UNIVERSAL
LIBRARY

OU_184095

UNIVERSAL
LIBRARY

OUP—901—26-3-70—5,000

OSMANIA UNIVERSITY LIBRARY

Call No. S491.25 B57S Accession No. S2140 P.G.

Author भट्टोजीदीक्षित

Title सिद्धान्तकौमुदी. उत्तरार्द्धम्

This book should be returned on or before the date last marked below.

1945

॥ श्रीः ॥

काशी-संस्कृत-ग्रन्थमाला

१२६

(व्याकरणविभागे (१७) सप्तदशं पुष्पम्)

रूपलेखनप्रकार-पङ्क्तिलेखनंप्रकारसहिता

सिद्धान्तकौमुदी-बालमनोरमा

सुबोधिनीसहितस्वरवैदिकी-भैरवीयुतलिङ्गानु-
शासनगणपाठसूत्रवार्तिकधातुसूच्यादि-
परिशिष्टविभूषिता ।

(उत्तरार्द्धम्)

प्रकाशकः

जयकृष्णदास-हरिदास गुप्तः-

चौखम्बा संस्कृत सीरिज आफिस

बनारस सिटी ।

पूर्वार्द्ध ८) उत्तरार्द्ध ८) संपूर्ण १६)

॥ श्रीः ॥

काशी-संस्कृत-ग्रन्थमाला

१३६

(व्याकरणविभागे (१७) सप्तदशं पुष्पम्)

म. म. श्रीभट्टोजिदीक्षितविरचिता

वैयाकरणसिद्धान्तकौमुदी

श्रीवासुदेवदीक्षितकृत-

'बालमनोरमा' व्याख्यासहिता

व्याकरणाचार्य-सदाशिवशास्त्रिभिः

सम्पादिता ।

[तृतीयो भागः]

Post Graduate Library
College of Arts & Commerce, O. U.

प्रकाशकः

जयकृष्णदास-हरिदास गुप्तः-

चौखम्बा संस्कृत सीरिज़ आफिस,

विद्याविलास प्रेस, बनारस सिटी ।

द्वितीयं संस्करणम्] मूल्य ३) [सन् १९४९

[सर्वेऽधिकाराः प्रकाशकाधीनाः]

भ्वाद्यादिचुराद्यन्तर्गतप्रकरणानुक्रमणिका

क्रमाङ्काः			पृष्ठानि
१	भ्वादिप्रकरणम्	... ...	३
२	अदादिप्रकरणम्	....	१६९
३	जुहोत्यादिप्रकरणम्	... .	२०७
४	दिवादिप्रकरणम्	....	२१८
५	स्वादिप्रकरणम्	... ...	२६३
६	तुदादिप्रकरणम्	... ...	२३९
७	रुधादिप्रकरणम्	... .	२५०
८	तनादिप्रकरणम्	... ...	२५४
९	क्र्यादिप्रकरणम्	... ...	२५८
१०	चुरादिप्रकरणम्	... .	२६४

प्राप्तिस्थानम्—

चौखम्बा-संस्कृत-पुस्तकालय,

बनारस सिटी

Post Graduate Library
College of Arts & Commerce, O. U.

बालमनोरमाव्याख्योपेता
वैयाकरणसिद्धान्तकौमुदी ।
[उत्तरार्द्धम्]

श्रौत्राहंन्तीचणैर्गुणयैर्महर्षिभिरहर्दिवम् ।
तोष्टूयमानोऽप्यगुणो विभुर्विजयतेतराम् ॥ १ ॥

अस्तु नमः पाणिनये भूयो मुनये तथास्तु वररुचये ।
किञ्चास्तु पतञ्जलये भात्रे विश्वेश्वराय गुरवे च ॥ १ ॥
व्याख्याता बहुभिः प्रौढैरेषा सिद्धान्तकौमुदी ।
वासुदेवस्तु तद्व्याख्यां वष्टि बालमनोरमाम् ॥ २ ॥

ॐ 'मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि च शास्त्राणि प्रथन्ते, वीरपुरुषाणि भवन्त्यायुष्मत्पुरुषाणि चाध्येतारश्च मङ्गलयुक्ताः स्यु'रिति भाष्यप्रमाणकं ग्रन्थमध्ये विघ्नविघातादिप्रयोजनाय कृतं मङ्गलं शिष्यशिक्षायै ग्रन्थतो निबध्नाति—श्रौत्रेति । वेदाध्येता श्रोत्रियः । 'श्रोत्रियंश्छन्दोऽधीते' इति वेदपर्यायाच्छन्दश्शब्दात् द्वितीयान्तादधीत इत्यर्थे घन्प्रत्ययः । प्रकृतेः श्रोत्रादेशश्च निपातितः । श्रोत्रियस्य भावः श्रौत्रम् । 'श्रोत्रियस्य यलोपश्चे'त्यणि इकारादुत्तरस्य यकाराऽकारसङ्घातस्य लोपे इकारस्य 'यस्येति चे'ति लोपः । अर्हति आर्यैः प्रशस्यमानेषु वेदविहितकर्मसु योग्यो भवतीत्यर्हन् । 'अर्हः प्रशंसाया'मिति शतृप्रत्ययः । अर्हतो भावः आर्हन्तो । 'अर्हतो नुम् चे'ति प्यञि आदिवृद्धौ प्रकृतेर्नुमागमे वित्त्वान्ङीषि 'हलस्तद्धितस्ये'ति यकारलोपे 'यस्येति चे'त्यकारलोपः । स्त्रीत्वं लोकात् । श्रौत्रं च आर्हन्ती च श्रौत्रार्हन्त्यौ । ताभ्यां वित्ताः श्रौत्रार्हन्तीचणाः । तैरिति विग्रहः । 'तेन वित्तश्चुञ्चुप्चणपा'विति चणप् । वेदाध्येतृत्वेन वेदविहितकर्मयोग्यतया च प्रसिद्धैरिति यावत् । गुणैरिति ।

पूर्वार्द्धे कथितास्तुर्यपञ्चमाध्यायवर्तिनः ।
प्रत्यया अथ कथ्यन्ते तृतीयाध्यायगोचराः ॥ २ ॥

नित्याऽनित्यवस्तुविवेकः, इहाऽमुत्रार्थफलभोगविरागः, शमदमादिसम्पत्तिः, मुमुक्षुत्वमित्यादिप्रशस्तगुणसम्पन्नेरित्यर्थः । 'रूपादाहतप्रशंसयो'रिति सूत्रे 'अन्येभ्योऽपि दृश्यते' इति वार्तिकेन यप् प्रत्ययः, तद्राज्ये 'गुण्या ब्राह्मणा' इत्युदाहरणात् । महर्षिभिरिति । महान्तश्च ते ऋषयश्चेति कर्मधारयः । 'आन्महत' इत्यात्वम् । अतितपस्विभिरित्यर्थः । अहर्दिवमिति । अहश्च दिवा चेति वीप्सायां 'अचतुरे'त्यादिना द्वन्द्वो निपातितः । अहन्यहनीत्यर्थः ।

तोष्टूय्यमानोऽपीति । 'ष्टुञ् स्तुतौ' सकर्मकः । गुणवत्त्वेनाऽभिधानं स्तुतिः । अभिधानक्रियानिरूपितं कर्मत्वमादाय 'देवान् स्तौती'त्यादौ द्वितीया । न तु गुणाभिधानमेव स्तुतिः, तथा सति गुणस्य धात्वर्थोपसङ्गृहीतत्वेनाऽकर्मकत्वापत्तेः । 'धात्वादेः षः सः' इति षकारस्य सकारे ष्टुत्वनिवृत्तौ, 'धातोरेकाच' इति भृशार्थे यङि, 'अकृत्सार्वधातुकयो'रिति दीर्घे, 'सन्यङो'रिति द्वित्वे, 'शर्पूर्वाः खय' इति सकारस्याभ्यासगतस्य लोपे, 'गुणो यङ्लुको'रित्यभ्यासोकारस्य गुणे, ततः परस्य सस्य 'आदेशप्रत्यययो'रिति षत्वे, ष्टुत्वेन तकारस्य टकारे, 'तोष्टूयेति' यङन्तात् 'सनाद्यन्ता' इति धातुसंज्ञकात् कर्मणि लटि लटश्शानचि 'आने मु'गिति मुगागमे, 'सार्वधातुके य'गिति यकि, यङोऽकारस्य 'अतो लोप' इति लोपे, 'तोष्टूय्यमान' इति रूपम् । भृशं स्तूयमानोऽपीत्यर्थः । अचिन्त्यजगद्रचनाद्यनन्तगुणसम्पन्नतया भृशं सङ्कीर्त्यमानोऽपीति यावत् । अगुण इति । निर्गुण इत्यर्थः । 'साक्षी चेता केवलो निर्गुणश्चे'त्यादिश्रुतेरिति भावः । निर्गुणस्य गुणवत्त्वेन कथनात्मिका स्तुतिर्विरुद्धेत्यापातप्रतिपन्नं विरोधमपिशब्दो द्योतयति । गुणानां व्यावहारिकसत्यत्वेऽपि पारमार्थिकत्वाऽभावान्न विरोध इत्युत्तरमीमांसायां स्पष्टम् । विभुरिति । सर्वव्यापकः परमेश्वर इत्यर्थः । विजयतेतरामिति । जि जये, अकर्मकः । उत्कर्षेण वर्तनं जयः । 'विपराभ्यां जे'रित्यात्मनेपदम् । 'तिङश्चे'त्यतिशायने तरप् । 'किमेत्तिङव्ययघे'ति तरबन्तात् स्वार्थे आम्प्रत्ययः । 'तद्धितश्चासर्वविभक्ति'रित्यत्र तसिलादिषु परिगणनादामन्तमव्ययम् । सर्वोत्कर्षेण वर्तत इत्यर्थः । न च विजयते इति समुदायस्याऽतिङन्तत्वात् कथं ततस्तरबिति वाच्यम् । वि इति हि भिन्नं पदम् , तिङन्तोत्तरपदसमासस्य छन्दोमात्रविषयत्वात् । ततश्च जयत इत्यस्मादेव तरप् । न च जयते इत्यस्य 'विपराभ्यां जे'रिति कृतात्मनेपदस्य विशब्दसापेक्षत्वादसामर्थ्यं शङ्क्यम् । वीत्युपसर्गस्य द्योतकत्वेन पृथगर्थविहीनतया तत्सापेक्षत्वाभावात् तिङन्तस्य प्रधानतया तस्य विशब्दापेक्षत्वेऽपि बाधकाऽभावाच्चेत्यलम् । वृत्तकथनपूर्वकं वर्तिष्यमाणनिरूपणं प्रतिजानीते—पूर्वार्द्ध इति । तुर्यश्चतुर्थः । 'चतुरश्छयतावाद्यक्षरलोपश्चे'ति चतुरशब्दाद्यत्प्रत्ययः, प्रकृतेश्चकाराऽकारसङ्घातलोपश्च । पूर्वार्धे चतुर्थपञ्चमाध्यायवर्तिनः प्रत्ययाः कथिता इत्यन्वयः । 'स्पृशोऽनुदके क्विन्'इत्यादि-

अथ भ्वादिप्रकरणम् ।

तत्रादौ दश लकाराः प्रदर्श्यन्ते—लट् । लिट् । लुट् । लृट् । लेट् । लोट् । लङ् । लिङ् । लुङ् । लृङ् । एषु पञ्चमो लकारश्छन्दोमात्रगोचरः । २१५१ वर्तमाने लट् ३।२।१२३॥ वर्तमानक्रियावृत्तेर्धातोर्लट् स्यात् । अटाविटौ । २१५२ लः कर्मणि च भावे चाऽकर्मकेभ्यः ३।४ ६९॥ लकाराः सकर्मकेभ्यः कर्मणि कर्तरि च स्युरकर्मकेभ्यो भावे कर्तरि च । २१५३ लस्य ३।४।७७॥ अधिकारोऽ-

---

तार्तीयीककतिपयप्रत्ययोपन्यासस्तु प्रासङ्गिक इति भावः । अथेति । चतुर्थपञ्चमाध्यायवर्तिप्रत्ययनिरूपणानन्तरं तृतीयाध्यायगोचराः प्रत्यया: कथ्यन्त इत्यन्वयः । तृतीयाध्यायस्य गोचराः प्रतिपाद्यतया विषयाः । तृतीयाध्यायविहिता इति यावत् । कृत्सु 'णचः स्त्रियाम्'इत्यादितद्धितव्युत्पादनं तु प्रासङ्गिकमिति भावः । तत्रेति । निर्धारणसप्तम्यन्तात्रच् । तेषु तृतीयाध्यायवर्तिप्रत्ययेष्वित्यर्थः । दर्शेति । अनुबन्धभेदाच्चकारभेद इति भावः । पञ्चम इति । लेडित्यर्थः । छन्दोमात्रेति । लिङर्थे लेडित्यत्र 'छन्दसि लुङ्लङ्लिटः' इति पूर्वसूत्रात् छन्दसीत्यनुवृत्तेरिति भावः। एतेन लेडू पाणि इह कुतो न प्रदर्श्यन्त इति शङ्का निरस्ता । वर्तमाने लट । धातोरिति सूत्रमातृतीयाध्यायसमाप्तेरधिकृतम् । 'वर्तमाने' इति तत्रान्वेति । वर्तमानेऽर्थे विद्यमानाद्धातोः लडिति लभ्यते । फलितमाह—वर्तमानक्रियावृत्तेरिति । धात्वर्थक्रियाया वर्तमानत्वं तु वर्तमानकालवृत्तित्वम् । कालस्य तु वर्तमानत्वम् अतीतानागतभिन्नकालत्वम् । 'भूतभविष्यतोः प्रतिद्वन्द्वी वर्तमानः काल' इति भाष्यम् । वर्तमानत्वं च न प्रत्ययार्थभूतकत्रादिविशेषणम् । अतीतपाकादिक्रिये कर्तरि वर्तमाने, पचति इत्यापत्तेः, किंतु धात्वर्थविशेषणमेव वर्तमानत्वम् । लट् तु तस्य द्योतक एव । अटाविटाविति । न च अकार उच्चारणार्थ एवास्त्विति वाच्यम् । लिडादिवैलक्षण्याय तस्यावश्यकत्वात् । तथाच तस्य इत्संज्ञां विना निवृत्त्युपायाभावात् इत्संज्ञैवादर्तव्येति भावः । लः कर्मणि च । वाक्यद्वयमिदं सूत्रम् । 'लः कर्मणि चे'ति प्रथमं वाक्यम् । ल इति प्रथमाबहुवचनान्तम् । चकारेण 'कर्तरि कृ'दित्यतः कर्तरीत्यनुकृष्यते । धातोरित्यधिकृतम् । लकाराः कर्मणि कर्तरि च धातोः स्युरिति लभ्यते । सकर्मकधातुविषयमेवेदम् । अकर्मकेषु कर्मण्यित्यस्य बाधितत्वात् । तदाह—लकाराः सकर्मकेभ्यो (धातुभ्यः) कर्मणि कर्तरि च स्युरिति । एवं च सकर्मकेभ्यो भावे लकारा न भवन्ति । सकर्मकेभ्योऽपि भावलकारप्रवृत्तौ तु 'देवदत्तेन घटं क्रियत' इत्यादौ भावलकारेण कर्मणोऽनभिहितत्वात् द्वितीया स्यादिति भावः । 'भावे चाकर्मकेभ्य' इति द्वितीयं वाक्यम् । अत्रापि चकारेण कर्तैवानुकृष्यते । न तु कर्म, असम्भवात् । तदाह-अकर्मकेभ्यो भावे कर्तरि चेति । अत्राऽकर्मकग्रहणेन अविवक्षितकर्माका अपि गृह्यन्ते । तेन 'देवदत्तेन भुज्यते' इत्यत्र सतोऽप्योदनरूपकर्मणः अविवक्षायां भावे लकारोऽस्त्येवेत्यन्यत्र विस्तरः । लस्य । 'धातो' रित्यधिकृतम् ।

वम् । २१५४ तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ् ३।४।७८॥ एतेऽष्टादश लादेशाः स्युः । २१५५ लः परस्मैपदम् १।४।९९॥ लादेशाः परस्मैपदसंज्ञाः स्युः । २१५६ तङानावात्मनेपदम् १।४।१००॥ तङ् प्रत्याहारः । (तादिनवकं) शानच्कानचौ चैतत्संज्ञानि स्युः । पूर्वसंज्ञापवादः । २१५७ अनुदात्तङित आत्मनेपदम् १।३।१२॥ अनुदात्तेत उपदेशे यो ङित् तदन्ताच्च धातोर्लस्य स्थाने आत्मनेपदं स्यात् । २१५८ स्वरि-

---

अकारो न विवक्षितः । तेन लिङादीनामपि सङ्ग्रहः । 'चूडाल' इत्यादौ च नातिप्रसङ्गः। तिप्तस् । तिप्, तस्, झि, सिप्, थस्, थ, मिप्, वस्, मस्, त, आताम्, झ, थास्, आथाम्, ध्वम्, इट्, वहि, महिङ् । एषां समाहारश्चन्द्वात् प्रथमैकवचनम्। लस्येति स्थानषष्ठ्यन्तमधिकृतम् । तेन आदेश इति लभ्यते । फलितमाह—एत इति । तसादौ कृत्वाऽभावः आर्षः । तिबादौ पकारानुबन्धयोजनं तु द्वेष्टीत्यादौ सार्वधातुकमपिदिति ङित्त्वनिवृत्त्यर्थम् । तदुदाहरणेषु स्पष्टीभविष्यति । लः परः । ल इति स्थानषष्ठी । आदेशः इत्यध्याहार्यम् । तदाह—लादेश इति । तङानौ । तङ् च आनश्चेति द्वन्द्वः । प्रत्याहार इति । 'त आतामिति तशब्दमारभ्य महिङिति ङकारेणेति शेषः । तदाह—तादिनवकमिति । इह पूर्वसूत्रात्त इत्यनुवर्तते । ततश्च आनग्रहणेन शानच्कानचावेव गृह्येते । न तु 'ताच्छील्यवयोवचनशक्तिषु चानशि'ति विहितश्चानशपि । तस्य लादेशत्वाऽभावात् । तेन परस्मैपदिभ्योऽपि चानश् सिध्यति, निघ्नाना इत्यादौ । तदाहशानच्कानचौ चेति । एतत्संज्ञानीति । आत्मनेपदसंज्ञकानीत्यर्थः । पूर्वसंज्ञेति । परस्मैपदसंज्ञापवाद इत्यर्थः । एवं च तिबादिनवके परस्मैपदसंज्ञा पर्यवस्यति । अथ कस्माद्धातोः परस्मैपदम्, कस्मादात्मनेपदमित्याकाङ्क्षायामाह—अनुदात्तङितः । अनुदात्तश्च ङच अनुदात्तङौ । तावितौ यस्य सः अनुदात्तङित् । तस्मात् अनुदात्तङितः । द्वन्द्वान्ते श्रूयमाण इच्छब्दः प्रत्येकं सम्बध्यते । अनुदात्तेतः ङितश्चेति लभ्यते । 'उपदेशेऽजनुनासिक इ'दित्यस्मात् मण्डूकप्लुत्या उपदेश इत्यनुवृत्तम्, ङित इत्यनेन सम्बध्यते । नत्वनुदात्तेत इत्यनेन । उपदेशादन्यत्र अनुदात्तस्येत्संज्ञाया अप्रसक्तत्वेनाऽभ्यभिचारात् । 'भूवादयो धातव' इत्यस्मान्मण्डूकप्लुत्या धातव इत्यनुवृत्तं पञ्चम्या विपरिणतम् अनुदात्तेता ङिता च विशेष्यते । तत्रानुदात्तेदंशे तदन्तविधेः प्रयोजनाऽभावात् ङिदंशे तदन्तविधिः । तदाह—अनुदात्तेत इत्यादिना । लस्य स्थान इति । आत्मनेपदमङ्गबालभ्यमिदम् । तिङां लादेशत्वनियमात् । उपदेशे किम् । चुकुटिषति । अत्र 'गाङ्कुटादिभ्य' इति सन आतिदेशिकमेव ङित्त्वम्, नत्वौपदेशिकम् । धातोः किम् ? अदुद्रुवत् । अत्र 'णिश्रीति' चङन्तादात्मनेपदम् । ङिदंशे तदन्तविध्यभावे तु बोभूयत इत्यादौ 'सनाद्यन्ता' इति धातुसंज्ञकात् चङन्तादात्मनेपदं न स्यात् । ङित इत्येवोक्तौ चङो ङित्त्वेऽपि तदन्तस्य धातोर्ङित्त्वाभावादात्मनेपदं न स्यात् । स्वरि-

तञ्जितः कर्त्रभिप्राये क्रियाफले १।३।७२॥ स्वरितेतो ञितश्च धातोरात्मनेपदं स्यात्कर्तृगामिनि क्रियाफले । २१५६ शेषात्कर्तरि परस्मैपदम् १।३।७८॥ आत्मनेपदनिमित्तहीनाद्धातोः कर्तरि परस्मैपदं स्यात् । २१६० तिङस्त्रीणि त्रीणि प्रथममध्यमोत्तमाः १।४।१०१॥ तिङ उभयोः पदयोस्त्रयस्त्रिकाः क्रमादेतत्संज्ञाः स्युः । २१६१ तान्येकवचनद्विवचनबहुवचनान्येकशः १।४।१०२॥ लब्धप्रथमादिसंज्ञानि तिङस्त्रीणि त्रीणि वचनानि प्रत्येकमेकवचनादिसंज्ञानि स्युः । २१६२ युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः १।४।१०५॥

तञ्जितः । स्वरितश्च ञ् च स्वरितञौ, तौ इतौ यस्य तस्मादिति बहुव्रीहिः । इच्छब्दः प्रत्येकं सम्बध्यते । तदाह–स्वरितेतो ञितश्चेति । धातोरित्यनन्तरं 'लस्य स्थाने' इति शेषः । कर्तारमभिप्रैति गच्छतीति कर्त्रभिप्रायम् । कर्मण्यण् । तदाह—कर्तृगामिनीति । एवं च 'होता याज्यया यजती'त्यादौ यागफलस्य स्वर्गस्य यजमानगामित्वेन होतृगामित्वाऽभावात् नात्मनेपदम् । तथा 'चैत्तेन यज्ञदत्तभृतो देवदत्तः पचती'त्यत्रापि पाकफलस्य भोजनस्य पक्तृगामित्वाऽभावान्नात्मनेपदम् । दक्षिणादिलाभस्तु न फलम् । लौकिको वैदिको वा यदुद्देशेन क्रियाप्रवृत्तिः तस्यैवात्र क्रियाफलशब्देन विवक्षितत्वात् । कर्तृगामिफलकक्रियावृत्तेर्धातोरित्यर्थः । आत्मनेपदं तु भावस्वर्थफलस्य कर्तृगामित्वं द्योतयतीत्यलम् । शेषात्कर्तरि । 'अनुदात्तङित' इति 'स्वरितञित' इति चोक्तादात्मनेपदविषयादन्यः शेषः । तदाह–आत्मनेपदनिमित्तहीनादिति । अनेन भूधातोः कर्तरि लस्य परस्मैपदं सिद्धम् । तत्र तिबादिनवके युगपत् पर्यायेण एकद्वित्रादिकतिपयरूपेण वा प्राप्ते 'युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः' 'अस्मद्युत्तमः' 'शेषे प्रथमः' इति व्यवस्थां वक्ष्यन् प्रथमादिसंज्ञां तावदाह—तिङस्त्रीणि त्रीणि । तिङः षट् त्रिकाः, संज्ञास्तु तिस्र इति यथासङ्ख्याऽसम्भवादेकैकस्य त्रिकस्य तिसृषु संज्ञासु प्राप्तास्वाह–तिङ उभयोः पदयोरिति । 'लः परस्मैपद' मित्यतः परस्मैपदमिति, 'तङानावात्मनेपद'मित्यत आत्मनेपदमिति चानुवृत्तं षष्ठ्यन्ततया विपरिणम्यते । ततश्च परस्मैपदात्मनेपदयोरुभयोरपि प्रत्येकं त्रयस्त्रिकाः सन्तीति यथासङ्ख्यं प्रथमादिसंज्ञाः प्रवर्तन्त इति भावः । प्रथमादिषु पुरुषसंज्ञा तु प्राचीनाचार्यशास्त्रसिद्धेति बोध्यम् । अथ प्रथमादिपुरुषेषु एकैकस्मिन् पुरुषे प्रत्येकत्रिकात्मके युगपत् पर्यायेण वा एकैकप्रत्यये प्राप्ते 'द्व्येकयोर्द्विवचनैकवचने' 'बहुषु बहुवचन'मिति व्यवस्थार्थमेकवचनादिसंज्ञामाह—तान्येक । तच्छब्देन पूर्वसूत्रोपात्तानि प्रथममध्यमोत्तमाख्यानि तिङस्त्रीणि त्रीणि परामृश्यन्ते । तदाह—लब्धप्रथमादिसंज्ञानीति । 'एकश' इत्यस्य विवरणं प्रत्येकमिति । 'सङ्ख्यैकवचनाच्च वीप्सायां' मिति शसिति भावः । युष्मदि । उपोच्चारितं पदमुपपदम् । युष्मदि समीपोच्चारिते सतीत्यर्थः । समानमेकमधिकरणं वाच्यं यस्येति विग्रहः । सामानाधिकरण्यं च युष्मदस्तिङः स्थानीभूतङकारेण विवक्षितम् । 'लः पर-

तिङ्वाच्यकारकवाचिनि युष्मदि अप्रयुज्यमाने प्रयुज्यमानेऽपि मध्यमः स्यात् । २१६३ प्रहासे च मन्योपपदे मन्यतेरुत्तम एकवच्च १।४।१०६॥ मन्यधातुरुपपदं यस्य धातोस्तस्मिन्प्रकृतिभूते सति मध्यमः स्यात्परिहासे गम्यमाने । मन्यतेस्तूत्तमः स्यात्स चैकार्थस्य वाचकः स्यात् । २१६४ अस्मद्युत्तमः १।४।१०७॥ तथाभूतेऽस्मद्युत्तमः स्यात् । २१६५ शेषे प्रथमः १।४।१०८॥ मध्यमोत्तमयोरविषये प्रथमः स्यात् । १ भू सत्तायाम् । कर्तृविवक्षायां भू ति इति स्थि-

---

स्मैपद'मित्यतस्तदनुवृत्तेः । तथा च फलितमाह—तिङ्वाच्यकारकवाचिनि युष्मदीति । स्थानं-प्रसङ्गोऽस्यास्तीति स्थानी तस्मिन् , प्रसङ्गे सतीत्यर्थः । प्रसङ्गश्च तदर्थावगतौ सत्यां वक्त्रा अप्रयोग एव भवति । तथा च स्थानिनीत्यनेन उपपदभूते युष्मदि प्रयोगं विना स्वार्थं बोधयति सतीत्यर्थः पर्यवस्यति । तदाह—अप्रयुज्यमान इति । स्थानिनीत्यनुक्तौ युष्मद्युपपदे प्रयुज्यमान एव मध्यमः स्यात् ; ततश्च राम पाहीत्यादौ अव्याप्तिः स्यात् । अपिना लक्ष्यमाह—प्रयुज्यमानेऽपीति । 'युष्मद्युपपदे स्थानिनी'त्येवोक्तौ राम त्वं पाहीत्यादौ युष्मत्प्रयोगे मध्यमो न स्यात् । अतोऽपिग्रहणमिति भावः । अत्वं त्वं सम्पद्यत इत्यत्र तु न मध्यमपुरुषः, तत्र युष्मच्छब्दस्य गौणत्वात् । 'भवानागच्छती'त्यादौ भवच्छब्दयोगे तु न मध्यमपुरुषः, युष्मच्छब्दस्य सम्बोध्यैकविषयत्वात् भवच्छब्दस्य तु स्वभावेन सम्बोध्याऽसम्बोध्यसाधारणत्वादित्यलम् । प्रहासे च । वाक्यद्वयमिदं सूत्रम् । 'प्रहासे च मन्योपपदे' इति प्रथमं वाक्यम् । मध्यम इत्यनुवर्तते । मनधातुः श्यन्विकरणः उपपदं यस्येति बहुव्रीहिः । मन्यपदश्रवणबलाद्धातावेति विशेष्यं लभ्यते । तदाह—मन्यधातुरित्यादिना । तस्मिन् प्रकृतिभूते सतीति । तस्माद्धातोर्लस्य स्थाने इत्यर्थः । मध्यम इत्यादिति । 'अस्मद्युपपदे इति शेषः । अस्मद्युत्तम इत्युत्तरसूत्रात्तदनुवृत्तेः । एवं च उत्तमपुरुषापवादोऽयं मध्यमविधिः । 'मन्यतेरुत्तम एकवचे'ति द्वितीयं वाक्यम् । तदुद्याचष्टे—मन्यतेस्तूत्तमः स्यादिति । 'युष्मद्युपपदे' इति शेषः पूर्वसूत्रात्तदनुवृत्तः । स चेति । सः मन्यतेरुत्तमपुरुषः, द्वित्वबहुत्वयोरपि एकवचनं लभत इत्यर्थः । मध्यमोत्तमयोर्व्यत्यासार्थमिदम् । एतत्सर्वमनुपदमेवोदाहरणे स्पष्टीभविष्यति । अस्मद्युत्तमः । तथाभूत इति । तिङ्वाच्यकारकवाचिनि प्रयुज्यमाने अप्रयुज्यमाने चेत्यर्थः । शेषे । उक्तान्मध्यमोत्तमविषयादन्यः शेषः । तदाह—मध्यमोत्तमयोरविषय इति । 'त्वमहं च पचाव' इत्यत्र तु परत्वादुत्तमपुरुष एव । न तु मध्यमः । 'देवदत्तस्त्वं च पचथ' इत्यत्रापि न प्रथमपुरुषः । युष्मदस्सत्त्वेन शेषत्वाऽभावादित्यलम् । भू सत्तायामिति । वर्तत इति शेषः । भ्वादिगणे प्रथमो धातुरयम् । तत्र भू इत्येव गणे पाठः । अर्थनिर्देशस्त्वाधुनिक इति वक्ष्यते । यद्यपि सत्ता जातिः, न क्रिया, तथापि आत्मधारणं सत्तेत्युच्यते । स्वरूपेणाऽवस्थानमिति यावत् । कर्तृविवक्षायामिति । वर्तमानसत्तावृत्तेर्भूधातोः कर्तरि लटि

ते । २१६६ तिङ्शित्सार्वधातुकम् ३।४।११३॥ तिङः शितश्च धात्वधिकारोक्ता एतत्संज्ञाः स्युः । २१६७ कर्तरि शप् ३।१।६८॥ कर्त्रर्थे सार्वधातुके परे धातोः शप् स्यात् । शपाविती । २१६८ सार्वधातुकार्द्धधातुकयोः ७।३।८४॥ अनयोः परयोरिगन्तस्याङ्गस्य गुणः स्यात् । अवादेशः । भवति । भवतः । २१६९ झोऽन्तः ७।१।३॥ प्रत्ययावयवस्य झस्यान्तादेशः स्यात् । 'अतो गुणे' (सू १९१) । भवन्ति । भवसि । भवथः । भवथ । २१७० अतो दीर्घो यञि

आत्मनेपदनिमित्तहीनतया परस्मैपदे तिबादिनवके तत्रापि युष्मदस्मत्सामानाधिकरण्याऽभावात् प्रथमपुरुषत्रिके तत्रापि कर्तुरेकत्वविवक्षायां तिपि सति, भू ति इति स्थिते प्रक्रिया वक्ष्यत इत्यर्थः । तत्र सार्वधातुककार्यं वक्तुम् सार्वधातुकसंज्ञामाह—तिङ्शित् । धातोरित्यधिकृतम् । तदाह—धात्वधिकारोक्ता इति । तेन हरीनित्यत्र शसः सार्वधातुकत्वं न । अन्यथा 'तिङ्शित्सार्वधातुक'मिति शसः सार्वधातुकत्वात् सार्वधातुकमपिदिति ङित्त्वे 'घेर्ङिती'ति गुणः स्यात् । कर्तरि शप् । 'सार्वधातुके यगि'त्यस्मात् सार्वधातुक इत्यनुवर्तते । 'धातोरेकाचो हलादेरि'त्यस्माद्धातोरिति । तदाह—कर्त्रर्थे इत्यादिना । तिङि परे धातोर्विहितानां प्रत्ययानां शबादीनां विकरणसंज्ञा प्राचीनाचार्यसिद्धा । शपाविताविति । शकारपकारौ 'लशकतद्धिते' इति 'हलन्त्य'मिति चेत्संज्ञकावित्यर्थः । ततश्च शपि शकारपकारयोः लोपे अकारमात्रं शिष्यत इत्यर्थः भू अ ति इति स्थिते—सार्वधातुकार्द्धे 'इको गुणवृद्धी' इति परिभाषया इक इत्युपस्थितेन अङ्गस्येत्यधिकृतं विशेष्यते । तदन्तविधिः । 'मिदेर्गुण' इत्यस्मात् गुण इत्यनुवर्तते । तदाह—अनयोरित्यादिना । तथा च ऊकारस्य गुणः ओकारः । अवादेश इति । ओकारस्येति शेषः । तथा च परिनिष्ठितं रूपमाह—भवतीति । भवत इति । कर्तृद्वित्वविवक्षायां भूधातोर्लटः तसादेशे शपि गुणे अवादेशे सकारस्य रुत्वविसर्गाविति भावः । कर्तृबहुत्वविवक्षायां भूधातोर्लटः झि इत्यादेशे शपि गुणे अवादेशे च कृतेझोऽन्तः । झः अन्तः इति छेदः । झ इति षष्ठ्यन्तम् । आदेशे तकारात् अकार उच्चारणार्थः । 'आयनेयी' इति सूत्रात् प्रत्ययग्रहणमनुवर्तते । न त्वादिग्रहणमपि, अस्वरित्त्वात् । अनुवृत्तं च प्रत्ययग्रहणमवयवषष्ठ्यन्तमाश्रीयते । तदाह—प्रत्ययावयवस्येति । झस्य । झकारस्येत्यर्थः । अन्तादेशः स्यादिति । अन्त् इत्ययमादेशः स्यादित्यर्थः । प्रत्ययावयवस्येति किम् । उज्झिता । अत्र धात्ववयवस्य झकारस्य न भवति । आदिग्रहणानुवृत्तौ तु 'शयान्ते'इति न सिध्यति । अन्तादेशात्प्रागेवान्तरङ्गत्वाल्लेटोऽडाटाविट्याटि कृते झकारस्य प्रत्ययादित्वाऽभावात् इति भाष्ये स्पष्टम् । एवं च भव झि इत्यत्र झकारस्य अन्त् इत्यादेशे, भव अन्ति इति स्थिते, 'अतो गुण' इति द्वयोरकारयोः सवर्णदीर्घापवादे पररूपे कृते, भवन्तीति रूपमित्यर्थः । अन्तादेशे प्रथमाऽऽकारोच्चारणं तु लुग्विकरणे द्विषन्तीत्यादौ अकारश्रवणार्थम् । भवसीति । मध्यमपुरुषैकवचने

७।३।१०१॥ अदन्तस्याङ्गस्य दीर्घः स्याद्यञादौ सार्वधातुके परे। भवामि। भवावः। भवामः। स भवति। तौ भवतः। ते भवन्ति। त्वं भवसि। युवां भवथः। यूयं भवथ। अहं भवामि। आवां भवावः। वयं भवामः। एहि, 'मन्ये ओदनं भोक्ष्यसे' इति, भुक्तः सोऽतिथिभिः। एतमेत वा 'मन्ये ओदनं भोक्ष्येथे। भोक्ष्यध्वे' इत्यादि। भोक्ष्ये। भोक्ष्यावहे। भोक्ष्यामहे। मन्यसे। मन्येथे। मन्यध्वे इत्यादिरर्थः। 'युष्मद्युपपदे' (सू २१६२) इत्याद्यनुवर्तते। तेनेह न। एतु भवान्मन्यते ओदनं भोक्ष्ये इति भुक्तः सोऽतिथिभिः। प्रहासे किम्। यथार्थकथने मा भूत्। एहि मन्यसे ओदनं भोक्ष्य इति, भुक्तः सोऽतिथिभिः। २१७१ परोक्षे लिट् ३।२। ११५॥ भूतानद्यतनपरोक्षार्थवृत्तेर्धातोर्लिट् स्यात्। लस्य तिबादयः। २१७२ लिट्

सिपि शपि गुणे अवादेशे रूपम्। भवथ इति। मध्यमपुरुषद्विवचने थसि शपि गुणे अवादेशे रुत्वविसर्गौ च रूपम्। 'न विभक्तौ तुस्माः' इति सस्य नेत्वम्। भवथेति। मध्यमपुरुषबहुवचने थादेशे शपि गुणे अवादेशे रूपम्। उत्तमपुरुषैकवचनेऽपि शपि गुणे अवादेशे भव मि इति स्थिते—अतो दीर्घो यञि। 'अङ्गस्येत्यधिकृतम् अतो विशेष्यते। तदन्तविधिः। 'तुरुस्तुशम्यम' इत्यतः सार्वधातुक इत्यनुवृत्तं यञा विशेष्यते। तदादिविधिः। तदाह—अदन्तस्येत्यादिना। भवामीति। न च भूधातोर्विहितत्वादेशं प्रति भूधातुरेवाऽङ्गम्, न तु भवेति विकरणान्तमिति वाच्यम्। 'यस्मात्प्रत्ययविधिस्तदादि प्रत्ययेऽङ्ग' मित्यत्र तदादिग्रहणेन विकरणविशिष्टस्यापि अङ्गत्वात्। भवावः भवाम इति। लस्य वसि मसि च शपि गुणे अवादेशे अतो दीर्घे रुत्वे विसर्गे च रूपे। 'न विभक्ता'वित्ति सस्य नेत्वम्। अथ प्रथममध्यमोत्तमपुरुषव्यवस्थामुक्त्वा स्मारयितुमाह—स भवतीत्यादि। 'अथ प्रहासे चे'त्ति सूत्रस्योदाहरति—एहीति। सर्वेषु भुक्तवत्सु भोक्तुमागतं जामातरं प्रति परिहासाय प्रवृत्तमिदं वाक्यम्। भो जामातः,एहि आगच्छ, ओदनं भोक्ष्ये इति त्वं मन्यसे, नैतद्युक्तमित्यर्थः। कुत इत्यत आह-भुक्तः सोऽतिथिभिरिति। स ओदनः अतिथिभिर्भक्षित इत्यर्थः। अत्र भुजेरुत्तमपुरुषे प्राप्ते मध्यमः पुरुषः। मन्यतेस्तु मध्यमपुरुषे प्राप्ते उत्तमः पुरुषः। एतम् एत वेति। हे जामातरौ आगच्छतम् 'ओदनं भोक्ष्यावहे' इति मन्येथे इति भो जामातरः 'ओदनं भोक्ष्यामहे' इति मन्यध्वे इति चार्थः। अत्रोभयत्रापि भुजेरुत्तमे प्राप्ते मध्यमः। मन्यतेस्तु मध्यमे प्राप्ते उत्तमः। द्वित्वबहुत्वयोरेकवचनं च। इत्यादीति। एहि एतम् एत वा मन्ये जलं पास्यसि पास्यथः पास्यथ इत्यादिसङ्ग्रहः। मन्ये इत्युत्तमपुरुषैकवचनान्तं व्याचष्टे—मन्यस इत्यादिना। अनुवर्तत इति। 'प्रहासे चेति सूत्रे' इति शेषः। एतु भवानिति। युष्मदुपपदवतोः पर्यायत्वाऽभावस्यानुपदमेवोक्तत्वादिति भावः। इति लट् प्रक्रिया। परोक्षे लिट्। 'अनद्यतने लङ्लिट्यस्मादनद्यतन इत्यनुवर्तते। 'भूते' इत्यधिकृतम्। परोक्षत्वं चात्यर्थविशेषणम्। तदाह—भूतानद्यतनेत्यादिना। अतीतरात्रेरन्त्ययामेन आगामिरात्रेराद्ययामेन

च ३।४।११५॥ लिङादेशस्तिङार्द्धधातुकसंज्ञ एव स्यान्न तु सार्वधातुकसंज्ञः। तेन शबादयो न। २७३ परस्मैपदानां णलतुसुस्थलथुसणल्वमाः ३।४।८२॥ लिटस्तिबादीनां नवानां णलादयो नव स्युः। भू अ इति स्थिते २७४ भुवो वुग्लुङ्लिटोः ६।४।८८॥ भुवो वुगागमः स्यात् लुङ्लिटोरचि। नित्यत्वात् वुग्गुणवृद्धी बाधते। २७५ एकाचो द्वे प्रथमस्य ६।१।१॥ २७६ अजादेर्द्वितीयस्य ६।१।२॥ इत्यधिकृत्य। २७७ लिटि धातोरनभ्यास-

---

सहितो दिवसः अद्यतन इति लुङ्सूत्रभाष्ये कैयटे स्थितम्। परोक्षत्वं तु वर्षशतवृत्तत्वमित्येके। वर्षसहस्रवृत्तत्वमित्यपरे। द्व्यहवृत्तत्वं त्र्यहवृत्तत्वं चेत्यन्ये। कुशकटाद्यन्तरितत्वमितीतरे। एते पक्षा भाष्ये स्थिताः। तत्र प्रयाक्तुरिन्द्रियाऽगोचरत्वं परोक्षत्वमित्येव सर्वसम्मतमित्यलम्। लस्य तिबादय इति। तिबादिनवकमित्यर्थः। लिट् च। लिडिति लुप्तस्थानषष्ठ्यन्तम्। 'तिङ्शित्सार्वधातुक'मित्यस्मात् तिङित्यनुवर्तते। 'आर्धधातुकं शेष' इत्यस्मादार्द्धधातुकमिति। तदाह—लिङादेशस्तिङिति॥ एकसञ्ज्ञाधिकारबहिर्भूतत्वात् सार्वधातुकसञ्ज्ञाया अपि समावेशे प्राप्ते आह—आर्धधातुकसञ्ज्ञ एवेति। 'लङश्शाकटायनस्यैवे'ति सूत्रादेवकारानुवृत्तेरिति भावः। तेनेति। सार्वधातुकत्वाऽभावेन तन्निमित्ताः शप्श्यनादयो न भवन्तीत्यर्थः। परस्मैपदानाम्। लिटस्तझयोरित्यस्मात् लिट इत्यनुवृत्तिमभिप्रत्याह—लिटस्तिबादीनामिति। णलादय इति। णल्, अतुस्, उस्, थल्, अथुस्, अ, णल्, व, म, इत्येते नव यथासङ्ख्यं स्युरित्यर्थः। तत्र तिपो णल्, सर्वादेशः। न च णकारलकारयोः 'चुटू' इति 'हल्न्त्य'मिति च इत्संज्ञकत्वाल्लोपे कथमनेकाल्त्वमिति वाच्यम्। सर्वादेशत्वात्प्राक् णलः प्रत्ययत्वाऽभावेन 'चुटू' इत्यस्याप्रवृत्तेः। णित्त्वं तु जुहावेत्यादौ वृद्ध्यर्थम्। लित्त्वं तु लित्स्वरार्थम्। ननु मध्यमपुरुषबहुवचनस्थस्य विधीयमानः अकारः 'अलोऽन्त्यस्ये'त्यन्त्यस्य स्यात्। अकारस्य अकारविधिस्तु यथासङ्ख्यापादनार्थं इति चेत्, सत्यम्। द्वयोरकारयोः पररूपेण अ इति सूत्रे निर्देशादनेकाल्त्वात् सर्वादेशत्वमिति भाष्ये स्पष्टम्। न च अतुसादीनामादेशत्वात् पूर्वविभक्तित्वाऽभावेन 'न विभक्ता'विति निषेधाऽभावात् सकारस्येत्वं दुर्वारमिति वाच्यम्। सकारादुपरि सकारान्तरस्य संयोगान्तलोपेन लुप्ततया श्रूयमाणसकारस्योपदेशेऽन्त्यत्वाभावादित्यलम्। भूव् वुक्। अचीति। 'अचि श्नुधात्वि'त्यतस्तदनुवृत्तेरिति भावः। अचीति किम्। अभूत्। ननु णलि परत्वात् वुकं बाधित्वा 'अचो ञ्णिती'ति वृद्धिः स्यात्। बभूविथेत्यत्र तु 'सार्वधातुकार्द्धधातुकयो'रिति गुणः स्यादित्यत आह—नित्यत्वादिति। कृतयोरपि गुणवृद्धयोरेकदेशविकृतन्यायात् वुक् प्रवर्तते। अकृतयोरपि प्रवर्तते। ततश्च 'कृताऽकृतप्रसङ्गे यो विधिः स नित्य' इति न्यायेन वुक् नित्यः सन्, गुणवृद्धी बाधत इत्यर्थः। वुकि ककार इत्, उकार उच्चारणार्थः। किरवादन्तावयवः। भूव् अ

स्य ६।१।८॥ लिटि परेऽनभ्यासधात्ववयवस्यैकाचः प्रथमस्य द्वे स्त आदिभूता-

इति स्थिते। एकाचः। अजादेः। इत्यधिकृत्येति। षष्ठाध्यायारम्भे द्वे इमे सूत्रे। ते च न विधायके, अतिप्रसङ्गात्। किन्तु 'ष्यङः सम्प्रसारण'मित्यतः प्राक् अनुवर्तेते एवेति भावः। लिटि धातोः। 'एकाचो द्वे प्रथमस्ये'त्यधिकृतम्। धातोरित्यवयवषष्ठी। तदाह—धात्ववयवस्येति। 'एकाच' इति 'प्रथमस्ये'ति च धात्ववयवस्य विशेषणम्। एकः अच् यस्येति तद्गुणसंविज्ञानो बहुव्रीहिः। तथा च लिटि परे अभ्यासभिन्नस्यैकाऽवयवस्य प्रथमस्य धात्ववयवस्य द्वे उच्चारणे स्त इत्यर्थः। एकाच इत्यत्र कर्मधारयाश्रणे तु पपाचेत्यादि न सिध्येदिति भाष्ये स्पष्टम्। 'अजादेर्द्वितीयस्ये' त्यप्यधिकृतम्। तत्राऽऽचासावादिश्च अजादिः तस्मादिति कर्मधारयात् पञ्चमी। तदाह—आदिभूतादचः परस्य तु द्वितीयस्येति। एकाच इति शेषः। अजादिर्धात्ववयवस्य एकाच्श्चेत् द्वित्वम्, तर्हि द्वितीयस्यैवैकाचो द्वित्वम्। नतु प्रथमस्येति यावत्। अत्र द्वे इत्यनन्तरमुच्चारणे इत्यध्याहृत्यैकाचः प्रथमस्येति कृत्योगलक्षणषष्ठीं चाश्रित्य द्विः प्रयोग एवात्र विधीयते। न स्थानषष्ठीमाश्रित्यादेशपक्ष इति प्रकृतसूत्रभाष्ये प्रपञ्चितम्। 'आदेशप्रत्यययो'रिति सूत्रभाष्येऽपि द्विःप्रयोगपक्ष एवोक्तः। तदिह विस्तरभयान्न लिखितम्। पपाच इत्यादौ प्रथमत्वमेकाच्कत्वं च व्यपदेशिवत्त्वेन बोध्यम्। अजादेरिति बहुव्रीह्याश्रयणे तु, इन्द्रमात्मन इच्छति इन्द्रीयति, इन्द्रीयितुमिच्छति इन्दिद्रीयिषतीत्यादौ 'न न्द्राः संयोगादय' इति दकारस्य द्वित्वनिषेधश्च स्यात्। तत्राऽजादेरित्यनुवृत्तेः। धातोरिति किम्। तदभावे हि लिटि परे यः प्रथमः एकाच् तस्य द्वे इत्यर्थः स्यात्। एवं सति पपाचेत्यादावेव स्यात्। न तु जजागारेत्यादाविति भाष्ये स्पष्टम्। न च पपाचेत्यादौ 'लिटि धातो'रिति द्वित्वे कृते 'लक्ष्ये लक्षणस्येति' न्यायेन पुनर्द्वित्वस्याऽप्रसक्तेरनभ्यासग्रहणं व्यर्थमिति वाच्यम्। यङन्तात् 'सन्यङो'रिति यङ्निमित्तकद्वित्वविशिष्टत्वात् सनि सन्निमित्तकद्वित्वनिवृत्तये सन्नन्तात् 'सन्यङो'रिति कृतद्वित्वाण्णिचि लुकि चलि कृते 'चङी'ति द्वित्वनिवृत्तये चाऽनभ्यासग्रहणस्यावश्यकत्वात्। भाष्ये तु 'कृष्णो नोनाव वृषभो यदीद'मित्यादौ नुधातोर्यङन्तात् 'सन्यङो'रिति कृतद्वित्वात् नोनूय इत्यस्मात् लिटि 'कास्प्रत्ययादाममन्त्रे लिटी'ति मन्त्रप्रयुदासादामभावे 'यस्य हल' इति यकारलोपे अतो लोपे तिपो णलि वृद्धावावादेशे नोनावेत्यत्र 'लिटि धातो'रिति द्वित्वनिवृत्तये अनभ्यासग्रहणमित्युक्त्वा, 'अनभ्यासग्रहणमनर्थकम् छन्दसि वा वचना'दित्युक्तम्। यङन्तात् सनि, सन्नन्ताण्णिचि चङि च प्रयोगो लोके नास्त्येवेति तदाशय इति शब्देन्दुशेखरे स्पष्टम्। प्रकृते च भूव् अ इत्यत्र चत्वार एवाचः। तत्र भू इति प्रथमः, ऊव् इति द्वितीयः, ऊ इति व्यपदेशिवद्भावेन तृतीय एकाच्, भूव् इति समुदायस्तु चतुर्थः। तत्र समुदाये द्विरुच्यमाने सर्वे अवयवाः द्विरुच्यन्त इति भूव् इति समुदायस्यैव द्विर्वचनमिति भाष्ये स्पष्टम्। त-

दचः परस्य तु द्वितीयस्य । भूव् भूव् अ, इति स्थिते । २१७८ पूर्वोऽभ्यासः ६।१।४। अत्र ये द्वे विहिते तयोः पूर्वोऽभ्याससंज्ञः स्यात् । २१७९ हलादिः शेषः ७।४।६०॥ अभ्यासस्यादिर्हल् शिष्यतेऽन्ये हलो लुप्यन्ते । इति वलोपः । २१८० ह्रस्वः ७।४।५९॥ अभ्यासस्याऽचो ह्रस्वः स्यात् । २१८१ भवतेरः ७।४।७३॥ भवतेरभ्यासोकारस्य अः स्याल्लिटि । २१८२ अभ्यासे चर्च ८। ४।५४॥ अभ्यासे झलां चरः स्युर्जशश्च । झशां जशः । खयां चरः । तत्रापि प्रकृ-

दाह—भूव् भूव् अ इति स्थित इति । अत्र भूव् इत्यस्य एकाचः धात्ववयवत्वं प्रथमत्वं च व्यपदेशिवत्त्वाद्बोध्यम् । पूर्वः । अत्रेति । 'एकाचो द्वे प्रथमस्ये'ति षाष्ठद्वित्वप्रकरण इत्यर्थः । तेन 'सर्वस्य द्वे' इत्यादिविहितस्य द्वित्वस्य न संग्रहः । कस्य पूर्व इत्याकाङ्क्षायां द्वे इत्यनुवृत्तं षष्ठ्या विपरिणतं सबध्यते । तदाह—ये द्वे विहिते तयोरिति । हलादिः शेषः । 'अत्र लोपोऽभ्यासस्ये'त्यस्मादभ्यासस्येत्यनुवर्तते । शिष्यत इति शेषः, कर्मणि घञ् । शिषधातुरितरनिवृत्तिपूर्वकावस्थितौ । तदाह—अभ्यासस्येत्यादिना । इति वलोप इति । भूव् भूव् अ इत्यत्र अभ्यासवकारस्य लोप इत्यर्थः । भू भूव् अ इति स्थिते—ह्रस्वः । 'अत्र लोपोऽभ्यासस्ये'त्यतः अभ्यासस्येत्यनुवर्तते । ह्रस्वश्रवणादचश्चेति परिभाषया अच इत्युपस्थितम् । तदाह—अभ्यासस्याऽच इति । भु भूव् अ इति स्थितम् । यद्यपि 'भवतेर' इति वक्ष्यमाणोऽकारविधिनैव सिद्धमिदम् । तथापि झलादेस्त्यादार्थमावश्यकमिदम् अत्रैव न्याय्यत्वादुपन्यस्तम् । भवतेरः । भवतेः अः इति छेदः । भवतेरिति श्तिपा निर्देशः । भूधातोरित्यर्थः । 'इक्श्तिपौ धातुनिर्देशे' इत्युक्तेः । 'अत्र लोपोऽभ्यासस्ये'त्यस्मादभ्यासस्ये'नुवर्तते । 'थयो लिटि' इत्यस्मात् लिटीति । भूधातोरभ्यासस्य भवअकारः 'अलोऽन्यस्ये'त्यन्त्यस्योकारस्य भवति । तदाह—अभ्यासोकारस्येति । 'नानर्थकेऽलोन्त्यविधि'रिति तु नेह प्रवर्तते । 'अनभ्यासविकारे' इत्युक्तेः । भ भूव् अ इति स्थिते—अभ्यासे चच । 'झलां जश झशी'त्यस्मात् झलामित्यनुवर्तते । चकारेण जश् समुच्चीयते । तदाह—अभ्यासे झलामित्यादिना । झलश्चतुर्विंशतिः । तत्र शषसाः ऊष्माणः । तेषामभ्यासे लोपो वक्ष्यते 'शर्पूर्वाः खय' इति । हकारस्य स्वभ्यासे कुहोश्चुरिति चुत्व वक्ष्यते । एव च झलो झयो विंशतिरिहाऽभ्यासगताः स्थानिनो लभ्यन्ते । तेषां मध्ये कस्य चरः, कस्य जशः इत्याकाङ्क्षायामाह—झशां जश इति । वर्गाणां तृतीयचतुर्था झशः । तेषां जशः जबगडदा इत्यर्थः । यद्यद्वर्ग्याः स्थानिनः तत्तद्वर्ग्या आदेशा इत्यपि बोध्यम् । खयां चर इति । वर्गाणां प्रथमद्वितीयाः खयः, तेषां चरः चटतकपा इत्यर्थः । अत्रापि यद्यद्वर्ग्याः स्थानिनः तत्तद्वर्ग्या आदेशा इत्यपि बोध्यम् । तत्रापीति । तेष्वपि वर्गेषु प्रकृत्या स्वभावेन जशामेव सतां प्रकृत्या स्वभावेन जश एव सन्तः तत्तद्वर्ग्या आदेशाः स्युः । एवं प्रकृत्या स्वभावेन चरामेव सतां प्रकृत्या स्वभावेन चर एव सन्तः तत्तद्वर्ग्या आदे-

तिजशां प्रकृतिजशः, प्रकृतिचरां प्रकृतिचर इति विवेकः, आन्तरतम्यात्। २१८३ असिद्धवदत्राभात् ६।४।२२॥ इत ऊर्ध्वमापादपरिसमाप्तेराभीयम्। समानाश्रये तस्मिन्कर्तव्ये तदसिद्धं स्यात्। इति वुकोऽसिद्धत्वादुवङि प्राप्ते। वुग्युटावुवङ्यणोः

शाः स्युरित्यर्थः। पर्जन्यवल्लक्षणप्रवृत्तेरिति भावः। कुत इयं व्यवस्थेत्यत आह—आन्तरतम्यादिति। झशां जशां च घोषसंवारनादप्रयत्नसाम्यम्। खयां चरां च श्वासाऽघोषविवारप्रयत्नसाम्यम्। तत्तद्वर्ग्याणां तत्तद्वर्ग्या आदेशा इत्यत्र तु स्थानसाम्यं नियामकं बोध्यम्। तथा च प्रकृतेः अभ्यासभकारस्य बकारे सति बभूव अ इति स्थिते 'अचिश्नुधातु'त्युवङादेशमाशङ्क्याह—असिद्धवदत्रा। षष्ठस्य चतुर्थपादे इदं सूत्रम्। 'श्नाभ्यस्तयोः' इति सूत्रात् पूर्वं पठितम्। आ भादित्यभिविधावाङ्। अभ्यस्येत्यधिकारमभिव्याप्येत्यर्थः। आधिकारश्च आ पादपरिसमाप्तेरिति सिद्धान्तः। तथा च आपादपरिसमाप्तेरिति लभ्यते। 'विहितं कार्य'मिति शेषः। किमारभ्येत्याकाङ्क्षायामुपस्थितत्वादस्मादेव सूत्रादूर्ध्वमिति लभ्यते। ततश्च 'श्नाभ्यस्तयोः' इत्यारभ्यापादसमाप्तेः विहितं यदाभीयं कार्यं तदसिद्धवद्भवति। प्रवृत्तमप्यप्रवृत्तवत् भवतीत्यर्थः। अधिकारसूत्रमिदमुत्तरत्र 'श्नाभ्यस्तयोः' इत्यादौ प्रतिसूत्रमुपतिष्ठते। तथा च यद्यत्सूत्रे इदमनुवर्तते तत्तदाभीयकार्ये कर्तव्येऽसिद्धमिति लभ्यते। एवंच 'श्नाभ्यस्तयोः' इत्यादि तत्तदाभीयं कार्यं 'श्नाभ्यस्तयोः' इत्याद्याभीये कार्ये कर्तव्ये असिद्धवदित्यर्थः पर्यवस्यति। अत्रेत्यनेन निमित्तसमभ्यन्तेन त्वसिद्धीभवतः कार्यस्य यन्निमित्तं तन्निमित्तके कार्ये कर्तव्ये सतीत्यर्थलाभात् 'समानाश्रये कार्ये कर्तव्ये सतीति' लभ्यते। एतत्सर्वं भाष्ये स्थितम्। तदाह—इत ऊर्ध्वमित्यादिना। तस्मिन्निति। आभीये कर्तव्ये सतीत्यर्थः। एधि शाधीत्युदाहरणम्। अत्र 'ध्वसोरेद्धावभ्यासलोपश्चे'त्यस्तेरेत्वस्य 'शाहा'विति शास्तेः शाभावस्य चाभीयत्वेनाऽसिद्धत्वात् 'हुझल्भ्यो हेर्धि'रिति हेर्धित्वमाभीयं प्रवर्तते। तथा 'जक्षित्यादयः षड्दाभा'दित्यत्राप्युदाहरणम्। हनधातोर्लङ्युत्तमत्वात् लोपमध्यमपुरुषैकवचने सिपो हिभावे 'अनुदात्तोपदेशे'ति नलोपस्याभीयस्यासिद्धत्वादतो हेरित्याभीयो लुङ् न भवति। समानाश्रय इति किम्। पपुष इत्यत्र पाधातोर्लिटः क्वसौ 'लिटि धातो'रिति द्वित्वे अभ्यासहृस्वे क्वस्वन्तात् द्वितीयाबहुवचने शसि 'वसोः सम्प्रसारण' माभीयम् 'आतो लोप इटि चे'त्याल्लोपे आभीये कर्तव्ये असिद्धं च भवति। आल्लोपः क्वसौ, संप्रसारणं तु शसीति भिन्नाश्रयत्वात्। आभीये कर्तव्ये इति किम्। 'अभाजि' राग इत्यत्र भञ्जेश्चिणि, रञ्जेर्घञि च कृते, 'भञ्जेश्च चिणि', 'घञि च भावकरणयो'रिति नलोपस्याभीयस्यानाभीयायामुपधावृद्धौ कर्तव्यायां नासिद्धत्वम्। आभादित्यभिविधिः किम्। आधिकारात् प्रागित्युक्ते भूयानित्यत्र 'बहोर्लोपो भू च बहो'रिति बहोर्भूभावस्य ओगुणे कर्तव्ये असिद्धत्वं न स्यात्, अस्येति सूत्रादूर्ध्वमाधित्वादित्यलम्। इति वुकोऽसिद्धत्वादिति। वुक आभीयस्य अचि श्नुधातुभ्रुवामित्युवङि आभीये कर्तव्ये असिद्धतया ऊकारस्योवङि लघूपधगुणे बभोवेति प्राप्ते

सिद्धौ वक्तव्यौ। बभूव। बभूवतुः बभूवुः। २१८४ आर्धधातुकस्येड्वलादेः ७।२।३५॥ वलादेरार्धधातुकस्येडागमः स्यात्। बभूविथ। बभूवथुः। बभूव। बभूव। बभूविव। बभूविम। २१८५ अनद्यतने लुट् ३।३।१५॥ भविष्यत्यनद्यतनेऽर्थे धातोर्लुट् स्यात्। २१८६ स्यतासी लृलुटोः ३।१।३३॥ लृ इति लृङ्लृटोर्ग्रहणम्। धातोः स्यतासी एतौ प्रत्ययौ स्तो लृलुटोः परतः। शबाद्यपवादः। २१८७ आर्धधातुकं शेषः ३।४।११४॥ तिङ्शित्सार्वधातुकमित्युक्तेभ्योऽन्यो धातोरिति विहितः प्रत्यय एतत्संज्ञः स्यात्। इट्। २१८८ लुटः प्रथमस्य डारौरसः २।४।८५॥ डा, रौ, रस् एते

सतीत्यर्थः। वुग्विधिस्तु गुणवृद्धिबाधकत्वेन चरितार्थ इति भावः। वुग्युटावुवङ्यणोरिति। यथासङ्ख्यमन्वयः। बभूवेति। णलो णित्त्वं तु जगादेरित्यादौ वृद्ध्यर्थम्। बभूवतुरिति। तसः अतुसादेशे वुगादि पूर्ववत्। सकारस्य रुत्वविसर्गौ। बभूवुरिति। झेरुसादेशे वुगादि पूर्ववत्। सिपः थलि बभूव थ इति स्थिते—आर्धधातुकस्येट्। 'नेड्वशिकृती'त्यस्मादनुवृत्त्यैव सिद्धेरिहेड्ग्रहणं न कार्यमिति 'नेड्वशी'ति। सूत्रभाष्ये प्रत्याख्यातम्। आर्धधातुकस्येति किम्। जुगुप्सते। अत्र 'गुप्तिज्किद्भ्यः' इति सनो धातोरित्यधिकृत्य विहितत्वाऽभावादार्धधातुकत्वम्। बभूविथेति। सिपः थलि तस्य इडागमे वुगादि पूर्ववत्। बभूवथुरिति। थसः अथुसादेशे वुगादि पूर्ववत्। सकारस्य रुत्वविसर्गौ। बभूवेति। मध्यमपुरुषद्विवचनस्य अकारः सर्वादेश इति 'परस्मैपदानां णलतुसि'त्यत्रोक्तम्। वुगादि पूर्ववत्। बभूवेति। मिपो णलि वुगादि पूर्ववत्। बभूविवेति। वसो वादेशे वलादित्वादिडागमे वुगादि पूर्ववत्। नचात्र 'अचि क्नु'तीडागमनिषेधः शङ्क्यः 'कृसृभृवृस्तुद्रुस्रुश्रुवो लिटी'ति क्त्वादिनियमादिट्सिद्धेः। बभूविमेति। मसो मादेशे इडागमे वुगादि पूर्ववत्। इति लिट्प्रक्रिया। अनद्यतने लुट्। धातोरित्यधिकृतम्। 'भविष्यति गम्यादयः' इत्यतः भविष्यतीत्यनुवर्तते भविष्यत्यनद्यतन इति धात्वर्थेऽन्वेति। तदाह—भविष्यत्यनद्यतन इति। अनद्यतनग्रहणं तु परोक्षे लिडित्यत्र व्याख्यातः। डटावितौ। लुडस्तिबादयः। भू ति इति स्थिते 'कर्तरि शबि'ति शपि प्राप्ते—स्यतासी लृ। स्यश्च तासिश्चेति द्वन्द्वात् पथमाद्विवचनम्। तासेरिकार उच्चारणार्थः। लृ लुट् अनयोर्द्वन्द्वात् सप्तमीद्विवचनम्। ग्रहणमिति। लृस्वरूपस्योभयत्राऽविशिष्टत्वादिति भावः। धातोरित्यधिकृतम्। तदाह—धातोरिति। भू तास् ति इति स्थिते—आर्धधातुकं शेषः। 'तिङ्शित्सार्वधातुक'मिति पूर्वसूत्रोपात्ततिङ्शिदन्यः शेषः तदाह—तिङ्शिद्भ्योऽन्य इति। विहित इति। धातोरित्यधिकृतं विहितविशेषणमाश्रीयत इति भावः। एवं च 'जुगुप्सते' इत्यादौ 'गुप्तिज्किद्भ्य' इत्यादिविहितसनादीनां धातोरित्युच्चार्यं विहितत्वाऽभावेन आर्धधातुकत्वाभावाद्विडागमो न भवति। एतत्संज्ञः स्यादिति। आर्धधातुकसंज्ञक इत्यर्थः। इडिति। तास्प्रत्ययस्योक्तसूत्रेणार्धधातुकत्वात् स्वतो वलादित्वा

क्रमात्स्युः । डित्त्वसामर्थ्यादभस्यापि टेर्लोपः । २१८६ पुगन्तलघूपधस्य च ७।३।८६॥ पुगन्तस्य लघूपधस्य चाऽङ्गस्येको गुणः स्यात्सार्वधातुकार्धधातुकयोः । येन नाव्यवधानं तेन व्यवहितेऽपि, वचनप्रामाण्यात् । तेन भिनत्तीत्यादावनेकव्यवहितस्येको न गुणः । भवित् आ । अत्रेको गुणे प्राप्ते । २१९० दीधीवेवीटाम्

'आर्द्धधातुकस्येड्वलादे'रितीडागम इत्यर्थः । भू इ तास् इति स्थिते, उकारस्य गुणे अवादेशे च भविता स् इति स्थिते—लुटः प्रथमस्य । डा रौ रस् एषां द्वन्द्वात् प्रथमाबहुवचनम् । लुट इति स्थानषष्ठी, लुडादेशस्य प्रथमपुरुषस्येत्यर्थः । क्रमादिति । यथासङ्ख्यलभ्यम् । ननु परस्मैपदस्य त्रयः प्रथमाः, आत्मनेपदस्य च त्रयः प्रथमाः इति स्थानिनः षट्, आदेशास्तु त्रय इति कथं यथासङ्ख्यमिति चेन्न । डाश्च रौश्च रस् चेति कृतद्वन्द्वानां डारौरसश्च डारौरसश्चेति एकशेषमाश्रित्य भाष्ये समाहितत्वात् । डाभावस्य चादेशत्वात् प्राक् प्रत्ययत्वाऽभावेन 'चुटु' इत्यस्याऽप्रवृत्त्या सर्वादेशत्वम् । सति च तस्मिन् प्रत्ययत्वाच्चुट् इति टकारस्येत्सञ्ज्ञेति भाष्ये स्पष्टम् । एवं च भू तास् आ इति स्थिते प्रक्रियां दर्शयति—डित्त्वसामर्थ्यादिति । डाभावस्य कप्रत्ययावधिषु स्वादिष्वनन्तभूतत्वेन तस्मिन् परे भस्वाऽभावेऽपि डित्त्वसामर्थ्यात् टेरिति टिलोप इत्यर्थः । तथाच भवित् आ इति स्थिते—पुगन्तलघू । 'मिदेर्गुणः' इत्यतः गुण इत्यनुवर्तते । अङ्गस्येत्यधिकृतमवयवषष्ठ्यन्तमाश्रीयते । पुगन्तलघूपधस्येति तद्विशेषणम् । पुक् अन्तो यस्य तत् पुगन्तम् । लघ्वी उपधा यस्य तल्लघूपधम् । पुगन्तं च लघूपधं चेति समाहारद्वन्द्वात् षष्ठी । 'इको गुणवृद्धी' इति परिभाषया इक इत्युपस्थितं स्थानषष्ठ्यन्तमाश्रीयते । तदाह—पुगन्तस्येत्यादिना । अङ्गस्येक इति । अङ्गावयवस्येत्यर्थः । द्वेष्टि द्वेष्टा इत्याद्युदाहरणम् । नन्वत्राऽङ्गावयवस्येकः तदुपरितनहलाऽव्यवधानात् सार्वधातुकपरत्वाभावात् कथमिह इको गुण इत्यत आह—येन नेति । येन स्थान्युत्तरवर्णेन परनिमित्तस्य, नाऽव्यवधानं व्यवधानमवर्जनीयमिति यावत्, तेन वर्णेन व्यवहितेऽपि परनिमित्तं कार्यं भवतीत्यर्थः । कुत इत्यत आह—वचनप्रामाण्यादिति । तथाविधवर्णाव्यवधानेऽपि कार्यप्रवृत्तौ वचनारम्भस्यैव प्रमाणत्वादित्यर्थः । लघूपधस्य हीको गुणो विधीयते । उपधात्वं चाऽन्त्यादलः पूर्वस्यैव भवति । ततश्चेक उपर्यन्त्यस्य वर्णस्याऽभावे इक उपधात्वाभावाल्लघूपधस्याङ्गस्य गुणविधानं निर्विषयमेव स्यात् । अतस्तद्व्यवधानं सोढव्यमिति भावः । ननु व्यवहितस्यापीको गुणप्रवृत्त्यभ्युपगमे भिनत्ति छिनत्तीत्यादौ इकारस्यापि गुणः स्यादित्यत आह—तेनेति । अवर्जनीयव्यवधानस्यैवाश्रयणेनेत्यर्थः । उपधात्वस्येकमेव वर्णमुपरितनमादाय सम्भवादनेकवर्णव्यवधानं नादर्तव्यमिति भावः । गुणे प्राप्त इति । भवित् आ इति स्थिते डाभावसम्पन्नस्याऽऽकारस्य स्थानिवत्त्वेन सार्वधातुकतया तस्मिन् परे भवित् इत्यङ्गावयवस्योपधाभूतस्येकारस्य गुणे प्राप्ते सतीत्यर्थः । न च भूधातोर्विहितं सार्वधातुकं

१।१।६॥ दीधीवेव्योरिटश्च गुणवृद्धी न स्तः। भविता। २।६१ तासस्त्योर्लोपः ७।४।५०॥ तासेरस्तेश्च लोपः स्यात्सादौ प्रत्यये परे। २।६२ रि च ७।४।५१॥ रादौ प्रत्यये प्राग्वत्। भवितारौ। भवितारः। भवितासि। भवितास्थः। भवितास्थ। भवितास्मि। भवितास्वः। भवितास्मः। २।६३ लुट् शेषे च ३।३।१३॥ भविष्यदर्थाद्धातोर्लुट् स्यात्क्रियार्थायां क्रियायामसत्यां सत्यां च। स्यः इट्। भविष्यति। भवि-

---

प्रति भूधातुरेवाऽङ्गम्, न तु भवित् इति विकरणविशिष्टमिति वाच्यम्। अङ्गसञ्ज्ञासूत्रे तदादिग्रहणेन विकरणविशिष्टस्याऽप्यङ्गत्वात्। दीधिवेवी। 'दीधीङ् दीप्तिदेवनयोः' 'वेवीङ् वेतिना तुल्ये'। दीधीश्च वेवीश्च इट् चेति द्वन्द्वात् षष्ठी। 'इको गुणवृद्धी' इत्यतो गुणवृद्धी इति, 'न धातुलोप' इत्यतो नेति चानुवर्तते। तदाह—दीधीवेव्योरित्यादिना। अथ प्रथमपुरुषद्विवचने तसि परे शबपवादे तासि इडागमे ऊकारस्य गुणे अवादेशे तसो रौभावे भवितास् रो इति स्थिते' 'रि चे'ति सकारस्य लोपं वक्ष्यन् तत्रानुवृत्तिप्रतिपत्तये तत्पूर्वसूत्रमुपन्यस्यति—तासस्त्योः। तास् चाऽस्तिश्च चेति द्वन्द्वात् षष्ठी। 'सः स्यार्धधातुके' इत्यतोऽनुवृत्तेन सीति सप्तम्यन्तेनाऽधिकृताक्षिप्तप्रत्ययस्य विशेषणात् तदादिविधिः। तदाह—तासेरित्यादि। अस्तेरिति ङितपा निर्देशः। अस्धातोरित्यर्थः। अलोऽन्त्यस्येत्यन्त्यस्य लोपः। भवितासीत्यनुपदमेवोदाहरणं वक्ष्यते। रि च। 'तासस्त्योर्लोप' इति सूत्रं अस्तिवर्जमनुवर्तते। रीत्यनेनाऽक्षिप्तप्रत्ययस्य विशेषणात्तदादिविधिः। तदाह—रादाविति। प्राग्वदिति। तासेर्लोप इत्यर्थः। अस्तिस्तु नानुवर्तते। ततो रादिप्रत्ययस्याऽसम्भवात्। आर्धधातुके तस्य भूभावविधानात्। एवं च भवितास् रावित्यत्र सलोपे सति रूपमाह—भवितारावितिं। भवितार इति। झौ तासि इडागमे ऊकारस्य गुणे अवादेशे झेः रस् इत्यादेशे तासः सकारस्य लोपे रसः सकारस्य रुत्वविसर्गाविति भावः। भवितासोति। सिपि तासि इडागमे ऊकारस्य गुणे अवादेशे 'तासस्त्यो'रिति सकारस्य लोप इति भावः। भवितास्थ इति। थसि तासि इडागमे गुणे अवादेशे थसः सस्य रुत्वविसर्गाविति भावः। भवितास्थेति। बहुवचने थे तासि इटि गुणावादेशौ। भवितास्मीति। मिपि तासि इटि गुणावादेशौ। भवितास्व इति। वसि तासि इटि गुणे अवादेशे रुत्वविसर्गौ। एवं मसि भवितास्म इति रूपम्। इति लुट्प्रक्रिया। लृट् शेषे च। धातोरित्यधिकृतम्। 'भविष्यति गम्यादयः' इत्यतो भविष्यतीत्यनुवृत्तं धात्वर्थऽन्वेति। तदाह—भविष्यदर्थाद्धातोः लृट् स्यादिति। 'तुमुन्ण्वुलौ क्रियायां क्रियार्थायां'मिति पूर्वसूत्रे क्रियार्थायां क्रियायामित्यर्थनिर्देशः स्थितः। ततोऽन्यः शेषः। 'क्रियार्थायां क्रियायामसत्यां'मिति लभ्यते। चकारात् 'क्रियार्थायां क्रियायां सत्यां'मित्यपि लभ्यते। तदाह—क्रियार्थायां क्रियायामसत्यां सत्यां चेति। ननु लृट् इत्येव सूत्रमस्तु। शेषे चेति मास्तु। भविष्यदर्थाद्धातोः लृट् इत्येतावतैव क्रियार्थायां क्रियायामसत्यां सत्यां च लृटो लाभ इति चेत् मैवम्। 'शयिष्यत' इति

ष्यतः । भविष्यन्ति । भविष्यसि । भविष्यथः। भविष्यथ । भविष्यामि । भविष्यावः। भविष्यामः । २१९४ **लोट् च** ३।३।१६२॥ विध्यादिष्वर्थेषु धातोर्लोट् स्यात् । २१९५ **आशिषि लिङ्लोटौ** ३।३।१७३॥ २१९६ **परुः** ३।४।८६॥ लोट इकारस्य उः स्यात् । भवतु । २१९७ **तुह्योस्तातङ्ङाशिष्यन्यतरस्याम्** ७। १। ३५॥ आशिषि तुह्योस्तातङ्वा स्यात् । अनेकाल्त्वात्सर्वादेशः । यद्यपि 'ङिच्च' (सू ४३) इत्ययमपवादस्तथाप्यनन्यार्थङित्वेष्वनङादिषु चरितार्थ इति गुणवृद्धिप्रतिषेधसम्प्रसारणाद्यर्थतया सम्भवत्प्रयोजनकत्वे तातङिमन्यरं प्रवृत्तः परेण

स्थीयत' इत्यादौ भावकर्मणोः तुमुन्ण्वुल्ष्यां लृटो बाधाऽभावार्थत्वात् । नच वासरूपविधिना तस्सिद्धिः शङ्क्या । 'क्त्वयुट्तुमुन्खलर्थेषु वासरूपविधिर्नास्तीति' तन्निषेधादित्यास्तां तावत् । स्य इडिति । लृटस्तिपि 'स्यतासी लृलुटो'रिति स्यप्रत्ययः । तस्य वलाद्यार्धधातुकत्वात् इडागम इत्यर्थः । भविष्यतीति । स्यप्रत्ययस्य इटि ऊकारस्य गुणे अवादेशे प्रत्ययावयवत्वात् सकारस्य षत्वे भविष्यतीति रूपमित्यर्थः । तसादौ भविष्यत इत्याद्यप्येवं योज्यम् । भविष्यामीत्यादौ 'अतो दीर्घो यञी'ति दीर्घः । इति लृट्प्रक्रिया । लोट् च । 'विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु' इत्यनुवर्तते । तदाह—विध्यादिष्विति । विध्यादिशब्दा अनुपदमेव लिङ्विधौ व्याख्यास्यन्ते । आशिषि लिङ् । आशिष्यपीत्यर्थः । आशासनमाशीः इष्टप्राप्तीच्छा । लोटस्तिपि विशेषमाह—परुः । पः उः इति च्छेदः । परिति षष्ठ्यन्तम् । इवर्णस्येति लभ्यते । 'लोटो लङ्व'दित्यतो लोट इत्यनुवर्तते । तदाह—लोट इति । भवत्विति । तिपि शपि गुणे अवादेशे तिप इकारस्य उकारः । अथाऽऽशिषि लोटो विशेषमाह—तुह्योस्तातङ् । तुश्च हिश्च तुह्यौ, तयोरिति विग्रहः । तातङि ङकार इत् । अकार उच्चारणार्थः ॥ तादिस्यादेशः शिष्यते । ननु किमस्य अनेकाल्त्वात्सर्वादेशता, उत ङित्त्वादन्तादेशतेत्यत आह—अनेकाल्त्वात् सर्वादेश इति । ननु 'ङिच्चे'त्यस्य सर्वादेशापवादतया अनङादेरिव तातङोऽप्यन्त्यादेशत्वमेवोचितमित्याशङ्क्य ते—यद्यपि ङिच्चेत्ययमपवाद इति । परिहरति—तथापीति । परेण बाध्यत इति । तातङादेशे 'ङिच्चे'त्ययं विधिः 'अनेकाल्शित्सर्वस्ये'ति परेण बाध्यत इत्यर्थः । ननु 'परनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीय' इति परापेक्षया अपवादस्य प्रबलत्वात् ङिच्चेत्यन्तादेशत्वमेव तातङि युक्तमित्यत आह—तातङि मन्यरं प्रवृत्त इति । 'ङिच्चे'ति विधिरिति शेषः । तातङ्विषये ङिच्चेति विधिमंन्यरं प्रवृत्त इति हेतोः परेण सर्वादेशविधिना बाध्यत इत्यर्थः । कुतो मन्द्प्रवृत्तिकत्वमित्यत आह—अनन्यार्थेत्यादिना । अन्तादेशत्वादन्योऽर्थो यस्य ङित्त्वस्य न विद्यते तदनन्यार्थम् । तथाविधं ङित्त्वं येषां तेषु अनङादिषु ङिच्चेति विधिः चरितार्थः सकलप्रयोजनक इति कृत्वा मन्दं प्रवृत्त इत्यर्थः । तातङो ङित्त्वं तु अन्तादेशत्वापेक्षया अनन्यार्थं नेत्याह—सम्भवत्प्रयोजनकत्वे इति । सम्भवन्ति प्रयोजनानि अस्यानि

बाध्यते। इहोत्सर्गापवादयोरपि समबलत्वात्। भवतात्। २१६८ लोटो लङ्वत् ३।४।८५॥ लोटो लङ इव कार्यं स्यात्। तेन तामादयः सलोपश्च। तथाहि। २१६९ तस्थस्थमिपां तांतंतामः ३।४।१०१॥ ङितश्चतुर्णामेषां तामादयः क्रमात्स्युः ॥२२०० नित्यं ङितः ३।४।९९॥ सकारान्तस्य ङिदुत्तमस्य

यस्य सः सम्भवत्प्रयोजनः। तथाविधः ङकारः यस्य तथाविधे तातङीत्यर्थः। कथं सम्भवत्प्रयोजनकत्वमित्यत आह—गुणवृद्धिप्रतिषेधसम्प्रसारणाद्यर्थनयेति। द्विष्टादित्यादौ लघूपधादिगुणनिषेधः। स्तुतात् यजादित्यादा'वुतो वृद्धिर्लुकि हली'ति विहिताया वृद्धेर्निषेधः। 'वश कान्तौ' उष्टादित्यत्र 'ग्रहिज्यावयी'ति सम्प्रसारणम्। अदिना ब्रूनादित्यत्र 'ब्रुव ईडि-'तीटोऽभावस्य सङ्ग्रहः। ननु तातङ्विषये ङिच्चेति विधिर्मन्दं प्रवर्तताम्। अथापि 'परनित्यान्तरङ्गापवादानामुत्तरोत्तरं बली'य इति न्यायेन परस्यापि सर्वादेशविधेरपवादभूतेन ङिच्चेत्यनेन बाध एवोचित इत्यत आह—इहेति। इह तातङ्विषये अनेकालुशित्सर्वस्येति सामान्यशास्त्रस्य, ङिच्चेति विशेषशास्त्रस्य च समबलत्वात् सामान्यशास्त्रं विशेषशास्त्रेण न बाध्यत इत्यर्थः। अयं भावः—अपवादशास्त्रस्य परनित्यान्तरङ्गापेक्षया प्राबल्ये निरवकाशत्वमेव बीजम्। प्रकृते च ङिच्चेति विधिः अनङादिङित्त्वमन्तादेशत्वैकप्रयोजनकं प्रयोजनान्तरविरहेण निरवकाशत्वात् झटिति परिगृह्य कृतार्थतामनुभवन्, तातङो ङित्त्वं प्रयोजनान्तरमत्त्वेन सावकाशत्वादुपेक्षत इति। तदुक्तं भाष्ये—'ङित्त्वस्य सावकाशत्वाद्विप्रतिषेधात्तातङ् सर्वादेश' इति। अधिकात्तु विस्तरभिया विरम्यते। भवतादिति। आशिषि लोटस्तिपि शपि गुणे अवादेशे उकारे तोस्तातङ् सर्वादेशः। ङकार इत्। द्वितीयतकारादकार उच्चारणार्थः। लोटो लङ्वत्। लङ इव लङ्वत्। 'तत्र तस्येवे'ति षष्ठ्यन्ताद्वतिः। तदाह—लोटो लङ इवेति। ननु तर्हि 'लुङ्लङ्लुङ्क्ष्वडुदात्त' इत्यडागमोऽपि स्यादित्यत आह—तेनेति। लङ इति स्थानषष्ठ्यन्तात् वतिप्रत्ययाश्रयणेनेत्यर्थः। अडागमस्तु न लङो विधीयते। किन्तु लकि अङ्गस्येति भावः। केन तामादयः, केन वा सलोप इत्यत आह—तथा हीति। तामादयः सलोपश्च यथा ज्ञायन्ते तथा स्पष्टमुच्यन्त इत्यर्थः। तस्थस्थमिपाम्। तस् थस् थ मिप् एषां द्वन्द्वात् षष्ठीबहुवचनम्। ताम् तम् त अम् एषां द्वन्द्वात् प्रथमाबहुवचनम्। 'नित्यं ङित' इत्यस्मात् ङित इत्यनुवर्तते। तदाह—ङितश्चतुर्णामिति। ङितो लकारस्य आदेशभूतानामित्यर्थः। क्रमादिति। यथासङ्ख्यसूत्रलभ्यमिदम्। नित्यं ङितः। उत्तमपुरुष एवास्य सूत्रस्य प्रयोजनम्। प्रसङ्गादिहोपन्यस्तम्। 'स उत्तमस्ये'ति सूत्रमनुवर्तते। तत्र स इति षष्ठ्यन्तम्। तेन उत्तमो विशेष्यते। तदन्तविधिः। 'इतश्च लोप' इत्यतो लोप इत्यनुवर्तते। तदाह—सकारान्तस्य ङिदुत्तमस्येति। ङितो लकारस्य य आदेशः उत्तमपुरुषः तस्येत्यर्थः। 'वैतोऽन्यत्रे'त्यस्माद्वाग्रहणानुवृत्तिनिवृत्तये नित्यग्रहणम्।

नित्यं लोपः स्यात्। 'अलोऽन्त्यस्य' (सू ४२) इति सस्य लोपः। भवताम्। भवन्तु। २२०१ **सेर्ह्यपिच्च** ३।४।८७॥ लोटः सेर्हिः स्यात्सोऽपिच्च। २२०२ **अतो हेः** ६।४।१०५॥ अतः परस्य हेर्लुक्स्यात्। भव। भवतात्। भवतम्। भवत। २२०३ **मेर्निः** ३।४।८६॥ लोटो मेर्निः स्यात्। २२०४ **आडुत्तमस्य पिच्च** ३।४।९२॥ लोडुत्तमस्याडागमः स्यात्स पिच्च। हिन्योरुत्वं न। इकारोच्चारणसामर्थ्यात्। भवानि। भवाव। भवाम। २२०५ **अनद्यतने लङ्** ३।२।१११॥

अलोऽन्त्यस्येत्यन्त्यलोपः। भवतामिति। लोटस्तस्। तस्य तामादेशः। शप्। गुणाऽवादेशौ। न च तामादेशस्य सर्वादेशत्वात् प्राक् विभक्तित्वाभावा'द्न विभक्तौ तुस्मा'-इति निषेधाऽभावात् मकारस्येत्सञ्ज्ञा शङ्क्या। संयोगान्तलोपेन मकारान्तरप्रश्लेषेण उपदेशेऽन्त्यत्वाऽभावात्। भवन्त्विति। लोटो हेः अन्तादेशे शपि गुणे अवादेशे द्वयोरकारयोः पररूपे एकरितीकारस्य उकारे भवन्त्विति रूपम्। अथ लोटः सिपि शपि गुणाऽवादेशयोः भव सि इति स्थिते। सेर्ह्यपिच्च। हि इति लुप्तप्रथमाकम्। 'लोटो लङ्व' दित्यतो लोट इत्यनुवर्तते। तदाह—लोटः सेरिति। स्तुहीत्यादौ सिप्-स्थानिकस्य हेः पित्त्वात्सार्वधातुकमपिदिति ङिद्वत्त्वाऽभावात् गुणे प्राप्ते अपिद्वचनम्। एवं च ङिद्वत्त्वात् 'ङिति चे'ति गुणो न। सेर्हि ङिच्चेत्येव तु न सूत्रितम्। पित्तस्स्वरः अनुदात्तस्य स्थाने हेरप्यनुदात्तत्वापत्तेः। भव हि इति स्थिते। अतो हेः। अत इति पञ्चमी। हेरिति षष्ठी। 'विणो लु'गित्यतो लुगित्यनुवर्तते। तदाह—अतः परस्येति। भवेति। हिविधानं तु स्तुहीत्याद्यर्थमिति भावः। भवतादिति। आशिषि लोटः सिपि तस्य 'सेर्ह्यपिच्चे'ति हिभावे शपि गुणावादेशयोः 'अतो हे'रिति लुकं परत्वात् बाधित्वा 'तुह्यो'रिति पक्षे तातङिति भावः। भवतमिति। थसि शपि गुणे अवादेशे च भव,थस् इति स्थिते 'लोटो लङ्व'दिति लङ्वत्त्वात्स्थस्थमिपामिति थसः तमादेशे रूपम्। एवं भवतेति। थस्य तादेश इति विशेषः। लोटो मिपि शपि गुणे अवादेशे मिपा तस्यस्थमिपामित्यमादेशे प्राप्ते-मेर्निः। 'लोटो लङ्व'-दित्यतः लोट इत्यनुवर्तते। तदाह—लोटो मेरिति। भव मि इति स्थिते। आडुत्तमस्य। 'लोटो लङ्व'दित्यतः लोट इत्यनुवर्तते। तदाह—लोडुत्तमस्येति। स्तवानि स्तवावेत्यादौ सार्वधातुकमपिदिति ङित्त्वनिवृत्त्यर्थं पिद्वचनम्। यद्यपि मिप्स्थानिकस्य नेः पित्त्वात्तदागमस्यापि सिद्धं पित्त्वं, तथापि वस्मसोराडागमस्याऽङित्त्वार्थं पिदिति वचनम्। ननु स्तुहि भवानीत्यत्र 'एरु'रित्युत्वं कुतो न स्यादित्यत आह—हिन्योरुत्वं नेति। सामर्थ्यादिति। अन्यथा हुनु इत्येव विदध्यादिति भावः। भवानीति। आडागमे सवर्णदीर्घः। नचात्र लङ्वद्भावादितश्चेति लोपः शङ्क्यः। इकारोच्चारणसामर्थ्यात्। अन्यथा 'मो न' इत्येव विदध्यात्। एवं हरापि बोध्यम्। यद्यपि भवानीत्यादावतो दीर्घो यञि इत्येव दीर्घसिद्धेराडागमविधिः व्यर्थः। तथापि

अनद्यतनभूतार्थवृत्तेर्धातोर्लङ् स्यात्। २२०६ लुङ्लङ्लुङ्क्ष्वडुदात्तः६।४।७१॥ एषु परेष्वङ्गस्याडागमः स्यात्, स चोदात्तः। २२०७ इतश्च ३।४।१०० ॥ ङितो लस्य परस्मैपदमिकारान्तं यत्तदन्तस्य लोपः स्यात्। अभवत्। अभवताम्। अभवन्। अभवः। अभवतम्। अभवत। अभवम्। अभवाव। अभवाम। २२०८ विधिनिमन्त्रणामन्त्रणाऽधीष्टसम्प्रश्नप्रार्थनेषु लिङ् ३।३।१६१॥ एष्वर्थेषु द्योत्येषु वाच्येषु वा लिङ् स्यात्। विधिः प्रेरणम्, भृत्यादेर्निकृष्टस्य प्रवर्तनम्। नि-

---

स्तवानीत्यादावर्थमावश्यकमिहापि न्याय्यत्वादुपन्यस्तम्। भवावेति। लोटो वस् गुणावादेशौ। आडागमः। सवर्णदीर्घः। लङ्वद्भावात् 'नित्यं ङित' इति सकारलोपः। एवं मसि भवामेति रूपम्। इति लोट्प्रक्रिया। अनद्यतने लङ्। धातोरिति, भूत इति चाधिकृतम्। भूत इति धात्वर्थं अन्वेति। तदाह—अनद्यतनभूतार्थवृत्तेरिति। लुङ् लङ्लृङ्क्षु। अङ्गस्येत्यधिकृतम्। तदाह—एषु परेषु अङ्गस्येति। अन्तरङ्गत्वात् नित्यत्वात्परत्वाच्च यथायथं तिपि शपि विकरणे गुणे अवादेशे विकरणविशिष्टस्याङ्गस्य अडागमः। 'लावस्थायामेवाऽडागम' इति तु पक्षान्तरं भाष्ये स्थितम्। इतश्च। लस्येत्यधिकृतम्। 'इतश्च लोपः परस्मैपदेष्विति यस्मात् लोप इति, परस्मैपदेष्वितिचानुवर्तते। परस्मैपदेष्वित्येतत् षष्ठ्या विपरिणम्यते। तदाह—ङितो लस्येत्यादिना। अल्लोऽन्त्यस्येत्यन्त्यस्य लोपः। तदाह—अभवदिति। अभवतामिति। लङस्तसस्तामादेशः, शप्। गुणावादेशौ। अट्। अभवन्निति। झेरन्तादेशः। शप् गुणावादेशौ अट् 'इतश्चे'ति इकारलोपः। तकारस्य संयोगान्तलोपः। अभव इति। सिपि शपि गुणे अवादेशे अटि इकारलोपे रुत्वविसर्गौ। अभवतमिति। थस्तमादेशः। शप् गुणावादेशौ अट्। अभवतेति। थस्य तादेशे शपि गुणे अवादेशे अटि। अभवमिति। मिपः अमादेशे शपि गुणे अवादेशे पूर्वरूपम्। अभवावेति। वसि शपि गुणावादेशौ अट्। 'अतो दीर्घो यञी'ति दीर्घः। 'नित्यं ङित' इति सकारलोपः। एवं मसि अभवामेति रूपम्। इति लङ्प्रक्रिया। विधिनिमन्त्रणा। ननु विध्यादयो हि न लिङो वाच्याः। लः कर्मणि च भावे चेति सूत्रेण कर्तृकर्मभावार्थानां लकारवाच्यत्वबोधनात्। नच लः कर्मणि चेति शास्त्रं लिङ्व्यतिरिक्तलकारविषयकमेवास्त्विति वाच्यम्। तथा सति यजेतेत्यादौ कर्तृवाचकत्वाऽभावेन शबाद्यनापरोरिस्यत आह-वाच्येष्विति। 'लः कर्मणि चे'ति सूत्रं सामान्यविषयं चेदपि विधिनिमन्त्रणेति विशेषशास्त्रेण न बाध्यते, अविरोधात्। तथाच विध्यादिविशिष्टकर्तरि लकारात् फलतीति मत्वाह-वाच्येषु वेति। पक्षद्वयमीदं भाष्ये स्थितम्। विधिः प्रेरणमिति भाष्यम्, अर्थतस्सङ्गृह्णाति—'विधिः प्रेरणमिति। ननु निमन्त्रणादीनामपि प्रेरणान्तर्भावात्पौनरुक्त्यमित्यतो व्याचष्टे—भृत्यादेर्निकृष्टस्य प्रवर्तनमिति। तथथा भृत्यं स्वामी वदति—भवान् वस्त्रं क्रीणयेदिति। आमन्त्रणात् भेदं दर्शयितुं निमन्त्रणशब्दं व्याचष्टे—निमन्त्रणं

मन्त्रणं नियोगकरणम्, आवश्यके श्राद्धभोजनादौ दौहित्रादेः प्रवर्तनम्। आमन्त्रणं कामचारानुज्ञा। अधीष्टः सत्कारपूर्वको व्यापारः। 'प्रवर्तनायां लिङ्' इत्येव सुवचम्। चतुर्थी पृथगुपादानं प्रपञ्चार्थम्। ३२०६ यासुट् परस्मैपदेषूदात्तो ङिच्च ३। ४।१०३॥ लिङः परस्मैपदानां यासुडागमः स्यात् स चोदात्तो ङिच्च। ङित्त्वोक्तेर्ज्ञायते क्वचिदनुबन्धकार्येऽप्यनलिवधाविति प्रतिषेधः इति। श्नः शानचः शित्त्वम-

---

नियोगकरणमिति। **नियोगशब्दस्य** प्रेरणशब्दपर्यायत्वभ्रम वारयति—आवश्यके श्राद्ध-भोजनादौ दौहित्रादेः प्रवर्तनमिति। **'श्रोत्रिय श्राद्धे पवित्राणि दौहित्रः कुतपस्तिलः'। इत्यादिवचनादिति** भावः। **तद्यथा** दौहित्रादीन् प्रति इह श्राद्धे भवान् भुञ्जीतेति। **आमन्त्रणं** कामचारानुज्ञेति। **यथेच्छं क्रियतामित्यभ्यनुज्ञानमित्यर्थः। अधीष्टं** सत्कारपूर्वको व्यापार इति। **भाष्यवाक्यमिदम्। सत्कृत्य प्रवर्तनमित्यर्थः। अधिपूर्वकस्येषधातोर्भावे क्तान्तस्योपसर्गवशादस्मिन्नर्थे वृत्तिः। अत एव भाष्यप्रयोगादधीष्टशब्दस्य पुंस्त्वम्। अधीष्टमित्येव क्वचित्पाठः। 'माणवकं भवानध्यापये'दित्युदाहरणम्। इदं कार्यं न वेति विचार्य निर्धारणम् सम्प्रश्नः। यथा—किं भोः व्याकरणं भवानधीयीतेति। प्रार्थनं याच्ञा। यथा 'भवानन्नं मे दद्या'दिति। सुवचमिति। प्रवर्तनात्वस्य विध्यादिचतुर्षु अनुस्यूतत्वादिति भावः। प्रवृत्त्यनुकूलव्यापारः प्रवर्तना। तत्र प्रवृत्तिः शिष्यादिनिष्ठा। तदनुकूलव्यापारस्तु प्रेरणात्मकः प्रवर्तयितृगुर्वादिनिष्ठः। विस्तरस्तु मञ्जूषायां द्रष्टव्यः। चतुर्थीमिति। विधिनिमन्त्रणामन्त्रणाधीष्टानामित्यर्थः। अथ लिङस्तिपि इतश्चेतीकारलोपे शपि गुणे अवादेशे भव त् इति स्थिते—यासुट् पर। 'लिङः सीयु' डित्यतः लिङ इत्यनुवर्तते। षष्ठ्यर्थे सप्तमी। तदाह—लिङः परस्मैपदानामिति। सीयुटोऽपवादः। यासुटि टकार इत्, उकार उच्चारणार्थः। टित्वात् तिबादीनामाद्यवयवः। अवयवे डित्वं च 'आनर्थक्याक्तदङ्गेषु' इति न्यायेन समुदाये आगमविशिष्टतिबादौ विश्राम्यति। 'आगमा अनुदात्ता' इति यासुटः अनुदात्तत्वे प्राप्ते उदात्तवचनम्। इदमेव वचनमागमा अनुदात्ता इत्यत्र ज्ञापकमिति भाष्यम्। स्तुयात्- स्तुयातामित्यादौ गुणादिनिषेधार्थं यासुटो डित्त्ववचनम्। ननु यदागमा इति न्यायेन यासुडागमो लिङादेशपरस्मैपदावयवः। ततश्च स्थानिवत्त्वेनैव डित्त्वसिद्धेः यासुटो डित्त्वविधिर्व्यर्थः। नच स्थानिभूतलिङो ङकारस्याल इत्त्वेन गुणनिषेधविधावाश्रयणादनलिवधाविति निषेधः शङ्क्यः। 'घुमास्थागापाजहातिसां हली'ति किडति विहितस्य ईत्वस्य 'न लयपी'ति निषेधेन ङित्त्वेनानुबन्धकार्ये अनलिवधाविति निषेधाऽभावज्ञापनादित्यत आह—ङित्त्वोक्तेरिति। क्वचिदनुबन्धकार्येऽपि अनलिवधाविति निषेध इति। **यासुटो** ङित्त्वेन ज्ञायत इत्यन्वयः। **तथा च** एतज्ज्ञापनार्थमेव **यासुटो** ङित्त्वमिति भावः। ज्ञापनफलं तु वक्ष्यमाणेत्यत्र ङीबभावः। अन्यथा लृदादेशस्य श्नानचः स्थानिवत्त्वेन टित्त्वात् ङीप् स्यात्। ननु 'क-

पीह लिङ्गम्। २२१० **सुट्तिथोः** ३।४।१०७॥ लिङस्तकारथकारयोः सुट् स्यात्। सुटा यासुट् न बाध्यते। लिङो यासुट् तकारथकारयोः सुडिति विषयभेदात्। २२११ **लिङः सलोपोऽनन्त्यस्य** ७।२।७९॥ सार्वधातुकलिङोऽनन्त्यस्य सस्य लोपः स्यात्। इति सकारद्वयस्यापि निवृत्तिः। सुटः श्रवणं त्वाशीर्लिङि। स्फुटतरं तु तत्राप्यात्मनेपदे। २२१२ **अतो येयः** ७।२।८०॥ अतः परस्य सार्वधातुकावयवस्य या इत्यस्य इय् स्यात्। गुणः। यलोपः। भवेत्। सार्वधातुके

चिदनुबन्धकार्यंऽप्यनलिबधाविति निषेध' इत्यत्र यासुटो ङित्त्ववचनं न ज्ञापकम्। अनुबन्धकार्ये सर्वत्र अनलिबधाविति निषेधाऽभावे सत्यपि यासुटो ङित्त्वस्य तिप्सिप्मिबागमयासुटो ङित्त्वार्थमावश्यकत्वात्। नहि ङिदादेशत्वेऽपि तिप्सिप्मिपां ङित्त्वं स्थानिवत्त्वलभ्यम्। 'हलश्श्नश्शानज्झा'वित्ति सूत्रभाष्ये 'ङिच्च पिन्न पिच्च ङिन्नेति' प्रपञ्चितत्वादित्यस्वरसादाह—श्नः शानचः शित्त्वमपीह लिङ्गमिति। इह अनुबन्धकार्येऽपि क्वचिदनलिबधाविति निषेधोऽस्तीत्यस्मिन्नर्थे श्नः-श्नाप्रत्ययस्य, यः शानजादेशः हलः श्नश्शानज्झाविति विहितः, तस्य शित्त्वमपि लिङ्गं-ज्ञापकमित्यर्थः। अन्यथा स्थानिवत्त्वेनैव तस्य शित्त्वसिद्धेस्तद्वचनं व्यर्थं स्यादिति भावः। अत्र च यद्वक्तव्यं तत् स्त्रीप्रत्ययप्रकरणे वक्ष्यमाणेत्यत्र प्रपञ्चितम्। तथा च प्रकृते भव यास् त् इति स्थिते—सुट्तिथोः। लिङस्सीयुट्त्यतः लिङ इत्यनुवर्तते। तिप्थ् चेति द्वन्द्वात् षष्ठीद्विवचनम्। इकार उच्चारणार्थः। तदाह—लिङस्तकारेति। सुटि टकार इत्, उकार उच्चारणार्थः। भव यास् स् त् इति स्थितम्। नन्विह परेण सुटा यासुटः कथं न बाधः। भवेयुरित्यादौ परस्मैपदेषु यासुडविधिः चरितार्थस्यादित्याशङ्क्य निराकरोति—सुटा यासुट् न बाध्यत इति। तत् कुत इत्यत आह—लिङो यासुडिति। लिङः सीयुट् यासुडागमश्च। लिङादेशैकदेशस्य तकारस्य सुडागम इति विषयभेदादित्यर्थः। तथा च यौगपद्याऽसम्भवाऽभावात् विप्रतिषेधाऽभावाच्च परेणापि सुटा यासुटो बाध इति भावः। लिङः स। सेति लुप्तषष्ठीकं पदम्। 'रुदादिभ्यः सार्वधातुके' इत्यतः सार्वधातुक इत्यनुवृत्तं षष्ठ्या विपरिणम्यते। तदाह—सार्वधातुक लिङ इति। सकारद्वयस्यापि। अविशेषात् सकारद्वयस्यापि युगपल्लोपः प्रवर्तते। 'लक्षये लक्षणस्य सकृदेव प्रवृत्ति'रिति तु पर्यायेण पुनःप्रवृत्तिनिवृत्तिपरमिति भावः। यद्यपि भव यास् स् त इत्यत्र स्कोरित्येव सिध्यति। तथापि भवेयुरित्याद्यर्थं सूत्रम्। ननु सुटो लोपे किमर्थंस्सुडविधिरित्यत आह—सुटः श्रवणं त्वाशीर्लिङीति। भूयास्तामित्यादौ लिङाशिषीत्यार्द्धधातुकत्वेन तत्र सकारलोपस्याऽप्रसक्तेरिति भावः। 'यश्शनपरस्यैकस्याऽनेकस्य वोच्चारणे विशेषाऽभाव' इति भाष्यादाह-स्फुटतरं त्विति। तत्रापि आशिषि लिङ्यपि, एधिषीष्टेत्यादावात्मनेपदे स्फुटतरं सकारद्वयस्य श्रवणमित्यर्थः। तत्र यासुटो अभावेन सलोपाऽभावेन च सुट एव सकारस्य पृथक् स्पष्टं श्रवणसम्भवादिति भावः।

किम्। चिकीर्ष्यात्। मध्येऽपवादन्यायेन हि अतो लोप एव बाध्येत। भवेदित्यादौ तु परत्वाद्दीर्घः स्यात्। भवेताम्। २२१३ झेर्जुस् ३।४।१०८॥ लिङो

तथा च भव या त् इति स्थिते। अतो येयः। 'या' इति लुप्तषष्ठीकं पदम्। अत इति पञ्चमी। परस्येत्यध्याहार्यम्। इय इत्यन्नाऽकार उच्चारणार्थः। 'रुदादिभ्य' इत्यस्मात् 'सार्वधातुक' इत्यनुवृत्तम् अवयवषष्ठया विपरिणम्यते। तदाह—अतः परस्येत्यादिना। भव इय् त् इति स्थितम्। गुण इति। 'आद्गुणः' इत्यनेनेति शेषः। भवेय् त् इति स्थितम्। यलोप इति। 'लोपो व्योरित्यनेने'ति शेषः। भवेदिति। यलोपात् प्राक् हल्ङ्यादिलोपः संयोगान्तलोपश्च न शङ्क्यः, अन्तरङ्गत्वेन यलोपस्य पूर्वं प्रवृत्तेः, संयोगान्तलोपस्य त्रैपादिकत्वेनाऽसिद्धत्वाच्चेति भावः। सार्वधातुके किमिति। 'रुदादिभ्य' इत्यतस्सार्वधातुक इत्यनुवृत्तिलभ्यं सार्वधातुकावयवस्येति किमर्थमित्यर्थः। भूवादित्यादावाशीर्लिङि आर्धधातुके अतः परत्वाऽभावादेव इयादेशाऽभावसिद्धेः सार्वधातुकग्रहणानुवृत्तिर्व्यर्थेत्याशयः। चिकीर्ष्यादिति। कृञ्धातोः सन्नन्तात् आशीर्लिङि तिबादौ चिकीर्ष यादिति स्थिते 'अतो लोप' इत्यकारलोपे चिकीर्ष्यादिति रूपम्। तत्र 'अतो येय' इत्यत्र सार्वधातुकग्रहणानुवृत्तौ चिकीर्ष यादिति स्थिते अतो येय इति इयादेशे आद्गुणे यलोपे चिकीर्षेदिति स्यात्। सार्वधातुकग्रहणानुवृत्तौ तु न दोषः, आशीर्लिङादेशस्य तिङः लिङाशिषीत्यार्धधातुकतायाः वक्ष्यमाणत्वादिति भावः। ननु आशिषि लिङि चिकीर्ष यादिति स्थिते नित्यत्वात् अतो लोप इति अकारलोपे सति अतः परत्वाऽभावादेव 'अतो येय' इत्यस्याऽप्रवृत्तेः तत्र सार्वधातुकग्रहणानुवृत्तिर्व्यर्थेत्येत आह—मध्येऽपवादन्यायेन ह्यतो लोप एव बाध्येतेति। षष्ठस्य चतुर्थपादे अतो लोप इति सूत्रम्, सप्तमस्य द्वितीयपादे अतो येय इति सूत्रम्, सप्तमस्य चतुर्थपादे तु 'अतो दीर्घो यञी'ति सूत्रमिति स्थितिः। तत्र आशीर्लिङि आर्धधातुके चिकीर्षे यादित्यत्राऽलोपप्राप्त्या विधिलिङि तु भव यादित्यत्र अतो दीर्घप्राप्त्या च इयादेशस्य निरवकाशत्वेन बाध्यसामान्यचिन्तामाश्रित्यापवादतया तेन अन्यतरस्मिन् बाध्ये सति 'मध्येऽपवादाः पूर्वान् विधीन् बाधन्ते नोत्तरा'निति न्यायेनातो लोप एव बाधमर्हति। न तु अतो दीर्घ इत्यर्थः। एवं चार्द्धधातुके चिकीर्ष यादिति स्थिते अतः परत्वादियादेशः प्रसज्येतेत्यतिव्याप्तिः स्यादिति स्थितम्। एवं चाव्याप्तिरपीत्याह—भवेदित्यादाविति। अतः परस्य इयादेशविधौ सार्वधातुकग्रहणानुवृत्तौ विधिलिङस्तिपि सार्वधातुके भव यादिति स्थिते इयादेशं परत्वाद्बाधित्वा 'अतो दीर्घो यञी'ति यञादौ सार्वधातुके परे अतो विधीयमानो दीर्घः स्यात्। ततश्च अतः परत्वाऽभावादियादेशो न स्यादित्यव्याप्तिः स्यादित्यर्थः। ननु च इयादेशस्य निरवकाशत्वात् दीर्घबाधकत्वं शङ्क्यम्। चिकीर्ष्यादित्यार्द्धधातुके दीर्घप्राप्त्ययोग्ये इयादेशस्य सावकाशत्वादिति भावः। भवेतामिति। तसः तामादेशे शपि गुणे अवादेशे यासुडागमे सुटि रुत्वे यलोपे या इत्यस्य इयादेशे आद्गुणे यलोपः। अथ लिङो झेर्जुसित्यन्त इति प्राप्ते—

मेर्जुस् स्यात्। ज इत्। २२१४ उस्यपदान्तात् ६।१।९६॥ अपदान्तादवर्णा-दुसि परे पररूपमेकादेशः स्यात्। इति प्राप्ते। परत्वान्नित्यत्वाच्च 'अतो येयः' (सू २२१२) इति प्राह्यः। यद्यप्यन्तरङ्गत्वात्पररूपं न्याय्यम्, तथापि 'यास' इत्येतस्य इय् इति व्याख्येयम्। एवं च सलोपस्यापवाद इय्। 'अतो येयः' (सू २२१२) इत्यत्र तु सन्धिरार्षः। भवेयुः। भवेः। भवेतम्। भवेत। भवेयम्। भवेव।

मेर्जुस्। लिङस्सीयुडित्यतो लिङ इत्यनुवर्तते। तदाह—लिङो मेरिति। अनेकाल्त्वात्स-र्वादेशः। ज इदिति। जुसः स्थानिवत्त्वेन प्रत्ययत्वात् चुटू इति जकार इत्संज्ञक इत्यर्थः॥ उसि शपि गुणे अवादेशे यासुटि सकारलोपे भव या उसिति स्थिते इयादेशं बाधित्वा पररूपप्रवृत्तिं शङ्कितुमाह—उस्यप। एकः पूर्वपरयोरित्यधिकृतम्। आद्गुण इत्यस्मादा-दित्यनुवर्तते। 'एङि पररूप'मित्यस्मात्पररूपमिति। तदाह—अपदान्तादिति। उसीति। उसि यः अच् उकारः तस्मिन् परत इत्यर्थः। 'इको यणची'त्यतः अचीत्यनुवृत्तेः। य-द्यपि उसः कृत्स्नस्याकारस्य च उसिस्थेकादेशेऽपि रूपं तुल्यम्। तथापि 'अकः सवर्ण दीर्घ' इत्यादावुत्तरत्राचीत्यावश्यकमत्राप्यनुवर्तत इति बोध्यम्। भिन्धरित्याद्युदाहर-णम्। इति प्राप्त इति। भव या उसित्यत्राकारस्योकारस्य चादुगुणं बाधित्वा एकस्मि-न्नुकारे पररूपे प्राप्ते सतीत्यर्थः। सति च पररूपे या इत्यस्याऽभावात् इय् न स्या-दिति मन्यते—परत्वादिति। पररूपापेक्षया इयादेशः परः नित्यश्च, अकृते कृते च प्र-वृत्तेः। कृते पररूपे य् इत्यस्यैकदेशविकृतन्यायेन एकादेशस्य पूर्वान्तवद्भावेन वा इया-देशस्य निर्बाधत्वात्। ततश्च पररूपं बाधित्वा इयादेशे भवेयुरिति रूपमिति प्राचीना मन्यन्त इत्यर्थः। ननु पररूपमङ्गाधिकारस्थत्वाऽभावात् अङ्गानपेक्षत्वात् अन्तरङ्गम्, इयादेशस्तु आङ्गत्वात् प्रकृतिप्रत्ययोभयसापेक्षत्वात् बहिरङ्गः। ततश्च पराङ्नित्यादु-पीवादेशात् पररूपस्यान्तरङ्गतया बलवत्त्वात् पररूपमेव इह स्यादिति शङ्कते—यद्य-पीति। परिहरति—तथापीति। अतः यास् इयः इति पदच्छेदः। यासिति लुप्तषष्ठीकं पदम्। ततश्च अतः परस्य यासित्येतस्य इय् स्यादिति व्याख्येयमित्यर्थः। ननु 'लिङः सलोपोऽनन्त्यस्ये'ति सकारस्य लोपः इयादेशं बाधित्वा नित्यत्वात् प्राप्नोतीति, ततश्च यास् इत्यस्य इय् इति कथमित्यत आह—एवं चेति। यासिति सकारान्तस्य इयादेशविधिसामर्थ्यादेव सकारलोपं बाधित्वा प्रागेव यासिति सकारान्तस्य इया-देशो भवतीत्यर्थः। तथा च सकारावस्थायां अवर्णात्परत्वाभावेन पररूपस्याप्रवृत्ति-रिति भावः॥ ननु यदि 'यास् इय्' इतिच्छेदः, तदा सकारस्य रुत्वे, भोभगो इति यत्वे, 'लोपः शाकल्यस्ये'ति तस्य लोपे अतो या इयः इति स्यात्। आद्गुणे कृतंत्वे यलो-पस्याऽसिद्धत्वादित्यत आह—सन्धिरार्ष इति। 'आने मु'गिति सूत्रे भाष्ये तु अतो या इय इत्येव सूत्रपाठो लक्ष्यते। भवेरिति। सिपि, शपि, गुणः। अवादेशः। इतश्चेति इ-कारलोपः। यासुडागमः। सकारस्य रुत्वं। इयादेशः। आद्गुणः यलोपः। रुत्वविः

भवेम। २२१५ लिङाशिषि ३।४।११६॥ आशिषि लिङस्तिङार्द्धधातुकसंज्ञः स्यात्। २२१६ किदाशिषि ३।४।१०४॥ आशिषि लिङो यासुट् कित्स्यात्। 'स्कोः' (स ३८०) इति सलोपः। २२१७ क्ङिति च १।१।५॥ गित्किन्ङित्नि-

सर्गौ। एवं थसः तमादेशे थस्य तादेशे च, भवेतम्। भवेतेति च रूपम्। भवेयमिति। मिपि अमादेशः। शप्। गुणः। अवादेशः यासुट्। सलोपः। इयादेशः। आदूगुणः। भवेवेति। वस्। शप्। गुणावादेशौ। 'नित्यं ङित' इति सकारलोपः। यासुट्। सलोपः। इयादेशः। आदूगुणः। यलोपः। एवं मसि भवेमेति रूपम्। इति विधिलिङ्प्रक्रिया। अथाशीर्लिङि विशेषमाह—लिङाशिषि। लिङिति लुप्तषष्ठीकं पदम्। 'तिङ्शित्सार्वधातुक'मित्यतस्तिङित्यनुवर्तते। तदाह—आशिषि लिङस्तिङिति। सार्वधातुकसंज्ञापवादोऽयम्। ततश्च सार्वधातुकसंज्ञाकार्यं शबादि न भवति। किदाशिषि। लिङर्ल्सीयुडित्यतः लिङ इत्यनुवर्तते। 'यासुट् परस्मैपदेष्वि'त्यतः यासुडिति च। तदाह-आशिषि लिङ्इति। 'यासुट् परस्मैपदेष्वि'ति ङित्त्वमप्यपवादः। यद्यपि ङित्त्वेनैव गुणनिषेधः सिध्यति। तथापि 'इज्या'दिग्रहणौ 'वचिस्वपियजादीनां किती'ति सम्प्रसारणार्थं कित्त्वमावश्यकम्, इह न्याय्यत्वादुपन्यस्तम। अथ आशिषि लिङस्तिपि आर्धधातुकत्वात् शबभावे 'इतश्चे'तीकारलोपे यासुडागमे अतः परत्वाभावात् सार्वधातुकत्वाभावाच्च इयादेशाभावे सुटि भूयास् स् त् इति स्थिते प्रक्रियामाह—स्कोरिति सलोप इति। 'लिङस्सलोप' इत्यस्य सार्वधातुकविषयत्वात् स्कोरिति सुटः पदान्तसंयोगादित्वाल्लोपः। ततः यासुटः सस्यापि पदान्तसंयोगादित्वादेव लोपः। ननु झलपरसंयोगादित्वेन यासुटः सस्य लोपे सुटः सस्य पदान्तसंयोगादित्वाल्लोप इति युक्तम्। तथा सति झलपरसंयोगादिलोपस्याऽसिद्धत्वेन संयोगान्तलोपापत्तेः। भ्रष्ट इत्यादौ सावकाशस्य झलपरसंयोगादिलोपस्य संयोगान्तलोपाऽबाधकत्वादिति शब्दरत्ने विस्तरः। एवं च भूयास् स त् इति स्थिते सकारद्वयस्य निवृत्तौ भूयादिति रूपम्। तत्र 'सार्वधातुकार्द्धधातुकयो रिति गुणे प्राप्ते। क्ङिति च। गश्च ङश्च एषां समाहारद्वन्द्वः, काप्पूर्वं गकारस्य चत्वेन निर्देशात् कुङ् च इत् यस्येति विग्रहः। द्वन्द्वान्ते श्रूयमाण इच्छब्दः प्रत्येकमन्वेति। तथा च गिति किति ङिति चेति लभ्यते। निमित्तसप्तम्येषा। 'इको गुणवृद्धी' इत्यनुवर्तते। चकार इत्यर्थे। इक इत्युच्चार्यं विहिते इति लभ्यते। 'न धातुलोप आर्द्धधातुके' इत्यतः नेत्यनुवर्तते। तदाह—गित्किन्ङिन्निमित्ते इत्यादिना। गितीत्यनुक्तौ तु 'श्लाजित्स्पश्च-श्नु'रिति श्नुप्रत्यये 'जिष्णु'रित्यत्र गुणनिषेधो न स्यात्। 'न च श्नुप्रत्ययः किदेव क्रियतामिति वाच्यम्। तथा सति 'घुमास्थे'ति किति विहितस्य ईत्वस्य प्रसङ्गात्। यदि तु गिति किति ङिति परतो गुणवृद्धी न स्त इति व्याख्यायेत, तदा छिन्नं भिन्नमित्यत्र क्तप्रत्यये परे लघूपधगुणनिषेधो न स्यात्। स्थानिभूतस्यैकः हलो व्यवधानात्। नच येन नाव्यवधानन्यायः शङ्क्यः।

मित्ते इरलक्षणे गुणवृद्धी न स्तः। भूयात्। भूयास्ताम्। भूयासुः। भूयाः। भूयास्तम् भूयास्त। भूयासम्। भूयास्व। भूयास्म। २२१८ लुङ् ३।२।११०॥ भूतार्थवृत्तेर्धातोर्लुङ् स्यात्। २२१९ माङि लुङ् ३।३।१७५॥ सर्वलकारापवादः। २२२० स्मोत्तरे लङ् च ३।३।१७६॥ स्मोत्तरे माङि लङ् स्याल्लुङ् च। २२२१ च्लि लुङि ३।१।४३॥ शबाद्यपवादः। २२२२ च्लेः सिच् ३।१।४४॥ इत्यावितौ २२२३ गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु ७।४।७७॥ एभ्यः सिचो

चितं स्तुतमित्यादावव्यवहितं चरितार्थत्वात्। यदि च 'इको न गुणवृद्धी' इत्येव व्याख्यायेत न त्विग्लक्षणे इति, तदा लिगोरपत्यं लैगवायनः, नडादित्वात् फक्, इह आदिवृद्धेरेगुणस्य च वस्तुगत्या इस्थानिकत्वात् निषेधः स्यादित्यलम्। भूयादिति। इहार्द्धधातुकत्वाल्लिङः सलोप इत्यस्याऽप्रवृत्तेः स्कोरिति सलोप इत्युक्तं न विस्मर्तव्यम्। न चैवमपि संयोगादिलोपस्यासिद्धत्वाद्धलन्तत्वादिलोपः स्यादिति वाच्यम्। सुटि यासुटि च सति तास्यां विशिष्टस्यैव प्रत्ययत्वेनाऽपृक्तत्वाभावादित्यलम्। भूयास्तामिति। आशिषि लिङस्तसस्तामादेशे आर्द्धधातुकत्वात् शबभावे यासुडागमे अतः परत्वाऽभावादियादेशाऽभावे सुटि झलपरसंयोगादित्वेन यासुटः सकारस्य लोपः गुणनिषेधश्च। भूयासुरिति। झेर्जुसि यासुडागमे गुणनिषेधे रूपम्। भूया इति। आशीर्लिङः सिपि इतश्चेतीकारलोपः। यासुटः स्कोरिति सलोपः, गुणनिषेधः, रुत्वविसर्गौ। भूयास्तमिति। थसस्तमादेशे यासुटि गुणनिषेधः। एवं थस्य तादेशेऽपि भूयास्तेति रूपम्। भूयास्मेति। मिपः अमादेशे यासुटि गुणनिषेधः। भूयास्वेति। लिङो वस्। 'नित्यं ङित' इति सकारलोपः। यासुट्। गुणनिषेधः। एवं मसि भूयास्मेति रूपम्। इत्याशीर्लिङ्प्रक्रिया। लुङ्। धातोरिति भूत इति चाधिकृतम्। तदाह—भूतार्थवृत्तेरिति। माङि लुङ्। माङि प्रयुज्यमाने धातोर्लुङ् स्यादित्यर्थः। ननु लुङ् इत्युदाहृतसूत्रेणैव सिद्धेः किमर्थमिदमित्यत आह—सर्वलकारापवाद इति। मास्मैत्यादौ तु मा इत्यव्ययानन्तरं प्रतिषेधार्थकमित्याहुः। 'आङ्माङोश्चे'ति सूत्रभाष्ये तु ङितो माशब्दस्य निर्देशात् प्रमाछन्द इत्यत्र तुक् न भवतीत्युक्तम्। माशब्दस्याऽव्ययान्तरस्य सत्त्वे तु तदेवोदाहियेत। मास्विदत्यत्र तु अस्त्विति विभक्तिप्रतिरूपकमव्ययमित्यन्ये। स्मोत्तरे लङ् च। चकारात् माङि लुङिति नानुकृष्यते। स्म इत्यव्ययं उत्तरं यस्मादिति विग्रहः। तदाह—स्मोत्तरे माङीति। अयमपि सर्वलकारापवादः। च्लि लुङ्। च्लि इति लुप्तप्रथमाकम्। लुङि परे धातोः च्लिप्रत्ययः स्यादित्यर्थः। शबाद्यपवाद इति। आदिना श्यनादिविकरणसङ्ग्रहः। च्लेः सिच्। इत्यावितौ। चित्स्वरश्चित्स्वस्य प्रयोजनम्। इदित्त्वस्य तु अमंस्तेत्यत्र 'अनिदितां हल उपधाया' इत्युपधालोपस्याऽप्रवृत्तिः प्रयोजनम्। गातिस्थाघु। गाति स्था घु पा भू एषां इन्द्वात् पञ्चमीबहुवचनम्। परस्मैपदेषु शेषः। सिच इति षष्ठी। गातीति रितपा निर्देशात्

लुक्स्यात्। गापाविहेणादेशपिबती गृह्येते। २२२४ भूसुवोस्तिङि ७।३।८८॥ भू सू एतयोः सार्वधातुके तिङि परे गुणो न स्यात्। २२२५ अस्तिसिचोऽपृक्ते ७।३।९६॥ सिच्च अस् चेति समाहारद्वन्द्वः। सिच्छब्दस्य सौत्रं भत्वम्। अस्तीत्यव्ययेन कर्मधारयः। ततः पञ्चम्याः सौत्रो लुक्। विद्यमानात्सिचोऽस्तेश्च परस्याऽपृक्तस्य हल ईडागमः स्यात्। इति ईट् नेह, सिचो लुका लुप्तत्वात्। अभूत्।

गाधातोर्ग्रहणम्। घु इत्यनेन 'दाधाघ्वदाबि'ति घुसञ्ज्ञकयोः दाधातोर्धाधातोश्च ग्रहणम्। 'व्यञ्क्त्रियार्थंजितो यूनि लुगणिञो'रित्यस्माद्यवहितादपि लुगित्यनुवर्तते। 'जुहोत्यादिभ्यः श्लु'रित्यव्यवहितमपि श्लुग्रहणं नानुवर्तते। व्याख्यानात्। तदाह—पञ्चम्यः सिच इत्यादिना। गापाविहेति। इह गातिस्थेति, सूत्रे गातीत्यनेन पाग्रहणेन च इणो गा लुङीति लुग्विकरणस्येणो गादेशः, शव्विकरणाः पिबादेशयोग्याः पाधातुश्च गृह्येते इत्यर्थः। 'गापोर्ग्रहणे इणपिबत्योर्ग्रहण'मिति भाष्यादिति भावः। तथा च लुङस्तिबादेशे इतश्चेति इकारलोपे झषपवादे च्लिप्रत्यये तस्य सिचि तस्य लुकि अडागमे अभू त इति स्थिते पित्त्वात् ङित्त्वाऽभावे 'सार्वधातुकार्द्धधातुकयोरि'ति गुणे प्राप्ते—भूसुवोस्तिङि। 'मिदेर्गुण' इत्यतो गुण इति, 'नाभ्यस्तस्याचि पितीत्यतो नेति सार्वधातुक इति चानुवर्तते। तदाह—एतयोरिति। भू सू इत्यनयोरित्यर्थः। इह 'षूङ् प्राणिगर्भविमोचन' इति लुग्विकरणस्यैव ग्रहणम्। न तु सुवतिसूयत्योः शविकरणश्यन्विकरणयोरपि। तत्र तिङो विकरणेन व्यवधानात्। अथ अभूत् इत्यत्र तकारस्येडागममाशङ्क्याह—अस्तिसिचोऽपृक्ते। अस्तिश्च सिच्चेति समाहारद्वन्द्वात् पञ्चमी। 'ब्रुव ईडि'त्यत ईडित्यनुवर्तते। 'तस्मादित्युत्तरस्ये'ति परिभाषया 'अस्तिसिचः' इति पञ्चमी अपृक्तस्येति षष्ठीं प्रकल्पयति। ततश्च अस्तेः सिचश्च परस्याऽपृक्तस्य ईडागमः स्यादिति प्राचीना व्याचक्षते। तथा सति लुङि अस्तेर्भूभावे अभूदिति न स्यात्। भूभावस्य स्थानिवत्त्वेन अस्तितया तत्रापृक्तस्य हल ईडागमस्य दुर्वारत्वात्। तथा अगात्, अस्थात्, अपादित्यादावपि 'गातिस्थे'ति सिचो लुक्यपि स्थानिवत्त्वेन सिचः परत्वादीडागमः स्यात्। अतः प्रकारान्तरेण व्याचष्टे—सिच्च अस् चेत्यादिना। ननु सिचस्शब्दे सिच्शब्दस्य पूर्वखण्डस्यान्तर्वर्तिविभक्त्या पदत्वाच्चोः कुरिति कुत्वप्रसङ्ग इत्यत आह—सिच्शब्दस्य सौत्रं भत्वमिति। तथा च भत्वेन पदत्वस्य बाधान्न कुत्वमिति भावः। ननु सिचस्शब्दे अस् इत्यनेनैवास्तेर्लाभात् अस्तिग्रहणं किमर्थमित्यत आह—अस्तीत्यव्ययेन कर्मधारय इति। अस्तीति विभक्तिप्रतिरूपकमव्ययं लुप्तसप्तमीविभक्तिकं विद्यमानार्थकम्। तेन सिचस्शब्दस्य कर्मधारय इत्यर्थः। तथा च अस्तिसिचस् इत्येकं पदमिति स्थितम्। ततः पञ्चम्याः सौत्रो लुगिति। 'सुपां सुलुगित्यनेने'ति शेषः। तथा च अस्तिसिच इति पदात् लब्धार्थमाह—विद्यमानात्सिचोऽस्तेश्च परस्येति। हल इति। 'उतो वृद्धिर्लुकि हली'त्यतोऽनुवृ-

हलः किम्। ऐधिषि। अपृक्तस्य इति किम्। ऐधिष्ट। अभूताम्। २२२६ सिज-भ्यस्तविदिभ्यश्च ३।४।१०९॥ सिचोऽभ्यस्ताद्विदेश्च परस्य झिसंबन्धिनो झेर्जुस् स्यात्। इति प्राप्ते। २२२७ आतः ३।४।११०॥ सिज्लुक्यादन्तादेव झे-र्जुस् स्यात्। अभूवन्। अभूः। अभूतम्। अभूत। अभूवम्। अभूव। अभूम। २२२८ न माङ्योगे ६।४।७४॥ अडाटौ न स्तः। मा भवान् भूत्। मा स्म भवत्। भू-द्वा। २२२९ लिङ्निमित्ते लृङ् क्रियातिपत्तौ ३।३।१३९॥ हेतुहेतुमद्भावा-वादि लिङ्निमित्तं तत्र भविष्यत्यर्थे लृङ् स्यात्क्रियाया अनिष्पत्तौ गम्यमानायाम्।

स्य हलोत्यस्य षष्ठ्या विपरिणाम इति भावः। इटीट् नेहेति। अनेन सूत्रेण अभूत् इत्यत्र ईडागमो नेत्यर्थः। कुत इत्यत आह—सिचो लुका लुप्तस्यादिति। विद्यमानत्व-विशेषणेन लुसात्सिचः परस्य नेति भावः। एवं च अगादित्यादावपि लुसात्सिचः परस्य, अस्तेर्लुङि कृतभूभावात्परस्य च नेत्युक्तप्रायम्। ऐधिषीति। एधधातोर्लुङि उत्तमपुरुषैकवचनम् इट्। अत्र इकारस्य सिचः परत्वेऽपि हलन्त्वाऽभावात् ईडागमो नेति भावः। ऐधिष्टेति। एधधातोर्लुङि प्रथमपुरुषैकवचनम्। अत्र त इत्यस्य सिचः परत्वेऽपि एकारप्रत्ययत्वाऽभावेनाऽपृक्तत्वाऽभावात् ईडागमो नेति भावः। अभूता-मिति। लुङस्तसि तस्य तामादेशः। च्लिः। सिच्। अट्। गुणनिषेधः। सिजभ्यस्तविदि। झेर्जुसिति सूत्रमनुवर्तते। 'नित्यं ङित' इत्यतः ङित इति च। तदाह—सिचोऽभ्यस्तादि-त्यादिना। इति प्राप्त इति। 'लिङो झेर्जुसी'ति शेषः। आतः। 'झेर्जु'सिति सूत्रमनुवर्तते। 'आतः सिज्लुगन्तादिति वक्तव्य'मिति वार्तिकं भाष्ये पठितम्। ततश्च सिज्लुकि यदा-कारान्तं तस्मात्परस्य झेर्जुसिति लभ्यते। सिजभ्यस्तेति पूर्वसूत्रेणैव सिदूधे नियमा-र्थमिदम्। तदाह—सिज्लुक्यादन्तादेवेति। अभूवन्निति। च्लिः। च्लिः। सिच्। लुक्। अट्, झोऽन्तः। इतश्चेति इकारलोपः। तकारस्य संयोगान्तलोपः। 'भुवो वुग्लुङ्लिटो'रिति वुक्। सिज्लुकि आतः परस्यैवेति नियमात् सिजभ्यस्तेति न जुसिति भावः। अभू-रिति। सिप् च्लिः सिच् लुक् अट् इकारलोपः। रुत्वविसर्गौ। अभूतमिति। थसस्तम् च्लिः सिच् लुक् अट्। गुणनिषेधः। एवं थस्य तादेशे अभूतेति रूपम्। अभूवमिति। मिप् अम्। च्लिः सिच्। लुक् अट् वुक्। अभूवेति। वस् च्लिः सिच् लुक् अट्। नित्यं ङित इति सकारलोपः गुणनिषेधः। एवं मसि अभूमेति रूपम्। अथ माङि लुङि विशे-षमाह—न माङ्योगे। शेषपूरणेन सूत्रं व्याचष्टे—अडाटौ न स्त इति। 'लुङ्लङ्लृङ्क्ष्वड-दात्त'इत्यतः 'आडजादीना'मित्यतश्च, तदनुवृत्तेरिति भावः। मा भवान् भूदिति। मा भूदित्यत्र अडागमे सति असति च विशेषाऽभावात् भवत्पदस्य मध्ये प्रयोगः। अथ 'स्मोत्तरे लङ् चे'त्यस्य उदाहरति—मा स्म भवद्भूदिति। एवं बहुवचने मा स्म भवन् मा स्म भूवन्निति चोदाहरणं बोध्यम्। इति लुक्प्रक्रिया। लिङ्निमित्ते। हेतुहेतु-मद्भावादीति। हेतुहेतुमतोर्लिङ्, 'इच्छार्थेषु लिङ्लोटा'वित्यादि लिङ्निमित्तं तदा-

अभविष्यत्। अभविष्यताम्। अभविष्यन्। अभविष्यः। अभविष्यतम्। अभविष्यत। अभविष्यम्। अभविष्याव। अभविष्याम। **२२३० ते प्राग्धातोः १।४।८०॥** ते गत्युपसर्गसंज्ञा धातोः प्रागेव प्रयोक्तव्याः। **२२३१ आनि लोट् ८।४।१६॥** उपसर्गस्थान्निमित्तात्परस्य लोडादेशस्यानीत्यस्य नस्य णः स्यात्। प्रभवाणि। 'दुरः षत्वणत्वयोरुपसर्गत्वप्रतिषेधो वक्तव्यः'। दुःस्थितिः। दुर्भवानि। 'अन्तःशब्दस्याऽङ्किविधिणत्वेषूपसर्गत्वं वाच्यम्'। अन्तर्धा। अन्तर्धिः। अन्तर्भवाणि। **२२३२ शेषे विभाषाऽकखादावषान्त उपदेशे८।४।१८॥** उपदेशे कादिखादिषान्तवर्जे गदनदादेरन्यस्मिन्धातौ परे उपसर्गस्थान्निमित्तात्परस्य नेर्नस्य णत्वं वा स्यात्।

रार्थंप्रक्रियायां स्पष्टोभविष्यति। भविष्यत्यर्थ इति। 'भविष्यति मर्यादावचने' इत्यतः तदनुवृत्तेरिति भावः। क्रियातिपत्तिपदं व्याचष्टे—क्रियाया अनिष्पत्ताविति। 'सुवृष्टिश्चेदभविष्यत् तदा सुभिक्षमभविष्यत्' इत्युदाहरणं बोध्यम्। अभविष्यदिति। लृङ् तिप् इतश्चेतीकारलोपः। 'स्यतासी लृलुटो'रिति शबपवादः स्यप्रत्ययः। अट्। वलादिलक्षण इट् गुणावादेशौ। षत्वम्। अभविष्यतामिति। तसस्तामादेशः। स्यः। अट्। इट्। गुणावादेशौ। षत्वम्। अभविष्यन्निति। झिः, स्यः, अट्, इट् गुणावादेशौ 'झोऽन्तः' इति झेरन्तादेशः इतश्चेतीकारलोपः। तकारस्य संयोगान्तलोपः। षत्वम्। अभविष्य इति। सिप्। स्यः। अट्, इट्। गुणः। अवादेशः। इतश्चेतीकारलोपः। षत्वम्। रुत्वविसर्गौ। अभविष्यतमिति। थसः तमादेशः। स्यः, अट्, इट, गुणावौ, षत्वम्। एवं थस्य तादेशादि पूर्ववत्। अभविष्यमिति। मिपः अम्, स्यः, अट्, इट्, गुणावौ पूर्वरूपम्। षत्वम्। अभविष्यावेति। वस्, स्यः, अट्, इट्, 'नित्यं ङित' इति सकारलोपः। अतो दीर्घः। षत्वम्। एवं मसि अभविष्यामेति रूपम्। इति लृङ्प्रक्रिया। अथ प्रसङ्गादाह—ते प्राग्धातोः। ते इत्यस्य विवरणम्—गत्युपसर्गसंज्ञा इति। 'उपसर्गाः क्रियायोगे' 'गतिश्चे'ति प्रकृतत्वादिति भावः। प्रागेवेति। न परतः नापि व्यवहिता इत्यर्थः। इह 'धातोः प्रागेव प्रयुज्यमाना गत्युपसर्गाः स्यु'रिति संज्ञानियमपक्षोऽपि भाष्ये स्थितः। आनि लोट्। लोडिति आनीति च लुप्तषष्ठीकं पदम्। 'रषाभ्यां नो ण' इत्यनुवर्तते। 'उपसर्गादसमासेऽपी'त्यत उपसर्गादिति च। तदाह—उपसर्गस्थान्निमित्तादिति। रेफषकारात्मकादित्यर्थः। असमानपदत्वार्थं आरम्भः। 'अ कुप्वाङ्नुम्व्यवायेऽपी'ति सूत्रं णत्वप्रकरणे सर्वत्र भवतीति भाष्यम्। दुरः षत्वेति। षत्वणत्वयोः कर्तव्ययोः दुरः उपसर्गत्वप्रतिषेध इत्यर्थः। दुःस्थितिरिति। अत्रोपसर्गात्सुनोतीति षत्वं न भवति। दुर्भवानीति। अत्राऽऽनि लोडिति णत्वं न भवति। अन्तः शब्दस्येति। अङ्विधौ किविधौ णत्वे च कर्तव्ये अन्तर् इत्यस्य उपसर्गत्वमित्यर्थः। प्रादिसमासाभावात्प्राप्ते वचनम्। अन्तर्धेति। स्त्रियामित्यधिकारे धावातोः 'आतश्चोपसर्गे' इत्यङ्। टाप्। अन्तर्धिरिति। उपसर्गे घोः किः। अन्तर्भवाणीति। 'आनि लो'डिति णत्वम्। शेषे विभाषा। अकखादा-

प्रणिभवति—प्रनिभवति। इहोपसर्गाणामसमस्तत्वेऽपि संहिता नित्या। तदुक्तम्—

'संहितैकपदे नित्या नित्या धातूपसर्गयोः
नित्या समासे वाक्ये तु सा विवक्षामपेक्षते ॥' इति।

सत्ताद्यर्थनिर्देशश्चोपलक्षणम्। 'यागात्स्वर्गो भवती'त्यादावुत्पद्यत इत्याद्यर्थात् उपसर्गास्त्वर्थविशेषस्य द्योतकाः। प्रभवति। पराभवति। संभवति। अनुभवति। अभिभवति। उद्भवति। परिभवतीत्यादौ विलक्षणार्थावगतेः। उक्तं च—

'उपसर्गेण धात्वर्थो बलादन्यत्र नीयते। प्रहाराहारसंहारविहारपरिहारवत् ॥' इति।

एधृ २ वृद्धौ। कत्थन्ता' षट्त्रिंशदनुदात्तेतः। २२३३ त्रिन आत्मनेपदानां

विति च्छेदः। 'नेर्गदनदे'ति पूर्वसूत्रोक्तधातुभ्योऽन्यः शेषः। तदाह—गदनदादेरन्यस्मिन्निति। ननु णत्वप्रकरणं संहिताधिकारस्थम्। ततश्चाऽविवक्षितायां संहितायाम् उपसर्गात्परत्वाऽभावात् णत्वाभावः। विवक्षितायां तु णत्वमिति विरुद्धयोरसिद्धेः किमिह विभाषाग्रहणेनेत्यत आह—सहोपसर्गाणामिति। उक्तमिति। हरिणेति शेषः। अत्र 'एकपदे'इत्यनेन अखण्डं पदं विवक्षितम्। 'नित्या समासे' इति लिङ्गात्। अखण्डत्वं च पदभिन्नोत्तरखण्डकत्वम्। अन्यथा 'राजीयती'त्यादौ 'अतो गुणे'इति शपा परूपम् एकादेशः पक्षे न स्यात्। अर्थनिर्देशश्चेति। धातुपाठे 'भू सत्तायाम्'इत्याद्यर्थनिर्देश इत्यर्थः। उपलक्षणमिति। प्रदर्शनमात्रमित्यर्थः। नन्वर्थान्तरपरिसंख्या कुतो न स्यादित्यत आह—यागादिति। नच 'यागात् स्वर्गो भवती'त्यादौ उत्पत्त्यादौ लक्षणा कुतो न स्यादिति वाच्यम्। प्रयोगप्राचुर्यसत्त्वात्। पाणिनिर्हि धातुपाठे धातून् कांश्चिदर्थसहितान् कांश्चिदर्थरहितान् पठतीति 'चुटू' इति सूत्रभाष्ये स्थितम्। न चातिप्रसङ्गः शङ्क्यः। 'अनेकार्था अपि धातवो भवन्तीति' भाष्ये अपिशब्देन प्रयोगानुसारित्वावगतेः। सर्वेषु धातुष्वर्थनिर्देशस्त्वाधुनिकः। एवं च 'सेधतेर्गतौ'इति सूत्रे गतावित्युपादानात् षिध गत्याम्इत्यर्थनिर्देशः अपाणिनीय एवेति दिक्। ननु भूधातोः केवलस्योत्पत्त्याद्यर्थकत्वे उद्भवतीत्यादौ उपसर्गा व्यर्था इत्यत आह—उपसर्गास्त्विति। उपसर्गं विनापि भूधातोरुत्पत्त्याद्यर्थप्रतीतेः। 'उद्भवती'त्यादौ प्युच्यमाना अप्युपसर्गा द्योतका एव न तु वाचका इति भावः। द्योतकत्वं वा तेषां किमर्थं स्वीकार्यमित्यत आह—प्रभवतीत्यादिति। प्रभवः प्रकाशः उत्पत्तिः शक्तिर्वा। पराभवः पराजयः। सम्भवः—सम्भावना। अनुभवः उपभोगः अभिभवः हिंसा। उद्भवः उत्पत्तिः। परिभवः तिरस्कारः। उक्तं चेति। हरिणेति शेषः। प्रहारः कशाद्याघातः। आहारो भक्षणम्। संहारः वधः। विहारः क्रीडा। परिहारः परित्यागः। इति भूधातुप्रक्रिया। एध वृद्धाविति। जायते, अस्ति, विपरिणमते, वर्धते, अपक्षीयते, विनश्यतीति षट् भावविकाराः। तत्र चतुर्थावस्था वृद्धिः उपचयः। कत्थन्ता इति। कत्थ श्लाघायामित्यन्ता इत्यर्थः। अनुदात्तेत इति। ततश्च एतेभ्य आत्मनेपदमेवेति भावः। तत्र एधृ इत्यस्मात्

टेरे ३।४।७९॥ टितो लस्यात्मनेपदानां टेरेत्वं स्यात्। एधते। २२३४ सार्वधातुकमपित् १।२।४॥ अपित्सार्वधातुकं ङिद्वत्स्यात्। २२३५ आतो ङितः ७।२।८१॥ अतः परस्य ङितामाकारस्य इय् स्यात्। एधेते। एधन्ते। २२३६ थासः से ३।४।८०॥ टितो लस्य थासः से स्यात्। एधसे। एधेथे। एधध्वे। 'अतो गुणे' (सू १९१)। एधे। एधावहे। एधामहे। २२३७ इजादेश्च गुरुमतोऽनृच्छः २।१।२६॥ इजादिर्यो धातुर्गुरुमानृच्छत्यन्यस्तत आम् स्याल्लिटि। 'आमो मकारस्य नेत्त्वम्'। आस्कासोरग्निधानाज्ज्ञापकात्। २२३८ आमः २।४।८१॥

कर्तरि लटि तस्यात्मनेपदप्रथमपुरुषैकवचने तादेशे शपि एधत इति स्थिते—टित आत्म। टेः ए इति च्छेदः। लस्येत्यधिकृतम्। तदाह—टितो लस्येति। 'आदेशानामि'ति शेषः। अत्रात्मनेपदशब्देन तङेव गृह्यते नत्वानोऽपि। तेन पचमानो यजमान इत्यादावेत्वं नेति भाष्ये स्पष्टम्। एधत इति। अत्र तकारादकारस्य व्यपदेशिवद्भावेनान्त्यादित्वेन टित्त्वादेत्वम्। अथ लटः प्रथमपुरुषद्विवचने आतामित्यादेशे 'टित आत्मनेपदाना'मिति आम एत्वे शपि एध आते इति स्थिते ङित्कार्यं वक्ष्यन् ङित्त्वमाह—सार्वधातुकमपित्। 'गाङ्कुटादिभ्य' इत्यतो ङिदित्यनुवर्तते। अङितो ङित्त्वं वास्तवं न सम्भवतीति ङिद्वदिति लभ्यते। तदाह—ङिद्वदिति। आतो ङितः। ङित इत्यवयवषष्ठी। 'अतो येय' इत्यस्मात् अत इति पञ्चम्यन्तं, इय इति प्रथमान्तं चानुवर्तते। यकारादकार उच्चारणार्थः। तदाह—अतः परस्येति। ङिदामित्यनन्तरं अवयवस्येति शेषः। एधेते इति। एध आते इति स्थिते, आकारस्य इय्, 'आदृगुणः', 'लोपो व्योर्वली'ति यकारलोप इति भावः। एधन्त इति। लटः प्रथमपुरुषबहुवचने झादेशे परे शपि झकारस्य अन्तादेशे परूपे टेरेत्वमिति भावः। अथ लटो मध्यमपुरुषैकवचने थासादेशे कृते टित आत्मनेपदानामित्येत्वे प्राप्ते। थासः से। से इति लुप्तप्रथमाकम्। एधस इति। थासि शपि थासः सेभावः। एधेथे इति। लटो मध्यमपुरुषद्विवचने आथामादेशे शपि आम एत्वे आकारस्य इयादेशे गुणे थलोप इति भावः। एधध्व इति। लटो मध्यमपुरुषबहुवचने ध्वमादेशे शपि टेरेत्वे रूपम्। लट उत्तमपुरुषैकवचने इडादेशे एत्वे शपि एध ए इति स्थिते प्रक्रियां दर्शयति—अतो गुणे इति। 'अतो गुणे' इति परूपे वृद्ध्यपवादे कृते सति 'एधे इति रूपमित्यर्थः। एधावहे इति। लट उत्तमपुरुषबहुवचने वहि इत्यादेशे टेरेत्वे शपि अतो दीर्घः। एधामह इति। लट उत्तमपुरुषबहुवचने महि इत्यादेशे टेरेत्वे शपि अतो दीर्घः। महिङिति ङकारस्तङ्प्रत्याहारार्थः। इति लट्प्रक्रिया। इजादेश्च। नञः ऋच्छ इत्यनेन समासे अनृच्छ इत्यस्मात् पञ्चमी। 'धातोरेकाच' इत्यतो धातोरित्यनुवर्तते। 'कास्प्रत्यया'दित्यतः आमिति, लिटीति चानुवर्तते। तदाह—इजादिरित्यादिना। आस्कासोरिति। 'कास्प्रत्ययादाममन्त्रे लिटी'ति, 'दयायासश्चेति च, कासधातोः आसधातोश्च लिटि आम् वि-

आमः परस्य लुक्स्यात्। २२३९ कृञ्चानुप्रयुज्यते लिटि ३।१।४०॥ आमन्ताल्लिट् पराः कृम्वस्तयोऽनुप्रयुज्यन्ते। 'आम्प्रत्ययवत्कृञोऽनुप्रयोगस्य' (सू २२४०) इति सूत्रे कृञ्ग्रहणसामर्थ्यादनुप्रयोगोऽन्यस्यापीति ज्ञायते। तेन 'कृम्वस्तियोगे—' (सू २११७) इत्यतः 'कृञो द्वितीय—' (सू २१२६) इति अकारेण प्रत्याहाराश्रयणात्कृम्वस्तिलाभः। तेषां क्रियासामान्यवाचित्वादाम्प्रकृतीनां

हितः। तत्र मकारस्य इत्संज्ञकत्वे 'मिदचोऽन्त्यात् पर' इति आकारादाकारान्तरं स्यात्। ततश्च सवर्णदीर्घे कृते कास् आस् इत्येव भवतीति आम्विधिरनर्थकः स्यात्। अत आमो मकारस्य नेत्संज्ञेति विज्ञायत इत्यर्थः। तथाच एध् आम् ल इति स्थिते-आमः। 'मन्त्रे घसह्वरे'त्यतः लेरिति 'व्यत्ययो बहुल'मित्यत लुगिति चानुवर्तते। तदाह—आमः परस्य लेरिति। अत्रेदमवधेयम्। 'कृन्मेजन्त' इत्यत्र कृञो मान्तस्तदन्तमव्ययमिति व्याख्याने एधामित्यादि नाऽव्ययं, लिट एव कृत्वात्, तस्य च मान्तत्वाभावात्। तथाच प्रत्ययलक्षणेन कृदन्तत्वात् प्रातिपदिकत्वे स्वाद्युत्पत्तौ 'आम' इति लुक्। लेरिति तु नानुवर्तते। मान्तं कृदन्तमव्ययमिति व्याख्याने तु प्रत्ययलक्षणेन कृदन्तत्वात् एधामिति मान्तमव्ययम्। ततः सुबुत्पत्तौ अव्ययादाप्सुप इति लुक्। 'आम' इत्यनेन तु परिशेषाल्लेरेव लुक्सिद्धेर्लेरिति नानुवर्तनीयम्। 'आमः परस्य ले'रिति विवरणवाक्ये तु लेरिति स्पष्टार्थमेव। एवं च एधामित्यव्ययं न वेति पक्षद्वयम्' उभयथापि सुबन्तं पदमिति भाष्ये स्पष्टम्। कृञ्चानु। कास्प्रत्ययादामित्यतः आमित्यनुवृत्तं पञ्चम्या विपरिणम्यते। प्रत्ययग्रहणपरिभाषया तदन्तं गृह्यते। लिटि परे यः कृञ् सः अनुप्रयुज्यत इत्यन्वयः। फलितमाह—आमन्ताल्लिट्परा इति। लिट्शिरस्का इत्यर्थः। कृम्वस्तय इति। कृञित्यनेन कृम्वस्तीनां ग्रहणमिति भावः। अनुप्रयुज्यन्त इति। प्रश्नब्दादनुशब्दाच्चाव्यवहिताः पश्चात्प्रयुज्यन्त इत्यर्थः। 'विपर्यासनिवृत्त्यर्थं व्यवहितनिवृत्यर्थं चे'ति वार्तिकात् भाष्याच्च। एवं च 'तं पातयां प्रथममास यपात पश्चात्' 'प्रभ्रंशयां यो नहुषं चकार' इत्यादिप्रयोगाः प्रामादिका एव। नातोऽम् स्यात्, कृञ्चानुप्रयुज्यत इत्युक्तसमुच्चयार्थश्चकारः। ननु कृञ एवाऽनुप्रयोगश्रवणात् कथं भ्वस्त्योरप्यनुप्रयोग इत्यत आह—आम्प्रत्ययवदित्यादिना। 'कृञ्चानुप्रयुज्यत' इत्यत्र कृञ एकस्यैवानुप्रयोगविधौ सति 'आम्प्रत्ययव' दिति सूत्रे अनुप्रयुज्यमानस्येत्यस्य कृञ इति विशेषणं व्यर्थं स्यात्। धात्वन्तरस्यानुप्रयोगाऽप्रसक्तेः। ततश्च कृञ इति विशेषणादन्यस्यापि अनुप्रयोगो विज्ञायत इत्यर्थः। ननु कृञोऽन्यस्याप्यनुप्रयोगो विज्ञायतां, भ्वस्त्योरपीत्येव कुत आयातमित्यत आह—तेनेति। कृञ्ग्रहणेनेत्यर्थः। प्रत्याहाराश्रयणादिति। एतच्च भाष्ये स्पष्टम्। नन्वनुप्रयुज्यमानानां कृम्वस्तीनां आम्प्रकृतिभूतानां च कथमन्वय इत्यत आह—तेषामित्यारभ्याभेदेनान्वय इत्यन्तेन। सामान्यविशेषयोरभेदान्वयस्य न्याय्यत्वादिति भावः। कृञ

विशेषवाचित्वात्तदर्थयोरभेदेनान्वयः। सम्पदिस्तु प्रत्याहारेऽन्तर्भूतोऽप्यनन्वितार्थत्वान्न प्रयुज्यते। कृञस्तु क्रियाफले परगामिनि परस्मैपदे प्राप्ते। **२२४० आम्प्रत्ययवत्कृञोऽनुप्रयोगस्य १।३।६३॥** आम्प्रत्ययो यस्मादित्यतद्गुणसंविज्ञानो बहुव्रीहिः। आम्प्रकृत्या तुल्यमनुप्रयुज्यमानात्कृञोप्यात्मनेपदं स्यात्। इह

इव भ्वस्त्योरपि क्रियासामान्यवाचित्वात् धातूनामनेकार्थत्वादिति ज्ञेयम्। ननु 'कृभ्वस्तियोग' इत्यस्य 'कृञो द्वितीयेऽस्य च सूत्रस्य मध्ये 'अभिविधौ सम्पदा च' इति पठितम्। एवं च कृञ्प्रत्याहारे सम्पदोऽपि कुतो न ग्रहणमित्यत आह—सम्पदिरिति। अनन्वितार्थत्वादिति। सिद्धस्य वस्तुनो रूपान्तरापत्तिः सम्पदेरर्थः। एधादिधातोरस्वाम्प्रकृतिभूतस्य वृद्ध्यादिरर्थः। तयोरुभयोरपि विशेषरूपत्वेन सामान्यविशेषभावाऽभावेन अभेदान्वयासम्भवादित्यर्थः। अत एव कृभ्वस्तीनां ग्रहणमिति भाष्यं सङ्गच्छत इति भावः। ननु आम्प्रत्ययवदिति कृञ आत्मनेपदविधायकसूत्रं वक्ष्यमाणं व्यर्थम्। 'स्वरितञितः' इत्येव तत्सिद्धेरित्याशङ्क्याह—कृञस्त्विति। आम्प्रत्ययवत्सूत्रः। अनुदात्तङित इत्यत आत्मनेपदमित्यनुवर्तते। तत्राम्प्रत्ययस्यात्मनेपदाऽभावादाह—आम् प्रत्ययो यस्मादित्यतद्गुणसंविज्ञानो बहुव्रीहिरिति। तस्य अन्यपदार्थस्य गुणाः विशेषणानि वर्तिपदार्थरूपाणि, तेषां संविज्ञानं क्रियान्वयितया ज्ञानं न विद्यते यस्य बहुव्रीहेः सः अतद्गुणसंविज्ञानः। यथा चित्रगुमानयेति। अत्र हि पुरुषस्यैवान्यपदार्थस्य क्रियान्वयः। न तु चित्राणां गवामपि। तथा च प्रकृते आम्प्रत्ययविनिर्मुक्तः आम्प्रत्ययप्रकृतिभूतः एधादिधातुरेव आम्प्रत्ययशब्देन लभ्यत इति भावः। 'आम्प्रत्ययव'दिति तृतीयान्ताद्वतिः। अनुप्रयुज्यत इत्यनुप्रयोगः। कर्मणि घञ्। पञ्चम्यर्थे षष्ठी। तदाह—आम्प्रकृतेत्यादिना। आम्प्रकृतेर्भावितुं योग्यं यदात्मनेपदं तत अनुप्रयुज्यमानात् कृञोऽपि स्यादिति यावत्। अत्र न प्रत्याहारग्रहणम्। 'अनुप्रयोगस्येत्येव सिद्धे कृञ्ग्रहणादिह न प्रत्याहारग्रहण'मिति भाष्यम्। परगामिन्यपि क्रियाफले कृञ्धातोरात्मनेपदार्थोऽयमारम्भः। इन्द्राञ्चकारेत्यादौ तु परगामिनि क्रियाफले नाऽनेनात्मनेपदम्। आम्प्रकृतेः 'इदि परमैश्वर्ये' इति धातोरात्मनेपदाऽभावात् तस्य परस्मैपदित्वात्। एतदर्थमेव आम्प्रत्ययवदित्युपात्तम्। नन्विन्द्राचकारेत्यादौ मास्वनेन सूत्रेण परगामिनि क्रियाफले आत्मनेपदम्। आत्मगामिनि तु क्रियाफले 'स्वरितञितः' इत्यात्मनेपदं दुर्वारम्। अस्य सूत्रस्य एधाञ्चक्रे इत्यादौ परगामिनि क्रियाफले आत्मनेपदस्याऽप्राप्तस्य विधान एव समर्थतया आत्मगामिनि क्रियाफले 'स्वरितञितः' इति प्राप्तस्यात्मनेपदस्य निवारणे सामर्थ्याभावादित्यत आह—इहेति। इह 'आम्प्रत्ययवत् कृञोऽनुप्रयोगस्ये'ति सूत्रे 'पूर्वसनः' इति पूर्वसूत्रात् पूर्ववदित्यनुवर्त्य 'आम्प्रत्ययवत् कृञोऽनुप्रयोगस्ये'त्येकं वाक्यं, 'पूर्ववत् कृञोऽनुप्रयोगस्ये'ति अन्यद्वाक्यमिति, वाक्यद्वयं सम्पाद्यम्। तत्र पूर्ववदिति

पूर्ववत् इत्यनुवर्त्य वाक्यभेदेन सम्बध्यते। पूर्ववदेवात्मनेपदं न तु तद्विपरीतमिति। तेन कर्तृगेऽपि फले इन्दाञ्चकारेत्यादौ न तङ्। २२४१ लिटस्तझयोरेशिरेच् ३।४।८१॥ लिडादेशयोस्तझयोः एश् इरेच् एतौ स्तः। एकारोच्चारणं ज्ञापकं 'तङादेशानां टेरेत्वं न' इति। तेन डारौरसा न। कृ ए इति स्थिते। २२४२ असंयोगाल्लिट् कित् १।२।५॥ असंयोगात्परोऽपिल्लिट् कित्स्यात्। 'क्ङिति च' (सू २२१७) इति निषेधात् 'सार्वधातुकार्धधातुकयोः' (सू २१६८) इति गुणो न। द्वित्वात्परत्वाद्यणि प्राप्ते। २२४३ द्विर्वचनेऽचि १।१।५९॥ द्वित्वनिमित्तेऽ-

---

तृतीयान्ताद्धेतिः। पूर्वेण-पूर्वप्रयुक्तेन एधादिधातुना तुल्यमित्यर्थः। तत्र वाक्यद्वयस्य समानार्थकत्वे वैयर्थ्यात् द्वितीयं वाक्यं नियमार्थं सम्पद्यते। पूर्ववदेव आत्मनेपदं न तु तद्विपरीतमिति। एवं च पूर्ववाक्येन एधाञ्चक्रे इत्यादौ कृञः परगामिन्यपि क्रियाफले आत्मनेपदविधिः, द्वितीयवाक्येन तु इन्दाञ्चकारेत्यादौ कर्तृगामिनि क्रियाफले 'स्वरितञित' इत्यात्मनेपदस्य निवृत्तिः फलति। तदाह—नेनेति। द्वितीयवाक्येनेत्यर्थः। न तङिति। न आत्मनेपदमित्यर्थः। एवं चानुप्रयुज्यमानात्कृञः लिटस्तङि प्रथमपुरुषैकवचने तादेशे एधाम् कृ त इति स्थिते। लिटस्तझयोरेशि। ननु लिटस्तझयोरिशिरिजित्येवास्तु। आदेशयोरेकारोच्चारणं व्यर्थम्। टित आत्मनेपदानामित्येत्वेनैव सिद्धेरित्यत आह—एकारोच्चारणमिति। ज्ञापनस्य फलमाह—तेन डारौरसा नेति। डा-रौ रस् एषां लुडादेशभूतात्मनेपदादेशानां टेरेत्वं नेत्यर्थः। वस्तुतस्तु परत्वादेरत्वे कृते पुनः प्रसङ्गविज्ञानेन डादिषु कृतेषु लक्षये लक्षणस्येति न्यायात् एवं नेति लुटः प्रथमस्येति सूत्रभाष्ये स्पष्टम्। कृ ए इति स्थिते इति। तकाराकारसकारत्वस्य एकारः शित्वात् सर्वादेश इति भावः। असंयोगाल्लिट्। अपिदिति। सार्वधातुकमपिदित्यतस्तदनुवृत्तेरिति भावः। सार्वधातुकमपिदिति किन्त्वं तु नात्र प्रवर्तते। लिडादेशानामार्धधातुकत्वादिति बोध्यम्। किन्वस्य फलमाह—क्ङिति चेति। द्वित्वादिति। कृ ए इति स्थिते लिटि धातोरिति द्वित्वात् परत्वात् इको यणचीति ऋकारस्य यणादेशे रेफे प्राप्ते सतीत्यर्थः। कृते तु यणि एकाच्त्वाभावात् लिटि धातोरिति द्वित्वं न स्यादिति भावः। द्विर्वचनेऽचि। द्विरुच्यते येन परनिमित्तेन तत् द्विर्वचनं द्वित्वनिमित्तमिति यावत्। अचीत्यस्य विशेषणमिदम्। 'अचः परस्मिन्'नित्यतः अच इति 'स्थानिवदादेश' इत्यतः आदेश इति न पदान्तेत्यतः नेति चानुवर्तते। द्विर्वचन इत्यावर्तते। एवं च द्वित्वे कर्तव्ये सतीत्यपि लभ्यते। तदाह—द्वित्वनिमित्ते अचीत्यादिना। द्वित्वे कर्तव्ये-सतीत्युक्तेः कृते द्वित्वे चक्रे इत्यादौ यणादयो भवन्ति। अन्यथा तु न स्युः। द्वित्वनिमित्तस्य अचः सत्वात्। द्वित्वनिमित्त इति किम्। दुद्यूषति। दिव् धातोः सनि द्वित्वात्परत्वात् ऊठि कृते द्वित्वात्प्राग्यण् भवत्येव। तथा च द्यू इत्यस्य द्वित्वे दुद्यूषतीति सिध्यति। द्वित्वे कर्तव्ये यणो निषेधे तु दिद्यूषतीत्यभ्यासे इकार एव श्रूयेत।

चि परे अच आदेशो न स्याद् द्वित्वे कर्तव्ये । २२४४ उरत् ७।४।६६॥ अभ्यासऋवर्णस्यात्यात्प्रत्यये परे । रपरत्वम् । 'हलादिः शेषः' (सू २१७६) । प्रत्यये किम् ? वव्रश्च । २२४५ कुहोश्चुः ७।४।६२॥ अभ्यासकवर्गहकारयोश्चवर्गादेशः

न तूकारः । द्वित्वनिमित्त इत्युक्तौ तु ऊठि परे द्वित्वात् प्राक् यणो न निषेधः । ऊठो द्वित्वनिमित्तत्वाभावात् । अचीति किम् । जेघ्रीयते । अत्र घ्राधातोर्यङि द्वित्वात् प्राक् 'ई घ्राध्मोः' इति ईकारादेशो न निषिध्यते । ईत्वस्य द्वित्वनिमित्तयङ्निमित्तकत्वेऽपि द्वित्वनिमित्ताज्जनिमित्तकत्वाभावात् । अचः किम् । असूषुपत् । इह 'स्वापेश्चङि द्वित्वात् प्राक् 'स्वापेश्चङी'ति वर्तमानस्य सम्प्रसारणं न निषिध्यते । तस्याजादेशत्वाभावात् । ततश्च कृते सम्प्रसारणे सुप् इत्यस्य द्वित्वे अभ्यासे उकारस्य अवर्णो सम्भवति । सम्प्रसारणे निषिद्धे तु स्वप् इत्यस्य द्वित्वे अभ्यासे उकारो न श्रूयेत । एवं च प्रकृते यणादेशात् प्राक् लिटि धातोरिति द्वित्वे कृ कृ ए इति स्थिते—उरत् । उः अत् इति च्छेदः । ऋ इत्यस्य उरिति षष्ठ्येकवचनम् । 'अत्र लोपोऽभ्यासस्ये'त्यस्मादभ्यासस्येत्यनुवर्तते । अङ्गस्येत्यधिकृतम् । तद्वशात् प्रत्यये परत एव अङ्गसंज्ञाविधानात् । तदाह—अभ्यासऋवर्णस्येत्यादिना । रपरत्वमिति । अभ्यासऋवर्णादेशस्याकारस्योरण्रपर इति रपरत्वमित्यर्थः । तथा च कर् कृ ए इति स्थिते । हलादिः शेषः इति । रेफस्य निवृत्तिरिति भावः । प्रत्यये किमिति । अङ्गेनैव प्रत्ययस्याक्षिप्तत्वात् प्रत्यये परत इति किमर्थमित्यर्थः । वव्रश्चेति । 'ओ व्रश्चू' छेदने, लिटि णल् द्वित्वं लिट्यभ्यासस्येति अभ्यासरेफस्य सम्प्रसारणं ऋकारः । उरत् । रपरत्वम् । हलादिः शेषः । वव्रश्चेति रूपम् । अत्र अभ्यासऋवर्णस्येति रेफस्थानिकस्य सम्प्रसारणस्य यः उरदित्वसम्पन्नः अकारः तस्य अचः परस्मिन्निति स्थानिवत्त्वेन सम्प्रसारणतया तस्मिन् परे वकारस्य 'न सम्प्रसारणे सम्प्रसारण'मिति निषेधान्न सम्प्रसारणमिति स्थितिः । उरदित्यत्र 'प्रत्यये परत' इत्यनुक्तौ तु सम्प्रसारणभूतऋकारस्थानिकस्य अकारस्य परनिमित्तकत्वाभावेन स्थानिवत्त्वाप्रसक्तेः सम्प्रसारणत्वाभावात्तस्मिन् परतो 'न सम्प्रसारणे सम्प्रसारणमि'ति निषेधो न स्यादिति भावः । एवं च क कृ ए इति स्थिते—कुहोश्चुः । कु ह इत्यनयोर्द्वन्द्वात् षष्ठीद्विवचनम् । 'अत्र लोपोऽभ्यासस्ये'त्यतः अभ्यासस्येत्यनुवर्तते । तदाह—अभ्यासेति । यद्यपि स्थानिनां कवर्गीयाणां हकारस्य च षट्त्वात् चवर्गीयाणां पञ्चत्वान्न यथासङ्ख्यम्, नापि स्थानत आन्तर्यम्, कण्ठताल्वोष्ठस्थानभेदात् । आभ्यन्तरप्रयत्नसाम्यं तु कवर्गचवर्गयोरविशिष्टम् । हकारचवर्गयोस्तु नास्त्येव तत् । अतो बाह्यप्रयत्नत एवान्तर्यमिह व्यवस्थापकमाश्रयणीयम् । तत्र प्रथमस्य कवर्गीयस्य प्रथम एव चवर्गीयो भवति, अघोषश्वासविवाराल्पप्राणप्रयत्नसाम्यात् । नतु द्वितीयः, महाप्राणत्वात् । नापि तृतीयपञ्चमौ, घोषसंवारनादप्रयत्नत्वात् । नापि चतुर्थः, घोषसंवारनादमहाप्राणप्रयत्नत्वात् । तथा द्वितीयस्य

स्यात् । एधाञ्चक्रे । एधाञ्चक्राते । एधाञ्चक्रिरे । २२४६ एकाच उपदेशेऽनुदात्तात् ७।२।१०॥ उपदेशे यो धातुरेकाजनुदात्तश्च ततः परस्य वलादेरार्धधातुकस्येट् न स्यात् । उपदेशे इत्युभयान्वयि । एकाच इति किम् । यङ्लुग्व्यावृत्तिर्यथा स्यात् । स्मरन्ति हि—

कवर्गीयस्य द्वितीय एव चवर्गीयो भवति, अघोषश्वासविवारमहाप्राणप्रयत्नत्वात् । नतु प्रथमः, अल्पप्राणत्वात् । नापि तृतीयपञ्चमौ, घोषसंवारनादाल्पप्राणप्रयत्नत्वात् । नापि चतुर्थः, घोषसंवारनादप्रयत्नत्वात् । तथा तृतीयस्य कवर्गीयस्य तृतीय एव चवर्गीयो भवति । घोषसंवारनादाल्पप्राणप्रयत्नत्वात् । न तु प्रथमः, अघोषश्वासविवारप्रयत्नत्वात् । अत एव न द्वितीयोऽपि, महाप्राणप्रयत्नत्वाच्च । नापि चतुर्थः, महाप्राणत्वात् । नापि पञ्चमः, घोषसंवारनादाल्पप्राणसाम्येऽपि अनुनासिकतया भेदात् । तथा चतुर्थस्य कवर्गीयस्य चतुर्थ एव चवर्गीयो भवति, घोषसंवारनादमहाप्राणप्रयत्नत्वात् । न तु प्रथमः, अघोषश्वासविवाराल्पप्राणप्रयत्नत्वात् । नापि द्वितीयः, अघोषविवारश्वासप्रयत्नत्वात् । नापि तृतीयपञ्चमौ, अल्पप्राणत्वात् । पञ्चमस्य तु कवर्गीयस्य अनुनासिकत्वात् ञकार एव । हकारस्य तु घोषसंवारनादमहाप्राणवतः तादृशो वर्गचतुर्थ एव झकार इति विवेकः । प्रकृते तु क कृ ए इति स्थिते अभ्यासककारस्य चकारे ऋकारस्य यणि रेफः । तदाह—एधाञ्चक्र इति । एकककृतका भूतानद्यतनपरोक्षा वृद्धिरूपा क्रियेत्यर्थः । एधाञ्चक्राते इति । कृञो लिटः आतामि टेरेत्वम् । 'द्विर्वचनेऽची'ति यणि निर्विद्धे 'कृ' इत्यस्य द्वित्वे उरदत्त्वम् । हलादिः शेषः । सवर्णम् । यण् । न च आतामित्यस्य द्वित्वनिमित्तत्वेऽपि आकारस्याचो द्वित्वनिमित्तत्वाभावात् कथमिह 'द्विर्वचनेऽची'ति यण्निषेध इति वाच्यम् । साक्षाद्वा समुदायघटकतया वा द्वित्वप्रयोजकस्यैव द्वित्वनिमित्तशब्देन विवक्षितत्वादिति भावः । एधाञ्चक्रिर इति । झस्य इरेच् । कृ इत्यस्य द्वित्वादि पूर्ववत् । अथ लिटि थासः सेभावे कृ इत्यस्य द्वित्वादौ एधां चक्रे से इति 'आर्धधातुकस्येड्वलादे'रिति इडागमे प्राप्ते—एकाच उपदेशेऽनुदात्तात् । 'ऋत इद्धातो'रित्यतो धातोरित्यनुवर्तते । 'नेड्वशिकृती'त्यतः नेति च । तदाह—उपदेशे यो धातुरेकाजिति । एकः अच् यस्येति बहुव्रीहिः । आर्धधातुकस्येति । यद्यपीदं न श्रुतम् । नाप्यनुवृत्तिलभ्यम् । तथाप्यार्थिकमिदम् । आर्धधातुकस्यैवेटः प्राप्तेः । वृत्तिग्रन्थे तु आर्धधातुकस्येति नोपात्तम् । नन्वेकाच उपदेशेऽनुदात्तादित्यत्र यदि उपदेश इत्येतदेकाच इत्यत्रान्वेति तदा कर्तुमित्यत्र इण्निषेधो न स्यात् । कृञ्धातोरूदृदन्तैरित्यादिना अनुदात्तत्वस्य वक्ष्यमाणत्वेऽपि तुमुन्प्रत्यये कृते 'ञ्नित्यादिर्नित्य'मित्याद्युदात्तत्वात् । यदि तु उपदेश इत्येतत् अनुदात्तादित्यनेनान्वेति तदा यद्यपि नार्थं दोषः । कृते तुमुन्प्रत्यये उदात्तत्वेऽपि धातूपदेशकाले अनुदात्तत्वेन तत्र इण्निषेधस्य निर्बाधत्वात् । तथापि एधाञ्चक्रुषे इत्यादौ इण्निषेधो न स्यात् । द्वित्वे

'शितपा शपाऽनुबन्धेन निर्दिष्टं यद्गणेन च ।
यत्रैकाज्ग्रहणं चैव पञ्चैतानि न यङ्लुकि ॥' इति ।

एतच्चेहैवैकाज्ग्रहणेन ज्ञाप्यते । अचः इत्येवैकत्वविवक्षया तद्वतो ग्रहणेन च सिद्धे एकग्रहणसामर्थ्यादनेकाच्कोपदेशो व्यावर्त्यते। तेन वधेर्हन्त्युपदेशे एकाचोऽपि न निषेधः। आदेशोपदेशेऽनेकाच्कत्वात्। अनुदात्ताश्चानुपदमेव सङ्ग्रहीष्यन्ते । एधाञ्चक्रुषे । एधाञ्चक्राये। २२४७ इणः षीध्वंलुङ्लिटां धोऽङ्गात् ८।३।७८॥

कृते अनेकाच्त्वादित्यत आह—उपदेश इत्युभयान्वयीति । 'उपदेश' इत्येतत् 'एकाजि'त्यत्रा'नुदात्ता'दित्यत्र चान्वेति । मध्यमणिन्यायादिति भावः । ननु ऊदृदन्तैरित्यादिना परिगणितानामनुदात्तोपदेशधातूनामेकाच्त्वाद्व्यभिचाराद्देकाज्ग्रहणं मास्तु । उपदेशेऽनुदात्तादित्येवास्तु । एतावतैव कर्तुं चकृषे इत्यादावि ङ्निषेधसिद्धेरिति पृच्छति—एकाचः किमिति । यङ्लुग्व्यावृत्तिरिति । यङ्लुकि चर्करितेत्यादौ हृणिनषेधव्यावृत्तये एकाज्ग्रहणमित्यर्थः । ननु कृतेऽप्येकाज्ग्रहणे कथं यङ्लुग्व्यावृत्तिः । कृते द्वित्वे अनेकाच्त्वेऽपि धातूपदेशे एकाच्त्वादित्यत आह—स्मरन्ति हीति । प्राचीनाचार्या निबध्नन्तीत्यर्थः । शितपा शपेत्यादेरुदाहरणानि यङ्लुङ्निरूपणे स्पष्टीभविष्यन्ति। नन्विह एकाज्ग्रहणाद्यङ्लुकि हृणिनषेधस्य व्यावृत्तावपि शितबादिनिर्दिष्टानां यङ्लुकि व्यावृत्तिः प्राचीनाचार्यसम्मताऽपि पाणिनेरसंमतेवेत्यत आह—एतच्चेति । एतत् 'शितपा शपे'ति श्लोकसिद्धं सर्वमपि, इह सूत्रे एकाज्ग्रहणेनैव एकदेशानुमत्या ज्ञाप्यत इत्यर्थः। ननु 'हनो वधलिङि' 'लुङ्लिङो'रिति हन धातोर्वधादेशे कृते अवधीदित्यत्र इडागमो न स्यात् । वधादेशे कृते अनेकाच्त्वेऽपि धातूपदेशे हन्तेरेकाच्त्वादित्यत आह—अच इत्येवैकत्वेत्यादि व्याचष्टे इत्यन्तम् । 'एकाच उपदेशेऽनुदात्ता'दित्यत्र हि एकग्रहणमपनीयाच इत्युक्तेऽपि एकाच्कादिति लभ्यते। एकवचनोपात्तस्यैकत्वस्य त्यागे प्रमाणाभावात् । न चैवं सति एकत्वविशिष्टादचः परस्येत्येव लभ्येत। नत्वेकाच्कादिति बहुव्रीह्यर्थं इति वाच्यम्। अनुदात्तोपदेशपरिगणने शकलृपचिमुष्यादीनां परिगणनसामर्थ्येन 'अच' इत्यस्य सत्वघटकत्वमाश्रित्य एकाज्वतो ग्रहणसम्भवात् । तदेवमच इत्यनेनैव एकाच्कादिति सिद्धे यदेकग्रहणं करोति तत्सामर्थ्यादुपदेशे सर्वत्र एकाजेव, न तु कस्मिंश्चिदप्युपदेशे अनेकाजित्यर्थंकल्पनया कदाचिदनेकाच्कोपदेशधातुव्यावर्त्यत इत्यर्थः । तेनेति । उपदेशे सर्वत्र एकाजेवेत्यर्थलाभेन, हन्त्युपदेशे हनिति स्थान्युपदेशे एकाचोऽपि सतो हनिति धातोरादेशस्य वधेः परस्य हृणिनषेधो नेत्यर्थः । कुत इत्यत आह—आदेशोपदेश इति । 'अवधी' दित्यत्र 'अतो हलादेर्लघो' रिति वृद्धि निवृत्तये हनो वधादेशस्य अदन्तताया भाष्ये उक्तत्वादिति भावः। ननु के ते अनुदात्ता धातव इत्यत आह—अनुदात्तास्त्वनुपदमेवेति। पदस्य पश्चादनुपदम् , पदमात्रे अतीते सतीत्यर्थः । अनन्तरमेवेति यावत्। एधाञ्चक्रुषे इति ।

इण्णन्तान्दृङ्ग्रात्परेषां षीध्वंलुङ्लिटां धस्य मूर्धन्यः स्यात्। एवाञ्चकृढ्वे। एधाञ्चक्रे। एधाञ्चकृवहे। एधाञ्चकृमहे। एधाम्बभूव। अनुप्रयोगसामर्थ्यादस्तेर्भूभावो न। अन्यथा हि 'कृञ्चानुप्रयुज्यते' इति 'कृभु'-इति वा ब्रूयात्। २२४८ अत आदेः ७।४।७०॥ अभ्यासस्यादेरतो दीर्घः स्यात्। पररूपाऽपवादः। एधामास। एधामासतुरित्यादि। एधिता। एधितारौ। एधितारः। एधितासे। एधितासाथे। २२४९

ढडभावे प्रत्ययावयवत्वात् षत्वम्। एधाञ्चक्राथे इति। लिटः आथामादेशः। टेरेत्वम्। द्विर्वादि पूर्ववत्। लिटो ध्वमष्टेरेत्वे द्विर्वादौ एधाञ्चकृ ध्वे इति स्थिते—इण्षीध्वंलुङ्लिटाम्। षीध्वं लुङ् लिट् एषां द्वन्द्वः। 'धः' इति षष्ठ्येकवचनम्। 'इण' इत्यत्रविशेषणम्। तदन्तविधिः। 'अपदान्तस्य मूर्धन्य' इत्यधिकृतम्। तदाह—इण्णन्तादित्यादिना। धकारस्य ढकारो मूर्धन्यः। घोषसंवारनादमहाप्राणप्रयत्नसाम्यात्। तदाह—एधाञ्चकृढ्व इति। उत्तमपुरुषैकवचने लिटि एत्वे पूर्ववत् द्विर्वादौ कृते रूपमाह—एधाञ्चक्र इति। एधाञ्चकृवह इति। लिटो वहिभावे एत्वे द्विर्वादि पूर्ववत्। एवं लिटो महिभावे द्विर्वादि पूर्ववत्। सर्वत्रासंयोगाल्लिटकिदिति कित्त्वादुगुणाभावः। अथ भूधातोः लिङन्तस्यानुप्रयोगे उदाहरति—एधाम्बभूवेति। एधाञ्चक्र इत्यनेन समानार्थकम्। अनुप्रयुज्यमानस्य भूधातोः क्रियासामान्यार्थकत्वात्। नन्वस्तेरनुप्रयोगे लिङादेशस्यार्धधातुकत्वात् अस्तेर्भूरित्यार्धधातुके विहितो भूभावः कुतो न स्यादित्यत आह—अनुप्रयोगेति। 'कृञ्चानुप्रयुज्यत' इत्यत्र प्रत्याहारमाश्रित्य कृञ्वस्तीनामनुप्रयोगविधिसामर्थ्यादसधातोर्भूभावो नेत्यर्थः। तदेवोपपादयति—अन्यथेति। अनुप्रयुज्यमानस्यास्तेर्भूभावाभ्युपगमे कृञ्चानुप्रयुज्यत इत्यनुप्रयोगविधौ 'कृञ्चानुप्रयुज्यत' इति वा 'कृभुचानुप्रयुज्यत' इति वा ब्रूयात्। तावता एधाम्बभूवेति सिद्धेरित्यर्थः। यद्यपि कृञित्युक्तौ लाघवमस्ति। तथापि एकस्यैव भवतेरधिकस्य लाभाय कृञिति प्रत्याहारक्लेशो न कर्तव्य इति भावः। अत एवात उत्सावधातुक इति सूत्रभाष्येऽनुप्रयोगे भूभावेन अस्तेरबाधनमिति भाष्यं सङ्गच्छते। ततश्च अनुप्रयुज्यमानादसधातोर्लिटि भूभावनिवृत्तौ याञि एधाम् अस् अ इति स्थिते द्विर्वे हलादिशेषे अ अस् इति स्थिते सवर्णदीर्घे बाधित्वा अतो गुण इति पररूपे प्राप्ते—अत आदेः। 'अभ्यास' इत्यस्मादभ्यासस्येत्यनुवर्तते। 'दीर्घ इण' इत्यतो दीर्घ इति च। तदाह—अभ्यासस्येति। अत्र यद्वक्तव्यं तत्सामधातुप्रक्रियायां 'अ इवाचरति अतोऽत्यादिग्रन्थस्य व्याख्यानावसरे वक्ष्यते। एधामासेति। न चानुप्रयुज्यमानाभ्यामस्तिभूभ्यामाम्प्रत्ययविधित्यात्मनेपदं शङ्क्यम्। तत्र कृञ्ग्रहणेन प्रत्याहारग्रहणाभावस्य भाष्ये उक्तत्वात्। एधामासतुरित्यादीति। एधामासुः। एधामासिथ। एधामासथुः। एधामास। एधामास। एधामासिव। एधामासिम। इति लिट्प्रक्रिया। एधितेति। लुटः तादेशे एध् त इति स्थिते शबपवादस्तास् इट्। लुटः प्रथमस्येति डा टिलोपः एधितेति रूपम्।

धि च ८।२।२५॥ धादौ प्रत्यये परे सलोपः स्यात्। एधिताध्वे। २२५० ह एति ७।४।५२॥ तासस्त्योः सस्य हः स्यादेति परे। एधिताहे। एधितास्वहे। एधितास्महे। एधिष्यते। एधिष्येते। एधिष्यन्ते। एधिष्यसे। एधिष्येथे। एधिष्यध्वे। एधिष्ये। एधिष्यावहे। एधिष्यामहे। २२५१ आमेतः३।४।९०॥ लोट एकारस्याम्स्यात्। एधताम्। एधेताम्। एधन्ताम्। २२५२ सवाभ्यां वामौ ३।४।९१॥

'दीधीवेवीटा'मिति लघूपधगुणो न। एधितारावित्ति। लुट आताम् तास् इट् आतामित्यस्य रौभावः। 'रि चे'ति सलोपः। एधितार इति। झस्य रस् तास् इट् रि चेति सलोपः रुत्वविसर्गौ। एधितास इति। थासः से। तास् इट्। तासस्त्योरिति सलोपः। एधितासाथे इति। आथाम् टेरेत्वं तास् इट्। अथ ध्वमि टेरेत्वे तासि इटि एधितास्। ध्वे इति स्थिते—धि च। 'सः स्यार्द्धधातुके' इत्यतः स इत्यनुवर्तते। तासस्त्योरित्यतो लोप इति। अङ्क्षिप्तप्रत्ययो धीत्यनेन विशेष्यते। तदादिविधिः। तदाह—धातावित्ति। तासः सलोपे 'एधिताध्वे' इति रूपम्। अथ लुटः इडादेशे एत्वे तासि इटि एधितास् ए इति स्थिते—ह एति। ह इति प्रथमान्तम्। अकार उच्चारणार्थः। सः स्यार्द्धधातुक इत्यतः स इति तासस्त्योर्लोप इत्यतः तासस्त्योरिति चानुवर्तते। तदाह—तासस्त्योरिति। तासः सस्य हकारे 'एधिताहे' इति रूपम्। एधितास्वहे इति। लुटो वहिमाबः टेरेत्वम् तास् इट्। एवम् 'एधितास्महे' इति। तत्र महिमावो विशेषः। इति लुट्प्रक्रिया। एधिष्यत इति। लृटः तादेशे टेरेत्वम्। 'स्यतासी' इति शबपवादः स्यः इट् प्रत्ययावयवत्वात् षत्वम्। एधिष्येत इति। आताम्। टेरेत्वम्। स्यः। इट्। 'आतो ङित'इत्याकारस्य इय्। 'लोपो व्यो'रिति यलोपः। आदृगुणः षत्वम्। एधिष्यन्त इति। झस्य टेरेत्वम् झकारस्य अन्तादेशः स्यः इट् परूपं षत्वम्। थासादावपि लटीव सुयोजमिति मत्वा रूपाणि न प्रदर्शितानि। तत्र 'थासः से'। स्यः। इट्। षत्वम्। एधिष्यसे इति रूपम्। एधिष्येते इतिवदाथामि एधिष्येथे इति रूपम्। ध्वम एत्वे। स्यः इट। षत्वम्। एधिष्यध्वे इति रूपम्। इट्। एत्वे। स्यः। इडागमः। षत्वम्। अतो गुण इति पररूपम्। एधिष्ये इति रूपम्। वहिमब्लोष्टेरेत्वम्, स्यः। इट्। अतो दीर्घः। एधिष्यावहे। एधिष्यामहे इति रूपे। इति लृट्प्रक्रिया। आमेतः। आम् एतः इति च्छेदः। 'लोटो लङ्वत्' दित्यतो लोट इत्यनुवर्तते तदाह—लोट एकारस्येति। लोडादेशावयवस्य एकारस्येत्यर्थः। एधतामिति। लोटः तादेशे टेः एत्वे आमादेशे शपि रूपम्। एधेतामिति। आताम्। टेरेत्वं शप्। 'सार्वधातुकमपि'दिति ङित्त्वादतो ङित इत्याकारस्य इय्। गुणः। वकारलोपः। 'आमेत' इत्येकारस्य आम्। एधन्तामिति। झस्य टेरेत्वे शपि झकारस्य अन्तादेशे एकारस्य आम्। अथ लोटः थासः सेभावे शपि एधसे इति स्थिते। सवाभ्याम्। सश्च वश्च सवौ। ताभ्यामिति विग्रहः। अकारावुच्चारणार्थौ। वश्च मश्च वाडमौ। 'लोटो

षकारवकाराभ्यां परस्य लोडेतः क्रमात् व अम् एतौ स्तः। एधस्व। एधेथाम्। एधध्वम्। २२५३ एत ऐ ३।४।९३॥ लोडुत्तमस्य एत ऐ स्यात्। आमोपवादः। एधै। एधावहै। एधामहै। २२५४ आडजादीनाम् ६।४।७२॥ अजादीनामाट् स्याल्लुङादिषु। अटोऽपवादः। 'आटश्च' (सू २६९)। ऐधत। ऐधेताम्। ऐधन्त। ऐधथाः। ऐधेथाम्। ऐधध्वम्। ऐधे। ऐधावहि। ऐधामहि। २२५५ लिङः सीयुट् ३।४।१०२॥ (लिङात्मनेपदस्य सीयुडागमः स्यात्) सलोपः। एधेत। एधेयाताम्। २२५६ झस्य रन् ३।४।१०५॥ लिङो झस्य रन्स्यात्। एधेरन्। एधेथाः। एधे-

---

लकृव'दित्यस्मात् लोट इति 'आमेत' इत्यस्मादेत इति चानुवर्तते। तदाह—सकारेति। 'आमेत' इत्यस्यापवादः। एधस्वेति। 'एधसे' इत्यत्र एकारस्य व इति वकारसहितस्य आदेशः। एधेथामिति। आथाम्। टेरेत्वम्। शप्। 'आतो ङित' इत्याकारस्य इय्। गुणः। यलोपः। 'आमेत' इत्याम्। एधध्वमिति। ध्वमि शप्, टेरेत्वे कृते सवाभ्यामिति वकारात् परत्वादेकारस्य अम्। उत्तमपुरुषैकवचने इटि टेरेत्वे शपि 'आमेत' इत्येकारस्य आमि प्राप्ते। एत ऐ। 'ए' इति ह्रस्वप्रथमाकम्। 'लोटो लकृव'दित्यस्माल्लोट इति 'आडुत्तमस्य पिच्चे'त्यस्मादुत्तमस्येति चानुवर्तते। तदाह—लोडुत्तमस्येति। एधै इति। एध ए इति स्थिते एकारस्य ऐत्वे आडुत्तमस्येत्याडागमे, आटश्चेति वृद्धौ, वृद्धिरेचीति वृद्धिः। एधावहै एधामहै इति। वहिमह्योरेत्वे शपि एकारस्य ऐत्वे आटि सवर्णदीर्घः। इति लोट्प्रक्रिया। अथ एधधातोर्लङि तुझलझलृक्ष्वडुदात्त इत्यडागमे वृद्धि बाधित्वा परत्वादतो गुण इति पररूपे प्राप्ते। आडजादीनाम्। तुझादिष्विति। 'तुझलझलृक्ष्विं'त्यनुवृत्तेरिति भावः। अटोऽपवाद इति। अटि सति पररूपं स्यादिति भावः। आटश्चेत्यनन्तरं वृद्धिरिति शेषः। यद्यपि वृद्धिरेचीति एत्येधत्योति वा वृद्धौ इदं सिध्यति। तथापि ऐत्वतेत्वार्थम् सूत्रमिहापि न्याय्यत्वादुपन्यस्तम्। ऐधेतेति। लङस्तादेशे शपि आडागमे आटश्चेति वृद्धिः। लङादेशानां तिदादेशत्वाभावात् एत्वम् न भवति। आडजादीनामिति सूत्रं भाष्ये प्रत्याख्यातम्। ऐधेतामिति। आतामि शपि आटि वृद्धिः। 'आतो ङित' इत्याकारस्य इय् आदुगुणः यलोपः। ऐधन्तेति। झेरन्तादेशः। शप् आट् वृद्धिः। ऐधथा इति। थास्, शप्, आट, वृद्धिः। ऐधेथामिति। आथाम् शप् आट् वृद्धिः। इय्। आदुगुणः। यलोपः। ऐधध्वमिति। ध्वम्, शप्, आट्, वृद्धिः। ऐधे इति। इट् शप् आदुगुणः। आटो वृद्धिः। ऐधावहि ऐधामहि इति। वहिमह्योः शप्, आट्, वृद्धिः, अतो दोर्घः। इति लङ्प्रक्रिया। लिङः सीयुट्। स्पष्टम्। परस्मैपदानां लिङादेशानां यासुडागमविधानादात्मनेपदविषयमिदम्। सीयुटि टकार इत्। उकार उच्चारणार्थः। सलोप इति। 'लिङः सलोप' इत्यनेनेति शेषः। एधेतेति। लिङस्तादेशः। सीयुट्। शप्। सलोपः। आदुगुणः। यलोपः। एधेयाताम्। आतामि सीयुट् शप् सलोपः आदुगुणः। झस्य रन्।

याथाम्। एधेध्वम्। २२५७ इटोऽत् ३।४।१०६॥ लिङादेशस्यैटोऽत्स्यात्। एधेय। एधेवहि। एधेमहि। आशीर्लिङि आर्धधातुकत्वाल्लिङः सलोपो न। सीयुट्सुटोः प्रत्ययावयवत्वात्षत्वम्। एधिषीष्ट। एधिषीयास्ताम्। एधिषीरन्। एधिषीष्ठाः। एधिषीयास्थाम्। एधिषीध्वम्। एधिषीय। एधिषीवहि। एधिषीमहि। ऐधिष्ट। ऐधिषा-

'लिङः सीयुडि'त्यतो लिङ इत्यनुवर्तते। तदाह—लिङो झस्येति। लिङादेशस्य झस्येत्यर्थः। अनेकाल्त्वात्सर्वादेशः। एधेरन्निति। झस्य रन्। शप्। सीयुट्। सलोपः। आदूगुणः। यलोपः। एधेथा इति। थास् सीयुट् शप्। सीयुटस्सस्य लोपः। आदूगुणः। यलोपः। थासस्सस्य रुत्वविसर्गौ। एधेयाथामिति। आथाम्। सीयुट्। सलोपः। शप्। आदूगुणः। एधेध्वमिति। ध्वं सीयुट्। शप्। सलोपः। आदूगुणः। यलोपः। इटोऽत्। इटः अत् इति च्छेदः। 'लिङस्सीयुडि'त्यतो लिङ इत्यनुवर्तते। तदाह—लिङादेशस्येति। 'अच्च घे'रित्यत्रैव आदेशे तकार उच्चारणार्थ एव नश्विस्सञ्ज्ञक इति शब्देन्दुशेखरे 'दिव औदि'त्यत्र प्रपञ्चितम्। इत्सञ्ज्ञक एवेत्यन्ये। 'न विभक्ताविति निषेधस्तु न। आदेशत्वात् प्राक् विभक्तित्वाभावात्। 'झस्य र'ञ्जित्यत्र तु लक्ष्यानुरोधेन सयोगान्तलोपमाश्रित्य नकारान्तरप्रश्लेषादुपदेशे अन्त्यत्वाऽभावाच्चकारस्य नेत्सञ्ज्ञेत्यलम्। एधेयेति। इट्। तस्य अकारादेशः। सीयुट्। शप्। सलोपः। आदूगुणः। एधेवहि एधेमहीति। वहिमह्योः सीयुट्। सलोपः। शप्। आदूगुणः यलोपः। इति विधिलिङ्प्रक्रिया। अर्धधातुकत्वादिति। 'लिङाशिषी'त्यनेनेति भावः। सलोपो नेति। सार्वधातुकग्रहणस्य 'लिङः सलोपः' इत्यत्रानुवृत्तेरिति भावः। सीयुट्सुटोरिति। लक्ष्यभेदात्पुनः प्रवृत्तिरिति भावः। युगपदेवोभयोः षत्वमित्यन्ये। एधिषीष्टेति। आशिषि लिङः तादेशः आर्धधातुकत्वात् न शप् सीयुट् तकारस्य सुट् सीयुटस्सकारात् प्रागिडागमः। यलोपः, सीयुटः सुटश्च सकारस्य षत्वं, तकारस्य ष्टुत्वेन टकारः। एधिषीयास्तामिति। आताम् सीयुट्। आकारादुपरि तकारात्प्राक् सुट्। सीयुटः प्रागिट्। तत उत्तरस्य सकारस्य षत्वम्। एधिषीरन्निति। झस्य रन् सीयुट्। इडागमः। यकारलोपः। षत्वम्। एधिषीष्ठा इति। थास् सीयुट्, थकारस्य सुट्। सीयुटः प्रागिट्। सकारद्वयस्य षत्वम्। थकारस्य ष्टुत्वेन ठकारः। रुत्वविसर्गौ। एधिषीयास्थामिति। आथाम्। सीयुट्। आकारादुपरि थकारात् प्राक् सुट् सीयुटः प्रागिट् तत उत्तरस्य सकारस्य षत्वम्। एधिषीध्वमिति। ध्वम् सीयुट् यलोपः सीयुटः प्रागिट् षत्वम्। ढ्रेण: परत्वेऽपि ढ्रेणन्तादङ्गात्परत्वं नास्ति। इटः प्रत्ययभक्तत्वात्। ततश्च 'ढ्रेणः षोढ्व'मिति ढत्वं न भवति। एधिषीयेति। इटः अत्। सीयुट्। इट्। षत्वम्। एधिषीवहि एधिषीमहीति। वहिमह्योरसीयुट्। इट् षत्वम्। इत्याशीर्लिङ्प्रक्रिया। ऐधिष्टेति। लुङः तादेशः। च्लिः। सिच्। इट्। धातोराट्। वृद्धिः। षत्वम्। ष्टुत्वम्। ऐधिषातामिति। आताम्। च्लिः। सिच्। इट्। आट्। वृद्धिः। षत्वम्। अथ झस्य

ताम् । २२५८ आत्मनेपदेष्वनतः ७।१।५॥ अनकारात्परस्यात्मनेपदेषु झस्य 'अत्' इत्यादेशः स्यात् । ऐधिषत । ऐधिष्टाः । ऐधिषाथाम् । 'इणः षीध्वंलुङ्लिटां धोऽङ्गात्' (सू २२४७) । ऐधिढ्वम् । इड्भिन्न एव इणिह 'गृह्यत' इति मते तु ऐधिध्वम् । ढधयोर्वस्य मस्य च द्वित्वविकल्पात्षोडश रूपाणि । ऐधिषि । ऐधिष्वहि । ऐधिष्महि । ऐधिष्यत । ऐधिष्येताम् । ऐधिष्यन्त । ऐधिष्यथाः । ऐधिष्येथाम् । ऐधिष्य-

---

आदेर्झकारस्य झोऽन्त इत्यन्तादेशे प्राप्ते—आत्मनेपदेषु । 'झोऽन्त' इत्यतः झ इति षष्ठ्यन्तमनुवर्तते । 'आत्मनेपदेष्वि'ति षष्ठ्यर्थे सप्तमी । आत्मनेपदावयवस्य झकारस्येति लभ्यते । 'अदभ्यस्ता'दित्यतः अदित्यनुवर्तते । न अत् अनत् । तस्मादिति विग्रहः । तदाह—अनकारादित्यादिना । ऐधिषतेति । झावयवझकारस्य अत् इत्यादेशः । च्लिः । सिच् । इट् । आट् । वृद्धिः । षत्वम् । ऐधिष्टा इति । थास् च्लिः । सिच् इट् । आट् । वृद्धिः । षत्वं थकारस्य ष्टुत्वेन ठकारः । रुत्वविसर्गौ । ऐधिषाथामिति । आथाम् । च्लिः । सिच् । इट् । आट् । वृद्धिः । षत्वम् । अथ ध्वमो धस्य ढत्व स्मारयति—इणः षीध्वमिति । ऐधिढ्वमिति । ध्वम् । च्लिः । सिच् । इट् । आट् । वृद्धिः । 'धि चे'ति सस्य लोपः । 'इणः षीध्व मिति धकारस्य ढत्वम् । इटः लुप्तसिज्भक्तत्वा सिजन्ताक्रान्तभूतत्वेन इडन्तस्य इण्णन्ताङ्गत्वादिति भावः । इड्भिन्न एवेति । उत्तरसूत्रे 'विभाषेट' इत्यत्र इड्ग्रहणात् पूर्वसूत्रे 'इणः षीध्व'मित्यत्र इड्भिन्न एव इण् गृह्यत इति केचिदाहुः । तन्मते तु प्रकृते इटः परत्वात् धकारस्य ढत्वाभावे ऐधिध्वमित्येव रूपमित्यर्थः । इदं तु मतान्तर भाष्याऽनारूढमिति सूचयितु तुशब्दः । ढधयोरिति । मतभेदमाश्रित्येदम् । तत्र ढत्वाभावपक्षे धकारस्य अनवि चेति द्वित्वविकल्पात् द्विधमेकधमिति रूपद्वयम् । एवं ढत्वे द्विढम् , एकढमिति रूपद्वयम् । रूपचतुष्टयेऽपि 'यणो मयो हो वाऽन्ये' इत्यत्र मय इति पञ्चमीमाश्रित्य वकारस्य द्वित्वविकल्पादेकवकाराणि द्विवकाराणि च प्रागुक्तानि चत्वारि रूपाणि भवन्ति । तथा च अष्टौ रूपाणि सम्पद्यन्ते । मकारस्य द्वित्वविकल्पादेतान्यष्टौ रूपाणि एकमकाराणि द्विमकाराणि चेति षोडश रूपाणि सम्पद्यन्तीत्यर्थः । ऐधिषीति । लुङ इडादेशः । च्लिः । सिच् । इडागमः । आट् । वृद्धिः । वहिमह्योस्तु च्लेः सिचि इडागमे आटि वृद्धौ, ऐधिष्वहि, ऐधिष्महीति रूपे । इति लुङ्प्रक्रिया । ऐधिष्यतेति । लृङः तादेशः । स्यः । इट् । आट् । वृद्धिः । षत्वम् । ऐधिष्येतामिति । आतां स्यः । इट् । आकारस्य इय् । आदृगुणः । यलोपः । आट् । वृद्धिः । षत्वम् । ऐधिष्यन्तेति । झावयवझकारस्यान्तादेशः । स्यः । इट् । आट् । वृद्धिः । षत्वम् । ऐधिष्यथा इति । थास् । स्यः । इट् । आट् । वृद्धिः । रुत्वविसर्गौ । ऐधिष्येथामिति । आथाम् । स्यः । इट् । आकारस्य इय् । आदृगुणः । यलोपः । आट् । वृद्धिः । षत्वम् । ऐधिष्यध्वमिति । ध्वम् । स्यः । इट् । आट् । वृद्धिः ।

ध्वम् । ऐधिष्ये । ऐधिष्यावहि । ऐधिष्यामहि । उदात्तत्वाद्लादेरिट् प्रसङ्गादनुदात्ताः सङ्गृह्यन्ते—

ऊदृदन्तैर्यौतिरुदृणुशीङ्स्नुनुक्षुश्विडीङ्श्रिभिः ।
वृङ्वृञ्भ्यां च विनैकाचोऽजन्तेषु निहताः स्मृताः ॥
शकॢपचमुँ रिचँवचँविचँसिचँप्रच्छँत्यजँनिजिर्भजः ।
भञ्जुभुजँभ्रस्जँमस्जियजँयुजँरुजँरञ्जँविजिर्स्वञ्जिसञ्जँसृजः ॥
अदँक्षुदँखिदँछिदँतुदिनुदः पद्यभिद्यतिविन्दँ ।
शदँसदी स्विद्यति स्कन्दि हदी क्षुधिबुध्यती ॥

त्वम् । ऐधिष्य इति । इडादेशः । स्यः । इडागमः । षत्वम् । आदृगुणः । वहिमह्योस्तु स्यः । इट । अतो दीर्घः । आट् । वृद्धिः । षत्वम् । ऐधिष्यावहि, ऐधिष्यामहि, इति रूपे । नन्वेधधातोरनुदात्तेत्कत्वात् 'एकाच उपदेशेऽनुदात्तादि'तोऽनिषेधः कुतो न स्यादित्यत आह—उदात्तत्वादिति । एधधातुर्यद्यपि अनुदात्तेत् तथापि अनुदात्तस्येतः लोपे सति परिशिष्टो धातुर्नानुदात्त इति भावः । ननु कतिपये धातवः पाणिनिना अनुदात्ता उच्चरिता इति कथमदानीन्तनैरवगन्तव्यमित्यत आह—प्रसङ्गादिति । स्मृतस्योपज्ञानहेतुत्वम्-प्रसङ्गः । पाणिनिपठितानामनुदात्तधातूनां तदानींतनशिष्यपरम्परया आनुपूर्व्यसिद्धत्वादानीं ज्ञानं सम्भवतीति भावः । ऊदृदन्तैरिति । अजन्तेषु धातुषु ऊदन्तैः ऋदन्तैश्च धातुभिर्विना, युरुक्षुशीङ्स्नुनुक्षुश्विडीङ्श्रि एतैश्च धातुभिर्विना, वृङ् वृञ् आभ्यां च विना, अन्ये एकाच अजन्तधातवः । निहताः । अनुदात्ताः स्मृताः । पाणिनिशिष्यपरम्परया ज्ञाता इत्यर्थः । अथ हलन्तेषु अनुदात्तान् धातून् परिगणयति—शकॢ पचँ मुचँ । शकॢ पच मुच रिच वच विच सिच प्रच्छ त्यज निजिर भज एषां द्वन्द्वः । तत्र कान्तेषु शकॢ इत्येकः । ककार इत् । भाष्ये तु अनुबन्धरहितः पाठो दृश्यते । चान्तेषु पच मुच रिच वच विच सिच इति षट् । अत्र डुपचष् इत्यस्यैव ग्रहणं, प्रसिद्धत्वात् । न तु पचि व्यक्तीकरणे इत्यस्येत्याहुः । मुचॢँ ऌ मोक्षणे इत्यस्यैव ग्रहणं, न तु मुचि कल्कने इति भौवादिकस्य । अविशेषात्सर्वस्येत्यन्ये । छान्तेषु प्रच्छ एकः । प्रच्छीतीकार उच्चारणार्थः । णिजिरित्यत्र इर इत्सञ्ज्ञा वक्ष्यते । भञ्ज भुजिमित्यादि सृज इत्यन्तमेकं पदम् । जान्तेषु त्यज निज भज भञ्ज भुज भ्रस्ज मस्ज यज युज रुज रञ्ज विज स्वञ्ज सञ्ज सृज इति पञ्च दश । अदँ क्षुदिमित्यादि नुद इत्यन्तमेकं पदम् । तत्र तुदेरिकार उच्चारणार्थः । पद्यभिदित्येकं पदम् । समाहारद्वन्द्वः । पद्येति श्यना निर्देशः । विद्यतिरिति श्यना निर्देशः । विनदिति श्यनमा निर्देशः । शदँसदी स्कन्दिहदी क्षुधिबुध्यती इति द्विवचनान्तानि । सदँ स्कन्दँ हदि क्षुधि इति हका निर्देशः । स्विद्यति बुध्यतीति रितपा श्यन्विकरः

बन्धिर्युधिरुधी राधिव्यधशुधः साधिसिध्यती ।
मन्यहन्नाप्क्षिपक्षुपितप्तिपस्तृप्यतिदृप्यती ॥
लिपलुपवपशप्स्वपसृपियभ्रभ्लभ्गम्नम्यमो रमिः ।
कृशर्दंशिदिशि दृशमृशरिशरुशलिशविशस्पृशः कृषिः ॥
त्विषतुषद्विषदुषपुष्यषिषविषशषशुषश्लिष्यतयो घसिः ।
वसतिर्दहदिहिदुहो नहमिहरुह लिहवहिस्तथा ॥
अनुदात्ता हलन्तेषु धातवो द्व्यधिकं शतम् ।
तुदादौ मतभेदेन स्थितौ यौ च चुरादिषु ॥

णयोर्निर्देशः । ततश्च दान्तेषु अद् क्षुद् खिद् छिद् तुद् नुद् पद् (श्यन्विकरणः) भिद् विद् (श्यन्विकरणः) विद् (श्नम्विकरणः) शद् सद् स्विद् (श्यन्विकरणः) स्कन्द् हद् इति पञ्चदश । बन्धिरिति । इका निर्देशः । युधिरुधी इत्येकं पदम् इका निर्देशः 'राधिव्यध् शुधः' इत्येकं पदम् । राधीति इका निर्देशः । साधिसिध्यती इति द्वन्द्वः । साधीति इका निर्देशः । ततश्च धान्तेषु क्रुध् क्षुध् बुध् (श्यन्विकरणः) बन्ध् युध् रुध् राध् व्यध् शुध् साध् सि (श्यन्विकरणः) इत्येकादश । मन्येत्यादि तिप इत्यन्तमेकं पदम् । मन्येति श्यना निर्देशः । क्षुपीति इका निर्देशः । 'तृप्यतिदृप्यती' इति द्वन्द्वः श्यना निर्देशः । लिपित्यादि यम इत्यन्तमेकं पदम् । सृपीति इका निर्देशः । रमिरिति भिन्नं पदम् । इका निर्देशः । तथा च नान्तेषु मन् हञ्चिति द्वौ । मनिः श्यन्विकरणः । पान्तेषु आप क्षिप् क्षुप् तप् तिप् तृप् दृप लिप् लुप् वप् शप् स्वप् सृप् इति त्रयोदश । भान्तेषु यभ् रभ् लभ् इति त्रयः । मान्तेषु गम नम् यम् रम् इति चत्वारः । कृशिरित्यादि स्पृश इत्यन्तमेकं पदम् । दंशिरिति च हरित् । कृशि दिशि दंशीति इका निर्देशः । तथा च शान्तेषु कृश् दंश् दिश् दृश् मृश् रिश् रुश् लिश् विश् स्पृश् इत्येते दश । कृषिरिति पृथक् पदम् । इका निर्देशः । त्विषित्यादि श्लिष्यतय इत्यन्तमेकं पदम् । पुष्येति श्यना निर्देशः । श्लिष्यतीति श्यन्विकरणस्य श्लिषा निर्देशः । तथा च षान्तेषु कृष् त्विष् तुष् द्विष् दुष पुष् (श्यन्विकरणः) पिष् विष् शिष् शुष् श्लिष् (श्यन्विकरणः) इत्येकादश । घसिरिति पृथक्पदम् । इका निर्देशः । वसतिरिति पृथक्पदं श्लिषा निर्देशः । सान्तेषु घस् वस् इति द्वौ । दहदिहिदुह इति द्वन्द्वः । दिहीति इका निर्देशः । नह मिह रुह लिह इति समाहारद्वन्द्वः । वहिः इति पृथक्पदं इका निर्देशः । तथेति चकारपर्यायः । हान्तेषु दह् दिह् दुह् नह् मिह् रुह् लिह् वह् इत्यष्टौ । द्व्यधिकं शतमिति । भाष्ये सूत्रेषु षान्तेषु पाठस्तु लेखकप्रमादकृत इति भावः । अथ षान्तेषु द्वयोः श्यना निर्देशस्य फलमाह-तुदादाविति । यौ तृप्दृपी तुदादौ चुरादौ च मतान्तरीयत्वेन धातुपाठे स्थितौ

तृपृदृपी तौ वारयितुं श्यना निर्देश आहतः ।
किं च-'स्विद्यपद्यौ सिध्यबुध्यौ मन्यपुष्यशिजषः श्यना ॥
वसिः शया लुका यौतिर्निर्दिष्टोऽन्यनिवृत्तये ।
ग्लिजिर्विजिर्शक्लृ इति सानुबन्धा अमी तथा ॥
विन्दतिश्चान्द्रदौर्गादेरिष्टो भाष्येऽपि दृश्यते ।
व्याघ्रभूत्यादयस्त्वेनं नेह पेठुरिति स्थितम् ॥
रञ्जिमस्जी अदिपदी तुद् (नुद्)त्रुध् शुषिपुषी शिविः ॥
भाष्यानुक्ता नवेहोक्ता व्याघ्रभूत्यादिसम्मतेः ॥

३ स्पर्ध संघर्षे । संघर्षः पराभिभवेच्छा । धात्वर्थेनोपसंग्रहादकर्मकः । स्पर्धते ।

तौ अनुदात्तेभ्यो वारयितुं श्यना निर्देशः अभ्युपगत इत्यर्थः । अत एव 'शे मुचादीनाम्' इति सूत्रभाष्ये तृपितो दृपित इत्युदाहृतं सङ्गच्छत इति भावः ।

किं चेति । अन्यदपि वक्ष्यत इत्यर्थः । अन्यनिवृत्तय इति । विकरणान्तरनिवृत्तय इत्यर्थः । तच्चाग्रे तदाद्धंधातुकनिरूपणे स्पष्टीभविष्यति । अमी तथेति । उक्तानुबन्धरहितानां व्याघ्रभूत्यय इत्यर्थः । एतदपि तत्तदाद्धंधातुकनिरूपणे स्पष्टीभविष्यति । विन्दतिरिति । 'विदॢ लाभे' इति तौदादिकः । चान्द्रदौर्गादिव्याकरणसम्मतः । भाष्येऽपि दृश्यत इति । विन्दतिर्विनक्तिर्विद्यतीति तत्र पाठादिति भावः । एनमिति । विन्दतिमित्यर्थः । नेह पेठुरिति । तथापि भाष्यप्रामाण्यादस्यानिट्कत्वमिति भावः । 'रञ्जिमस्जी' इत्येकं पदम् । नुत्क्षुध् इति पृथक्कृते पदे । 'शुषिपुषी' इत्येकं पदम् । शिविरित्यन्तरम् इत्येते इति शेषः । नवेहेति । नव धातवः भाष्यानुक्ता अपि इहानुदात्तेषु परिगणिता इत्यर्थः । कुत इत्यत आह—व्याघ्रभूत्यादिसम्मतेरिति । भाष्ये स्वेभ्यो नवभ्योऽन्येषां परिगणनं नवानामप्येषामुपलक्षणमिति भावः । 'तेन रक्तं रागात्', 'तदस्मिन्नन्नं प्रायेण' 'क्तोऽकृतमितप्रतिपन्नाः' 'शुष्कधृष्टौ' 'क्तेन नञ्विशिष्टेने'त्यादिसौत्रप्रयोगाः । नुन्नः, मत्तः, पुष्टः, मङ्क्ता, मङ्क्तव्यमित्यादिभाष्यप्रयोगाश्चात्र लिङ्गम् । इत्यनिट्कारिकाः । स्पर्ध संघर्षे इति । 'वर्तते' इति शेषः । पराभिभवेति । परस्याभिभवः पराजयः । तद्विषयकेच्छेत्यर्थः । नन्वत्रेच्छायां पराभिभवस्य कर्मतया स्पर्धधातोः सकर्मकत्वात्, 'देवदत्तः यज्ञदत्तं स्पर्धयती'त्यादौ 'गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामित्यकर्मकत्वं कथमित्यत आह—धात्वर्थेनोपसंग्रहादकर्मक इति । 'धात्वर्थबहिर्भूतकर्मकत्वमेव सकर्मकत्वमिति 'सुप आत्मनः क्यजि'ति सूत्रभाष्ये प्रपञ्चितत्वादिति भावः । नचैवं सति पदव्यवस्थायां 'स्पर्धायामाङ' इत्यत्र 'कृष्णश्चाणूरमाह्वयते' स्पर्धत इत्यर्थं इति मूलग्रन्थविरोध इति वाच्यम् । तत्र स्पर्धाभिभवपूर्वकाह्वाने वृत्तेरित्यलम् । स्पर्धत इति । 'कत्थन्ताः षट्त्रिंशदनुदात्तेत' इत्युक्तेरात्मनेपदम् । एधधातुवत्

२२५६ शर्पूर्वाः खयः ७।४।६१॥ अभ्यासस्य शर्पूर्वाः खयः शिष्यन्ते। 'हलादिः शेषः' (सू० २१७६) इत्यस्याऽपवादः। पस्पर्धे। स्पर्धिता। स्पर्धिष्यते। स्पर्धताम्। अस्पर्धत। स्पर्धेत। स्पर्धिषीष्ट। अस्पर्धिष्ट। अस्पर्धिष्यत। ४ गाधृ प्रतिष्ठालिप्सयोर्ग्रन्थे च। गाधते। जगाधे। ५ बाधृ लोडने। लोडनं प्रतिघातः। बाधते। ६ नाथ ७ नाधृ याच्ञोरतापैश्वर्ययोः शीःषु। 'आशिषि नाथ इति वाच्यम्'। अस्याशिष्येवात्मनेपदं स्यात्। नाथते। अन्यत्र नाथति। नाधते।

ल्लटि रूपाणीति भावः। धातोरिजादित्वाभावादिजादेश्चेति लिट्यां न। अत एव नानुप्रयोगोऽपि। किन्तु लिटस्तादेशे 'लिटस्तझयो'रिति तस्येशि 'लिटि धातो'रिति द्वित्वे 'हलादिः शेषः' इत्यभ्यासे प्रथमहल्व्यतिरिक्तहलां निवृत्तौ पस्पर्धे इति प्राप्ते। शर्पूर्वाः खयः। अभ्यासस्येति। 'अत्र लोपोऽभ्यासस्ये'त्यतस्तदनुवृत्तेरिति भावः। 'शर्पूर्वाः' इत्यत्र शर् पूर्वः येभ्य इत्यनङ्गुणसंविज्ञानो बहुव्रीहिः। तेन शर् न शिष्यते। शिष्यन्त इति। 'हलादिः शेषः' इत्यतः शेषः इत्यनुवृत्तं कर्मणि षष्ठ्यन्तं बहुवचनान्ततया विपरिणम्यत इति भावः। तथा च प्रकृते अभ्यासे खय् पकारः शिष्यते। 'न ह्रदाः संयोगादय' इति रेफस्य द्वित्वनिषेधो न शङ्क्यः। द्वितीयैकाजवयवस्यैव तन्निषेधात्। तदाह—पस्पर्ध इति। न च वज्रश्चेत्यत्राभ्यासे चकार एव शिष्यतेति वाच्यम्। हलादिः शेष इत्यतो हि आदिरित्यप्यनुवर्तते। शर्व्यतिरिक्तवर्णापेक्षया धात्वादिभूता इत्यर्थः। पस्पर्धाते। पस्पर्धिरे। पस्पर्धिषे। पस्पर्धाथे। पस्पर्धिध्वे। पस्पर्धे। पस्पर्धिवहे। पस्पर्धिमहे, इति लिटि रूपाणि सुगमानि। स्पर्धितेति। लुटि एधधातुवद् रूपाणि सुगमानीति भावः। स्पर्धिष्यत इति। लृटि एधधातुवद्रूपाणीति भावः। स्पर्धतामिति। लोटि एधिवद्रूपाणीति भावः। अस्पर्धतेति। लङि एधिवद्रूपाणीति भावः। हलादि त्वादडेव न त्वाडिति विशेषः। स्पर्धेतेति। विधिलिङि एधिवद्रूपाणि। स्पर्धिषीष्टेति। आशिषि लिङि एधिवद्रूपाणि। अस्पर्धिष्टेति। लुङि एधिवद्रूपाणि। अडागमः, न त्वाट् इति विशेषः। अस्पर्धिष्यतेति। लृङि एधिवद्रूपाणि। अडागमो विशेषः। न त्वाट्। गाधृ प्रतिष्ठेति। चतुर्थान्तो धातुः। ऋकारो 'नाग्लोपिशास्वृदिताम्' इति निषेधार्थः। अजगाधत्। प्रतिष्ठा आधारे स्थितिः। ग्रन्थः ग्रन्थन रचनम्। जगाधे इति। लिटि द्वित्वादि। अभ्यासस्य ह्रस्वः। ह्रस्वम्। बाधृ इति। प्रतिघातः पीडनम्। नाथ नाधृ इति। द्वितीयचतुर्थान्तौ धातू। उपतापः ज्वरप्रयुक्ता पीडा। आशीः आशासनम्। द्वितीयान्तस्य नाथधातोर्विशेषमाह—आशिष नाथ इति। अत्र 'नाथ' इति षष्ठी। 'अनुदात्तङित' इत्यतः आत्मनेपदमित्यनुवर्तते। अनुदात्तेत्त्वादेव सिद्धे नियमार्थमिदं वार्तिकम्। तदाह—अस्याशिष्येवेति। आशासनार्थवृत्तेरेव नाथधातोरात्मनेपदम्। याच्ञार्थवृत्तेस्तु 'शेषात् कर्तरी'ति परस्मैपदमेवेत्यर्थः। नाथत इति। आशास्ते इत्यर्थः। अन्यत्रेति। याच्ञाद्यर्थे विद्यमानस्येत्यर्थः। अथ चतुर्थान्तस्य नाधधातोरुदाहरति—नाध

८ दध धारणे। दधते। २२६० अत एकहल्मध्येऽनादेशादेर्लिटि ६।४।१२०॥ लिण्निमित्तादेशादिकं न भवति यदङ्गं तदवयवस्यासंयुक्तहल्मध्यस्थस्याकारस्यैकारः स्यादभ्यासलोपश्च किति लिटि। २२६१ थलि च सेटि ६।४।१२१॥ प्रागुक्तं स्यात्। आदेशश्चेह वैरूप्यसम्पादक एवाश्रीयते। शसिदद्योः प्रतिषेधवचनाज्ज्ञापकात्। तेन प्रकृतिजश्चरां तेषु सत्स्वपि एत्वाभ्यासलोपौ स्त एव। देधे। देधाते। देधिरे। अतः किम्। दिदिवतुः। तपरः किम्। ररासे। एक—इत्यादि किम्। तस्थतुः।

इति। दधते इति। चतुर्थान्तोऽयम्। तस्य लटि एधिवद्रूपाणि सिद्धवत्कृत्य लिटस्तादेशे तस्यैशि द्वित्वे दध् दध् ए इति स्थिते। अत एकहल्मध्ये। आदेशः आदिर्यस्येति बहुव्रीहिः। अङ्गस्येत्यधिकृतम् अन्यपदार्थः। लिटीति निमित्तसप्तमी अनादेशादेरित्यस्यैकदेशे आदेशऽन्वेति। लिटि परे निमित्ते य आदेशः सः आदिर्यस्य न भवति तथाविधस्याङ्गस्येति लभ्यते। अङ्गस्येत्यवयवषष्ठी। तथाच तथाविधाङ्गावयवस्यात इति लभ्यते। एकशब्दः असहायवाची। 'एकै मुख्यान्यकेवला' इत्यमरः। एकौ असंयुक्तौ हलौ एकहलौ. तयोर्मध्यः, एकहलमध्यः तत्रेति विग्रहः। 'अत' इत्यस्यैव विशेषणमिदम्। 'द्वयोरेद्वा'वित्यतः एदिति अभ्यासलोप इति चानुवर्तते। 'गमहने'-त्यतः कितीत्यनुवर्तते, ननु ङितीति लिङादेशानां ङित्त्वमम्भवात्। लिटीत्येतावविधौ परानिमित्तं च। आवृत्त्या उभयार्थलाभः। तदाह—लिण्निमित्तेत्यादिना। थलि च। प्रागुक्तमिति। एकहलमध्य इति यत् प्रागुक्तं एत्वादि तत् सेटि थलि च स्यादित्यर्थः। थलः कित्त्वाऽभावात् पूर्वसूत्रेणाप्राप्तौ वचनम्। ननु देधे पेततुरित्यादौ 'अभ्यासे चर्चे'ति जशां चरां च जशि चरि च लिण्निमित्तादेशादित्त्वात् कथमेत्वाभ्यासलोपावित्यत आह—आदेशश्चेति। इह 'अत एकहल्मध्य' इति सूत्रे, आदेशशब्देन स्थान्यपेक्षया विरूप एवादेशो विवक्षितः। तथा च तथाविधादेशादेरेव एत्वाभ्यासलोपौ न भवतः स्थानिसरूपादेशस्तु न पर्युदास इत्यर्थः। शसिदद्योरिति। 'न शसददवादिगुणानाम्' इति शसिदद्योरेत्वाभ्यासलोपयोः प्रतिषेध उच्यते। यदीह यथाकथञ्चिद्वदादेशादेः पर्युदासः स्यात्, तर्हि शसिदद्योरभ्यासे शकारदकारयोश्चरजशोः शकारदकारादेशे सति आदेशादित्वादेव एत्वाभ्यासलोपयोः अभावसिद्धौ 'न शसददवे'ति तत्प्रतिषेधोऽनर्थकः स्यात्। अतः वैरूप्यसम्पादकादेशादेरेव पर्युदासो विज्ञायत इत्यर्थः। तेनेति। स्थानिसरूपादेशादेः पर्युदासाऽभावादित्यनेनेत्यर्थः। सत्स्वपीति। देधे पेततुः इत्यादौ दकारादेशेषु सत्स्वपीत्यर्थः। देधे इति। दध् दध् ए इति स्थिते दकारादकारस्य एत्वेऽभ्यासलोपे च रूपम्। 'असंयोगाल्लिट्कित्' इति कित्त्वमिह बोध्यम्। देधिर इति। देधिषे। देधाथे। देधिध्वे। देधे। देधिवहे। देधिमहे। इति रूपाणि सम्भवन्तीति भावः। दिदिवतुरिति। दिव्धातोरतुसि द्वित्वे हलोर्मध्ये अतोऽभावादेत्वाभ्यासलोपौ नेति भावः। तपरः किमिति। 'अत' इति तपरकरणं किमर्थमित्यर्थः। ररासे इति। 'रासु शब्द'

अनादेशादेः किम् । चकणतुः । लिटा आदेशविशेषणादिह स्यादेव । नेमिथ । सेहे ॥ ६ स्कुदि आप्रवणे । आप्रवणमुत्प्लवनमुद्धरणं च । २२६२ इदितो नुम्धातोः । ७।१।५८॥ स्कुन्दते । चुस्कुन्दे । १० श्विदि श्वैत्ये । अकर्मकः । श्विन्दते । शि-श्विन्दे । ११ वदि अभिवादनस्तुत्योः । वन्दते । १२ भदि कल्याणे सुखे च । भ-न्दते । बभन्दे । १३ मदि स्तुतिमोदमदस्वप्नकान्तिगतिषु । मन्दते । ममन्दे । १४ स्पदि

भ्वादिरात्मनेपदी । अत्र हलमध्यस्थावर्णस्य ह्रस्वत्वाभावादेत्वाभ्यासलोपौ नेति भावः । एकेत्यादि किमिति । एकहलमध्यस्थस्येति किमर्थमित्यर्थः । तस्मादुक्तम् । 'स्मर चङ्गगतौ' । लिटोऽनुसि द्वित्वे अभ्यासाकारस्य नाऽसंयुक्तहलमध्यस्थत्वमिति भावः । चकणतुरिति । 'कण शब्दे' । लिटोऽनुसि द्वित्वे कुहोश्चुः इति ककारस्य चुत्वेन चकारः । तथाच वैरूप्यमश्रादकादेशादित्वादेत्वाभ्यासलोपौ नेति भावः । अथ 'लिण्निमित्तादेशादिकमित्यत्र लिण्निमित्तेत्यस्य प्रयोजनमाह—नेडिति । नेमिथेति । 'णमु प्रह्वत्वे शब्दे च' । 'णो नः' इति नत्वम् । थलि इटि द्वित्वे नत्वसम्पन्नकारादेशादित्वेऽपि नत्वस्य लिण्निमित्तकत्वाभावाल्लिण्निमित्तकादेशादित्वाभावादेत्वाभ्यासलोपौ निर्बाधाविति भावः । सेहे इति । 'षह मर्षणे' धात्वादेः षः सः' इति सत्वे लिटि द्वित्वे सत्वसम्पन्नसकारादेशादित्वेऽपि सत्वस्य लिण्निमित्तकत्वाभावात् लिण्निमित्तकादेशादित्वविरहादेत्वाभ्यासलोपौ निर्बाधाविति भावः । दधिता । दधिष्यते । दधताम् । अदधत । दधेत । दधिषीष्ट । अदधिष्ट । अदधिष्यत ।

स्कुदीति । उत्प्लवनमुत्प्लुत्य गमनम् । इदितः । इत् ह्रस्व इकारः, इत् इत्संज्ञकः यस्य सः इदित्, तस्येति विग्रहः । इत्संज्ञकेदन्तधातोरित्यर्थः । तेन चक्षिङादौ न दोषः । नुमि मकार इत् । उकार उच्चारणार्थः मित्त्वादन्त्यादचः परः । स्कुन्दत इति । 'नश्चापदान्तस्य—' इत्यनुस्वारः परसवर्णः । चुस्कुन्द इति । लिटि द्वित्वे 'शर्पूर्वाः खयः' इत्यभ्यासे ककारः शिष्यते । 'कुहोश्चुः' इति तस्य कुत्वेन चकारः । श्विदिति । श्वैत्यं-श्वैत्यकरणम् । अकर्मक इति । श्वैत्यस्य धात्वर्थनोपसंग्रहादिति भावः । ततश्च 'श्विन्दयति देवदत्तं यज्ञदत्त' इत्यादौ 'गतिबुद्धिप्रत्यवसान' इत्यादिना अकर्मककार्यं द्वितीया भवति । श्वेतीभवनं वा श्वैत्यम् । शिश्विन्दत इति । श्वेतीभवतीत्यर्थः । इदित्वान्नुम् । अनुस्वारपरसवर्णौ । शिशिन्द इति । नुमि कृते गुरुमत्त्वेऽपि इजादित्वाभावादाम् नेति भावः । वदीति । अभिवादनम् आशीर्वादः, तत्कारणभूतो व्यापारः, प्रणामादिरभिवादनम् । वन्दत इति । इदित्वान्नुम् । भदीति । कल्याणं शुभक्रिया । सुखं सुखीभावः । भन्दत इति । इदित्वान्नुम् । बभन्द इति । अभ्यासे भकारस्य जश्त्वेन बकारः । मदीति । मोदः सन्तोषः । मदः गर्वः । मन्दत इति । इदित्वान्नुम् । ममन्द इति । नुमि सति संयुक्तहलमध्यस्थत्वादेत्वाभ्यासलोपौ नेति भावः । स्पदीति । अकर्मकः ।

किञ्चिच्चलने । स्पन्दते । पस्पन्दे । १५ क्लिदि परिदेवने । शोक इत्यर्थः । सकर्मकः । क्लिदन्ते चैत्रम् । चिक्लिन्दे । १६ मुद हर्षे । मोदते । मुमुदे । १७ दद दाने । ददते । २२६३ न शसददवादिगुणानाम् ६।४।१२६॥ शसेर्ददेर्वकारादीनां गुणशब्देन भावितस्य च योऽकारस्तस्यैत्वाभ्यासलोपौ न । ददे । ददाते । ददिरे । १८ ष्वद १६ स्वर्द आस्वादने । अयमनुभवे सकर्मकः; रुचावकर्मकः । २२६४ धात्वादेः षः सः ६।१।६४॥ धातोरादेः षस्य सः स्यात् । 'साहसदाद्योः' (सू०

स्पन्दत इति । इदित्त्वान्नुम् । पस्पन्द इति । 'शर्पूर्वाः खय.' इत्यभ्यासे पकारः शिष्यते । क्लिदेति । परिदेवनशब्दं व्याचष्टे—शोक इति । स्मृत्वा क्लेशः शोकः । तदाह—सकर्मक इति । क्लिन्दते चैत्रमिति । अतीतं चैत्रं स्मृत्वा क्लिश्नातीत्यर्थः । इदित्त्वान्नुम् । चिक्लिन्द इति । अभ्यासे ककारस्य चुत्वेन चकार इति भावः । मुदेति । हर्षः तुष्टिः । मोदत इति । शपि लघूपधगुणः । मुमुद इति । 'असंयोगाल्लिट्कित्' इति कित्त्वान्न गुणः ।

ददेति । न ममेति त्यागो दानम् , न तु द्रव्यत्यागः । तथा सति धात्वर्थोपसंग्रहादकर्मकत्वापत्तेः । न शसददः । शस ददवादि गुण एषां द्वन्द्वः । अवयवषष्ठी । गुणशब्देन विहित एव गुणोऽत्र गुणशब्देन विवक्षितः । अन्यथा शसिददिग्रहणवैयर्थ्यात् । 'अत एकहल्मध्ये' इत्यस्मात् अत इति, 'घञ्सोरेदौ —' इत्यतः एदिति, अभ्यासलोप इति चानुवर्तते । तदाह—शसेरित्यादिना । गुणशब्देनेति किम् । पेचे । अत्र पचेरकारस्य गुणत्वेऽपि गुणशब्देन विहितत्वाऽभावान्नाय निषेधः । 'पृधातोः' पपरतुरिति तु गुणस्योदाहरणम् , गुणशब्देन विहित. यः अर तदवयवत्वादकारस्येति बोध्यम् । ददद इति । ददेर्लिटस्तादेशस्य एशि द्वित्वे 'अत एकहल्मध्य' इति प्राप्तावेत्वाभ्यासलोपौ न भवतः । 'ष्वद स्वर्दे'ति । आस्वादनं अनुभवः । प्रीतिविषयीभावात्मिका रुचिर्वा । तदाह—अयमिति । प्रत्येकाभिप्रायमेकवचनम् । धात्वादेः । 'ष' इति षष्ठ्यन्तम् । तदाह—धातोरादेः षस्य सः स्यादिति । षकारस्य सः स्यादित्यर्थः । धातुग्रहणं किम् । षट् । अत्र धात्वादित्वाभावान्न सकारः । आदिग्रहणं किम् । लषति । न चेवमपि षकारीयतोत्यादौ सुब्धात्वादेरपि षस्य सकारः स्यादिति वाच्यम् , 'आदेच उपदेशेऽशिति' इत्यतः उपदेश इत्यनुवृत्तेः । एवं च षदिरत्यादावपि उपदेशग्रहणानुवृत्त्यैव व्यावृत्तिसिद्धेर्धातुग्रहणं भाष्ये प्रत्याख्यातम् ।

ननु धातुपाठे स्वद स्वदेत्येवं सकार एव उपदिश्यताम् । एवं च 'धात्वादेः षः सः' इत्यपि मास्तु इति चेन्मैवम्—ष्यङ्तात् तुजि असिस्वददित्यत्र षकारश्रवणार्थकत्वात् धातुपाठे सकारस्यैवोपदेशे तु असिस्वददित्यत्र सकारस्य आदेशसकारत्वाऽभावेन षत्वाऽसम्भवात् । नन्वेवं सति अनुस्वदत इत्यत्रादेशसकारत्वात् षत्वापत्ति-

२१२३) इति षत्वनिषेधः। अनुस्वदते। सस्वदे। स्वर्दते। सस्वर्दे। २० उर्द माने क्रीडायां च। २२६५ उपधायां च ८।२।७८॥ धातोरुपधाभूतयो रेफवकारयोर्हल्परयोः परत इको दीर्घः स्यात्। ऊर्दते। ऊर्दाञ्चक्रे। २१ कुर्द २२ खुर्द २३ गुर्द २४ गुद क्रीडायामेव। कूर्दते। चुकूर्दे। खूर्दते। गूर्दते। गोदते। जुगुदे। २५ षूद क्षरणे। सूदते। सुषूदे।

सेक्सुप्सुस्तुसुजस्तुस्त्यान्ये दन्त्याजन्तसादयः।
एकाचः षोपदेशाः स्वष्क्ष्विद्स्वद्स्वञ्जस्वपस्मिङः॥

रित्यत आह—सादयोरिति। सस्वद इति। लिटि द्वित्वे संयुक्तहल्मध्यस्थत्वादेत्वाभ्यासलोपौ नेति भावः। उर्दति। चकारादास्वादनेऽपीति केचित्। उपधायां च 'सिपि धातोरिति, 'वोरुपधाया' इत्यतः वोरिक इति, 'हलि च' इत्यतः हलीति चानुवर्तते। 'उपधयो'रित्यर्थे उपधायामित्याषंम्। तदाह—धातोरित्यादि। ऊर्दत इति। अत्र धातोः रेफवान्तत्वाभावात् 'वोरुपधायाः' इत्यस्य 'हलि चे'त्यस्य चाप्राप्तौ 'उपधायां चे'त्यारम्भः। धातोरित्यभावे पदाधिकारस्थत्वात् पदस्य उपधाभूतयोरित्यर्थः स्यात्। तत्र क्विबन्ते ऊर्द् इत्यत्रैव स्यात्, ऊर्दत इत्यादौ न स्यात्। रेफवकारयोः किम्? पुष्यति। हल्परयोः किम्? चिरिणोति। इकः किम्? नर्दति। ऊर्दाञ्चक्र इति। हृजादित्वादाम्। 'कृञ्चानुप्रयुज्यते' इत्यनुप्रयोगः। कूर्देति। गुदेरपि पृथग्धातुः। 'क्रीडायामेवे'त्यर्थनिर्देशः। एवकारस्तु हतोऽन्यत्र धात्वर्थनिर्देशस्य उपलक्षणत्वं ज्ञापयति—कूर्दत इति। 'उपधायां च' इति दीर्घः। चुकूर्द इति। 'कुहोश्चुः' इति चुत्वम्। खूर्दत इति। 'उपधायां च' इति दीर्घः। एवं गूर्दत इति। गोदत इति। शपि लघूपधागुणः। जुगुद इति 'असंयोगात्' इति कित्त्वान्न गुणः। षूदेति। क्षरणं प्रस्रवणम्। सूदत इति। प्रस्रवतीत्यर्थः। 'धात्वादेः' इति षस्य सः। अलघूपधत्वान्न गुणः। सुषूद इति। धात्वादे'रिति षस्य सत्वे लिटि द्वित्वादौ इणः परस्यादेशसकारत्वात् षत्वम्। यदि धातुपाठे सकारस्यैव पाठः, तर्हि इहादेशसकारत्वाऽभावात् षत्वं न स्यात्। षोपदेशे तु षस्य सत्वे सति आदेशसकारत्वात् षत्वं सुपपादमिति भावः। ननु धातुपाठे के धातवः सादयः पठिताः, के वा सादयः? पाणिनिकृतषोपदेशपाठस्य इदानीं परिभ्रष्टत्वादित्याशङ्क्य पाणिनीयपरम्परासिद्धान् षोपदेशान् पठति—सेगिति श्लोकेन। दन्त्याजन्तसादय एकाचः षोपदेशाः स्युरित्यन्वयः। दन्त्यश्च अच्च दन्त्याचौ तौ अन्तौ अव्यवहितपरौ यस्य सः दन्त्याजन्तः, तथाविधः षः षकारः आदिर्येषां ते दन्त्याजन्तसादयः। दन्त्यपरकः अच्परकश्च यः षकारः तदादय एकाचो धातवः इदानीं कृतसत्त्वाः सकारादित्वेन परिदृश्यमाना अपि षकारादित्वेन पाणिनिना उपदिष्टाः प्रत्येतव्या इत्यर्थः। 'सादय' इति पाठेऽप्येवमेव व्याख्येयम्। 'अज्दन्त्यपराः षादयः षोपदेशाः' इतिभाष्यम्। षूद क्षरणे इत्यादयः अच्परकषोपदेशाः। 'ष्ठा गतिनिवृत्ता'वित्यादय-

दन्त्यः केवलदन्त्यो; न तु दन्तोऽष्ठजोऽपि ॥ ष्वष्कादीनां पृथग्ग्रहणाज्झारकात् । २६ ह्राद अव्यक्ते शब्दे । ह्रादते । जह्रादे । २७ ह्रादी सुखे च । चादव्यक्ते शब्दे ॥ ह्रादते । २८ स्वाद आस्वादने । स्वादते । २९ पर्द कुत्सिते शब्दे । पर्दते । ३० यती प्रयत्ने । यतते । येते । ३१ युतृ ३२ जुतृ भासने । योतते । युयुते । जोतते । जुजुते । ३३ विथृ ३४ वेथृ याचने । विविथे । विवेथे ।

स्तु दन्त्यपरकषोपदेशाः । दन्त्याजन्तेति किम् । स्कुदि आप्रवणे । चुस्कुन्दे । अत्र सकारो न दन्त्यपरकः नाप्यूष्मपरकः । एकाचः किम् । सोसूच्यते । 'सूत्र वेष्टने' चुरादिः रजन्तः अनेकाच् । यद्यप्येकाच इति भाष्ये न दृश्यते, तथापि यङ्विधौ सोसूच्यत इति भाष्यं तत्र मानमिति बोध्यम् । एवं च 'साध संसिद्धौ'इत्यादौ सकारपाठस्यैव दृश्यमानत्वेऽपि षोपदेशत्वमेव । ननु 'सेकृ गतौ, 'सृप्लृ गतौ' सृ गतौ''सृज विसर्गे'एते चत्वारः अच्परकसादयः। स्तृञ् आच्छादने, ऋदन्तः श्नुविकरणः,। 'स्तृञ् आच्छादने' इन्तः श्नाविकरणः, 'स्थै शब्दसङ्घातयोः' । एते त्रयो दन्त्यपरकसादयः । एतेषां सप्तानामपि षोपदेशत्वं स्यादित्यतिव्याप्तिमाशङ्क्य तद्निवृत्त्यै विशेषणमाह—सेक सृप् सृ स्तृ सृज स्तृ स्थान्ये इति । स्थ्यै धातोः कृतात्वस्य निर्देशः श्लोके सप्तमावेशार्थः । स्थ्यै इत्येकारान्तस्य निर्देशे 'स्थायन्य' इत्येकस्याक्षरस्याधिक्यापत्तेः । नन्वेवमपि 'ष्वष्क् गतौ' 'ष्विन्दा गात्रप्रस्रवणे' 'ष्वद आस्वादने' 'ष्वञ्ज परिष्वङ्गे' 'ष्विन्वप् शये' 'ष्विम्ड् ईषद्धसने' इत्येतेषु सकारस्य दन्त्यपरकत्वाऽभावात् अच्परकत्वाभावाच्च षोपदेशत्वसंग्रहः स्यादित्यव्याप्तिमाशङ्क्य तानपि संगृह्णाति—ष्वष्क् ष्विन्द् स्वद् स्वञ्ज स्वप् ष्विम्ड् इति । 'अपीति' शेषः । ननु 'ष्णु शब्दोपतापयोरित्यादीनामपि दन्त्यवकारपरकत्वात् षोपदेशत्वं स्यादित्यत आह—दन्त्यः केवलदन्त्य इति । कुत इत्यत आह—ष्वष्कादीनामिति । अन्यथा दन्त्यपरकत्वादेव सिद्धे ष्वष्कादिग्रहणं व्यर्थं स्यादिति भावः । यद्यपि ष्वष्कतिरत्र भाष्ये न दृश्यते:, तथापि सुधातुष्टिवुष्वष्कतीनां सत्वप्रतिषेधः इति वार्तिकात्तल्लाभ इति भावः । ह्रादेति । रेफवानयम् । अव्यक्तशब्दः अमनुष्यवाक् । जह्राद इति । अभ्यासस्य ह्रस्वः । चुस्वम् । ह्रादीति । लकारवानयम् । 'श्वीदितो निष्ठायाम्' इति इण्निषेधार्थमीत्वम् । स्वादेति । केवलदन्त्यपरकत्वाभावान्नायं षोपदेशः असिस्वदत् । पर्देति । गुदरव इत्यर्थः । यतीति । ईदित्त्वमिण्निषेधार्थम् । येते इति । 'अत एकहल्मध्ये' इत्येत्वाभ्यासलोपौ । युतृ जुतृ इति । ऋदित्त्वम् 'नाग्लोपिशास्वृदिताम्' इत्यात्वार्थम् । योतत इति । शपि लघूपधगुणः । युयुत इति । 'असंयोगादिति कित्त्वान्न गुणः । विथृ वेथृ इति । द्वितीयान्तावेमौ । ननु 'विथृ' इत्येवास्तु, लघूपधगुणे सति वेथत इत्यस्याऽविशिष्टत्वादित्यत आह—विविथे विवेथे इति । वेथृधातोर्विवेथे इति रूपम् । विथृधातोस्तु असंयोगादिति किरवाद्

३५ ग्रथि शैथिल्ये । ग्रन्थते । ३६ ग्रथि कौटिल्ये । ग्रन्थते । ३७ कत्थ श्लाघायाम् । कत्थते । एधादयोऽनुदात्तेतो गताः ।

अथाष्टात्रिंशत्तवर्गीयान्ताः परस्मैपदिनः । ३८ अत सातत्यगमने । अतति । 'अत आदेः' (सू० २२४८) आत, आततुः, आतुः । लुङि आतिस् ई त् इति स्थिते । २२६६ इट ईटि ७।२।२३॥ इटः परस्य सस्य लोपः स्यादीटि परे । 'सिज्लोप एकादेशे सिद्धो वाच्यः' । आतीत् । आतिष्टाम् । आतिषुः । २२६७ वदव्रजहलन्तस्याचः ७।२।३॥ वदेर्व्रजेर्हलन्तस्य चाङ्गस्याचः स्थाने वृद्धिः स्यात्सिचि परस्मैपदेषु । इति प्राप्ते । २२६८ नेटि ७।२।४॥ इडादौ सिचि प्रागुक्तं न

गुणाभावे विविथ इति रूपमिति भावः । ग्रथेति । द्वितीयान्तः । शैथिल्यम् । स्रसनम् । ग्रन्थते इति । इदित्त्वान्नुम् । ग्रन्थति । द्वितीयान्तः । कौटिल्यं । वक्रीभवनम् । ग्रन्थत इति । इदित्त्वान्नुम् । कत्थेति । अविद्यमानगुणज्ञापनं श्लाघा । अथाष्टात्रिंशदिति । अष्टौ च त्रिंशदिति द्वन्द्वः । अष्टाधिका त्रिंशदिति वा । 'द्व्यष्टनः संख्याया' मित्यात्वम् । 'अष्टत्रिंश'दिति पाठे तु अष्टेति पृथक्पदम् । परस्मैपदिन इति । अनुदात्तस्वरितङ्त्वाभावात् 'शेषात् कर्तरि' इति परस्मैपदिन एवेति भावः । अतेति । सातत्यगमनं सन्ततगमनम् । लिटि णलि द्वित्वे हलादिशेषे अ अत् अ इति स्थिते पररूपे प्राप्ते आह – अत आदेरिति । 'हलन्त्यम्' इति शेषः । तथा च अभ्यासाऽकारस्य दीर्घे सति सवर्णदीर्घः । तदाह—आतेति । अकारस्य हलमध्यस्थत्वाभावादेत्वाभ्यासलोपौ न । लुङीति । अतधातोर्लुङस्तिपि इतश्चेति इकारलोपे च्लेः सिचि तस्य इडागमे 'अस्तिसिचोऽपृक्ते' इति ईडागमे आटि वृद्धौ आतिस् ई त् इति स्थिते सतीत्यर्थः । इट ईटि । 'इट्' इति पञ्चमो । रात्सस्येत्यतः सस्येति, संयोगान्तस्येत्यतो लोप इति चानुवर्तते । तदाह—इटः परस्येति । एवं च आति स् ई त् इति स्थिते सकारस्य लोपे आति ई त् इति स्थिते सवर्णदीर्घे आतीदिति रूपं वक्ष्यति । तत्र सलोपस्यासिद्धत्वात् कथ सवर्णदीर्घ इत्यत आह—सिज्लोप एकादेशे सिद्धो वक्तव्य इति । आतिष्टामिति । ङुडस्तस् । तस्य ताम् । च्लेः सिच् । तस्य इटि आटि वृद्धौ षत्वम् । अपृक्तत्वाभावेन ईडभावात् सलोपो न । आतिषुरिति । ङुडो झिः । च्लेः सिच् । जुस् इट् आट् वृद्धिः । षत्वं रुत्वविसर्गौ । आतीः । आतिष्टम् । आतिष्ट । आतिषम् । आतिष्व । आतिष्म । अत्र वृद्धिमाशङ्क्याह—वदव्रज । वद व्रज हलन्त एषां समाहारद्वन्द्वात् षष्ठ्येकवचनम् । अङ्गस्येत्यधिकृतम् । 'सिचि वृद्धिः परस्मैपदेष्वि'त्यनुवर्तते । तदाह—वदेरित्यादिना । हलन्तत्वादेव सिद्धे वदव्रजग्रहणं तु अवादीद्व्राजीदित्यत्र 'अतो हलादेर्लघो'रिति वृद्धिविकल्पबाधनार्थम् । नेटि । प्रागुक्तं नेति । 'वदव्रजहलन्तस्याच' इत्युक्तं नेत्यर्थः । तत्र वदव्रजयोर्विशिष्य विधानात् हलन्तलक्षणाया एव वृद्धेर्निषेधोऽयम् ।

स्यात् । मा भवानतीत् । अतिष्टाम् । अतिषुः । ३९ चिती संज्ञाने । चेतति । चिचेत । अचेतीत् । अचेतिष्टाम् । अचेतिषुः । ४० च्युतिर् आसेचने । सेचनमार्द्रीकरणम् । आशीषदर्थेऽभिव्याप्तौ च । 'इर इत्संज्ञा वाच्या' । च्योतति । चुच्योत । २२६६ इरितो वा ३।१।५७॥ इरितो धातोरङ्लेरङ् वा स्यात्परस्मैपदे परे । अच्युतत् । अच्योतीत् । ४१ श्च्युतिर् क्षरणे । श्च्योतति । चुश्च्योत । अश्च्युतत् । अश्च्योतीत् । यकाररहितोऽप्ययम् । श्योतति । ४२ मन्थ विलोडने । विलोडनं प्रतिघातः । मन्थति । ममन्थ । यासुटः 'किदाशिषि' (सू० २२१६) इति कित्त्वात् 'अनिदिताम्' (सू० ४१५) इति नलोपः । मथ्यात् । ४३ कुथि ४४ पुथि ४५ लुथि ४६ मथि हिंसासंक्लेशनयोः । इदित्त्वान्नलोपो न । कुन्थ्यात् । पुन्थ्यात् । लुन्थ्यात् ।

हलन्तलक्षणा वृद्धिस्तु अधाक्षीदित्यादावनिडादौ सिचि चरितार्था । नन्वातीदित्यादौ अकारस्य वृद्धौ सत्यामसत्यां च आटा एकादेशे सति रूपे विशेषाभावात् किं तन्निषेधेनेत्याशङ्क्याह—मा भवानतीदिति । माङ्योगे आडभावे सति वृद्धिनिषेधः सफल इति भावः । चितीति । ईदित्त्वम् 'श्वीदितो निष्ठायाम्' इति इण्निषेधार्थम् । चेतनीति । शपि लघूपधगुणः । चिचेतेति । तिबादेशणलः पित्त्वेन असंयोगादिति कित्त्वस्याऽप्रवृत्तेर्न गुणनिषेधः । चिचितुरित्यादौ तु कित्त्वान्न गुणः । अचेतीदिति । 'हट ईटी'ति सलोपः । अचेतिष्टामिति । अपृक्तत्वाऽभावादीडभावान्न सिज्लोपः । चेटीति निषेधान्न हलन्तलक्षणा वृद्धिः । च्युतिरिति । अत्र इकारस्य रेफस्य च प्रत्येकमित्संज्ञायामिदित्त्वान्नुमि प्राप्ते आह—इर इत्संज्ञेति । तथाच इर् इति समुदायस्य इत्संज्ञकत्वादिदित्त्वाऽभावान्न नुमिति भावः । च्योतनीति । लघूपधगुणः । चुच्योतेति । णलः पित्त्वेन कित्त्वाभावान्न गुणनिषेध इति भावः । चुच्युततुरित्याहौ तु कित्त्वान्न गुणः । लुङि च्लेः सिचि प्राप्ते । इरितो वा । 'धातोरेकाच' इत्यतो धातोरिति 'च्लेः सि'रित्यतः च्लेरिति 'अस्यतिवक्तिख्यातिभ्य' इत्यतः अङिति 'पुषादिद्युतादिलृदित्' इत्यतः परस्मैपदेष्विति चानुवर्तते । तदाह—इरितो धातोरित्यादिना । अच्युतदिति । अङि सति कित्त्वान्न गुणः । अच्युतताम् । अच्युतन् । अच्युतः । अच्युततम् । अच्युतत । अच्युतम् । अच्युताव । अच्युताम । अङभावे त्वाह—अच्योतीदिति । 'हट ईटी'ति सिज्लोपः । अच्योतिष्टामित्यादि । श्च्युतिरिति । च्युतिवद्रूपाणि । चुश्च्योतेति । 'शर्पूर्वा' इति चकारः शिष्यते । यकाररहितोऽपीति । 'मधुश्चुतं घृतमिव सुपूत' मित्यादौ तथा दर्शनादिति भावः । मन्थेति । विलोडनमास्फालनम् । मन्थतीत्यादि । सुगमम् । आशीर्लिङि विशेषमाह—यासुट इति । कुथीति । चत्वारोऽपि द्वितीयान्ताः । इदित्त्वान्नुमि कुन्थतीत्यादि सुगमम् । आशीर्लिङि यासुटः कित्त्वेऽपि इदित्त्वेन अनिदितामिति पर्युदासात् नलोपो नेत्याह—इदित्त्वादिति । कुन्थ्यादिति । पुन्थ्यात् । लुन्थ्यात् । मन्थ्यात् । एतदर्थमेव

मन्थ्यात्। ४७ षिध गत्याम्। सेधति। 'सिषेध। सेधिता। असेधीत्। 'सात्पदाद्योः' (सू० २११३) इति षत्वनिषेधे प्राप्ते। **२२७०उपसर्गात्सुनोतिसुवतिस्यतिस्तौतिस्तोभतिस्थासेनयसेधसिचसञ्जस्वञ्जाम्** ८।३।६५॥ उपसर्गस्थान्निमित्तादेषां सस्य षः स्यात्। २२७१ **सदिरप्रतेः** ८।३।६६॥ प्रतिभिन्नादुपसर्गात्सदेः सस्य षः स्यात्। २२७२ **स्तन्भेः** ८।३।६७॥ सौत्रस्य सस्य षः स्यात्। योगविभाग उत्तरार्थः। किञ्च अप्रतेः इति नानुवर्तते। 'बाहुप्रतिष्टम्भविधुरद्रुमन्युः' इति (रघुवंशे स०२ श्लो० ३२)। २२७३ **अवाच्चालम्बनाविदूर्ययोः**

मन्थधातोः पृथक् मथीतिनिर्देशः। षिध गत्यामिति। अस्यरकषकारादित्वात् षोपदेशोऽयम्। ततश्च धात्वादेरिति सः। तदाह—सेधतीति। सिषेधेति। आदेशसकारत्वात् षत्वम्। अनिट्सु श्यन्विकरणस्यैव सिधेर्ग्रहणात् सेट्कोऽयम्। असेधीदिति। 'इट ईटी'ति सिज्लोपः। नेटीति निषेधात् न हलन्तलक्षणा वृद्धिः। असेधिष्टामित्यादि। अथ निषेधतीत्यादौ 'उपसर्गात्सुनोती'ति षत्व वक्ष्यति। तत्किमर्थं 'आदेशप्रत्यययो'रित्येव सिद्धेरित्याशङ्क्याह—सात्पदाद्योरिति। उपसर्गात्सुनोति। उपसर्गस्थादिति। उपसर्गशब्द उपसर्गस्थे लाक्षणिक इति भावः। निमित्तादिति। हृण्कादिरित्यर्थः। 'हृण्को'रित्यधिकारेऽपि कोरिति नात्र सम्बध्यते, असम्भवात्। सन्येति। 'सहेः साडः स' इत्यतः स इति षष्ठ्यन्तमनुवर्तत इति भावः। षः स्यादिति। 'अपदान्तस्य मूर्धन्य'इत्यधिकारादिति भावः। अत्र सुनोतीत्यादिः श्नपा निर्देशो यङ्लुङ्निवृत्त्यर्थ इति प्राञ्चः। स्पष्टार्थ इति प्रौढमनोरमायाम्। सेनयेति णिजन्तो नामधातुः। सेधनीति श्नपा निर्देशात् सिध्यतेर्न ग्रहणम्। अभिषुणोतीत्यादुदाहरणम्। प्रकृते निषेधतीत्यादावर्थमिह सूत्रोपन्यासः।

प्रसङ्गादाह—सदिरप्रतेः। उपसर्गादिति। उपसर्गस्थादिणः परस्येत्यर्थः। सदिरिति षष्ठ्यर्थे प्रथमेत्यभिप्रेत्याह—सदेः सस्येति। निषीदतीत्युदाहरणम्। स्तन्भेः। नकारोपधनिर्देशस्य प्रयोजनमाह—सौत्रस्येति। 'स्तन्भुस्तुन्भु' इति सूत्रनिर्दिष्टस्य नोपधस्येत्यर्थः। स हि प्रतिपदोक्तः। 'ष्टभि प्रतिबन्ध' इत्यस्य तु धातोरिदित्त्वान्नुमि लाक्षणिकत्वान्न ग्रहणम्। तेन विस्तम्भत इत्यादौ न षत्वम्। 'उदस्थास्तम्भो'रिति सूत्रे तु नोपधग्रहणादुभयोरपि ग्रहणम्, मकारस्य उभयत्रापि लाक्षणिकत्वात्। ननु 'सदिस्तन्भ्योरप्रते'रित्येकमेव सूत्रं कृतो न कृतमित्यत आह—योगविभाग उत्तरार्थ इति। 'अवाच्चालम्बनाविदूर्ययो'रित्युत्तरसूत्रे सदेरनुवृत्त्यर्थं इत्यर्थः। ननु सकारस्वरितत्वादालम्बनाविदूर्ययोरनुवृत्त्यभावादेव च अनुवृत्त्यभावः सिद्ध इत्यत्रारभ्याह—'कञ्चेति। नानुवर्तत इति। स्तन्भेरित्यत्र अप्रतेरित्यस्य अनुवृत्तिर्नेष्टा। एकसूत्रत्वे तु अप्रतेरित्यस्य स्तन्भिनाऽपि सम्बन्धः स्यादिति भावः। 'अप्रते' रित्यस्य स्तन्भावनन्वयो वृद्धप्रयोगानुगत इत्याह—बाहुप्रतिष्टम्भेति। अवाच्च। आलम्बनं च आविदूर्यं चेति द्वन्द्वा-

र्ययोः ८।३।६८॥ अवास्तन्मेरेतयोरर्थयोः षत्वं स्यात्। २२७४ वेश्च स्वनो भोजने ८।३।६९॥ व्यवाभ्यां स्वनतेः सस्य षः स्याद्भोजने। २२७५ परिनिविभ्यः सेवसितसयसिवुसहसुटस्तुस्वञ्जाम् ८।३।७०॥ परिनिविभ्यः परेषामेषां सस्य षः स्यात्। निषेवति। २२७६ प्राक्सितादड्व्यवायेऽपि ८।३।७१॥ 'सेवसित'–(सू० २२७५) इत्यत्र सितशब्दात्प्राक् ये सुनोत्यादयस्तेषामड्व्यवायेऽपि षत्वं स्यात्। न्यषेषत्। न्यषेषीत्। न्यषेषिष्यत्। २२७७ स्थादिष्वभ्यासेन चाभ्यासस्य ८।३।६४॥ प्राक्सितात्स्थादिष्वभ्यासेन व्यवायेऽपि षत्वं स्यात्। एषामेव चाभ्यासस्य न तु सुनोत्यादीनाम्। निषिषेध। निषिषिधतुः। २२७८ सेधतेर्गतौ ८।३।११३॥ गत्यर्थस्य सेधतेः षत्वं न स्यात्। गङ्गां विसेधति। ४८ षिधू

त्सप्तमीद्विवचनम्। षत्वयोरिति। आलम्बनाविदूर्ययोरर्थयोर्विद्यमानस्य अवात्परस्य स्तम्भेरित्यन्वयः। अपूर्वविधिरयम्, इण्णः परत्वाऽभावादप्राप्तेः। आलम्बने यथा–यष्टिमवष्टभ्य तिष्ठतीति। आश्रित्येत्यर्थः। आविदूर्ये सामीप्यम्। अवष्टब्धा गौः। निरुद्धा सती समीपे आस्त इत्यर्थः। वेश्च। अवादित्यनुकर्षणार्थश्चकारः। तदाह—व्यवाभ्यामिति। विष्वगति। अवष्वणति। सशब्दं भुङ्क्त इत्यर्थः। अट्कुप्वाङिति णत्वम्। परिनिविभ्यः। सेवेत्यकार उच्चारणार्थः 'षह सेवायाम्'इति धातोर्ग्रहणम्। परिषेवते। निषेवते। विषेवते। सितेत्यनेन षिञ् बन्धन इति क्तान्तस्य ग्रहणम्। अस्यैव धातोः परजन्तो वा पचाद्यजन्तो वा सयशब्दः। विषितः विषयः। 'षिवु' तन्तुसन्ताने परिषीव्यति। 'षह' मर्षणे। परिषहते। सुट् आगमः। परिष्करोति। स्तुस्वञ्भ्यो'रुपसर्गात् सुनोतीत्येव सिद्धे 'सिवादीनां वे'ति विकल्पार्थं पुनर्वचनम्। प्राक्सितात्। सुनोत्यादय इति। 'उपसर्गात्सुनोतीत्यादिसूत्रोपात्ता' इति शेषः। तेषामिति। पञ्चदशानामित्यर्थः। न्यषेधादिति। अकारेण व्यवहितत्वादिणः परत्वाभावादप्राप्तौ वचनम्। अभ्यषुणोदित्यप्युदाहार्यम्। स्थादिषु। अभ्यासेनेति तृतीयान्तम्। प्राक्सितादित्यनुवर्तते। तदाह—प्राक्सितादिति। उपसर्गात्सुनोतीति सुत्र स्थाधातुमारभ्य 'परिनिविभ्यः सेवसिते'त्यत्र सितशब्दात्प्राक् ये धातव उपात्ताः तेषु दशस्वित्यर्थः। निषिषेधेत्यादौ अभ्यासात्परस्य सस्य अभ्यासव्यवहितत्वेन उपसर्गात्परत्वाभावादप्राप्तौ वचनम्। ननु निषिषेधेत्यादौ अभ्यासस्येकारस्य उपसर्गात्सुनोतीत्यनेनैव सिद्धत्वादभ्यासस्येति व्यर्थमित्याशङ्क्य नियमार्थमित्याह—एषामेवेति। अभ्यासस्थसकारस्य चेत् षत्वं तर्हि स्थादिदशानामेवेत्यर्थः। एवं च 'षू प्रेरणे' अभिसुषूवति। अत्राभ्यासस्य न षत्वम्। अभ्यासात्परस्य तु सस्य स्तौतिण्योरेवेति नियमान्न षत्वम्। सेधतेः। न षत्वमिति। 'न रपरे'त्यतो नेत्यनुवृत्तेरिति भावः। गङ्गां विसेधतीति। गच्छतीत्यर्थः। इह 'उपसर्गात्सुनोती'ति षत्वं न भवति। अनन्तरस्येति

शास्त्रे माङ्गल्ये च। शास्त्रं शासनम्। २२७६ स्वरतिसूतिसूयतिधूञूदितो वा ७।२।४४॥ स्वरत्यादेरूदितश्च परस्य वलादेरार्धधातुकस्येड्वा स्यात्। २२८० झषस्तथोर्धोऽधः ८।२।४०॥ झषः परयोस्तथोर्धः स्यान्न तु दधातेः। जश्त्वम्। सिषेद्ध। सिषेधिथ। सेद्धा-सेधिता। सेत्स्यति-सेधिष्यति। असैत्सीत्। २२८१ झलो झलि ८।२।२६॥ झलः परस्य सस्य लोपः स्याज्झलि। असैद्धाम्। असैत्सुः। असैत्सीः। असैद्धम्। असैद्ध। असैत्सम्। असैत्स्व। असैत्स्म। पक्षे असेधीत्। असेधिष्टा-

---

न्यायेन 'उपसर्गात्सुनोती'त्यस्यैवायं निषेधः, न त्वादेशप्रत्यययोरित्यस्यापि। तेन सिषेधयिषतीत्यादौ आदेशप्रत्यययोरिति षत्वं भवत्येव।

षिधू इति। ननु वाक्यसङ्घविशेषात्मकस्य शास्त्रस्य कथं क्रियारूपत्वात्कथं धात्वर्थत्वमित्यत आह—शास्त्रं शासनमिति। माङ्गल्यं तु शुभकर्म। षिध गत्यामितिवदस्यापि रूपाणि। तत्र वलादावार्धधातुके नित्यमिटि प्राप्ते। स्वरति। 'आर्धधातुकस्येड्वलादे'रित्यनुवर्तते। स्वरति सूति सूयति धूञ् ऊदित् एषां समाहारद्वन्द्वात्पञ्चम्येकवचनम्। फलितमाह—स्वरत्यादेरिति। स्वरतीति स्वृञातोः शपा निर्देशः। सूतीति सूयतीति च लुग्विकरणस्य श्यन्विकरणस्य च सूधातोर्निर्देशः। एवं च 'ष्णू प्रेरणे' इति तौदादिकस्य न ग्रहणम्। 'धूञ् कम्पने' स्वादिः क्र्यादिश्च। ऊकारानुबन्धनिर्देशात् 'धू विधूनन' इत्यस्य न ग्रहणम्। 'इट्सनि वे'त्यतो वेत्यनुवर्तमाने वाग्रहणं 'लिङ्सिचोरात्मनेपदेष्वि'ति सूत्रयोः विकल्पनिवृत्त्यर्थमिति भाष्यम्। एवं च यलि इडभावपक्षे धिस्वादौ सिसेध् थ इति स्थिते। झषस्तथोः। झष इति पञ्चमी। तश्च थ चेति द्वन्द्वः। तकारादकार उच्चारणार्थः। तकारथकारयोरिति लभ्यते। 'धः' इति प्रथमैकवचनम्। अकार उच्चारणार्थः। धकार इति लभ्यते। 'अध' इति षष्ठ्यन्तम्। धाधातुभिन्नस्येति लभ्यते। तदाह—झषः परयोरिति। जश्त्वमिति। सिसेध् ध इति स्थिते 'झलां जश् झशि' इति प्रथमधकारस्य दकारे सिसेद्धेति रूपमित्यर्थः। सिषिधिव-सिषिध्व सिषिधिम-सिषिध्म। क्रादिनियमस्तु नेड्वशीति प्रक्रमान्नप्राप्तिस्थैवाभावस्य निवर्तकः, नतु विभाषादिप्राप्तिस्थापि, अनन्तरस्येति न्यायात्। इट्पक्षे आह-सिषेधिथेति। सेद्धेति। लुट् तास इडभावः डा टिलोपः गुणः। धत्वं जश्त्वम्। सेद्धारौ। सेद्धार इत्यादि। सेधितेति। इट्पक्षे रूपम्। सेत्स्यति सेधिष्यतीति। लृटि स्यः इड्विकल्पः। असैत्सीदिति। लुङस्तिप्। इकारलोपः। च्लिः। सिच्। इडभावः। 'अस्तिसिचः' इति ईट्। 'वदव्रजे'ति वृद्धिः। धकारस्य धत्वम्। असैध् स् तामिति स्थिते, अपृक्तत्वाभावादीडभावादिडभावाच्च, 'इट ईटी'ति सिचो लोपे अप्राप्ते। झलो झलि। झल इति पञ्चमी। संयोगान्तस्येत्यतो लोप इति, 'रात्सस्ये'त्यतः, सस्येति चानुवर्तते। तदाह—झलः परस्य सस्य लोपः स्यादिति। असैद्धामिति। असैध् स् तामिति स्थिते सलोपे धत्वे जश्त्वे च रूपम्। पक्ष इति। इट्पक्षे इत्यर्थः। असेधीदिति।

मित्यादि । ४९ खाद भक्षणे । ऋकार इत् । खादति । चखाद । ५० खद स्थैर्ये हिंसायां च । चाङ्क्षणे । स्थैर्येऽकर्मकः । खदति । २२८२ **अत उपधायाः ७।२।११६॥** उपधाया अतो वृद्धिः स्यात् ञिति णिति च प्रत्यये परे । चखाद । २२८३ **णलुत्तमो वा ७।१।९१॥** उत्तमो णल्वा णित्स्यात् । चखाद—चखद । २२८४ **अतो हलादेर्लघोः ७।२।७॥** हलादेर्लघोरकारस्येडादौ परस्मैपदपरे सिचि वृद्धिर्वा स्यात् । अखादीत्-अखदीत् । ५१ बद स्थैर्ये । पवर्गीयादिः । बदति । बबाद । बेदतुः । बेदिथ । बबाद—बबद । अबादीत्—अबदीत् । ५२ गद व्यक्तायां वाचि । गदति । २२८५ **नेर्गदनदपतपदघुमास्यतिहन्तियातिवातिद्रातिप्सातिवपतिवहतिशाम्यतिचिनोतिदेग्धिषु च ८।४।१७॥** उपसर्गस्थान्निमित्तात्परस्य नेर्णः

'इट ईटोति' सलोपः । नेटीति वृद्धिप्रतिषेधः । लघूपधगुणः । खाट् इति । अत्र ऋदित्वं 'नाग्लोपी'त्याद्यर्थमित्यभिप्रेत्याह—ऋकार इदिति । खदति । **स्थैर्यम्**—स्थिरीभवनम् । णलि अजन्तत्वाभावादचो ञ्णितीति वृद्धेरप्राप्तौ । अत उपधायाः । वृद्धिः स्यादिति । 'सृजेर्वृद्धि'रित्यतः **तदनुवृत्तेरिति** भावः । ञिति णिति चेति । **'अचो ञ्णिती**त्यतः **तदनुवृत्तेरिति** भावः । चखादेति । **एत्वाभ्यासलोपौ तु नात्र भवतः** । पित्त्वे अकित्त्वात्, आदेशादित्वात्, तदपेक्षया वृद्धेः परत्वाच्च । णलुत्तमः । णित स्यादिति । **'गोतो णि**दित्यतस्तदनुवृत्तेरिति भावः । चखाद—चखदेति । **णित्त्वे उपधावृद्धिः** । तदभावे न । अतो हलादेः । **'सिचि वृद्धिः परस्मैपदेष्वि'त्यनुवर्तते । 'नेटी'त्यस्मादिटीति 'ऊर्णोतेर्विभाषे'त्यतो विभाषेति च । तदाह—हलादेरिति । हलाद्यवयवस्येत्यर्थः । आदिग्रहणं स्पष्टार्थम् । हलः परस्येत्येव सिद्धेः । अखादीत्-अखदीत् इति । वृद्धौ तदभावे च इट ईटोति सिज्लोपः । अखादिष्टाम्, अखदिष्टामित्यादि ।**

बदेति । **स्थैर्यम्** स्थिरीभवनम् । पवर्गीयादिरिति । **पवर्गतृतीयादिरित्यर्थः । नतु वृन्योष्ठ्यादिरिति भावः ।** बबादेति । **'अत उपधाया'** इति वृद्धिः । बेदतुरिति । **अभ्यासजश्त्वेन आदेशादित्वेऽपि जश्त्वस्य वैरूप्यापादकत्वाऽभावादेत्वाभ्यासलोपाविति भावः । बबादेत्यत्र तु पित्त्वेन 'कित्त्वाभावादेत्वाभ्यासलोपौ न । बेदिथेति । अकित्त्वेऽपि 'थलि च सेटि' इत्येत्वाभ्यासलोपौ । बेदथुः बेद । अथ उत्तमपुरुषणलि 'णलुत्तमो वे'ति णित्त्वविकल्पादुपधावृद्धिविकल्प इत्याह—बबादेति । बेदिव बेदिम । अबादीत्—अबदीत् इति । 'अतो हलादे'रिति वृद्धिविकल्पः । गदेति । व्यक्तवाक् मनुष्यकृतशब्दप्रयोगः । जगादेति । चुत्वजश्त्वे । 'उपधावृद्धिः । वैरूप्यापादकादेशादित्वादेत्वाभ्यासलोपौ न । जगदतुः जगदुरित्यादि । नेगद । 'रषाभ्यां नो णः' इत्यनुवर्तते । 'उपसर्गादसमासेऽपि' इत्यत उपसर्गादिति च । तच्च उपसर्गस्थे लाक्षणिकम् । तदाह—उपसर्गस्थादिति । क्षिपका शपा च निर्देशाः यङ्लुगिनवृत्त्यर्थाः ।

स्याद् गदादिषु । प्रणिगदति । जगाद । ५३ रद विलेखने । विलेखनं भेदनम् । रराद । ५४ णद अव्यक्ते शब्दे । २२८६ **णो नः ६।१।६५॥** धातोरवयवस्य नः स्यात् । नदति । 'णोपदेशास्त्वनर्द नाटिनाथ्नाधून्नन्द्नक्कनृतः ।' नाटेर्दीर्घाईस्य पर्युदासाद्धटादिर्णोपदेश एव । तवर्गचतुर्थान्तनाधतेः नृनन्द्योश्च केचिण्णोपदेशतामाहुः । **२२८७ उपसर्गादसमासेऽपि णोपदेशस्य ८ । ४ । १४ ॥** उपसर्गस्थान्निमित्तात्परस्य णोपदेशस्य धातोर्नस्य णः स्यात्समासेऽसमासेपि । प्रणदति । प्रणिनदति । ५५ अर्द गतौ याचने च । 'अत आदेः' सू (२२४८) २२८८ **तस्मा-**

प्रणिगदतीति । भिन्नपदस्थत्वादप्राप्तौ वचनम् । रदेति । णलि उपधावृद्धिमभिप्रेत्याह—ररादेति। रेदतुरित्यादि। अरादीत्। अरदीत्। णदेति । अव्यक्तशब्दः अमनुष्यपशुपक्ष्यादिकृतशब्दप्रयोगः । णो नः । 'णः' इति षष्ठ्यन्तम् । 'धात्वादेः षः सः' इत्यतोऽनुवर्तनादाह—धातोरिति । तेन अणतीत्यादौ न नत्वम् । नः स्यादिति । नकारः स्यादित्यर्थः । नदतीति । 'मेघार्दि,रिति शेषः । 'णो नः' इति नत्वस्यानैमित्तिकतया लिण्निमित्तादेशादित्वाऽभावादेत्वाभ्यासलोपौ स्त एव—नेदतुरित्यादि । अथ 'नृनर्दूनन्दनक्कनाटिनाथ्नाधूनवर्जं णोपदेशाः' इति भाष्यं श्लोकार्धेन सङ्गृह्णाति—णोपदेशास्त्विति । 'नर्द शब्दे' । 'नट अवस्कन्दने' चुरादिः । 'नाथृ नाध याच्ञादौ' । द्वितीयचतुर्थान्तौ । 'टु नदि समृद्धौ' । 'नक्क नाशने' । 'णू नये' । 'नृतो गात्रविक्षेपे' । एभ्योऽष्टभ्योऽन्ये णकारादिधातवः इदानीं नकारादित्वेन दृश्यमाना अपि नत्वसम्पन्ननकारादितया णोपदेशाः प्रत्येतव्या इत्यर्थः । 'नाटो'ति एयन्तस्य प्रयोजनमाह—नाटेरिति । घटादिरिति । 'नट नृत्ता'विति घटादिपठित इत्यर्थः । तत्फलं घटादौ वक्ष्यते । मतान्तरमाह—तवर्गेति । तवर्गचतुर्थान्तनाधधातोः नृनन्द्योश्च णोपदेशेषु पर्युदासाऽभावमङ्गीकृत्य तेषामपि णोपदेशत्वमाहुरित्यर्थः । अत्र मते पञ्चभ्यो भिन्ना णोपदेशा इति फलितम् । भाष्यविरोधोऽत्रारुचिबीजम् । ननु णकारमुपदिश्य तस्य किमर्थं नकारो विधीयते । नकार एवोपदिश्यतामित्याशङ्क्य तत्प्रयोजनमाह—उपसर्गात् । 'रषाभ्यां नो णः' इत्यधिकृतम् । तदाह—उपसर्गस्थादिति । 'समासेऽङ्गुलेः सङ्गः' इत्यतः समास इत्यनुवृत्तेरसमासे न स्यादित्यसमासग्रहणम् । तथा सति 'प्रणाम' इत्यादौ समासे न स्यादित्यपिग्रहणम् । तदाह—समासे असमासेऽपीति । णस्योपदेशो यस्मिन्निति विग्रहः । प्रणदतीति । भिन्नपदस्थत्वादप्राप्तिः । प्रणिनदतीति । नेर्गदेति णत्वम् । नचात्र 'उपसर्गादसमास' इति धातुनकारस्य णत्वं शङ्क्यम्, अट्कुप्वाङ्नुम्व्यवधानात् । अर्दतीति । 'उपर्यार्दा च' इत्यत्र इक इत्यनुवर्तनात् अर्दतीत्यादौ न दीर्घः । लिटि णलि द्वित्वे हलादिशेषे अत आदेरित्यभ्यासाकारस्य दीर्घे आ अर्देति स्थिते—तस्मान्नुट् । द्वौ हलौ यस्य तस्येति विग्रहः । तच्छब्देन 'अत आदे'रिति कृतदीर्घः परा-

न्नुड्द्विहलः ७ । ४ । ७१ ॥ द्विहलो धातोर्दीर्घीभूतादकारात्परस्य नुट् स्यात् । आनर्द । आर्दीत् । ५६ नर्द ५७ गर्द शब्दे । णोपदेशत्वाभावान्न णः । प्रनर्दति । गर्दति । जगर्द । ५८ तर्द हिंसायाम् । तर्दति । ५९ कर्द कुत्सिते शब्दे । कुत्सिते कौक्षे । कर्दति । ६० खर्द दन्दशूके दशनहिंसादिरूपाया दन्दशूककियायामित्यर्थः । खर्दति । चखर्द । ६१ अर्द ६२ अदि बन्धने । अन्तति । आनन्त । अन्दति । आनन्द । ६३ इदि परमैश्वर्ये । इन्दति । इन्दाञ्चकार । ६४ विदि अवयवे । पवर्गतृतीयादिः । बिन्दति । अवयवं करोतीत्यर्थः । भिदि इति पाठान्तरम् । ६५ गडि वदनैकदेशे । गण्डति । अन्तत्यादयः पञ्चैते न तिङ्विषया इति काश्यपः । अन्ये तु तिङमपीच्छन्ति । ६६ णिदि कुत्सायाम् । निन्दति । प्रणिन्दति । ६७ टुनदि समृद्धौ । २२८६ **आदिर्ञिटुडवः १।३।५।** उपदेशे धातोराद्या एते इतः स्युः । नन्दति । इदित्त्वान्नलोपो न । नन्द्यात् । ६८ चदि आह्लादे ।

मृश्यते । तदाह—दीर्घीभूतादिति । टकार इत् । डकार उच्चारणार्थः । टित्त्वादाद्यवयवः । तदाह—आनर्दति । आर्दीदिति । 'इट ईटि' इति सिज्लोपः । नर्देत्यादि । स्पष्टम् । कर्दति । कुत्सितशब्देन कुत्सितविशेषो विवक्षित इत्याह—कुत्सिते कौक्ष इति । कुक्षिभवे इत्यर्थः । खर्दति । दन्दशूकः दंशनस्वभावः सर्पः । 'दन्दशूको बिलेशयः' इत्यमरः । ननु सर्पस्य क्रियात्वाभावात् कथ धात्वर्थत्वमित्यत आह—दंशनेति ।

अति अदीति । इदित्त्वान्नुम् । तदाह—अन्तर्तीति । आनन्तेति । 'अत आदेः' इति दीर्घः । 'तस्मान्नुड्द्विहलः' इति नुट् । एवम् अन्दति । आनन्देति । नुट् । आन्दीत् । इदीति । परमैश्वर्यम्—परमेश्वरीभवनम् । इन्दतीति । इदित्त्वान्नुम् । इन्दाञ्चकारेति । 'इजादेश्च' इत्याम् । विदीति । इदित्त्वान्नुमित्याह—बिन्दतीति । नन्ववयवस्य अक्रियारूपत्वात् कथं धात्वर्थत्वमित्यत आह—अवयवं करोतीत्यर्थ इति । अबिन्दीत् । अबिन्दिष्टामित्यादि । पाठान्तरमिति । पवर्गीयचतुर्थादिरित्यर्थः । गडीति । वदनैकदेश इति । तत्क्रियायामित्यर्थः । गण्डति । अगण्डीत् । अन्तत्यादय इति । अति अदि बन्धने, इदि परमैश्वर्ये, विदि अवयवे, गडि वदनैकदेशे इति पञ्च धातवः तिङ्प्रकृतयो न भवन्तीति काश्यपमतमित्यर्थः । अन्य इति । काश्यपादन्ये मुनयः तिङमपि एभ्य इच्छन्तीत्यर्थः । णिदीति । इदित्त्वान्नुम् । णोपदेशत्वात् णस्य नत्वम् । तदाह—निन्दतीति । प्रणिन्दतीति । 'उपसर्गादसमासेऽपी'ति णत्वम् । टु नदीति । समृद्धिः प्रजापश्वादिसम्पत्तिः । आदिः । 'भूवादयो धातवः' इत्यस्मात् धातव इत्यनुवृत्त षष्ठया विपरिणम्यते । 'उपदेशेऽजनुनासिक' इत्यस्मात् उपदेश इति, इदिति चानुवर्तते । आदिरिति इदितिच बहुत्वे एकवचनम् । तदाह—उपदेश इति । द्वित्करणं 'ट्वितोऽथु'-मित्येतदर्थम् । नन्दतीति । इदित्त्वान्नुम् । इदित्त्वादिति । आशीर्लिङि यासुटः किरवेऽपि

चन्दति। चचन्द। ६६ त्रदि चेष्टायाम्। त्रन्दति। तत्रन्द। ७० कदि ७१ क्रदि ७२ क्लदि आह्वाने रोदने च। चकन्द। चक्रन्द। चक्लन्द। ७३ क्लिदि परिदेवने। चिक्लिन्द। ७४ शुन्ध शुद्धौ। शुन्धति। शुशुन्ध। नलोपः। शुध्यात्।

अथ कवर्गीयान्ता अनुदात्तेतो द्विचत्वारिंशत्। ७५ शीकृ सेचने। तालव्यादिः। दन्त्यादिः इत्येके। शीकते। शिशीके। ७६ लोकृ दर्शने। लोकते। लुलोके। ७७ श्लोकृ संघाते। संघातो ग्रन्थः। स चेह ग्रथ्यमानस्य व्यापारो ग्रन्थितुर्वा। आद्येऽकर्मको द्वितीये सकर्मकः। श्लोकते। ७८ ष्ठेकृ ७९ ष्ठेकृ शब्दनोत्साहयोः। उत्साहो वृद्धिरौद्धत्यं च। 'एच इग्घ्रस्वादेशे' इति ह्रस्वः। दिष्ठेके। ८० रेकृ शङ्कायाम्। रेकते। ८१ सेकृ ८२ स्रेकृ ८३ स्रेकि ८४ श्रकि ८५ श्लकि गतौ। त्रयो दन्त्यादयः। द्वौ तालव्यादी। अषोपदेशत्वान्न षः। सिस्रेके। ८६ शकि शङ्कायाम्। शङ्कते।

इदित्त्वात्। अनिदितामिति नलोपो नेत्यर्थः। नन्द्यादिति। अन्द्यात्, अन्द्यादित्यस्याप्युपलक्षणम्। चदीत। इदित्त्वान्नुमित्याह—चन्दतीति। त्रदीति। अदुपधोऽयम्। इदित्त्वान्नुमित्याह—त्रन्दतीति। क्रदि क्लदीति। अदुपधौ। क्लिदि परिदेवन इति। अनुदात्तेषु पठितस्येह पाठः परस्मैपदार्थः। शुन्ध शुद्धाविति। अकर्मकोऽयम्। शुन्धतीति। शुचिर्भवतीत्यर्थः। ननु शुधीत्येवमिदेवाऽयं कुतो न पठित इत्यत आह—नलोप इति। आशीर्लिङि 'अनिदितामिति नलोपे शुध्यादिति रूपमिष्टम्। इदित्त्वे तु नलोपो न स्यादिति भावः। अथ कवर्गीयान्ता इत्यादि 'लोकृ' इत्यन्तम। स्पष्टम्। श्लोकृ इति। संघातशब्दं व्याचष्टे—ग्रन्थ इति। ननु वाक्यसमुदायात्मकस्य ग्रन्थस्य अक्रियात्वात् कथं धात्वर्थमित्याशङ्क्याह—स चेहेति। ग्रन्थनं ग्रन्थः सङ्घीभावः सङ्घीकरणं वा। तत्र सङ्घीभवनं सङ्घनिष्ठम्। सङ्घीकरणंतु सङ्घीकर्तृनिष्ठम्। तत्र सङ्घीभवनार्थकत्वे अकर्मकः। सङ्घीकरणार्थत्वे सकर्मक इत्यर्थः। श्लोकत इति। सङ्घीभवतीत्यर्थः, सङ्घीकरोतीति वा। ष्ठेकृ ष्ठेकृ इति। शब्दनम् शब्दः। एच इति। लिटि एशि द्वित्वे 'हलादिः शेषे' देद्रेक् ए इति स्थिते अभ्यासे एकारस्य ह्रस्वो भवन् 'एच इग्घ्रस्वादेशे' इति इकारो भवतीत्यर्थः। दिष्ठेक इति। अभ्यासे धकारस्य जश्त्वेन दकारः। एकारस्य तु ह्रस्व इकारः। रेकृ इति। शङ्का संशयः आक्षेपो वा। शीकृ सेचन इत्यारभ्य एतत्पर्यन्ता ऋदितः। सेकृ इति। आद्यौ एकारमध्यौ ऋदितौ। इतरे त्रयः अदुपधाः इदितः। त्रय इति। पञ्चसु आद्यास्त्रय इत्यर्थः। अषोपदेशत्वादिति। सेकृधातोः पर्युदासान्न षोपदेशत्वम्। द्वितीयतृतीययोस्तु दन्त्यषपरकसादित्वाभावान्न षोपदेशत्वम्। ततश्च सकारस्यादेशसकारत्वाभावान्न षत्वमिति भावः। 'एच इग्घ्रस्वादेश' इत्यभिप्रेत्याह—सिस्रेक इत्यादि। 'सस्रङ्के' इत्यादाविदित्त्वान्नुम्। शकीति। इदित्त्वान्नुमि-

शशङ्के। ८७ अकि लक्षणे। अङ्कते। आनङ्के। ८८ वकि कौटिल्ये। वङ्कते। ८९ मकि मण्डने। मङ्कते। ९० ककि लौल्ये। लौल्यं गर्वश्चापल्यं च। ककते। चकके। ९१ कुक ९२ वृक आदाने। कोकते। चुकुके। वर्कते। वव्रके। 'भ्रुदुद्रुभ्यो लिटः कित्वं गुणात्पूर्वविप्रतिषेधेन। ९३ चक तृप्तौ प्रतिघाते च। चकते। चेके। ९४ ककि ९५ वकि ९६ श्वकि ९७ त्रकि ९८ ढौक्रृ ९९ त्रौक्रृ १०० ष्वष्क १०१ वष्क १०२ मष्क १०३ टिक्रृ १०४ टीक्रृ १०५ तिक्रृ १०६ तीक्रृ १०७ रधि १०८ लधि गत्यर्थाः। कङ्कते। डुढौके। तुत्रौके। 'शुन्धातुष्ठिवुष्वष्कतीनां सत्व-प्रतिषेधो वक्तव्यः।' ष्वष्कते। षष्वष्के। अथ तृतीयो दन्त्यादिः इत्येके। टेकते। टीकते। एवं तेकते। तीकते। लधि भोजननिवृत्तावपि। १०९ अधि ११० वधि १११ मधि गत्याक्षेपे। आक्षेपो निन्दा। गतौ गत्यारम्भे च इत्यन्ये। अङ्घते। आनङ्धे। वङ्घते। मङ्घते। मधि कैतवे च। ११२ राधृ ११३ लाधृ ११४

स्याह—शङ्कत इति। शशङ्क इति। अकीति। लक्षणं चिह्नकरणम्। अङ्क इति। इदित्त्वान्नुम्। आनङ्क इति। 'तस्मान्नुड्द्विहलः' इति नुट्। वकि कौटिल्ये इत्यादि स्पष्टम्। वृक वृकेति। द्वितीयः ऋदुपधः। शपि लघूपधगुणं मत्वा आह—कोकत इति। चुकुक इति। 'असंयोगादि'ति कित्त्वात् न लघूपधगुणः। अभ्यासे चुत्वम्। लघूपधगुणे रपरत्वं मत्वाह—वर्कत इति। लिटि 'असंयोगा'दिति कित्त्वान्न गुण इति मत्वाह—वव्रके इति। उरदत्त्वं हलादिशेषः। ननु कित्त्वात् परत्वात् गुणः स्यात्, कृते गुणे रपरत्वे संयोगात्परत्वेन कित्त्वस्याऽप्रवृत्त्या अनित्यत्वादित्यत आह—ऋदुपधेभ्यो लिटः कित्त्वं गुणात् पूर्वविप्रतिषेधेनेति। चकेति। तृप्तावकर्मकः। प्रतिघाते सकर्मकः। एत्वाभ्यासलोपौ मत्वाह—चेक इति। ककीति। एते पञ्चदश धातवः। आद्याश्चत्वारः इदितः। द्वितीयो वकारादिः। तृतीयस्तालव्यादिः। पञ्चमषष्ठौ दशमाद्याश्चत्वारश्च ऋदितः। दशमद्वादशौ इदुपधौ। रधिलधी इदितौ चतुर्थान्तौ। कङ्कत इत्यादाविदित्त्वान्नुम्। डुढौके तुत्रौक इति। अभ्यासे ढस्य जश्त्वेन डकारः, ओकारस्य ह्रस्व उकारः। अथ ष्वष्कधातोः षोपदेशपरिगणनात् 'धात्वादे'रिति सत्वे प्राप्ते आह—पुन्धातिति। षष्वष्क इति। संयुक्तहलमध्यस्थत्वादेत्त्वाभ्यासलोपौ न, संयोगात्परत्वेन लिटः कित्त्वाभावाच्च। तृतीय इति। तथा च ष्वष्कते इति रूपम्। केवलदन्त्यपरकसादिरित्वाभावेन षोपदेशत्वाऽभावः। टेकते इति। लघूपधगुणः। टीकत इति। दीर्घोपधत्वाच्च गुणः। एवं तेकते तीकत इति। रङ्घते लङ्घते। इदित्त्वान्नुम्। लधि भोजननिवृत्तावपीति। निवृत्तिः विमुखीभवनम्। लङ्घते। न भुङ्क्त इत्यर्थः। अधीति। त्रयोऽपि चतुर्थान्ता इदितः। आनङ्ध इति। 'तस्मान्नुड्द्विहलः' इति नुट्। वङ्घत इति। इदित्त्वान्नुम्। लिटि तु ववङ्धे इति रूपम्। वादित्वात्संयुक्तहलमध्यस्थत्वात् संयोगात्परत्वेन लिटः कित्त्वाऽभावाच्च एत्त्वाभ्यासलोपौ न। मधि कैतवे चेति। कैतवं वञ्चना। राधृ इति।

द्राघृ सामर्थ्ये। राघते। लाघते। ध्राघृ इत्यपि केचित्। द्राघृ आयामे च। आयामो दैर्घ्यम्। द्राघते। ११५ श्लाघृ कत्थने। श्लाघते।

अथ परस्मैपदिनः पञ्चाशत्। ११६ फक्क नीचैर्गतौ। नीचैर्गतिर्मन्दगमनमसह्यव्यवहारश्च। फक्कति। पफक्क। ११७ तक हसने। तक्कति। ११८ तकि कृच्छ्रजीवने। तङ्कति। ११९ बुक्क भषणे। भषणं शब्दः। बुक्कति। १२० कख हसने। प्रनिकखति। १२१ ओखृ १२२ राखृ १२३ लाखृ १२४ द्राखृ १२५ ध्राखृ शोषणालमर्थयोः। ओखति। ओखाञ्चकार। १२६ शाखृ १२७ श्लाखृ व्याप्तौ। शाखति। १२८ उख १२९ उखि १३० वख १३१ वखि १३२ मख १३३ मखि १३४ गख १३५ णखि १३६ रख १३७ रखि १३८ लख १३९ लखि १४० इख १४१ इखि १४२ ईखि १४३ वल्ग १४४ रगि १४५ लगि १४६ अगि १४७ वगि १४८ मगि १४९ तगि १५० त्वगि १५१ श्रगि १५२ श्लगि १५३ इगि १५४ रिगि १५५ लिगि गत्यर्थाः। द्वितीयान्ताः पञ्चदश। तृतीयान्तास्त्रयोदश। इह खान्तेषु रिख त्रख त्रिखि शिखि इत्यपि चतुरः केचित्पठन्ति। ओखति। २२६० अभ्यासस्यासवर्णे ६।४।७८॥ इवर्णोवर्णान्तस्य अभ्यासस्येयङुवङौ स्तोऽसवर्णेऽचि। उवोख। सन्निपातपरिभाषया 'इजादेः—' (सू २२३७) इत्याम् न।

अयोऽपि ऋदितः। सामर्थ्यं कार्यक्षमीभवनम्। ध्राघृ इत्यपीति। चतुर्थादिमपि केचित् पठन्तीत्यर्थः। द्राघृ इति। आयामः दीर्घीभवनम्। श्लाघृ कत्थन इति। कत्थनं स्तुतिः। ओकृ इत्यादयो द्विचत्वारिंशदात्मनेपदिनो गताः।

फक्क नीचैरित्यादि स्पष्टम् प्रानकखनीति। 'शेषे विभाषा' इत्यत्र अकखादाविति पर्युदासान्नेर्णत्वं नेति भावः। ओखृ इति। अलमर्थः-भूषणक्रिया, पर्याप्तिः, वारणं वा। ओखति। ओखाञ्चकार। शाख श्लाखृ इति। श्लाघृ इति चतुर्थान्त आत्मनेपदेषु गतः। उख उखीति। पञ्चदशेति। 'इखि इत्यन्ता' इति शेषः। त्रयोदशेति। 'वल्गादय' इति शेषः। तत्र इदित्त्वान्नुम्। आशीर्लिङि नलोपाभावश्च। पठन्तीति। तेषां मते खान्ता एकोनविंशतिरिति बोध्यम्। ओखतीति। शपि लघूपधगुणः। क्ङिति णलः पित्त्वेन कित्त्वाभावात् प्राप्तस्यापि लघूपधगुणस्य द्विर्वचनेऽचीति निषिद्धतया गुरुमत्त्वाभावादाममभावे सति पूर्वं द्वित्वे कृते हलादिशेषे पश्चात् 'बाधादङ्गं बलीय' इति परिभाषया अन्तरङ्गमपि सवर्णदीर्घं बाधित्वा लघूपधगुणे कृते उ ओख् अ इति स्थिते, उवर्णस्य यणि प्राप्ते—अभ्यासस्य। 'अचि श्नुधातुभ्रुवां य्वोरियङुवङौ' इति चानुवर्तते। इह उश्च यू तयोरिति विग्रहः। अभ्यासविशेषणमिदं तदन्तविधिः तदाह-इवर्णोवर्णान्तस्येति। ङित्त्वादन्तादेशौ। उवोखेति। 'अचि श्नुधातुभ्रुवां य्वोरियङुवङौ' इत्यस्य तु नात्र प्राप्तिः, अजादौ प्रत्यये परत एव तत्प्रवृत्तेः, अभ्यासस्य अङ्गत्वाभावाच्च।

ऊखतुः । ऊखुः । इह सवर्णदीर्घस्याभ्यासग्रहणेन ग्रहणाद्ह्रस्वः प्राप्तो न भवति । सकृत्प्रवृत्तत्वात् । आङ्गत्वादि पर्जन्यवल्लक्षणप्रवृत्त्या ह्रस्वे कृते ततो दीर्घः । 'वार्णादाङ्गं बलीयः' इति न्यायात्परत्वाच्च । उङ्गति । ववाख । ववखतुः । वङ्गति । मेखतुः । (मङ्गति । ममङ्ग । नखति । नङ्गति । रखति । रेखतुः । रङ्गति । एखति । इङ्गति । ईङ्खति । वल्गति । रङ्गति । लङ्गति । अङ्गति । वङ्गति । मङ्गति ।

ननु द्वित्वे कृते लघूपधगुणे सति इजादिगुरुमत्त्वादाम् स्यादित्यत आह—मन्निपातेति । णलि परे विहितगुणसम्पन्नमिजादिगुरुमत्त्वमाश्रित्य आमं गुणो न प्रवर्तयति, आमि सति धातोर्णल्परकत्वव्यघाताद्धि भावः । ऊखतुरिति । अपिपदेन किं ह्रस्वात् लघूपधगुणाभावे द्वित्वे हलादिशेषे सवर्णपरकत्वाद्भ्यासस्यासवर्ण इति इयङभावे सवर्णदीर्घे रूपमिति भावः । ननु 'ऊखतु'रित्यत्र ऊकारस्य सवर्णदीर्घसम्पन्नस्य एकादेशतया पूर्वान्तत्वेनाभ्याससम्बन्धित्वात् "ह्रस्व' इत्यभ्यासस्याचो विधीयमानो ह्रस्वः प्राप्नोतीत्याशङ्क्याह—इह सवर्णदीर्घस्य अभ्यासग्रहणेन ग्रहणाद्ह्रस्वः प्राप्त इति । अथ परिहरति—न भवतीति । कुत इत्यत आह—सकृत्प्रवृत्तत्वादिति । तदेवोपपादयति—आङ्गत्वादिति । उ ऊखतुरिति स्थिते पर्जन्यवल्लक्षणप्रवृत्त्या अभ्यासह्रस्वे सवर्णदीर्घे 'ऊखतु'रिति स्थितिः । तत्र ऊकारस्य पुनरभ्यासह्रस्वो न भवति । लक्ष्ये लक्षणस्य सकृदेव प्रवृत्तिरिति न्यायादित्यर्थः । ननु वर्णमात्रापेक्षत्वेन अन्तरङ्गतया प्रथमं सवर्णदीर्घ एव स्यादिति ह्रस्वस्य प्रथमं प्रवृत्तिर्दुरुपपादेत्यत आह—वार्णादिति । तथा चानया परिभाषया बहिरङ्गोऽपि ह्रस्व एव प्रथमं प्रवर्तत इति भावः । परत्वाच्चेति । नन्विदमनुपपन्नम्, उक्तरीत्या अन्तरङ्गं सवर्णदीर्घे प्रति ह्रस्वस्य परत्वकथनौचित्यादिति चेत् ? न, परत्वादित्यस्य—परकालप्राप्तिकत्वादित्यर्थात् । अभ्यासविकारेषु परस्परं बाध्यबाधकभावाभावेन युगपदेव हलादिशेषे ह्रस्वे च कृते पश्चात्प्रवर्तमानस्य सवर्णदीर्घस्य पूर्वं पूर्वमन्तरङ्गं परं परं बहिरङ्गमिति न्यायेन बहिरङ्गत्वादित्यलम् ।

वङ्गतीति । इदित्त्वान्नुम् । ववाखेति । वखधातोर्णलि उपधावृद्धिः । ववखतुरिति । वादिरवादेस्वाभ्यासलोपौ न । वङ्गतीति । वखिधातोरिदित्त्वान्नुम् । ववङ्ग । मेखतुरिति । एत्वाभ्यासलोपौ । मङ्गतीति । मखिधातोरिदित्त्वान्नुम् । ममङ्गेति । संयुक्तहलमध्यस्थत्वादेस्वाभ्यासलोपौ न । नखति नङ्गतीति । 'णो नः' इति नत्वम् । रखतीति । णलि तु उपधावृद्धिः । रराख । अतुसादावेस्वाभ्यासलोपौ—रेखतुरित्यादि । रङ्गतीति । इदित्त्वान्नुम् । ररङ्ग । लखतीति । इखधातोः शपि लघूपधगुणः । इयेख । ईखतुः । लङ्गतीति । इदित्त्वान्नुम् । इङ्काञ्चकार । ईङ्गतीति । अलघूपधत्वाच्च गुणः । ईङ्काञ्चकार । वल्गतीति । लिटि ववल्ग । ववल्गतुः । रङ्गतीति लङ्गतीति । ररङ्गतुः । अङ्गतीति । लिटि-आनङ्ग । वङ्गतीति । लिटि-ववङ्ग । ववङ्गतुः । मङ्गतीति । लिटि ममङ्ग । ममङ्गतुः । तङ्गतीति ।

तङ्कति। त्वङ्कति। श्रङ्कति। श्लङ्कति। इङ्कति। रिङ्कति। लिङ्कति। रेखति। त्रखति। त्रिङ्कति। शिङ्कति)। स्वगि कम्पने च। १५६ युगि १५७ जुगि १५८ बुगि वर्जने। युङ्कति। १५९ घघ हसने। घघति। जघाघ। १६० मघि मण्डने। मङ्घति। १६१ शिघि आघ्राणे। शिङ्घति।

अथ चवर्गीयान्ताः। तत्रानुदात्तेत एकविंशतिः। १६२ वर्च दीप्तौ। वर्चते। १६३ षच सेचने सेवने च। सचते। सेचे। सचिता। १६४ लोचृ दर्शने। लोचते। लुलोचे। १६५ शच व्यक्तायां वाचि। शेचे। १६६ श्वच १६७ श्वचि गतौ। श्वचते। श्वञ्चते। १६८ कच बन्धने। कचते। १६९ कॅच १७० काचि दीप्तिबन्धनयोः। चकञ्चे। चकाञ्चे। १७१ मच १७२ मुचि कल्कने। कल्कनं दम्भः शाठ्यं च। कथनम् इत्यन्ये। मेचे। मुमुच्चे। १७३ मचि धारणोच्छ्रायपूजनेषु। ममञ्चे। १७४ पचि व्यक्तीकरणे। पञ्चते। १७५ ष्टुच प्रसादे। स्तोचते। तुष्टुचे। १७६ ऋज गतिस्थानार्जनोपार्जनेषु। अर्जते। नुडविधौ ऋकारैक-

---

लिटि ततङ्क ततङ्कतुः। त्वङ्कतीति। लिटि तत्वङ्क तत्वङ्कतुः। श्रङ्कतीति। लिटि शश्रङ्क शश्रङ्कतुः। श्लङ्कतीति। लिटि शश्लङ्क शश्लङ्कतुः। इङ्कतीति। लिटि इङ्कांचकार। रिङ्कतीति। लिटि रिरिङ्क रिरिङ्कतुः। लिङ्कतीति। लिटि लिलिङ्क लिलिङ्कतुः।

अथ खान्तेषु रिखादिचतुर्णां मतान्तरसिद्धानामुदाहरणमाह—रेखतीति। शपि लघूपधगुणः। रिरेख रिरिखतुः। त्रखतीति। लिटि तत्राख तत्रखतुः। त्रिङ्कतीति। लिटि तित्रिङ्क तित्रिङ्कतुः। शिङ्कतीति। लिटि शिशिङ्क शिशिङ्कतुः। स्वगि कम्पने चेति। चादृतौ। स्वङ्कति तत्वङ्क। युगीति। त्रयोऽपि इदितः। युङ्कति युङ्कते। जुङ्कति। घघ हसने इति। घघति। णलि उपधावृद्धिः। जघाघ। जघघतुः। लिण्निमित्तादेशादित्वादेत्वाभ्यासलोपौ न। मघि मण्डन इति। इदित्त्वान्नुमित्याह—मङ्घतीति। ममङ्घ ममङ्घतुः। शिघि आघ्राण इति। शिङ्घति शिशिङ्घ। फक्कादयः पञ्चाशदृताः।

वर्च दीप्ताविति। दीप्तिः प्रकाशः। षच सेचन इति। अच्परकसादित्वात् षोपदेशोऽयम्। स्वरितेत्सु 'षच समवाये' इति वक्ष्यते। सेच इति। सस्वस्य लिण्निमित्तत्वाऽभावादादेशादित्वेऽपि एत्वाभ्यासलोपौ। दम्भः शाठ्यं चेति। परविस्रम्भार्थं धर्मांधाचरणं दम्भः कापट्याऽपरपर्यायः। 'कपटोऽस्त्री व्याजदम्भोपधयः' इत्यमरः। शाठ्यं कुटिलीभावः। 'निकृतस्त्वनृजुः शठः' इत्यमरः। पचि व्यक्तीकरण इति। 'पचि विस्तारे' इति चुरादौ वक्ष्यते। 'पचे' त्येके। ष्टुच प्रसाद इति। ष्टुत्वसम्पन्नः टकारः। ततश्च दन्त्यपरकसादित्वात् षोपदेशोऽयम्। स्तोचत इति। षस्य सत्वे सति ष्टुत्वं निवर्तत इति भावः। तुष्टुचे इति। 'शर्पूर्वाः खयः' इति तकारशेषः। आदेशसकारत्वात् षत्वम्। ऋज गतीति। अर्जनम्—सम्पादनम्। उपार्जनम्—सेवनम्। अर्जत

देशो रेफो हल्त्वेन गृह्यते । तेन द्विर्हल्त्वान्नुट् । आनृजे । १७७ ऋजि १७८ भृजी भर्जने । ऋजते । 'उपसर्गादिति'—(सू ७४) इति वृद्धिः । प्रार्जते । ऋजां-चक्रे । आर्जिष्ट । भर्जते । बभृजे । अभर्जिष्ट । १७९ एजृ १८० भ्रेजृ १८१ भ्राजृ दीप्तौ । एजांचक्रे । १८२ ईज गतिकुत्सनयोः । ईजाञ्चक्रे ।

अथ द्विसप्ततिर्वेज्यन्ताः परस्मैपदिनः । १८३ शुच शोके । शोचति । १८४ कुच शब्दे तारे । कोचति । १८५ कुञ्च १८६ कुञ्ज कौटिल्यार्थीभावयोः । 'अनिदिताम्' (सू ४१५) इति नलोपः । कुञ्च्यात् । कुञ्ज्यात् । गतौ

इति । शपि लघूपधगुणः । रपरत्वम् । नुड्विधाविति । वार्तिकमिदम् । आनृज इति । लिटः असंयोगादिति कित्त्वात् गुणाभावे द्विर्भावे उरदत्वे रपरत्वे हलादिशेषे अत आदेरिति दीर्घे नुडिति भावः । ऋजि भृजा इति । ऋदुपधौ द्वौ । आद्यः इदित् । द्वितीयस्य ईदित्त्वात् 'स्वरितो निष्ठाया'मिति नेट् । इदित्त्वान्नुम् । अनुस्वारपरसवर्णौ । ऋञ्जाञ्चक्र इति । नुमि सति 'संयोगे गुरिति ऋकारस्य गुरुत्वादिजादेश्चेत्याम् । ऋञ्जिता । ऋञ्जिष्यते । ऋञ्जताम् । आर्ञ्जत । ऋञ्जेत । ऋञ्जिषीष्ट । अथ लुङि रूपं दर्शयति—आर्ञ्जिष्टेति । लुङः तादेशः । च्लेः । सिच् । इट् । लघूपधत्वा-भावान्न गुणः । आट् । वृद्धिः । ष्टुत्वम् । ष्टुत्वम् । लृङि-आर्ञ्जिष्यत । भर्जत इति । शपि लघूपधगुणः । रपरत्वम् । बभृजे । भर्जिता । भर्जिष्यते । भर्जताम् । अभर्जत । भर्जेत । भर्जिषीष्ट । लुङि रूपमाह—अभर्जिष्टेति । लुङस्तादेशः च्लेः सिच् । इट् । गुणः । रपरत्वम् । अडागमः । षत्वं । ष्टुत्वम् । लृङि-अभर्जिष्यत । एजृ भ्रेजृ भ्राजृ इति । आद्ययोः ऋदित्त्वम् 'नाश्लोपी' त्यर्थम् । तृतीयस्य तु अकारेक्तत्वेऽप्यात्मनेपदं सिध्यति । ऋदित्त्वस्य न किञ्चित्फलमस्ति । न च 'नाश्लोपी'ति चरमपरे णौ उपधा-ह्रस्वः, फलं भवितुमर्हति, 'भ्राजभासे'त्यादिना तत्र उपधाह्रस्वविकल्पस्य वक्ष्यमाण-त्वात् । ईज गताविति । अलघूपधत्वान्न गुणः । ईजते । ईजाञ्चक्र इति । इजादेश्चेत्याम् । वक्ष्यति एकविंशतिर्वृत्ताः ।

द्विसप्ततिरिति । चवर्गीयान्ता इति शेषः । शुच शोक इति । स्मृत्वा क्लेशः शोकः । शोचतीति । वियुक्त पित्रादिकं स्मृत्वा विलपनातीत्यर्थः । कुच शब्द इति । शब्दनं शब्दः । चुकोच चुकुचतुः । अकोचीत् । कुञ्च कुञ्जेति । उभावपि चवर्गपञ्चमोपधौ । कुञ्चतौ अनुस्वारपरसवर्णसम्पन्नस्य नकारस्थानिकलकारस्य धातुपाठे निदर्शनः । धातु-पाठे 'नकारजावनुस्वारपञ्चमौ' इत्यभियुक्तवादात् । तदाह—अनिदितामिति । अनु स्वारपरसवर्णयोरसिद्धतया नकारस्य सत्त्वेन आशीर्लिङि अनिदितामिति लोप कुच्यादिति रूपमित्यर्थः । क्ङिति तु चुकुञ्च चुकुञ्चतुः इत्यादौ पित्त्वेन संयोगात्परत्वेन

१८७ लुञ्च अपनयने। लुञ्च्यात्। १८८ अञ्चु गतिपूजनयोः। अञ्च्यात्। गतौ न-लोपः। पूजायां तु अञ्च्यात्। १८९ वञ्चु १९० चञ्चु १९१ तञ्चु१९२ त्रञ्चु १९३ मुञ्चु १९४ म्लुञ्चु १९५ म्रुचु १९६ ग्लुचु गत्यर्थाः। वञ्च्यात्। चञ्च्यात्। तञ्च्यात्। त्रञ्च्यात्। अम्रुञ्चीत्। अम्लुञ्चीत्। २२९१ **जृस्तन्भुम्रुचुम्लुचु-ग्रुचुग्लुचुग्लुञ्चुश्विव्यश्च** ३।१।५८॥ एभ्यश्च्लेरङ् वा स्यात्। अम्रुचत्—अम्रोचीत्। अम्लुचत—अम्लोचीत्। १९७ ग्रुचु १९८ ग्लुचु १९९ कुजु २०० खुजु स्तेयकरणे। जुम्रोच। अम्रुचत—अम्रोचीत्। जुग्लोच। अग्लुचत्-अग्लोचीत्। अक्रोजीत्। अखोजीत्। २०१ ग्लुञ्चु २०२ घस्ज गतौ। लुङि अङ् वा। अग्लुचत्-अग्लुञ्चीत्। सस्य श्चुत्वेन शः, तस्य जश्त्वेन जः। सज्जति। अय-मात्मनेपद्यपि। सज्जते। २०३ गुजि अव्यक्ते शब्दे। गुञ्जति। गुञ्ज्यात्। २०४ अर्च

च किस्वाभावान्नलोपो न भवति। क्रुञ्चधातुस्तु स्वाभाविकऋकारोपध एव। न त्व-नुस्वारपरसवर्णसम्पन्नऋकारोपध इति 'परेश्च घाङ्कयोः' इति सूत्रे भाष्यकैयटयोः स्थि-तम्। अतस्तस्याशीर्लिङि 'अनिदितामिति' नलोपस्य न प्रसक्तिरित्यभिप्रेत्योदाह-रति—कुञ्च्यादिति। अकाररहितपाठस्तु प्रामादिक इति शब्देन्दुशेखरे स्थितम्। लु-ञ्चेति। अयमपि नोपधः। अनुस्वारपरसवर्णसम्पन्नस्य ऋकारस्य निदृशः। तथा च आशीर्लिङि अनिदितामिति नलोपः। तदाह-लुञ्च्यादिति। एवमञ्चधातोरपि द्रष्टव्यम्। पूजायां त्विति। 'नाञ्चेः पूजायाम्' इति निषेधादिति भावः।

वञ्चु चञ्चु तञ्चु इति। आद्याः षट् नोपधाः। अनुस्वारपरसवर्णाभ्यां ऋकारनि-दृशः। तथा च तेषामाशीर्लिङि अनिदितामिति नलोपः, तदाह—वञ्च्यादिति। लुङि अम्रुञ्चीत् अम्लुञ्चीदिति नोपधयोः रूपम्। सिज्लोपः। जृस्तन्भु। 'च्लेः सिच्' इत्यतः च्लेरिति, 'अस्यतिवक्तिख्यातिभ्य.' इत्यतः अङिति, 'इरितो वा' इत्यतो वेति चानु-वर्तते। तदाह—एभ्यश्च्लेरङ् वेति। जृष् वयोहानौ, स्तन्भुः सौत्रो धातुः, म्रुचुम्लुचु गत्यर्थौ, ग्रुचु ग्लुचु स्तेयकरणे, ग्लुञ्चु गतौ, इत्येतेभ्य इत्यर्थः। अम्रुचादिति। च्लेरङि सति ङित्त्वान्न लघूपधगुणः। अम्रोचीदिति। अङभावे 'हल ईदि' इति सिज्लोपः। ग्रुचु ग्लुचु इति। 'जृस्तन्भु' इति अङ् वेत्याह—अम्रुचत अम्रोचीदिति। आद्यस्य रूपे। अथ द्वितीयस्य अङ्विकल्पमुदाहरति—अग्लुचत् अग्लोचीदिति। अङि सति ङित्त्वान्न ल-घूपधगुणः। अङभावे सिज्लोपः। ग्लुञ्चु घस्ज्रिति। आद्यो नोपधः, द्वितीयस्तु घोप-देशः, अचूपरकसादित्वात्। तत्र आद्यस्य लुङि विशेषमाह—अङ्वेति। 'जृस्तन्भ्वेत्य-नेनेति शेषः। ग्लुचुग्लुञ्चुग्लुञ्चवो पृथग्ग्रहणसामर्थ्यात् नलोपो नेति वृत्तिकृत्। अग्लुञ्चत्। सस्येति धात्वादेः षस्य सत्वे सस्ज् इति स्थिते द्वितीयस्य सकारस्य श्चुत्वेन शा-कार इत्यर्थः। तस्येति। शकारस्य 'झलां जश् झशि' इति जकार इत्यर्थः। भुजीत। ङित्त्वादाशीर्लिङि नलोपो नेत्याह—गुञ्ज्यादिति। अर्चेति। खिटि 'तस्माच्छुद्धि-

पूजायाम्। आनर्च्च। २०५ म्लेच्छ अव्यक्ते शब्दे। अस्फुटेऽव्यक्ते शब्दे चेत्यर्थः। म्लेच्छति। मिम्लेच्छ। २०६ लछ २०७ लाछि लक्षणे। ललञ्छ। ललाञ्छ। २०८ वाछि इच्छायाम्। वाञ्छति।

२०९ आछि आयामे। आञ्छति। 'अत आदेः' (सू २२४८) इत्यत्र तपरकरणं स्वाभाविकह्रस्वपरिग्रहार्थम्। तेन दीर्घाभावान्न नुट्। आञ्छ। तपरकरणं मुखसुखार्थमिति मते तु नुट्। आनाञ्छ। २१० ह्रीच्छ लज्जायाम्। जिह्रीच्छ। २११ हुर्च्छा कौटिल्ये। कौटिल्यमपसरणम् इति मैत्रेयः। 'उपधायां च' (सू २२६५) इति दीर्घः। हूर्च्छति। २१२ मुर्छा मोहसमुच्छ्राययोः। मूर्छति। २१३ स्फुर्छा विस्तृतौ। स्फूर्छति। २१४ युच्छ प्रमादे। युच्छति। २१५ उछि उञ्छे। 'उञ्छः कणश आदानं कृषिशाद्यर्जनं शिलम्।' इति यादवः। उञ्छति। उञ्छाञ्चकार। २१६ उछी विवासे। विवासः समाप्तिः। प्रायेणायं विपूर्वः। व्युञ्छति। २१७ धृज २१८ धृजि २१९ ध्रज २२० ध्रजि २२१ ध्वज २२२ ध्वजि गतौ। धर्जति। धृञ्जति। ध्रजति। ध्रञ्जति। ध्वजति। ध्वञ्जति। २२३ कूज अव्यक्ते

हल' इति नुटं मत्वाह—आनर्चेति। म्लेच्छेत्यादि स्पष्टम्। तुकि लञ्छतीति रूपम्। ललञ्छ ललञ्छतुः।

आञ्छति। लिटि णलि द्वित्वे हलादिशेषे अभ्यासह्रस्वे अ आञ्छ् अ इति स्थिते 'अत आदेरिति दीर्घे 'तस्मान्नुड्द्विहल' इति च नुटमाशङ्क्याह—अत आदेरिति। तत्र हि दीर्घस्याकारस्य दीर्घविधौ प्रयोजनाऽभावादेव ह्रस्वाकारस्य दीर्घे इति सिद्धौ अत इति तपरकरणं स्वाभाविकस्यैव ह्रस्वाकारस्य परिग्रहार्थमित्यर्थः। ततः किमित्यत आह—तेनेति। 'अत आदेः' इति दीर्घविधौ स्वाभाविकह्रस्वाकारस्यैव ग्रहणेन 'अत आदेः' इति दीर्घस्याऽभावान्न नुडित्यर्थः। आञ्छेति। द्वित्वे हलादिशेषे अभ्यासह्रस्वे सवर्णदीर्घ इति भावः। मुखसुखार्थमिति। तथाच ह्रस्वस्थानिकदीर्घाकारादपि परस्य नुड् भवत्येवेति भावः। 'ह्रीच्छ लज्जाया'मित्यादि स्पष्टम्। युच्छ प्रमाद इति। यकारादिरुदुपधोऽयम्। युच्छतीति। अन्तरङ्गत्वात् 'छे च' इति तुकि लघूपधत्वाऽभावात् न गुणः। युयुच्छ। युयुच्छतुः। उञ्छि उञ्छे इति। अयमप्युदुपधः। उञ्छतीति। इदित्त्वान्नुमि अलघूपधत्वान्न गुणः। उञ्छाञ्चकारेति। नुमि कृते 'सयोगे गुरु' इत्युकारस्य गुरुत्वात् 'इजादेश्च' इत्यामिति भावः। धृजेति। आद्यौ ऋदुपधौ। इतरे चत्वारः अदुपधाः। द्वितीयचतुर्थषष्ठाः इदितः। धर्जतीति। शपि लघूपधगुणः। रपरत्वम्। दधर्ज दधृजतुः धृज्यात्। अधर्जीत्। धृञ्जतीति। इदित्त्वान्नुम्। दधृञ्ज। इदित्त्वान्नकोपो न। धृञ्ज्यात्। अधृञ्जीत्। ध्रजतीति। णलि द्रध्राज। दध्रजतुः। अध्राजीत्। अध्रजीत्। ध्रञ्जतीति। अदुपधोऽयम्। दध्रञ्ज। इदित्त्वान्नकोपो न। दध्रञ्जतुः। ध्वजतीति। दध्वाज। ध्वञ्जतीति। दध्वञ्ज। कूज अव्यक्ते

शब्दे। चुकूज। २२४ अर्ज २२५ षर्ज अर्जने। अर्जति। आनर्ज। सर्जति। ससर्ज। २२६ गर्ज शब्दे। गर्जति। २२७ तर्ज भर्त्सने। तर्जति। ततर्ज। २२८ कर्ज व्ययने। चकर्ज। २२९ खर्ज पूजने च। चखर्ज। २३० अज गतिक्षेपणयोः। अजति। २२६२ अजेर्व्यघञपोः २।४।५६॥ अजेर्वी इत्ययमादेशः स्यादार्धधातुकविषये घञमपं च वर्जयित्वा। 'वलादावार्धधातुके वेष्यते' विवाय। विव्यतुः। विव्युः। अत्र वकारस्य हलपरत्वात् 'उपधाया च' (सू २२६०) इति दीर्घे प्राप्ते 'अचः परस्मिन्'-(सू ५०) इति स्थानिवद्भावेनाचपरकत्वम्। न च 'न पदान्त'-(सू ५१) इति निषेधः। 'स्वरादीर्घयलोपेषु लोपानादेश एव न स्थानिवत्।' इत्युक्तेः। यलि 'एकाचः'-(सू २२४६) इतीडिनषेधे प्राप्ते। २२६३ कृसृभृवृस्तु-

इति। स्पष्टम्। सर्जतीत्यत्र षोपदेशत्वात् षत्वम्। अज गतौ। लटि अजतीत्यादि सिद्धवत्कृत्य लिटि विशेषमाह-अजेर्व्यघञपोः। 'वी' इति दीर्घान्तं लुप्तप्रथमाकम्। 'आर्धधातुके' इत्यधिकृतम्। विषयसप्तम्येषा, नतु परसप्तमी, व्याख्यानात्। तदाह-आर्धधातुकविषय इत्यादि। अजेरिति इकानिर्दशः, अज धातोरित्यर्थः। आर्धधातुक इति परसप्तम्याश्रयणे तु वेवीयत इति न स्यात्, वीभावात्प्राक् अजादित्वात् यङपत्यभवात्। विषयसप्तम्याश्रयणे तु यङि विवक्षिते वीभावे सति हलादित्वाभाङ् निर्बाधः। अघञपोः किम्? घञि समाजः। 'समुदोरजः पशुषु' इत्यपि समजः। अत्र 'अघञपोरि'ति न वक्तव्यम्। 'वा लिटि' इत्यतो वेत्यनुवर्तते। व्यवस्थितविभाषेयम्। घञि अपि च न भवति। ण्वुटि वलादावार्धधातुके च विकल्पः। अन्यत्र तु आर्द्धधातुके नित्यमिति भाष्यकैयटयोः स्थितम्। तदाह-वलादावार्धधातुके वेष्यत इति। उक्तव्यवस्थितविभाषोपलक्षणमिदम्। विवायेति। लिटो णलि विवक्षिते वीभावे सति णलि द्वित्वे अभ्यासहस्वे 'अचो ञ्णिति' इति वृद्धौ आयादेश इति भावः। विव्यतुरिति। वीभावे सति अतुसि द्वित्वे अभ्यासहस्वे 'असंयोगात्' इति कित्त्वात् गुणाभावे इयङपवादे 'एरनेकाचः' इति यणि रूपम्। एवम् उसि विव्युरिति रूपम्। ननु विव्यतुः विव्युरित्यत्र द्वितीयवकारस्य यकारात्मकहल्परकत्वात् 'उपधायां च' इति इकारस्य दीर्घः स्यादित्याशङ्क्य ईकारस्थानिकस्य यकारस्य 'अचः परस्मि'न्निति स्थानिवत्त्वेन द्वितीयवकारस्य हल्परकत्वाऽभावात् तस्मिन्वकारे परे इकारस्य न दीर्घं इति परिहरति-अत्र वकारस्येत्यादि अहल्परकत्वमित्यन्तम्। ननु दीर्घविधौ 'न पदान्त' इति निषेधात्कथमिह यकारस्य स्थानिवत्त्वमित्याशङ्क्य निराकरोति—नचान पदान्तेति निषेध इति। 'शङ्क्य' इति शेषः। कुत इत्यत आह-स्वरादीर्घेति। इत्युक्तेरिति। वार्तिककृतेति शेषः। यलि एकाच इति। अजधातोरनुदात्तोपदेशानन्तर्भावेऽपि 'वी' इति तदादेशोऽनुदात्तः, अजन्तेषु ऊदृदन्तादिचतुर्दशभिन्नधातूनामनुदात्तत्वाभ्युपगमादिति भावः। कृसृ। कृ सृ भृ वृ स्तु द्रु स्रु श्रु इत्यष्टानां समाहारद्वन्द्वात्पञ्चमी। लिटीति षष्ठ्यर्थे सप्तमी। 'नेड्वशिकृति' इत्यतो

द्रुस्रुश्रुवो लिटि ७।२।१३॥ एभ्यो लिट इण् स्यात्। क्रादीनां चतुर्णां ग्रहणं नियमार्थम्। प्रकृत्याश्रयः प्रत्ययाश्रयो वा यावानिणिनषेधः स लिटि चेत्तर्हि क्रादिभ्य एव नान्येभ्य इति। ततश्चतुर्णां थलि भारद्वाजनियमप्रापितस्य वमादिषु क्रादिनियमप्रापितस्य चेटो निषेधार्थम्। **२२१४ अचस्तास्वत्थल्यनिटो नित्यम् ७।२ ६१॥** उपदेशेऽजन्तो यो धातुः तासौ नित्यानिट् ततः परस्य थल इण् स्यात्।

नेति इडिति चानुवर्तते। तदाह—एभ्य इति। ननु 'एकाच उपदेशेऽनुदात्तात्' इति 'अञ्चुकः क्ति' इति च सिद्धे किमर्थमिदं सूत्रमित्यत आह—क्रादीनामिति। कृ सृ भृ वृ इत्येतेषामित्यर्थः। नियमस्वरूपमाह—प्रकृत्याश्रय इत्यादि। कृ सृ भृ इत्येषां त्रयाणां अनुदात्तोपदेशान्तभूतानामेकाच उपदेश इति यः प्रकृत्याश्रयो निषेधः, यश्च वृधातोः 'अञ्चुकः क्ति' इति प्रत्ययाश्रयो निषेधः, तदुभयमपि यदि लिटि स्यात् तर्हि कृसृभृवृ इत्येभ्य एव परस्य लिटो भवति, ननु तदन्येभ्यः परस्येत्यर्थः। तेन बिभिदिव बिभिदिमेत्यादौ 'एकाच उपदेशे' इति निषेधः, बभूविव बभूविमेत्यादौ 'अञ्चुकः क्ति' इति निषेधश्च न भवति। अथ स्तुद्रुस्रुश्रुवां ग्रहणस्य प्रयोजनमाह—तत इति। 'अन्येषा'मिति शेषः। चतुर्णामिति। ग्रहणमिति शेषः। ततः तेभ्यः कृसृभृवृ इत्येभ्यः अन्येषां स्तुद्रुस्रुश्रुवां ग्रहणं थलि तुष्टोथ दुद्रोथ सुस्रोथ शुश्रोथ इत्यत्र 'ऋतो भारद्वाजस्य' इति वचयमाणेन 'ऋदन्तस्यैव थलि नेट् अन्यस्य तु स्यादेवे'ति नियमेन प्राप्तस्य इटो निषेधार्थम्। तथा तुष्टुव तुष्टुमेत्यादौ 'कृसृभृवृ' इत्युक्तेन 'क्रादिभ्य एव परस्य लिट इण्निषेधः अन्येभ्यस्तु परस्य इट् स्यादेवे'ति नियमेन प्राप्तस्य इटो निषेधार्थं चेत्यर्थः। तदेवम् अजेः थलि वीभावे 'एकाचः' इति निषेधाऽभावाद्विडागमो निर्बाध इति स्थितम्। अथ तस्य थलि इडागमस्य भारद्वाजनियमाद्विकल्पं वक्तुम् तदपवोगित्वेन सूत्रद्वयमुपन्यस्यति—अचस्तास्वत्। अधातोस्थलोऽभावाद्धातोरिति लभ्यते। 'अच' इति तद्विशेषणम्। तदन्तविधिः। 'उपदेशेऽत्वत' इत्युत्तरसूत्रादुपदेश इत्यपकृष्यत इति 'ऋतो भारद्वाजस्ये'ति सूत्रभाष्ये स्थितम्। उपदेशे अजन्तादित्यन्वयः। 'अनिट' इति बहुव्रीहेः पञ्चमी। नित्यमिड्विहीनादित्यन्वयः। 'तासि च क्लृप' इत्यतस्तासीत्यनुवर्तते। तासौ नित्यमनिट इत्यन्वयः। थलीति षष्ठ्यर्थे सप्तमी। 'गमेरिट् परस्मैपदेष्वि'त्यतः इडिति, 'न वृद्भ्यश्चतुर्भ्यः' इत्यतो नेति चानुवर्तते। 'तास्व'दिति सप्तम्यन्तात् वतिः। तदाह—उपदेशे योऽजन्त इत्यादि इण् स्यादित्यन्तम्। 'तास्व'दिति शेषः। यथा तासि नेट् तथा थल्यपि नेट् इत्यर्थः। चिनेथ जुहोथेत्याद्युदाहरणम्। अत्र क्रादिनियमप्राप्त इण् भवति। अजन्तात्किम्। बिभेदिथ। उपदेश इति किम्। 'हृञ्' जहर्थ। इह गुणे रपरत्वे अजन्तत्वाभावादिणिनिषेधो न स्यादित्युपदेशग्रहणम्। नित्यग्रहणं किम् 'स्तृ गतौ' सस्वरिथ 'स्वरतिसूती'ति तासौ विकल्पितेटकत्वाच्च निषेधः। तासौ किम्। लूत्वा लुलविथ। थलि किम्। पपिव। पपिम। इह तासीत्यनुवृत्त्यैव सिद्धे 'तास्व'दिति नातीवोपयुज्यत इति केचित्। वस्तुतस्तु यस्तासौ विधते तस्मादेव पर-

२२६५ उपदेशेऽत्वतः ७।२।६२॥ उपदेशेऽकारवतस्तासौ नित्यानिटः परस्य थल इयन स्यात् । २२६६ ऋतो भारद्वाजस्य ७।२।६३॥ तासौ नित्यानिट ऋदन्तादेव थलो नेट् भारद्वाजस्य मतेन । तेनान्यस्य स्यादेव । अयमत्र सङ्ग्रहः—

अजन्तोऽकारवान्वा यस्तास्यनिट् यजि वेडयम् ।
ऋदन्त ईदृङ् नित्यानिट् क्राद्यन्यो लिटि सेड् भवेत् ॥

स्य थल इण्निषेधार्थं तास्वदित्यावश्यकम् । तेन 'लिटयन्यतरस्याम्' इत्यतो घस्लृभावे जघसिथेत्यत्र न निषेधः, घसस्तासावभावादिति अद भक्षण इति धातौ मूल एव वक्ष्यते । 'यस्तासावस्ति अनिट् चे'ति भाष्यम् । एवं वेञो वयादेशेऽपि न निषेध इति बोध्यम् । उपदेशेऽत्वतः । 'अत्वत' इति छेदः । अत् ह्रस्वाकारः सः अस्य अस्तीति अत्वान् 'तसौ मत्वर्थ' इति मत्वान्त जश्त्वम् । अच इति वर्तते पूर्वसूत्रं, तत्र यदनुवृत्तं तदप्यनुवर्तते । तदाह—उपदेशे अकारवत इति । शक्लृ शक्तौ, पच् पक्तेष्युदाहरणम् । अत्र क्रादिनियमप्राप्त इण्न भवति । उपदेशे किम् । कृष विलेखने । चकर्षिथ । अत्वत इति किम् । बिभेदिथ । तपरः किम् । ररार्धिथ । तासौ किम् । जग्रहिथ । 'जिघृक्षतीत्यत्र 'सनि ग्रहगुहोश्चे'ति सनि नित्यमनिट्, नतु तासौ । नित्येति किम् । अज्ञ, आनञ्जिथ । 'ऊदित्वात्तासौ वे'डिति भाष्यम् । चक्रमिथेत्यप्युदाहरणम् 'स्नुक्रमो'रिति नियमेनात्मनेपदे तासावनिट्त्वेऽपि परस्मैपदे सेट्त्वात् । ऋतो भारद्वाजस्य । तासौ नित्यमनिट इति, थलीति, नेति, इडिति चानुवर्तते । भारद्वाजस्य मते ऋदन्ताद्धातोः परस्य नेडिति फलितम् । ह्रस्वलादौ 'अचस्तास्वत्थल्येव सिद्धम् । अतो नियमार्थमिदमित्याह—ऋदन्तादेव थलो नेडिति । अनृदन्तात्परस्य तु थल इट् स्यादेवेत्येवकारार्थः । तदाह—अन्यस्य स्यादेवेति । ऋदन्तभिन्नात्परस्य थल इट् स्यादेवेत्यर्थः । तथाच ऋदन्तभिन्नाद्धातोः परस्य थलो नेत्यनिवृत्तिरिति भारद्वाजमते फलतीति न वैयर्थ्यमिति भावः । तथाच अनृदन्ताद्धातोः परस्य थलो भारद्वाजमते इट् । मतान्तरे तु 'अचस्तास्वदिति' 'उपदेशेऽत्वत' इति च तत्र नेडिति विकल्पः फलतीति भावः । तद्यथा—पपिथ—पपाथ । पेचिथ-पपक्थ । अयमत्रेति । 'कृसृभृवृस्तुद्रुस्रुश्रुवो लिटी'ति 'अचस्तास्वत्थल्यनिटो नित्य'मिति 'उपदेशेऽत्वत' इति 'ऋतो भारद्वाजस्ये'ति च सूत्रचतुष्टयस्य विषयाणां सङ्ग्रहो वक्ष्यत इत्यर्थः । अजन्त इति । यः धातुः ऋदन्ताभिन्नाजन्तः ह्रस्वाकारवान् वा तासौ नित्याऽनिट् साऽयं थलि विकल्पितेट् इति पूर्वार्धस्यार्थः । अत्र 'ईदृग्'इत्यस्य तासौ नित्याऽनिडित्यर्थः । यः ऋदन्तस्तासौ नित्यानिट् सः थलि नित्याऽनिडित्यर्थः । 'अचस्तास्व'दिति पाणिनिमते 'ऋतो भारद्वाजस्ये'ति भारद्वाजमतेऽपि तस्य अनिट्कत्वादिति भावः । क्रादन्य इति । क्रादष्टभ्योऽन्यो धातुः लिटि नित्यं सेडित्यर्थः । क्रादष्टभ्य एव परस्य लिटि नेडिति कृसृभृवृ इति सूत्रेण नियमितत्वादिति भावः । नन्वत्र क्रादन्य इत्युक्त्या क्रादीनामष्टानां लिटि नित्यानिट्कत्वमवगतम् । तद्बुरपन्नम्, स्तुद्रुस्रुश्रुवाम् ऋदन्तभिन्नत्वेन

न च स्तुद्रुस्रुश्रुवादीनामपि थलि विकल्पः शङ्क्यः। 'अचस्तास्वत्-'(सू २२९४) इति 'उपदेशेऽत्वतः' (सू २२९५) इति च योगद्वयप्राप्तिपूर्वस्यैव हि प्रतिषेधस्य भारद्वाजनियमो निवर्तकः 'अनन्तरस्य'-इति न्यायात्। विवयिथ। विवेथ। आजिथ। विव्यथुः। विव्य। विवाय। विवय। विव्यिव। विव्यिम। वेता। अजिता। वेष्यति। अजिष्यति। अजतु। आजत्। अजेत्। वीयात्। २२९७ **सिचि वृद्धिः परस्मैपदेषु ७।२।१॥** इगन्ताङ्गस्य वृद्धिः स्यात्परस्मैपदे परे सिचि। अवैषीत्-आजीत्। अवेष्यत्। आजिष्यत्। २३१ तेज पालने। तेजति। २३२ खज

तेभ्यस्थलि 'अचस्तास्वत्'इति निषेधस्य भारद्वाजमते अप्रवृत्त्या इडविकल्पस्य दुर्वारत्वात्।नचैवं सति 'कृसृभृवृ'इति सूत्रे स्तुद्रुस्रुश्रुग्रहणमनर्थकमिति वाच्यम्। तुष्टुव तुष्टुमेत्यादौ वमादिषु क्रादिनियमप्राप्तस्य इटो निवृत्त्या चरितार्थत्वादित्याशङ्क्य निराकरोति-नच स्तुद्रुस्रुश्रुवामपि थलि विकल्पः शङ्क्य इति। कुत इत्यत आह-अचस्तास्वदिति। ऋदन्तादेव परस्य थल इण्निषेधः अनृदन्तात्परस्य तु थल इण्निषेधो नेति भारद्वाजीयं मतम्। अयं च इण्निषेधस्य निषेधः 'अचस्तास्वदिति 'उपदेशेऽत्वत' इति च सूत्रद्वयप्राप्तस्यैव इण्निषेधस्य पक्षे निवर्तकः। न तु क्रादिसूत्रप्राप्तस्य इट्प्रतिषेधस्यापीत्यर्थः। कुत इत्यत आह-अनन्तरस्येति। 'अचस्तास्वदिति 'उपदेशेऽत्वत' इति 'ऋतो भारद्वाजस्ये'ति च सूत्रक्रमः। 'कृसृभृवृ' इति सूत्रं तु ततः प्राग्बहुव्यवहितमिति भावः। किंच 'नेड्वशिकृती'त्यादिप्रतिषेधकाण्डोत्तरम् 'आर्धधातुकस्येड्वलादे'रिति विधिकाण्डारम्भसामर्थ्यादपि स्तुद्रुस्रुश्वामिण्निषेधो भारद्वाजनियमं बाधत इति 'नेड्वशिकृती'त्यत्र 'वस्वेकाजाद्धसा'मित्यत्र च भाष्ये स्पष्टम्।

ततश्च प्रकृते अजेरत्थलि वीभावे तस्य अजन्तत्वात्तासौ नित्याऽनिट्कत्वाच्च इड्विकल्प इति सिद्धम्। तदाह—विवयिथ विवेथेति। सिबादेशस्य थलः पित्त्वात् असंयोगादिति कित्त्वाभावाद्गुणः। इट्पक्षे अयादेशः। आजिथेति। 'वलादावार्धधातुके वेष्यते' इति वीभावाऽभावपक्षे अजधातोरनुदात्तोपदेशवहिर्भूतत्वादिट्। द्वित्वम्। हलादिशेषः। 'अत आदे'रिति दीर्घः। विव्यथुरिति। अथुसि वीभावे द्वित्वे अभ्यासहस्वे असंयोगादिति कित्त्वात् गुणाभावे इयङ्पवादे 'एरनेकाच' इति यणि रूपम्। विव्येति। यस्य अकारे वीभावादि। विवाय विवयेति। 'णलुत्तमो वे'ति णित्त्वविकल्पाद्वृद्धिविकल्पः। विव्यिव विव्यिमेति। 'क्ङिच्च्यो लिटि सेड् भवेद्'ति नित्यमिट् यण्। वेता अजितेति। लुटि तासि वीभावविकल्पः। वेष्यति अजिष्यतीति। लृटि स्ये वीभावविकल्पः। वीयादिति। आशीर्लिङादेशस्य आर्धधातुकत्वात् वीभावः। अथ लुङि सिचि वीभावे 'सार्वधातुकार्धधातुकयो'रिति गुणे प्राप्ते। सिचि वृद्धिः। इगन्तस्येति। वृद्धिश्रुत्या इक इत्युपस्थितमङ्गस्येत्यधिकृतस्य विशेषणम्, तदन्तविधिरिति भावः। एवं च अकोषीदित्यादौ व्यञ्जनस्य न वृद्धिः। अवैषीदिति। लुङ्लस्तप्। इकारलोपः। सिचि वीभावः। 'एकाच' इति इण्निषेधः। वृद्धिः। अडागमः। षत्वम्। आजीदिति। सिज्लोपः। 'वदव्रजे'ति हलन्तलक्ष-

मन्थे । खजति । २३३ खजि गतिवैकल्ये । खञ्जति । २३४ एजृ कम्पने । एजा-मकार । २३५ टु ओ स्फूर्ज वज्रनिर्घोषे । स्फूर्जति । पुस्फूर्ज । २३६ क्षि क्षये । अकर्मकः । अन्तर्भावितण्यर्थस्तु सकर्मकः । क्षयति । चिक्षाय । चिक्षियतुः । चि-क्षियुः । चिक्षयिथ–चिक्षेथ । चिक्षियिव । चिक्षियिम । क्षेता । २२९८ अकृत्सा-र्वधातुकयोर्दीर्घः ७।४।२५॥ अजन्तस्याङ्गस्य दीर्घः स्याद्यादौ प्रत्यये परे । नतु कृत्सार्वधातुकयोः । क्षीयात् । अक्षैषीत् । २३७ क्षीज अव्यक्ते शब्दे । कूजिना सहायं पठितुं युक्तः । चिक्षीज । २३८ लज २३९ लजि भर्त्सने । २४० लाज २४१ लाजि भर्जने च । २४२ जज २४३ जजि युद्धे । २४४ तुज हिंसायाम् । तोजति । तुतोज । २४५ तुजि पालने । २४६ गज २४७ गजि २४८ गृज २४९ गृजि २५० मुज २५१ मुजि शब्दार्थाः । गज मदने च । २५२ वज २५३ व्रज

णायां वृद्धौ 'नेटि' इति निषिद्धायामाडागमे 'आटश्चे'ति वृद्धिः। लृकि अवेष्यत् आजि-ष्यत् । तेज पालन इत्यादि । स्पष्टम् । एजृ कम्पन इति । दीर्घौ त्वात्मनेपदी गतः । टु ओ-स्फूर्जेति । 'आदिर्ञिटुडव' इति टुरित् । उपदेशेऽनुनासिकत्वादोकार आकारश्च इत् । 'ट्वितोऽथुजि'त्यथुच्, 'आदितश्चे'ति निष्ठानत्वम्, 'ओदितश्चे'ति निष्ठायामिण्निषे-धश्च तत्फलानि । 'उपधायां चे'ति दीर्घस्यानित्यत्वज्ञापनार्थमिह दीर्घं ऊकारः पठितः। तेन हुश्नुंतीत्यादौ न दीर्घ इत्याहुः । स्फूर्जतीति । लिटि पुस्फूर्ज, अस्फूर्जीत् । क्षि क्षय इति । क्षयो नाशः । अन्तर्भावितण्यर्थ इति । नाशनार्थक इत्यर्थः । अजन्तेष्वेवास्य पाठो युक्तः । क्षयतीति । नश्यतीत्यर्थः, नाशयतीति वा । शपि गुणे अयादेशः । चिक्षायेति । णलि वृद्धिः आयादेशः । चिक्षियतुरिति । 'असंयोगा'दिति कित्त्वान्न गुणः । इयङ् । चिक्षयिथ—चिक्षेथेति । पित्त्वेन कित्त्वाऽभावात् गुणः । अजन्तत्वात्तासौ नित्यानिट्त्वा-च्च भारद्वाजनियमात्थलि वेट् । इट्पक्षे अयादेशः । चिक्षियथुः । चिक्षिय । चिक्षाय । चिक्षय । वस्मसोस्तु क्रादिनियमात् नित्यमिट् । तदाह—चिक्षियिव चिक्षियिमेति । क्षेता । क्षेष्यति । क्षयतु । अक्षयत् । क्षयेत् । आशीर्लिङि विशेषमाह—अकृत्सार्व-धातुकयोः । अङ्गस्येत्यधिकृतम् । 'अयङ् यि क्ङिती'त्यतः क्ङीति सप्तम्यन्तम-नुवृत्तमङ्गाक्षिप्तप्रत्ययविशेषणम्, तदादिविधिः । दीर्घश्रुत्या 'अच' इत्युपस्थितमङ्गवि-शेषणम् । तदन्तविधिः । तदाह–अजन्तस्येत्यादिना । अकृत्सार्वधातुकयोरिति किम् । प्रकृत्य । तुकं बाधित्वा परत्वादीर्घो न । क्षिनुयात्, सार्वधातुकत्वाच्च दीर्घः । लाजेति । ईदुपधः । कूजिनेति । 'कूज अव्यक्ते शब्दे' इत्यनुपदमेव पठितम् । तत्रैव 'कूज क्षीज अव्यक्ते शब्दे' इति पठितुं युक्तमित्यर्थः, अर्थैक्यादिति भावः । लज लजि भर्त्सन इति । 'भर्त्सनं त्व 'कारगीः' इत्यमरः । द्वितीय इदित् । आशीर्लिङि लज्यात् । लज्यात् । लाज लाजि भर्जन इति । आदुपधौ । द्वितीय इदित् । जज जजीत्यादि । स्पष्टम् । वज व्र-जेति । आदेस्य असंयुक्तहलूमध्यस्थाऽकारवत्त्वेऽपि 'न शसददवादिगुणानाम्' इत्येत्वा-

गतौ । ववजतुः 'वदव्रज'—(सू २२६७) इति वृद्धिः । अव्राजीत् ।

अथ टवर्गीयान्ताः शाङन्ता अनुदात्तेतः षट्त्रिंशत् । २५४ अट्ट 'अतिक्रमहिंसयोः । दोपधोऽयम् । तोपधः इत्यन्ये । अट्टते । आनट्टे । २५५ वेष्ट वेष्टने । विवेष्टे । २५६ चेष्ट चेष्टायाम् । अचेष्टिष्ट । २५७ गोष्ट २५८ लोष्ट संघाते । जुगोष्टे । जुलोष्टे । २५९ घट्ट चलने । जघट्टे । २६० स्फुट विकसने । स्फोटते । पुस्फुटे । २६१ अठि गतौ । अण्ठते । आनण्ठे २६२ वठि एकचर्यायाम् । ववण्ठे । २६३ मठि २६४ कठि शोके । शोक इह आध्यानम् । मण्ठते । कण्ठते । २६५ मुठि पालने । मुण्ठते । २६६ हेठ विबाधायाम् । विबाधा शाठ्यम् । जिहेठे । २६७ एठ च । एठाञ्चक्रे । २६८ हिडि गत्यनादरयोः । हिण्डते । जिहिण्डे । २६९ हुडि सङ्घाते । जुहुण्डे । २७० कुडि दाहे । चुकुण्डे । २७१ वडि विभाजने । २७२ मडि च । ववण्डे । २७३ भडि परिभाषणे परिहासः सनिन्दोपालम्भश्च परिभाषणम् । बभण्डे । २७४ पिडि सङ्घाते । पिण्डे । २७५ मुडि मार्जने । मार्जनं शुद्धिर्न्यग्भावश्च । मुण्डते । २७६ तुडि तोडने । तोडनं दारणं हिंसनं च । तुण्डते । २७७ हुडि वरणे । वरणं स्वीकारः । हरणे इत्येके । हुण्डते । २७८

म्यासलोपो नेत्याह—ववजतुरिति । अवाजीत्—अवजीत् । द्वितीयस्य तु संयुक्तहलमध्यस्थाऽकारत्वादेर्वेत्त्वाऽभ्यासलोपयोर्न प्रसक्तिः । 'अव्राजी' दित्यत्र 'अतो हलादे'रिति वृद्धिविकल्पमाशङ्क्याह—वदव्रजेति वृद्धिरिति । हलन्तत्वादेव सिद्धे व्रजग्रहणस्य 'अतो हलादे'रिति विकल्पनिरासार्थत्वादिति भावः । शुचादयो द्विसप्ततिर्वृत्ताः ।

शाङन्ता इति । 'शाङ् श्लाघायामित्यन्ता इत्यर्थः । शाठयन्ता इति क्वचित्पाठः । अट्टेति । तवर्गतृतीयोपधोऽयम् । चत्वंष्टुत्वाभ्यां टोपधनिर्देशः । तदाह—टोपधोऽयमिति । तथा च अट्टधातोः सनि इटि अट्टि स इति स्थिते ष्टुत्वचर्त्वयोरसिद्धत्वादजादेर्द्वितीयस्येति प्रवर्तमानं द्वित्वम् 'नन्द्राऽसंयोगादय' इति दकारं विहाय टिस् इत्यस्य भवति । ततो हलादिशेषे दकारस्य ष्टुत्वचर्त्वयोः 'अट्टिटिषत' इतीष्ट सिध्यति । स्वाभाविकमूर्धन्योपधत्वे 'नन्द्रा' इति निषेधाऽभावात् टकारद्वयसहितस्यैव द्वित्वे हलादिशेषेण द्वितीयटकारस्य निवृत्तौ अटिट्टिषते इत्यनिष्ट प्रसज्येतेति भावः। टोपध इत्यन्व इति । ष्टुत्वेन टोपधनिर्देश इति भावः । अस्मिन्पक्षे सनि द्वित्वे कर्तव्ये ष्टुत्वस्याऽसिद्धत्वेपि 'नन्द्रा' इति निषेधाऽभावात्सकारविशिष्टस्य तटि स् इत्यस्य द्वित्वे हलादिशेषेण टकारस्य निवृत्या अतिट्टिषते इति रूपमिति भावः । आनट्टे इति । इह 'नन्द्रा' इति निषेधो न, तत्र द्वितीयस्यैकाच इत्यनुवृत्तेः । घट्ट चलन इति । अयं चुरादावपि । स्फुट विकसन इति । अयं कुटादावपि। अठि गताविति । खिटि नुमि द्वित्वे हलादिशेषे 'अत आदे'रिति दीर्घे 'तस्मान्नुड्द्विहल' इति नुडिति मत्वाह—आनण्ठ इति । वठि एकचर्यायामिति । अखहायचर्चायामित्यर्थः। मडि चेति । विभाजन इत्यनुषज्यते । 'मडि

चडि कोपे । चण्डते । २७६ शडि रुजायां सङ्घाते च । शण्डते । २८० तडि ताडने । तण्डते । २८१ पडि गतौ । पण्डते । २८२ कडि मदे । कण्डते । २८३ खडि भेदने । २८४ हेडृ २८५ होडृ अनादरे । जिहेडे । जुहोडे । २८६ बाडृ आप्लाव्ये । वशादिः । आप्लाव्यमाप्नवः । बाडते । २८७ द्राडृ २८८ ध्राडृ विशरणे । द्राडते । ध्राडते । २८९ शाडृ श्लाघायाम् । शाडते ।

अथ गडवन्ताः परस्मैपदिनः । २९० शौटृ गर्वे । शौटति । शुशौट । २९१ यौटृ बन्धे । यौटति । २९२ म्लेटृ २९३ म्रेडृ उन्मादे । द्वितीयो डान्तः । टान्तमध्ये पाठस्त्वर्थसाम्यान्नाथतिवत् । म्लेटति । म्रेडति । २९४ कटे वर्षावरणयोः । चटे इत्येके । चकाट । सिचि 'अतो हलादेर्लघोः' (सू २२८४) इति वृद्धौ प्राप्तायाम् । २२९९ ह्मयन्तक्षणश्वसजागृणिश्व्येदिताम् ७।२।५॥ हमयान्तस्य क्षणादेर्ययन्तस्य श्वयतेरेदितश्च वृद्धिर्न स्यादिडादौ सिचि । अकढीत् । २९५ अट २९६ पट गतौ । आट । आटतुः । आटुः । पपाट । पेटतुः । पेटुः । २९७ रट परिभाषणे । रराट । २९८ लट बाल्ये । ललाट । २९९ शट रुजाविशरणगत्यवसादनेषु । शशाट । ३०० वट वेष्टने । ववाट । ववटतुः । ववटुः ।

भूषायामिति परस्मैपदिषु वक्ष्यते । शाडृ श्लाघायामिति । डलयोरैक्यात् शालत इति काश्यपः । इत्यष्टादशः षट्त्रिंशत्तमः ।

अथ गड्यन्ता इति । 'गडि वदनैकदेशे' इत्यन्ता इत्यर्थः । म्लेटृ म्रेडृ इति । एदुपधौ । द्वितीयो डान्त इति । टवर्गतृतीयान्त इत्यर्थः । ननु टान्तेष्वस्य कथ पाठः, चुड्ड भावकरण इत्यारभ्यानुक्रम्यमाणेष्वेवास्य पठितुं युक्तत्वादित्यत आह—टान्तमध्य इति । नाथतिवदिति । 'एव वृद्धा'वित्यारभ्यानुक्रान्तेषु तवर्गचतुर्थान्तेषु यथा 'नाधृ नाध याञ्चे'ति तवर्गद्वितीयान्तस्यापि अर्थसाम्यात्पाठः, तद्वदित्यर्थः । कटे इति । कण्ठ्यादिः । चटे इति । तालव्यादिः । आमश्च लिटि अभ्यासस्य चुत्वमित्याह—चकाटेति । चकटतुः । द्वितीयस्य चेटतुः, वैकल्पिकाडागमाभावादेत्वाभ्यासलोपौ । प्राप्तायामिति । हलन्तलक्षणाया नित्यवृद्धेर्नेटीति निषेधात् 'अतो हलादे'रिति वैकल्पिकवृद्धौ प्राप्तायामित्यर्थः । ह्मयन्त क्षण श्वस जागृ णि श्नि एदित् एषां द्वन्द्वात्परषष्ठी । ह् म् य् इत्येते वर्णा येषामन्ते ते ह्मयन्ताः । तदाह—हमयान्त्स्येति । क्षणादेरिति । आदिना श्वस जागृ इत्यनयोर्ग्रहणम् । य्यन्तस्येति । प्रत्ययग्रहणपरिभाषया यिग्रहणेन तदन्तग्रहणमिति भावः । श्वयतेरिति । शिवधातोरित्यर्थः । एदित इति । एत् इत् यस्येति विग्रहः । वृद्धिर्न स्यादिति । 'सिचि वृद्धि'रित्यतो नेटीत्यतश्च तदनुवृत्तेरिति भावः । इडादौ सिचीति । 'सिचि वृद्धि'रित्यतः सिचीति 'नेटी'त्यत इटीति चानुवर्तत इति भावः । अकटीदिति । एदित्त्वाच्च वृद्धिः । अट पटेति । 'अत आदे'रिति दीर्घे प्राप्ते

ववटिथ। ३०१ किट ३०२ खिट त्रासे। केटति। खेटति। ३०३ शिट ३०४ षिट अनादरे। शेटति। शिशेट। सेटति। सिषेट। ३०५ जट ३०६ झट सङ्घाते। ३०७ भट भृतौ। ३०८ तट उच्छ्राये। ३०९ खट काङ्क्षायाम्। ३१० णट नृत्तौ। ३११ पिट शब्दसङ्घातयोः। ३१२ हट दीप्तौ। ३१३ वट अवयवे। ३१४ लुट विलोडने। डान्तोऽयमित्येके। ३१५ चिट परप्रेष्ये। ३१६ विट शब्दे। ३१७ विट आक्रोशे। वशादिः। हिट इत्येके ३१८ इट ३१९ किट ३२० कटी गतौ। एटति। केटति। कटति। ईकारः 'श्नीदितो निष्ठायाम्' (सू ३०३९) इतीण्निषेधार्थः। केचित्तु इदितं मत्वा नुमि कृते कण्टतीत्यादि वदन्ति। अन्ये तु इ ई इति प्रश्लिष्य, अयति। इयाय। इयतुः। इयुः। इयथिथ-इयेथ। इय। इयाय-इयय, दीर्घ

आह—आटेति। पेटतुरिति। एरजभ्यासलोपौ। वट वेष्टने। ववटतुरिति। 'न शसददवादिगुणानामि'ति निषेधः। ववटिथेति। अत्र 'थलि च सेटी'ति प्राप्तस्य 'न शसददे'ति निषेधः। किट खिट त्रास इति। यद्यपि 'इट किट कटी गता'विति अत्रे किटधातुः पठ्यते। तथाप्यर्थभेदात् पुनरिह पाठः। खिट त्रासे, किट गतौ चेति पठितुं युक्तम्। खिट खिटेति। आद्यस्तालव्यादिः। द्वितीयस्तु षोपदेशः। जट झटेति। आद्यस्य अवैरूप्यापादकादेशादिरित्वादेत्त्वाऽभ्यासलोपौ। द्वितीयस्य तु न। जेटतुः। जझटतुः। णट नृत्ताविति। षोपदेशः। चुरादेरेव नाटेः पर्युदासादयं षोपदेश एव। प्रणटति। हट किट कटी गताविति। 'कटे वर्षावरणयो'रिति कटिः पूर्वमेदित्पठितः। इह ईदित्पठ्यते। एदित्त्वाभावात् ह्रस्वान्तेति वृद्धिनिषेधो न भवति। अकटीत्-अकाटीत्। ननु तर्हि कटेत्येव कुतो न पठ्यत इत्यत आह—ईकार इति। केचित्त्विति। कटि इति ह्रस्वान्तपाठं मत्वा इदित्त्वान्नुमि कृते अनुस्वारे परसवर्णे च कण्टतीति वदन्तीत्यर्थः। अन्ये त्विति। उदाहरन्तीत्यन्वयः। प्रश्लिष्येति। कटि इत्यनन्तरम् इ ई इति धातुद्वयं सवर्णदीर्घेण प्रश्लिष्य निर्दिष्टमिति भावः। अयतीति। इधातोर्लटि शपि गुणे अयादेशः। इयायेति। णलि द्विर्वे वृद्धौ आयादेशे 'अभ्यासस्याऽसवर्णे'इति इयङ्। इयतुरिति। इकारोऽत्र ह्रस्वः। तथाहि—इ अतुसिति स्थिते कित्त्वादगुणाभावे 'द्विर्वचनेऽची'ति निषेधाद्यणभावे 'इ' इत्यस्य द्वित्वे इ इ अतुसिति स्थिते सवर्णपरकत्वादभ्यासस्य इयङभावे सति 'वर्णादाङ्गं बलीय' इति सवर्णदीर्घं बाधित्वा 'एरनेकाच' इत्युत्तरखण्डस्य यणि 'इयतु'रिति रूपम्। इधातोर्भारद्वाजनियमात्थलि वेट्। तत्र इट्पक्षे रूपमाह—इययिथेति। थलि द्विर्वे इटि पित्त्वेन कित्त्वाऽभावादू गुणे अयादेशे अभ्यासस्य इयङ्। नचा'ऽचः परस्मिन्नि'ति गुणस्य स्थानिवत्त्वेन असवर्णपरत्वाऽभावात् कथमभ्यासस्य इयङिति वाच्यम्, असवर्णग्रहणसामर्थ्यादेव स्थानिवत्त्वाप्रसक्तेः। एवं णलि इयायेत्यत्रापि वृद्धेर्न स्थानिवत्त्वम्। थलि इडभावपक्षे रूपमाह—इयथेति। थलि द्विर्वे गुणे अभ्यासस्येयङ्। अथुसि इयथुः। (इयेति। थस्य अकारादेशे द्वित्वे उत्तरखण्डस्य 'एरनेकाच' इति यणि

स्य तु 'इजादेश्च..' (सू२२३७) इत्यामि अयाञ्चकारेत्यादि उदाहरन्ति। ३२१ मडि भूषायाम्। ३२२ कुडि चैकल्ये। कुण्डति। कुण्डत इति तु दाहे गतम्। ३२३ मुड ३२४ प्रुड मर्दने। ३२५ चुडि अल्पीभावे। ३२६ मुडि खण्डने। मुण्डति। पुडि च इत्येके। पुण्डति। ३२७ रुटि ३२८ लुटि स्तेये। रुण्टति। लुण्टति। रुठि लुठि इत्येके। रुडि लुडि इत्यपरे। ३२९ स्फुटिर् विशरणे। इरित्त्वादङ् वा। अस्फुटत्-अस्फोटीत्। स्फुटि इत्यपि केचित्। इदित्त्वान्नुम्। स्फुण्टति। ३३० पठ व्यक्तायां वाचि। पेठतुः। पेठिथ। अपठीत्। अपाठीत्। ३३१ वठ स्थौल्ये। ववठतुः। ववठिथ। ३३२ मठ मदनिवासयोः। ३३३ कठ कृच्छ्रजीवने। ३३४ रट परिभाषणे। रठ इत्येके। ३३५ हठ प्लुतिशठत्वयोः। बलात्कारे इत्येके। हठति। जहाठ। ३३६ ठुठ ३३७ लुठ ३३८ उठ उपघाते। ओठति। ऊठ इत्येके। ऊठति। ऊठाञ्चकार। ३३९ पिठ हिंसासङ्क्लेशनयोः। ३४० शठ कैतवे च। ३४१ शुठ प्रतिघाते। शोठति। शुठि इति स्वामी। शुण्ठति। ३४२ कुठि च। कुण्ठति। ३४३ लुठि आलस्ये प्रतिघाते च। ३४४ शुठि शोषणे। ३४५ रुठि ३४६ लुठि गतौ। ३४७ चुड्ड भावकरणे। भावकरणमभिप्रायसूचनम्। चुड्डति। चुचुड्ड। ३४८ अड्ड अभियोगे। अड्डति। आनड्ड। ३४९ कड्ड काङ्क्षायै। कड्डति। चुड्डादयस्त्रयो दोपधाः। तेन क्विपि चुत् अत् कत् इत्यादि। ३५० क्रीड विहारे

रूपम्)। 'णलुत्तमो वे'ति णित्त्वपक्षे आह—इयायेति। द्वित्वे पित्त्वेन कित्त्वाऽभावात् वृद्धौ आयादेशे अभ्यासस्य इयङ्। णित्त्वाऽभावे आह—इययेति। द्वित्वे पित्त्वेन कित्त्वाऽभावात् गुणे अयादेशे अभ्यासस्य इयङ्। वसि मसि चकारादिनियमान्नित्यमिटि द्वित्वे उत्तरखण्डस्य 'एरनेकाच' इति यणि इयिव इयिमेति रूपम्। एता। एष्यति। अयतु। आयत्। अयेत्। आशीर्लिङि तु 'अकृत्सार्वधातुकयो'रिति दीर्घे ईयात्। सिचि वृद्धिः। ऐषीत्। ऐष्यत्। दीर्घस्य त्विति। दीर्घस्य ईधातोरित्यर्थः। तस्य लिटं वर्जयित्वा लडादिषु पूर्ववत्। लिटि विशेषमाह—अयाञ्चकारेति। ईधातोरामि गुणे अयादेशः अनुप्रयोगश्च। कुटि वैकल्य इति। वैकल्यम् अविवेक इत्याहुः। अपूर्णभावो वा। मुड प्रुड मर्दन इत्यादि। स्पष्टम्। पठधातोर्लिटि अतुसादौ किति एत्त्वाभ्यासलोपौ। तदाह—पेठतुरिति। पेठिथेति। पित्त्वेन अकित्त्वेऽपि 'थलि च सेटी'त्येत्त्वाभ्यासलोपौ। अपठीत्। अपाठीदिति। 'अतो हलादेर्लघो'रिति वृद्धिविकल्पः। वठ स्थौल्ये इति। स्थौल्यं स्थूलीभवनम्। 'न शसददवादिगुणाना'मित्येत्त्वाभ्यासलोपनिषेध इति मत्वा आह—ववठतुः। ववठिथेति। दोपधा इति। ष्टुत्वेन ङोपधनिर्देश इति भावः। चुदिति। चुड्ड धातोः क्विपि हल्ङ्यादिना सुलोपे द्वितीयस्य डस्य संयोगान्तलोपे ष्टुत्वनिवृत्तौ 'वावसाने' इति चर्त्वं चुत् इति रूपम्। अदिति। अड्ड धातोः क्विपि पूर्ववत् रूपम्। कदिति।

चिक्रीड । ३५१ तुडृ तोडने । तोडति । तुतोड । तूडृ इत्येके । ३५२ हूडृ ३५३ हूडृ ३५४ होडृ गतौ । हुडयात् । हूडयात् । होडयात् । ३५५ रौडृ अनादरे । ३५६ रोडृ ३५७ लोडृ उन्मादे । ३५८ अड उद्यमे । अडति । आड । आडतुः । आडुः । ३५९ लड विलासे । लडति । डलयोर्लरयोरैकत्वस्मरणाल्लडतीति स्वाम्यादयः । ३६० कड मदे । कडति । कडि इत्येके । कण्डति । ३६१ गडि वदनैकदेशे । गण्डति । इति टवर्गीयान्ताः ।

अथ पवर्गीयान्ताः । तत्रानुदात्तेतः स्तोभत्यन्ताश्चतुस्त्रिंशत् । ३६२ तिपृ ३६३ तेपृ ३६४ ष्टिपृ ३६५ ष्टेपृ क्षरणार्थाः । आद्योऽनुदात्तः । क्षीरस्वामी स्वयं सेडिति बभ्राम । तेपते । तितिपे । क्रादिनियमादिट् । तितिपिषे । तेप्ता । तेप्स्यते । २३०० **लिङ् सचावात्मनेपदेषु** १।२।१७॥ इक्समीपाद्धलः परौ झजादी लिङात्मनेपदपरः सिच्चेत्येतौ कितौ स्तः । कित्त्वान्न गुणः । तिप्सीष्ट । तिप्सीयास्ताम् । तिप्सीरन् । लुङि 'झलो झलि'(सू २२८१) इति सलोपः । अतिप्त । अतिप्साताम् । अतिप्सत । तेपते । तितेपे । तेपिता । तिप्सिष्टे । तिप्सिषाते । तिप्सिषिरे । तिप्सिष्टे । तिप्सिष्टेपाते ।

कड्डधातोः किपि रूपम् इत्यादीति । आदिना जशत्वेन चुटित्यादिसङ्ग्रहः । एकत्वस्मरणादिति । शिक्षादाविति शेषः । गडि वदनेति । **तवर्गान्तेषु गडीति गतम् । परस्मैपदिनः शौट्ट गर्व इत्यादयो गताः ।**

तिपृ इति । **प्रथमतृतीयाविदुपधौ । द्वितीयचतुर्थौ पदुपधौ । तृतीयचतुर्थौ षोपदेशौ च, तकारस्य षटुत्वेन टकारस्य निर्दिष्टतया दन्त्यपरकत्वादित्वात् ।** आद्य इति । **तिपृधातुरित्यर्थः, भाष्यादौ अनुदात्तोपदेशेष्वस्य पाठादिति भावः ।** बभ्रामेति । **भाष्यविरुद्धत्वादिति भावः ।** आद्यस्योदाहरति—तेपत इति । शपि लघूपधगुणः । तितिप इति । **'असंयोगा'दिति कित्त्वान्न गुणः । अथ तितिपिष इत्यत्र 'एकाच उ'दित्यत्र 'एकाच उपदेश' इति निषेधमाशङ्क्याह**—क्रादिनियमादिति । तेप्स्यत इति । **लोडादौ तु तेपताम्, अतेपत, तेपेत । अथाशीर्लिङि सीयुटि सुटि तिप्सीष्टेति रूपं वक्ष्यति । तत्र लघूपधगुणे प्राप्ते।** लिङ् । **'इको झलि'ति, 'हलन्ताच्चे'ति च सूत्रमनुवर्तते । 'असंयोगा'दित्यतः किदिति च ।** इक इति सामीप्ये षष्ठी, हलि अन्त्येति । **तदाह**—इक्समीपादित्यादिना । **आत्मनेपदपरकत्वं सिच एव विशेषणम्, नतु लिङः, लिङादेशस्यात्मनेपदस्य लिङः परत्वासम्भवात् । इकः किम्? 'वह' वक्षीष्ट । सति तु कित्त्वे 'वचित्वपो'रिति सम्प्रसारणं स्यात् । आत्मनेपदेषु किम्? अद्राक्षीत् । इह कित्त्वे सति 'सृजिदृशोर्झल्यमकिती'त्यम् न स्यात् ।** अतिप्तेति । **लुङस्तादेशे, च्लिः, सिच् । 'झलो झली'ति लोपः । आत्मनेपदपरकत्वेन सिचः कित्त्वात् न लघूपधगुणः । अथ तेपृधातोरेदुपधत्वस्य प्रयोजनमाह**—तितेपे इति । **इदुदुपधत्वे तु कित्त्वादगुणो न स्यादिति भावः । सेट्कोऽयमिति सूचयति**—तेपिषीष्टेति । **तेपिषीष्ट । अतेपिष्ट । ष्टिपृधातोस्तु 'धात्वादेः षः स' इति सत्वे**

तिष्टेपिरे। तेपृ कम्पने च। ३६६ ग्लेपृ दैन्ये। ग्लेपते। ३६७ टु वेपृ कम्पने। वेपते। ३६८ केपृ ३६९ गेपृ ३७० ग्लेपृ च। चात्कम्पने गतौ च। सूत्रविभागादिति स्वामी। मैत्रेयस्तु चकारमन्तरेण पठित्वा कम्पने इत्यपेक्षत इत्याह। ग्लेपेरर्थभेदापुनः पाठः। ३७१ मेपृ ३७२ रेपृ ३७३ लेपृ गतौ। ३७४ त्रपूष् लज्जायाम्। त्रपते। २३०१ तृफलभजत्रपश्च ६।४।१२२॥ एषामत एकारोऽभ्यासलोपश्च स्यात्किति लिटि सेटि थलि च। त्रेपे। त्रेपाते। त्रेपिरे। ऊदित्त्वादिड्वा। त्रपिता। त्रप्ता। त्रपिषीष्ट। त्रप्सीष्ट। ३७५ कपि चलने। कम्पते। चकम्पे। ३७६ रबि ३७७ लबि ३७८ अबि शब्दे। ररम्बे। ललम्बे। आनम्बे। ३७९ लबि अवस्रंसने च। ३८० कबृ वर्णे। चकबे। ३८१ क्लीबृ अघाष्टर्ये। चिक्लीबे। ३८२ ह्रीबृ मदे। ह्रीबते। ३८३ शीभृ कत्थने। शीभते। ३८४ चीभृ च। ३८५ रेभृ शब्दे। रिरेभे। अभिरभी क्वचित्पठ्येते। अम्भते। रम्भते। ३८६ ष्टभि ३८७ स्कभि प्रतिबन्धे। स्तम्भते। नुम्यनुस्वारः। उत्तम्भते। 'उदः स्थास्तम्भोः'-(सू ११८) इति पूर्वसवर्णः। विस्तम्भते। 'स्तन्भेः' (सू २२७२) इति षत्वं

ष्टुत्वनिवृत्त्या ह्रटि स्तेपत इति रूपं सिद्धवत्कृत्य लिटि रूपमाह—तिष्टिप इति। शर्पूर्वाः खयः' इति तकारः शिष्यते, षकारस्य निवृत्तौ ष्टुत्वनिवृत्तेः। किरवान्न गुणः। तिष्टेप इति। ष्टेपृधातोः रूपम्। तेपृ कम्पने चेति। चात्क्षरणे। वस्तुतस्तु चकारेण क्षरणार्थस्य लाभात् पूर्वत्रास्य पाठस्यकर्तुं शक्यः। केचित्तु 'देपृ' इति वर्णतृतीयादि पठन्ति। चात्कम्पने गतौ चेति। अनुक्तसमुच्चयार्थश्चकार इति भावः। एतच्च टु वेपृ केपृ गेपृ ग्लेपृ कम्पन इत्येव सिद्धे पृथक्पाठाल्लभ्यते। अर्थभेदादिति। ग्लेपृ दैन्ये इति पूर्वं पठितम्। इह तु अर्थभेदात् पुनः पाठः। अन्यथा 'ग्लेपृ दैन्ये कम्पने गतौ चे'ति गौरवं स्यादिति भावः। त्रपूषति। ऊकारः षकारश्च इत्। अदुपधः। संयुक्तहलमध्यस्थत्वादेत्वाभ्यासलोपयोरप्राप्तावाह—तृफल। 'अत एकहल्मध्ये' इत्यतः अत इति लिटीति चानुवर्तते। 'ध्वसोरित्यतः एदिति अभ्यासलोपश्चेति च, 'गमहनेत्यस्मात् किती'ति, 'थलि च सेटी'ति सूत्रं च। तदाह—एषामिति। गुणशब्देन भाविताऽकारवत्त्वाद्विरूपादेशादित्वादेकहल्मध्यस्थत्वाऽभावाच्चाऽप्राप्ते विधिरयम्। आनम्ब इति। द्विहल्त्वान्नुट्। ष्टभि स्कभी'ति। आद्यः षोपदेशः, ष्टुत्वेन तकारस्य टकारनिर्देशेन दन्त्यपरकसादित्वात्, ततः षस्य सत्वे ष्टुत्वस्य निवृत्तिः। तदाह—स्तम्भत इति। नुम्यनुस्वार इति। इदित्त्वान्नुमि 'नश्चापदान्तस्ये'ति तस्यानुस्वारः। 'अनुस्वारस्य यमी'ति तस्य परसवर्णः मकारः। 'ष्टम्भे' इत्येव पाठे तु प्रतिपदोक्तत्वात् 'उदः स्था' इत्यत्र अस्यैव ग्रहणं स्यादिति भावः। पूर्वसवर्ण इति। सकारस्य थकारः। तस्य 'खरि चे'ति चर्त्वं

तु न भवति । श्नुविधौ निर्दिष्टस्य सौत्रस्यैव तत्र ग्रहणात् । तद्बीजं तु 'उदः स्था-स्तम्भोः-' (सू ११८) इति पवर्गीयोपधपाठः, 'स्तन्भेः' (सू २२७२) इति तवर्गीयोपधपाठश्चेति माधवः । केचिदस्य टकार औपदेशिक इत्याहुः । तन्मते विष्टम्भते । ष्टम्भते । टष्टम्भे । ३८८ जभी ३८९ जृभि गात्रविनामे । २३०२ **रधिजभोरचि ७।१।६१॥** एतयोर्नुमागमः स्यादचि । जम्भते । जजम्भे । अ-म्भिता । अजम्भिष्ट । जृम्भते । जजृम्भे । ३९० शल्भ कत्थने । शशल्भे । ३९१ वल्भ भोजने । दन्त्योष्ठ्यादिः । ववल्भे । ३९२ गल्भ धार्ष्ट्ये । गल्भते । ३९३ श्रम्भु प्रमादे । तालव्यादिर्दन्त्यादिश्च । श्रम्भते । स्रम्भते वा । ३९४ ष्टुभु स्तम्भे । स्तोभते । विष्टोभते । तुष्टुभे । व्यष्टोभिष्ट ।

अथ परस्मैपदिनः । ३९५ गुपू रक्षणे । २३०३ **गुपूधूपविच्छिपणिप-**

तकार इत्यर्थः । अत्र यदुक्तव्यं तत् "उदः स्थास्तम्भो'रित्यत्र हरसन्धौ प्रपञ्चितम् । विस्तम्भत इति । 'सात्पदाद्यो'रिति षत्वनिषेध इति भावः । नन्वेवमपि 'स्तन्भे'रिति षत्वं कुतो न स्यादित्यत आह —स्तन्भेरिति षत्वं तु न भवतीति । कुत इत्यत आह— श्नुविधाविति । 'स्तन्भुस्तुन्भुस्कन्भुस्कुन्भुस्कुञ्भ्यः श्नुरचे'ति सूत्रे निर्दिष्टस्यैव प्रति-पदोक्तस्य षत्वविधौ ग्रहणादित्यर्थः । नन्वेवं सति 'उदः स्थास्तम्भो'रिति पूर्वसवर्णवि-धावपि सौत्रस्यैव ग्रहणं स्यादित्यत आह—तद्बीजं त्विति । षत्वविधौ सौत्रस्यैव ग्रहणम्, पूर्वसवर्णविधौ तु तदन्यस्यापीत्यत्र प्रमाणमित्यर्थः । ननु पूर्वसवर्णविधौ मोपधस्य, षत्वविधौ तु नोपधस्य पाठः इत्यत्र किं प्रमाणमित्यत आह—इति माधव इति । पा-णिनिशिष्यपरम्परैव तत्र प्रमाणमिति भावः । लिटि 'शर्पूर्वाः खयः' इति षकारस्य निवृत्तौ ष्टुत्वनिवृत्त्या तकारः शिष्यते । तस्तम्भे । टकार औपदेशिक इति । स्वाभाविक एव टकारो नतु ष्टुत्वसम्पन्न इत्यर्थः । तन्मते विष्टम्भत इति । तथा च षकारस्यापि स्वा-भाविकत्वात् षत्वविधौ स्तन्भेरेव ग्रहणेऽपि षकारो निर्बाध इति भावः । ष्टुष्टम्भ इति । 'शर्पूर्वा' इति टकार एव शिष्यत इति भावः । जभी जृभि गात्रविनाम इति । गात्रस्य विनामः वक्रभावः । आद्य ईदित् । द्वितीय इदित् । आद्यस्य ईदितं 'स्वरीदितो नि-ष्ठाया'मिति इण्निषेधार्थम् । रधिजभोः । 'रध हिंसाया'मिति श्यन्विकरणस्य चतुर्था-न्तस्य इका निर्देशः । 'इदितो नुम् धातो'रित्यतः नुमित्यनुवर्तते । तदाह—एतयोरिति । आनिदित्त्वात् नुम्विधिः । जम्भत इति । शपि नुम् । 'जम्भितेत्यादाविटि अपरक-त्वान्नुम् । अभि किम् । रद्धा । जब्धम् । श्रम्भु इति । अकारमध्यः । ष्टुभु स्तम्भ इति । ष्टुत्वेन तकारस्य टः । षोपदेशोऽयम् । विष्टोभत इति । 'उपसर्गात्सुनोती'ति षत्वम् । व्यष्टोभिष्टेति । 'प्राक्सितादड्व्यवायेऽपी'ति षत्वम् । तिङ इत्यादयस्तोभत्यन्ता अनुदा-त्तेतो गताः ।

गुपू रक्षण इति । ऊदिदयम् । गुपूधूप । एम्य इति । गुपू धूप विच्छि पणि पाव

निभ्य आयः ३।१।२८॥ एभ्य आयप्रत्ययः स्यात् स्वार्थे। 'पुगन्त'-(सू २१८९) इति गुणः। २३०४ सनाद्यन्ता धातवः ३।१।३२॥ सनादयः कर्मेणिङन्ताः प्रत्यया अन्ते येषां ते धातुसञ्ज्ञाः स्युः धातुत्वाल्लडादयः। गोपायति। २३०५ आयादय आर्धधातुके वा ३।१।३१॥ आर्धधातुकविवक्षायामायादयो वा स्युः। २३०६ कास्प्रत्ययादाममन्त्रे लिटि ३।१।३५॥ कास्धातोः प्रत्ययान्तेभ्यश्चाम्स्याल्लिटि न तु मन्त्रे। 'कास्यनेकाजग्रहणं कर्तव्यम्' । सूत्रे प्रत्ययग्रहणमपनीय तत्स्थानेऽनेकाच इति वाच्यमित्यर्थः। २३०७ आर्धधातुके ६।४।४६॥ इयङि-

---

इत्येभ्य इत्यर्थः। अर्थनिर्देशाऽभावादाह—स्वार्थ इति। आयप्रत्ययः अकारान्तः। तत्फलं तु 'गोपायतं नः सुमनस्यमान' इत्यत्र गोपायेत्यस्य धातुस्वरेणान्तोदात्तत्वेन शबकारेण एकादेशस्यापि 'एकादेश उदात्तेनोदात्तः' इत्युदात्तत्वे, तमित्यस्य अनुपदेशात् परलसार्वधातुकत्वेन अनुदात्तस्य 'उदात्तादनुदात्तस्य स्वरितः' इति स्वरितत्वमिति बोध्यम्। 'धातोरेकाच' इत्यतो धातोरित्यनुवृत्त्या धातोरिति विहितत्वादायप्रत्ययस्यार्धधातुकत्वात् तत्कार्यं गुणादि भवति। तदाह—पुगन्तेति गुण इति। नन्वायप्रत्ययान्तस्य भ्वादिषु पाठाऽभावेन धातुत्वाऽभावात् कथमस्माल्लडादयः इत्यत आह—सनाद्यन्ताः। 'गुप्तिज्किद्भ्यः सनि'त्यारभ्य 'कमेर्णिङि'त्यन्तैः सूत्रैः सनादिप्रत्ययान्विधाय सूत्रमिदं पठितम्। सन् आदिर्यषां ते सनादयः णिङ्प्रत्ययपर्यन्ताः, ते अन्ते येषां ते सनाद्यन्ता इति विग्रहः। तदाह—सनादय इति। 'सनद्यश्चिक्यङ्सुयङ्सुपो३ऽथाचारक्विब्णिज्ण्यङो तथा। यगाय ईयङ् णिङ् चेति द्वादशामी सनादयः।' इति सङ्ग्रहः। संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणप्रतिषेधाद्विह तदन्तग्रहणम्। धातुत्वादिति। आयप्रत्ययान्तस्येत्यर्थः। गोपायतीति। शपि 'अतो गुणे' इति पररूपम्। आयादयः। आयः आदिः येषां ते आयादयः। 'आय ईयङ् णिङ् चेति त्रय आयादयो मताः' 'गुपूधूपविच्छिपणिपनिभ्य आयः' 'ऋनेभ्यो यङ्' 'कमेर्णिङि'त्युत्तरसूत्रस्य पाठात्। विवक्षायामिति। 'आर्धधातुक' इति विषयसप्तमीति भावः। परसप्तमीत्वे तु गोपायितेत्यत्र अतो लोपो न स्यात्, आर्धधातुकोपदेशकाले अदन्तत्वाभावादिति भावः। तथा च लिटि आयप्रत्ययस्य विकल्पः स्थितः। तत्र आयप्रत्ययपक्षे आह—कास्प्रत्ययात्। आम् अमन्त्रे इति च्छेदः। चकासृ दीप्तौ, जागृ निद्राक्षये, इत्यादिभ्योऽपि लिटि आमिष्यते। तदर्थमाह—कास्यनेकाजिति। ननु यद्यस्मिन् वार्तिके सूत्रस्थं प्रत्ययग्रहणमपि सम्बध्यते तदा कासुधातोश्च अनेकाचश्च प्रत्ययान्ताच्चेति लभ्यते। ततश्च अ इवाचरति अति क्विबन्तात्लडादयः। लिटि औ अतुरित्यादीर्घं न सिध्येत्, प्रत्ययान्तत्वेन आमः प्रसङ्गात्। यदि तु कासुधातोश्च अनेकाचः प्रत्ययान्ताच्चेति व्याख्यायेत, तदा चकासुजाग्रादिभ्यो न स्यादित्यत आह—प्रत्ययग्रहणमपनीयेति। तथा च कासुधातोरनेकाचश्च आमित्येतावदेव लभ्यत इति नोक्तदोषद्वयमिति भावः। वस्तुतस्तु अ इवाचरति अतीत्यादि नास्त्येवेति

कृत्य । २३०८ अतो लोपः ६।४।४८ आर्धधातुकोपदेशकाले यदकारान्तं तस्याकारस्य लोपः स्यादार्धधातुके परे । गोपायाञ्चकार-गोपायाम्बभूव-गोपायामास । जुगोप । जुगुपतुः । ऊदित्त्वाद्वेट् । जुगोपिथ-जुगोप्थ । गोपायिता-गोपिता-गोप्ता । गोपाय्यात्-गुप्यात् । अगोपायीत-अगोपीत्-अगौप्सीत् । ३९६ धूप सन्तापे । धूपायति । धूपायाञ्चकार-दुधूप । धूपायितासि । धूपितासि । ३९७ जप ३९८ जल्प व्यक्तायां वाचि । जप मानसे च । ३९९ चप सान्त्वने । ४०० षप समवाये । समवायः सम्बन्धः सम्यगवयोधो वा । सपति । ४०१ रप

सुब्धातुनिरूपणे वक्ष्यते । तथा च गोपाय आमिति स्थितम् । अतो लोपः । 'अनुदात्तोपदेशवनती'त्यतः उपदेशग्रहणमनुवर्तते आर्धधातुक इत्यधिकृतम् । तदिह आवर्तते । एकमुपदेशे अन्वेति । द्वितीयं तु लोपे परनिमित्तम् । तदाह—आर्धधातुकोपदेश इत्यादिना । आर्धधातुकोपदेश इति किम् । अय वय गतौ, आख्यां क्विपि, 'लोपो व्योरि'ति लोपे 'हल्ङ्यस्य पिती'ति तुकि, अपृक्तलोपे अत् वत् इतीष्यते । अत्र यलोपे सति अतो लोपो न भवति, आर्धधातुकोपदेशकाले धातोर्यकारान्तत्वात् । 'आर्धधातुकोपदेश' इत्यत्र आर्धधातुकग्रहणाभावे 'चिकीर्षित' मित्यत्र अल्लोपो न स्यात्, सन उपदेशकाले नकारान्तत्वात् । आर्धधातुकग्रहणे तु न दोषः, अनुबन्धविनिर्मुक्तात् सन्प्रत्ययादेव क्प्रत्ययस्य आर्धधातुकस्योत्पत्तेः । आर्धधातुके पर इति किम् ? कथयति । चुरादावदन्तोऽयम् । अत्र उपधावृद्धिर्न भवति, 'अतः परस्मिन्निग्यल्लोपस्य स्थानिवत्त्वात् । आर्धधातुके पर इत्यनुक्तौ तु अल्लोपस्य परनिमित्तकत्वाऽभावात् स्थानिवत्त्वं न स्यात् । तथाच प्रकृते गोपाय आमिति स्थिते अतो लोपे गोपायामिति सिध्यति । यद्यपि सवर्णदीर्घेणाप्येतत्सिद्धम्, तथापि न्याय्यत्वादतो लोप उपन्यस्तः । आयप्रत्ययाऽभावपक्षे आह—जुगोपेति । पित्त्वेन कित्त्वाऽभावाल्लघूपधगुणः । जुगुपतुरिति । कित्त्वाच्च गुणः । ऊदित्त्वाद्वेडिति । 'थलादावि'ति शेषः । जुगुपिव-जुगुप्व । जुगुपिम-जुगुप्म । क्ङिदिनियमस्तु नञ्प्राप्तस्यैवाभावस्य, नतु विभाषादिलभ्यस्येति षिधू शास्त्र इत्यत्रोक्तम् । गोपायितेति । लुटि आयप्रत्ययपक्षे नित्यमिट् । आयप्रत्ययाभावपक्षे इडविकल्पः । ऊदित्त्वस्य केवले चरितार्थत्वात् । तदाह—गोपिता-गोप्तेति । गोपायिष्यति । गोपिष्यति । गोप्स्यति । गोपायतु । अगोपायत् । गोपायेत् । आशीर्लिङि आयप्रत्ययपक्षे अतो लोपे रूपमाह—गोपाय्यादिति । आयप्रत्ययाऽभावे आह—गुप्यादिति । लुङि सिचि आयप्रत्ययपक्षे आह—अगोपायीदिति । आयप्रत्ययाऽभावपक्षे इटि रूपमाह—अगोपीदिति । 'इट ईटी'ति सिज्लोपः 'नेटीति' हलन्तलक्षणवृद्धेर्निषेधः । इडभावे तु इटः परत्वाऽभावात् न सिज्लोप इत्याह—अगोप्सीदिति । 'वदव्रजे'ति वृद्धिः । अगोपायिष्यत् अगोपिष्यत् अगोप्स्यत् । धूप सन्ताप इति । 'गुपूधूप' इत्यायः । आर्धधातुके तद्विकल्पः । षप सम-

४०२ लप व्यक्तायां वाचि। ४०३ चुप मन्दायां गतौ। चोपति। चुचोप। चोपिता। ४०४ तुप ४०५ तुम्प ४०६ ञुप ४०७ ञुम्प ४०८ तुफ ४०९ तुम्फ ४१० षुफ ४११ ष्णुम्फ हिंसार्थाः। तोपति। तुतोप। तुम्पति। तुतुम्प। तुतुम्पतुः। संयोगात्परस्य लिटः कित्त्वाभावान्नलोपो न। 'किदाशिषि' (सू २२१६) इति कित्त्वान्नलोपः। तुप्यात्। 'प्रात्तुम्पतौ गवि कर्तरि' इति पारस्करादिगणे पाठात्सुट्। प्रस्तुम्पति गौः। शितपा निर्देशाद्यङ्लुकि न। प्रतोतुम्पीति। ञोपति। ञुम्पति। तोफति। तुम्फति। ञोफति। ञुम्फति। इहाद्यौ द्वौ पञ्चमषष्ठौ च नीरेफाः। अन्ये सरेफाः। आद्याश्चत्वारः प्रथमान्ताः। ततो द्वितीयान्ताः। अष्टावप्युकारवन्तः। ४१२ पर्व ४१३ रफ ४१४ रफि ४१५ अर्ब ४१६ पर्ब ४१७ लर्ब ४१८ बर्ब ४१९ मर्ब ४२० कर्ब ४२१ खर्ब ४२२ गर्ब ४२३ शर्ब ४२४ पर्ब ४२५ चर्ब गतौ। आद्यः प्रथमान्तः ततो द्वौ द्वितीयान्तौ। तत एकादश तृतीयान्ताः। द्वितीयतृतीयौ मुक्त्वा सर्वे रोपधाः। पर्पति। पपर्प। रफति। रम्फति। अर्बति। आनर्ब। पर्बति। लर्बति। बर्बति। पवर्गीयादिरयम्। मर्बति। कर्बति। खर्बति। गर्बति। शर्बति। सर्बति। चर्बति। ४२६ कुबि आच्छादने। कुम्बति। ४२७ लुबि ४२८ तुबि अदने। लुम्बति। तुम्बति। ४२९ चुबि वक्त्रसंयोगे। चुम्बति। ४३० षुभु ४३१ ष्णुम्भु हिंसार्थौ। सर्भति। ससर्भ। सर्भिता। सुम्भति। ससुम्भ। सुभ्यात्। ष्णिभु ष्णिम्भु इत्येके। सेभति। सिस्भति। ४३२ शुभ ४३३ शुम्भ भाषणे। भासने इत्येके। हिंसायाम् इत्यन्ये।

अथानुनासिकान्ताः। तत्र कम्यन्ता अनुदात्तेतो दश। ४३४ घिणि ४३५ घुणि ४३६ घृणि प्रहणे। नुम्। ष्टुत्वम्। घिण्णते। जिघिण्णे। घुण्णते। जुघुण्णे। घृण्णते। अघृण्णे। ४३७ घुण ४३८ घूर्ण भ्रमणे। घोर्णते। घूर्णते। इमौ तुदादौ

वाय इति। **षोपदेशोऽयम्।** चुप मन्दायामिति। **चवर्गप्रथमादिरयम्।** **चवर्गद्वितीयादिस्त्वनिट्कः।** तुप तुम्पेति। **अष्टावप्युदुपधाः तृतीयचतुर्थौ सप्तमाष्टमौ च रेफवन्त इति मूले स्पष्टीभविष्यति। तुतुम्पतुरित्यत्र नलोपमाशङ्क्याह**—संयोगादिति॥ **आशीर्लिङि विशेषमाह**—किदाशिषीति। प्रात्तुम्पतेति। **शितपा निर्देशोऽयम्। प्रात् तुम्पधातोः परे सुट् स्यात् गवि कर्तरि सतीत्यर्थः। तुम्पधातोः सुट् आद्यवयवः। सुट्विधावस्मिन् तुम्पताविति शितपा निर्देशस्य प्रयोजनमाह**—शितपा निर्देशाद्यङ्लुकि नेति। **'अपाऽनुबन्धेन इत्युक्तेरिति भावः।** षृभु षृम्भु इति। **ऋदुपधौ षोपदेशौ।** सुभ्यादिति। **आशीर्लिङि अनिदित्त्वान्नलोपः।** ष्णिभु ष्णिम्भु इत्येके इति। **आद्य इदुपधो द्वितीयो मोपधः।** शुभ शुम्भेति। **द्वितीयस्य आशीर्लिङि अनिदित्त्वान्नलोपः। इति 'गुपू' इत्यादयः पवर्गीयान्ताः परस्मैपदिनो गताः।**

कम्यन्ता इति। 'कमु कान्तौ' इत्येतत्पर्यन्ता इत्यर्थः। घुण घूर्णेति। **द्वितीय-**

परस्मैपदिनौ। ४३९ पण व्यवहारे स्तुतौ च। ४४० पन च। स्तुतावित्येव संबध्यते पृथङ्निर्देशात्। पनिसाहचर्यात्पणेरपि स्तुतावेवाय प्रत्ययः। व्यवहारे तु, पणते। पेणे। पणितेत्यादि। स्तुतावनुबन्धस्य केवले चरितार्थत्वादायप्रत्ययान्तान्नात्मनेपदम्। पणायति। पणायाञ्चकार। पेणे। पणायितासि। पणितासे। पणाय्यात्। पणिषीष्ट। पनायति। पनायाञ्चकार। पेने। ४४१ भामृ क्रोधे। भामते। बभामे। ४४२ क्षमूष् सहने। क्षमते। चक्षमे। चक्षमिषे-चक्षंसे। चक्षमिध्वे चक्षन्ध्वे। चक्षमिवहे। २३०९ ष्वोश्च ८।२।६५॥ मान्तस्य धातोर्मस्य नकारादेशः स्यान्मकारे वकारे च परे। णत्वम्। चक्षणवहे। चक्षमिमहे-चक्षण्महे। क्षमिष्यते-क्षंस्यते। क्षमेत। आशिषि क्षमिषीष्ट-क्षंसीष्ट। अक्षमिष्ट-अक्षंस्त। ४४३ कमु कान्तौ। कान्तिरिच्छा। २३१० कमेर्णिङ् ३।१।३०॥ स्वार्थे। ङित्त्वात्तङ्।

यस्य दीर्घपाठः स्पष्टार्थः 'उपधायां चे'त्येव दीर्घसिद्धेः। केचित्तु घुर्णंति ह्रस्वमेव पठन्ति। स्तुतावित्येवेति। न तु व्यवहारे इत्येवकारार्थः। पृथङ्निर्देशादिति। अन्यथा 'पण पन व्यवहारे स्तुतौ चे'त्येव निर्दिशेदिति भावः। यद्यपि पृथङ्निर्देशो यथासङ्ख्यनिवृत्त्यर्थं इत्यपि वक्तुं शक्यम्, तथापि सम्प्रदायानुरोधादेवमुक्तम्। पनिसाहचर्यादिति। पनधातुः स्तुतावेव वर्तते तत्साहचर्यात् 'गुपूधूपविच्छीत्यत्र पणधातुरपि स्तुत्यर्थक एव गृह्यते, नतु व्यवहारार्थकः। अतः स्तुतावेव पणधातोरायप्रत्ययः। न तु व्यवहारे इत्यर्थः। क्रेतव्यद्रव्यस्य मूल्यनिर्धारणाय प्रश्नप्रतिवचनात्मको व्यवहारः। ननु स्तुतौ पणायतीति रूपं वक्ष्यमाणमनुपपन्नम्, पणधातोरनुदात्तेत्त्वेनात्मनेपदापत्तेः। न च आयप्रत्ययान्तस्यानुदात्तेत्त्वं नेति शङ्क्यम्, पणधातौ श्रुतस्यानुदात्तेत्त्वस्य 'आनर्थक्यात्तदङ्ग'न्यायेन आयप्रत्ययान्ते अन्वयोपपत्तेरित्यत आह-स्तुताविति। अनुबन्धस्य अनुदात्तात्मकस्य इतः आर्धधातुकविषये कदाचिदायप्रत्ययविनिर्मुक्ते चरितार्थत्वादायप्रत्ययान्तादात्मनेपदं नेत्यर्थः। एवं च तुल्यन्यायत्वादेकाच उपदेश इति निषेधोऽपि नेति सूचितम्। क्षमूष् सहन इति। 'षिद्भिदादिभ्योऽङि'त्यर्थं षित्वम्। ऊदित्वादिड्विकल्पं मत्वाह-चक्षमिषे चक्षंस इति। इडभावपक्षे 'अनुनासिकस्य क्विझलो' इति दीर्घस्तु न भवति, क्सिसाहचर्येण तिङ्भिन्नस्यैव झलादेः तत्र ग्रहणात्। वहिमह्योरिडभावपक्षे विशेषमाह-ष्वोश्च। 'मो नो धातो'रित्यनुवर्तते। तदाह-मान्तस्येति। णत्वमिति। षात्परत्वात् 'अट्कुप्वाङि'ति नकारस्य णत्वमित्यर्थः। कमु कान्ताविति। 'उदितो वे'ति क्त्वायां इडविकल्पार्थमुदित्त्वम्। कान्तिशब्दस्य प्रभापरत्वभ्रमं वारयति-कान्तिरिच्छेति। स्वर्गकाम इत्यादौ कमेरिच्छायां प्रयोगबाहुल्यदर्शनादिति भावः। 'कामोऽभिलाषस्तर्षश्च' इत्यमरः। कमेर्णिङ्। 'शेषपूरणेन सूत्रं व्याचष्टे—स्वार्थे इति। अर्थविशेषाऽनिर्देशादिति भावः। णकावितौ। 'णेरनिटि' इत्यत्र उभयोर्ग्रहणाय अनुबन्धकरणम्। ङित्त्वात्तङिति। अनुदात्तेत्त्वं तु णिङ-

कामयते। २३११ अयामन्ताल्वाय्येत्न्विष्णुषु ६।४।५५॥ आम् अन्त आलु आय्य इत्नु इष्णु एषु णेरयादेशः स्यात्। वक्ष्यमाणलोपापवादः। कामयाञ्चक्रे। 'आयादय आर्धधातुके वा'(सू २३०५)। चकमे। कामयिता-कमिता। कामयिष्यते-कमिष्यते। २३१२ णिश्रिद्रुस्रुभ्यः कर्तरि चङ् ३।१।४८॥ एयन्तात्, श्रयादिभ्यश्च च्लेश्चङ् स्यात्कर्त्रर्थे लुङि परे। अ काम् इ अ त इति स्थिते। २३१३ णेरनिटि ६।४।५१॥ अनिडादावार्धधातुके परे णेर्लोपः स्यात्। परत्वात् 'एरनेकाचः-' (सू २७२) इति यणि प्राप्ते। 'एयन्ल्लोपाविय ङ्ण्णुणवृद्धिदीर्घेभ्यः पूर्वविप्रतिषेधेन'

भावे 'चकम' इत्यादौ चरितार्थमिति भावः। कामयत इति। णिचि 'अत उपधाया' इति वृद्धौ कामि इति णिजन्तम्। 'क्विब्वचि चे'ति निषेधस्तु न, अनिरुक्षणत्वात्। णिजन्तस्य धातुत्वात् लडादयः। तत्र लटि शपि गुणे अयादेशे कामयते इति रूपम्। कामयेते इत्यादि सुगमम्। लिटि 'कास्यनेकाच' इत्याभि,आम इति लिटो लोपे,कामि आम् इति स्थिते सार्वधातुकेति गुणं बाधित्वा 'णेरनिटि' इति वक्ष्यमाणे णिलोपे प्राप्ते-अयामन्त। अय् इति च्छेदः 'णेरनिटी'त्यतो णेरित्यनुवर्तते।तदाह-णेरयादेशः स्यादिति।तथाच कामयामित्यामन्तं स्थितम्। ततः 'कृञ्चानुप्रयुज्यते' इत्यनुप्रयोगाल्लिडिति मत्वाह-कामयाञ्चक्र इति। णिङ आयादिष्वन्तर्भावाल्लिडादावार्धधातुके तद्विकल्पमुक्तं स्मारयति—आयादय इति। चकम इति। सेट्कोऽयम्। चकमिषे। चकमिष्वहे। चकमिमहे। कामयितेति। लुटि णिङ्पक्षे तासि इटि वृद्धौ गुणे अयादेशे रूपम्। कामयताम्। अकामयत। कामयेत।कामयिषीष्ट-कमिषीष्ट। अथ णिजन्तात् कामि इत्यस्माल्लुङः तादेशे च्लेः सिजादेशे प्राप्ते-णिश्रि। णि श्रि द्रु स्रु एषां द्वन्द्वः। प्रत्ययग्रहणपरिभाषया णीति तदन्तस्य ग्रहणम्। 'च्लि लुङी'त्यतो लुङीति, 'च्लेः सिजि'त्यतः च्लेरिति चानुवर्तते। तदाह—एयन्तादित्यादिना। चङाविति। णेरनिटि। आर्धधातुक इत्यधिकृतम्। 'अतो लोप' इत्यस्मात् लोप इत्यनुवर्तते। अनिटीत्यस्य आर्धधातुकविशेषणत्वात् तदादिविधिः। तदाह—अनिडादाविति। तथाच णिलोपे काम् अ त इति स्थिते-परत्वादिति। 'एरनेकाच' इत्यस्य 'णेरनिटी'त्यपेक्षया परत्वाण्णिलोपं बाधित्वा यणि प्राप्ते सतीत्यर्थः। कृते तु यणि लोपो दुर्लभः, णेरभावात्। स्थानिवत्त्वेऽपि यणा बाधितस्य पुनरुन्मेषो दुर्लभः। वस्तुतस्तु स्थानिवत्त्वमेवेह दुर्लभम्। यण्स्थानिनमिकारम् अलूरूपम् णित्त्वरूपेणाश्रित्य प्रवर्तमानस्य णिलोपस्याऽल्विधित्वेन तत्र स्थानिवत्त्वाऽसम्भवात्। स्पष्टा चेयं रीतिः 'भाभगो' इति सूत्रभाष्ये इति शब्देन्दुशेखरे विस्तरः। एयन्ल्लोपाविति। णिलोपः इयङ्यण्गुणवृद्धिदीर्घेभ्यः, अल्लोपस्तु वृद्धिदीर्घाभ्यां पूर्वविप्रतिषेधेनेति विवेकः। तथाच पूर्वविप्रतिषेधादिह यणं बाधित्वा णिलोपो भवतीति स्थितम्। ननु-अततक्षत्, आटिटत्, कारणा, कारकः, कार्यते इति वक्ष्यमाणेषु वार्तिकोदाहरणेषु क्रमेण इयङ्यण्गुणवृद्धिदीर्घाणामवश्यं प्राप्ते-

इति वार्तिकम्। णिलोपस्य तु पाचयतेः पाक्तिरित्यादि क्तिजन्तमवकाश इति भावः। वस्तुतस्तु अनिटि इति वचनसामर्थ्यादार्धधातुकमात्रमस्य विषयः।तथा चेयङादेरपवाद एवायम्। इयङ् अततक्षत्। यण् आटिटत्। गुणः कारणा। वृद्धिः कारकः। दीर्घः कार्यते। २३१४ णौ चङ्युपधाया ह्रस्वः ७।४।१॥ चङ्परे णौ यदङ्गं

णिलोपस्य निरवकाशत्वादेव इयङादिबाधकत्वसम्भवादिदं वार्तिकं व्यर्थम्। सुधियौ, प्रध्यौ, कर्ता, चिकाय, सूयात् इत्यादौ इयङ्यण्गुणवृद्धिदीर्घाणां सावकाशत्वादित्यत आह—णिलोपस्य त्विति। पचधातोर्णिचि उपधावृद्धौ पाचि इति व्यन्तात् 'स्त्रियां क्तिन्'ति क्तिनि, 'तितुत्रतथसिसुसरकसेषु च' इति इण्निषेधे 'णेरनिटी'ति णिलोपे कृत्वे पाक्तिरिति स्थितिः। 'क्तिजन्तमि'ति पाठे तु 'क्तिच्क्तौ च संज्ञायाम्' इति क्तिच् बोध्यः। 'पाक्तिरि'ति कस्यचित्संज्ञा। अत्र इयङादीनाम् अप्रसक्तेर्णिलोपस्यापि सावकाशत्वं तुल्यम्। तत्र अततक्षदित्यादौ परत्वादियङादिप्राप्तौ तन्निवृत्त्यर्थं वार्तिकमिदमारभ्यणीयमिति भावः। वार्तिकं व्यर्थमेवेत्याह—वस्तुतस्त्विति। आर्धधातुकमात्रमिति। कृत्स्नमनिडाद्यार्धधातुकमस्य णिलोपस्य विषय इत्यर्थः। तथाच अततक्षदित्यादौ परानपि इयङादीन् णिलोपः अपवादत्वात् बाधते, परापेक्षया अपवादस्य प्रबलत्वात्। परत्वादियङादीनां णिलोपबाधकत्वाभ्युपगमे हि णेरनिटीत्यत्र अनिटीति व्यर्थम्। कारयितेत्यादाविडाद्यार्धधातुके गुणेनैव णिलोपस्य बाधसिद्धेः। ततश्च अनिटीति वचनसामर्थ्यादनिडादावार्धधातुके सर्वस्मिन्परे णिलोप इति विज्ञायते। एवं च अततक्षदित्यादावियङादिप्रवृत्तियोग्येऽप्यार्धधातुके सर्वत्र णिलोप इत्यस्य निरवकाशत्वादपवादत्वादेव णिलोपेन इयङादिबाधसिद्धेर्वार्तिकमिदं व्यर्थमिति भावः। अपवाद एवायमिति। णिलोप इत्यर्थः। अतो लोपस्तु 'चिकीर्षक' इत्यत्र वृद्धि 'चिकीर्ष्या'दित्यत्र 'अकृत्सार्वधातुकयोरि'ति दीर्घं च बाधित्वा पूर्वविप्रतिषेधाद्भवति। न ह्यतो लोपो वृद्धिदीर्घयोरपवादः, गोपायितेत्यादौ वृद्धिदीर्घयोरप्राप्तयोरप्यतो लोपस्यारम्भादित्यलम्। इयङिति। उदाहरणसूचनमिदम्। अततक्षदिति। तक्षधातोर्व्यन्तात्लुङस्तिपि इकारलोपे चङि द्वित्वे संयोगपूर्वकत्वादेरनेकाच इति यणभावे इयङि प्राप्ते पूर्वविप्रतिषेधात् णिलोपे हलादिशेषे अडागमे अततक्षदिति रूपम्। यणिति। उदाहरणसूचनम्। आटिटदिति। अटधातोर्व्यन्तात् आटि इत्यस्मात् लुङि तिपि इकारलोपे चङि टि इत्यस्य द्वित्वे 'एरनेकाच' इति यणं बाधित्वा पूर्वविप्रतिषेधाण्णिलोपे आटि वृद्धौ रूपम्। गुण इति। उदाहरणसूचनम्। कारणेति। 'स्त्रिया'मित्यधिकारे कृञ्धातोर्व्यन्तात् कारि इत्यस्मात् 'ण्यासश्रन्थो युच' इति युचि अनादेशे सार्वधातुकार्धधातुकयो'रिति गुणं बाधित्वा पूर्वविप्रतिषेधाण्णिलोपे स्त्रीत्वाट्टापि कारणेति रूपम्। वृद्धिरिति। उदाहरणसूचनम्। कारक इति। कृञ्धातोर्व्यन्तात्कारि इत्यस्माण्वुलि अकादेशे वृद्धि बाधित्वा पूर्वविप्रतिषेधाण्णिलोपे रूपम्। दीर्घ इति। उदाहरणसूचनम्। कार्यत इति। कृञ्धातोर्व्यन्तात्कारि इत्यस्मात् कर्मणि लटि यकि

तस्योपधाया ह्रस्वः स्यात्। २३१५ चङि ६।१।११॥ चङि परेऽनभ्यासघात्ववर्यवस्यकाचः प्रथमस्य द्वे स्तोऽजादेस्तु द्वितीयस्य। २३१६ सन्वल्लघुनि चङ्परेऽनग्लोपे ७।४।९३ चङ्परे इति बहुव्रीहिः। (अन्यपदार्थो णिः)। स च अङ्गस्य इति च द्वयमप्यावर्तते। अङ्गसंज्ञानिमित्तं यच्चङ्परं णिरिति यावत् तत्परं यल्लघु तत्परो योऽङ्गस्याभ्यासस्तस्य सनीव कार्यं स्यादणावग्लोपेऽसति। अथवा अङ्गस्य इति नाव-

---

'अकृत्सार्वधातुकयो'रिति दीर्घं बाधित्वा पूर्वविप्रतिषेधाण्णिलोपः। तथाच प्रकृते कामृ ह् अ त इत्यत्र 'एरनेकाच' इति यणं बाधित्वा णिलोपे कामृ अ त इति स्थितम्। णौ चङि। अङ्गाधिकारादाह—यदङ्गमिति। उपधायाः किम्? अचकाङ्क्षत्। चङि किम्?। कारयति। णौ किम्? 'चङ्युपधाया ह्रस्व' इत्युच्यमाने अदादपदित्यत्र दाधातोः ण्यन्तात् लुङि चङि दा ह् अ त् इति स्थिते आकारस्य ह्रस्वे सति पुक् न स्यात्। णावित्यनुक्तौ तु आकारस्य णौ परतः उपधात्वाभावान्न ह्रस्वः। 'द्विर्वचनेऽची'ति निषेधस्तु न शङ्क्यः, द्वित्वनिमित्तचङः ङ्याधया व्यवहितत्वात्। तथाच प्रकृते कमृ अ त इति स्थितम्। चङि। 'एकाचो द्वे प्रथमस्ये'ति 'अजादेर्द्वितीयस्ये'ति चाधिकृतम्। 'ञ्णिति धातारनभ्यासस्ये'ति सूत्रं ञ्णिति इति वर्जमनुवर्तते, तदाह—चङि पर इत्यादिना। तथाच कमृ इत्यस्य द्वित्वे हलादिशेषे क कमृ अ त इति स्थितम्। सन्वल्लघुनि। 'अनग्लोप' इतिच्छेदः। बहुव्रीहिरिति। चङ् परो यस्मादिति विग्रह इति भावः। कर्मधारयमाश्रित्य चङि परे इति नार्थः, परग्रहणवैयर्थ्यात्। ननु बहुव्रीह्याश्रयणेऽपि 'अत्र लोपोऽभ्यासस्ये'त्यतः अभ्यासस्येत्यनुवृत्तौ चङ्परके लघुनि परे अभ्यासः सन्वदित्यर्थो लभ्यते। तथा सति अपन्तेभ्यः श्रिद्रुस्रुभ्यश्चङि द्वित्वे अशिश्रियत् अदुद्रुवत् असुस्रुवदित्यत्रापि सन्वत्त्वं स्यात्। ततश्च 'दीर्घो लघो'रिति सन्वद्भावविषये अभ्यासस्य वक्ष्यमाणो दीर्घः स्यादित्यत आह—अन्यपदार्थो णिरिति। तथाच चङ्परे णौ इति लभ्यते। अशिश्रियदित्यादौ च णेरभावात् न सन्वत्त्वमिति भावः। स चाङ्गस्येति चेति। बहुव्रीहिगम्यो णिः अङ्गस्येत्यनुवृत्तं चेत्यर्थः। तत्र णावित्यानुक्तौ एकं लघुनीत्यत्रान्वेति। तथाच चङ्परे णौ यल्लघु तस्मिन्परत इति लभ्यते। द्वितीयं तु अनग्लोपे इत्यत्रान्वेति। तथाच णौ परतः यः अग्लोपः तस्याऽभावे सतीति लभ्यते। अङ्गस्येत्यानुवृत्तौ एकं चङ्परे इत्यत्रान्वेति। निमित्तनिमित्तिभावे षष्ठी। तथाच अङ्गसंज्ञानिमित्तभूते चङ्परके वर्णे परे इति लभ्यते। चङ्परकश्च वर्णः अर्थात् णेरिकार एव। न तु श्रिद्रुस्रुवामन्त्यवर्णः, तस्य अप्रत्ययत्वेन अङ्गसंज्ञाप्रापकत्वाऽभावात्। एतदर्थमेव अङ्गस्येत्यस्य निमित्तषष्ठ्यन्तताम् आश्रित्य चङ्पर इत्यनेनान्वयाऽभ्युपगतः। चङ्पर इत्येतावतैव तु णाविति न लभ्यते, श्रिद्रुस्रुष्वभिचारात्। द्वितीयं त्वङ्गस्येत्येतत् अभ्यासस्येत्यनुवृत्तेन अन्वेति। 'सन्व'दिति सप्तम्यन्ताद्वतिः। तदाह—अङ्गसंज्ञानिमित्तमित्यादिना। अथवेति। अस्मिन्व्याख्याने 'चङ्परे' इत्येतत् अङ्गस्येत्यत्रान्वेति। न तु लघुनि। अङ्गस्य च प्रत्ययनिमित्तत्वादेव णेरभ्य-

र्तते चङ्परे णौ यदङ्गं तस्य योऽभ्यासो लघुपरस्तस्येत्यादि प्राग्वत्। २३१७ सन्यतः ७।४।७९॥ अभ्यासस्यात इकारः स्यात्सनि। २३१८ दीर्घो लघोः ७।४। ९४॥ अभ्यासस्य लघोः दीर्घः स्यात्सन्वद्भावविषये। अचीकमत। णिङ्भावपक्षे तु 'कमेश्च्लेश्च्लङ् वक्तव्यः'। णेरभावान्न दीर्घसन्वद्भावौ। अचकमत।

सञ्ज्ञायाः कार्यकालत्वादङ्ग यत्र द्विरुच्यते।
तत्रैव दीर्घः सन्वच्च नानेकाच्त्वं तु माधवः॥ १॥

पदार्थस्य लाभः। लघुनीति तु अभ्यासस्येत्यत्रैवान्वेति। तदाह—चङ्परे णौ यदङ्गमित्यादिना। प्राग्वदिति। सनीव कार्यं स्यादणावलोपे असतीत्यर्थः। अत्र प्रथमपक्ष एव भाष्यसंमतः, 'अजजागर'दित्यत्र 'चङ्परे णौ यल्लघु तदभ्यासव्यवहितमिति न सन्वत्त्व'मिति भाष्योक्तेः एवं च प्रथमपक्षे उन्देर्णेर्यन्तात्सनि द्वित्वे उन्दिदि अ त इत्यत्र अभ्यासोत्तरखण्डे चङ्परे णौ लघोरभावेनाऽभ्यासस्य तथाविधलघुपरकत्वविरहात् सन्वत्त्वाभावान्नाभ्यासदीर्घः। द्वितीयपक्षे तु चङ्परे णौ यदङ्गम् उन्दिद् इत्येतत् तदीयोऽभ्यासश्चङमादाय लुप्तं णिमादाय वा लघुपर इति सन्वत्त्वसत्त्वादभ्यासदीर्घ इति भेदः। एवं च प्रकृते क कम् अ त इत्यतः व्याख्याद्वयेऽपि सन्वत्त्वं स्थितम्। सन्यतः। सनि अतः इति छेदः। 'अत्र लोप' इत्यत्र अभ्यासस्येत्यनुवर्तते। 'भृञामि'दित्यतमात् इदिति। तदाह—अभ्यासस्येति। किं कम् अ त इति स्थितम्। दीर्घो लघोः। 'अत्र लोपोऽभ्यासस्ये'त्यतः अभ्यासस्येत्यनुवर्तते। तदाह—अभ्यासस्य लघोर्दीर्घ इति। अभ्यासावयवस्य लघोरित्यर्थः। 'सन्वल्लघुनि चङ्परे' इति सूत्रं सन्वच्छब्दवर्जमनुवर्तते। तच्च प्राग्वदेव द्वेधा व्याख्येयम्। तथा च फलितमाह—सन्वद्भावविषय इति। 'सन्यत' इत्यत्र तपरत्वं स्पष्टार्थमिति 'दीर्घोऽकितः' इति सूत्रे भाष्ये स्पष्टम्। तथा च कि कम् अ तेत्यत्र अभ्यासेकारस्य दीर्घे अभ्यासचुत्वे अडागमे परिनिष्ठितं रूपमाह—अचीकमतेति। अत्र लघोर्णिपरत्वं येन नाभ्यवधानन्यायाद्बोध्यम्। णिङ्भावपक्षे त्विति। 'आयादय आर्धधातुके वे'ति णिङो वैकल्पिकत्वादिति भावः। कमेश्चेश्च्लङ् वक्तव्य इति। अण्यन्तत्वादप्राणौ वचनम्। णेरभावादिति। णिङ्भावपक्षे कमिधातोरनुदात्तत्वात्तङि प्रथमपुरुषैकवचने श्लेश्चङि द्वित्वे हलादिशेषे अभ्यासचुत्वे अडागमे अचकमतेति रूपं वक्ष्यते। तत्र णेरभावात् दीर्घो लघोरित्यभ्यासलघोर्दीर्घो न भवति, तत्र लघुनि चङ्परेऽनलोप इत्यनुवर्त्य चङ्परे णावेव तद्विधानोक्तेः। अत एव सन्वत्त्वाभावात्सन्यत इत्यभ्यासाऽकारस्य इत्त्वं च न भवतीत्यर्थः। 'दीर्घो लघो'रिति दीर्घविधौ सन्वत्त्वं न निमित्तम्। किंतु लघुनि चङ्परे इत्यस्य तत्रानुवृत्त्या सन्वद्भावविषये तत्प्रवृत्तेः। अतः दीर्घसन्वद्भावाविति पृथगुक्तिः।

अथ पञ्चभिः श्लोकैः सन्वद्भावसूत्रं 'दीर्घो लघो'रिति सूत्रं च विशदयति—सञ्ज्ञाया इत्यादिना। अस्मिन् शास्त्रे 'कार्यकाल संज्ञापरिभाष'मित्येकः पक्षः। 'कार्यकाल'मित्यस्य कार्यप्रदेशकमित्यर्थः। अस्मिन्पक्षे तत्तत्कार्यविधिप्रदेशेषु सञ्ज्ञा-

चकास्त्यर्थापयत्यूर्णोत्यादौ नाङ्ग द्विरुच्यते ।
किं त्ववयवः कश्चित्तस्मादेकाच्त्वं द्वयम् ॥ २ ॥
वस्तुतोऽङ्गस्यावयवो योऽभ्यास इति वर्णनात् ।
ऊर्णौ दीर्घोऽर्थापयतौ द्वयं स्यादिति मन्महे ॥ ३ ॥

शास्त्रस्य परिभाषाशास्त्रस्य च उपस्थितिः । 'यथोद्देशं संज्ञापरिभाष'मिति पक्षान्तरम् । उद्देशाः संज्ञापरिभाषाशास्त्राम्नायप्रदेशाः तान् अनतिक्रम्य यथोद्देशम् । संज्ञाशास्त्रं परिभाषाशास्त्रं च स्वप्रदेशे स्थितमेव तत्तद्विध्यपेक्षितं स्वं स्वमर्थं समर्पयतीति यावत् । अस्मिन्पक्षे कार्यप्रदेशेषु संज्ञापरिभाषायां तदर्थस्यैवोपस्थितिः, न तु संज्ञापरिभाषाशास्त्रयोरिति स्थितिः । 'सन्वल्लघुनी'ति सूत्रे, 'दीर्घो लघो'रिति सूत्रे च अङ्गस्येति अभ्यासस्येति चानुवृत्तम् । तत्र कार्यकल्पक्षे 'पूर्वोऽभ्यास' इति सूत्रं सन्निहितम् । ततश्च अङ्गस्य ये द्वे उच्चारणे तयोः पूर्वः अभ्याससंज्ञः स सन्वद्भवतीति फलितम् । तत्र कृदन्तोच्चारणशङ्कयोगादङ्गस्येति कर्मणि षष्ठी, न स्ववयवषष्ठी, कारकषष्ठ्या बलवत्त्वात् । अङ्गं च प्रत्यये परतः कृत्स्नमेव प्रकृतिरूपम् , न तु तदेकदेशः । ततश्च कृत्स्नमङ्गं च प्रत्यये परतः कृत्स्नमेव प्रकृतिरूपम्, न तु तदेकदेशः । ततश्च कृत्स्नमङ्ग यत्र द्विरुच्यते, न तु तदेकदेशमात्रं तत्रैव 'दीर्घो लघो'रिति दीर्घः 'सन्वल्लघुनी'ति सन्वद्भावश्च भवति । एवं च अङ्गस्य एकाच्कत्वे सत्येव तयोः प्रवृत्तिः, तत्र कृत्स्नस्याङ्गस्य द्विरुक्तेः । अनेकाच्केषु तु अङ्गेषु न तयोः प्रवृत्तिः, तत्र एकस्यैव एकाचः अङ्गैकदेशस्य द्विरुक्तेरिति माधवो मन्यत इति प्रथमश्लोकस्यार्थः । 'नानेकाचि'त्युक्तं विशदयति-चकास्तीति श्लोकेन । 'चकासृ दीप्तौ' । अर्थमाचष्टे इत्यर्थे णिचि 'अर्थवेदयो'रिति प्रकृतेरापुगागमे अर्थापिधातुः । 'ऊर्णुञ् आच्छादने' । एते त्रयः अनेकाचका धातवः । आदिना 'जागृ निद्राक्षये' इत्यादिसङ्ग्रहः । एभ्यो व्यन्तेभ्यश्चङि अङ्गं कृत्स्नं न द्विरुच्यते । किन्तु अङ्गस्य कश्चिदेकाजवयव एव द्विरुच्यते । तस्मात् अनेकाच्केषु कृत्स्नस्याङ्गस्य द्विरुक्तयभावात् एकाच्केष्वेवाङ्गेषु 'दीर्घो लघो'रिति दीर्घः, 'सन्वल्लघुनी'ति सन्वद्भावश्चेत्येतद्द्वयं भवति, नत्वनेकाच्काङ्गेष्वित्यर्थः । नन्वेवं सति 'दिदरिद्रासति' इत्यादौ 'हलादिः शेष' इत्याद्यभ्यासकार्यमनेकाच्केष्वङ्गेषु न स्यात् कृत्स्नाङ्गस्य द्विरुक्तयभावात् । किञ्च 'अजीजागरदि'त्यत्र सन्वत्त्वमाशङ्क्य 'णिपरकलघोर्गकारात्कारस्य 'जा' इत्यनेन व्यवहितत्वादभ्यासस्य न सन्वत्त्व'मिति समाहितं भाष्ये । तदेतत् अनेकाचकाङ्गेषु सन्वत्त्वस्याऽप्रवृत्तौ विरुध्येत, कृत्स्नस्याङ्गस्य द्विरुक्तयभावादेव तत्र सन्वत्त्वस्याप्राप्तौ तच्छङ्काया एवानुन्मेषादित्यस्वारस्याद्यथोद्देशपक्षमालम्ब्याह-वस्तुत इति । 'अङ्गस्ये'त्यवयवषष्ठी । अङ्गावयवस्याभ्यासस्येति लभ्यते । ततश्च ऊर्णुञि व्यन्ते चाङ 'नु' इत्येकदेशस्य द्वित्वेऽपि 'ओर्णुनु'विदित्यत्र 'दीर्घो लघो'रित्यभ्यासलघुर्दीर्घो भवति । सन्वत्त्वं तु प्रयोजनाभावादुपेक्षितम्, अभ्यासे अकाराभावेन 'सन्यत' इत्यस्यासम्भवात् । अर्थमाचष्टे इत्यर्थे णिचि प्रकृतेरापुकि अर्थापिधातोश्चङि णि-

चकास्तौ तूभयमिदं न स्यात्स्याच्च व्यवस्थया ।
णेर्विशेष्यं सन्निहितं लघुनीत्यङ्गमेव वा ॥ ४ ॥
इति व्याख्याविकल्पस्य कैयटेनैव वर्णनात् ।
णेरग्लोपेऽपि सम्बन्धस्त्वगितामपि सिद्धये ॥ ५ ॥

अथ क्रम्यन्ताश्चिशत्परस्मैपदिनः।४४४ अण ४४५ रण ४४६ वण ४४७ भण-४४८ मण ४४९ कण ४५० क्रण ४५१ त्रण ४५२ भ्रण ४५३ ध्वण शब्दार्थाः। अणति । रणति । वणति । वकारादित्वादेत्त्वाभ्यासलोपौ न । ववणतुः । ववणिथ । घणिरपि कैश्चित्पठ्यते । घणति । ४५४ श्रोण् अपनयने । श्रोणति । श्रोणाञ्चकार । ४५५ शोण् वर्णगत्योः । शोणति । शुशोण । ४५६ श्रोण् संघाते । श्रोणति।४५७ श्लोण् च।शोणादयश्चयोऽमी तालव्योष्मादयः।४५८ पैण् गतिप्रेरणश्लेषणेषु।प्रैण् इति क्वचित्पठ्यते । पिप्रैण । ४५९ ध्रण शब्दे । उपदेशे नान्तोऽयम् । 'रषाभ्याम्'

लोपे उपधाह्रस्वे थप् इत्यस्य द्वित्वेऽपि 'आर्तथप'दित्यत्र सन्वद्भावात् 'सन्यत' इत्यभ्यासस्य इत्वम् अभ्यासदीर्घश्चेति हृयं भवतीति जानीम इति तृतीयश्लोकार्थः। 'अङ्गस्यावयव' इति पक्षेऽपि चकास्तौ विशेषमाह—चकास्तौ त्विति । चतुर्थश्लोकोऽयम् । अवस्था—वस्तुस्थितिः । व्यवस्थया पक्षद्वयेनेति यावत् । 'चङ्परे' इत्यनेन अन्यपदार्थतया लक्षणस्य णावित्यस्य सन्निहित लघुनीत्येतत् विशेष्यम् । तथा च 'चङ्परे णौ यदङ्गं लघु' इति प्रथमव्याख्यान फलितम् । अङ्गमेव वा णेर्विशेष्यम् । तथाच 'चङ्परे णौ यदङ्गमिति द्वितीयं व्याख्या फलितम् । इति व्यवस्थया पक्षद्वयेन सन्वत्वं दीर्घश्चेत्युभयमिदं चकास्तौ यज्यते चङि णिलोपे द्वित्वे 'अचचकासत्' इत्यत्र न स्यात्, स्याच्चेत्यन्वयः । तत्र 'चङ्परे णौ यल्लघि'ति व्याख्याने सति नैव उभयं स्यात् । चङ् परस्य णेः कास् इत्यनेन व्यवहितत्वात् । अचीकमतेत्यादौ त्वेकव्यवधानं येन नाव्यवधानन्यायात्सोढव्यमेव । 'चङ्परे णौ यदङ्ग'मिति व्याख्याने तु 'अचीचकास'दित्यत्र उभयं स्यादेव, अङ्गस्य णिपरकत्वसत्त्वादिति बोध्यम् । ननु 'चङ्परे णौ यल्लघि'ति 'चङ्परे णौ यदङ्ग'मिति च व्याख्याभेदे किं प्रमाणमित्यत आह—इति व्याख्याविकल्पस्य कैयटेनैव वर्णनादिति। आदृतेत्यतेति शेषः । ननु णौ इत्यस्यावृत्तिमभ्युपगम्य अग्लोपेऽपि तदन्वयः किमर्थं इत्यत आह—णेरग्लोपेऽपीति । अगितामिति । 'कमु कान्ता'दित्यादीनामपीत्यर्थः। सिद्धय इति । दीर्घसन्वत्वसिद्धयर्थमित्यर्थः। अन्यथा कमुप्रभृतीनामुकारानुबन्धलोपमादाय अग्लोपित्वात् दीर्घसन्वद्भावौ न स्यातामित्यर्थः । इति धिषिप्रभृतयः क्रम्यन्ता दश गताः ।

क्रम्यन्ता इति । 'क्रमु पादविक्षेपे' इत्येतत्पर्यन्ता इत्यर्थः । 'अनुनासिकान्ता' इति शेषः । अण रणेति । इतः प्रभृति कन दीक्षावित्यतः प्राक् मूर्धन्यान्ताः । श्रोण् इति । ऋदित्त्वं नाग्लोपीति निषेधार्थम् । भ्रण शब्द इति । अदुपधोऽयम् । उपदेश इति ।

(धु २३५) इति णत्वम्। ध्रणति। णोपदेशकलं यङ्लुकि। दन्ध्रन्ति। वण इत्यपि केचित्। वेणतुः। वेणिथ। ४६० कनी दीप्तिकान्तिगतिषु। चकान। ४६१ ष्टन ४६२ वन शब्दे। स्तनति। वनति। ४६३ वन ४६४ षण सम्भक्तौ। वनेरर्थभेदात्पुनः पाठः। सनति। ससान। सेनतुः। २३१६ ये विभाषा ६।४।४३॥ जनसनखनामात्वं वा स्याद्यादौ क्ङिति। सायात्-सन्यात्। ४६५ अम गत्यादिषु। कनीदीप्तिकान्तिगति-इत्यत्र गतेः परयोः शब्दसम्भक्त्योरादिशब्देन ग्रहः। अमति। आम। ४६६ द्रम ४६७ ह्रम ४६८ मीमृ गतौ। द्रमति। दद्राम। 'ह्रयन्त—' (सू २२६६) इति न वृद्धिः। अद्रमीत्। ह्रम्मति। जह्रम। मीमति। मिमीम। अयं शब्दे च। ४६६ चमु ४७० छमु ४७१ जमु ४७२ झमु अदने। २३२० ष्ठिवुक्लमुचमां शिति ७।३।७५॥ एषामचो दीर्घः स्याच्छिति। आजि चम इति

धात्वुपदेशे नकारान्तोऽयम्। अकारस्य उच्चारणार्थस्य निवृत्तौ तवर्गपञ्चमान्त इत्यर्थः। तर्हि णकारस्य कथं श्रवणमित्यत आह—षाभ्यामिति णत्वमिति। ननु स्वाभाविक एव णकार इत्यस्तु, किं नकारस्य कृतणत्वस्य निर्देश इति कल्पनयेत्यत आह—णोपदेशेति। नकारस्यानिकणोपदेशस्य 'नश्चे'त्यनुस्वारात्मकं फलं यङ्लुकि प्रत्येतव्यमित्यर्थः। दन्ध्रतीति। ध्रणधातोर्यङ्लुकि द्वित्वे हलादिशेषे 'नुगतोऽनुनासिकान्तस्ये'त्यभ्यासस्य नुकि उत्तरखण्डे णकारस्याऽसिद्धत्वेन अनुस्वारे परसवर्णं तस्याऽसिद्धत्वात् णत्वाभावे नकारस्यैव श्रवणम्। स्वाभाविकणकारोपदेशे तु उत्तरखण्डे णकार एव श्रूयेतेति भावः। वणेत्यपीति। पवर्गतृतीयादिरिति भावः। 'कन दीप्ती' त्यारभ्य अम गत्यादिष्वित्यतः प्राक् तवर्गपञ्चमान्ताः। ष्टन वनेति। आद्यः णोपदेशः। ष्टुत्वसम्पन्नः टकारः। तदाह—स्तनतीति। वन षणेति। द्वितीयः णोपदेशः। ननु 'ष्टन वन शब्दे' इति वनेः पठितस्य पुनः पाठो व्यर्थ इत्यत आह—अर्थभेदादिति। वनेः शब्दे सम्भक्तौ च वृत्तिरिष्टा। ष्टनेस्तु शब्द एव वृत्तिरिष्टा। तत्र 'ष्टन वन शब्दे सम्भक्तौ चे'त्युक्तौ ष्टनेरपि सम्भक्तौ वृत्तिः स्यात्। 'ष्टन शब्दे' इत्युक्त्वा 'वन सम्भक्तौ चे'ति पाठे गौरवमिति भावः। आशोलिकि विशेषमाह—ये विभाषा। 'जनसनखनां सञ्झलो'रित्यतः जनसनखनामित्यनुवर्तते। अनुदात्तोपदेशेत्यतः क्ङितीति। 'ये' इति तद्विशेषणम्। अकार उच्चारणार्थः। तदादिविधिः। 'विड्वनोरनुनासिकस्या'दित्यतः आदिरित्यनुवर्तते। तदाह—जनसनखनामित्यादिना। सायादिति। नकारस्य आत्वे सवर्णदीर्घः। द्रम ह्रम मीमृ गताविति। आद्योऽदुपधः। न वृद्धिरिति। 'अद्रमी'-रित्यत्र हलन्तलक्षणायां वृद्धौ नेटीति निषिद्धायां 'ह्रयन्ते'त्यतः 'अतो हलादेरि'ति वृद्धिर्नेत्यर्थः। जह्रमेति। अभ्यासचुरादेर्ह्रस्य ह्रः। तस्य 'अभ्यासे चर्चे'त्यनेन जः। मिमीमेति। मीमृधातोर्णलि द्वित्वे अभ्यासह्रस्वः। अयं शब्दे चेति। मीमृधातुरित्यर्थः। ष्ठिवुक्लमु। 'समामष्टानां दीर्घः श्यनीत्यतः दीर्घ इत्यनुवर्तते। दीर्घग्रहणं अब ह्रस्वु-

वक्तव्यम्। आचामति। आङि किम्। चमति। विचमति। अजमीत्। जिमिकेचित्पठन्ति। जेमति। ४७३ क्रमु पादविक्षेपे। २३२१ **वा भ्राशम्लाशभ्रमुक्रमुक्लमुत्रसित्रुटिलषः ३।१।७०॥** एभ्यः श्यन्वा स्यात्कर्त्रर्थे सार्वधातुके परे। २३२२ **क्रमः परस्मैपदेषु ७।३।७६॥** क्रमेर्दीर्घः स्यात्परस्मैपदपरे शिति। क्राम्यति क्रामति। चक्राम। क्राम्यतु-क्रामतु। २३२३ **स्नुक्रमोरनात्मनेपदनिमित्ते ७।२।३६॥** अत्रैवेट्। अक्रमीत्।

अथ रेवत्यन्ता अनुदात्तेतः। ७७४ अय ४७५ वय ४७६ पय ४७७ मय ४७८ चय ४७९ तय ४८० णय गतौ। अयते। २३२४ **दयायासश्च ३।१।३७॥** दय अय आस् एभ्य आम् स्याल्लिटि। आयाञ्चक्रे। अयिता। अयिषीष्ट।२३२५।

पस्थितम्। तदाह—एषामचो दीर्घ इति। ष्टिवु क्लमु चम् एषां द्वन्द्वः। चम् इत्यनेन आङ्पूर्वस्य चमेर्ग्रहणम्। अचमीदिति। ह्रयन्तेति न वृद्धिः। क्रम् पादेति। उदित्स्वमुदितो वेति विकल्पार्थम्। वा भ्राश। 'दिवादिभ्यः श्यन्'त्यतः श्यन्निति,'कर्तरि श'रित्यतः कर्तरीति, 'सार्वधातुके य'गित्यतः सार्वधातुक इति चानुवर्तते। तदाह-एभ्यः श्यन्वेत्यादि। क्रमः। दीर्घः स्यादिति। 'शमामष्टाना'मित्यतः तदनुवृत्तेरिति भावः। शितीति। 'ष्टिवुक्लमुचमा'मित्यतस्तदनुवृत्तेरिति भावः। क्रामतीति। मध्यमपुरुषैकवचने क्रामेत्यत्र तु 'क्रमः परस्मैपदेष्वि'ति दीर्घो भवत्येव। नच दीर्घस्याङ्गाधिकारस्थत्वात् न लुमतेति निषेधः शङ्क्यः, लुमता लुप्ते प्रत्यये यदङ्गं तस्य कार्यं एव तस्य प्रवृत्तेः। शिति परतः क्रमेरङ्गस्य दीर्घस्तु न लुप्तप्रत्यये परस्मैपदे परे अङ्गस्य कार्यम्, किन्तु शिति परे अङ्गस्य कार्यमिति बोध्यम्। स्नुक्रमोः। पञ्चम्यर्थे षष्ठी। आत्मनेपदनिमित्तस्याऽभावः अनात्मनेपदनिमित्तम्, अर्थाभावे अव्ययीभावेन सह नञ्तत्पुरुषो विकल्प्यत इत्युक्तेः समासः। आत्मनेपदनिमित्ताभावे सति स्नुक्रमभ्यां परस्य वलाद्यार्द्धधातुकस्य इट् स्यादित्यर्थः। स्नुक्रमोरनुदात्तोपदेशानन्तर्भावादिटि सिद्धे वचनमिदं नियमार्थमित्याह—अत्रैवेडिति। एवञ्च भावकर्मलकारेषु इण्न भवति। उपस्नोप्यते जलेन। भावलकारोऽयम्। उपक्रम्यते। कर्मणि लृट्। स्यः। 'प्रस्नुत'मित्यत्र तु 'अयुकः किती'ति निषेधान्नेट्, 'आर्द्धधातुकस्येड्वलादे'रिति इडुविधेः पूर्वस्तात्प्रतिषेधकाण्डारम्भसामर्थ्यात्। 'स्नुक्रमोरनात्मनेपद' इति तु न सूत्रितम्, आत्मनेपदभिन्ने परस्मैपदे परे इत्यर्थे चिक्रमिषिष्यतीत्यसिद्धेः स्येन व्यवधानात्। आत्मनेपदे परे नेडित्यर्थं तु प्रचिक्रंसिष्यत इत्यसिद्धिः। अतो निमित्तग्रहणमित्यलम्। अक्रमीदिति। 'ह्रयन्ते'ति न वृद्धिः। इति क्रम्यन्ताः परस्मैपदिनो गताः।

रेवत्यन्ता इति। 'रेवृ' प्लवगतावित्येतत्पर्यन्ता इत्यर्थः। अयपयेत्यारभ्य शल्च चलने इत्यतः प्राक् यकारान्ताः। दयायासश्च। दय अय आस् एषां समाहारद्वन्द्वात्पञ्चम्येकवचनम्। 'कासप्रत्यया'दित्यतः आम् लिटीत्यनुवर्तते। तदाह—एभ्य आम् स्या-

विभाषेटः ८।३।७९॥ इणः परो य इट् ततः परेषां षीध्वंलुङ्लिटां धस्य वा मूर्धन्यः स्यात्। अयिषीढ्वम्। अयिषीध्वम्। आयिष्ट। आयिढ्वम्–आयिध्वम्। **२३२६ उपसर्गस्यायतौ ८।२।१९॥** अयतिपरस्योपसर्गस्य यो रेफस्तस्य लत्वं स्यात्। प्लायते। पलायते। निसुदुसो रुत्वस्यासिद्धत्वाच्च लत्वम्। निरयते। दुरयते। निर्दुरोस्तु–निलयते-दुलयते। प्रत्यय इति त्विणो रूपम्। अथ कथम् 'उदयति विततोर्ध्वरश्मिरर्कः' इति माघः। इट किट कटी इत्यत्र प्रश्लिष्टस्य भविष्यति। यद्वा 'अनुदात्तेत्त्वलक्षणमात्मनेपदमनित्यम्' (प ६७), चक्षिङो ख्यिकरणाज्ज्ञापकात्। वादित्वात्, ववये। पेये। मेये। चेये। तेये। प्रणयते। नेये। ४८१ दय दानगतिरक्षणहिंसादानेषु। आदानं ग्रहणम्। दयाञ्चक्रे। ४८२ रय गतौ। ४८३ ऊयी तन्तुसन्ताने। ऊयाञ्चक्रे। ४८४ पूयी विशरणे दुर्गन्धे च। पूयते। पुपूये।

लिटि इति। विभाषेटः। 'इणः षीध्वंलुङ्लिटां ध.' इत्यनुवर्तते। 'अपदान्तस्ये'त्यतो मूर्धन्य इति च। तदाह—इणः परो य इडित्यादि। इणन्तादङ्गादित्यर्थः। अयिषीढ्वमिति। आशीर्लिङो ध्वमः सीयुट्। यलोपः। आर्धधातुकत्वाच्च सलोपः। इट्। यकारादिणः परो य इट् ततः परत्वात् धस्य मूर्धन्यो ढः। इटः परमक्तत्वाच्चकारान्तादङ्गात् परस्य इषीध्वमः इणन्तादङ्गात्परत्वान्नित्ये प्राप्ते विकल्पोऽयम्। आयिढ्वमिति। लुङो ध्वमि च्लेः सिचि आटि वृद्धौ सिच इटि 'धि च'ेति सलोपः। ध्वम इवर्णान्तादङ्गात्परत्वान्नित्ये प्राप्ते विकल्पः। अङ्गादिति निवृत्तमिति केचित्। उपसर्गस्यायतौ। अयताविति शितपा निर्देशः। 'कृपो रो ल' इत्यतः रो ल इत्यनुवर्तते। तदाह—अयतिपरस्यत्यादि। प्लायत इति। प्र इत्युपसर्गः। पलायत इति। परा इत्याकारान्त उपसर्गः। ननु निरयते दुरयत इत्यत्रापि लत्वं स्यादित्यत आह–निसुदुसोरिति। तर्हि निलयते दुलयत इति कथमित्यत आह—निर्दुरोरित्विति। एतदर्थमेव प्रादिषु सान्तयो रेफान्तयोश्च निर्देश इति भावः। तर्हि 'प्रत्यय' इत्यत्रापि प्रतेरयतिपरत्वात् रस्य लत्वं स्यादित्यत आह—प्रत्यय इति त्विति। प्रतिपूर्वकादिण्धातोरुप्रत्यये 'प्रत्यय' इति रूपम्। अयतिपरत्वाऽभावान्न लत्वमित्यर्थः। अयधातुमादाय 'प्रलयय' इति न अनभिधानादिति कैयटः। कथमुदयतीति। उत्पूर्वकादयधातोः शत्रन्तात्सप्तम्यन्तमिति मत्वा आक्षेपः। अनुदात्तेत्त्वेन लटः शानचप्रसङ्गादिति भावः। प्रश्लिष्टस्येति। 'इधातो'रिति शेषः। तस्य अनुदात्तेत्त्वाऽभावाच्छतृप्रत्ययो निर्बाध इति भावः। ज्ञापकादिति। 'चक्षिङ्'धातोः इकारस्य अनुदात्ततया अनुदात्तेत्त्वादेव आत्मनेपदसिद्धौ ख्यिकरणं अनुदात्तेत्त्वप्रयुक्तात्मनेपदस्य अनित्यतां ज्ञापयति। तस्य अनित्यत्वे तु नित्यात्मनेपदार्थं ख्यिकरणमर्थवदिति भावः। इदं तु भाष्ये न दृश्यते। वादित्वादिति। दयधातोर्लिटि वादित्वादेत्त्वाभ्यासलोपयोरभावे सति 'ववये' इति रूपमित्यर्थः। णयधातुर्णोपदेश इति मत्वा आह—प्रणयत इति। 'उपसर्गादसमासेऽपी'ति णत्वमिति भावः। दयाञ्चक्र इति। 'दयायासश्च' इत्याम्। ऊयाञ्चक्र इति। हृजादित्वा-

४८५ क्नूयी शब्दे उन्दने च। चुक्नूये। ४८६ क्ष्मायी विधूनने। चक्ष्माये। ४८७ स्फायी ४८८ ओप्यायी वृद्धौ। स्फायते। पस्फाये। प्यायते। **२३२७ लिड्यङोश्च ६।१।२९॥** लिटि यङि च प्यायः पीभावः स्यात्। पुनः प्रसङ्गविज्ञानात् पीशब्दस्य द्वित्वम्। 'एरनेकाचः-' (सू २७२) इति यण्। पिप्ये। पिप्याते। पिप्यिरे। **२३२८ दीपजनबुधपूरितायिप्यायिभ्योऽन्यतरस्याम् ।३।१।६१॥** एभ्यश्लेश्चिण्वा स्यादेकवचने तशब्दे परे। **२३२९ चिणो लुक् ६।४।१०४॥** चिणः परस्य तशब्दस्य लुक् स्यात्। अप्यायि। अप्यायिष्ट। ४८९ तायृ सन्तानपालनयोः। सन्तानः प्रबन्धः। तायते। तताये। अतायि। अतायिष्ट। ४९० शल चलनसंवरणयोः। ४९१ वल ४९२ वल्ल संवरणे सञ्चरणे च। ववले। ववल्ले। ४९३ मल ४९४ मल्ल धारणे। मेले। ममल्ले। ४९५ भल ४९६ भल्ल परिभाषणहिंसादानेषु। बभले। बभल्ले। ४९७ कल शब्दसंख्यानयोः। कलते। चकले। ४९८ कल्ल अव्यक्ते शब्दे। कल्लते। अशब्दे इति स्वामी, अशब्दस्तूष्णींभाव इति च। ४९९ तेवृ ५०० देवृ देवने। तितेवे। दिदेवे। ५०१ षेवृ ५०२ गेवृ ५०३ ग्लेवृ ५०४ पेवृ ५०५ मेवृ ५०६ म्लेवृ सेवने। 'परिनिविभ्यः-' (सू २२७५) इति षत्वम्। परिषेवते। सिषेवे। अयं सोपदेशो-

---

दाम्। उन्दने चेति। क्लेदने चेत्यर्थः। स्फायी ओप्यायीति। ओदित्त्वम् 'ओदितश्च' इति निष्ठानत्वार्थम्। ईदित्त्वं तु 'श्वीदितो निष्ठाया'मिति इण्निषेधार्थम्। लिड्यङोश्च। लिट् च यङ् चेति द्वन्द्वात्सप्तमी। 'प्यायः पी' इति सूत्रमनुवर्तते। तदाह—लिटि यङि चेति। ननु प्यायतेर्लिटि द्वित्वं बाधित्वा परत्वात् पीभावे द्वित्वे एरनेकाचः इति यणि पिप्ये इति रूपमिष्यते। तत्र द्वित्वं बाधित्वा परत्वात् पीभावे कृते पुनर्द्वित्वं न सम्भवति, 'विप्रतिषेधे यद्बाधितं तद्बाधितमेव' इति न्यायादित्यत आह—पुनः प्रसङ्गेति। 'पुनः प्रसङ्गविज्ञानात् सिद्धम्' इति परिभाषा। विप्रतिषेधे बाधितस्यापि पुनः प्रवृत्तेरभ्युपगमात्कृतेऽपि पीभावे द्वित्वादिकं सिद्धमिति तदर्थः। दीपजन। 'क्लेः सिच्' इत्यतः क्लेरिति, 'चिण् ते पदः' इत्यस्मात् चिण् ते इति चानुवर्तते। तदाह—एभ्यश्चलेरिति। एकवचन इति। दीपादीनामात्मनेपदित्वेन तेभ्यस्तशब्दस्य एकवचनस्वनियमादिति भावः। चिणो लुक्। चिण इति पञ्चमी। तदाह—चिणः परस्येति। चिणः परश्च अर्थात् तशब्द एव भवति। चिणभावे क्लेः सिचि रूपमाह—अप्यायिष्टेति। तायृ सन्तानेति। लुङि 'दीपजन' इति क्लेश्चिणि तलोपे रूपमाह—अतायीति। चिणभावे सिचि 'अतायिष्टे'ति रूपम्। शल चलनेत्यारभ्य तेवृ इत्यतः प्राक् ञान्ताः। तेवृ इत्यारभ्य रेवत्यन्ता वकारान्ताः। षेवृधातोः षोपदेशत्वात्सत्वे सेवत इत्यादि रूपम्। परिषेवत इत्यत्र 'सात्पदाद्योः' इति निषेधे प्राप्ते आह—परिनिविभ्य इति।

ऽपीति न्यासकारादयः। तत् भाष्यविरुद्धम्। गेवते। जिगेवे। जिग्लेवे। पिपेवे। मेवते। म्लेवते। शेवृ खेवृ क्लेवृ इत्यप्येके। ५०७ रेवृ प्लवगतौ। प्लवगतिः प्लुतगतिः। रेवते।

अथावस्यन्ताः परस्मैपदिनः। ५०८ मव्य बन्धने। ममव्य। ५०९ सुव्य ५१० ईव्य ५११ ईर्ष्य ईर्ष्यार्थाः। ५१२ हय गतौ। अहयीत्। यान्तत्वान्न वृद्धिः। ५१३ शुच्य अभिषवे। अवयवानां शिथिलीकरणं सुरायाः सन्धानं वा अभिषवः स्नानं च। शुशुच्य। चुच्य इत्येके। ५१४ हर्य गतिकान्त्योः। जहर्य। ५१५ अल भूषणपर्याप्तिवारणेषु। अलति। आल। २३३० **अतो लरान्तस्य** ७।२।२॥ लर-इति लुप्तषष्ठीकम्। अतः समीपौ यौ लरौ तदन्तस्याङ्गस्यातो वृद्धिः स्यात्परस्मैपदपरे सिचि। 'नेटि' (सू २२६८) इति निषेधस्य 'अतो हलादेः' (सू २२८४) इति विकल्पस्य चापवादः। मा भवानालीत्। अयं स्वरितेदित्येके। तन्मते अलते इत्याद्यपि। ५१६ ञिफला विशरणे। 'तृफल-' (सू २३०१) इत्येत्त्वम्। फेलतुः।

सिषेवे इति। आदेशसकारत्वात् षत्वमिति भावः। अयं सोपदेशोऽपीति। षेषुङ्यातुरित्यर्थः। तद्भाष्यविरुद्धमिति। 'सेक्सृप्सृस्तृसृजस्तृस्त्यानामेव भाष्ये षोपदेशपर्युदासादिति भावः। रेवृ प्लवगताविति। प्लवेति न धात्वन्तरमिति सूचयन्नाह—प्लवगतिः प्लुतगतिरिति। अयपयेत्यादिरेवस्यन्ता गताः।

अवस्यन्ता इति। 'अव रक्षणे' इत्येतत्पर्यन्ता इत्यर्थः। मव्येत्यारभ्य अल भूषणेत्यतः प्रा ॑यकारान्ताः। अल भूषणेत्यारभ्य 'खोरं प्रतीघात' इत्यतः प्राक् लकारान्ताः। अतो लरान्तस्य। 'सिचि वृद्धिः परस्मैपदेषु' इत्यनुवृत्तम्। अङ्गस्येत्यधिकृतम्। तद्विशेषणत्वात्तदन्तविधिनैव सिद्धे अन्तग्रहणं व्यर्थम्। तत्राह—लरेति लुप्तषष्ठीकमिति। लर अन्तस्य इति छेदः। ल् च रश्चेति समाहारद्वन्द्वात् षष्ठ्येकवचनं लुप्तम्। लरन्तस्येति सामानाधिकरण्येनान्वयः। 'अत' इति व्यधिकरणषष्ठ्यन्तम्, अन्तस्येत्यत्रान्वेति। अन्तशब्दः समीपवर्तिवाची। तथा च अतः समीपवर्तिनो लरन्तस्येति लभ्यते। लरन्तस्येत्यङ्गविशेषणत्वात्तदन्तविधिः। ततश्च अत्समीपवर्तिरेफलकारान्तस्य अङ्गस्य सिचि वृद्धिरिति लभ्यते। 'अत' इत्यावृत्तं वृद्धौ स्थानित्वेनान्वेति। तदाह—अतः समीपावित्यादिना। अतः समीप इति किम्। अखोरीत्। अमीलीत्। लरान्तस्येति किम्। मा भवानतीत्। अतो वृद्धिरित्युक्त्वा अतः समीपावित्यनुक्तौ तु अवश्रीत् अश्वक्षीदित्यत्रातिव्याप्तिः। अत्र अङ्गस्यान्तौ रेफलकारौ नातः समीपाविति न वृद्धिः। मचात्र अतः मकारेण लकारेण च व्यवहितत्वादेव न वृद्धिः। आलीदित्यादौ एकव्यवधाने चरितार्थत्वादिति वाच्यम्, सिचि परे यदङ्गं तदकारस्य वृद्धिरित्यर्थाश्रयणे अतिव्याप्तिवारणार्थत्वात्। ञिफलेति। विशरणं शिथिलीभावः। 'आदिर्ञिटुडवः' इति ञित्। 'ञीतः क्तः' इति प्रयोजनम्। 'आदितश्च' इति इण्निषेधार्थमादित्वम्।

फेलुः। अफालीत्। ५१७ मील ५१८ श्मील ५१९ ष्मील ५२० ष्मीञ् निमेषणे। निमेषणं सङ्कोचः। द्वितीयस्तालव्यादिः। तृतीयो दन्त्यादिः। ५२१ पील प्रतिष्टम्भे। प्रतिष्टम्भो रोधनम्। ५२२ णील वर्णे। निनील। ५२३ शील समाधौ। शीलति। ५२४ कील बन्धने। ५२५ कूल आवरणे। ५२६ शूल रुजायां संक्लेषे च। ५२७ तूल निष्कर्षे। निष्कर्षो निष्कोषणम्। तच्चान्तर्गतस्य बहिर्निस्सारणम्। तुतूल। ५२८ पूल संघाते। ५२९ मूल प्रतिष्ठायाम्। ५३० फल निष्पत्तौ। फेलतुः। फेलुः। ५३१ चुल्ल भावकरणे। भावकरणमभिप्रायाविष्कारः। ५३२ फुल्ल विकसने। ५३३ चिल्ल शैथिल्ये भावकरणे च। ५३४ तिल गतौ। तेलति। तिल्ल इत्येके। तिल्लति। ५३५ वेलृ ५३६ चेलृ ५३७ केलृ ५३८ खेलृ ५३९ क्वेलृ ५४० वेल्ल चलने। पञ्च ऋदितः। षष्ठो लोपधः। ५४१ पेलृ ५४२ फेल्ल ५४३ शेलृ गतौ। षेलृ इत्येके। ५४४ स्खल सञ्चलने। चस्खाल। अस्खालीत्। ५४५ खल सञ्चये। ५४६ गल अदने। गलति। अगालीत्। ५४७ षल गतौ। सलति। ५४८ दल विशरणे। ५४९ श्वल ५५० श्वल्ल आशुगमने। शश्वाल। अश्वालीत्। शश्वल्ल। अशश्वल्लीत्। ५५१ खोल ५५२ खोर्ङ् गतिप्रतिघाते। खोलति। खोरति। ५५३ घोर्ङ्गतिचातुर्ये। घोरति। ५५४ त्सर छद्मगतौ। तत्सार। अत्सारीत्। ५५५ क्मर हूर्छने। चक्मार। ५५६ अभ्र ५५७ वभ्र ५५८ मभ्र ५५९ चर गत्यर्थाः। चरतिर्भक्षणेऽपि। अभ्रति। आनभ्र। मा भवानभ्रीत्। अज्ञान्त्यरेफस्यातः समीपत्वाभावान्न वृद्धिः। ५६० ष्ठिवु निरसने। 'ष्ठिवुक्लमु-' (सू० २३२०) इति दीर्घः। ष्ठीवति। अस्य द्वितीयो वर्णस्थकारष्ठकारौ वेति वृत्तिः।

लिण्निमित्तादेशादित्वादप्राप्ते आह—तृफलेति। 'मील श्मीलेति'। **निमेषणं नेत्रसंकोचः। सङ्कोच इति पाठेऽप्ययमेवार्थः।** णील वर्ण इति। **वर्णक्रियायामित्यर्थः।** फल निष्पत्ताविति। **अि फलेति पूर्वं पठितम्। अनुबन्धभेदात्पुनः पाठः।** खोल खोर्ङ् इति। **द्वितीयो रेफान्तः। ऋदित्। इत आरभ्य ष्ठिवेः प्राक् रेफान्ताः।** घोर्ङ् गतिचातुर्य इति। **अश्वगतिविशेष इत्यर्थः। रेफान्तोऽयम्। ऋदित्।** त्सर छद्मगताविति। **कपटगतावित्यर्थः।** क्मर हूर्छन इति। **कुटिलीभवन इत्यर्थः।** ष्ठिवु निरसन इति। **इदुपधः। उदित्। इत आरभ्य ऊष्मान्तेभ्यः प्राक् वकारान्ताः। तिपि शपि लघूपधगुणे प्राप्ते आह**—'ष्ठिवुक्लम्विचमी'ति। **ल्युटि तु शित्परकत्वाभावात् दीर्घाभावे लघूपधगुणः। ष्ठीवनमिति तु पृषोदरादित्वात् समाधेयम्।** अस्येति। **ष्ठिवुधातोः द्वितीयो वर्णः थकार इत्यर्थः। कृतष्टुत्वस्य निर्देश इति भावः। षोपदेशोऽयम्, केवलस्यथकारपरकसादित्वात् षोपदेशत्वेऽपि न सत्वम्, 'सुष्वादातुष्ठिवु' इति निषेधात्। लिटि तु 'शर्पूर्वाः खयः' इति षकारवकारयोर्निवृत्त्या ष्टुत्वनिवृत्तौ रूपमाह**—तिष्ठेवेति।

तिष्ठेव। तिष्ठिवतुः। तिष्ठिवुः। टिष्ठेव। टिष्ठिवतुः। टष्ठिवुः। 'हलि च' (सू ३५४) इति दीर्घः। ष्ठीव्यात्। ५६१ जि जये। अयमजन्तेषु पठितुं युक्तः। जयः उत्कर्षप्राप्तिः। अकर्मकोऽयम्। जयति। २३३१ **सन्लिटोर्जेः ७।३।५७॥** जयतेः सन्लिङिनमित्तो योऽभ्यासस्ततः परस्य कुत्वं स्यात्। जिगाय। जिग्यतुः। जिग्युः। जिगयिथ। जिगेथ। जिगाय। जिगय। जिग्यिव। जिग्यिम। जेता। जीयात्। अजैषीत्। ५६२ जीव प्राणधारणे। जिजीव। ५६३ पीव ५६४ मीव ५६५ तीव ५६६ णीव स्थौल्ये। पिपीव। मिमीव। तितीव। निनीव। ५६७ ष्ठीवु ५६८ ष्ठेवु निरसने। ५६९ उर्वी ५७० तुर्वी ५७१ थुर्वी ५७२ दुर्वी ५७३ धुर्वी हिंसार्थाः। ऊर्वाञ्चकार। 'उपधायां च' (सू २२६५) इति दीर्घः। तुतूर्व। ५७४ गुर्वी उद्यमने। गूर्वति। जुगूर्व। ५७५ मुर्वी बन्धने। ५७६ पुर्व ५७७ पर्व ५७८ मर्व पूरणे। ५७९ चर्व अदने। ५८० भर्व हिंसायाम् ५८१ कर्व ५८२ खर्व ५८३ गर्व दर्पे। ५८४ अर्व ५८५ शर्व ५८६ षर्व हिंसायाम्। आनर्व। शर्वति। सर्वति। ५८७ इवि व्याप्तौ। इन्वति। इन्वाञ्चकार। ५८८ पिवि ५८९ मिवि ५९० णिवि सेचने। तृतीयो मूर्धन्योष्मादिरित्येके। सेवने इति तरङ्गिण्याम्। पिन्वति। पिषिन्व। ५९१ हिवि ५९२ दिवि ५९३ धिवि ५९४ जिवि प्रीणनार्थाः। हिन्वति। दिन्वति। २३३२ **धिन्विकृण्व्योरच ३।१।८०॥** अनयोरकारोऽन्तादेशः स्यादुप्रत्ययश्च शन्विषये।

ठकारस्य स्वाभाविकत्वे तु टिष्ठेवेति रूपम्। जि जय इति। **जिधातुरनिट्कः।** सन्लिटोर्जेः। **अभ्यासाच्च' इति सूत्रात्** अभ्यासादित्यनुवर्तते। **चजोः कुघिण्यतोः' इत्यस्मात् कु इति च। 'सन्लिटोरि'ति निमित्तसप्तमी, अभ्यासे अन्वेति। तदाह**—सन्लिङ्निमित्तो योऽभ्यास इत्यादि। **'सनि लिटि च अभ्यासात् परस्य कुत्व'मिति व्याख्याने तु यङ्लुगन्तात् सनि जेजयिषति इत्यत्र कुत्वं स्यात्। अतः 'सन्लिङ्निमित्तो योऽभ्यास' इति व्याख्येयमिति माधवः।** जिगायेति। **णलि द्वित्वे वृद्धौ उत्तरखण्डे जस्य कुत्वेन गः।** जिग्यतुरिति। **क्ङित्त्वादगुणाभावः। लिटि 'एकाच' इति इण्निषेधं बाधित्वा क्रादिनियमादिटि प्राप्ते, थलि 'अचस्तास्वत्' इति तन्निषेधस्य भारद्वाजनियमाङ्गीकरणः तदाह**—जिगयिथ जिगेथेति। **जिग्यथुः। जिग्य। णलुत्तमो वा' इति मत्वा आह**—जिगाय, जिगयेति। **क्रादिनियमादिटं मत्वा आह**—जिग्यिव जिग्यिमेति। जेतेति। **जेष्यति। जयतु। अजयत्। आशीर्लिङि 'अकृत्सार्वधातुकयोः इति दीर्घं मत्वा आह**—जीयादिति। **अजैषीदिति। सिचि वृद्धिरिति वृद्धिरिति भावः। अजेष्यत्। षर्वधातुः षोपदेशः। इवि धातोरिदित्त्वान्नुम्। तदाह**—इन्वतीति। इन्वाञ्चकारेति। **नुमि हजादिगुरुमत्त्वाद्वामिति भावः। पिविमिवीत्यादयः इदितः।** धिन्विकृण्व्योः। **'अ' इति लुप्तप्रथमाकम्। धिविकृण्व्योः कृतनुमोः धिन्विकृण्वेति निर्देशः। 'तनादिकृञ्भ्य उ' 'इत्यतः उरिति**

'अतो लोपः' (सू० २३०८) तस्य स्थानिवद्भावाल्लघूपधगुणो न । उप्रत्ययस्य पित्सु गुणः । धिनोति । धिनुतः । धिन्वन्ति । २३३३ **लोपश्चास्यान्यतरस्यां म्वोः** ६।४।१०७॥ असंयोगपूर्वो यः प्रत्ययोकारस्तदन्तस्याङ्गस्य लोपो वा स्यात् म्वोः परयोः । धिन्वः । धिनुवः । धिन्मः । धिनुमः । मिपि तु परत्वाद्गुणः । धिनोमि । २३३४ **उतश्च प्रत्ययादसंयोगपूर्वात्** ६।४।१०६॥ असंयोगपूर्वो यः प्रत्ययोकारस्तदन्तादङ्गात्परस्य हेर्लुक्स्यात् । धिनु । नित्यत्वादुकारलोपात्पूर्वमाट् । धिनवाव । धिनवाम । जिन्वतीत्यादि । ५९५ रिवि ५९६ रवि ५९७ धवि गत्यर्थाः ।

वकारादनुकृष्यते । 'कर्तरि शप्' इत्यतः कर्तरीति, 'सार्वधातुके यक्' इत्यतः सार्वधातुक इति च । तदाह—अनयोरित्यादिना । वकारस्याऽकारः धिन् अ ति इति स्थितम् । अतो लोप इति । युगपत्सन्नियोगशिष्टतया उप्रत्ययाऽकारयोर्विधानेऽपि श्रुतक्रमानुरोधेन प्रवृत्त्या आर्धधातुकोपदेशकाले 'धिन' इत्यस्यादन्तत्वमिति भावः । नन्वत्र वकारस्य लोप एव विधेयतां किमकारविधिनेत्यत आह—तस्येति । वकारस्य लोपविधौ तु अजादेशत्वाभावात् स्थानिवत्त्वं न स्यादिति भावः । तथा च धिनु ति इति स्थिते आह—उप्रत्ययस्येति । 'धिनुत इति । धिविधातोर्नुमि तसि उप्रत्यये वकारस्य अकारादेशे अतो लोपे तसो ङित्त्वादुकारस्य न गुणः । धिन्वतीति । धिन्व इत्यस्मात् झिः । झोऽन्तः । उप्रत्ययः । वकारस्य अकारः । अतो लोपः । उकारस्य यणिति भावः । अत्र वकारस्य स्थानिवत्त्वेन आर्धधातुकत्वेऽपि नेट् । उकारवृत्त्यार्धधातुकत्वस्य अलघुधर्मत्वेन अनल्विधाविति निषेधात् । तदिदं 'भोभगो' इति सूत्रभाष्ये स्पष्टम् । धिनोषि । धिनुथः । धिनुथ । धिनोमि । लोपश्च । 'उतश्च प्रत्ययादसंयोगपूर्वात्' इति पूर्वसूत्रोक्त उकारः अस्येत्यनेन परामृश्यते । प्रत्ययशब्दः प्रत्ययसम्बन्धिनि वर्तते । असंयोगपूर्वात् प्रत्ययादिति च उकारे अन्वेति । स च अङ्गस्य विशेषणम् । तदन्तविधिः । तदाह—असंयोगेति । प्रत्ययोकार इति । प्रत्ययसम्बन्धी उकार इत्यर्थः । 'प्रत्यय उकार' इति व्याख्याने तु सुनुवः । सुनुमः इत्यत्र न स्यात्, तत्र श्नोरेव प्रत्ययत्वात् । प्रत्ययेति किम् । युवः । युमः । असंयोगपूर्वादिति किम् । शक्नुवः । शक्नुमः । धिन्वः—धिनुव इति । अत्र उप्रत्ययस्य उकारान्तत्वं व्यपदेशिवत्त्वेन बोध्यम् । नन्वेवं धिनोमीत्यत्र मिपि धिनु मि इति स्थिते उकारस्य लोपः स्यादित्यत आह—मिपि त्विति । दिधिन्व । धिन्विता । धिन्विष्यति । धिनोतु । उतश्च । हेर्लुक्स्यादिति । 'चिणो लु'गित्यतः 'अतो हे'रित्यतश्च तदनुवृत्तेरिति भावः । लोटो मिपि उप्रत्यये वकारस्य अकारे अतो लोपे धिनु मि इति स्थिते मेर्निभावम् आडुत्तमस्येत्याडागमं च बाधित्वा परत्वादुकारस्य 'लोपश्चास्यान्यतरस्याम्' इति लोपमाशङ्क्याह—नित्यत्वादुकारलोपात् पूर्वमाडिति । निभावस्याप्युपलक्षणम् । उकारलोपे कृते अकृते च निभावस्य आडागमस्य च प्रवृत्त्या नित्यत्वादुकारलोपात्पूर्वमेव निभावाडागमयोः कृतयोः

रियवति। रण्वति। धन्वति। ५९८ कृवि हिंसाकरणयोश्च। चकाराद्गतौ। कृणोतीत्यादि धिनोतिवत्। अयं स्वादौ च। ५९९ मव बन्धने। मवति। मेवतुः। मेवुः। अमवीत्—अमावीत्। ६०० अव रक्षणगतिकान्तिप्रीतितृप्त्यवगमप्रवेशश्रवणस्वाम्यर्थयाचनक्रियेच्छादीप्त्यवाप्त्यालिङ्गनहिंसादानभागवृद्धिषु। अवति। आव। मा भवानवीत्। ६०१ धावु गतिशुद्ध्योः। स्वरितेत्। धावति—धावते। दधाव—दधावे। अथोष्मान्ता आत्मनेपदिनः। ६०२ धुक्ष ६०३ धिक्ष सन्दीपनक्लेशनजीवनेषु। धुक्षते। दुधुक्षे। धिक्षते। दिधिक्षे। ६०४ वृक्ष वरणे। वृक्षते। ववृक्षे। ६०५ शिक्ष विद्योपादाने। शिक्षते। ६०६ भिक्ष भिक्षायामलाभे लाभे च। भिक्षते। ६०७ क्लेश अव्यक्तायां वाचि। बाधने इति दुर्गः। क्लेशते। चिक्लेशे। ६०८ दक्ष वृद्धौ शीघ्रार्थे च। दक्षते। ददक्षे। ६०९ दीक्ष मौण्ड्येज्योपनयननियमव्रतादेशेषु। दीक्षते। दिदीक्षे। ६१० ईक्ष दर्शने। ईक्षाञ्चक्रे। ६११ ईष गतिहिंसादर्शनेषु। ईषाञ्चक्रे। ६१२ भाष व्यक्तायां वाचि। भाषते। ६१३ वर्ष स्नेहने। दन्त्योष्ठ्यादिः। ववर्षे। ६१४ गेषृ अन्विच्छायाम्। ग्लेषृ इत्येके। अन्विच्छा अन्वेषणम्। जिगेषे। ६१५ पेषृ प्रयत्ने। पेषते। ६१६ जेषृ ६१७ णेषृ ६१८ एषृ ६१९ ञेषृ गतौ। जेषते। नेषते। एषाञ्चक्रे। पिप्रेषे। ६२० रेषृ ६२१ हेषृ ६२२ ह्रेषृ अव्यक्ते शब्दे। आद्यो वृकशब्दे। ततो द्वौ अश्वशब्दे। रेषते। हेषते। ह्रेषते। ६२३ कासृ शब्दकुत्सायाम्। कासाञ्चक्रे। ६२४ भासृ दीप्तौ। बभासे। ६२५ णासृ ६२६ रासृ शब्दे। नासते। प्रणासते। ६२७ णस कौटिल्ये। नसते। ६२८ म्यस भये। म्यसते। बभ्यसे। ६२९ आङः शसि इच्छायाम्। आशंसते। आशशंसे। ६३० प्रसु ६३१

उकारलोपस्याप्रसक्तौ आटः पित्त्वेन ङित्त्वाभावादुकारस्य गुणे अवादेशे च धिनवानीति रूपमिति भावः। अधिनोत्। धिनुयात्। धिन्व्यात्। अधिन्वीत्। अधिन्विष्यत्। कृणोतीत्यादीति। धिविवद्भूपाणीति भावः। अय स्वादौ चेति। कृविरित्यर्थः। अव रक्षणेति। स्वाम्यर्थः-ऐश्वर्यम्। मा भवानवीदिति। 'नेटीति' न वृद्धिः। मव्यादयोऽवस्यन्ताः परस्मैपदिनो गताः। धावु गतीति। उदिदयम्। स्वरितेदिति। ततश्च कर्तृगामिनि फले आत्मनेपदम्। अन्यथा परस्मैपदमिति भावः। अथोष्मान्ता इति। तत्र 'धुक्षे' त्यारभ्य कासृधातोः प्राक् षकारान्ताः। तत्र क्लेशधातुरेकः शकारान्तः। दीक्ष मौण्ड्येति। पञ्चार्थाः। णेषृधातुर्णोपदेशः। कासृधातुमारभ्य ईहधातोः प्राक् सकारान्ताः। कासाञ्चक्र इति। कास्प्रत्ययादित्याम्। णासृधातुर्णसधातुश्च णोपदेशः। आङः शसीति। आङः परः शसिधातुरिच्छायामित्यर्थः। ईहेत्यारभ्य काशृधातुवर्जं घुषिकान्तीत्यतः प्राक् हकारान्ताः। काशृधातुस्तु शकारान्तः। क्लिहधातुरि-

ग्लसु अदने। जग्रसे। जग्लसे। ६३२ ईह चेष्टायाम्। ईहाञ्चक्रे। ६३३ वह ६३४ महि वृद्धौ। वंहते। ववंहे। मंहते। ६३५ अह गतौ। अंहते। आनंहे। ६३६ गर्ह ६३७ गल्ह कुत्सायाम्। जगर्हे। जगल्हे। ६३८ बर्ह ६३९ बल्ह प्राधान्ये। ओष्ठ्यादी। ६४० वर्ह ६४१ वल्ह परिभाषणहिंसाच्छादनेषु। दन्त्योष्ठ्यादी। केचित्तु पूर्वयोर्दन्त्योष्ठ्यादितामनयोरोष्ठ्यादितां चाहुः। ६४२ प्लिह गतौ। पिप्लिहे। ६४३ वेह्ट ६४४ जेह्ट ६४५ बाह्ट प्रयत्ने। आद्यौ दन्त्योष्ठ्यादिः। अन्त्यः केवलोष्ठ्यादिः। उभावप्योष्ठ्यादी इत्येके। दन्त्योष्ठ्यादी इत्यपरे। जेहतिर्गत्यर्थोऽपि। बबाहे। ६४६ ग्राह्ट निद्राक्षये। निग्रेपे इत्येके। ६४७ काश्ट दीप्तौ। चकाशे। ६४८ ऊह वितर्के। ऊहांचक्रे। ६४९ गाह्ट विलोडने। गाहते। जगाहे। जगाहिषे-जघाक्षे। जगाहिढ्वे। जगाहिध्वे। जघाढ्वे। गाहिता। २३३५ ढो ढे लोपः ८।३।१३॥ ढस्य लोपः स्यात् ढे परे। गाढा। गाहिष्यते-घाक्ष्यते। गाहिषीष्ट-घाक्षीष्ट। अगाहिष्ट-अगाढ। अघाक्षाताम्। अघाक्षत। अगाढाः। अघाढ्वम्। अघाक्षि।

दुपधः। ऊह वितर्के इति। युक्तस्य अर्थनिर्णयो वितर्कः। 'अनुक्तमप्यूहति पण्डितो जन' इत्यत्र तु अनुदात्तेत्त्वलक्षणात्मनेपदमनित्यमिति बोध्यम्। गाहूधातुरुदित्त्वाट्टेट्। तदाह—जगाहिषे जघाक्षे इति। इडभावे जगाह् से इति स्थिते झो ढः 'एकाच्' इति भष्भावेन गस्य घः, 'षढोः' इति ढस्य कः, सस्य षः। जगाहिढ्वे-जगाहिध्वे इति। इट्पक्षे 'विभाषेटः'। इति ढत्वविकल्पः। इडभावे त्वाह—जघाढ्व इति। जगाह् ध्वे इति स्थिते हस्य ढः, धस्य ष्टुत्वेन ढः, गस्य भष् घकारः, पूर्वस्य ढस्य 'ढो ढे लोपः' इति वक्ष्यमाणो लोपः। ढलोपसूत्रं त्विहैव पठितुं युक्तम्। गाहितेति। इट्पक्षे रूपम्। इडभावे तु गा ता इति स्थिते हस्य ढत्वे 'झषस्तथोर्धोऽधः' इति तकारस्य धत्वे, ष्टुत्वेन धस्य ढत्वे, गाढ् ढा इति स्थिते—ढो ढे। ढः इति षष्ठ्यन्तम्। तदाह—ढस्येति। ढकारस्येत्यर्थः। इति पूर्वस्य ढकारस्य लोपे 'गाढा' इति रूपम्। ढलोपे ष्टुत्वस्यासिद्धत्वं तु न, तथा सति ढलोपविधिवैयर्थ्यात्। घाक्ष्यते इति। इडभावे हस्य ढः, गस्य भष् घकारः, ढस्य कः, सस्य ष इति भावः। घाक्षीष्टेति। आशीर्लिङि सीयुटि इडभावपक्षे हस्य ढः, गस्य भष् घकारः, ढस्य कः सस्य ष इति भावः। अगाहिष्टेति। सिच इट्, सस्य षः, तकारस्य ष्टुत्वेन टः। इडभावे त्वाह—अगाढेति। अगाह् स् त इति स्थिते सिच इडभावे 'झलो झली'ति लोपः। ढत्वधत्वष्टुत्वढलोपाः। सलोपात्पूर्वं भष्भावस्तु न, भष्भावस्यासिद्धतया 'झलो झली'ति सलोपस्य पूर्वं प्रवृत्तेः। न च कृतेऽपि सलोपे प्रत्ययलक्षणेन सकारपरकत्वात् भष् दुर्वार इति शङ्क्यम्, 'वर्णाश्रये प्रत्ययलक्षणाभावा'दिति भावः। अघाक्षातामिति। इडभावपक्षे ढघकषाः। अघाक्षतेति। पूर्ववत्। अगाढा इति। थास् सिच्। इडभावे सलोपः। ढत्वधत्वष्टुत्वढलोपाः। अघाढ्वमिति। ध्वमि इडभावपक्षे सलोपः। ढत्वधत्वष्टुत्वढलोपाः।

६५० गृहू ग्रहणे। गर्हते। जगृहे। 'ऋदुपधेभ्यो लिटः कित्त्वं गुणात्पूर्वविप्रतिषेधेन' (वा ५९३) जगृहिषे-जघृक्षे। जघृढ्वे। गर्हिता-गर्दा। गर्हिष्यते-घर्क्ष्यते। गर्हिषीष्ट-घृक्षीष्ट। लुङि अगर्हिष्ट। इडभावे-२३३६ **शल इगुपधादनिटः क्सः** ३।१।४५॥ इगुपधो यः शलन्तस्तस्मादनिटः च्लेः क्सादेशः स्यात्। अघृक्षत। २३३७ **क्सस्याचि** ७।३।७२॥ अजादौ तङि क्सस्य लोपः स्यात्। 'अलोऽन्त्यस्य'। (सू ४२) अघृक्षाताम्। अघृक्षन्त। ६५१ ग्लह च। ग्लहते। ६५२ घुषि कान्तिकरणे। घुंषते। जुघुषे। केचित् घष इत्यदुपधं पठन्ति।

ध्वममाश्रित्य ढलोपात्पूर्वं भष्भावः। अघाढ्वमिति। इडभावे हस्य ढः, भष्भावः, ढस्य कः, सस्य षत्वमिति भावः। अघाक्ष्वहि। अघाक्ष्महि। अगाहिष्यत। अघाक्ष्यत। गृहूधातुः ऊदित् ऋदुपधः। गर्हते इति। लटस्तिपि शपि लघूपधगुणे रपरत्वम्। जगृहे इति। 'असंयोगा'दिति कित्त्वादृगुणाभावः। न च कित्त्वात् परत्वाद्गुणः शङ्क्यः, 'ऋदुपधेभ्यो लिटः कित्त्वं गुणात् पूर्वविप्रतिषेधेन' इति वार्तिकादिति भावः। ऊदित्त्वादिड्विकल्पं मत्वा आह—जगृढ्वे इति। अभ्यासे उदरत्वं, हलादिः शेषः, जश्त्वम्, झष्, षत्वम्। इडभावे तु ढत्वभष्भावकत्वषत्वानि। ध्वमि जगृहिध्वे इति सिद्धवत्कृत्य इडभावे आह—जघृढ्वे इति। हस्य ढः, भष्भावष्टुत्वढलोपाः। गर्ढेति। इडभावे गुणे रपरत्वे ढत्वधत्वष्टुत्वढलोपाः। घर्क्ष्यते इति। गुणः, रपरत्वं हस्य ढः, भष्भावः, ढस्य कः, षत्वम्। घृक्षीष्टेति। आशीर्लिङः सीयुटि इडभावे 'लिङ्सिचा'विति कित्त्वादृगुणाभावे, हस्य ढः, भष्भावः, ढस्य कः, षत्वम्। अगर्हिष्टेति। सिच इटि गुणे रपरत्वे षत्वे रूपम्। शल इगुपधा। शलन्त इति। 'धातोरेकाचः' इत्यतोऽनुवृत्तधातुविशेषणत्वात्तदन्तविधिरिति भावः। सिचोऽपवादः। क्सादेशः अदन्तः। ककार इत्। अघृक्षतेति। च्लेः क्सः। तस्य कित्त्वादकारस्य न गुणः। हस्य ढः, भष्भावः, ढस्य कः, षत्वमिति भावः। अघृक्ष आताम् इति स्थिते 'आतो ङितः' इति इयादेशे प्राप्ते—क्सस्य। अचीत्यस्याऽङ्क्ङिति प्रत्ययविशेषणत्वात् तदादिविधिः। 'घोर्लोपो लेटि वा' इत्यतः लोप इत्यनुवर्तते। तदाह—अजादाविति। अलोऽन्त्यस्येति। अन्त्यस्याऽकारस्य लोप इति भावः। वस्तुतस्तु 'लुग्वा दुह-दिह' इत्युत्तरसूत्रादात्मनेपदे इत्यपकृष्य तद्विशेषणत्वादचीति तदादिविधिः। तेन दृशेः क्सप्रत्यये 'तादृङ्क्षः' इत्यादौ नायं लोपः। 'अजादौ तङीत्येव क्वचित्पाठो दृश्यते। अघृक्षाताम्मिति। अघृक्ष आताम् इति स्थिते क्सकारस्य लोपे अतः परत्वाभावात् 'आतो ङितः' इति इय् नेति भावः। अघृक्षन्तेति। झस्य अजादित्वाभावात्तस्मिन्परे क्सस्य अकारलोपाऽभावादतः परत्वात् 'आत्मनेपदेष्वनतः' इत्यदादेशो न। कृते तु झोऽन्तादेशे क्सस्याकारलोपः पररूपं वा। ग्लह चेति। ग्लह धातुरपि ग्रहणे वर्तत इत्यर्थः। अदुपधोऽयम्। घुषि कान्तीति। उदुपधोऽयम्। इदित्त्वान्नुम्। 'नश्चे'त्यनु-

अथार्हत्यन्ताः परस्मैपदिनः। ६५३ घुषिर् अविशब्दने। विशब्दनं प्रतिज्ञानम्, ततोऽन्यस्मिन्नर्थ इत्येके। शब्दे इत्यन्ये पेठुः। घोषति। जुघोष। घोषिता। इरित्त्वादङ्वा। अघुषत्-अघोषीत्। ६५४ अक्ष व्याप्तौ। २३२८ अक्षोऽन्यतरस्याम् ३।१।७५॥ अक्षो वा श्नुप्रत्ययः स्यात्कर्त्रर्थे सार्वधातुके परे। पक्षे शप्। अक्ष्णोति। अक्ष्णुतः। अक्ष्णुवन्ति। अक्षति। अक्षतः। अक्षन्ति। आनक्ष। आनक्षिथ-आनष्ठ। अक्षिता-अष्टा। अक्षिष्यति। 'स्कोः' (सू ३८०) इति कलोपः। 'षढोः कः सि' (सू २६५) अक्ष्यति। अक्ष्णोतु। अक्ष्णुहि। अक्ष्णवानि। आक्ष्णोत्। आक्ष्णवम्। अक्ष्णुयात्। अक्ष्णुयुः। अक्ष्यात्। ऊदित्त्वाद्वेट्। 'नेटि'

स्वारः। यत्परकत्वाभावान्न परसवर्णः। तदाह—घुषत इति। सेट्कोऽयम्। अदुपधपक्षे तु घषते। जघषे। ऊष्मान्ता आत्मनेपदिनो गताः।

अथार्हत्यन्ताः परस्मैपदिन इति। 'ऊष्मान्ता' इति शेषः। तत्र तुस हसेत्यतः प्राक् वान्ताः। घुषिरिति। इर् इत्। प्रतिज्ञानमिति। 'वेदाः प्रमाण' मित्याद्यभ्युपगम इत्यर्थः। ततोऽन्यस्मिन्निति। विशब्दनात् अन्यत् अविशब्दनं तस्मिन्नित्यर्थः। इरित्त्वादङ् वेति। 'इरितो वे'त्यनेनेति शेषः। अघुषदिति। अङो ङित्त्वान्न लघूपधगुणः। अघोषीदिति। अङभावपक्षे लघूपधगुणे 'इट ईटि' इति सिज्लोपः। हलन्तलक्षणवृद्धेः 'नेटि' इति निषेधः। अक्षूधातुः ऊदित्त्वाट्टेट्कः। अक्षोऽन्यतरस्याम्। 'अक्ष' इति पञ्चमी। 'स्वादिभ्यः श्नु'रित्यतः श्नुरिति, 'कर्तरि शबि'त्यतः कर्तरीति, 'सार्वधातुके यगि'त्यतः सार्वधातुक इति चानुवर्तते। तदाह—अक्षो वेति। श्नुप्रत्ययस्य शित्त्वं सार्वधातुकत्वार्थम्। तत्फलं तु 'स्वादिभ्यः श्नुः' इत्यत्र वक्ष्यते। अक्ष्णोतीति। तिपि श्नुः तस्य तिपः पित्त्वेन ङित्त्वाऽभावात् 'सार्वधातुके'ति गुणः। णत्वम्। अक्ष्णुत इति। तसः अपित्त्वेन ङित्त्वात् श्नोर्न गुणः। अक्ष्णुवन्तीति। ङित्त्वाद् गुणाऽभावे उवङ्। अक्ष्णोषि। अक्ष्णुथः। अक्ष्णुथ। अक्ष्णोमि। अक्ष्णुवः। अक्ष्णुमः। अक्षतीति। शप्पक्षे रूपम्। आनक्षेति। णलि द्विर्हलित्त्वान्नुट्। आनक्षतुः। आनक्षुः। ऊदित्त्वादिट्पक्षे आह-आनक्षिथेति। इडभावे आह-आनष्ठेति। आनक्ष् थ इति स्थिते 'स्को'रिति कलोपः। थस्य ष्टुत्वेन ठः। अष्टेति। लुटि तासि इडभावपक्षे 'स्को' रिति कलोपे तकारस्य ष्टुत्वेन टः। अक्ष्यतीति स्थिते प्रक्रियां दर्शयति—स्कोरिति कलोपः, षढोः कः सीति। कारपरत्वात् सस्य षत्वं च। अक्ष्णोत्विति। अक्ष्णोतु। अक्ष्णुतात्। अक्ष्णुताम्। अक्ष्णुवन्तु। अक्ष्णुहीति। संयोगपूर्वत्वादुतश्चेति हेलुक् न। हेरपित्त्वेन ङित्त्वात् श्नोर्न गुणः। अक्ष्णुतात्। अक्ष्णुतम्। अक्ष्णुत। अक्ष्णवानीति। आटः पित्त्वेन ङित्त्वाऽभावाच्च गुणनिषेधः। गुणे अवादेशः। अक्ष्णवाव। अक्ष्णवाम। शपि तु अ त्वित्यादि। आक्ष्णोदिति। लङस्तिप् श्नोर्गुणः आट् वृद्धिः। आक्ष्णुताम्। आक्ष्णुवन्। आक्ष्णोः। आक्ष्णुतम्। आक्ष्णुत। आक्ष्णवमिति। मिपः अम्। श्नोर्गुणः। अवादेशः।

(सू २२६८) मा भवानक्षीत्। अक्षिष्टाम्। अक्षिषुः। इडभावे तु मा भवानाक्षीत्। आष्टाम्। आक्षुः। ६५५ तक्ष ६५६ त्वक्षू तनूकरणे। २३३६ तनूकरणे तक्षः ३।१।७६॥ श्नुः स्याद्वा शब्विषये। तक्षणोति-तक्षति वा काष्ठम्। तत्क्षिथ-ततष्ठ। अतक्षीत्। अतक्षिष्टाम्। अताक्षीत्। अताष्टाम्। तनूकरणे किम्। वाग्भिः सन्तक्षति। भर्त्सयतीत्यर्थः। ६५७ उक्ष सेचने। उक्षाञ्चकार। ६५८ रक्ष पालने। ६५९ णिक्ष चुम्बने। प्रणिक्षति। ६६० त्रक्ष ६६१ टृक्ष ६६२ णक्ष गतौ।

आक्षणुव। आक्षणुम। अक्षणुयादिति। विधिलिङि यासुटो ङित्त्वात् श्नोर्न गुणः। अक्षणुयुरिति। 'लिङः सलोपः' इति सलोपे 'उस्यपदान्तात्' इति परूपमिति भावः। अक्षणुयाः। अक्षणुयातम्। अक्षणुयात। अक्षणुयाम्। अक्षणुयाव। अक्षणुयाम। शप्पक्षे अक्षेदित्यादि। अक्ष्यादिति। आर्शीलिङि आर्धधातुकत्वाच्च श्नुः, नापि शप्। लुङि सिचि विशेषमाह—ऋदित्त्वाद्वेडिति। तत्र इट्पक्षे आह—नेटीति। हलन्तलक्षणा वृद्धिर्नेत्यर्थः। नच अभैत्सीदित्यादावेकेन हला व्यवधाने हलन्तलक्षणवृद्धेश्चरितार्थत्वादत्र न तत्प्रसक्तिरिति शङ्क्यम्, रञ्जेः अराङ्क्षीदित्यत्र वृद्धिसिद्धये अनेकाल्व्यवधानेऽपि हलन्तलक्षणवृद्धिप्रवृत्तेर्भाष्यादौ प्रपञ्चितत्वादिति भावः। मा भवानक्षीदिति। आटि सति हलन्तलक्षणवृद्धौ सत्यामसत्यां च रूपे भेदाभावात् 'मा भवान्' इत्युपात्तम्। अक्षिष्टाम्। अक्षिषुरिति। अत्रापि 'मा' इति सम्बध्यते। इडभावे त्विति। लुङस्तिपि अक्ष्स्-ईदिति स्थिते इडभावान्नेटीति निषेधाऽप्रसक्त्या हलन्तलक्षणवृद्धौ 'स्कोः' इति कलोपे 'षढोः' इति कत्वे षत्वमिति भावः। अत्र 'नेटि' इति निषेधाभावेन हलन्तलक्षणवृद्धिर्निर्बाधेति स्पष्टयितुमेव 'मा भवान्' इत्यत्राप्युपात्तमिति बोध्यम्। आष्टामिति। अक्ष्स्ताम् इति स्थिते हलन्तलक्षणवृद्धौ 'झलो झली'ति सिज्लोपे 'स्को'रिति कलोपे तकारस्य ष्टुत्वम्। आक्षुरिति। अक्ष्स्उस् इति स्थिते हलन्तलक्षणवृद्धौ 'स्को'रिति कलोपे षस्य कत्वे सस्य षत्वमिति भावः। आक्षीः। आष्टम्। आष्ट। आक्षम्। आक्ष्व। आक्ष्म। आक्षिष्यत्। आक्ष्यत्। आक्ष्यताम्। आक्ष्यन्। आक्ष्यः। आक्ष्यतम्। आक्ष्यत। आक्ष्यम्। आक्ष्याव। आक्ष्याम। तक्षूत्वक्षू इति। स्थूलस्य काष्ठादेः कतिपयावयवापनयनेन सूक्ष्मीकरणं तनूकरणम्। तनूकरणे। शेषपूरणेन सूत्रं व्याचष्टे—श्नुः स्याद्वा शप्विषये इति। 'स्वादिभ्यः श्नुरि'त्यतः श्नुरिति, 'कर्तरि शबि'त्यतः कर्तरीति, सार्वधातुके यगित्यतः सार्वधातुक इति चानुवर्तते। तनूकरणेऽर्थे विद्यमानात् तक्षधातोः श्नुः स्यात्कर्त्रर्थे सार्वधातुके इति फलितम्। न च तक्षूधातोस्तनूकरणार्थकत्वाऽभ्युपगमात् श्नुविधौ तनूकरणग्रहणं व्यर्थमिति वाच्यम्, अत एव धातुपाठे अर्थनिर्देशस्य उपलक्षणत्वावगमात्। तक्षणोतीत्यादि। अक्षूवद्रूपाणि। लुङि सिचि इट्पक्षे 'नेटी'ति वृद्धिनिषेधे अतक्षीदिति, इडभावे तु अताक्षीदिति च रूपम् अक्षूवत्। एवं त्वक्षूधातुरपि। णिक्षधातुर्णोपदेशः। प्रणिक्षतीति। 'उपसर्गादस-

त्रक्षति। स्रक्षति। नक्षति। ६६३ वक्ष रोषे। संघाते इत्येके। ६६४ मृक्ष संघाते। म्रक्ष इत्येके। ६६५ तक्ष त्वचने। त्वचनं संवरणं त्वचो ग्रहणं च। पक्ष परिग्रहे इत्येके। ६६६ सूर्क्ष आदरे। सुसूर्क्ष। अनादरे इति तु क्वाचित्कोऽपपाठः। 'अवज्ञावहेलनमसूर्क्षणम्' इत्यमरः। ६६७ काक्षि ६६८ वाञ्छि ६६९ माङ्क्षि काङ्क्षायाम्। ६७० द्राक्षि ६७१ ध्राक्षि ६७२ ध्वाक्षि घोरवाशिते च। ६७३ चूष पाने। चुचूषः। ६७४ तूष तुष्टौ। ६७५ पूष वृद्धौ। ६७६ मूष स्तेये। ६७७ लूष ६७८ रूष भूषायाम्। ६७९ शूष प्रसवे। प्रसवोऽभ्यनुज्ञानम्। तालव्योष्मादिः। ६८० यूष हिंसायाम्। ६८१ जूष च। ६८२ भूष अलङ्कारे। भूषति। ६८३ ऊष रुजायाम्। ऊषाञ्चकार। ६८४ ईष उञ्छे। ६८५ कष ६८६ खष ६८७ शिष ६८८ जष ६८९ झष ६९० शष ६९१ वष ६९२ मष ६९३ रुष ६९४ रिष हिंसार्थाः। तृतीयषष्ठौ तालव्योष्मादी। सप्तमो दन्त्योष्ठ्यादिः। चकाष। चखाष। शिशेष। शिशेषिथ। शेष्टा। कसः अशिक्षत्। अशेक्षत। जेषतुः। जक्षषतुः। शेषतुः। ववषतुः। मेषतुः। २३४० **तोषसहलुभरुषरिषः** ७।२।४८॥ इच्छत्र्यादेः परस्य ता-

---

मासेऽपि' इति णत्वम्। त्रक्ष क्रूरत्व णत्व गताविति। त्रयोऽप्यकारमध्याः द्वितीयः षोपदेशः। तदाह—स्रक्षतीति। षस्य सत्वे ष्टुत्वनिवृत्तिरिति भावः। णक्षधातुर्णोपदेशः। सिचि 'नेटी'ति हलन्तलक्षणवृद्धिनिषेधः। वक्ष रोषे इति। दन्त्योष्ठ्यादिः। त्रयधातुरकारमध्यः। त्वचनशब्दस्य विवरणं—संवरणमिति। सूर्क्षधातुः रेफमध्यः अपपाठस्त्वे हेतुमाह—अवज्ञेति। सूर्क्षधातोरनादरार्थकत्वे ऊसूर्क्षणमित्यस्य आदरार्थकत्वापत्त्या अमरकोशे अवज्ञापर्यायत्वावगमविरोध इति भावः। घोरवाशिते चेति। चात् काङ्क्षायामपि। घोरवाशितं क्रूरशब्दः। चूषेत्यारभ्य ऊष रुजायामिति यावदूदुपधाः। ईष उञ्छ इति। ईदुपधः। कषेत्यारभ्य दश धातवः। तत्र तृतीयो दशमश्च इदुपधः। शिषधातुरनिट्कः। क्रादिनियमात्थलि वसि मसि च नित्यमिट्, अजन्ताकारवत्त्वाऽभावेन थलि वेट्कत्वाभावात्। शिशेषिथ। शिशिषिव। शिशिषिम। अशिक्षदिति। 'शल इगुपधात्' इति क्लेः क्सादेशे कित्त्वाल्लघूपधगुणनिषेधे षस्य कत्वे सस्य षत्वमिति भावः। ववषतुरिति। 'न शसदद' इति निषेधादेत्त्वाभ्यासलोपौ न। रुषधातुः सेट्कः। रोषति। रुरोष। रुरुषतुः। रुरुषुः। रुरोषिथ। रुरुषथुः। रुरुष। रुरोष। रुरुषिव। रुरुषिम। तीषसह। आर्धधातुकस्येत्यतः इडित्यनुवर्तते। 'स्वरतिसूति' इत्यतो वेति च। तीति सप्तम्युपादानात्तदादिविधिः। इष सह लुभ रुष रिष एषां द्वन्द्वात्पञ्चम्येकवचनम्। तदाह—इच्छत्यादेरिति। इषेच्छतीति इषेः क्षितपा निर्देशः। इषधातुर्विवक्षितः। 'इषु इच्छायां' तुदादिः शविकरणः। 'इष गतौ' दिवादिः श्यन्विकरणः। 'इष आभीक्ष्ण्ये' क्र्यादिः श्नाविकरणः। तत्र 'इषेस्तकारे श्यन्प्रत्ययात्प्रतिषेधः' इति वार्ति-

देरार्धधातुकस्येड्वा स्यात्। रोषिता-रोष्टा। रोषिष्यति। रेषिता-रेष्टा। रेषिष्यति। ६९५ भष भर्त्सने। इह भर्त्सनं शब्दः। भषति। बभाष। ६९६ उष। दाहे। ओषति। २३४१ उषविदजागृभ्योऽन्यतरस्याम् ३।१।३८॥ एभ्यो लिट्यामा स्यात्। ओषाञ्चकार। उवोष। ऊषतुः। उवोषिथ। ६९७ जिषु ६९८ विषु ६९९ मिषु सेचने। जिजेष। क्रादिनियमादिट्। विवेषिथ। विविषिव। वेष्टा। वेक्ष्यति। अविक्षत्। ७०० पुष पुष्टौ। पोषति। पोषिता। पोषिष्यति। अपोषीत्। अनिट्केषु पुष्य इति श्यना निर्देशादयं सेट् अतो न क्सः। अङ्विधौ दैवादिकस्य ग्रहणान्नाङ्। ७०१ श्रिषु ७०२ श्लिषु ७०३ प्लुषु ७०४ प्लुषु दाहे। श्रेषति। शिश्रेष। श्रेषिता। श्लेषति। शिश्लेष। श्लेषिता। अयमपि सेट्। 'अनिट्सु दैवादिकस्यैव ग्रहणम्' इति कैयटादयः। यत्त्वनिट्कारिकान्यासे द्वयोर्ग्रहणमित्युक्तं तत्स्वोक्तिविरोधाद् ग्रन्थान्तरविरोधाच्चोपेक्ष्यम्। पुप्रोष। पुप्लोष। ७०५ पृषु ७०६ वृषु ७०७ मृषु सेचने। मृषु सहने च। इतरौ हिंसासंक्लेशनयोश्च। पर्षति। पपर्ष। पृक्षात्। ७०८ घृषु सङ्घर्षे। ७०९ हृषु अलीके। ७१० तुस ७११ हस ७१२ हस ७१३ रस शब्दे। तुतोस। जहास। जहास। रास।

कात् श्यन्विकरणस्य न ग्रहणम्। रोषिता, रोष्टेति। हडभावे ष्टुत्वेन तकारस्य टकारः। रिषेस्तादाविड्विकल्पं मत्वा आह—रेषितेति रेष्टेति। उष दाह इति। सेट्कोऽयम्। उखधातुवत् रूपाणि। उषविद। कास्प्रत्ययादित्यतः आम् लिटीत्यनुवर्तते, तदाह—एभ्यो लिटीति। आमभावपक्षे आह—उवोषेति। 'अभ्यासस्याऽसवर्णे' इति उवङादेशः। जिषु विषु मिषु सेचन इति। द्वितीयो दन्त्योष्ठ्यादिः। थलि वसि मसि च विशेषमाह—क्रादिनियमादिडिति। विवेषिथेति। अजन्ताकारवत्त्वाऽभावेन भारद्वाजनियमाऽप्रवृत्तेस्तस्यापि क्रादिनियमाश्रित्यमिट्। वेष्टेति। तासि ष्टुत्वेन तकारस्य टः। वेक्ष्यतीति। 'षढो'रिति षस्य कः, सस्य षः। अविक्षदिति। 'शल इगुपधात्' इति क्सः, षस्य कः, सस्य षः, कित्त्वान्न गुणः। पुषभातुः सेडिति मत्वा आह—पोषितेति। अपोषीदिति। 'नेटो'ति वृद्धिनिषेधः। नन्वनिटसु पुषेः पाठात् कथं सेट्कत्वमित्यत आह—अनिट्केष्विति। अत इति। सेटकत्वात् क्सो नेत्यर्थः। ननु पुषादित्वलक्षणः अङ्कृतो नेत्यत आह—अङ्विधाविति। एतच्चानुपदमेव पुषादिसूत्रव्याख्यावसरे स्पष्टीभविष्यति। अयमपीति। पुषभातुवत् श्लिषधातुरपि भौवादिकः सेडित्यर्थः। कैयटादय इति। 'श्लिष आलिङ्गने' इति सूत्रे कैयटहरदत्तादिभिस्तथा प्रपञ्चितत्वादिति भावः। द्वयोर्ग्रहणमिति। भौवादिकदैवादिकयोरित्यर्थः। स्वोक्तीति। 'श्लिष आलिङ्गने' इति सूत्रे दैवादिकश्लिषेरनिट्केषु ग्रहणमिति न्यासकृता कैयटादिभिरुक्तत्वादिति भावः। पृषु वृषु इत्यारभ्य हृषुपर्यन्ता ऋदुपधाः। अलीकं मिथ्याभवनं मिथ्योक्तिर्वा। तुस हसेत्या-

७१४ लस श्लेषणक्रीडनयोः । ७१५ घस्लृ अदने । अयं न सार्वत्रिकः । 'लिट्यन्यतरस्याम्' (सू २४२४) इत्यदेर्घस्लादेशविधानात् । ततश्च यत्र लिङ्गं वचनं वास्ति तत्रैवास्य प्रयोगः । अत्रैव पाठः शपि परस्मैपदे लिङ्गम् । लृदित्करणमङि । अनिट्कारिकासु पाठो वलाद्यार्धधातुके । क्मरचि तु विशिष्योपादानम् । घसति । घस्ता । २३४२ सः स्याद्धधातुके ७।४।४९॥ सस्य तः स्यात्सादावार्धधातुके । घत्स्यति । घसतु । अघसत् । घसेत् । लिङ्गाद्यभावादाशिष्यस्याप्रयोगः । २३४३ पुषादिद्युताद्यृलृदितः परस्मैपदेषु३।१।५५॥ श्यन्विकरणपुषादेर्द्युतादेर्लृदितश्च परस्य च्लेरङ् स्यात्परस्मैपदेषु । अघसत् । ७१६ जर्ज ७१७ चर्च ७१८ झर्झ

रम्य णश गतावित्यतः प्राक् सकारान्ताः । घस्लृधातुरनिट्कः । अयमिति । घस्लृ धातुः सर्वेषु न प्रयोज्य इत्यर्थः । कुत इत्यत आह—लिटीति । यद्ययं सार्वत्रिकः स्यात् तदा लिट्यपि प्रयुज्येत । ततश्च 'अद भक्षणे' इति धातोर्लिट्यन्यतरस्यामिति घस्लृभावविधिर्व्यर्थः स्यादिति भावः । असार्वत्रिकत्वे सति क्व प्रयोगः क्व नेत्यत आह—ततश्चेति । यत्र घस्लृधातोः प्रयोगे ज्ञापकं प्रत्यक्षवचनं वास्ति तत्रैवास्य प्रयोग इत्यर्थः । तत्र तावल्लिङ्गं दर्शयति—अत्रैवेति । भ्वादिगणे अत्रैव क्रमे अस्य पाठः शपि परस्मैपदे प्रयोगे लिङ्गमित्यर्थः । नच धातुसञ्ज्ञार्थः पाठ इति वाच्यम्, द्युत दीप्तावित्यतः प्राक् पाठेनैव सिद्धे अत्र क्रमे तत्पाठवैयर्थ्यादिति भावः । लृदित्करणमङीति । 'प्रयोगे लिङ्गमिति शेषः । अनिट्कारिकास्विति । अनुदात्तोपदेशेषु घस्लृधातोः पाठः वलाद्यार्धधातुके प्रयोगे लिङ्गमित्यर्थः । अथ क्वचिदस्य प्रयोगे प्रत्यक्षवचनं दर्शयति—क्मरचीति । 'सुघस्यदः क्मरच्' इत्यत्र विशिष्य घसेरुपादानं क्मरचि प्रयोगे प्रमाणमित्यर्थः । घसतीति । लटि तसाद्युपलक्षणमिदम् । लिटि अस्य प्रयोगाऽभावाल्लुट्युदाहरति—घस्तेति । सः सि । सः इति च्छेदः । सः इति षष्ठ्यन्तम् । सि इति सप्तम्यन्तम् आर्धधातुकविशेषणम् । तदादिविधिः । 'अच उपसर्गात्तः' इत्यतः तः इत्यनुवर्तते । अकार उच्चारणार्थः । तदाह—सस्य तः स्यादिति । आदेशे अकारस्य उच्चारणार्थत्वात्तकारः स्यादित्यर्थः । लुङि च्लेः सिचि प्राप्ते—पुषादि । 'च्लेः सिच्' इत्यतः च्लेरिति 'अस्यतिवक्तिख्यातिभ्यः' इत्यतः अङिति चानुवर्तते । पुषादि द्युतादि लृदित् एषां समाहारद्वन्द्वात्पञ्चमी । तत्र पुषधातुस्तु भ्वादौ क्र्यादौ चुरादौ दिवादौ चास्ति । तत्र यदि भौवादिकः पुषादिगणो गृह्येत, तर्हि द्युतादिग्रहणमनर्थकं स्यात्, पुषादिगणोत्तरमेवात्र द्युतादिगणपाठात् । नापि क्र्यादयन्तर्गणाः । तत्र हि 'मुष स्तेये' 'ष्वच भूतप्रादुर्भावे 'हेठ च' 'ग्रह उपादाने' इति चत्वार एव पठ्यन्ते । यदि त एवात्र पुषादयो विवक्षिताः स्युःतर्हि लाघवात् लृदित एव ते क्रियेरन् । नाप्यत्र चौरादिकः पुषादिर्गृह्यते, णिचा च्लेर्व्यवहितत्वात् । अतः परिशेषात् दिवादय एव गृह्यन्ते ।

परिभाषणहिंसातर्जनेषु । ७१९ पिसृ ७२० पेसृ गतौ । पिपिसतुः । पिपेसतुः । ७२१ हसे हसने। एदित्त्वान्न वृद्धिः। अहसीत् ।७२२ णिश समाधौ । तालव्योष्मान्तः । प्रणेशति । ७२३ मिश ७२४ मश शब्दे रोषकृते च । तालव्योष्मान्तौ । ७२५ शव गतौ । दन्त्योष्ठ्यान्तस्तालव्योष्मादिः । शवति । अशवीत्—अशावीत् । ७२६ शश प्लुतगतौ । तालव्योष्माद्यन्तः । शशाश । शेशतुः । शेशुः । शेशिथ । ७२७ शसु हिंसायाम् । दन्त्योष्मान्तः । 'न शसदद-'(सू २२२२) इत्येत्त्वं न । शशसतुः । शशसुः । शशसिथ । ७२८ शंसु स्तुतौ । अयं दुर्गतावपीति दुर्गः । 'नृशंसो घातुकः क्रूरः' इत्यमरः । शशंस । आशिषि नलोपः । शस्यात् । ७२९ चह परिकल्कने । कल्कनं शाठ्यम् । अचहीत् । ७३० मह पूजायाम् । अमहीत् । ७११ रह त्यागे । ७१२ रहि गतौ । रंहति । रंह्यात् । ७३३ दह ७३४ दहि ७३५ बृह ७३६ बृहि वृद्धौ । दर्हति । ददर्ह । ददर्हतुः । दंहति । बर्हति । बृंहति । बृहि शब्दे च । 'बृंहितं करिगर्जितम्' इत्यमरः । बृहिर् इत्येके । अबृहत् । अबर्हीत् । ७३७ तुहिर् ७३८ दुहिर् ७३९ उहिर् अर्दने । तोहति । तुतोह । अतुहत्-अतोहीत् । दोहति । दुदोह । अदुहत्-अदोहीत् । अनिट्कारिकास्वस्य दुहेर्ग्रहणं नेच्छन्ति । ओहति । उवोह । ऊहतुः । ओहिता । मा भवानुहत् । आहीत् । ७४० अर्ह पूजायाम् । आनर्ह ।

अथ कृपूपर्यन्ता अनुदात्तेतः । ७४१ द्युत दीप्तौ । द्योतते । **२३५४ द्युतिस्वाप्योः सम्प्रसारणम् ७।४।६७ ॥** अनयोरभ्यासस्य सम्प्रसारणं स्यात् ।

तदाह-इयन्विकरणेति । जर्ज चर्च झर्झेति । एतेषां चवर्गीयान्तेष्वेव पाठ उचितः । हसे हसन इति । एदिदयम् । न वृद्धिरिति । 'ह्रयन्ते'त्यनेनेति शेषः । णिश समाधाविति । णोपदेशत्वादुपसर्गादसमासेऽपीति नस्य णत्वम् । तदाह—प्रणेशतीति । 'शसु हिंसायाम्' इत्यतः प्राक् शकारान्ताः । शवतिस्तु वान्तः । शंस्विति । नोपधः, कृतानुस्वारस्य निर्देशः । 'चह परिकल्कने' इत्यारभ्य अर्हतिपर्यन्ता हकारान्ताः । रह त्यागे इति । नायमिदित् । रहि गताविति । अयमिदित् । दृह दृढीति । ऋदुपधा एते । द्वितीयचतुर्थाविदितौ । अबृहत् । अबर्हीदिति । इरित्त्वादङ्विकल्प इति भावः । उवोहेति । उहिधालोर्लिटि द्वित्वे हलादिशेषे पुगन्तलक्षणे गुणे 'अभ्यासस्यासवर्णे' इत्युवङ् । मा भवानुहदिति । इरित्त्वादङि रूपम् । औहीदिति । अङभावपक्षे च्लेः सिचि तस्य इटि 'अस्तिसिचः' इति तकारस्य ईटि 'इट ईटि' इति सिचो लोपे 'आडजादीनाम्' इति आडि वृद्धिः । माङ्योगे तु मा भवानुहीत् । आनर्हेति । 'अत आदेः' इति दीर्घे नुट् ।

कृपूपर्यन्ता अनुदात्तेत इति । द्युतेत्यारभ्य कृपूपर्यन्ता इत्यर्थः । द्युतिस्वाप्योः । अभ्या-

दिद्युते । दिद्युताते । द्योतिता । २३४५ द्युद्भ्यो लुङि ।१।३।९१॥ द्युतादिभ्यो लुङः परस्मैपदं वा स्यात् । पुषादिसूत्रेण परस्मैपदे अङ् । अद्युतत्-अद्योतिष्ट । ७४२ श्वितृ वर्णे । श्वेतते । शिश्विते । अश्वितत् । अश्वेतिष्ट । ७४३ ञिमिदा स्नेहने । मेदते । २३४६ मिदेर्गुणः ७।३।८१॥ मिदेरिको गुणः स्यादिदित्संज्ञकशकारादौ । एशः आदिशित्वाभावान्नानेन गुणः । मिमिदे । अमिदत् । अमेदिष्ट । ७४४ ञिष्विदा स्नेहनमोचनयोः । मोहनयोः इत्येके । स्वेदते । सिष्विदे । अस्विदत्-अस्वेदिष्ट । ञिक्ष्विदा च इत्येके । अक्ष्विदत्—अक्ष्वेदिष्ट । ७४५ रुच दीप्तावभिप्रीतौ च । रोचते सूर्यः । हरये रोचते भक्तिः । अरुचत् । अरोचिष्ट । ७४६ घुट परिवर्तने । घोटते । जुघुटे । अघुटत्-अघोटिष्ट । ७४७ ख्रट ७४८ लुट ७४९ लुठ प्रतिघाते । अरुटत्—अरोटिष्ट । ७५० शुभ दीप्तौ । ७५१ क्षुभ सञ्चलने । ७५२

सस्येति । 'अत्र लोपोऽभ्यासस्य' इत्यतः तदनुवृत्तेरिति भावः । दिद्युते इति । द्वित्वे हलादिः शेषः इत्यनेन यकारस्य लोपे प्राप्ते तदपवादत्वेन 'द्युतिस्वाप्योः' इति सम्प्रसारणे 'सम्प्रसारणाच्च' इति उकारस्य पूर्वरूपे रूपम् । द्युद्भ्यो लुङि। बहुवचनात् द्युतादिभ्य इति गम्यते । दिव्योगे पञ्चमी । 'तस्मादित्युत्तरस्य' इति परिभाषया परस्येति लभ्यते । 'शेषात्कर्तरि, इत्यतः परस्मैपदमित्यनुवर्तते । तदाह—द्युतादिभ्य इति । परस्मैपदे अङिति । आत्मनेपदपक्षे सिजेव नत्वङ्, पुषादिसूत्रे परस्मैपदग्रहणादिति भावः । तदाह–अद्योतिष्टेति । श्वितृ वर्णे इति । श्वेतवर्णकरणे श्वेतीभवने वेत्यर्थः । अश्वितदिति । द्युतादित्वादङ् । अश्वेतिष्टेति । आत्मनेपदपक्षे रूपम् । एवमग्रेऽपि द्युतादौ लुङि रूपभेदो ज्ञेयः । ञिमिदा स्नेहने इति । ञिरित् 'जीतः क्तः' इत्येतदर्थः । 'मिमिदे' इत्यत्र ङिटः 'असंयोगा'दिति कित्त्वेऽपि गुणं शङ्कितुमाह—मिदेर्गुणः । 'मिदे'रित्यवयवषष्ठी। गुणश्रुत्या 'इको गुणवृद्धी' इति परिभाषया इक इत्युपतिष्ठते 'ष्ठिवुक्लमुचमां शिति' इत्यतः शितीत्यनुवर्तते । शू चासाविच्चेति कर्मधारयः । तेन च अधिकृताऽङ्गाश्रितः प्रत्ययो विशेष्यते । तदादिविधिः । इदित्संज्ञकशकारादौ प्रत्यये परे इति लभ्यते । तदाह—मिदेरित्यादिना । देवादिकमिदेः श्यनि ममेद्यते इत्याद्युदाहरणम् । शू इत् यस्येति बहुव्रीहिमाश्रित्य शिति प्रत्यये परे मिदेरिको गुण इत्येव कुतो न व्याख्यायत इत्याशङ्क्य मिमिदे इत्यत्र गुणाऽभावार्थमित्संज्ञकशकारादाविति व्याख्येयमित्यभिप्रेत्याह—एशः आदिशित्वाभावादिति । ञिष्विदेति ।; षोपदेशोऽयम् । अनिट्सु स्विद्येति श्यन्विकरणस्यैव ग्रहणादयं सेट् । रुच दीप्तावभिप्रीतौ चेति । अभिप्रीतिः प्रीतिविषयोभवनम् । दीप्तौ उदाहरति—रोचते सूर्य इति । प्रकाशत इत्यर्थः । अभिप्रीतौ उदाहरति—हरये रोचते भक्तिरिति । भक्तिः हर्याश्रितप्रीतिविषयो भवतीत्यर्थः । 'हर्यर्थानाम्' इति सम्प्रदानत्वाच्चतुर्थी । क्षुभ सञ्चलने इति । क्षोभते ।

णभ ७५३ तुभ हिंसायाम्। आद्योऽभावे च। 'नभन्तामन्यके समे'। 'मा भूवन्न-न्यके सर्वे' इति निरुक्तम्। अनभत्—अनभिष्ट। अतुभत्—अतोभिष्ट। इमौ दि-वादी क्रयादी च। ७५४ स्रंसु ७५५ ध्वंसु ७५६ भ्रंसु अवस्रंसने। ध्वंसु गतौ च। अङि नलोपः। अस्रसत्—अस्रंसिष्ट। 'नास्रसत्करिणां ग्रैवम्' इति रघुवंशे। भ्रंशु इत्यपि केचित्पेठुः। अत्र तृतीय एव तालव्यान्त इत्यन्ये। भ्रशु भ्रंशु अधःपतने इति दिवादौ। ७५७ स्रम्भु विश्वासे। अस्रभत—अस्रम्भिष्ट। दन्त्यादिरयम्। तालव्यादिस्तु प्रमादे गतः। ७५८ वृतु वर्तने। वर्तते। ववृते। २३४७ वृ-द्भ्यः स्यसनोः ६।३।६२॥ वृतादिभ्यः परस्मैपदं वा स्यात्स्ये सनि च। २३४८ न वृद्भ्यश्च भ्यः ७।२।५६॥एभ्यः सकारादेरार्धधातुकस्येण्न स्यात्तङानयो-रभावे। वर्त्स्यति—वर्तिष्यते। अवृतत्—अवर्तिष्ट। अवर्त्स्यत्—अवर्तिष्यत। ७५९

क्षुभ्यतीति दिवादौ। क्षुम्नातीति क्रयादौ। णभधातुः णोपदेशः। नभते। आद्योऽभावे चेति। चात्संचलनेऽपि। तत्र अभावार्थकस्य प्रयोगं दर्शयति—नभन्तामन्यके समे इति। मन्त्रोऽयम्। नन्वत्र मन्त्रे णभेर्हिंसार्थकत्वमेव कुतो न स्यादित्यत आह—मा भूवन्न-न्यके सर्वे इति। 'नभन्ता'मित्यस्य विवरणं—मा, भूवन्निति। न भवन्तीत्यर्थः। समे इत्यस्य विवरणं—सर्वे इति। निरुक्तमिति। वेदव्याख्यानात्मको यास्कप्रणीतो ग्रन्थ-विशेषो निरुक्तम्। स्रंसु ध्वंसु भ्रंसु इति। त्रयो नोपधाः कृतानुस्वारनिर्देशाः। ध्वंसु गतौ चेति। चादवस्रंसनेऽपि। अस्रसदिति। वृतादित्वात्परस्मैपदे अङि नलोप इति भावः। नास्रसदिति। नास्रंसदित्यपपाठः। नचाऽस्रसदिति रूपमिति भ्रमितव्यम्। तत्र परस्मैपदासम्भवात्। स्रम्भुधातुरकारमध्यः। वृतु वर्तने इति। उदित् ऋदुपधः सेट्-कः। वर्तते इति। शपि गुणे रपरत्वम्। ववृते इति। 'असंयोगा'दिति कित्त्वाद् गुणा-भावे द्वित्वे उरदत्त्वे रपरत्वे हलादिशेषे रूपम्। लुटि वर्तिता। वृद्भ्यः। बहुवचना-द्वृतादिभ्य इति गम्यते 'शेषात्कर्तरी'त्यतः परस्मैपदमित्यनुवर्तते, 'वा क्यषः' इ-त्यतो वेति च। तदाह—वृतादिभ्य इति। न वृद्भ्यः। 'सेऽसिची'ति सूत्रात् से इति, आर्द्धधातुकस्येडिति चानुवर्तते। तदाह—एभ्यः सकारादेरिति। तङानयोरभावे इति। 'गमेरि'डित्यतः परस्मैपदेष्वित्यनुवृत्तम्। तेन च तङानयोरभावो लक्ष्यते, व्याख्या-नादिति भावः। तेन 'जिगमिषिता' इत्यत्र गमेः सन्नन्तात् तृचि इट् सिध्यति, वृतेः सन्नन्तात् हेर्लुकि विवृत्स इत्यत्र इण्निषेधश्च सिध्यति। वर्त्स्यतीति। लृटि स्यः। 'वृद्भ्यः स्यसनोः' इति परस्मैपदविकल्पः। 'न वृद्भ्यः' इति इण्निषेधः। गुणः। रप-रत्वम्। परस्मैपदाऽभावे त्वाह—वर्तिष्यते इति। 'तङानयोरभावे' इत्युक्तेः 'न वृद्भ्यः' इति इण्निषेधो न। अवर्तिष्टेति। परस्मैपदस्य अङश्चाऽभावे रूपम्। अवर्त्स्यदिति। लृङि स्यः। 'वृद्भ्यः स्यसनोः' इति परस्मैपदम्। 'न वृद्भ्यः' इति इण्निषेधः, गुणः,

वृधु वृद्धौ । ७६० शृधु शब्दकुत्सायाम् । इमौ वृतुवत् । ७६१ स्यन्दू प्रस्रवणे । स्यन्दते । सस्यन्दे । सस्यन्दिषे-सस्यन्त्से । सस्यन्दिध्वे । स्यन्दिता—स्यन्ता । 'वृद्भ्यः स्यसनोः' (सू २३४७) इति परस्मैपदे कृते ऊदित्त्वलक्षणमन्तरङ्गमपि विकल्पं बाधित्वा चतुर्ग्रहणसामर्थ्यात् 'न वृद्भ्यः—' इतिनिषेधः । स्यन्त्स्यति—स्यन्दिष्यते--स्यन्त्स्यते । स्यन्दिषीष्ट--स्यन्त्सीष्ट । 'युद्भ्यो लुङि' (सू २३४५) इति परस्मैपदपक्षे अङ् । नलोपः । अस्यदत्-अस्यन्दिष्ट--अस्यन्त । अस्यन्त्साताम् ।

रपरत्वमिति भावः । अवर्तिष्यतेति । परस्मैपदस्याऽभावे 'न वृद्भ्यः' इति इण्निषेधोऽपि नेति भावः । वृधु शृधु इति द्वौ ऋदुपधौ । तत्रापि 'युद्भ्यो लुङि' इति परस्मैपदपक्षे द्युतादिलक्षणः अङ् । लृट्लुटोः 'वृद्भ्यः स्यसनोः' इति परस्मैपदपक्षे 'न वृद्भ्यः' इति इण्निषेधश्च । तदाह-स्मौ वृतुवदिति । वर्त्स्यति वर्धिष्यते । अवृधत्-अवर्धिष्ट । अवत्स्यत् । अवर्धिष्यत । शत्स्यति-शर्धिष्यते । अशृधत्—अशर्धिष्ट । अशत्स्यत्-अशर्धिष्यत । स्यन्दूधातुः ऊदित् नकारोपधः कृतानुस्वारपरसवर्णनिर्देशः । सस्यन्दिषे सस्यन्त्से इति । इडभावे दस्य चर्त्वेन तः । सस्यन्दिद्ध्वे सस्यन्द्ध्वे इति । इडभावे धकारात् प्राक् दकारः । खपरकत्वाभावान्न चर्त्वम् । स्यन्दिता स्यन्तेति । इडभावे दस्य चर्त्वम् । ननु लृटि स्ये सति 'वृद्भ्यः स्यसनोः' इति परस्मैपदपक्षे परत्वादूदित्त्वलक्षणमिड्विकल्पं बाधित्वा 'न वृद्भ्यश्चतुर्भ्यः' इति इण्निषेधे 'स्यन्त्स्यती'त्येव रूपमिष्यते, नतु स्यन्दिष्यति इति । तदयुक्तम् अन्तरङ्गतया ऊदित्त्वलक्षणस्यैव इड्विकल्पस्य उचितत्वात् सकारादिविशेषापेक्षतया तङानाभावनिमित्तापेक्षतया च न वृद्भ्य' इति निषेधस्य बहिरङ्गत्वादित्याशङ्क्य निराकरोति-वृद्भ्य इति । 'वृद्भ्यः स्यसनोः' इति परस्मैपदे कृते अन्तरङ्गमपि विकल्पं बाधित्वा 'न वृद्भ्यः' इति निषेध इत्यन्वयः । कुत इत्यत आह-चतुर्ग्रहणसामर्थ्यादिति । यदि ह्यत्र ऊदित्त्वलक्षण इड्विकल्प एव स्यात् नतु 'न वृद्भ्यश्चतुर्भ्यः' इति निषेधः, तर्हि 'चतुर्भ्यः' इति व्यर्थं स्यात् । न च कृपूव्याप्तिस्तत्फलमिति शङ्क्यम्, 'तासि च क्लृपः' इति चकारेण सकारादार्धधातुकेऽपि नित्यमिण्निषेधप्रवृत्तेर्वक्ष्यमाणत्वात् । तथा च चतुर्ग्रहणं चतुर्णामपि सर्वत्र इण्निषेधार्थमिति भावः । भाष्ये तु 'निषेधाश्च बलीयांसः' इति न्यायेन अन्तरङ्गस्यापि ऊदित्त्वलक्षणेड्विकल्पस्य 'न वृद्भ्यः' इति निषेधेन बाधसिद्धेश्चतुर्ग्रहणं प्रत्याख्यातम् । तथा च लृटि परस्मैपदपक्षे ऊदित्त्वलक्षणमिड्विकल्पं बाधित्वा 'न वृद्भ्यः' इति नित्यमिण्निषेधे स्यन्त्स्यतीत्येकमेव रूपमिति स्थितम् । आत्मनेपदपक्षे तु ऊदित्त्वादिड्विकल्पं मत्वा आह—स्यन्दिष्यते स्यन्त्स्यते इति । इडभावे दस्य चर्त्वम् । आशीर्लिङि सीयुटि ऊदित्त्वादिड्विकल्पं मत्वा आह-स्यन्दिषीष्ट स्यन्त्सीष्टेति । 'न वृद्भ्यः' इति निषेधस्तु न, तङानयोरभाव एव तत्प्रवृत्तेरिति भावः । लुङि विशेषमाह-युद्भ्यो लुङीत्यादिना । अङिति । 'द्युतादिलक्षण' इति शेषः । नलोप इति । 'अनिदितां'मित्यनेनेति शेषः । आत्मनेपदपक्षे तु अङभावादूदि-

अस्यन्तसत। अस्यन्तस्यत्—अस्यन्दिष्यत-अस्यन्तस्यत। २३४९ **अनुविपर्यभिनिभ्यः स्यन्देरप्राणिषु ८।३।७८॥** एभ्यः परस्याप्राणिकर्तृकस्य स्यन्देः सस्य षो वा स्यात्। अनुष्यन्दते-अनुस्यन्दते वा जलम्। अप्राणिषु किम्। अनुस्यन्दते हस्ती। अप्राणिषु इति पर्युदासात् मस्योदके अनुष्यन्देते इत्यत्रापि पक्षे षत्वं भवत्येव। प्राणिषु न इत्युक्तौ तु न स्यात्। ७६२ कृपू सामर्थ्ये। २३५० **कृपो रो लः ८।२।१८॥** कृप उः रः लः इति च्छेदः। कृप इति लुप्तषष्ठीकम्। तच्चावर्तते। कृपो यो रेफस्तस्य लः स्यात्। कृपेर्ऋकारस्यावयवो यो रेफसदृश-

---

सलक्षणामड्विकल्पं मत्वा आह—अस्यन्दिष्ट अस्यन्त्तेति। तत्र हडभावपक्षे अस्यन्द् स् त इति स्थिते 'झलो झलि' इति सलोपे दस्य चत्वम्। नचाऽपित्त्वेन ङित्त्वात् 'अनिदिताम्' इति नलोपः शङ्क्यः, सिज्लोपस्याऽसिद्धत्वेनाऽनुपधात्वादिति भावः। अस्यन्त्सातान् अस्यन्त्सतेति। अस्यन्त्थाः। अस्यन्त्साथाम्। अस्यन्द्ध्वम्। अस्यन्त्सि। अस्यन्त्स्वहि। अस्यन्त्स्महि। अस्यन्तस्यत्-अस्यन्तस्यत-अस्यन्दिष्यत। अनुविपर्यभिनि। एभ्य इति। अनु वि परि अभि नि इत्येतेभ्य इत्यर्थः। सस्येति। 'सहेः साडः सः' इत्यतः स इति षष्ठ्यन्तस्यानुवृत्तेरिति भावः। षो वा स्यादिति। 'अपदान्तस्य मूर्धन्यः' इत्यधिकारादिति भावः। ननु 'मास्योदके अनुष्यन्देते' इत्यत्र कथं षत्वं प्राणिकर्तृकत्वस्यापि सत्वादित्यत आह—अप्राणिष्विति पर्युदासादिति। 'प्राणिकर्तृकस्य नेति न प्रतिषेधः, येनात्र प्राणिकर्तृकत्वस्यापि सत्वात् षत्वं न स्यात्। किन्तु प्राणिभिन्नकर्तृकस्येति पर्युदास आश्रीयते। एवञ्च प्राण्यप्राणिकर्तृकस्यापि अप्राणिकर्तृकत्वाऽनपायादिह षत्वं निर्बाधमिति भावः। कृपू सामर्थ्ये इति। सामर्थ्यं कार्यक्षमीभवनम्। ऊदित्त्वाट्टेट्कोऽयम्। ऋदुपधः। तङि प्रथमपुरुषैकवचनस्य टेरेत्त्वे शपि लघूपधगुणे रपरत्वे कर्पते इति स्थिते-कृपो रो लः। 'कृप' इति लुप्तविभक्तिकम्। षष्ठ्येकवचने उः इति ऋकारस्य रूपम्। अवयवषष्ठी। कृप उरिति स्थिते आदृगुणे कृपोरिति भवति। र इति षष्ठ्यन्तम्। कृपोर् रः इति स्थिते 'रो रि' इति रेफलोपे 'कृपो रः' इति भवति। 'लः' इति प्रथमान्तम्। अकारः उच्चारणार्थः। तदाह—कृपः उः रः लः इति च्छेद इति। एतच्च ऋलृक्सूत्रभाष्ये स्थितम्। ननु कृपेस्यत्र का विभक्तिर्लुप्तेत्यत आह—कृप इति लुप्तषष्ठीकमिति। पकारादकार उच्चारणार्थः। कृप्धातोरिति लभ्यते। तच्चावर्तते इति। कृप रः लः इति पदत्रयमावर्तत इत्यर्थः। तथाच वाक्यद्वयं सम्पद्यते-'कृप रः लः' इत्येकं वाक्यम्। तदाह-कृपो यो रेफस्तस्य लः स्यादिति। तथाच 'कल्पते' इति भवति। 'कृप उः रः लः' इति द्वितीयं वाक्यम्। तत्र कृपेस्यवयवषष्ठ्यन्तम् उरित्यन्वेति। उरित्यवयवषष्ठ्यन्तं रेफे अन्वेति। तथा च कृप्धातोरवयवः यः ऋकारः तस्य यो रेफः तस्य लकारः स्यादिति लभ्यते। तत्र ऋकारावयवत्वं रेफस्य न सम्भवतीति रेफशब्दो रेफसदृशे ऋकारांशे लाक्षणिकः। ल इत्यपि लकारसदृशे लृ-

स्तस्य च लकारसदृशः स्यात् । कल्पते । चक्लृपे । चक्लृपिषे-चक्लृप्से । इत्यादि स्यन्दिवत् ।२३५१ लुटि च क्लृपः १।३।९३॥ लुटि स्यसनोश्च क्लृपेः परस्मैपदं वा स्यात् । २३५२ तासि च क्लृपः ७।२।६०॥ क्लृपेः परस्य तासेः सकारादेरार्धधातुकस्य चेएन स्यात्तङानयोरभावे । कल्तासि । कल्तास्यः । कल्पितासे-कल्तासे । कल्प्स्यति-कल्पिष्यते-कल्प्स्यते । कल्पिषीष्ट-क्लृप्सीष्ट । अक्लृपत्-अकल्पिष्ट—अक्लृप्त । अकल्प्स्यत् । अकल्पिष्यत—अकल्प्स्यत । वृत् । वृत्तः सम्पूर्णो द्युतादिर्वृतादिश्चेत्यर्थः ।

कारांशे लाक्षणिकः । तदाह-कृपेर्ऋकारस्यावयव इत्यादिना । एवं च लिटि चकृप् ए इति स्थिते कित्त्वाद्गुणाऽभावे ऋकारैकदेशस्य रेफसदृशस्य लकारसदृशे सति 'चक्लृपे' इति रूपम् । कृपः रः लः इति च्छेदमभ्युपगम्य कृपधातोः रेफस्य लकार इति व्याख्याने तु 'चक्लृपे' इति न सिध्येत् । तदर्थमावृत्तिराश्रितेत्यभिप्रेत्याह-कल्पते चक्लृपे इति । ऊदित्त्वादिड्विकल्पं मत्वा आह-चक्लृपिषे चक्लृप्से इति । स्यन्दिवदिति । चक्लृप्राथे । चक्लृपिध्वे-चक्लृप्ध्वे । चक्लृपे । चक्लृपिवहे-चक्लृप्वहे । चक्लृपिमहे-चक्लृप्महे । लुटि च क्लृपः । चकारात् वृदृभ्यः स्यसनोः इत्यतः स्यसनोरित्यनुकृष्यते । 'शेषात्कर्तरि' इत्यतः परस्मैपदमिति । 'वा क्यषः' इत्यतो वेति च । तदाह—लुटि स्यसनोरित्यादिना । तासि च । चकारात्सकाराद्यार्द्धधातुकं गृह्यते । 'सेऽसिचि कृत' इत्यतः से इति 'आर्द्धधातुकस्य' इत्यतः आर्द्धधातुकस्येति चानुवर्तते । 'न वृदृभ्यश्चतुर्भ्यः' इत्यतो नेति च । 'गमेरिडित्यतः परस्मैपदमिति च । तदाह-क्लृपेः परस्येत्यादिना । कल्तासीति । 'लुटि च क्लृपः' इति परस्मैपदपक्षे ऊदित्त्वलक्षणमिड्विकल्पं बाधित्वा 'तासि च क्लृपः' इति इण्निषेधे गुणे रपरत्वे लत्वे रूपम् । वरस्मैपदाऽभावपक्षे तु ऊदित्त्वलक्षणमिड्विकल्पं मत्वा आह-कल्पितासे कल्तासे इति । लृटि तु 'लुटि च क्लृपः' इति परस्मैपदपक्षे ऊदित्त्वलक्षणमिड्विकल्पं बाधित्वा 'तासि च क्लृपः' इति इण्निषेधं मत्वा आह—कल्प्स्यतीति । परस्मैपदाऽभावे तु ऊदित्त्वादिड्विकल्पं मत्वा आह-कल्पिष्यते कल्प्स्यत इति । कल्पताम् । अकल्पत । कल्पेत । आशीर्लिङि ऊदित्त्वलक्षणमिड्विकल्पं मत्वा आह—कल्पिषीष्टेति, क्लृप्सीष्टेति च । इडभावे 'लिङ्सिचावात्मनेपदेषु' इति कित्त्वान्न गुणः । अक्लृपदिति । 'वृदृभ्यो लुङि' इति परस्मैपदपक्षे द्युतादित्वलक्षणे अङि सति ङित्त्वान्न गुणः । अङभावे तु ऊदित्त्वलक्षणमिड्विकल्पं मत्वा आह-अकल्पिष्टेति, अक्लृप्तेति । अकल्प्स्यदिति । लृङि स्ये 'लुटि च क्लृपः' इति परस्मैपदपक्षे तु ऊदित्त्वलक्षणमिड्विकल्पं मत्वा आह-अकल्पिष्यत अकल्प्स्यतेति । वृदिति । धृतेः समाप्त्यर्थकात् कर्तरि क्विप् । तदाह-वृत्त इति । 'गत्यर्थाकर्मक' इति कर्तरि क्तः । वृत्तशब्दस्य विवरणं-सम्पूर्ण इति । द्युतादयः कृपूपर्यन्ता अनुदात्तेतो गताः ।

अथ त्वरत्यन्तास्त्रयोदशानुदात्तेतः षितश्च । ७६३ घट चेष्टायाम् । घटते । जघटे । 'घटादयो मितः' इति वक्ष्यमाणेन मित्संज्ञा । तत्फलं तु णौ 'मितां ह्रस्वः' (सू २५६८) इति 'चिण्णमुलोर्दीर्घोऽन्यतरस्याम्' (सू २७६२) इति च वक्ष्यते । घटयति । विघटयति । कथं तर्हि 'कमलवनोद्घाटनं कुर्वते ये' 'प्रविघाटयिता समुत्पतन् हरिदश्वः कमलाकरानिव' इत्यादि । शृणु । घट सङ्घाते इति चौरादिकस्येदम् । न च तस्यैवार्थविशेषे मित्त्वार्थमनुवादोऽयमिति वाच्यम् । 'नान्ये

अथ त्वरत्यन्ता इति । 'ञि त्वरा सम्भ्रमे' इत्यन्ता इत्यर्थः । षितश्चेति । षित्संज्ञका इत्यर्थः । षित्कार्यभाज इति वा । 'ञि त्वरा सम्भ्रमे' इत्युक्त्वा 'घटादयः षितः' इति वक्ष्यमाणत्वादिति भावः । षित्फलं तु स्त्रियामित्यधिकारे 'षिद्भिदादिभ्यः' इत्यङ् । घटा व्यथा इत्यादि रूपम् । घटते इति । चेष्टते इत्यर्थः । तत्फलं त्विति । मित्त्वफलं तु 'मितां ह्रस्वः' इति णौ ह्रस्वः, 'चिण्णमुलोर्दीर्घः' इति दीर्घश्च वक्ष्यते । 'धातुपाठे अर्थनिर्देशः उपलक्षण'मित्युक्तम् । ततश्चार्थान्तरवृत्तेरपि घटधातोर्घटादिकार्यं भवत्येव । तदाह—घटयति विघटयतीति । संश्लेषयति विश्लेषयतीत्यर्थः । णौ ह्रस्वोदाहरणमिदम् । अघटि अघाटीति चिण्युदाहरणम् । घाटंघाटम्, घटंघटमिति ण्यन्ताण्णमुलि दीर्घविकल्पस्योदाहरणम् । 'नित्यवीप्सयोः' इति द्विर्वचनम् । ननु यद्यर्थान्तरवृत्तेरपि घटधातोर्मित्त्वं, तदा 'उद्घाटनं' 'प्रविघाटयिते'त्यत्र विकसनार्थकस्यापि घटधातोर्णौ मित्त्वाद्ध्रस्वः स्यादित्याक्षिपति—कथं तर्हीति । शृणुवति । 'समाधान'मिति शेषः । चौरादिकस्येति । चुरादौ 'घट सङ्घाते' इति पठितम् । तदिदं घाटादिकान्न घटधातोर्धात्वन्तरमेव । तस्य णौ मित्त्वाभावात् ह्रस्वाभावे 'उद्घाटनं' 'प्रविघाटयिते'ति निर्बाधमेव, अर्थनिर्देशस्योपलक्षणतया सङ्घातादन्यत्र विकासनेऽपि चौरादिकस्य वृत्तिसम्भवादिति भावः । ननु घटादिगणादन्यत्र अर्थान्तरे पठितानां धातूनामिह घटादिगणे पाठः घटादिगणनिर्दिष्ट एवार्थे मित्त्वार्थोऽनुवाद एव, नतु धातुभेदः । अन्यथा घाटादिकत्वं गणान्तरस्थत्वं चादाय मित्त्वतदभावयोर्विकल्पापत्तेः । ये तु धातवो घटादिगण एव पठिताः नतु गणान्तरे, तेषां त्वर्थान्तरवृत्तावपि मित्त्वमिति धातुवृत्त्यादिग्रन्थेषु सिद्धान्तः । घटधातुस्तु 'घट सङ्घाते' इति चुरादौ पठितः । अतस्तस्यैवात्र गणे चेष्टायामर्थे मित्त्वार्थोऽनुवाद इति लब्धम् । एवं च 'विघटयति' इत्यादावर्थान्तरवृत्तौ ण्यन्तस्य कथं मित्त्वमित्याशङ्क्य निराकरोति—नचेति । तस्यैव—चौरादिकस्यैव, घटधातोः चेष्टात्मके अर्थविशेषे वृत्तौ मित्त्वार्थोऽनुवादः स्यादिति न वाच्यमित्यर्थः । कुत इत्यत आह—नान्ये मितोऽहेताविति । चुरादन्तर्गणसूत्रमिदम् । तत्र हि 'ज्ञप मिच्च' 'यम च परिवेषणे' 'चह परिकल्कने' 'रह त्यागे' 'बल प्राणने' 'चिञ् चयने' इति पञ्च धातून् पठित्वा 'नान्ये मितोऽहेतौ' इति पठितम् । तत्र 'चह परिकल्कने' इत्यस्य स्थाने 'चपे'ति केचित् पठन्ति । तथाच पञ्चत्वस्य न विरोधः । एषु पञ्चस्वपि मिदित्यनुवर्तते । 'अ-

मितोऽहेतौ' इति निषेधात्। अहेतौ स्वार्थे णिचि ज्ञपादिपञ्चकव्यतिरिक्ताः चुरादयो मितो नेत्यर्थः। ७६४ व्यथ भयसञ्चलनयोः। व्यथते। **२३५३ व्यथो लिटि ७।४।६८॥** व्यथोऽभ्यासस्य सम्प्रसारणं स्याल्लिटि। हलादिशेषापवादः। थस्य हलादिशेषेण निवृत्तिः। विव्यथे। ७६५ प्रथ प्रख्याने। पप्रथे। ७६६ प्रस विस्तारे। पप्रसे। ७६७ म्रद मर्दने। ७६८ स्खद स्खदने। स्खदनं विद्रावणम्। ७६९ क्षजि गतिदानयोः। मित्त्वसामर्थ्यादनुपधात्त्वेऽपि 'चिण्णमुलोः—'(सू २७६२) इति दीर्घविकल्पः। अक्षक्षि—अक्षाक्षि। क्षक्षंक्षक्षम्। क्षाक्षंक्षाक्षम्। ७७० दक्ष-गतिहिंसनयोः। योऽयं वृद्धिशैघ्र्ययोरनुदात्तेत्सु पठितस्तस्यैहार्थविशेषे मित्त्वार्थोऽनुवादः। ७७१ क्रप कृपायां गतौ। ७७२ कृद ७७३ क्रदि ७७४ क्लदि वैक्लव्ये।

हेता'विति च्छेदः। कस्मादन्ये इत्यपेक्षायां संनिहितत्वात् ज्ञपादिपञ्चभ्य इति लभ्यते। हेतुशब्देन 'हेतुमति च' इति सूत्रविहितो णिच् लभ्यते। तद्भिन्नो णिच् स्वार्थिकः अहेतुः। तदाह-अहेतौ स्वार्थे णिचीति। ज्ञपः आदिर्येषामिति अतदगुणसंविज्ञानो बहुव्रीहिः। ज्ञपधातोस्तदुत्तरेभ्यश्च पञ्चभ्य इत्येवं षड्भ्योऽन्ये ये चुरादयः ते मितो नेति फलितम्। एवं च चुरादौ ज्ञपादिपञ्चकव्यतिरिक्तानां मित्त्वाभावात् 'घट चेष्टायाम्' इति निर्देशश्चौरादिकस्य 'घट सङ्घाते' इत्यस्य चेष्टायां वृत्तौ मित्त्वार्थोऽनुवाद इति न युज्यते। किन्तु हृदैव घटादिगणे 'घट चेष्टायाम्' इत्यपूर्वोऽयं धातुः। तस्य चार्थान्तरवृत्तावपि मित्त्वमस्त्येवेति 'विघटयती'त्यादौ मित्त्वाद्ध्रस्वो निर्बाध इति भावः। व्यथधातुर्द्वितीयान्तः। व्यथो लिटि। **'अत्र लोपः'** इत्यतः अभ्यासस्येति **'श्रुतिस्वाप्यो'रित्यतः सम्प्रसारणमिति चानुवर्तते। तदाह**—व्यथोऽभ्यासस्येत्यादिना। हलादिशेषापवाद इति। व्यथ् व्यथ् ए इति स्थिते हलादिशेषलभ्यं थकारस्य लोपं बाधित्वा सम्प्रसारणमित्यर्थः। तथाच थकारस्य इकारे पूर्वरूपे विव्यथे इति रूपम्। वकारस्य तु न सम्प्रसारणम्, **'न सम्प्रसारणे सम्प्रसारणम्'** इति निषेधात्। ननु सम्प्रसारणेन हलादिशेषबाधे थकारस्यापि निवृत्तिर्न स्यादित्यत आह-थस्येति। थकारलोपस्य बाधं विना संप्रसारणस्य प्रवृत्त्यनुपपत्तेस्तेन तद्बाधेऽपि थकारलोपस्य बाधे प्रमाणाभावादिति भावः। म्रद मर्दने इति। ऋदुपधोऽयम्। मर्दते। ममृदे। क्षजिधातुरिदित्। क्षजते। चक्षञ्जे। ननु घटादिगणे अस्य पाठो व्यर्थः, क्षञ्जयतीत्यत्र णौ नुमि कृते अकारस्यानुपधात्वेन उपधादीर्घस्याऽप्रसक्त्या 'मितां ह्रस्वः' इत्यस्याऽप्रवृत्तावपि विशेषाऽभावात् अनुपधात्वेन 'मितां ह्रस्वः' इत्यस्य प्रसक्त्यभावाच्च। अत एव अक्षक्षि क्षक्षंक्षक्षमित्यत्रापि चिण्णमुलोः इति दीर्घविकल्पस्यापि न प्रसक्तिरित्यत आह-मित्त्वसामर्थ्यादिति। दक्ष गतीति ननु 'दक्ष वृद्धौ शीघ्रार्थे च' इत्यनुदात्तेत्सु पाठादेव सिद्धे किमर्थमिह पाठः, अर्थनिर्देशस्योपलक्षणत्वादेव गतिहिंसार्थकत्वस्यापि सम्भवादित्यत आह-वृद्धिशैघ्र्ययोरिति। मित्त्वसामर्थ्यादनुपधात्वेऽपि चिण्णमुलोर्दीर्घविकल्पः। अदक्षि अदाक्षि। दक्षं दक्षम्, दाक्षंदाक्षम्। क्रप कृपायां गताविति। अदुपधोऽयम्। कृपायां गतौ चेत्यर्थः।

वैकल्ये इत्येके। त्रयोऽप्यनिदितः इति नन्दी। इदितः इति स्वामी। 'कदि-क्रदी इदितौ, क्रद वलद इति चानिदिता'विति मैत्रेयः। कदिक्रदिक्लदीनामाह्वान-रोदनयोः परस्मैपदिषूक्तानां पुनरिह पाठो मित्त्वार्थ आत्मनेपदार्थश्च। ७७५ ज्वि-त्वरा सम्भ्रमे। 'घटादयः षितः' (ग० सू १८६)। षित्त्वादङ् वक्ष्यते।

अथ फणान्ताः परस्मैपदिनः। ७७६ ज्वर रोगे। ज्वरति। जज्वार। ७७७ गड सेचने। गडति। जगाड। ७७८ हेड वेष्टने। 'हेडृ अनादरे' इत्यात्मनेपदिषु गतः। स एवोत्सृष्टानुबन्धोऽनुवर्तते अर्थविशेषे मित्त्वार्थम्। परस्मैपदिभ्यो ज्वरादि-भ्यः प्रागेवानुवादे कर्तव्ये तन्मध्येऽनुवादसामर्थ्यात्परस्मैपदम्। हेडति। जिहेड। हिडयति। अहिडि-अहीडि। अनादरे तु हेडयति। ७७९ वट ७८० भट परिभा-षणे। 'वट वेष्टने', 'भट भृतौ' इति पठितयोः परिभाषणे मित्त्वार्थोऽनुवादः। ७८१ ष्वट नृत्तौ। इत्यमेव पूर्वमपि पठितम्। तत्रायं विवेकः। पूर्वं पठितस्य

कदि क्रदि वलदि इति नन्दिमते क्षीरस्वामिमते च त्रय एव धातवः। मैत्रेयमते चत्वार इति बोध्यम्। तत्र इदितां त्रयाणां पौनरुक्त्यं परिहरति—कदिक्रदिक्लदीनामित्यादि-ना। ज्वित्वरेति। ज्वरित्। 'जीतः क्तः' इति क्तः प्रयोजनम्। आदित्त्वं तु 'आदितश्च' इति निष्ठायामिण्निषेधार्थम्। इदुपधत्वं तु व्यर्थम्, हृस्वेऽप्यामनेपदसिद्धेः 'कृत्यमत्वरसंघुषास्वनाम्' इति निष्ठायामिड्विकल्पसिद्धेश्च। घटादयः षित इति। 'त्वर-त्यन्ता' इति शेषः। गणसूत्रमिदम्। तत्प्रयोजनमाह—षित्त्वादिति। वक्ष्यते इति। 'षि-द्भिदादिभ्योऽङ्' इत्यनेनेति शेषः। घटादिषु त्रयोदशानुदात्तेतो गताः। 'ष्टुत ष्टीमौ' इत्यतः प्राक् घटादिसमाप्तिरिति वक्ष्यते।

अथ फणान्ता इति। 'फणगतौ'त्यायेतत्पर्यन्ता इत्यर्थः। ज्वररोगे इति। णौ ज्वरयति। चिण्णि तु अज्वरि-अज्वारि। णमुलि तु ज्वरं ज्वरं,ज्वारं ज्वारम्। एवमग्रेऽपि ज्ञेयम्। हेड वेष्टने इति। डकारादकार उच्चारणार्थः। ततश्च 'नाग्लोपिशास्वृदिताम्' इति निषेधो न भवति। स एवेति। हेडधातुरेव ऋकारानुबन्धमुत्सृज्य वेष्टनरूपे अर्थविशेषे मित्त्वार्थमनुवर्तते इत्यर्थः। भावन्तरत्वं तु मित्त्वतदभावयोर्विकल्पः स्यादिति भावः। नन्वात्मनेपदिन एवाऽऽनुवादे परस्मैपदिन स्यादित्यत आह—परस्मैपदिभ्य इति। यदि स्वात्मनेपदमिष्टं तर्हि घटादिषु स्वरित्यन्तेष्वेवानुदात्तेत्सु पठ्येतेति भावः। हेडतीति। वेष्टते इत्यर्थः। हिडयतीति। वेष्टयतीत्यर्थः। 'हेतुमति' इति णिचि 'मितां ह्रस्वः' इति ह्रस्व इति भावः। अहिडि—अहीडीति 'चिण्णमुलोः' इति दीर्घविकल्पः। अनादरे तु हेड-यतीति। वेष्टनरूपार्थ एव मित्त्वाच्च ह्रस्व इति भावः। 'वट परिभाषणे' इति नापूर्वो धातुरित्याह—वट वेष्टने इत्यादि। अनुवाद इति। भावन्तरत्वे तु मित्त्वतदभावयोर्वि-कल्पः स्यादिति भावः। 'ष्वट नृत्तौ' इत्यस्य पौनरुक्त्यमाक्षिपति—इत्थमेव पूर्वमपि पठि-

नाट्यमर्थः । यत्कारिषु नटव्यपदेशः। वाक्यार्थाभिनयो नाट्यम् । घटादौ तु नृत्तं नृत्यं चार्थः । यत्कारिषु नर्तकव्यपदेशः । पदार्थाभिनयो नृत्यम् । गात्रविक्षेपमात्रं नृत्तम् । केचित्तु घटादौ णट नतौ इति पठन्ति । गतौ इत्यन्ये । णोपदेशपर्युदासवाक्ये भाष्यकृता 'नाटि' इति दीर्घपाठाद्घटादिर्णोपदेश एव । ७८२ इक प्रतीघाते। स्तकति । ७८३ चक तृप्तौ । तृप्तिप्रतीघातयोः पूर्वं पठितस्य तृप्तिमात्रे मित्त्वार्थोऽनुवादः । आत्मनेपदिषु पठितस्य परस्मैपदिष्वनुवादात्परस्मैपदम् । ७८४ कखे हसने । एदित्त्वाच्च वृद्धिः । अकखीत् । ७८५ रगे शङ्कायाम् । ७८६ लगे सङ्गे । ७८७ हुगे ७८८ डुगे ७८९ षगे ७९० ष्टगे संवरणे । ७९१ कगे नोच्यते । 'अस्यायमर्थः' इति विशिष्य नोच्यते । क्रियासामान्यार्थत्वात् । अनेकार्थत्वादित्यन्ये । ७९२ अक ७९३ अग कुटिलायां गतौ। ७९४ कण ७९५ रण गतौ। चकाण। रराण। ७९६ चण ७९७ शण ७९८ षण दाने च। शण गतौ इत्यन्ये ।

तमिति । टवर्गान्तेष्विति शेषः । तथा च उभयोरप्यर्थैक्येन अर्थविशेषे मित्त्वार्थमिहानूयते इति परिहारस्याऽसंभवात्पौनरुक्त्यमेवेति भावः । परिहर्तुमुपक्षिपति—तत्रायं विवेक इति । तत्र तयोः धात्वोः अयं वक्ष्यमाणः विवेकः अर्थभेदः प्रत्येतव्य इत्यर्थः । पूर्वं पठितस्येति । टवर्गान्तेषु पठितस्येत्यर्थः । यत्कारिष्विति । यस्य कर्तृषु नटव्यवहारः तन्नाट्यं पूर्वं पठितस्य नटधातोरर्थ इत्यर्थः । किं तन्नाट्यमित्यत्राह—वाक्यार्थेति । घटादौ तिति । यस्य कर्तृषु नर्तकव्यपदेशः तत् नृत्यं, नृत्तं च घटादौ पठितस्य नटेरर्थ इत्यर्थः । नृत्यनृत्तयोः को भेद इत्यत आह—पदार्थेति । एवं च टवर्गान्तेषु पठितस्य घटादिगतस्य चार्थभेदसत्त्वादर्थविशेषे मित्त्वार्थोऽनुवाद इति युज्यते । धात्वन्तरत्वे तु मित्त्वतदभावयोर्विकल्पः स्यादिति भावः । अथ नटधातोरस्य णोपदेशपर्युदासभ्रमं वारयति—णोपदेशेति । 'अनर्दनाटी'त्यादिपर्युदासवाक्ये नाटीति णिच्लक्षणवृद्धिनिर्देशेन 'नट अवस्फन्दने' इति चौरादिकस्यैव ग्रहणादयं णोपदेश एवेत्यर्थः । ष्टकधातुः षोपदेशः। कृतष्टुत्वस्य निर्देशः । स्तकतीति । 'धात्वादेः' इति षस्य सत्वे ष्टुत्वनिवृत्तिः । चक तृप्तौ । तृप्तोति । 'चक तृप्तौ प्रतीघाते च' इत्यात्मनेपदिषु पठितस्य तृप्तावर्थे मित्त्वार्थोऽत्राऽनुवाद इत्यर्थः । एवंच धात्वन्तरत्वाऽभावान्न मित्त्वतदभावविकल्पः । ननु आत्मनेपदिषु पठितस्यात्रानुवादादात्मनेपदं स्यादित्यत आह—आत्मनेपदिष्विति । षगे ष्टगे इति । षोपदेशौ । ष्टगे इति कृतष्टुत्वनिर्देशः। कगे नोच्यत इति । ननु 'कगे' इत्यनेन यदि किमपि नोच्येत, तर्हि कथमस्य धातुत्वमित्यत आह—अस्यायमिति। क्रियाविशेषो नास्यार्थ इति भावः । ननु यदि न कोऽपि क्रियाविशेषोऽस्यार्थः, तर्हि कथमयं धातुरित्यत आह—क्रियासामान्यार्थवाचित्वादिति । धातुपाठपठितस्य क्रियाविशेषार्थकत्वाभावे सति क्रियासामान्यवाचित्वं परिशेषलभ्यमिति भावः । अनेकेति । 'कलिः कामधेनु'रिति

७९९ अथ ८०० श्लथ (क्रथ) ८०१ क्रथ ८०२ क्लथ हिंसार्थाः। 'आसिनिप्रहण'-(सू६१७)इति सूत्रे क्राथेति मित्त्वेऽपि वृद्धिर्निपात्यते। क्राथयति। मित्त्वं तु निपातनात्परत्वात् 'चिण्णमुलोः' (सू २७६२) इति दीर्घे चरितार्थम्। अक्रथि, अक्राथि। क्रथंक्रथम्। क्राथंक्राथम्। ८०३ वन च। हिंसायामिति शेषः। वनु च नोच्यते। वनु इत्यपूर्व एवायं धातुर्न तु तानादिकस्यानुवादः। उदित्करणसामर्थ्यात्। तेन क्रियासामान्ये वनतीत्यादि। प्रवनयति। अनुपसृष्टस्य तु मित्त्वविकल्पो वक्ष्यते। ८०४ ज्वल दीप्तौ। णप्रत्यवार्थे पठिष्यमाण एवायं मित्त्वार्थमनूद्यते। प्रज्वलयति।

न्यायेन कलधातुवदपरिमितार्थकत्वमिति भावः। अथ श्लथ क्रथ क्लथ इति। चत्वारोऽपि द्वितीयान्ताः आद्यतृतीयौ रेफमध्यौ। द्वितीयो नकारमध्यः। चतुर्थस्तु लकारमध्यः। आद्यस्तु थकारादिः। इतरे ककारादयः। ननु क्रथधातोर्घटादित्वेन मित्त्वात् णौ उपधावृद्धिसम्पन्नस्य आकारस्य 'मितां ह्रस्वः' इति ह्रस्वत्वे क्रथयतीति स्यात्, नतु क्राथयतीति तत्राह—आसिनीति। 'आसिनिप्रहणनाटक्राथपिषां हिंसायाम्' इति षष्ठीविधौ णौ मित्त्वेऽपि क्राथेति वृद्धिर्निपात्यत इत्यर्थः। नन्वेवं सति घटादौ क्रथधातोः पाठो व्यर्थ इत्यत आह—मित्त्व इति। चिण्णमुलोर्दीर्घपक्षे चरितार्थमित्यन्वयः। ननु तत्रापि क्राथेति निपातनाद्वृद्धिरित्यत आह—निपातनात्परत्वादिति। 'क्राथे'ति निपातनापेक्षया 'चिण्णमुलो'रित्यस्य परत्वादित्यर्थः। यद्यपि 'मितां ह्रस्वः' इत्यपि परम्, तथापि पुरस्तादपवादन्यायेन क्राथेति वृद्धिनिपातनं 'मितां ह्रस्वः' इत्यस्यैवाऽव्यवहितस्य बाधकं, नतु 'चिण्णमुलो'रित्यस्यापि, तस्य व्यवहितत्वादिति बोध्यम्। अक्रथि, अक्राथीति। क्रथेण्यन्ताच्चिणि दीर्घविकल्पः। क्रथंक्रथं। क्राथंक्राथमिति। णमुलि दीर्घविकल्पः। वन चेति। चकारो हिंसानुकर्षकः। तदाह—हिंसायामितीति। शेष इति। 'वन शब्दे, वन संभक्ता'वितिपठितस्य हिंसायां मित्त्वार्थोऽनुवादः। वनति। णौ तु वनयति। णमुलि तु वनंवनं, वानंवानम्।

वनु च नोच्यते इति। 'कगे' नोच्यते इतिवदध्याख्येयम्। नन्वन्यत्र पठितस्य घटादौ मित्त्वार्थोऽनुवाद इति सिद्धान्तात्तनादौ 'वनु याचने' इति पठितस्य अनुदात्तेतोऽनुवादात् क्रियासामान्येऽर्थे वनुते इत्यात्मनेपदम् उदात्तयश्च स्यादित्यत आह—अपूर्व एवायमिति। उदित्करणेति। यदि तानादिकस्यैव अनुवादः स्यात्, तर्हि तनादिगणे 'वनु इति कृतेन उदित्करणेनैव 'उदितो वा' इत्यादिकार्यस्य सिद्धेरिह गणे पुनरुदित्करणमनर्थकं स्यात्। अतस्तानादिकस्य नानुवादः, किं त्वपूर्व एवायं वनुधातुः। तथा च 'वनती'ति परस्मैपदं शङ्विकरणं चेत्याह—तेन क्रियासामान्ये वनतीत्यादीति। आदिना वनतः वनन्तीत्यादिसंग्रहः। प्रवनयतीति। घटादिकस्य क्रियासामान्यवाचिनो ण्यन्ते मित्त्वादुदित्त्वम्। वक्ष्यत इति। 'रक्षान्नावनुवमां च' इत्यनेनेति शेषः। तानादिकात्तु वनु याचने इत्यस्माण्णिचि उपधादीर्घे 'वानयती'त्येव भवति। ज्वल दीप्तौ। णप्रत्ययार्थ-

८०५ ह्वल ८०६ ह्मल चलने। प्रह्वलयति। प्रह्मलयति। ८०७ स्मृ आध्याने। चिन्तायां पठिष्यमाणस्य आध्याने मित्त्वार्थोऽनुवादः। आध्यानमुत्कण्ठापूर्वकं स्मरणम्। ८०८ दृभये 'दृ विदारणे' इति क्र्यादेरयं मित्त्वार्थोऽनुवादः। दृणन्तं प्रेरयति दरयति। भयादन्यत्र दारयति। 'धात्वन्तरमेवेदमि'ति मते तु दरतीत्यादि। केचिद्भटादौ 'अस्मृदृत्वर-' (सू २५६६) इति सूत्रे च दृ इति दीर्घस्थाने ह्रस्वं पठन्ति। तन्नेति माधवः। ८०९ नॄ नये। क्र्यादिषु पठिष्यमाणस्यानुवादः। नयादन्यत्र नारयति। ८१० श्रा पाके। 'श्रै' इति कृतात्त्वस्य श्रा इत्यादादिकस्य च सामान्येनानुकरणम्।

मिति। 'ज्वलितिकसन्तेभ्यो णः' इति णप्रत्ययार्थं ज्वलादिगणे पठिष्यमाणस्य इह मित्त्वार्थोऽनुवाद इत्यर्थः। ज्वलतीत्यादि सिद्धवत्कृत्य मित्त्वस्य णौ ह्रस्वं प्रयोजनमाह—प्रज्वलयतीति। धात्वन्तरत्वे तु मित्त्वतदभावयोर्विकल्पः स्यादिति बोध्यम्। स्मृ-आध्याने। चिन्तायामिति। 'स्मृ चिन्तायां'मिति पठिष्यमाणस्य आध्याने मित्त्वार्थोऽनुवाद इत्यर्थः। चिन्तया आध्यानमन्यदिति दर्शयितुमाह—आध्यानमुत्कण्ठेति। दृ भये इति। अस्य दृणातीति रूपं नतु शप्। तदाह—क्र्यादेरयं मित्त्वार्थोऽनुवाद इति। 'भयेऽर्थे मित्त्वार्थ'मिति शेषः। अर्थनिर्देशस्य उपलक्षणत्वात् भये वृत्तिः। तथाच क्र्यादित्वात् श्नाविकरण एवायमिति भावः। मित्त्वप्रयोजनं दर्शयति—दृणन्तं प्रेरयतीति। भीषयतीत्यर्थः। भयादन्यत्र दारयतीति। भेदयतीत्यर्थः। धात्वन्तरमेवेति। नतु क्र्यादेरनुवाद इत्यर्थः। अस्मिन्मते भौवादिकत्वात् शबेवेत्याह—दरतीत्यादीति। सूत्रे चेति। 'अस्मृदृत्वरप्रथम्रदस्तॄस्पशाम्' इति ह्रस्वविधावित्यर्थः। ह्रस्वं पठन्तीति। तन्मते क्र्यादेरनुवादप्रसक्तिरेव नास्तीति भावः। तन्नेति। यदि ह्ययं घटादौ ह्रस्वान्तः क्र्यादौ तु दीर्घान्तो भवेत् तर्हि 'शृदृप्रां ह्रस्वो वा' इत्यत्र दृग्रहणमनर्थकं स्यात्। ह्रस्वदीर्घान्तधातुभ्यामेव तत्फलसिद्धे रिति भावः। नॄ नये इति। नयः नयनम्। क्र्यादिष्विति। नॄ नये इत्येव क्र्यादिषु पठ्यते। तत्रार्थनिर्देशो न विवक्षितः। क्र्यादिषु पठिष्यमाणस्य नॄधातोर्नयादन्यत्र विद्यमानस्य नयेऽर्थे मित्त्वार्थोऽनुवाद इत्यर्थः। तथाच श्नाविकरण एवायम्। नृणातेर्धात्वन्तरत्वाभावान्न मित्त्वतदभावौ। अपि तु नित्यमेव मित्त्वम्। श्रा पाके इति। नन्वत्र भ्वादौ पठ्यमानाच्छ्रायतेः, उत्तरत्र अदादौ पठिष्यमाणाच्च श्रातेरन्य एव यदि कश्चन स्वतन्त्रो धातुर्घटादौ निर्दिश्येत तदा प्रकृते ङटि शपि श्रातीति रूपसंपत्त्या लुग्विकरणस्थेन 'श्रा पाके' इत्यनेन पौनरुक्त्यमित्यत आह—श्रै इतीति। अग्रे भ्वादिगणे 'श्रै पाके' इति पठिष्यते। तस्य कृतात्त्वस्यानुकरणमित्यन्वयः। तथाच तस्यैव श्रैधातोरनेकार्थकतया पाके वृत्तस्य मित्त्वार्थमत्रानुवादात् शपि श्रायतीत्यादि रूपम्। एतच्च 'श्रतं पाके' इति सूत्रे भाष्यकैयटयोः स्थितम्। एवं च 'सति संभवे अन्यत्र पठितानामिह मित्त्वार्थोऽनुवाद' इति सिद्धान्तादग्रे भ्वादौ 'श्रै पाके' इत्यस्य पौनरुक्त्यं न शङ्क्यम्। नन्वेवं सति 'श्रै पाके' इत्येवात्र कुतो न पठितमित्यत आह—

'लुग्विकरणालुग्विकरणयोरलुग्विकरणस्य' (प ६ १), 'लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम्' (प १।१।४) इति परिभाषाभ्याम्। श्रपयति। विक्लेदयतीत्यर्थः। पाकादन्यत्र श्रपयति। स्वेदयतीत्यर्थः। मारणतोषणनिशामनेषु ८।११ ज्ञा। निशामनं चाक्षुषज्ञानम् इति माधवः। ज्ञापनमात्रम् इत्यन्ये। निशानेषु इति पाठान्तरम्। निशानं तीक्ष्णीकरणम्। एष्वेवार्थेषु जानातिर्मित्। ज्ञप मिच्च इति चुरादौ। ज्ञापनं मारणादिकं च तस्यार्थः। कथं 'विज्ञापना भर्तृषु सिद्धिमेति' इति 'तज्ज्ञापयत्याचार्यः' इति च। शृणु। माधवमते अचाक्षुषज्ञाने मित्त्वाऽभावात्। 'ज्ञापनमात्रे

श्रा इत्यादादिकस्य चेति। नन्वु लाक्षणिकत्वात् 'श्रै पाके' इति भौवादिकस्य कृतात्त्वस्याप्यनुवाद इति न युज्यत इत्यत आह—लुग्विकरणेत्यादि परिभाषाभ्यामित्यन्तम्। परिभाषाभ्यामुभयोरनुकरणमित्यन्वयः। 'स्वरतिसूतिसूयतिधूञूदितो वा' इति सूत्रे 'सू'इति पठितेऽपि द्वयोर्ग्रहणे सिद्धे सूतिसूयत्योः पृथग्ग्रहणं 'लुग्विकरणा' इति परिभाषां ज्ञापयतीत्याहुः। प्रतिपदोक्तपरिभाषा तु न्यायसिद्धेत्युक्तमेव। श्रपयतीति। श्रीधातोर्णिचि 'आदेच उपदेशे' इत्यात्त्वे 'अतिहीं' इति पुकि 'मितां ह्रस्वः'। श्राधातोस्तु स्वत एवाऽदन्तत्वाण्णिचि पुकि ह्रस्वः। पाकादन्यत्रेति। अर्थनिर्देशस्योपलक्षणत्वादिति भावः। मारणेति। मारणे तोषणे निशामने च ज्ञाधातुर्वर्तत इत्यर्थः। अक्षतस्य मारणे संपूर्वकस्यैव ज्ञाधातोः प्रयोगः। चाक्षुषज्ञानमिति। निपूर्वकात् शम आलोचने इत्यस्मात् चौरादिकण्यन्तात् ल्युटि निशामनशब्दस्य निष्पत्तेरिति भावः। ज्ञानमात्रमिति। उपसर्गवशादिह ज्ञापने वृत्तिः, चाक्षुषत्वं च ज्ञानस्य न विवक्षितमिति भावः। निशानेष्विति। 'मारणतोषणनिशानेषु ज्ञा' इति पाठान्तरमित्यर्थः। ननु ज्ञाधातोरस्माच्छ्वादौ शपि 'ज्ञाजनोर्जा' इति जादेशे जाति जातः इत्यादि स्यादित्यत आह—एष्वेवेति। 'ज्ञा अवबोधने' इति श्नाविकरणस्यैव मारणादिष्वर्थेषु णौ मित्त्वार्थमिहानुवादात् श्नाविकरण एवायमिति भावः। जानातेः मित्त्वफलं तु णौ ह्रस्वः—'पशुं सज्ञपयति' अक्षतं मारयतीत्यर्थः। 'हरिं ज्ञापयति'। संतोषयतीत्यर्थः। 'रूपं ज्ञपयति' माधवमते दर्शयतीत्यर्थः। मतान्तरे तु बोधयतीत्यर्थः। 'शरं ज्ञपयति' तीक्ष्णीकरोतीत्यर्थः। ननु माधवमते बोधयतीत्यर्थे ज्ञपयतीति कथं मित्त्वम्, तन्मते चाक्षुषज्ञानस्यैव निशामनशब्दार्थत्वादित्यत आह—ज्ञप मिच्चेति चुरादाविति। एवंच चौरादिकं ज्ञाधातुमादाय बोधनेऽप्यर्थे ज्ञपयतीति ह्रस्वः सङ्गच्छते इति भावः। ननु चौरादिकस्यापि ज्ञपेर्मारणतोषणनिशामनेष्वेवार्थेषु मित्त्वमस्तु, तत्रार्थान्तरनिर्देशाभावात्। तथाच माधवमते कथं बोधनेऽर्थे मित्त्वमित्यत आह—ज्ञापनं मारणादिकं च तस्यार्थ इति। ज्ञापनं मारणं तोषणं निशामनं च, तस्य चौरादिकस्य ज्ञपधातोरर्थो माधवमते इत्यर्थः। कथमिति। ज्ञाधातोर्ज्ञपधातोश्च णौ मित्त्वाद्ध्रस्वप्रसङ्गादिति भावः। शृण्विति। उत्तरमिति शेषः। मित्त्वाभावादिति। 'ह्रस्वो नेति' शेषः। 'विज्ञापनेत्यत्र 'तज्ज्ञापयतीत्यत्र च अचाक्षु-

मित्त्व'मिति मते तु 'शा नियोगे' इति चौरादिकस्य । धातूनामनेकार्थत्वात् । 'नि-शानेष्वि'ति पठतां हरदत्तादीनां मते तु न काप्यनुपपत्तिः । कम्पने ८१२ चलिः । 'चल कम्पने' इति ज्वलादिः । चलयति शाखाम् । कम्पनादन्यत्र तु शीलं चालयति । अन्यथा करोतीत्यर्थः । हरतीत्यर्थः, इति स्वामी । सूत्रं चालयति । क्षिपतीत्यर्थः । ८१३ छदिः ऊर्जने । 'छद अपवारणे' इति चौरादिकस्य स्वार्थे णिजभावे मित्त्वार्थोऽयमनुवादः । अनेकार्थत्वादूर्जेरर्थे वृत्तिः । छदन्तं प्रयुङ्क्ते छदयति । बलवन्तं प्राणवन्तं वा करोतीत्यर्थः । अन्यत्र छादयति । अपवारयन्तं प्रयुङ्क्ते इत्यर्थः । स्वार्थे णिचि तु छादयति । बलीभवति प्राणीभवति अपवारयति वेत्यर्थः । जिह्वोन्मथने ८१४

वमेवाऽऽत्मज्ञानं विवक्षितमिति भावः । ननु 'ज्ञापनमात्रे मित्त्व'मिति मते 'विज्ञापने'त्यत्र 'तज्ज्ञापयती'त्यत्र च मित्त्वं दुर्वारमित्यत आह—ज्ञापनमात्रे इति । चौरादिकस्येति । 'विज्ञापनेति, ज्ञापयतीति च रूपमिति' शेषः । 'नान्ये मितोऽहेतौ' इति निषेधात्र तस्य मित्त्वमिति भावः । ननु नियोगार्थस्य तस्य कथं ज्ञापने वृत्तिरित्यत आह—धातूनामिति । न कापीति । विज्ञापनेत्यत्र 'ज्ञापयती'त्यत्र च ज्ञापनार्थवृत्तित्वात् ज्ञापनस्य च मारणतोषणतोक्ष्णीकरणान्यत्वान्न तस्मिन्नर्थे ज्ञाधातोर्मित्त्वप्रसक्तिरिति भावः । एवञ्च माधवमते बोधने ज्ञाधातोः ज्ञापयतीत्युपधादीर्घः । ज्ञपधातोस्तु ज्ञपयतीत्युपधाह्रस्व इति रूपद्वयमपि साध्विति स्थितम् । कम्पने चलिरिति । इका निर्देशोऽयम् । चलधातुः कम्पने मिदित्यर्थः । ज्वलादिरिति । तस्य चलेः कम्पने मित्त्वार्थोऽत्रानुवाद इति भावः । शीलं चालयतीति । अत्र कम्पनार्थकत्वाऽभावान्न मित्त्वमिति भावः । तदाह—अन्यथा करोतीत्यर्थ इति । धातूनामनेकार्थत्वादिति भावः । छदिरूर्जने इति । इका निर्देशोऽयम् । छदधातुरूर्जने मिदित्यर्थः । ऊर्जनं बलवत्करणं, प्राणनं वा, 'ऊर्जं बलप्राणनयो'रित्युक्तेः । अन्यत्र पठितस्यान्यार्थविशेषे णौ मित्त्वार्थोऽनुवाद इति सिद्धान्तः । छदधातुस्वयं चुरावन्तर्गणे युजादौ पठितः । तस्याऽत्रानुवादो व्यर्थः, 'नान्ये मितोऽहेतौ'विति ज्ञपादिपञ्चकव्यतिरिक्तस्य चुरादौ मित्त्वनिषेधादित्यत आह—छद अपवारणे इति । चुरावन्तर्गणयुजादिपठितस्य 'आ धृषाद्वा' इति स्वार्थिकणिजभावपक्षे ऊर्जनेऽर्थे मित्त्वार्थोऽनुवाद इत्यर्थः । हेतुमण्णिचि ह्रस्वार्थः । स्वार्थिकणिचि सत्येव 'नान्ये मित' इति निषेधप्रवृत्तेरिति भावः । नन्वपवारणार्थकस्य छदेः कथमूर्जने वृत्तिरित्यत आह—अनेकार्थत्वादिति । ननु स्वार्थणिजभावे सति मित्त्वं किमर्थमित्यत आह—छदन्तं प्रयुङ्क्ते छदयतीति । अत्र हेतुमण्णिचि ह्रस्वः । 'नान्ये मित' इति निषेधस्तु हेतुमण्णिचि नेति भावः । अन्यत्रेति । ऊर्जनादन्यत्र अपवारणे इत्यर्थः । स्वार्थे णिचि त्विति । 'नान्ये मितः' इति निषेधस्य तत्र प्रवृत्तेरिति भावः । जिह्वोन्मथने लडिरिति । इका निर्देशोऽयम् । लडधातुर्जिह्वोन्मथने मिदित्यर्थः ।

लडिः 'लड विलासे' इति पठितस्य मित्त्वार्थोऽनुवादः। उन्मथनं क्षोभणम्। जिह्वा-शब्देन षष्ठीतत्पुरुषः। लडयति जिह्वाम्। तृतीयातत्पुरुषो वा। लडयति जिह्वया। अन्ये तु जिह्वाशब्देन तद्व्यापारो लक्ष्यते। समाहारद्वन्द्वोऽयम्। लडयति शत्रुम्। लडयति दधि। अन्यत्र लाडयति पुत्रम्। ८१५ मदी हर्षग्लेपनयोः। ग्लेपनं दैन्यम्। दैवादिकस्य मित्त्वार्थोऽयमनुवादः। मदयति। हर्षयति ग्लेपयति वेत्यर्थः। अन्यत्र मादयति। चित्तविकारमुत्पादयतीत्यर्थः। ८१६ ष्वन शब्दे। भाव्ययं मित्त्वार्थमनूद्यते। ष्वनयति घण्टाम्। अन्यत्र ष्वानयति। अस्पष्टाक्षरमुच्चारयतीत्यर्थः।

अत्र भोजः 'दलिबलिस्खलिरणिध्वनित्रपित्रपयश्च' इति पपाठ। तत्र ध्वनि-रणी उदाहृतौ। 'दल विशरणे' 'बल संवरणे' 'स्खल संचलने' 'त्रपूष् लज्जायाम्' इति गताः। तेषां णौ, दलयति। वलयति। स्खलयति। त्रपयति। 'क्षै क्षये' इति वक्ष्य-

---

लडेति। 'लड विलासे' इति टवर्गान्तेषु भ्वादौ पठितस्य जिह्वोन्मथनेऽर्थे मित्त्वार्थोऽनुवाद इत्यर्थः। एवञ्च धातुभेदाऽभावात् सर्वथैव मित्त्वकार्यं भवति। गणभेदाद्धातु-भेदे मित्त्वतदभावयोर्विकल्पः स्यादिति भावः। लडयति जिह्वामिति। रसानां रसान् ज्ञापयतीत्यर्थः। 'गतिबुद्धि' इति द्विकर्मकोऽयम्। लडयति जिह्वयेति। देवदत्तो रसान् जानाति, तज्जिह्वया ज्ञापयतीत्यर्थः। तद्व्यापार इति। शब्दप्रयोगादिजिह्वाव्यापार इत्यर्थः। समाहारेति। जिह्वा च उन्मथनं चेति समाहारद्वन्द्वः। जिह्वाव्यापारे उदाह-रति—लडयति शत्रुमिति। गेहे शूर इत्यादिशब्दप्रयोगेण गर्हत इत्यर्थः। 'उन्मथनं लो-डनम्' इत्यभिप्रेत्योदाहरति—लडयति दधीति। विलोडयतीत्यर्थः। अन्यत्रेति। जिह्वो-न्मथनादन्यत्रेत्यर्थः। लाडयति पुत्रमिति। क्रीडयतीत्यर्थः। ग्लेपनं दैन्यमिति। दीनी-भवनमित्यर्थः। ननु लडादौ शपि मदतीत्यादि स्यादित्यत आह—दैवादिकस्येति। तथाच श्यन्विकरण एवाऽयमिति भावः। ष्वन शब्दे इति। पूर्वमनुनासिकान्तेषु 'अण रणे'त्यत्र ष्वणधातुर्मूर्धन्यान्तः पठितः। अयं तु दन्त्यान्त इति भेदः। भावीति। ज्व-लादौ 'ष्वन शब्दे' इति पठिष्यमाण एवात्र ष्वन्यात्मके अनुच्चारणजन्ये शब्दने मित्त्वार्थमनूद्यते इत्यर्थः। धातुभेदे तु मित्त्वतदभावौ स्यातामिति भावः। ष्व-नयति घण्टामिति। शब्दायमानां करोतीत्यर्थः। अन्यत्रेति। अस्पष्टोच्चारणात्मके शब्दने इत्यर्थः।

अत्रेति। 'घटादा'वित्यर्थः। तत्रेति। दलिबलस्खलित्रपित्रपयश्चेत्यर्थः। उदाहृताविति। 'घटा-दा'विति शेषः। तत्र ध्वनिरनुपदमेवोदाहृतः। रणिस्तु 'कणरण गता'वित्यत्रेति बोध्य-म्। भोजमते प्रागनयोः पाठो नेति न पौनरुक्त्यम्। गता इति। भ्वादौ पठिता इत्य-र्थः। 'इह मित्त्वार्थमनूद्यन्ते' इति शेषः। धात्वन्तरत्वे तु मित्त्वतदभावौ स्याता-मिति भावः। ननु क्षयेरत्र पाठान्मित्त्वे णौ ह्रस्वे 'क्षपयती'ति वक्ष्यति। अस्त्वेवम्।

माणस्य कृतात्वस्य पुक्ता निर्देशः । क्षपयति । ८१७ स्वन अवतंसने । 'शब्दे' इति पठिष्यमाणस्यानुवादः । स्वनयति । अन्यत्र स्वानयति । 'घटादयो मितः' (ग० सू १८७) । मित्संज्ञका इत्यर्थः । 'जनीजृष्कनसुरञ्जोऽमन्ताश्च' (ग० सू १८८) । मितः इत्यनुवर्तते । जृष् इति मित्त्वनिर्देशाज्जीर्यतेर्ग्रहणम् । जृणातेस्तु जारयति । केचित्तु 'जनीजृष्णसु—' इति पठित्वा ष्णसु निरसने इति दैवादिकमुदाहरन्ति । 'उवलह्वलह्मलनमामनुपसर्गाद्वा' (ग०सू०१८९) एषां मित्त्वं वा । प्राप्तविभाषेयम् । उज्वलयति-उज्वालयति । उपसृष्टे तु नित्यं मित्त्वम् । प्रज्वलयति । कथं तर्हि प्रज्वालयति उन्नामयतीति । घञन्तात् 'तत्करोति–' (ग०सू०२०४) इति णौ । कथं संक्रामयतीति ।

तथापि 'क्षै क्षये' इति भ्वादौ पठिष्यमाणस्य णौ आत्वे पुकि क्षापयतीत्यपि स्यात्, क्षैधातोः क्षपेत्यनुवादोऽसम्भवात् । तत्राह—क्षै इत्यादि । णौ आत्वे पुकि मित्त्वाद्ध्रस्वे सति क्षपयति क्षै इत्यस्यानुवादसम्भव इति भावः । स्वन अवतंसने इति । अवतंसनम्-अलङ्कृतिः। पठिष्यमाणस्येति । घटादिगणादूर्ध्वं स्वन शब्दे इति पठिष्यमाणस्य स्वनेरवतंसनेऽर्थे णौ मित्त्वार्थोऽनुवाद इत्यर्थः । घात्वन्तरत्वे तु मित्त्वतद्भावौ स्यातामिति भावः । स्वनयतीति । भूषयतीत्यर्थः । अन्यत्रेति । अवतंसनादन्यत्र शब्देऽर्थे णौ मित्त्वाभावान्न ह्रस्व इति भावः । घटादयो मित इति । गणसूत्रम् । ननु घटादिषु मकारानुबन्धाऽदर्शनात्कथं मित्त्वमित्यत आह—मित्संज्ञका इति । मित्कार्यभाग इत्यर्थः । जनीजृषिति । गणसूत्रम् । जनी जृष् कनसु रञ् एषां द्वन्द्वात्प्रथमाबहुवचनम् । अम् अन्ते येषां ते अमन्ताः क्रमिगम्यादयः । एते अघटादित्वेऽपि मित इत्यर्थः। जीर्यतेरिति । 'जॄ वयोहानौ' इति श्यन्विकरणस्यैवेत्यर्थः । जृणातेस्त्विति । 'जॄ वयोहानौ' इति श्नाविकरणस्य मित्त्वाभावेनात्र ग्रहणाऽभावान्न मित्त्वमिति भावः । उदाहरन्तीति । तन्मते जृणातेरपि मित्त्वमिति भावः । उवलह्वल इत्यपि गणसूत्रम् । प्राप्तविभाषेयमिति । उवलह्वलह्मलां घटादित्वान्नमेर्मान्तत्वाच्च मित्त्वस्य प्राप्तेरिति भावः। उपसृष्टे त्विति । सोपसर्गे त्वित्यर्थः। कथं तर्हीति । अनुपसर्गादिति विशेषणे सति उवलेर्नमेश्च णौ मित्त्वविकल्पाऽभावाज्जनीजृषिति मित्त्वाद्ध्रस्वो नित्यः स्यादित्याक्षेपः। समाधत्ते—घञन्तादिति । तत्करोतीति णावित्यनन्तरं समाधेयमिति शेषः । प्रज्वलनं प्रज्वालः । उन्नमनम् उन्नामः । भावे घञ् । उपधावृद्धिः । प्रज्वालं करोतीति, उन्नामं करोतीत्यर्थे 'तत्करोति तदाचष्टे' इति णिचि 'णाविष्ठवत्' इति इष्ठवत्त्वात् टिलोपे सति तस्य स्थानिवत्त्वान्मित्त्वप्रयुक्तह्रस्वाऽभावे प्रज्वालि उन्नामि इत्याभ्यां लटि तिपि शपि गुणे अयादेशे प्रज्वालयति उन्नामयतीति रूपे इति भावः। ननु सम्पूर्वात् क्रमेर्णौ संक्रामयतीति रूपमिष्यते। तत्र अमन्तत्वेन मित्त्वाद्ध्रस्वप्रसङ्गः । न च क्रमण क्राम इति घञन्तात्तत्करोतीत्यावुक्तरीत्या ह्रस्वाभाव इति समाधानं सम्भवति, क्रमेर्घञि हि 'नोदात्तोपदेशस्य' इति वृद्धिप्रतिषेधे सति

'मितां ह्रस्वः' (सू २५६८) इति सूत्रे 'वा चित्तविरागे' (सू २६०५) इत्यतो वा इत्यनुवर्त्य व्यवस्थितविभाषाश्रयणादिति वृत्तिकृत्। एतेन 'रजो विभ्रमयन् राज्ञां' 'धुर्यान्विश्रामयेति सः' इत्यादि व्याख्यातम्। 'ग्लास्नावनुवमां च' (ग०सू १६०)। अनुपसर्गादेषां मित्त्वं वा स्यात्। आधयोरप्राप्ते इतरयोः प्राप्ते विभाषा। 'न क्म्यमिचमाम्' (ग०सू १६१)। अप्राप्तत्वात्प्राप्तं मित्त्वमेषां न स्यात्। कामयते। आधयति। चामयति। ८१८ शमो दर्शने (ग०सू १६२)। शाम्यतिर्दर्शने मित्त्वं न स्यात्। निशामयति रूपम्। अन्यत्र तु 'प्रणयिनो निशमय्य वधूः कथाः'। कथं तर्हि 'निशामय तदुरवृत्तिं विस्तराद्वदतो मम' इति। शम आलोचने इति चौरादिकस्य। धातूनामनेकार्थत्वाच्छ्रवणे वृत्तिः। शाम्यतिवत्। ८१६ यमो अपरिवेषणे (ग०सू १६३)। यत्रऋतिर्भोजनोऽन्यत्र मित्त्वं स्यात्। आयामयति। व्राव-

---

'क्रम'इत्येव भवति, नतु क्राम इति कृत्वा उक्तपमाधानाऽसम्भवादित्यभिप्रेत्याक्षिपति—कथमिति। समाधत्ते—मितामिति। 'मितां ह्रस्वः' इति सूत्रे वेरनुवर्त्यं मित्त्वाऽभावे सङ्क्रामयतीति रूपमित्यन्वयः। ननु कदाचिद्धस्वो दुर्वार इत्यत आह—व्यवस्थितेति। तथा चात्र ह्रस्वाऽभाव एवाश्रीयत इति भावः। वृत्तिकृदिति। भाष्ये तु नैतत् इति भावः। एनेनेति। व्यवस्थितविभाषाश्रयणेनेत्यर्थः। 'ग्लास्नावनुवमां च' इत्यपि गणसूत्रम्। प्रथमार्थे षष्ठी। अनुपसर्गादिति, मित इति, वेति चानुवर्तते। फलितमाह—अनुपसर्गादिति। आधयोरिति। ग्लास्ना इत्यनयोरवटादित्वादप्राप्ते मित्त्वे, इतरयोर्ज्ञनुवमोः प्राप्ते मित्त्वे विभाषेत्यर्थः। तत्र वनेः 'वनु च नोच्यते' इति घञादौ पाठाद्वमेरुत्वमन्तत्वान्मित्त्वप्राप्तिरिति बोध्यम्। 'न क्म्यमिचमाम्' इति 'शमो दर्शने' इति च गणसूत्रम्। दर्शनं चाक्षुषज्ञानम्। 'शम उपशमे' इति दैवादिकः श्यन्विकरण एवात्र गृह्यते। नतु 'शम आलोचने' इति चौरादिकः, 'नाम्ये मितोऽहेतौ' इति तस्य मित्त्वनिषेधात्। तदाह—शाम्यतिरिति। निशामयति रूपमिति। पश्यतीत्यर्थः। उपशमार्थकस्यापि अनेकार्थकत्वादर्शने वृत्तिः। अन्यत्रेति। दर्शनादन्यत्रेत्यर्थः। निशमय्येति। श्रावयित्वेत्यर्थः। शमेर्ण्यन्तात् क्त्वो ल्यपि कृते 'ल्यपि लघुपूर्वात्' इति णेर्यादेशः। कथमिति। तर्हि। दर्शनार्थकस्यैव शमेर्मित्त्वनिषेधे सति 'श्रुणु' इत्यर्थं मित्त्वाद्धस्वप्रसङ्गान्निशामयेति कथमित्याक्षेपः। समाधत्ते—शम आलोचने इति चौरादिकस्येति। 'निशामयेति रूपमिति शेषः। 'नाम्ये मितोऽहेतौ'इति तस्य मित्त्वनिषेधात् न ह्रस्व इति भावः। ननु चौरादिकस्य शमेरालोचनार्थकत्वात् कथं श्रवणे वृत्तिरित्यत आह—धातूनामिति। शाम्यतिवदिति। श्यन्विकरणस्य शमेरुपशमार्थकस्य यथा दर्शने वृत्तिस्तद्वदित्यर्थः। 'यमोऽपरिवेषणे' इत्यपि गणसूत्रम्। भोजनपात्रे ओदनादिपूपादिभोज्यद्रव्याणां स्थापनं परिवेषणम्। तदाह—भोजनतोऽन्यत्रेति। भुक्त्य-

यति । व्यापारयति वेत्यर्थः । परिवेषणे तु यमयति ब्राह्मणान् । भोजयतीत्यर्थः । 'पर्यवसितं नियमयन्' इत्यादि तु नियमवच्छब्दात्तत्करोतीति ण्यौ बोध्यम् । ८२०

'स्खदिरअवपरिभ्यांच'(ग०सू १६४) मिन्नेत्येव । अवस्खादयति । परिस्खादयति । अपावपरिभ्यः इति न्यासकारः । स्वामी तु 'नकमि-'इति नञमुत्तरत्रिसूत्र्यामनुवर्त्य 'शमः अदर्शने' इति चिच्छेद । यमस्तु अपरिवेषणे मित्त्वमाह । तन्मते 'पर्यवसितं नि-

---

क्तकपरिवेषणादन्यत्रेत्यर्थः । 'यम उपरमे' इत्यस्य उपसर्गवशात् परिवेषणे ततोऽन्यस्मिन्नप्यर्थे वृत्तिः सम्भवति । तत्र अपरिवेषणे वृत्तौ मित्त्वं नेत्यर्थः । आयामयतीति । अन्नाऽपरिवेषणे वृत्तेर्न मित्त्वमिति भावः । तदाह—द्राघयतीति । दीर्घीकरोतीत्यर्थः । व्यापारयतीति । प्रवर्तयतीत्यर्थः । यमयति ब्राह्मणानिति । परिवेषणार्थकत्वान्मित्त्वमिति भावः । तदाह—भोजयतीति । भुञ्जते ब्राह्मणाः, तान्परिवेषणेन प्रवर्तयतीत्यर्थः । ननु 'पर्यवसितं नियमय'न्नित्यत्र अपरिवेषणार्थकतया मित्त्वाऽभावात्कथं ह्रस्व इत्यत आह—पर्यवसितमित्यादि । नियमनं नियमः । 'यमः समुपनिविषु च' इति भावे अप्प्रत्ययः । तस्मान्मतुप् । नियमवच्छब्दात्तत्करोतीति णिचि 'विन्मतोर्लुक्' इति मतुपो लुकि ण्यन्तान्नटशतरि गुणायादेशयोर्नियमयच्छब्द इति भावः । वस्तुतस्तु मतुपो लुकि टिलोपस्याऽप्राप्त्या 'अचो ञ्णिति' इति वृद्धौ पुगागमापत्तिः । ततश्च नियमवदित्यर्थकाद् अर्शआद्यजन्तात् नियमशब्दात् 'तत्करोति' इति णिचि इष्टवत्त्वाट्टिलोपे तस्य स्थानिवत्त्वादुपधावृद्ध्यभावे 'नियमयन्नि'ति समर्थनीयमिति शब्देन्दुशेखरे स्थितम् । 'स्खदिरवपरिभ्यां च'इत्यपि गण्यसूत्रम् । स्खदिरिति इका निर्देशः । अव परि आभ्यां परः स्खदधातुर्मिन्नेत्यर्थः । 'स्खद स्खदने' इति चटादौ पाठान्मित्त्वप्राप्तिः । परिस्खादयतीति । अषोपदेशत्वेन आदेशसकारत्वाऽभावान्न ष इति भावः । अपावेति । 'स्खदिरपावपरिभ्यः' इति न्यासकारः पपाठेत्यर्थः । तन्मते अपस्खादयतीत्यत्रापि मित्त्वाभावान्न ह्रस्वः । स्वामी त्विति । 'न कम्यमिचमाम्' इत्यत्र श्रुतः नञ् 'शमो दर्शने' 'यमोऽपरिवेषणे' 'स्खदिरवपरिभ्यां च' इति त्रिषु सूत्रेषु नानुवर्तते । शमः अदर्शने इति च्छेदः । शमधातुः अदर्शने मित्स्यादित्यर्थः । अमन्तत्वादेव सिद्धे नियमार्थमिदम् । 'अदर्शन एव शमधातुर्मित्स्यात् नतु दर्शने' इति स्वामिमतम् । इदं च पर्यवसानगत्या पूर्वमतान्नाऽतिरिच्यते । यमस्त्विति । यमधातोस्तु अपरिवेषण एव मित्त्वमाहेत्यर्थः । अमन्तत्वादेव सिद्धेरपरिवेषण एव यमधातुर्मित्त्वं नतु परिवेषण इति फलति । एवं च द्राघयति व्यापारयति वेत्यर्थे मित्त्वाद्ध्रस्वे 'आयमयती'त्येव रूपम् । परिवेषणे तु मित्त्वाऽभावाद्ध्रस्वाऽभावे 'यामयति ब्राह्मणा'निति भवतीति पूर्वमताद्विपरीतं फलति । एवं च 'पर्यवसितं नियमय'न्नित्यत्र यमेरपरिवेषणार्थत्वान्मित्त्वे ह्रस्वो निर्बाधः । तदाह—तन्मते इति । स्खदेर्घटादित्वादेव मित्त्वसिद्धेः 'स्खदिरवपरिभ्यां चे'ति सूत्रमपि नियमार्थम् । 'सोपस-

यमयन्' इत्यादि सम्यगेव । उपसृष्टस्य स्खदेश्चेदवादिपूर्वस्य इति नियमात्प्रस्खादयतीत्याह । तस्मात्सूत्रद्वये उदाहरणप्रत्युदाहरणयोर्व्यत्यासः फलितः । इदं च मतं वृत्तिन्यासादिविरोधादुपेक्ष्यम् । ८२१ फण गतौ । न इति निवृत्तम् असम्भवात् । निषेधात्पूर्वमसौ न पठितः । फणादिकार्यानुरोधात् । २३५४ **फणां च सप्तानाम्** ६।४।१२५॥एषां वा एत्वाभ्यासलोपौ स्तः किति लिटि सेटि थलि च । फेणतुः । फेणुः । पफणतुः । पफणुः । फेणिथ-पफणिथ । फणयति । वृतः । घटादिः समाप्तः । फणेः प्रागेव वृदित्येके । तन्मते फाणयतीत्येव । ८२२ राजृ दीप्तौ । स्वरितेत् । राजति-राजते । रेजतुः-रराजतुः । रेजे-रराजे । अतः इत्यनुवृत्तावपि विधान-

---

र्गस्य चेत् स्खदेमित्त्वं तर्हि अवपरिभ्यां परस्यैव मित्त्वं न तूपसर्गान्तरादिति । एवंच प्रस्खादयतीत्यत्र मित्त्वाभावान्न ह्रस्वः । अवस्खदयति परिस्खदयति इत्यत्र तु मित्त्वाद्ध्रस्व इति फलति । तदाह—उपसृष्टस्येति । **सोपसर्गस्येत्यर्थः** । पूर्वमते तु अवपरिभ्यां परस्य मित्त्वनिषेधादवस्खादयति परिस्खादयतीति न ह्रस्वः । प्रस्खदयतीत्यत्र तु अवपरिपूर्वकत्वाभावेन मित्त्वनिषेधाऽभावाद्ध्रस्व इति विपरीतम् । तस्मादिति । **'यमोऽपरिवेषणे' 'स्खदिरवपरिभ्यां चे'ति सूत्रद्वये उक्तरीत्या मित्त्वनियमविध्याश्रयणादुदाहरणप्रत्युदाहरणयोरुक्तरीत्या व्यत्यासः फलित इत्यर्थः** । उपेक्ष्यमिति । **'न पादम्याङ्' इति सूत्रव्याख्यावसरे 'यमोऽपरिवेषणे' इति मित्त्वं प्रतिषिध्यत' इति वृत्तिन्यासयोरुक्तत्वादिति भावः** । केचित्तु स्वामिमते 'पर्यवसितं नियमय'न्नित्यादिसामञ्जस्यात्तावेवोपेक्ष्यावित्याहुः । फण गतावित्ति । ननु घटादित्वेऽपि नायं मित्, इतः प्राक् 'स्वन अवतंसने, इत्युत्तरमेव 'घटादयो मित' इत्युक्तेः । अतः कथमत्र निषेधः तत्राह—न इति निवृत्तमसम्भवादिति । प्राप्ति विना मित्त्वस्य निषेधाऽसम्भवादिह नेति नानुवर्तते, किंतु मिदित्येवानुवर्तते इत्यर्थः । ननु फण गतावित्यत्र मिन्नेति यदि नानुवर्तते तर्हि 'न कम्यमिचमाम्' इति निषेधकाण्डात् प्रागेवाऽयं कुतो न पठितः । तत्राह—निषेधात्पूर्वमसौ न पठित इति । कुत इत्यत आह—फणादिकार्यानुरोधादिति । निषेधकाण्डात्प्रागेव फणेः पाठे कम्यमिचमादीनामपि फणादिष्वन्तर्भावः स्यादिति भावः । फणां च । **'अत एकहल्मध्ये' इत्यतो लिटीति 'थलि च सेटि' इति चानुवर्तते । 'ध्वसोः' इत्यतः एदिति, 'गमहन-' इत्यतः कितीति, 'वा जृभ्रमुत्रसाम्' इत्यतो वेति च । तदाह—एषामिति । फणादीनामित्यर्थः । फणामिति बहुवचनात् तदादिलोपः । 'फण गतौ' इत्यत्र मिदित्येवानुवर्तते नेति तु नानुवर्तते इत्यस्य प्रयोजनमाह—फणयतीति । वृदिति । कर्तरि क्विबन्तम् । वृतुधातुरिह समाप्त्यर्थकः** । तदाह—घटादिः समाप्त इति । फणेः प्रागेवेति । **एवं सति फणेरघटादित्वान्न मित्त्वमिति भावः । तदाह—तन्मते फाणयतीत्येवेति । इति घटादयः । राजृ दीप्ताविति । इत आरभ्य षण्णामेत्त्वाभ्यासलोपौ फणादिरित्वात्पक्षे भवतः । तदाह—रेजतुरित्यादि । ननु 'फणां च सप्तानाम्' इत्यत्र अत**

सामर्थ्यादात एत्वम् । ८२३ टु भ्राजृ ८२४ टु भ्राशृ ८२५ टु भ्लाशृ दीप्तौ । अनुदात्तेतः । भ्राजतेरिह पाठः फणादिकार्यार्थः । पूर्वं पाठस्तु व्रश्चादिषत्वाभावार्थः । तत्र हि राजिसाहचर्यात्फणादेरेव ग्रहणम् । भ्रेजे । बभ्राजे । 'वा भ्राश-' (सू २३२१) इति श्यन् वा । भ्राश्यते—भ्राशते । भ्रेशे-बभ्राशे । भ्लाश्यते-भ्लाशते । भ्लेशे-बभ्लाशे । द्वावपीमौ तालव्यान्तौ । ८२६ स्यमु ८२७ स्वन ८२८ ध्वन शब्दे । स्यमादयः क्षरत्यन्ताः परस्मैपदिनः । स्येमतुः-सस्यमतुः । अस्यमीत् । स्वेनतुः-सस्वनतुः । अस्वनीत्-अस्वानीत् । विष्वणति । अवध्वणति । सशब्दं भुङ्क्त इत्यर्थः । 'वेश्च स्वनः-' (सू २२७४) इति षत्वम् । फणादयो गताः । दध्वनतुः । ८२९ षम ८३० ष्टम अवैकल्ये । ससाम । तस्ताम । ८३१ ज्वल दीप्तौ । 'अतो लान्तस्य' (सू २३३०) अज्वालीत् । ८३२ चल कम्पने । ८३३ जल घातने । घातनं तैक्ष्ण्यम् । ८३४ टल ८३५ टूवल वैक्लव्ये । ८३६ ष्ठल स्थाने । ८३७ हल विलेखने । ८३८ णल गन्धे । बन्धने इत्येके । ८३९ पल गतौ । पल्लति । ८४० बल प्राणने धान्यावरोधने च । बलति । बेलतः । बेलुः । ८४१ पुल महत्त्वे । पोलति । ८४२ कुल संस्त्याने बन्धुषु च ।

इत्यनुवृत्तेः कथमिह एत्वाभ्यासलोपावित्यत आह—अत इत्यनुवृत्तावपीति । अत इति नानुवर्तते । तदनुवृत्तावपि फणादिसप्तानामपि वचनसामर्थ्यात् राजृधातोराकारस्याप्येत्वाभ्यासलोपस्य विकल्पः स्यादेवेत्यर्थः । अत इति राजादिधातौ न सम्भवतीति, असम्भवादिति यावत् । टु भ्राजृ टु भ्राशृ टु भ्लाशृ दीप्ताविति । टुरित् 'टूवितोऽथुच्' इत्येतदर्थः । अनुदात्तेत इति । 'एते त्रय' इति शेषः । ननु पूर्वं चवर्गान्तेष्वनुदात्तेत्सु भ्राजतेः पाठात् पुनरपि तस्येह पाठः किमर्थं इत्यत आह—भ्राजतेरिति । तर्हि 'एजृ भ्रेजृ भ्राजृ दीप्तौ' इति भ्राजेः पूर्वं पाठो व्यर्थ इत्यत आह—पूर्वं पाठस्त्विति । षत्वाभावार्थ इति । 'व्रश्चभ्रस्जे'ति षत्वविधौ भ्राजेर्ग्रहणाऽभावार्थं इत्यर्थः । ननु पूर्वं पठितस्यापि षत्वविधौ कुतो न ग्रहणमित्यत आह—तत्र हीति । षत्वविधौ हीत्यर्थः । एत्वाभ्यासलोपयोः पाञ्चिकत्वादाह—भ्रेजे बभ्राजे इति । द्वावपीमाविति । द्वितीयतृतीयावित्यर्थः । ननु 'विष्वणतीत्यत्र कथं षत्वम् ? केवलदन्याऽऽजन्तसादिरवाऽभावेन अषोपदेशतया आदेशसकारस्वाभावात्, अवध्वणतीत्यत्र हृण्कवर्गाभ्यां परत्वाभावाच्च षत्वस्य प्रसक्तिः । 'सात्पदाद्यो'रिति निषेधाच्चेत्यत आह—वेश्च स्वन इतीति । तत्र चकारेण अवाच्चेत्यपि लभ्यत इति भावः । फणादयो गता इति । ध्वनतेः प्रागिति शेषः । तत्र ध्वनेर्न फणादिकार्यमिति भावः । तदाह—दध्वनतुरिति । षम ष्टमेति । षोपदेशौ । तस्तामेति । सति ष्टुत्वनिवृत्तिरिति । तैक्ष्ण्यमिति । तीक्ष्णीभवनमित्यर्थः । टल टूवल वैक्लव्ये इति । वैक्लव्यं भयादिजनितो व्यग्रीभावः । णल गन्धे इति । णोपदेशोऽ-

धैर्त्यानं संघातः। बन्धुशब्देन तद्व्यापारो गृह्यते । कोलति । चुकोल । ८४३ शल ८४४ हुल ८४५ पत्लृ गतौ । शशाल । जुहोल । पपात । पेपतुः । पतिता । २३५५ पतः पुम् । ७।४।१६॥ अङि परे । अपप्तत् । 'नेर्गद–' (सू २२८५) इति णत्वम् । प्रण्यपप्तत् । ८४६ कथे निष्पाके । कथति । चकाथ । अकथीत् । ८४७ पथे गतौ । अपथीत् । ८४८ मथे विलोडने । मेथतुः । अमथीत् । ८४९ टुवम् उद्गिरणे । इदेव निपातनात् ऋत इत्वमिति सुधाकरः । ववाम । ववमतुः । वादित्वादेत्वाभ्यासलोपौ न । भागवृत्तौ तु वेमतुरित्याद्यप्युदाहृतम् । तद्भाष्यादौ न दृष्टम् । ८५० भ्रमु चलने । 'वा भ्राश–' (सू २३२१) इति श्यन्वा । भ्रम्यति–भ्रमति । 'भ्राम्यति' इति तु दिवादौ वक्ष्यते । २३५६ वा जॄभ्रमुत्रसाम् ।६।४। १२४ ॥ एषामेत्त्वाभ्यासलोपौ वा स्तः किति लिटि सेटि थलि च। भ्रेमतुः । बभ्रमतुः । अभ्रमीत् । ८५१ क्षर सञ्चलने । अक्षारीत् ।

अथ द्वावनुदात्तेतौ । ८५२ षह मर्षणे । 'परिनिविभ्यः—'(सू २२७५) इति षत्वम् । परिषहते । सेहे । सहिता । 'तीषसह–' (सू० २३४०) इति वा इट् । इडभावे दत्वधत्वष्टुत्वढलोपाः । २३५७ सहिवहोरोदवर्णस्य ६।३।११२॥

यम् । गन्धः–गन्धक्रिया । तद्व्यापार इति । बन्धुतानुकूला विवाहादिव्यापार इत्यर्थः । पत्लृधातुस्तवर्गप्रथमान्तः सेट्कः । लुङि लृदित्त्वात् च्लेरङि वृते अपत अ त् इति स्थिते—पतः पुम् । शेषपूरणेन सूत्रं व्याचष्टे—अङि परे इति । 'ऋदृशोऽङि' इत्यतः तदनुवृत्तेरिति भावः । पतेः पुम् स्यादङि परे इति फलितम् । पुमि मकार इत् उच्चारणार्थः । मित्त्वादन्त्यादचः परः । तदाह—अपप्तदिति । कथे निष्पाके इति । जलक्षीरघृतादीनां पादभागादिशोषणपर्यन्तः पाको निष्पाकः । अकथीदिति । एदित्त्वान्नवृद्धिः । एवं अमथीत् । टुवम् उद्गिरणे इति । टुरित् । नायमुदित् । तेन 'उदितो वा' इति क्त्वायामिड्विकल्पो न । 'गॄ निगरणे' इति दीर्घान्तोऽयम् । नन्वस्माद्धातोर्ल्युटि 'ऋत इद्धातोः' इति इत्वं बाधित्वा परत्वात् 'सार्वधातुक' इति गुणे सति 'उद्गरण'इत्येव निर्देशो युज्यत इत्यत आह–इदेवेति । उद्गिरण इत्यर्थनिर्देशः पाणिनीय इति सुधाकरो मन्यते । भ्रमु चलने इति । वक्रमार्गसंचारे इत्यर्थः । अयथार्थज्ञानेऽप्ययम् । 'उदितो वे'ति क्त्वायामिड्विकल्पार्थमुदित्त्वम् । वा जॄभ्रमु । 'अत एकहल्मध्ये' इत्यतो ङिटि इति 'थलि च सेटि' इति चानुवर्तते । 'ध्वसोरेद्धौ' इत्यतः एदिति 'गमहन' इत्यतः कितीति च । तदाह—एषामिति । अभ्रमीदिति । 'क्ङिति च' इति न वृद्धिः । अक्षारीदिति । 'अतो हरान्तस्य' इति वृद्धिः ।

षह मर्षणे इति । अपराधे सत्यपि कोपाऽनाविष्करणं मर्षणम् । इडभावे इति । सह् ता इति स्थिते 'हो ढः' इति ढत्वं 'झषस्तथोः' इति तकारस्य धत्वम् । धस्य ष्टुत्वेन

अनयोरवर्णस्य ओत्स्याड्ढलोपे सति। २३५८ सोढः ८।३।११५॥ सोढ्रूपस्य सहेः सस्य षत्वं न स्यात्। परिसोढा। २३५९ सिवादीनां वाड्व्यवायेऽपि ८।३।७१॥ परिनिविभ्यः परेषां सिवादीनां सस्य षो वा स्यादड्व्यवायेऽपि। पर्यषहत। पर्यसहत। ८५३ रमु क्रीडायाम्। रेमे। रेमिषे। रन्ता—रंस्यते। रंसीष्ट। अरंस्त।

अथ कसन्ताः परस्मैपदिनः। ८५४ षदॢ विशरणगत्यवसादनेषु। २३६० पाघ्राध्मास्थाम्नादाण्दृश्यर्तिसर्तिशदसदां पिबजिघ्रधमतिष्ठमनयच्छ-पश्यर्च्छधौशीयसीदाः ७।३।७८॥ पादीनां पिबादयः स्युरित्संज्ञकशकारादौ प्रत्यये परे। सीदति। ससाद। सेदतुः। सेदिथ—ससत्थ। सत्ता। सत्स्यति। लृदित्त्वादङ्। असदत्। 'सदिरप्रतेः'(सू १२७१)। निषीदति। न्यषीदत्। २३६१

ढः। 'ढो ढे लोपः' इति पूर्वस्य ढस्य लोप इत्यर्थः। सढा इति स्थितम्। सढिवहोः। ढलोपे इति। 'ढ्रलोप' इत्यतः तदनुवृत्तेरिति भावः। 'रलोप' इति तु नानुवर्तते, असम्भवात्। तथा च सकारादकारस्य ओत्त्वे सोढेतिरूपम्। 'परिसोढे'त्यत्र 'परिनिविभ्य' इति षत्वे प्राप्ते। सोढः। 'सोढ' इति सहेरोत्त्वसम्पन्नस्य षष्ठ्यन्तम्। 'सहेः साढः सः' इत्यतः स इति षष्ठ्यन्तमनुवर्तते। 'न रपर' इत्यतो नेति। 'मूर्धन्य' इत्यधिकृतम्। तदाह—सोढ्रूपस्येत्यादिना। सिवादीनाम्। 'परिनिविभ्यः' इति सूत्रादुत्तरमिदं सूत्रम्। तदाह—परिनिविभ्यः परेषामिति। 'सिवुसहसुट्स्तुस्वञ्जा'मिति शेषः। रमु क्रीडायामिति। नायमुदिदिति माधवः। केचित् उदितं मत्वा 'उदितो वा' इति वत्वायामिड्विकल्पमिच्छन्ति। अनिट्कोऽयम्। लिटि क्रादिनियमादिट्। तदाह—रेमिषे इति।

अथ कसन्ता इति। 'कस गतौ' इत्येतत्पर्यन्ता इत्यर्थः। षदॢ धातुः षोपदेशः अनिट्कश्च। लटि शपि सदॢ अ ति इति स्थिते—पाघ्राध्मा। पा घ्रा ध्मा स्था म्ना दाण् दृशि अर्ति सर्ति शदॢ सदॢ एषां द्वन्द्वात् षष्ठीबहुवचनम्। पिब जिघ्र धम तिष्ठ मन यच्छ पश्य ऋच्छ धौ शीय सीद एषां द्वन्द्वात् प्रथमाबहुवचनम्। यथासङ्ख्यमादेशाः। 'ष्ठिवुक्लमु' इत्यतः शितीत्यनुवर्तते। श्वासौ इच्चेति कर्मधारयः। अङ्गाच्चिसप्रत्ययविशेषणत्वात् तदादिविधिः। तदाह—रत्संज्ञकेति। ससादेति। इत्संज्ञकशकारादिप्रत्ययाऽभावात् न सीदादेशः। श इत् यस्य सः शित्। शितीति बहुव्रीह्याश्रयणे तु पाघ्रातोः कर्मणि लिटि एशि आत्त्वलोपे 'पपे' इत्यत्रापि पिबादेशः स्यादिति बोध्यम्। थलि क्रादिनियमप्राप्तस्य इटः 'उपदेशेऽत्वतः' इति निषेधेऽपि भारद्वाजनियमाद्वेट्। तत्र इट्पक्षे 'थलि च सेटी'त्येत्वाभ्यासलोपौ। तदाह—सेदिथ। ससत्थेति। सेदिव, सेदिम। क्रादिनियमादिट्। न्यषीददिति। 'प्राक्सितादड्व्यवायेऽपि' इति षत्वम्।

सदेः परस्य लिटि ८।३।११८॥ सदेरभ्यासात्परस्य षत्वं न स्याल्लिटि। निषसाद। निषेदतुः। ८५५ शदॢ शातने। विशीर्णतायामयम्। शातनं तु विषयतया निर्दिश्यते। २३६२शदेः शितः१।३।६०॥ शिद्भाविनोऽस्मादात्मनेपदं स्यात्। शीयते। शशाद। शेदतुः। शेदिथ–शशत्थ। शत्ता। अशदत्। ८५६ क्रुश आह्वाने रोदने च। क्रोशति। क्रोष्टा। क्रुशेः क्सः। अक्रुक्षत्। ८५७ कुच सम्पर्चनकौटिल्यप्रतिष्टम्भविलेखनेषु। कोचति। चुकोच। ८५८ बुध अवगमने। बोधति। बोधिता। बोधिष्यति। ८५९ रुह बीजजन्मनि प्रादुर्भावे च। रोहति।

'निषसादे'त्यत्र अभ्यासात् परस्य 'स्थादिष्वभ्यासेन' इति षत्वे प्राप्ते—सदेः परस्य। 'न रपर' इत्यतः नेत्यनुवर्तते। 'मूर्धन्य' इत्यधिकृतम्। सदेरित्यवयवषष्ठी। परशब्द उत्तरखण्डपरः। सदेरुत्तरखण्डस्य षत्वं नेति लभ्यते। फलितमाह—सदेरभ्यासात्पर-स्येति। शदॢ शातने इति। ननु शदॢधातोरस्मात् हेतुमण्ण्यन्तात् ल्युटि 'शदेरगतौ तः' इति दकारस्य तकारे शातनशब्दः। तथाच शातनं शीर्णतानुकूलक्रियेति फलति। एवं च सकर्मकत्वापत्तौ विशीर्यतीत्यर्थे शीयत इतिवचनमाणमुदाहरणं कथमित्यत आह—विशीर्णतायामिति। विशरणे इत्यर्थः। तर्हि कथं शातनमिति हेतुमण्णिजित्यत आह—शातनं तु विषयतयेति। विपूर्वात् 'षिञ् बन्धने' इत्यस्मात् विषयशब्दः। अविनाभावेने-त्यर्थः। प्रयोजकव्यापारं विना विशरणस्याऽसम्भवात् शातननिर्देशः। व्यर्थस्त्वाऽवि-वक्षितत्वात् विशरणमेव शदॢधात्वर्थ इति यावत्। शदेः शितः। 'अनुदात्तङित' इ-त्यस्मादात्मनेपदमित्यनुवर्तते। शॄ इत् यस्य सः शित्। शप् विवक्षितः। शिति वि-वक्षिते सतीत्यर्थः, तिङुत्पत्तेः पूर्वं सार्वधातुकाश्रयस्य शपोऽसम्भवात्। तदाह—शिद्भा-विन इति। शित् भावी भविष्यन् यस्मात्स शिद्भावी तस्मादित्यर्थः। शीयते इति। शपि शदेः शीयादेशः। विशीर्यतीत्यर्थः। शीयेते शीयन्ते इत्यादिः। शिद्विषयादिरयुक्ते-र्लिटि नात्मनेपदम्। 'हलन्तक्रुशकारादा'वित्युक्तेर्न शीयादेशः। तदाह—शशादेति। अनिट्कोऽयम्। क्रादिनियमप्राप्तस्य इटः 'उपदेशेऽत्वतः' इति निषमात्थलि भारद्वा-जनियमात् वेट्। तदाह—शेदिथ शशत्थेति च। इट्पक्षे 'थलि च सेटि' इत्येत्त्वाभ्यास-लोपाविति भावः। शेदिव। शेदिम। क्रादिनियमादिट्। अशददिति। लृदित्त्वाद्लुङिति भावः। क्रुशधातुरनिट्कः। चुक्रोशिथ। क्रादिनियमात्थलि नित्यमिट्। अजन्ताऽ-कारवत्त्वाभावान्न भारद्वाजनियमः। चुक्रुशिव। चुक्रुशिम। क्रोष्टेति। व्रश्चादिना शस्य षत्वे ष्टुत्वेन तकारस्य टः। क्रुशेः क्सः इति। इगुपधलक्षणत्वादिति भावः। अक्रुक्ष-दिति। व्रश्चादिना शस्य षः। 'षढोः' इति षस्य कः, सस्य षत्वम्। किरवाद्य गुणः। कुच सम्पर्चनेति। 'कुच शब्दे'इति पठितस्य पुनरिह पाठः सम्पर्चनादावेव ज्वलादिका-र्यण्प्रत्ययार्थः। अर्थनिर्देशः क्वचित्पाणिनीय इति भूधातौ प्रपञ्चितम्। बुध अवगमने इति। सेट्कोऽयम्, अनिट्सु श्यन्विकरणस्यैव बुधेर्ग्रहणात्। तदाह—बोधितेति।

करोह । करोहिथ । रोढा । रोक्ष्यति । अरुक्षत् । ८६० कस गतौ । अकासीत्-अकक्षीत् । कृत् । ज्वलादिगणः समाप्तः ।

अथ गूहरयन्ताः स्वरितेतः । ८६१ हिक्क अव्यक्ते शब्दे । हिक्कति—हिक्कते । ८६२ अञ्चु गतौ याचने च । अञ्चति—अञ्चते । अचु इत्येके । अचि इत्यपरे । ८६३ टु वाचृ याञ्चायाम् । याचति-याचते । ८६४ रेट्ट परिभाषणे । रेटति । रेटते । ८६५ चते ८६६ चदे याचने । चचात—चेते । अचतीत् । चचाद-चेदे । अचदीत् । ८६७ प्रोथृ पर्याप्तौ । पुप्रोथ । पुप्रोथे । ८६८ मिद ८६९ मेद मेधाहिंसनयोः । मिमेद—मिमिदे । थान्ताविमौ इति स्वामी । मिमेथ । धान्तौ इति न्यासः । ८७० मेधृ सङ्गमे च । मेधति । मिमेधे । ८७१ णिद ८७२ णेद कुत्साऽवज्ञानिकर्षयोः । निनेद । निनिदतुः । निनिदे । निनेदे । ८७३ शृधु ८७४ मृधु उन्दने । उन्दनं क्लेदनम् । शर्धति-शर्धते । शर्धिता । मर्धति-मर्धते । ८७५ बुधिर् अवबोधने । बोधति— बोधते । इरित्त्वादङ्वा । अबुधत्—अबोधीत्—अबोधिष्ट । 'दीपजन—' (सू २३२८) इति चिण्तु न भवति । पूर्वोत्तरसाहचर्येण देवादिकस्यैव तत्र ग्रहणात् । ८७६ उ बुन्दिर् निशामने । निशामनं ज्ञानम् । बुबुन्दे । अबुदत्—अबुन्दीत् । ८७७ वेणृ गतिज्ञानचिन्तानिशामनवादित्रग्रहणेषु ।

अबोधीत् । रहधातुरनिट्कः । क्सादिनियमात्थल्यपि नित्यमिट् । अजन्ताऽऽकारवत्त्वाऽभावात् न भारद्वाजनियमः । रोढेति । ढ्रलोपे इति ढलोपः । रोक्ष्यतीति । लृटि स्ये ढकषाः । अरुक्षदिति । इगुपधज्ञाप्रीकिरः कः इति कषाः कित्त्वाच्च गुणः । वृदिति । 'ज्वलितिकसन्तेभ्यः' इति उत्तराऽवधेरपि कर्तृग्रहणादेव सिद्धेः दृक्करणं स्पष्टार्थमित्याहुः । इति ज्वलादयः ।

गूहरयन्ता इति । 'गुहू संवरणे' इत्येतत्पर्यन्ता इत्यर्थः । चते चदे याचने । अचतीदिति । एदिरित्त्वान्न वृद्धिः । एवमचदीत् । बुधिर् अवबोधने इति । 'दुध अवगमने' इति केवलपरस्मैपदी गतः स तु ज्वलादिकार्यार्थः । अयं तु इरित् स्वरितेत् । अनिट्सु इत्यधिकरणस्यैव पाठादयं सेट् । अबुधदिति । इर इत्त्वेऽपि तदवयवस्य इकारस्य प्रत्येकमित्त्वाभावान्न वृद्धिः । स्वरितेत्त्वप्रयुक्तमात्मनेपदं तु भवत्येव, स्वरितेत्सु पाठसामर्थ्यात्, वस्तुतस्तु इकारस्य प्रत्येकमित्त्वेऽपि न वृद्धिः, 'इदितो नुम्धातोः' इत्यत्र कर्मधारयमाश्रित्य इत्संज्ञकेकारान्तस्यैव नुम्विधेः । पूर्वोत्तरेति । जनपूरिसाहचर्येणेत्यर्थः । उ बुन्दिरिति । आद्य उकार इत् 'उदितो वेति क्त्वायामिड्विकल्पार्थः । अबुददिति । इरित्त्वादङि 'अनिदितामिति नलोपः । इर इकारस्य प्रत्येकमित्संज्ञाविरहात्, 'अनिदितामित्यस्य इत्संज्ञकेकारान्तस्याभिन्नानामित्यर्थाश्रयणाच्चेति शब्देन्दुशेखरे स्थितत्वात् । वेणृ गतीति । वाद्यमाण्डस्य वादनार्थं ग्रहणं वादित्रग्रहणम् । खनुधातुरुदित् ।

वेणति-वेणते । नान्तोऽप्ययम् । ८७८ खनु अवदारणे । खनति-खनते । २३६३ **गमहनजनखनघसां लोपः क्ङित्यनङि ६।४।९८॥** एषामुपधाया लोपः स्यादजादौ क्ङिति न त्वङि । चख्नतुः । 'ये विभाषा' (सू २३१६) । खायात्-खन्यात् । ८७९ चीवृ आदानसंवरणयोः । चिचीव-चिचीवे । ८८० चायृ पूजानिशामनयोः । ८८१ व्ययृ गतौ । अव्ययीत् । ८८२ दाशृ दाने । ददाश—ददाशे । ८८३ मेषृ भये । गतौ इत्येके । मेषति-मेषते । ८८४ म्रेषृ ८८५ म्लेषृ गतौ । ८८६ असृ गतिदीप्त्यादानेषु । असति-असते । आस-आसे । अयं षान्तोऽपि । ८८७ स्पश बाधनस्पर्शनयोः । स्पर्शनं ग्रथनम् । स्पशति—स्पशते । ८८८ लष कान्तौ । 'वा भ्राश—' (सू २३२१) इति श्यन्वा । लष्यति—लषति । लेषे । ८८९ चष भक्षणे । ८९० छष हिंसायाम् । चच्छषतुः । चच्छषे । ८९१ झष आदानसंवरणयोः । ८९२ भ्रक्ष ८९३ म्लक्ष अदने । भक्ष इति मैत्रेयः । ८९४ दासृ दाने । ८९५ माहृ माने । ८९६ गुहू संवरणे । **२३६४ ऊदुपधाया गाहः ६।४।८९ ॥** गुह उपधाया ऊत्स्याद्गुणहेतावजादौ प्रत्यये । गूहति—गूहते । ऊदित्त्वादिड्वा । गूहिता—गोढा । गूहिष्यति—गोक्ष्यति । गूहेत् । गुह्यात् ।

कत्वायामिड्विकल्पः । गमहन । उपधाया इति । 'ऊदुपधायाः' इत्यतः तदनुवृत्तेरिति भावः । अजादाविति । 'अचि श्नुधातुभ्रुवां य्वोरियङुवङौ' इत्यतः अनुवृत्तस्य अचि इत्यस्य अङ्गाधिकारप्रत्ययविशेषणतया तदादिविधिलाभ इति भावः । क्ङितीत्युक्तेः चखानेत्यत्र नोपधालोपः । अनङीति किम् । अगमत् । चख्ने । चख्नाते इत्यादि । व्यय गताविति । अयं वित्तत्यागेऽपि, अर्थनिर्देशस्योपलक्षणत्वात् । अव्ययीदिति । ह्रीयन्तेति न वृद्धिः । चष भक्षणे इति । चचाष, चेषतुः । छष हिंसायामिति । वैरूप्यसम्पादकादेशादित्त्वादेरभ्यासलोपौ न । तदाह—चच्छषतुः इति । गुहू संवरणे इति । उदुपधोऽयम् । ऊदित् । ऊदुपधायाः । 'गोढ' इति कृतलघूपधगुणस्य गुहेर्निर्देशः । ततश्च गुणविषय एवेदं भवति । अचि श्नुधातुभ्रुवां य्वोरियङुवङौ' इत्यतः अनुवृत्तस्य अचीत्यस्य अङ्गाधिकारप्रत्ययविशेषणत्वात्तदादिविधिः । तदाह—गुह उपधाया इत्यादिना । गुणहेताविति । गुणं प्रति परनिमित्तभूत इत्यर्थः । गुणापवादः । जुगूह । गुणहेताविति किम् । जुगुहतुः । जुगुहुः । जुगुहे । जुगुहाते । जुगुहिरे । जु गूहिथ-जुगोढ । ढत्वधत्वष्टुत्वढलोपाः । जुगुढथुः । जुगूह । जुगुहिषे-जुघुक्षे । ढत्वभष्भावकत्वषत्वानि । जुगुहाथे । जुगुहिध्वे—जुघुढ्वे । जुगूहे । जुगुहिव-जुगुह्व । जुगुहिम-जुगुह्म । जुगुहे । जुगुहिवहे-जुगुह्वहे । जुगुहिमहे-जुगुह्महे । इति लिटि रूपाणि सिद्धवत्कृत्य लुटि इट्पक्षे ऊत्वे रूपमाह-गूहितेति । इडभावे अजादिप्रत्ययाऽभावात् ऊत्वाऽभावे गुणे ढत्वधत्वष्टुत्वढलोपेषु रूपमाह—गोढेति । लृटि स्ये इट्पक्षे ऊत्वे रूपमाह—गूहिष्यतीति । इडभावे तु गुणढत्वभष्भावकत्वषत्वेषु रूप-

अगूहीत्। इडभावे क्सः। अघुक्षत्। २३६५ लुग्वा दुहदिहलिहगुहामात्मनेपदे दन्त्ये ७।३।७३॥ एषां क्सस्य लुग्वा स्याद्दन्त्ये तङि। दत्वधत्वष्टुत्वढलोपदीर्घाः। अगूढ-अघुक्षत। 'क्सस्यादि' (सू २३३७) इत्यन्त्यलोपः। अघुक्षाताम्। अघुक्षन्त। अगुढ्वहि-अघुक्षावहि। अघुक्षामहि।

अथ अन्ता उभयपदिनः। ८६७ श्रिञ् सेवायाम्। श्रयति—श्रयते। शिश्रियतुः। श्रयिता। 'णिश्रि—' (सू २३१२) इति चङ्। अशिश्रियत्। ८६८ भृञ् भरणे। भरति। बभार। बभ्रतुः। बभर्थ। बभृव। बभृषे। भर्ता। २३६६

माह—घोक्ष्यतीति। गूहिष्यते, घोक्ष्यते इत्यप्युदाहार्यम्। गूहतु। गूहताम्। अगूहत्। अगूहत। गूहेदिति। 'गूहेतेरप्यपि ज्ञेयम्। गुह्यादिति। आशीर्लिङि अजादिप्रत्ययाऽभावादूत्वं न। कित्त्वान्न गुणः। लुङि इट्पक्षे सिज्लोपे ऊत्वे रूपमाह—अगूहीदिति। अगूहिष्टाम्। अगूहिषुरित्यादि। इडभावे क्सः इति। इगुपधज्ञाप्रीकिरः कः इति भावः। अघुक्षदिति। हत्वभष्भावकत्वषत्वानि। अघुक्षताम्। अघुक्षन्नित्यादि। लुङ्लस्तङि विशेषमाह—लुग्वा दुह। दन्त्ये तङीति। दन्त्यादौ तङीत्यर्थः। प्रत्ययाऽदर्शनत्वात्सर्वादेशोऽयं लुक्। अगूढेति। अगुह् स त इति स्थिते क्सस्य कित्त्वेन गुणहेतुत्वाभावादजादित्वाभावाच्च ऊत्वाभावे क्सलुकि अगुह् त इति स्थिते प्रक्रियां दर्शयति—हत्वधत्वष्टुत्वढलोपदीर्घा इति। अघुक्षतेति। क्सलुगभावे हत्वभष्भावकत्वषत्वानीति भावः। अघुक्षाताम्मिति। क्सादेशे क्सस्य कित्त्वेन गुणहेतुत्वाभावादूत्वाभावे हत्वभष्भावकत्वषत्वेषु कृतेषु 'क्सस्याचीत्यस्यय्लोपे अतः परत्वाभावादतो लिङ इति न भवतीति भावः। अघुक्षन्तेति। अस्य अजादित्वाभावात्तस्मिन्परे क्सस्य अन्त्यलोपाभावादतः परत्वाऽभावात् "आत्मनेपदेष्वनतः" इत्यदादेशो न भवति। कृते तु झोऽन्तादेशे क्सस्याऽन्तलोप इति भावः। अघुक्षथाः। अघुक्षाथाम्। अघुक्ष्वम्। अघुक्षि। इति रूपाणि सिद्धवत् कृत्याह—अगूहीति। दन्त्यादिप्रत्ययपरत्वात् क्सस्य लुकि अजादिप्रत्ययाभावात् ऊत्वाभावे रूपम्। अघुक्षावहीति। क्सलुगभावे हत्वभष्भावकत्वषत्वानि। अतो दीर्घश्च। अघुक्षामहीति। दन्त्यादिप्रत्ययपरत्वाऽभावाच्च क्सलुक् इति गृहन्त्यन्ताः स्मरितेतः।

उभयपदिन इति। श्रित्त्वादिति भावः। श्रिञ्धातुः सेट्। शिश्रियतुरिति। कित्त्वाच्च गुणः। इयङ्। शिश्रियुः। शिश्रयिथ। शिश्रियथुः। शिश्रिय। शिश्राय—शिश्रय। शिश्रियिव। शिश्रियिम। शिश्रिये। शिश्रियाते। शिश्रियिरे। शिश्रियिषे। शिश्रियाथे। शिश्रियिढ्वे—शिश्रियिध्वे। शिश्रिये। शिश्रियिवहे। शिश्रियिमहे। श्रयिता। श्रयिष्यति। श्रयिष्यते। श्रयतु। श्रयताम्। अश्रयत्। अश्रयत। श्रयेत्। श्रयेत। श्रीयात्। श्रयिषीष्ट। लुङि विशेषमाह—णिश्रीति। अशिश्रियदिति। चङीति द्वित्वम्। अशिश्रियत। अश्रयिष्यत-अश्रयिष्यत। भृञ् धातुरनिट्। भरतीति। भरते इत्यपि

ऋद्धनोः स्ये ७।२।७०॥ ऋतो हन्तेश्च स्यस्य इट् स्यात्। भरिष्यति। २३६७ रिङ् शयग्लिङ्क्षु ७।४।२८॥ शे यकि यादावार्धधातुके लिङि च ऋतो रिङादेशः स्यात्। रीङि प्रकृते रिङ्विधिसामर्थ्यादीर्घो न। भ्रियात्। २३६८ उश्च १।२।१२॥ ऋवर्णान्तरो झलादी लिङ् तङ्परः सिच्चेरयेतौ कितौ स्तः। भृषीष्ट। भृषीयास्ताम्। अभार्षीत्। अभार्ष्टाम्। अभार्षुः। २३६९ हृस्वादङ्गात् ८।२।२७॥ सिचो लोपः स्याज्झलि। अभृत। अभृषाताम्। अभरिष्यत्। ८९९ हृञ् हरणे।

ज्ञयम्। बभ्रतुरिति। कित्त्वाच्च गुणः। यण्। बभ्रुः। थलादौ 'एकाच' इति नेट्, कृसृभृवृस्तुद्रुस्रुश्रुभ्रु लिट्यपि तङ्निषेधस्य प्रवृत्तेः। थलि 'अचस्तास्वत्' इति निषेधाच्च, ऋदन्तेषु भारद्वाजमतेऽपि थलि निषेधाच्च। तदाह—बभर्थेति। बभ्रथुः। बभ्र। बभार-बभर। इति सिद्धवत्कृत्याह—बभृवेति। बभ्रुम। बभ्रे। बभ्राते। बभ्रिरे। इति सिद्धवत्कृत्याह—बभृषे इति। बभ्राथे। बभृढ्वे। बभ्रे। बभृवहे। बभृमहे। लृटि स्ये इण्निषेधे प्राप्ते—ऋद्धनोः। ऋत् हन् अनयोर्द्वन्द्वात् पञ्चम्यर्थे षष्ठी। 'स्ये' इति षष्ठ्यर्थे सप्तमी। 'आर्द्धधातुकस्ये'त्यतः इडित्यनुवर्तते। तदाह—ऋत इत्यादिना। 'एकाच' इति इण्निषेधस्यापवादः। भरिष्यतीति। भरिष्यते। भरतु। भरताम्। अभरत्। अभरत। भरेत्। भरेत। आशीर्लिङि परस्मैपदे भृ यात् इति स्थिते—रिङ् शय। श यक् लिङ् पर्या द्रुग्द्वात्सप्तमीबहुवचनम्। 'अयङ् यि क्ङिती'त्यतो यीति सप्तम्यन्तमनुवृत्तं लिङो विशेषणम्। तदादिविधिः। शे तु यीति नान्वेति, असम्भवात्। नापि यकि, अव्यभिचारात्। अत एव 'अकृत्सार्वधातुकयो'रित्यनुवृत्तमपि लिङ एव विशेषणम्। तदाह—शे यकीत्यादिना ऋदन्ता इति। 'रीङृत' इत्यतः तदनुवृत्तेरिति भावः। अङ्गस्येत्यधिकृतम्। 'ऋत' इति तद्विशेषणम्। तदन्तविधिः। ऋदन्तस्याऽङ्गस्येति लभ्यते। आदेशे ङकार इत्। ङित्त्वात् अन्तादेशः। निदिश्यमानपरिभाषयैव सिद्धे ङकारोच्चारणम्, इडागमेनैव सिद्धे रेफोच्चारणं च स्पष्टार्थम्। ननु भ्रियादिति वक्ष्यमाणमुदाहरणमयुक्तम्, कृते रिङि 'अकृत्सार्वधातुकयो'रिति दीर्घप्रसङ्गादित्यत आह—रिङि प्रकृते इति। कृते रिङि यदि दीर्घः स्यात्तर्हि रिङ्विधिर्व्यर्थः स्यात्, 'रीङृत' इत्येव सिद्धेः। अतो रिङि कृते सति न दीर्घ इत्यर्थः। भ्रियादिति। भ्रियास्ताम्मित्यादि सुगमम्। आशीर्लिङि भृषीष्टेत्यत्र गुणे प्राप्ते—उश्च। 'लिङ्सिचावात्मनेपदेषु' इति सूत्रमनुवर्तते। 'हको झल्' इत्यतो झलिति च। तदाह—ऋवर्णादिति। भृषीष्टेति। कित्त्वाच्च गुणः। अभार्षीदिति। परस्मैपदे सिचि वृद्धौ रपरत्वम्। तङि तु अभृ स् त इति स्थिते—हस्वादङ्गात्। हस्वान्तादित्यर्थः। सिच इति भाष्यम्। 'झलो झलि' इत्यतो झलीति, 'संयोगान्तस्य लोपः' इत्यतो लोप इति चानुवर्तते इत्यभिप्रेत्य शेषपूरणेन सूत्रं व्याचष्टे—सिचो लोपः स्याज्झलीति। हस्वात्किम्। अत्यौष्ट। अग्रास्किम्। अलाविष्टाम्। सिचः किम्। द्विष्टराम्। द्विष्टमाम्। सुजन्वा-

हरणं प्रापणं स्वीकारः स्तेयं नाशनं च । जहर्थ । जह्रिव । जह्रिषे । हर्ता । हरिष्यति । ९०० धृञ् धारणे । धरति । अधार्षीत् । अधृत । ९०१ णीञ् प्रापणे । निनयिथ-निनेथ । निन्यिषे ।

अथाजन्ताः परस्मैपदिनः । ९०२ धेट् पाने । धयति । २३७० आदेच उपदेशेऽशिति ६।१।४५॥ उपदेशे एजन्तस्य धातोरात्वं स्यान्न तु शिति ।

त्तरसमपौ । अभूतेति । 'उश्च' इति सिचः किरवान्न गुणः । 'झलो'ग्युक्तेः अभूषाताम्, अभूक्षतेत्यत्र न सिज्लोपः । अनतः परत्वात् झस्य अदादेशः । अभूथाः । अभूषाथाम् । अभूढ्वम् । अभूषि । अभूष्वाह । अभूष्महि । हृधातुरनिट् । हरणं चतुर्विधमित्याह—प्रापणमित्यादि । तद्यथा—भारं हरति, प्रापयतीत्यर्थः । अंशं हरति, स्वीकरोतीत्यर्थः । परस्वं हरति, चोरयतीत्यर्थः । पापं हरति हरते वा । नाशयतीत्यर्थः । जहार । जहतुः । जहुः । 'एकाचः' इति इण्निषेधस्य क्रादिष्वेव लिटि नियमितत्वादिह थलि इटि प्राप्ते 'अचस्तास्वत्' इति तन्निषेधः । ऋदन्तत्वेन भारद्वाजमतेऽपि इण् निषेध एव । तदाह—जहर्थेति । जहथुः । जह । जहार-जहर । इति सिद्धवत्कृत्याह—जह्रिवेति । क्रादिनियमादिट् । जहिम । जह्रिषे । क्रादिनियमादिट् । जहाथे । जह्रिढ्वे—जहिढ्वे । जह्रे । जह्रिवहे । जह्रिमहे । लुङादिषु भृञ इव रूपाणि । धृञ् धातुरनिट् । हृञ इव रूपाणि । णीञ् धातुरनिट् णोपदेशः । नयति-नयते । निनाय । निन्यतुः । निन्युः । क्रादिनियमाल्लिटि इट् । थलि तु 'अचस्तास्वत्' इति इण्निषेधस्य भारद्वाजनियमादिड्विकल्प इत्यभिप्रेत्याह—निनयिथ निनेथेति । निन्यिषे । निन्याथे । निन्यिढ्वे—निन्यिढ्वे । निन्ये । निन्यिवहे । निन्यिमहे । नेता । नेष्यति । नेष्यते । नयतु । नयताम् । अनयत् । अनयत । नयेत् । नयेत । नीयात् । नेषीष्ट । अनैषीत् । अनेष्ट । अनेष्यत् । अनेष्यत । इत्यजन्ता उभयपदिनो गताः ।

परस्मैपदिन इति । 'जि घ्रि अभिभवे इत्येतस्पर्यन्ता' इति शेषः । धेट् पाने इति । 'स्तनंधयी'त्यादौ ङीषर्थं टित्त्वम् अवयवे टित्त्वस्य व्यर्थतया समुदायार्थत्वादिति हरदत्तः । आदेचः । एजन्तस्य धातोरिति । 'लिटि धातोः' इत्यतः धातोरित्यनुवृत्तं एच्चा विशेष्यते, तदन्तविधिरिति भावः । न तु शितीति । श् चासौ इच्चेति कर्मधारयात्सप्तमी, प्रत्ययविशेषणत्वात्तदादिविधिः, इत्संज्ञकशकारादौ प्रत्यये परे इति लभ्यते । 'क्ङिति च' 'न व्यो लिटि' इत्यादिपूर्वोत्तरसूत्राणां प्रत्ययेष्वेव प्रवृत्त्या प्रत्यये इति विशेष्यलाभः । 'अशिती'ति न पर्युदासः । तथा सति क्ङिद्भिन्ने 'प्रत्यये' परे इत्यर्थः स्यात् । ततश्च 'सुग्लः' इत्यत्र ग्लैधातोः 'आतश्चोपसर्गे' इति कप्रत्ययो न स्यात्, कप्रत्ययनिमित्तमात्त्वम्, आदन्तात्प्रत्यय इत्यन्योन्याश्रयात् । 'शिति नेति' प्रसज्यप्रतिषेधे तु आत्त्वस्य अनैमित्तिकतया कप्रत्ययनिमित्तकत्वाऽभावात् प्रथममात्त्वे कृते कप्रत्यय. सुपपादः । शितीति बहुव्रीह्याश्रयणे ग्लैधातोर्भावे लिटि 'भावकर्मणोः' इति

२३७१ आत औ णलः ७।१।३४॥ आदन्ताद्धातोर्णल औकारादेशः स्यात्। दधौ। २३७२ आतो लोप इटि च ६।४।६४॥॥ अजाद्योरार्धधातुकयोःक्ङिदिटोः परयोरातो लोपः स्यात्। द्वित्वात्परत्वाल्लोपे प्राप्ते 'द्विर्वचनेऽचि' (सू २२४३) इति निषेधः। द्वित्वे कृते आलोपः। दधतुः। दधुः। दधिथ-दधाथ। दधिव। दधिम। धाता। २३७३ दाधा घ्वदाप् १।१।२० ॥ दारूपा धारूपाश्च धातवो

तङि एशि आत्त्वे आतो लोपे 'जग्ले' इति न सिध्यत्, एशः शित्त्वेन तस्मिन्परे आत्त्वस्य निषेधात्। अतः कर्मधारयमाश्रित्य इत्संज्ञकशकारादौ प्रत्यये परे नेत्यर्थं आश्रितः। एवं च पर्युदासेऽपि न क्षतिः। इत्संज्ञकशकारादिभिन्नप्रत्यये विवक्षिते हृत्या अयणेन सुश्लु इत्यत्र कप्रत्ययात्प्रागेव आत्त्वोपपत्तेः। उपदेशे किम्? चेता, स्तोता। धातोः किम्? गोभ्याम्। 'गमेर्डोः' इति डोप्रत्ययोपदेशात् उपदेशे यः एच तदन्त त्वात् गो इत्यस्य प्राप्तिः। न च डित्करणादीनामुपदेशे एजन्तत्वाभावात् कथमात्त्वमिति न शङ्क्यम्, 'उदीचां माङ' इति निर्देशेन 'नानुबन्धकृतमनेजन्तत्वम्' इति ज्ञापनादित्यास्तां तावत्। तथा च प्रकृते लिटि द्विरादौ दधा अ इति स्थिते—आत औ। औ इति लुप्तप्रथमाकम्। अङ्गस्येत्यधिकृतं पञ्चम्या विपरिणम्यते। 'आत' इति तदिशेषणम्। तदन्तविधिः। तदाह—आदन्ताद्धातोरिति। णल् प्रकृतिश्च धातुरेवेति धातुग्रहणम्। तथाच णल औत्वे वृद्धौ रूपमाह—दधाविति। दधा अतुसिति स्थिते—आतो लोपः। 'आर्धधातुके' इत्यधिकृतम्। 'दीङो युडचि क्ङिति' चानुवर्तते। अचीत्यार्द्धधातुकविशेषणत्वात्तादिविधिः। क्ङिति अजाद्यार्द्धधातुके इटि च आतो लोप इति लभ्यते। फलितमाह—अजाद्योरिति। इटः आर्द्धधातुकत्व तु तदवयवत्वाद्बोध्यम्। क्ङितीति च इटो न विशेषणम्, इड्ग्रहणसामर्थ्यात्। इडित्यनेन उत्तमपुरुषैकवचनम् इडागमश्च गृह्यते। अजाद्योः किम्? ग्लेधातोः कर्मणि लटि यकि ग्लायते। आर्धधातुकयोः किम्? यान्ति वान्ति। दधौ इत्यत्र तु क्ङित्त्वाभावान्नालोपः। सति तस्मिन् औत्वं न स्यात्। ननु धा अतुस् इति स्थिते द्वित्वात्परत्वादाल्लोपे सति एकाच्त्वाभावात् द्वित्वं न स्यादित्याशङ्क्य परिहरति—द्वित्वादित्यादिना। धेट्धातुरनिट्। भारद्वाजनियमात् यलि वेडित्याह—दधिव दधिमेति। इट् पक्षे आल्लोपः। दधथुः। दध। दधौ। इति सिद्धवत्कृत्याह—दधिवेति। वसि आत्त्वे क्ङितीत्यादिनियमादिटि आल्लोप इति भावः। दधिमेत्यपि एवं ज्ञेयम्। धातेति। लुटि आत्त्वे तासादि इति भावः। धास्यति। धयतु। अधयत्। धयेत्। आशीर्लिङि घुसंज्ञाकार्यं वक्ष्यन् घुसंज्ञां दर्शयति—दाधा घ्वदाप्। 'दे'त्यनेन स्वाभाविकाऽऽकारान्तयोः 'डु दाञ् दाने' 'दाण् दाने' इत्यनयोः कृतात्त्वयोः 'दो अवखण्डने' 'देङ् रक्षणे' इत्यनयोश्चाक्षणिकयोश्च, 'धे'त्यनेन स्वाभाविकाऽऽकारान्तस्य 'डु धाञ् धारणपोषणयोः' इत्यस्य, चाक्षणिकस्य 'धेट् पाने' इत्यस्य च ग्रहणम्। 'गामादाग्रहणेष्वविशेषः' इति परिभा-

घुसंज्ञाः स्युर्दाप्दैपौ विना । २३७४ **एलिङि** ६।४।६७॥घुसंज्ञानां मास्थादीनां चैत्वं स्यादार्धधातुके किति लिङि । धेयात् । धेयास्ताम् । धेयासुः । २३७५ **विभाषा धेट्श्व्योः** ३।१।४६॥ आभ्यां च्लेश्चङ् वा स्यात्कर्तृवाचिनि लुङि परे । 'चङि' (सू २३१५) इति द्वित्वम् । अदधत् । अदधताम् । २३७६ **विभाषा घ्राधेट्शाच्छासः** २।४।७८॥ एभ्यः सिचो लुग्वा स्यात्परस्मैपदे परे । अघात् । अघाताम् । अघुः । २३७७ **यमरमनमातां सक्च** ७।२।७२॥ एषां सक् स्यादेभ्यः सिच इट् स्यात्परस्मैपदेषु । अयासीत् । अयासिष्टाम् । अयासिषुः । ९०३

षाबलात् तत्र दाग्रहणेन धारूपस्यापि ग्रहणाच्च। अत एव 'दो दद् घोः' इत्यत्र घेण्णिवृत्त्यर्थं दाग्रहणमर्थवत्, दधातेर्हिभावविधानादेव निवृत्तिसिद्धेः। तदाह—दारूपा धारूपाश्चेति । एलिङि । एरिति प्रथमान्तम् । 'आर्धधातुके' इत्यधिकृतम् ।'घुमास्थागापाजहातिसाम्' इत्यनुवर्तते । घु मा स्था गा पा जहाति सा एषां द्वन्द्वात् षष्ठीबहुवचनम् । तदाह —घुसंज्ञानां मास्थादीनामिति । किति लिङि इति । 'दीङो युडचि क्ङिति' इत्यतः । कितीत्यनुवृत्तेरिति भावः । ङिदिति नानुवर्तते । लिङर्धधातुकस्य ङित्त्वासंभवात् । लुङि च्लेः सिचि प्राप्ते—'विभाषा धेट् । 'च्लि लुङी'त्यनुवर्तते । 'णिश्रिद्रुस्रुभ्य' इत्यतः कर्तरि चङिति च । तदाह —आभ्यामिति । धेट् धि आभ्यामित्यर्थः । अदधदिति । चङि द्वित्वे आल्लोप इति भावः । अदधताम् । अदधन् । अदधः । अदधतम् । अदधत । अदधम् । अदधाव । अदधाम । चङभावपक्षे विशेषमाह—विभाषा घ्रा । 'व्यचत्रियार्षे' इत्यतः लुगित्यनुवर्तते । 'गातिस्था' इत्यतः 'सिचः परस्मैपदेष्विति' । तदाह—एभ्य इति । 'घ्रा गन्धोपादाने' 'धेट् पाने' 'शो तनूकरणे' 'छा छेदने' 'षो अन्तकर्मणि' एषां समाहारद्वन्द्वात्पञ्चम्येकवचनम् । शोप्रभृतीनां कृतात्वानां निदृशः । धेटः 'गातिस्थाघुपा' इति नित्यं प्राप्ते अन्येषामप्राप्ते वचनम् । अधुरिति । 'उरत्पदान्तात्' इति परूपम् । अधाः । अधातम् । अधात । अधाम् । अधाव । अधाम । सिचो लुगभावपक्षे आह—यमरम । यम, रम, नम, आत् एषां द्वन्द्वात्षष्ठीबहुवचनम् । 'आदित्यनेन आदन्तं गृह्यते । तदाह—एषां सक् स्यादिति । सकि ककार इत्, अकार उच्चारणार्थः । कित्त्वादन्तावयवः । चकारेण 'हृदृशति' इत्यतः इडिति 'स्तुसुधूञ्भ्यः' इत्यतः परस्मैपदेष्विति चानुकृष्यते । 'अञ्जेः सिची'त्यतः सिचीति च । तच्च षष्ठ्या विपरिणम्यते । तदाह—एभ्यः सिच इट् चेति । अयासीदिति । धातोः सगागमः । सिच इट्, ईट् । 'इट ईटि' इति सिज्लोपः । अयासिष्टामिति । अपृक्तत्वाऽभावादीडभावाच्च सिज्लोपः । सस्य षत्वे तकारस्य ष्टुत्वेन टः । अयासिषुरिति । अयासीः । अयासिष्टम् । अयासिष्ट । अयासिषम् । अयासिष्व । अयासिष्म । यद्यपि अयासीदित्यत्र सगिटोर्विधिर्व्यर्थ एव, तथापि अयासिष्टामित्यादार्थम् आतः सगिड्विधानम् । यमादीनां

ग्लै ६०४ ग्लै हर्षक्षये। हर्षक्षयो धातुक्षयः। ग्लायति। जग्लौ। जग्लिथ—जग्लाथ। २३७८ वाऽन्यस्य संयोगादेः ६।४।६८॥ घुमास्थादेरन्यस्य संयोगादेर्धातोरात एत्वं वा स्यादार्धधातुके किति लिङि। ग्लायात्। ग्लेयात्। अग्लासीत्। ग्लायति। ६०५ ष्ट्यै न्यक्करणे। न्यक्करणं तिरस्कारः। ६०६ ष्ट्रै स्वप्ने। ६०७ ष्ट्रै तृप्तौ। ६०८ ध्यै चिन्तायाम्। ६०९ रै शब्दे। ६१० स्त्यै ६११ ष्टयै शब्दसङ्घातयोः। स्त्यायति। षोपदेशस्यापि सत्वे कृते रूपं तुल्यम्। षोपदेशफलं तु तिष्ठ्यासति, अतिष्ठ्यपदित्यत्र षत्वम्। ६१२ खै खदने। ६१३ क्षै ६१४ जै

तु अयंसीदित्यादौ हलन्तलक्षणवृद्धेरभावार्थम्, अयासिष्टामित्याद्यर्थं च तदेतत् तत्तद्धातुषु स्पष्टीभविष्यति। अभास्यत्। ग्लै ग्लै हर्षक्षये। धातुक्षय इति। बलक्षय इत्यर्थः। अनिटाविमौ। ग्लायतीति। शपि आयादेशः। शिद्भिन्नत्वादात्त्वं न। जग्लाविति। णलि आत्त्वे 'आत औ णलः' इति औभावे वृद्धिरिति भावः। अनुनासादौ द्वित्वे कृते आतो लोपः। जग्लतुः। जग्लुः। भारद्वाजनियमात्थलि वेडित्याह—जग्लिथ जग्लाथेति। इट्पक्षे आल्लोपः। जग्लथुः। जग्ल। जग्लौ। जग्लिव। जग्लिम। ग्लाता। ग्लास्यति। ग्लायतु। अग्लायत्। ग्लायेत्। आशीर्लिङि आत्त्वे कृते ग्लेयात् इति स्थिते—वाऽन्यस्य। आर्धधातुक इत्यार्धकृतम्। 'एलिङि' इत्यनुवर्तते। 'एरि'ति प्रथमान्तम्। 'आतो लोप इटि च' इत्यतः 'आत' इत्यनुवर्तते। कस्मादन्यस्येत्यपेक्षायां घुमास्थागापाजहातिसां हलीति प्रकृतत्वात्तेभ्योऽन्यस्येति लभ्यते। तदाह—घुमास्थादेरन्यस्येति। किताति। 'दीङो युडचि क्ङिति' इत्यतः तदनुवृत्तेरिति भावः। ङितीति तु नानुवर्तते, लिङार्धधातुकस्य ङित्त्वाऽसम्भवात्। अग्लासीदिति। 'यमरमे'त्यादन्तत्वात् सगिटौ। अग्लासिष्टाम्। अग्लासिषुरित्यादि। अग्लास्यत्। ग्लायतीति। ग्लेधातोरिव रूपाणीति भादः। ष्टै न्यक्करणे इति। यकारमध्योऽयम्। इत आरभ्य ऐकारान्तानां संयोगादीनां ग्लैवदेव रूपाणि प्रत्येतव्यानि। 'रै शब्दे' इत्यादीनां तु असंयोगादीनाम् आशीर्लिङि 'वाऽन्यस्य संयोगादेः' इत्येत्वं न भवति, तेन रायादित्यादि रूपमिति विशेषः। स्त्यै ध्यै इति। षोपदेशेषु स्त्यायातोः पर्युदासादाद्यो न षोपदेशः। द्वितीयस्तु षोपदेशः। तकारस्य ष्टुत्वसम्पन्नटकारनिर्देशः। सत्वे कृते इति। 'धात्वादे'रिति यस्य सकारे सति निमित्ताऽपायात् ष्टुत्वनिवृत्तिरिति भावः। तिष्ठ्यासतीति। ष्ठ्यैधातोः कृतसत्वात् सनि आत्त्वे स्था स इति सन्नन्तात् झटि तिपि शपि 'सन्यङोः' इति द्वित्वे 'शपूर्वाः खयः' इति सकारयकारनिवृत्तौ 'तास्थ्यासति' इति स्थिते अभ्यासहृत्वे 'सन्यतः' इति द्वित्वे सकारस्य हृणः परत्वादादेशसकारत्वाच्च षत्वे 'तिष्ठ्यासती'ति रूपम्। स्वाभाविकसकारादित्वे त्वादेशसकारादित्वाऽभावात् षत्वं न स्यादिति भावः। अतिष्ठ्यपदिति। ष्ठ्यैधातोः कृतसत्वात् च्वौ आत्त्वे 'अतिष्ठी' इति पुकि स्त्यापि इति व्यन्तात् च्लौ अडागमे तिपि 'इतस्व'

९१५ षै क्षये । क्षायति । जजौ । सस्रौ । साता । 'घुमास्था—' (सू २४६२) इ-त्यत्र 'विभाषा घ्राधेट्—' (सू २३७६) इत्यत्र च स्यतेरेव ग्रहणं न त्वस्य । तेन एत्वसिज्लुकौ न । सायात् । असासीत् । ९१६ कै ९१७ गै शब्दे । गेयात् । अ-गासीत् । ९१८ शै ९१९ श्रैपाके । ९२० पै ९२१ ओवै शोषणे । पायात् । अपा-सीत् । 'घुमास्था-'(सू २४६२) इतीत्त्वं, तदपवाद 'एर्लिङि'(सू २३७४)इत्येत्वं, 'गा-तिस्था'(सू २२२३) इति सिज्लुक् च न । पारूपस्य लाक्षणिकत्वात् ९२२ ष्टै वेष्टने । स्तायति । ९२३ ष्णै वेष्टने । शोभायां च इत्येके । स्नायति । ९२४ दैप् शोधने । दायति । अघुत्वादेत्वसिज्लुकौ न । दायात् । अदासीत् । ९२५ पा पाने । 'पा-घ्राध्मा—' (सू २३६०) इति पिबादेशः । तस्यादन्तत्वान्नोपधागुणः । पिबति ।

इति इकारलोपे 'णिश्रिद्रुस्रुभ्यः' इति च्लेश्चङि 'णेरनिटि' इति णिलोपे 'णौ चङ्युप-धायाः' इति ह्रस्वे 'चङि' इति स्यप् इत्यस्य द्वित्वे 'शपूर्वा' इति सकारयकारपका-राणां निवृत्तौ सत्यां 'सन्यतः' इति इत्वे इण्णः परत्वादादेशसकारत्वाच्च सस्य षत्वे, तस्य ष्टुत्वे अतिष्टयपदिति रूपम् । स्वाभाविकसकारत्वे त्वादेशसकारत्वाभावात् षत्वं न स्यादिति भावः । जजौ ससाविति । जेर्घातोः पैधातोश्च णलि आत्त्वे द्वित्वादौ वृद्धिरिति भावः । ननु 'एर्लिङि' इत्यत्र 'घुमास्थागापाजहातिसाम्' इत्यनुवृत्त्या सैधातोराशीर्लिङि 'सायादित्यत्र एत्वं स्यात् । तथा लुङि सगिटोः असासीत् अ-सासिष्टामित्येव इष्यते । तत्र 'विभाषा घ्राधेट्शाच्छासः' इति सिचः पाक्षिके लुकि असात् असातामित्यपि प्रसज्येतेत्यत आह—घुमास्थेत्यत्रेत्यादि । स्यतेरिति । 'षो अन्त-कर्मणि' इति श्यन्विकरणस्येत्यर्थः । अत्र श्यान्यानमेव शरणम् । 'विभाषा घ्राधेट्' इत्यत्र श्यन्विकरणाभ्यां साहचर्याच्च । पै ओवै शोषणे । पायति । वायति । 'ओदि-तश्च' इति निष्ठानत्वार्थमोदित्त्वम् । ननु पैधातोः कर्मणि लटि यकि आत्त्वे पायते इत्यत्र 'घुमास्थागापाजहातिसां हलि' इति ईत्त्वं स्यात् । तथा आशीर्लिङि पायात् इत्यत्र 'एर्लिङि' इति एत्वं स्यात्, तत्रापि 'घुमास्थागापाजहातिसाम्' इत्यनुवृत्तेः । तथा लुङि 'अपासीदित्यत्र 'गातिस्था' इति सिचो लुकि 'यमरम' इति इटः अभा-वात्तत्सन्नियोगशिष्टः सगपि नस्यादित्यत आह—घुमास्थेतीत्त्वमित्यादिना । पारूपस्येति । उदाहृतसूत्रत्रये लक्षणप्रतिपदोक्तपरिभाषया आदन्तत्वेन उपदिष्टस्यैव पाधातोर्ग्रहणम्, ननु पैधातोः कृतात्त्वस्येति भावः । एवञ्च प्रकृते पैधातोराशीर्लिङि पायादित्येव रू-पम् । लुङि सगिटोः अपासीत्, अपासिष्टामित्येव रूपम् । ष्टै वेष्टने इति । षोपदेशोऽ-यम् । कृतष्टुत्वनिर्देशः । सत्वे कृते ष्टुत्वनिवृत्तिः । तदाह—स्तायतीति । ष्णैधात्वादिरपि षोपदेशः कृतष्टुत्वनिर्देशः । सत्वे कृते ष्टुत्वनिवृत्तिः । तदाह—स्नायतीति । दैप् शो-धने । अघुत्वादिति । घुसञ्ज्ञाविधौ दाब्दैपौ विनेत्युक्तेरिति भावः । पा पाने । पिबादेश इति । 'शिद्विषय' इति शेषः । तस्येति । पिबादेशस्य अदन्तत्वात् न लघूपधगुण इति

पेयात्। अपात्। ९२६ घ्रा गन्धोपादाने। जिघ्रति। घ्रायात्—घ्रेयात्। अघ्रात्—अघ्रासीत्। ९२७ ध्मा शब्दाग्निसंयोगयोः। धमति। ९२८ ष्ठा गतिनिवृत्तौ। तिष्ठति। 'स्थादिष्वभ्यासेन'-(सू २२७७) इति षत्वम्। अधितष्ठौ 'उपसर्गात्-' (सू २२७०) इति षत्वम्। अधिष्ठाता। स्थेयात्। ९२९ म्ना अभ्यासे। मनति। ९३० दाण् दाने। प्रणियच्छति। देयात्। अदात्। ९३१ हृञ् कौटिल्ये। हरति।

भाष्ये स्पष्टम्। अनिडयम्। पपौ। पपतुः। पपुः। भारद्वाजनियमात् थलि वेट्—पपिथ—पपाथ। पपथुः। पप। पपौ। पपिव। पपिम। क्र्यादिनियमादिट्। पाता। पास्यति। पिबतु। अपिबत्। पिबेत्। आशीर्लिङि 'यूर्लिङि' 'इत्येत्वमभिप्रेत्याह-पेयादिति। 'गातिस्था' इति सिचो लुगित्यभिप्रेत्याह-अपादिति। अपाताम्। अपुः। अपाः। अपातम्। अपात। अपाम्। अपाव। अपाम। अपास्यत्। घ्रा गन्धोपादाने। 'पाघ्राध्मा' इति शिद्विषये जिघ्रादेशः। तदाह—जिघ्रतीति। अनिडयम्। जघ्रौ। जघ्रतुः। जघ्रुः। भारद्वाजनियमात् थलि वेट्—जघ्रिथ। जघ्राथ। जघ्रथुः। जघ्र। जघ्रौ। जघ्रिव। जघ्रिम। क्र्यादिनियमादिट्। घ्राता। घ्रास्यति। जिघ्रतु। अजिघ्रत्। जिघ्रेत्। आशीर्लिङि 'वाऽन्यस्य संयोगादेः' इत्येत्वविकल्पं मत्वा आह—घ्रायात्-घ्रेयादिति। 'विभाषा घ्रायेट्' इति सिचो वा लुक्। लुगभावपक्षे आदन्तत्वात्सगिटौ। तदाह—अघ्रात्। अघ्रासीदिति। ध्माधातुरनिट्। 'पाघ्राध्मा' इति शिद्विषये धमादेशः। तदाह—धमतीति। दध्मौ। दध्मतुः। दध्मुः। दध्मिथ—दध्माथ। दध्मथुः। दध्म। दध्मौ। दध्मिव। दध्मिम। ध्माता। ध्मास्यति। धमतु। अधमत्। धमेत्। ध्मायात्—ध्मेयात्। अध्मासीत्। अध्मास्यत्। ष्ठाधातुः षोपदेशः कृतष्टुत्वनिर्देशः। शिद्विषये 'पाघ्रा' इति तिष्ठादेशः। तदाह—तिष्ठतीति। तस्थौ। अधितष्ठावित्यत्र इण्कवर्गाभ्यां परत्वाभावेऽपि षत्वमाह—स्थादिष्विति। तस्थतुः। तस्थुः। तस्थिथ—तस्थाथ। तस्थथुः। तस्थ। तस्थौ। तस्थिव। तस्थिम। स्थाता। अधिष्ठातेत्यत्र 'सात्पदाद्योः' इति षत्वनिषेधमाशङ्क्याह—उपसर्गादिति। षत्वमिति। स्थास्यति। तिष्ठतु। अतिष्ठत्। तिष्ठेत्। आशीर्लिङि संयोगादित्वेऽपि घुमास्थादेरभ्यस्त्वाऽभावादेत्वविकल्पो न, किन्तु 'यूर्लिङि' इति नित्यमेव एत्वम्। तदाह—स्थेयादिति। 'गातिस्था' इति सिचो लुक्। अस्थात्। अस्थास्यत्। म्ना अभ्यासे इति। अयमप्यनिट्। 'पाघ्रा' इति शिद्विषये मनादेशः। तदाह—मनतीति। मम्नौ। मम्नतुः। मम्नुः। मम्निथ—मम्नाथ। मम्नथुः। मम्न। मम्नौ। मम्निव। मम्निम। म्नाता। म्नास्यति। मनतु। अमनत्। मनेत्। म्नायात्—म्नेयात्। अम्नासीत्। अम्नास्यत्। दाण् दाने इति। अयमप्यनिट्। 'पाघ्रा' इति शिद्विषये यच्छादेशः। प्रणियच्छतीति। 'नेर्गद' इति णत्वम्। ददौ। ददतुः। ददुः। ददिथ—ददाथ। ददथुः। दद। ददौ। ददिव। ददिम। दाता। दास्यति।

२३७९ ऋतश्च संयोगादेर्गुणः ७।४।१०॥ ऋदन्तस्य संयोगादेरङ्गस्य गुणः स्याल्लिटि । किदर्थमपीदं परत्वाण्णल्यपि भवति । रपरत्वम् । उपधावृद्धिः । जहार । जह्रतुः । जह्रुः । जह्रर्थ । ह्रर्ता । 'ऋद्धनोः स्ये' (सू २३६६) ह्ररिष्यति ।

२३८० गुणोऽर्तिसंयोगाद्योः ७।४।२९॥ अर्तेः संयोगादेश्च ऋदन्तस्य च गुणः स्याद्यकि यादावार्धधातुके लिङि च । ह्रर्यात् । अह्रार्षीत् । अह्रार्ष्टाम् । ६३२ स्वृ शब्दोपतापयोः । 'स्वरतिसूति—' (सू २२७६) इति वेट् । सस्वरिथ—सस्वर्थ । वमयोस्तु—२३८१ **अथुकः क्ङिति** ७।२।११॥ अस्मात् एकाच उगन्ताच्च पर-

---

यच्छतु । अयच्छत् । यच्छेत् । आशीर्लिङि 'एर्लिङि' इत्येत्व मत्वा आह—देयादिति । 'गातिस्था' इति सिचो लुकं मत्वा आह—अदादिति । हृञ् कौटिल्ये इति । अयमप्यनिट् । ह्रर्तीति । शपि गुणे रपरत्वम् । ऋक्ष । लिटीति । 'दयतेर्दिगि लिटि' इत्यतः तदनुवृत्तेरिति भावः । ननु तिप्सिप्मिप्सु सार्वधातुकार्धधातुकयोरित्येव गुणे सिद्धे किमर्थमिदमित्यत आह—किदर्थमपीदमिति । अतुसादिकिदर्थं यलाद्यकिदर्थं चेत्यर्थः । ननु अस्य गुणस्य अतुसादिषु चरितार्थत्वात् यलि 'अचो ञ्णिति, इति वृद्धिप्रसङ्गात्किदर्थं णलि अयं गुण इत्यत आह—परत्वाण्णल्यपि भवतीति । 'अचो ञ्णिति' इति वृद्ध्यपेक्षया अस्य गुणस्य परत्वादित्यर्थः । तर्हि 'जह्वार' इति कथमित्यत आह—उपधावृद्धिरिति । 'अत उपधाया' इत्यनेनेति शेषः । जह्रर्थेति । क्रादिनियमप्राप्तस्य इटः 'अचस्तास्वत्' इति 'ऋतो भारद्वाजस्य' इति च निषेधादिति भावः । जह्रतुः । जह्रुः । जह्रर्थ-जह्रथ । जह्रिव । जह्रिम । क्रादिनियमादिट् । ह्रर्तु । अह्ररत् । ह्ररेत् । आशीर्लिङि ह्रृ यात् इति स्थिते कित्त्वादुगुणनिषेधे प्राप्ते—गुणोऽर्ति । भौवादिकः जौहोत्यादिकश्च ऋधातुः अर्तीत्यनेन गृह्यते । लुकौ निर्देशस्तु न विवक्षितः । अङ्गस्येत्यधिकृतम् । 'रीङृतः' इत्यतः ऋत इत्यनुवर्तते । तच्च अङ्गविशेषणं तदन्तविधिः ऋदन्तस्याङ्गस्येति लभ्यते । संयोगाद्योरित्यपि तद्विशेषणम् । 'अकृत्सार्वधातुकयोः' इत्यतः असार्वधातुकग्रहणमनुवर्तते । आर्द्धधातुके इति लभ्यते । 'रिङ् शयग्लिङ्क्षु' इत्यतः यकि लिङीति च लभ्यते । 'अयङ् यि क्ङिति' इत्यतः यीति सप्तम्यन्तमनुवर्तते । आर्द्धधातुकविशेषणत्वात्तदादिविधिः । तदाह—अर्तेरित्यादिना । तथाच ह्रृ यात् इति स्थिते गुणे रपरत्वे रूपमाह—ह्रर्यादिति । अह्रार्षीदिति । सिचि वृद्धिः । रपरत्वम् । षत्वम् । अह्ररिष्यत् । स्वृ शब्दोपतापयोरिति । अयमप्यनिट् । स्वरति । लिटि तु क्ङित्यपि गुणः । थलि तु कृते गुणे रपरत्वे उपधावृद्धिः । सस्वार । सस्वरतुः । सस्वरुः । थलि तु क्रादिनियमप्राप्तस्य इटः 'अचस्तास्वत्' इति 'ऋतो भारद्वाजस्य' इति च नित्यनिषेधप्राप्ते आह—स्वरतिसूतीति वेट्ति । सस्वरिथ-सस्वर्थेति । सस्वरथुः । सस्वर । सस्वार-सस्वर । इत्यपि ज्ञेयम । वमयोरिति । क्रादिनियमाद्वित्यमिडित्यर्थः । अत्र इण्निषेध शङ्कितुमाह—अथुकः क्ङिति । अस्मा

योर्गलिकितोरियन स्यात्। परमपि स्वरत्यादिविकल्पं बाधित्वा पुरस्तात्प्रतिषेधकाण्डारम्भसामर्थ्यादनेन निषेधे प्राप्ते क्रादिनियमान्नित्यमिट्। सस्वरिव। सस्वरिम। परत्वात् 'ऋद्धनोः स्ये' (सू ७३६६) इति नित्यमिट् स्वरिष्यति। स्वर्यात्। अस्वारीत्। अस्वारिष्टाम्। अस्वार्षीत्। अस्वार्ष्टाम्। ६३३ स्मृ चिन्तायाम्। ६३४ ह्वृ संवरणे। ९३५ सृ गतौ। क्रादिस्त्वनिट्। ससर्थ। ससृव। सिङ्।

श्कृ चेति समाहारद्वन्द्वात् षष्ठी। उक् प्रत्याहारः। अङ्गस्येत्यधिकृतं पञ्चम्या विपरिणतम् उका विशेष्यते। तदन्तविधिः। 'एकाच उपदेश' इत्यतः एकाच इत्यनुवृत्तं इगन्तेऽन्वेति। 'नेड्वशिकृति' इत्यतो नेडिति। क्तितीति सप्तमी षष्ठ्यर्थे। रूच कूच क्रौ तौ इतौ यस्येति विग्रहः। गकारस्य चर्त्वेन निर्देशः तदाह—श्रिञ् पर्यन्त इत्यादिना। गकारप्रश्लेषः किम्? भूष्णुः। 'ग्लाजिस्थश्च स्नुः' इति चकारादू भूधातोः स्नुः। तस्य गित्त्वादिट् न। कित्त्वे तु स्थास्नुरित्यत्र 'घुमास्था' इति ईत् स्यात्। ष्ण्यन्त इत्यादित्यनन्तरं अनेन निषेधे प्राप्ते इत्यन्वयः। नन्वियं शङ्का न युज्यते। 'अयुकः क्तिति' इति निषेधं बाधित्वा परत्वात् 'स्वरतिसूती'ति विकल्पस्य प्राप्तेरित्यत आह—परमपीत्यादि सामर्थ्यादित्यन्तम्। पुरस्तात्प्रतिषेधकाण्डारम्भसामर्थ्यात्परमपि स्वरत्यादिविकल्पं बाधित्वा अनेन निषेधे प्राप्ते इत्यन्वयः। 'आर्द्धधातुकस्येड्'त्यादिविधिकाण्डात्प्रागेव 'नेड्वशि कृति' इत्यादिप्रतिषेधकाण्डारम्भसामर्थ्यात् 'स्वरति' इति विकल्पोऽप्यनेन बाध्यते इत्यर्थः। परमपीत्यादिः प्राप्ते इत्यन्तः शङ्काग्रन्थः। परिहरति—क्रादिनियमान्नित्यमिति। प्रकृत्याश्रयः प्रत्ययाश्रयो वा यावान् इण्निषेधः स लिटि चेत् तर्हि क्रादिभ्य एवेत्युक्तत्वादिति भावः। लुटि—स्वरिता-स्वर्ता। लृटि स्ये 'स्वरति' इति विकल्पं निरस्यति—स्वरतीति। स्वरतु। अस्वरत्। स्वरेत्। स्वर्यादिति। आशीर्लिङि 'गुणोऽर्तिसंयोगाद्योः' इति गुणः। अस्वारीदिति। 'स्वरति' इति इट्पक्षे वृद्धिरिति भावः। अस्वार्षीदिति। इडभावे 'सिचि वृद्धिः' इति वृद्धिरिति भावः। स्मृ चिन्तायामिति। अयमप्यनिट्। स्मरति। लिटि ऋतश्च' इति क्त्वि गुणः। थलि तु गुणे उपधावृद्धिः। सस्मार। सस्मरतुः। सस्मरुः। ऋदन्तत्वाद्भारद्वाजमतेऽपि क्रादिनियमप्राप्तस्य इटः थलि नित्यनिषेधः। सस्मर्थ। सस्मरथुः। सस्मर। सस्मार—सस्मर। सस्मरिव। सस्मरिम। स्मर्ता। लृटि स्ये 'ऋद्धनोः' इति इट्—स्मरिष्यति। स्मरतु। अस्मरत्। स्मरेत्। आशीर्लिङि 'गुणोऽर्ति' इति गुणः—स्मर्यात्। लुङि सिचि वृद्धौ रपरत्वम्—अस्मार्षीत्। अस्मरिष्यत्। ह्वृ सवरणे इति। अयमपि स्मृधातुवत्। सृ गताविति। ऋदन्तोऽथमनिट्। सरति। लिटि संयोगादित्वाऽभावात् 'ऋतश्चे'ति गुणो न। ससार। सस्रतुः। सस्रुः। क्रादित्वान्नेडिति। सृधातोः क्रादित्थत्वादिति भावः। ससर्थेति। क्रादित्वात्थल्यपि नित्यं निषेध इति भावः। सस्रथुः। सस्र। ससार। ससर। सस्रव। सस्रम। इत्यपि ज्ञेयम्। सर्ता। लृटि

स्यियात्। असार्षीत्। असार्ष्टाम्। २३८२ सर्तिशास्त्यर्तिभ्यश्च ३।१।५६॥ एभ्यश्च्लेरङ् स्यात्कर्तरि लुङि। इह लुप्तशपा शासिना साहचर्यात् सर्त्यर्ती जौहोत्यादिकावेव गृह्येते। तेन भ्वाद्योर्नाङ्। शीघ्रगतौ तु 'पाघ्राध्मा' (सू २३६०) इति शिति धौरादेशः। धावति। ६३६ ऋ गतिप्रापणयोः। ऋच्छति। २३८३ ऋच्छत्यृताम् ७।४।११॥ तौदादिकस्य ऋच्छतेः ऋवर्णातोः ऋतां च गुणः स्याल्लिटि। णलि प्राग्वदुपधावृद्धिः। आर। आरतुः। आरुः। २३८४ इडत्यर्ति-

---

'ऋद्धनोः' इति इट्—सरिष्यति। सरतु। असरत्। सरेत्। आशीर्लिङि संयोगादित्वाऽभावात् 'गुणोऽर्ति' इति न गुणः। किन्तु 'रिङ् शयग्लिङ्क्षु' इति रिङित्याह—रिङिति। स्यियादिति। रोङि प्रकृते रिङ्विधिसामर्थ्याच्च दीर्घ इति भावः। असार्षीदिति। सिचि वृद्धौ रपरत्वम्। अत्र च्लेरङ्माशङ्क्य निषेधमाह—सर्ति। णिल लुङीत्यनुवर्तते। 'णिश्रिद्रुस्रुभ्यः' इत्यतः कर्तरि, चङीति। तदाह—एभ्य इति। ततश्च प्रकृते 'असार्षी'दित्यत्र अङ् स्यादिति शङ्का सूचिता। तां परिहरति—इह लुसीत्यादिना। इह अङ्विधौ शास्तीत्यनेन लुप्तविकरणः शासिर्गृह्यते इति निर्विवादम्, तस्य विकरणान्तराभावात्। एवं च तत्साहचर्यात् सूधातुः ऋधातुश्च जौहोत्यादिकौ श्लुविकरणावेव गृह्येते इत्यर्थः, लुप्तविकरणत्वसाम्यादिति भावः। तेनेति। लुप्तविकरणयोरेव ग्रहणेन भ्वादिगणस्थयोः सूधातुऋधात्वोरङ् नेत्यर्थः। तदेवं सूधातोर्गतिसामान्यवृत्तेरुक्तानि रूपाणि। यदि शीघ्रगतौ सूधातुः, तदा तस्य विशेषमाह—शीघ्रगतौ इति। धौरादेश इति। धोशब्दस्य 'धोरि'ति प्रथमान्तम्। 'धौ' इत्यौकारान्त आदेश इत्यर्थः। 'पाघ्रा' इति सूत्रे सर्तीति शितपा निर्देशः। लुप्तविकरणनिर्देशस्तु अविवक्षित इति भावः। 'सर्तेर्वंगितायां गतौ धावादेशः' इतिवार्तिकमभिप्रेत्येदम्। धावतीति। शपि सूधातोर्धौभावे आवादेशः। धावतु। अधावत्। धावेत्। ऋ गतिप्रापणयोः। अनिट्। 'पाघ्राध्मा' इति शद्विषये ऋच्छादेशः। तदाह—ऋच्छतीति। ननु ऋ अतुस् इति स्थिते द्विर्वे उरदृत्वे रपरत्वे हलादिशेषे 'अत आदेः' इति दीर्घे आ ऋ अतुस् इति स्थिते 'असंयोगात्' इति कित्त्वादुत्तरखण्डस्य गुणाऽभावे यणं बाधित्वा परत्वादादृगुणे अरतुरिति स्यादित्यतस्तन्न गुणविधानमाह—ऋच्छत्यृताम्। 'दयतेर्दिगि लिटि' इत्यतो लिटीति, 'ऋतश्च संयोगादेर्गुण' इत्यतो गुण इति चानुवर्तते। ऋच्छति ऋ ऋत् एषां द्वन्द्वाद्बहुवचनम्। बहुवचनादेव ऋकारप्रश्लेषो गम्यते। प्रश्लिष्टेन च ऋकारेण ऋधातुरेव गृह्यते। ऋवर्णान्तधातुग्रहणे 'ऋतश्च संयोगादेर्गुणः' इत्यस्य वैयर्थ्यात्। 'ऋच्छ गतीन्द्रियप्रलयमूर्तिभावेषु' इति तौदादिकस्य 'ऋच्छती'ति शितपा निर्देशः। भौवादिकस्य धातोस्तु ऋग्रहणेनैव सिद्धेः। तदाह—तौदादिकस्य ऋच्छतेरित्यादिना। किदर्थमपीदं सूत्रं परत्वादित्यपि भवति। णलि प्राग्वदिति। 'हूङ् कौटिल्ये' इत्यत्र उक्तया रीत्या किन्तु चरितार्थोऽप्ययं गुणः

व्ययतीनाम् ७।२।६६॥ अद् ऋ व्येञ् एभ्यस्थलो नित्यमिट् स्यात्। आरिथ। अर्ता। अरिष्यति। अर्यात्। आर्षीत्। आर्ष्टाम्। ९३७ गृ ९३८ घृ सेचने। गरति। जगार। जगर्थ। अग्रिव। रिङ्। ग्रियात्। अगार्षीत्। ९३९ धृ हूर्च्छने। ९४० स्रु गतौ। सुस्रोथ। सुस्रुव। स्रूयात्। 'ग्लिग्रि—' (सू२३१२) इति

'अचो ञ्णिति' इति वृद्धयपेक्षया परत्वात् णलयपि भवति। ततो रपरत्वे उपधावृद्धिरित्यर्थः। आरेति। ऋधातोर्लिटि तिपो णलि द्वित्वे उरदत्वे हलादिशेषे 'अत आदेः' इति दीर्घे उत्तरखण्डस्य वृद्धौ रपरत्वे सवर्णदीर्घ इति भावः। आरतुरिति। पूर्ववत् द्वित्वादौ आ ऋ अतुसिति स्थिते कित्त्वादगुणनिषेधे प्राप्ते 'ऋच्छत्यृताम्' इति गुणे रपरत्वे सवर्णदीर्घ इति भावः। आरुरित्यप्येवम्। थलि तु क्रादिनियमप्राप्तस्य इटः 'अचस्तास्वत्' इति ऋदन्तत्वात् भारद्वाजमतेऽपि निषेधे प्राप्ते आह—इडत्यर्ति। पञ्चम्यर्थे षष्ठी। 'अचस्तास्वत्' इत्यतः थलीत्यनुवर्तते। 'विभाषा सृजिदृशोः' इति पूर्वसूत्राद्विभाषाग्रहणमस्वरितत्वान्नानुवर्तते। तदाह—ऋद् ऋ इत्यादिना। आर्द्धधातुकस्येडित्यनुवृत्तौ पुनरिड्ग्रहणं तु 'न वृद्भ्यश्चतुर्भ्यः' इत्यतो नेत्यनुवृत्तिनिवृत्तये इत्याहुः। आरिथेति। आरथुः। आरुः। आर। आरिव। आरिम। क्रादिनियमादिट्। अरिष्यतीति। 'ऋद्धनोः' इति इट्। ऋच्छतु। आर्च्छत्। अर्यादिति। 'गुणोऽर्ति' इति गुणे रपरत्वमिति भावः। आर्षीदिति। सिचि वृद्धिः। 'सतिशास्त्यर्तिभ्यश्च' इति अङ्तु न, तत्र भौवादिकस्य ऋधातोर्न ग्रहणमित्यनुपदमेवोक्तेरिति भावः। आरिष्यत्। 'ऋद्धनोः स्ये' इति इट्। गृ घृ सेचने। अनिटौ। गरतीति। जगार। असंयोगादित्वात् 'ऋतश्च' इति गुणो न। जग्रतुः। जग्रुः। क्रादिनियमेन इटि प्राप्ते 'अचस्तास्वत्'दिति नेट्। ऋदन्तत्वाद्भारद्वाजमतेऽपि नेट्। तदाह—जगर्थेति। जग्रथुः। जग्र। जगार-जगर। जग्रिवेति। क्रादिनियमादिट्। जग्रिम। गर्ता। गरिष्यति। 'ऋद्धनोः' इति इट्। गरतु। अगरत्। गरेत्। रिङिति। आशीर्लिङि असंयोगादित्वात् 'गुणोऽर्ति' इति गुणाभावे 'रिङ् शयग्लिङ्क्षु' इति रिङिरित्यर्थः। ग्रियादिति। रीङि प्रकृते रिङ्विधेर्नं दीर्घः। अगार्षीदिति। सिचि वृद्धौ रपरत्वम्। अगार्ष्टाम्। अगरिष्यत्। 'ऋद्धनोः' इति इट्। धृधातोस्तु भौवादिकस्य घृतं घर्मः क्षुणा इत्यत्रैव प्रयोगः, नान्यत्रेति 'तृ-उवरुक्षोष्टुः' इति सूत्रे भाष्ये स्पष्टम्। ध्वृ हूर्च्छने इति। हूर्च्छनं कुटिलीभवनम्। ध्वरति। दध्वार। 'ऋतश्च' इति गुणः। दध्वरतुः। दध्वरुः। थलि 'अचस्तास्वत्' इति क्रादिनियमप्राप्त इट् न। ऋदन्तत्वाच्च भारद्वाजमतेऽपि नेट्। दध्वर्थ। दध्वरथुः। दध्वर। दध्वार-दध्वर। दध्वरिव। दध्वरिम। क्रादिनियमादिट्। ध्वर्ता। 'ऋद्धनोः' इति इट्-ध्वरिष्यति। ध्वरतु। अध्वरत्। ध्वरेत्। आशीर्लिङि 'गुणोऽर्ति' इति गुणः। ध्वर्यात्। अध्वार्षीत्। अध्वरिष्यत्। स्रु गतौ। अनि। स्रवति। सुस्राव। अतुसादौ कित्त्वात् गुणाभावे उवङ्। सुस्रुवतुः। सुस्रुवुः। क्रादित्वान्नेट्। तदाह—सुस्रोथेति।

चङ्। लघूपधगुणादन्तरङ्गत्वादुवङ्। असुस्रुवत्। ९४१ षु प्रसवैश्वर्ययोः। प्रसवोऽभ्यनुज्ञानम्। सुषोथ-सुषविथ। सुषुविव। सोता। २३८५ स्तुसुधूञ्भ्यः परस्मैपदेषु ७।२।७२॥ एभ्यः सिच इट् स्यात्परस्मैपदेषु। असावीत्। पूर्वोत्तराभ्यां सिद्ध्यां साहचर्यात्सुनोतेरेव ग्रहणमिति पक्षे असौषीत्। ९४२ श्रु श्रवणे। २३८६ श्रुवः शृ च ३।१।७४॥ श्रुवः शृ इत्यादेशः स्यात् श्नुप्रत्ययश्च शब्विषये। शपोऽपवादः। श्नोर्ङित्त्वाद्धातोर्गुणो न। शृणोति। शृणुतः। २३८७ हुश्नुवोः सार्वधातुके ६।४।८७॥ जुहोतेः श्नुप्रत्ययान्तस्यानेकाचोऽङ्गस्य चा-

---

सुस्रवथुः सुस्रव। सुस्राव—सुस्रव। सुस्रवैति। क्रादित्वान्नेट्। सुस्रेष्यपि ज्ञेयम्। स्रोता। स्रोष्यति। स्रवतु। अस्रवत्। स्रवेत्। स्रूयादिति। 'अकृत्सार्वधातुकयोः' इति दीर्घ इति भावः। लुङि विशेषमाह—णिश्रीति चङीति। 'चङि' इति द्विरवमित्यपि द्रष्टव्यम्। ननु असुस्र अ त् इति स्थिते रेफादुत्तरस्य उकारस्य 'सार्वधातुकार्द्धधातुकयोः'रिति गुणस्य चङ्निमित्तकस्य ङित्त्वाच्चिषेधेऽपि उवङपेक्षया परत्वात् तिपं निमित्तीकृत्य रेफादुकारस्य लघूपधगुणः स्यादित्यत आह—लघूपधगुणादन्तरङ्गत्वादुवङिति। बहिर्भूततिबपेक्षत्वाल्लघूपधगुणः बहिरङ्गः। अन्तर्गतचङपेक्षत्वादुवङन्तरङ्गः। अतः उवङेव भवति। परादन्तरङ्गस्य बलवत्त्वादिति भावः। असुस्रुवदिति। असोष्यत्। षु प्रसवैति। अत्र प्रसवशब्दस्य गर्भमोचनपरत्वभ्रमं वारयति—प्रसवोऽभ्यनुज्ञानमिति। 'ओं प्रणयेति ब्रह्मा प्रसौति' इत्यादौ तथा दर्शनादिति भावः। षोपदेशोऽयम्। शपि उवङ बाधित्वा परत्वात्सार्वधातुकयोरिति गुणः। सवति। सुषाव। अनुपादौ किरित्वाद्गुणाऽभावे उवङ्। सुषुवतुः। सुषुवुः। भारद्वाजनियमात्थलि वेट्। तदाह—सुषविथ-सुषोथेति। अकिरित्वाद् गुण इति भावः। सुषुवथुः। सुषुव। सुषाव—सुषव। वमयोस्तु क्रादिनियमाल्लित्यमिट्। तदाह—सुषुविवेति। किरित्वाद्गुणाभावे उवङ्। सोतेति। सोष्यति। सवतु। असवत्। सवेत्। सूयात्। लुङि असौषीदिति प्राप्ते—स्तुसुधूञ्भ्यः। 'इडत्यर्ति' इत्यतः इडित्यनुवर्तते। 'अञ्नेः सिचि' इत्यतः सिचीत्यनुवृत्तं षष्ठ्या विपरिणम्यते। तदाह—एभ्यः सिच इति। असावीदिति। सिचि वृद्धौ 'इट ईटि' इति सिज्लोपः। पूर्वोत्तराभ्यामिति। स्तुञ्धूञ्भ्यामित्यर्थः। सुनोतेरिति। षुञ् अभिषवे इति श्नुविकरणस्येत्यर्थः। असौषीदिति। इडभावे सिचि वृद्धिः इति भावः। असोष्यत्। श्रु श्रवणे इति। उदन्तोऽयमनिट्। श्रुवः शृ च। 'श्रु' इति लुप्तप्रथमाकम्। चकारेण 'स्वादिभ्यः श्नुः' इति सूत्रस्थः श्नुः समुच्चीयते। तदाह—श्रुवः शृ इत्यादेशः स्यात् श्नुप्रत्ययश्चेति। शपोऽपवाद इति। अनेन शब्विषये कर्त्रर्थसार्वधातुक एवास्य प्रवृत्तिः सूचिता। श्नोर्ङित्त्वादिति। 'सार्वधातुकमपि'त्यस्यनेनेति भावः। शृणोतीति। तिपमाश्रित्य श्नोर्गुणः। तसादीनां ङित्त्वात् श्नोर्न गुणः। तदाह—शृणुत इति। शृणु अन्तीति स्थिते अन्तेः ङित्त्वात्

संयोगपूर्वो वर्णस्य यणस्यादजादौ सार्वधातुके । उवङोऽवादः । शृण्वन्ति । शृणोमि । शृण्वः-शृण्मः । शृण्मः-शृण्मः । शुश्रोथ । शुश्रुव । शृणु । शृण्वानि । शृण्यात् श्रयात् । अश्रौषीत् । ६४३ भ्रु स्थैर्ये । भ्रवति । अयं कुटादौ गत्यर्थोऽपि । ६४४ द्रु ६४५ द्रु गतौ । दुद्रोथ-दुदविथ । दुद्रुविव । दुद्रोथ । दुद्रुव ।

श्नोर्गुणनिषेधे सति उवङि प्राप्ते—हुश्नुवोः । श्नोः प्रत्ययस्वात्तदन्तग्रहणम् । 'इ णो यण्' इत्यतः यण् इत्यनुवर्तते, 'अचि श्नु' इत्यतः अचीति । तस्य सार्वधातुकविशेषणत्वात्तदादिविधिः । 'एरनेकाचः' इति सूत्रं एरितिवर्जमनुवर्तते । 'ओः सुपि' इत्यतः ओरिति च षष्ठ्यन्तम् । तदाह—जुहोतेरित्यादिना । असंयोगपूर्वस्येति तु उकारस्य विशेषणं ननु श्नुविशेषणम् । तेन आप्नुवन्तीत्यत्र यण् न । हुश्नुवोः किम् ? योयुवति । अत्र युधातोर्यङ्लुकि 'अदभ्यस्ता'दिति झेरादेशे योयु अति इति स्थिते अनेकाजवयवस्य असंयोगपूर्वस्य उकारस्य यण् न भवति । अत्र भाष्ये 'बहुलं छन्दसि' इत्यनुवृत्तौ 'यङोऽचि च' इति विहितस्य यङ्लुकः छान्दसत्वात् 'छन्दस्युभयथा' इत्यार्धधातुकत्वाश्रयणादेव योयुवतीत्यत्र यणभावसिद्धेः हुश्नुग्रहणं भाषायामपि क्वचित् यङ्लुकं ज्ञापयतीत्युक्तम् । तथाच भाषायामपि अनेकाचः असंयोगपूर्वकोकारान्ताद्योयुवतीत्यादौ यङ्लुकिसिद्धेः तत्र यणभावार्थं हुश्नुग्रहणमिति फलति । ज्ञापकस्य सामान्यापेक्षत्वादुदाहृतोवर्णान्तादन्यत्रापि क्वचिद्यङ्लुक् सिध्यति । एतदेवाभिप्रेत्य भाष्ये—'हुश्नुग्रहणं ज्ञापयति-भाषायामपि यङ्लुक् भवति' इत्युक्त्वा, 'किमेतस्य ज्ञापने प्रयोजनं, बेभिदीति चेच्छिदीति इत्येतत्सिद्धं भवति' इत्युक्तम् । अत्र भिदिच्छिद्योरेव ग्रहणादुदाहृतोकारान्तादन्यत्र भवन् यङ्लुक् आम्येव भवति, न त्वन्यत्रेत्याहुः । भिदिच्छिद्योर्ग्रहणं प्रदर्शनमात्रमित्यन्ये । शृण्वन्तीति । शृणुथः । शृणुथ । इत्यपि ज्ञेयम् । 'लोपश्चास्यान्यतरस्यां म्वोः' इत्यभिप्रेत्याह—शृण्व इत्यादि । शुश्राव । शुश्रुवतुः । शुश्रुवुः । थलि वमयोश्च क्ङित्त्वान्नित्यमिण्निषेधः । तदाह-शुश्रोथ । शुश्रुवेति । शुश्रुम । इत्यपि ज्ञेयम् । श्रोता । श्रोष्यति । शृणोतु-शृणुतात् । शृणुताम् । शृण्वन्तु । 'उतश्च प्रत्ययादसंयोगपूर्वात्' इति हेर्लुकं मत्वा आह—शृण्वितीति । शृणुतात् । शृणुतम् । शृणुत । शृणवानीति । आटः पित्त्वेन ङित्त्वाऽभावाद्गुण इति भावः । भ्रु स्थैर्ये इति । अनिट् । भ्रवति । दुभ्राव । दुभ्रुवतुः । दुभ्रुवुः । भारद्वाजनियमात्थलि वेट् । दुभ्रुविथ-दुभ्रोथ । दुभ्रुवथुः । दुभ्रुव । दुभ्राव-दुभ्रुव । दुभ्रुविव । दुभ्रुविम । क्ङिदित्यमाद्विट् । भ्रोता । भ्रोष्यति । अभ्रवत् । अभ्रवेत् । भ्रूयात् । अभ्रौषीत् । अभ्रोष्यत् । दु द्रु गताविति । अनिटौ । द्रवति । द्रवति । दुद्राव । दुद्रुवतुः । दुद्रुवुः । दुद्राव । दुद्रुवतुः । दुद्रुवुः । अस्य भारद्वाजनियमात्थलिवेडित्याह-दुद्रोथ दुदविवेति । दुद्रुवथुः । दुद्रुव । दुदाव-दुदव । वमयोः क्ङिदित्यमादिडित्याह-दुद्रुविवेति । द्रुतोयस्य क्ङिदित्वात्थलि नित्यं नेट् । तदाह-दुद्रोथेति । दुद्रुवथुः । दुद्रुव । दुद्राव-

'णिश्रि—'(सू २३१२) इति चङ् १ अदुद्रुवत् । ६४६ जि ६४७ ञ्रि अभिभवे । अभिभवो न्यूनीकरणं न्यूनीभवनं च । आद्ये सकर्मकः । शत्रून् जयति । द्वितीये त्वकर्मकः । अध्ययनात्पराजयते । अध्येतुं ग्लायतीत्यर्थः । 'विपराभ्यां जेः' (सू २६८५) इति तङ् । 'पराजेरसोढः' (सू ५८६) इत्यपादानत्वम् ।

अथ ङीङन्ता ङितः । ६४८ ष्मिङ् ईषद्धसने । स्मयते । सिष्मिये । सिष्मियिढ्वे—सिष्मियिध्वे । ६४६ गुङ् अव्यक्ते शब्दे । गवते । जुगुवे । ६५० गाङ् गतौ । गाते । गाते । गाते । इट एत्वे कृते वृद्धिः । गै । लङ इटि—अगे ।

दुद्रुव । वमयोः क्रादित्वान्नेट् । तदाह—दुद्रुवेति । द्रोता । द्रोता । द्रोष्यति । द्रोष्यति । द्रवतु । द्रवतु । अद्रवत् । अद्रवत् । द्रवेत् । द्रवेत् । द्रूयात् । द्रूयात् । अद्रौषीत् । चङीति । द्रुधातोरिति भावः । अदुद्रुवादिति । चङीति द्वित्वम् । ङित्त्वादगुणनिषेधे उवङिति भावः । अद्रोष्यत् । अद्रोष्यत् । जि ञ्रि अभिभवे इति । अनिट् । न्यूनीकरणमिति । नीचीकरणमित्यर्थः । न्यूनीभवनमिति । क्षीणबलीभवनमित्यर्थः । शत्रून् जयतीति । नीचीकरोतीत्यर्थः । ननु जिधातोः परस्मैपदित्वात् पराजयत इति कथमात्मनेपदमित्यत आह-विपराभ्यामिति । ननु पराजयस्य अध्ययनेन संश्लेषविश्लेषयोरभावात् कथं पराजयं प्रत्यध्ययनस्याऽपादानत्वमित्यत आह-पराजेरिति । जयति । लिटि 'सन्लिटोर्जेः' इति कुत्वम् । जिगाय । जिग्यतुः । जिग्युः । भारद्वाजनियमात्थलि वेट् । जिगयिथ-जिगेथ । जिग्यथुः । जिग्य । जिगाय-जिगय । वमयोः क्रादिनियमादिट् । जिग्यिव । जिग्यिम । जेता । जेष्यति । जयतु । अजयत् । जयेत् । जीयात् । अजैषीत् । अजैष्टाम् । अजैषुः । अजैषीः । अजैष्टम् । अजैष्ट । अजैषम् । अजैष्व । अजैष्म । अजेष्यत् । इति धेडादयोऽजन्ताः परस्मैपदिनः ।

अथ ङीङन्ता ङित इति । 'ङीङ् विहायसा गतौ' इत्येतत्पर्यन्ताः ङित्त्वादात्मनेपदिन इत्यर्थः । 'ष्मिङ् ईषद्धसने' । षोपदेशोऽयम् । स्मयते इति । 'धात्वादेः षः सः' । सिष्मिये इति । ङित्त्वादगुणाभावे इयङ् । आदेशसकारत्वादुत्तरखण्डे सस्य षः । सिष्मियाते । सिष्मियिरे । क्रादिनियमादिट् । सिष्मियिषे । सिष्मियाथे । 'विभाषेटः' इति मत्वा आह—सिष्मियिढ्वे । सिष्मियिध्वे इति । स्मेता । स्मेष्यते । स्मयताम् । अस्मयत । स्मयेत । स्मेषीष्ट । अस्मेष्ट । अस्मेष्यत । गुङ्धातुरनिट् । गुणः ओकारः, अवादेश इति विशेषः । गाङ्धातुरनिट् । गाते इति । लटस्तादेशे शपि सवर्णदीर्घे टेरेत्वमिति भावः । आताम् तथैव रूपमाह—गाते इति । गा अ आताम् इति स्थिते परत्वात् सवर्णदीर्घे अतः परस्य दीर्घाऽकारस्याऽभावात् 'आतो ङितः' इति इञ् न भवति । झावपि तथैव रूपमाह—गाते इति । शपा सह आकारस्य सवर्णदीर्घं 'आत्मनेपदेष्वनतः' इति झस्य अदादेशे टेरेत्वमिति भावः । गासे । गाथे । गाध्वे । लट

गेत । गेयाताम् । गेरन् । गासीष्ट । 'गाङ्कुटादिभ्यः—' (सू २४६१) इति सूत्रे इङादेशस्यैव गाङो ग्रहणं, न त्वस्य । तेनाङित्त्वात् 'घुमास्था–'(सू २४६२) इतीत्त्वं न । अगास्त । आदादिकोऽयमिति हरदत्तादयः । फले तु न भेदः । ६५१कुङ् ६५२ घुङ् ६५३ उङ् ६५४ डुङ् शब्दे । अन्ये तु उङ् कुङ् खुङ् गुङ् घुङ् डुङ् इत्याहुः । कवते । चुकुवे । घवते । अवते । ऊवे । 'वार्णादाङ्गं बलीयः' (प ५६)

उत्तमपुरुषैकवचने विशेषमाह—इट इति । गा अ इ इति स्थिते सवर्णदीर्घ सति इट एत्वे कृते 'वृद्धिरेचि' इति वृद्धौ 'गै' इति रूपमित्यर्थः । गावहे । गामहे । लिटि अजादौ आलोपः । जगे । जगाते । जगिरे । क्रादिनियमादिट् । जगिषे । जगाथे । जगिध्वे । जगे । जगिवहे । जगिमहे । गाता । गास्यते । गाताम् । गाताम् । गाताम् । गास्व । गाथाम् । गाध्वम् । गै । गावहै । गामहै । अगात । अगाताम् । अगात । अगाथाः । अगाथाम् । अगाध्वम् । लङ इटीति । अगा अ इ इति स्थिते टिदादेशत्वाऽभावे सवर्णदीर्घे आदूगुणे 'अगे' इति रूपमित्यर्थः । अगावहि । अगामहि । गेतेति । लिङस्तादेशे शपि गा अ त इति स्थिते सवर्णदीर्घे सीयुटि सलोपे यलोपे आदूगुण इति भावः । गेयातामिति । गा अ आतामिति स्थिते सवर्णदीर्घे सीयुटि सलोपे आदूगुण इति भावः । गेरन्निति । झस्य रन्भावे गा अ रन् इति स्थिते सवर्णदीर्घे सीयुटि सलोपे यलोपे आदूगुण इति भावः । गेथाः । गेयाथाम् । गेध्वम् । गेय । गेवहि । गेमहि । आशीर्लिङि आह—गासीष्टेति । गासीयास्ताम् । गासीरन् । गासीष्टाः । गासीयास्थाम् । गासीध्वम् । गासीय । गासीवहि । गासीमहि । ननु गासीष्टेत्यादौ 'गाङ्कुटादिभ्योऽञ्णिन्ङित्' इति ञ्णिन्ङिन्निमित्तप्रत्ययस्य ङित्त्वविधानेन सीयुटागमावश्यिष्टप्रत्ययस्य ङित्त्वात् 'घुमास्थागापाजहातिसां हलि' इति इलादौ विहिते विहितमीत्त्वं स्यादित्यत आह—गाङ्कुटादिभ्य इति सूत्रे इति । 'इङ' इत्यनुवृत्तौ 'गाङ् लिटि' इति विहितस्य गाङादेशस्यैव गाङ्कुटादिसूत्रे ग्रहणं, न त्वस्य गाधातोरित्यर्थः । एतच्च 'गाङ् लिटि' इति सूत्रे भाष्ये स्पष्टम् । तेनेति । गाङ्कुटादिसूत्रे प्रकृतस्य गाधातोरग्रहणेनेत्यर्थः । लुङ्याह—अगास्तेति । अगासाताम् । अगासत । अगास्थाः । अगासाथाम् । अगाध्वम् । अगासि । अगास्वहि । अगास्महि अगास्यत । आदादिकोऽयमिति । ततश्च 'अदिप्रभृतिभ्यः शपः' इति शपो लुगिति भावः । फले तु न भेद इति । शपो लुकि सति, गाते इत्यादेव रूपम् । तास्मिन्नसत्यपि गा अ ते इत्यादौ सवर्णदीर्घे सति तदेव रूपमिति न रूपभेद इत्यर्थः । कुङ् घुङ् उङ् डुङ् शब्दे इति । चत्वारोऽपि ङितः । आद्यद्वितीयचतुर्थाः कवर्गप्रथमचतुर्थपञ्चमाद्याः । तृतीयस्तु केवल उवर्णः । अन्ये त्विति । आद्यः केवलोवर्णो ङित् । इतरे तु पञ्च क्रमेण कवर्गाद्याः । तत्र कुङ्धातोरुदाहरति—कवते इति । लिटि अजादौ कित्त्वादूगुणाभावे उवङ् । तदाह—चुकुवे इति । चुकुवाते । चुकुविरे । क्रादिनियमादिट् । चुकुविषे ।

इत्युवङ्। ततः सवर्णदीर्घः। ओता। ओत्यते। ओतीष्ट। ओष्ट। ङवते। ङुङ्वे। ङोता। ६५५ च्युङ् ६५६ ज्युङ् ६५७ प्रुङ् ६५८ प्लुङ् गतौ। क्नुङ् इत्येके। ६५९ रुङ् गतिरेषणयोः। रेषणं हिंसा। रुरुवे। रविता। ६६० धृङ् अवध्वंसने। धरते। दध्रे। ६६१ मेङ् प्रणिदाने। प्रणिदानं विनिमयः प्रत्यर्पणं च। प्रणिमयते। 'नेर्गद-' (सू २२८५) इति णत्वम्। तत्र घुप्रकृतिमाङिति पठित्वा ङितो माप्रकृतेरपि ग्रहणस्येष्टत्वात्। ६६२ देङ् रक्षणे। दयते। २३८८ दयतेर्दिगि लिटि ७।४।९॥ दिग्यादेशेन द्वित्वबाधनमिष्यते इति वृत्तिः। दिग्ये। २३८९ स्थाघ्वो-

---

चुक्रुवाथे। चुकुविध्वे। चुकुवे। चुकुविवहे। चुकुविमहे। कोता। कोष्यते। कवताम्। अकवत। कवेत। कोषीष्ट। अकोष्ट। अकोष्यत। एवं खवते इत्यादि। ङुङ्वातोराह—अवते इति। ऊवे इति। उ ङ ए इति स्थिते द्वितीयस्य उवर्णस्य उवङि कृते सवर्णदीर्घ इति भावः। ननु उवङः बहिर्भूतस्यत्वापेक्षया बहिरङ्गत्वाद्दीर्घे कृते ऊ ए इति स्थिते उवङि उवे इत्येवोचितमित्यत आह—वार्णादिति। ऊवाते। ऊविरे। क्ङादिनियमादिट्। ऊविषे। ऊवाथे। ऊविढ्वे। ऊवे। ऊविवहे। ऊविमहे। ओता ओष्यते इति। आवत। अवेत। ओषीष्ट। ओष्ट। ओष्यत्। इत्यपि ज्ञेयम्। ङुङ्वातोर्लटि ङवते इति रूपमुक्तम्। सम्प्रति लिटि रूपमाह—ङुङ्वे इति। 'कुहोश्चुः' इति ङकारस्य स्थानिनः चुर्भवन् स्थानसाम्यस्य पञ्चस्वप्यवान्तरप्रयत्नसाम्यस्य पञ्चस्वप्यविशिष्टत्वादुत्तरप्राणानुनासिक्यसाम्यात् ञकारः। प्रथमतृतीयौ तु न भवतः, आनुनासिक्याभावात्। च्युङादयोऽप्युवर्णान्ता अनिटः कुङ्वातुवत् ज्ञेयाः। रुङ् गतीति। सेट्कोऽयम्। 'ऊदुदन्तैर्यौतिरुक्षणु' इत्यनिट्षु पर्युदासात्। तदाह—रवितासे इति। धृङ्वातुरनिट्। दध्रे इति। क्ङिति दृग्रु इत्यनेन ऋकारस्य यण्। दध्राते। दध्रिरे। क्ङादिनियमादिट्। दध्रिषे। दध्राथे। दध्रिढ्वे। दध्रे। दध्रिवहे। दध्रिमहे। धर्ता। लृटि स्ये 'ऋदृशोः' इति इटि धरिष्यते। धरताम्। अधरत। धरेत। आशीर्लिङि सीयुटि 'ङश्च' इति कित्त्वान्न गुणः। धृषीष्ट। 'हस्वादङ्गात्' इति सिचो लुक्। अधृत। अधृषाताम्। अधृषत। अधरिष्यत। मेङ् प्रणिदाने। णत्वमिति। प्रणिदानशब्दे, 'प्रणिमयते' इत्यत्र च 'नेर्गद' इति णत्वमित्यर्थः। ननु 'प्रणिमयते' इत्यत्र णत्वमि न सम्भवति, शिद्विषये आत्वाऽभावेन, मारूपाऽभावात्। तथा प्रणिमानशब्देऽपि णत्वं न सम्भवति, तत्र मेङः कृदारभ्यत्वस्य लाक्षणिकमारूपत्वात्। 'गामादाग्रहणेष्वविशेषः' इत्याश्रित्य मेङोऽपि कृदारभ्यत्वस्य णत्वविधौ ग्रहणे तु मीनातिमिनोत्योरारभ्ये, प्रनिमाता। प्रनिमास्यति। इत्यत्रापि नेर्णत्वापत्तिरित्यत आह—त्रेति। तत्र 'नेर्गद' इति णत्वविधौ। घुमेत्यस्य स्थाने 'घुप्रकृतिमाङिति पठित्वा तत्र प्रकृतिशब्दस्य घुमाङ्रूपप्रकृतिपरत्वमाश्रित्य घौ, माङ्घातौ, घुमा प्रकृतौ च परतः इति पर्यवसानमा-

रिच्च १।२।१७॥ अनयोरिदादेशः स्यात् सिच्च किस्स्यात् तङि। अदित। अदिथाः। अदिषि। ९६३ श्यैङ् गतौ। श्यायते। शश्ये। ९६४ प्यैङ् वृद्धौ। प्यायते। पप्ये। प्याता। ९६५ त्रैङ् पालने। त्रायते। तत्रे। ९६६ पूङ् पवने। पवते। पुपुवे। पविता। ९६७ मूङ् बन्धने। मवते। ९६८ डीङ् विहायसा गतौ। डयते।

श्रिञ्य माप्रकृतेर्ङितो मेङ्धातोः कृतात्वस्यापि ग्रहणस्य भाष्यकृता अभ्युपगतत्वादित्यर्थः। एवञ्च 'प्रणिमयते' इत्यत्र नाऽव्याप्तिः, मेङः कृतात्वमाप्रकृतित्वे सति ङित्त्वात्। नापि मीनातिमिनोत्योरारभे प्रनिमाता प्रनिमास्यतीत्यत्र अतिव्याप्तिः, माङ्रूपस्य ङित्त्वाऽभावादिति भावः। एतच्च घुसंज्ञासूत्रे भाष्ये स्थितम्। ममे। ममाते। ममिरे। क्रादिनियमादिट्। ममिषे। ममाथे। ममिध्वे। मामे। ममिवहे। ममिमहे। माता। मास्यते। मयताम्। अमयत। मयेत। मासीष्ट। अमास्त। अमास्यत। देङ्धातुर्मेङ्वत्। दयतेर्दिगि। 'दिगी'ति लुप्तप्रथमाकम्। देङ्धातोः दिगि इत्यादेशः स्यादिलिटीत्यर्थः। ननु लिट एशादौ दिग्यादेशे कृते द्वित्वे सति दिदिग्ये इत्यादि स्यादित्यत आह—दिग्यादेशेनेति। एतच्च भाष्ये स्पष्टम्। वृत्तिरिति भाष्यस्याप्युपलक्षणम्। क्रादिनियमादिट्। दिग्विषे। दिग्याथे। दिग्विध्वे। दिग्ये। दिग्विवहे। दिग्विमहे। दाता। दास्यते। दयताम्। अदयत। दयेत। दासीष्ट। लुङि सिचि अदास् त इति स्थिते—स्थाघ्वोरिच्च। 'असंयोगाल्लिट्' इत्यतः किदिति 'हलन्तिसिच्' इत्यतः सिजिति चानुवर्तते। तदाह—अनयोरित्यादिना। परस्मैपदेषु नेदं प्रवर्तते, तत्र 'गातिस्था' इति सिचो लुका लुप्तत्वात्। अत एव 'लिङ्सिचौ' इति सूत्रादात्मनेपदेष्विति नानुवर्तितम्, व्यावर्त्याऽभावात्। अदितेति। इत्वे कृते 'हस्वादङ्गात्' इति सिचो लुक्। त इत्यस्य ङित्त्वादिकारस्य न गुणः। आतामादौ तु इत्त्वे कृतेऽपि सिचो न लुक्, झलि परत एव लुग्विधेः। सिचः किच्चादिकारस्य न गुणः। अदिषाताम्। अदिषत। अदिथाः। अदिषाथाम्। अदिढ्वम्। अदिषि। अदिष्वहि। अदिष्महि। अदास्यत, इत्यपि ज्ञेयम्। श्यैङ् गतौ। श्यायते इति। शपि आयादेशः। शिद्विषयत्वादात्त्वं नेति भावः। शश्ये इति। एशि आत्त्वे आतो लोपः। शश्याते। शश्यिरे। क्रादिनियमादिट्। शश्यिषे। शश्याथे। शश्यिध्वे। शश्ये। शश्यिवहे। शश्यिमहे। श्याता। श्यास्यते। श्यायताम्। अश्यायत। श्यायेत। श्यासीष्ट। अश्यास्त। अश्यास्यत। प्यैङ्धातुरपि श्यैङ्वत्। त्रैङ्प्येवम्। पूङ् पवने इति। सेट् ऊदुपधानामनिट्सु पर्युदासात्। पवते इति। शपि गुणः अवादेशः। पुपुवे इति। कित्त्वादगुणाऽभावे उवङ्। पुपुवाते। पुपुविरे। पुपुविषे। पुपुवाथे। पुपुविध्वे। पुपुवे। पुपुविवहे। पुपुविमहे। पविता। पविष्यते। पवताम्। अपवत। पवेत। पविषीष्ट। अपविष्ट। अपविष्यत। मूङ्धातुरप्येवम्। डीङ् विहायसा गतौ इति आकाशेन गमने इत्यर्थः। सेडयम्, अनिट्सु डाङः पर्युदासात्। डयते इति। शपि ईकारस्य गुणे

डिडय्ये। डयिता। ६६६ तॄ प्लवनतरणयोः। २३६० ऋत इद्धातोः ७। १।१००॥ ऋदन्तस्य धातोरङ्गस्य इत्स्यात्। 'इत्वोत्त्वाभ्यां गुणवृद्धी विप्रतिषेधेन' (वा ४३७३) तरति। 'ऋच्छत्यृताम्' (सू २३८३) इति गुणः। 'तृफल—' (सू ४३०१) इत्येत्त्वम्। तेरतुः। तेरुः। २३६१ वृतो वा ७।२।३८॥ वृङ्वृञ्भ्यामृदन्ताच्चेटो दीर्घो वा स्याच्च तु लिटि। तरिता-तरीता। अलिटि इति किम्? तेरिथ। 'हलि च' (सू ३५४) इति दीर्घः। तीर्यात्। २३६२ सिचि च परस्मैपदेषु ७। २।४०॥ अत्र वृत इटो दीर्घो न। अतारिष्टाम्।

अयादेश इति भावः। डिडय्ये इति। किस्वादृगुणाऽभावे ईकारस्य यणिति भावः। डिड्याते। डिडियरे। डिडियषे। डिडयाथे। डिडियध्वे। डिडये। डिडियवहे। डिडियमहे। डयिता। डयिष्यते। डयताम्। अडयत। डयेत। डयिषीष्ट। डयिषीयास्ताम्। डयिषीरन्। डयिषीष्ठाः। डयिषीयास्थाम्। डयिषीढ्वम्—डयिषीध्वम्। डयिषीय। डयिषीवहि। डयिषीमहि। अडयिष्ट। अडयिष्यत। इति स्मिङादयो डीङन्ता क्ङितः। तॄधातुः सेट् परस्मैपदी। अनिट्सु ऋदन्तपर्युदासात्सेट्। ऋत इद्धातोः। 'ऋत' इति धातोर्विशेषणम्। तदन्तविधिः। अङ्गस्येत्यधिकृतम्। तदाह—ऋदन्तस्येति। धातोः किम्। मातॄणाम्। तथाच तरति, तिपति। ततार, पपार। इत्यादौ ऋकारस्य झपि तिपि णलि च परे गुणवृद्धी बाधित्वा अन्तरङ्गत्वात् इत्त्वम् उत्त्वं च स्यादिति शङ्का प्राप्ता। तां परिहर्तुमाह—इत्त्वोत्त्वाभ्यामिति। ल्यब्लोपे पञ्चमीद्विवचनम्। 'ऋत इद्धातोः' इति इत्त्वं 'उदोष्ठ्यपूर्वस्य' इति उत्त्वमन्तरङ्गमपि बाधित्वा गुणवृद्धी विप्रतिषेधसूत्रेण परत्वात् स्यातामिति भावः। तरतीति। णौ णलि ततार। अतुसादौ कित्त्वाद्गुणनिषेधमाशङ्क्याह—ऋच्छत्यृतामिति। ततर् अतुस् इति स्थिते अकारस्य गुणशब्देन भावितत्वात् 'न शसददवादिगुणानाम्' इति निषेधमाशङ्क्याह—तृफलेति। तेरतुः तेरुः इति। तेरिथ। तेरथुः। तेर। ततार-ततर। तेरिव। तेरिम। वृतो वा। वृ ऋत इत्यनयोः समाहारद्वन्द्वाल्पञ्चम्येकवचनम्। वृ इति वृङ्वृञोर्ग्रहणम्। आर्धधातुकस्येट्' इत्यत इडित्यनुवृत्त षष्ठ्या विपरिणम्यते। 'ग्रहोऽलिटि दीर्घः' इत्यतः अलिटि दीर्घ इत्यनुवर्तते। तदाह—वृङ्वृञ्भ्यामित्यादि। तरिता तरीतेति। इटो दीर्घविकल्पः। गुणे रपरत्वम्। तरिष्यति। तरतु। अतरत्। तरेत्। हलि चेति। आशीर्लिङि कित्त्वाद्गुणनिषेधे, इत्त्वे, रपरत्वे 'हलि च' इति दीर्घे, तीर्यात् इति रूपमित्यर्थः। अतारीत्। अतारिष्टाम्। इत्यादौ 'वृतो वा' इति दीर्घे प्राप्ते—सिचि च। अत्रेति। अपरस्मैपदपरके सिचि वृङ्वृञ्भ्याम् ऋदन्ताच्च परस्य इटो दीर्घो नेत्यर्थः। 'न लिङि' इत्यतो नेत्यनुवर्तते। अतारिष्टामिति। अतारिषुः। अतारिषम्। अतारिष्व। अतारिष्म। अतरिष्यत्।

अथाष्टावनुदात्तेतः। ६७० गुप गोपने। ६७१ तिज निशाने। ६७२ मान पूजायाम्। ६७३ बध बन्धने। २३६३ **गुप्तिज्किद्भ्यः सन्** ३।१।५॥२३६४ **मान्बधदान्शान्भ्यो दीर्घश्चाभ्यासस्य** ३।१।६॥ सूत्रद्वयोक्तेभ्यः सन्स्यात्, मानादीनामभ्यासस्येकारस्य दीर्घश्च। 'गुपेर्निन्दायाम्' (वा १६८७) 'तिजेः क्षमायाम्' (वा १६८८) 'कितेर्व्याधिप्रतीकारे' (१६८६) निग्रहे अपनयने नाशने संयमे च। 'भानेर्जिज्ञासायाम्' (वा १६६२) 'बधेश्चित्तविकारे' (वा १६६३) 'दानेरार्जवे' (वा १६६४) 'शानेर्निशाने' (वा १६६५) 'सनाद्यन्ताः' (सू २३०४) इति धातुत्वम्। २३६५ **सन्यङोः** ६।१।६॥ सन्नन्तस्य यङन्तस्य च प्रथमैकाचो द्वे स्तोऽजादेस्तु द्वितीयस्य। अभ्यासकार्यम्। गुपिप्रभृतयः किद्भिन्ना निन्दाद्यर्थका एवानुदात्तेतः। दानशानौ तु स्वरितेतौ। एते नित्यं सन्नन्ताः। अर्थान्तरेषु त्वननुबन्धकाः चुरादयः।

गुप गोपने इति। **गोपनं रक्षणम्**। तिज निशाने इति। **निशानं तीक्ष्णीकरणम्**। मान पूजायाम्। बध बन्धने इति। एते चत्वारोऽनुदात्तेत इति स्थितिः। गुप्तिज्किद्भ्यः। मान्बध। गुप्तिजी इह पठितौ। 'कित निवासे' इत्यनुपदमेव परस्मैपदिषु पठिष्यते। एभ्यश्चिभ्यो धातुभ्यः सन्प्रत्ययः स्यादिति प्रथमसूत्रार्थः। मानधातुर्बधधातुश्च इह पठितौ। दान खण्डने, शान तेजने इत्यनुपदमेव स्वरितेत्सु पठिष्येते। एभ्यश्चतुर्भ्यः सन् स्यादिति द्वितीयसूत्रे प्रथमखण्डस्यार्थः। 'आभ्यासस्ये'ति च्छेदः। अभ्यासस्य विकारः आभ्यासः। स च 'सन्यतः' इति इत्वमेव, नतु ह्रस्वः, इति 'गुणो यङ्लुकोः' इति सूत्रे भाष्ये स्पष्टम्। ततश्च मान्बधदान्शानामभ्यासावयवस्य इकारस्य सन्-सन्नियोगशिष्टो दीर्घश्च स्यादिति द्वितीयसूत्रे द्वितीयखण्डस्यार्थः, इत्यभिप्रेत्य सूत्रद्वयस्य फलितमर्थमाह—सूत्रद्वयेति। अथ उक्तसनोः वृत्तिकृदाद्युपनिबद्धान् अर्थविशेषानाह—गुपेर्निन्दायामित्यादिना शानेर्निशाने इत्यन्तेन। अत्र गोपनाद्यर्थकानां निन्दादौ वृत्तिस्त्वर्थनिर्देशस्योपलक्षणत्वाद्बोध्या। जिज्ञासाशब्देन जिज्ञासाप्रयोज्यो विचारो लक्ष्यते। मानेर्विचारे इत्येव वृत्तिकृत्। सन्नन्तस्य धातुकार्यप्राप्त्यर्थमाह—सनाद्यन्ता इति। सन्यङोः। अवयवषष्ठ्येषा। प्रत्ययस्वात्तदन्तग्रहणम्। 'एकाचो द्वे प्रथमस्य' इति 'अजादेर्द्वितीयस्य' इति चाधिकृतम्। तदाह—सन्नन्तस्येत्यादिना। 'सनि यङि च परे' इति तु न व्याख्येयम्, तथा सति प्रतिपूर्वादिणः सनि अटि [illegible]र्यङि च प्रतीषिषति, अटाट्यते इत्यत्र प्रत्ययसहितस्य द्वित्वाऽनापत्तेः। अभ्यासकार्यमिति। हलादिशेषादिकमित्यर्थः। गुपिप्रभृतय इति। कितधातुभिन्नाः गुप्तिजमानबधाश्चत्वारः 'गुपेर्निन्दाया'मित्यादिनिबद्धनिन्दाद्यर्थका एव अनुदात्तेतः सन्भाज इत्यर्थः। कितधातुस्तु परस्मैपदिषु पठिष्यमाणश्चादुदात्तेदेव सन् व्याधिप्रतीकारादिषु पञ्चस्वेवार्थेषु सन्भागिति भावः। दानशानौ स्वरिति। 'दान खण्डने' 'शान तेजने' इति धातू स्व-

अनुबन्धस्य केवलेऽचरितार्थत्वात्सन्नन्तात्तङ्। धातोरित्यविहितत्वात्सनोऽत्र नार्धधातुकत्वम्। तेनेड्गुणौ न। जुगुप्सते। जुगुप्साञ्चक्रे। तितिक्षते। मीमांसते। भष्भावः। चर्त्वम्। बीभत्सते। ६७४ रस रामस्ये। आरभते। आरेभे। रब्धा।

रितेतावेव सन्तौ आजवे निशाने चार्थं सन्भाजावित्यर्थः, तयोरनुपदमेव स्वरितेत्सु पाठादिति भावः। एते नित्यं सन्नन्ता इति। एते गुप्तिजादयः सप्त धातवः 'गुपेर्निन्दाया'मित्यादिनिबद्धेष्वर्थेषु नित्यं सन्नन्ताः। निन्दाद्यर्थकत्वे सनं विना एषां प्रयोगो नास्तीत्यर्थः। अर्थान्तरेषु त्विति। निन्दादिभ्योऽन्येषु धातुपाठनिर्दिष्टेषु तदन्येषु चार्थेषु अनुदात्तानुबन्धरहिताः सन्तश्चौरादिका एव भवन्ति, न तु भौवादिका इत्यर्थः। चुरादिष्वेतेषामनुदात्तानुबन्धकत्वे अनुबन्धकरणस्य केवलेष्वचरितार्थतया ण्यन्तादकर्तृगेऽपि फले तङ् स्यादिति भावः। नन्वेवं सति भ्वादिगणे गुपादेरनुदात्तानुबन्धकरणं व्यर्थम्, उक्तरीत्या गोपनाद्यर्थकानामेषामनुबन्धरहितचौरादिकत्वनियमेन, निन्दाद्यर्थेषु सन्नन्तनियमेन च ततोऽत्यन्त प्रयोगाऽभावादित्यत आह—अनुबन्धस्येति। गुपादिषु केवलेष्वनुबन्धनिर्देशस्य निष्फलतया अनुबन्धनिर्देशस्य सन्नन्तार्थत्वं विज्ञायत इति कृत्वा सन्नन्तात्तङित्यर्थः। नचैवमपि भ्वादिगणे एषां गोपनाद्यर्थनिर्देशो व्यर्थ एवेति वाच्यम्, भ्वादौ तदर्थनिर्देशस्य अपाणिनीयत्वादिति भावः। तदुक्तं भाष्ये—'गुपादिष्वनुबन्धकरणसामर्थ्यात्सन्नन्तादात्मनेपदम्' इति। अत्र सन्नन्तादात्मनेपदमित्युक्त्या केवलानामेषां शब्दिकरणानां नास्ति प्रयोग इति सूचितम्। तथा चुरादिष्वेषामनुदात्तानुबन्धराहित्यमित्यपि सूचितम्। अन्यथा अनुबन्धकरणस्य केवलेष्वचरितार्थत्वात् सन्नन्तादिव ण्यन्तादपि अकर्तृगे फले आत्मनेपदार्थत्वापातात्सन्नन्तादात्मनेपदमित्युक्तिरसङ्गता स्यादित्यन्यत्र विस्तरः। धातोरितीति। 'आर्द्धधातुकं शेषः' इत्यत्र धातोर्विहितः प्रत्यय इतिविहितविशेषणाश्रयणात् सनश्चास्य धात्वधिकारविहितत्वाऽभावान्नार्द्धधातुकत्वमित्यर्थः। तेनेति। सन आर्द्धधातुकत्वाभावेनेत्यर्थः। जुगुप्सते इति। निन्दतीत्यर्थः। गुपेः सनि अनार्द्धधातुकत्वाद्विड्गुणयोरभावे 'सन्यङोः' इति द्वित्वे हलादिशेषे अभ्यासचुत्वमिति भावः। जुगुप्साञ्चक्रे इति। 'कास्प्रत्यया'दित्याम्। जुगुप्सिता। जुगुप्सिष्यते। जुगुप्सताम्। अजुगुप्सत। जुगुप्सेत। जुगुप्सिषीष्ट। अजुगुप्सिष्ट। अजुगुप्सिष्यत। तितिक्षते इति। तीक्ष्णीकरोतीत्यर्थः। तिजेः सनि द्वित्वादि। जस्य कुत्वेन गः, तस्य चर्त्वेन कः, सस्य षत्वमिति विशेषः। मीमांसते इति। विचारयतीत्यर्थः। मान्धातोः सनि द्वित्वे हलादिशेषे अभ्यासहस्वे 'सन्यतः' इति इत्त्वे मान्बधेत्यभ्यासदीर्घे, 'नश्चे'त्यनुस्वारे, मीमांसधातोर्लडादीति भावः। बधधातोः सनि विशेषमाह—भष्भाव इति। धकारस्य भकार इत्यर्थः। चर्त्वमिति। धस्य तकार इत्यर्थः। तथा च 'भश्से'ति सन्नन्तं सम्पन्नम्। बीभत्सते इति। भष्भवचर्त्वयोरसिद्धत्वात् बध् इत्यस्य द्वित्वे हलादिशेषे

रप्स्यते। ६७५ डु लभष् प्राप्तौ। लभते। ६७६ ष्वञ्ज परिष्वङ्गे। २३६६ दंशस-ञ्जस्वञ्जां शपि ६।४।२५॥ २३६७ रञ्जेश्च ६।४।२६॥ एषां शपि नलोपः। स्वजते। परिष्वजते। 'ग्रन्थिग्रन्थिदम्भिस्वजीनां लिटः कित्त्वं वा' इति व्याकरणा-न्तरम्। देभतुः। सस्वजे। इति भाष्योदाहरणादेकदेशानुमत्या इहाप्याश्रीयते। 'सदेः परस्य लिटि' (सू २३६१) इति सूत्रे 'स्वञ्जेरुपसंख्यानम्' (वा४६६८) अतो-ऽभ्यासात्परस्य षत्वं न। परिषस्वजे। परिषस्वञ्जे। सस्वञ्जिषे—सस्वङ्क्षिषे। स्व-ङ्क्ता। स्वङ्क्ष्यते। स्वजेत। स्वङ्क्षीष्ट। अस्वङ्क्त। प्रत्यस्वङ्क्त। 'प्राक्सितात्'

'सन्यतः' इति इत्त्वे 'मान्बध' इति दीर्घे बीभत्सधातोर्लंडादीति भावः। तदेवं गुपा-दिषु सप्तसु सन्नन्तेषु अत्र क्रमे धातुपाठे निबद्धाश्चत्वार उदाहृताः। कितमानज्ञान-घातवस्तु अनुपदमेव धातुपाठक्रमे पठिष्यमाणास्तत्र तत्रोदाहरिष्यते। रभ रामस्ये इति। अनिडयम्। रामस्यं शीघ्रीभावः। आङ्पूर्वकस्तु प्रारम्भार्थकः। तदाह—आर-भते इति। रब्धेति। 'झषस्तथो'रिति धत्वम्, भस्य ऊस्त्वम्। रप्स्यत इति। रभताम्। अरभत। रभेत। रप्सीष्ट। अरब्ध। अरप्स्यत। डु लभषिति। डुरित् षकारश्च। 'ङिव-तः क्ङिन्नः' 'क्ङिच्चादिभ्योऽङ्' इति प्रयोजनम्। अनिट् रभधातुवद्रूपाणि। ष्वञ्ज प-रिष्वङ्गे इति। षोपदेशोऽयमनिट्। दंशस्वञ्ज। रञ्जेश्च। व्याख्यासौकर्याय सूत्रद्वयमुपा-त्तम्। नलोप इति। नकारस्य लोप इत्यर्थः, 'झषान्नलोपः' इत्यतः तदनुवृत्तेरिति भा-वः। परिष्वजते इति। 'परिनिविभ्य' इति षत्वमिति भावः। संयोगात्परत्वाल्लिट कित्त्वे अप्राप्ते आह—ग्रन्थीति। व्याकरणान्तरमिदं पाणिनीयैरपि ग्राह्यमित्याह—देभतु-रिति। 'अत एकहल्मध्ये' इति सूत्रभाष्ये 'देभतुः' इत्युदाहृतम्। 'सदेः परस्य लिटि' इति सूत्रभाष्ये सस्वजे इत्युदाहृतम्। ततश्च एकदेशानुमत्या ग्रन्थिग्रन्थीत्यादिवा-क्यं कृत्स्नं व्याकरणान्तरस्थं भाष्यानुमतमिति विज्ञायत इत्यर्थः। सदेरिति। 'सदेः पर-स्य लिटि' इति षत्वनिषेधसूत्रे स्वञ्जेरपि ग्रहणमित्यर्थः। ततश्च स्वदिस्वञ्ज्योरुत्तर-खण्डस्य सस्य षत्वं न स्यादिति लब्धम्। तदाह—अतोऽभ्यासात् परस्येति। परिषस्वजे परिषस्वञ्जे इति। 'परस्ये'त्युक्तेरुत्तरखण्डस्यैव षत्वनिषेधः, न स्वभ्यासस्य। कित्त्वपक्षे नलोपः। सस्वञ्जाते—सस्वजाते। सस्वञ्जिरे—सस्वजिरे। क्ङिदिनियमादि-दित्याह—सस्वञ्जिषे सस्वङ्क्षिषे इति। सस्वञ्जाथे-सस्वजाथे। सस्वञ्जिध्वे-सस्वङ्क्षिध्वे। सस्वञ्जे-सस्वजे। सस्वञ्जिवहे-सस्वजिवहे। सस्वञ्जिमहे-सस्वजिमहे। स्वङ्क्तेति। स्वञ्ज् ता इति स्थिते जकारस्य कुत्वेन गकारे सति श्चुत्वसम्पन्नजकारस्य निहतौ नकारस्यानुस्वारे तस्य परसवर्णेन ङकारे गकारस्य चर्त्वं रूपम्। एवमग्रेऽपि। स्वजेतेति। 'दंशसञ्ज' इति शपि नलोप इति भावः। स्वङ्क्षीष्ट। अस्वङ्क्तेति। लुङि अस्वञ्ज् स त इति स्थिते 'झलो झलि' इति सिज्लोपे कुत्वादि पूर्ववदिति भावः।

(सू २२७६) इति षत्वम्। परिनिविभ्यस्तु 'सिवादीनां वा–' (सू २३५६) इति विकल्पः। एतदर्थमेव 'उपसर्गात्सुनोति—' (सू २२७०) इत्येव सिद्धे स्तुस्वञ्जोः 'परिनिवि–' (सू २२७५) इत्यत्र पुनरुपादानम्। पर्यष्वङ्क्त–पर्यस्वङ्क्त। ९७७ हद पुरीषोत्सर्गे। हदते। जहदे। हत्ता। हत्स्यते। हदेत। हत्सीष्ट। अहत्त।

अथ परस्मैपदिनः। ९७८ ञि ष्विदा अव्यक्ते शब्दे। ९७९ स्कन्दिर् गतिशोषणयोः। चस्कन्दिथ–चस्कन्थ। स्कन्ता। स्कन्त्स्यति। नलोपः—स्कद्यात्। इरित्त्वादङ्वा–अस्कदत्–अस्कान्त्सीत्। अस्कान्ताम्। अस्कान्त्सुः। २३६८ वेः

ननु 'प्रत्यष्वङ्क्त' इत्यत्र अटा व्यवधानादुपसर्गस्थादिणः परत्वाऽभावात् कथम् 'उपसर्गात्सुनोति' इति षत्वमित्यत्र आह—पाक् सिवादिति। परिनिविभ्यस्त्विति। 'परस्य स्वञ्जेः' इति शेषः। ननु परिनिविभ्यः परस्यापि स्वञ्जेः 'परिनिविभ्यः सेवसितसयसिवुसहसुट्स्तुस्वञ्जाम्' इति नित्यमेव षत्वमुचितम्, 'प्राक्सितादड्व्यवायेऽपि' इत्यटा व्यवधानेऽपि तस्य प्रवृत्तेः। 'उपसर्गात्सुनोति' इत्यादिसूत्रे स्वञ्जेः पठितत्वेन स्वञ्जेः 'प्राक्सितात्' इति सूत्रविषयत्वादित्यत आह—एतदर्थमेवेत्यादि। परिनिवि इति। नित्यषत्वविधौ स्वञ्जिरप्युपात्तः। ततः 'उपसर्गात्सुनोति' इत्येव तस्य षत्वे सिद्धे पुनरुपादानं 'सिवादीनां वाड्व्यवायेऽपि' इत्युत्तरसूत्रे षत्वविकल्पविधौ अनुवृत्त्यर्थमेव सम्पद्यते। परिनिविभ्यः परस्य स्वञ्जेः 'सिवादीनां वा' इति षत्वविकल्पार्थं पूर्वसूत्रे 'परिनिविभ्यः सेव' इत्यत्र स्वञ्जिग्रहणमिति पर्यवस्यतीत्यर्थः। इद पुरीषोत्सर्गे। अनिडयम्। क्र्यादिनियमादिट्। जहदिषे। जहदिध्वे। जहदिवहे। जहदिमहे। इत्तेति। लुटि तासि दस्य चर्त्वम्। अहत्तेति। 'झलो झलि' इति सिज्लोपः। गुपादयोऽष्टावनुदात्तेतो गताः।

अथ परस्मैपदिन इति। 'कित निवासे' इत्यन्ता इति शेषः। ञिष्विदेति। ञिः आकारश्च इत्। सेट्। स्वेदति। सिष्वेद। सिष्विदतुः। सिष्विदुः। सिष्वेदिथ। सिष्विदथुः। सिष्विद। सिष्वेद। सिष्विदिव। सिष्विदिम। स्वेदिता। स्वेदिष्यति। स्वेदतु। अस्वेदत्। स्वेदेत्। स्विद्यात्। अस्वेदीत्। अस्वेदिष्यत्। स्कन्दिरिरित्। अनिट्। भारद्वाजनियमात्थलि वेडित्याह—चस्कन्दिथ चस्कन्त्थेति। अनिट्पक्षे चस्कन्द्थ इति स्थिते 'खरि च' इति दकारस्य तकारः। चस्कन्दिव। चस्कन्दिम। स्कन्त्तेति। लुटि तासि चर्त्वेन दस्य तः। स्कन्त्स्यतीति। स्ये दस्य चर्त्वम्। स्कन्दतु। अस्कन्दत्। स्कन्देत्। आशीर्लिङि विशेषमाह—नलोप इति। इरः समुदायस्य इत्वेन धातोरनिदित्त्वादाशीर्लिङि नकारस्य लोप इत्यर्थः। अस्कददिति। लुङि अङि सति ङित्त्वान्नलोप इति भावः। अङभावे आह—अस्कान्त्सीदिति। अनेकहल्त्वव्यवधानेऽपि हलन्तलक्षणा वृद्धिः प्रवर्तत इति निरूपितमक्षधातौ। अतोऽत्र वृद्धौ दस्य चर्त्वेन तः। अस्कान्ता-

स्कन्देरनिष्ठायाम् ८।३।७३॥ षत्वं वा स्यात्। कृत्येवेदम्, अनिष्ठायाम् इति पर्युदासात्। विस्कन्ता-विस्कन्त्ता। निष्ठायां तु विस्कन्नः। २३५६ परेश्च ८।३।७४॥ अस्मात्परस्य स्कन्देः सस्य षो वा। योगविभागाद् अनिष्ठायाम् इति न सम्बध्यते। परिष्कन्दति-परिस्कन्दति। परिस्कन्नः-परिष्कण्णः। षत्वपक्षे णत्वम्। नच पदद्वयाश्रयतया बहिरङ्गत्वात्षत्वस्यासिद्धत्वम्। 'धातूपसर्गयोः कार्यमन्तरङ्गम्' इत्यभ्युपगमात्। 'पूर्वं धातुरुपसर्गेण युज्यते ततः साधनेन' इति भाष्यम्। 'पूर्वं साधनेन' इति मतान्तरे तु न णत्वम्। ९८० यभ मैथुने। येभिथ-ययब्ध। यन्धा।

मिति। हलन्तलक्षणवृद्धौ 'झलो झलि' इति सिज्लोपे दस्य चत्वेम्। अस्कान्तसुरिति। उसि सिचि वृद्धौ दस्य चत्वम्। अस्कान्तसीः। अस्कान्तम्। अस्कान्त। अस्कान्तस्म। अस्कान्तस्व। अस्कान्तस्म। अस्कन्स्यत्। वेः स्कन्देः। शेषपूरणेन सूत्रं व्याचष्टे-षत्वं वा स्यादिति। 'अपदान्तस्य मूर्धन्यः' इत्यधिकारात् 'सिवादीनां वा' इत्यतो वेस्यनुवृत्तेश्चेति भावः। वेः परस्य स्कन्देः सस्य षो वा स्यात् अनिष्ठायां परत इति फलितम्। ननु विस्कन्दतीत्यादौ कुतो न षत्वविकल्प इत्यत आह—कृत्येवेदमिति। पर्युदासस्य 'अब्राह्मणमानयेत्यादाविव सजातीयापेक्षत्वादिति भावः। 'विस्कन्ता-विस्कन्त्तेति। तृचि रूपे। अषोपदेशत्वादप्राप्ते विभाषेयम्। परेश्च। ननु 'वेपरिभ्यां स्कन्देरनिष्ठाया'मित्येव सिद्धे सूत्रभेदो व्यर्थं इत्यत आह—योगेति। षत्वपक्षे इति। परिस्कन्द् त इति स्थिते 'अनिदितामि'ति नलोपे 'रदाभ्याम्' इति निष्ठातकारस्य, तस्पूर्वदकारस्य च नत्वे सस्याऽनेन षत्वपक्षे प्रथमनकारस्य रेफापेक्षया भिन्नपदस्थत्वेऽपि षात् परत्वात् णत्वे द्वितीयनकारस्य ष्टुत्वेन णत्वे 'परिष्कण्ण' इति रूपमित्यर्थः। ननु दकारस्थानिकनकारस्य षकारनिमित्तकं णत्वमन्तरङ्गम्, निमित्तनिमित्तिनोरेकपदस्थत्वात्। षत्वं तु परि इत्युपसर्गात्मकपदान्तरस्थनिमित्तीकृत्य प्रवर्तमानं बहिरङ्गम्। ततश्च णत्वे कर्तव्ये बहिरङ्गस्य षत्वस्याऽसिद्धत्वात् षात्परत्वाभावात् कथं णत्वमित्याशङ्क्य निराकरोति—न चेति। पदद्वयाश्रयतया बहिरङ्गस्य षत्वस्याऽसिद्धत्वं यत्प्रपञ्च्यते तन्न शङ्क्यमित्यन्वयः। कुत इत्यत आह-धातूपसर्गयोरिति। पूर्वं धातुरिति। पूर्वं धातुरुपसर्गेण सह युज्यते। सन्ध्यादिकार्यं लभते। पश्चात् धातूपसर्गकार्यंप्रवृत्त्यनन्तरं साधनेन युज्यते। साधनशब्दः कारकवाची। इह तु तद्वाचकः प्रत्ययो लक्ष्यते। प्रत्ययेनेति यावत्। इदं च 'सम्प्रसारणाच्च' इत्यादिसूत्रभाष्ये स्पष्टम्। तदाह—भाष्यमिति। मतान्तरे त्विति। 'पूर्वं धातुः साधनेन युज्यते, पश्चादुपसर्गेण' इति पक्षे तु षत्वस्य बहिरङ्गतया असिद्धत्वान्न णत्वमित्यर्थः। यभधातुरनिट्। यभति। ययाभ। येभतुः। थलि तु भारद्वाजनियमादिट्पक्षे पित्त्वेनाऽकित्त्वेऽपि 'थलि च सेटि' इत्येत्त्वाभ्यासलोपं मत्वा आह—येभिथेति। ययब्धेति। थलि इडभावपक्षे पित्त्वेनाऽकित्त्वादेत्त्वाऽभ्यासलोपाऽभावे ययभ्थ इति स्थिते 'झष-

अप्स्यति अयाप्सीत्। ९८१ णम प्रह्वत्वे शब्दे च। नेमिथ-ननन्थ। नन्ता। अनंसीत्। अनंसिष्टाम्। ९८२ गम्लृ ९८३ सृप्लृ गतौ। २४०० इषुगमियमां छः ७।३।७७॥ एषां छः स्याच्छिति परे। गच्छति। जगाम। जग्मतुः। जग्मुः। जगमिथ-जगन्थ। गन्ता। २४०१ गमेरिट् परस्मैपदेषु ७।२।५८॥ गमेः परस्य सकारादेरिट् स्यात्। गमिष्यति। लृदित्त्वादङ्। 'अनङि' इति पर्युदासान्नोपधालोपः। अगमत्। सर्पति। ससर्प। २४०२ अनुदात्तस्य चर्दुपधस्यान्य-

---

स्तथोः' इति थस्य धत्वे भस्य जश्त्वेन बकार इति भावः। येमथुः। येम। य यामयय्म। क्रादिनियमादिट्। येमिव। येमिम। यच्छेत। लुटि तासि तकारस्य 'झषस्तथोः' इति धत्वम्। भकारस्य जश्त्वेन बकार इति भावः। यप्स्यतीति। स्ये भस्य चर्त्वेन पः। यभतु। अयभत्। यभेत्। यभ्यात्। अयाप्सीदिति। हलन्तलक्षणा वृद्धिरिति भावः। अयप्स्यत्। णम प्रह्वत्वे इति। आनडयं णोपदेशश्च। केचित्त्विमं धातुमुदितं पठन्ति। तत्तु प्रामादिकम्। तथा सति 'उदितो वा' इति क्त्वायामिड्विकल्पस्य 'यस्य विभाषा' इति निष्ठायामिड्विकल्पस्य चापत्तेः। नमति। ननाम। नेमतुः। नेमुः। थलि तु भारद्वाजनियमादिट्पक्षे पित्त्वेनाऽकित्त्वेऽपि 'थलि च सेटि' इत्येत्त्वाभ्यासलोपं मत्वा आह—नेमिथ ननन्थेति। इडभावपक्षे पित्त्वेन अकित्त्वादेत्त्वाभ्यासलोपाभावे रूपम्। नेमथुः। नेम। ननाम—ननम। नेमिव। नेमिम। क्रादिनियमादिट्। नन्तीति। मस्यानुस्वारपरसवर्णौ। नंस्यति। नमतु। अनमत्। नमेत्। नम्यात्। अनंसीदिति। 'यमरम' इति सगिति भावः। अनंस्यत्। गम्लृ सृप्लृ गताविति। अनिटौ। सृपिरुपदेशः। इषुगमि। छितीति। 'छिवुक्लमुचमाम्' इत्यतः तदनुवृत्तेरिति भावः। उदित्त्वनिर्देशात्तौदादिकस्य इषेर्ग्रहणम्। अत्राऽऽचीत्यनुवर्त्य अजादौ द्वितीयाश्रित्य इष्यति इष्यात इत्यत्र हलं नेति भाष्ये स्थितम्। एवं चात्र सूत्रे तुदादौ च उदित्पाठः अनार्ष इति शब्देन्दुशेखरे स्थितम्। गच्छतीति। शपि मकारस्य छकारः। जग्मतुरिति। 'गमहन' इत्युपधालोपः। एवं जग्मुः। भारद्वाजनियमात्थलि वेट्। तदाह—जगमिथ जगन्थेति। जग्मथुः। जग्म। जगाम—जगम। जग्मिव। जग्मिम। क्रादिनियमादिट्। गमेरिट्। गमेरिति पञ्चमी। 'सेऽसिचि' इत्यतः से इत्यनुवृत्तेन आर्धधातुकस्येत्यनुवृत्तं विशेष्यते। तदादिविधिः। तदाह—गमेः परस्यैत्यादिना। 'परस्मैपदेष्वि'त्यस्य आत्मनेपदाऽभावे इत्यर्थः। एवं च 'सञ्जिगमिषितेऽति तृचि इट् सिध्यति। गमिष्यतीति। गच्छतु। अगच्छत्। गच्छेत्। गम्यात्।

ङि विशेषमाह—लृदित्त्वादङिति। 'गमहन' इति उपधालोपो नेत्याह—अनङि इति पर्युदासादिति। अगमदिति। लृङि अगमिष्यत्। सर्पतीति। शपि ऋकारस्य गुणपररूपम्। ससर्पेति। ससृपतुः। ससृपुः। थलि क्रादिनियमाभावादकारवत्त्वाभावाच्च नेड्विकल्पः। ससर्पिथ। ससृ-

तरस्याम् ६।१।५६॥ उपदेशेऽनुदात्तो य ऋदुपधस्तस्याऽम्वा स्याद्झलादावकिति परे। स्रमा—सर्म्मा। स्रप्स्यति-सप्स्यति। असृपत्। ९८४ यम उपरमे। यच्छति। येमिथ—ययन्थ। यन्ता। अयंसीत्। अयंसिष्टाम्। ९८५ तप सन्तापे। तप्ता। अताप्सीत्। २४०३ निसस्तपतावनासेवने ८।३।१०२॥ षः स्यात्। आसेवनं पौनःपुन्यं, ततोऽन्यस्मिन्विषये। निष्टपति। ९८६ त्यज हानौ। तत्यजिथ—तत्यक्थ। त्यक्ता। अत्याक्षीत्। ९८७ षञ्ज सङ्गे। 'दंशसञ्जस्वञ्जां शपि'

पथुः। ससृप। ससर्प। ससृपिव। ससृपिम। लुटि तासि ऋघूपधगुणे रपरे प्राप्ते—अनुदात्तस्य च। 'सृजिदृशोः' इत्यतः झलयमकितीति। 'आदेच' इत्यत उपदेशे इति चानुवर्तते। तदाह—उपदेशेऽनुदात्त इत्यादिना। मित्त्वादन्त्यादचः परः। उपदेशे किम्। स्रप्तुम्। तुमुनि परे 'ञ्नित्यादिर्नित्यम्' इत्युदात्तोऽयम्। अथापि उपदेशे अनुदात्तत्वादम् भवत्येव। अकितीति किम्? क्ङप्रत्यये सृसः। स्रप्तेति। सृप् धातोर्लुटि तासि अमागमे ऋकारस्य यणिति भावः। सर्म्मेति। अमभावे लघूपधगुणे रपरत्वमिति भावः। एवं स्रप्स्यति-सप्स्यतीति। सर्पतु। असर्पत्। सर्पेत्। सृप्यात्। असृपदिति। लृदित्त्वात् च्लेरङि सति डित्त्वान्न गुण इति भावः। अस्रप्स्यत्—असप्स्यत्। यम उपरमे इति। उपरमो विरमणम्। अनिदयम्। यच्छतीति। 'इषुगमियमाम्' इति शपि छः। ययाम। येमतुः। येमुः। थलि भारद्वाजनियमादिट्पक्षे 'थलि च सेटि' इत्येत्त्वाभ्यासलोपौ। तदाह—येमिथ—ययन्थेति। इडभावे रूपम्। येमथुः। येम। ययाम—ययम। येमिव। येमिम। क्ङादिनियमादिट्। यन्तेति। यंस्यति। यच्छतु। अयच्छत्। यच्छेत्। यस्यात्। अयंसीदिति। 'यमरमे'ति इट्सकौ। 'इट ईटी'ति सिज्लोपः। 'नेटी'ति निषेधान्न हलन्तलक्षणा वृद्धिरिति भावः। अयंस्यत्। तप सन्तापे इति। अनिदयम्। तपति। ततापः। तेपतुः। तेपुः। तेपिथ—ततप्थ। तेपथुः। तेप। ताप—तताप। तेपिव। तेपिम। तप्तेति। तप्स्यति। तपतु। अतपत्। तपेत्। तप्यात्। अताप्सीदिति। हलन्तलक्षणा वृद्धिरिति भावः। अतप्स्यत्। निसस्तपतौ। शेषपूरणेन सूत्रं व्याचष्टे—षः स्यादिति। 'अपदान्तस्य मूर्धन्यः' इत्यधिकारादिति भावः। निसः सकारस्य षः स्यात् तपधातौ परत इति यावत्। 'अनासेवने' इत्येतद्व्याख्यास्यन् आसेवनशब्दं व्याचष्टे—पौनःपुन्यमिति। आसेवनशब्देन सह नञ्समास इत्यभिप्रेत्याह—ततोऽन्यस्मिन्विषये इति। आदेशत्वाऽभावात् पदान्तत्वाच्च अप्राप्ते वचनम्। निष्टपतीति। निष्कृष्य तपतीत्यर्थः। निसः सस्य षत्वे तकारस्य ष्टुत्वेन टः। आसेवने तु न षत्वम्। त्यज हानाविति। हानिरुत्सर्गः। अयमनिट्। त्यजति। तत्याज। तत्यजतुः। तत्यजुः। संयुक्तहल्मध्यस्थत्वादेत्त्वाभ्यासलोपौ न। थलि तु भारद्वाजनियमाद्वेट्। तदाह—तत्यजिथ—तत्यक्थेति। इडभावे 'चोः कुः'रिति भावः। त्यक्तेति। त्याजयति। त्यजतु। अत्यजत्। त्यजेत्। त्यज्यात्।

(धृ २३२६) इति नलोपः । सजति । सङ्क्ता । ९८८ दृशिर् प्रेक्षणे । पश्यति । २४०४ विभाषा सृजिदृशोः ७।२।६५॥ आभ्यां यन इड् वा । २४०५ सृजिदृशोर्झल्यमकिति ६।१।५८॥ अनयोरामागमः स्याज्झलादावकिति । ददृष्ठ—ददर्शिथ । द्रष्टा । द्रक्ष्यति । दृश्यात् । हरित्त्वादड् वा । २४०६ ऋदृशोऽङि गुणः ७।४।१६॥ ऋवर्णान्तानां दृशेश्च गुणः स्यादङि । अदर्शत् । अङभावे—२४०७ न दृशः ३।१।४७॥ दृशश्च्लेः क्सो न । अद्राक्षीत् । ९८९ दंश दशने ।

अत्याक्षीदिति। हलन्तलक्षणा वृद्धिरिति भावः। अयक्ष्यत्। षढ न सङ्घे इति। षोपदेशोऽयमनिट्, नोपधश्च। कृतानुस्वारपरसवर्णस्य निर्देशः। शरः पित्त्वेन कित्त्वाभावात्तस्मिन्परे 'अनिदिताम्' इति नलोपोऽप्रवृत्तेराह—दंशसञ्जेति नलोप इति। अनुस्वारपरसवर्णयोरसिद्धत्वादिति भावः। सजतीति। लिटि तु ससञ्ज। अनुनासादौ तु अकित्त्वान्न नलोपः ससञ्जतुः। ससञ्जुः। थलि भारद्वाजनियमाद्वेट्। ससञ्जिथ—ससङ्क्थ। इडभावे जश्त्वेन गकारे तस्य चर्त्वे सति अनुस्वारपरसवर्णसम्पन्नस्य स्वर्गपञ्चमस्य निवृत्तौ ककारे परेऽनुस्वारस्य परसवर्णो ङकारः। ससञ्जथुः। ससञ्ज। ससञ्ज। ससञ्जिव। ससञ्जिम। क्रादिनियमादिट्। सङ्क्ष्यतीति। तासि जश्त्वेन गकारे तस्य चर्त्वे सति जश्त्वे निवृत्तौ नश्य ङकार इति भावः। सङ्क्ष्यति। सजतु। असजत्। सजेत्। सज्यात्। असाङ्क्षीत्। हलन्तत्वाद्वृद्धिः। असङ्क्ष्यत्। दृशिर् प्रेक्षणे इति। हरित्, अनिट् च। पश्यतीति। शितिं 'पाघ्राध्मा' इति पश्यादेश इति भावः। ददर्श। ददृशतुः। ददृशुः। थलि तु क्रादिनियमान्नित्यमिट् प्राप्तः। अजन्ताऽकारवत्त्वाऽभावात् 'अचस्तास्वत्' इति 'उपदेशेऽत्वतः' इति निषेधस्य चाप्राप्तेः ऋदन्तत्वाऽभावेन भारद्वाजनियमस्याऽप्रसक्तेः। तत्राह—विभाषा सृजि। पञ्चम्यर्थे षष्ठी। 'गमेरिट्' इत्यतः इडिति 'अचस्तास्वत्' इत्यतः थलीति चानुवर्तते। तदाह—आभ्यामिति। इडभावपक्षे 'अनुदात्तस्य' इति अमागम विकल्पे प्राप्ते—सृजिदृशोः। अम् अकिति इति च्छेदः। नित्यार्थमिदम्। ददृष्ठेति। ददृश् थ इति स्थिते इडभावपक्षे अमागमे ऋकारस्य यणि वश्चादिना शस्य षत्वे थस्य ष्टुत्वेन ठ इति भावः। इट्पक्षे स्वाह—ददर्शिथेति। अझलादित्वादम् नेति भावः। द्रष्टेति। तासि अमागमे शस्य षत्वे तकारस्य ष्टुत्वेन टकार इति भावः। द्रक्ष्यतीति। अमागमे शस्य षत्वे 'ढढो'रिति कत्वे सस्य ष इति भावः। पश्यतु। अपश्यत्। पश्येत्। आशीर्लिङि आह—दृश्यादिति। अझलादित्वादम् नेति भावः। लुङि विशेषमाह—हरित्त्वादङ्वेति। अत्र अङ्पक्षे गुणनिषेधे प्राप्ते—ऋदृशोऽङि। 'ऋ' इत्यङ्विशेषणत्वात् तदन्तविधिः। तदाह—ऋवर्णान्तानामिति। अङभावे इति। अङभावपक्षे 'शल इगुपधात्' इति क्सादेशे प्राप्ते सतीत्यर्थः। न दृशः। 'च्लेः सिच्' इत्यतः च्लेरिति 'शल इगुपधात्' इत्यतः क्स इति चानुवर्तते। तदाह—दृशश्च्लेः क्सो नेति। क्सादेशे तु अदृक्षदिति स्यादिति भावः।

दशनं दंष्ट्राव्यापारः । पृषोदरादित्वादनुनासिकलोपः । अत एव निपातनादित्येके । तेषामप्यत्रैव तात्पर्यम् । अर्थनिर्देशस्याधुनिकत्वात् । 'दंशसञ्ज—' (सू २३९६) इति नलोपः । दशति । ददंशिथ—ददष्ठ । ददंश । दङ्क्ष्यति । दश्यात् । अदाक्षीत् । ६६० कृष विलेखने । विलेखनमाकर्षणम् । क्रष्टा—कर्ष्टा । क्रक्ष्यति—कर्क्ष्यति । 'स्पृशमृशकृषतृपदृपां च्लेः सिज्वा वाच्यः' (वा १८२६) अक्राक्षीत् ।

अद्राक्षीदिति । सिचि अमागमे ऋकारस्य यणि अकारस्य हलन्तलक्षणवृद्धौ शस्य षत्वे तस्य कत्वे सस्य षत्वमिति भावः । अद्दक्ष्यत् । दंश दशने इति । अयमनिट्, नोपधश्च । कृतानुस्वारनिर्देशः । दंष्ट्राव्यापार इति । हनुमूलगताः स्थूलदन्ताः दंष्ट्राः, तद्व्यापारः खतांक्रियादिरूप इत्यर्थः । ननु दंशधातोर्ल्युटि दशनशब्दः । तत्र 'अनिदिताम्' इति नकारस्य लोपो न सम्भवति, ल्युटः ङिद्वत्त्वाऽभावात् । 'दंशसञ्जे' त्यपि नस्य लोपो न सम्भवति, तस्य शप्येव प्रवृत्तेः । तथाच दशन इत्यर्थनिर्देशः कथमित्यत आह-पृषोदरादित्वादिति । अत एवेति । दशनशब्दनिर्देशादेव नकारस्य लोप इत्यन्ये मन्यन्त इत्यर्थः । तेषामपीति । 'निपातनान्नकारलोप' इति वदतामपि पृषोदरादिषु निपातनादित्यर्थ एव तात्पर्यं न तु धातुपाठे 'दंश दशने' इत्यर्थनिर्देशे इति भावः । विनिगमनाविरहमाशङ्क्याह—अर्थनिर्देशस्याधुनिकत्वादिति । सर्वधातुष्वर्थनिर्देशस्य अपाणिनीयत्वादित्यर्थः । क्वचिदेव धातुष्वर्थनिर्देशः पाणिनीय इति भूधातोर्निरूपितम् । अथ दशतीत्यादौ शपः पित्त्वेन अकित्त्वात् 'अनिदिताम्' इति नलोपाप्रवृत्तेराह—दंशसञ्जेति नलोप इति । दशतीति । अनुस्वारस्यासिद्धत्वादिति भावः । 'दंशसञ्जे'त्यत्र शपीत्युक्तेरार्धधातुके नलोपो न । संयोगात्परत्वेन लिटः कित्त्वाऽभावादनिदितामित्यपि न । ददंश । ददंशतुः । ददंशुः । भारद्वाजनियमात्थलि वेट् । तदाह—ददंशिथ-ददंष्टेति । अनिट्पक्षे व्रश्चादिना शस्य षः । थस्य ष्टुत्वेन ठ इति भावः । दंष्टेति । तासि व्रश्चादिना शस्य षत्वे तकारस्य ष्टुत्वमिति भावः । दङ्क्ष्यतीति । व्रश्चादिना शस्य षत्वे तस्य कत्वे अनुस्वारस्य परसवर्णे ङकारे सस्य षत्वमिति भावः । दशतु । अदशत् । दशेत् । दश्यादिति । आशीर्लिङि 'अनिदिताम्' इति नलोप इति भावः । अदाक्षीदिति । सिचि हलन्तलक्षणा वृद्धिः, शस्य षः, तस्य कः, अनुस्वारस्य परसवर्णेन ङः, सस्य षत्वमिति भावः । अदक्ष्यत् । कृष विलेखने इति । अनिदयम् । कर्षति । चकर्ष । चकृषतुः । चकृषुः । थलि अजन्ताऽकारवत्त्वाऽभावात् क्रादिनियमान्नित्यमिट्-चकर्षिथ । चकृषथुः । चकृष । चकर्ष । चकृषिव । चकृषिम । इति सिद्धवत्कृत्याह—क्रष्टा-कर्ष्टेति । 'अनुदात्तस्य च' इति अम्विकल्पः । तकारस्य ष्टुत्वम् । क्रक्ष्यति—क्रक्ष्यतीति । षस्य कत्वे सस्य षः । कर्षतु । अकर्षत् । कर्षेत् । कृष्यात् । 'शल इगुपधात्' इति च्लेः वसादेशे प्राप्ते आह—स्पृशमृशेति । अक्राक्षीदिति । च्लेः वसादेशाभावे सिचि 'अनुदात्तस्य चर्दुपधस्य'

अकाष्टाम्। अकार्क्षीत्। अकार्ष्टाम्। अकार्ष्टुः। पक्षे क्सः। अकृक्षत्। अकृक्षताम्। अकृक्षन्। ९९१ दह भस्मीकरणे। देहिथ-ददग्ध। दग्धा। धक्ष्यति। अधाक्षीत्। अदाग्धाम्। अधाक्षुः। ९९२ मिह सेचने। मिमेह। मिमेहिथ। मेढा। मेक्ष्यति। अमिक्षत्। ९९३ किल निवासे रोगापनयने च। चिकित्सति। संशये पाये च विपूर्वः, 'विचिकित्सा तु संशयः' इत्यमरः। अस्यानुदात्तेत्त्वमाश्रित्य चिकित्सते इत्यादि

इत्यपि ऋकारस्य यणि हलन्तलक्षणवृद्धौ 'षढोः कः सि' इत्यनेन षस्य कत्वे सस्य षत्वमिति भावः। अकार्क्षीदिति। अमभावे सिचि वृद्धौ रूपम्। पक्षे क्स इति। पक्षेऽसिजभावपक्षे 'शल इगुपधात्' इति कप इत्यर्थः। अकृक्षदिति। क्से सति कित्त्वाद्गुणाभावे षस्य कः, सस्य ष इति भावः। अकक्षयत्-अकक्षयन्। दह भस्मीकरणे इति। अनिट्। दहति। ददाह। देहतुः। देहुः। थलि तु भारद्वाजनियमाद्वेडित्याह—देहिथ-ददग्धेति। इट्पक्षे 'थलि च सेटि' इत्येत्त्वाभ्यासलोपौ। अनिट्पक्षे तु 'दादेः' इति हस्य घः, 'झषस्तथोः' इति थस्य धः, धस्य जश्त्वेन ग इति भावः। देहथुः। देह। ददाह—ददह। देहिव। देहिम। दग्धेति। तासि हस्य घः, तकारस्य धः, धस्य ग इति भावः। धक्ष्यतीति। हस्य घः, दस्य भष्, धस्य गः, तस्य चर्त्वेन कः, सस्य ष इति भावः। दहतु। अदहत्। दहेत्। दह्यात्। अधाक्षीदिति। सिचि हलन्तलक्षणा वृद्धिः। हस्य घः, दस्य भष्, धस्य गः, तस्य कः, सस्य ष इति भावः। अदाग्धामिति। सिचि वृद्धिः, हस्य घः, 'झलो झलि' इति सलोपः, 'झषस्तथोः' इति तकारस्य धः, धस्य ग इति भावः। अधाक्षुरिति। सिचि वृद्धिः, हस्य घः, दस्य भष्, धस्य गः, तस्य कः, सस्य ष इति भावः। अधाक्षीः। अदाग्धम्। अदाग्ध। अधाक्षम्। अधाक्ष्व। अधाक्ष्म। अधक्ष्यत्। मिह सेचने इति। अनिट्। मेहति। मिमेह। मिमिहतुः। मिमिहुः। अजन्ताऽऽकारवत्त्वाऽऽभावात् क्रादिनियमाच्चेत्यमिट्। तदाह—मिमेहिथेति। मिमिहथुः। मिमिह। मिमेह। मिमिहिव। मिमिहिम। मेढेति। तासि ढत्वधत्वष्टुत्वढलोपाः। मेक्ष्यतीति। हस्य ढः, तस्य कः, सस्य षः। मेहतु। अमेहत्। मेहेत्। मिह्यात्। लुकि 'शल इगुपधात्' इति क्सः। कित्त्वाद्गुणः। हस्य ढः, तस्य कः, सस्य षः। तदाह—अमिक्षदिति। अमेक्ष्यत्। किल निवासे रोगापनयने चेति। परस्मैपदिषु पाठात् अयं परस्मैपदी। अर्थद्वयमाश्रमत्र निर्दिष्टम्। अर्थनिर्देशस्य उपलक्षणत्वात् अर्थान्तरेषु वृत्तिः। अत्र 'कितेर्व्याधिप्रतीकारे निग्रहेऽपनयने नाशने संशये च' इति निबन्धेऽर्थेषु 'गुप्तिज्किद्भ्यः सन्' इति सन्विहितः। तदाह—चिकित्सतीति। 'सन्यतः' इति इत्त्वे हलादिशेषे अभ्यासचुत्वे चिकित्सेति सन्नन्तः, तस्मात्लिटि शपि 'चिकित्सतीति रूपम्। अस्य सनः 'धातोः' इति विहितत्वाऽऽभावादनार्द्धधातुकत्वान्न लघूपधगुणः, नापि इडागम इति आगुक्तम्। चिकित्साञ्चक्रेत्यादि सुगमं जुगुप्सतिवत्। संशये इत्यादि। व्यक्तम्।

कञ्चिदुदाजहार । निवासे तु केतयति ।

९९४ दान खण्डने । ९९५ शान तेजने । इतो वहस्यन्ताः स्वरितेतः । दीदांसति—दीदांसते । शीशांसति—शीशांसते । अर्थविशेषे सन् । अन्यत्र दानयति । शानयति । ९९६ डु पचष् पाके । पचति—पचते । पेचिथ—पपक्थ । पेचे । पक्ता । पक्षीष्ट । ९९७ षच समवाये । सचति—सचते । ९९८ भज सेवायाम् । बभाज । भेजतुः । भेजुः । भेजिथ—बभक्थ । भक्ता । भक्ष्यति—भक्षते । अभा-

---

निवासे स्विति । व्याधिप्रतीकारार्थंपञ्चकादर्थान्तरे चुरादिष्वस्योक्तत्वादिति भावः ।

दान खण्डने । शान तेजने इति । तेजनं तीक्ष्णीकरणम् । इत इति । 'दान खण्डने' इत्यारभ्य 'वह प्रापणे' इत्येतत्पर्यन्ताः स्वरितेत इत्यर्थः । तत्र धातुपाठे अर्थनिर्देशस्य उपलक्षणत्वाद्यदा दानधातुरार्जवे शानधातुस्तु निशाने वर्तते, तदा 'मानुबन्धधान्-शान्' इति सनि, 'सन्यङोः' इति द्वित्वे, अभ्यासहल्वे, तस्य 'सन्यतः' इति इत्वे, तस्य 'मान् बध' इति दीर्घे सति, नकारस्यानुस्वारे, दीदांसशीशांसाभ्यां लटि स्वरितानुबन्धस्य केवलयोरचरितार्थत्वात्, कर्तृगे फले तङि शपि दीदांसते, शीशांसते इति रूपम् । परगामिनि तु फले परस्मैपदे तिपि शपि दीदांसति, शीशांसति इति रूपम् । तदाह—दीदांसते इत्यादि । शीशांसतीति । तीक्ष्णीकरोतीत्यर्थः । अर्थविशेषे इति । आर्जवे निशाने चार्थे सनित्यर्थः । अन्यत्रेति । आर्जवनिशानाभ्यामन्यत्र णिजन्तात्परस्मैपदमेवेत्यर्थः । 'अर्थान्तरे अननुबन्धकारचुरादयः' इत्युक्तेरिति भावः । डुपचष् पाके इति । डु चकारः चकारादकारश्च इत् । स्वरितेत्त्वादुभयपदी । तदाह—पचति-पचते इति । पपाच । पेचतुः । पेचुः । भारद्वाजनियमात्थलि वेट् । तदाह-पेचिथ-पपक्थेति । इट्पक्षे 'थलि च सेटि' इत्येत्त्वाभ्यासलोपौ । अनिट्पक्षे तु 'चोः कुः' इति भावः । पेचथुः । पेच । पपाच—पपच । पेचिव । पेचिम । क्र्यादिनियमादिट् । पेचे इति । पेचाते । पेचिरे । पेचिषे । पेचाथे । पेचिध्वे । पेचे । पेचिवहे । पेचिमहे । क्र्यादिनियमादिट् । पक्षीति । तासि 'चोः कुः' पक्ष्यति—पक्ष्यते । पचतु । पचताम् । अपचत्—अपचत । पचेत् । पक्षीष्टेति । आशीर्लिङि तङि सीयुटि 'चोः कुः' । षत्वम् । अपाक्षीत् । अपक्त । अपक्षाताम् । अपक्ष्यत्—अपक्ष्यत । षचधातुः चोपदेशः । तदाह-सचति-सचते इति । सेडयम् । ससाच । सेचतुः । सेचुः । सेचिथ । सेचथुः । सेच । ससाच-ससच । सेचिव । सेचिम । सेचे । सेचिषे । सेचिवहे । सेचिमहे । सक्ष्यात् । सचिषीष्ट । असाचीत्—असचीत् । असचिष्ट । भज धातुरनिट् । भजति । किटि लिटि वैरूप्यापादकादेशादित्वात् 'अत एकहल्मध्ये' इत्यभ्यासौ 'तृफज' इत्येत्त्वाभ्यासलोपौ । तदाह-भेजतुरिति । भारद्वाजनियमात्थलि वेट् । तदाह-भेजिथ-बभक्थेति । इट्पक्षे 'थलि च सेटि' इत्येत्त्वाभ्यासलोपौ इति भावः । भेजिव । भेजिम ।

क्षीत्—अभक्त। ६९९ रञ्ज रागे। नलोपः। रजति—रजते। रज्यात्। रङ्क्षीष्ट। अराङ्क्षीत्। अराङ्क्ताम्। अरङ्क्त। १००० शप आक्रोशे। आक्रोशो विरुद्धानुष्ठानम्। शशाप। शेपे। अशाप्सीत्—अशप्त १००१ क्षिष दीप्तौ। क्ष्वेषति—क्ष्वेषते। तित्विषे। क्ष्वेष्टा। क्ष्वेक्ष्यति-क्ष्वेक्ष्यते। क्ष्विष्यात्-क्ष्विक्षीष्ट। अक्ष्विक्षत्-अक्ष्विक्षत। अक्ष्विक्षताम्। अक्ष्विक्षन्त। १००२ यज देवपूजासङ्गतिकरणदानेषु। यजति-यजते।

क्रादिनियमादिट्। भेजे। भेजिषे। भेजिवहे। भक्तेत्यादि। सुगमम्। रञ्ज रागे इति। नोपधोऽयम्। कृतानुस्वारपरसवर्णनिर्देशः। अनिडयम्। शपः पित्त्वेन ङित्त्वाऽभावात्, 'अनिदिताम्' इत्यप्राप्तावपि 'रञ्जेश्च' इति शपि नलोपस्तदाह—रजति-रजते इति। संयोगाप्परत्वाल्लिटो न कित्त्वम्। रराञ्ज। रराञ्जतुः। भारद्वाजनियमात्थलि वेट्। रराञ्जिथ—रराङ्क्थ। अनिट्पक्षे जश्त्वेन गः। ततोऽनुस्वारपरसवर्णानुनासिकावृत्तौ गस्य चर्त्वेन कः। मस्यानुस्वारे तस्य परसवर्णो ङकार इति भावः। रराञ्जिव। रराञ्जिम। क्रादिनियमादिट्। रङ्क्ता। रङ्क्ष्यति—रङ्क्ष्यते। रजतु। रजताम्। अरजत्—अरजत। रजेत्—रजेत। आशीर्लिङि यासुटः कित्त्वात् 'अनिदिताम्' इति नलोपः। तदाह—रज्यादिति। रङ्क्षीष्टेति। आत्मनेपदे लिङः सीयुट्ट जश्त्वेन गः, ततः परसवर्णसम्पन्नञकारनिवृत्तिः, गस्य कः, नस्य परसवर्णेन ङः, षत्वमिति भावः। अराङ्क्षीदिति। सिचि हलन्तलक्षणवृद्धौ कुत्वादि पूर्ववत्। अनेकहल्व्यवधानेऽपि हलन्तलक्षणा वृद्धिः प्रवर्तते इति भाष्यस्पष्टम्। अराङ्क्तामिति। 'झलो झलि' इति सलोपः। कुत्वादि पूर्ववत्। अरङ्क्षेति। लुङस्तङि प्रथमपुरुषैकवचने 'झलो झलि' इति सलोपे कुत्वादि। शप आक्रोशे इति। अनिडयम्। भारद्वाजनियमात्थलि वेट्। वमादौ तु क्रादिनियमादिट्। अशाप्सीदिति। हलन्तलक्षणा वृद्धिः। अशप्तेति। 'झलो झलि' इति सलोपः। अशप्साताम्। क्ष्विषधातुरनिट्। शपि लघूपधगुणः। तदाह—क्ष्वेषति-क्ष्वेषते इति। तित्विषे। तित्विषतुः। तित्विषुः। तित्विषिथ। तित्विषथुः। तित्विष। तित्विषे। तित्विषिव। तित्विषिम। क्रादिनियमादिट्। तित्विषिषे इति। तित्विषाते। तित्विषिरे। तित्विषाषे। तित्विषाथे। तित्विषिढ्वे। तित्विषिढे। तित्विषिवहे। तित्विषिमहे। क्ष्वेष्टेति। तासि तकारस्य ष्टुत्वम्। क्ष्वेक्ष्यति-क्ष्वेक्ष्यते इति। स्ये कत्वषत्वे। क्ष्वेषतु। क्ष्वेषताम्। अक्ष्वेषत्—अक्ष्वेषत। क्ष्वेषेत्—क्ष्वेषेत। क्ष्विष्यादिति। यासुटः आशीर्लिङि कित्त्वाच्च लघूपधगुणः। क्ष्विक्षीष्टेति। 'क्ष्विङ्क्ष्विचावात्मनेपदेषु' इति कित्त्वाच्च गुणः। लुङि परस्मैपदे 'शल इगुपधात्' इति क्सः कित्त्वाच्च गुणः। तदाह—अक्ष्विक्षदित्यादि। लुङि आत्मनेपदे क्सेः वसादेशं मत्वा आह—अक्ष्विक्षतेति। अक्ष्विक्षन्तेति। अक्ष्विक्ष ङ इति स्थिते 'क्सस्याचि' इत्यन्त्यलोपासम्भवादतः परत्वात् 'आत्मनेपदेष्वन्यतः' इत्यदादेशाऽसम्भवादन्तादेशे वस्यान्तलोपे परूपे वा रूपमिति भावः। यज देवपूजेति। अनिडयम्। यजति-यजते इति। देवान् पूजयति-सङ्गमयति। ददाति

२४०८ **लिट्यभ्यासस्योभयेषाम् ६।१।१७॥** [वच्यादीनां ग्रह्यादीनां चाभ्यासस्य सम्प्रसारणं स्याल्लिटि । इयाज । २४०९ **वचिस्वपियजादीनां किति ६।१।१५॥** वचिस्वप्योर्यजादीनां च सम्प्रसारणं स्यात्किति । पुनः प्रसङ्गविज्ञानाद्द्वित्वम् । ईजतुः । ईजुः । इयजिथ—इयष्ठ । ईजे । यष्टा । यक्ष्यति—यक्ष्यते । इज्यात् । यक्षीष्ट । अयाक्षीत्—अयष्ट । १००३ डु वप् बीजसन्ताने ।

वेत्यर्थः । णलि द्वित्वादौ तु ययाज् अ इति स्थिते—लिट्यभ्यासस्योभयेषाम् । 'व्यङ्ः सम्प्रसारणम्' इत्यतः सम्प्रसारणमित्यनुवर्तते । 'वचिस्वपियजादीनाम्' इति सूत्रोपात्ताः 'ग्रहिज्यावयि' इति सूत्रोपात्ताश्च उभयशब्देन गृह्यन्ते । तदाह—वच्यादीनां ग्रह्यादीनां चेति । अत्र वच्यादीनामित्यनेन वचिः स्वपिः यजादयश्च विवक्षिताः । 'यज देवपूजा' इत्यारभ्य 'टु ओ श्वि गतिवृद्ध्योः' इत्येतत्पर्यन्ता यजादयः । तदुक्तम्-'यजिर्वपिर्वहिश्चैव वसिर्वेञ्व्येञ् इत्यपि । ह्वेञ् वदिः श्वयतिश्चैव यजादयः स्युरिमे नव ।' इति । तेषवनन्तभावाद्वचिस्वप्योः पृथग्ग्रहणम् । ग्रह्यादीनामित्यनेन तु ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतयो विवक्षिताः । इयाजेति । अभ्यासयकारस्य सम्प्रसारणे इकारे 'सम्प्रसारणाच्च' इति पूर्वरूपमिति भावः । यज अतुस् इति स्थिते द्वित्वे अभ्यासयकारस्य सम्प्रसारणे पूर्वरूपे च इयजतुरिति प्राप्ते—वचिस्वपि । 'वचिस्वपी'ति इका निर्देशः । सौत्रः सम्प्रसारणाभावः । आदिशब्दो यजिनैव सम्बध्यते, न तु वचिस्वपिभ्याम्, तथा सति हि वच्यादेः स्वप्यादेर्यजादेश्चेत्यर्थः स्यात् । तथा सति पृथक्स्वपिग्रहणं व्यर्थं स्यात्, अदादिगणे लुम्विकरणे 'वच परिभाषणे' इत्यारभ्य षष्ठस्थ 'ञि ष्वप् शये' इत्यस्य वच्यादिग्रहणेनैव सिद्धेः । तदाह—वचिस्वप्योर्यजादीनां चेति । ननु यज अतुस् इति स्थिते द्वित्वात्परत्वात्सम्प्रसारणे कृते 'विप्रतिषेधे यदूबाधितं तदूबाधितमेव' इति न्यायेन द्वित्वस्य कथं प्राप्तिरित्याशङ्क्याह—पुनः प्रसङ्गेति । ईजतुरिति । यज् अतुस् इति स्थिते सम्प्रसारणे पूर्वरूपे च कृते द्वित्वे सवर्णदीर्घ इति भावः । पूर्वं चात्र किति लिटि 'वचिस्वपि' इति सूत्रम्, अकिति लिटि तु 'लिट्यभ्यासस्य' इति सूत्रमिति स्थितिः । भारद्वाजनियमात्थलि वेट् । कृते द्वित्वे अकिरवाद्वचिस्वपीत्यप्रवृत्तौ 'लिट्यभ्यासस्य' इत्यभ्यासयकारस्य सम्प्रसारणम् । तदाह—इयजिथ-इयष्ठेति । अनिट्पक्षे ब्रश्चादिना जस्य षत्वे ष्टुत्वेन थस्य ठः । ईजथुः । ईज । इयाज-इयज । ईजिव । ईजिम । ईजे इति । 'असंयोगात्' इति कित्त्वात् 'वचिस्वपि' इति सम्प्रसारणे कृते द्वित्वे सवर्णदीर्घे इति भावः । ईजाते । ईजिरे । क्रादिनियमादिट् । ईजिषे । ईजाथे । ईजिध्वे । ईजे । ईजिवहे । ईजिमहे । यष्टेति । तासि ब्रश्चादिना जस्य षत्वे ष्टुत्वेन तकारस्य टः । यक्ष्यति-यक्ष्यते इति । ब्रश्चादिना जस्य षत्वे 'षढोः' इति षस्य क्षत्वे सत्व षत्वमिति भावः । यजतु—यजताम् । अयजत—अयजत । यजेत्—यजेत । आशीर्लिङि आह—इज्यादिति । यासुटः कित्त्वात्

बीजसन्तानं क्षेत्रे विकिरणं गर्भाधानं च। अयं छेदनेऽपि। केशान् वपति। उवाप। ऊपे। वप्ता। उप्यात्। वप्सीष्ट। प्रण्यवाप्सीत्। अवप्त। १००४ वह प्रापणे। उवाह। उवहिथ। 'सहिवहोरोदवर्णस्य' (६ २३५७)। उवोढ। ऊहे। वोढा। वक्ष्यति—वक्ष्यते। अवाक्षीत्। अवोढाम्। अवाक्षुः। अवोढ। अवक्षाताम्।

'वचिस्वपि' इति सम्प्रसारणमिति भावः। यक्षीष्टेति।। आशीर्लिङि आत्मनेपदे प्रथमैकवचने सीयुटि जश्त्वे तस्य कुत्वे सस्य षत्वमिति भावः। अयाक्षीदिति। सिचि हलन्तलक्षणा वृद्धिः। जश्त्व ष, तस्य कः, सस्य ष इति भावः। अयष्टेति। अयज् स् त इति स्थिते 'झलो झलि' इति सलोपे, जश्त्व षः, ष्टुत्वेन तकारस्य ट इति भावः। अयष्टाताम्। अयक्षत। अयक्ष्यत्—अयक्षयत। डु वप् बीजसन्ताने इति। प्ररोहार्थं बीजानां क्षेत्रेषु प्रक्षेपणे इत्यर्थः। तदाह—क्षेत्रे विकिरणमिति। 'वपिः प्रकिरणार्थं' इति 'सन्यङोः' इत्यत्र भाष्यम्। गर्भाधानं चेति। 'अप्रमत्ता रक्षत तन्तुमेतं मा वः क्षेत्रे परबीजानि वाप्सुः' इत्यादौ तथा दर्शनादिति भावः। अयं छेदनेऽपीति। वर्तते इति शेषः। केशान् वपतीति। छिनत्तीत्यर्थः। अनिडयम्। उवापेति। 'लिट्यभ्यासस्य' इत्यकित्यभ्यासस्य सम्प्रसारणमिति भावः। किति तु 'वचिस्वपि' इति द्वित्वात्प्राक्सम्प्रसारणे कृते द्वित्वम्। ऊपतुः। ऊपुः। उवपिथ-उवप्थ। ऊपथुः। ऊप। उवाप-उवप। ऊपिव। ऊपिम। ऊपे इति। ऊपाते। ऊपिरे। ऊपिषे। ऊपाथे। ऊपिध्वे। ऊपे। ऊपिवहे। ऊपिमहे। वप्तेति। वप्स्यति—वप्स्यते। वपतु—वपताम्। अवपत्—अवपत। वपेत्—वपेत। उप्यादिति। आशिषि यासुटः किरवात् 'वचिस्वपि' इति सम्प्रसारणम्। वप्सीष्टेति। सीयुटि रूपम्। प्रण्यवाप्सीदिति। लुङि परस्मैपदे सिचि हलन्तलक्षणा वृद्धिः। 'नेगंद' इति षत्वम्। अवाप्साम्। अवाप्सुः। अवप्तेति। आत्मनेपदे लुङि 'झलो झलि' इति सलोपः। अवप्साताम्। वह प्रापणे इति। अयमनिट्। वहति—वहते। उवाहेति। 'लिट्यभ्यासस्य' इति अकिति अभ्यासस्य सम्प्रसारणमिति भावः। किति 'वचिस्वपि' इति सम्प्रसारणे कृते द्वित्वम्। ऊहतुः। ऊहुः। भारद्वाजनियमात्थलि वेट्। तदाह—उवहिथेति। 'न शसदद' इति निषेधात् 'थलि च सेटि' इति न भवति। अथ थलि अनिटपक्षे आह—सहिवहोरोदवर्णस्येति। सहिवहोरवर्णस्य ओत्स्याद्ढलोपे परत इत्यर्थः। 'ढ्रलोप' इति दीर्घं बाधित्वा ओत्त्वमिति भावः। उवोढेति। उवह् थ इति स्थिते ढत्वधत्वष्टुत्वढलोपाः ओत्त्वं चेति भावः। ऊहथुः। ऊह। उवाह-उवह। ऊहिव। ऊहिम। क्रादिनियमादिट्। ऊहे इति। ऊहाते। ऊहिरे। ऊहिषे। ऊहाथे। ऊहिध्वे—ऊहिढ्वे। ऊहे। ऊहिवहे। ऊहिमहे। वोढेति। तासि ढत्वधत्वष्टुत्वढलोपाः ओत्वं च। ल्रुटि रूपे, हस्य ढः, तस्य कः, षत्वम्। तदाह—वक्ष्यति-वक्ष्यते इति। वहतु—वहताम्। अवहत्—अवहत। वहेत्—वहेत। उह्यात्। अवाक्षीदिति। हलन्तलक्षणवृद्धौ ढकषाः प्राग्वत्। अवोढामिति। 'झलो झलि' इति

अवक्षत। अवोढाः। अवोढ्वम्। १००५ वस निवासे। परस्मैपदी। वसति। उवास। २४१० शासिवसिघसीनां च ८।३।६०॥ इण्कुभ्यां परस्यैषां सस्य षः स्यात्। ऊषतुः। ऊषुः। उवसिथ—उवस्थ। वस्ता। 'सः स्यार्धधातुके' (सू २३४२)। वत्स्यति। उष्यात्। अवात्सीत्। अवात्ताम्। वेञ् १००६ तन्तुसन्ताने। वयति—वयते २४११ वेञो वयिः २।४।४१॥ वा स्यात्लिटि। इकार उच्चारणार्थः। उवाय। २४१२ ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चति-

---

सलोपे ढत्वधत्वष्टुत्वढलोपाः ओत्वं चेति भावः। अवात्तामिति। उसि सिचि वृद्धौ ढकषाः। अवात्सीः। अवोढम्। अवोढ। अवाक्ष्म। अवाक्ष्व। अवाक्ष्म। अवोढेति। लुङि आत्मनेपदे प्रथमपुरुषैकवचने अवह् स् त इति स्थिते सलोपः ढत्वधत्वष्टुत्वढलोपाः ओत्वं च। अवक्षातामिति। आतामि सिचि ढकषा इति भावः। अवक्षतेति। 'आत्मनेपदेष्वनतः' इत्यदादेशः। अवोढवमिति। अवक्षि। अवक्ष्वहि। अवक्ष्महि। अवक्ष्यत्—अवक्ष्यत। इति वहाद्यन्ताः स्वरितेतो गताः। वसधातुरनिट्। अकिति लिटि परे 'ह्लिट्यभ्यासस्य' इत्यभ्यासस्य सम्प्रसारणम्। तदाह—उवासेति। किति तु 'वचिस्वपि' इति सम्प्रसारणे कृते द्विर्वादौ ऊस् अतुस् इति स्थिते सकारस्य आदेशप्रत्ययावयवत्वाभावादप्राप्ते षत्वे—शासिवसि। 'सहेः साडः सः' इत्यतः स इति षष्ठ्यन्तमनुवर्तते। 'इण्कोः' इति 'अपदान्तस्य मूर्धन्यः' इति चाधिकृत्य। तदाह—इण्कवर्गाभ्यामिति। भारद्वाजनियमात्थलि वेट् इति मत्वा आह—उवसिथ-उवस्थेति। 'न शासदद' इति निषेधात् 'थलि च सेटि' इति न भवति। ऊषथुः। ऊष। उवास—उवस। ऊषिव। ऊषिम क्रादिनियमादिट। वस् स्य ति इति स्थिते आह—सः स्यार्धधातुके इति। अनेन सकारस्य तकार इति भावः। वसतु। अवसत्। वसेत्। उष्यादिति। आशीर्लिङि यासुटः किच्चात् वस्य सम्प्रसारणे 'शासिवसि' इति षत्वमिति भावः। अवात्सीदिति। सिचि हलन्तलक्षणवृद्धौ सस्य तकारः। अवात्ताम्। अवस् स् ताम्। इति स्थिते वृद्धौ 'झलो झलि' इति सलोपे प्रत्ययलक्षणमाश्रित्य सकारान्तार्धधातुकपरत्वात् धातुसकारस्य 'सः सि' इति तकारः। वस्तुतस्तु सिज्लोपस्यासिद्धत्वात् 'सः सि' इति तकारे सिज्लोप इति बोध्यम्। अवात्सुः। अवात्सीः। अवात्तम्। अवात्त। अवात्स्म। अवात्स्व। अवात्स्म। अवत्स्यत्। वेञ्धातुरनिट्। ञित्त्वादुभयपदी। तन्तुसन्तानः पटनिर्माणार्थं तन्तूनां तिर्यक्प्रसारणविशेषः। वयतिवयते इति। शपि अयादेशः। वेञो वयिः। शेषपूरणेन सूत्रं व्याचष्टे—वा स्यात्लिटीति। 'लिटयन्यतरस्याम्' इत्यतः अन्यतरस्यामित्यनुवृत्तेरिति भावः। उच्चारणार्थ इति। इकारस्य इत्संज्ञकत्वे तु नुम् स्यादिति भावः। उवायेति। णलि वयादेशे यजादित्वादकिति लिटि परे 'लिटयभ्यासस्य' इति वकारस्य सम्प्रसारणे उपधावृद्धिरिति भावः। अत्र यकारस्य तु न सम्प्रसारणम्, 'लिटि वयो यः'

पृच्छतिभृज्जतीनां ङिति च ६।१।१६॥ एषां किति ङिति च सम्प्रसारणं स्यात्। इति यकारस्य प्राप्ते—**२४१३ लिटि वयो यः ६।१।३८॥** वयो यस्य सम्प्रसारणं न स्याल्लिटि। ऊयतुः। ऊयुः। **२४१४ वश्चास्यान्यतरस्यां किति ६।१।३९॥** वयो यस्य वो वा स्यात्किति लिटि। ऊवतुः। ऊवुः। उवयिथ। वयस्तासावभावात्थलि नित्यमिट्। स्थानिवद्भावेन झित्वात्तङ्। ऊये। ऊवे। वयादेशाभावे—**२४१५ वेञः ६।१।४०॥** वेञो न संप्रसारणं स्याल्लिटि। ववौ।

इति तन्निषेधस्यानुपदमेव वक्ष्यमाणत्वादिति भावः। यद्यपि णलि वयादेशाभावेऽपि द्वित्वे अभ्यासस्य सम्प्रसारणे 'अचो ञ्णिति' इति वृद्धौ आयादेशे उवायेति सिध्यति। तथापि ऊयतुरित्याद्यर्थं वयादेशस्य आवश्यकत्वादिहापि वयादेशो न्याय्यत्वाद्दुपन्यस्तः। वे अतुस् इति स्थिते वयादेशे कृते-ग्रहिज्या। चकारेण 'वचिस्वपियजादीनाम्' इत्यतः किताविति समुच्चीयते। 'व्यञः सम्प्रसारण'मित्यनुवर्तते। तदाह—एषामित्यादि। अत्र परस्मैपदिग्रहादिसाहचर्यात् 'अय-वय-पय' गतौ इति पठितस्यात्मनेपदिनो वयेर्न ग्रहणम्। यजादित्वादेव वयेः सम्प्रसारणे सिद्धे अत्र वयग्रहणं स्पष्टार्थमिति भाष्ये स्पष्टम्। इति यकारस्य प्राप्ते इति। 'न सम्प्रसारणे सम्प्रसारणम्' इति ञ्णित्कादन्तस्य यणः पूर्वं सम्प्रसारणमिति विज्ञानाद्यकारस्य संप्रसारणे प्राप्ते सतीत्यर्थः, लिटि वयो। सम्प्रसारणं नेति। 'न सम्प्रसारणे सम्प्रसारणम्' इत्यतः तदनुवृत्तेरिति भावः। तथा च यकारस्य सम्प्रसारणानिषेधे वकारस्य संप्रसारणमिति भावः तदाह—ऊयतुरिति। वश्चास्य। 'लिटि वयो यः' इत्यनुवर्तते। तदाह—वयो यस्येत्यादि। उवयिथेति। अकित्त्वाच्च वः। अजन्तत्वादकारवत्त्वाच्च थलि इडविकल्पमाशङ्क्याह—वयस्तासावभावात्थलि नित्यमिडिति। वयेर्लिट्येव विहितत्वेन तासावभावात् 'अचस्तास्वत्' इति 'उपदेशेऽत्वतः' इति च इण्निषेधाऽप्रसक्त्या क्रादिनियमान्नित्यमिडित्यर्थः। 'यस्तासावस्ति नित्याऽनिट् च' इति भाष्यम्। ऊयथुः-ऊवथुः। ऊय-ऊव। उवायउवय। ऊयिव-ऊविव। ऊयिम—ऊविम। ननु वयेरञ्जित्त्वात् कथमुभयपदित्वमित्यत आह—स्थानिवद्भावेनेति। ऊये—ऊवे इति। 'वश्चास्यान्यतरस्याम्' इति वत्वविकल्पः। वत्वाभावे 'लिटि वयो यः' इति यकारस्य सम्प्रसारणनिषेधः। वकारस्य 'ग्रहिज्या' इति 'वचिस्वपि' इति वा सम्प्रसारणम्। ऊयाते। ऊयिरे। ऊयिषे। ऊयाथे। ऊयिध्वे। ऊये। ऊयिवहे। ऊयिमहे। क्रादिनियमादिट्। एवं, ऊवाते। ऊविरे। इत्यादि। वयादेशाभावे इति। यजादित्वात् 'लिट्यभ्यासस्य' इति 'वचिस्वपि' इति च सम्प्रसारणे प्राप्ते सतीति शेषः। वेञः। 'लिटि वयो यः' इत्यतो लिटीति 'न सम्प्रसारणे सम्प्रसारणम्' इत्यतो न सम्प्रसारणमिति चानुवर्तते। तदाह—वेञो नेति। अत्र किताविति नानुवर्तते। तदाह—ववाविति। णलि सम्प्रसारणनिषेधे 'आदेच उपदेशे' इत्या-

ववतुः। ववुः। ववित्थ—ववाथ। ववे। वाता। ऊयात्। वासीष्ट। अवासीत्। १००७ व्येञ् संवरणे। व्ययति—व्ययते। २४१६ न व्यो लिटि ६।१।४६॥ व्येञ आत्त्वं न स्याल्लिटि। वृद्धिः। परमपि हलादिशेषं बाधित्वा यस्य सम्प्रसारणम्। उभयेषां ग्रहणसामर्थ्यात्। अन्यथा वच्यादीनां ग्रह्यादीनां चानुवृत्त्यैव सिद्धे किं तेन। विव्याय। विव्यतुः। विव्युः। 'इडत्यर्ति—' (सू २३८४) इति

त्त्वे 'आत औ णलः' इत्यौभावे 'वृद्धिरेचि' इति वृद्धौ रूपम्। ववतुरिति। 'आदेचः' इत्यात्वे 'आतो लोपः'। एवं ववुः। भारद्वाजनियमात्थलि वेट्, वेञस्तासावनिट्कत्वात्। तदाह—ववित्थ—ववाथेति। इट्पक्षे अकित्त्वेऽपि इट्परत्वादाल्लोप इति भावः। ववथुः। वव। ववौ। वविव। वविम। क्र्यादिनियमादिट्। वव्रे इति। ववाते। वविरे। ववित्रे। ववाथे। वविध्वे। वव्रे। वविवहे। वविमहे। वातेति। लुटि तासि आत्त्वम्। वास्यति—वास्यते। वयतु—वयताम्। अवयत्—अवयत। वयेत्—वयेत। ऊयादिति। आशीर्लिङि यासुटि कित्त्वात् 'वचिस्वपि' इति सम्प्रसारणे पूर्वरूपे 'अकृत्सार्वधातुकयोः' इति दीर्घ इति भावः। वासीष्टेति। आशीर्लिङि आत्मनेपदे, सीयुटि आत्त्वे रूपम्। वासीयास्ताम्। अवासीदिति। आत्त्वे कृते इट्सकौ। अवास् इ स् ईदिति स्थिते 'इट ईटि' इति सिचलोपः। अवासिष्टामित्यादि। आत्मनेपदे—अवास्त, अवासाताम् इत्यादि। अवास्यत—अवास्यत। व्येञ संवरणे इति। जित्त्वादुभयपदी। अनिट्। व्ययति—व्ययते इति। शपि अयादेशः। णलादौ तु आत्त्वे विव्यौ, विव्यतुरित्यादि प्राप्तम्। तत्राह—न व्यो लिटि। 'व्ये' इत्यस्य कृतात्त्वस्य षष्ठ्यन्तस्य 'व्य' इति निर्देशः। आत्त्वमिति। 'आदेच उपदेशे' इत्यतः आदिश्यनुवृत्तेरिति भावः। वृद्धिरिति। णलि व्ये अ इति स्थिते 'अचो ञ्णिति' इति वृद्धिरित्यर्थः। तथाच व्यै अ इति स्थितम्। ननु तत्र द्वित्वे 'लिट्यभ्यासस्य' इत्यभ्यासे यकारस्य सम्प्रसारणे पूर्वरूपे उत्तरखण्डस्य आयादेशे विव्याय इति रूपं वक्ष्यति। तदयुक्तम्, सम्प्रसारणात्प्राक् परत्वात् हलादिशेषेण यकारस्य निवृत्तौ वकारस्य सम्प्रसारणे उकारे सति उव्यायेत्यापत्तेरित्यत आह—परमपीति। उभयेषामिति। 'लिटयभ्यासस्य' इति सूत्रे 'उभयेषा'मिति ग्रहणसामर्थ्यादित्यर्थः। तदेवोपपादयति—अन्यथेति। 'वचिस्वपियजादीनाम्' इत्यस्य 'ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनाम्' इत्यस्य च स्वरितत्वादेवानुवृत्त्यैव सिद्धे पुनर्'लिटयभ्यासस्य' इत्यत्र 'उभयेषां'ग्रहणं पुनर्विधानार्थम्। तथाच वच्यादीनां ग्रह्यादीनां चाभ्यासस्य सम्प्रसारणं स्याल्लिटीति द्विर्विधानं लब्धम्। तत्र द्वितीयं विधानं नियमार्थम्-उभयेषामभ्यासस्य सम्प्रसारणमेव स्यान्नेतरदिति। तेनाभ्यासे एतत्सम्प्रसारणविषये कार्यान्तरनिवृत्तिः सिद्धेत्यर्थः। तथाच प्रकृते अभ्यासयकारस्य सम्प्रसारणे सिद्धं रूपमाह-विव्यायेति। विव्यतुः। विव्युरिति। 'वचिस्वपि' इति सम्प्रसारणे द्वित्वे पणिति भावः। थलि भारद्वाजनियमादिड्विकल्पमाशङ्क्याह—इड·

नित्यमिट्। विव्ययिथ। विव्याय—विव्यय। विव्ये। व्याता। वीयात्। व्यासीष्ट। अव्यासीत्—अव्यास्त। १००८ ह्वेञ् स्पर्धायां शब्दे च। ह्वयति—ह्वयते। २४१७ अभ्यस्तस्य च ६।१।३३॥ अभ्यस्तीभविष्यतो ह्वेञः सम्प्रसारणं स्यात्। ततो द्वित्वम्। जुहाव। जुहवतुः। जुहवुः। जुहोथ—जुहविथ। जुहूवे। ह्वाता।

त्यर्तीति। विव्यायथेति। अकित्त्वादभ्यासस्य सम्प्रसारणमिति भावः। विव्यथुः। विव्यय विव्याय—विव्ययेति। अकित्त्वादभ्यासस्य सम्प्रसारणे णित्त्वविकल्पादृद्धिविकल्प इति भावः। विव्यिव। विव्यिम। विव्ये इति। कित्त्वात् 'वचिस्वपि' इति सम्प्रसारणे पूर्वरूपे वि इत्यस्य द्वित्वे यणिति भावः। विव्याते। विव्यिरे। विव्यिषे। विव्याथे। विव्यिढ्वे—विव्यिध्वे। विव्ये। विव्यिवहे। विव्यिमहे। व्यातेति। तासि एकारस्य आत्त्वम्। व्यास्यति-व्यास्यते। व्ययतु व्ययताम्। ७ व्ययत्—अव्ययत। व्ययेत्—व्ययेत। वीयादिति। कित्त्वात् 'वचिस्वपि' इति सम्प्रसारणे पूर्वरूपे 'अकृत्सार्वधातुकयोः' इति दीर्घः। वीयास्ताम्। व्यासीष्टेति। आशीर्लिङि सीयुटि आत्त्वम्। अव्यासीदिति। लुङि सिचि आत्त्वे इट्सकोः सिज्लोपः। अव्यासिष्टामि त्यादि। अव्यास्तेति। लुङि आत्मनेपदे अव्ये स् त इति स्थिते आत्त्वमिति भावः। अव्यासातामित्यादि। अव्यास्यत्—अव्यास्यत। ह्वेञ्धातुरनिट्। जित्त्वादुभयपदी। शब्द चेति। आकारणार्थः 'आगच्छे'-त्यादिशब्दोऽत्र विवक्षितः। ह्वयति—ह्वयते इति। शपि अयादेशः। णलादौ अकिति 'लिट्यभ्यासस्य' इति अभ्यासस्यैव सम्प्रसारणे प्राप्ते-अभ्यस्तस्य च। 'ह्वः सम्प्रसारणम्' इत्यनुवर्तते 'ह्व' इति कृतात्वस्य 'ह्वे' इत्यस्य षष्ठ्यन्तम्। तथाच अभ्यस्तीभूतस्य ह्वेञः सम्प्रसारणमिति लभ्यते। तथा सति णलि ह्व अ इति स्थिते द्वित्वे कृते 'उभे अभ्यस्तम्' इत्यभ्यस्तसंज्ञायामुत्तरखण्डस्य सम्प्रसारणे कृते पूर्वखण्डस्याभ्यासस्य 'न सम्प्रसारणे सम्प्रसारणम्' इति निषेधः स्यादित्यत आह-अभ्यस्तीभविष्यत इति। ननु यद्यभ्यस्तीभविष्यतो ह्वेञः सम्प्रसारणं तर्हि द्वित्वं बाधित्वा परत्वात्सम्प्रसारणे सति 'विप्रतिषेधे यद्बाधितं तद्बाधितम्' इति न्यायात् द्वित्वं न स्यादित्यत आह-ततो द्वित्वमिति। सम्प्रसारणानन्तरं द्वित्वमित्यर्थः, पुनः प्रसङ्गविज्ञानादिति भावः। तथाच णलि आत्त्वे कृते सम्प्रसारणे पूर्वरूपे 'हु' इत्यस्य द्वित्वे 'कुहोश्चुः' इति चुत्वे तस्य जश्त्वे 'अचो ञ्णिति' इति वृद्धौ अवादेशे परिनिष्ठितं रूपमाह—जुहावेति। जुहवतुरिति। अनुपि आत्त्वे आल्लोपे बाधित्वा अन्तरङ्गत्वात् 'अभ्यस्तस्य च' इत्यनेन सम्प्रसारणे 'वार्णादाङ्गं बलीयः' इत्यस्याऽनित्यतया अन्तरङ्गत्वात्पूर्वरूपे कृते द्वित्वे उवङिति भावः। यद्यपि किति 'वचिस्वपि' इति सम्प्रसारणेऽपि सिद्धमिदम्। तथापि अकिति आवश्यकमभ्यस्तस्य चेत्येतत् न्याय्यत्वादिहापि भवतीति बोध्यम्। एवं जुहुवुः। भारद्वाजनियमात्थलि वेट्। तदाह—जुहोथ, जुहविथेति। जुहुवथुः। जुहुव। जुहाव—जुहविव। जुहुविव। जुहुविम। क्रादिनियमादिट्। जुहुवे। जुहुवाते। जुहुविरे। जुहुविषे। जुहुवाथे।

हूयात्। ह्वासीष्ट। २४१८ लिपिसिचिह्वश्च ३।१।५३॥ एभ्यश्च्लेरङ् स्यात्। २४१९ आत्मनेपदेष्वन्यतरस्याम् ३।१।५४॥ 'आतो लोपः—' (सू २३७२)। अह्वत्। अह्वताम्। अह्वन्। अह्वत-अह्वास्त।

अथ द्वौ परस्मैपदिनौ। १००९ वद व्यक्तायां वाचि। अच्छ वदति। उवाद। ऊदतुः। ऊदिथ। वदिता। वद्यात्। 'वदव्रज—' (सू २२६७) इति वृद्धिः। अवादीत्। १०१० टुओ श्वि गतिवृद्धयोः। श्वयति। २४२० विभाषा श्वेः ६।१।३०॥ श्वयतेः सम्प्रसारणं वा स्याल्लिटि यङि च। शुशाव। शुशुवतुः।

थे। जुहुविध्वे। जुहुवे। जुहुविवहे। जुहुविमहे। ह्वातेति। तासि आत्त्वम्। ह्वास्यति-ह्वास्यते। ह्वयतु-ह्वयताम्। अह्वयत-अह्वयत। ह्वयेत्-ह्वयेत। हूयादिति। आशीर्लिङि आत्त्वे यासुटि कित्त्वात् 'वचिस्वपि' इति सम्प्रसारणे पूर्वरूपे 'अकृत्सार्वधातुकयोः' इति दीर्घ इति भावः। ह्वासीष्टेति। आशीर्लिङि सीयुटि रूपम्। लुङि विशेषमाह—लिपिसिचि। लिपि सिचि ह्वा एषां समाहारद्वन्द्वात्पञ्चम्येकवचनम्। 'च्लेः सिच्' इत्यतः च्लेरिति 'अस्यतिवक्तिख्यातिभ्यः' इत्यतः अङिति चानुवर्तते। तदाह—एभ्य इति। इद परस्मैपदविषयम्, आत्मनेपदे विकल्पविधानात्। तदाह—आत्मनेपदेषु। आतो लोपः इति। अ ह्वा अ त् इति स्थिते 'आतो लोप इटि च' इत्यालोप इत्यर्थः। अह्वदिति। अह्वताम्। अह्वन्नित्यादि। अह्वतेति। लुङि आत्मनेपदे अङि रूपम्। अह्वेताम्। अह्वन्तेत्यादि। अङभावपक्षे त्वाह—अह्वास्तेति। अह्वासाताम्। अह्वासत। इत्यादि। अह्वास्यत्-अह्वास्यत।

वद व्यक्तायां वाचीति। अज्झल्विभाषेन स्पष्टोच्चारणे इत्यर्थः। सेऽयम्। अच्छ वदतीति। 'अच्छेत्यव्ययमाभिमुख्ये। अभिमुखं वदतीत्यर्थः 'अच्छ गत्यर्थवदेषु' इति गतित्वादच्छेत्यस्य धातोः प्रागेव प्रयोग इति भावः। अकिति लिटि द्वित्वे 'लिट्यभ्यासस्य' इति सम्प्रसारणमिति मत्वा आह—उवादेति। किति लिटि तु 'वचिस्वपियजादीनाम्' इति द्वित्वात्प्राक् सम्प्रसारणे कृते द्वित्वे सवर्णदीर्घ इति मत्वाह—ऊदतुरिति। उवादेथेति। द्वित्वे अभ्यासस्य सम्प्रसारणमिति भावः। ऊदथुः। ऊद। उवाद-उवद। ऊदिव। ऊदिम। वदितेति। तासि इट्। वदिष्यति। वदतु। अवदत्। वदेत्। उद्यादिति। आशीर्लिङि यासुटः कित्त्वात् 'वचिस्वपि' इति सम्प्रसारणमिति भावः। 'अवादीत्' इत्यत्र हलन्तलक्षणवृद्धेः 'नेटि' इति निषेधेऽपि 'अतो हलादेः' इति वृद्धिविकल्पमाशङ्क्य वदव्रजेति वृद्धिरिति। एतदर्थमेव 'वदव्रजहलन्तस्य' इत्यत्र वदधातोः पृथक् ग्रहणमिति भावः। टुओ श्वि इति। टुरोकारश्चेत्। श्वयतीति। शपि गुणाऽयादेशौ। लिटि तु अकिति णलादौ 'लिट्यभ्यासस्य' इत्यभ्यासस्य नित्यं सम्प्रसारणे प्राप्ते, किति तु अतुसादौ द्वित्वात्प्राक् 'वचिस्वपि' इति नित्यं सम्प्रसारणे प्राप्ते आह—विभाषा श्वेः। सम्प्रसा-

'श्वयतेर्लिट्यभ्यासलक्षणप्रतिषेधः' (वा ३४६२)। तेन 'लिट्यभ्यासस्य-' (सू २४०८) इति सम्प्रसारणं न। शिश्वाय । शिश्वियतुः । श्वयिता । श्वयेत् । शूयात्। 'जृस्तम्भु—' (सू २२६१) इत्यङ् वा । २४२१ श्वयतेरः ७।४।१८॥ श्वयतेरिकारस्याकारः स्यादङि । पररूपम् । अश्वत् । अश्वताम् । अश्वन् । 'विभाषा घेट्श्व्योः' (सू २३७५) इति चङ्। इयङ्। अशिश्वियत् । 'ह्मयन्त—' (सू

रणमिति । 'व्यञ्जः सम्प्रसारणम्' इत्यतस्तदनुवृत्तेरिति भावः । लिटि यङि चेति। 'लिट्यङोः' इत्यनुवृत्तेरिति भावः । शुशावेति । णलि अभ्याससम्प्रसारणं बाधित्वा द्वित्वात्प्रागेव परत्वादनेन सम्प्रसारणे कृते ततो द्वित्वे वृद्ध्यावादेशाविति भावः । अकित्त्वाद्वचिस्वपीत्यस्य नात्र प्राप्तिः । तथाच लिट्यकित्स्वेकवचनेषु द्वित्वात् प्रागप्राप्तस्य सम्प्रसारणस्य विकल्पविधिः । 'शुश्रुवतुरित्यादिद्विवचनबहुवचनेषु तु द्वित्वात्प्राक् वचिस्वपीति प्राप्तस्य सम्प्रसारणस्य विकल्पविधिः । तथाच उभयत्र विभाषेयम् । यङशे त्वप्राप्तविभाषैवेयम्-शोशूयते । शेशीयते । तत्र णलि एतत्सम्प्रसारणाऽभावपक्षे श्वि इत्यस्य द्वित्वानन्तरमभ्याससम्प्रसारणे शुश्वाय इति प्राप्ते आह—श्वयतेर्लिट्यभ्यासलक्षणप्रतिषेध इति । लिट्यभ्याससम्प्रसारणस्य प्रतिषेधो वक्तव्य इत्यर्थः । तथाच 'श्वि' इत्यभ्यासस्य सम्प्रसारणाऽभावादभ्यासे इकार एव श्रूयते इत्याह—तेनेति । शूयादिति । आशीर्लिङि यासुटः कित्त्वाद्वचिस्वपीति सम्प्रसारणे पूर्वरूपे 'अकृत्सार्वधातुकयोः' इति दीर्घ इति भावः । लुङि विशेषमाह—जृस्तम्भेति । तथाच अश्वि अ त् इति स्थिते इयङि प्राप्ते—श्वयतेरः । श्वयतेः अः इति च्छेदः । श्वयतेरिति श्तिपा निर्देशः । श्विधातोरित्यर्थः । 'अलोऽन्यस्य' इत्यन्त्यस्य इकारस्येति लभ्यते । 'ऋदृशोऽङि' इत्यतः अङीत्यनुवर्तते । तदाह—श्वयतेरिकारस्येति । अश्व अ त् इति स्थिते सवर्णदीर्घमाशङ्क्याह—पररूपमिति । आर्धधातुकोपदेशे अदन्तत्वाभावात् न अङ्लोपः । अश्वन्निति । अश्वः । अश्वतम् । अश्वत । अश्वम् । अश्वाव । अश्वाम । अङभावपक्षे त्वाह-विभाषेति । इयङिति । 'चङि' इति द्वित्वमित्यपि ज्ञेयम् । तदाह—अशिश्वियदिति । अङश्चङ्भावे तु अश्वि ईत् इति स्थिते इकारस्य सिचि वृद्धौ सत्याम् आयादेशे अश्वायीदिति प्राप्ते आह—ह्मयन्तेति न वृद्धिरिति । शिवग्रहणादिति भावः । न च 'नेटि' इत्येव सिचि वृद्धेः निषेधसिद्धेः पृथक् शिवग्रहणं व्यर्थमिति वाच्यम्, 'नेटि' इति निषेधस्य हलन्तलक्षणवृद्धिमात्रविषयत्वात् । नच अश्वि ईत् इति स्थिते सिचि वृद्ध्यपेक्षया परत्वादन्तरङ्गत्वाच्च इकारस्य गुणे एकारे कृते हलन्तत्वाभावेन सिचि वृद्ध्यप्राप्त्या अयादेशे कृते यान्तत्वादेव हलन्तलक्षणवृद्धेर्निषेधसिद्धेः 'ह्मयन्त' इत्यत्र शिवग्रहणं व्यर्थमिति वाच्यम्, अनवकाशतया अपवादत्वेन गुणं बाधित्वा सिचि वृद्धेः प्राप्तौ तन्निषेधार्थत्वाच्छिवग्रहणम् । वृद्धिस्थस्य व्याख्या-

२२९९) इति न वृद्धिः। अश्वयीत्। वृत्। यजादयो वृत्ताः। भ्वादिस्त्वाकृतिगणः। तेन चुलुम्पतीत्यादिसंग्रहः। इति भ्वादयः।

२४२२ ऋतेरीयङ् ३।१।२९॥ ऋतिः सौत्रस्तस्मादीयङ् स्यात्स्वार्थे। जुगुप्साायामयं धातुः इति बहवः। कृपायां च इत्येके। 'सनाद्यन्ताः—' (सू २३०४) इति धातुत्वम्। ऋतीयते। ऋतीयांचक्रे। आर्धधातुकविवक्षायां तु 'आयादय आर्धधातुके वा' (सू २३०५) इतीयङभावे 'शेषात्कर्तरि—' (सू २१५६) इति परस्मैपदम्। आनर्त। अर्तिष्यति। आर्तीत्। इति तिङन्ते भ्वादिप्रकरणम्॥

अथ तिङन्तेऽदादिप्रकरणम्॥ २॥

१०११ अद भक्षणे। द्वौ परस्मैपदिनौ। २४२३ अदिप्रभृतिभ्यः शपः २।४।७२॥ लुक् स्यात। अत्ति। अत्तः। अदन्ति। २४२४ लिट्यन्यतर-

---

नम्—यजादयो वृत्ता इति। ननु भ्वादयो वृत्ता इति कुतो न व्याख्यायते इत्यत आह—भ्वादिस्त्वाकृतिगण इति। चुलुम्पतीति। चुलुम्पधातुर्लोपार्थकः, तस्यापि भ्वादिगणे पाठात् शब्विकरणत्वमिति भावः। इति भ्वादय इति। नचैवं सति 'अद भक्षणे' इत्यादीनां वक्ष्यमाणानां धातुत्वं कथमिति शङ्क्यम्, शब्विकरणाः भ्वादयः समाम्ना इत्यर्थात्।

ऋतेरीयङ्। ऋतेर्धातुपाठे अदर्शनादाह—ऋतेः सौत्र इति। स्वार्थे इति। अर्थविशेषस्यानिर्देशादिति भावः। तकारान्तो धातुरयमिका निर्दिष्टो न त्विकारान्तः। इदन्तत्वे हि सवर्णदीर्घेणैव सिद्धे ईयङिति ईकारोच्चारणवैयर्थ्यात्। नच इदन्तत्वे सति 'एरनेकाचः' इति यण् स्यादिति वाच्यम्, एवमपि ऋतेर्कर्तः इति क्यङ्यये कृते 'अकृत्सार्वधातुकयोर्दीर्घः' इति दीर्घणैव सिद्धे ईयङ्विधिवैयर्थ्यात्। एके इति। अन्ये इत्यर्थः। ऋतीयते इति। ईयङोऽदन्तत्वात् शपि पररूपम्। ऋतीयाञ्चक्रे इति। 'कास्प्रत्ययात्' इत्याम्। ऋतीयिता। ऋतीयिष्यते। ऋतीयताम्। आर्तीयत। ऋतीयेत। ऋतीयिषीष्ट। आर्तीयिष्ट। आर्तीयिष्यत। आनर्तेति। ऋत् इति तकारान्तात् लिटि णलि द्वित्वे उरदत्वे रपरत्वे हलादिशेषे 'अत आदेः' इत्यभ्यासस्य दीर्घे 'तस्माच्छुड्ढिहलः' इति नुट्, 'नुडविधौ ऋकारकदेशो रेफो हलन्तेन गृह्यते' इत्युक्तेरिति भावः। आनृततुः। आनृतुः। अनिट्सु अस्याऽऽठात् थलि नित्यमिट्। आनर्तिथ। आनृतथुः। आनृत। आनर्त। आनृतिव। आनृतिम। अर्तिता। अर्तिष्यति। ऋत्यात्। आर्तीदिति। 'इः ईटि' इति सिज्लोपः आडागमः। आर्तिष्यत्। इति श्रीवासुदेवदीक्षितविदुषा विरचितायां सिद्धान्तकौमुदीव्याख्यायां बालमनोरमाख्यायां शब्विकरणनिरूपणं समाप्तम्।

अथ लुग्विकरणान् धातूञ्जिरूपयितुमुपक्रमते—अद भक्षणे इति। अनिट्यम्। अदिप्रभृतिभ्यः। 'व्यक्षन्त्रियार्षजितः' इत्यतो लुगित्यनुवर्तते इत्यभिप्रेत्य शेषपूरणेन सूत्रं व्याचष्टे—लुक् स्यादिति। अदिप्रभृतिभ्यः परस्य शपो लुगिति फलितम्। अत्तीति।

स्याम् २।४।४०॥ अदो घस्लृ वा स्यात्सिचि। जघास। 'गमहन–' (सू २३६३) इत्युपधालोपः। तस्य चविधिं प्रति स्थानिवद्भावनिषेधाद्धस्य चर्त्वम्। 'शासिवसि–' (सू २४१०) इति षत्वम्। जक्षतुः। जक्षुः। घसेस्तासावभावात्थलि नित्यमिट्। जघसिथ। आद। आदतुः। 'इडत्यर्ति–' (सू २३८४) इति नित्यमिट्। आदिथ। अत्ता। अत्स्यति। २४२५ हुझल्भ्यो हेर्धिः ६।४।१०१॥ होर्झलन्तेभ्यश्च हेर्धिः स्यात्। अद्धि—अत्तात्। अदानि। २४२६ अदः सर्वेषाम्

शपो लुकि दस्य चत्वेन तकारः। एवमग्रेऽपि। अदन्तीति। एतदर्थमेव 'झोऽन्तः' इत्यत्र अकारादिरादेश आश्रितः। अत्सि। अत्थः। अत्थ। अद्मि। अद्वः। अद्मः। लिट्यन्यतरस्याम्। 'अदो जग्धिः' इत्यतः अद इति लुङ्सनोर्घस्लृ' इत्यतो घस्लृ इति चानुवर्तते। तदाह—अद इति। आदेशे लृकार इत्। घसादेशः अनिट्। जघासेति। अकित्त्वात् 'गमहन' इत्युपधालोपो नेति भावः। जघस् अतुसिति स्थिते आह—गमहनेत्युपधालोप इति। 'असंयोगात्' इति कित्त्वादिति भावः। जघस् अतुसिति स्थिते घकारस्य चर्त्वं वक्तुं उपधालोपस्य स्थानिवत्त्वमाशङ्क्याह—तस्येति। उपधालोपस्येत्यर्थः। जघस् अतुसिति स्थिते सकारस्य आदेशप्रत्यययोरित्यत्वाऽभावादाह—शासीति। थलि तु क्ङिदिनियमाद्भित्यमिट्। 'उपदेशेऽत्वतः' इति निषेधस्य तासौ नित्याऽनिडविषयत्वात्। घस्तु तासौ न विद्यत एव, कुतस्तस्य तासावनिट्कत्वम्। 'यस्त्रासावस्ति अनिट् च' इति हि भाष्यम्। तदाह—घसेस्तासाविति। जघासथेति। जक्षथुः। जक्ष। जघास-जघस। जक्षिव। जक्षिम। घसादेशाभावपक्षे त्वाह—आदेति। थलि भारद्वाजनियमादिड्विकल्पे प्राप्ते आह—इडत्यर्तीति। आदिथेति। आदथुः। आद। आद। आदिव। आदिम। अत्ता। अत्स्यतीति। अनिट्। दस्य तः। अत्तु-अत्तात्। अत्ताम्। अदन्तु। अद् हि इति स्थिते 'झयो होऽन्यतरस्याम्' इति हकारस्य पूर्वसवर्णविकल्पेन धकारविकल्पे प्राप्ते—हुझल्भ्यो हेर्धिः। झलन्तेभ्य इति। अङ्गविशेषणत्वात् तदन्तविधिरिति भावः। अनेकालत्वात् सर्वादेशः। 'रुदिहीत्यत्र तु न, निर्दिश्यमानहेरिटा व्यवहितत्वात्, इट्सहितस्य त्वनिर्दिश्यमानत्वादिति भाष्ये स्पष्टम्। अत्तादिति। भित्त्वात् परत्वात्तातङ्। तस्य स्थानिवत्त्वेन हित्वेऽपि न पुनर्धित्वम् 'विप्रतिषेधे यद्बाधितं तद्बाधितमेव' इति न्यायात्। अत्तम्। अत्त। अदानीति। 'आडुत्तमस्य' इत्याडागमः। एतदर्थमेव आडागमे दीर्घोच्चारणमिति भावः। अदाव। अदाम। लङि आदू त इति स्थिते—अदः सर्वेषाम्। अद इति पञ्चमी। 'तस्मादित्युत्तरस्य' इति परिभाषया परस्येति लभ्यते। 'गुणोऽपृक्ते' इत्यतः अपृक्ते इति 'तुरुस्तुशम्यमः' इत्यतः 'सार्वधातुके' इति चानुवर्तते। सप्तमीद्वयं च षष्ठ्या विपरिणम्यते। 'अद गार्ग्यगालवयोः' इत्यतः अदित्यनुवर्तते। 'गार्ग्यगालवयोरित्यस्यानुवृत्तिनिवृ-

७।३।१०॥ अदः परस्यापृक्तसार्वधातुकस्याऽडागमः स्यात्सवर्णदीर्घे तु। आदत्। आत्ताम्। आदन्। आदः। आत्तम्। आत्त। आदम्। आद्व। आद्म। अद्यात्। अद्याताम्। अद्युः। अद्यास्ताम्। अद्यासुः। २४२७ लुङ् सनोर्घस्लृ २।४।३७॥ अदो घस्लृ स्याल्लुङि सनि च। लृदित्त्वादङ्। अघसत्। १०१२ हनहिंसागत्योः। प्रणिहन्ति। २४२८ अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो झलि क्ङिति ६।४।३७॥ अनुनासिक इति लुप्तषष्ठीकं पदं वनतीतरेषां विशेषणम्। अनुनासिकान्तानामेषां वनतेश्च लोपः स्याज्झलादौ क्ङिति परे। यमिरमिनमिगमिहनिमन्यतयोऽनुदात्तोपदेशाः। तनु [षणु] क्नसुक्षिणुऋणुतृणुघृणुवनुमनु

त्तये सर्वेषामिति, तदाह—अदः परस्येत्यादिना टित्त्वादाद्यवयवः। तदाह—आदत इति। आत्तामिति। अपृक्तग्रहणान्नाऽडागम इति भावः। विधिलिङि रूपमाह—अद्यादिति। शपो लुकि अतः परत्वाऽभावात् 'अतो येयः' इति नेति भावः। मिपः अमि यामुटि सलोपे सवर्णदीर्घे अद्याम्। अद्याव। अद्याम। आशीर्लिङि अद्यादिति सिद्धवत्कृत्याह—अद्यास्तामिति। लुङि अद् स् त् इति स्थिते—लुङ्सनोर्घस्लृ। 'अदो जग्धिः' इत्यतः अद इत्यनुवर्तते। तदाह—अद इति। लृदित्त्वस्य प्रयोजनमाह—लृदित्त्वादिति। हनधातुरनिट्। प्रणिहन्तीति। शपो लुक्। नस्याऽनुस्वारपरसवर्णौ। 'नेर्गद' इति णत्वम्। अनुदात्तोपदेश। 'ऊदृदन्तै'रित्यादिभिः संगृहीता अनुदात्तोपदेशाः, वनतिर्भ्वादिकः, तनोत्यादयस्तु 'तनु विस्तारे' इत्यादिना पठिष्यन्ते। एतेषामनुनासिकस्य लोपः स्यात् झलादौ क्ङिति इति प्रतीयमानार्थः। एवं सति मुक्तमित्यादौ मुचादीनामपि मकारादिलोपः स्यात्। तत्राह—अनुनासिक इति। लुप्तषष्ठीक पदमिति। एवमप्युक्तातिप्रसङ्गतादवस्थ्यादाह—वनतीतरेषां विशेषणमिति। अनुदात्तोपदेशानां तनोत्यादीनां चेत्यर्थः। तथाच विशेषणत्वात्तदन्तविधौ अनुनासिकान्तानामनुदात्तोपदेशानां तनोत्यादीनां वनतेश्चेत्येषामन्तस्य लोपः स्यादित्यर्थलाभान्मुक्तमित्यादौ नातिप्रसङ्गः। तदाह—अनुनासिकान्तानामित्यादिना। वनधातोस्तु अनुनासिकान्तत्वान्न विशेषणम्, अव्यभिचारादिति भावः। अत्रानुदात्तोपदेशान् अनुनासिकान्तान् दर्शयति—यमिरमीति। अनुदात्तोपदेशेषु एतेषामेव षण्णामनुनासिकान्तत्वादिति भावः। अथ तनोतीत्यादीननुनासिकान्तान् दर्शयति—तनुक्षणु इत्यादि। 'मनु' इत्यन्तसमाहारद्वन्द्वात् प्रथमैकवचनान्तम्। एतेऽष्टौ तनोत्यादयोऽनुनासिकान्ता इत्यर्थः। 'तनु विस्तारे' इत्यारभ्य 'डु कृञ् करणे' इत्यन्ता दश धातवस्तनोत्यादयः। तत्र करोतिरनुनासिकान्तत्वाभावादिह न गृह्यते। 'जनसनखनां सञ्झलोः' इति सनोतेरात्त्वस्य वक्ष्यमाणत्वात् सोऽप्यत्र न गृहीतः। 'वनु याचने' इति तनादौ पठितम्। तस्य उविकरणतया, उदित्त्वेन च वनतिग्रहणेनाग्रहणात् तनादौ पठितस्यापि पृथग्ग्रहणम्। तत्र तत्र तानादिकस्य वनेरुदित्त्वात् 'उदितो वा' इति क्त्वायामिड्विकल्पात् 'यस्य विभाषा'

तनोत्यादयः । हतः । घ्नन्ति । २४२६ वमोर्वा ८।४।२३॥ उपसर्गस्थान्निमित्तात्परस्य हन्तेर्नस्य णो वा स्याद्वमयोः परयोः । प्रहणिम—प्रहन्मि । प्रहण्वः—प्रहन्वः । 'हो हन्तेः—' (सू ३५८) इति कुत्वम् । जघान । जघ्नतुः । जघ्नुः । २४३० अभ्यासाच्च ७।३।५५॥ अभ्यासात्परस्य हन्तेर्हस्य कुत्वं स्यात् । जघनिथ-जघन्थ । हन्ता । 'ऋदुनोः—' (सू १३६६) इतीट् । हनिष्यति । हन्तु-हतात् । घ्नन्तु । २४३१ हन्तेर्जः ६।४।३६॥ हौ परे । आभीयतया जस्यासिद्धत्वाद्धेर्लुक् । जहि । हनानि । हनाव । हनाम । अहन् । अहताम् । अघ्नन् । अहनम् । २४३२ आर्धधातुके २।४।३५॥ इत्यधिकृत्य । २४३३ हनो वध

इति निष्ठायामिडभावे वतः वतवान् इत्युदाहरणम् । वनतेस्तु औवादिकस्य उदित्त्वाभावान्निष्ठायां सेट्कत्वेऽपि क्तिनि वनितिरित्युदाहरणम्, तत्र 'तितुत्रतथसिसुसरकसेषु च' इति इण्निषेधादित्यलम् । हत इति । तसि अनुदात्तोपदेशानुनासिकान्तत्वान्नकारलोपः, 'सार्वधातुकमपित्' इति तपो ङित्त्वात् । घ्नन्तीति । अजादिङित्परकत्वात् 'गमहन' इत्यूपधालोपे 'हो हन्तेः' इति कुत्वेन हस्य घः । हंसि । हथः । हथ । वमोर्वा । 'उपसर्गादसमासेऽपि' इत्यतः उपसर्गादित्यनुवर्तते । 'रषाभ्यां नो णः' इति सूत्रमनुवर्तते । 'हन्तेरत्पूर्वस्य' इत्यतो हन्तेरिति । तदाह—उपसर्गस्थान्निमित्तादिति । ननु जहानेति स्थिते आह—हो हन्तेरिति । 'अभ्यासाच्च' इत्यपेक्षया अस्यान्तरङ्गत्वेन न्याय्यत्वादिति भावः । जघ्नतुरिति । 'गमहन' इत्यूपधालोपे 'हो हन्तेः' इति कुत्वम् । थलि भारद्वाजनियमादिड्विकल्पे जहनिथ जहन्थ, इति स्थिते ञ्णित्प्रत्ययपरत्वाभावान्नकारपरत्वाभावाच्च 'हो हन्तेः' इति कुत्वाऽप्राप्तौ—प्रभ्यासाच्च । 'हो हन्तेः' इत्यनुवर्तते । 'चजोः कु घिण्ण्यतोः' इत्यतः कुग्रहणं च । तदाह—प्रभ्यासात् परस्येत्यादिना । जघनिथ, जघन्थेति । इडभावे नस्याऽनुस्वारपरसवर्णौ । जघ्नथुः । जघ्न । जघान-जघ्न । जघ्निव । जघ्निम । लुटि स्ये इण्निषेधमाशङ्क्याह—ऋदुनोरिति । हन् हि इति स्थिते 'हुझल्भ्यः' इति धिरे प्राप्ते—हन्तेर्जः । 'शा हौ' इत्यतः हौ इत्यनुवृत्तिमभिप्रेत्य शेषपूरणेन सूत्रं व्याचष्टे—हौ परे इति । कृते जादेशे 'अतो हेः' इति हेर्लुकमाशङ्क्य आह—आभीयतयेति । जहीति । हतात् । हतम् । हत । हनानीति । आटः पित्त्वेन ङित्त्वाऽभावान्नोपधालोप इति भावः । अहनिति । लङस्तिपि, 'हृतश्च' इति इकारलोपे 'संयोगान्तस्य' इति तकारलोपः । न्याय्यत्वाद्वलङ्यादिलोपो वा । अहनमिति । अहन्व । अहन्म । झलादिपरकत्वाऽभावान्नोपधादीर्घः । विधिलिङि हन्यात्, हन्याताम् इत्यादि । आशीर्लिङि वधादेशं वक्ष्यन्नाह—आर्धधातुके । इत्यधिकृत्येति । 'अदो जग्धिः' इत्यादिविधयो वक्ष्यन्त इति शेषः । तदधिकारस्थं सूत्रमाह—हनो वध । वधेति लुप्तप्रथमाकम् । हनो वधादेशः स्यादार्धधातुके लिङीत्यर्थः ।

लिङि २।४।४२॥ २४३४ लुङि च २।४।४३॥ वधादेशोऽदन्तः। 'आर्धधातुके' (सू २३०७) इति विषयसप्तमी। तेनार्धधातुकोपदेशेऽकारान्तत्वात् 'अतो लोपः-'(सू २३०८) वध्यात्। वध्यास्ताम्। आर्धधातुके किम्। विध्यादौ हन्यात्। 'हन्तेः-' (सू ३५६) इति यत्वम्। अहन्यात्। अल्लोपस्य स्थानिवत्त्वात् 'अतो हलादेः-'(सू २२८४) इति न वृद्धिः। अवधीत्।

अथ चत्वारः स्वरितेतः। १०१३ द्विष अप्रीतौ। द्वेष्टि। द्विष्टे। द्वेष्टा। द्वेक्ष्यति। द्वेक्ष्यते। द्वेष्टु—द्विष्टात्। द्विड्ढि। द्वेषाणि। द्वेषै। द्वेषावहै। अद्वेट्। २४३५ द्विषश्च ३।४।१२०॥ लङो झेर्जुस् वा स्यात्। अद्विषुः। अद्विषन्। अद्वेषम्। द्विष्यात्। द्विषीत। द्विक्षीष्ट। अद्विक्षत्। १०१४ दुह प्रपूरणे। प्रपूरण

लुङि च। हनो वधादेशः स्यात् लुङीत्यर्थः स्पष्टः। वधादेशोऽदन्त इति। धकारादकारो न सुखोच्चारणार्थ इति भावः। तत्प्रयोजनं तु अनुपदमेव अवधीत् इत्यत्र वक्ष्यते। ननु आशीर्लिङि हन् यादिति स्थिते आर्धधातुके परे कृतस्य वधादेशस्य आर्धधातुकोपदेशे अकारान्तत्वाऽभावात् कथ वध्यादित्यत्र अल्लोप इत्यत आह—विषयसप्तमीति। तथाच आर्धधातुके विवक्षिते तत्प्रवृत्तेः प्रागेव वधादेशे कृते आर्धधातुकप्रवृत्तिरिति फलितम्। ततश्च आर्धधातुकोपदेशे वधादेशस्य अकारान्तत्वादल्लोपो निर्बाधः। तदाह—तेनेति। अवधीदिति। सिचि अल्लोपे कृते वधादेशस्य धकारान्ततया एकाच्त्वेऽप्यादेशोपदेशे अनेकाच्त्वेन 'एकाच उपदेशे' इति निषेधाऽभावात् सिच इट्। 'अतो हलादेः' इति वृद्धिस्तु न भवति, 'अचः परस्मिन्' इत्यल्लोपस्य स्थानिवत्त्वात्। एतदर्थमेव हि वधादेशस्य अदन्तत्वमाश्रितम्।

स्वरितेत इति। उभयपदिन इति फलितम्। द्विष अप्रीताविति। अनिट्। द्वेष्टीति। पित्त्वेन ङित्त्वाऽभावाल्लघूपधगुण इति भावः। द्विष्टः। द्विषन्ति। द्वेक्षि। द्विष्ठः। द्विष्ठ। द्वेष्मि। द्विष्वः। द्विष्मः। तङि उदाहरति—द्विष्टे इति। ङित्त्वान्न गुणः। द्विषाते। द्विषते। द्विक्षे। द्विषाथे। द्विड्ढ्वे। द्विषे। द्विष्वहे। द्विष्महे। षढाविति षस्य कत्वं मत्वा आह—द्वेक्ष्यतीति। द्विड्ढीति। हेर्धिः, षस्य जश्त्वेन डः, ष्टुत्वेन ढः। द्विष्टात्। द्विष्टम्। द्विष्ट। द्वेषाणीति। आटः पित्त्वेन ङित्त्वाभावात् गुणः, षात्परत्वाण्णत्वम्। द्वेषाव। द्वेषाम। द्विष्टाम्। द्विषाताम्। द्विषताम्। द्विक्ष्व। द्विषाथाम्। द्विड्ढ्वम्। द्वेषै इति। आटः पित्त्वेन ङित्त्वाऽभावात् गुण इति भावः। अद्वेडिति। अङस्तिप्। गुणः। इकारलोपः हल्ङ्यादिलोपः। 'वाऽवसाने' इति 'झलां जश्' इति च चर्त्वंजश्त्वे इति भावः। अद्विष्टाम्। द्विषश्च। 'झेर्जुस्' इति 'लङः शाकटायनस्य' इति चानुवर्तते इत्यभिप्रेत्य शेषपूरणेन सूत्रं व्याचष्टे—लङो झेरिति। अद्विषन्निति। अद्वेट्। अद्विष्टम्। अद्विष्ट। अद्वेषम्। अद्विष्व। अद्विष्म। विधिलिङि परस्मैपदे आह—द्विष्यादिति। द्विष्याताम्। द्विष्युः इत्यादि। तङि आह—द्विषीतेति।

पूरणाभावः। धात्वर्थं बाधते कञ्चित्। दोग्धि। दुग्धः। धोक्षि। दुग्धे। धुक्षे। धुग्ध्वे। दोग्धु। दुग्धि। दोहानि। धुक्ष्व। धुग्ध्वम्। दोहै। अधोक्। अदोहम्। अदुग्ध। अधुग्ध्वम्। अधुक्षत्। अधुक्षत। 'लुग्वा दुह—' (सू २३६५) इति

द्विषीयाताम्। द्विषीरन्। इत्यादि। आशीर्लिङि द्विष्यास्ताम् इत्यादि। तङ्याह—द्विक्षीष्टेति। 'लिङ्सिचावात्मनेपदेषु' इति कित्त्वाच्च गुणः। द्विक्षीयास्तामित्यादि। लुङि परस्मैपदे आह—अद्विक्षदिति। 'शल इगुपधात्' इति क्सः। अद्विक्षताम्। अद्विक्षन्। इत्यादि। तङि अद्विक्षत। अद्विक्षाताम्। अद्विक्षन्त। इत्यादि। अद्वेक्षत्। अद्वेक्ष्यत। दुह प्रपूरणे इति। अयमनिट्। 'पयो दोग्धि' इत्यादौ प्रकृष्टपूरणस्यार्थस्यानवगमादाह—प्रपूरणं पूरणाभाव इति। ऊधःपूरणप्रतिकूलोभाव इत्यर्थः। ऊधसः सकाशात् क्षारणे इति यावत्। ननु प्रपूरणशब्दस्य कुतोऽयमर्थ इत्यत आह—धात्वर्थं बाधते कञ्चिदिति। प्रसिद्धं धात्वर्थं कञ्चिदुपसर्गो बाधित्वा अर्थान्तरं नयतीत्यर्थः। दोग्धीति। 'दादेः' इति हस्य घः, 'झषस्तथोः' इति तकारस्य धकारः, घस्य जश्त्वेन गः। एवं दुग्धः इत्यपि। दुहन्ति। धोक्षीति। हस्य घः, चर्त्वेन कः, षत्वमिति भावः। दुग्धः। दुग्ध। दोह्मि। दुह्वः। दुह्मः। लटि आत्मनेपदे आह—दुग्धे इति। घजगाः। दुहाते। दुहते। धुक्षे इति। हस्य घः, दस्य भष् धकारः, घस्य कः, षत्वम्। दुहाथे। धुग्ध्वे इति। हस्य घः, भष्, घस्य गः। दुह्वहे। दुह्महे। दोदोह। दुदुहतुः। दुदुहुः। अजन्ताऽकारवत्त्वाभावात् क्रादिनियमान्नित्यमिट्-दुदोहिथ। दुदुहथुः। दुदुह। दुदोह। दुदुहिव। दुदुहिम। दुदुहे। दुदुहाते। दुदुहिरे। दुदुहिषे। दुदुहाथे। दुदुहिढ्वे-दुदुहिध्वे। दुदुहे। दुदुहिवहे। दुदुहिमहे। दोग्धा। धोक्ष्यति। धोक्ष्यते। दोग्ध्यति। दुग्धात्। दुग्धाम्। दुहन्तु। दुग्धीति। हेर्धिः। घत्वजश्त्वे। दुग्धात्। दुग्धम्। दुग्ध। दोहानीति। आः पित्त्वादङित्त्वाद्गुणः। दोहाव। दोहाम। दुग्धाम्। दुहाताम्। दुहताम्। धुक्ष्वेति। घत्वं भ जश्त्वचर्त्वे षत्वम्। दुहाथाम्। धुग्ध्वमिति। हस्य घः, भष् घस्य जश्त्वम्। दोहै इति। आटः पित्त्वादङित्त्वादुगुण इति भावः। दोहावहै। दोहामहै। लङि परस्मैपदे आह—अधोगिति। तिप् इकारलोपः, हल्ङ्यादिलोपः, हस्य घः, दस्य भष्, घस्य चर्त्वविकल्पः। अदुग्धाम्। अदुहन्। अधो ्। अदुग्धम्। अदुग्ध। अदोहमिति। अदुह्व। अदुह्म। लङन्तङ्याह—अदुग्धेति। हस्य घः, तकारस्य धः, घस्य गः। अदुहाताम्। अदुहत। अदुग्धाः। अदुहाथाम्। अधुग्ध्वमिति। हस्य घः, दस्य भष् घस्य गः। अदुह्वहि। अदुह्महि। लुङि परस्मैपदे आह—अधुक्षदिति। 'शल इगुपधात्' इति क्सः। हस्य घः, दस्य भ ्, घस्य चर्त्वं, षत्वम्। अधुक्षताम्। अधुक्षन्। इत्यादि। लुङस्तङ्याह—अधुक्षतेति। 'क्सस्याऽचि' अधुक्षाताम्। अधुक्षन्त। अधुक्षथाः। अधुक्षाथाम्। अधुक्षध्वम्। अधुक्षि। अधुक्षावहि। अधुक्षामहि। लुग्वेति। त थास् ध्वम् वहि एषु चतुर्षु दन्त्यादिषु परेषु 'लुग्वा

लुक्पक्षे तथास्ध्वम्वहिषु लक्ष्वदपि । १०१५ दिह उपचये । उपचयो वृद्धिः । प्रणि-देग्धि । १०१६ लिह आस्वादने । लेढि । लीढः । लिहन्ति । लेक्षि । लीढे । लिक्षे । लीढ्वे । लेढु । लीढाम् । लीढि । लेहानि । अलेट् । अलिक्षत् । अलिक्षत । अलिक्षताम् । अलीढ । अलिढावहि-अलिह्वहे । अलेदयत् । अलेदयत । १०१७ चक्षिङ् व्यक्तायां वाचि । अयं दर्शनेऽपि । इकारोऽनुदात्तो युजर्थः । 'विचक्षणः

दुह' इति क्सस्य लुक्पक्षे लक्षीव रूपाणीत्यर्थः । तथाच अदुग्धाः । अदुग्धाः । अदुग्ध्वम् । अदुह्वहि । इत्यपि रूपाणीति फलितम् । अधोचत् । अधोचत । दिह उपचये इति । उपचयो वृद्धिः । अनिट् । प्रणिदेग्धीति । 'नेगंद' इति णत्वम् । दुहधातुवद्रूपाणि । लिह आस्वादने इति । अनिट् । लेढीति । शपो लुकि ढत्वधस्त्वष्टुत्वढलोपाः । लेक्षीति । सिपि हस्य ढः 'ढढोः' इति ढस्य क इति भावः । लीढः । लीढ । लेह्मि । लिटि तङ्याह—लीढे इति । लिहाते । लिहते । लिक्षे इति । ढकषाः । लिहाथे इति सुगमम् । लीढ्व इति । ढत्वधस्त्वष्टुत्वढलोपदीर्घाः । लिढे । लिह्वहे । लिह्महे । लेढा । लेक्ष्यति । लेक्ष्यते । लेढ्विनि । लीढात् । लीढाम् । लिहन्तु । लीढोति । हेर्धिः ढत्वधःष्टुत्वढलोपदीर्घाः । लीढात् । लीढम् । लीढ । लेहानीति । आटः पित्त्वेन ङित्त्वाऽभावाद्गुण इति भावः । लेहाव । लेह्याम । लीढाम् । 'लिढातम् । लिहनाम् । लिक्ष्व । लिहाथाम् । लीढ्वम् । लेहै । लेहावहै । लेहामहै । अलेडिति । लङि तिपि शपो लुपि हकारलोपे हलङ्यादिलोपे हस्य ढः, चर्त्वविकल्प इति भावः । अलीढाम् । अलिहन् । अलेट् । अलीढम् । अलीढ । अलेह्म । अलिह्व । अलिह्म । अलीढ । अलिहाताम् । अलिक्षत । अलीढाः । अलिहाथाम् । अलीढ्वम् । अलिहि । अलिह्वहि । अलिह्महि । अलिक्षदिति । लुङि क्सः । अलिक्षताम् । अलिक्षन् । अलिक्षः इत्यादि । तङि आह—अलिक्षतेति । अधोढेति । 'लुग्वा दुह' इति क्सलोपपक्षे रूपम् । अलिक्षाताम् । अलिक्षन्त । अलिक्षथाः-अलीढाः । अलिक्षाथाम् । अलिक्षध्वम्-अलीढ्वम् । अलिक्षि । 'लुग्वा दुह' इति लुग्विकल्पं मत्वा आह—अलिक्षावहि, अलिह्वहीति । अलेदयत्, अलेदयतेति । लुङि रूपे । द्विषादयश्चत्वारः स्वरितेतो गताः । चक्षिङ् व्यक्तायां वाचीति । गूढार्थस्य स्पष्टप्रतिपत्त्यर्थं विवरणे इत्यर्थः । अयं दर्शनेऽपीति । श्रुतौ 'पूर्वापरं चरतो माययैतौ । शिशू क्रीडन्तौ परियातो अध्वरम् । विश्वान्यन्यो भुवनानि चक्षे । ऋतूनन्यो विदधज्जायते पुनः' इत्यादौ तथा दर्शनादिति भावः । ननु चक्षिङ्इत्यत्र इकारोच्चारणं व्यर्थम् । न च सुखोच्चारणार्थं तदिति वाच्यम्, अकारोच्चारणेनैव तत्सिद्धेः । नाप्यनुदात्तेत्वप्रयुक्तात्मनेपदार्थं तदिति शक्यं वक्तुम्, ङित्त्वादेव तत्सिद्धेरित्यत आह—इकारोऽनुदात्तो युजर्थ इति । 'अनुदात्तेतश्च हलादेः' इति ल्युडपवादयुच्प्रत्ययार्थः । अकारमुच्चरन्नुच्चारणं तु उच्चारणार्थत्वाभावप्रतिपत्त्यर्थमिति भावः । विचक्षणः

प्रथयन्' । नुम् तु न । 'अन्ते इदितः' इति व्याख्यानात् । ङकारस्तु 'अनुदात्तेत्त्वप्रयुक्तमात्मनेपदमनित्यम्' (प १७) इति ज्ञापनार्थः । तेन 'स्फायिम्रोर्कसन्धि—' इत्यादि सिध्यति । चष्टे । चक्षाते । 'आर्धधातुके' (सू २४३१) २४३६ चक्षिङः ख्याञ् २।४।५४॥ २४३७ वा लिटि २।४।५५॥ अत्र भाष्ये ख्शादिरयमादेशः । असिद्धकाण्डे, 'शस्य यो वा' (वा १५८६) इति स्थितम् । अस्त्वात्पदद्वयम् । चख्यौ—चख्ये । चक्शौ—चक्शे । चयो द्वितीयाः—' (वा ५०२३) इति तु न, चर्त्वस्यासिद्धत्वात् । चचक्षे । ख्याता—कशाता । ख्यास्यति—ख्यास्यते ।

प्रथयन् इति मन्त्रः । अत्र लिस्स्वरनिवृत्तये युच्प्रत्यय इति भावः । ननु युच्प्रत्ययार्थमिकारस्य इत्संज्ञावश्यकत्वे नुमागमः स्यादित्यत आह-नुम् तु नेति । कुत इत्यत आह—अन्ते इदित इति । 'इदितो नुम् धातोः' इत्यत्र 'गोः पादान्ते' इत्यस्मादन्ते इत्यनुवृत्तेरिति भावः । नन्विकारे युजर्थम् अनुदात्तेत्त्वस्य इत्संज्ञकत्वस्य च आवश्यकत्वे तत एवात्मनेपदसम्भवात् ङकारोच्चारण व्यर्थमित्याशङ्क्य आह-ङकारस्त्विति । ङकारः नित्यात्मनेपदार्थः । अनुदात्तेत्त्वप्रयुक्तं त्वात्मनेपदं कदाचिन्न स्यात् । अतो ङकारोच्चारणम् । अत एव 'अनुदात्तेत्त्वप्रयुक्तमात्मनेपदमनित्यम्' इति विज्ञायत इत्यर्थः । स्फायन्निति । 'स्फायी वृद्धौ' इत्यनुदात्तेतोऽपि लटः शत्रादेशः, न त्वात्मनेपदं ज्ञानजिति भावः । वस्तुतस्तु अन्त्येत्कत्वव्याघातेन चरितार्थत्वात् ङकारोच्चारणमुक्तार्थे कथं ज्ञापकम्, भाष्ये तथा अनुक्तत्वाच्च । अतः पृषोदरादित्वकल्पनया स्फायन्निति कथंचित्साध्यमित्याहुः। चष्टे इति। 'स्कोः' इति कलोपः, ष्टुत्व चेति भावः। चक्षाते इति । चक्षते । थासः सेभावे 'स्कोः' इति कलोपे 'षढोः' इति षस्य कत्वे षत्वे च कृते, चक्षे । चक्षाथे । ध्वमि 'स्कोः' इति कलोपे षस्य जश्त्वेन डकारे चड्ढ्वे । चक्षे । चक्ष्वहे । चक्ष्महे । आर्द्धधातुके इत्यनन्तरम् 'इत्यनुवर्तमाने' इति शेषः । चक्षिङः ख्याञ् । चक्षिङः ख्याञ् स्यादार्द्धधातुके परे इत्यर्थः । वा लिटि। चक्षिङः ख्याञ् वा स्यात्लिटीत्यर्थः । अत्रेति । 'चक्षिङः ख्याञ्' इति सूत्रभाष्ये 'ख्शादिरयमादेशः' इति, 'पूर्वत्रासिद्धम्' इत्यधिकारे 'ख्शाञः शस्य यो वा वक्तव्यः' इति च स्थितमित्यर्थः । तेन 'पुंख्यान'मित्यत्र यत्वस्यासिद्धत्वात् 'पुमः ख्यम्परे' इति खत्वं नेति हलन्त्यनिरूपणे प्रपञ्चितम् । अस्त्वात्पदद्वयमिति । परस्मैपदमात्मनेपद चेत्यर्थः । चख्यौ इति । क्शादेशस्य शस्य यत्वपक्षे 'आत औ णलः' इति भावः । चख्यतुः । चख्युः । भारद्वाजनियमात्थलि वेट्—चक्ष्यथ-चख्याथ । चख्यथुः । चख्य । चख्यौ । चक्ष्यव । चक्ष्यम । क्रादिनियमादिट् । लिटि तर्हि ख्शादेशस्य शस्य यत्वपक्षे आह—चख्ये इति । चख्याते । चक्ष्यिरे । चक्ष्यिषे । चख्याथे । चक्ष्यिध्वे-चक्ष्यिढ्वे । चख्ये । चक्ष्यिवहे । चक्ष्यिमहे । शस्य यत्वाभावपक्षे त्वाह-चक्शौ चक्शे इति । खस्य चर्त्वेन क इति भावः । कृते चर्त्वे तस्य 'चयो द्वितीयाः शरि' इति खकारमाशङ्क्य निराक

कशास्यति—कशास्यते । अचष्ट । चक्षीत । ख्यायात्—ख्येयात् । कशायात्—क्शेयात् । २४३८ अस्यतिवक्तिख्यातिभ्योऽङ ३।१।५२॥ एभ्यश्च्लेरङ् । अख्यत्–अख्यत । अकशासीत्–अकशास्त । 'वर्जने कशाम् नेष्टः' (वा १५६२) समचक्षिष्ट, इत्यादि ।

अथ पृच्यन्ता अनुदात्तेतः । १०१८ ईर गतौ कम्पने च । ईर्ते । ईराञ्चक्रे । ईरिता । ईरिष्यते । ईर्ताम् । ईर्ध्वे । ईर्ध्वम् । ऐरिष्ट । १०१९ ईड स्तुतौ । ईट्टे । २४३६ ईशः से ७।२।७७॥ २४४० ईडजनोर्ध्वे च ७।२।७८॥ ईशीड्जनां

रोति–चयः इति । अथ ख्याआदेशाऽभावपक्षे आह–चचक्षे इति । चचक्षिषे । चचक्षिध्वे । चचक्षिवहे । ख्यास्यते इति । चक्षाम् । चक्षाताम् । चक्षत । चक्षव । चक्षायाम् । चड्ढ्वम् । चक्षै । चक्षावहै । चक्षामहै । लङ्याह—अचष्टेति । अचक्षाताम् । अचक्षत । अचक्षाः । अचक्षायाम् । अचड्ढ्वम् । अचक्षि । अचक्षवहि । अचक्षमहि । विधिलिङ्याह—चक्षीतेति । आशीर्लिङि कशादेशस्य शस्य यत्वपक्षे आह—ख्यायात–ख्येयादिति । 'वाऽन्यस्य' इत्येत्त्वविकल्पः । शस्य यत्वाऽभावपक्षे आह—कशायात–क्शेयादिति । लुङि च्लेः सिचि प्राप्ते—अस्यतिवक्ति । 'च्लेः सिच्' इत्यतः च्लेरित्य-नुवर्तते । तदाह—एभ्यश्च्लेरिति । अख्यत्–अख्यतेति । यत्वपक्षे रूपम् । आल्लोपः । ञि त्वादुभयपदित्वादात्मनेपदेऽपि रूपम् । कशादेशपक्षे परस्मैपदपक्षे तु आह–अकशासी-दिति । अङ्विधौ ख्यातीति यकारनिर्देशात् यत्वाभावपक्षे अङ् न भवति । किन्तु आ-दन्तत्वलक्षणौ सगिटौ । अकशासिष्टाम् इत्यादि । अकशास्तेति । आत्मनेपदे लुङि रूपम् । अकशासाताम् , इत्यादि । अख्यास्यत । अख्यास्यत । अकशास्यत् । अकशा-स्यत । वर्जने कशाम् नेष्ट इति । वार्तकमिदम् । समचक्षिष्टेति । अवर्जयदित्यर्थः । लुङि रूपम् ।

अथ पृच्यन्ता इति । 'पृची सम्पर्चने' इत्येतत्पर्यन्ता इत्यर्थः । ईर गताविति । सेट् । ईर्ते इति । ईराते । ईरते । ईर्षे । ईराथे । ईर्ध्वे । ईरे । ईवहे । ईर्महे । ईराञ्चक्रे इति । 'इजा-देश्च' इत्याम् । ईरतेति । ईरिष्यते, इत्यपि ज्ञेयम् । ईर्ताम्मिति । ईराताम् । ईरताम् । ईर्ध्वेति । ईराथाम् , इत्यपि ज्ञेयम् । ईर्ध्वमिति । ईर । ईरावहै । ईरामहै । ऐर्त । ऐरा-ताम् । ऐरत । ऐर्थाः । ऐराथाम् । ऐध्वम् । ऐरि । ऐर्वहि । ऐर्महि । ईरीत । ईरिषीष्ट । ऐरिष्ट । ऐरिष्यत । ईड स्तुतौ । ईट्टे इति । तकारस्य ष्टुत्वेन टः, डस्य चर्त्वेन ट इति भावः । ईडाते । ईडते । ईड् से इति स्थिते सार्वधातुकत्वादिडागमे अप्राप्ते–ईशः से । ईड-जनोर्ध्वे च । 'इडत्यर्ति' इत्यतः इडिति । 'रुदादिभ्यः' इत्यतः सार्वधातुक इति चानु-वर्तते । से ध्वे इति लुप्तषष्ठीके इत्यभिप्रेत्य सूत्रद्वयं युगपदुद्याचष्टे–ईशीड्जनामिति । ध्वे इत्यस्य पूर्वं आपकर्षः, से इत्यस्य उत्तरत्रानुवृत्तिरिति भावः । प्रत्येकं व्याख्याने तु ईशो ध्वेशब्दे परे न स्यात्, ईड्जनोः सेशब्दे परे न स्यादिति भावः । ननु तर्हि 'ईशीड्जनां

से-ध्वे-शब्दयोः सार्वधातुकयोरिट् स्यात्। योगविभागो वैचित्र्यार्थः। ईडिषे। ईडिध्वे। 'एकदेशविकृतस्यानन्यत्वात्' (प ३८) ईडिष्व। ईडिध्वम्। 'विकृतिग्रहणेन प्रकृतेरग्रहणात्' ऐड्ढ्वम्। १०२० ईश ऐश्वर्ये। ईष्टे। ईशिषे। ईशिध्वे। १०२१ आस उपवेशने। आस्ते। 'दयायासश्च' (सू २३२४)। आसाञ्चक्रे। आस्स्व। आध्वम्। आसिष्ट। १०२२ आङ्शासु इच्छायाम्। आशास्ते। आशासाते। आङ्पूर्वत्वं प्रायिकम्। तेन 'नमोवाकं प्रशास्महे' इति सिद्धम्। १०२३ वस आच्छादने। वस्ते। वस्से। वध्वे। ववसे। वसिता। १०२४ कसि गति-

---

सेध्वयोः इत्येकमेव सूत्रं कुतो न कृतमित्यत आह-योगविभागो वैचित्र्यार्थ इति। 'से' इत्यस्य उत्तरत्रानुवृत्तिः, 'ध्वे' इत्यस्य पूर्वत्रापकर्ष इति वैचित्र्यद्योतनार्थं इत्यर्थः। स्वतन्त्रेच्छस्य महर्षेर्नियन्तुमशक्यत्वादिति भावः। ईडिषे इति। ईड्हे। ईड्वहे। ईड्महे। लिटि तु ईडाञ्चक्रे इत्यादि। ईडिता। ईडिष्यते। ईट्टाम्। ननु ईडिध्वेत्यत्र कथमिट् सेशब्दाऽभावात्। तत्राह-एकदेशेति। एकदेशविकृतत्वात् स्वशब्दस्य इटि ईडिष्व इति रूपमित्यर्थः। ननु तर्हि ईड्ढ्वम् इत्यत्र कथं नेट्, ध्वेस्वरूपापेक्षया 'ध्वमित्यस्य एकदेशविकृतत्वादित्यत आह-विकृतीति। प्रकृतिग्रहणे तदेकदेशविकृतस्य ग्रहणम्। न तु विकृतिग्रहणे तदेकदेशविकृताया अपि प्रकृतेर्ग्रहणम्। 'पुरुषमानये'त्युक्ते हि अन्धोऽनन्धो वा पुरुष आनीयते। 'अन्धमानय' इत्यत्र तु अन्ध एवानीयते न त्वनन्धः। तथाच ध्वम इत्वे कृते ध्वेशब्दः, तेन च विकृतेन ध्वमित्यस्य तत्प्रकृतिभूतस्य न ग्रहणमिति नेडिति भावः। ईडे। ईडावहे। ईडामहे। ऐट्ट। ऐडाताम्। ऐडत। ऐट्ठाः। ऐडाथाम्। ऐड्ढ्वम्। ऐडि। ऐड्वहि। ऐड्महि। ईडीत। ईडिषीष्ट। ऐडिष्ट। ऐडिष्यत। ईशधातुरीडिवत्। ईष्टे इत्यादि। शस्य व्रश्चादिना षत्वे ष्टुत्वमिति। विशेषः। आस उपवेशने। आस्ते इति। आसाते। आसते। आस्से। आसाथे। 'धि च' इति सलोपः। आध्वे। आसे। आस्वहे। आस्महे। इजादित्वाद्यभावादाह—दयायासश्चेति। आसिता। आसिष्यते। आस्ताम्। आसाताम्। आस्स्वेति। सकारद्वयमत्र बोध्यम्। आसाथाम्। आध्वमिति। 'धि च' इति सलोपः। आसे। आसावहै। आसामहै। आस्त। आसाताम्। आसत। आस्थाः। आसाथाम्। आध्वम्। आसि। आस्वहि। आस्महि। आसीत। आसीयाताम्। आसिषीष्ट। आसिषीयास्ताम्। आसिष्टेति। आसिषातामित्यादि। आसिष्यत। आङः शासु इच्छायामिति। आङः परः शासधातुरिच्छायामित्यर्थः। नमोवाकमिति। वचेर्घञि वाकः। नमश्शब्दस्य वचनं कुर्महे इत्यर्थः। धातूनामनेकार्थत्वात् आसिवद्रूपाणि। वस आच्छादने इति। परिधाने इत्यर्थः। वध्वे इति। 'धि च' इति सलोपः। ववसे इति। वादित्वादेरभ्यासलोपौ नेति भावः। वसितेति। अनि सु शब्विकरणस्यैव वसेर्ग्रहणमिति भावः। वसिष्यते। वस्ताम्। अवस्त। वसीत। वसिषीष्ट। अवसिष्ट। अवसिष्यत। कसि

शासनयोः। कंस्ते। कंसाते। कंसते। अयमनिदित् इत्येके–कस्ते। तालव्यान्तोऽप्य-निदित्। कष्टे। कशाते। कक्षे। कड्ढ्वे। १०२५ णिसि चुम्बने। निंस्ते। दन्त्यान्तोऽयम्। आभरणकारस्तु तालव्यान्त इति बभ्राम। निंस्से। १०२६ णिजि शुद्धौ। निङ्क्ते। निङ्क्षे। निञ्जिता। १०२७ शिजि अव्यक्ते शब्दे। शिञ्जे। १०२८ पिजि वर्णे। सम्पर्चने इत्येके। उभयत्रेत्यन्ये। अवयवे इत्यपरे। अव्यक्ते शब्दे इतीतरे। पिञ्जे। पृजि इत्येके। पृञ्जे। १०२९ वृजी वर्जने। वृन्त्योष्ठ्यादिः। ईदित्। वृक्ते। वृजाते। वृज्रे। 'इदित्' इत्यन्ये। वृङ्क्ते। १०३० पृची सम्पर्चने। पृक्ते। १०३१ षूङ् प्राणिगर्भविमोचने। सूते। सुषुवे। सुषुविषे। सोता—सविता। 'भूसुवोः—' (सू २२२४) इति गुणनिषेधः। सुवै। सविषीष्ट। असविष्ट। असोष्ट। १०३२ शीङ् स्वप्ने। २४४१ शीङः सार्वधातुके

गतीति। वसभातुवत् इदिरवान्नुमिति विशेषः। तालव्यान्त इति। तालव्योष्मान्त इत्यर्थः। कष्टे इति। 'व्रश्चे'ति शस्य षः, ष्टुत्वम्। कक्षे इति। शस्य षः, षस्य 'षढोः' इति कः, षत्वम्। कड्ढ्वे इति। शस्य षः, तस्य जश्त्वेन डः, धस्य ष्टुत्वेन ढः। णिसि चुम्बने इति। णोपदेशोऽयम्। नुमि 'नश्च' इत्यनुस्वारः। निंस्ते इत्यादि। निंस्से इत्यादि। नुमोऽनुस्वारः थासः सेभावः। दन्त्यान्तोऽयमिति। दन्त्योष्मान्तोऽयमित्यर्थः। बभ्रामेति। 'नुम्विसर्जनीयशर्व्यवायेऽपि' इति सूत्रे वृत्त्यादौ दन्त्योष्मान्तत्वोक्तेरिति भावः। णिजि शुद्धाविति। णोपदेशोऽयम्। अनिट्सु इरित एव ग्रहणादयं सेट्। निङ्क्ते इति। नुमि निनज् ते इति स्थिते जस्य कुत्वेन गः, तस्य चर्त्वेन कः, नस्य अनुस्वारे परसवर्णो ङकारः। निञ्जाते। निङ्क्षे। निञ्जाथे। निङ्ध्वे। निञ्जे। निञ्ज्वहे। निञ्ज्महे। लिटि संयोगात्परत्वात् क्ित्त्वाऽभावान्नलोपो न। निनिञ्जे। निनिञ्जाते इत्यादि। निञ्जिता। निञ्जिष्यते। निङ्क्ताम्। अनिङ्क्त। निञ्जीत। निञ्जिषीष्ट। अनिञ्जिष्ट। अनिञ्जिष्यत। शिजिपिजी अव्येवम्। पृजि इत्येके इति। ऋदुपधोऽयम्। वृजीधातुः ऋदुपधः ईदित्, अतो नुम् नेति भावः। पृची सम्पर्चने इति। ऋदुपधोऽयम्। पपृचे इत्यादि। ईरादयः पृच्यन्ता अनुदात्तेतो गताः। षूङ्धातुः षोपदेशः, वेट्, ङित्त्वात्तङ्। सूते इति। सुवाते। सुवते। सूषे। सुवाथे। सूढ्वे। सुवे। सूवहे। सूमहे। सुषुविषे इति। 'स्वरतीति' इड्विकल्पं बाधित्वा 'अयुकः क्ङिति' इति निषेधे प्राप्ते, क्रादिनियमाङ्ङित्यमिट्। 'स्वरति सूति' इति इड्विकल्पं मत्वा आह—सोता सवितेति। तिङस्तासा व्यवधानात् 'भूसुवोः' इति न गुणनिषेध इति भावः। सोष्यते। सविष्यते। सूताम्। सुवाताम्। सुवताम्। सूष्व। सूढ्वम्। आटः पित्त्वाद्गुणे प्राप्ते आह—भूसुवोरिति। सुवै इति। सुवावहै। सुवामहै। असूत। सुवीत। सविषीष्ट। सोषीष्ट इत्यादि स्पष्टम्। शीङ् स्वप्ने। सेट्। ङित्त्वात्तङ्। शीङः सार्वधा-

गुणः ७।४।२१॥ 'क्ङिति च' (सू २२१७) इत्यस्यापवादः । शेते । शयाते । २४४२ शीङो रुट् ७।१।६॥ शीङः परस्य झादेशस्यातो रुडागमः स्यात् । शेरते । शेषे । शेध्वे । शये । शेवहे । शिश्ये । शयिता । अशयिष्ट ।

अथ स्तौत्यन्ताः परस्मैपदिनः ऊर्णुस्तूभयपदी । १०३३ यु मिश्रणे अमिश्रणे च । २४४३ उतो वृद्धिर्लुकि हलि ७।३।८९॥ लुग्विषये उकारस्य वृद्धिः स्यात्पिति हलादौ सार्वधातुके न त्वभ्यस्तस्य । यौति । युतः । युवन्ति । युयाव । यविता । युयात् । इह 'उतो वृद्धिः—' न, भाष्ये 'पिच्च ङिच्च पिच्च' इति व्याख्यानात् । विशेषविहितेन ङित्त्वेन पित्त्वस्य बाधात् । यूयात् । अयावीत् ।

तुके । स्पष्टम् । 'सार्वधातुकार्द्धधातुकयोः' इत्येव सिद्धे किमर्थमिदमित्यत आह— क्ङिति चेत्यस्यापवाद इति । झस्य अदादेशे सति शे अते इति स्थिते—शीङो रुट् । 'झोऽन्तः' इत्यतो झ इत्यनुवर्तते । 'अदभ्यस्तात्' इत्यतः अदित्यनुवृत्तं षष्ठ्या विपरिणम्यते । तदाह—शीङः परस्य झादेशस्येति । रुटि उकार उच्चारणार्थः । टित्त्वादाद्यवयवः । शेध्वे इति । 'षोढ्ढलुङ्लिटाम्' इत्युक्तेन ढः । शिश्ये इति । शिश्यिषे । शिश्यिढ्वे-शिश्यिध्वे । शयितेति । शयिष्यते । शेताम् । शयाताम् । शेरताम् । शेष्व । शयाथाम् । शेध्वम् । शये । शयावहै । शयामहै । अशेत । अशयाताम् । अशेरत । अशेथाः । अशयाथाम् । अशेढ्वम् । अशयि । अशेवहि । अशेमहि । शयीत । शयिषीष्ट । अशयिष्टेति । अशयिष्यत इत्यपि ज्ञेयम् ।

स्तौत्यन्ता इति । 'ष्टुञ् स्तुतौ' वित्यतः प्राक्तना इत्यर्थः । ऊर्णुस्तूभयपदीति । त्रिस्वादिति भावः । यु मिश्रणे अमिश्रणे चेति । अमिश्रणं पृथग्भावः । सेडयम् । उतो वृद्धिर्लुकि हलि । 'नाभ्यस्तस्याचि पिति सार्वधातुके' इति अचिवर्जमनुवर्तते । लुकीति विषयसप्तमी, दर्शनाऽभावस्य लुप्तः परत्वासम्भवात् । तदाह—लुग्विषय इत्यादिना । यौतीति । गुणं बाधित्वा वृद्धिः । युत इति । अपित्त्वान्न वृद्धिः । युवन्तीति । अपित्त्वाद्वृद्ध्यभावे ङित्त्वाद्गुणाऽभावे उवङिति भावः । यौषि । युथः । युथ । यौमि । युवः । युमः । युयावेति । युयुवतुः । युयुवुः । युयविथ । युयुवथुः । युयुव । युयाव । युयव । युयुविव । युयुविम । यावितेति । उवङ् बाधित्वा परत्वाद्गुणः । यविष्यति । यौतु-युतात् । युताम् । युवन्तु । हौ अपित्त्वान्न वृद्धिः । युहि-युतात् । युतम् । युत । आटि पित्त्वेऽपि हलादित्त्वाऽभावान्न वृद्धिः । पित्त्वेन ङित्त्वाऽभावाद्गुणः । यवानि । यवाव । यवाम । अयौत् । अयुताम् । अयुवन् । अयौः । अयुतम् । अयुत । अयवम् । अयुव । अयुम । विधिलिङ्याह—युयादिति । अत्र यासुडागमसहितस्य तिपः पित्त्वादुतो वृद्धिमाशङ्क्याह—इह उतो वृद्धिर्नेति । कुत इत्यत आह—भाष्ये इति । व्याख्यानादिति । 'हलः श्नः शानज्झौ' इति सूत्रव्याख्यावसरे वचनादित्यर्थः । ननु यासुडागमसहितस्य तिपः पित्त्वात् 'पिच्च ङिच्च' इत्युक्तवचनेन 'यासुट् परस्मैपदेषु' इति ङि-

१०३४ रु शब्दे। २४४४ तुरुस्तुशम्यमः सार्वधातुके ७।३।९५॥ एभ्यः।र-स्य सार्वधातुकस्य हलादेस्तिङ ईड्वा स्यात्। 'नाभ्यस्तस्य—' (सू २५०३) इत्यतोऽनुवृत्तिसम्भवे पुनः सार्वधातुकग्रहणमपिदर्थम्। रवीति–रौति। रुवीतः–रुतः। हलादेः किम्। रुवन्ति। तिङः किम्। शाम्यति। सार्वधातुके किम्। आशिषि रूयात्। विष्यादौ तु रुयात्–रुवीयात्। अरावीत्। अरविष्यत्। 'तु' इति सौत्रो धातुर्गतिवृद्धिहिंसासु। अयं च लुग्विकरण इति स्मरन्ति। तवीति–तौति। तुवीतः—तुतः। तोता। तोष्यति। १०३५ ष्णु स्तुतौ। नौति। नविता। १०३६ ष्टुञ् शब्दे। स्तौति। स्तविता। १०३७ ष्णञ् तेजने। ष्णौति।

त्त्वस्याऽप्यभावात् 'क्ङिति च' इति गुणनिषेधाभावात् गुणः स्यादित्यत आह— विशेषविहितेनेत्यादि, बाधादित्यन्तम्। 'यासुट् परस्मैपदेषु' इति विशेषविहितेन यासुटो ङित्त्वेन तत्सहितस्य तिपो 'ङिच्च पित्र' इति पित्त्वप्रयुक्तङित्त्वनिषेधस्य बाधात् ङित्त्वाद्गुणनिषेधो निर्बाध इत्यर्थः। आशीर्लिङ्याह—यूयादिति। आर्धधातुकत्वाच्च वृद्धिः। 'अकृत्सार्वधातुकयोः' इति दीर्घः। यूयास्ताम् इत्यादि। लुङ्याह—अयावी-दिति। सिचि वृद्धिः। 'इट ईटि' इति सिज्लोपः। अयाविष्टाम् इत्यादि। अयविष्यत्। तुरुस्त। तु रु स्तु शमि अम् एषां समाहारद्वन्द्वात् पञ्चम्येकवचनम्। 'उतो वृद्धिः' इत्यतो हलीति 'भूसुवोः' इत्यतस्तिङीति 'ध्रुव ईट्' इत्यतः ईडिति 'यङो वा' इत्यतः वा इति चानुवर्तते। तदाह–एभ्य इत्यादिना। नाभ्यस्तस्येति। 'नाभ्यस्तस्याचि पिति सार्वधातुके' इत्यतः सार्वधातुके इत्यनुवृत्तिसम्भवे पुनः सार्वधातुकग्रहणं पिति इत्य-स्यानुवृत्तिर्मा भूदित्येतदर्थमित्यर्थः। रवीतीति। ईट्पक्षे हलादित्वाऽभावात् उतो वृद्धि-र्नेति भावः। रौतीति। ईडभावे 'उतो वृद्धिः' इति भावः। रुवीतः रुतः इति। अपिरयेऽपि ईड्विकल्प इति भावः। रुवन्तीति। अन्तादेशे कृते हलादित्वाऽभावादीडभावे उवङिति भावः। शाम्यतीति। श्यनस्तिङ्त्वाऽभावादीट नेति भावः। आशिषि रूयादिति। आर्धधातुकत्वादीडभावे 'अकृत्सार्वधातुकयोः' इति दीर्घः। विष्यादौ त्विति। आदिना निमन्त्रणादिसङ्ग्रहः। रुयात् रुवीयादिति। हलादिसार्वधातुकत्वात् ईड्विकल्प इति भावः। ईडभावपक्षे हलादौ पिति सार्वधातुके 'उतो वृद्धिः' इति बोध्यम्। ननु धातुपाठे तु धातोरदर्शनात् धातुत्वाऽभावात्कथं ततः सार्वधातुकस्य ईड्विधिरित्यत आह—तु इति सौत्रो धातुरिति। गतिवृद्धिहिंसारिति। अत्र व्याख्यानमेव शरणम्। ननु शपा व्यवधानादस्य सार्वधातुकपरत्वं कथमित्यत आह—अयं च लुग्विकरण इति स्मरन्तीति। अव्यवहिततिङः ईड्विधानमेवात्र बीजम्। शाम्यमोस्तु, 'शमीध्वम्, अभ्यमीति' इति वेदे शपो लुकि बोध्यम्। अयमनिट्। हलादौ सार्वधातुके रुधातुवत्। आर्धधातुके तु नेट्। तदाह—तोतीति। ष्णु स्तुताविति। णोपदेशोऽयं सेट्। युधातुवद्रूपाणि। क्षुध्णुस्नुधातवः सेटः। युधातुवद्रूपाणि। चुक्षाव। चुक्ष्णाव। सु-

द्णविता। १०३८ ष्णु प्रस्रवणे। स्नौति। सुष्णाव। स्नविता। स्नूयात्। १०३९ ऊर्णुञ् आच्छादने। २४४५ ऊर्णोतेर्विभाषा ७।३।९०॥ वा वृद्धिः स्यादलादौ पिति सार्वधातुके। ऊर्णौति-ऊर्णोति। ऊर्णुतः। ऊर्णुवन्ति। ऊर्णुते। ऊर्णुवाते। ऊर्णुवते। 'ऊर्णोतेराम्नेति वाच्यम्' (वा १८०२) २४४६ न न्द्राः संयोगादयः ६।१।३॥ अचः पराः संयोगादयो नदराः द्विर्न भवन्ति। नुशब्दस्य द्वित्वम्, णत्वस्यासिद्धत्वात्। 'पूर्वत्रासिद्धीयमद्विर्वचने' (प १२७) इति त्वनित्यम् 'उभौ साभ्यासस्य' (सू २६०६) इति सिद्धात्। ऊर्णुनाव। ऊर्णुनुवतुः। ऊर्णुनुवुः। २४४७ विभाषोर्णोः १।२।३॥ इडादिप्रत्ययो वा ङित्स्यात्। ऊर्णुनुविथ। ऊर्णुनविथ। ऊर्णुविता। ऊर्णोता। ऊर्णोतु। ऊर्णवानि।

ष्णाव इति। षोपदेशोऽयमिति भावः। ऊर्णुञ्धातुरुभयपदी। सेट्। उतो वृद्धेर्नित्य प्राप्तौ—ऊर्णोतेर्विभाषा। 'उतो वृद्धिः' इत्यतो वृद्धिरिति हलीति चानुवर्तते। 'नाभ्यस्तस्य' इत्यतः पिति सार्वधातुके इति च, इत्यभिप्रत्य शेषपूरणेन सूत्रं व्याचष्टे—वृद्धिः स्यादित्यादिना। लिटि 'इजादेः' इति 'कास्यनेकाच्' इति च आमि प्राप्ते आह—ऊर्णोतेराम् नेति। ऊर्णोतेर्नुवद्भावस्य वक्ष्यमाणतया इजादित्वस्य अनेकाच्त्वस्य चाभावादिति भावः। णलि ऊर्णु अ इति स्थिते 'अजादेर्द्वितीयस्य' इति नु इति रेफसहितस्य द्वित्वे हलादिशेषे नकारस्य निवृत्तौ ऊरुनावेति प्राप्ते—नन्द्राः संयोगादयः। 'एकाचो द्वे प्रथमस्य' इत्यतो द्वे इत्यनुवर्तते। 'अजादेर्द्वितीयस्य' इत्यतः अजादेरिति। अचश्चासौ आदिश्चेति कर्मधारयात्पञ्चमी। न्, द्, र् एषां द्वन्द्वः। तदाह—अचः परा इति। ननु 'णु' इत्यस्य द्वित्वे खण्डद्वयेऽपि णकारः श्रूयेतेत्यत आह—नुशब्दस्य द्वित्वमिति। णत्वस्येति। धातुपाठे 'ऊर्णु' इति नकारस्य कृतणत्वस्य निर्देशः द्वित्वे कर्तव्ये तस्य णत्वस्याऽसिद्धत्वादित्यर्थः। लिङ्गादिति। 'उभौ साभ्यासस्य' इत्यस्यायमर्थः—साभ्यासस्याऽनितेरुपसर्गस्थान्निमित्तात्परौ खण्डद्वयगतौ नकारौ णत्वं प्राप्नुत इति। प्राणिणत् इत्युदाहरणम्। अत्र 'अनितेः' इति णत्वे कृते 'पूर्वत्रासिद्धीयमद्विर्वचने' इति णत्वस्याऽसिद्धत्वाऽभावमाश्रित्य णि इत्यस्य द्वित्वादेव खण्डद्वये णकारश्रवणसिद्धेः 'उभौ साभ्यासस्य' इति वचनं 'पूर्वत्रासिद्धीयमद्विर्वचने' इत्यस्यानित्यतां गमयतीत्यर्थः। ऊर्णुनावेति। नुशब्दस्य द्वित्वे पूर्वनकारस्य 'रषाभ्याम्' इति णत्वम्। द्वितीयस्य तु 'अट्कुप्वाङ्' इति न णत्वम्। 'उभौ साभ्यासस्य' इति लिङ्गादेव। विभाषोर्णोः। 'गाङ्कुटादिभ्यः' इत्यतो ङिदित्यनुवर्तते, 'विज इट्' इत्यतः इडिति, इत्यभिप्रेत्य शेषपूरणेन सूत्रं व्याचष्टे—इडादीति। ऊर्णुनुविथेति। ङित्त्वपक्षे गुणाऽभावादुवङ्। ऊर्णुनविथेति। ङित्त्वाऽभावपक्षे गुणः। ऊर्णुनुवथुः। ऊर्णुनुव। ऊर्णुनाव। ऊर्णुनव। लुटि तासि इटि ङित्त्वविकल्पं मत्वा आह—ऊर्णविता ऊर्णुवितेति। ऊर्णो-

ऊर्णवै। २४४८ गुणोऽपृक्ते ७।३।९१॥ ऊर्णोतेर्गुणः स्यादपृक्ते हलादौ पिति सार्वधातुके। वृद्ध्यपवादः। और्णोत्। और्णोः। ऊर्णुयात्। ऊर्णुयाः। इह वृद्धिर्न। 'ञ्नित्यादिर्नित्यम्' इति भाष्यात्। ऊर्णुयात्। ऊर्णविषीष्ट-ऊर्णुविषीष्ट। और्णुवीत्। और्णुविष्टाम्। २४४९ ऊर्णोतेर्विभाषा।७।२।६॥ इडादौ सिचि परस्मैपदे परे वा वृद्धिः स्यात्। पक्षे गुणः। और्णावीत्। और्णाविष्टाम्। और्णाविषुः। और्णावीत्। १०४० ष्णु अभिगमने। द्यौति। द्योता। १०४१ षु प्रसवैश्वर्ययोः। प्रसवोऽभ्यनुज्ञानम्। सोता। असौषीत्। १०४२ कु शब्दे। कोता। १०४३ ष्टुञ् स्तुतौ। स्तौति-स्तवीति। स्तुतः-स्तुवीतः। स्तुते-स्तुवीते। 'स्तुसुधूञ्भ्यः-'

विष्यति। ऊर्णुविष्यति। ऊर्णविष्यते। ऊर्णुविष्यते। लङि और्णुं त् इति स्थिते 'ऊर्णोतेर्विभाषा' इति वृद्धिविकल्पे गुणे च प्राप्ते—गुणोऽपृक्ते। 'ऊर्णोतेर्विभाषा' इत्यतः ऊर्णोतेरिति 'नाभ्यस्तस्य' इत्यतः पिति सार्वधातुके इति 'उतो वृद्धिः' इत्यतो हलीति चानुवर्तते। तदाह—ऊर्णोतेरित्यादि। वृद्ध्यपवाद इति। 'ऊर्णोतेर्विभाषा' इति वृद्धिविकल्पस्यापवाद इत्यर्थः। ऊर्णुयात् इत्यत्र 'विभाषोर्णोः' इति वृद्धिविकल्पमाशङ्क्याह—इह वृद्धिर्नेति। भाष्यादिति। तथा च यासुटो ङित्त्वेन पित्त्वाऽभावान्न वृद्धिविकल्प इति भावः। नचैवं सति गुणनिषेधोऽपि न स्यादिति शङ्क्यम्, विशेषविहितेन यासुटो ङित्त्वेन 'ङिच्च पिन्नेति पित्त्वप्रयुक्तङित्त्वनिषेधस्य बाध इति 'युमिश्रणे' इति धातावेवोक्तत्वादिति भावः। परस्मैपदे आशीर्लिङ्याह—ऊर्णुयादिति। 'अकृत्सार्वधातुकयो'रिति दीर्घः। ऊर्णुयास्तामित्यादि। आत्मनेपदे लिङ्याह—ऊर्णविषीष्ट-ऊर्णुविषीष्टेति। 'विभाषोर्णो.' इति ङित्त्वविकल्प इति भावः। लुङि परस्मैपदे और्णं ई त् इति स्थिते 'विभाषोर्णोः' इति ङित्त्वपक्षे गुणाऽभावे उत्वे रूपमाह—और्णुवीदिति। ङित्त्वाऽभावपक्षे गुणे नित्यं प्राप्ते—ऊर्णोतेर्विभाषा। 'सिचि वृद्धिः परस्मैपदेषु' इत्यनुवर्तते, 'नेटि' इत्यतः इटीति च। तदाह—इडादावित्यादि। आत्मनेपदे तु लुङि-और्णविष्ट। और्णुविष्ट। और्णविष्यत्। और्णुविष्यत्। और्णविष्यत-और्णुविष्यत। द्यु अभिगमने इति। अनिट्। द्यौतीति। उतो वृद्धिः। सार्वधातुके लिटि च युधातुवत्। द्योतिता। द्योष्यति। असौषीत्। षु प्रसवैति। षोपदेशोऽयम्। अनिट्। सौतीत्यादि युधातुवत्। एवं कु शब्दे इत्यपि। ष्टुञ् स्तुताविति। उभयपदी अनिट्। 'तुरुस्तुशम्यमः' इति ईड्विकल्पम्, ईडभावपक्षे तु उतो वृद्धिं च मत्वा आह—स्तौति स्तवीतीति। स्तुवन्ति। स्तौषि-स्तवीषि। स्तुथः-स्तुवीथः। स्तुथ-स्तुवीथ। स्तौमि-स्तवीमि। स्तुवः-स्तुवीवः। स्तुमः-स्तुवीमः। आत्मनेपदे लटि ईड्विकल्पं मत्वा आह—स्तुते स्तुवीते इति। स्तुवाते। स्तुवते। स्तुषे-स्तुवीषे। स्तुवाथे। स्तुध्वे-स्तुवीध्वे। स्तुवे। स्तुवहे-स्तुवीवहे। स्तुमहे-स्तुवीमहे। लिटि-तुष्टाव। तुष्टुवतुः। तुष्टुवुः। ङित्त्वात्थल्यपि नेट् भवति। तुष्टोथ। तुष्टुवथुः। तुष्टुव। तुष्टाव-तुष्टव। तुष्टुव।

(सू २३८५) इतोट्। अस्तावीत्। 'प्राक्सितात्-' (सू २२७६) इति षत्वम्। अभ्यष्टौत्। 'सिवादीनां वा—' (सू २३५९)। पर्यष्टौत्—पर्यस्तौत्। १०४४ ब्रूञ् व्यक्तायां वाचि। २४५० ब्रुवः पञ्चानामादित आहो ब्रुवः। ३।४।८४॥ ब्रुवो लटः परस्मैपदानामादितः पञ्चानां णलादयः पञ्च वा स्युर्ब्रुवश्चाहादेशः। अकार उच्चारणार्थः। आह। आहतुः। आहुः। २४५१ आहिथ ८।२।३५॥ झलि परे। चर्त्वम्। आत्थ। आहथुः। २४५२ ब्रुव ईट् ८।३।९३॥ ब्रुवः परस्य हलादेः पित ईट् स्यात्। आत्थ इत्यत्र स्थानिवद्भावात्प्राप्तोऽयं 'झलि'

तुष्टुम। तुष्टुवे इत्यादि। स्तोता। स्तोष्यति। स्तोष्यते। स्तौतु-स्तुवीतु। स्तुतात्-स्तुवीतात्। स्तुताम्-स्तुवीताम्, स्तुवन्तु। स्तुहि-स्तुवीहि। स्तुतात्-स्तुवीतात्। स्तुतम्-स्तुवीतम्। स्तुत-स्तुवीत। स्तवानि। स्तवाव। स्तवाम। स्तुताम्-स्तुवीताम्। स्तुवाताम्। स्तुवताम्। स्तुष्व-स्तुवीष्व। स्तुवाथाम्। स्तुध्वम्-स्तुवीध्वम्। स्तवै। स्तवावहै। स्तवामहै। लङि अस्तौत्-अस्तवीत्। अस्तुताम्-अस्तुवीताम्। अस्तुवन्। अस्तौः-अस्तवीः। अस्तुतम्-अस्तुवीतम्। अस्तुत-अस्तुवीत। अस्तुवम्। अस्तुव-अस्तुवीव। अस्तुम-अस्तुवीम। अस्तुत-अस्तुवीत। अस्तुवाताम् इत्यादि। विधिलिङि स्तुयात्-स्तुवीयात् इत्यादि। आत्मनेपदे स्तोषीष्टेत्यादि। लुङि सिचि इडभावे प्राप्ते आह-स्तुसुधूञ्भ्य इति। तथाच 'इट ईटि' इति सिज्लोप सिचि वृद्धौ अस्तावीदिति फलति। अस्ताविष्टामित्यादि। 'स्तुसुधूञ्भ्यः' इत्यत्र परस्मैपदेष्वित्यनुवृत्तेरात्मनेपदे इट् न। अस्तोष्ट। अस्तोषाताम् इत्यादि। ब्रूञ् व्यक्तायां वाचीति। ब्रुवः पञ्चानाम्। 'परस्मैपदानां णलतुस्' इत्यतः उत्तरसूत्रमिदम्। 'विदो लटो वा' इत्यतः लटो वेत्यनुवर्तते। तदाह—ब्रुवो लट इति। आदितः पञ्चानामिति। तिप् तस् झि सिप् थस् इत्येषामित्यर्थः। णलादयः पञ्चेति। णल् अतुस् उस् थल् अथुस् इत्येते पञ्चेत्यर्थः। उच्चारणार्थ इति। तत्प्रयोजनमात्मेत्यत्रानुपदमेव व्यक्तं भविष्यति। आहेति। ब्रुवातोर्लटस्तिपो णलि प्रकृतेराहादेशः। सिपस्थलि प्रकृतेराहादेशे आह् थ इति स्थिते हस्य ढत्वे प्राप्ते—आहस्थः। 'आह' इति षष्ठ्यन्तम्। 'झलो झलि' इत्यतो झलीत्यनुवर्तते इत्यभिप्रेत्य शेषपूरणेन सूत्रं व्याचष्टे—झलि परे इति। आह् इत्यस्य थकारः स्यात् झलीति फलितम्। 'अलोऽन्त्यस्येत्यन्त्यस्य भवति। चर्त्वमिति। आथ् थ इति स्थिते प्रथमथकारस्य 'खरि चे'ति चर्त्वे आत्थ इति रूपमित्यर्थः। आहादेशस्य अकारान्तत्वे तु हकारादकारस्य थकारादेशे हस्य ढत्वे चर्त्वं आट्त्थ इति स्यादिति बोध्यम्। पञ्चानां णलाद्यभावपक्षे आह-ब्रुव ईट्। 'नाभ्यस्तस्य' इत्यतः पितीति 'उतो वृद्धिः' इत्यतो हलीति चानुवर्तते। तदाह—ब्रुवः परस्येत्यादिना। ननु आत्थेत्यत्र आहादेशस्य स्थानिवत्त्वेन ब्रूत्वात्ततः परस्य थस्य ईडागमः स्यादित्यत आह—आथेत्यत्रेति। स्थानिवद्भावात् प्राप्तोऽयमीडागमः

इति थत्वविधानान्न भवति । ब्रवीति । ब्रूतः । ब्रुवन्ति । ब्रूते । आर्धधातुकाधिकारे **२४५३ ब्रुवो वचिः २।४।५३॥** उवाच । ऊचतुः । ऊचुः । उवचिथ-उवक्थ । ऊचे । वक्ता । ब्रवीतु-ब्रूतात् । 'ङिच्च सिच्च' इत्यपित्त्वादीयन । ब्रवाणि । ब्रवै । ब्रूयात् । उच्यात् । 'अस्यतिवक्ति—' (सू २४३८) इत्यङ् । **२४५४ वच उम् ७।४।२०॥** अङि परे । अवोचत् । अवोचत ।

अथ शास्यन्ताः परस्मैपदिनः । इङ् त्वात्मनेपदी । १०४५ इण् गतौ । एति ।

न भवतीत्यन्वयः । कुत इत्यत आह—झलि इति । थत्वविधानादिति । 'आहस्थः' इति झलि परतः आहादेशस्य थत्वं विधीयते । ईटि तु सति झलादित्वाऽभावात्तन्निषेधः स्यात् । अतः आर्धधातुकत्वेन ईट् नेति विज्ञायत इत्यर्थः । ब्रुवन्तीति । ब्रवीषि । ब्रूथः । ब्रूथ । ब्रवीमि । ब्रूवः । ब्रूमः । लट आत्मनेपदे आह—ब्रूते इति । 'ब्रुवः पञ्चानाम्' इत्यत्र परस्मैपदानामित्यनुवृत्तेराहादेशो न । ब्रुवाते । ब्रुवते । ब्रूषे । ब्रुवाथे । ब्रूध्वे ब्रूवे । ब्रुवहे । ब्रूमहे ।

ब्रुवो वचिः । ब्रुवो वचिरादेशः स्यादार्धधातुके इत्यर्थः । इकार उच्चारणार्थः । उवाचेति । अकिति द्वित्वे कृते 'लिटयभ्यासस्य' इति सम्प्रसारणमिति भावः । ऊचतुरिति । किति द्वित्वात्प्राक् 'वचिस्वपियजादीनाम्' इति सम्प्रसारणे द्वित्वे कृते हलादिशेषे सवर्णपरत्वात् 'अभ्यासस्यासवर्णे' इत्युवङभावे सवर्णदीर्घ इति भावः । वचिरनिट्सु परिगणितः । तस्य भारद्वाजनियमात्थलि वेट् । तदाह—उवचिथ उवक्थेति । इडभावे 'चोः कुः' । 'ब्रुव ईट्' इत्यत्र 'नाभ्यस्तस्य' इत्यतः सार्वधातुकग्रहणस्याप्यनुवृत्तेरीड् न । ऊचथुः । ऊच । उवाच—उवच । ऊचिव । ऊचिम । क्रादिनियमादिट् । ऊचे इति । ऊचाते । ऊचिरे । ऊचिषे । ऊचाथे । ऊचिध्वे । ऊचे । ऊचिवहे । ऊचिमहे । वक्तेति । वक्ष्यादेशे हल्ङिनिषेधः । वक्ष्यति-वक्ष्यते । ब्रवीतु ब्रूतादिति । ननु तिबादेशस्य तातङः पित्त्वात् 'ब्रुव ईट्' इति ईडागमः स्यादित्यत आह—ङिच्चेति । ब्रूताम् । ब्रुवन्तु । ब्रूहि-ब्रूतात् । ब्रूतम् । ब्रूत । ब्रवाणीति । आट्य पित्त्वेन ङित्त्वाऽभावात् न गुणनिषेध इति भावः । अब्रवीत् । अब्रूताम् । अब्रुवन् । अब्रवीः । अब्रूतम् । अब्रूत । अब्रवम् । अब्रूव । अब्रूम । विधिलिङ्याह—ब्रूयादिति । ब्रूयाताम् इत्यादि । आशीर्लिङ्याह—उच्यादिति । वक्ष्यादेशे 'वचिस्वपि' इति सम्प्रसारणमिति भावः । उच्यास्ताम् इत्यादि । आत्मनेपदे आशीर्लिङि-वक्षीष्ट । वक्षीयास्ताम् इत्यादि । अकित्त्वान्न सम्प्रसारणम् । लुङि सिचि वक्ष्यादेशे अवच् स् त इति स्थिते आह—अस्यतीति । अवच् अ त् इति स्थिते—वच उम् । शेषपूरणेन सूत्रं व्याचष्टे—अङि परे इति । 'ऋदृशोऽङि' इत्यतस्तदनुवृत्तेरिति भावः । मित्त्वादन्त्यादचः

इतः। २४५५ इणो यण् ६।४।८१॥ अजादौ प्रत्यये परे। इयङोऽपवादः। यन्ति। इयाय। २४५६ दीर्घ इणः किति ७।४।६९॥ इणोऽभ्यासस्य दीर्घः स्यात्किति लिटि। ईयतुः। ईयुः। इयथिथ-इयेथ। ऐत्। ऐताम्। आयन्। इयात्। ईयात्। २४५७ एतेर्लिङि ७।४।२४॥ उपसर्गात्परस्य इणोऽणो ह्रस्वः स्यात् किति लिङि। निरियात्। 'उभयत आश्रयणे नान्तादिवत्'। अभीयात्। अणः

परः। आदृगुणः। तदाह—अवोचदिति। अवक्ष्यत्। अवक्ष्यत। इङ् इति। 'इङ् अध्ययने' इति धातुस्तु ङित्त्वादात्मनेपदीत्यर्थः। इण् गताविति। 'इणो यण्' इत्यादौ विशेषणार्थो णकारः। एतीति। शपो लुकि तिपः पित्त्वेन ङित्त्वाभावादृगुणः। इत इति। अपित्त्वेन ङित्त्वान्न गुणः। इ अन्तीत्यत्र ङित्त्वादृगुणाऽभावे इयङि प्राप्ते—इणो यण्। 'अचि श्नुधातु' इत्यतः अचीत्यनुवृत्तस्य अङ्गाधिकारलब्धाङ्गाक्षिप्तप्रत्ययविशेषणत्वात्तदाद्यधिकारित्यभिप्रेत्य शेषपूरणेन सूत्रं व्याचष्टे—अजादौ प्रत्यये परे इति। इयङोऽपवाद इति। इयङि प्राप्ते एव तदारम्भादिति भावः। गुणवृद्धी तु परत्वादस्य बाधिके। यथा-अयनम्, आयकः। यन्तीति। एषि। इथः। इथ। एमि। इवः। इमः। इयायेति। द्वित्वे सति उत्तरखण्डवृद्धौ आयादेशे 'अभ्यासस्यासवर्णे' इति इयङ्। अतुसि तु द्वित्वे कित्त्वादृगुणाभावे इ इ अतुस् इति स्थिते 'इणो यण्' इत्युत्तरखण्डस्य यणि इयतुरिति स्थिते—दीर्घ इणः। 'अत्र लोपः' इत्यतः अभ्यासस्येति, 'व्यथो लिटि' इत्यतो लिटीति चानुवर्तते। तदाह—इणोऽभ्यासस्येति। ईयतुरिति। भारद्वाजनियमात्थलि वेडिति मत्वा आह—इयथिथ इयेथेति। ईयथुः। ईय। इयाय-इयय। ईयिव। ईयिम। एता। एष्यति। एतु—इतात्। इताम्। यन्तु। इहि—इतात्। इतम्। इत। अयानि। अयाव। अयाम। ऐदिति। लङि तिप इकारलोपे इकारस्य गुणे आटो वृद्धिः। आयन्निति। झेरन्तादेशे इकारलोपे इ-अन् इति स्थिते 'इणो यण्' इति यणि कृते तस्याभीयत्वेनासिद्धत्वादाडिति भावः। ऐः। ऐतम्। ऐत। आयम्। ऐव। ऐम। विधिलिङ्याह—इयादिति। इयाताम्। इयुरित्यादि। आशीर्लिङ्याह—ईयादिति। 'अकृत्सार्वधातुकयोः' इति दीर्घ इति भावः। ईयास्तामित्यादि। एतेर्लिङि। 'उपसर्गादध्वस्व ऊहते' इत्यतः 'उपसर्गादध्वस्व' इति, 'ष्ठेऽणः' इत्यतः अण इति, 'अयङ् यि क्ङिति' इत्यतः कितीति चानुवर्तते। तदाह—उपसर्गात्परस्येत्यादि। इह आर्द्धधातुके इति प्रामादिकम्। पूर्वसूत्रेषु तदभावादनुवृत्तेरसम्भवात्, किति लिङीत्येव सिद्धेश्च। ङितीति तु नानुवर्तते। इण आर्द्धधातुकलिङो ङित्त्वाऽभावात्। अन्वभीयादित्यत्रापि ह्रस्वः स्यादित्यत आह—उभयत इति। अत्र एकादेशस्य ईकारस्य पूर्वान्तत्वे उपसर्गानुप्रवेशादिणधातुत्व न सम्भवति। परादित्वेन इण्धातुत्वाश्रयणे तु नोपसर्गात्परत्वम्, उपसर्गैकदेशस्य इकारस्य ईकारात्मना सत्वेन 'अभ्' इत्यस्य उपसर्गत्वाऽभावात्। एकादेशस्य आदिवत्त्वमाश्रित्य इण्धातु-

किम्। समेयात्। 'समीयात्' इति प्रयोगस्तु भौवादिकस्य। २४५८ इणो गा लुङि २।४।४५॥ 'गातिस्था—' (सू २२२३) इति सिचो लुक्। अगात्। अगाताम्। अगुः। १०४६ इङ् अध्ययने। नित्यमधिपूर्वः। अधीते। अधीयाते। अधीयते। २४५९ गाङ् लिटि २।४।४९॥ इङो गाङ् स्याल्लिटि। लावस्थायां विवक्षिते वा। अधिजगे। अधिजगाते। अधिजगिरे। अध्येता। अध्येष्यते। अध्यय्यै। गुणायादेशयोः कृतयोरुपसर्गस्य यण्। 'पूर्वं धातुरुपसर्गेण-' इति दर्शन-

---

त्वम्, अन्तवत्त्वमाश्रित्य तस्य उपसर्गानुप्रवेशश्चेत्यपि न सम्भवति। पूर्वपरशब्दाभ्यां च विरोधस्य पुरस्फूर्तिकतया विरुद्धातिदेशद्वयस्य युगपदसम्भवादित्यर्थः। इदं च अन्तादिवत्सूत्रे भाष्ये स्पष्टम्। न च 'ऋभ्' इति भान्तस्य एकदेशविकृतन्यायेन उपसर्गत्वात् ईकारस्य परादिवत्त्वे ह्रस्वो दुर्वार इति वाच्यम्, लक्ष्यानुसारेण क्वचित् एकदेशविकृतन्यायानाश्रयणादिति शब्देन्दुशेखरे विस्तरः। समेयादिति। आ-इयात् एयात्। समेयादित्यत्र एकारस्य अनण्त्वान्न ह्रस्वः। ग्रहणकसूत्रादन्यत्र पूर्वणैव णकारेण प्रत्याहाराश्रयणादिति भावः। तर्हि क्वचित् 'समीया'दिति प्रयोगः कथमित्याशङ्क्याह—समीयादिति प्रयोगस्तु भौवादिकस्येति। 'इट किट कटी गतौ' इति प्रसिद्धस्य इधातोराशीर्लिङि 'अकृत्सार्वधातुकयोर्दीर्घः' इति दीर्घो बोध्य इति भावः। लुङि विशेषमाह—इणो गा लुङि। इण्धातोः गा इत्यादेशः स्याल्लुङीति सूत्रार्थः स्पष्टः। अगा स् त् इति स्थिते आह—गातिस्थेति। लृङि ऐष्यत्। इङ् अध्ययन इति। अधिरुपरिभावे। 'उपरिभावश्च पठने नियमपूर्वकत्व'मिति भूवादिसूत्रे भाष्ये स्पष्टम्। नित्यमधिपूर्व इति। धातुपाठे वचनमिदम्। अधीते इत्यत्र धातुरुपसर्गं न व्यभिचरतीति भूवादिसूत्रे भाष्ये। अधीते इति। 'सार्वधातुकमपित्' इति ङित्त्वात् गुणनिषेधे सवर्णदीर्घः। अजादौ तु इयङ्। तदाह—अधीयाते अधीयते, इति। अधीषे। अधीयाथे। अधीध्वे। अधीये। अधीवहे। अधीमहे। गाङ् लिटि। इङ इति। 'इङश्च इत्यतस्तदनुवृत्तेरिति भावः। स्थानिवद्भावेन ङित्त्वे सिद्धे ङित्करणं 'गाङ्कुटादिभ्यः' इत्यत्र 'इणो गा लुङि' इत्यस्य ग्रहणाभावार्थमिति भाष्यम्। ननु कृते गाङादेशे द्वित्वे अभ्यासजश्त्वे आल्लोपे अधिजगे इति रूपं वक्ष्यति। तदयुक्तम्। 'द्विर्वचनेऽचि' इति गाङादेशनिषेधात् गाङादेशात् प्रागेव द्वित्वे सति उत्तरखण्डस्य गादेशे अधीगे इति रूपापत्तेरित्यत आह—लावस्थायां विवक्षिते वेति। तत्र 'लावस्थाया'मिति वार्तिकमते गाङादेशात् प्रागेव 'द्विर्वचनेऽचि' इति सूत्रं न प्रवर्तते, द्वित्वनिमित्ताऽचोऽभावात्। विवक्षिते इति भाष्यमते तु सुतरां 'द्विर्वचनेऽचि' इति न प्रवर्त्तते, अनैमित्तिकत्वादिति भावः। अधिजगिरे इति। अधिजगिषे। अधिजगाथे। अधिजगिध्वे। अधिजगे। अधिजगिवहे। अधिजगिमहे। लोटि, अधीताम्। अधीयाताम्। अधीयताम्। अधीष्व। अधीयाथाम्। अधीध्वम्। इति सिद्धव-

नेऽन्तरङ्गत्वाद्गुणात्पूर्वं सवर्णदीर्घः प्राप्तः । 'णेरध्ययने वृत्तम्' (सू ३०६६) इति निर्देशान्न भवति । अध्यैत । परत्वादियङ् । तत आट् वृद्धिः । अध्यैयाताम् । अध्यैयत । अध्यैयि । अध्यैवहि । अध्यैमहि । अधीयीत । अधीयीयाताम् । अधीयीध्वम् । अधीयीय । अध्येषीष्ट । २४६० विभाषा लुङ्लृङोः २।४।५०॥

स्कृत्य आह—अध्ययने इति । तत्र प्रक्रियां दर्शयति—गुणाऽयादेशयोरिति । 'पूर्वं धातुः साधनेन युज्यते पश्चादुपसर्गेण' इति 'सुट्कात्पूर्वः' इति सूत्रसिद्धान्तादिति भावः । तथाच इट एत्वे आटि वृद्धौ अधि इ ऐ इति स्थिते गुणे अयादेशे यणिति फलितम् । ननु 'पूर्वं धातुरुपसर्गेण युज्यते पश्चात्साधनेन' इत्यपि पक्षः 'सुट्कात्पूर्वः' इति सूत्रभाष्ये स्थितः । तथाच अधि इ ऐ इति स्थिते पूर्वसवर्णदीर्घे सति गुणायादेशयोः कृतयोः अध्यै इति स्यादित्याशङ्क्य निराकरोति—पूर्वं धातुरिति । साधनेनेत्यस्य कारकबोधकेनेत्यर्थः । प्रत्ययेनेति यावत् । दर्शन इत्येतस्य मते इत्यर्थः । 'पूर्वं धातुरुपसर्गेण युज्यते पश्चात्साधनेन' इति पक्षे पूर्वप्रवृत्तिकत्वेन अन्तरङ्गत्वात् 'सार्वधातुकार्द्धधातुकयोः' इति गुणं बाधित्वा सवर्णदीर्घः प्राप्तो न भवतीत्यन्वयः । कुत इत्यत आह—णेरध्ययने वृत्तमिति निर्देशादिति । अन्यथा इयुटि अनादेशे अधि इ अन इति स्थिते पूर्वं सवर्णदीर्घे ततो गुणाऽयादेशयोः कृतयोः अध्ययनमिति प्रयुक्तादिति भावः । वस्तुतस्तु पूर्वं धातुः साधनेन युज्यते इत्येव भाष्यसंमतम्, पूर्वं धातुरुपसर्गेण, 'नैतत्सारमिति' भाष्योक्तेरित्यन्यत्र विस्तरः । अध्ययावहै अध्ययामहै । लङ्याह—अध्यैतेति । अधि आ इ त इति स्थिते 'आटश्च' इति वृद्धौ यणिति भावः । अधि इ आताम्मिति स्थिते आटि वृद्धौ यणि अध्यैतामिति प्राप्ते आह—परत्वादियङिति । आटः प्रागेव परत्वादियङस्त्य इयङि तत आटि वृद्धौ यणि 'अध्यैयाताम्'मिति रूपमित्यर्थः । अध्यैयतेति । 'आत्मनेपदेष्वनतः' इत्यदादेशः । अध्यैथाः । अध्यैयाथाम् । अध्यैध्वम् । इति सिद्धवत्कृत्याह—अध्यैयि । अध्यैवहि । अध्यैमहीति । विधिलिङ्याह—अधीयीतेति । अधि इ त इति स्थिते सीयुटि सुटि सलोपे यलोपे अधि इ ईत इति स्थिते धातुभूतस्य इकारस्य इयङि सवर्णदीर्घ इति भावः । अधीयीयातामिति । अधि इ आताम्मिति स्थिते सीयुटि सुटि सलोपे अधि इ ईयाताम्मिति स्थिते धातुभूतस्य इकारस्य इयङि सवर्णदीर्घ इति भावः । झस्य रन्भावे सीयुटि सकारयकारलोपे अधि ई रन् इति स्थिते धातुभूतस्य इकारस्य इयङि सवर्णदीर्घे अधीयीरन्, अधीयीथाः, अधीयीयाथाम् इति सिद्धवत्कृत्य आह—अधीयीध्वमिति । ध्वमि सीयुटि सलोपे यलोपे अधि इ ई ध्वमिति स्थिते इङ इयङि सवर्णदीर्घ इति भावः । अधीयीयेति । 'इटोऽत्' सीयुट् । सलोपः । अधि इ ईय इति स्थिते इङ इयङि सवर्णदीर्घ इति भावः । अधीयीवहि अधीयीमहि । आशीर्लिङ्याह-अध्येषीष्टेति । सीयुटि गुणः । यण् षत्वम् । अध्येषीयास्ताम्-अध्येषीरन्। अध्येषीष्ठाः । अध्येषीयास्थाम्। अध्येषीढ्वम्। अध्येषीय। अध्येषीवहि। अ-

इङो गाङ् वा स्यात्। २४६१ गाङ्कुटादिभ्योऽञ्णिन्ङित् १।२।१॥ गाङादेशात्कुटादिभ्यश्च परेऽञ्णितः प्रत्यया ङितः स्युः। २४६२ घुमास्थागापाजहातिसां हलि ६।४।६६॥ एषामात ईत्स्यात् हलादौ किङत्याधेधातुके। अध्यगीष्ट-अध्यैष्ट। अध्यगीष्यत-अध्यैष्यत। १०४७ इक् स्मरणे। अयमप्यधिपूर्वः। 'अधीगर्थदयेशाम्—' (सू ६१३) इति लिङ्गात्। अन्यथा हि 'इगर्थ—' इत्येव ब्रूयात्। 'इयवदिक इति वक्तव्यम्' (वा १५७७)। अधियन्ति। अध्यगात्।

ध्येषीमहि। लुङि आटि अधि आ इ त इति स्थिते-विभाषा लुङ्लृङोः। शेषं पूरयति-इङो गाङ् वा स्यादिति। 'इङश्च' इत्यतो 'गाङ् लिटि' इत्यतश्च तदनुवृत्तेरिति भावः। सिचि अधि अ गा स् त इति स्थिते-गाङ्कुटादिभ्यो। ञ्णि च ञ्णौ, तौ इतौ यस्य सः ञ्णित्, सः न भवतीत्यञ्णित्। गाङ् च कुटादयश्चेति द्वन्द्वात्तच्छ्रुतौ। गाङिति ङकारानुबन्धात् 'इणो गा लुङि' इत्यस्य न ग्रहणमित्युक्तम्। नापि 'गाङ् गतौ' इत्यस्यात्र ग्रहणम्, तत्र ङकारस्यात्मनेपदप्रापणेन चरितार्थत्वात्। इङादेशस्य गाङो ङकारो नात्मनेपदप्रापणेन चरितार्थः, स्थानिवत्त्वेनैव तत्सिद्धेः। तदाह—गाङादेशादिति। एव च सिचः ङित्त्वे आह—घुमास्था। 'षो अन्तकर्मणि' इत्यस्य कृतात्त्वस्य निर्देशः। घु मा स्था गा पा जहाति सा एषां द्वन्द्वात्षष्ठी। 'आर्द्धधातुके' इत्यधिकृतम्। 'आतो लोप इटि च' इत्यतः आत इति 'ईद्यति' इत्यतः ईदिति 'अनुदात्तोपदेश' इत्यतः क्ङिति इति चानुवर्तते। तदाह—एषामित्यादिना। अध्यगीष्टेति। अधि अ गा स् त इत्यत्र आकारस्य ईकारे यणि सिचः षत्वे तकारस्य ष्टुत्वेन ट इति भावः। 'गातिस्था' इति न सिज्लोपः, परस्मैपदाभावात्। अध्यगीषाताम्। अध्यगीषत। अध्यगीष्ठाः। अध्यगीषाथाम्। अध्यगीढ्वम्। अध्यगीषि अध्यगीष्वहि। अध्यगीष्महि। गाङभावपक्षे आह—अध्यैष्टेति। अधि आ इ स् त इति स्थिते इकारस्य गुणे आटो वृद्धौ यणि षत्वष्टुत्वे इति भावः। अध्यैषाताम्। अध्यैषत। अध्यैष्ठाः। अध्यैषाथाम्। अध्यैढ्वम्। 'धि च' इति सलोपः। अध्यैषि। अध्यैष्वहि। अध्यैष्महि। लृङ्याह—अध्यगीष्यतेति। 'विभाषा लुङ्लृङोः' इति गाङादेशे स्ये तस्य 'गाङ्कुटादिभ्यः' इति ङित्त्वे 'घुमास्था' इति ईत्त्वे अटि यणि षत्वमिति भावः। अध्यगीष्येतामित्यादि। गाङभावपक्षे आह—अध्यैष्यतेति। अध्यैष्येतामित्यादि। इक् स्मरणे। अयमपीति। इङ्धातुवदयमपि धातुर्नित्यमधिपूर्वक इत्यर्थः। ननु धातुपाठे इङमधिकृत्य 'नित्यमधिपूर्वे' इति वचनात्, भूवादिसूत्रभाष्याच्च इङो नित्यमधिपूर्वकत्वं युक्तम्। अस्य तु तथात्वे किं प्रमाणमित्यत आह—अधीगर्थेति। तत्र हि अधीगर्थेत्यनेन स्मरणार्थकधातुर्विवक्षितः। इङ्धातोरधिपूर्वकत्वाभावेऽपि स्मरणार्थकत्वे इगर्थत्वेनावतैव स्मरणार्थकधातुलाभात् तत्र अधीति व्यर्थं स्यात्। अत इङ्धातुरयं नित्यमधिपूर्वक एव स्मरणार्थक इति विज्ञायत इत्यर्थः। इण्वदिक इति। षष्ठ्यन्ताद्वतिः। इणः यत्

केचित्तु आर्धधातुकाधिकारोक्तस्यैवातिदेशमाहुः। तन्मते यण्न। तथा च भट्टिः—'ससीतयो राघवयोरधीयन्' इति। १०४८ वी गतिव्याप्तिप्रजनकान्त्यसनखादनेषु। प्रजनं गर्भग्रहणम्। असनं क्षेपणं। वेति। वीतः। वियन्ति। वेषि। वेमि। वीहि। अवेत्। अवीताम्। अवियन्। अडागमे सत्यनेकाच्त्वाद्यणिति केचित्। अव्यन्। अत्र ईकारोऽपि धात्वन्तरं प्रश्लिष्यते। एति। ईतः। इयन्ति। ईयात्।

कार्यं 'इणो यण्' इत्यादि, तत् इको भवतीत्यर्थः। अध्येति, अधीतः इति सिद्धवत्कृत्य आह—अधियन्तीति। अन्तादेशे इयङ्पवादः। 'इणो यण्' इति यणिति भावः। अध्येषि। अधीथः। अधीथ। अध्येमि। अधीवः। अधीमः। अधीयाय। अतुसि तु द्वित्वे कृते अधि इ इ अतुसिति स्थिते 'इणो यण्' इति द्वितीयस्य इकारस्य यणि प्रथमस्य इकारस्य 'दीर्घ इणः किति' इति दीर्घे सवर्णदीर्घे, अधीयतुः। अधीयुः। अधीयथिथ—अधीयेथ, अधीयथुः। अधीय। अधीयाय-अधीयय अधीयिव। अधीयिम। अध्येता। अध्येष्यति। अध्येतु-अधीतात्। अधीताम्। अधियन्तु। अधीहि-अधीतात्। अधीतम्। अधीत। अध्ययानि। अध्ययाव। अध्ययाम। अध्यैत्। अध्यैताम्। अध्यायन्। अध्यैः। अध्यैतम्। अध्यैत। अध्यायम्। अध्यैव। अध्यैम। इति सिद्धवत्कृत्य लुङ्याह—अध्यगादिति। इण्वत्त्वात् 'इणो गा लुङि' इति गादेशे 'गातिस्था' इति सिचो लुक्। लुप्तत्वात् 'घुमास्था' इति ईत्त्वं न। अध्यगाताम्। अध्यगाम्। अध्यगाव। अध्यैष्यत्। केचित्विति। आर्द्धधातुके इत्यधिकारे 'इणो गा लुङि' इति सूत्रे एतद्वार्तिकपाठस्य भाष्ये दर्शनात्तदधिकारोक्तानामेव कार्याणामुपस्थितत्वादिति भावः। तन्मते यण् नेति। 'इणो यण्' इत्यस्य आर्धधातुकाधिकारस्थत्वाभावाज्जातिदेश इत्यर्थः। तेन ओऽन्तादेशे इयङि सवर्णदीर्घं अधीयन्तीत्याद्यूह्यम्। राघवयोरधीयन्निति। 'अधीगर्थ'इति षष्ठी। राघवौ स्मरन्नित्यर्थः। अधिपूर्वात् इगधातोर्लटः शतरि शपो लुकि इकारस्य इयङि सवर्णदीर्घं अधीयदिति शत्रन्तात् सुबुत्पत्तौ सौ रूपम्। वी गताति। 'अजेर्व्यघञपोः' इति सूत्रभाष्यरीत्या अस्य 'आर्द्धधातुके नास्ति प्रयोगः' इति शब्देन्दुशेखरे स्थितम्। वियन्तीति। एकाच्त्वाद्यणभावादियडिति भावः। लोटि वेतु-वीतात्। वीताम्। वियन्तु। इति सिद्धवत्कृत्याह—वीहीति। हेरपित्त्वेन ङित्त्वान्न गुण इति भावः। वीतात्। वीतम्। वीत। वयानि। वयाव। वयाम। लङ्याह—अवेदिति। अवियन्निति। वी-अन्निति स्थिते परत्वादडागमात् प्रागियङि कृते अडागम इति भावः। मतान्तरमाह—अडागमे सतीति। 'लावस्थायाम'डिति पक्षे इयङं बाधित्वा अनेकाच्त्वात् यणि अव्यन्निति केचिदाहुरित्यर्थः। केचिदित्यस्वारसं सूचयति। तद्वीजं तु कृतेऽप्यटि यणि कर्तव्ये आभीयतया अटः असिद्धत्वादनेकाच्त्वाभावाद्यणभावादिति शब्देन्दुशेखरे विस्तरः। अत्रेति। वी ई इति सवर्णदीर्घं 'वी गती'ति निर्देश इति भावः। ईयादिति। विधिलिङि आशीर्लिङि च रूपमिदं समानम्। 'स्कोः

ऐषीत्। १०४६ या प्रापणे। प्रापणमिह गतिः। प्रणियाति। यातः। यान्ति। २४६३ लङः शाकटायनस्यैव ३।४।१११॥ आदन्तात्परस्य लङो झेर्जुस् वा स्यात्। अयुः-अयान्। यायात्। यायाताम। यायास्ताम्। अयासीत्। १०५० वा गतिगन्धनयोः। गन्धनं सूचनम्। १०५१ भा दीप्तौ। १०५२ ष्णा शौचे। १०५३ श्रा पाके। १०५४ द्रा कुत्सायाम् गतौ। १०५५ प्सा भक्षणे। १०५६ पा रक्षणे। पायास्ताम्। अपासीत्। १०५७ रा दाने। १०५८ ला आदाने। 'द्वावपि दाने' इति चन्द्रः। १०५६ दाप् लवने। प्रणिदाति-प्रनिदाति। दायास्ताम्। अदासीत्। १०६० ख्या प्रकथने। अयं सार्वधातुकमात्रविषयः। 'सस्थानत्वं नमः ख्यात्रे' (वा १५६१) इति वार्तिकं तन्द्राह्यं चेह लिङ्गम्। सस्थानो जिह्वामूलीयः। स नेति ख्याआदेशस्य ख्यादित्वे प्रयोजनमित्यर्थः। सम्पूर्वस्य

इति सलोपः। तत्र विधिलिङि ईयाताम्इत्यादि, आशिषि तु ईयास्ताम्इत्यादि, इति विशेषः। ऐषीदिति। सिचि वृद्धिः। या प्रापणे इति। ननु गच्छतीत्यर्थे यातीति कथमित्यत आह—प्रापणमिह गतिरिति। णिजर्थस्त्वविवक्षित इति भावः। प्रणियातीति। 'नेर्गद' इति णत्वम्। ययौ। याता। यास्यति। यातु। अयात्। अयाताम्। लङः शाकटायनस्यैव। 'झेर्जुस्' इति 'आत' इति चानुवर्तते। तदाह—आदन्तादिति। जुस् वेति। शाकटायनग्रहणाद्विकल्पलाभ इति भावः। एवकारस्तु 'लिट् च' 'लिङाशिषि' इत्युत्तरार्थ इति भाष्ये स्पष्टम्। नच 'लोटो लङ्वत्' इत्यतिदेशात् यान्तु इत्यत्रापि जुस्विकल्पः शङ्क्यः, 'नित्यं ङितः' इत्यतो ङित इत्यनुवृत्त्यैव सिद्धेर्लङ्ग्रहणस्य लङ्वद्भावमादाय प्रवृत्तिनिवारणार्थत्वात्। इदमपि भाष्ये स्पष्टम्। अयानीति। जुसभावे रूपम्। अयासीत्। ष्णाधतुः षोपदेशः। नस्य ष्टुत्वेन णत्वनिर्देशः। स्नाति। स्नायात—स्नेयात्। पा रक्षणे। 'एलिङि' इति सूत्रे 'गातिस्था' इत्यत्र च पिबतेरेव ग्रहणादेत्वसिज्लुकौ न। तदाह—पायास्ताम्, अपासीत् इति। दाप् लवने। घुत्वाभावात् 'शेषे विभाषा' इति णत्वविकल्पं मत्वा आह—प्रणिदातीति-प्रनिदातीति। घुत्वाऽभावादाशीर्लिङि एत्वं, लुङि लुक् च नेति मत्वा आह—दायास्तामिति, अदासीदिति च। ख्या प्रकथने। अयं सार्वधातुकमात्रविषय इति। मात्रशब्दोऽवधारणे। सार्वधातुक एवास्य ख्याधातोः प्रयोगः, न त्वार्द्धधातुक इत्यर्थः। कुत इत्यत आह—सस्थानत्वमिति। 'चक्षिङः ख्याञ्' इति सूत्रे ख्यास्थाने 'ख्शाञ्' इति वक्तव्यम्। अस्य शकारस्य 'पूर्वत्रासिद्ध'मित्यधिकारे यकारो वक्तव्य इत्युक्त्वा 'प्रयोजनं सौप्ररूये वुञ्विधि'रित्युपक्रम्य 'सस्थानत्वं नमः ख्यात्रे' इत्युक्तं वार्तिके। तत्र नञमध्याहृत्य 'नमः ख्यात्रे' इति सस्थानत्व न भवतीति व्याख्यातं भाष्ये। तदिदं वार्तिकं भाष्यं च ख्याधातोरस्य सार्वधातुके एव प्रयोग इत्यत्र ज्ञापकमित्यर्थः। तत्र सस्थानपदं व्याचष्टे—सस्थानो जिह्वामूलीय इति। प्राचीनाचार्यसमयादिति भावः। स नेति। सः जिह्वामूलीयः नमः

ख्यातेः प्रयोगो न' इति न्यासकारः। १०६१ प्रा पूरणे। १०६२ मा माने। अकर्मकः। 'तनौ ममुस्तत्र न कैटभद्विषः' इति माघः। उपसर्गवशेनार्थान्तरे तु सकर्मकः। 'उदरं परिमाति मुष्टिना'। 'नेर्गद—' (सू २२८५) इत्यत्र नास्य ग्रहणम्। प्रणिमाति प्रनिमाति। १०६३ वच परिभाषणे। वक्ति। वक्तः। अयमन्तिपरो न प्रयुज्यते। बहुवचनपरः इत्यन्ये। झिपरः इत्यपरे। वक्षि। वच्यात्। उच्यात्। अवोचत्। १०६४ विद ज्ञाने। २४६५ विदो लटो वा ३।४।८३॥

ख्याग्रे इत्यत्र न भवतीत्येतत् ख्याआदेशस्य खशादित्वविधौ, शस्य यत्वविधौ च प्रयोजनमित्यर्थः। खशादित्वे इति। यत्वविधावित्यस्याप्युपलक्षणम्। शकारस्थानिकयत्वस्यासिद्धत्वाद्। 'शर्परे विसर्जनीय' इति विसर्जनीयः इष्टः सिध्यति, जिह्वामूलीयस्त्वनिष्टो न भवतीति भाष्यवार्तिकहृदयम्। ख्याधातोरस्यार्द्धधातुकेऽपि प्रयोगसत्त्वे तु तृजन्ते ख्यातृशब्दे यकारस्य शकारस्थानिकत्वाभावात् असिद्धत्वाभावात् 'शर्परे विसर्जनीयः' इत्यस्याऽप्रवृत्तौ 'कुप्वोः' जिह्वामूलीयो दुर्वारः स्यात्। ततश्चार्धधातुके सर्वत्र न ख्याधातोः प्रयोग इति विज्ञायते, ज्ञापकस्य सामान्यापेक्षत्वादिति भावः। सम्पूर्वस्येति। सार्वधातुकेऽपीति भावः। अत्र ख्याख्यानमेव शरणम्। एवञ्च 'संख्याति' इत्यादि नास्तीति फलितम्। सङ्ख्यादिशब्दास्तु ख्याआदेशस्येति बोध्यम्। मा माने इति। मानं परिमितिरिति भावः। तदाह—अकर्मक इति। 'माति घृतपात्रेऽस्मिन्निति उदाहरणम्। परिमितं भवतीत्यर्थः, संगृहीतं भवतीति यावत्। अत्रार्थे शिष्टप्रयोगसंवादं दर्शयति—तनौ ममुस्तत्रेति। 'तनौ ममुस्तत्र न कैटभद्विषस्तपोधनाभ्यागमसम्भवा मुदः' इति माघकाव्ये (स० १) तपोधनस्य नारदस्य अभ्यागमेन आगमनेन सम्भवाः मुदः सन्तोषाः कैटभद्विषः श्रीकृष्णस्य तनौ शरीरे न ममुः परिमिता न बभूवुः। आधिक्यान्न संगृहीता बभूवुरिति यावत्। अर्थान्तरे त्विति। परिच्छेदे वित्यर्थः। उदरमिति। 'उदरं परिमाति मुष्टिना कुतुकी कोऽपि दमस्वसुः किमु' इति नैषधकाव्ये। कोऽपि कुतुकी दमस्वसुः दमयन्त्याः उदरं मुष्टिना परिमाति किमु? परिगृह्णातीत्यर्थः। नास्य ग्रहणमिति। 'धुप्रकृतिमा'ङिति भाष्यादिति भावः। एवञ्च 'शेषे विभाषाऽकखादौ' इति णत्वविकल्प इति मत्वा आह—प्रणिमाति प्रनिमातीति। ममौ। ममिथ-ममाथ। ममिव। माता। मास्यति। मातु। अमात्। असासीत्। अमास्यत्। वच परिभाषणे। अनिट्। अयमन्तीति। लटि प्रथमपुरुषबहुवचनं नास्तीत्यर्थः। बहुवचनपर इति। 'न प्रयुज्यते' इति शेषः। अस्मिन् पक्षे पुरुषत्रये बहुवचनं नास्ति। झिपर इति। 'न प्रयुज्यत' इति शेषः। अस्मिन् पक्षे लिङादिष्वपि प्र० पु० बहुवचनं नास्तीति भावः। तत्र लिटि अकिति 'लिट्यभ्यासस्य' इति सम्प्रसारणम्। उवाच। किति तु 'वचिस्वपि' इति सम्प्रसारणम्। ऊचतुः। उवचिथ—उवक्थ। ऊचिव। वक्ता। वक्ष्यति। वक्तु। अवक्। वच्यादिति। विविलिङि रूपम्। आशीर्लिङि 'वचिस्वपि'

वेत्तेर्लटः परस्मैपदानां णलादयो वा स्युः। वेद। विदतुः। विदुः। वेत्थ। विदथुः। विद। वेद। विद्व। विद्म। पक्षे वेत्ति। वित्तः इत्यादि। विवेद। विविदतुः। 'उषविद' (सू २३४१) इत्याम्पक्षे विद इत्यकारान्तनिपातनान्न लघूपधगुणः। विदाञ्चकार। वेदिता। २४६५ **विदाङ्कुर्वन्त्वित्यन्यतरस्याम्३।१।४१॥**

वेत्तेर्लोट्यां गुणाभावो लोटो लुक् लोङन्तकरोत्यनुप्रयोगश्च वा निपात्यते। पुरुषवचने न विवक्षिते, इति शब्दात्। २४६६ **तनादिकृञ्भ्य उः ३।१।७९॥**

तनादेः कृञश्च उप्रत्ययः स्यात्। शपोऽपवादः। तनादिरित्यादेव सिद्धे कृञ्ग्रहणं गणकार्यस्यानित्यत्वे लिङ्गम्। तेन 'न विश्वसेदविश्वस्तम्' इत्यादि सिद्धम्। विदाङ्कुरोतु।

इति सम्प्रसारणं मत्वा आह—उच्यादिति। अवोचदिति। लुङि 'अस्यतिवक्ति' इति च्लेरङि 'वच उम्' इति भावः। विद ज्ञाने इति। अनिट्सु लुग्विकरणस्याऽऽग्रहणात् अयं सेट्। विदो लटो वा। 'परस्मैपदानां णलतुस्' इत्यादिसूत्रमनुवर्तते। 'विद' इति पञ्चमी। तदाह—वेत्तेर्लट इति। विन्दतिविद्यत्योस्तु शेन श्यना च व्यवधानात् नंते आदेशाः। इत्यादीति। विदन्ति। वेत्सि। वित्थः। वित्थ। वेद्मि। विद्वः। विद्मः। विविदतुरिति। विविदुः। विवेदिथ। विविदथुः। विविद। विवेद। विविदिव। विविदिम। आमपक्षे इति। न लघूपधगुण इत्यन्वयः। कुत इत्यत आह—अकारान्तनिपातनादिति। 'उषविद' इति सूत्रे विदेत्यकारान्तत्वम् आमसन्नियोगेन 'निपात्यत' इत्यर्थः। आमि अतो लोपः। तस्य 'स्थानिवत्त्वात्' न लघूपधगुण इति भावः। वेदितेति। वेदिष्यतीत्यपि ज्ञेयम्। विदाङ्कुर्वन्त्वित्यन्यतरस्याम्। 'कृञ् चानुप्रयुज्यते लिटि' इत्युत्तरमिदं सूत्रम्। इतिशब्दः प्रकारे। एवंजातीयकं वैकल्पिकेन प्रत्येतव्यमित्यर्थः। वेत्तेरिति। लुग्विकरणात् विदधातोः लोटि परे आम्प्रत्ययो निपात्यत इत्यर्थः। लोङन्तेति। आमन्ताद्विदेः लोङन्तकृञ्धातोः अनुप्रयोगश्च निपात्यत इत्यर्थः। ननु 'विदाङ्कुर्वन्तु' इति लोटि प्रथमपुरुषबहुवचनस्यैव सूत्रे निर्देशात् कथं लोङन्तसामान्यानुप्रयोग इत्यत आह—पुरुषेति। कुर्वन्त्विति प्रथमपुरुषो बहुवचनं च न विवक्षितमित्यर्थः। तयोस्तु नान्तरीयकमुच्चारणमिति भावः। इति शब्दादिति। तस्य प्रकारवचनस्य लोकप्रयोगानुसारित्वादिति भावः। तनादिकृञ्भ्य उः। शपोऽपवाद इति। अनेन शञ्विषय एवास्य प्रवृत्तिरिति सूचितम् 'सार्वधातुके यक्' इत्यतः सार्वधातुकग्रहणस्य 'कर्तरि शप्' इत्यतः कर्तरीत्यस्य चानुवृत्तेरिति भावः। तेनेति। गणकार्यस्याऽनित्यतया 'श्नसेत्' इत्यत्र अदादिगणकार्यं शपो लुक् न भवतीत्यर्थः। वस्तुतस्तु कृञ्ग्रहणस्यात्र भाष्ये प्रत्याख्यातत्वात् उक्तज्ञापनाभावात् विश्वसेदित्यसम्बद्धमेवेत्याहुः। 'विश्वस्त'मित्यत्र तु आगमशास्त्रस्याऽनित्यत्वात् नेडित्याहुः। विदाङ्कुरोत्विति। अत्र विदेर्लोटि आमि लोटो लुकि आमन्ताद्विदेः कृञो लोङन्तस्यानुप्रयोगः। तत्र लोटस्तिपि 'पुरुषः' इत्युक्ते शपं बाधित्वा उप्र-

२४६७ **अत उत्सार्वधातुके ६।४।११०॥** उप्रत्ययान्तस्य कृञोऽकारस्य उस्यात्सार्वधातुके क्ङिति। उदिति तपरत्वसामर्थ्यान्न गुणः। विदाङ्कुरुताम्-विदाङ्कुरुताम्। 'उतश्च-' (सू २३३४) इति हेर्लुक्। आभीयत्वेन लुकोऽसिद्धत्वादुत्वम्। विदाङ्कुरु। विदाङ्करवाणि। अवेत्। अवित्ताम्। 'सिजभ्यस्त—' (सू २२२६) इति झेर्जुस्। अविदुः। २४६८ **दश्च ८।२।७५॥** धातोर्दान्तस्य पदस्य सिपि परे रुः स्याद्वा। अवेः-अवेत्। १०६५ **अस भुवि। अस्ति। २४६९ श्नसोरल्लोपः ६।४।१११॥** श्नस्यास्तेश्चाकारस्य लोपः स्यात्सार्वधातुके क्ङिति। स्तः। सन्ति। 'तासस्त्योः—' (सू २१६१) इति सलोपः। असि। स्थः। स्थ। अस्मि। स्वः। स्मः। 'आर्द्धधातुके' (सू २४३२) इत्यधिकृत्य। २४७० **अस्तेर्भूः २।४।५२॥** बभूव। भविता। अस्तु-स्तात्। स्ताम्। सन्तु। २४७१

त्यये ऋकारस्य गुणे रपरत्वे उकारस्य तिङ्निमित्तो गुणः। तातङि तु ऋकारस्य गुणे रपरे तातङो ङित्त्वात् उकारस्य गुणाऽभावे विदाङ्कुरुतात् इति स्थिते—अत उत्। उप्रत्ययान्तस्येति। 'उतश्च प्रत्ययात्' इत्यतः तदनुवृत्तेरिति भावः। कृञोऽकारस्य उदिति। 'नित्यं करोतेः' इत्यतः तदनुवृत्तेरिति भावः। ङिदिति। 'गमहन' इत्यतः तदनुवृत्तेरिति भावः। अकारस्य उत्वे कृते तस्य लघूपधगुणमाशङ्क्य आह—तपरेति। इदं स्थानिवत्सूत्रे भाष्ये स्पष्टम्। विदाङ्कुरुतामिति। विदाङ्कुर्वन्त्वित्यपि ज्ञेयम्। 'न भकुर्छुराम्' इति निषेधात् 'हलि च' इति दीर्घो न। हेर्लुगिति। विदाङ्कुरु हि इति स्थिते 'अत उत्सार्वधातुके' इत्युत्त्वं परमपि बाधित्वा नित्यत्वात् 'उतश्च प्रत्ययात्' इति हेर्लुगित्यर्थः। तर्हि सार्वधातुकाऽभावात् कथमुत्वमित्यत आह—आभीयत्वेनेति। विदाङ्कुर्विति। विदाङ्कुरुतात्। विदाङ्कुरुतम्। विदाङ्कुरुत। विदाङ्करवाणीति। आटः पित्त्वेन ङित्त्वाभावादुकारस्य गुण इति भावः। विदाङ्करवाव। विदाङ्करवाम। लङ्याह—अवेदिति। हलन्त्यादिना सिपो लोपे विशेषमाह—दश्च। 'सिपि धातो रुर्वा' इत्यनुवृत्तम्। 'द' इति षष्ठ्यन्तेन धातुर्विशेष्यते। तदन्तविधिः। पदस्येत्यधिकृतम्। तदाह—धातोर्दान्तस्य पदस्येति। अलोऽन्त्यस्येत्यन्त्यस्य ज्ञेयम्। अवेदिति। सिपो हलन्त्यादिलोपे दकारस्य रुत्वविकल्पः। अवित्तम्। अवित्त। अवेदम्। अविद्व। अविद्म। विद्यात्। विद्याताम्। विद्यात्। विद्यास्ताम्। अवेदीत्। अवेदिष्यत्। अस भुवीति। भवनं भूः। सत्तायामित्यर्थः। अस्तीति। सत्यं चत्वैऽपि सकार एव भवति, नतु तकारः, अल्पप्राणतया प्रयत्नभेदात्। श्नसोरल्लोपः। अत् इति लुप्तषष्ठीकं पदम्। श्न अस् अनयोर्द्वन्द्वात्षष्ठीद्विवचनम्। शकन्ध्वादित्वात् पररूपम्। श्नेति श्नमुप्रत्ययैकदेशनिर्देशः। 'अत उत्सार्वधातुके' इत्यतः सार्वधातुके इत्यनुवर्तते, 'गमहन' इत्यतः क्ङितीति। तदाह—श्नस्येत्यादिना। अस्तेर्भूः। अस्धातोर्भूभावः स्यात् आर्द्धधातुके

ध्वसोरेद्धावभ्यासलोपश्च ६।४।११९॥ घोरस्तेश्चैत्वं स्याद्धौ परेऽभ्यासलोपश्च । आभीयत्वेनैत्त्वस्यासिद्धत्वाद्धेधिः । 'श्नसोः—' (सू २४६९) इत्यल्लोपः । एधि । तातङ्पक्षे एत्वं न । परेण तातङा बाधात् । 'सकृद्गतौ—' (प ४१) इति न्यायात् । स्तात् । स्तम् । स्त । असानि । असाव । असाम । 'अस्तिसिचः—' (सू २२२५) इतीट् । आसीत् । श्नसोरल्लोपस्याभीयत्वेनासिद्धत्वादाट् । आस्ताम् । आसन् । स्यात् । भूयात् । अभूत् । सिचोऽस्तेश्च विद्यमानत्वेन विशेषणादीयन । २४७२ उपसर्गप्रादुर्भ्यामस्तिर्यच्परः ८।३।८७॥ उपसर्गेणः प्रादुसश्च परस्यास्तेः सस्य षः स्याद्यकारेऽचि च परे । निष्यात् ।

परे इत्यर्थः । अस् हि इति स्थिते-ध्वसोरेद्धावभ्यासलोपश्च । घु अस् अनयोर्द्वन्द्वः । एत हौ इति च्छेदः । ननु अस् हि इति स्थिते 'हुझल्भ्यो हेर्धिः' इति धित्वं परत्वात् बाधित्वा 'ध्वसोः' इति सकारस्य एत्वे कृते हुझल्भ्यः परत्वाऽभावात् कथं धिभाव इत्यत आह—आभीयत्वेनेति । तथाच अ ए धीति स्थिते आह-श्नसोरिति । नन्वाशिषि अस् हि इति स्थिते तातङं बाधित्वा परत्वादेत्त्वं प्राप्नोतीत्यत आह-तातङ्पक्षे एत्वं नेति । कुत इत्यत आह—परेणेति । ननु कृते तातङि तस्य स्थानिवत्त्वेन हित्वात्तस्मिन्परे 'ध्वसोः' इत्येत्वं कुतो नेत्यत आह—सकृद्गताविति । सकृत् एकवारं गतौ प्रवृत्तौ, विप्रतिषेधे विरोधे सति, यद्बाधितं तद्बाधितमेव भवति,ननु पुनः प्रवर्तत इति तदर्थः । लङस्तिपि विशेषमाह—अस्तिसिचः इति । इकारलोपे आटि वृद्धौ 'अस्तिसिचः' इति ईडागम इत्यर्थः । ननु तसादौ ङिति परत्वादाडागमात्पाक् 'श्नसोः' इत्यल्लोपे सति अजादित्वाभावात् कथमाडित्यत आह—श्नसोरल्लोपस्याभीयत्वेनेति । आस्तामिति । अत्र कृते आडागमे तस्य लोपनिवृत्त्यर्थं 'श्नसोरल्लोपः' इति तपरकरणम् । वस्तुतस्तु आट आभीयत्वेनासिद्धत्वादेव लोपो न भवतीति 'श्नसोरल्लोपः' इत्यत्र तपरकरणं व्य 'मिति भाष्ये स्पष्टम् । आसन्निति । आसीः । आस्तम् । आस्त । आसम् । आस्व । आस्म । विधिलिङ्याह—स्यादिति । स्याताम् । स्युरित्यादि । आशीर्लिङि आर्धधातुकत्वात् भूभावं मत्वा आह—भूयादिति । लुङि तु सिचि भूभावे 'गातिस्था इति सिचो लुकं मत्वा आह—अभूदिति । तत्र 'अस्तिसिचोऽपृक्ते' इति ईडागममाशङ्क्य आह—सिचोऽस्तेश्चेति । इह भूभावे सति अस्तेरश्रूयमाणत्वात् ईण्नेति भावः । उपसर्गप्रादुर्भ्याम् । उपसर्गः प्रादुस् अनयोर्द्वन्द्वः । इण्कोरित्यधिकृतम् । तत्र इण इत्युपसर्गेण सम्बध्यते, न तु प्रादुसि, ततः परस्य अस्तेः सस्य इणः परत्वाऽसम्भवात् । कोरित्यपि असम्भवान्न सम्बध्यते । अस्तिरिति षष्ठ्यर्थे प्रथमा । 'सहेः साडः सः' इत्यतः स इति षष्ठ्यन्तमनुवर्तते, मू न्य इत्यधिकृतम् । य् अच् अनयोर्द्वन्द्वः । यचौ परौ यस्मादिति विग्रहः । यकारे अकारे च परे इति लभ्यते । तदाह—उपसर्गेणः इति । उपसर्गस्थादिण इत्यर्थः । परस्येति । अस्तेः सस्य विशे-

प्रादुःष्यात्। निषन्ति। प्रादुःषन्ति। यङ्लुगन्तः किम्। अभिस्तः। १०६६ मृजूष् शुद्धौ। २४७३ मृजेर्वृद्धिः ७।२।११४॥ मृजेरिको वृद्धिः स्याद्धातुप्रत्यये परे। 'क्ङिति च'—' (वा ५०५७)। 'व्रश्च—' (८ २९४) इति षः। मार्ष्टि। मृष्टः। मृजन्ति-मार्जन्ति। ममार्ज। ममार्जतुः—ममृजतुः। ममार्जिथ-ममार्ष्ठ। मार्जिता-मार्ष्टा। मृड्ढि। अमार्ट्। अमार्जम्। अमार्ज्यात्। अमार्क्षीत्।

षणमिदम्। नश्वस्तेः। तेन प्रादुरासीदित्यत्र न षत्वम्। यकारपरकत्वे उदाहरति—निष्यात् प्रादुःष्यादिति। प्रादुस् इति सान्तमव्ययम्। सस्य षत्वे पूर्वस्य सस्य ष्टुत्वेन षः। षान्तत्वे तु 'प्रादुर्ष्या'मिति रुत्वनिर्देशो नोपपद्यते। अरूपरकत्वे उदाहरति—निषन्ति प्रादुष्षन्तीति। मृजूष् शुद्धाविति। ऊदित्त्वमिड्विकल्पार्थम्। 'क्ङिद्दादिभ्यो ऽङ्' इत्यङर्थं क्ङित्त्वम्। वस्तुतस्तु भिदादिगणे मृजाशब्दपाठादेव सिद्धेरिह क्ङित्करणमनार्षमित्याहुः। मृजेर्वृद्धिः। 'इको गुणवृद्धी' इति परिभाषया 'इक' इत्युपस्थितम्। मृजेरित्यवयवषष्ठी। तदाह—मृजेरिको वृद्धिः स्यादिति। 'धातोः स्वरूपग्रहणे तत्प्रत्यये कार्यविज्ञानम्' इति परिभाषामभिप्रेत्य आह—धातुप्रत्यये परे इति। धातोर्विहिते प्रत्यये इत्यर्थः। तेन परिमृड्भ्यामित्यत्र न वृद्धिरिति भावः। गुणापवादोऽयम्। क्ङित्यजादौ वेष्यते इति। 'मृजेर्वृद्धि'रिति शेषः। 'इको गुणवृद्धी' इति सूत्रभाष्ये इदं पठितम्। व्रश्चेति ष इति। मृज् ति इति स्थिते ऋकारस्य वृद्धौ रपरत्वे जकारस्य व्रश्चेति षत्वे तकारस्य ष्टुत्वेन टकारे मार्ष्टीति रूपमित्यर्थः। मृष्ट इति। ङित्त्वाच्च वृद्धिः, नापि गुण इति भावः। मृजन्ति मार्जन्ति इति। 'क्ङित्यजादा'वितिं वृद्धिर्विकल्प इति भावः। मार्ष्टि। मृष्टः। मृष्ट। मार्ज्मि। मृज्वः। मृज्मः। ममार्जेति। अलि मृजेर्वृद्धिरिति भावः। अतुसादावजादौ क्ङिति वृद्धिविकल्पं मत्वा आह—ममार्जतुः ममृजतुरिति। ममार्जुः। ममृजुः। इत्यपि ज्ञेयम्। ऊदित्त्वादिड्विकल्पं मृजेर्वृद्धिं च मत्वा आह—ममार्जिथ ममार्ष्ठेति। इडभावे जस्य व्रश्चेति षः। थस्य ष्टुत्वेन ठ इति भावः। ममार्जथुः-ममृजथुः। ममार्ज-ममृज। ममार्ज। ममार्जिव-ममृजिव-ममृज्व। ममार्जिम-ममृजिम-ममृज्म। लुट्याह—मार्जिता मार्ष्टेति। ऊदित्त्वादिटि, तदभावे च 'मृजेर्वृद्धिः' इति भावः। मार्जिष्यति-मार्क्ष्यति। मार्ष्टुं-मृष्टात्। मृष्टाम्। मार्जन्तु-मृजन्तु। मृड्ढीति। हेरपित्त्वेनाङित्त्वाच्च वृद्धिः। व्रश्चादिना जस्य षः, हेर्धिः, षस्य जश्त्वेन डः, धस्य ष्टुत्वेन ढः। मृष्टात्। मृष्टम्। मृष्ट। मार्जानि। मार्जाव। मार्जाम। लङ्याह—अमार्ट् इति। तिप इकारलोपे वृद्धौ रपरत्वेन हल्ङ्यादिना तकारलोपे व्रश्चादिना जस्य षः, तस्य जश्त्वचर्त्वे इति भावः। अमृष्टाम्। अमार्जन्-अमृजन्। अमार्ट्। अमृष्टम्। अमृष्ट। अमार्ज्मि। अमृज्व। अमृज्म। मृज्यात्। मृज्यास्ताम्। मृज्यास्ताम्। अमार्जीत् अमार्क्षीदिति। ऊदित्त्वादिड्विकल्प इति भावः। इट्पक्षे अमार्जिष्टाम्। अमार्जिषुरित्यादि सुगमम्। इडभावे अमार्ष्टाम्। अमार्क्षुः।

१०६७ रुदिर् अश्रुविमोचने। २४७४ रुदादिभ्यः सार्वधातुके ७।२।७६॥ रुद्, स्वप्, श्वस्, अन्, जक्ष् एभ्यो वलादेः सार्वधातुकस्येट् स्यात्। रोदिति। रुदितः। हौ परत्वादिटि धित्वं न। रुदिहि। २४७५ रुदश्च पञ्चभ्यः ७।३।९८॥ हलादेः पितः सार्वधातुकस्यापृक्तस्य ईट् स्यात्। २४७६ अड्गार्ग्यगालवयोः ७।३।९९॥ अरोदीत्—अरोदत्। अरुदिताम्। अरुदन्। अरोदीः—अरोदः। अरोदम्। प्रकृतिप्रत्ययविशेषापेक्षाभ्यामङीङ्भ्यामन्तरङ्गत्वाद्यासुट्। रुद्यात्। अरुदत्। अरोदीत्। १०६८ ञि ष्वप् शये। स्वपिति। स्वपितः। सुष्वाप। सुषुपतुः। सुषुपुः। सुष्वपिथ—सुष्वप्थ। २४७७ सुविनिर्दुर्भ्यः सुपिसूतिसमाः

अमार्क्षीः। अमार्ष्टम्। अमार्ष्ट। अमार्क्षम्। अमार्ष्व। अमार्क्ष्म। अमार्जिष्यत्—अमार्क्ष्यत्। रुदिर्धातुरिरित् सेट्। रुदादिभ्यः। इड्वलादेरित्यनुवृत्तिं मत्वा आह—वलादेरिति। रुदित इति। ङित्त्वान्न गुणः। रुदन्ति। रोदिषि। रुदिथः। रुदिथ। रोदिमि। रुदिवः। रुदिमः। रुरोद। रुरुदतुः। रुरोदिथ। रुरुदिव। रुरुदिम। रोदिता। रोदिष्यति। रादित्-रुदितात्। रुदिताम्। रुदन्तु। रुदि हि इति स्थिते 'हुझल्भ्यः' इति धित्वमाशङ्क्य आह—हौ परत्वादिति। रुदिहीति। हेरपित्त्वेन ङित्त्वान्न लघूपधगुण इति भावः। रुदितात्। रुदितम्। रुदित। रोदानि। रोदाव। रोदाम। रुदश्च पञ्चभ्यः। 'नाभ्यस्तस्य' इत्यतः पिति सार्वधातुके इति 'उतो वृद्धिः' इत्यतो हलीति 'गुणोऽपृक्ते' इत्यतः अपृक्ते इति 'ब्रुव ईट्' इत्यत ईडिति चानुवर्तते। 'रुद' इति पञ्चमी। 'रुदादिभ्य' इति विवक्षितम्। इत्यभिप्रेत्य सूत्रशेषं पूरयति—इलादेरित्यादिना। अड्गार्ग्यगालवयोः। अनयोर्मते रुदादिभ्यः पञ्चभ्यः परस्य हलादेः पितः सार्वधातुकस्य अपृक्तस्य अडागमः स्यादिति स्पष्टोऽर्थः। अरोदीरिति। अरुदितम्। अरुदित, इत्यपि ज्ञेयम्। अरोदमिति। अरुदिव। अरुदिम। इत्यपि ज्ञेयम्। ननु ङिकस्तिपि यासुटं बाधित्वा परत्वात् 'अड्गार्ग्यगालवयोः' इति 'रुदश्च पञ्चभ्यः' इति च अडीटौ स्यातामित्यत आह—प्रकृतिप्रत्ययेति। हलादिपित्सार्वधातुकाऽपृक्ताऽपेक्षत्वाच्चेत्यपि ज्ञेयम्। लुङि 'ह्रस्तो वा' इत्यङ्पक्षे आह—अरुददिति। अभावपक्षे त्वाह—अरोदीदिति। 'अस्तिसिचः' इति ईट्। 'रुदश्च पञ्चभ्यः' इति तु नेह प्रवर्तते, सिचा व्यवहितत्वात्। ष्वप् शये इति। षोपदेशोऽयम्। आर्धधातुके अनिट्। स्वपितीति। 'रुदादिभ्यः' इति इट। स्वपितः इति। स्वपन्ति। स्वपिषि। स्वपिथः। स्वपिथ। स्वपिमि। स्वपिवः। स्वपिमः। सुष्वापेति। द्वित्वे 'लिटयभ्यासस्य' इति सम्प्रसारणे पूर्वरूपे आदेशसकारत्वात् षत्वमिति भावः। सुषुपतुरिति। 'वचिस्वपि' इति सम्प्रसारणे कृते द्वित्वादीति भावः। सुषुपुरित्यपि ज्ञेयम्। सुष्वपिथ सुष्वप्थेति। भारद्वाजनियमात्थलि वेडिति भावः। सुषुपथुः। सुषुप। सुष्वाप-सुष्वप। सुषुपिव। सुषुपिम। सुविनिर्दुर्भ्यः। कृतसम्प्रसारणस्य स्वपूधातोः सुपीत्यनेन ग्रहणम्। सूतीत्यनेन सूति-

८।३।८८॥ एभ्यः सुप्यादेः सस्य षः स्यात्। 'पूर्वं धातुरुपसर्गेण युज्यते'। किति लिटि परत्वात्सम्प्रसारणे षत्वे च कृते द्वित्वम्। 'पूर्वत्रासिद्धीयमद्विर्वचने' (प १२७) सुषुषुपतुः। सुषुषुपुः। पिति तु द्वित्वेऽभ्यासस्य सम्प्रसारणम्। षत्वस्यासिद्धत्वात्ततः पूर्वं 'हलादिः शेषः' (प २१७६)। नित्यत्वाच्च। ततः सुपि

शब्दः कृदन्तो गृह्यते। समेत्यनेनापि समशब्दस्य ग्रहणम्। षष्ठ्यर्थे प्रथमा। 'सहेः साडः सः' इत्यतः स इति षष्ठ्यन्तमनुवर्तते। मूर्धन्य इत्यधिकृतम्। तदाह-एभ्यः सुप्यादेरिति। सुषुप्तिः, सुषूतिः, सुषमः इत्युदाहरणानि। अत्र कृतसम्प्रसारणस्य स्वप्धातोर्ग्रहणात् सुस्वप्न इत्यत्र न षत्वमिति भाष्यम्। नन्वेवं सति सुषुषुपतुरित्यत्र सुपूर्वस्य स्वपधातोः कथं षत्वम्। कृतसम्प्रसारणस्य हि स्वपधातोः षत्वम्। तत्र यदि स्वप् अतुस् इति स्थिते पूर्वं द्वित्वे कृते पश्चात् 'वचिस्वपि' इति सम्प्रसारणं तदा हलादिशेषे उत्तरखण्डस्यैव 'वचिस्वपि' इति सम्प्रसारणं, न स्वभ्यासस्य। अतुसः कितः उत्तरखण्डव्यवहितत्वात्, 'न सम्प्रसारणे सम्प्रसारणम्' इति निषेधाच्च। ततश्च सु सुषुप् अतुसित्यत्र पूर्वखण्डस्य कृतसम्प्रसारणत्वाभावात् कथं षत्वम्। उत्तरखण्डस्य च सु इत्युपसर्गादव्यवहितपरत्वाऽभावात्कथमनेन षत्वम्, इण्कवर्गाभ्यां परत्वाऽभावेन 'आदेशप्रत्यययोः' इत्यस्याप्युत्तरखण्डे अप्रवृत्तेः। यदि तु परत्वात्पूर्वं सम्प्रसारणे कृते पश्चात् द्वित्वं तर्हि सुप् इत्यस्य द्वित्वप्रवृत्तेः प्रागेव षत्वमिति वक्तव्यम्। तत्तु न युज्यते। 'पूर्वं धातुः साधनेन युज्यते पश्चादुपसर्गेण' इति परिभाषया सु इत्युपसर्गसम्बन्धस्य द्वित्वात्प्रागवृत्तेः। तथाच कृतसम्प्रसारणस्य अकृतषत्वस्य सुप् इत्यस्य द्वित्वे उत्तरखण्डस्यैव 'आदेशप्रत्यययोः' इति षत्वं स्यात्। न तु पूर्वखण्डस्य 'साऽऽपदाद्योः' इति निषेधात्। कृते हलादिशेषे सु इति पूर्वखण्डस्य सुब्रूपत्वाभावेन 'सुविनिर्दुर्भ्यः' इत्यस्याऽप्यप्रवृत्तेः। न च एकदेशविकृतस्यानन्यत्वं शङ्क्यम्, एवमप्यभ्यासस्यानर्थकत्वेन अर्थवद्ग्रहणपरिभाषया षत्वस्य तत्राप्राप्तेः। तस्मादिह सुषुषुपतुरित्यत्र पूर्वखण्डे षत्वं दुरुपपादमित्याशङ्क्य आह—पूर्वं धातुरित्यादिना। लक्ष्यानुरोधादिह 'पूर्वं धातुरुपसर्गेण युज्यते पश्चात्साधनेन' इत्याश्रीयते। ततश्च द्वित्वात्प्रागेव परत्वात्सम्प्रसारणे सति सुप् इत्यस्य सु इत्युपसर्गपूर्वकत्वमादाय षत्वे च कृते सति पुनः प्रसङ्गविज्ञानात् षुप् इत्यस्य कृतषत्वस्य द्वित्वे सति खण्डद्वयेऽपि षकारश्रवणं निर्बाधमित्यर्थः। तदुक्तं भाष्ये-'षुपिभूतो द्विरुच्यते' इति। ननु कृतषत्वस्य कथं द्वित्वं, द्वित्वे कर्तव्ये षत्वस्याऽसिद्धत्वादित्यत आह—पूर्वत्रासिद्धीयमिति। ननु तर्हि सुसुप्वापेत्यत्रापि पूर्वखण्डे षत्वं श्रूयेतेत्यत आह—पिति त्विति। किति णलि कित्त्वाभावात् 'वचिस्वपि' इत्यस्याप्रवृत्तौ कृते द्वित्वे 'क्ङित्यभ्यासस्य' इति पूर्वखण्डस्य सम्प्रसारणम्। सु सुप् स्वप् अ इति स्थिते 'सुविनिर्दुर्भ्यः' इति षत्वस्याऽसिद्धत्वात् हलादिशेष इत्यर्थः। नित्यत्वाच्चेति। कृते अकृते च षत्वे हलादिशेषस्य प्रा-

रूपाभावान्न षः। सुसुष्वाप। सुस्वप्ना। अस्वपीत्–अस्वपत्। स्वप्यात्। सुप्यात्। सुषुप्यात्। अस्वाप्सीत्। १०६९ श्वस प्राणने। श्वसिति। श्वसिता। अश्वसीत्। अश्वसत्। श्वस्याताम्। श्वस्यास्ताम्। 'ह्यन्तक्षण–' (सू २२६६) इति न वृद्धिः। अश्वसीत्। १०७० अन च। अनिति। आन। अनिता। आनीत्–आनत। २४७८ अनितेः ८।४।१६॥ उपसर्गस्थान्निमित्तात्परस्यानितेर्नस्य णः स्यात्। प्राणिति। १०७१ जक्ष भक्षहसनयोः। जक्षिति। जक्षितः। २४७६ अदभ्यस्तात् ७।१।४॥ झस्य अत्स्यात्। अन्तापवादः। जक्षति। 'सिजभ्यस्त–' (सू २२२६) इति झेर्जुस्। अजक्षुः। अयमन्तरस्थादिरित्युज्ज्वलदत्तो वभ्राम। रुदादयः पञ्च गताः।

१०७२ जागृ निद्राक्षये। जागर्ति। जागृतः। जाग्रति। 'उपविद—' (सू

प्तेरिति भावः। तत इति। हलादिशेषोत्तरं सु इत्यस्यैव स्थत्या सुप् इति रूपस्याऽभावान्न ष इत्यर्थः। एकदेशविकृतस्यादनन्यत्वेऽपि अभ्यासस्याथवत्त्वाभावान्न ष इति द्रष्टव्यम्। स्वप्ता। स्वप्स्यति। स्वपितु—स्वपितात्। स्वपिताम्। स्वपन्तु। स्वपिहि—स्वपितात्। स्वपितम्। स्वपित। स्वपानि। स्वपाव। स्वपाम। लङ्याह—अस्वपीत् अस्वपदिति। रुदश्च पञ्चभ्यः' इति ईटि 'अङ्गार्थंगालवयोः' इत्यटि च रूपे। अन्यानि रुदिवद्रूपाणि। लिङ्याह—सुप्यादिति। 'वचिस्वपि' इति सम्प्रसारणमिति भावः। 'सुविनिर्दुर्भ्यः' इति षत्वं मत्वा आह—सुषुप्यादिति। अस्वाप्सीदिति। अनिट्कत्वान्न सिज्लोप इति भावः। श्वस प्राणने इति। वलाद्यार्धधातुके सेडयम्। सार्वधातुके तु वलादौ 'रुदादिभ्यः' इति इट्। लङस्तिपि 'रुदश्च' इति ईटम् 'अङ्गार्थं' त्यटं च मत्वा आह—अश्वसीत् अश्वसदिति। विध्याशीर्लिङोः श्वस्यादिति सिद्धवत्कृत्य आह—श्वस्याताम्। श्वस्यास्तामिति। अन चेति। अनधातुरपि प्राणने वर्तते इत्यर्थः। सेडयम्। सार्वधातुकेऽपि वलादौ 'रुदादिभ्यः' इति इट्। लङि ईडटौ मत्वा आह—आनीत् आनदिति। अनितेः। 'रषाभ्यां नो णः' इत्यनुवर्तते। 'उपसर्गादसमासेऽपि' इत्यतः उपसर्गादिति। तदाह—उपसर्गस्थादिति। भिन्नपदस्थत्वादप्राप्तौ वचनम्। जक्षधातुः सेट्। वलादौ सार्वधातुकेऽपि 'रुदादिभ्यः' इति सेट। अदभ्यस्तात्। झस्येति। 'झोऽन्त' इत्यतस्तदनुवृत्तेरिति भावः। जक्षतीति। 'जक्षित्यादयः षट्' इत्यभ्यस्तसंज्ञेति भावः। लङस्तिपि ईडटोः अजक्षीत् अजक्षत इति सिद्धवत्कृत्य आह—सिजभ्यस्तेति। अदादेशापवादो जुस्। अन्तस्थादिरिति। तालव्यान्तस्थादिरित्यर्थः। बभ्रामेति। "जक्षत्क्रीडन् रममाणः" इत्युपनिषदि चवर्गतृतीयादित्यस्य निर्विवादत्वादिति भावः।

जागृधातुः ऋकारान्तः सेट्। जागर्तीति। तिपि शपो लुकि ऋकारस्य गुणे रपरत्वम्। जागृत इति। ङित्त्वान्न गुणः। जाग्रतीति। 'जक्षित्यादयः षट्' इत्यभ्यस्तसंज्ञा-

२३४१) इत्याम्वा । जागराञ्चकार—जजागार । २४८० जाग्रोऽविचिण्णल्ङित्सु ७।३।८५॥ जागर्तेर्गुणः स्याद्विचिण्णल्ङिद्भ्योऽन्यस्मिन्वृद्धिविषये प्रतिषेधविषये च । जजागरतुः । अजागः । अजागृताम् । अभ्यस्तत्वाज्जुस् । २४८१ जुसि च ७।३।८३॥ अजादौ जुसीगन्ताङ्गस्य गुणः स्यात् । अजागरुः । अजादौ किम् । जागृयुः। आशिषि तु जागर्यात् । जागर्यास्ताम् । जागर्यासुः। लुङि अजागरीत् । 'जागृ इस्' इत्यत्र यण्प्राप्तः, तं सार्वधातुकगुणो बाधते, तं सिचि वृद्धिः, तां जागर्तिर्गुणः, तत्र कृते हलन्तलक्षणा वृद्धिः प्राप्ता, 'नेटि' (सू २२६८) इति

याम् 'अदभ्यस्तात्' इति झेरदादेशः । ङित्त्वादृगुणनिषेधे ऋकारस्य यणिति भावः । जागर्षि । जागृथः । जागृथ । जागर्मि । जागृवः । जागृमः । ङिटि 'काम्यनेकाच्' इति नित्यमामि प्राप्ते आह—उषविदेत्याम् वेति । जागरामिति । आमि ऋकारस्य गुणो रपरत्वं चेति भावः । आमभावे आह—जजागारेति । अतुसादौ ङित्त्वादृगुणनिषेधे प्राप्ते—जाग्रोऽवि । 'जाग्र' इति षष्ठी । 'मिदेर्गुणः' इत्यतः गुण इत्यनुवर्तते । तदाह—जागर्तेर्गुणः स्यादिति । 'अविचिण्णल्ङित्स्विति च्छेदः । वि चिण् णल् ङित् एषां द्वन्द्वे नञ्समासः । तदाह—विचिण्णल्ङिद्भ्योऽन्यस्मिन्निति । चिण्णलपर्युदासात् वृद्धिविषयेऽप्यस्य प्रवृत्तिः । ङित्पर्युदासात् गुणप्रतिषेधविषयेऽप्यस्य प्रवृत्तिः । तदाह—वृद्धिविषये प्रतिषेधविषये चेति । जजागरतुरिति । अत्र किन्त्वेऽपि गुणः । जजागरुः । जजागरिथ । जजागरथुः । जजागार । जजागर । जजागरिव । जजागरिम । विचिण्णल्ङित्सु तु न गुणः । वि—जागृविः । चिण्—अजागारि । णल्—जजागार । ङित्—जागृतः । वृद्धिविषये यथा—ण्वुलि जागरकः । प्रतिषेधविषये यथा—जजागरतुः । किन्त्वेऽपि गुणः इत्यादूयूह्यम् । जागरिता । जागरिष्यति । जागर्तु-जागृतात् । जागृताम् । जाग्रतु । जागृहि-जागृतात् । जागृतम् । जागृत । जागराणि । जागराव । जागराम । लङ्याह—अजागरिति । तिपि इकारलोपे हलङ्यादिना तकारलोपे रेफस्य विसर्ग इति भावः । अभ्यस्तत्वाज्झो झेरदादेशे प्राप्ते आह—अभ्यस्तत्वाज्जुसिति । 'सिजभ्यस्तविदिभ्यश्च' इत्यनेनेति भावः । जक्षित्यादित्वादभ्यस्तत्वम् । अजागृ उस् इति स्थिते 'सार्वधातुकमपित्' इति ङित्त्वादविचिण्णल्ङित्स्विति पर्युदासादप्राप्ते गुणे आह—जुसि च । अङ्गस्येत्यधिकृतम् । 'मिदेर्गुणः' इत्यतः गुण इत्यनुवर्तते । 'इको गुणवृद्धी' इति परिभाषया इक इत्युपस्थितेन अङ्गस्य विशेषणात्तदन्तविधिः । 'क्सस्याचि' इत्यतोऽनुवृत्तेन अचीत्यनेन जुसीत्यस्य विशेषणात्तदादिविधिः । तदाह—अजादाविति । अजागरुरिति । अजागः । अजागृतम् । अजागृत । अजागरम् । अजागृव । अजागृम । विचिण्णल्ङित्सु यासुटो ङित्त्वाद्गुणः । जागृयात् । जागृयाताम् । जागृयुरिति । 'जुसि चे'त्यत्र अजादाविति युक्तेनं गुण इति भावः । आशिषि तु जागर्यादिति । 'किदाशिषि' इति यासुटः किरवात् 'जाग्रोऽविचिण्णल्ङित्सु' इति गुण इति भावः ।

निषिद्धा, ततः 'अतो हलादेः—' (सू २२८४) इति बाधित्वा 'अतो लान्तस्य' (सू २३३०) इति वृद्धिः प्राप्ता, 'क्ङिति—'(सू२२९९)इति निषिध्यते। तदाहुः—

'गुणो वृद्धिर्गुणो वृद्धिः प्रतिषेधो विकल्पनम् ।
पुनर्वृद्धिर्निषेधोऽतो यत्पूर्वाः प्राप्तयो नव ।' इति ।

१०७३ दरिद्रा दुर्गतौ । दरिद्राति । २४८२ इहरिद्रस्य ६।४।११४॥दरिद्रातेरिकारः स्याद्ध्रलादौ क्ङिति सार्वधातुके। दरिद्रितः । २४८३श्नाभ्यस्तयोरातः ६।४।११२॥ अनयोरातो लोपः स्याक्ङिति सार्वधातुके । दरिद्रति । अनेकाच्त्वादाम । दरिद्राञ्चकार । 'आत औ णलः' (सू २३७१) इत्यत्र औ इत्येव सिद्धे औकारविधान दरिद्रातेरालोपे कृते श्रवणार्थम्। अत एव शपकादाम्नेत्येके । ददरिद्रौ । ददरिद्रतुरित्यादि । यत्तु णलि ददरिद्रेति तन्निर्मूलमेव । 'दरिद्रातेरार्धधातुके

जागृधातोर्लुङि सिचि इटि यणादिप्राप्तिक्रमं दर्शयति—जागृ इस् इत्यत्रेति । तत्र कृते इति । *जाग्रोऽविचिण्णल्' इति गुणे रपरत्वे कृते अजागर् ईदिति स्थिते सतीत्यर्थः । तदाहुरिति । वृद्धा इति शेषः । अजागरिष्टाम् । अजागरिषुः । इत्यादि सुगमम् ।

दरिद्राधातुरादन्तः सेट् । दुर्गतिः धनहीनीभवनम् । दरिद्रातीति । धनहीनीभवतीत्यर्थः । इहरिद्रस्य । सौत्रो हस्वः । 'गमहन' इत्यतः क्ङितीत्यनुवर्तते । 'ई हल्यघोः' इत्यतः हलि इति 'अत उत्' इत्यतः सार्वधातुके इति । तदाह–दरिद्रातेरिति । 'श्नाभ्यस्तयोः' इत्यात्त्वोपापवादः । 'अलोऽन्त्यस्येत्यन्त्यस्य इकारः । दरिद्रित इति । 'सार्वधातुकमपित्' इति तसो ङित्त्वादाकारस्य इकारः । श्नाभ्यस्तयोरातः । 'गमहन' इत्यतः लोपः क्ङितीत्यनुवर्तते । 'अत उत्' इत्यतः सार्वधातुके इति । तदाह—अनयोरिति । आप्रत्ययस्य अभ्यस्तस्य चेत्यर्थः । दरिद्रतीति । जक्षित्यादित्वादभ्यस्तत्वात् 'अदभ्यस्तात्' इति झस्य अदादेशे आकारलोपः । दरिद्रासि । दरिद्रिथः । दरिद्रिथ । दरिद्रामि । दरिद्रिवः । दरिद्रिमः । लिट्याह—अनेकाच्त्वादामिति । इदञ्च 'कास्प्रत्ययात्' इति सूत्रभाष्ये स्पष्टम् । दरिद्राञ्चकारेति । आमि सवर्णदीर्घः । कैयटमतमाह—आत इति । 'आत औ णलः' इत्यत्र प्रथमातिक्रमे कारणाऽभावात् ओकार एव विधातुमुचितः । वृद्धौ सत्यां तावतैव ययौ इत्यादिसिद्धेः । तस्मादौकारविधानं दरिद्राधातोर्णलि 'दरिद्रातेरार्धधातुके लोपो वक्तव्यः' इत्यात्त्वोपे 'ददरिद्रौ' इत्यौकारश्रवणार्थं सम्पद्यते । ओकारविधाने तु आल्लोपे सति वृद्धेरसम्भवात् ददरिद्रो इत्योकार एव श्रूयेतेत्यर्थः । अत एवेति । अस्मादेव दरिद्रातेः औकारश्रवणार्थात् औकारविधानाद्दरिद्रातेर्लिटि आम् नेति विज्ञायते । आमि सति णल एवाऽप्रसक्तेरित्यर्थः । इदञ्च 'वस्वेकाजाद्घसाम्' इति सूत्रभाष्ये ध्वनितं, कैयटेन स्पष्टीकृतम् । तन्निर्मूलमेवेति । 'कास्प्रत्ययात्' इति 'वस्वेकाच्' इति सूत्रस्थभाष्यकैयटविरोधादिति भावः । ददरिद्रतुः ।

विवक्षिते आलोपो वाच्यः' (वा ४१४६) । 'लुङि वा' (वा ४१४२) । 'सनि यङुलि ल्युटि च न' (वा ५०५८) । दरिद्रिता । अदरिद्रात् । अदरिद्रिताम् । अदरिद्रुः । दरिद्रियात् । दरिद्र्यात् । अदरिद्रीत् । इट्सकौ-अदरिद्रासीत् । १०७४ चकासृ दीप्तौ । भ्वस्य अत् । चकासति । चकासाञ्चकार । 'घि च' (सू २२४९)

ददरिद्रुः । ददरिद्रिथ । ददरिद्रथुः । ददरिद्र । ददरिद्रौ । ददरिद्रिव । ददरिद्रिम । आर्धधातुके विवक्षिते इति । 'आतो लोप इटि च' इत्यालोपो दरिद्रातेर्भवन् किङति अकिङति च अजादावार्धधातुके भवति । स च आर्धधातुके विवक्षिते ततः प्रागेव भवतीति वक्तव्यमित्यर्थः । तेन दरिद्रातीति दरिद्रः, आल्लोपे कृते पचाद्यच् सिध्यति । आर्धधातुके परे आल्लोपप्रवृत्तौ तु 'इयाद्व्यधा' इत्यादन्तलक्षणो यप्रत्ययः स्यात् । ततश्च कृते णप्रत्यये आल्लोपं बाधित्वा 'आतो युक् चिण्कृतोः' इति युकि 'दरिद्राय' इति स्यात् । आर्धधातुके विवक्षिते ततः प्रागेव आल्लोपे तु कृते आदन्तत्वाऽभावात् णप्रत्ययाऽभावे पचाद्यच्प्रत्ययो निर्बाधः । तदिदं भाष्ये स्पष्टम् । लुङि वेति । लुङि आल्लोपो वा वक्तव्य इत्यर्थः । 'अद्यतन्यां वेति वक्तव्यम्' इति वार्तिकार्थसंग्रहोऽयम् । अद्यतन्यामित्यनेन अद्यतनभूतार्थकविहितलुङ्विभक्तिर्विवक्षिता, भाष्ये तस्या एवोदाहरणात् । सनि ण्वुलि ल्युटि च नेति । एतेषु दरिद्रातेरालोपो नेति वक्तव्यमित्यर्थः । ण्वुलि यथा—दरिद्रायकः, आतो युक् । ल्युटि यथा—दरिद्रायणः, अनादेशे कृते आल्लोपाऽभावात् सवर्णदीर्घः । सनि यथा-दिदरिद्रासति । अनन्तरस्येति न्यायादस्य वार्तिकप्राप्तस्यैव लोपस्याऽयं निषेधः । तेन 'तनिपतिदरिद्राणामुपसङ्ख्यानम्' इति दरिद्रातेः सनः इट्पक्षे 'आतो लोप इटि च' इत्यालोपो भवत्येव-दिदरिद्रिषति । तदुक्तं भाष्ये—'न दरिद्रायके लोपो दरिद्राणे च नेष्यते । दिदरिद्रासतीत्येके दिदरिद्रिषतीति वा' । दरिद्रितेति । तासि इटि उदाहृतवार्तिकेन आल्लोपः । 'आतो लोप इटि च' इत्यस्य सम्भवेऽपि न्याय्यत्वादत्र वार्तिकोपन्यासः । दरिद्रिष्यति । दरिद्रातु-दरिद्रितात् । दरिद्रिताम् । दरिद्रतु । दरिद्रिहि-दरिद्रितात् । दरिद्रितम् । दरिद्रित । दरिद्राणि । दरिद्राव । दरिद्राम । लङ्याह—अदरिद्रादिति । इत्त्वं मत्वा आह—अदरिद्रितामिति । अदरिद्रुरिति । जक्षित्यादित्वेन अभ्यस्तत्वाज्जुसिति भावः । अदरिद्राः । अदरिद्रितम् । अदरिद्रित । अदरिद्राम् । अदरिद्रिव । अदरिद्रिम । दरिद्र्यादिति । विधिलिङि सार्वधातुकत्वादित्त्वमिति भावः । आशीर्लिङ्याह—दरिद्र्यादिति । आतो लोप इति भावः । लुङ आतो लोपपक्षे आह—अदरिद्रीदिति । अदरिद्रिष्टामित्यादि । आल्लोपाभावपक्षे त्वाह—इट्सकाविति । अदरिद्रिष्यत् । चकासृ दीप्ताविति । ऋदित् । सेट् । चकास्ति । चकास्तः इति सिद्धवत्कृत्य आह—झस्य अदिति । जक्षित्यादित्वेन अभ्यस्तत्वादिति भावः । चकासतीति । चकास्सि । चकास्थः । चकास्थ । चकास्मि । चकास्वः । चकास्मः । चकासाञ्चकारेति । अनेकाच्त्वादामिति भावः । चकासिता ।

इति सलोपः सिच एवेत्येके। चकाद्धि। 'चकाधि' इत्येव भाष्यम्। २४८४ तिप्यनस्तेः ८।२।७३॥ पदान्तस्य सस्य दः स्यात् तिपि न त्वस्तेः। (ससजुषोरित्यस्यापवादः) अचकात्—अचकाद्। अचकासुः। २४८५ सिपि धातो रुर्वा ८।२।७४॥ पदान्तस्य धातोः सस्य रुः स्याद्वा। पक्षे दः, अचकाः—अचकात्। १०७५ शासु अनुशिष्टौ। शास्ति। २४८६ शास इदङ्हलोः ६।४।३४॥ शास उपधाया इत्स्यादङि हलादौ क्ङिति च। 'शासिवसि—' (सू २४१०) इति षः। शिष्टः। शासति। शशास। शशासतुः। शास्तु। शिष्टात्। शिष्टाम्। शासतु। २४८७ शा हौ ६।४।३५॥ शास्तेः शादेशः स्याद्धौ परे। तस्याभीयत्वेनासिद्ध-

---

चकासिष्यति। चकास्तु। चकास्ताम्। चकासतु। हेर्धिभावे चकास् धि इति स्थिते 'धि च' इति सलोप इति सिद्धान्तः। तत्र मतान्तरमाह—सिच एवेत्येके इति। 'धि च' इति लोपः सिच एवेत्येके मन्यन्ते इत्यर्थः। 'धिसकारे सिचो लोपः चकाद्धीति प्रयोजनम्' इति वार्तिकादिति तदाशयः। अस्मिन्पक्षे सकारस्य जश्त्वेन दकारः। तदाह—चकाद्धीति। 'एके' इत्यस्वरसोद्भावनम्। तद्बीजं तु 'धिसकारे सिचो लोपः' इति वार्तिकं प्रत्याख्याय सकारमात्रस्य 'धि च' इति लोपस्याभ्युपगमः। तदाह—चकाधीत्येव भाष्यमिति। चकास्तात्। चकास्तम्। चकास्त। चकासानि। चकासाव। चकासाम। क्ङि अ चकास् त् इति स्थिते—तिप्यनस्तेः। न अस्तिः अनस्तिः तस्येति विग्रहः। पदस्येत्यधिकृतम्। 'झलां जशोऽन्ते' इत्यतः अन्ते इत्यनुवर्तते। 'ससजुषोः' इत्यतः स इति षष्ठ्यन्तमनुवर्तते। 'वसुस्रंसुध्वंस्वनडुहां दः' इत्यतः द इति। तदाह—पदान्तस्येत्यादिना। अनस्तेः किम्। 'सलिलं सर्वमा इदम्'। 'आः' इत्यस्यातोर्लङस्तिपि इकारलोपे 'बहुलं छन्दसि' इति 'अस्तिसिचः' इति ईडभावे हल्ङ्यादिलोपे रूपम्। प्रकृते तु चकासेर्लङस्तिपो हल्ङ्यादिलोपे सकारस्य दत्वे 'वाऽवसाने' इति चर्त्वजश्त्वे इत्यभिप्रेत्याह—अचकात् अचकादिति। अचकासुरिति। सिजभ्यस्तेति जुसिति भावः। सिपि धातो रुर्वा। पदस्येत्यधिकृतम्। 'झलां जशोऽन्ते' इत्यतः अन्ते इत्यनुषक्तम्। 'ससजुषोः' इत्यतः सः इति लुप्तषष्ठीकमनुवर्तते। तदाह—पदान्तस्येति। पक्षे इति। वसुस्रंस्वित्यतः तदनुवृत्तेरिति भावः। सिपि धातुरवस्य अव्यभिचाराद्धातोरित्युत्तरार्थम्। अचकासीत्। अचकासिष्यत्। शासुधातुरदित् सेट्। शास इदङ्हलोः। 'आनदितां हलः' इत्यतः उपधायाः क्ङिति इत्यनुवर्तते इति। तदाह—शास उपधाया इति। शास्तीति। जक्षादित्वेन अभ्यस्तत्वाददादेश इति भावः। शास्सि। शिष्टः। शिष्ठ। शास्मि। शिष्वः। शिष्मः। 'आशास्ते' इत्यत्र तु नेत्त्वम् अङ्योरस्य परस्मैपदिन एव ग्रहणादिति भाष्ये स्पष्टम्। शशासेति। शशासिथ। शासिता। शासिष्यति। शास् हि इति स्थिते आह—शा हौ। 'शा' इति लुप्तप्रथमाकम्। 'शास इदङ्' इत्यतः शास इत्यनुवर्तते। तदाह—शास्तेरिति। इत्त्वापवादः। ननु शास्तेः शा-

स्वाद्धेर्धिः । शाधि । अशात् । अशिष्टाम् । अशासुः । अशात् । अशाः । शिष्यात् । 'सर्तिशास्ति—' (सू २३८२) इत्यङ् । अशिषत् । अशासिष्यत् । १०७६ दीधीङ् दीप्तिदेवनयोः । एतदादयः पञ्च धातवश्छान्दसाः । दीधीते । 'एरनेकाचः—'(सू २७२) इति यण् । दीध्याते । २४८८ यीवर्ण्योर्दीधीवेव्योः ७।४।५३॥ एतयोरन्त्यस्य लोपः स्याद्यकारे इवर्णे च परे । इति लोपं बाधित्वा नित्यत्वाट्टेरेत्वम् । दीध्ये । 'दीधीवेवीटाम्' (सू २१६०) इति गुणनिषेधः । दीध्याञ्चक्रे । दीधिता । दीधिष्यते । १०७७ वेवीङ् वेतिना तुल्ये । वी गतीरयनेन तुल्येऽर्थे वर्तत इत्यर्थः ।

अथ त्रयः परस्मैपदिनः । १०७८ षस १०७९ षस्ति स्वप्ने । सस्ति । सस्तः ।

भावे सति झल्परत्वाभावात्कथं हेर्धिरित्यत आह—तस्याभीयत्वेनेति । यद्यपि 'धि च' इति सलोपे शाधीति सिद्धम् । तथापि सलोपस्याऽसिद्धत्वात् 'शास इत्' इति इत्त्वं स्यात् । तन्निवृत्तये शाविधानमित्याहुः । ङङ्याह—अशादिति । 'तिप्यनस्तेः' इति दित्वे चर्त्वविकल्प इति भावः । अशासुरिति । अभ्यस्तत्वाज्जुसिति भावः । अशाः अशादिति । 'सिपि धातोः' इति रुत्वदत्वविकल्प इति भावः । अशिष्टम् । अशिष्ट । अशासम् । अशिष्व । अशिष्म । शिष्यादिति । 'शास इत्' इति इत्त्वे 'शासिवसि' इति ष इति भावः । अशिषदिति । अङि इत्त्वमिति भावः । दीधीङ्धातुरीकारान्तः । ङित्त्वादात्मनेपदी । एतदादयः पञ्चेति । इदं च माधवानुरोधेन । तत्त्वं त्वग्रे वक्ष्यते । जक्षित्यादित्वादभ्यस्तत्वाज्झस्य अदादेशः । दीध्यते । दीधीषे । दीध्याथे । दीधीध्वे । लट इडादेशे आह—यीवर्ण्योर्दीधीवेभ्यः । यिश्च इवर्णश्चेति द्वन्द्वात्सप्तमी । 'यि' इत्यत्र इकार उच्चारणार्थः । 'तासस्त्योः' इत्यतो लोप इत्यनुवर्तते । 'अलोन्त्यस्य' इत्यन्त्यस्य लोपः । तदाह—एतयोरित्यादि । 'आदीध्य गतः' 'आवेव्य गतः' । अत्र ल्यपि ईकारस्य लोपः । इवर्णे उदाहरणं वक्ष्यते । इति लोपमिति । लट इडादेशे दीधी इ इत्यत्र 'यीवर्ण्योः' इति इवर्णपरत्वात्प्राप्तं लोपं परमपि बाधित्वा नित्यत्वाट्टेरेत्वमित्यर्थः । कृते अकृते च लोपे प्रवृत्तेरेत्वं नित्यम् । तस्मिन्कृते यीवर्ण्यपरकत्वाऽभावान्न लोप इति भावः । गुणनिषेध इति । दीधी आमिति स्थिते 'सार्वधातुकार्धधातुकयोः' इति प्राप्तस्य निषेध इत्यर्थः । दीधितेति । इटि कृते इवर्णपरकत्वादीकारस्य लोप इति भावः । दीधीताम् । दीध्याताम् । दीध्यताम् । दीधीष्व । दीध्याथाम् । दीधीध्वम् । दीध्ये । दीध्यावहै । दीध्यामहै । अदीधीत । अदीध्याताम् । अदीध्यत । अदीधीथाः । अदीध्याथाम् । अदीधीध्वम् । अदीधि । अदीधीवहि । अदीधीमहि । दीधीत । दीधीयाताम् । दीधिषीष्ट । दीधिषीयास्ताम् । दीधिषीरन् । अदीधिष्ट । अदीधिष्यत । वस्तुतस्तु छन्दसि दृष्टानुविधित्वादेषां पञ्चानां लोकानुसारेण रूपवर्णनमनुचितम् । वेवीङ् वेतिना तुल्ये इति । दीधीवद्रूपाणि । इति जक्षित्या-

सन्ति । ससास । सेसतुः । सस्तु । सधि । 'पूर्वत्रासिद्धम्' (सू १२) इति सलोपस्यासिद्धत्वात् 'अतो हेः' (सू २२०२) इति न लुक् । असत् । असस्ताम् । असः । असत् । सस्यात् । असासीत् । असंसीत् । सन्ति । इदित्त्वान्नुमि कृते 'संस्त् तस' इति स्थिते 'स्कोः—' (सू ३८०) इति सलोपे 'झरो झरि सवर्णे' (सू ७१) इति तकारस्य वा लोपः । सन्तः । संस्तन्ति । बहूनां समवाये द्वयोः संयोगसंज्ञा नेत्याश्रित्य 'स्कोः—' (सू ३८०) इति लोपाभावात् । संस्ति ।

द्वयः । षस षस्लि स्वप्ने इति । षोपदेशावेतौ । द्वितीय इदित् । तत्र षसधातोरुदाहरति—सस्तीति । ससन्तीति । अनभ्यस्तत्वादन्तादेश एवेति भावः । एत्त्वाभ्यासलोपौ मत्वा आह—सेसतुरिति । सेसुः । सेसिथ । सेसथुः । सेस । ससास । सस्स । सेसिव । सेसिम । समिता । सस्सिष्यति । सस्तु । सस्तात् । सस्ताम् । ससन्तु । सस्—हि इति स्थिते हेर्धिभावे 'धि च' इति सलोपं मत्वा आह—सधीति । तत्र 'धि' इत्यस्य स्थानिवत्त्वेन हित्वात् 'अतो हेः' इति लुकमाशङ्क्य आह—पूर्ववेति । सस्तात् । सस्तम् । सस्त । ससानि । ससाव । ससाम । लङ्याह—असदिति । असस् त् इति स्थिते हल्ङ्यादिना तकारलोपे 'तिप्यनस्तेः' इति सस्य दत्वमिति भावः । असस्तामिति । अससन् इत्यपि ज्ञेयम् । लङः सिपि तु असस् स् इति स्थिते 'सिपि धातोः' इति रुर्वा, पक्षे दः, हल्ङ्यादिलोपः । तदाह—असः असदिति । असस्तम् । असस्त । असस्म । असस्व । असस्म । लिङ्याह—सस्यादिति । सस्याताम् । सस्यास्ताम् इत्यादि । लुङ्याह—असासीदिति । 'अतो हलादेः' इति वृद्धिविकल्प इति भावः । असंसिष्यत् ।

अथ षस्तिधातोरुदाहरतीति—सन्तीति । इदित्त्वान्नुम् । 'नश्च' इत्यनुस्वारे संस् त् ति इति स्थिते, 'स्कोः' इति सलोपे, परसवर्णे, 'झरो झरि' इति प्रथमतकारस्य लोपविकल्पे, एकतं द्वितं वा रूपमिति भावः । संस्तन्तीति । अनभ्यस्तत्वादन्तादेश एवेति भावः । सिपि संस्त् सि इति स्थिते 'स्कोः' इति सलोपे अनुस्वारस्य परसवर्णो नकारः । सवर्णपरत्वाऽभावात् 'झरो झरि' इति तकारलोपो न । सन्सि । सन्थः । सन्थ । संस्मि । संस्वः । संस्मः । ससंस्त । ससंस्ततुः । ससंस्तिथ । ससंस्तिव । ससंस्तिम । संस्तिष्यति । सन्तु-सन्तात् । सन्ताम् । संस्तन्तु । संस् त् हि इति स्थिते हेर्धिभावे 'स्कोः' इति सलोपे परसवर्णे सन्त् धि इति स्थिते 'झरो झरि' इति तकारस्य लोपः । सन्धि । लोपाभावे तकारस्य जश्त्वे सन्द्धि-सन्तात् । सन्तम् । सन्त । संस्तानि । संस्ताव । संस्ताम । लङस्तिपि असंस्त् त् इति स्थिते हल्ङ्यादिलोपे संयोगादिलोपे संयोगान्तस्य लोपे असन् । असन्ताम् । असंस्तन् । असन् । असन्तम् । असन्त । असस्तम् । असंस्त्व । असंस्म । संस्यात् । असंस्तीत् । असंस्तिष्यत् । मतान्तरमाह—बहूनामिति । इत्याश्रित्येति । तथाच प्रकृते लुङस्तिपि संस्त् ति

संस्तः । संस्तन्ति इत्येके । १०८० वश कान्तौ । कान्तिरिच्छा । वष्टि । उष्टः । उशन्ति । वक्षि । उष्ठः । उवाश । ऊशतुः । वशिता । वष्टु । उष्टात् । उष्टाम् । उवृढि । अवट् । औष्टाम् । औशन् । अवशम् । उश्याताम् । उश्यास्ताम् । अवाशीत् । अवशीत् । १०८१ 'चर्करीतं च' (ग सू १९५) । यङ्लुगन्तमदादौ बोध्यम् । १०८२ हनुङ् अपनयने । हनुते । जुहनुवे । हनुवीत । होषीष्ट । अहोष्ट ।

इति तिङन्तेऽदादिप्रकरणम् ।

इति स्थिते झलि परे अनुस्वारसकारतकाराणां त्रयाणां समवायात् स् त् इत्यनयोः संयोगसंज्ञाविरहात् 'स्कोः' इति लोपाऽभावात् संस्तीत्यादूह्यमित्यर्थः । वश कान्ताविति । कान्तिरिच्छा । सेट् । वष्टीति । 'ग्रश्च' इति शस्य षत्वे तकारस्य ष्टुत्वेन टः । उष्टः इति । ङिति 'ग्रहिज्या' इति सम्प्रसारणे रूपमिति भावः । उवाशेति । लिटि अकिति 'लिट्यभ्यासस्य' इति सम्प्रसारणमिति भावः । ऊशतुरिति । परत्वादूग्रहिज्येति सम्प्रसारणे कृते द्वित्वे हलादिशेषे सवर्णदीर्घ इति भावः । उवशिथ । ऊशथुः । ऊश । उवाश । उवश । ऊशिव । ऊशिम । वशिरेति । अनेन सेट्त्वं द्योतितम् । वशिष्यति । उष्टामिति । उशन्तित्यपि ज्ञेयम् । उवृढीति । वश् हि इति स्थिते विभाषे अपित्त्वेन ङिच्चात् ग्रहिज्येति सम्प्रसारणे शस्य षत्वे धस्य ष्टुत्वेन ढकारे षस्य जश्त्वेन ड इति भावः । वशानि । वशाव । वशाम । लङ्याह—अवडिति । हलन्त्यादिलोपे शस्य षः, षस्य डः, तस्य चर्त्वविकल्प इति भावः । औशन्निति । अवट् । औष्टम् । औष्ट । अवशमिति । पित्त्वाच्च सम्प्रसारणमिति भावः । औश । औशम । विध्याशीर्लिङोः उश्यादिति सिद्धवत्कृत्य आह—उश्याताम् उश्यास्तामिति । अवशीत्, अवाशीत् । अवशिष्यत् । तदेवं दीधीङ्, वेवीङ्, षस, षस्ति, वश, एते पञ्च धातवः छान्दसा एवेति माधवादयः । तत्र 'दीधीवेवीटाम्' इति सूत्रे 'दीधीवेव्योश्छन्दोविषयत्वा'दिति भाष्यम् । 'जक्षित्यादयः षट्' इति सूत्रे 'षसिवशी छान्दसा'विति भाष्यम् । एतद्भाष्यादेव षस्तिधातोर्नात्र पाठ इति प्रतीयते । अत एव 'षस शास्ति स्वप्ने' इति पाठमभ्युपगम्य शितपा निर्देशेन शास एवार्थभेदात् पुनः पाठ इति कैयट आह । अत्र वशधातोरपि छान्दसत्ववचनं प्रायिकम्, 'वष्टि भागुरिरल्लोपम्' 'जयाय सेनान्यमुशन्ति देवाः' इत्यादिप्रयोगदर्शनादिति स्तां तावत् । चकरीतं चेति । धातुपाठे गणसूत्रमिदम् । 'चकरीतम्' इति यङ्लुगन्तस्य संज्ञा पूर्वाचार्यसिद्धा । तदाह—यङ्लुगन्तमदादाविति । तेन यङ्लुगन्ताच्छबेव विकरणः तस्य लुक्; न तु श्यनादि विकरणान्तरम् । 'परस्मैपदिन' इत्युपक्रमाद्यङ्लुगन्तस्य परस्मैपदित्वमेव । हनुङ् अपनयने इति । अनिदयम् । हुते इति । हुवाते । हुवते इत्यादि । जुहुवे इति । जुहुवाते । जुहुविरे । क्रादिनियमादिट् । जुहुविषे । जुहुविवहे । होता । होष्यते । हुताम् । हुत्वा । हवै । हवावहै । अहुत । इति सिद्धवत्कृत्य विधिलिङ्याह—हुवीतेति । आशीर्लिङ्याह—होषीष्टेति । लुङ्याह—अहोष्टेति । इति तिङन्तेऽदादि लुग्विकरणं समाप्तम् ।

अथ तिङन्ते जुहोत्यादिप्रकरणम् ॥ ३ ॥

१०८३ हु दानादनयोः। 'आदाने च' इत्येके। 'प्रीणनेऽपि' इति भाष्यम्। दानं चेह प्रक्षेपः। स च वैधे आधारे हविषश्चेति स्वभावाल्लभ्यते। इतश्चत्वारः परस्मैपदिनः। २४८६ जुहोत्यादिभ्यः श्लुः २।४।७५॥ शपः श्लुः स्यात्। २४९० श्लौ ६।१।१० ॥ धातोर्द्वे स्तः। जुहोति। जुहुतः। 'अदभ्यस्तात्' (सू २४७९ इत्यत्। 'हुश्नुवोः—' (सू २३८७) इति यण्। जुह्वति। २४९१ भीहीभृहुवां श्लुवच्च ३।१।३९॥ एभ्यो लिट्याम्वा स्यात्, आमि श्लाविव कार्यं च। जुहवाञ्चकार-जुहाव। होता। होष्यति। जुहोतु-जुहुतात्। 'हेर्धिः' जुहुधि। आटि परत्वाद्गुणः। जुहवानि। परत्वात् 'जुसि च' (सू २४८१) इति गुणः। अजुहवुः। जुहुयात्। हूयात्। अहौषीत्। १०८४ ञि भी भये। बिभेति।

अथ श्लुविकरणा धातवो निरूप्यन्ते। हु दानादनयोरिति। दाने अदने चेत्यर्थः। भाष्यमिति। 'तृतीया च होश्छन्दसि' इति सूत्रस्थमिति शेषः। ननु यदि दानमिह प्रसिद्धं विवक्षितं तर्हि 'ब्राह्मणाय गां ददाती'त्यत्र जुहोतीत्यपि प्रयोगः स्यादित्यत आह—दानं चेह प्रक्षेप इति। नन्वेवमपि कूपे घटं प्रक्षिपति, आहवनीये जलं प्रक्षिपतीत्यत्रापि जुहोतीति प्रयोगः स्यादित्यत आह— स चेति। सः प्रक्षेपः विधिबोधिते आधारे आहवनीयादौ पुरोडाशादिहविष इति लभ्यते इत्यन्वयः। कुत इत्यत आह—स्वभावादिति। अनादिसिद्धलोकव्यवहारादित्यर्थः। तथाच विधिशोधिते आधारे विधिबोधितस्य देवतायै त्यज्यमानस्य हविषः प्रक्षेपे हुधातुर्वर्तते इति फलितम्। एतच्च पूर्वमीमांसायां तृतीये 'सर्वप्रदानं हविषस्तदर्थत्वात्' इत्यधिकरणे अध्वरमीमांसाकुतूहलवृत्तौ प्रपञ्चितमस्माभिः। जुहोत्यादिभ्यः श्लुः। शपः इति। 'अदिप्रभृतिभ्यः' इत्यतस्तदनुवृत्तेरिति भावः। हु श्र ति इति स्थिते शपः श्लौ कृते हु ति इति स्थिते—श्लौ। शेषं पूरयति—धातोर्द्वे स्त इति। 'एकाचो द्वे' इत्यतः 'लिटि धातोः' इत्यतश्च तदनुवृत्तेरिति भावः। द्विर्वे कृते अभ्यासकार्यमभिप्रेत्य आह—जुहोतीति। यणिति। उवङपवाद इत्यर्थः। भीहीं। भी, ही, भृ, हु, द्वन्द्वात्पञ्चम्यर्थे षष्ठी। 'कास्प्रत्ययात्' इत्यतः आम् लिटीत्यनुवर्तते। तदाह—य(ते)भ्य इति। 'श्लुव'दिति सप्तम्यन्ताद्वतिरित्यभिप्रेत्य आह—आमि श्लाविव कार्यं चेति। जुहवामिति। आमि श्लाविव द्विर्वे गुण इति भावः। जुहावेति। जुह्वतुः। जुहविथ-जुहोथ। जुहुविव। हेर्धिरिति। 'हुश्नुभ्यो हेर्धिः' इत्यनेनेति भावः। 'जुहवानी'त्यत्र आटः पित्त्वेन अङित्त्वात् गुणे प्राप्ते तं बाधित्वा 'हुश्नुवोः' इति यणि प्राप्ते आह—आटि परत्वादिति। 'हुश्नुवोः' इत्यपेक्षया गुणः परत्वाद्भवतीत्यर्थः। लङि अजुहोत्, अजुहुताम् इति सिद्धवत्कृत्य 'सिजभ्यस्त' इति जुसि 'हुश्नुवोः' इति यणमाशङ्क्य आह—परत्वाज्जुसि चेते गुण इति। अजुहवुरिति।

२४६२ भियोऽन्यतरस्याम् ६।४।११५॥ इकारः स्याद्वलादौ क्ङिति सार्वधातुके। बिभितः—बिभीतः। बिभ्यति। बिभयाञ्चकार। बिभाय। भेता। १०८५ ह्री लज्जायाम्। जिह्रेति। जिह्रीतः। जिह्रियति। जिह्रयाञ्चकार। जिह्राय। १०८६ पॄ पालनपूरणयोः। २४६३ अतिपिपर्त्योश्च ७।४।७७॥ अभ्यासस्येकारोऽन्तादेशः स्यात् श्लौ। २४१४ उदोष्ठ्यपूर्वस्य ७।१।१०२॥ अङ्गावय-

अजुहोः। अजुहुतम्। अजुहुत। अजुहवम्। अजुहुव। अजुहुम। अहौषीदिति। सिचि वृद्धिः। अहौष्टामित्यादि। अहोष्यत्। झि भो भये इति। अनिट। ईदन्तः। शपः श्लौ द्वित्वादि मत्वा आह—बिभेतीति। भियोऽन्यतरस्याम्। 'हृहरिद्रस्य' इत्यतः हृदिति 'गमहन' इत्यतः क्ङितीति 'ई हल्यघोः' इत्यतः हलीति 'अत उत्' इत्यतः सार्वधातुके इति चानुवर्तते इत्यभिप्रेत्य शेषं पूरयति—इकारः स्यादित्यादिना। बिभ्यतीति। 'अदभ्यस्तात्' इत्यत्। बिभयामिति। 'भीह्रीभृहुवां श्लुवच्च' इति श्लुवत्त्वात् द्वित्वादीति भावः। बिभायेति बिभ्यतुः। बिभयिथ-बिभेथ। बिभ्यिव। बिभ्यिम। भेतेति। भेष्यति। बिभेतु-बिभितात्-बिभीतात्। बिभिताम्-बिभीताम्। बिभ्यतु। बिभिहि-बिभीहि-बिभितात्-बिभीतात्। बिभितम्-बिभीतम्। बिभित-बिभीत। बिभयानि। बिभयाव। बिभयाम। अबिभेत्। अबिभिताम्-अबिभीताम्। अबिभयुः। अबिभेः। अबिभितम्-अबिभीतम्। अबिभित-अबिभीत। अबिभयम्। अबिभिव-अबिभीव। अबिभिम-अबिभीम। बिभियात्-बिभीयात् इत्यादि। आशीर्लिङि, भीयात्। भीयास्ताम्। अभैषीत्। अभेष्यत्। ह्री लज्जायामिति। अनिट्। जिह्रियतीति। 'अदभ्यस्तात्' इत्यत्। इयङ्। जिह्रयामिति। 'भीह्रीभृहुवाम्' इत्याम्। श्लुवत्त्वात् द्वित्वादीति भावः। जिह्रायेति जिह्रयिथ-जिह्रेथ। जिह्रियिव। ह्रेता। ह्रेष्यति। जिह्रेतु—जिह्रीतात्। जिह्रीहि। जिह्रयाणि। अजिह्रेत्। जिह्रीयात्। ह्रीयात्। अह्रैषीत्। अह्रेष्यत्। पॄधातुः सेट्। लटस्तिपि शपः श्लौ द्वित्वे पॄ पॄ इति स्थिते—अतिपिपर्त्योश्च। 'अन्य लोपः' इत्यस्मादभ्यासस्येति 'भृञामित्' इत्यस्मात् इदिति 'निजां त्रयाणाम्' इत्यतः श्लाविति चानुवर्तते इत्यभिप्रेत्य शेषं पूरयति—अभ्यासस्येत्यादिना। तथाच अभ्यासे ऋकारस्य इत्त्वे रपरत्वे हलादिशेषे उत्तरखण्डस्य गुणे रपरत्वे पिपर्तीति वक्ष्यति। तत्र उत्तरखण्डे ऋकारस्य उत्वं शङ्कितुमाह—उदोष्ठ्य। 'ऋत इद्धातोः' इत्यतः ऋत इत्यनुवर्तते। अङ्गस्येत्यधिकृतमिहानुवृत्तमावर्तते। पूर्वमवयवषष्ठ्यन्तम् ओष्ठ्यस्य विशेषणम्। अपरंतु ऋता विशेष्यते। तदन्तविधिः। तदाह—अङ्गावयवौष्ठ्येत्यादिना। अङ्गावयवेति किम्। समीर्णः। 'ॠ गतौ क्र्यादिः। तस्मात्सम्पूर्वात् क्तप्रत्यये 'श्र्युकः किति' इति इण्निषेधे 'ऋत इद्धातोः' इति इत्त्वे रपरत्वे 'हलि च' इति दीर्घे 'रदाभ्याम्' इति निष्ठानत्वे तस्य णत्वे समीर्ण इति रूपम्। तत्र मकारात्मकौष्ठ्यपूर्वत्वादित्त्वं बाधित्वा उत्त्वं स्यात्। 'अङ्गावयवे'त्युक्तौ तु मकारस्य

वौष्ठ्यपूर्वो य ऋत् तदन्तस्याङ्गस्य उत्स्यात् । गुणवृद्धी परत्वादिमं बाधेते । पिपर्ति । उत्त्वं, रपरत्वं । 'हलि च' (सू ३५४) इति दीर्घः । पिपूर्तः । पिपुरति । पपार । किति लिटि 'ऋच्छत्यृताम्' (सू २३८३) इति गुणे प्राप्ते । **२५६५ शृदृप्रां ह्रस्वो वा ७।४।१२॥** एषां किति लिटि ह्रस्वो वा स्यात् । पक्षे गुणः । पप्रतुः । पप्रुः । पपरतुः । पपरुः । परिता-परीता । अपिपः । अपिपूर्तम् । अपिपरुः । पिपूर्यात् । पूर्यात् । अपारीत् । अपारिष्टाम् । 'ह्रस्वान्तोऽयम्' इति केचित् । पिपर्ति । पिपृतः । पिप्रति । पिपृयात् । आशिषि, प्रियात् । अपार्षीत् । पाणिनीयमते तु 'तं रोदसी पिपृतम्' इत्यादौ छान्दसत्वं शरणम् । १०८७ डु भृञ् धार-

---

ओष्ठ्यस्य अङ्गावयवत्वाभावादुत्त्वं न भवति । तथाच प्रकृतेऽपि पृ तीत्यत्र इदमुत्त्वं स्यादिति शङ्का प्राप्ता, तां परिहरति—गुणवृद्धी इति । इममिति । उत्त्वविधिमित्यर्थः । पिपर्तीति । उत्त्वात्परत्वाद्गुण इति भावः । पिपृ तस् इति स्थिते आह—उत्त्वमिति । ङित्त्वेन गुणाऽभावात् उदोष्ठ्येत्युत्त्वमिति भावः । पिपुरतीति । अभ्यस्तत्वाददादेशे ङित्त्वादगुणाभावादुत्त्वमिति भावः । पिपर्षि । पिपूर्थः । पिपूर्थ । पिपर्मि । पिपूर्वः । पिपूर्मः । लिटि णलयाह—पपारेति । उत्त्वात्परत्वादुद्बुद्धिरिति भावः । 'अर्तिपिपर्त्योश्च' इत्यभ्यासस्य नेत्त्वम्, तत्र श्लावित्यनुवृत्तेः । प्राप्ते इति । गुणे नित्यं प्राप्ते इत्यर्थः । शृदृ प्राम् । शृ दृ पृ एषां द्वन्द्वः । लिटीति । 'दयतेर्दिगि लिटि' इत्यतः तदनुवृत्तेरिति भावः । यद्यपि पूर्वसूत्रेषु क्वापि कितीति न दृष्टं तथापि अस्य 'ऋच्छत्यृताम्' इति गुणाऽपवादत्वात् गुणस्य च तस्य किदर्थत्वात्कितीत्युक्तम् । पपरतुरिति । पपृ अतुस् इति स्थिते ऋकारस्य ह्रस्वे तस्य यणिति भावः । गुणपक्षे आह—पपरतुरिति । गुण एव तु न विकल्पितः । गुणाऽभावे 'वार्णादाङ्गं बलीयः' इति यणं बाधित्वा 'उदोष्ठ्य' इत्युत्त्वप्रसङ्गात् । पपरिथ । पप्रथुः-पपरथुः । पप्र-पपर । पपार-पपर । पप्रिव-पपरिव । 'वृतो वा' इति दीर्घविकल्पं मत्वा आह—परिता परीतेति । परिष्यति-परीष्यति । पिपर्तु-पिपूर्तात् । पिपूर्ताम् । पिपुरतु । पिपूर्हि-पिपूर्तात् । पिपूर्तम् । पिपूर्त । पिपराणि । पिपराव । पिपराम । लङ्याह—अपिपरिति । अपि पृ त् इति स्थिते गुणे रपरत्वे हल्ङ्यादिना तकारलोपे रेफस्य विसर्गः । अपिपरुरिति । अभ्यस्तत्वात् जुस् । कृते 'जुसि च' इति गुणे रपरत्वम् । अपिपः । अपिपूर्तम् । अपिपूर्त । अपिपरम् । अपिपूर्व । अपिपूर्म । केचिदिति । अन्ये आचार्याः इत्यर्थः । ह्रस्वान्तत्वपक्षे 'उदोष्ठ्य' इत्युत्त्वं नेति मत्वा आह—पिपृत इति । ह्रस्वान्तस्य अनिट्त्वाल्लुङादौ पर्तन्यादि । पिपृहि । अपार्षीदिति । ह्रस्वान्तस्य अनिट्त्वान्न सिज्लोप इति भावः । नन्वाचार्यान्तरसम्मतं ह्रस्वान्तत्वं कुतोऽस्माभिरादर्तव्यम् इत्यत आह—पाणिनीयेति । पाणिनिसम्मतदीर्घान्तत्वस्यैवाश्रयणे 'तं रोदसी पिपृतम्' इत्यादौ 'उदोष्ठ्य' इत्युत्त्वापत्त्या ऋकारस्य ह्रस्वस्य श्रवणाऽनापत्त्या तद्विषये छान्दसत्वमेव शरणमनुसरणीयं स्यादि-

णपोषणयोः । २४९६ भृञ्जामित् ७।४।७६॥ भृञ् माङ् ओहाङ् एषां त्रयाणा-मभ्यासस्य इत्स्यात् श्लौ । बिभर्ति । बिभृतः । बिभ्रति । बिभृष्वे । श्लुवद्भावात् द्वित्वेरत्वे । बिभरामास–बभार । बभर्थ । बभूव । बिभृहि । बिभराणि । अबिभः । अबिभृताम् । अबिभरुः । बिभृयात् । भ्रियात् । भृषीष्ट । अभार्षीत् । अभृत । १०८८ माङ् माने शब्दे च । २४९७ ईं हल्यघोः ६।४।११३॥ आभ्यस्तयोरात

स्यर्थः । डु भृञिति । अनिदयं ञित्त्वादुभयपदी । श्लौ सति द्वित्वादौ बिभर्तीत्यादि स्थितम् । भृञामित् । भृञामिति बहुवचनाद्भ्रञादीनामिति लभ्यते । 'अत्र लोपः' इत्यतः अभ्यासस्येति 'निजां त्रयाणां गुणः श्लौ' इत्यतः त्रयाणां श्लाविति चानुवर्तते । तदाह—भृञ् माङित्यादिना । बिभ्रतीति । अभ्यस्तत्वाददादेशे यण् । बिभर्षि । बिभृथः । बिभृथ । बिभर्मि । बिभृवः । बिभृमः । बिभृते । बिभ्राते । बिभ्रते । बिभृषे । बिभ्राथे । इति सिद्धवत्कृत्य आह—बिभृष्वे इति । बिभ्रे । बिभृवहे । बिभृमहे । श्लुवद्भावादिति । 'भीह्रीभृहुवाम्' इत्यनेन इति भावः । बिभरामासेति । अनुप्रयोगसामर्थ्यादस्तेः भूभावो नेति भावः । बभारेति । श्लावित्यनुवृत्तेर्भृञामिदिति नेत्त्वम् । बभ्रतुः । बभ्रुः इत्यपि ज्ञेयम् । 'कृसृभृवृ' इति लिटि इण्निषेधः । यल्यपि 'अचस्तास्वत्' इति नित्यमिण्निषेधः, ऋदन्तत्वेन भारद्वाजमतेऽपि निषेधात् । तदाह—बभर्थेति । बभ्रथुः । बभ्र । बभार–बभर इति सिद्धवत्कृत्य आह–बभूवेति । क्ङित्त्वादिण्निषेध इति भावः । बभ्रे । बभ्राते । बभ्रिरे । बभृषे । बभ्राथे । बभृढ्वे । बभ्रे । बभृवहे । बभृमहे । भर्ता । भरिष्यति–भरिष्यते । बिभर्तु–बिभृतात् । बिभृताम् । बिभ्रतु । इति सिद्धवत्कृत्य आह—बिभृहीति । हेरपित्त्वेन ङित्त्वादगुणनिषेध इति भावः । बिभृतात् । बिभृतम् । बिभृत । इति सिद्धवत्कृत्य आह—बिभराणीति । आटः पित्त्वेन ङित्त्वाभावान्न गुणनिषेध इति भावः । बिभराव । बिभराम । लङ्याह—अबिभरिति । अबिभृ त् इति स्थिते गुणे रपरत्वे हल्ङ्यादिलोपे रेफस्य विसर्ग इति भावः । अबिभरुरिति । अभ्यस्तत्वात् झेर्जुस् 'जुसि च' इति गुणः । अबिभः । अबिभृतम् । अबिभृत । अबिभरम् । अबिभृव । अबिभृम । अबिभृत । अबिभ्राताम् । अबिभ्रत । अबिभृथाः । अबिभ्राथाम् । अबिभृध्वम् । अबिभ्रि । अबिभृवहि । अबिभृमहि । आशीर्लिङ्याह—भ्रियादिति । 'रिङ् शयग्लिङ्क्षु' इति रिङ् । आत्मनेपदे आशीर्लिङ्याह–भृषीष्टेति । 'उश्च' इति कित्त्वान्न गुणः । अभार्षीदिति । अनिट्त्वान्न सिज्लोपः । सिचि वृद्धिः । रपरत्वमिति भावः । अभार्ष्टामित्यादि । आत्मनेपदे लुङ्याह–अभृतेति । 'हुश्नुवोरसार्वधातुके' इति सिचो लोपः । अभृषातामित्यादि । माङ् माने इति । अनिट् । ङित्त्वादात्मनेपदी । श्लौ द्वित्वे 'भृञामित्' इति अभ्यासस्य इत्त्वे मि मा ते इति स्थिते—ईं हल्यघोः । 'ईं' इति लुप्तप्रथमाकम् । 'श्नाभ्यस्तयोरातः' इत्यनुवर्तते 'गमहन' इत्यतः क्ङितीति 'अत उत्सार्वधातुके' इत्यतः सार्वधातुके इति चानुवर्तते ।

त्रासिद्धे न स्थानिवत्' । धत्तः । दवति । धत्थः । धत्थ । दध्वः । दध्मः । धत्ते । धत्से । धद्ध्वे । धेहि । अधित ।

अथ त्रयः स्वरितेतः। १०६३ णिजिर् शौचपोषणयोः। २।०२ **निजां त्रयाणां गुणः श्लौ** ७।४।७५॥ णिजिर् विजिर् विष्लृ एषामभ्यासस्य गुणः स्याच्छ्लौ। नेनेक्ति। नेनिक्तः। नेनिजति। नेक्ता। नेक्ष्यति। नेनेक्तु। नेनिग्धि।

तकारथकारयोरिति लभ्यते। चकारात् ध्वोरिति समुच्चीयते। सकारे धवशब्दे चेति लभ्यते। तदाह—द्विरुक्तस्येत्यादिना। तथाच अभ्यासे दकारस्य धकारः तकारपरकत्वात्। ननु 'श्नाभ्यस्तयो'रित्यालोपस्य 'अतः परस्मिन्' इति स्थानिवत्त्वाच्च तकारपरकत्वं, नापि झषन्तत्वमित्यत आह—वचनसामर्थ्यादिति। वस्तुतस्त्विति। भष्भावस्य पूर्वत्रासिद्धीयत्वादेव तस्मिन् कर्तव्ये आलोपस्य स्थानिवत्त्वाऽप्रसक्तेर्वचनसामर्थ्याश्रयणकल्पनेति वृथेति भावः। धत्तः इति। धस्य चर्त्वेन त इति भावः। दधतीति। 'अदभ्यस्तात्' इत्यदादेशे 'श्नाभ्यस्तयोः' इत्यालोपः। धत्थः इति। थकारपरत्वात् भष्। धत्थ। दधामि। दध्वः इति। परनिमित्ताऽभावान्न भष्। दध्मः। धत्ते इति। दधाते। दधते। धत्से इति। सकारपरकत्वाद्धषिति भावः। दधाथे। धद्ध्वे इति। दध् ध्वे इति स्थिते ध्वशब्दपरकत्वाद्धषिति भावः। दधे। दध्वहे। दध्महे। दधौ। दधे। धाता। धास्यति। धास्यते। दधातु-धत्तात्। धत्ताम्। दधतु। धेहीति। 'ध्वसोः' इत्येत्वाभ्यासलोपाविति भावः। धत्तात्। धत्तम्। धत। दधानि। दधाव। दधाम। धत्ताम्। दधाताम्। दधताम्। धत्स्व। दधाथाम्। धद्ध्वम्। दधै। दधावहै। दधामहै। अदधात्। अधत्त। दध्यात्। दधीत। धेयात्। धासीष्ट। अधात्। अधिषतेति। 'स्थाध्वोरिच्च' इति इत्त्वे 'हल्ङ्यादिलोपे' इति सिचो लोप इति भावः। अधास्यत्। अधास्यत।

णिजिर् धातुः, अनिडयं णोपदेशः। इरित्। इकारस्य प्रत्येकमित्त्वाभावान्न नुम्। इकारस्य स्वरितत्वप्रतिज्ञाबलादात्मने फले आत्मनेपद भवत्येव। तस्मादयमप्युभयपदी। एवं विजिरपि ज्ञेयः। निजां त्रयाणाम्। निजामिति बहुवचनात्तदादीनां ग्रहणम्। 'अत्र लोपः' इत्यतः अभ्यासस्येत्यनुवर्तते। तदाह—णिजिर् इत्यादिना। नेनेक्तीति। श्लौ द्वित्वे हल्यादिशेषे उत्तरखण्डस्य तिपमाश्रित्य गुणे पूर्वखण्डस्यानेन गुणे चोः कुत्वमिति भावः। अभ्यस्तत्वाददादेशं मत्वा आह—नेनिजतीति। नेनेक्षि। नेनिक्थः। नेनिक्थ। नेनेज्मि। नेनिज्वः। नेनिज्मः। नेनिक्ते। नेनिजाते। नेनिजते। नेनिक्षे। नेनिजाथे। नेनिग्ध्वे। नेनिजे। नेनिज्वहे। नेनिज्महे। निनेज। निनिजतुः। निनिजुः। निनेजिथ। निनिजथुः। निनिज। निनेज। निनिजिव। निनिजिम। निनिजे। निनिजाते। निनिजिरे। निनिजिषे। निनिजाथे। निनिजिध्वे। निनिजे। निनिजिवहे। निनिजिमहे। नेक्ता। नेक्ष्यति। नेनेक्तु। नेनिक्तात्। नेनिक्ताम्। नेनि-

४।११८॥ जहातेरालोपः स्याद्यादौ सार्वधातुके। जह्यात्। 'एर्लिङि' (सू २३७४) हेयात्। अहासीत्। १०६१ डु दाञ् दाने। प्रणिददाति। दत्तः। ददति। दत्ते ददौ। 'ध्वसोः—' (सू २४७१) इत्येत्त्वाभ्यासलोपौ। देहि। अददात्। अदत्ताम्। अददुः। दद्यात्। देयात्। अदात्। अदाताम्। अदुः। अदित। १०९२ डु धाञ् धारणपोषणयोः। 'दानेऽपि' इत्येके। प्रणिदधाति। २५०१ दधस्तथोश्च ८।२।३८॥ द्विरुक्तस्य झषन्तस्य धात्वातोर्बशो भष् स्यात्तथयोः परयोः स्वोश्च परतः। 'वचनसामर्थ्यादालोपो न स्थानिवत्' इति वामनमाधवौ। वस्तुतस्तु पूर्व-

---

ह्यत्यतः आत इति, 'अत आत्सार्वधातुके' ह्यत्यतः सार्वधातुके इति चानुवर्तते। 'यि' इति सप्तम्यन्तं सार्वधातुकविशेषणम्। तदादिविधिः। तदाह—जहातेरित्यादिना। 'जहातेश्च' इत्यस्यापवादः। आशीर्लिङ्याह—एर्लिङीति। अहासीदिति। 'यमरम' इति सगिटौ। अहास्यत्। डु दाञ्-उभयपदी। अनि्। प्रणिददातीति। 'नेर्गद' इति णत्वम्। दत्त इति। ददा तस् इति स्थिते 'अवो'रिति पर्युदासादीत्त्वाभावे 'श्नाभ्यस्तयोः' इत्यात्त्वलोपः। ददतीति। अभ्यस्तत्वाददादेशे 'श्नाभ्यस्तयोः' इत्यात्त्वलोप इति भावः। ददासि। दत्थः। दत्थ। ददामि। दद्वः। दद्मः। दत्ते इति। ददाते। ददते। दत्से। ददाथे। ददूध्वे। दद्वे। दद्वहे। दद्महे। ददौ इति। ददतुः। ददुः। ददिथ। ददाथ। ददथुः। दद। ददौ। ददिव। ददिम। ददे। ददाते। ददिरे। ददिषे। ददाथे। ददिध्वे। ददे। ददिवहे। ददिमहे। दाता। दास्यति। दास्यते। ददातु-दत्तात्। दत्ताम्। ददतु। इति सिद्धवत्कृत्य देहि इत्यत्र आह—ध्वसोरिति। दत्तात्। दत्तम्। दत्त। ददानि। ददाव। ददाम। दत्ताम्। ददाताम्। ददताम्। दत्स्व। ददाथाम्। दद्ध्वम्। ददै। ददावहै। ददामहै। लङ्याह—अददादिति। अददुरिति। अभ्यस्तत्वात् जुस्। अददाः। अदत्तम्। अदत्त। अददाम। अदद्व। अदद्म। विधिलिङ्याह—दद्यादिति। 'श्नाभ्यस्तयोः' इत्यात्त्वलोपः। आशीर्लिङि तु 'एर्लिङि' इत्येत्त्वमभिप्रेत्य आह—देयादिति। दासीष्ट। लुङ्याह—अदादिति। 'गातिस्था' इति सिचो लुगिति भावः। अदाः। अदातम्। अदात। अदाम्। अदाव। अदाम। लुङ्यात्मनेपदे आह—अदितेति। अदा स् त इति स्थिते 'स्थाघ्वोरिच्च' इति दाधातोरन्त्यस्य इकारः। सिचः कित्त्वं च। कित्त्वाच्च गुणः। 'ह्रस्वादङ्गात्' इति सिचो लोप इति भावः। अदिषाताम्। अदिषत। अदिथाः। अदिषाथाम्। अदिढ्वम्। अदिषि। अदिष्वहि। अदिष्महि। अदास्यत्। अदास्यत। डु धाञ्। ञित्त्वादुभयपदी। अनिट्। प्रणिदधातीति। 'नेर्गद' इति णत्वम्। तसि श्लौ द्वित्वे अभ्यासजश्त्वे 'श्नाभ्यस्तयोः' इत्यात्त्वलोपे दध् तस् इति स्थिते—दधस्तथोश्च। धाधातोः कृतद्वित्वस्य दधा इत्यस्य 'दधः' इति षष्ठ्यन्तम्। 'एकाचो बशः' इत्यतः झषन्तस्य बशो भष् इत्यनुवर्तते। त थू अनयोर्द्वन्द्वात् सप्तमीद्विवचनम्। तकारादकार उच्चारणार्थः।

त्रासिद्धे न स्थानिवत्' । धत्तः । दवति । धत्थः । धत्थ । दध्वः । दध्मः । धत्ते । धत्से । धद्ध्वे । धेहि । अधित ।

अथ त्रयः स्वरितेतः। १०६३ णिजिर् शौचपोषणयोः। २।०२ **निजां त्रयाणां गुणः श्लौ** ७।४।७५॥ णिजिर् विजिर् विष्लृ एषामभ्यासस्य गुणः स्याच्छ्लौ। नेनेक्ति। नेनिक्तः। नेनिजति। नेक्ता। नेक्ष्यति। नेनेक्तु। नेनिग्धि।

तकारथकारयोरिति लभ्यते। चकारात् ध्वोरिति समुच्चीयते। सकारे धवशब्दे चेति लभ्यते। तदाह—द्विरुक्तस्येत्यादिना। तथाच अभ्यासे दकारस्य धकारः तकारपरकत्वात्। ननु 'श्नाभ्यस्तयो'रित्यालोपस्य 'अतः परस्मिन्' इति स्थानिवत्त्वाच्च तकारपरकत्वं, नापि झषन्तत्वमित्यत आह—वचनसामर्थ्यादिति। वस्तुतस्त्विति। भष्भावस्य पूर्वत्रासिद्धीयत्वादेव तस्मिन् कर्तव्ये आलोपस्य स्थानिवत्त्वाऽप्रसक्तेर्वचनसामर्थ्याश्रयणकल्पनेति वृथेति भावः। धत्तः इति। धस्य चर्त्वेन त इति भावः। दधतीति। 'अदभ्यस्तात्' इत्यदादेशे 'श्नाभ्यस्तयोः' इत्यालोपः। धत्थः इति। थकारपरत्वात् भष्। धत्थ। दधामि। दध्वः इति। परनिमित्ताऽभावान्न भष्। दध्मः। धत्ते इति। दधाते। दधते। धत्से इति। सकारपरकत्वाद्धषिति भावः। दधाथे। धद्ध्वे इति। दध् ध्वे इति स्थिते ध्वशब्दपरकत्वाद्धषिति भावः। दधे। दध्वहे। दध्महे। दधौ। दधे। धाता। धास्यति। धास्यते। दधातु-धत्तात्। धत्ताम्। दधतु। धेहीति। 'ध्वसोः' इत्येत्वाभ्यासलोपाविति भावः। धत्तात्। धत्तम्। धत। दधानि। दधाव। दधाम। धत्ताम्। दधाताम्। दधताम्। धत्स्व। दधाथाम्। धद्ध्वम्। दधै। दधावहै। दधामहै। अदधात्। अधत्त। दध्यात्। दधीत। धेयात्। धासीष्ट। अधात्। अधिषतेति। 'स्थाध्वोरिच्च' इति इत्त्वे 'हल्ङ्यादिलोपे' इति सिचो लोप इति भावः। अधास्यत्। अधास्यत।

णिजिर् धातुः, अनिडयं णोपदेशः। इरित्। इकारस्य प्रत्येकमित्त्वाभावान्न नुम्। इकारस्य स्वरितत्वप्रतिज्ञाबलादात्मने फले आत्मनेपद भवत्येव। तस्मादयमप्युभयपदी। एवं विजिरपि ज्ञेयः। निजां त्रयाणाम्। निजामिति बहुवचनात्तदादीनां ग्रहणम्। 'अत्र लोपः' इत्यतः अभ्यासस्येत्यनुवर्तते। तदाह—णिजिर् इत्यादिना। नेनेक्तीति। श्लौ द्वित्वे हल्यादिशेषे उत्तरखण्डस्य तिपमाश्रित्य गुणे पूर्वखण्डस्यानेन गुणे चोः कुत्वमिति भावः। अभ्यस्तत्वाददादेशं मत्वा आह—नेनिजतीति। नेनेक्षि। नेनिक्थः। नेनिक्थ। नेनेज्मि। नेनिज्वः। नेनिज्मः। नेनिक्ते। नेनिजाते। नेनिजते। नेनिक्षे। नेनिजाथे। नेनिग्ध्वे। नेनिजे। नेनिज्वहे। नेनिज्महे। निनेज। निनिजतुः। निनिजुः। निनेजिथ। निनिजथुः। निनिज। निनेज। निनिजिव। निनिजिम। निनिजे। निनिजाते। निनिजिरे। निनिजिषे। निनिजाथे। निनिजिध्वे। निनिजे। निनिजिवहे। निनिजिमहे। नेक्ता। नेक्ष्यति। नेनेक्तु। नेनिक्तात्। नेनिक्ताम्। नेनि-

२५०३ नाभ्यस्तस्याचि पिति सार्वधातुके ऽ।३।८७॥ लघूपधगुणो न स्यात्। नेनिजानि। अनेनेक्। अनेनिक्ताम्। अनेनिजुः। नेनिज्यात्। निज्यात्। अनिजत्। अनैक्षीत्। अनिक्त। १०६४ विजिर् पृथग्भावे। वेवेक्ति। वेविक्ते। विवेजिथ। अत्र 'विज इट्' (सू २५३६) इति डित्वं न, 'ओ विजी' इत्यस्यैव तत्र ग्रहणात्। 'णिजिविजी रुधादावपि। १०६५ विष्लृ व्याप्तौ। वेवेष्टि-वेविष्टे। लृदित्वादङ्। अविषत्। तङि क्सः। अजादौ 'क्सस्याचि' (सू २३३७) इत्यल्लोपः। अविक्षत। अविक्षाताम्। अविक्षन्त।

अथ आगणान्तात्परस्मैपदिनश्छान्दसाश्च। १०६६ घृ क्षरणदीप्त्योः। 'जिघर्म्यग्निं हविषा घृतेन'। 'भृज्ञामित्' (सू २४६६)। 'बहुलं छन्दसि' (सू ३५९८)

जतु। नेनिग्धीति। अपित्त्वेन ङित्त्वाच्च गुणः। हेर्धिः। नेनिक्तात्। नेनिक्तम्। नेनिक्त। 'आदुत्तमस्य' इति पित्त्वेन अङित्त्वाल्लघूपधगुणे प्राप्ते-नाभ्यस्तस्याचि। 'मिदेर्गुणः' इत्यतो गुण इति 'पुगन्त' इत्यतो लघूपधस्येति चानुवर्तते इत्यभिप्रेत्य शेषं पूरयति-लघूपधगुणो न स्यादिति। नेनिजानीति। नेनिजाव। नेनिजाम। नेनिक्ताम्। नेनिजाताम्। नेनिजताम्। नेनिक्ष्व। नेनिजाथाम्। नेनिग्ध्वम्। नेनिजै। नेनिजावहै। नेनिजामहै। ङित्त्वे परस्मैपदे आह—अनेनेगिति। अनेनिजुरिति। अभ्यस्तत्वाज्जुसिति भावः। अनेनेक्। अनेनिक्तम्। अनेनिक्त। अनेनिजम्। 'नाभ्यस्तस्य' इति न गुणः। अनेनिज्व। अनेनिग्म। निक्षीष्ट। लुङ्याह—अनिजदिति। इरित्त्वादङिति भावः। अनिक्तेति। 'झलो झलि' इति सिज्लोपः। अनिक्षाताम्। इत्यादि। विजिरपि णिजिवत्। अत्रेति। थलि इट्पक्षे 'विज इट्' इति विहितं ङित्त्वं नेत्यर्थः। अतो न गुणनिषेध इति भावः। ओ विजी इत्यस्यैवेति। व्याख्यानादिति भावः। रुधादावपीति। ततश्च 'रुधादिभ्यः श्नम्' इति श्नम्विकरणादावपीति भावः। विष्लृ व्याप्ताविति। लृदित्, उभयपदी, अनिट्। णिजेरिव रूपाणि। वेवेष्टीति। ष्टुत्वेन तकारस्य टः। सिपि 'षढोः' इति षस्य कत्वम्। वेवेक्षि। वेविष्टः। वेविष्ठ। वेविड्ढि। अविषदिति। लृदित्त्वादङिति भावः। तङि क्स इति। 'झल इगुपधात्' इत्यनेनेति भावः। आगणान्तादिति। जुहोत्यादिगणसमाप्तिपर्यन्तमित्यर्थः। घृधातुरनिट्। तिपि शपौ द्वित्वे अभ्यासकार्ये गुणे रपरत्वे। जघर्ति। जघृतः। जघ्रति। जघर्म्यग्निं हविषा घृतेन' इति बह्वृचमन्त्रपाठः। 'जिघर्म्यग्नि मनसा घृतेन' इति तैत्तिरीयपाठः। अत्र ह्रस्वमभ्यासस्य आह—भृज्ञामिति। ननु तत्र त्रयाणामेव ग्रहणमित्यत आह—बहुलमिति। ह्रस्वं छान्दसमिति भावः। जघार। जघ्रतुः। जघ्रुः। जघर्थ। जघ्रथुः। जघ्र। जघार-जघर। जघ्रिव। घरिष्यति। जघर्तु-जघृतात्। जघ्रतु। जघृहि। जघराणि। अजघः। अजघृताम्। अजघरुः। अजघरम्। अजघृव। जघृयात्। घ्रियात्। अघार्षीत्। अघरिष्यत्।

इतीत्त्वम्। १०९७ हृ प्रसह्यकरणे। 'अयं स्रुवोऽभिजिहर्ति होमान्'। १०९८ ऋ १०९९ सृ गतौ। 'बहुलं छन्दसि' (सू ३५९८) इत्येव सिद्धे 'अर्तिपिपर्त्योश्च' (सू २४९३) इतीत्त्वविधानादयं भाषायामपि। अभ्यासस्यासवर्णे (सू २२९०) इतीयङ्। इयर्ति। इयृतः। इयृति। आर। आरतुः। 'इडत्यर्ति-' (सू २३८४) इति नित्यमिट्। आरिथ। अर्ता। अरिष्यति। इयराणि। ऐयः। ऐयृताम्। ऐयरुः। इयृयात्। अर्यात्। आरत्। ससर्ति। ११०० भस भर्त्सनदीप्त्योः। बभस्ति।

हृ प्रसह्यकरणे इति। घृधातुवद्रूपाणि। अयं स्रुवो अभिजिहर्ति होमानिति। स्रुवे साध्यमाने यजमानो मन्त्रः। अत्रापि अभ्यासस्य इत्वं छान्दसमिति भावः।

ऋ सृ गताविति। इमावनिटौ। तत्र ऋधातोः छान्दसत्वेऽपि लोकेऽपि क्वचित् प्रयोगं समर्थयति—बहुलमिति। 'भृञामित्' 'अर्तिपिपर्त्योश्च' 'बहुलं छन्दसि' इति सूत्रस्थितिः। तत्र 'बहुलं छन्दसी' त्येव ऋधातोरित्त्वसिद्धेः 'अर्तिपिपर्त्योश्च' इत्यर्तिग्रहणात् लोकेऽपि ऋधातोः श्लुविकरणस्य प्रयोगो विज्ञायत इत्यर्थः। एतच्चाऽत्रैव सूत्रे भाष्ये स्पष्टम्। अत एव भाष्यात् श्लुविकरणस्यैव ऋधातोः 'अर्तिपिपर्त्योश्च' इत्यत्र ग्रहणम्। पिपर्तिसाहचर्याच्च, श्लाविषयस्य अभ्यासग्रहणस्य चानुवृत्तश्चेत्यलम्। अभ्यासस्यासवर्णे इति। शपः श्लौ ऋ ति इति स्थिते द्वित्वे उरदत्त्वं बाधित्वा 'अर्तिपिपर्त्योश्च' इत्यभ्यासऋकारस्य इत्वे रपरत्वे हलादिशेषे उत्तरखण्डस्य ऋकारस्य गुणे रपरत्वे इ अर् ति इति स्थिते 'अभ्यासस्याऽसवर्णे' इति इयङि 'इयर्ति' इति रूपमित्यर्थः। इयृत इति। पूर्ववदेव द्वित्वादि। तसः अपित्त्वेन ङित्त्वाद्गुणानिषेध इति भावः। इयृतीति। पूर्ववदेव द्वित्वादि। अभ्यस्तत्वाद्दादेशः। ङित्त्वाच्च गुणः। उत्तरखण्डस्य ऋकारस्य यण् रेफ इति भावः। इयर्षि। इयृथः। इयर्मि। इयृवः। इयृमः। लिट्याह—आरेति। थलि 'अचस्तास्वत्' इति 'ऋतो भारद्वाजस्य' इति नित्यमिण्निषेधे प्राप्ते आह—इडत्यर्तीति। मित्यमिडिति। आरिथ। आरिव। आरिम। अर्तेति। अनिट्त्वादिति भावः। अरिष्यतीति। 'ऋद्धनोः स्ये' इति इडिति भावः। इयर्तु-इयृतात्। इयृताम्। इयृतु। इयृहि इयृतात्। इयृतम्। इयृत। इयराणीति। आटः पित्त्वेन अङित्त्वाच्च गुणनिषेध इति भावः। इयराव। इयराम। लङ्याह—ऐय इति। श्लौ ऋ त् इति स्थिते द्वित्वे अभ्यासस्य इत्त्वे रपरत्वे हलादिशेषे इयङि उत्तरखण्डस्य गुणे रपरत्वे च हलङ्यादिलोपे रेफस्य विसर्ग इय इति स्थिते आटि वृद्धौ ऐय इति रूपमिति भावः। नच 'लावस्थायाम'डिति पक्षे आटि वृद्धौ रपरत्वे आर् त् इति स्थिते द्वित्वे हलादिशेषे सकर्णदीर्घे हलङ्यादिलोपे रेफस्य विसर्गे आः इति स्यादिति शङ्क्यम्, 'बहुलं छन्दस्यमाङ्योगेऽपि' इति बहुलग्रहणेनात्र लावस्थायामाडित्यस्याऽनाश्रयणादित्याहुः। ऐयरुरिति। ऐयः। ऐयृतम्। ऐयृत। ऐयरम्। ऐयृव। ऐयृम। विधिलिङ्याह—इयृयादिति। यासुटो ङित्त्वाद्गुण-

'घसिभसोर्हलि—' (३५५०) इत्युपधालोपः । 'झलो झलि' (सू २२८१) इति सलोपः । बन्धः । बप्सति । ११०१ कि ज्ञाने । चिकेति । ११०२ तुर त्वरणे । तुतोर्ति । तुतूर्तः । तुतुरति । ११०३ धिष शब्दे । दिधेष्टि । दिधिष्टः । ११०४

निषेध इति भावः । इययाताम् । इत्यादि । आशीर्लिङ्याह-अर्यादिति । 'अकृत्सार्वधातुकयोः' इति दीर्घः प्राप्तः । तं बाधित्वा 'रिङ्शयग्लिङ्क्षु' इति रिङ् प्राप्तः । तं बाधित्वा 'गुणोऽर्तिसंयोगाद्योः' इति गुण इति भावः । लुङ्याह—आर्दिति । 'सर्तिशास्त्यर्तिभ्यश्च' इत्यङि 'ऋदृशोऽङि' इति गुण इति भावः । आरिष्यत् । तदेवं ऋधातुं निरूप्य सृधातुं निरूपयति—ससर्तीति । ससृतः । ससृतः । इत्यादि सुगमम् । ससार । ससर्थ । ससृव । सर्ता । सरिष्यति । ससर्तुं । असृसः । असृसृताम् । असृसरुः । ससृयात् । स्रियात् । अभरत् । भस भर्त्सनेनेति । अयं सेट् । बभस्तीति । श्लौ भस् ति इति स्थिते द्वित्वे अभ्यासजश्त्वमिति भावः । बभस् तस् इति स्थिते आह-घसिभसोरिति । 'घसिभसोर्हलि च' इत्यस्यायमर्थः—छन्दसि अनयोरुपधाया लोपः स्यात् हलादावजादौ च क्ङिति परे इति । तथाच बभस् तस् इत्यत्र उपधालोपे 'झलो झलि' इति सकारलोपे तकारस्य 'झषस्तथोः' इति धत्वे भकारस्य जश्त्वमिति भावः । बप्सतीति । अभ्यस्तत्वादद्दादेशे बभस् अति इति स्थिते 'घसिभसोः' इत्युपधालोपे भकारस्य चर्त्वमिति भावः । बभस्सि । बब्धः । बब्ध । बभस्मि । बप्स्वः । बप्स्मः । बभास । बप्सतुः । बप्सुः । बभसिथ । बप्सथुः । बप्स । बभास-बभस । बप्सिव । बप्सिम । भसिता । भसिष्यति । बभस्तु-बब्धात् । बब्धाम् । बप्सतु । बब्धि-बब्धात् । बब्धम् । बब्ध । बभसानि बभसाव । बभसाम । अबभः । अबब्धाम् । अबप्सुः । अबभः । अबब्धम् । अबब्ध । अबप्सम् । अबप्स्व । अबप्स्म । बप्स्यात् । भस्यात् । अभासीत्-अभसीत् । अभसिष्यत् । कि ज्ञाने । चिकेतीति । किधातोस्तपि श्लौ द्वित्वे अभ्यासचुत्वे उत्तरखण्डस्य गुण इति भावः । चिकितः । चिकयिति । चिकेषि । चिकिथः । चिकिथ । चिकेमि । चिकिवः । चिकिमः । चिकाय । चिक्यतुः । चिक्युः । चिकायथ-चिकेथ । चिक्यिव । केता । केष्यति । चिकेतु—चिकितात् । चिकिताम् । चिक्यतु । चिकिहि । चिकयानि । अचिकेत् । अचिकिताम् । अचिकयुः । अचिकेः । अचिकयम् । अचिकिव । चिकियात् । कीयात् । अकैषीत् । अकेष्यत् । तुर त्वरणे इति । तुतूर्त इति । 'हलि च' इति दीर्घः । तुतोर्षि । तुतूर्थः । तुतूर्थ । तुतोर्मि । तुतूर्वः । तुतोर । तुतुरतुः । तुतोरिथ । तुतुरिव । तोरिता । तोरिष्यति । तुतोर्तु-तुतूर्तात् । तुतूर्ताम् । तुतुरतु । तुतूर्हि । तुतोराणि । अतुतोः । अतुतूर्ताम् । अतुतुरुः । अतुतोः । अतुतुरम् । अतुतूर्व । तुतूर्यात् । तूर्यात् । अतोरीत् । अतोरिष्यत् । धिष शब्दे । सेट् । दिधेष्टीति । श्लौ द्वित्वादौ लघूपधगुणे तकारस्य ष्टुत्वमिति भावः । दिधिषति । दिधेक्षि । दिधिष्टः । दिधेष्मि । दिधिष्वः । दिधेष । दिधिषतुः । दिधेषिथ । दिधिषिव । धेषिता । धेषिष्यति । दिधेष्टु-दिधिष्टात् । दिधिषतु । दिधि-

धन धान्ये। दधन्ति। दधन्तः। दधनति। ११०५ जन जनने। जजन्ति। २५०४ **जनसनखनां सञ्झलोः ६।४।४२॥** एषामाकारोऽन्तादेशः स्याज्झलादौ सनि झलादौ क्ङिति च। अजातः। जज्ञति। जजंसि। जजान। जजायात्। जजन्यात्। जायात्। जन्यात्। ११०६ गा स्तुतौ। 'देवाञ्जिगाति सुम्नयुः'। जिगीतः। जिगति।

इति तिङन्ते जुहोत्यादिप्रकरणम्।

ड्ढि। दिधिषाणि। अदिधेट्। अदिधिष्टाम्। अदिधिषुः। अदिधिषम्। अदिधिष्व। दिधिष्यात्। धिष्यात्। अधेषीत्। अधेषिष्यत्। धन धान्ये इति। धान्यार्जने इत्यर्थः। दधन्त इति। ष्णमूष् सहने इति धातोः चक्षसे इतिवदनुनासिकस्य क्ङीति न दीर्घः। दधंसि। दधन्थः। दधन्थ। दधन्मि। दधन्वः। दधन्मः। दधान। दधनतुः। दधनिथ। दधनिव। धानता। धनिष्यति। दधन्तु—दधन्तात्। दधन्ताम्। दधनतु। दधंहि। दधनानि। अदधन्। अदधन्ताम्। अदधनुः। अदधन्। अदधन्तम्। अदधन्त। अदधनम्। अदधन्व। अदधन्म। दधन्यात्। धन्यात्। अधानीत्-अधनीत्। अधनिष्यत्। जन जनने इति। उपपत्तौ अकर्मकः। उत्पादने सकर्मकः। जनसन। 'विड्वनोः' इत्यतः आदित्यनुवर्तते। तदाह—एषामाकारोऽन्तादेशः इति। सन् झल् इत्यनयोः द्वन्द्वात् सप्तम्यद्विवचनम्। सनि झलि चेति लभ्यते। 'अनुदात्तोपदेश' इत्यतः झलि क्ङितीत्यनुवर्तते। तत्र झलीत्यनुवृत्तेन सन् विशेष्यते। तदादिविधिः। झलादौ सनीति लभ्यते। क्ङितीत्यनुवृत्तं तु एतत्सूत्रस्थेन झला विशेष्यते। तदादिविधिः। झलादौ क्ङितीति लभ्यते। तथाच झलादौ सनीति, झलादौ क्ङितीति च परनिमित्तद्वयं लभ्यम्। तदाह—झलादौ सनि झलादौ क्ङिति चेति। सन्विशेषणं झलादाविति किम्? जिजनिषति। सिसनिषति। चिखनिषति। अथ क्ङिज्झल्विशेषणस्य प्रयोजनमाह—जज्ञतीति। जजन् अति इति स्थिते अतोर्ङित्त्वेऽपि झलादित्वाभावादात्त्वाऽभावे 'गमहन' इत्युपधालोपे नकारस्य श्चुत्वेन ञकार इति भावः। 'जनसनखनां सन्' इत्याश्रित्य योगविभागेन उक्तार्थसिद्धिं चाश्रित्य झलग्रहणं त्वत्र सूत्रे प्रत्याख्यातं भाष्ये। जजंसीति। 'नश्च' इत्यनुस्वारः। जजाथः। जजाथ। जजन्मि। जजन्वः। जजन्मः। अजानेति। जज्ञतुः। सेऽयम्। जजनिथ। जज्ञथुः। जज्ञिव। जनिता। जनिष्यति। जजन्तु-जजातात्। जजाहि। जजनानि। अजजन्। अजजाताम्। अजजुः। अजजनम्। अजजन्व। विधिलिङि 'ये विभाषा' इति मत्वा आह—जजायात् जजन्यात् इति। अजनीत्-अजानीत्। अजनिष्यत्। गा स्तुतौ। देवान् जिगातीति। 'भृञामित्' इत्यत्र 'बहुलं छन्दसि' इति वचनादभ्यासस्य इत्त्वमिति भावः। जिगीतः इति। 'ई हल्यघोः' इति ईत्त्वम्। जिगाति। अभ्यस्तत्वाददादेशे 'श्नाभ्यस्तयोः' इत्यालोपः। जिगासि। जिगीथः। जिगीथ। जिगामि। जिगीवः। जगौ। जगतुः। जगिथ-जगाथ। जगिव। गाता। गास्यति। जिगातु-जिगीतात्। जिगी-

अथ तिङन्ते दिवादिप्रकरणम् ॥ ४ ॥

११०७ दिवु क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकान्तिगतिषु । भ्वादयः परस्मैपदिनः । २५०५ दिवादिभ्यः श्यन् ३।१।६९॥ शपोऽपवादः । 'हलि च' (सू ३५४) इति दीर्घः । दीव्यति । दिदेव । देविता । देविष्यति । दीव्यतु । अदीव्यत् । दीव्येत् । दीव्यात् । अदेवीत् । अदेविष्यत् । ११०८ षिवु तन्तुसन्ताने । परिषीव्यति । परिषिषेव । न्यषेवीत् । न्यसेवीत् । ११०९ ष्ठिवु गतिशोषणयोः । १११० ष्ठिवु निरसने । केचिदिहेमं न पठन्ति । ११११ ष्णुसु अदने । 'आदाने' इत्येके । 'अदर्शने' इत्यपरे । सुष्णोस । १११२ ष्णसु निरसने । स्नस्यति । सस्नास । १११३ क्ष्णसु ह्वरणदीप्त्योः । ह्वरणं कौटिल्यम् । चक्ष्णास । १११४ ष्णुष दाहे । वुष्योष । १११५ प्लुष च । १११६ नृती गात्रविक्षेपे । नृत्यति । ननर्त । २५०६ सेऽसिचि कृतचृतछृदतृदनृतः ७।२।५७॥ एभ्यः परस्य सिज्भिन्नस्य सादेरार्धधातुकस्य इड्वा स्यात् । नर्तिष्यति । नर्त्स्यति ।

ताम् । जिगतु । जिगी हि । जिगानि । अजिगात् । अजिगीताम् । अजिगुः । अजिगाः । अजिगाम् । अजिगीव । जिगीयात् । आशिषि गेयात् । अगासीत् । अगास्यत् । इति श्रीवासुदेवदीक्षितविदुषा विरचितायां सिद्धान्तकौमुदीव्याख्यायां बालमनोरमाख्यायां श्लुविकरणं समाप्तम् ।

अथ श्यन्विकरणधातवो निरूप्यन्ते । दिवु क्रीडेति । **उदिदयम्** । **तेन** रूपप्रक्रियायामिडिकल्पः । **निष्ठायां च नेट्** । भ्वादयः इति । **जृष् झष् वयोहानौ इत्येतत्पर्यन्ता इत्यर्थः** । दिवादिभ्यः श्यन् । **'कर्तरि शप्' इत्यतः कर्तरीति 'सार्वधातुके यक्' इत्यतः सार्वधातुके इति चानुवर्तते इत्यभिप्रेत्य आह**—शपोऽपवाद इति । शकारनकारावितौ । **दिव् य ति इति स्थिते आह**—हलि चेति दीर्घ इति । **श्यनः अपित्त्वेन ङित्त्वान्न गुण इति भावः** । दीव्यतः । दीव्यन्ति इत्यादि सुगमम् । दिदेवेति । **दिदिवतुः । दिदेविथ । दिदिविव** । सेट्त्वं सूचयति—देवितेति । षिवुधातुरपि सेट्, षोपदेशः, दिवुधातुवत् । परिषीव्यतीति । **'परिनिविभ्यः सेव' इति षत्वमिति भावः** । परिषिषेवेति । **'स्थादिष्वेवाभ्यासस्य' इति नियमस्तु न, तत्र 'प्राक्सितादिति'नुवृत्तेरिति भावः** । **'सिवादीनां वाड्व्यवायेऽपि' इति मत्वा आह**—न्यषेवीत् न्यसेवीदिति । स्त्रिवुधातुस्तु रेफवान् । ष्ठिवु निरसने इति । **'सुऽधातुष्वक्ष्ठीवाम्' इति न सत्वम्** । ष्ठीव्यति इत्यादि सुगमम् । आर्धधातुकेषु तु शब्विकरणस्थष्ठिवुधातुवद्रूपाणि । ष्णसुधातुश्च षोपदेशः । नृती गात्रेति । **'इवीदितः' इत्यात्मनेपदमीदित्त्वम्** । सेडयम् । सेऽसिचि । **से असिचि इति च्छेदः** । सप्तमी षष्ठ्यर्थे । कृत चृत छृद तृद नृत् एषां समाहारद्वन्द्वात् पञ्चमी । **'उदितो**

नृत्येत्। नृत्यात्। अनर्तीत्। १११७ त्रसी उद्वेगे। 'वा भ्राश—' (सू २३२१) इति श्यन्वा। त्रस्यति-त्रसति। त्रेसतुः-तत्रसतुः। ११११८ कुथ पूतीभावे। पूतीभावो दौर्गन्ध्यम्। १११६ पुथ हिंसायाम्। ११२० गुध परिवेष्टने। ११२१ क्षिप प्रेरणे। क्षिप्यति। क्षेप्ता। ११२२ पुष्प विकसने। पुष्प्यति। पुपुष्प। ११२३ तिम ११२४ ष्टिम ११२५ ष्टीम आर्द्रीभावे। तिम्यति। स्तिम्यति। स्तीम्यति। ११२६ व्रीड चोदने लज्जायां च। व्रीड्यति। ११२७ इष गतौ। इष्यति। ११२८ षह ११२६ षुह चक्यर्थे। चक्यर्थस्तृप्तिः। सह्यति। सुह्यति। ११३० जूष् ११३१ भूष् वयोहानौ। जीर्यति। जजरतुः—जेरतुः। जरिता-जरीता। जीर्यंत्। जीर्यात्। 'जृस्तम्भु' (सू २२९१) इत्यङ् वा। 'ऋदृशोऽङि गुणः' (सू २४०६)। अजरत्—अजारीत्। अजारिष्टाम्। झीर्यति। जझरतुः। अझारीत्। ११३२ षूङ् प्राणिप्रसवे। सूयते। सुषुवे। 'स्वरतिसूति—' (सू २२७९) इति विकल्पं बाधित्वा 'श्र्युकः किति' (सू २३८१) इति निषेधे प्राप्ते क्रादिनियमान्नित्यमिट्। सुषुविषे। सुषुविवहे। सोता। सविता। ११३३ दूङ् परितापे। दूयते। ११३४ दीङ् क्षये। दीयते। २५०७ दीङो युडचि क्ङिति ६।४।६३॥ दीङः परस्याजादेः

वा' इत्यतो वेति आर्द्धधातुकस्येडिति चानुवर्तते। तदाह—एभ्य इत्यादिना। नित्यमिटि प्राप्ते विकल्पार्थमिदं वचनम्। अनर्तीदिति। 'सेऽसिचि' इत्यत्र 'असिचि' इत्युक्तेर्नित्यमिडिति भावः। त्रसी उद्वेगे। 'वा जृभ्रमुत्रसाम्' इत्येत्वाभ्यासविकलपौ मत्वा आह—त्रेसतुः, तत्रसतुरिति। कुथ पूतीभावे इति। पवित्रीभवने इत्यर्थः। दुर्गन्धकरणे इति वा। 'पूतिगन्धस्तु दुर्गन्धः' इत्यमरः। तिम ष्टिम ष्टीमेति। द्वितीयतृतीयौ षोपदेशौ। द्वितीय इदुपधः। तृतीयस्तु ईदुपधः। षह षुहेति। षोपदेशौ। चक्यर्थस्तृप्तिरिति। यद्यपि 'चक तृप्तौ प्रतिघाते च' इत्युक्तम्। तथापि तृप्तिरेवेह विवक्षिता, व्याख्यानात्। षुहेः 'नपुंसके भावे क्तः' इति क्तप्रत्यये सुहितशब्दः। सुहितस्तृप्तिरिति 'पूरणगुण' इति सूत्रे कैयटः। जूष भूष् वयोहानावात्मे। सेट्कौ। जीर्यतीति। 'ऋत इद्धातोः' इति इत्वे 'हलि च' इति दीर्घ इति भावः। अतुसादौ 'ऋच्छत्यृताम्' इति गुणे रपरत्वे 'वा जृभ्रमुत्रसाम्' इत्येत्वाभ्यासलोपविकल्प इति भावः। जजरिथ। 'वृतो वा' इति मत्वा आह—जरिता जरीतेति। षूङ् प्राणिप्रसवे इति। प्रसवः उत्पादनम्। षोपदेशोऽयम्। विकल्पमिति। परमपीति शेषः। निषेधे प्राप्ते इति। पुरस्तात्प्रतिषेधकाण्डारम्भसामर्थ्यादिति भावः। दूङ् परितापे इति। पीडने, पीडितीभवने वेत्यर्थः। आद्ये सकर्मकः। द्वितीये अकर्मकः। दीङ् क्षये इति। क्षयो ह्रस्वः, नाशो वा। दीङो युडचि। 'आर्द्धधातुके' इत्यधिकृतम् अचा विशेष्यते। तदादिविधिः। 'दीङ' इति पञ्चमी। सप्तमी षष्ठ्यर्थे। तदाह—दीङः परस्येत्यादिना। दिदी ए इति

क्विप आर्धधातुकस्य युट् स्यात्। 'वुग्युटावुवङ्यणोः सिद्धौ वक्तव्यौ' (वा ४०६२) दिदीये। २५०८ मीनातिमिनोतिदीङां ल्यपि च ६।१।५०॥ एषामात्वं स्याल्ल्यपि चकारादशित्येजिनमित्ते। दाता। दास्यते। अदास्त। अदास्थाः। ११३५ डीङ् विहायसा गतौ। डीयते। ११३६ धीङ् आधारे। धीयते। दिध्ये। धेता। ११३७ मीङ् हिंसायाम्। हिंसा अत्र प्राणवियोगः। मीयते। ११३८ रीङ् श्रवणे। रीयते। ११३९ लीङ् श्लेषणे। २५०९ विभाषा लीयतेः ६।१।५१॥ लीयतेरिति यका निर्देशो न तु श्ना। लौलीङोरात्वं वा स्यादेजिवषये ल्यपि च। लेता-लाता। लेष्यते-लास्यते। एजिवषये किम्। लीयते। लिल्ये। ११४० व्रीङ् वृणोत्यर्थे। व्रीयते। विव्रिये। 'स्वादय ओदितः' (ग सू २९६)। तत्फलं तु निष्ठानत्वम् ११४१ पीङ् पाने। पीयते। ११४२ माङ् माने। मायते। ममे। ११४३

स्थिते परत्वात् 'एरनेकाचः' इति यणि प्राप्ते नित्यत्वात् युट्। टकार इत्। उकार उच्चारणार्थः। टित्वादाद्यवयवः। दिदीये इति रूपमिति भावः। ननु युटि कृतेऽपि तस्यासिद्धत्वाद्यण् दुर्वारः। तथा च दिद्य्ये इति स्यात्। इकारो न श्रूयेत यकारद्वयं श्रूयेत इत्यत आह—वुग्युटाविति। मीनातिमिनोति। 'आदेच उपदेशेऽशिति' इत्यत आदित्यनुवर्तते। तदाह—रथामात्वं स्यात् ल्यपीति। चकारात् एचः, अशितीति परनिमित्तं समुच्चीयते। तत्र 'एच' इत्यनन्तरं 'निमित्ते' इति शेषः। एजन्निमित्ते अशिति प्रत्यये च परे इति फलितम्। तदाह—चकारादशित्येजिनमित्ते इति। 'इति समुच्चीयत' इति शेषः। लुङ्याह—अदास्तेति। इह आत्वे कृते घुत्वे सत्यपि 'स्थाघ्वोरिच्च' इति न भवति। 'स्थाघ्वोरिच्चे दीङः प्रतिषेधः' इति घुसंज्ञासूत्रस्थभाष्यपठितवार्तिकादिति भावः। धीङ् आधारे इति। आधारः आधारणम्। स्थापनमिति यावत्। लीङ् श्लेषणे। इति। लीयते। लिल्ये। लिलियिषे। लिलियिढ्वे। लिलियिढ्वे। विभाषा लीयतेः। ननु लीयतेरिति श्यना निर्देशात् 'लीङ् श्लेषणे' इति श्नाविकरणस्य ग्रहणं न स्यादित्यत आह—यका निर्देश इति। 'सार्वधातुके यक्' इति विहितयका लीयतेरिति निर्देशः। स च श्यश्नान्तसाधारणः, यक उभयत्रापि साधारण्यादिति भावः। 'मीनातिमिनोति' इत्यतः ल्यपीति 'आदेचः' इत्यतः आदिति, एच इति च अनुवर्तते। तदाह—मीनातीत्यादिना। स्वादय ओदित इति। धातुपाठपठितं गणसूत्रमिदम्। 'षूङ् प्राणिप्रसवे' इत्यारभ्य व्रीङन्ता ओदित्कार्यभाज इत्यर्थः। निष्ठानत्वमिति। 'ओदितश्च' इत्यनेनेति भावः। प्रीङ् प्रीताविति। प्रीतिस्तुष्टिः। 'मुत्प्रीतिः प्रमदो हर्षः' इत्यमरः। एवं सत्यकर्मकः। यथा—फलमूलादिना हरिः प्रीयते। हृष्यतीत्यर्थः। यदा तु प्रीतिः तर्पणं 'प्रीञ् तर्पणे' इति क्रयादिकात् क्तिनि प्रीतिशब्दनिष्पत्तिः, तदा तु सकर्मकः। तदाह—

ईङ् गतौ। ईयते। अयांचक्रे। ११४४ प्रीङ् प्रीतौ। सकर्मकः। प्रीयते। पिप्रिये। अथ चत्वारः परस्मैपदिनः। ११४५ शो तनूकरणे। २५१० **ओतः श्यनि ७।३।७१॥** लोपः स्याच्छ्यनि। श्यति। श्यतः। श्यन्ति। शशौ। शशतुः। शाता। शास्यति। 'विभाषा घ्राधेट्—' (सू २३७६) इति सिचो वा लुक्। लुगभावे 'यमरम—' (सू २३७७) इतीट्सकौ। अशात्। अशाताम्। अशुः। अशासीत्। अशिषिष्टाम्। ११४६ छो छेदने। छ्यति। ११४७ षो अन्तकर्मणि। स्यति। ससौ। असिष्यति। असिष्यत्। असिसतौ। ११४८ दो अवखण्डने। द्यति। ददौ। प्रणिदाता। देयात्। अदात्।

अथात्मनेपदिनः पञ्चदश। ११४९ जनी प्रादुर्भावे। २५११ **ज्ञाजनोर्जा ७।३।७९॥** अनयोर्जादेशः स्याच्छिति। जायते। जज्ञे। जज्ञाते। जज्ञिरे। जनिता। जनिष्यते। 'दीपजन—' (सू २३२८) इति वा चिण्। २५१२ **जनि-**

सकर्मकः इति। प्रीयते इति। **तर्पयतीत्यर्थः**। अथ चत्वारः परस्मैपदिन इति। **'दो अवखण्डने' इत्यन्ता इति भावः**। शो तनूकरणे। **अनि**। ओतः श्यनि। **'धोर्लोपो लेटि वा' इत्यतो लोप इत्यनुवर्तते इत्यभिप्रेत्य शेषं पूरयति**—लोपः स्यादिति। शशाविति। **'आदेच' इत्यात्त्वे णल औत्वमिति भावः**। शशतुरिति। **शशिथ-शशाथ**। शशिव। शास्यतीति। श्यतु। अश्यत्। श्येत्। शायात्। लुङि सिचि **विशेषमाह**—विभाषेति। **सिचो लुक्पक्षे आह**—अशादिति। **'आतः' इति जुसिति मत्वा आह**—अशुरिति। **सिचो लुगभावे सगिटौ मत्वा आह**—अशासीदिति। **छोधातुरपि शोधातुवत्**। षो अन्तकर्मणीति। **समापने विनाशने वेत्यर्थः**। शोधातुवद्रूपाणि। षोपदेशोऽयम्। स्यतीति। **'ओतः श्यनि' इति लोपः**। अभिष्यतीति। **'उपसर्गात्' इति षत्वम्** अभ्यष्यदिति। **'प्राक्सितात्' इति षत्वम्**। अभिसनाविति। **स्यादिष्विति नियमात् न षः**। दो अवखण्डने। प्रणिदातेति। **'नेगंद' इति णत्वम्**। देयादिति। **आशीर्लिङि 'एर्लिङी'त्येत्त्वम्**। अदादिति। **'गातिस्था' इति सिचो लुक्**।

अथात्मनेपदिन इति। **'वाश्च शब्दे' इत्यन्ता इत्यर्थः**। जनी प्रादुर्भावे इति। **'श्वीदितो निष्ठायाम्' इत्याद्यर्थमीदित्त्वम्**। ज्ञाजनोर्जा। शितीति। **'ष्ठिवुक्लमुचमा'मित्यत स्तदनुवृत्तेरिति भावः**। जायत इति। **ज्ञाधातोस्तु श्नाविकरणत्वात् जानातीत्युदाहरणम्**। **उभयत्रापि जादेशस्य ह्रस्वान्तत्वे 'अङ्गकाय कृते पुनर्नाङ्गकार्यम्' इति परिभाषया 'अतो दीर्घो यञि' इत्यप्राप्तेर्जादेशस्य दीर्घान्तत्वमाश्रितम्**। जज्ञे इति। **'गमहन' इत्युपधालोपे नस्य श्चुत्वेन ञः**। जायेत। **जनिषीष्ट। लुङि अजन् त इति स्थिते आह**—दीपेति। वा चिणिति। **'क्लेः' इति शेषः**। **अजन् इ त इति स्थिते उपधावृद्धौ प्राप्तायाम्**—जनिवध्योश्च। **'अत उपधायाः' इत्यतः उपधाया इति 'मृजे-**

वध्योश्च ७।३।३५॥ अनयोरुपधाया वृद्धिर्न स्याच्चिण्णि ञ्णिति कृति च । अजनि । अजनिष्ट । ११५० दीपी दीप्तौ । दीप्यते । दिदीपे । अदीपि । अदीपिष्ट । ११५१ पूरी आप्यायने । पूर्यते । अपूरि । अपूरिष्ट । ११५२ तूरी गतित्वरणहिंसनयोः । तूर्यते । तुतूरे । ११५३ धूरी ११५४ गूरी हिंसागत्योः । धूर्यते । दुधूरे । गूर्यते । जुगूरे । ११५५ घूरी ११५६ जूरी हिंसावयोहान्योः । ११५७ शूरी हिंसास्तम्भनयोः । ११५८ चूरी दाहे । ११५९ तप ऐश्वर्ये वा । अयं धातुरैश्वर्ये वा श्यनं तङं च लभते । अन्यदा तु शब्विकरणः परस्मैपदीत्यर्थः । केचित्तु वाग्रहणं वृतुधातोराद्यवयवमिच्छन्ति । तप्यते । तप्ता । तप्स्यते । 'पत' इति व्यत्यासेन पाठान्तरम् । 'द्युत द्यामानि युतः पत्यमानः' । ११६० वृतु वरणे । वृत्यते । पक्षान्तरे वावृत्यते । 'ततो वावृत्यमाना सा रामशालां न्यविक्षत' इति भट्टिः । ११६१ क्लिश उपतापे । क्लिश्यते । क्लेशिता । ११६२ काशृ दीप्तौ । काश्यते । ११६३ वाशृ शब्दे । वाश्यते । ववाशे ।

अथ पञ्च स्वरितेतः । ११६४ मृष तितिक्षायाम् । मृष्यति । मृष्यते । ममर्ष । ममृषे । ११६५ शुचिर् पूतीभावे । पूतीभावः क्लेदः । शुच्यति-शुच्यते । शुशो-

---

वृद्धिः' इत्यतो वृद्धिरिति 'नोदात्तोपदेशस्य' इत्यतो नेति 'आतो युक्' इत्यतः चिण्कृतोरिति 'अचो ञ्णिति' इत्यतः ञ्णितीति चानुवर्तते । तदाह—अनयोरिति । दीपीधातुरीदित् । 'दीपजन' इति सिचः चिण्विकल्पं मत्वा आह-अदीपि अदीपिष्टेति । पूरीधातुरपि ईदित् । 'दीपजन' इति चिण्विकल्पं मत्वा आह—अपूरि अपूरिष्टेति । तूरी इत्यादयोऽपि 'चूरी दाहे' इत्यन्ता ईदित एव । तप ऐश्वर्ये वेति । श्यन् आत्मनेपदं

ति शेषः । उभयोः प्रकृतत्वादित्यभिप्रेत्य शेषं पूरयति—श्यनं तङं चेति । अन्यदा रिति । ऐश्वर्यादन्यत्रार्थे वृत्तिदशायामित्यर्थः । केचित्त्विति । 'तप ऐश्वर्य' 'वावृतु वरणे' इति धातुपाठे स्थितम् । तत्र 'वावृतु वरणे' इत्येवं वाशब्दं वृतु इत्यस्य आद्यवयवमिच्छन्तीत्यर्थः । एवञ्च 'तप ऐश्वर्यं' इत्येव स्थितम् । अस्मिन्पक्षे तपधातोः नित्यमेव श्यन् तङ् चेति भावः । तप्यते इति । ईष्टे इत्यर्थः । प्रथमपक्षे ऐश्वर्यं तपतीत्यपि भवति । पत इतीति । तपधातोस्तकारपकारयोः क्रमव्यत्यासेन 'पत ऐश्वर्यं वा' इति पाठान्तरमित्यर्थः । एवं व्यत्यासेन पाठे प्रयोगं दर्शयति—द्युत द्यामानि युतः पत्यमानः इति । प्रवायुमच्छा बृहतीत्यृचः एकदेशोऽयम् । 'पत्यमान' इत्यस्य ईशान इत्यर्थः । अत्र शटः शानच् आत्मनेपदं श्यन् च । पक्षान्तरे इति । 'वावृतु' इति पाठपक्षे इत्यर्थः । वावृत्यते इति । वृणोतीत्यर्थः । अपेक्षते इति यावत् । वावृतुधातोः प्रयोगं दर्शयति—ततो वावृत्यमानेति । अपेक्षमाणेत्यर्थः । न्यविक्षतेति । 'नेर्विशः' इत्यात्मनेपदम् । 'शक इगुपधात्' इति क्सः ।

च·शुशुचे। अशुचत्–अशोचीत्–अशोचिष्ट। ११६६ णह बन्धने। नह्यति–नद्धः ते। ननाह। नेहिथ–ननद्ध। नेहे। नद्धा। नत्स्यति। अनात्सीत्। ११६७ रञ्ज रागे। रज्यति–रज्यते। ११६८ शप आक्रोशे। शप्यति। शप्यते।

अथैकादशानुदात्तेतः। ११६९ पद गतौ। पद्यते। पेदे। पत्ता। पत्स्यते। अपत्सीष्ट। २५।३ **चिण् ते पदः** ३।१।६०॥ पदश्चलेश्चिण्यात्मनेपदे परे। प्रण्यपादि। अपत्साताम्। अपत्सत। ११७० खिद दैन्ये। खिद्यते। चिखिदे। खेत्ता। अखित्त। ११७१ विद सत्तायाम्। विद्यते। वेत्ता। ११७२ बुध अवगमने। बुध्यते। बुबुधे। बोद्धा। भोत्स्यते। अभुत्सीष्ट। अबोधि–अबुद्ध। अभुत्साताम्। ११७३ युध संप्रहारे। युध्यते। युयुधे। योद्धा। अयुद्ध। कथं 'युध्यति' इति। युधमिच्छतीति क्यच्। 'अनुदात्तेत्त्वलक्षणमात्मनेपदमनित्यम्' (प ९७) इति वा। ११७४ अनो रुध कामे। अनुरुध्यते। ११७५ अण प्राणने। अण्यते। आणे। अणिता। 'अन' इति दन्त्यान्तोऽयमित्येके। ११७६ मन ज्ञाने। मन्यते। मेने। मन्ता। ११७७ युज समाधौ। समाधिश्चित्तवृत्तिनिरोधः। अकर्मकः। युज्यते। योक्ता।

अथ पञ्च स्वरितेत इति। **'शप आक्रोशे' इत्यन्ता इत्यर्थः**। शुच्यतीति। **क्लिन्नं भवतीत्यर्थः**। अशुचदिति। **हरित्वादङिति भावः**। णह बन्धने इति। णोपदेशोऽयम्। अनिट्। ननाहेति। **नेहतुः**। भारद्वाजनियमात्थलि वेट् इति मत्वा आह—नेहिथ ननद्धेति। **इट्पक्षे 'थलि च सेटि' इत्येत्वाभ्यासलोपौ। इडभावे तु 'नहो धः' इति हस्य ध इति भावः**। रञ्ज रागे। अनिट्। रज्यतीति। **'अनिदिताम्' इति नलोप इति भावः। ररञ्ज। ररञ्जतुः। ररञ्जिथ–ररङ्क्थ। ररञ्जिव। रङ्क्ता इत्यादि**। अथैकादशेति। **'लिश अल्पीभावे' इत्यन्ता इत्यर्थः**। पद गतौ। अनिट्। चिण् ते पदः। पदश्चलेरिति। **'चलेस्सिच्' इत्यतः चलेरित्यनुवर्तते इति भावः**। तशब्दे इति। **आत्मनेपदप्रथमैकवचने। इत्यर्थः। इदं च भाष्ये स्पष्टम्**। प्रण्यपादीति। **सिचश्चिणि 'उपधावृद्धौ 'चिणो लुक्' इति तशब्दस्य लोपः। 'नेर्गद' इति णत्वमिति भावः**। विद सत्तायाम्। वेत्तेति। **अनिदिति भावः। लिटि क्रादिनियमादिट्। एवं बुधधातुरपि**। बोद्धेति। **तासि 'झषस्तथोः' इति तकारस्य धकारः**। भोत्स्यते इति। **'एकाचः' इति भष्**। भुत्सीष्टेति। **'लिङ्सिचौ' इति कित्त्वम्। 'दीपजन' इति चिण्विकल्पं मत्वा आह**—अबोधि अबुद्धेति। कथं युध्यतीति। **आत्मनेपदित्वादिति भावः। समाधत्ते**—युधमिति। **युध्शब्दः भावक्विबन्तः। युधमिच्छतीत्यर्थं 'सुप आत्मनः' इति क्यजन्तात् परस्मैपदमित्यर्थः। अनुदात्तेत्वप्रयुक्तमात्मनेपदमनित्यमिति समाधानं त्वनुचितम्, तस्य भाष्याऽदृष्टत्वेन अप्रामाणिकत्वात्। अत एव 'व्यत्ययो बहुलम्' इति सूत्रभाष्ये 'प्रतीपमन्य ऊमिर्युध्यतीत्यत्र व्यत्ययेन परस्मैपदमित्येव समाहितम्। अनो रुध कामे**

११७८ सृज विसर्गे । अकर्मकः । 'संसृज्यते सरसिजैररुणांशुभिन्नैः' । ससृजिषे । स्रष्टा । स्रक्ष्यते 'लिङ्सिचौ-' (सू २३००) इति कित्त्वान्न गुणो नाप्यम् । सृक्षीष्ट । असृष्ट । असृक्षाताम् । ११७९ लिश अल्पीभावे । लिश्यते । लेष्टा । लेक्ष्यते । लिक्षीष्ट । अलिक्षत । अलिक्षाताम् ।

अथागणान्तात्परस्मैपदिनः । ११८० राधोऽकर्मकादवृद्धावेव । एवकारो भिन्नक्रमः । राधोऽकर्मकादेव श्यन् । उदाहरणमाह—वृद्धाविति । यन्मुख्यमपराध्यति ।

इति । अनु ह्यायुपसर्गात्परः रुधधातुः कामे वर्तत इत्यर्थः । युज समाधौ । अनिट् । अकर्मक इति । चित्तवृत्तेर्धात्वर्थान्तर्भावादिति भावः । अर्थान्तरे तु सकर्मकोऽपि भवति, 'सृजिदृज्योः सकर्मकयोः कर्मवद्भाव' इति कर्मवत्सूत्रवार्तिकात् । एतच्च कर्मकर्तृप्रक्रियायां स्पष्टीभविष्यति । सृज विसर्गे इति । अनिट् । विसर्गः स्वबन्धः उपसर्गवशात् । तदाह—अकर्मक इति । संसृज्यते इति । अरुणांशुभिन्नैः अरुणकिरणविकसितैः सरसिजैः कमलैः संसृज्यते सम्बध्नातीत्यर्थः । 'कमलिनी'ति शेषः । कर्तरि लकारोऽयम् , न स्वयं कर्मणि लकारः, अकर्मकत्वात् । अर्थान्तरे तु सकर्मकोऽयमिति कर्मकर्तृप्रक्रियायां वक्ष्यते । लिट्याह—ससृजिषे इति । क्रादिनियमादिडिति भावः । स्रष्टेति । 'सृजिदृशोर्झल्यमकिति' झल्यमागमे ऋकारस्य यणि व्रश्चादिना जस्य षः ष्टुत्वेन तकारस्य ट इति भावः । स्रक्ष्यते इति । पूर्ववदमि, जस्य षत्वे 'षढोः' इति षस्य कत्वे सस्य षत्वमिति भावः । आशीर्लिङि आह—सृक्षीष्टेति । अत्र लघूपधगुणमाशङ्क्य आह—लिङ्सिचाविति । नाप्यमिति । 'सृजिदृशोर्झल्यम्' इत्यमपि नास्तीत्यर्थः । अकित्येव तद्विधानादिति भावः । लुङ्याह—असृष्टेति । 'झलो झलि' इति सिचो लोपः । 'लिङ्सिचावात्मनेपदेषु' इति सिचः कित्त्वान्न गुणः नाप्यमिति भावः । लिश अल्पीभावे । लिक्षीष्टेति । 'लिङ्सिचौ' इति कित्त्वान्न गुणः । अलिक्षतेति । 'शल इगुपधात्' इति क्सः ।

आ गणान्तादिति । दिवादिगणसमाप्तिपर्यन्तमित्यर्थः । राधोऽकर्मकादवृद्धावेवेति । श्यन्निति शेषः । राधधातोरकर्मकादवृद्धावेवार्थे श्यनिति प्रतीयमानोऽर्थः । एवं सति अकर्मकादिति व्यर्थम् । राधेरर्थान्तरे च श्यन् न स्यात् । इष्यते हि 'अपराध्यती'त्यादौ द्रोहार्थेऽपि श्यन् । तत्राह—एवकारो भिन्नक्रम इति । यस्मिन् क्रमे वृद्धाविति अत ऊर्ध्वं एवकारः पठितः, ततोऽन्यः क्रमो यस्य स भिन्नक्रम इत्यर्थः । 'वृद्धा'वित्यत ऊर्ध्वं पठित एवकारः अन्यत्र निवेशनीय इति यावत् । तदेव दर्शयति—राधोऽकर्मकादेव श्यनिति । एवं चार्थान्तरेऽपि श्यन् सिध्यति । 'शत्रुं हिनस्ती'त्यर्थे शत्रुमपराध्नोतीत्यत्र सकर्मकत्वात् न श्यनिति भावः । तर्हि वृद्धावित्यस्य किं प्रयोजनमित्याशङ्क्य अकर्मकक्रिया एवंविधेति प्रदर्शनार्थं तत् , ननु परिसंख्यानार्थमित्याह । उदाहरणमाह वृद्धाविति । एतच्च वृद्धिग्रहणमकर्मकक्रियामात्रोपलक्षणमिति भावः ।

द्रुह्यतीत्यर्थः । 'विराध्यन्तं क्षमेत कः' । द्रुह्यन्तमित्यर्थः । राध्यत्योदनः । सिध्यतीत्यर्थः । कृष्णाय राध्यति । दैवं पर्यालोचयतीत्यर्थः । दैवस्य धात्वर्थेऽन्तर्भावाज्जीवत्यादिवदकर्मकत्वम् । ररा ध । रराधतुः । रराधिथ । 'राधो हिंसायाम्' (सू २५३२) इत्येत्त्वाभ्यासलोपाविह न । हिंसार्थस्य सकर्मकतया दैवादिकत्वायोगात् । राद्धा । रात्स्यति । अयं स्वादिश्चुरादिश्च । ११८१ व्यध ताडने । 'ग्रहिज्या'-(सू २४१२) इति सम्प्रसारणम् । विध्यति । विध्याध । विविधतुः । विव्यधिथ-विव्यद्ध । व्यद्धा । व्यत्स्यति । विध्येत् । विध्यात् । अव्यात्सीत् । ११८२ पुष पुष्टौ । पुष्यति । पुपोष । पुपोषिथ । पोष्टा । पोक्ष्यति । 'पुषादि-' (सू २३४३) इत्यङ् । अपुषत् । ११८३ शुष शोषणे । अशुषत् । ११८४ तुष प्रीतौ । ११८५ दुष वैकृत्ये । ११८६ श्लिष

तथाविधाऽर्थान्तराण्युदाहरति—यन्मद्भक्त्येत्यादिना । 'क्रुधद्रुह' इति सम्प्रदानत्वम् कृष्णाय राध्यतीति । 'राधीक्ष्योर्यस्य विप्रश्नः' इति सम्प्रदानत्वम् । दैवमिति । कृष्णस्य किमिदानीं शुभमशुभं वेति पृष्टा दैवज्ञः तस्य शुभाशुभसूचकादित्यादिग्रहस्थिति ज्योतिश्शास्त्रतः परीक्षते इति यावत् । ननु पर्यालोचने दैवस्य कर्मत्वात्कथमिह अकर्मकतेत्यत आह—दैवस्येति । ननु 'राधोऽकर्मकादवृद्धावेव' इत्यत्र वृद्धिग्रहणस्य उपलक्षणतया हिंसार्थकस्यापि राधेर्दैवादिकत्वात् रराधतुः इत्यादौ 'राधो हिंसायाम्' इति वक्ष्यमाणावेरभ्यासलोपौ स्यातामित्यत आह—राध इति । इह नेति । रराधतुः इत्यादौ राधेर्हिंसार्थकत्वे 'राधो हिंसायाम्' इति वक्ष्यमाणावेरभ्यासलोपौ न स्त इत्यर्थः । कुत इत्यत आह—हिंसार्थस्येति । नोन्मिषत्येवैषा शङ्का, राधेरकर्मकस्यैव दैवादिकत्ववचनात् । हिंसार्थकस्य च राधेः सकर्मकतया दैवादिकत्वाभावादुक्तशङ्काया अनुन्मेषादित्यर्थः । ननु राध्नोति, राधयति इति कथमित्यत आह—अयं स्वादिश्चुरादिश्चेति । रराधिथ । क्ङादिनियमात् नित्यमिट्, दीर्घाकारवत्त्वेन 'उपदेशेऽत्वतः' इत्यस्याप्रवृत्तेः अजन्तोऽकारवानित्यत्र च ह्रस्वाकारस्यैव विवक्षितत्वात् । राद्धा । अरात्सीत् । व्यध ताडने इति । चतुर्थान्तोऽयम् । अनिट् । विध्यतीति श्यनो ङित्त्वात् 'ग्रहिज्या' इति यकारस्य सम्प्रसारणे पूर्वरूपे विध्यतीति रूपमित्यर्थः । वकारस्य तु न सम्प्रसारणम् 'न सम्प्रसारणे सम्प्रसारणम्' इति निषेधात् । विव्याधेति । द्वित्वे कृते अभ्यासस्य 'लिट्यभ्यासस्य' इति सम्प्रसारणमिति भावः । विविधतुरिति । परत्वात् 'ग्रहिज्या' इति सम्प्रसारणे कृते द्वित्वमिति भावः । भारद्वाजनियमात्थलि वेडित्याह--विव्यधिथ-विव्यद्धेति । 'लिट्यभ्यासस्य' इति सम्प्रसारणम् । अनिट्पक्षे 'झषस्तथोः' इति धः । अव्यात्सीदिति । हलन्तलक्षणा वृद्धिः । पुष पुष्टौ । अनिट् । पुपोषिथेति । अजन्ताऽकारवत्त्वाऽभावात् क्ङादिनियमाभ्रित्यमिट् । अपुषदिति । पुषाद्यङ् । ङित्त्वाच्च गुणः । शुषधातुरनिट् । अशुषदिति । पुषाद्यङिति भावः । एवमग्रेऽपि । तुष् दुष् श्लिष् एते अनिटः । लुङि श्लिषः क्लेः सिजादेशे

आलिङ्गने । श्लिष्यति । शिश्लेष । श्लेष्टा । श्लेदयति । २५१४ (क) **श्लिषः** ३।१।४६॥ अस्मात्परस्यानिटश्च्लेः क्सः स्यात् । पुषाद्यङोऽपवादो न तु चिणः । पुरस्तादपवादन्यायात् । २५१४ (ख) **आलिङ्गने** ३।१।४६॥ श्लिषश्च्लेरालिङ्गने एव क्सो नान्यत्र । योगविभागसामर्थ्यात् 'शल इगुपधात्—' (सू २३३६) इत्यस्याप्ययं नियमः । अश्लिक्षत्कन्यां देवदत्तः। 'आलिङ्गन एव' इति किम् । समाश्लिषज्जतुकाष्ठम् । (आङ्) प्रत्यासत्ताविह श्लिषिः । कर्मण्यना-

---

प्राप्ते—श्लिषः । 'च्लेरिति 'शल इगुपधात्' इत्यतः अनिटः क्स इति चानुवर्तते । तदाह—अस्मात्परस्येत्यादिना । ननु 'शल इगुपधात्' इत्येव क्से सिद्धे किमर्थमिदमित्यत आह—पुषाद्यङोऽपवाद इति। 'शल इगुपधात्' इति क्सं बाधित्वा परत्वात् पुषाद्यङ् स्यात् , तन्निवृत्तये पुनः क्सविधिरित्यर्थः । ननु 'श्लिष' इति क्सः यथा परमपि पुषाद्यङं बाधते तथा 'चिण्भावकर्मणोः' इति चिणमपि परं बाधेत, एवं सति 'उपाश्लेषि कन्या देवदत्तेन' इत्यत्र कर्मणि लुङि 'चिण्भावकर्मणोः' इति श्लेश्चिण् न स्यादित्यत आह—ननु चिण इति । 'श्लिषः' इति क्सविधिः 'चि भावकर्मणोः' इति चिण्विधेर्न बाधक इत्यर्थः । कुत इत्यत आह—पुरस्तादिति । 'शल इगुपधादनिटः क्सः' ,'श्लिषः' 'पुषादिद्युताद्यृलृदितः परस्मैपदेषु' चिण् भावकर्मणोः' इति सूत्रक्रम इति भावः । आलिङ्गने । 'श्लिषः' इति पूर्वसूत्रे यदनुवृत्तं तत्सर्वमिहानुवर्तते, श्लिष इति च । तथाच आलिङ्गने विद्यमानात् श्लिषेः परस्य च्लेः क्सः स्यादिति लभ्यते । 'श्लिषः' इति पूर्वसूत्रेणैव सिद्धे नियमार्थमिदम् । तदाह—श्लिषश्च्लेरालिङ्गने एव क्सो नान्यत्रेति । नन्वयं नियमः 'अनन्तरस्य' इति न्यायात् 'श्लिष' इति सूत्रप्राप्तस्यैव स्यात्, ननु 'शल इगुपधात्' इत्यस्यापीत्यत आह—शल इगुपधादित्यस्याप्ययं नियम इति । कुत इत्यत आह—योगविभागसामर्थ्यादिति । यदि 'श्लिष' इति प्राप्त एव क्स आलिङ्गन एव इति नियम्येत तर्हि योगविभागो व्यर्थः स्यात् । 'श्लिष आलिङ्गने' इत्येकसूत्रत्वे सत्यपि अनालिङ्गने क्सो नेत्यस्यार्थस्य सिद्धत्वात् । अतः 'शल इगुपधात्' इति क्सोऽपि श्लिषेरालिङ्गने एव न त्वनालिङ्गनेऽपि इति नियमो विज्ञायत इत्यर्थः । अश्लिक्षत् कन्यां देवदत्त इति । आलिङ्गदित्यर्थः । अत्र पुषाद्यङं बाधित्वा अनेन क्सः । समाश्लिषज्जतु काष्ठमिति । जतु लाक्षा । सा च काष्ठलग्नैवोत्पद्यते इति स्थितिः । जतु च काष्ठं चेति समाहारद्वन्द्वः । 'उपाश्लिषत् जतु काष्ठं च' इत्येव भाष्यम् । अत्र श्लिषेरालिङ्गनार्थकत्वाभावान्न क्सः, किंतु पुषाद्यङेवेति भावः । नन्वजादित्वाऽभावेन आडागमस्याऽसम्भवात् समाश्लिषदित्ययुक्तमित्यत आह—आङिति । समाश्लिषत् इत्यत्र श्लिषेः प्राक् आङ् उपसर्ग एव, न त्वाडागम इति भ्रमितव्यमित्यर्थः । नन्वालिङ्गनं समाश्लेषणं तथाच 'समाश्लिषज्जतु काष्ठम्' इत्यत्रापि श्लिषेरालिङ्गनार्थकत्वात् क्सो दुर्वार इत्यत आह—प्रत्यासत्ताविहेति । इह 'समाश्लिषज्जतु

लिङ्गने सिजेव, न तु क्सः। एकवचने चिण्। अश्लेषि। अश्लिक्षाताम्। अश्लिक्षत। अश्लिष्ठाः। अश्लिड्ढ्वम्। ११८७ शक विभाषितो मर्षणे। विभाषित इत्युभय-

---

काष्ठम्' इत्यत्र श्लिषिः प्रत्यासत्तौ संयोगे वर्तते, नतु बाह्वादिना संवलनात्मकसम्बन्धविशेषरूपे आलिङ्गने इत्यर्थः। नन्वालिङ्गने एव श्लिषश्चलेः क्सः, न त्वनालिङ्गने इति नियमात् अनालिङ्गने 'शल इगुपधात्' इत्यपि क्सो न भवतीत्युक्तमयुक्तम्। 'समाश्लिषज्जतुकाष्ठ'मित्यत्रानालिङ्गने 'शल इगुपधात्' इति क्सं बाधित्वा परत्वात् पुषाद्यङ एव प्राप्त्या क्सस्याऽप्रसक्तेरित्यत आह-कर्मणीति। अनालिङ्गनवृत्तेः श्लिषधातोः कर्मणि लुङि च्लेस्सिजेव भवति, न तु पुषाद्यङ्, तस्य परस्मैपदविषयत्वात्, कर्मणि लुङश्च 'भावकर्मणोः' इत्यात्मनेपदनियमात्। तस्य च 'शल इगुपधात्' इति प्राप्तः क्सः ङक्तेन नियमेन अनालिङ्गनेऽपि वार्यते इति युक्तमित्यर्थः। यदुक्तं 'आलिङ्गने श्लिषश्चलेः क्सः पुषाद्यङ एवापवादः, नतु चिणः' इति, तस्य प्रयोजनमाह—एकवचने चिणिति। तदेवोदाहृत्य दर्शयति—अश्लेषीति। आलिङ्गिता कन्या देवदत्तेनेत्यर्थः। श्लिषेरालिङ्गनार्थकात् कर्मणि लुङि प्रथमैकवचने तशब्दे परे 'चिण् भावकर्मणोः' इति च्लेश्चिणि कृते 'चिणो लुक्' इति तशब्दस्य लुक्। अत्र 'श्लिष' इति क्सस्य पुषाद्यङ्मात्रापवादत्वाच्चिणपवादत्वाऽभावाच्चिण् निर्बाध इति भावः। 'समाश्लेषि जतुना काष्ठम्' इत्यत्र तु अनालिङ्गनात् च्लेश्चिणो निर्बाधत्वादश्लेषीति निर्बाधमेव। एवं च आलिङ्गने अनालिङ्गनेऽपि श्लिषः कर्मणि लुङि एकवचने तशब्दे परे च्लेश्चिणेवेति स्थितम्। अथाऽनालिङ्गने श्लिषः कर्मणि लुङि 'शल' इति क्सोऽपि नेति यदुक्तं तदुदाहृत्य दर्शयति—अश्लिक्षातामिति। अनालिङ्गने श्लिषः कर्मणि लुङः आतामि च्लेः क्साऽभावात् सिचि 'षढोः' इति षस्य कत्वे सस्य षत्वे रूपमिति भावः। नन्वश्लिक्षातामित्यत्र सत्यपि क्से 'क्सस्याचि' इत्यकारलोपे इष्टं सिद्धमित्यस्वरसात्कर्मणि लुङि झादावुदाहरति—अश्लिक्षतेत्यादि। अश्लिष् स् झ इति स्थिते झोऽन्तादेशं बाधित्वा 'आत्मनेपदेष्वनतः' इत्यदादेशे षस्य कत्वे सिचः सस्य षत्वे अश्लिक्षतेतीष्यते। च्लेः क्से तु सति अश्लिष् स् झ इति स्थिते 'क्सस्याचि' इत्यकारलोपाऽप्रसक्तेरतः परत्वात् 'आत्मनेपदेष्वनतः' इत्यदादेशो न स्यादिति भावः। अश्लिष्ठा इति। श्लिषेः कर्मणि लुङस्थासि च्लेः सिचि 'झलो झलि' इति सिचो लोपे ष्टुत्वे 'अश्लिष्ठा' इति रूपमिष्यते। क्से तु 'झलो झलि' इत्यसम्भवादश्लिक्षथाः इति स्यादिति भावः। अश्लिड्ढ्वमिति। श्लिषः कर्मणि लुङो ध्वमि सिचि 'झलो झलि' इति सस्य लोपे षस्य जश्त्वेन डकारे ष्टुत्वेन षस्य ढः। क्से तु सति अश्लिक्षध्वम् इति स्यादिति भावः। शक विभाषित इति। मर्षणे अथ शकधातुर्विकल्पित इत्यर्थः। विकल्पश्च प्रकृतपरस्मैपदविषयक एव न तु दिवादिपाठविषयकः, व्याख्यानात्। तदाह—उभयपदीति। मर्षणमिह सामर्थ्यम्।

पदीत्यर्थः । शक्यति-शक्यते वा हरिं द्रष्टुं भक्तः । शशाक । शेकिथ-शशक्थ । शेके । शक्ता । शक्ष्यति-शक्ष्यते । अशकत्-अशक्त । सेट्कोऽयमित्येके । तन्मते-नानिट्कारिकासु लृदित्पठितः । शकिता । शकिष्यति । ११८८ ष्विदा गात्रप्रक्षरणे । घर्मस्रुतावित्यर्थः । अयं ओदित इति न्यासकारादयः । नेति हरदत्तादयः । स्विद्यति । सिष्वेद । सिष्वेदिथ । स्वेत्ता । अस्विदत् । ११८९ क्रुध क्रोधे । क्रोद्धा । क्रोत्स्यति । ११९० क्षुध बुभुक्षायाम् । क्षोद्धा । कथं क्षुधित इति । सम्पदादिक्विबन्तात्तारकादित्वादितजिति माधवः । वस्तुतस्तु 'वसतिक्षुधोः—' (सू ३०४६) इतीट् वक्ष्यते । ११९१ शुध शौचे । शुध्यति । शुशोध । शोद्धा । ११९२ षिधु संराद्धौ । ऊदित्पाठः प्रामादिकः । सिध्यति । सेद्धा । सेत्स्यति । असिधत् । ११९३ रध हिंसासंराद्धयोः । संराद्धिर्निष्पत्तिः । रध्यति । 'रधिजभोरचि' (सू २३०२) इति नुम् । ररन्ध । ररन्धतुः । २५१५ रधादिभ्यश्च ७।२।४५॥रध्, नश्, तृप्, दृप्, द्रुह्, मुह्, ष्णुह्, ष्णिह् एभ्यो वलाद्यार्धधातुकस्य वेट् स्यात् । ररन्धिथ-ररद्ध । ररन्धिव-रेध्व । २५१६ नेट्यलिटि रधेः ७।१।६२॥ लिङ्-वर्जे इटि रधेर्नुम् न स्यात् । रधिता-रद्धा । रधिष्यति-रत्स्यति । अक्षि तु नुम् ।

शक्यति शक्यते वा हरिं द्रष्टुं भक्त इति । समर्थो भवतीत्यर्थः । सेट्कोऽयमित्येके इति । स्वमते स्वनिट्क एवेति भावः । ननु अनिट्कारिकासु लृदितः शकेः पाठात् कथमनिट्कत्वमित्यत आह—तन्मतेनेति । ये सेट्त्वं शकेर्वदन्ति तन्मतमवलम्ब्य अनिट्कारिकासु शकिः लृदित्पठित इत्यर्थः । सम्पदादिक्विबन्तादिति । क्षुध्यत इति क्षुध्, भावे क्विप् । क्षुध् अस्य संजाता क्षुधित इति विग्रहः । वसतिक्षुधोः इति । वसेः क्षुधेश्च क्त्वानिष्ठयोरिडागमः स्यादिति तदर्थः । वक्ष्यते इति । 'कृस्विं'ति शेषः । षिधु संराद्धाविति । निष्पत्तावित्यर्थः । प्रामादिकः इति । माधवादिसम्मतत्वादिति भावः । रध हिंसेति सेट् । चतुर्थान्तोऽयम् । ररन्धतुरिति । पत्त्वाभ्यासलोपौ बाधित्वा परत्वान्नुमि संयोगाप्परत्वेन अकित्त्वाच्चलोपो नेति भावः । रधादिभ्यश्च । 'आर्द्धधातुकस्येड्वलादेः' इत्यनुवर्तते । 'स्वरतिसूति' इत्यतो वेति चेत्यभिप्रेत्य शेषं पूरयति—वलाद्यार्द्धधातुकस्य वेति । 'आर्द्धधातुकस्य' इति नित्ये प्राप्ते विकल्पोऽयम् । क्षुटि तासि इटि 'रधिजभोरचि' इति नुमि प्राप्ते—नेट्यलिटि रधेः । 'इदितो नुम् धातोः' इत्यतो नुमित्यनुवर्तते । तदाह-लिङ्वर्जे इटीति । अक्षि त्विति । पुषाद्यक्षि कृते सतीत्यर्थः । अरधदिति । 'मो अहं द्विषतेऽरधम् ।' दृश अदर्शने इति । शोपदेशोऽयं सेट । 'रधादिभ्यश्च' इति वेट् । तत्र इट्पक्षे आह-नेश्शिये ति । 'थलि च सेटि' इत्येत्त्वाभ्यासलोपाविति भावः । इडभावपक्षे ननक्ष्थ इति स्थिते । मस्जिनशोर्झलि । नुम् स्यादिति । 'इदितो नुम्' इत्य-

'अनिदिताम्-' (सू ४१५) इति नलोपः। अरघत्। ११९४ णश अदर्शने। नश्यति। ननाश। नेशतुः। नेशिथ। २।१७ **मस्जिनशोर्झलि** ७।१।६०॥ नुम् स्यात्। ननंष्ठ। नेशिव-नेश्व। नेशिम-नेश्म। नशिता-नंष्टा। नशिष्यति-नङ्क्ष्यति। नश्येत्। नश्यात्। अनशत्। प्रणश्यति। २।१८ **नशेः षान्तस्य** ८।४।३६॥ णत्वं न स्यात्। प्रनंष्टा। अन्तग्रहणं भूतपूर्वप्रतिपत्त्यर्थम्। प्रनङ्क्ष्यति-नशिष्यति। ११९५ तृप प्रीणने। प्रीणनं तृप्तिस्तर्पणं च। 'नाग्निस्तृप्यति काष्ठानाम्'। 'पितृनताप्सीत्' इति भट्टिः। इत्युभयत्र दर्शनात्। ततर्पिथ-ततर्प्थ-तत्रप्थ। तर्पिता-तर्प्ता-त्रप्ता। 'स्पृशमृशकृष—' इति सिज्वा। अतर्पीत्-अताप्सीत्-अत्राप्सीत्-अतृपत्। ११९६ दृप हर्षमोहनयोः। मोहनं गर्वः। दृप्यतीत्यादि। 'रधादिस्वादिभौ वेट्कावमर्थमनुदात्तता'। ११९७ द्रुह जिघांसायाम्। 'वा द्रुहमुह'-(सू ३२७) इति वा घः। पक्षे ढः। दुद्रोहिथ-दुद्रोग्ध-दुद्रोढ। द्रोहिता-द्रोग्धा-द्रोढा। द्रोहिष्यति-ध्रोक्ष्यति। ढत्वघत्वयोस्तुल्यं रूपम्। अद्रुहत्। ११९८ मुह वैचित्त्ये। वैचित्यमविवेकः। मुह्यति। मुमोहिथ-मुमोग्ध-मुमोढ। मोहिता-

---

तस्तदनुवृत्तेरिति भावः। ननंष्टेति। **ष्टुत्वम्।** प्रणश्यतीति। **'उपसर्गादसमासे' इति णत्वम्।** नशेः षान्तस्य। **'रषाभ्याम्' इत्यतो ण इति 'न भाभूपू' इत्यतः नेति चानुवर्तते इत्यभिप्रेत्य शेषं पूरयति**—णत्वं न स्यादिति॥ **षान्तस्येति किम् प्रणश्यति।** भूतपूर्वेति। **पूर्वं षकारस्य सत इदानीमादेशवशेन षान्तत्वाभावेऽपि णत्वनिषेधप्राप्त्यर्थमन्तग्रहणमित्यर्थः।** प्रनङ्क्ष्यतीति। **अत्र षस्य कत्वे कृतेऽपि भूतपूर्वंगत्या षान्तत्वान्न णत्वमिति भावः।** तृप प्रीणने। तृप्तिस्तर्पणं चेति। **आद्ये अकर्मकः। द्वितीये सकर्मकः। रधादिस्वाद्वेडिति मत्वा आह**—ततर्पिथ ततर्प्थेति। तत्रप्थेति च। **'अनुदात्तस्य चर्दुपधस्य' इत्यमिति भावः। ततृपिव-ततृप्व।** सिज्वेति। **पक्षे पुषादित्वादङिति भावः। रधादिस्वादिड्विकल्पः। तत्र सिचि इट्पक्षे आह**—अतर्पीदिति। **इडभावपक्षे आह**—अताप्सीदिति। **इलन्तलक्षणा वृद्धिरिति भावः। 'अनुदात्तस्य च' इत्यम्पक्षे आह**—अत्राप्सीदिति। **पुषादिद्युतादिलृदित्परस्मैपदेषु वृतृपदृधूङ्सिध्वस्जिदसिघसीनां च' इति वार्तिकेन सिचः कित्त्वाद्गुणाभावे आह**—अतृपदिति। **क्ङिति च' इति गुणनिषेधः। तृप हर्षे इति। तृपधातुवत्। ननु रधादिस्वादेव वेट्कत्वादनिट्कारिकासु तृप्यतिदृप्यत्योः पाठो व्यर्थ इत्यत आह**—रधादिस्वादिभौ वेट्कावमर्थमनुदात्तता इति। द्रुह जिघांसायाम्। **अनुदात्तत्वाभावेऽपि रधादिस्वाद्वेट्। तत्र इडभावे आह**—वा द्रुहमुह इति। ध्रोक्ष्यतीति। **'वा द्रुह' इति घत्वपक्षे दकारस्य भषि घस्य चत्वं सस्य षत्वे रूपम्। ढत्वपक्षेऽपि 'षढोः' इति कत्वे एतदेव रूपम्। तदाह**—ढत्वघत्वयोस्तुल्यं रूपमिति। अद्रुहदिति। **पुषादित्वादङिति भावः। मुहधातुरनुदात्तत्वाऽभावेऽपि रधादित्वात् वेट्।** मुमोहिथेति। **इट्पक्षे रूपम्। अनिट्पक्षे तु 'वा द्रुहमुह' इति घत्वं मत्वा**

मोग्धा–मोढा । मोहिष्यति-मोक्ष्यति । अमुहत् । ११९९ ष्णुह उद्गिरणे । स्नुह्यति । सुष्णोह । सुष्णोहिथ–सुष्णोग्ध–सुष्णोढ । सुष्णुहिव–सुष्णुह्व । स्नोहिता–स्नोग्धा–स्नोढा । स्नोहिष्यति–स्नोक्ष्यति । अस्नुहत् । १२०० ष्णिह प्रीतौ । स्निह्यति । सिष्णेह । वृत् । रधादयः समाप्ताः । पुषादयस्तु आगणान्तादिति सिद्धान्तः । १२०१ शमु उपशमे । २५१९ शमामष्टानां दीर्घः श्यनि ७।३।७४॥ शमादीनामित्यर्थः । प्रणिशाम्यति । शेमतुः । शेमिथ । शमिता । अशमत् । १२०२ तमु काङ्क्षायाम् । ताम्यति । तमिता । अतमत् । १२०३ दमु उपशमे । उपशम इति व्यन्तस्य । तेन सकर्मकोऽयम् । न तु शमिवदकर्मकः । अदमत् । १२०४ श्रमु तपसि खेदे च । श्राम्यति । अश्रमत् । १२०५ भ्रमु अनवस्थाने । 'वा भ्राश–'(सू३२१) इति श्यन्वा । तत्र कृते 'शमामष्टानाम्—' (सू २५१९) इति दीर्घः । भ्राम्यति । लुङ्यङ्—अभ्रमत् । शेषं भ्वादिवत् । १२०६ क्षमू सहने । क्षाम्यति । क्षक्षमिथ–क्षक्षन्थ । क्षक्षमिव–क्षक्ष्व । क्षक्षमिम–क्षक्ष्म । क्षमिता–क्षन्ता । अयमषित् । भ्वादिस्तु षित् । 'अषितः क्षाम्यतेः क्षान्तिः क्षमूषः क्षमते क्षमा' । १२०७ क्लमु

आह—मुमोग्धेति । ढत्वपक्षे आह—मुमोढेति । मोक्ष्यतीति । घत्वढत्वयोस्तुल्यं रूपम् । ष्णुह ष्णिहेति । षोपदेशौ । तदाह—सुष्णोह । सिष्णेहेति । थलादावनिट्पक्षे 'वा द्रुह' इति घत्वविकल्पः । पक्षे ढः । इति रधादयः । आ गणन्तादिति । दिवादिगणसमाप्तिपर्यन्ता पुषादयः इत्यर्थः । सिद्धान्त इति । माधवादिभिस्तथाऽभ्युपगमादिति भावः । उपशमे इति । उपशमो नाशः इन्द्रियनिग्रहश्च । शमामष्टानाम् । ल्पष्टम् । बहुवचनात् शमादिग्रहणम् । तदाह—शमादीनामिति । 'शमस्तमुर्दमुरथ श्रमुर्भ्रमुरपि क्षमुः । क्लमुर्मदी चेत्येतेऽष्टौ शमादय इति स्थितिः ।' दमु उपशमे इति । ननु शमु दमु उपशमे इत्येव पठितुं युक्तमित्यत आह—उपशम इति । शमधातोर्हेतुमण्ण्यन्तात् वञ्जि 'नोदात्तोपदेशस्य' इति वृद्ध्यभाव इत्यर्थः । ततः किमित्यत आह—तेनेति । ततश्च दाम्यतीत्यस्य शमयतीत्यर्थः । शेषं भ्वादिवदिति । आर्धधातुकेषु शप्पक्षे च भ्वादिवदित्यर्थः । क्षमू सहने । ऊदित्त्वात् थलि वमादौ च इड्विकल्पः । तदाह—क्षक्षमिथेत्यादि । षित्त्वाऽषित्त्वयोः फलभेदं श्लोकार्द्धेन संगृह्णाति—अषितः इति । अषितः क्षाम्यतेः श्यन्विकरणपठितस्य क्षमधातोः क्तिनि क्षान्तिः इति रूपम् । अषित्त्वात् 'षिद्भिदादिभ्यः' इत्यङ् न । क्षमूषस्तु भौवादिकात् षितः आत्मनेपदे शपि क्षमते इति रूपम्, क्तिनं बाधित्वा षित्त्वादङि क्षमेति रूपं चेत्यर्थः । क्लमु लानौ । नन्वस्य शमादिगणात् बहिरेव दिवादिगणे पाठोऽस्तु । नच 'शमामष्टानाम्' इति दीर्घार्थं शमादिगणे अस्य पाठ इति वाच्यम्, 'ष्ठिवुक्लमुचमां शिति' इत्येव शपि परे इव श्यनि परेऽपि दीर्घसिद्धेः । नच 'ष्ठिवुक्लमुचमां शिति' इत्यत्रैव क्लमुग्रहणं त्यज्य-

ग्लानौ । क्लाम्यति-क्लामति । शपीव श्यन्यपि 'ष्ठिवुक्लमु-' (सू २३२०) इत्येव दीर्घे सिद्धे शमादिपाठो घिनुणर्थः । अङ् । अक्लमत् । १२०८ मदी हर्षे । माद्यति । अमदत् । शमादयोऽष्टौ गताः ।

१२०९ **अस्तु क्षेपणे** । अस्यति । आस । असिता । २५२० **अस्यतेस्थुक्** ७।४।१७॥ अङि परे । आस्थत् । अस्य पुषादित्वादङि सिद्धे 'अस्यतिवक्ति—' (सू २४३८) इति वचनं तङर्थम् । तङ् तु 'उपसर्गादस्यत्यूह्योः' (वा ६२०) इति वक्ष्यते । पर्यास्थत । १२१० **यसु प्रयत्ने** । २५२१ **यसोऽनुपसर्गात्** ३।१।७१॥ २५२२ **संयसश्च** ३।१।७२॥ श्यन्वा स्यात् । यस्यति-यसति । संयस्यति-संयसति । अनुपसर्गात् किम् । प्रयस्यति । १२११ **जसु मोक्षणे** । जस्यति । १२१२ **तसु उपक्षये** । १२१३ **दसु च** । तस्यति । अतसत् । दस्यति । अदसत् । १२१४ **वसु स्तम्भे** । वस्यति । ववास । ववसतुः । 'न शसदद-' (सू २२६३) इति निषेधः । वशादिरयमिति मते तु, वेसतुः । वेसुः । १२१५ **व्युष विभागे** । अयं दाहे पठितः, अर्थभेदेन स्वर्थं पुनः पठ्यते । अव्युषत् । ओष्ठ्यादिर्दन्त्या-

---

तामिति वाच्यम् , शपि दीर्घार्थं तस्यावश्यकत्वादित्याशङ्क्य परिहरति—शपीव श्यन्यपीत्यादि घिनुणर्थं श्यन्तम् । **'शमित्यष्टाभ्यो घिनुण्' इति विधानादिति भावः । शमादय** इति । **'शमु उपशमे' इत्यारभ्य 'मदी हर्षे' इत्यन्ता अष्टौ शमादयो वृत्ता इत्यर्थः ।**

असु क्षेपणे । अस्यतेस्थुक् । **शेषं पूरयति**—अङि परे इति । **'ऋदृशोऽङि' इत्यतस्तदनुवृत्तेरिति भावः । थुकि ककार इत् उकार उच्चारणार्थः किन्त्वादसधातोरन्त्यावयवः । ननु पुषादित्वादेवास्यतेश्च्लेरङि सिद्धे 'अस्यतिवक्तिख्यातिभ्योऽङ्' इत्यत्र अस्यतिग्रहणं व्यर्थमित्याशङ्क्य निराकरोति**—अस्य पुषादित्वादिति । तङर्थमिति । **'पर्यास्थतेऽत्यत्र आत्मनेपदे अङर्थमस्यतिवक्तीत्यत्र अस्यतिग्रहणमित्यर्थः, पुषाद्यङः परस्मैपदमात्रविषयतया आत्मनेपदे अप्रसक्तेरिति भावः । नन्वस्यतेः केवलपरस्मैपदित्वादात्मनेपदं दुर्लभमित्यत आह**—तङ् तु उपसर्गादिति वक्ष्यते । इति । **'पदव्यवस्थाया'मिति शेषः ।** यसु प्रयत्ने । यसोऽनुपसर्गात् । संयसश्च । **सूत्रद्वयमिदम् ।** श्यन् वा स्यादिति । **शेषपूरणमिदम् । 'दिवादिभ्यः श्यन्' इत्यतः 'वा भ्राश' इत्यतश्च तदनुवृत्तेरिति भावः । अनुपसर्गाद्यसः श्यन् वा स्यादिति प्रथमसूत्रार्थः । सोपसर्गात्तु नित्य एव श्यन्, अनुपसर्गादिति पर्युदासात् । सम्पूर्वात् यसेर्नित्यमेव श्यनः प्राप्तौ द्वितीयसूत्रम् ।** व्युष विभागे । अयमिति । **दिवादिगण एव पुषादिभ्यः प्रागयं धातुः पठित इत्यर्थः । पौनरुक्त्यमाशङ्क्य आह**—अर्थभेदेन स्वर्थं पठ्यते इति । **विभागात्मके अर्थविशेषे एव पुषाद्यङर्थमिह पुनः पाठ इत्यर्थः ।** अव्युषदिति । **'व्युष दाहे' इति पूर्वपठितस्य तु सिजेव । अव्योषीत् ।** ओष्ठ्यादिरिति । **दन्त्योष्ठ्यादिर्दन्त्योष्मान्तोऽय-**

न्तोऽयम्–ष्वुस इति केचित् । अयकारः वुस इत्यन्ये । १२१६ प्लुष दाहे । अप्लुषत् । पूर्वत्र पाठः सिजर्थ इत्याहुः । तद्भ्वादिपाठेन गतार्थमिति सुवचम् । १२१७ विस प्रेरणे । विस्यति । अविसत् । १२१८ कुस संश्लेषणे । अकुसत् । १२१९ वुस उत्सर्गे । १२२० मुस खण्डने । १२२१ मसी परिणामे । परिणामो विकारः । समी इत्येके । १२२२ लुठ विलोडने । १२२३ उच समवाये । उच्यति । उवोच । ऊचतुः । मा भवानुचत् । १२२४ भृशु १२२५ भ्रंशु अधःपतने । बभर्श । अभृशत् । 'अनिदिताम्–' (सू ४१५) इति नलोपः । भ्रश्यति । अभ्रशत् । १२२६ वृश वरणे । वृश्यति । अवृशत् । १२२७ कृश तनूकरणे । कृश्यति । १२२८ ञि तृषा पिपासायाम् । १२२९ हृष तुष्टौ । श्यन्श्लौ भौवादिकाद्विशेषः । १२३० रुष १२३१ रिष हिंसायाम् । 'तीषसह–' (सू २३४०) इति वेट् । रोषिता–रोष्टा । रेषिता–रेष्टा । १२३२ डिप क्षेपे । १२३३ कुप क्रोधे । १२३४ गुप व्याकुलत्वे । १२३५ युप १२३६ रुप १२३७ लुप विमोहने । युप्यति । प्यति । लुप्यति । लोपिता । लुप्यतिः सेट्कः । अनिट्कारिकासु लिपिसाहचर्यात्तौदादिकस्यैव ग्रहणात् । १२३८ लुभ गार्ध्ये । गार्ध्यमाकाङ्क्षा । 'तीषसह–' (सू २३४०) इति वेट् । लोभिता–लोब्धा । लोभिष्यति । लुभ्येत् । लुभ्यात् । अलुभत् । भ्वादेरवृत्कृतत्वाल्लोभतीत्यपीत्याहुः । १२३९ क्षुभ सञ्चलने । क्षुभ्यति । १२४० णभ १२४१ तुभ हिंसायाम् । क्षुभिनभितुभयो द्युतादौ क्रयादौ च पठ्यन्ते । तेषां द्युतादित्वादङ् सिद्धः । क्रयादित्वात्पक्षे सिज्भवत्येव । इह पाठस्तु श्यन्नर्थः ।

मिति केचिन्मन्यन्त इत्यर्थः । अयकार इति । दन्तोष्ठ्यादिदन्त्योष्मान्तो यो धातुरुक्तः स एवायं यकाररहित इत्यन्ये मन्यन्त इत्यर्थः । 'अयकार'मिति पाठे क्रियाविशेषणम् । प्लुष दाहे । ननु दिवादिगणे परस्मैपदिषु पुषादिभ्यः प्राक् अस्य पाठः क्वचित् दृश्यते । तत्र पौनरुक्त्यशङ्कां परिहरति—पूर्वत्र पाठः सिजर्थ इति । पुषादावेव पाठे सति अङेव श्रूयेत नतु सिच् । पुषादेः प्रागपि पाठे तु तस्य अङभावात् सिच् श्रूयेत । तथा च सिचः कदाचित् श्रवणार्थः पूर्वं पाठ इत्यर्थः । आहुरित्यस्वरसोद्भावनम् । तद्वीजं दर्शयति—तद्भ्वादीति । तत् दिवादिगणे पुषादिभ्यः पूर्वमस्य पठनं भ्वादिपाठेनैव सम्पन्नप्रयोजनकमिति सुष्ठु वक्तुं शक्यमित्यर्थः । एवं च भ्वादिपाठात् शब्विकरणः लुङि सिचः श्रवणं च सिध्यति । पुषादौ पाठात्तु श्यन्विकरणः अङ् च सिध्यति । अतः दिवादिगणे पुषादिभ्यः प्रागस्य पाठो व्यर्थं एवेति भावः । एतदेवाभिप्रेत्य मूले दिवादिगणे पुषादिगणात् प्राक् 'प्लुष दाहे' इति न पठितमिति बोध्यम् । मसी परिणामे इति । ईदित्वं 'श्वीदितः' इत्येतदर्थम् । मस्यति । समी इत्येके इति । सम्यति । भृशु भ्रंशु अधःपतने । द्वितीयधातोराह–अनिदितामिति । युप रुप लुप विमोहने इति । धातुवृत्त्यादिविरो-

१२४२ क्लिदू आर्द्रीभावे। क्लिद्यति। चिक्लेदिथ-चिक्लेत्थ। चिक्लिदिव-चिक्लिद्व। चिक्लिदिम-चिक्लिद्म। क्लेदिता-क्लेत्ता। १२४३ ञि मिदा स्नेहने। 'मिदेर्गुणः' (सू २३४६) मेद्यति। अमिदत्। द्युतादिपाठादेव अमिदत्, अमेदिष्टेति सिद्धे इह पाठः अमेदीदिति मा भूदिति। द्युतादिभ्यो बहिरेवात्मनेपदिषु पाठस्तूचितः। १२४४ ञि ष्विदा स्नेहनमोचनयोः। १२४५ ऋधु वृद्धौ। आनर्ध। आर्धत्। १२४६ गृधु अभिकाङ्क्षायाम्। अगृधत्। वृत्। पुषादयो दिवादयश्च वृत्ताः। केचित्तु पुषादिसमाप्त्यर्थमेव वृत्करणम्। दिवादिस्तु भ्वादिवदाकृतिगणः। तेन क्ष्वीयते मृग्यतीत्यादिसिद्धिरित्याहुः। इति तिङन्ते दिवादिप्रकरणम्।

अथ तिङन्ते स्वादिप्रकरणम् ॥ ५ ॥

१२४७ षुञ् अभिषवे। अभिषवः स्नपनं पीडनं स्नानं सुरासन्धानं च। तत्र स्नाने अकर्मकः। २५२३ स्वादिभ्यः श्नुः ३।१।७३॥ सुनोति। सुनुतः।

धादुदिरपाठो लेखकप्रमादादायातः। ११ पाठस्त्विति। क्षुभिनभितुभीनाम् इह दिवागणे पाठस्य श्यनेव प्रयोजनमित्यर्थः। वस्तुतस्तु पुषादेः प्रागेव एषां त्रयाणां पाठो युक्त इति भावः। ञि मिदा स्नेहने। अमिददिति। ननु भ्वाद्यन्तर्गणे द्युतादौ 'ञि मिदा स्नेहने' इत्यात्मनेपदिषु पठितः। लुङि तु 'द्युद्भ्यो लुङि' इत्यत्र परस्मैपदविकल्प उक्तः। द्युताद्यङ् तु परस्मैपद एव न तु तङि। एवं च द्युतादिपाठादेव परस्मैपदपक्षे अङि अमिददिति, तङि तु अङभावे अमेदिष्टेति सिद्धम्। तथा च पुषादावस्य पाठो व्यर्थः। तद्बहिर्दिवादौ पाठादेव श्यन्सिद्धेरित्याशङ्क्यते—द्युतादिपाठादेवेत्यादिना, सिद्धे श्यन्तेन। तामिमां शङ्कां परिहरति—११ पाठः अमेदीदिति मा भूदितीति। पुषादावस्य पाठः अमेदीदिति व्यावृत्त्यर्थः श्यर्थः। पुषादिभ्यः प्रागेव दिवादावस्य पाठे तु तस्माल्लुङि अङ्सम्भवादमेदीदिति स्यादिति भावः। नन्वेवं सति भ्वाद्यन्तर्गणे द्युतादावस्य पाठो व्यर्थः। द्युतादिभ्यो बहिरेवात्मनेपदिषु पठ्यताम्। एवं च अमेदिष्टेति सिद्धम्। इह पुषादौ पाठात्तु अमिददिति सिद्धमित्याशङ्क्येष्टापत्त्या परिहरति—द्युतादिभ्यो बहिरेवात्मनेपदिषु पाठस्तूचित इति। सूचितः इति पाठे तु सुतरामुचित इति व्याख्येयम्। ञि ष्विदेत्यादि। वक्तव्यम्। इति श्रीवासुदेवदीक्षितविदुषा विरचितायां सिद्धान्तकौमुदीव्याख्यायां बालमनोरमाख्यायां श्यन्विकरणं समाप्तम्।

अथ श्नुविकरणा धातवो निरूप्यन्ते। षुञ्धातुः षोपदेशः। अनिट्। इत आरभ्य ञित्त्वादुभयपदिनः। सुरासन्धानमिति। सुरोत्पादनमित्यर्थः। स्वादिभ्यः श्नुः। कर्त्रर्थे सार्वधातुके स्वादिभ्यः श्नुः स्यादित्यर्थः। शपोऽपवादः। सुनोतीति। लटस्तिपि श्नुः, शकार इत् शित्त्वेन सार्वधातुकत्वात् 'सार्वधातुकमपित्' इति ङित्त्वात्तस्मिन् परे धातोर्न गुणः। श्नोस्तु तिपमाश्रित्य गुण इति भावः। सुनुत इति। तसो

'हुश्नुवोः—' (सू २३८७) इति यण् । सुन्वन्ति । सुन्वः-सुनुवः । सुन्वहे-सुनुवहे । सुषाव । सुषुवे । सोता । सुनु । सुनवानि । सुनवै । सुनुयात् । सूयात् । 'स्तुसुधूञ्भ्यः—' (सू २३८५) इतीट्-असावीत् । असोष्ट । अभिषुणोति । अभ्यषुणोत् । अभिसुषाव । २५२४ सुनोतेः स्यसनोः । ८।३।११७॥ स्ये सनि च परे सुनोः षो न स्यात् । विसोष्यति । १२४८ षिञ्

ङित्त्वात् श्नोर्न गुण इति भावः । सुनु-अनि । इति स्थिते 'अचि श्नुधातुः' इति उवङमाशङ्क्य आह—हुश्नुवोरिति । सुनोषि । सुनुथः । सुनुथ । सुनोमि । वांस मसि च 'लोपश्चास्यान्यतरस्यां म्वोः' इत्युकारलोपविकल्पं मत्वा आह—सुन्वः सुनुवः इति । सुन्मः । सुनुमः । इत्यपि ज्ञेयम् । अथ लटस्तङि सुनुत । सुन्वाते । सुन्वते । सुनुषे । सुन्वाथे । सुनुध्वे । सुन्वे । इति सिद्धवत्कृत्य आह—सुन्वहे सुनुवहे इति । 'लोपश्चास्य' इत्युकारलोपविकल्प इति भावः । सुन्महे । सुनुमहे इत्यपि ज्ञेयम् । सुषावेति । सुषुवतुः । सुषुवुः । सुषविथ-सुषोथ । सुषुवथुः । सुषुव । सुषाव-सुषव । सुषुविव । सुषुविम । अथ लिटस्तङ्याह—सुषुवे इति । सुषुवाते । सुषुविरे । सुषुविषे । सुषुवाथे । सुषुविध्वे । सुषुवे । सुषुविवहे । सुषुविमहे । सोतेति । अनिट्त्वसूचनमिदम् । सोष्यति । सोष्यते । सुनोतु-सुनुतात् । सुनुताम् । सुन्वन्तु । इति सिद्धवत्कृत्य आह—सुनु इति । 'उतश्च प्रत्ययात्' इति हेर्लुक् । सुनुतात् । सुनुतम् । सुनुत । सुनवानीति । 'हुश्नुवोः' इति यणं बाधित्वा परत्वाद्गुणः, आटः पित्त्वेन ङित्त्वादिति भावः । सुनवाव । सुनवाम । लोटस्तङि सुनुताम् । सुन्वाताम् । सुन्वताम् । सुनुष्व । सुन्वाथाम् । सुनुध्वम् । इति सिद्धवत्कृत्य आह—सुनवै इति । हुश्नुवोः' इति यणं बाधित्वा परत्वात् गुणः, आटः पित्त्वेन ङित्त्वाऽभावादिति भावः । सुनवावहै । सुनवामहै । असुनोत् । असुनुताम् । असुन्वन् । असुनोः । असुनवम् । असुनुव-असुन्व । असुनुत । असुन्वाताम् । असुन्वत । इत्याद्यूह्यम् । विधिलिङ्याह—सुनुयादिति । यासु-ा ङित्त्वात् श्नोर्न गुण इति भावः । सूयादिति । आशीर्लिङि 'अकृत्सार्वधातुकयोः' इति दीर्घ इति भावः । सोषीष्ट । लुङि परस्मैपदे सिचः इण्निषेधे प्राप्ते आह—स्तुसुधूञ्भ्यः इति इडिति । असाविष्टामित्यादि । लुङस्तङ्याह—असोष्टेति । असोषातामित्यादि । असोष्यत् । असोष्यत । 'उपसर्गात् सुनोति' इति षत्वं मत्वा आह—अभिषुणोतीति । षात्परस्त्वाण्णत्वम् । अभ्यषुणोदिति । 'प्राक् सितादड्व्यवायेऽपि' इति षत्वम् । अभिसुषावेति । 'स्थादिष्वभ्यासेन' इति नियमादभ्यासस्य न षः । 'आदेशप्रत्यययोः' इत्युत्तरखण्डस्य षः । सुनोतेः स्यसनोः । 'अपदान्तस्य मूर्धन्यः' इत्यधिकृतम् । 'न रपर' इत्यतो नेत्यनुवर्तते । तदाह—षो न स्यादिति । स्ये उदाहरति—विसोष्यतीति । अत्र 'उपसर्गात् सुनोति' इति प्राप्तः षो न भवति । सनि तु अभिसुसूरित्युदाहरणम् । द्विरुक्तः सनि द्वित्वे 'अभिसुसुस' इति सन्नन्तात् क्विपि अतो लोपे 'अभिसुसुस्' इत्यस्मात् साहेर्लङ्यादिलोपे सस्य रुत्वे 'वोरुपधायाः' इति दीर्घे रेफस्य विसर्गः । 'सुसु-

बन्धने । सिनोति । विसिनोति । सिषाय । सिष्ये । सेता । १२४९ षिञ् नि-शाने । तालव्यादिः । शेता । १२५० डु मिञ् प्रक्षेपणे । 'मीनातिमिनोति—' (सू २५०८) इत्यात्वम् । ममौ । ममिथ–ममाथ । मिम्ये । माता । मीयात् । मासीष्ट । अमासीत् । अमासिष्टाम् । अमास्त । १२५१ चिञ् चयने । प्रणिचि-नोति । २५२५ विभाषा चेः ७।३।५८। अभ्यासात्परस्य चिञ. कुत्वं वा स्या त्सनि लिटि च । प्रणिचिकाय–चिचाय । चिक्ये–चिच्ये । अचैषीत् । अचेष्ट । १२५२ स्तृञ् आच्छादने । स्तृणोति । स्तृणुते । 'गुणोऽर्ति—' (सू २३८०)

षति' इति तु नोदाहरणम्, 'स्तौतिण्योरेव षण्यभ्यासात्' इति नियमादेव षत्वा-ऽभावसिद्धेरित्यलम् । षिञ् बन्धने इति । षोपदेशः अनिट् च । पुञ इव रूपाणि । विसिनोतीति । 'सात्पदाद्योः' इति षत्वनिषेधः । 'उपसर्गात्सुनोति' इति तु न षः सु-नोत्यादिष्वनन्तर्भावादिति भावः । सिषायेति । णलि वृद्धौ आयादेशः । अतुसादौ 'एरनेकाचः' इति यण् । सिष्यतुरित्यादि । लिटस्तङाह—सिष्ये इति । सिचि ए इति स्थिते 'एरनेकाचः' इति यणिति भावः । सिष्याते । सिष्यिरे इत्यादि । असेषीत् । शिञ् निशाने इति । षिञ्वत् । डु मिञ् प्रक्षेपणे इति । मिनोति । उपदेशे एजन्तत्वाभा-वादात्त्वे अप्राप्ते आह—मीनातिमिनोतीत्यात्त्वमिति । 'एज्विषये अशितीति शेषः । ममाविति । आत्त्वे कृते णलः औत्वमिति भावः । अतुसादावेज्विषयत्वाभावान्नात्त्वम् । 'एरनेकाचः' इति यण् । मिम्यतुः । मिम्युः । भारद्वाजनियमात्थलि वेडिति मत्वा आह—ममिथ ममाथेति । थलः पित्त्वेन अकित्त्वादेज्विषयत्वम् । इट्पक्षे 'आतो लोपः' इति भावः । मिम्यथुः । मिम्य । ममौ । मिम्यिव । मिम्यिम । लिटस्तङाह—मिम्ये इति । एशः किरवादेज्विषयत्वाभावाच्च नात्त्वमिति भावः । मिम्याते । मि-म्यिरे । मिम्यिषे । मिम्याथे । मिम्यिध्वे । मिम्ये । मिम्यिवहे । मिम्यिमहे । मातेति । एज्विषयत्वादशित्त्वाच्च आत्त्वमिति भावः । मास्यति । मास्यते । सार्वधा-तुकेषु घुञ्वत् । मीयादिति । आशीर्लिङि परस्मैपदे यासुटः कित्त्वादेज्विषयत्वा-भावादात्त्वाभावे 'अकृत्सार्व' इति दीर्घ इति भावः । आशीर्लिङि तङि आह—मासीष्टेति । एज्विषयत्वादात्त्वमिति भावः । लुङि परस्मैपदे सिचि आत्त्वे 'यमरम' इति सगिटौ मत्वा आह—अमासीदिति । सकि सिच इटि सिज्लोपः । अमास्तेति । लुङि तङि सिचि आत्त्वमिति भावः । अमासाताम् । अमासत इत्यादि । चिञ् चयने इति । चयनं रचना । अनिट् । सार्वधातुके घुञ्वद्रूपाणि । प्रणिचिनोतीति । 'नेगंद' इति णत्वमिति भावः । विभाषा चेः । 'चजोः कुघिण्ण्यतोः' इत्यतः कुग्रहणम-नुवर्तते । 'अभ्यासाच्च' इत्यतः अभ्यासादिति 'सन्लिटोर्जेः' इत्यतः सन्लिटोरिति च । तदाह—अभ्यासादित्यादिना । स्तृञ् आच्छादने इति । अनिट् । लिटि तस्तार । अतुसादौ 'ऋतश्च संयोगादेर्गुणः' इति गुणः । वृद्धिविषयेऽपि परत्वादस्य प्रवृत्तिः ।

इति गुणः । स्तर्यात् । २५२६ ऋतश्च संयोगादेः ७।२।४३॥ ऋदन्तात्संयोगादेः परयोर्लिङ्सिचोरिड् वा स्यात्तङि । स्तरिषीष्ट-स्तृषीष्ट । अस्तरिष्ट-अस्तृत । १२५३ कृञ् हिंसायाम् । कृणोति । कृणुते । चकार । चकर्थ । चके । क्रियात् । कृषीष्ट । अकार्षीत् । अकृत । १२५४ वृञ् वरणे । २५२७ बभूथाततन्थजगृभ्मववर्थेति निगमे ७।२।६४॥ एषा वेदे इडभावो निपात्यते । तेन भाषायां थलीट । ववरिथ । ववृव । ववृवहे । वरीता—वरिता । २५२८ लिङ्सिचोरात्मनेपदेषु ७।२।४२॥ वृङ्वृञ्भ्यामदन्ताच्च परयोर्लिङ्सिचोरिड् वा स्यात्तङि । २५२९ न लिङि ७।२।३९॥ वृतो लिङ इटो दीर्घो न स्यात् । वरिषीष्ट-वृषीष्ट । अवारीत् । अवरिष्ट—अवरीष्ट—अवृत । १२५५ धूञ् कम्पने । धुनोति । धुनुते ।

तस्तरतुः । ऋदन्तत्वात्थलयपि नित्यं नेट् । तस्तर्थ । तस्तरिव । तस्तरे । तस्तराते । तस्तरिरे । तस्तरिषे । तस्तरिवहे । स्तर्ता । 'ऋदृनोः स्ये' स्तरिष्यति । आशीर्लिङि परस्मैपदे यासुटः किरवादुगुणनिषेधे प्राप्ते आह—गुणोऽर्तीति गुण इति । तङि आशीर्लिङि स्तृ-षीष्ट इति स्थिते—ऋतश्च संयोगादेः । 'लिङ्सिचोरात्मनेपदेषु' इत्यनुवर्तते । 'इट् सनि वा' इत्यतः इड्वेति । तदाह—ऋदन्तादित्यादिना । लुङि परस्मैपदे अस्तार्षीत् । लुङस्तङि त्वाह—प्रस्तरिष्ट अस्तृतेति । 'ऋतश्च संयोगादेः' इति इट्पक्षे गुणः । इडभावपक्षे तु 'हस्वादङ्गात्' इति सिचो लोपः । कृञ् हिंसायाम् । चकर्थेति । 'कृसृभृवृ' इति थलयपि नित्यमिण्निषेधः । चकृव । क्रियादिति । आशीर्लिङि 'रिङ् शयग्लिङ्क्षु' रिति रिङ् । कृषीष्टेति । 'उश्च' इति किरवाङ्ग गुणः । अकार्षीदिति । सिचि वृद्धिः । रपरत्वम् । अकृतेति । 'हस्वादङ्गात्' इति सिचो लोपः । वृञ् वरणे । सेट् । ववार । वव्रुः । बभूथाततन्थ । निगमो वेदः । तदाह—एषा वेदे इति । ननु 'कृसृभृवृ' इति निषेधादेव थलि ववर्थेति सिद्धे किमर्थं ववर्थग्रहणमित्यत आह—तेन भाषायां थलीडिति । निगमे एव वृणोतेस्थलि इण्निषेध इति नियमलाभादिति भावः । वव्रे । वव्राते । वव्रिषे । 'वृतो वा' इति मत्वा आह—वरिता वरीतेति । लिङ्सिचोः । 'इट् सनि वा' इत्यतः इड्वा इत्यनुवर्तते । 'वृतो वा' इत्यतो 'वृत' इति तदाह—वृङ्वृञ्भ्यामित्यादिना । न लिङि । 'वृतो वा' इत्यतो 'वृत' इत्यनुवर्तते । लिङ्गति षष्ठ्यर्थे सप्तमी । 'आर्धधातुकस्येट्' इत्यतः इडित्यनुवृत्त षष्ठ्या विपरिणम्यते । 'ग्रहोऽलिटि' इत्यतो दीर्घ इत्यनुवर्तते । तदाह—वृत इति । वृङ्वृञ्भ्यामकारान्ताच्चेत्यर्थः । वरिषीष्टेति । इट्पक्षे 'वृतो वा' इति प्राप्तो दीर्घो न भवति । वृषीष्टेति । इडभावपक्षे 'उश्च' इति किरवाङ्ग गुणः । अवारीदिति । लुङि परस्मैपदे सिचि वृद्धिः । अवारिष्टाम् । अवारिषुः । 'सिचि च परस्मैपदेषु' इति निषेधादिह 'वृतो वा' इति न दीर्घः । लुङस्तङि सिचि 'लिङ्सिचोः' इति इट्पक्षे 'वृतो वा' इति दीर्घविकल्पं मत्वा आह—अवरिष्ट अवरीष्टेति । अवृतेति । इडभावपक्षे 'हस्वादङ्गात्' इति सिचो

अधौषीत्। अधोष्यत्। दीर्घान्तोऽप्ययम्। धूनोति। धूनुते। 'स्वरतिसूति—' (सू २२७६) इति वेट्। दुधविथ—दुधोथ। किति लिटि तु 'श्रयुकः—' (सू २३८१) इति निषेधं बाधित्वा क्रादिनियमान्नित्यमिट्। दुधुविव। 'स्तुसुधू-ञ्भ्यः—' (सू २३८५) इति नित्यमिट्। अधावीत्। अधविष्ट—अधोष्ट।

अथ परस्मैपदिनः। १२५६ टुदु उपतापे। दुनोति। १२५७ हि गतौ वृद्धौ च। २५३० हिनुमीना ८।४।१५॥ उपसर्गस्थान्निमित्तात्परस्य एतयोर्नस्य णः स्यात्। प्रहिणोति। २५३१ हेरचडि ७।४।५६॥ अभ्यासात्परस्य हिनोतेर्हस्य कुत्वं स्यान्न तु चङि। जिघाय। १२५८ पॄ प्रीतौ। पृणोति। पर्ता। १२५९ स्पृ प्रीतिपालनयोः। 'प्रीतिचलनयोः' इत्यन्ये। 'चलनं जीवनम्' इति स्वामी। स्पृणोति। पस्पार। स्मृ इत्येके। स्मृणोति। पृणोत्यादयस्त्रयोऽपि छान्दसा इत्याहुः। १२६० आप्लृ व्याप्तौ। आप्नोति। आप्नुतः। आप्नुवन्ति। आप्नुवः। आप्नुहि। लृदित्त्वादङ्। आपत्। १२६१ शक्लृ शक्तौ। अशकत्। १२६२ राध १२६३ साध संसिद्धौ। राध्नोति। २५३२ राधो हिंसायाम् ६।४।१२३॥ एत्त्वाभ्यासलोपौ स्तः किति लिटि सेटि थलि च। अपरेधतुः। रेधुः।

लोपः। धुञ् कम्पन इति। ह्रस्वान्तोऽयमनिट्। धुत्र इव रूपाणि। दीर्घान्तोऽप्ययमित्यादि। व्यक्तम्।

अथ परस्मैपदिन इति। 'राध साध संसिद्धा'वित्येतत्पर्यन्ता इत्यर्थः। 'टुदु उपतापे' इत्यारभ्य 'स्मृ इत्येके' इत्येतत्पर्यन्ता धातवो ह्रस्वान्ताः। हि गतावित्यत्र 'प्रहिणोती'त्यत्र भिन्नपदत्वात् णत्वेऽप्राप्ते आह—हिनुमीना। हिनु मीना अनयोर्द्वन्द्वात्षष्ठीद्विवचनस्य आर्षो लुक्। 'रषाभ्यां नो णः' इत्यनुवर्तते। 'उपसर्गादसमासेऽपि' इत्यत उपसर्गादिति च। तदाह—उपसर्गस्थादिति। हेरचडि। 'चजोः' इति सूत्रात् कुग्रहणमनुवर्तते। 'अभ्यासाच्च' इत्यतः अभ्यासादिति। 'हो हन्तेः' इत्यतः ह इति षष्ठ्यन्तमनुवर्तते। तदाह—अभ्यासात्परस्येति। जिघायेति। जिघ्यतुः। जिघ्यिथ—जिघेथ। जिघ्यिव। आप्लृ व्याप्तौ। अनिट। आप्नुवन्तीति। संयोगपूर्वकत्वात् 'हुश्नुवोः' इति न यण्। आप्नुव इति। संयोगपूर्वकत्वात् 'लोपश्चास्य' इति नोकारलोपविकल्पः। आप्नुहीति। संयोगपूर्वकत्वादेव 'उतश्च प्रत्ययात्' इति हेर्न लुक्। शक्लृ शक्ताविति। शक्नोति। शशाक। शेकतुः। शशकथ-शेकिथ। शेकिव। शक्ता। शक्ष्यति। अशकदिति। लृदित्त्वादङ्। राध साध संसिद्धौ। अनिटौ। दीर्घाकारवत्त्वात् 'अत एकहल्' इत्यप्राप्तावाह—राधो हिंसायाम्। 'ह्रस्वसोः' इत्यतः एदिति अभ्यासलोप इति च अनुवर्तते। 'गमहन' इत्यतः कितीति, 'अत एकहल्मध्ये' इत्यतः लिटीति 'थलि च सेटि' इति सूत्र चानुवर्तते। तदाह—एत्त्वेत्यादिना। अपरेधतुरिति।

रेधिथ । राद्धा । साध्नोति । साद्धा । असात्सीत् असाद्धाम् ।

अथ द्वावनुदात्तेतौ । १२६४ अशू व्याप्तौ संघाते च । अश्नुते । २५३३ अश्नोतेश्च ७।४।७२॥ दीर्घादभ्यासावर्णात्परस्य नुट् स्यात् । आनशे ॥अशिताअष्टा । अशिष्यते—अक्ष्यते । अश्नुवीत । अक्षीष्ट-अशिषीष्ट । आशिष्ट—आष्ट । आक्षाताम् । १२६५ ष्टिघ आस्कन्दने । स्तिघ्नुते । तिष्टिघे । स्तेघिता ।

अथ आ गणान्तात्परस्मैपदिनः । १२६६ तिक १२६७ तिग गतौ च । चादास्कन्दने । तिक्नोति । तिग्नोति । १२६८ षघ हिंसायाम् । सघ्नोति । १२६९ ञि धृषा प्रागल्भ्ये । धृष्णोति । दधर्ष । धर्षिता । १२७० दम्भु दम्भने । दम्भनं दम्भः । दभ्नोति । ददम्भ । 'अन्थिग्रन्थिदम्भिस्वञ्जीनां लिटः कित्त्वं वा' इति व्याकरणान्तरमिहाप्याश्रीयत इत्युक्तम् । 'अनिदिताम्—' (सू ४१५) इति नलोपः । तस्याभीयत्वादसिद्धत्वेन एत्त्वाभ्यासलोपयोरप्राप्तौ 'दम्भेश्च एत्त्वाभ्यासलोपौ वक्तव्यौ' (वा ४१५३) । देभतुः । ददम्भतुः । इदं कित्त्वं पिदिपिद्विषयकमिति सुधाकरादयः । तन्मते तिप्सिप्मिप्सु देभ, देभिथ, देभ इति रूपान्तरं बोध्यम् । अपिद्विषयकमिति न्यासकारादिमते तु ददम्भ, ददम्भिथ, ददम्भेत्येव । दभ्यात् । १२७१ ऋधु वृद्धौ । तृप प्रीणने इत्येके । तुम्नादित्वाणत्वं न । तृप्नोति । 'छन्दसि' (गण १९७) । आगणान्तादधिकारोऽयम् ।

उपसर्गवशादिह हिंसायां वृत्तिः । अन्यत्र रराधतुः । थल्यपि क्रादिनियमान्नित्यमिट् । 'उपदेशेऽत्वतः' इत्यत्र तपरकरणादिह नेण्निषेधः । तदाह—रेधिथेति । राद्धेति । 'झषस्तथोः' इति धः ।

अशू व्याप्ताविति । ऊदित्त्वाद्वेट् । अश्नुते इति । अश्नुवाते । अश्नुवते । संयोगपूर्वकत्वात् 'हुश्नुवोः' इति न यण् । अश्नोतेश्च । 'अत्र लोपः' इत्यतः अभ्यासस्येत्यनुवर्तते, 'तस्मान्नुट्' इति च । तच्छब्देन 'अत आदेः' इति कृतदीर्घः अकारः परामृश्यते । तदाह—दीर्घादिति । आनशे इति । आनशिषे—आनक्षे । आनशिवहे-आनक्ष्वहे । अष्टेति । ष्टुश्वादिना क्षस्य षत्वे ष्टुत्वम् । विधिलिङ्याह—अश्नुवीतेति । आशीर्लिङि ऊदित्त्वादिड्विकल्पं मत्वा आह—अक्षीष्ट-अशिषीष्टेति । लुङि सिच इट्पक्षे आह—आशिष्टेति । अनि पक्षे 'झलो झलि' इति सिचो लोपं मत्वा आह—आष्टेति । ष्टिघधातुः षोपदेशः । सेट् ।

आ गणान्तादिति । स्वादिगणसमाप्तिपर्यन्तमित्यर्थः । इत्युक्तमिति । भ्वादाविति भावः । कित्त्वपक्षे आह—अनिदितामिति नलोप इति । नन्वनिदितामिति नलोपे सति 'अत एकहल्मध्ये' इत्येत्वसिद्धेः 'दम्भेश्च' इति व्यर्थमित्यत आह—तस्याभीयत्वादिति । नलोपस्येत्यर्थः । दभ्यादिति । आशीर्लिङि 'अनिदिताम्' इति नलोपः ।

१२७२ अह व्याप्तौ। अह्नोति। १२७३ दघ घातने पालने च। दघ्नोति। १२७४ चमु भक्षणे। चम्नोति। १२७५ रि १२७६ क्षि १२७७ चिरि १२७८ जिरि १२७९ दाश १२८० दृ हिंसायाम्। रिणोति। क्षिणोति। अयं भाषायामपीत्येके। 'न तद्यशः शस्त्रभृतां क्षिणोति'। ऋक्षीत्येक एवाजादिरित्यन्ये। ऋक्षिणोति। चिरिणोति। जिरिणोति। दाश्नोति। दृणोति। वृत्। इति तिङन्ते स्वादिप्रकरणम्।

अथ तिङन्ते तुदादिप्रकरणम् ॥ ६ ॥

१२८१ तुद व्यथने। इतः षट् स्वरितेतः। २५३४ तुदादिभ्य शः ३।१।७७॥ तुदति। तुदते। तुतोद। तुतोदिथ। तुतुदे। तोत्ता। अतौत्सीत्। अतुत्त। १२८२ णुद प्रेरणे। नुदति। नुदते। नुनोद। नुनुदे। नोत्ता। १२८३ दिश अतिसर्जने। अतिसर्जनं दानम्। देष्टा। दिक्षीष्ट। अदिक्षत्। अदिक्षत। १२८४ भ्रस्ज पाके। 'ग्रहिज्या—' (सू २४१२) इति संप्रसारणम्। सस्य श्चुत्वेन शः। शस्य जश्त्वेन जः। भृज्जति—भृज्जते। २५३५ भ्रस्जो रोपधयो रमन्यतरस्याम् ६।४।४७॥ भ्रस्जो रेफस्योपधायाश्च स्थाने रमागमो वा

छन्दसीति। गणसूत्रमिदम्। तद्व्याचष्टे—आगणान्तादिति। रि क्षि इति। रि क्षि चिरि जिरि दाश दृ इति षट् धातवः। आद्यद्वितीयावेकाचौ। तदाह—रिणोति। क्षिणोतीति। अयं भाषायामपीति। क्षिधातुरित्यर्थः। तत्र प्रयोगं दर्शयति—न तद्यश इति। वृदिति। स्वादयो वृत्ता इत्यर्थः। इति श्रीवासुदेवदीक्षितविदुषा विरचितायां सिद्धान्तकौमुदीव्याख्यायां बालमनोरमाख्यायां इनुविकरणं समाप्तम्।

अथ शविकरणा धातवो निरूप्यन्ते। इतः षडिति। 'ऋषी गतौ' इत्यतः प्रागित्यर्थः। तुदादिभ्यः शः। कर्त्रर्थे सार्वधातुके परे तुदादिभ्यः शः स्यात् स्वार्थे इत्यर्थः। अपवादः। तुदतीति। लघूपधगुणं बाधित्वा नित्यत्वात् शे कृते तस्य अपित्वात् 'सार्वधातुकमपित्' इति ङित्त्वाच्च गुण इति भावः। अजन्ताऽकारवत्त्वाऽभावात् क्रादिनियमाल्लिटि थलयपि नित्यमिट्। तदाह—तुतोदिथेति। तोत्तेति। अनिडिति भावः। अतौत्सीदिति। हलन्तलक्षणा वृद्धिः। णुदधातुर्णोपदेशः। अनिट्। दिशधातुरप्यनिट्। देष्टेति। ष्टुत्वेति षत्वे ष्टुत्वम्। स्ये तु 'षढोः' इति षस्य कत्वं च—देक्ष्यति। दिक्षीष्टेति। 'लिङ्सिचौ' इति क्ङित्त्वाच्च गुणः। 'शल इगुपधात्' इति कसं मत्वा आह—अदिक्षत्। अदिक्षतेति। भ्रस्ज पाके। अनिट्। भ्र ज् अ ति इति स्थिते आह—ग्रहिज्येति। ङित्त्वाद्रफस्य सम्प्रसारणमृकारः पूर्वरूपं चेति भावः। भृसज् अ ति इति स्थिते आह—सस्येत्यादि। ग्रलि भ्रस्ज् अ इति स्थिते—भ्रस्जो रोपधयोः। 'भ्रस्ज' इत्यवयवषष्ठी। 'रोपधयो'रिति स्थानषष्ठी। रश्च उपधा च तयोरिति विग्रहः। रेफादकार उच्चा-

स्यादार्धधातुके । मित्त्वादन्त्यादचः परः । स्थानषष्ठीनिर्देशाद्रोपधयोनिवृत्तिः । बभर्ज । बभर्जतुः । बभर्जिथ-बभर्ष्ठ । बभर्ज । रमभावे—बभ्रज्ज । बभ्रज्जतुः । बभ्रज्जिथ । 'स्को-' (सू ३८०) इति सलोपः । 'व्रश्च—' (सू २९४) इति षः । बभ्रष्ठ । बभ्रज्ज । भ्रष्टा-भर्ष्टा । भ्रक्ष्यति-भर्क्ष्यति । 'क्ङिति रमागमं बाधित्वा संप्रसारणं पूर्वविप्रतिषेधेन' (वा ४०७८) भृज्ज्यात् । भृज्ज्यास्ताम् । भर्क्षीष्ट । भ्रक्षीष्ट । अभार्क्षीत्-अभ्राक्षीत् । अभर्ष्ट-अभ्रष्ट । १२८५ क्षिप प्रेरणे ।

रणार्थः । रेफस्य उपधायाश्च स्थाने इति लभ्यते । 'आर्द्धधातुके' इत्यधिकृतम् । तदाह—भ्रस्जो रेफस्येत्यादिना । रमि मकार इत् अकार उच्चारणार्थः । तदाह—मित्त्वादन्त्यादचः पर इति । तथा च रेफाऽकारादुपरि सकारात् प्राक् रेफ आगम इति फलितम् । भ्र र् स् ज् अ इति स्थितम् । ननु रम आगमत्वे 'रोपधयो' रिति कथं स्थानषष्ठीनिदेश इत्यत आह—स्थानेति । स्थानं प्रसङ्गः । रेफस्य उपधायाश्च उच्चारणप्रसङ्गे सति अकारादुपरि रेफः प्रयोज्यः । भकारादुपरि रेफः जकारात्प्राक्सकारश्च न प्रयोज्याविति लब्धम् । तथाच तयोर्निवृत्तिः फलितेति भावः । एवञ्च भर्ज् अ इति स्थिते द्वित्वादौ रूपमाह—बभर्जेति । अतुसादावपि संयोगात्परत्वात्किरवाभावात् 'ग्रहिज्या' इति सम्प्रसारणं न भवति । भारद्वाजनियमात्थलि वेडिति मत्वा आह—बभर्जिथ बभर्ष्ठेति । इडभावपक्षे बभर्ज् थ इति स्थिते 'व्रश्च' इति जस्य षः । ष्टुत्वेन थस्य ठ इति भावः । बभर्जिव । लिटस्तङ्याह—बभर्जे इति । बभर्जाते इत्यादि सुगमम् । रमभावे आह—बभ्रज्जेति । णलि भ्रस्ज् अ इति स्थिते द्वित्वे हलादिशेषे अभ्यासजश्त्वे बभ्रस्ज् अ इति स्थिते सस्य श्चुत्वेन शकारे शस्य जश्त्वेन जकार इति भावः । 'लिटयभ्यासस्य' इति सम्प्रसारणस्य न प्रसक्तिः, अभ्यासे हलादिशेषेण रेफाऽभावात् । बभ्रज्जतुरिति । संयोगात्परत्वादकित्त्वात् 'ग्रहिज्या' इति न सम्प्रसारणमिति भावः । बभ्रज्जिथेति । भारद्वाजनियमादि पक्षे रमभावपक्षे रूपम् । तत्र इडभावपक्षे बभ्रस्ज् थ इति स्थिते आह—स्कोरिति । व्रश्चेति ष इति । 'जश्ये'ति शेषः । रमभावपक्षे लिटस्तङ्याह—बभ्रज्जेति । बभ्रज्जाते । बभ्रज्जिषे । इत्यादि सुगमम् । भ्रष्टेति । रमभावपक्षे रूपम् । भर्ष्टेति । रमागमे भर्ज् ता इति स्थिते जस्य 'व्रश्च' इति षः, ष्टुत्वेन तकारस्य ट इति भावः । एवम्—भ्रक्ष्यति भर्क्ष्यतीति । 'षढोः' इति कत्वे सस्य षत्वमिति विशेषः । भृज्जतु । अभृज्जत् । भृज्जेत् । ननु आशीर्लिङि भ्रस्ज् यात् इति स्थिते यासुटः कित्त्वात् 'ग्रहिज्या' इति सम्प्रसारणे पूर्वरूपे सकारस्य श्चुत्वेन शकारे शस्य जश्त्वेन जकारे भृज्ज्यात् इति रूपं वक्ष्यति । तदयुक्तम्—सम्प्रसारणं बाधित्वा परत्वात् रमागमे कृते भर्ज्यात् इति प्रसङ्गादित्यत आह—क्ङिति रमागममिति । आशीर्लिङस्तङि सीयुटि रमागमपक्षे आह—भर्क्षीष्टेति । रमभावे तु अकित्त्वात्सम्प्रसारणाभावादाह—भ्रक्षीष्टेति । लुङि परस्मैपदे रमागमविकल्पं मत्वा आह-अभार्क्षीत् अभ्रा-

क्षिपति। क्षिपते। क्षेप्ता। अक्षैप्सीत्। अक्षिप्त। १२८६ कृष विलेखने। कृषति। कृषते। कष्टा-कर्ष्टा। कृष्यात्। कृक्षीष्ट। 'स्पृशमृशकृष-' (वा १८२३) इति सिज्वा। पक्षे क्सः। सिचि अम्वा। अकाक्षीत्-अकार्क्षीत्-अकृक्षत्। तङि 'लिङ्सिचौ—' (२३००) इति कित्त्वादम्न। अकृष्ट। अकृक्षाताम्। अकृक्षत। अकृक्षत। अकृक्षाताम्। अकृक्षन्त। १२८७ ऋषी गतौ। परस्मैपदी। ऋषति। आनर्ष। १२८८ जुषी प्रीतिसेवनयोः। आत्मनेपदिनश्चत्वारः। जुषते। १२८९ ओ विजी भयचलनयोः। प्रायेणायमुत्पूर्वः। उद्विजते। २५३६ विज इट्। १।२। २॥ विजेः पर इडादिः प्रत्ययो ङिद्वत्। उद्विजिता। उद्विजिष्यते। १२९० ओ लजी १२९१ ओ लस्जी व्रीडायाम्। लजते। लेजे। लज्जते। ललज्जे।

अथ परस्मैपदिनः। १२९२ ओ व्रश्चू छेदने। 'ग्रहिज्या—' (सू २४१२)

क्षीदिति। आत्मनेपदे सिचि रमागमविकल्पं मत्वा आह—अभर्ष्ट-अभ्रक्षेष्टेति। 'झलो झलि' इति सिज्लोपः। क्षिप प्रेरणे इति। अनिट्। अजन्तत्वाऽकारवत्त्वाऽभावात् क्रादिनियमात्थलि नित्यमिट्। चिक्षेपिथ। एवं कृषधातुरपि। चकर्षिथ। लुटि तासि 'अनुदात्तस्य चर्दुपधस्य' इत्यमागमविकल्पः। अमागमाऽभावे गुणे रपरत्वम्। तदाह—कष्टा कर्ष्टेति। आशीर्लिङि परस्मैपदे आह—कृष्यादिति। कित्त्वात् झलादित्वाभावाच्च अमागमो गुणश्च नेति भावः। आशीर्लिङस्तङ्याह—कृक्षीष्टेति। 'लिङ्सिचौ' इति कित्त्वादमागमो गुणश्च नेति भावः। लुङि परस्मैपदे आह—स्पृशमृशेति सिज्वेति। पक्षे इति। सिजभावपक्षे 'शलः' इति क्स इत्यर्थः। सिचि अम्वेति। सिच्पक्षे 'अनुदात्तस्य च' इत्यमागमविकल्प इत्यर्थः। क्से तु कित्त्वादमागमो नेति भावः। अकाक्षी'दिति। सिचि अमागमे रूपम्। अकार्क्षीदिति। सिचि अमभावपक्षे हलन्तलक्षणा वृद्धिरिति भावः। क्सादेशपक्षे आह—अकृक्षदिति। कित्त्वादमागमो गुणश्च नेति भावः। तङीति। तङि सिच्पक्षे अकृष् स् त इति स्थिते 'लिङ्सिचौ' इति कित्त्वादम् नेत्यर्थः। गुणोऽपि नेति ज्ञेयम्। अकृक्षेति। 'झलो झलि' इति सिज्लोप इति भावः। अकृक्षतेति। सिच् पक्षे अनतः परस्मादादेश इति भावः। क्सादेशपक्षे आह—अकृक्षतेति। कित्त्वादम् नेति भावः। अकृक्षन्तेति। क्सादेशपक्षे अ कृक्ष झ इति स्थिते अच्परकत्वाऽभावात् 'क्सस्याचि' इत्यकारलोपाभावादतः परस्मादादेशाऽभावे अन्तादेश इति भावः। ऋषी गताविति। सेट्। आनार्षथ। आनर्षिव। अर्षिता। आर्षीत्। ओ विजी भयेति। सेट्। उद्विजितेत्यादौ लघूपधगुणे प्राप्ते—विज इट्। 'गाङ्कुटादिभ्यः' इत्यतः ङिदित्यनुवर्तते। तदाह—विजेः पर इत्यादि। उद्विजिता। उद्विजिष्यते। उदविजिष्ट।

व्रश्चधातुरुदित्त्वाट्टेट। ग्रहिज्येति। लटि व्रश्च् अ ति इति स्थिते शस्याऽपित्त्वेन ङित्त्वात् 'ग्रहिज्या' इति वैकल्पिकसम्प्रसारणमुकारः, पूर्वरूपं चेति भावः। तदाह—

वृश्चति । वव्रश्च । वव्रश्चतुः । वव्रश्चिथ-वव्रष्ठ । 'लिट्यभ्यासस्य—' (२४०८) इति सम्प्रसारणम् रेफस्य ऋकारः । 'उरत्' (सू २२४४) तस्य च 'अचः परस्मिन्—' (सू ५०) इति स्थानिवद्भावात् 'न सम्प्रसारणे—' (सू ३६३) इति वस्योत्वं न । व्रश्चिता-व्रष्टा । व्रश्चिष्यति-व्रक्ष्यति । वृश्च्यात् । अव्रश्चीत्-अव्राक्षीत् । १२९३ व्यच व्याजीकरणे । विचति । विव्याच । विविचतुः । व्यचिता । व्यचिष्यति । विच्यात् । अव्याचीत्-अव्यक्षीत् । 'व्यचेः कुटादित्वमनसि'

वृश्चतीति । वृश्चतः वृश्चन्तीत्यादि । वव्रश्चेति । णलि रूपमिदम् । थलि च प्रक्रिया अनुपदं वक्ष्यते । अतुसादौ संयोगात्परत्वेन कित्त्वाऽभावात् 'ग्रहिज्या' इति न सम्प्रसारणम् । तदाह—वव्रश्चतुरिति । ऊदित्त्वात्थलादौ वेट् । तदाह—वव्रश्चिथ वव्रष्ठेति । धातुपाठे 'व्रश्च्, इत्यत्र व्रस् च् इति स्थिते सस्य श्चुत्वेन शकारनिर्देशः । तथाच वव्रश्च् थ इति स्थिते श्चुत्वस्याऽसिद्धत्वात् 'स्कोः' इति सकारलोपे, चस्य 'व्रश्च्' इति चत्वे, ष्टुत्वेन थस्य ठत्वे, वव्रष्ठेति रूपम् । वव्रश्चिव । ननु णलि थलि च अकिति द्वित्वे कृते 'लिट्यभ्यासस्य' इत्यभ्यासावयवयोर्ऋकारेफयोर्द्वयोरपि सम्प्रसारणं स्यात् । न च 'न सम्प्रसारणे सम्प्रसारणम्' इति वकारस्य सम्प्रसारणनिषेधः शङ्क्यः, पूर्वं वकारस्य सम्प्रसारणसम्भवादित्यत आह—लिट्यभ्यासेति । 'न सम्प्रसारणे' इति निषेधादेव ज्ञापकात् प्रथमं रेफस्य ऋकारः सम्प्रसारणमित्यर्थः । तस्य सम्प्रसारणसम्पन्नस्य ऋकारस्य अकारविधिं स्मारयति—उरदिति । ननु ऋकारस्य अकारे कृते वकारस्य सम्प्रसारणं स्यात् । सम्प्रसारणपरकत्व विरहेण 'न सम्प्रसारणे' इति निषेधाऽप्रवृत्तेरित्यत आह—तस्य चेति । अकारस्येत्यर्थः । न च उरदित्वस्य परनिमित्तकत्वाश्रयणात् कथं स्थानिवत्त्वमिति वाच्यम् । आपादपरिसमाप्तेरङ्गाधिकार' इत्यभ्युपगम्य अङ्गाश्रितप्रत्ययनिमित्तकत्वाभ्युपगमात् । 'लक्षये. लक्षणस्य सकृदेव प्रवृत्तिः' इति न्यायस्तु 'न सम्प्रसारणे' इति निषेधादेव न स्थानिभेदे प्रवर्तत इति ज्ञायते । अत एव सुद्युप्यस्य इत्यादौ धकारस्य द्वित्वे कृते पूर्वधकारस्य जश्त्वेन दकारे तस्य द्वित्वमित्यास्तां तावत् । आशीर्लिङि आह—वृश्च्यादिति । कित्त्वात् सम्प्रसारणमिति भावः । अव्रश्चीदिति । ऊदित्त्वादिट्पक्षे 'नेटि' इति इलन्तलक्षणवृद्धिनिषेधः । इडभावे हलन्तलक्षणवृद्धिं मत्वा आह—अव्राक्षीदिति । अव्रश्च् सीत् इति स्थिते हलन्तलक्षणा वृद्धिः । श्चुत्वस्याऽसिद्धत्वात् 'स्कोः' इति सलोपः । 'व्रश्च' इति चस्य षः, तस्य 'षढोः' इति कः, सस्य ष इति भावः । 'नकारजावनुस्वारपञ्चमौ झलि धातुषु । सकारजः शकाररचेत् षाट्टवर्गस्तवर्गजः ।' इत्याहुः । व्यज-व्याजीकरणे । सेट । शे 'ग्रहिज्या' इति सम्प्रसारणं मत्वा आह—विचतीति । विव्याचेति । 'लिट्यभ्यासस्य' इत्यभ्यासयकारस्य सम्प्रसारणम् । 'न सम्प्रसारणे' इति न वकारस्य । विविचतुरिति । कित्त्वात् 'ग्रहिज्या' इति सम्प्रसारणे कृते द्वित्वादीति भावः । विव्यचिथ । विविचिव । विच्यादिति । आशीर्लिङि कित्त्वाद्यकारस्य सम्प्रसा-

(वा ३४५६) इति तु नेह प्रवर्तते। 'अनसि' इति पर्युदासेन कृन्मात्रविषयत्वात्। १२९४ उछि उञ्छे। उञ्छति। १२९५ उछी विवासे। उच्छति। १२९६ ऋच्छ गतीन्द्रियप्रलयमूर्तिभावेषु। 'ऋच्छत्यृताम्' (सू २३८३) इति गुणः। द्विहल्प्रहणस्यानेकहलुपलक्षणत्वान्नुट्। आनर्च्छ। आनर्च्छतुः। ऋच्छिता। १२९७ मिच्छ उत्क्लेशे। उत्क्लेशः पीडा। मिमिच्छ। अमिच्छीत्। १२९८ जर्ज १२९९ चर्च १३०० झर्झ परिभाषणभर्त्सनयोः। १३०१ त्वच संवरणे। तत्वाच। १३०२ ऋच स्तुतौ। आनर्च। १३०३ उज्झ आर्जवे। १३०४ उज्झ उत्सर्गे। १३०५ लुभ विमोहने। विमोहनमाकुलीकरणम्। लुभति। लोभिता—लोब्धा। लोभिष्यति। १३०६ रिफ कत्थनयुद्धनिन्दाहिंसादानेषु। रिफति। रिरेफ। रिह इत्येके। 'शिशुं न विप्रा मतिभी रिहन्ति'। १३०७ तृप १३०८ तृम्फ तृप्तौ। आद्यः प्रथमान्तः द्वितीयो द्वितीयान्तः। द्वावपि द्वितीयान्तावित्यन्ये। तृपति। ततर्प। तर्पिता। 'स्पृशमृशकृष' इति सिज्विकल्पः पौषादिकस्येव, अल्पवादत्वात्। तेनात्र नित्यं सिच्। अतर्पीत्। तृम्फति। शस्य ङित्वात् 'अनिदिताम्' (सू ४१५) इति नलोपे 'शे तृम्फादीनां नुम् वाच्यः' (वा ४३२३) आदिशब्दः प्रकारे। तेन येऽत्र नकारानुबन्धास्ते तृम्फादयः। तृम्फन्ति। ततृम्फ। तृफ्यात्। १३०९ तुप १३१० तुम्प १३११ तुफ १३१२ तुम्फ हिंसायाम्। तुपति। तुम्पति। तुफति। तुम्फति। १३१३ दृप १३१४ दृम्फ उत्क्लेशे। प्रथमः प्रथमान्तः। द्वितीयो

रणम्। 'अतो हलादेः' इति वृद्धिविकल्पं मत्वा आह—अव्याचीत् अव्यचीदिति। ननु 'व्यचेः कुटादित्वमनसि' इति व्यचेः कुटादित्वप्रतिषेधात् व्यचिता, व्यचिष्यति, इत्यादावपि 'गाङ्कुटादिभ्यः' इति ङित्त्वात् सम्प्रसारणं स्यादित्यत आह—व्यचेरिति। कृन्मात्रेति। अवधारणे मात्रशब्दः। 'उछि उञ्छे' 'उछी विवासे' इति स्वादौ पठितौ। इह तयोः पाठस्तु शविकरणार्थः। तेन उञ्छति उञ्छन्ती, उच्छती उच्छन्ती इत्यत्र 'आच्छीनद्योः' इति नुमिकल्पः सिध्यति। भ्वादौ पाठस्तु पित्स्वरार्थ इत्यन्यत्र विस्तरः। ऋच्छ गतीति। 'छे च' इति तुकि तस्य श्चुत्वेन चकारनिर्देशः। ऋच्छति। लघुपधत्वाभावाद्गुणे अप्राप्ते आह—द्विहल्त्वादिति। द्विष्वे उरदत्वे हलादिशेषे 'अत आदेः' इति दीर्घे आ अर्च्छ इति स्थिते बहुहलत्वात् द्विहल्त्वाऽभावान्नुटि अप्राप्ते आह—'द्विहल्ग्रहणस्येति। आनर्च्छीत्। 'भृञादेः' इत्यत्र ऋतृच्छः इति पर्युदासादाम् न। ऋच्छितेति। 'ऋच्छत्यृताम्' इत्यत्र लिटीयनुवृत्तेर्न गुण इति भावः। लुभधातुः सेट्। 'तीषसह' इति सेडिति मत्वा आह— विमोहनमिति। शिशुं नेति। 'न' शब्द इवार्थे। विप्राः शिशुमिव मतिभिः रिहन्ति-हिंसन्ति इत्यर्थः। तृपधातुः श्यन्विकरण एवानिट्।

द्वितीयान्तः । प्रथमो द्वितीयान्त इत्येके । दृपति । दृफति । दृम्फति । १३१५ ऋफ १३१६ ऋम्फ हिंसायाम् । ऋफति । आनर्फ । ऋम्फति । ऋम्फाञ्चकार । १३१७ गुफ १३१८ गुम्फ ग्रन्थे । गुफति । जुगोफ । गुम्फति । जुगुम्फ । १३१९ उभ १३२० उम्भ पूरणे । उभति । उवोभ । उम्भति । उम्भाञ्चकार । १३२१ शुभ १३२२ शुम्भ शोभार्थे । शुभति । शुम्भति । १३२३ दृभी ग्रन्थे । दृभति । १३२४ चृती हिंसाग्रन्थनयोः । चर्तिता । 'सेऽसिचि' (सू २५०६) इति वेट् । चर्तिष्यति—चर्त्स्यति । अचर्तीत् । १३२५ विध विधाने । विधति । वेधिता । १३२६ जुड गतौ । तवर्गपञ्चमान्त इत्येके । जुडति । 'मरुतो जुनन्ति' । १३२७ मृड सुखने । मृडति । मर्डिता । १३२८ पृड च । पृडति । १३२९ पृण प्रीणने । पृणति । पपर्ण । १३३० वृण च । वृणति । १३३१ मृण हिंसायाम् । १३३२ तुण कौटिल्ये । तुतोण । १३३३ पुण कर्मणि शुभे । पुणति । १३३४ मुण प्रतिज्ञाने । १३३५ कुण शब्दोपकरणयोः । १३३६ शुन गतौ । १३३७ डुण हिंसागतिकौटिल्येषु । १३३८ घुण १३३९ घूर्ण भ्रमणे । १३४० घुर ऐश्वर्यदीप्त्योः । सुरति । सुषोर । आशिषि सूर्यात् । १३४१ कुर शब्दे । कुरति । कूर्यात् । अत्र 'न भकुर्छुराम्' (सू १६२९) इति निषेधो न । करोतेरेव तत्र ग्रहणादित्याहुः । १३४२ खुर छेदने । १३४३ मुर संवेष्टने । १३४४ क्षुर विलेखने । १३४५ घुर भीमार्थशब्दयोः । १३४६ पुर अग्रगमने । १३४७ वृहू उद्यमने । दन्त्योष्ठ्यादिः । पवर्गादिरित्यन्ये ।

१३४८ तृहू १३४९ स्तृहू १३५० तृंहू हिंसार्थाः । तृहति । ततर्ह । स्तृहति । तस्तर्ह । तर्हिता—तर्ढा । स्तर्हिता स्तर्ढा । अतृंहीत्—अताङ्क्षीत् । अताण्ढाम् ।

अपवादत्वादिति । अपवादस्य उत्सर्गसमानदेशत्वादिति भावः । चृती हिंसाग्रन्थनयोरिति । ग्रन्थनं विस्रंसनम् । चृततीत्यादि सुगमम् । "अथास्य योक्त्र विचृतेत्" इत्याश्वलायनः । विस्रंसयेदित्यर्थः, उपसर्गवशात् । 'यजमानो मेखलां विचृतते' इत्यापस्तम्बसूत्रे तु तङ् आर्षः । घुधातुः षोपदेशः । कुर शब्दे । करोतेरेवेति । व्याख्यानमेवात्र शरणम् । वृहूधातुः ऋदुपधः । ऊदित्त्वाड्वेट्कः । पवर्गादिरिति । पवर्गतृतीयादिरित्यर्थः ।

तृहू स्तृहू तृंहू इति । त्रयोऽपि ऋकारवन्तः । तृतीयोऽनुस्वारवान् । ऊदित्त्वाड्वेट् । तर्ढेति । तृहेस्तासि ढत्वधत्वढ्त्वढलोपाः । एवं स्तर्ढा । तृण्ढा । अतर्हीत् । अतार्क्षीत् । अस्तर्हीत् । अस्ताक्षीत्, इति सिद्धवत्कृत्य आह—अतृंहीत्—अताङ्क्षीदिति । तृंहेरिड्भावपक्षे हलन्तलक्षणवृद्धौ रपरत्वम् । हस्य ढः, ढस्य कः, षत्वम् । अनुस्वारस्य परसवर्णोकार इति भावः । अताण्ढामिति । तृंहेस्तसस्तामि सिच इडभावपक्षे लोपे हल-

१३५१ इषु इच्छायाम्। 'इषुगमि—' (सू २४००) इति छः। इच्छति। एषिता—एष्टा। एषिष्यति। इष्यात्। ऐषीत्। १३५२ मिष स्पर्धायाम्। मिषति। मेषिता। १३५३ किल श्वैत्यक्रीडनयोः। १३५४ तिल स्नेहने। १३५५ चिल वसने। १३५६ चल विलसने। १३५७ इल स्वप्नक्षेपणयोः। १३५८ विल संवरणे। दन्त्योष्ठ्यादिः। १३५९ बिल भेदने। ओष्ठ्यादिः। १३६० णिल ग्रहने। १३६१ हिल भावकरणे। १३६२ शिल १३६३ षिल उञ्छे। १३६४ मिल श्लेषणे। १३६५ लिख अक्षरविन्यासे। लिलेख। १३६६ कुट कौटिल्ये। 'गाङ्कुटादिभ्यः—' (२४६१) इति ङित्त्वम्। चुकुटिथ। अङ्णित इति किम्। चुकोट। कुटिता। १३६७ पुट संश्लेषणे। १३६८ कुच सङ्कोचने। १३६९ गुज शब्दे। १३७० गुड रक्षायाम्। १३७१ डिप क्षेपे। १३७२ छुर छेदने। 'न भकुर्छुराम्' (सू १६२९) इति न दीर्घः। छुर्यात्। १३७३ स्फुट विकसने। स्फुटति। पुस्फोट। १३७४ मुट आक्षेपमर्दनयोः। १३७५ त्रुटि छेदने। 'वा भ्राश—' (सू २३२१) इति श्यन्वा। त्रुटयति-त्रुटति। तुत्रोट। त्रुटिता। १३७६ तुट कलहकर्मणि। तुटति। तुतोट। तुटिता। १३७७ चुट १३७८ छुट छेदने। १३७९ जुड बन्धने। १३८० कड मदे। १३८१ लुट संश्लेषणे। १३८२ कुड घनत्वे। घनत्वं सान्द्रता। चकर्ड। कुडिता। १३८३ कुड बाल्ये। १३८४ पुड उत्सर्गे। १३८५ घुट प्रतिघाते। १३८६ तुड तोडने। तोडनं भेदः। १३८७ थुड १३८८ स्थुड संवरणे। थुडति। तुथोड। तुस्थोड। खुड छुड इत्येके। १३८९ स्फुर १३९० फुल सञ्चलने। स्फुर स्फुरणे, स्फुल सञ्चलने इत्येके। **२५३७ स्फुरतिस्फुलत्योर्निर्निविभ्यः ८।३।७६॥** षत्वं वा स्यात्। निष्फुरति-निःस्फुरति। स्फर इत्यकारोपधं केचित्पठन्ति। पस्फार। १३९१ स्फुड १३९२ चुड १३९३ ब्रुड संवरणे। १३९४ कुड १३९५ भृड निमज्जने इत्येके। १३९६ गुरी उद्यमने। अनुदात्तेत्। गुरते। जुगुरे। गुरिता। १३९७ णू स्तवने। दीर्घान्तः। 'परिणूतगुणोदयः'। इतश्चत्कारः परस्मैपदिनः। नुवति। अनुवीत्। १३९८ धू विधूनने। धुवति। १३९९ गु पुरीषोत्सर्गे। जुगुविथ-जुगुथ। गुता। गुष्यति। अगुषीत्। 'ह्रस्वादङ्गात्' (सू २३६९)।

श्तलक्षणवृद्धौ ढत्वधत्वष्टुत्वढलोपा इति भावः। एवं तृंहः अस्ताढाम्, स्तृंहः-अस्ताण्ढाम्। स्फुर स्फुरणे। स्फुरतिस्फुलत्योः। 'मूर्धन्य' इत्यधिकृतम्। 'सिवादीनां वा' इत्यतो वेत्यनुवर्तते। तदाह—षत्वं वा स्यादिति। णू स्तवने इति। णोपदेशः। परिणूतेति।

अगुताम् । अगुषुः । १४०० ध्रु गतिस्थैर्ययोः । ध्रुव इति पाठान्तरम् । आद्यस्य ध्रुवतीत्यादि गुवतिवत् । द्वितीयस्तु सेट् । दुध्रुविथ । ध्रुविता । ध्रुविष्यति । ध्रुव्यात् । अध्रुवीत् । अध्रुविष्टाम् । १४०१ कु शब्दे । दीर्घान्तः इति कैयटादयः । कुविता । अकुविष्ट । ह्रस्वान्त इति न्यासकारः । कुता । अकुत । वृत् । कुटादयो वृत्ताः ।

१४०२ पृङ् व्यायामे । प्रायेण व्याङ्पूर्वः । रिङ् । इयङ् । व्याप्रियते । व्यापप्रे । व्यापप्राते । व्यापरिष्यते । व्यापृत । व्यापृषाताम् । १४०३ मृङ् प्राणत्यागे । **२५३८ म्रियतेर्लुङ्लिङोश्च १।३।६०॥** लुङ्लिङोः शितश्च प्रकृतिभूतान्मृङस्तङ् स्यान्नान्यत्र । ङित्त्वं स्वरार्थम् । म्रियते । ममार । ममर्थ । मम्रिव । मर्तासि । मरिष्यति । मृषीष्ट । अमृत ।

अथ परस्मैपदिनः सप्त । १४०४ । रि १४०५ पि गतौ । लघूपधगुणादन्तरङ्गत्वादियङ् । रियति । पियति । रेता । पेता । १४०६ धि धारणे । १४०७ क्षि निवासगत्योः । १४०८ षू प्रेरणे । सुवति । सविता । १४०९ कॄ विक्षेपे । किरति । किरतः । चकार । चकरतुः । करिता— करीता । कीर्यात् । अकारीत् । **२५३९ किरतौ लवने ६।१।१४०॥** उपात्किरतेः सुडागमः स्याच्छेदेऽर्थे । उप

'अयुकः क्ङिति' इति नेट् । कुङ् शब्दे । दीर्घान्त इति । **ततश्चायं सेट् ।**

पृङ् व्यायामे इति । ह्रस्वान्तोऽयमनिट् । 'ऋद्धनोः स्ये' इति इटं मत्वा आह—व्यापरिष्यते इति । मृङ्धातुरनिट् । म्रियतेः । 'अनुदात्तङितः' इत्यतः आत्मनेपदमित्यनुवर्तते । चकारेण 'शदेः शितः' इत्यतः शित इत्यनुकृष्यते । प्रकृतिभूतादित्यध्याहार्यम् । तदाह—तङ्लिङोरिति । तङ्स्यादिति । आत्मनेपदं स्यादित्यर्थः, 'म्रियमाणः' इत्यत्र आनश्यपि इष्टत्वात् । ननु ङित्त्वादेव सिद्धे किमर्थमिदमिति चाशङ्क्य नियमार्थमित्याह—नान्यत्रेति । **तर्हि ङित्त्वं व्यर्थमित्यत आह—ङित्त्वं स्वरार्थमिति । 'तास्यनुदात्तेन्ङिददुपदेशाल्लसार्वधातुकमनुदात्तम्' इत्येतदर्थमित्यर्थः ।** म्रियते इति । शे कृते रिङियङाविति भावः । ऋदन्तत्वात् भारद्वाजमतेऽपि नेडित्याह—ममर्थेति । मम्रिवेति । क्रादिनियमादिट् । मर्ता । 'ऋद्धनोः स्ये' इति इटं मत्वा आह—मरिष्यतीति । रि पि गताविति । द्वावित्यनिटौ । ननु शे कृते तिपमाश्रित्य इकारस्य परत्वाल्लघूपधगुणः स्यादित्यत आह—अन्तरङ्गत्वादियङिति ।

कॄ विक्षेप इति । दीर्घान्तोऽयं, सेट् । किरतीति । 'ऋत इद्धातोः' इति इत्वं रपरत्वम् । चकरतुरिति । किरेडपि 'ऋच्छ्यृताम्' इति गुण इति भावः । 'वृतो वा' इति मत्वा आह—करिता करीतेति । किरतौ लवने । उपादिति । 'उपात् प्रतियत्ने' इत्यतस्तदनुवृत्तेरिति भावः । सुडागम इति । 'सुट् कात्पूर्वः' इत्यतस्तदनुवृत्तेरिति भावः । 'अ-

स्किरति । 'अडभ्यासव्यवायेऽपि सुट् कात्पू' इति वक्तव्यम्' (वा ३६६६) । उपास्किरत् । उपचस्कार । २५४० हिंसार्या प्रतेश्च ६।४।१४१॥ उपात्प्रतेश्च किरतेः सुट् स्याद्धिंसायाम् । उपस्किरति । प्रतिस्किरति । १४१० गॄ निगरणे । २५४१ अचि विभाषा ८।२।२१॥ गिरतेः रेफस्य लत्वं वा स्यादजादौ । गिरति-गलति । जगार-जगाल । जगरिथ-जगलिथ । गरिता-गलिता । १४११ दृङ् आदरे । आद्रियते । आद्रियेते । आदद्रे । आदद्रिषे । आदर्ता । आदरिष्यते । आदृषीष्ट । आदृत । आदृषाताम् १४१२ धृङ् अवस्थाने । ध्रियते ।

अथ परस्मैपदिनः षोडश । १४१३ प्रच्छ ज्ञीप्सायाम् । पृच्छति । पप्रच्छ । पप्रच्छतुः । पप्रच्छिथ-पप्रष्ठ । प्रष्टा । प्रक्ष्यति । अप्राक्षीत् । वृत् । किरादयो वृत्ताः । १४१४ सृज विसर्गे । 'विभाषा सृजिदृशोः' (सू २४०४) । ससर्जिथ-ससृष्ठ । स्रष्टा । स्रक्ष्यति । 'सृजिदृशोर्झल्यमकिति' (सू २४०५) इत्यमागमः ।

डभ्यासव्यवायेऽपि' इति वार्तिकम् । 'सुट् कात्पूर्वः' इत्यनुवृत्तिलभ्यम् । हिंसार्थायाः प्रतेश्च । चकारादुपादिति समुच्चीयते । तदाह—उपादिति । गॄ निगरणे इति । निगरणं भक्षणम् । से । अचि विभाषा । 'ग्रो यङि' इत्यतः ग्र इत्यनुवर्तते । 'कृपो रो लः' इत्यतः रो लः इति । तदाह—गिरतेरिति । अजादाविति । 'धातोः कार्यमुच्यमानं तदन्त्यस्य भवति' इति परिभाषालब्धस्य प्रत्ययस्य अचा विशेषणात्तदादिविधिः । तेन गिरावित्यादौ नेति 'मृजेर्वृद्धिः' इति सूत्रभाष्ये स्पष्टम् । दृङ् आदरे इति । ह्रस्वान्तोऽयम् । अनिट् । आद्रियते इति । रिङ् इयङ् । 'ऋदृशोः स्ये' इति इटं मत्वा आह—आदरिष्यते इति । आदृषीष्टेति । 'उश्च' इति कित्त्वाच्च गुणः । आदृतेति । 'ह्रस्वादङ्गात्' इति सलोपः ।

प्रच्छ ज्ञीप्सायामिति । ज्ञातुमिच्छा ज्ञीप्सा । अनिट्यम् । पृच्छतीति । शस्य छित्त्वात् 'ग्रहिज्या' इति रेफस्य सम्प्रसारणम् ऋकारः पूर्वरूपं चेति भावः । पप्रच्छतुरिति । संयोगात् परत्वेन कित्त्वाभावाच्च सम्प्रसारणमिति भावः । भारद्वाजनियमात्थलि वेडिति मत्वा आह—पप्रच्छिथ पप्रष्ठेति । ह्रस्वाभावपक्षे वश्चादिना छस्य षः, थस्य ष्टुत्वेन ठ इति भावः । पप्रच्छिव । प्रष्टेति । छस्य व्रश्चेति षः, तकारस्य ष्टुत्वेन टः । नच षत्वस्यासिद्धत्वात् पूर्वं तुकि ततः छस्य षत्वे, ष्टुत्वयोः प्रट्प्रष्टेति स्यादिति वाच्यम्, व्रश्चेति सूत्रे सतुक्कस्य छस्य ग्रहणात् । किरादयो वृत्ता इति । नचैवं सति 'किरश्च पञ्चभ्यः' इत्यत्र पञ्चग्रहणं व्यर्थं किरादीनां पञ्चत्वादिति वाच्यम्, तस्य 'रुदादिभ्यः सार्वधातुके' इत्युत्तरार्थत्वात् । सृज विसर्गे । अनिट् । सृजति । ससर्ज । ससृजतुः । अजन्ताऽऽकारवत्त्वाभावेऽपि 'विभाषा सृजिदृशोः' इति थलि वेट् इति मत्वा आह—ससर्जिथ ससृष्ठेति । ह्रस्वाभावे 'व्रश्च' इति जस्य षः, थस्य ष्टुत्वेन ठः,

सृजेत् । सृज्यात् । अस्राक्षीत् । । १४१५ टु मस्जो शुद्धौ । मज्जति । ममज्ज । 'मस्जिनशोर्झलि' (सू २५१७) इति नुम् । 'मस्जेरन्त्यात्पूर्वो नुम् वाच्यः' (वा ३२१) संयोगादिलोपः । ममङ्क्थ-ममज्जिथ । मङ्क्ता । मङ्क्ष्यति । अमाङ्क्षीत् । अमाङ्क्ताम् । १४१६ रुजो भङ्गे । रोक्ता । रोक्ष्यति । अरौक्षीत् । अरौक्ताम् । १४१७ भुजो कौटिल्ये । रुजिवत् । १४१८ छुप स्पर्शे । छोप्ता । अच्छौप्सीत् । १४१९ रुश १४२० रिश हिंसायाम् । तालव्यान्तौ । रोष्टा । रोक्ष्यति । रेष्टा । रेक्ष्यति । १४२१ लिश गतौ । अलिक्षत् । १४२२ स्पृश संस्पर्शने । स्प्रष्टा-स्पर्ष्टा । स्प्रक्ष्यति-स्पर्क्ष्यति । अस्प्राक्षीत्-अस्पार्क्षीत्-अस्पृक्षत् । १४२३ विच्छ गतौ । 'गुपूधूप-' (सू २३०३) इत्यायः । आर्धधातुके वा । विच्छायति । विच्छायाञ्चकार । विविच्छ । १४२४ विश प्रवेशने । विशति । वेष्टा । १४२५ मृश आमर्शने । आमर्शनं स्पर्शः । अम्राक्षीत्-अमार्क्षीत्-अमृक्षत् । १४२६ णुद प्रेरणे । कर्त्रभिप्रायेऽपि फले परस्मैपदार्थः पुनः पाठः । १४२७ षदॢ विशरणगत्यवसादनेषु । सीदति इत्यादि भौवादिकवत् । इह पाठो नुम्विकल्पार्थः । सीदती-सीदन्ती । ज्वलादौ पाठस्तु णार्थः । सादः । स्वरार्थश्च ।

पित्त्वेन अकित्त्वात् 'सृजिदृशोः' इत्यमागम इति भावः । ससृजिव । टु मस्जो शुद्धौ । मज्जतीति । सस्य श्चुत्वेन शः, तस्य जश्त्वेन ज इति भावः । ममङ्क्थेति । मस्जेर्द्वित्वे हल्लादिशेषे ममस्ज् थ इति स्थिते 'स्कोः' इति सकारलोपे ममज् थ इति स्थिते जस्य कुत्वेन गकारे, 'मस्जिनशोः' इति नुमि, तस्यानुस्वारे, तस्य परसवर्णो ञकारः, गस्य चत्वेन कः इति बोध्यम् । यद्यपि अकारात् परत्र नुमि सत्यपि इदं सिध्यति, तथापि 'अन्त्यात् पूर्वो नुमि'त्यस्य 'मद्य' इत्यादौ नलोपः फलम् । अन्यथा उपधात्वाऽभावाज्जस्य लोपो न स्यादिति भावः । एवं—मङ्क्तेति । मङ्क्ष्यति इत्यत्र तु सस्य षत्वं विशेषः, 'रुजो भङ्गे' इत्यारभ्य 'विच्छ गतौ' इत्यतः प्रागनिटः । 'अनुदात्तस्य चर्दुपधस्य' इत्यम्विकल्पं मत्वा आह—स्प्रष्टा, स्पर्ष्टेति ।

णुद प्रेरणे । णोपदेशोऽयम् । 'विश प्रवेशने' इत्यारभ्य 'षदॢ शातने' इत्यन्ता अनिटः । तत्र अदुपधस्य थलि वेट् । अन्यस्य तु नित्यमेवेट् । मृशेः 'अनुदात्तस्य च' इत्यम्विकल्पः । तदाह—अम्राक्षीत्-अमार्क्षीदिति । 'स्पृशमृशे' इति सिज्वेति भावः । सिजभावे 'शल इगुपधात्' इति कस मत्वा आह—अमृक्षदिति । णुदधातुर्णोपदेशः । ननु तनादिगण एवाऽस्मिन् स्वरितेत्सु पठितस्य किमर्थमिह पाठ इत्यत आह—कर्त्रभिप्रायेऽपीति । षदॢधातोर्भ्वादौ पठितादेव सीदति इत्यादिसिद्धेः इह पाठो व्यर्थ इत्यत आह—इह पाठ इति । सीदन्ती इति शविकरणात् शत्रन्तात् ङीपि 'आच्छीनद्योः' इति नुम्विकल्पार्थं इह पाठ इत्यर्थः । भ्वादावेव पाठे तु 'शप्श्यनोर्नित्यम्'

शबनुदात्तः । शस्तूदात्तः । १४२८ शदॢ शातने । स्वरार्थं एव पुनः पाठः । शता तु नास्ति । 'शदेः शितः' (सू २३६२) इत्यात्मनेपदोक्तेः ।

अथ षट् स्वरितेतः । १४२९ मिल सङ्गमे । मिल संश्लेषणे इति पठितस्य पुनः पाठः कर्त्रभिप्राये तङर्थः । मिलति । मिलते । मिमेल । मिमिले । १४३० मुच्लृ मोक्षणे । २५४२ शे मुचादीनाम् ७।१।५९॥ नुम् स्यात् । मुञ्चति । मुञ्चते । मोक्ता । मुच्यात् । मुक्षीष्ट । अमुचत् । अमुक्त । अमुक्षाताम् । १४३१ लुप्ल छेदने । लुम्पति । लुम्पते । अलुपत् । अलुप्त । १४३२ विदॢ लाभे । विन्दति । विन्दते । विवेद । विविदे । व्याघ्रभूत्यादिमते सेट्कोऽयम् । वदिता । भाष्यादिमतेऽनिट्कः । वेत्ता । परिवेत्ता । परिर्वर्जने । ज्येष्ठं परित्यज्य दारानग्नींश्च लब्धवानित्यर्थः । तृन्तृचौ । १४३३ लिप उपदेहे । उपदेहो वृद्धिः । लिम्पति । लिम्पते । लेप्ता । 'लिपिसिचि—' (सू २४१८) इत्यङ् । तङि तु वा । अलिपत् । अलिपत-अलिप्त । १४३४ षिच क्षरणे । सिञ्चति । सिञ्चते । असिचत् । असिचत-असिक्त । अभिषिञ्चति । अभ्यषिञ्चत् । अभिषिषेच ।

अथ त्रयः परस्मैपदिनः । १४३५ कृती छेदने । कृन्तति । चकर्त । कर्तिता ।

इति नित्यो नुम् स्यादिति भावः । तर्हि भ्वाद्यन्तर्गणे ज्वलादावस्य पाठो व्यर्थ इत्यत आह—ज्वलादाविति । 'उज्ञलितिकसन्तेभ्यः' इति कर्तरिणप्रत्ययार्थं इति भावः । तदुदाहृत्य दर्शयति—साद इति । उभयत्र पाठस्य फलान्तरमाह—स्वरार्थश्चेति । तदेव विशदयति—शबनुदात्त इति । 'अनुदात्तो सुप्पितौ' इति पित्स्वरेणेति भावः । शस्तूदात्त इति । 'प्रत्ययः' 'आद्युदात्तश्च' इत्यनेनेति भावः । ननु 'शदॢ शातने' इत्यस्य भ्वादौ पाठादेव सिद्धे इह पाठो व्यर्थं इत्यत आह—स्वरार्थ एवेति । प्रागुक्तपित्त्वाऽपित्त्वकृतस्वरभेदार्थ एवेत्यर्थः । ननु शत्रन्तात् ङीपि उक्तरीत्या नुम्त्रिकल्पार्थोऽपि कुतो न स्यादित्यत आह—शता तु नास्तीति । शदेर्लटः शानजेव, नतु शत्रादेश इत्यर्थः । कुत इत्यत आह—शदेः शित इतीति । मिल सङ्गमे । पठितस्येति । अस्मिन्नेव तुदादिगणे परस्मैपदिषु पठितस्येत्यर्थः । तङर्थ इति । पूर्वत्र पाठस्तु कर्त्रभिप्रायेऽपि परस्मैपदार्थं इत्यर्थः मुचॢ मोक्षणे । शे मुचादीनाम् । नुम् स्यादिति । शेषपूरणमिदम् । 'इदितो नुम्' इत्यतस्तदनुवृत्तेरिति भावः । मुचीष्टेति । 'लिङ्सिचौ' इति क्सित्वाद्ध गुण इति भावः । अमुचदिति लृदित्वाद्लिङीति भावः । लुङि तङि आह—अमुक्तेति । 'झलो झलि' इति सिज्लोपः इति भावः । लिप उपदेहे । तङि तु वेति । 'आत्मनेपदेष्वन्यतरस्याम्' इत्यनेनेति शेषः । षिच क्षरणे । अभिषिञ्चतीति । 'उपसर्गात्सुनोति' इति षः । अभ्यषिञ्चदिति । 'प्राक्सितादड्व्यवायेऽपि' इति षत्वम् । अभिषिषेचेति । 'स्यादिष्वम्बाम्भिः' इति षः ।

कर्तिष्यति-कर्त्स्यति । अकर्तीत् । १४३६ खिद परिघाते । खिन्दति चिखेद । खेत्ता । अयं दैन्ये दिवादौ रुधादौ च । १४३७ पिशि अवयवे । पिशति । पेशिता । अयं दीपनायामपि । 'त्वष्टा रूपाणि पिशतु' वृत् । मुनादय स्तुदादयश्च वृत्ताः ।

इति तिङन्ते तुदादिप्रकरणम् ।

अथ तिङन्ते रुधादिप्रकरणम् ॥ ७ ॥

१४३८ रुधिर् आवरणे । नव स्वरितेतः इरितश्च । २५४३ **रुधादिभ्यः श्नम्** ३।१।७८॥ शपोऽपवादः । मित्त्वादन्त्यादचः परः । नित्यत्वाद्गुणं बाधते । रुणद्धि । 'श्नसोरल्लोपः' (सू २४६६) । णत्वस्यासिद्धत्वादनुस्वारः । परसवर्णः । तस्यासिद्धत्वाण्णत्वं न । 'न पदान्त' (सू ५१) इति सूत्रेणानुस्वारपरसवर्णयोरल्लोपो न स्थानिवत् । रुन्द्धः । रुन्धन्ति । रुन्द्धे । रोद्धा । रोत्स्यति । रोत्स्यते । रुणद्धु-रुन्द्धात् । रुन्द्धि । रुणधानि । रुणधै । अरुणत् । अरुन्द्धाम् ।

कृती छेदने इति । ईदित्त्वं 'ङ्वीदित' इत्येतदर्थम् । 'सेऽसिचि' इति वेडिति मत्वा आह—कर्तिष्यति कर्त्स्यतीति । पिशि अवयवे इति । अवयवक्रियायामित्यर्थः । रूपाणि पिशत्विति । प्रकाशयत्विस्यर्थः । इति श्रीवासुदेवदीक्षितविदुषा विरचितायां सिद्धान्तकौमुदी-व्याख्यायां बालमनोरमाख्यायां शवकरणं समाप्तम् ।

अथ श्नम्विकरणा धातवो निरूप्यन्ते । रुधादिभ्यः श्नम् । कर्त्रर्थं सार्वधातुके परे रुधादिभ्यः श्नम्प्रत्ययः स्यात् स्वार्थे इत्यर्थः । तदाह—शपोऽपवाद इति । श्नमि शमादितौ । मित्त्वस्य फलमाह—मित्त्वादन्त्यादचः पर इति । प्रत्ययत्वात् शकारस्येत्संज्ञा । शकारनिर्देशस्तु 'श्नसोरल्लोपः' 'श्नाऽन्नलोपः' इत्यत्र विशेषणार्थः । ननु सार्वधातुकसंज्ञार्थः, फलाऽभावात् । न च 'सार्वधातुकमपित्' इति ङित्त्वे गुणनिषेधः फलमिति शङ्क्यम् , श्नमः पूर्वस्य इगन्तस्य अङ्गत्वाऽभावादेव गुणाऽप्रसक्तेः । ननु श्नमः प्राक् परत्वाल्लघूपधगुणे कृते पश्चात् श्नमि रोगद्धि इति स्यादत्यत आह—नित्यत्वाद्गुणं बाधते इति । कृते अकृते च गुणे प्रवृत्तेः श्नम् नित्यः । तस्मिन् सति लघूपधत्वाभावान्न गुण इति भावः । रुणद्धीति । रुनध् ति इति स्थिते 'झषस्तथोः' इति धत्वे णत्वमिति भावः । रुनध् तस् इति स्थिते प्रक्रियां दर्शयति—श्नसोरल्लोप इति । ङिदिति सार्वधातुके तद्विधेरिति भावः । रुनध तस् इति स्थिते नस्य णत्वमाशङ्क्य आह—णत्वस्यासिद्धत्वादिति । ननु कृते परसवर्णे तस्य नस्य णत्वमस्त्विवत आह—नस्यासिद्धत्वादिति । परसवर्णसम्पन्ननस्येत्यर्थः । नन्विह अल्लोपस्य 'अचः परस्मिन्' इति स्थानिवत्त्वात् कथमनुस्वारपरसवर्णावित्यत आह—न पदान्तेति । रुन्द्ध इति । 'झषस्तथोः' इति धः । रुन्धन्तीति । रुणत्सि । रुन्द्धः । रुन्द्ध । रुणद्धि । रुन्ध्वः । रुन्ध्मः । रुन्द्धे इति । रुन्धाते । रुन्धते । रुन्त्से । रुन्धाथे । रुन्द्ध्वे । रुन्धे । रुन्ध्वहे । रुन्ध्महे । रुरोध ।

अरुणत्-अरुणः। अरुणधम्। अरुधत्—अरौत्सीत्। अरुद्ध। १४३९ भिदिर् विदारणे। भिनत्ति। भिन्ते। भेत्ता। भेत्स्यति। अभिनत्—अभिनः। अभिनदम्। अभिन्त। अभिदत्—अभैत्सीत्। अभित्त। १४४० छिदिर् द्वैधीकरणे। अच्छिदत्-अच्छैत्सीत्। अच्छित्त। १४४१ रिचिर् विरेचने। रिणक्ति। रिङ्क्ते। रिरेच। रिरिचे। रेक्ता। अरिणक्। अरिचत्—अरैक्षीत्। अरिक्त। १४४२ विचिर् पृथग्भावे। विनक्ति। विङ्क्ते। १४४३ क्षुदिर् सम्पेषणे। क्षुणत्ति। क्षुन्ते। क्षोत्ता। अक्षुदत्—अक्षौत्सीत्। अक्षुत्त। १४४४ युजिर् योगे। योक्ता। १४४५ उछृदिर् दीप्तिदेवनयोः। छृणत्ति। छृन्ते। चच्छर्द। 'सेऽसिचि—' (सू २५०६) इति वेट्। चच्छृदिषे—चच्छृत्से। छर्दिता। छर्दिष्यति—छर्त्स्यति। अच्छृदत्-अच्छर्दीत्। अच्छृर्दिष्ट। १४४६ उतृदिर् हिंसानादरयोः। तृणत्तीत्यादि। १४४७ कृती वेष्टने। परस्मैपदी। कृणत्ति। आर्धधातुकेतौदादिकवत्। १४४८ ओ इन्धी दीप्तौ। त्रय आत्मनेपदिनः। २५४३ श्नाभ्यस्तयोरातः ६।४।११२॥ श्नमः परस्य नस्य लोपः स्यात्। 'श्नसोरल्लोपः' (सू २४६६) इन्द्धे। इन्त्से।

रुरोधिथ। अरुणदिति। लङि हलन्ताद्दिना तिपो लोपः। धस्य रत्वविकल्पः। सिचि तु हलन्तादिना लुप्ते 'दश्च' इति रुत्वविकल्पं मत्वा आह—अरुणत् अरुण इति। रुन्ध्यात्। रुन्धीत। रुत्सीष्ट। धस्य रुत्वविकल्पं मत्वा आह—अरुधत् अरौत्सीदिति। अङभावे सिचि हल्-तलक्षणा वृद्धिः। लुङस्तङयाह—अरुद्धेति। 'झलो झलि' इति सिज्लोपः। भिनत्तीति। भिन्तः। भिन्दन्ति। भिनत्सि। भिन्थः। भिन्थ। भिनद्मि। भिन्द्वः। भिन्द्मः। भिन्त्त इति। भिन्दाते। भिन्दते। भिन्त्से। भिन्दाथे। भिन्द्ध्वे। भिन्त्। भिन्द्वहे। बिभेद। बिभिदथुः। बिभिदिव। बिभिदे। बिभिदिरे। अभिनत्। अभिन इति। 'दश्च' इति रुत्वं भावः। अभिन्तेति। लङि तङि रूपम्। लुङः परस्मैपदे आह—अभिदत् अभैत्सीदिति। छिनत्तीति भावः। लुङि तङयाह—अभित्तेति। 'झलो झलि' इति सिज्लोपः। अभिदन्तामित्यादि। उछृदिरिति। उकार इत्। 'उदितो वा' इति वेट्पक्षे इडिकल्पार्थः। ओ इन्धी दीप्तौ। ईदित्त्वं 'श्नाभ्यस्तयोः' इत्येतदर्थम्। श्नमि कृते इन न् धू ते इति स्थिते—श्नाभ्यस्तयोरातः इति। श्नम्प्रत्ययैकदेशस्य श्न इत्यस्य श्नसोरिति पञ्चमी। नेति लुप्तषष्ठीकम्। तदाह—श्नमः परस्य नस्येति। नकारस्येत्यर्थः। अकार उच्चारणार्थः। तथाच इन ध् ते इति स्थिते आह—श्नसोरल्लोपः इति। तथाच इन्ध् ते इति स्थिते 'झषस्तथोः' इति तकारस्य धत्वे पूर्वधस्य जश्त्वे परिनिष्ठितमाह—इन्द्धे इति। यद्यपि 'अनिदिताम्' इत्येवात्र नलोपः सिध्यति। तथापि अनक्ति इत्याद्यर्थं सूत्रमिहापि न्याय्यत्वादुपन्यस्तमिति बोध्यम्। इन्धे। इन्ध्वे।

इन्धिता । इनद्धै । ऐन्द्ध । ऐन्द्धाः । १४४९ खिद दैन्ये । खिन्ते । खेत्ता । १४५० विद विचारणे । विन्ते । वेत्ता ।

अथ परस्मैपदिनः । १४५१ शिष्लृ विशेषणे । शिनष्टि । शिष्टः । शिंषन्ति । शिशेशिथ । शेष्टा । शेक्ष्यति । हेर्धिः । जश्त्वम् । ष्टुत्वम् । 'झरो झरि—' (सू ७१) इति वा डलोपः । अनुस्वारपरसवर्णौ । शिण्ढि-शिण्ड्ढि । शिनषाणि । अशिनट् । लृदित्त्वादङ् । अशिषत् । १४५२ पिष्लृ सञ्चूर्णने । पिंषिवत् । पिनष्टि । १४५३ भञ्जो आमर्दने । भनक्ति । बभञ्जिथ—बभङ्क्थ । भङ्क्ता । १४५४ भुज पालनाभ्यवहारयोः । भुनक्ति । भोक्ता । भोक्ष्यति । अभुनक् । १४५५

इन्द्धाम् । इनत्त्व । इन्द्ध्वम् । इनधै इति । श्नमि उत्तमस्य इटः एत्वे आटि वृद्धौ इन न् ध् ऐ इति स्थिते श्नाम्नलोपे आटः पित्त्वेन ङित्त्वाभावात् 'श्नसोरल्लोपः' इत्यभावे रूपमिति भावः । अत्र नलोपार्थमपि श्नाम्न लोप इत्यावश्यकम्, आटः पित्त्वेन ङित्त्वाऽभावात् 'अनिदिताम्' इत्यस्याप्रवृत्तेः । इनधावहै । लङ्याह—ऐन्द्धेति । ऐन्द्धाः इति । 'झषस्तथोः' इति थस्य धः । इन्धांत । लुङि ऐन्धिष्ट । शिष्लृ विशेषणे । अनिट् । शिशेशिथेति । अजन्ताऽऽकारवत्त्वाऽभावात् क्ङादिनियमाभावेऽपि सेटम् । शिन ्-हि इति स्थिते आलोपे शिनष्-हि इति स्थिते आह—हेर्धिरिति । शिन् ष् धि इति स्थिते आह—जश्त्वमिति । 'झलां जश् झशि' इति षस्य ड इति भावः । ष्टुत्वमिति । धस्य ढ इति भावः । यद्यपि जश्त्वस्याऽसिद्धत्वात्ततः प्रागेव ष्टुत्वस्य उपन्यासो युक्तः । तथापि जश्त्व ष्टुत्वमिति प्रक्रियाप्रदर्शनमात्रपरं, क्रमस्तु न विवक्षितः । झर इति । जश्त्वसम्पन्नस्य डस्य लोपविकल्प इत्यर्थः । अनुस्वारपरसवर्णाविति । नकारस्य 'नश्च' इत्यनुस्वारे सति तस्य परसवर्णो णकार इत्यर्थः । 'न पदान्त' इति निषेधान्नालोपः स्थानिवत् । ढस्य लोपपक्षे उदाहरति—शिण्ढीति । ढस्य लोपाऽभावे उदाहरति—शिण्ड्ढीति । वस्तुतस्तु सानुस्वार एव पाठ उचितः, 'दीर्घादाचार्याणाम्' इत्युत्तरम् 'अनुस्वारस्य ययि परसवर्णः' 'वा पदान्तस्य' 'तोर्लि' 'उदः स्थास्तम्भ्वोः पूर्वस्य' 'झयो होऽन्यतरस्याम्' शश्छोऽटि' इति षट्सूत्रपाठोत्तरं 'झलां जश् झशि' 'अभ्यासे चर्च' 'खरि च' 'वावसाने' 'अयोऽयमग्रह्यस्यानुनासिकः' इति पञ्चसूत्रपाठ इति भाष्यसम्मताष्टाध्यायीपाठे परसवर्णदृष्ट्या 'झलां जश् झशि' इत्यस्य 'झरो झरि' इत्यस्य चासिद्धत्वेन यय्परत्वाभावे परसवर्णाप्राप्तेरिति शब्देन्दुशेखरे स्थितम् । शिष्टात् । शिष्टम् । शिष्ट । शिनषाणीति । आटः पित्त्वेन ङित्त्वाभावात् 'श्नसोः' इत्यल्लोपो नेति भावः । अशिनडिति । लङस्तिपो हल्ङ्यादिलोपे षस्य जश्त्वमिति भावः । अशिष्टाम् । अशिषन् । अशिनट् । अशिष्टम् । अशिष्ट । अशिनषम् । अशिष्व । अशिष्म । भञ्जो आमर्दने । भनक्तीति । श्नमि भन न् ज् ति इति स्थिते 'श्नाम्न लोपः' इति नलोप इति भावः । भङ्क्तः भञ्जतीत्यादूह्यम् । भारद्वाजनियमात्थलि वेडिति मत्वा आह—बभञ्जिथ—बभङ्क्थेति । भङ्क्तेति । अनिडिति भावः । भुज पालनेति । 'भुजोऽनवने' इति

१४५६ तृह हिंसि हिंसायाम्। २५४५ तृणह इम् ७।३।९२॥ तृहः श्नमि कृते इमागमः स्याद्धलादौ पिति। तृणेढि। तृण्ढः। ततर्ह। तर्हिता। अतृणेट्। हिनस्ति। जिहिंस। हिंसिता १४५७ उन्दी क्लेदने। उनत्ति। उन्त्तः। उन्दन्ति। उन्दाञ्चकार। औनत्। औन्ताम्। औन्दन्। औनः-औनत्। औनदम्। १४५८ अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु। अनक्ति। अङ्क्तः। अञ्जन्ति। आनञ्ज। आन-

---

तङ् वचयते भुङ्क्ते। भुञ्जाते इत्यादि। तृह हिंसि हिंसायाम्। आद्यः ऋदुपधः। सेट्। श्नमि कृते सत्वे तृणह् ति इति स्थिते—तृणह इम्। 'तृणह्' इति षष्ठी। कृतश्नमः तृहधातोर्निर्देशः। 'नाभ्यस्तस्य' इत्यतः पितीति 'उतो वृद्धिः' इत्यतः हलीति चानुवर्तते। फलितमाह—तृहः श्नमि कृते इति। मिश्वादन्त्यादचः परः। 'श्नमि कृते' इत्युक्तौ तु येन नाप्राप्तिन्यायेन इमागमेन श्नम् बाध्येत, 'सत्यपि सम्भवे बाधनं भवति' इति न्यायात्। अन्यथा 'ब्राह्मणेभ्यो दधि दीयताम्। तक्रं कौण्डिन्याय' इत्यत्र तक्रेण दधि न बाध्येत। श्नमा शप् च न बाध्येत, देशभेदेन उभयसम्भवादिति भावः। तृणेढीति। तृणह् ति इति स्थिते इमागमे आदृगुणे तृणेह ति इति स्थिते ढत्व-धत्वष्टुत्वढलोपा इति भावः। तृण्ढ इति। तसि श्नमि कृते, तृणह् तस् इति स्थिते तसः अपित्त्वादिमागमाभावे 'श्नसोः' इत्यल्लोपे ढत्वधत्वष्टुत्वढलोपा इति भावः। तृंहन्ति। तृणेक्षि। तृण्ढः। तृण्ढ। तृणेह्मि। तृंह्वः। तृंह्मः। ततर्हीति। ततृहतुः। ततर्हिथ। ततृहिव। तर्हितेति। सेडिति भावः। तर्हिष्यति। तृणेढु-तृण्ढात्। तृण्ढाम्। तृंहन्तु। तृण्ढि-तृण्ढ्ढि-तृण्ढात्। तृण्ढम्। तृण्ढ। तृणहानि। तृणहाव। तृणहाम। अतृणेडिति। लङस्तिपि श्नमि इम् हल्ङ्यादिलोपः ढत्वजश्त्वे इति भावः। अतृण्ढाम्। अतृंहन्। अतृणेट्। अतृण्ढम्। अतृण्ढ। अतृणहम्। अतृंह्व। अतृंह्म। तृंह्यात्। तृह्यात्। अतर्हीत्। अतर्हिष्यत्। हिंसिधातोरुदाहरति—हिनस्तीति। हिंह श्नमि हिंदित्त्वान्नुमि च कृते 'श्नाभ्यस्तयोरातः' इति नुमो लोप इति भावः। हिंस्तः। हिंसन्ति। हिनंसि। हिंस्थः। हिंस्थ। हिनंस्मि। हिंस्वः। हिंस्मः। जिहिंसेति। किति हिंदित्त्वान्नलोपो न। जिहिंसतुः। जिहिंसिथ। हिंसितेति। सेडिति भावः। हिंसिष्यति। हिनस्तु। हिंस्ताम्। हौ श्नमि नुमि कृते 'श्नाभ्यस्तयोरातः' इति नुमो लोपे हेरपित्त्वेन ङित्त्वात् 'श्नसोः' इत्यल्लोपे 'धि च' इति सलोपे, हिन्धि इति रूपम्। हिंस्तात्। हिंसानि। अहिनत्। अहिंस्ताम्। अहिंसन्। सिपि रुत्वा—अहिनः। अहिनत्। अहिंस्तम्। अहिंसम्। अहिंस्व। हिंस्यात्। हिंस्याताम्। आशीर्लिङि श्नमभावान्नुमेव। हिंदित्त्वान्नलोपो न। हिंस्यादित्येव। हिंस्यास्ताम्। अहिंसीत्। अहिंसिष्यत्। उन्दी क्लेदने। उन्दन्तीति। उनत्सि। उन्त्थः। उनद्मि। उन्द्वः। उन्दामिति। इजादेश्चेत्याम्। उन्दिता। उन्दिष्यति। 'उनत्त-उन्तात्। उन्द्धि। उनदानि। लङ्याह—औनदिति। औन्ताम्। औन्दन्। औनः। औनत्। औनदम्।

ञ्जिय-आनङ्क्थ । अङ्क्ता-अञ्जिता । अङ्ग्धि । अनजानि । आनक् । २५४६ अञ्जेः सिचि ७।२।७१॥ अञ्जेः सिचो नित्यमिट् स्यात् । आञ्जीत् । १४५६ तञ्चू सङ्कोचने । तनक्ति । तङ्क्ता-तञ्चिता । १४६० ओविजी भयचलनयोः । विनक्ति । विङ्क्तः । 'विज इट्' (सू २५३६) इति डित्त्वम् । विविजिथ । विजिता । अविनक् । अविजीत् । १४६१ वृजी वर्जने । वृणक्ति । वर्जिता । १४६२ पृची सम्पर्के । पृणक्ति । पपर्च । इति तिङन्ते रुधादिप्रकरणम् ।

अथ तिङन्ते तनादिप्रकरणम् ॥ ८ ॥

अथ सप्त स्वरितेतः । १४६३ तनु विस्तारे । 'तनादिकृञ्भ्य उः' (सू २४६६) तनोति । तन्वः-तनुवः । तनुते । तताने । तेने । तनु । अतनीत्-अतानीत् ।

औन्दु । उन्द्यात् । उद्यात् । अञ्जूधातुः नोपधः कृतपरसवर्णनिर्देशः । ऊदित्वाड्डेट् । अनक्तीति । श्नमि कृते परसवर्ण्यस्याऽसिद्धत्वात् 'श्नाञ्नलोपः' इति नकारलोपे जस्य कुत्वेन गः, गस्य चर्त्वेन क इति भावः । अङ्क्त इति । नलोपे अञ्जोपे जस्य कुत्वेन गः गस्य चर्त्वेन कः । श्नमो नस्य परसवर्णो ङ इति भावः । अञ्ज तीति । नलोपाऽञ्जोपौ । श्नमो नस्य परसवर्णो ञ इति भावः । अनक्षि । अङ्क्थः । अनज्मि । अञ्ज्वः । अङ्क्वीति । हौ श्नमि झिभावे नलोपाञ्जोपौ । जस्य कुत्वेन गकारः नस्य परसवर्णो ङकार इति भावः । अनजानि । श्नाञ्नलोपः । आटः पित्त्वादञ्जोपो न । लङ्याह—आनगिति । आङ्क्ताम् । आञ्जन् । अञ्ज्यात् । अज्यात् । अञ्जेः सिचि । 'इडत्यर्ति' इत्यत इडित्यनुवर्तते । ऊदित्वादेव सिद्धे नित्यार्थमिदम् ॥ तदाह—अञ्जेरित्यादिना । तञ्चू सङ्कोचने । नोपधः कृतपरसवर्णनिर्देशः । अञ्जूवद्रूपाणि यथायोग्यमूह्यानि । ओ विजीति । ओकार इत् । अनिट्सु इरितो ग्रहणादयं सेट् ।

इति श्रीवासुदेवदीक्षितविदुषा विरचितायां सिद्धान्तकौमुदीव्याख्यायां बालमनोरमाख्यायां श्नम्विकरणं समाप्तम् ।

अथ उविकरणधातवो निरूप्यन्ते । तनुधातुरुदित् । 'उदितो वा' इति प्रयोजनम् । तनादिकृञ्भ्य उः । कर्त्रर्थं सार्वधातुके तनादिभ्यः कृञश्च उप्रत्ययः स्यात् स्वार्थे इत्यर्थः । शपोऽपवादः । तनोतीति । उप्रत्ययस्य तिपमाश्रित्य गुणः । तसादौ तु ङित्त्वान्न गुणः । तनुतः । झोऽन्तादेशे कृते 'हको यणचि' इति यण् । तन्वन्ति । तनोषि । तनुथः । तनुथ । तनोमि । 'लोपश्चास्यान्यतरस्याम्' इत्युकारलोपविकल्पमभिप्रेत्याह—तन्वः-तनुव इति । लङ्याह—तनुत इति । तन्वाते । तन्वते । तनुषे । तन्वाथे । तनुध्वे । तन्वे । तनुवहे—तन्वहे । तनुमहे-तन्महे । तनानेति । तेनतुः । तेनिथ । तेन । तेनिव । लङ्याह—तेने इति । तेनाते । तेनिरे । तेनिषे । तेनाथे । तेनिध्वे । तेने । तेनिवहे । तेनिमहे । तनिता । तनिष्यति-तनिष्यते । तनोतु-तनुतात् । तनु-

२५४७ तनादिभ्यस्तथासोः २।४।७९॥ तनादेः सिचो वा लुक्स्यात्तथासोः। थासा साहचर्यादेकवचनतश्शब्दो गृह्यते। तेनेह न। यूयमतनिष्ट—अतानिष्ट। 'अनुदात्तोपदेश—' (सू २४२८) इत्यनुनासिकलोपः। तङि अतत—अतनिष्ट। अतथाः—अतनिष्ठाः। १४६४ षणु दाने। सनोति। सनुते। 'ये विभाषा' (सू २३१९)। सायात्—सन्यात्। 'जनसन—' (सू २५०४) इत्यात्त्वम्। असात-असनिष्ट। असाथाः-असनिष्ठाः। १४६५ क्षणु हिंसायाम्। क्षणोति। क्षणुते। 'क्ष्यन्त—' (सू २२९९) इति न वृद्धिः। अक्षणीत्। अक्षत—अक्षणिष्ट। अक्षथाः-अक्षणिष्ठाः। १४६६ क्षिणु च। उप्रत्ययनिमित्तो लघूपधगुणः 'संज्ञापूर्वको विधिरनित्यः' (प ९४) इति न भवतीत्याश्रेयादयः। भवत्येवेत्यन्ये। क्षिणोति—क्षेणोति। क्षेणितासि। क्षेणितासे। अक्षेणीत्। अक्षित—अक्षेणिष्ट। १४६७ ऋणु गतौ। ऋणोति-अर्णोति अर्णुतः अर्णवन्ति। आनर्ण। आनृणे। अर्णितासि।

ताम्। तन्वन्तु। 'उतश्च प्रत्ययात्' इति हेर्लुकं मत्वा आह—तन्विति। तनुतात्। तनुतम्। तनुत। तनवानि। तनवाव। तनवाम। अतनोत्। अतनुताम्। अतन्वन्। अतनोः। अतनुतम्। अतनुत-अतन्व। तनुयात्। तन्वीत। तनिषीष्ट। 'अतो हलादेरिति वृद्धिविकल्पं मत्वा आह—अतनात्-अतानीदिति। अतनिष्टाम्। अतनिषुः। अतनीः। अतनिष्टम्। अतनिष्ट। अतनिषम्। अतनिष्व। अतनिष्म। वृद्धिपक्षे अतानिष्टामित्यादि। अतनिष्यत्। लुङः तङि प्रथमैकवचने मध्यमपुरुषैकवचने च विशेषमाह—तनादिभ्यस्तथासोः। 'गतिस्था' इत्यतः सिच इति 'व्यक्षत्रियार्ष' इत्यतो लुगिति 'विभाषा घ्राधेट्' इत्यतो विभाषेति चानुवर्तते। तदाह—तनादेरित्यादिना। एकवचनतशब्दो गृह्यत इति। ननु लुङादेशपरस्मैपदमध्यमपुरुषबहुवचनतादेशोऽपीत्यर्थः। यूयमिति। लुङि मध्यमपुरुषबहुवचने सिचि वृद्धिविकल्पे सति, अतनिष्ट-अतानिष्टेत्यत्र सिचो नायं लुग्विकल्प इत्यर्थः। तदेवं प्रत्युदाहरणमुक्त्वा सूत्रस्थोदाहरणं वक्तुम् प्रक्रियां दर्शयति-अनुदात्तोपदेशेत्यनुनासिकलोपः, तङीति। तङि प्रथमैकवचने, तशब्द मध्यमपुरुषैकवचने थासि च सिचो लुकि 'अनुदात्तोपदेश' इति नकारस्य लोप इत्यर्थः। तदाह—अतत-अतनिष्टेति। अतथाः अतनिष्ठाः इति च। अतनिषाथामित्यादि सुगमम्। षणु दाने। षोपदेशोऽयम्। तनुवद्रूपाणि। असातेति। सिचो लुक्पक्षे रूपम्। असनिष्टेति। इट्। झलादिपरकत्वाऽभावादात्त्वं नेति भावः। षणुधातुरदुपधः। "वञ्चेऽध्वर्युः षण्वीत" इति तैत्तिरीये। क्षणु चेति। इदुपधः। अयमपि हिंसायामित्यर्थः। "वञ्चेऽध्वर्युः क्षिण्वीत" इति शाखान्तरं शाबरभाष्ये उदाहृतम्। ननु क्षिणोतीत्यत्र उप्रत्ययमाश्रित्य इकारस्य लघूपधगुणः कस्मान्नेत्यत्र आह—उप्रत्ययनिमित्त इति। ऋणु गतौ। अत्रापि क्षिणुवत् मतभेदाल्लघूपधगुणतदभावौ। तदाह—ऋणोति-अर्णोतीति। एवमग्रेऽपि। अर्ण्वन्तीति। 'इको यणचि' इति यणिति भावः।

आर्णोत्। आर्त—आर्णिष्ट। आर्थाः—आर्णिष्ठाः। १४६८ तृणु अदने। तृणोति—तर्णोति। तृणुते—तर्णुते। १४६९ घृणु दीप्तौ। जघर्ण। जघृणे।

अथ द्वावनुदात्तेतौ। १४७० वनु याचने। वनुते। ववने। चान्द्रमते परस्मैपदी। वनोति। ववान। १४७१ मनु अवबोधने। मनुते। मेने। १४७२ डु कृञ् करणे। करोति। 'अत उत्सार्वधातुके' (सू २४६७)। कुरुतः। यण्। न भकुर्छुराम्' (सू १६२९) इति न दीर्घः। कुर्वन्ति। २५४८ नित्यं करोतेः ६।४।१०८॥ करोतेः प्रत्ययोकारस्य नित्यं लोपः स्याद्वमयोः परयोः। कुर्वः। कुर्मः। चकर्थ। चकृव। कर्ता। करिष्यति। २५४९ ये च ६।४।१०९॥ कृञ उलोपः स्याद्यादौ प्रत्यये परे। कुर्यात्। आशिषि क्रियात्। कृषीष्ट। अकार्षीत्। 'तनादिभ्यः—' (सू २५४७) इति लुकोऽभावे 'हस्वादङ्गात्' (सू २३६९) इति सिचो लोपः। अकृत। अकृथाः। २५५० सम्परिभ्यां करोतौ भूषणे ६।१।१३७॥ २५५१ समवाये च ६।१।१३८॥ सम्परिपूर्वस्य करोतेः सुट् स्याद्भूषणे सङ्घाते चार्थे। संस्करोति। अलङ्करोतीत्यर्थः। संस्कुर्वन्ति। सङ्घोभवन्तीत्यर्थः। सम्पूर्वस्य क्वचिदभूषणेऽपि सुट्। 'सस्कृतं भद्रा' (सू १२१७) इति ज्ञापकात्।

डु कृञ् करणे। करोतीति। उप्रत्ययमाश्रित्य ऋकारस्य गुणः। रपरत्वम्। उकारस्य तु तिपमाश्रित्य गुणः। कुरुत इति। तसो ङित्त्वादुकारस्य न गुणः। कुरु अन्ति इति स्थिते आह—यणिति। 'इको यणचि' इत्यनेनेति शेषः। उकारस्य यणि कुर्व अन्ति इति स्थिते 'हलि च' इति दीर्घमाशङ्क्य आह—नभेति। वसि मसि च 'लोपश्चास्यान्यतरस्याम्' इत्युकारलोपविकल्पे प्राप्ते—नित्यं करोतेः। 'उतश्च प्रत्ययात्' इत्यनुवर्तते 'लोपश्चास्यान्यतरस्याम्' इत्यतः लोपः श्वोरिति च। तदाह—करोतेरिति। चकर्थेति। 'कृसृभृवृ' इति नेडिति भावः। अजन्तत्वेऽपि ऋदन्तत्वात् भारद्वाजमतेऽपि नेट्। करिष्यतीति। करोतु-कुरुतात्। कुरु। करवाणि। कुरुताम्। कुर्वाताम्। करवै। करवावहै। करवामहै। अकरोत्। अकुरुताम्। अकुरुत। अकुर्वाताम्। विधिलिङि-कुरुयात् इति स्थिते—ये च। 'लोपश्चास्यान्यतरस्याम्' इत्यतो लोप इति अस्यति चानुवर्तते। अस्येत्यनेन पूर्वसूत्रे उत इत्युपात्तः उत्परामृश्यते। 'नित्यं करोतेः' इत्यतः करोतेरित्यनुवर्तते। अङ्गाधिकृतः प्रत्ययो यकारेण विशेष्यते। तदादिविधिः तदाह-कृञ उलोप इति। आशिषि क्रियादिति। 'रिङ् शयग्लिङ्क्षु' इति रिङिति भावः। कृषीष्टेति। 'उश्च' इति कित्त्वान्न गुण इति भावः। अकार्षीदिति। सिचि वृद्धौ रपरत्वमिति भावः। ननु लुङस्तङ अकृ स् त इति स्थिते 'तनादिभ्यस्तथासोः' इति सिचो लुकि अकृतेतीष्टं सिध्यति सिचो लुगभावे तु सकारः श्रूयेतेत्यत आह—तनादिभ्य इत्यादि। सम्परिभ्याम्। समवाये च। करोतेः सुट् स्यादिति। 'सुट् कात्पूर्वः' इत्यतः 'नित्यं करोतेः'

'परिनिविभ्यः–' (सू २२७५) इति षः। परिष्करोति। 'सिवादीनां वा–' (सू २३५६)। पर्यष्कार्षीत्–पर्यस्कार्षीत्। **२५५२ उपात्प्रतियत्नवैकृतवाक्याध्याहारेषु च ६।१।१३६॥** उपात्कृञः सुट् स्यादेष्वर्थेषु। क्तात्प्रागुक्तयोरर्थयोः। प्रतियत्नो गुणाधानम्। विकृतमेव वैकृतं विकारः। वाक्यस्याध्याहारः आकाङ्क्षितैकदेशपूरणम्। उपरकृता कन्या। अलङ्कृतेत्यर्थः। उपस्कृताः ब्राह्मणाः। समुदिता इत्यर्थः। एधोदकस्योपस्कुरुते। गुणाधानं करोतीत्यर्थः। उपस्कृतं भुङ्क्ते। विकृतमित्यर्थः। उपस्कृतं ब्रूते वाक्याध्याहारेण ब्रूते इत्यर्थः। **२५५३ सुट्कात्पूर्वः ६।१।१३५॥** 'अडभ्यासव्यवायेऽपि' इत्युक्तम्। सञ्चस्कार। 'कात्पूर्वः' इत्यादि भाष्ये प्रत्याख्यातम्। तथा हि 'पूर्वं धातुरुपसर्गेण युज्यते'। अन्तरङ्गत्वात्सुट्। ततो द्वित्वम्। एवं च "ऋतश्च संयोगादेर्गुणः" (सू २३७९) संचस्करतुः।

इत्यतश्च तदनुवृत्तेरिति भावः। प्रागुक्तयोरिति। भूषणसमवाययोरित्यर्थः। ननु 'सम्परिभ्याम्' इति सुट् पदद्वयापेक्षत्वात् बहिरङ्गः। 'लिटि धातोः' इति द्वित्वं तु प्रकृतिप्रत्ययमात्रापेक्षत्वादन्तरङ्गम्। ततश्च सञ्चस्कार इत्यत्र परमपि सुटं बाधित्वा द्वित्वे कृते अभ्यासात्प्रागेव सुटि प्राप्ते—सुट् कात्पूर्वः। षष्ठ्यास्त्रयपादे इदं सूत्रम्। 'सम्परिभ्यां करोतौ भूषणे' 'समवाये च' 'उपात्प्रतियत्न' इत्यारभ्य 'अनुदात्तं पदमेकवर्जम्' इत्यतः प्रागिदमधिकृतं वेदितव्यमित्यर्थः। एवञ्च कात्पूर्व इत्युक्तेरभ्यासात् प्राक् न सुडिति भावः। नन्वभ्यासेन व्यवधानात्कथमिह उत्तरखण्डस्य सुट्। संस्करोतीत्यादौ अडव्यवहिते सुडविधेश्चरितार्थत्वात्। किञ्च समस्करोत् इत्यत्र अटा व्यवधानात् कथं सुट्। नह्यडागमः कृञ्भक्तः अङ्गभक्तत्वात्। विकरणान्तस्यैवाङ्गत्वादित्यत आह—अडभ्यासव्यवायेऽपीत्युक्तमिति। वार्तिकमिति शेषः। अटा अभ्यासेन च व्यवधानेऽपि सम्पर्यादिभ्यः परस्मात् कात्पूर्वः सुडित्यर्थः। इत्यादीति। सुट् इत्येवाधिकृतमस्तु 'कात्पूर्वः' इति 'अडभ्यासव्यवायेऽपि' इति च मास्त्वित्येवं भाष्ये प्रत्याख्यातमित्यर्थः। तदेवोपपादयितुं प्रतिजानीते—तथा हीति। पूर्वं धातुरुपसर्गेण युज्यते इति। 'पश्चात्साधनेने'ति शेषः। ततश्च पूर्वोपनिपतितधातूपसर्गसम्बन्धनिमित्तकं कार्यं पश्चादनुपतिष्यद्धातुप्रत्ययसम्बन्धनिमित्तकात्कार्यादन्तरङ्गम्, प्रथमोपस्थितत्वात्। तदुक्तं भाष्ये—'पूर्वं धातुरुपसर्गेणेति कृत्वा धातूपसर्गयोः कार्यमन्तरङ्गम्' इति। तदाह—अन्तरङ्गत्वात्सुट्। ततो द्वित्वमिति। तथा सुटि कृते 'स्कृ' इत्यस्य द्वित्वे उरदत्वे रपरत्वे 'शर्पूर्वाः खयः' इति रेफसकारयोर्निवृत्तौ अभ्यासचुत्वे सञ्चस्कारेति रूपसिद्धः 'कात्पूर्वः' इति 'अडभ्यासव्यवायेऽपि' इति च न कर्तव्यमिति भावः। एवं समस्करोदित्यत्रापि विकरणान्ताऽङ्गभक्ताऽडागमापेक्षया अन्तरङ्गत्वात् प्रथमं सुड् भविष्यतीति कृत्वा 'अडव्यवायेऽपी'त्यंशो न कर्तव्य इत्यूह्यम्। 'पूर्वं धातुरुपसर्गेणे'त्याश्रयणे फलान्तरमप्याह—एवं चेति। उत्करीत्या अन्तरङ्गत्वात् सुटि कृते संस्कृ इत्यस्माल्लिटः

'कृसृभृवृ—' (सू २२९३) इति सूत्रे 'ऋतो भारद्वाजस्य' (सू २२९६) इति सूत्रे च 'कृञोऽसुट इति वक्तव्यम्' (वा ४४०१) । तेन ससुट्कात्परस्येट् । सञ्चस्करिथ । सञ्चस्करिव । 'गुणोऽर्ति—' (सू २३८०) इति सूत्रे 'नित्यं छन्दसि' (सू ३५८७) इति सूत्रात् नित्यम् इत्यनुवर्तते । नित्यं यः संयोगादिस्तस्येत्यर्थात् सुटि गुणो न । संस्क्रियात् । 'ऋतश्च संयोगादेः' (सू २५२६) इति लिङ्सिचोर्नेट् । 'एकाच उपदेशे-' (सू २२४६) इति सूत्रात् उपदेशे इत्यनुवर्त्य उपदेशे यः संयोगादिः इति व्याख्यानात् । संस्कृषीष्ट । समस्कृत । समस्कृषाताम् ।

इति तिङन्ते तनादिप्रकरणम् ।

अथ तिङन्ते क्र्यादिप्रकरणम् ॥ ९ ॥

१४७३ डु क्रीञ् द्रव्यविनिमये । २५५४ क्र्यादिभ्यः श्ना ३।१।८१॥ क्रीणाति । 'ई हल्यघोः' (सू २४९७) क्रीणीतः । ईत्वात्पूर्वं झेरन्तादेशः । परत्वान्नित्यत्वादन्तरङ्गत्वाच्च । एवं झस्य अद्भावः । ततः 'श्नाभ्यस्तयोः—' (सू २४८३) इत्यात्लोपः । क्रीण्न्ति । क्रीणीते । क्रीणाते । क्रीणते । चिक्राय । चिक्रियतुः । चिक्रियिथ-चिक्रेथ । चिक्रियिव । चिक्रियिम । चिक्रियिषे । क्रेता । क्रेष्यति । क्रीयात् ।

अतुसि 'ऋतश्च संयोगादेर्गुणः' इति गुणे सञ्चस्करतुरिति सिध्यति । पूर्वं धातुः साधनेन युज्यते' इत्याश्रयणे तु चक्रतुरिति परिनिष्ठितस्य समित्युपसर्गयोगात्संयोगादित्वाभावाद्गुणस्यासिद्धिरिति भावः । नन्वत्र सञ्चस्करिव, सञ्चस्करिथ इत्यत्र च 'कृसृभृवृ' इति 'ऋतो भारद्वाजस्य' इति च इण्निषेधः स्यादित्यत आह—कृसृभृवृ सूत्रे इत्यादि । नन्वाशीर्लिङि संस्क्रियादित्यत्र 'गुणोऽर्तिसंयोगाद्योः' इति गुणः कुतो नेत्यत आह—गुणोऽर्तीत्यादि । ननु तङि संस्कृषीष्ट इति ङिति, समस्कृत समस्कृषाताम् इति लुङि च 'ऋतश्च संयोगादेः' इति इट् कुतो नेत्यत आह—ऋतश्चेत्यादि ।

इति श्रीवासुदेवदीक्षितविदुषा विरचितायां सिद्धान्तकौमुदीव्याख्यायां बालमनोरमाख्यायां उविकरणनिरूपणं समाप्तम् ।

अथ श्नाविकरणधातवो निरूप्यन्ते । डु क्रीञ्इति । क्र्यादिभ्यः श्ना । कर्त्रर्थे सार्वधातुके परे क्र्यादिभ्यः श्नाप्रत्ययः स्यात् स्वार्थे इत्यर्थः । शपोऽपवादः । क्रीणातीति । श्नाप्रत्ययस्य अपित्सार्वधातुकत्वेन ङित्त्वादीकारस्य न गुण इति भावः । ई हल्यघोरिति । हलादौ ङिति सार्वधातुके ईत्वमिति भावः । क्री णा झि इति स्थिते 'ई हल्यघोः' इति ईत्वमाशङ्क्य आह—ईत्वात्पूर्वमिति । नित्यत्वादिति । अकृते कृते च ईत्वे झन्तादेशस्य प्रवृत्तेरिति भावः । एवं झस्येति । क्री णा झ इति स्थिते 'आत्मनेपदेष्वनतः' इत्यदादेशोऽपि ईत्वात्पूर्वमित्यर्थः । तत इति । झन्तादेशाददादेशाच्च पञ्चादि-

क्षेषीष्ट। अक्षैषीत्। अक्षेष्ट। १४७४ प्रीञ् तर्पणे कान्तौ च। कान्तिः कामना। प्रीणाति। प्रीणीते। १४७५ श्रीञ् पाके। १४७६ मीञ् हिंसायाम्। 'हिनुमीना' (सू २५३०)। प्रमीणाति। प्रमीणीतः। 'मीनातिमिनोति—' (सू २५०८) इत्येज्विषये आत्वम्। ममौ। मिम्यतुः। ममिथ-ममाथ। मिम्ये। माता। मास्यति। मीयात्। मासीष्ट। अमासीत्। अमासिष्टाम्। अमास्त। १४७७ षिञ् बन्धने। सिनाति। सिनीते। सिषाय। सिष्ये। सेता। १४७७ स्कु आप्रवणे। **२५५५ स्तन्भुस्तुन्भुस्कन्भुस्कुन्भुस्कुञ्भ्यः श्नुश्च ३।१।८२॥** चात् श्ना। स्कुनोति। स्कुनुते। स्कुनाति। स्कुनीते। चुस्कुाव। चुस्कुवे। स्कोता। अस्कौषीत्। अस्कोष्ट। स्तन्भ्वादयश्चत्वारः सौत्राः। सर्वे रोधनार्था इत्येके। माधवस्तु प्रथमतृतीयौ स्तम्भार्थौ, द्वितीयो निष्कोषणार्थश्चतुर्थो धारणार्थ इत्याह। सर्वे परस्मैपदिनः। नलोपः। विष्टभ्नोति—विष्टभ्नाति। अवष्टभ्नोति—अवष्टभ्नाति। अवतष्टम्भ। 'जस्तन्भु—' (सू २२९१) इत्यङ् वा। व्यष्टभत्। व्यष्टम्भीत्। स्तुभ्नोति। स्तुभ्नाति। **२५५६ वेः स्कभ्नातेर्नित्यम् ८।३।७७॥** वेः परस्य स्कभ्नातेः सस्य षः स्यात्। विष्कभ्नोति—विष्कभ्नाति। स्कुभ्नोति—स्कुभ्नाति। **२५५७ हलः श्नः शानज्झौ ३।१।८३॥** हलः परस्य श्नः शानजादेशः स्याद्झौ परे। स्तभान। स्तुभान। स्कभान। स्कुभान। पक्षे स्तुभ्नुहि इत्यादि। १४७९ युञ् बन्धने। युनाति। युनीते। योता। १४८० क्नूञ् शब्दे। क्नूनाति। क्नूनीते। क्नविता। १४८१ द्रूञ हिंसायाम्। द्रूणाति। द्रूणीते। १४८२ पूञ् पवने। **२५५८ क्ष्वादीनां ह्रस्वः ७।३।८०॥** ङिति परे। पुनाति। पुनीते। पविता। १४८३ लूञ् छेदने। लुनाति। लुनीते। १४८४ स्तृञ् आच्छादने। स्तृणाति। स्तृणीते। तस्तार। तस्तरतुः। स्तरिता—स्तरीता। स्तृणीयात्। स्तृणीत।

स्यर्थः। अजादौ किङिति सार्वधातुके श्नाप्रत्ययस्य आङ्लोपः। भारद्वाजनियमात्थञि वेडिति मत्वा आह—चिक्रियिथ चिक्रेथेति। चिक्रियिवेति। क्रादिनियमादिडिति भावः। क्रीणातु। क्रीणीहि। अक्रीणात्। अक्रीणीत। क्रीणीयात्। क्रीणीत। सौत्रा इति। नोपधा इत्यपि ज्ञेयम्। नलोप इति। 'अनिदिताम्' इत्यनेनेति भावः। विष्टभ्नोतीति। 'स्तन्भेः' इति षत्वम्। अवष्टभ्नोतीति। 'अवाच्चालम्बनाविदूर्ययोः' इति षत्वम्। अवतष्टम्भेति। 'स्थादिष्वभ्यासेन' इति षत्वम्। व्यष्टभदिति। 'प्राक्सितात्' इति षत्वम्। स्तभानेति। श्नाप्रत्ययस्य शानजादेशे कृते 'अतो हेः' इति लुक्। ष्वादीनां ह्रस्वः। 'ष्णुक्ष्मुचमाम्' इत्यतः ङितीत्यनुवर्तत इत्यभिप्रेत्य शेषं पूरयति—ङिति परे इति। पविते ति। ऊकारान्तत्वात् सेडिति भावः। स्तृञ् आच्छादने। सेट्। तस्तरतुरिति। कित्त्वेऽपि 'ऋच्छत्यताम्' इति गुणः। स्तरिता—स्तरीतेति। 'वृतो वा' इति

आशिषि-स्तीर्यात्। 'लिङ्सिचोः—' (सू २५२८) इति वेट्। 'न लिङि' (सू २५२६)। स्तरिषीष्ट। 'उश्च' (सू २३६८) इति कित्त्वम्। स्तीर्षीष्ट। 'सिचि च परस्मैपदेषु' (सू २३९२) इति न दीर्घः। अस्तारीत्। अस्तारिष्टाम्। अस्तरीष्ट-अस्तरिष्ट-अस्तीर्ष्ट। १४८४ कॄञ् हिंसायाम्। कृणाति। कृणीते। चकार। चकरे। १४८६ वृञ् वरणे। वृणाति। वृणीते। ववार। ववरे। वरिता-वरीता। आशिषि 'उदोष्ठ्यपूर्वस्य' (सू २४९४)। वर्यात्। वरिषीष्ट-वर्षीष्ट। अवारीत्। अवारिष्टाम्। अवरिष्ट-अवरीष्ट-अवर्ष्ट। १४८७ धूञ् कम्पने। धुनाति। धुनीते। दुधविथ-दुधोथ। दुधुविव। धविता-धोता। 'स्तुधूञ्भ्यः—' (सू २३८५) इतीट्। अधावीत्। अधविष्ट-अधोष्ट।

अथ बध्नात्यन्ताः परस्मैपदिनः। १४८८ शॄ हिंसायाम्। 'शॄदॄप्रां ह्रस्वो वा' (सू २४६५) इति ह्रस्वपक्षे यण्। अन्यदा 'ऋच्छत्यृताम्' (सू २३८३) इति गुणः। शश्रतुः—शशरतुः। 'श्रयुकः किति' (सू २३८१) इति निषेधस्य क्र्यादिनियमेन बाधः। शशरिव-शश्रिव। शरिता-शरीता। शृणीहि। शीर्यात्। अशारिष्टाम्। १४८९ पॄ पालनपूरणयोः। पप्रतुः—पपरतुः। आशिषि पूर्यात्।

दीर्घविकल्पः। आशिषि स्तीर्यादिति। 'ऋत इद्धातोः' इति इत्वे रपरत्वे 'हलि च' इति दीर्घः। स्तॄषीष्ट इति स्थिते आह—लिङ्सिचोरिति वेटिति। 'वृतो वा' इति दीर्घविकल्पनिषेधसूत्रं स्मारयति—न लिङीति। वृत इटो दीर्घो नेत्यर्थः। इडभावपक्षे स्तॄषीष्ट इत्यत्र गुणमाशङ्क्य आह—उश्चेति कित्त्वमिति। लुङि परस्मैपदे सिचि अस्तारिष्टाम् इत्यत्र 'वृतो वा' इति इटो दीर्घविकल्पे प्राप्ते आह—सिचि चेति। अस्तरीष्ट-अस्तारिष्टेति। 'वृतो वा' इति दीर्घः। अरतीर्ष्टेति। 'लिङ्सिचोः' इति इडभावपक्षे ऋत इत्वे 'हलि च' इति दीर्घ इति भावः। कॄञ् हिंसायाम्। चकरे इति। 'ऋच्छत्यृताम्' इति गुणः। वृञ् वरणे इति। आशिषीति। वर्यात् इति स्थिते 'उदोष्ठ्यपूर्वस्य' इति ऋकारस्य उत्वमित्यर्थः, तत्र दन्त्योष्ठ्यपूर्वस्यापि ग्रहणादिति भावः। ऋत उत्वे रपरत्वे 'हलि च' इति दीर्घ इति बोध्यम्। वरिषीष्ट वर्षीष्टेति। 'लिङ्सिचोः' इति वेट्। इडभावे 'उश्च' इति कित्त्वादगुणाऽभावे उत्वे रपरत्वे 'हलि च' इति दीर्घ इति भावः। अवारिष्टामिति। 'सिचि च' इति इटो न दीर्घ इति भावः। अवरिष्ट-अवरीष्टेति। 'वृतो वा' इति सिच इटो दीर्घविकल्प इति भावः। दुधविथ-दुधोथेति। 'स्वरतिसूति-सूयतिधूदितः' इति वेडिति भावः।

शॄ हिंसायाम्। सेट्। ग्लि शशार। शॄ अतुस् इत्यत्र कित्त्वेऽपि 'ऋच्छत्यृताम्' इति नित्ये गुणे प्राप्ते आह—शॄदॄप्रामिति। गुणाऽपवादे पार्श्विके ह्रस्वे कृते ऋकारस्य

१४९० वृ वरणे । भरणे इत्येके । १४९१ भृ भर्त्सने । भरणेऽप्येके । १४९२ मृ हिंसायाम् । मृणाति । ममार । १४९३ दृ विदारणे । ददरतुः-दद्रतुः । ददुः । १४९४ जॄ वयोहानौ । झ इत्येके । धृ इत्यन्ये । १४९५ नॄ नये । १४९६ कॄ हिंसायाम् । १४९७ ऋ गतौ । ऋणाति । अराञ्चकार । अरिता—अरीता । आर्णात् । आर्णीताम् । ईर्यात् । आरीत् । आरिष्टाम् । १४९८ गॄ शब्दे । १४९९ ज्या वयोहानौ । 'ग्रहिज्या—' (सू २४१२) । २५५६ हलः ६।४।२॥ अङ्गावयवाद्धलः परं यत्सम्प्रसारणं तदन्ताङ्गस्य दीर्घः स्यात् । इति दीर्घे कृते । 'प्वादीनां ह्रस्वः' (सू २५५८) । जिनाति । जिज्यौ । जिज्यतुः । १५०० री गति-रेषणयोः । रेषणं वृकशब्दः । १५०१ ली श्लेषणे । 'विभाषा लीयतेः' (सू २५०९) इत्येजिधपये आत्वं वा । ललौ—लिलाय । लाता—लेता । १५०२ क्ली वरणे । क्लिनाति । १५०३ प्ली गतौ । प्लुत् । ल्वादयो वृत्ताः । प्वादयोऽशीत्येके । १५०४ व्री वरणे । १५०५ श्री भये । भरणे इत्येके । १५०६ क्षीष् हिंसायाम् । एषां चयाणां ह्रस्वः । क्षेपाञ्चिन्मते तु न । १५०७ ज्ञा अवबोधने । 'ज्ञाजनोर्जा' (सू २५११) जानाति । 'दीर्घनिर्देशसामर्थ्यान्न ह्रस्वः । १५०८ बन्ध बन्धने । बध्नाति । बबन्धिथ-बबन्द्ध । बन्द्धा । बन्द्धारौ । भन्त्स्यति ।

यणि रेफ इत्यर्थः । शशरिथ । पृधातुरपि शृधातुवत् । आशिषि पूर्वादिति । 'उदोष्ठ्यपूर्वस्य' इत्युत्त्वमिति भावः । दृ विदारणे । 'शृदप्राम्' इति ह्रस्वविकल्पं मत्वा आह—ददरतुः-दद्रतुरिति । ऋ गतौ । अराञ्चकारेति । व्यपदेशिवद्भावेन गुरुमत्त्वादाम् । लङ्याह—आर्णादिति । ज्या वयोहानौ । अनिट् । ज्या ना ति इति स्थिते 'ग्रहिज्या' इति सम्प्रसारणे पूर्वरूपे च जिनातीति स्थिते—हलः । दिर्योगे पञ्चम्येषा । हलः परस्येति लभ्यते । 'सम्प्रसारणस्य' इति सूत्रमनुवर्तते । अङ्गस्येत्यधिकृतमिहानुवृत्तमावर्तते । एकमवयवषष्ठ्यन्तं हल इत्यत्रान्वेति अङ्गावयवाद्धल इति लभ्यते । द्वितीयं तु स्थानषष्ठ्यन्तं सम्प्रसारणेन विशेष्यते । तदन्तविधिः । 'ह्रलोपे' इत्यतो दीर्घ इत्यनुवर्तते । तदाह—अङ्गावयवादित्यादिना । उदाहरणे तु-वीतः, शूनः, जीनः । हल इति किम् ? उक्तः उक्तवान् । अङ्गावयवात् किम् ? निरुक्तम् । तदन्ताङ्गस्येति किम् ? विध्यति । एषामिति व्रीश्रीक्षीपामित्यर्थः । ल्वादय एव वृत्ताः, न तु प्वादय इति मते इति भावः । ज्ञा अवबोधने । शिति जादेशं स्मारयति—ज्ञाजनोर्जेति । दीर्घनिर्देशेत । प्वादिष्वेऽपि आकारोच्चारणसामर्थ्यान्न ह्रस्व इति भावः । बन्ध बन्धने । अनिट् । नोपधः । बध्नातीति । 'अनिदिताम्' इति नलोप इति भावः । भारद्वाजनियमात्थलि वेडिति मत्वा आह—बबन्धिथ-बबन्द्धेति । अकित्त्वान्नलोपो न । अनिट्पक्षे तु 'झषस्तथोः'इति थस्य धः । बन्द्धेति । तासि 'झषस्तथोः' इति तकारस्य धः । भन्त्स्यतीति । 'एकाचः' इति

बधान । अभान्त्सीत् । 'पूर्वत्रासिद्धम्' (सू १२) इति भष्भावात्पूर्वं 'झलो झलि' (सू २२८१) इति सिज्लोपः । प्रत्ययलक्षणेन सादिप्रत्ययमाश्रित्य भष्भावो न । प्रत्ययलक्षणं प्रति सिज्लोपस्यासिद्धत्वात् । अबान्द्धाम् । अभान्त्सुः । १५०६ वृ सम्भक्तौ । वृणाति । वव्रे । वव्रषे । वव्रृढ्वे । वरिता—वरीता । अवरिष्ट—अवरीष्ट—अवृत । १५१० अन्थ विमोचनप्रतिहर्षयोः । इतः परस्मैपदिनः । अथ्नाति । 'अन्थिग्रन्थि—' इत्यादिना कित्त्वपक्षे एत्त्वाभ्यासलोपावप्यत्र वक्तव्यौ इति हरदत्तादयः । अेथतुः । अेथुः । इदं कित्त्वं पितामपीति सुधाकरमते, अेथिथ । अस्मिन्नपि पक्षे णलि शश्राथ । उत्तमे तु, शश्राय-शश्रथेति माधवः । तत्र मूलं मृग्यम् । १५११ मन्थ विलोडने । १५१२ ग्रन्थ १५१३ ग्रन्थ सन्दर्भे । अर्थभेदाच्छुन्ध्येः पुनः पाठः । रूपं तूक्तम् । १५१४ कुन्थ संश्लेषणे । संक्लेशे इत्येके । कुथ्नाति । चुकुन्थ । कुथ इति दुर्गः । चुकोथ । १५१५ मृद क्षोदे । मृद्नाति । मृदान । १५१६ मृड च । अयं सुखेऽपि । ष्टुत्वम् । मृड्णाति । १५१७ गुध रोषे । गुध्नाति । १५१८ कुष निष्कर्षे । कुष्णाति । कोषिता । २५६० निरः कुषः ७। २।४६॥ निरः परात्कुषो वलादेरार्धधातुकस्य इड्वा स्यात् । निष्कोषिता—निष्कोष्टा । निरकोषीत्—निरकुक्षत् । १५१९ क्षुभ सञ्चलने । 'क्षुभ्नादिषु च' (सू ७९२) । क्षुभ्नाति । क्षुभ्नीतः । क्षोभिता । क्षुभान । १५२० णभ १५२१ तुभ हिंसायाम् । नभ्नाति । तुभ्नाति । नभते । तोभते इति शपि । नभ्यति । तुभ्यति इति श्यनि । १५२२ क्लिशू विबाधने । 'शात्' (सू ११२) इति श्नुत्वनिषेधः । क्लिश्नाति । क्लेशिता—क्लेष्टा । अक्लेशीत्—अक्लिक्षत् । १५२३ अश भोजने ।

वस्य भष् । धस्य तत्वेन तः । बधानेति । 'हलः श्नः शानज्झौ' इति शानच् । अभान्त्सीदिति । हलन्तलक्षणा वृद्धिः । भष्भावः । अबान्द्धामित्यत्र सकारपरकत्वात् भष्भावमाशङ्क्य आह-पूर्वत्रेत्यादि । ननु कृते सिज्लोपे प्रत्ययलक्षणमाश्रित्य सकारपरकत्वात् भष् दुर्वार इत्यत आह—प्रत्ययलक्षणेनेति । अबान्द्धामिति । 'झषस्तथोः' इति तस्य धः । अन्थ विमोचने । अन्थिग्रन्थीत्यादिनेति । 'अन्थिग्रन्थिदम्भिस्वञ्जीनां लिटः कित्त्वं वा' इति व्याकरणान्तरेणेत्यर्थः । अस्मिन्नपि पक्षे इति । पितामपीदं कित्त्वमिति सुधाकरमतेऽपि प्रथमपुरुषणलि शश्राय । उत्तमपुरुषे णलि तु शश्राय शश्रथ इति माधवः आहेत्यर्थः । तत्र मूलमिति । 'कित्त्वपक्षे एत्त्वाभ्यासलोपा'वित्यारभ्य माधव इत्यन्तसन्दर्भं मूलं नास्तीत्यर्थः । संयुक्तहलमध्यस्थत्वादेर्वचिवार्तिकाऽदर्शनाच्चेति भावः । कुष निष्कर्षे । निरःकुषः । 'आर्द्धधातुकस्येड्वलादेः' इत्यनुवर्तते । 'स्वरतिसूति' इत्यतो वेति च । तदाह—निरःपरादिति । निरकुक्षदिति । इडभावपक्षे 'शल' इति क्स इति भा-

अश्नाति। आश। १५२४ उ ध्रस उञ्छे। उकार इत्। ध्रस्नाति। वकारो घात्ववयव इत्येके। उध्रसाद्यकार। १५२५ इष आभीक्ष्ण्ये। पौनःपुन्यं भृशार्थो वा आभीक्ष्ण्यम्। इष्णाति। 'तीषसह–' (सू २३४०) इत्यत्र सहिना साहचर्यादकारविकरणस्य तौदादिकस्यैव इषेर्ग्रहणं न तु इष्यतीष्णात्योरित्याहुः। एषिता। वस्तुतस्तु इष्णातेरपि इड्विकल्प उचितः। तथा च वार्तिकम्–'इषेस्तकारे श्यन्प्रत्ययात्प्रतिषेधः' (वा ४४३५) इति। १५२६ विष विप्रयोगे। विष्णाति। वेष्टा। १५२७ पुष १५२८ प्लुष स्नेहनसेवनपूरणेषु। पुष्णाति। प्लुष्णाति। १५२९ पुष पुष्टौ। पोषिता। १५३० मुष स्तेये। मोषिता। १५३१ खच भूतप्रादुर्भावे। भूतप्रादुर्भावोऽतिक्रान्तोत्पत्तिः। खच्चाति। वान्तोयमित्येके। २५६१ **च्छ्वोः शूडनुनासिके च ६।४।१९॥** सतुक्कस्य छ्वस्य च क्रमात् श् ऊठ् एतावादेशौ स्तोऽनुनासिके क्ङौ झलादौ च किति। खौनाति। चखाव। खविता। शानचः परत्वादूठि कृते हलन्तत्वाभावान्न शानच्। १५३२ हेठ च। ष्टुत्वम्। हेठ्णाति। १५३३ ग्रह उपादाने। स्वरितेत्। 'ग्रहिज्या–' (सू २४१२)। गृ-

---

वः। अश भोजने। आशेति। द्विहलत्वाऽभावान्न नुडिति भावः। इष आभीक्ष्ण्ये। तासि 'तीषसह' इति इड्विकल्पमाशङ्क्य आह—तीष सहेत्यत्रेति। सहेति शपा निर्देशबलेन भौवादिक एव सहधातुरत्र निर्दिष्टः। तत्साहचर्यात् तौदादिकस्यैव इषेर्ग्रहणम्, अकारविकरणत्वसामान्यादिति भावः। इषेस्तकारे श्यन्प्रत्ययादिति। श्यन् प्रत्ययो यस्मादिति बहुव्रीहिः। श्यन्विकरणपठितादिषेस्तकारे परे 'तीषसह' इति विधिर्नित्यर्थः। इष्णातेस्तकारे इड्विकल्पः फलित इति भावः। पुष पुष्टौ। आद्यो दीर्घोपधः। पुष पुष्टौ। पोषितेति। अनिट्सु श्यन्विकरणस्यैव पुषेर्ग्रहणादयं सेडिति भावः। 'पुषादिद्युतादीत्यत्र श्यन्विकरणपुषादेरेव ग्रहणादङ् न। खच भूतप्रादुर्भावे। अतिक्रान्तोत्पत्तिरिति। दशममासादौ उत्पत्तियोग्यस्य एकादशादिमासादिपूरुत्पत्तिरित्यर्थः। खच्चातीति। नस्य श्चुत्वेन ञ इति भावः। वान्तोऽयमिति। 'खव भूतप्रादुर्भावे' इत्येवं दन्त्योष्ठ्यान्तमेके पठन्तीत्यर्थः। च्छ्वोः शूडनुनासिके च। च्छ्व अनयोर्द्वन्द्वात् षष्ठीद्विवचनम्। छकारात्प्राक् तुकः श्चुत्वेन चकारस्य निर्देशः। 'शूठ्' इति च्छेदः। श् ऊठ् अनयोः समाहारद्वन्द्वात् प्रथमा। चकारेण क्ङिझलोः क्ङितीत्यनुवर्तते। तदाह—सतुक्कस्य इत्यादि। यथा विश्नः प्रश्नः, विच्छधातोः प्रच्छधातोश्च औणादिके नक्प्रत्यये अन्तरङ्गत्वात् 'छे च' इति तुकि कृते सति सतुक्कस्य छ्वस्य शकार आदेशः। वकारस्य ऊठमुदाहरति–खौनातीति। ख ना ति इति स्थिते वकारस्य ऊठ्, ठकार इत् 'एत्येधत्यूठ्सु' इति वृद्धिरिति भावः। खौनीतः। खौनन्तीत्यादि। खव् ना हि इति स्थिते 'हलः श्नःशानज्झौ' इति शानजादेशमाशङ्क्य आह—शानचः परत्वादिति। हेठ चेति। हेठधातुरपि

ह्वाति गृह्णीते। २५६२ ग्रहोऽलिटि दीर्घः ७।२।३७॥ एकाचो ग्रहेर्विहितस्येटो दीर्घः स्यान्न तु लिटि। ग्रहीता। लिटि तु जग्रहिथ। गृह्यात्। ग्रहीषीष्ट। 'ह्रयन्त' (सू २२६६) इति न वृद्धिः। अग्रहीष्टाम्। अग्रहीष्ट। अग्रहीषाताम्। अग्रहीषत। इति तिङन्ते क्रयादिप्रकरणम्।

अथ तिङन्ते चुरादिप्रकरणम् ॥ १० ॥

१५३४ चुर स्तेये। २५६३ सत्यापपाशरूपवीणातूलश्लोकसेनालोमत्वचवर्मवर्णचूर्णचुरादिभ्यो णिच् ३।१।२५॥ एभ्यो णिच् स्यात्। चू-

---

भूतप्रादुर्भावे वर्तते इत्यर्थः। ग्रह उपादाने इति। अदुपधः। स्वरितेत्त्वादुभयपदी। किति ङिति च सम्प्रसारणं स्मारयति—ग्रहिज्येति। गृह्णाति गृह्णीते इति। श्नाप्रत्ययस्य ङित्त्वाद्धेरस्य सम्प्रसारणे पूर्वरूपमिति भावः। णलि द्वित्वे कृते 'लिट्यभ्यासस्य' इति सम्प्रसारणे उरदत्वे रपरत्वे हलादिशेषे अभ्यासचुत्वे उपधावृद्धिः। जग्राह। अतुसादौ ङिति परत्वात् 'ग्रहिज्या' इति सम्प्रसारणे कृते द्वित्वादि। जगृहतुः। जगृहुः। जग्रहिथ। जगृहथुः। जगृह। जग्राह—जगृह। जगृहिव। जगृहिम। जगृहे। जगृहाते। जगृहिरे। जगृहिषे। जगृहाथे। जगृहिढ्वे—जगृहिध्वे। जगृहे। जगृहिवहे। जगृहिमहे। ग्रहोऽलिटि दीर्घः। 'ग्रह' इति दिग्योगे पञ्चमी। 'आर्धधातुकस्येट्' इत्यतः इडित्यनुवृत्तं षष्ठ्यन्तं विपरिणम्यते। 'एकाच उपदेशेऽनुदात्तात्' इत्यत एकाच इति च। तदाह—एकाच इत्यादि। एकाचः किम्? यङ्लुकि माभूत्। जाग्रहिता। विहितस्येति किम्? ग्राहितम्। णिलोपे कृते ग्रहधातोः परस्येऽपि विहितत्वाभावादिटो न दीर्घः। न च णिलोपस्य स्थानिवत्त्वात् न ग्रहधातोः पर इडिति वाच्यम्। दीर्घविधौ स्थानिवत्त्वनिषेधात्। अलिटि इत्यस्य फलमाह—लिटि तु जग्रहिथेति। गृह्यादिति। आशीर्लिङि यासुटः कित्त्वात्सम्प्रसारणमिति भावः। लिङस्तङ्याह—ग्रहीषीष्टेति। 'ग्रहोऽलिटी'ति दीर्घः। 'न लिङि' इति इटो दीर्घनिषेधस्तु न, तत्र 'वृत' इत्यनुवृत्तेः। अग्रहीष्टामिति। 'ग्रहोऽलिटि' इति दीर्घः। अग्रहीषुः। अग्रहीरित्यादि। लुङस्तङ्याह—अग्रहीष्टेति। 'ग्रहोऽलिटि' इति दीर्घः। अग्रहीषतेति। अग्रहीष्टाः इत्यादि सुगमम्। इति श्रीवासुदेवदीक्षितविदुषा विरचितायां सिद्धान्तकौमुदीव्याख्यायां बालमनोरमाख्यायां श्नाविकरणनिरूपणं समाप्तम्।

अथ स्वार्थिकणिजन्ताः चुरादिधातवो निरूप्यन्ते। चुर स्तेये इति। रेफादकार उच्चारणार्थः, न त्वित्संज्ञकः, प्रयोजनाऽभावात्, 'णिच्च' इति पदव्यवस्थाया वक्ष्यमाणत्वाच्च। एवमग्रेऽपि। सत्याप। सत्याप, पाश, रूप, वीणा, तूल, श्लोक, सेना, लोमन्, त्वच्, वर्मन्, वर्ण, चूर्ण, चुरादि एषां द्वन्द्वात्पञ्चमी। तदाह—एभ्यो णिच् स्यादिति।

र्णान्तेभ्यः 'प्रातिपदिकाद्धात्वर्थे–' (ग सू २०३) इत्येव सिद्धे तेषामिह ग्रहणं प्रपञ्चार्थम् । चुरादिभ्यस्तु स्वार्थे । 'पुगन्त–' (सू २१८६) इति गुणः । 'सनाद्यन्ताः–' (सू २३०४) इति धातुत्वम् । तिप्शबादि गुणायादेशौ । चोरयति ।

२५६४ णिश्चश्च १।३।७४॥

णिजन्तादात्मनेपदं स्यात्कर्तृगामिनि क्रियाफले । चोरयति–चोरयते । चोरयामास । चोरयिता । चोर्यात् । चोरयिषीष्ट । 'णिश्रि–' (सू २३११) इति चङ् । 'णौ चङि–' (सू २३१४) इति ह्रस्वः । द्वित्वम् । 'हलादिः शेषः' (सू २१७६) । 'दीर्घो लघोः' (सू २३१८) इत्यभ्यासदीर्घः । अचूचुरत्–अचूचुरत । १५३५ चिति स्मृत्याम् । चिन्तयति । अचिचिन्तत् । चिन्त इति पठितव्ये इदित्करणं णिचः पाक्षिकत्वे ज्ञापकम् । तेन चिन्त्यात्, चिन्त्य-

---

कल्पिबन्धर्थं इत्याकाङ्क्षायामाह–चूर्णान्तेभ्य इति । सत्यादिभ्यः चूर्णान्तेभ्यो द्वादशभ्यः करोत्याद्यर्थे 'प्रातिपदिकाद्धात्वर्थे बहुलम्' इति वक्ष्यमाणेन सिद्धमेवार्थनिर्देशनमित्यर्थः । ननु तेनैव सिद्धत्वादिह चूर्णान्तानुक्रमणं व्यर्थमित्यत आह–तेषामिह ग्रहणं प्रपञ्चार्थमिति । नच तेभ्यः स्वार्थे एव णिज्विधिरस्त्विति वाच्यम्, 'सत्यस्य तु कृञ्यापुक् निपात्यते । सत्यं करोति 'सत्यापयति' इत्यादि भाष्यविरोधादिति भावः । नामधातुप्रकरणे सत्यादिचूर्णान्तानामुदाहरणानि मूल एव स्फुटीभविष्यन्ति । चुरादिभ्यस्तु स्वार्थे इति । अर्थान्तरस्याऽनिर्दशादिति भावः । अत्र 'धातोरेकाचः' इत्यतो धातोरित्यनुवर्तते । चुरादिभ्यो धातुभ्यो णिजिति फलितम् । ततश्च णिच आर्द्धधातुकत्वं सिध्यति । अन्यथा धातोरिति विहितत्वाभावादार्धधातुकत्वं न स्यादिति बोध्यम् । तदाह–पुगन्तेति गुण इति । णिचि कृते चुर इ इति स्थिते णिव आर्द्धधातुकत्वात्तस्मिन् चकारादुकारस्य 'पुगन्तलघूपधस्य' इति गुण इत्यर्थः । णिचश्च । 'अनुदात्तङितः' इत्यत आत्मनेपदमिति 'स्वरितञितः' इत्यतः कर्त्रभिप्राये क्रियाफले इति चानुवर्तते । प्रत्ययग्रहणपरिभाषया णिजन्तादिति लभ्यते । तदाह–णिजन्तादित्यादिना । चोरयतीति । चोरयिष्यति । चोरयिष्यते । चोरयतु । चोरयताम् । अचोरयत् । अचोरयत । चोरयेत् । चोरयेत । आशीर्लिङि परस्मैपदे आह–चोर्यादिति । 'णेरनिटि' इति णिलोप इति भावः । आशीर्लिङि आत्मनेपदे आह–चोरयिषीष्टेति । लुङ्याह–णिश्रीत्यादि । दीर्घो लघोरिति । 'सन्वल्लघुनि' इति सन्वद्भावविषयत्वादिति भावः । चिति स्मृत्याम् । चिन्तयतीति । इदित्त्वान्नुमि णिजन्तात्लिङ उत्पत्तिरिति भावः । ननु इदित्करणं मास्तु प्रक्रियालाघवात् 'चिन्त स्मृत्याम्' इत्येवोच्यताम् । नच नलोपनिवृत्त्यर्थमिदित्त्वमिति वाच्यम् । चिन्तयति, चिन्तयांचकार इत्यादौ णिचः क्ङित्त्वाऽभावादेव नलोपस्याऽप्रसक्तेः । नच णिजभावे आशीर्लिङि चिन्त्यादिति कर्मलकारे यकि चिन्त्यते इत्यत्र च नलोपनिवृत्त्यर्थमिदित्त्वमिति शङ्क्यम् । चुरादिर्णिचो नित्यत्वेन णिचं विना केवलात् चिन्त्यात्, चिन्त्यते इति प्रयोगस्य शशश्-

त इत्यादौ नलोपो न। चिन्तति। चिन्तेत्। एतच्च ज्ञापकं सामान्यापेक्षमित्येके। 'अत एकहल्-' (सू २२६०) इत्यत्र वृत्तिकृता, जगाण। जगणतुः इत्युदाहृतत्वात्। विशेषापेक्षमित्यपरे। अत एव 'आ धृषाद्वा' (ग सू २०२) इत्यस्य न वैयर्थ्यम्। १५३६ यत्रि संकोचे। यन्त्रयति। यन्त्र इति पठितुं शक्यम्। यत्तु इदित्करणाद्यन्त्रतीति माधवेनोक्तं तच्चिन्त्यम्। एवं कुद्रितत्रिमत्रिषु। १५३७ स्फुडि परिहासे। स्फुण्डयति। इदित्करणात्स्फुण्डति। स्फुटि इति पाठान्तरम्। स्फुण्टयति। १५३८ लक्ष दर्शनाङ्कनयोः। १५३९ कुद्रि अनृतभाषणे। कुन्द्रयति। १५४० लड उपसेवायाम्। लाडयति। १५४१ मिदि स्नेहने। मिन्दयति-मिन्दति। १५४२ ओ लडि उत्क्षेपणे। ओलण्डयति-ओलण्डति। ओकार इदित्येके। लण्डयति-लण्डति। उकारादिरयमित्यन्ये। उलण्डयति। १५४३ लज अपवारणे। जल इत्येके। १५४४ पीड अवगाहने। पीडयति। २५६५ भ्राजभासभाषदीपजीवमीलपीडामन्यतरस्याम् ७।४।३॥ एषामुपधाया ह्रस्वो

क्ष्यमाणत्वादित्यत आह-चिन्तेत्यादि। तेनेति। पाक्षिकत्वेनेत्यर्थः। तथाच कदाचित् चिन्त्यात्, चिन्त्यते इति प्रयोगस्य सत्त्वात् तत्र नलोपनिवृत्त्यर्थमिदित्करणमिति भावः। ननु तथापि यत्र नलोपप्रसक्तिस्तत्रैव चिन्त्यात्, चिन्त्यते इत्यत्र णिज्विकल्पः स्यात् ननु चिन्तयतीत्यादौ, शपा व्यवधानेन तत्र नलोपस्याप्रसक्तेरित्याशङ्क्य ज्ञापकमिदं चिन्तधातुसामान्यापेक्षमित्यभिप्रेत्योदाहरति-चिन्तति। चिन्तेदिति। ज्ञापकमिदं चुरादित्वसामान्यापेक्षमिति मतान्तरमाह-एतच्चेति। ज्ञापकस्य चुरादित्वसामान्यापेक्षत्वे वृद्धसम्मतिमाह-अत एकेति। ज्ञापकस्य चिन्तिधातुमात्रविषयकत्वे गणधातोः चौरादिकस्य जगणतुरित्युदाहरणानुपपत्तिः स्पष्टेवेति भावः। विशेषापेक्षमिति। चिन्तिधातुमात्रविषयमित्यर्थः। इदमेव मतं युक्तमित्याह-अत एवेति। सर्वस्यापि चुरादेर्णिज्विकल्पे सति 'आ धृषाद्वा' इति कतिपयचुराद्यन्तगणपठितानां णिज्विकल्पविधैवैयर्थ्यमिति भावः। यत्रि सङ्कोचे। यन्त्रयतीति। अकारस्य उपधात्वाऽभावान्न वृद्धिः। अयन्त्रदिति। अकारस्य गुरुत्वाद्लघुत्वाल्लघुपरकत्वाऽभावात् सन्वद्भावाऽभावात् ह्रस्वदीर्घौ न। एवमग्रेऽपि संयोगान्तधातूनां ज्ञेयम्। पठितुं शक्यमिति। नलोपाऽभावस्तु इदित्त्वस्य न फलम्, नकारस्य उपधात्वाऽभावादेव नलोपस्याप्रसक्तेरिति भावः। तच्चिन्त्यमिति। यन्त्रयात् इत्यणिजन्ते सत्यपि नकारस्य अनुपधात्वादेव लोपाऽप्रसक्त्या इदित्त्वस्य प्रयोजनाऽभावादिति भावः। एवं 'कुद्रि अनृतभाषणे' 'तत्रि कुटुम्बधारणे' 'मत्रि गुप्तभाषणे' इति चुरादौ पठिष्यमाणेष्वपि इदित्वं त्यक्तुं शक्यमित्यर्थः। लड उपसेवायाम्। लाडयतीति। णिचि अत उपधावृद्धिः। एवमग्रेऽपि ज्ञेयम्। अलीलडत्। पीड अवगाहने। भ्राजभास। 'णौ चङ्युपधाया ह्रस्वः' इत्यनुव-

वा स्याच्चङ्परे णौ । अपीपिडत्-अपिपीडत् । १५४५ नट अवस्पन्दने । अवस्पन्दनं नाटयम् । १५४६ अथ प्रयत्ने । प्रस्थाने इत्येके । १५४७ बध संयमने । बाधयति । बन्ध इति चान्द्रः । १५४८ पॄ पूरणे । पारयति । दीर्घोच्चारणं णिचः पाक्षिकत्वे लिङ्गम् । तद्धि सेट्कत्वाय । एवंच पृणातिपिपर्तिभ्यां, परिता, परीता इत्यादिसिद्धावपि, परति-परतः इत्यादिसिद्धिः फलम् । १५४९ ऊर्ज बलप्राणनयोः । १५५० पत्ल परिग्रहे । १५५१ वर्ण १५५२ चूर्ण प्रेरणे । वर्ण वर्णने इत्येके । १५५३ अथ प्रख्याने । प्राथयति । 'नान्ये मितोऽहेतौ' इति वक्ष्यमाण-

---

तंते । तदाह—एषामिति । नित्ये उपधाह्रस्वे प्राप्ते विकल्पोऽयम् । ह्रस्वपक्षे लघुपरकत्वात्सन्वत्वाद्भ्यासदीर्घ इत्यभिप्रेत्य आह—अपीपिडदिति । अत्र उत्तरखण्डे ह्रस्वः, पूर्वखण्डे तु दीर्घः । ह्रस्वाभावपक्षे तु लघुपरकत्वाऽभावात् सन्वत्वविरहान्नाऽभ्यासदीर्घ इति मत्वा आह—अपिपीडदिति । अत्र उत्तरखण्डे दीर्घः पूर्वखण्डे ह्रस्वः । नट अवस्पन्दने इति । अवस्पन्दनं नाटयम् । नाटयति । अनीनटत् । अथ प्रयत्ने । आथयति । अशिश्रथत् । सन्वत्कविधौ अनेकहल्व्यवधानेऽपि लघुपरत्वं न विरुध्यते, 'अस्मृदृत्वर' इति ह्रस्वापवादस्य अत्वस्य विधानाल्लिङ्गात् । अन्यथा 'अपप्रथ'दित्यादौ अनेकहल्व्यवधानात् लघुपरत्वाऽभावादेव ह्रस्वाऽप्रसक्त्या किं तेन । पॄ पूरणे । ननु ह्रस्वान्त एवायं धातुर्निदश्यताम् । तावतैव पारयतीत्यादिसिद्धेः । न च णिजभावपक्षे परिता परिष्यतीत्यत्र इडर्थं दीर्घोच्चारणम् , ऋदन्तत्वे अनिट्कत्वाप्रसङ्गादिति वाच्यम् , चुरादिणिचो नित्यत्वेन ततो णिजभावस्य शशश्वदायमाणत्वदित्यत आह—दीर्घोच्चारणं णिचः पाक्षिकत्वे लिङ्गमिति । 'पृधातो'रिति शेषः । णिचः पाक्षिकत्वे तु परितेत्यादौ पर्तेत्यादिवारणाय दीर्घोच्चारणमर्थवदिति भावः । ननु ह्रस्वान्तत्वेऽपि परितेत्यादौ इट कुतो न स्यादित्यत आह—तद्धि सेट्कत्वायेति । हि यतः तत् दीर्घोच्चारणं परितेत्यादौ सेट्कत्वार्थम् ऋदन्तत्वे तु इण्न स्यात् , 'ऊदृदन्तैः' इत्यनि कारिकासु ऋदन्तस्य पर्युदासेन ऋदन्तस्याऽनिट्कत्वावगमादिति भावः । ननु पृधातोः णिचः पाक्षिकत्वज्ञापकस्य किं फलम् । श्नाविकरणश्नुविकरणपठिताभ्यामेव पृधातुभ्यां परितेत्यादिसिद्धेरित्यत आह—एवं चेति । उक्तरीत्या पृधातोः णिचः पाक्षिकत्वे ज्ञापिते सतीत्यर्थः । पारयति । परतीति । 'उदोष्ठ्यपूर्वस्य' इत्युत्वं तु न भवति, पराभ्यां गुणवृद्धिभ्यां बाधादिति भावः । ऊर्ज बलेति । 'सन्वल्लघुनि' इति सूत्रं द्वेधा व्याख्यातं प्राक् । तत्र चङि 'न द्व्याः' इति निषेधात् , 'जि' इति णिजन्तस्य द्वित्वे उत्तरखण्डे चङ्परे णौ लघोरभावात् प्रथमव्याख्याने अभ्यासस्य तथाविधलघुपरकत्वविरहात् सन्वत्वविरहाच्चाऽभ्यासदीर्घः, और्जिजत् । द्वितीयव्याख्याने तु चङ्परे णौ यदूर्ज ऊर्ज इत्येतत् तदीयस्याभ्यासस्य चङमादाय वा णिचं लुप्तमादाय वा लघुपरकत्वादभ्यासस्य दीर्घः, और्जीजत् । एवमेव एवञ्जातीयकेषु द्रष्टव्यम् । प्र

स्वान्नास्य मित्त्वम् । २५६६ अत्स्मृदृत्वरप्रथम्रदस्तृस्पशाम् ७।४।६५॥ एषामभ्यासस्याकारोऽन्तादेशः स्याच्चङ्परे णौ । इत्वापवादः । अपप्रथत् । १५५४ पृथ प्रक्षेपे । पर्थयति । २५६७ उर्ऋत् ७।४।७॥ उपधाया ऋवर्णस्य स्थाने ऋकारस्याद्वा चङ्परे णौ । इररामपवादः । अमीमृथत्-अपपर्थत् । पथ इत्येके । पाथयति । १५५५ षम्ब सम्बन्धने । सम्बयति । असस्म्बत् । १५५६ शम्ब च । अशशम्बत् । साम्ब इत्येके । १५५७ भक्ष अदने १५५८ कुट्ट छेदनभर्त्सनयोः । पूरणे इत्येके । कुट्टयति । १५५९ पुट्ट १५६० चुट्ट अल्पीभावे । १५६१ अट्ट १५६२ घुट्ट अनादरे । अट्टयति । अयं दोपधः । ष्टुत्वस्यासिद्धत्वात् 'नन्द्राः—' (सू २४४६) इति निषेधः । आट्टिटत् । १५६३ लुण्ठ स्तेये । लुण्ठयति । लुण्ठति इति 'लुठि स्तेये' इति भौवादिकस्य । १५६४ शठ १५६५ श्वठ असंस्कारगत्योः ।

प्रख्याने । प्रथयतीति । णिचि उपधावृद्धिरिति भावः । नन्वस्य घटादिकत्वेन मित्त्वादूध्रस्वः स्यादित्यत आह—नान्ये इति । ज्ञपादिपञ्चकव्यतिरिक्तचुरादिषु मित्त्वनिषेधादिति भावः । घटादिकस्य तु मित्त्वाङ्गुमण्णिचि 'प्रथयर्ता'त्येव भवति । न च चौरादिकस्यैव मित्त्वार्थं घटादावनुवादः किं न स्यादिति वाच्यम् , नान्ये मितोऽहेतौ' इति निषेधादित्यलम् । अत्स्मृ । अभ्यासस्येति । 'अत्रलोपोऽभ्यासस्य' इत्यतस्तदनुवृत्तेरिति भावः । चङ्परे णाविति । 'सन्वल्लघुनि' इत्यतः चङ्परे इत्यनुवर्तते । चङ्परो यस्मादिति बहुव्रीहिः अन्यपदार्थस्त्वर्थाण्णिरेवेति भावः । इत्वेति । 'सन्यतः' इति इत्वस्यापवाद इत्यर्थः । अपप्रथदिति । अत्र अत्त्वविधानादेव सन्वत्त्वविधौ अनेकहल्व्यवधानेऽपि लघुपरकत्वमिति विज्ञायते । अन्यथा येन नाव्यवधानन्यायात् एकहल्व्यवधानस्यैवाश्रयात् अत्र सन्वत्त्वविरहादेव इत्त्वाऽप्रवृत्त्या किं तेन । संयोगे परे गुरुत्वान्नाभ्यासदीर्घः । पृथ प्रक्षेपे । ऋदुपधः । पृथयतीति । णिचि लघूपधगुणः । रपरत्वम् । उर्ऋत । 'ऋ' इत्यस्य 'उ'रितिषष्ठ्यन्तं रूपम् । 'णौ चङ्युपधायाः' इत्यनुवर्तते । 'जिघ्रतेर्वा' इत्यतो वेति । तदाह—उपधाया इति । ननु ऋकारस्य ऋकारविधिर्व्यर्थ इत्यत आह—इररामपवाद इति । 'कृत संशब्दने' । 'अचीकृतत्' इत्यादौ 'उपधायाश्च' इति इत्वे रपरत्वे इर् प्राप्तः, 'अमीमृज'दित्यत्र तु 'मृजेर्वृद्धिः' इत्यार् प्राप्तः । प्रकृतपृथधातौ तु चङि जिल्लोपे प्रत्ययलक्षणेन णिचमाश्रित्य लघूपधगुणे रपरत्वे अर् प्राप्तः, तेषामपवाद इत्यर्थः । अपीपृथदिति । णिचमाश्रित्य प्राप्तं गुणं बाधित्वा ऋकारे, द्वित्वे, उरदत्वे, हलादिशेषे, सन्वत्त्वादित्त्वे, दीर्घे, रूपमिति भावः । अपपर्थदिति । ऋत्वाऽभावपक्षे 'द्विर्वचनेऽची'ति निषेधात् गुणात्प्राक् द्वित्वे उरदत्वे हलादिशेषे ऋकारस्य णिचमाश्रित्य गुणे रपरत्वे अपपर्थदित्यत्र लघुपरकत्वाऽभावेन सन्वत्त्वविरहादित्त्वदीर्घौ नेति भावः । अट्ट पुट्ट अनादरे । अयं दोपध इति । अट्टधातुरित्यर्थः । दकारस्य ष्टुत्वजश्त्वाभ्यां निदश इति भावः । दोप-

श्वठि इत्येके। १५६६ तुजि १५६७ पिजि हिंसाबलादाननिकेतनेषु। तुञ्जयति। पिञ्जयति। इदित्करणात् तुञ्जति। पिञ्जति। तुज पिज इति केचित्। लुजि लुञ्जि इत्येके। १५६८ पिस गतौ। पेसयति। पेसति इति तु शपि गतम्। १५६९ पान्त्व सामप्रयोगे। १५७० श्वल्क १५७१ वल्क परिभाषणे। १५७२ ष्णिह स्नेहने। स्फिट इत्येके। १५७३ स्मिट अनादरे। अषोपदेशत्वान्न षः। असिस्मिटत्। ष्मिङ् अनादरे इत्येके। ङित्त्वस्यावयवेऽचरितार्थत्वाण्णिजन्तात्तङ्। स्माययते। १५७४ श्लिष श्लेषणे। १५७५ पथि गतौ। पन्थयति-पन्थति। १५७६ पिच्छ कुट्टने। १५७७ छुदि संवरणे। छुन्दयति-छुन्दति। १५७८ श्रण दाने। प्रायेणायं विपूर्वः। विश्राणयति। १५७९ तड आघाते। ताडयति। १५८० खड १५८१ खडि १५८२ कडि भेदने। खाडयति। खण्डयति। कण्डयति। १५८३ कुडि रक्षणे। १५८४ गुडि वेष्टने। रक्षणे इत्येके। कुठि इत्यन्ये। अवकुण्ठयति-अवकुण्ठति। गुठि इत्यपरे। १५८५ खुडि खण्डने। १५८६ वटि विभाजने। वडि इत्येके। १५८७ मडि भूषायां हर्षे च। १५८८ भडि कल्याणे। १५८९ छर्द वमने। १५९० पुस्त १५९१ बुस्त आदरानादरयोः। १५९२ चुद संचोदने। १५९३ नक्क १५९४ धक्क नाशने। णोपदेशलक्षणे पर्युदस्तोऽयम्। प्रनक्कयति। १५९५ चक्क १५९६ चुक्क व्यथने। १५९७ क्षल शौचकर्मणि। १५९८ तल प्रतिष्ठायाम्। १५९९ तुल उन्माने। तोलयति। अतूतुलत्। कथं तुलयति तुलना इत्यादि। 'अतुलोपमाभ्यां' (सू ६३०) इति निपातनादा-

---

धत्वस्य प्रयोजनमाह—ष्टुत्वस्येति। तथा च दकारं विहाय टि इत्यस्य द्वित्वे आदूटितत् इति स्थिते दस्य ष्टुत्वे चत्वें च 'आट्टितत्' इति रूपमिष्टं सिध्यति। स्वाभाविकटोपधत्वे तु 'न न्द्राः' इति निषेधाऽभावात् टकारद्वयसहितस्य णयन्तस्य द्वित्वे हलादिशेषेणाऽभ्यासे प्रथमटकारस्य अनिवृत्तौ आट्टिट्दिति अनिष्टं रूपं स्यादिति भावः। ष्मिङ् अनादरे। ननु 'णिचश्चे'त्यात्मनेपदसिद्धेः किमर्थं ङित्करणमित्यत आह-णिजन्तात्तङिति। तङेवेत्यर्थः। अकर्त्रभिप्रायेऽपि फले णिजन्तादात्मनेपदार्थं ङित्करणमिति यावत्। ननु कृतेऽपि ङित्करणे णिजन्तस्य ङित्त्वाभावात् कथमुक्तप्रयोजनलाभ इत्यत आह—ङित्त्वस्य अवयवे चरितार्थत्वादिति। णयन्तावयवे ष्मिङ्धातो ङित्त्व व्यर्थम्, तस्य णिचं विना प्रयोगाऽभावात्। ततश्चाऽवयवे श्रुतं ङित्त्वं णयन्तादेव कार्यं साधयतीत्यर्थः। स्माययते इति। णिचि वृद्धौ आयादेशे स्मायि इति णयन्तात्लटस्तिपि शपि गुणाऽयादेशाविति भावः। असिष्मयत। तुल उन्माने। कथमिति। लघूपधगुणप्रसङ्गादिति भावः। तुलनेति। 'ण्यासश्रन्थो युच्' इति भावः। स-

दन्तस्य तुलाशब्दस्य सिद्धौ ततो णिच् । १५९९ दुल उत्क्षेपे । १६०१ पुल महत्त्वे । १६०२ चुल समुच्छ्राये । १६०३ मूल रोहणे । १६०४ कल १६०५ बिल क्षेपे । १६०६ बिल भेदने । १६०७ तिल स्नेहने । १६०८ चल भृतौ । १६०९ पाल रक्षणे । १६१० लूष हिंसायाम् । १६११ शुल्क माने । १६१२ शूर्प च । १६१३ चुट छेदने । १६१४ मुट संचूर्णने । १६१५ पडि १६१६ पसि नाशने । पण्डयति–पण्डति । पंसयति–पंसति । १६१७ व्रज १६१८ मार्ग संस्कारगत्योः । १६१९ शुल्क अतिस्पर्शने । १६२० चपि गत्याम् । चम्पयति–चम्पति । १६२१ क्षपि क्षान्त्याम् । क्षम्पयति–क्षम्पति । १६२२ छुजि कुच्छुजीवने । १६२३ श्वर्त गत्याम् । १६२४ श्वभ्र च । १६२५ ज्ञप मिच्च । अयं ज्ञाने ज्ञापने च वर्तते । २५६८ मितां ह्रस्वः ६।४।९२॥ मितामुपधाया ह्रस्वः स्याण्णौ परे । ज्ञपयति । १६२६ यम च परिवेषणे । चान्मित् । परिवेषणमिह वेष्टनम् । न तु भोजना, नापि वेष्टना । यमयति चन्द्रम् । परिवे-

---

माचष्टे—अतुलोपमाभ्यामिति । आदन्तस्येति । तुलधातोर्ण्यन्तात्पचाद्यचि निपातनात् गुणाभावे स्त्रीत्वे तुलाशब्दः आदन्तः । ततः 'तत्करोति तदाचष्टे' इति णिचि इष्टवत्त्वात् टिलोपे तुलि इति ण्यन्तात्लटस्तिपि युचि च 'तुलयती'ति 'तुलने'ति च रूपम् । आकारलोपस्य 'अचः परस्मिन्' इति स्थानिवत्त्वान्न गुण इति भावः । व्रज मार्गेति । व्राजयति । मार्गयति । यद्वा मार्गति न धात्वन्तरम् । व्रजधातुर्मार्गसंस्कारे गतौ चेत्यर्थः । ज्ञप मिच्चेति । ज्ञपधातुर्णिचं लभते, मित्संज्ञश्चेत्यर्थः । मित्त्वकार्यभागिति वा । धातुपाठे अर्थनिर्देशाऽभावादाह—अयमिति । 'प्रच्छ ज्ञीप्सायाम्'मित्यत्र ज्ञाने 'इलाव ज्ञुङ्स्थाशपां ज्ञीस्यमानः' इत्यत्र ज्ञापने च प्रयोगदर्शनादिति भावः । मितां ह्रस्वः । 'ऊदुपधाया गोहः' इत्यतः उपधाया इति 'दोषो णौ' इत्यतः णाविति चानुवर्तते । तदाह—मितामुपधाया इत्यादिना । ज्ञपयतीति । णिचि उपधावृद्धौ ह्रस्व इति भावः । यम च परिवेषणे । चान्मिदिति । इति अनुकृष्यते इति शेषः । यमधातुः परिवेषणे णिचं लभते, मित्कार्यभाक् चेत्यर्थः । मित्संज्ञक इति वा । परिवेषणमिह वेष्टनमिति । 'परिवेषस्तु परिधिः' इति कोशादिति भावः । न तु भोजनमिति । भुजेर्हेतुमण्ण्यन्तात् स्त्रियामित्यधिकारे 'ण्यासश्रन्थो युच्' क्लीबत्वं स्त्रीकात् । 'भोजने'त्येव क्वचित्पाठः । भोक्तुः पात्रे भोज्यद्रव्योपकल्पनमिह न परिवेषणमित्यर्थः । भोजनार्थां यमेर्हेतुमण्ण्यन्तस्य अमन्तत्वादेव मित्त्वसिद्धेरिति भावः । परिवेष्टत इत्यर्थ इति । अनेन इह परिविषेरण्यन्तात्ल्युटि परिवेषणशब्द इति सूचितम् । न च वेष्टनेऽप्यर्थे यमेरमन्तत्वादेव सिद्धे मित्त्वविधिर्व्यर्थ इति वाच्यम् । 'न कम्यमिचमाम्' इति मित्त्वप्रतिषेधप्रकरणस्थे 'यमोऽपरिवेषणे' इति घटाद्यन्तर्गणसूत्रे अपरिवेषणे

ष्टत इत्यर्थः। १६२७ चह परिकल्पने। चहयति। अचीचहत्। कथादौ वक्ष्यमाणस्य तु अदन्तत्वेनाग्लोपित्वाद्दीर्घसन्वद्भावो न। अचचहत। चप इत्येके। चपयति। १६२८ रह त्यागे इत्येके। अरीरहत्। कथादेस्तु अररहत्। १५२९ बल प्राणने। बलयति। १६३० चिस्फुर् चयने। २५६९ **चिस्फुरोर्णौ ६।१।५४॥** आत्वं वा स्यात्। २५७० **अर्तिह्वीब्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ ७।३।३६॥** एषां पुक् स्याण्णौ। चपयति—चययति। णित्करणसामर्थ्यादस्य णिज्विकल्पः। चयते। प्रणिचयति-प्रनिचयति। 'नान्ये मितोऽ-

---

इति पर्युदासेन भोजनतोऽन्यत्र वेष्टनेऽर्थे मित्त्वनिषेधस्य प्राप्तौ मित्त्वप्रापणार्थत्वात् 'यमोऽपरिवेषणे' इत्यत्र परिवेषणशब्देन भोजनाया एव विवक्षितत्वेन वेष्टने यमेर्मित्त्वनिषेधस्य प्रसङ्गात्। अत एव 'यमिर्भोजनातोऽन्यत्र न मि'इति व्याख्यातं मूलकृता। भोजनायां तु 'यमोऽपरिवेषणे' इति मित्त्वनिषेधविधौ भोजनायाः पर्युदासादेव तत्र मित्त्वनिषेधाऽभावादमन्तत्वादेव मित्त्वप्राप्तेरिह चुरादौ परिवेषणशब्देन वेष्टनमेव विवक्षितं नतु भोजनेत्यास्तां तावत्। चह परिकल्पने इति। इत आरभ्य 'चिस्फुर् चयने' इत्येतत्पर्यन्तं चेत्यनुवर्तते। अतस्तेषां मित्त्वात् णिचि ह्रस्वः। तदाह—चहयतीति। नन्वनेनैव सिद्धे अग्रे चुरादावन्तर्गणे कथादावस्य पाठो व्यर्थ इत्यत आह—कथादाविति। 'कथादयः अदन्ता' इति वक्ष्यते। तस्माण्णिचि अङ्लोपे चहयतीत्यादौ अङ्लोपस्य स्थानिवत्त्वादुपधाह्रस्वे च न विशेषः। तथापि अदन्तात् चङि णौ अङ्लोपे सति अग्लोपितया सन्वत्त्वदीर्घयोरभावे 'अचचह'इति रूपमस्ति फलमित्यर्थः। चप इत्येके इति। 'चह परिकल्पने' इत्यस्य स्थाने 'चप' इत्येके पठन्तीत्यर्थः। 'रह त्यागे' इत्येके इत्यपि तथैव व्याख्येयम्। एवञ्च ज्ञपादिषु पञ्चसु चहधातुः चपधातुः रहधातुर्वा अन्यतमस्तृतीयः, बलधातुश्चतुर्थः, चिस्फुरधातुः पञ्चमः, इति कृत्वा ज्ञपादिपञ्चानां मतत्रयेऽपि पञ्चत्वात् ज्ञपादिपञ्चकत्वस्य न विरोधः। 'रह त्यागे' इत्यस्यापि कथादिपाठफलमाह—कथादेस्तु अररहदिति। अदन्तत्वेन अग्लोपित्वाच्च दीर्घसन्वत्त्वे इति भावः। बल प्राणने। च इत्यनुवृत्त्या मित्त्वस्यानुकर्षणादुपधाह्रस्वं मत्वा आह—बलयतीति। चिस्फुरोर्णौ। 'आदेच उपदेशे' इत्यतः आदिति 'विभाषा लीयतेः' इत्यतः विभाषेति चानुवर्तते इति मत्वा शेषं पूरयति—आत्वं वा स्यादिति। चिस्फो णिचि आत्वे चोपधाह्रस्वे च इति स्थिते—अतिह्वी। अर्ति ह्वी ह्लीरी क्नूयी क्ष्मायी आत् एषां द्वन्द्वात् षष्ठी। 'पुक् णौ' इति छेदः। तदाह—एषां पुक् स्याण्णौ इति। पुकि ककार इत्, उकार उच्चारणार्थः किरवादन्तावयवः। चाप् ह इति स्थिते चेत्यनुवर्त्य मित्त्वस्यानुकर्षणेन मित्त्वादुपधाह्रस्वे चपि इत्यस्मात्तिबादौ परिनिष्ठितमाह—चपयतीति। आत्वाऽभावपक्षे त्वाह—चययतीति। चेर्णिचि वृद्धौ आयादेशे मित्त्वादुपधाह्रस्व इति भावः। ननु चिस्फोधातोरिह मित्करणं व्यर्थम्, ण्यन्तात् 'णिच-

हेतौ' (ग सू १९८) अहेतौ स्वार्थे णिचि शपादिभ्योऽन्ये मितो न स्युः । तेन शमादीनाममन्तत्वप्रयुक्तं मित्त्वं न । १६३१ घट्ट चलने । १६३२ मुस्त सङ्घाते । १६३३ खट्ट संवरणे । १६३४ षट्ट १६३५ स्फिट्ट १६३६ चुबि हिंसायाम् । १६३७ पुल संघाते । पूर्ण इत्येके । पुण इत्यन्ये । १६३८ पुंस अभिवर्धने । १६३९ टकि बन्धने । टङ्कयति–टङ्कति । १६४० धूस कान्तिकरणे । धूसयति । दन्त्यान्तः । मूर्धन्यान्त इत्येके । तालव्यान्तः इत्यपरे । १६४१ कीट वर्णे । १६४२ चूर्ण संकोचने । १६४३ पूज पूजायाम् । १६४४ अर्क स्तवने । तपने इत्येके । १६४५ शुठ आलस्ये । १६४६ शुठि शोषणे । शुण्ठयति–शुण्ठति । १६४७ जुड प्रेरणे । १६४८ गज १६४९ मार्ज शब्दार्थौ । गाजयति । मार्जयति । १६५० मर्च च । मर्चयति । १६५१ घृ प्रस्रवणे । स्रावणे इत्येके । १६५२ पचि विस्तारवचने । पञ्चयति । पञ्चते इति व्यक्तार्थस्य शपि गतम् । १६५३ तिज निशाने । तेजयति । १६५४ कृत संशब्दने । २५५१ उपधायाश्च ७।१।१०१॥ धातोरुपधाभूतस्य ऋत इत्स्यात् । रपरत्वम् । 'उपधायां च' (सू २२६५) इति दीर्घः । कीर्तयति । 'ऊर्कृत' (सू २५६७) अचीकृतत–अचिकीर्तत् । १६५५ वर्ध

र्च'इत्येव उभयपदसिद्धेः । चौरादिकस्यास्य नित्यं ण्यन्तत्वेन चयति चयते इति केवलस्याण्यन्तस्य शशश्वङ्कायमाणत्वादित्यत आह—ञित्करणसामर्थ्यादिति । एवञ्च णिजभावपक्षे उभयपदार्थमिह ञित्करणमर्थवदिति भावः । 'शेषे विभाषाऽकखादौ' इति णत्वविकल्पं मत्वा आह—प्रणिचयति प्रनिचयति इति । 'नान्ये मितोऽहेतौ' इति चुरादिगणसूत्रम् । अहेताविति च्छेदः । 'हेतुमति च' इति सूत्रेण विहितो णिच् हेतुशब्देन विवक्षितः । स न भवतीत्यहेतुः स्वार्थेणिच । तस्मिन्परे इति लभ्यते । किमपेक्षया अन्ये इत्याकाङ्क्षायां इतः प्राक् पठितञ्जपादिचिञन्तेभ्य इति लभ्यते तदाह—अहेतौ स्वार्थे णिचीत्यादिना । अहेतावित्यस्य व्याख्यानं स्वार्थे णिचीति । तेनेति । ञपादिचिञन्तव्यतिरिक्तचुरादीनां मित्त्वनिषेधेनेत्यर्थः । शमादीनामिति । 'शम आलोचने' 'अम रोगे' इत्यादीनामग्रे चुरादौ पठिष्यमाणानामित्यर्थः । अमन्तत्वेति । 'जनीजृष्कनसुरञ्जोऽमन्ताश्च' इत्यमन्तत्वनिमित्तकमित्यर्थः । कृत संशब्दने । उपधायाश्च । 'ऋत इद्धातोः' इत्यनुवर्तते । तदाह—धातोरित्यादिना । चङि 'ऊर्कृत्' इत्युपधाया ऋत्त्वपक्षे आह—अचीकृतदिति । उपधाया ऋत्त्वे कृत इत्यस्य द्वित्वे उरदृत्वे लघुपरतया सन्वत्त्वादित्वे 'दीर्घो लघोः' इति दीर्घ इति भावः । ऋत्वाभावपक्षे आह—अचिकीर्तदिति । ऋत इत्त्वे रपरत्वे 'उपधायां च' इति दीर्घे कीर्त् इत्यस्य द्वित्वे हलादिशेषे अभ्यासहृस्वे कुत्वमिति भावः । लघुपरकत्वाभावेन सन्वद्भावविषयत्वाऽभावान्नाभ्यासदीर्घः ।

छेदनपूरणयोः। १६५६ कुबि आच्छादने। कुम्बयति। कुभि इत्येके। १६५७ तुबि १६५८ तुवि अदर्शने। अर्दने इत्येके। १६५९ पह्व व्यक्तायां वाचि। क्रर इत्येके। १६६० चुटि छेदने। १६६१ इल प्रेरणे। एलयति। एलिलत्। १६६२ म्रक्ष म्लेच्छने। १६६३ म्लेच्छ अव्यक्तायां वाचि। १६६४ मृ १६६५ वहँ हिंसायाम्। केचिदिह गर्ज गर्द शब्दे, गर्ध अभिकाङ्क्षायाम्, इति पठन्ति। १६६६ गुर्द पूर्तिनिवेतने। १६६७ जसि रक्षणे। मोक्षणे इति केचित्। जंसयति–जंसति। १६६८ ईड स्तुतौ। १६६९ जसु हिंसायाम्। १६७० पिडि सङ्घाते। १६७१ रुष रोषे। रुट इत्येके। १६७२ डिप क्षेपे। १६७३ ष्टुप समुच्छ्राये।

आ कुस्मादात्मनेपदिनः। 'कुस्मनाम्नो वा' इति वक्ष्यते। तमभिव्याप्येत्यर्थः। अकर्तृगामिफलार्थमिदम्। १६७४ चित सञ्चेतने। चेतयते। अचीचितत। १६७५ दशि दंशने। दंशयते। अददंशत। इदित्त्वाण्णिजभावे दंशति। आकुस्मीयमात्मनेपदं णिच्सन्नियोगेनैवेति व्याख्यातारः। नलोपे सञ्जिसाहचर्याद् म्वादेरेव ग्रहणम्। १६७६ दसि दर्शनदंशनयोः। दंसयते-दसति। दस इत्यप्येके। १६७७ डप १६७८ डिप सङ्घाते। १६७९ तत्रि कुटुम्बधारणे। तन्त्रयते। चान्द्रास्तु धातुद्वयमिति मत्वा कुटुम्बयते इत्युदाहरन्ति। १६८० मन्त्रि गुप्तपरिभाषणे। १६८१ स्पश ग्रहणसंश्लेषणयोः। १६८२ तर्ज १६८३ भर्त्स तर्जने। १६८४ बस्त १६८५ गन्ध अर्दने। बस्तयते गन्धयते। १६८६ विष्क हिंसायाम्। हिष्क इत्येके। १६८७ निष्क परिमाणे। १६८८ लल ईप्सायाम्। १६८९ कुण सङ्कोचे, १६९० तूण पूरणे। १६९१ भूण आशाविशंकयोः। १६९२ शठ श्लाघायाम्। १६९३ यक्ष पूजायाम्। १६९४ स्यम वितर्के। १६९५ गूर उद्यमन। १६९६ शम १६९७ लक्ष आलोचने। 'नान्ये मितः–' इति मित्त्वनिषेधः। शामयते। १६९८ कुत्स अवक्षेपणे। १६९९ त्रुट छेदने। कुट इत्येके। १७०० गल स्रवणे। १७०१ भल आभण्डने। १७०२ कूट आप्रदाने। अवसादने इत्येके।

'आकुस्मा'दित्यत्र आङभिविधाविति मत्वा आह—तमभिव्याप्येति। ननु 'णिचश्च' इति सिद्धे आत्मनेपदविधानं व्यर्थमित्यत आह—अकर्तृगामिति। ननु 'दंशि दंशने' णिजभावे दंशति इति कथम्। आकुस्मीयत्वेन णिजभावेऽपि तङो, दुर्वारत्वादित्यत आह—आकुस्मीयमिति। 'दंशसञ्जस्वञ्जां शपि' इति नलोपमाशङ्क्य आह—नलोपे सञ्जीति। स्पश ग्रहणेति। अपस्पशत। 'अस्मृदृत्वर' इति अम्बासस्य अस्वं इत्याषधादः। गूर उद्यमने। अयं दीर्घोपधः। गूरयते। तुदादौ तु 'गुरी उद्यमने' इति। ह्रस्वोपधः। दिवादौ तु 'धूरी गूरी हिंसागत्योः' इति दीर्घोपध एवेति केचित्।

१७०३ कुट्ट प्रतापने । १७०४ वञ्चु प्रलम्भने । १७०५ वृष शक्तिबन्धने । शक्तिबन्धन प्रजननसामर्थ्यं, शक्तिबन्धश्च । वर्षयते । १७०६ मद तृप्तियोगे । मादयते । १७०७ दिवु परिकूजने । १७०८ गृ विज्ञाने । गारयते । १७०९ विद चेतनाख्याननिवासेषु । वेदयते ।

सत्तायां विद्यते ज्ञाने वेत्ति विन्ते विचारणे ।
विन्दते विन्दति प्राप्तौ श्यन्लुक्श्नम्शेभ्यिदं क्रमात् ॥

१७१० मान स्तम्भे । मानयते । १७११ यु जुगुप्सायाम् । यावयते । १७१२ कुत्स नाम्नो वा (ग सू १९६) । कुत्स इति धातुः कुत्सितत्समयने वर्तते । कुत्सयते । अचुकुत्सत । अथवा कुत्स इति प्रातिपदिकम् । ततो धात्वर्थे णिच् । इत्याकुत्सीयाः ।

१७१३ चर्च अध्ययने । १७१४ वृक्क भषणे । १७१५ शब्द उपसर्गादाविष्कारे च । चाङ्क्राषणे । प्रतिशब्दति । प्रतिश्रुतमाविष्करोतीत्यर्थः । अनुपसर्गाच्च । आविष्कारे इत्येव । शब्दयति । १७१६ कण निमीलने काणयति । 'णौ चङ्युपधाया ह्रस्वः' (सू २३१४) 'काण्यादीनां वा' (वा ४६१३) इति विक-

---

ह्रस्वोपध इत्यन्ये । विदधातोरर्थभेदं विकरणभेदं संगृह्णाति—सत्तायां विद्यते इत्यादिश्लोकेन । कुत्स नाम्नो वा । गणसूत्रम् । कुत्सेति पृथक्पदं अविभक्तिकम् । तदाह—कुत्स इति धातुरिति । 'कुत्सितत्समयने वर्तते इति शेषपूरणं व्याख्यानादिति भावः । कुत्सयते इति । आकुत्सीयरवादकर्तृगेऽपि फले आत्मनेपदम् । 'आकुत्सादात्मनेपदिन' इत्यत्र आङभिविधावित्याश्रयणादिति भावः । अचुकुत्सतेति । उकारस्य गुरुतया अभ्यासस्य लघुपरकत्वाऽभावान्न सन्वत्त्वमिति भावः । 'नाम्नो वेत्यंशं व्याचष्टे—अथवेति । नाम प्रातिपदिकं, तस्माद्धा णिजभवतीत्यर्थः । तच्च प्रातिपदिकं कुत्सशब्दात्मकमेव गृह्यते, प्रत्यासत्त्या । तथाच कुत्सेति धातोः कुत्सेति प्रातिपदिकाद्धा णिजिति फलितम् । तत्र धातोः णिचः स्वार्थिकत्वमभिप्रेत्य प्रातिपदिकात् णिचि विशेषमाह—तत इति । तस्मात् प्रातिपदिकादित्यर्थः । धात्वर्थे इति । करोतीत्यर्थं आचष्टे इत्यर्थं वेत्यर्थः । न च 'तत्करोति तदाचष्टे' इत्येव प्रातिपदिकात् णिच् सिद्ध इति वाच्यम्, 'आकुत्सादात्मनेपदिनः' इत्यात्मनेपदनियमार्थत्वात् । इत्याकुत्सीयाः ।

शब्द उपसर्गादिति । उपसर्गात्परः शब्दधातुः आविष्कारे वर्तते इत्यर्थः । अनुपसर्गादेति । अनुपसर्गात्परोऽपि शब्दधातुः णिचं लभते इत्यर्थः । 'आविष्कारे' इत्यस्य, वाक्यभेदेनार्थं पृथगुक्तिः । 'शब्द आविष्कारे चेत्येतावत्येवोक्ते अनुपसर्गाद्भाषणेऽपि स्यात् । तदाह—आविष्कारे इत्येवेति । काण्यादीनामिति । इदं वार्तिकं 'भ्राजभासभाष' इति सूत्रे भाष्ये पठितम् । 'काणि राणि आणि माणि हेडि कोपधः षट् काण्यादयः'

ल्प्यते । अचीकणत्–अचकाणत् । १७१७ जभि नाशने । जम्भयति–जम्भति । १७१८ षूद क्षरणे । सूदयति । असूषुदत् । १७१९ जसु ताडने । जासयति–जसति । १७२० पश बन्धने । पाशयति । १७२१ अम रोगे । आमयति । 'नान्ये मित–' इति निषेधः । अम गत्यादौ शपि गतः । तस्माद्धेतुमण्णौ 'न क्म्यमिचमाम्' इति निषेधः । आमयति । १७२२ चट १७२३ स्फुट भेदने । विकासे शशपोः स्फुटति–स्फाटते इत्युक्तम् । १७२४ घट सङ्घाते । घाटयति । 'हन्त्वर्थाश्च' (ग सू २००) । नवगणपामुक्ता अपि हन्त्यर्थाः स्वार्थे णिचं लभन्ते इत्यर्थः । १७२५ दिवु मर्दने । उदित्त्वाद्देवतीत्यपि । १७२६ अर्ज प्रतियत्ने । अयमर्थान्तरेऽपि । द्रव्यमर्जयति । १७२७ घुषिर् विशब्दने । घोषयति । 'घुषिरविशब्दने' (सू ३०६३) इति सूत्रे 'अविशब्दने' इति निषेधाल्लिङ्गादनित्योऽस्य णिच् । घोषति । इरित्त्वादङ् वा । अघुषत्–अघोषीत् । गयन्तस्य तु अजूघुषत् ।

इति भाष्यम् । अचीकणदिति । ह्रस्वत्वपक्षे लघूपधत्वाद्भ्यासस्य सन्वत्त्वमिति भावः । शशपोरिति । शविकरणे, शब्विकरणे चेत्यर्थः । हन्त्यर्थाश्चेति । गणसूत्रमिदम् । हन हिंसागत्योरिति हनधातोर्हिंसा गन्तृनं चार्थः । एतदर्थकाः ये धातवः भ्वादिषु नवसु गणेषु पठिताः ते सर्वेऽपि चुरादौ पठिताः प्रत्येतव्या इत्यर्थः । ततश्च तेभ्यः स्वार्थे णिजपि पक्षे भवतीति फलितम् । तदाह—नवगणेत्यादि । दिवु मर्दने । उदित्त्वादिति । उदित्करणम् । 'उदितो वा' इति क्त्वायामिड्विकल्पार्थम् । द्यूत्वा-देवित्वा । इडभावे ऊठ् । इटि तु 'न क्त्वा सेट्' इति कित्त्वनिषेधान् गुण इति स्थितिः । अस्य नित्यण्यन्तत्वे सति णिचा व्यवहितत्वेन क्त्वायामिड्विकल्पस्य अप्रसक्तेरुदित्करणं व्यर्थं सत् ज्ञापयति अस्य दिवुधातोः णिजिवकल्पः इतीति भावः । घुषिर् विशब्दने । विशब्दनं शब्देन स्वाभिप्रायाविष्करणं प्रतिज्ञानं च । भ्वादौ स्वयं धातुरविशब्दनार्थकः पठितः । घोषयतीति । शब्देन स्वाभिप्रायमाविष्करोतीत्यर्थः, प्रतिजानाते इति वा । लिङ्गादिति । इण्निषेधप्रकरणे घुषिर् अविशब्दने' इति सूत्रम् । अविशब्दनार्थकात् घुषधातोः निष्ठायामिण्न स्यादित्यर्थः । यथा घुष्टा रज्जुः' । प्रसारितेत्यर्थः । अविशब्दने इति किम्? अवघुषितं वाक्यम् । प्रतिज्ञातमित्यर्थः । अत्र विशब्दनार्थकत्वान्नेण्निषेध इति स्थितिः । तत्र विशब्दनार्थकस्य घुषधातोः चौरादिकत्वेन व्यवहितत्वेनियमाणिच्चा व्यवधानात् तः परा निष्ठा नास्त्येवेति इण्निषेधे विशब्दनपर्युदासो व्यर्थः सन् चौरादिकस्याऽस्य विशब्दनार्थकस्य घुषेः णिचो विकल्पं गमयति । एवंच 'अवघुषितं वाक्य' मित्यत्र चौरादिकघुषेर्विशब्दनार्थकस्य निष्ठायाम् इण्निषेधो नेति भाष्ये स्पष्टम् । इरित्त्वादङ् वेति । 'णिजभावपक्षे' इति शेषः । ननु इरित्त्वादेव णिजिवकल्पे सिद्धे 'घुषिरविशब्दने' इति इण्निषेधसूत्रे 'अविशब्दने' इति पर्युदासस्य णिजिवकल्पज्ञापकत्वाश्रयणक्लेशो भाष्ये व्यर्थ इति चेत्, न—अत एव भाष्यादिरि-

षत्। १७२८ आङः क्रन्द सातत्ये। भौवादिकः क्रन्दधातुराह्वानाद्यर्थ उक्तः। स एवाङ्पूर्वो णिचं लभते सातत्ये। आक्रन्दयति। अन्ये तु 'आङ्पूर्वो घुषिः क्रन्दसातत्ये' इत्याहुः। आघोषयति। १७२९ लस शिल्पयोगे। १७३० तसि १७३१ भूष अलङ्करणे। अवतंसयति-अवतंसति। भूषयति। १७३२ अर्ह पूजायाम्। १७३३ ज्ञा नियोगे। आज्ञापयति। १७३४ भज विश्राणने। १७३५ शृधु प्रसहने। अशशर्धत्-अशीशृधत्। १७३६ यत निकारोपस्कारयोः। १७३७ रक १७३८ लग आस्वादने। रघ इत्येके। रग इत्यन्ये १७३९ अञ्चु विशेषणे। अञ्चयति। उदित्त्वमिड्विकल्पार्थम्। अत एव विभाषितो णिच्। अञ्चति। एवं शृधुजसुप्रभृतीनामपि बोध्यम्। १७४० लिगि चित्रीकरणे। लिङ्गयति-लिङ्गति। १७४१ मुद संसर्गे। मोदयति सक्तून्घृतेन। १७४२ त्रस धारणे। ग्रहणे प्रत्येके। वारणे इत्यन्ये। १७४३ उघ्रस उञ्छे। ऊकारो धात्ववयव इत्येके। नेत्यन्ये। ध्रासयति। उध्राशयति। १७४४ मुच प्रमोचने मोदने च। १७४५ वस स्नेहच्छेदापहरणेषु। १७४६ चर संशये। १७४७ च्यु सहने। हसने च इत्येके। च्यावयति। च्युस इत्येके। च्योसयति। १७४८ भुवोऽवकल्कने। अवकल्कनं मिश्रीकरणमित्येके। चिन्तनमित्यन्ये। भावयति। १७४९ कृपेश्च कल्पयति।

'आ स्वदः सकर्मकात्' (ग सू २०१)। स्वदिमभिव्याप्य सम्भवत्कर्मम्य

स्वाऽभावविज्ञानात्। एवच 'घुषिर् विशब्दने' इत्यत्र घुषिरित्यस्य इका निर्देशमाश्रित्य प्रथमान्तत्वमेवाश्रयणीयम्। 'इरित्त्वादङ्क्वे'ति मूलं तु भाष्यविरोधादुपेक्ष्यमेवेत्यास्तां तावत्। आङः क्रन्द सातत्ये इति। आङः परः क्रन्दधातुः आह्वानसातत्ययोर्यं णिचं लभते इत्यर्थः। यद्वा 'आङ इत्यनन्तर घुषिरित्यनुवर्तते। 'क्रन्दसातत्ये' इत्यर्थनिर्देशः। तदाह—अन्ये त्विति। लस शिल्पयोग इति। कौशले इत्यर्थः। तसि भूषेति। अत्र तसिः प्रायेण अवपूर्वः। तदाह—अवतंसयतीति। ज्ञा नियोग इति। आङ्पूर्वः। तदाह—आज्ञापयतीति। आदन्तत्वात् पुक्। अजिज्ञपत्। यत निकारेति। तालव्यादन्तः स्यादिः। यतो वा प्रैषो वा निकारः। यातयति। अयीयतत्। अञ्चु विशेषण इति। व्यावर्तने इत्यर्थः। उदित्त्वमिति। 'उदितो वा' इत्यण्यन्तात् क्त्वायामिड्विकल्पार्थमित्यर्थः। ण्यन्तात्तु णिचा व्यवधानात् इट्विकल्पस्य न प्रसक्तिरिति भावः। नन्वस्य नित्यण्यन्तत्वादण्यन्तत्वम् असिद्धमित्यत आह—अत एवेति। च्यु सहने इति। च्यावयति। अच्युच्यवत्। भुवोऽवकल्कने इति। अवकल्कनवृत्तेर्भूधातोर्णिच् स्यादित्यर्थः। कृपेश्चेति। अवकल्कनवृत्तेः कृपेः णिच् स्यादित्यर्थः। कल्पयतीति। 'कृपो रोलः' इति रत्वम्।

आस्वदः सकर्मकादिति। आङभिविधौ। तदाह—स्वदिमभिव्याप्येति। तत्र 'स्वद

एव णिच्। १७५० प्रस प्रहणे। प्रासयति फलम्। १७५१ पुष धारणे। पोषयत्याभरणम्। १७५२ दल विदारणे। दालयति। १७५३ पट १७५४ पुट १७५५ लुट १७५६ तुजि १७५७ मिजि १७५८ पिजि १७५९ लुजि १७६० भजि १७६१ लघि १७६२ त्रिसि १७६३ पिसि १७६४ कुसि १७६५ दशि १७६६ कुशि १७६७ घट १७६८ घटि १७६९ बृहि १७७० बर्ह १७७१ बल्ह १७७२ गुप १७७३ धूप १७७४ विच्छ १७७५ चीव १७७६ पुथ १७७७ लोकृ १७७८ लोचृ १७७९ णद १७८० कुप १७८१ तर्क १७८२ वृतु १७८३ वृधु भाषार्थाः। घाटयति। पोटयति। लोटयति। तुजयति। तुजति। एवं परेषाम्। घाटयति। घण्टयति। २५७२ नाग्लोपिशास्वृदिताम् ७।४।२॥ णिच्यग्लोपिनः शास्तेः ऋदितां चोपधाया ह्रस्वो न स्याच्चङ्परे णौ। अलुलोकत्। अलुलोचत्। वर्तयति। वर्धयति। उदित्त्वात्, वर्तति। वर्धति। १७८४ रुट १७८५ लजि १७८६ अजि १७८७ दसि १७८८ भूशि १७८९ रुशि १७९० शीक १७९१ रुसि १७९२ नट १७९३ पुटि १७९४ जि १७९५ चि १७९६ रवि १७९७ लघि १७९८ ग्रहि १७९९ रहि १८०० महि च। १८०१ लडि १८०२ तड १८०३ नल च। १८०४ पूरी आप्यायने। ईदित्वं निष्ठायामिण्निषेधाय। अत एव णिज्वा। पूरयति—पूरति। १८०५ रुज हिंसायाम्। १८०६ स्वद आस्वादने। स्वाद इत्येके। असिस्वदत्। दीर्घस्य स्वरोपदेशत्वात् असिस्वदत्।

आस्वादने' इत्यस्य अकर्मकत्वादाह—सम्भवत्कर्मक्य इति। इत आरभ्य आस्वदीयाः सकर्मकाः। स्वदिस्त्वकर्मकः। षट पुटेति। एकत्रिंशत् धातवः। आद्यास्त्रयष्टान्ताः। आद्यद्वितीयौ पवर्गप्रथमादी। चतुर्थाद्या एकादश इदितः। त्रिसिपिसी इदुपधौ। अदुपधावित्येके। षोडशसप्तदशाविदितौ। अलुलोकत्, अलुलोचत् इत्यत्र उपधाह्रस्वे प्राप्ते—नाग्लोपि। 'णौ चङ्युपधायाः' इत्यनुवर्तते। णावित्यावर्तते। एकमग्लोपिन इत्यन्वेति। द्वितीयं तु निषेधे परनिमित्तम्। तदाह—णिच्यग्लोपिन इत्यादि। अलुलोकदिति। ऋदित्त्वाऽऽग्लोपीति निषेधेन उपधाह्रस्वाभावे सति लघुपरकत्वाभावाच्चाभ्यासदीर्घं इति भावः। उदित्त्वादिति। 'वृतु वृधु' इत्युदित्त्वं 'उदितो वा' इत्यण्यन्तात् क्त्वायामिड्विकल्पार्थम्। ण्यन्तात्तु णिचा व्यवधानात् नेड्विकल्पप्रसक्तिः। अतो णिज्विकल्पो विज्ञायते इति भावः। पूरी आप्यायने। इण्निषेधायेति। अण्यन्तात् क्त्वायामिण्निषेधार्थमीदित्त्वम्। ण्यन्तात्तु णिचा व्यवधानादप्रसक्तेः। अतो णिज्विकल्पो विज्ञायते इत्यर्थः। स्वदधातुः षोपदेशः। उदाह—असिस्वददिति। आदेशसकारत्वात्षः। अभ्यासेऽकारस्य संयोगपरकत्वेन गुरुत्वा-

'आ धृषाद्वा' (ग सू २०२)। इत ऊर्ध्वं विभाषितणिचो धृषधातुमभिव्याप्य। १८०७ युज १८०८ पृच संयमने। योजयति-योजति। अयौक्षीत्। पर्चयति-पर्चति। पर्चिता। अपर्चीत्। १८०९ अर्च पूजायाम्। १८१० षह मर्षणे। साहयति। 'स एवायं नागः सहति कलभेभ्यः परिभवम्'। १८११ ईर क्षेपे। १८१२ ली द्रवीकरणे। लाययति-लयति। लेता। १८१३ वृजी वर्जने। वर्जयति-वर्जति। १८१४ वृञ् आवरणे। वारयति-वरति-वरते। वरिता-वरीता। १८१५ ज़ वयोहानौ। जारयति-जरति। जरिता-जरीता। १८१६ त्रि च। त्राययति-त्रयति। त्रेता। १८१७ रिच वियोजनसम्पर्चनयोः। रेचयति-रेचति। रेक्ता। १८१८ शिष असर्वोपयोगे। शेषयति-शेषति। शेष्टा। अशिक्षत्। अयं विपूर्वोऽतिशये। १८१९ तप दाहे। तापयति-तपति। तप्ता। १८२० तृप तृप्तौ। 'संदीपने' इत्येके। तर्पयति-तर्पति। तर्पिता। १८२१ छृदी संदीपने। छर्दयति-छर्दति। छर्दिता। छर्दिष्यति। 'सेऽसिचि—' (सू २५०६) इति विकल्पो न। साहचर्यात्तत्र रौधादिकस्यैव ग्रहणात्। चृप छृप दृप सन्दीपने इत्येके। चर्पयति। छर्पयति। १८२२ दभी भये। दर्भयति-दर्भति। दर्भिता।

ङाऽभ्यासदीर्घः। दीर्घस्य रिति। दीर्घमध्यस्य रित्यर्थः। अधोपदेशस्थादिति। ह्रस्व-मध्यस्यैव स्वरेः षोपदेशेषु परिगणनादिति भावः। इत्यास्वदीयाः।

आधृषाद्वेति। गणसूत्रम्। विभाषितणिच इति। विकल्पितणिच्काः। प्रत्येतव्या इत्यर्थः। आङभिव्याप्ताविति मत्वा आह—धृषधातुमभिव्याप्येति। णिजभावपक्षे आह—अयौक्षीदिति। अर्च पूजायामिति। अयमनुदात्तेदिति शाकटायनः। अर्चयते। अर्चते। अस्य भ्वादौ पाठः अनार्षः। अनेनैव सिद्धः। नच परस्मैपदार्थं भ्वादावर्चः पाठ इति वाच्यम्, भ्वादौ तस्याप्यात्मनेपदीयतायाः शाकटायनसम्मतत्वेन माधवोक्तेः। एवमन्यत्यानामाधृषीयाणां भ्वादौ परस्मैपदिषु पाठः प्रामादिक एवेत्याहुः। ली द्रवीकरणे लाययतीति। लीलोरिति नुक् तु न, लासाहचर्यात् हेतुमण्णावेवाऽस्य प्रवृत्तेः। लेतेति। 'विभाषा लीयतेः' इत्यात्वं तु न, तत्र श्नाश्यन्विकरणयोरेव यकानिदिका इति भाष्यात्। वृञ् आवरणे। वरिता-वरीतेति। 'वृतो वा' इति दीर्घः। आशीर्लिङि-त्रियात्। आत्मनेपदे तु 'लिङ्सिचोः' इति वेट्। वृषीष्ट-वरिषीष्ट। इडभावपक्षे 'ढ्रश्चे'ति किरवाऋ गुणः। 'न लिङि' इति इटो न दीर्घः। अवृत। त्रि चेति। इत्यान्तोऽयम्। रिच वियोजने इति। अनिडयम्। ततश्च णिजभावपक्षे नेट्। तदाह—रेक्तेति। शिष असर्वेति। अयमप्यनिट् तदाह—शेष्टेति। अशिक्षदिति। 'शल इगुपधा'-दिति क्सः। अयं विपूर्वोऽतिशये इति। वर्तते इति शेषः। अयमस्मादिशिष्ट इत्यत्र अधिक इति गम्यते। तृप तृप्ताविति। अनिट्सु श्यना निर्देशादयं से। तदाह—तर्पि-

१८२३ इभ संदर्भे। अयं तुदादावीदित्। १८२४ अथ मोक्षणे। हिंसायां इत्येके। १८२५ मी गतौ। मायति-मयति। मेता। १८२६ ग्रन्थ बन्धने। ग्रन्थयति। ग्रन्थति। १८२७ शीक आमर्षणे। १८२८ चीक च। १८२९ अर्द हिंसायाम्। स्वरितेत्। अर्दयति-अर्दति-अर्दते। १८३० हिंसि हिंसायाम्। हिंसयति-हिंसति। हिनस्ति इति श्नमि गतम्। १८३१ अर्ह पूजायाम्। १८३२ आङः षद पद्यर्थे। आसादयति-आसीदति। 'पाघ्रा—' (सू २३६०) इति सीदादेशः। आसत्ता। आसात्सीत्। १८३३ शुन्ध शौचकर्मणि। शुन्धिता। अशुन्धीत्। अशुन्धिष्टाम्। १८३४ छुद अपवारणे। स्वरितेत्। १८३५ जुष परितर्कणे। परितर्कणमूहो हिंसा वा। परितर्पणे इत्यन्ये। परितर्पणं परितृप्तिक्रिया। जोषयति-जोषति। प्रीतिसेवनयोर्जुषत इति तुदादौ। १८३६ धूञ् कम्पने। णावित्यधिकृत्य 'धूञ्प्रीणोर्नुग्वक्तव्यः' (वा ४५१६)। धूनयति-धवति। धवते। केचित्तु 'धूञ्प्रीणोः—' इति पठित्वा प्रीणातिसाहचर्याद्धुनातेरेव नुकमाहुः। धावयति। अयं स्वादौ क्रयादौ तुदादौ च, स्वादौ ह्रस्वश्च। तथा च कविरहस्ये—

'धूनोति चम्पकवनानि धुनोत्यशोकं चूतं धुनाति धुवति स्फुटितातिमुक्तम्।
वायुर्विधूनयति चम्पकपुष्परेणून् यत्कानने धवति चन्दनमञ्जरीश्च॥'

१८३७ प्रीञ् तर्पणे। प्रीणयति। 'धूञ्प्रीणोः—' इति हरदत्तोक्तपाठे तु प्रायति-प्रयति प्रयते। १८३८ अन्थ १८३९ ग्रन्थ सन्दर्भे। १८४० आप्लृ लम्भने। आपयति-आपति। आप्ता। आपत्। स्वरितेदयमित्येके। आपते। १८४१ तनु श्रद्धोपकरणयोः। उपसर्गाच्च दैर्घ्ये। तानयति। वितानयति तनति वितनति। चन श्रद्धोपहननयोः इत्येके। चानयति। चनति। १८४२ वद सन्देशवचने। वादयति। स्वरितेत्। वदति-वदते। अनुदात्तेदित्येके। ववदतुः। ववदिथ। ववदे। वद्यात्। १८४३ वच परिभाषणे। वाचयति-वचति। वक्ता। अवाचीत्। १८४४ मान पूजायाम्। मानयति—मानति। मानिता। विचारणे तु भौवादिको नित्यसन्नन्तः। स्तम्भे तु मानयते। (इत्याकुम्भीयः)। मन्यते इति दिवादौ।

तेति। छुदी सन्दीपने इति। ईदित्त्वं निष्ठायामिण्निषेधार्थम्। धुवति स्फुटितेति। शविकरणस्य रूपम्। शस्य ङित्त्वादुगुणाभावे उवङ्। प्रीञ् तर्पणे। प्रीणयतीति। 'धूञ्प्रीणोः' इति वार्तिकान्नुगिति भावः। हरदत्तेति। अनेन भाष्याऽसम्मतत्वं सूचितम्। उपसर्गाच्चेति। दैर्घ्यं तु उपसर्गादुपसर्गाच्च परस्तनुधातुराधृषीयो वेदितव्य इत्यर्थः। श्रद्धोपकरणयोरित्युपसर्गादेवेति भावः। वच परिभाषणे। अवाचीदिति। 'अस्यतिवक्ती'ति

मनुते इति तनादौ च। १८४५ भू प्राप्तावात्मनेपदी। भावयते-भवते। णिच् संन्नियोगेनैवात्मनेपदमित्येके। भवति। १८४६ गर्ह विनिन्दने। १८४७ मार्ग अन्वेषणे। १८४८ कठि शोके। उत्पूर्वोऽयमुत्कण्ठायाम्। कण्ठते इत्यात्मनेपदी गतः। १८४९ मृजू शौचालङ्कारयोः। मार्जयति-मार्जति। मार्जिता-मार्ष्टा। १८५० मृष तितिक्षायाम्। स्वरितेत्। मर्षयति-मर्षति। मर्षते। मृष्यति-मृष्यते। इति दिवादौ। सेचने शपि मर्षति। १८५१ धृष प्रसहने। धर्षयति-धर्षति। इत्याधृषीयाः।

अथादन्ताः। १८५२ कथ वाक्यप्रबन्धे। अल्लोपस्य स्थानिवद्भावान्न वृद्धिः। कथयति। अग्लोपित्वान्न दीर्घसन्वद्भावौ। अचकथत्। १८५३ वर ईप्सायाम्। वरयति। वारयतीति गतम्। १८५४ गण संख्याने। गणयति २५७३ ई च गणः ७।४।९७॥ गणेरभ्यासस्य ईत्साचक्पूरे णौ चादत्। अजगणत्—अजीगणत्। १८५५ शठ १८५६ श्वठ सम्यगवभाषणे। १८५७ पठ १८५८ वठ ग्रन्थे। १८५९ रह त्यागे। अरारहत्। १८६० स्तन १८६१ गदी देवशब्दे।

लुका निर्देशादङ् नेति भावः। 'वचिस्वपी'ति सम्प्रसारणम्-इत्यात् इत्याधृषीयाः।

अथादन्ता इति। वचयन्ते इति शेषः। अन्ते अकारो नेत्संज्ञकः, नाप्युच्चारणार्थं इति भावः। तत्र कथधातोर्णिचि अतो लोपे 'कथि' इत्यस्मात् तिपि शपि गुणे अयादेशे कथयतीति रूपं वक्ष्यति। तत्र णिचमाश्रित्य उपधावृद्धिमाशङ्क्याह—अल्लोपस्य स्थानिवद्भावादिति। अचः परस्मिन्नित्यनेनेति भावः। अत्रेदमवधेयम्। स्थानिनि सति शास्त्रीयं यत्कार्यं तदेव 'स्थानिवदादेशोऽनल्विधा'वित्यत्रातिदिश्यते। यत्तु स्थानिनि सति निमित्तव्यापाताच्च भवति तस्याऽभावस्य अशास्त्रीयत्वान्नाऽतिदेशः। अन्यथा 'नायक' इत्यत्र ईकारस्थानिकस्य ऐकारस्य आयादेशानापत्तेः। ईकारे स्थानिनि सति आयभावस्य इष्टत्वेन तस्याप्यैकारे अतिदेशप्रसङ्गात्। 'अचः परस्मिन्' इत्यत्र तु स्थानिनि सति यत् शास्त्रीयं कार्यं प्रसज्यते तस्य, तदभावस्य चाशास्त्रीयस्याप्यतिदेश इति भाष्ये स्पष्टम्। अतोऽत्र थकारादकारे सति प्रसक्तस्य उपधावृद्ध्यभावस्य अशास्त्रीयस्येऽप्यतिदेश इति सिद्धम्। लुङि चङि 'अचकथत्' इत्यत्र सन्वत्त्वमाशङ्क्याह—अग्लोपित्वादिति। सन्त्वविषये जायमानोऽभ्यासदीर्घः सन्वत्वं नापेक्षत इति पृथगुक्तिः। एवं वरादौ सर्वत्र ज्ञेयम्।

गण संख्याने। चङि अल्लोपस्य स्थानिवत्त्वात् दीर्घसन्वद्भावयोरभावे 'अजगण'-दित्येव प्राप्ते आह—ई च गणः। 'सन्वल्लघुनि' इत्यतः चङ्परे इति, 'अत्र लोप' इत्यतः। अभ्यासस्येति चानुवर्तते। तदाह—गणेरभ्यासस्येति। 'अस्मृदृत्वर' इति पूर्वसूत्रादृदृग्रहणं चकारानुकृष्यते। तदाह—चादिति। स्तनगदी देवशब्दे इति। प°

स्तनयति। गदयति। अजगदत्। १८६२ पत गतौ वा। वा णिजन्तः। वा अदन्त इत्येके। आद्ये पतयति–पतति। पताञ्चकार। अपतीत्। द्वितीये पातयति। अपीपतत्। १८६३ पष अनुरसर्गात्। गताविरयेव। पषयति। १८६४ स्वर आक्षेपे। स्वरयति। १८६५ रच प्रतियत्ने। रचयति। १८६६ कल गतौ सङ्ख्याने च। १८६७ चह परिकल्कने। परिल्कनं दम्भः शाठ्यं च। १८६८ मह पूजायाम्। महयति। महति इति शपि गतम्। १८६९ सार १८७० कृप १८७१ श्रथ दौर्बल्ये। सारयति। कृपयति। श्रथयति। १८७२ स्पृह ईप्सायाम्। १८७३ भाम क्रोधे। अबभामत्। १८७४ सूच पैशुन्ये। सूचयति। अषोपदेशत्वान्न षः। असूसुचत् १८७५ खेट भक्षणे। तृतीयान्त इत्येके। खोट इत्यन्ये। १८७६ क्षोट क्षेपे। १८७७ गोम उपलेपने। अजुगोमत् १८७८ कुमार क्रीडायाम्। अचुकुमारत्। १८७९ शील उपधारणे। उपधारणमभ्यासः। १८८० साम सान्त्वप्रयोगे। असीषमत्। साम सान्त्वने इत्यतीतस्य तु असीषमत्। १८८१ वेल कालोपदेशे। वेलयति। कान्त इति पृथग्धातुरित्येके। कालयति। १८८२ पल्यूल लवनपवनयोः १८८३ वात सुखसेवनयोः। गतिसुखसेवनेषु इत्येके। वातयति। अववातत्। १८८४ गवेष मार्गणे। अजगवेषत्। १८८५ वास उप-

---

न्यगर्जने इत्यर्थः। स्तनश्च गदिश्चेति द्वन्द्वः। गदीति हका निर्देशः। गरेत्यकारान्तात् हकि अल्लोपे गदीति निर्देशः। एवञ्च प्राकरणिकमदन्तत्वं न व्याहन्यते। पत गतौ वेति। गतावर्थे पतधातुः णिचं वा लभत इत्यर्थः। तदाह—वा णिजन्त इति। आघृषीयस्त्वाऽभावात् विकल्पविधिः। यद्वा वाशब्दस्य अदन्तत्व एवान्वयः। णिच् तु नित्य एव। तदाह—वा अदन्त इत्येके इति। प्रथमपक्षे तु अदन्तत्वमेव तदाह—आद्ये पतयतीति। अल्लोपस्य स्थानित्वाच्च वृद्धिः। पताञ्चकारेति। णिजभावेऽप्यदन्तत्वात् 'काश्यनेकाच्' इत्यामिति भावः। चङि-अपपतत्। अल्लोपित्वाच्च दीर्घसम्वत्वे। द्वितीये पातयतीति। तकारादकारस्य उच्चारणार्थत्वादुपधावृद्धिरिति भावः। अपीपतदिति। अल्लोपित्वाऽभावादीर्घसम्वत्वे इति भावः। कृपयतीति। अदन्तस्य स्वस्य धात्वन्तरत्वात् 'कृपो रो लः' इति न भवति। स्पृह ईप्सायाम्। आप्तुमिच्छा ईप्सा। अबभामदिति। चङि अल्लोपस्य स्थानिवत्त्वान्नोपधाह्रस्वः। सूच पैशुन्ये। अषोपदेशत्वादिति। अनेकाक्त्वादिति भावः। खेट भक्षणे। तृतीयान्त इति। टवर्गतृतीयान्त इत्यर्थः। साम सान्त्वप्रयोगे। सान्त्वप्रयोगः अकटुभाषणम्। असीषमदिति। अल्लोपस्य स्थानिवत्त्वान्नोपधाह्रस्वः। ननु 'साम सान्त्वने' इति कथादेः प्राक् चुरादौ पाठो व्यर्थः अनेनैव सिद्धेरित्यत आह—साम सान्त्वने इत्यतीतस्य तु असीषमदिति। पूर्वपठिते सामधातौ मकारादकारस्य उच्चारणार्थतया उपधाह्रस्वः, दीर्घसम्वत्वे ने-

सेवायाम् । १८८६ निवास आच्छादने । १८८७ भाज पृथक्कर्मणि । १८८८ सभाज प्रीतिदर्शनयोः। प्रीतिसेवनयोः इत्यन्ये । सभाजयति । १८८९ ऊन परिहाणे । ऊनयति । 'ओः पुयण्जि—' (सू २५७७) इति सूत्रे पययोः इति वक्तव्ये वर्गप्रत्याहारजकारग्रहो लिङ्ग 'णिचि अच आदेशो न स्यादद्वित्वे कार्ये

त्यर्थः । यद्यपि 'साम सान्त्वप्रयोगे' इत्येव प्राक् चुरादौ पठितम् । तथापि सान्त्वनस्य सामप्रयोगादनन्यत्वात्तथोक्तिरिति भावः । गवेष मार्गणे । मार्गणम् अन्वेषणम् । चङि अल्लोपस्य स्थानिवत्त्वान्नोपधाह्रस्वः । तदाह—अजगवेषदिति । निवास आच्छादने । अनिनिवासत् । ऊन परिहाणे । परिहाणं न्यूनीभावः । ऊनयतीति । णावतो लोप इति भावः । ननु चङि चङि ऊन इ अ त् इति स्थिते णिलोपे 'चङि' इत्यजादेर्द्वितीयस्य नशब्दस्य द्वित्वे अतो लोपे अल्लोपित्वेन सन्वत्वाभावादभ्यासे ह्रस्वदीर्घयोरभावे आटो वृद्धौ औननदिति रूपं वक्ष्यति । तदनुपपन्नम् , द्वित्वात्प्रागेव परत्वादतो लोपे कृते निशब्दस्य द्वित्वे औननदित्येवमभ्यासे इकारश्रवणप्रसङ्गात् । नच द्वित्वे कार्ये अतो लोपस्य 'द्विर्वचनेऽचि' ति निषेधः शङ्क्यः, अल्लोपनिमित्तस्य णिचो द्वित्वनिमित्तत्वाऽभावात् इत्यत आह—ओः पुयण्जीत्यादि । 'ओः पुयण्ज्यपरे' इति सूत्रे 'ओः पययोरपरयो'रित्येव वक्तव्ये 'पु' इति पवर्गस्य 'यणिति' प्रत्याहारस्य जकारस्य च ग्रहणं लिङ्गमित्यन्वयः । कुत्र लिङ्गमित्यत आह—णिचीत्यादि । द्वित्वे कार्ये णिजन्निमित्तक अच आदेशो न स्यादित्यत्र लिङ्गमिति पूर्वेणान्वयः । तथाहि 'ओः पुयण्ज्यपरे' इति सूत्रम् । 'सनि परे यदङ्गं तदवयवाऽभ्यासोवर्णस्य इकारः स्यात् अवर्णपरकेषु पवर्गयणजकारेषु परत इति तदर्थः । 'पूङ्'-पिपावयिषति, 'भू'-बिभावयिषति, 'यु'-यिंयावयिषति, 'रु'-रिरावयिषति, 'लूञ्-लिलावयिषति, 'जु'-जिजावयिषति इत्युदाहरणानि । अत्र द्विर् प्रत्यनिमित्ते णिचि 'द्विर्वचनेऽचि' इति निषेधाऽप्रवृत्त्या द्वित्वात् प्रागेव परत्वाद्वृद्ध्यावादेशयोः कृतयोः अभ्यासेष्वाकारस्य ह्रस्वे सति 'सन्यतः' इत्येव ह्रस्वसिद्धेः पवर्गयणप्रत्याहारजकारग्रहणं व्यर्थम् । पकारयकारग्रहण तु न व्यर्थम् । पिपावयिषति यियावयिषतीत्यत्र उक्तरीत्या 'सन्यतः' इति ह्रस्वसिद्धावपि पिपविषते यियविषतीत्यत्र पूङ्धातोर्युंधातोश्च अण्यन्तात् सनि अभ्यासे ह्रस्वार्थं तद्गवयवकत्वात् । तत्र हि 'इको झल् इति कित्त्वात् 'ध्रुवकः किति' इति प्राप्तम्णिन्वेध बाधित्वा 'स्मिपूङ्रञ्ज्वशां सनि' इति सनीवन्तर्धभ्रञ्जदम्भुश्रिस्ज्वयूर्णुभरज्ञपिसनाम्' इति च सूत्राभ्यामिटि कृते इडादेः सनो द्वित्वनिमित्तत्वेन इटोऽप द्वित्वनिमित्ततया 'द्विर्वचनेऽचि' इति गुणावादेशयोर्निषेधे सति 'पू' 'यु' इत्यनयोर्द्वित्वे अभ्यासे अकाराभावेन 'सन्यतः' इत्यस्याऽप्रवृत्त्या तत्र ह्रस्वार्थं 'पययो'रित्यावश्यकम् । वर्गप्रत्याहारजकारग्रहणं तु 'द्वित्वे कार्ये णावच आदेशो ने'त्यनाश्रयणे व्यर्थमेव । तदाश्रयणे तु बिभावयिषतीत्यादिषु णिचि लुप्ते सति 'चङि' इति द्वित्वे कार्ये प्रत्ययलक्ष-

इति। 'यत्र द्विरुक्तावभ्यासोत्तरखण्डस्याद्योऽच् प्रक्रियायां परिनिष्ठिते रूपे वाऽवर्णो लभ्यते तत्रैवायं निषेधः।' ज्ञापकस्य सजातीयापेक्षत्वात्। तेन अचिकीर्तत् इति सिद्धम्। प्रकृते तु नशब्दस्य द्वित्वम्। तत उत्तरखण्डेऽल्लोपः। औननत्। मा भवानूननत्। १८९० ष्वन शब्दे। अदध्वनत्। १८९१ कूट परितापे। पर-

णमाश्रित्य णिच् गुणावादेशयोः प्रतिषेधे सति उवर्णान्तानां द्वित्वे अभ्यासे अकाराऽभावेन 'सन्यतः' इत्यस्याऽप्रवृत्त्या वर्णप्रत्याहारजकारग्रहणमर्थवत्। अतः द्वित्वे कार्ये णावच आदेशो नेति विज्ञायते इत्यर्थः। ननु 'कृत सशब्दने' अस्मात् णौ 'उपधायाश्च' इति ऋत इत्वे रपरत्वे किति इत्यस्मात् लुङि च्लि णिलोपे द्वित्वे हलादिशेषे कस्य चुत्वे उत्तरखण्डे इकारस्य 'उपधायां च' इति दीर्घे अचिकीर्तदिति रूपमिष्यते। तत्र युज्यते, द्वित्वे कर्तव्ये णावच आदेशस्य निषिद्धतया इत्वात्प्रागेव कृत् इत्यस्य द्वित्वे, उरदत्त्वे, रपरत्वे, हलादिशेषे, कस्य चुत्वे, उत्तरखण्डे, ऋत इत्वे, रपरत्वे, उपधादीर्घे अचकीर्तदित्यापत्तेरित्यत आह—यत्र द्विरुक्ताविति। यत्र धातोः चङि द्विर्वचने कृते अभ्यासोत्तरखण्डस्य आद्योऽच् अवर्णो लभ्यते तत्रैव द्वित्वे कार्ये णावच आदेशो नेत्यय निषेध इत्यन्वयः। यद्यपि धातोरवयवस्य एकाचो द्वित्वे कृते अभ्यासोत्तरखण्डे द्वितीयस्याऽचोभावादाद्योऽजिति व्यर्थमेव। तथापि स्पष्टार्थं तदित्याहुः। नन्वभ्यासोत्तरखण्डस्याद्योऽजवर्णो लभ्यते इत्यत्र किमवर्णः द्वित्वप्रवृत्तेरेलायां विवक्षितः उत परिनिष्ठिते रूपे विवक्षितः? नाद्यः, चुधातोर्ण्यन्तात् सनि चुक्षावयिषतीत्यत्र 'क्षु' इत्यस्य द्वित्व कृते अभ्यासोत्तरखण्डे प्राक्त्वादशायामवर्णाऽभावेन वृद्ध्यावादेशयोर्निषेधाऽप्रवृत्त्या द्वित्वात् प्रागेव परत्वाद्वृद्ध्यावादेशयोः क्षाव् इत्यस्य द्वित्वे चिक्षावयिषतीत्यापत्तेः। न द्वितीयः, ऊन इ अत् इति स्थिते सति 'न' इत्यस्य द्वित्वे अभ्यासोत्तरखण्डे अल्लोपे सत्यवर्णाऽभावेन णौ अल्लोपस्य निषेधाप्रवृत्त्या द्वित्वात् प्रागेव प्रत्ययादतो लोपे सति 'नि' इत्यस्य द्वित्वे औनिन'दित्यापत्तेरित्यत आह—प्रक्रियायां परिनिष्ठिते रूपे वेति। न त्वमुकत्रैवेत्याग्रह इति भावः। सजातीये पुयण्जाम् अभ्यासोत्तरखण्डे अवर्णपरत्वनियमादिति भावः। सिद्धमिति। प्रक्रियायां परिनिष्ठिते वा उत्तरखण्डे अवर्णाऽभावादत इत्त्वस्य न निषेध इति भावः। एवं च 'चुक्षावयिषति' इत्यत्र 'क्षु' इत्यस्य द्वित्वे प्राक्त्वादशायामभ्यासोत्तरखण्डे अवर्णाभावेऽपि परिनिष्ठिते रूपे तास्सरवात् णौ गुणावादेशयोर्भवत्येव द्वित्वे कार्ये निषेधः। औननदित्यत्रापि णौ भवत्येवाऽल्लोपस्य निषेध इत्याह—प्रकृते त्विति। औननदित्यत्रेत्यर्थः। नशब्देत्येति। अल्लोपात्प्रागेव नशब्दस्य द्वित्वाश्रयणे प्रक्रियादशायामुत्तरखण्डे अवर्णलोपादल्लोपस्य निषेधे सति नशब्दस्यैव द्वित्वं न तु निशब्दस्येति भावः। तत इति। नशब्दस्य द्वित्वाऽनन्तरमुत्तरखण्डे अल्लोप इति भावः। अत्र नशब्दद्वित्वार्थमेव ऊनधातोरदन्तत्वं स्थितम्। फलान्तरं सूचयन्नाह—मा भवान् ऊनन-

दाहे इत्यन्ये । १८९२ केत १८९३ प्राम १८९४ कुण १८९५ गुण चामन्त्रणे । चास्कूटोऽपि । कूटयति । संकेतयति । प्रामयति । कुणयति । गुणयति । पाठान्तरम्-केत श्रावणे निमन्त्रणे च । केतयति । निकेतयति । कुण गुण चामन्त्रणे । च कारात्केतेति । १८९६ कूण सङ्कोचने इति । १८९७ स्तेन चौर्ये । अतिस्तेनत् ।

आ गर्वादात्मनेपदिनः । १८९८ पद गतौ । पदयते । अपपदत । १८९९ गृह ग्रहणे । गृहयते । १९०० मृग अन्वेषणे । मृगयते । मृग्यति इति कण्ड्वादिः । १९०१ कुह विस्मापने । १९०२ शूर १९०३ वीर विक्रान्तौ । १९०४ स्थूल परिबृंहणे । स्थूलयते । अतुस्थूलत । १९०५ अर्थ उपयाच्ञायाम् । अर्थयते । आर्तेथत । १९०६ सत्र सन्तानक्रियायाम् । असत्रत । अनेकाच्त्वान्न षोपदेशः । सिसत्रयिषते । १९०७ गर्व माने । गर्वयते । अदन्तत्वसामर्थ्यान्णिजिकल्पः । धातोरन्त उदात्तः, लिटि आम् च फलम् । एवमप्रेऽपि । इत्यावीयाः ।

१९०८ सूत्र वेष्टने । सूत्रयति । असुसूत्रत् । १९०९ मूत्र प्रस्रवणे । मूत्रयति-

---

देति । अल्लोपित्वान्नोपधाह्रस्व इति भावः । पाठान्तरमिति । 'केत श्रावणे' इत्यादि ज्ञेयमित्यर्थः । चकारात्केतेति । समुच्चीयते इति शेषः । संकोचने इतीति । इतिशब्दः पाठान्तरसमाप्तौ । स्तेनचौर्ये । अनेकाच्त्वान्न षोपदेशोऽयमिति मत्वा आह—प्रतिस्तेनदिति । गृह ग्रहणे ऋदुपधोऽयम् । गृह्यति इति । अल्लोपस्य स्थानिवत्त्वान्न गुण इति भावः । लुङि अजगृहत । अल्लोपित्वान्न सन्वत्त्वम् । मृग अन्वेषणे । मृगयते इति । हृहाप्यल्लोपस्य स्थानिवत्त्वान्न गुणः । 'मार्ग अन्वेषणे' इत्यादृधीयस्य तु मार्गयति मार्गति इति च गतम् । अर्थ उपयाच्ञायाम् । अर्थयते इति । अर्थं ह इति स्थिते अतो लोपः । न तु 'अचो ञ्णिति' इति वृद्धिः, वृद्धेर्णापो बलीयानिति न्यायात् । 'अर्थवेदयो'रित्यापुक्तु न, तत्र प्रातिपदिकस्य ग्रहणात् । गर्व माने । अभिमाने इत्यर्थः । ननु कथादावस्य पाठो व्यर्थः, अदन्तत्वे फलाभावात् । नच सन्वत्त्वनिवृत्तौ अल्लोपित्वाय अदन्तत्वमिति शङ्क्यम्, लघुपरकत्वाभावादेव तदप्रसक्तेः । नाऽप्यल्लोपस्य स्थानिवद्भावात् उपधावृद्धिनिवृत्त्यर्थमदन्तत्वमिति शङ्क्यम् । गकारादकारस्यानुदात्तत्वादेव तदप्रसक्तेरित्यत आह-अदन्तत्वसामर्थ्यान्णिजिकल्प इति । ननु गर्वते इत्यत्र णिजभावेऽप्यदन्तत्वं निष्फलमिति कथं तस्य विकल्पज्ञापकतेत्यत आह—धातोरन्त उदात्त इति । तेन 'गर्वते' इत्यत्र वकारादकार उदात्तः फलति । अदन्तत्वाभावे तु गकारादकार उदात्तः स्यादिति भावः । लिटयाम् चेति । 'गर्वाञ्चक्रे, इत्यत्र 'काञ्यनेकाचः' इत्याम्प्रत्ययोऽप्यदन्तत्वस्य फलमित्यर्थः । अन्यथा अनेकाच्त्वाभावादाम् न स्यादिति भावः । एवमप्रेऽपीति । 'मूत्र प्रस्रवणे' इत्यादावित्यर्थः । इत्यावीयाः । सूत्र वेष्टने । अनेकाच्त्वादषोपदेशत्वार्थमस्य अदन्तत्वमिति न तलोऽस्य णिजिक-

मूत्रति। १९१० रूक्ष पारुष्ये। १९११ पार १९१२ तीर कर्मसमाप्तौ। अपपारत्। अतितीरत्। १९१३ पुट संसर्गे। पुटयति। १९१४ धेक दर्शने इत्येके। अदिधेकत्। १९१५ कत्र शैथिल्ये। कत्रयति-कत्रति। कर्त इत्यप्येके। कतयति-कर्तति। 'प्रातिपदिकाद्धात्वर्थे बहुलमिष्ठवच्च' (ग सू २०३)। प्रातिपदिकाद्धात्वर्थे णिच्स्यात्, इष्ठे यथा प्रातिपदिकस्य पुंवद्भावरभावटिलोपविन्मतुल्लोपयणादिलोपप्रत्ययस्फाद्यादेशभसंज्ञास्तद्वणावपि स्युः। पटुमाचष्टे पटयति। परत्वाद्वृद्धौ सत्यां टिलोपः। अपीपटत्। 'यौ चङि-' (सू २३१४) इत्यत्र भाष्ये तु 'वृद्धेर्लोपो बलीयान्' इति स्थितम्। अपपटत्। 'तत्करोति तदाचष्टे' (ग सू

ल्पः। कत्र शैथिल्ये। कत इत्यपीति। अदन्तत्वसामर्थ्यादस्य णिच्त्वेऽपि इति मत्वा आह—कर्तयति कर्तीति। प्रातिपदिकाद्धात्वर्थे बहुलमिष्ठवच्च। चुरादिगणसूत्रमिदम्। 'इष्ठ'वदिति सप्तम्यन्ताद्वतिः। तेन भुवमाचष्टे भावयतीत्यत्र 'इष्ठस्य यिट् च' इति यिडागमो न भवति। तदाह-इष्ठे यथेति। अत्र 'धात्वर्थे' इत्यनेन करणम्। आख्यानं दर्शनं वचनं श्रवणमित्यादि गृह्यते। पुंवद्भावेति। अतिशयेन पटुर्वी पटिष्ठेत्यत्र, मस्यादे' इति पुवस्वम्। 'द्रढिष्ठ' इत्यत्र 'र ऋतो हलोर्हलोर्घोः' इति रभावः। अतिशयेन साधुः साधिष्ठः इत्यत्र टिलोपः। अतिशयेन स्रग्वी स्रजिष्ठः इत्यत्र 'विन्मतोर्लुक्' इति विनो लुक्। अतिशयेन गोमान् गविष्ठः इत्यत्र मतुपो लुक्। अतिशयेन स्थूलः स्थविष्ठः इत्यादौ 'स्थूलदूरयुव' इत्यादिना यण्णादिलोपः पूर्वस्य च गुणः। अतिशयेन प्रियः प्रेष्ठः इत्यादौ 'प्रियस्थिरे'त्यादिना प्रस्थाद्यादेशः। अतिशयेन स्रग्वी स्रजिष्ठः इत्यत्र भस्वाज्ज कुत्वम्। एते इष्ठे इव णावपि परतः स्युरित्यर्थः। पटयतीति। पटुमाचष्टे इत्यार्थे णिच्। इष्ठवत्त्वात् टेरिति टिलोप इति भावः। ननु उकारस्य टेर्लोपे सति अग्लोपित्वात् सन्वत्त्वं न स्यादित्यत आह—परत्वाद्वृद्धौ सत्यां टिलोप इति। 'अचो ञ्णिति' इति उकारस्य वृद्धौ कृतायां औकारस्य टेर्लोपः। अकृतायां तु वृद्धौ उकारस्य टेर्लोपः। ततश्च 'शब्दान्तरस्य प्राप्नुवन् विधिरनित्यः' इति न्यायेन टिलोपोऽनित्यः, वृद्धिस्तु टिलोपे कृते सति नैव भवतीति साऽप्यनित्या। एवंच वृद्धिटिलोपयोरुभयोर्मध्ये परत्वात् उकारस्य वृद्धिः औकारः। तस्याऽऽदेशात्प्रागेव परत्वात् वार्णादाङ्गस्य बलीयस्त्वाच्च औकारस्य टेर्लोप इत्यर्थः। एवंच अनग्लोपित्वात् सन्वत्त्वमिति मत्वा आह—अपीपटदिति। एतच्च 'मुण्डमिश्र' इति सूत्रे भाष्यकैयटयोः स्पष्टम्। स्थितमिति। तथाच वृद्धेः प्रागुकारस्य लोपे अग्लोपित्वान्न सन्वत्त्वमित्यर्थः। भाष्ये उभयथा दर्शनाद्रूपद्वयमपि साधिति बोध्यम्। शब्देन्दुशेखरे तु 'वृद्धेः लोपो बलीयान्' 'यौ चङि' इति सूत्रभाष्यमेव प्रमाणम्, 'मुण्डमिश्र' इति सूत्रभाष्यं त्वेकदेशव्युत्पत्तिरिति प्रपञ्चितम्। अत्र पुंवद्भावादिकमुदाहरति। पटीमाचष्टे एतर्हि। पुंवद्भावात् ङीप्रत्ययोनिवृत्तिः। दृढमाचष्टे द्रढयति। 'र ऋत' इति रभावः। स्रग्विणमाचष्टे

२०४)। पूर्वस्यैव प्रपञ्चः। करोत्याचष्टे इति धात्वर्थमात्रं णिजर्थः। [लडर्थ-स्त्वविवक्षितः। 'तेनातिक्रामति' (ग सू २०५)। अश्वेनातिक्रामति। अश्वयति। हस्तिनातिक्रामति हस्तयति। 'धातुरूपं च' (ग सू २०६) णिच्प्रकृतिर्धातुरूपं प्रतिपद्यते। चशब्दोऽनुक्तसमुच्चयार्थः। तथा च वार्तिकम्-'आख्यानात्कृतस्तदाचष्टे कृल्लुप्रकृतिप्रत्यापत्तिः प्रकृतिवच्च कारकम्' (वा १७६६) इति। कंसवधमाचष्टे कंसं घातयति। इह कंसं-हन्-इ इति स्थिते। २५७४ हनस्तोऽ-

---

स्रजयति। 'विन्मतो'रिति विनो लुक्। गोमन्तमाचष्टे गवयति। मनुषो लुक्। अङ्गवृत्त-परिभाषया न वृद्धिः। स्थूलमाचष्टे स्थवयति इत्यादिषु यणादिलोपः। प्रियमाचष्टे प्रापयति' स्थिरमाचष्टे स्थापयति इत्यादिषु प्रस्थस्फायादेशाः। अत्र वृद्धिर्भवत्येव, 'द्वयो'रितिनिर्देशेन अङ्गवृत्तपरिभाषाया अनित्यत्वाश्रयणात्। स्रग्विणमाचष्टे स्रजयति। सुबन्तात् विहितस्य विनो लुकि अन्तर्वर्तिविभक्त्या पदत्वात् प्राप्तं कुत्वं भत्वान्न भवति। तत्करोति तदाचष्टे। इदमपि चुरादिगणसूत्रम्। प्रातिपदिकादित्यनुवर्तते। तत्करोति, तदाचष्टे इति चार्थे प्रातिपदिकाण्णिच् स्यादित्यर्थः। आचारक्विबि प्रातिपदिकादेवेदम्। ननु 'प्रातिपदिकाद्धात्वर्थे' इत्येव सिद्धे किमर्थमिदमित्यत आह—पूर्वस्यैव प्रपञ्च इति। ननु करोति आचष्टे इति वर्तमाननिर्देशादकरोदित्याद्यर्थेषु न स्यादित आह—करोत्याचष्टे इत्यादि। लडर्थ इति। उपलक्षणम्। तेन भूते भविष्यति द्वित्वे बहुत्वे च प्रत्ययो भवत्येव। तेनातिक्रामति। इदमपि गणसूत्रम्। 'प्रातिपदिकाद्धात्वर्थ' इत्यस्यैव प्रपञ्चः। वाचा अतिक्रामति वाचयति इत्यत्र कुत्वं तु न शङ्क्यम्, असुबन्तादेव प्रातिपदिकात् प्रत्ययोत्पत्तेः। धातुरूपं चेति। इदमपि गणसूत्रम्। णिच्प्रकृतिरिति, प्रतिपद्यते इति चाध्याहृत्य व्याचष्टे—णिच्प्रकृतिर्धातुरूपं प्रतिपद्यते इति। ननु प्रातिपदिकाद् धात्वर्थे णिच् भवति, णिच्प्रकृतिर्धातुरूपं च प्रतिपद्यते इति प्रतीयमानार्थाश्रयणे भुक्तमाचष्टे भुक्तयतीति न स्यात्। भुक्तशब्दस्य भुजधातुरादेशः स्यादित्यत आह—चशब्दोऽनुक्तसमुच्चयार्थ इति। किमनुक्तं समुच्चीयते इत्यत आह—तथा च वार्तिकमिति। व्याख्यानात् कृत इति। 'हेतुमति च' इति सूत्रे इदं वार्तिकं स्थितम्। आख्यानं वृत्तकथाप्रबन्धः। तद्वाचिनः कृदन्तात् कंसवधादिशब्दात् तदाचष्ट इत्यर्थे णिचि कृते णिच्प्रकृत्यवयवभूतस्य कृतः लुक्, तस्यैव कृतः या प्रकृतिः हनादिधातुरूपा, तस्याः प्रत्यापत्तिः, आदेशादिविकारपरित्यागेन स्वरूपेणावस्थानं भवतीत्यर्थः। 'प्रकृतिवच्च कारकम्' इत्यंशस्तु मूल एव व्याख्यास्यते। कंसवधमाचष्टे कंसं घातयतीत्युदाहरणम्। 'हननं वधः'। 'हनश्च वधः' इति भावे हनधातोः अप्प्रत्ययः प्रकृतेः वधादेशश्च। कंसस्य वधः कंसवधः, तद्वाचकाख्यानपरवाक्यसन्दर्भो विवक्षितः। तमाचष्टे इत्यर्थे णिच्। अप्प्रत्ययस्य कृतो लुक् प्रकृतिभूतस्य हनधातोर्वधादेशस्य च निवृत्तिः। तथाच फलितं दर्शयति—इह कंसं हन् इ इति स्थिते इति। हनस्तोऽचिण्णलोः।

चिण्णलोः ७।३।३२॥ हन्तेस्तकारोऽन्तादेशः स्याच्चिण्णल्वर्जे णितिणिति। नन्वत्राङ्गसंज्ञा धातुसंज्ञा च कंसविशिष्टस्य प्राप्ता। ततश्चाङ्द्वित्वयोर्दोषः। किं च कुत्वतत्वे न स्याताम्। धातोः स्वरूपग्रहणे तत्प्रत्यये कार्यविज्ञानात्। सत्यम्। प्रकृतिवच्च इति चकारो भिन्नक्रमः-कारकंच। चात्कार्यम्। हेतुमण्णिचः प्रकृतेर्हन्यादेर्हेतुमण्णौ

'हन' इति षष्ठी। 'त' इत्यत्र अकार उच्चारणार्थः। तदाह—हन्तेस्तकार इति। 'अन्तादेश' इत्यलोऽन्त्यपरिभाषया सिद्धम्। णिति णिति चेति। 'अचो ञ्णिति' इत्यतस्तदनुवृत्तेरिति भावः। तथाच हनो नकारस्य तत्वे 'हो हन्तेः' इति कुत्वेन हस्य घकारे 'घातीति ण्यन्तं फलितम्। ततो लटि 'घातयति' इति रूपं स्थितम्। कृतो लुकि समासनिवृत्तौ सुब्लुकोऽपि निवृत्तौ कंसमिति च स्थितम्। 'आख्यानात् कृतः' इति वार्तिकस्थं 'प्रकृतिवच्च कारक'मित्यंशं शङ्कोत्तरत्वेन योजयिष्यन् शङ्कामवतारयति—ननु इति। कंसविशिष्टस्येति। कंसवधशब्दस्येत्यर्थः। तस्मादेव णिचो' विधानादिति भावः। ननु कंसवधशब्दस्य अङ्गत्वे का हानिरित्यत आह—ननइति। कंसवधशब्दस्याङ्गत्वात् अङ्द्वित्वयोर्विषये दोषः स्यात्। कंसशब्दात्पूर्वमडागमः स्यात्। कंस् ङ्त्यस्य द्विर्वचनं स्यात् इष्यते तु कंसमजीघतत् इत्येवं हनधातोरेवोभयमित्यर्थः। किं चेति। कसं घातयतीति कुत्वप्रवेन न स्यातामित्यर्थः। कुत इत्यत आह—धातोरिति। धातोर्हन् इत्यादितत्तत्स्वरूपेण ग्रहणे सति तत्प्रत्यये धातोर्विहितप्रत्यये कार्यविज्ञानमिति परिभाषयेत्यर्थः। तेन वान्नेमित्यत्र 'हनस्तोऽचिण्णलोः' इति तत्वं न भवतीति 'हनस्तोऽचिण्णलोः' इति सूत्रे भाष्ये स्पष्टम्। तथाच प्रकृते कंसं घातयतीत्यत्र 'हो हन्तेः' इति कुत्वं 'हनस्तोऽचिण्णलोः, इति तत्वं च न स्याताम्। अत्र णिचः प्रातिपदिकाद्विहितत्वेन धातोर्विहित्वाऽभावादित्यर्थः। अत्र प्रत्ययलक्षणेन कृदन्ततया कृत्प्रकृत्यर्थस्य कर्मत्वेन कंसस्येति षष्ठी। स्यादिश्यप्यादेशोऽपि बोध्यः, तत्परिहारस्यापि वक्ष्यमाणत्वात्। तामिमां शङ्कामर्धाङ्गीकारेण परिहरति—सत्यमिति। कंसवधशब्दस्यैवाङ्गत्वमित्यार्धमङ्गीक्रियते दोषापादनं तु नाङ्गीक्रियत इत्यर्थः। प्रकृतिवच्चेतीति। 'आख्यानात् कृतः' इति वार्तिके प्रकृतिवच्चेति चकारः भिन्नक्रमः। 'प्रकृतिव'दित्यनन्तरपठितः चकारः कारकमित्यस्मादूर्ध्वं निवेशनीय इति भावः। तदेवाभिनीय दर्शयति—कारक चेति। चकारोऽयमनुक्तसंग्रहार्थं इत्याह—चात्कार्यमिति। 'समुच्चीयते' इति शेषः। तथाच कारकं कार्यं च प्रकृतिवदिति फलितम्। अत्र प्रकृतिशब्देन हेतुमण्णिचः प्रकृतिर्विवक्षिता, व्यवधानात्। प्रकृताविव प्रकृतिवत्। सप्तम्यन्ताद्वतिः। तदाह—प्रकृतेर्हन्यादेर्हेतुमण्णाविति। 'प्रयुज्यमाने सतीति शेषः। 'कारक'मित्यस्य विवरणं द्वितीयान्तमिति। द्वितीयातृतीयादिकारकविभक्त्यन्तमित्यर्थः। हन्ति कंसं कृष्णः, तं प्रेरयतीत्यर्थे कंसं घातयति, कंसमजीघतदित्यादौ हेतुमण्यन्ते प्रयुज्यमाने यत् द्वितीयादिकारकविभक्त्यन्तं यच्च कार्यं कुत्वतरशङ्कहि-

यादृशं कारकं धातावनन्तर्भूतं द्वितीयान्तं यादृशं च कार्ये कृत्वतत्त्वादि तदिहापीत्यर्थः । कंसमजीघतत् । 'कर्तुःक्यङ्सलोपश्च' (ग सू २०७) कर्तुर्व्यापारार्थं यत्करणं न तु चक्षुरादिमात्रमित्यर्थः । असिना हन्ति असयति । १६१६ वक्ष दर्शने । १६१७ चित्र चित्रीकरणे । आलेख्यकरणे इत्यर्थः । कदाचिद्दर्शने । चित्र इत्ययमद्भुतदर्शने णिचं लभते । चित्रयति । १६१८ अंस समाघाते । १६१९ वट विभाजने । १६२० लज प्रकाशने । वटि लजि इत्येके । वटयति । लज्जयति । अदन्तेषु पाठबलाददन्तत्वे वृद्धिरित्यन्ये । वण्टापयति । लज्जापयति । शाकटायनस्तु कथादीनां सर्वेषां पुकमाह । तन्मते कथापयति गणापयति इत्यादि । १६२१ मिश्र सम्पर्के । १६२२ संग्राम युद्धे । अयमनुदात्तेत् । अकारप्रश्लेषात् । असंसक्तग्रामत । १६२३ स्तोम श्लाघायाम् ।

त्वादि तत्सर्वं 'आख्यानात् कृत' इत्यस्योदाहरणे कंसवधमाचष्टे कंसं घातयति, कंसवधमाचष्ट कंसमजीघतदित्यादावपि भवतीति फलितम् । तत्र कारकमित्यनेन कंसात् षष्ठी निरस्ता, उदाहृतहेतुमण्ण्यन्तस्थले कृयोगाऽभावेन कर्मणि द्वितीयाया एव सत्त्वात् । 'कार्य'मित्यनेन तु कृत्वतत्त्वे कंसस्य अङ्द्वित्वानिरासश्चेति बोध्यम् । आख्यानशब्दश्च कथञ्चिदवृत्तानुवादपरः, न तु भारतादिप्रसिद्धकंसवधादिकथापरः । तेन राजागमनमाचष्टे राजानमागमयतीत्यादि सिध्यति । 'द्वितीयान्तमित्यत्र द्वितीयाग्रहणमुपलक्षणम्' । तेन पुष्ययोगमाचष्टे पुष्येण योजयतीति सिध्यतीति भाष्ये स्पष्टम् । कर्तुःकरणाद्भृत्यर्थे । इदमपि गणसूत्रम् । 'प्रातिपदिकाद्भृत्यर्थे' इत्यस्यैव प्रपञ्चः । कर्तुः करणं कर्तृकरणं, न तु कर्ता च करणं च इति द्वन्द्वः व्याख्यानात् । तदाह—कर्तुर्व्या पारार्थमिति । अभिमतफलोत्पादनार्थमित्यर्थः । साधकतमामिति यावत् । नन्वेवं सति 'करणाद्भृत्यर्थे' इत्येव सिद्धे कर्तृग्रहणं व्यर्थमित्यत आह—न तु चक्षुरादिमात्रमिति । कर्तृग्रहणं विहाय करणादित्येवोक्तौ चक्षुरादीन्द्रियमेव सुप्रसिद्धत्वात् करणादिति शब्देन गम्येत । अतः कर्तृग्रहणमित्याहुः । वस्तुतस्तु 'साधकतमं करणम्' इति शास्त्रप्रसिद्धकरणस्य ग्रहणौचित्यात् कर्तृग्रहणं स्पष्टार्थमेव । केचित्तु कर्तृकरणादिति द्वन्द्वमाश्रित्य 'देवदत्तेन वाक्यति देवदत्तयतीति कर्तुरुदाजहुः कदाचिद्दर्शने इति । चित्रेत्यनुवर्तते । तदाह—चित्र इत्ययमिति । कदाचिद्दर्शने इत्यस्य विवरणम्—अद्भुतदर्शने इति । चित्र चित्रीकरणकदाचिद्दर्शनयोरित्येव सुवचम् । वटि लजि इत्येके इति । ननु कथादावनयोः पाठो व्यर्थः । इदितोरनयोः टकारजकारान्तयोरदन्तत्वस्याऽप्रसक्तेः फलाभावोऽपेक्ष्येत आह—अदन्तेष्विति । अदन्तेषु पाठबलात् वण्ट लज्जेति कदाचिददन्तत्वमप्यनयोर्ज्ञाते । अदन्तत्वस्य च फलाभावादतो लोपं बाधित्वा 'अचो ञ्णिति' इति वृद्धौ 'अतिही' इति पुगित्यर्थः । फलितमाह—वण्टापयतीति । शाकट-

अतुस्तोमत्। १९२४छिद कर्णभेदने। करणभेदने इत्यन्ये। कर्ण इति धात्वन्तरमित्यन्ये। १९२५अन्ध दृष्ट्युपघाते। उपसंहारे इत्यन्ये। आन्दधत् १९२६ दण्ड दण्डनिपातने। १९२७ अङ्क पदे लक्षणे च। आङ्कत्। १९२८अङ्क च। आंकगत्। १९२९सुख १९३०दुःख तत्क्रियायाम्। १९३१रस आस्वादनस्नेहनयोः। १९३२व्यय वित्तसमुत्सर्गे। अव्ययत्। १९३३रूप रूपक्रियायाम्। रूपस्य दर्शनं करणं वा रूपक्रिया। १९३४छेद द्वैधीकरणे। अच्चिच्छेदत्। १९३५ छद अपवारणे इत्येके। छदयति। १९३६ लाभ प्रेरणे। १९३७ व्रण गात्रविचूर्णने। १९३८ वर्ण वर्णक्रियाविस्तारगुणवचनेषु। वर्णक्रिया वर्णकरणम्। सुवर्णं वर्णयति। कथां वर्णयति। विस्तृणातीत्यर्थः। हरिं वर्णयति। स्तौतीत्यर्थः। 'बहुलमेतन्निदर्शनम्' (ग सू२०८) अदन्तधातुनिदर्शनमित्यर्थः। बाहुलकादन्येऽपि बोध्याः। तद्यथा-१९३९पर्ण हरितभावे। अपपर्णत्। १९४०विष्क दर्शने। १९४१क्षिप प्रेरणे। १९४२वस निवासे। १९४३तुस्थ आवरणे। एवमान्दोलयति। प्रेङ्खोलयति। विडम्बयति। अवधीरयति इत्यादि। अन्ये तु दशगणीपाठो बहुलम् इत्याहुः। तेनापठिता अपि सौत्रलौकिकवैदिका बोध्याः। अरे

यनस्विति। ऋविशेषोऽयम्। संग्राम युद्धे। गणसूत्रमिदम्। युद्धवाचि संग्रामेति प्रातिपदिकं करोत्यर्थे णिचं लभते इत्यर्थः। ननु 'प्रातिपदिकाद्धात्वर्थे' इत्येव सिद्धे किमर्थमिदमित्यत आह—अनुदात्तेदिति। एतदात्मनेपदार्थमिति भावः। ननु संग्रामशब्दस्य प्रातिपदिकस्य अकारान्तत्वात् कथमनुदात्तेत्वमित्यत आह—प्रकारप्रश्लेषादिति। संग्रामशब्दादनुदात्तानुनासिकं पररूपेण प्रश्लिष्टस्य निर्देशादिति भावः। असंग्रामेति। युक्ति चक्रि संग्रामशब्दस्य पयन्तस्य अङ्गत्वात् ततः प्रागडिति भावः। एतच्च भृशादिसूत्रे कैयटे स्पष्टम्। अरलोपित्वाच्चोपधाहस्वः। सुख दुःख तत्क्रियायाम्। सुखानुकूले दुःखानुकूले च व्यापारे इत्यर्थः। सुख दुःखेति प्रातिपदिकाभ्यां तत्करोतीत्यर्थे णिच् स्यादिति यावत्। 'प्रातिपदिकाद्धात्वर्थे' इत्येव आभ्यां णिजित्याहुः। बहुलमेतन्निदर्शनम्। गणसूत्रमिदम्। एतेषां कथादीनाम् अदन्तानां निदर्शनं पाठ इत्यर्थः। तदाह—अदन्तेति। बहुलग्रहणस्य फलमाह—बाहुलकादिति। अपपर्णेदिति। अरलोपित्वाच्च सन्वत्वमिति भावः। क्षिप प्रेरणे। क्षिपयति। अरलोपस्य स्थानिवत्त्वाच्च गुणः। एवमग्रेऽपि। वस निवासे। वासयति। अदन्तत्वाच्चोपधावृद्धिः। आन्दोलयतीत्यादौ अदन्तत्वेन अरलोपित्वाच्चोपधाहस्वः। तदेवं 'बहुलमेतन्निदर्शनम्' इत्यस्य कथाद्यदन्तविषयत्वमुक्त्वा मतान्तरमाह—अन्ये त्विति। भ्वादिः, अदादिः, जुहोत्यादिः, दिवादिः, स्वादिः, तुदादिः, रुधादिः, तनादिः, क्रयादिः, चुरादिरिति दशगणी, तद्बहिर्भूता अपि सौत्राः जुप्रभृतयः, लौकिकाः प्रेङ्खोलादयः, वैदिकाः 'तद्रात्रिभिरसुभ्रन्' इत्यादौ सुभ्रादयश्च संगृहीता भवन्ती-

रूपलेखन-पङ्क्तिलेखनप्रकारः

"हलादिः शेषः" इत्यस्य तथा व्याख्यानं कुरुत, येन 'आट, आटतुः' इत्यत्र दोषो न भवेत्। "हलादिः शेषः" अभ्यासस्यादिर्हल् शिष्यते, अन्ये हलोलुप्यन्ते इति सूत्रार्थे 'पपाच' इत्यादौ अभ्यासस्यादिर्हल् वर्तते, तत्र अन्यहलो लोपो भवति। ननु 'आट, आटतुः' इत्यादौ तु अभ्यासस्याद्यक्षरो हल् नास्ति तत्र कथं हल्लोपः स्यादिति चेदुच्यते—"हस्वोऽ-हलादिः शेषः" इति संहितापाठं, अभ्यासस्य हस्वो भवतु। ततोऽभ्यासोऽहल् भवतु-हलर्ह-तो भवतु, ततोऽभ्यासस्यादिः शिष्येत्, अभ्यासस्याद्यक्षरो वर्तता नाम इति वाक्यार्थत्रयेण जादिधातुष्वपि अभ्यासोऽहल् भवतु इति वाक्यार्थेन न काप्यनुपपत्तिरिति दिक्।

'येन नाव्यवधानम्' इत्यस्याभिप्रायो दर्शनीयः। ननु "पुगन्तलघूपधस्य च" इत्यत्र "सार्वधातुकार्धधातुकयोः" इत्यस्याङ्गविशेषणत्वे सार्वधातुकार्द्धधातुकाऽव्यवहितस्याङ्गस्यैको गुणो भवतीत्यर्थकरणे भिनत्तीत्यत्रापि गुणापत्तिः, तयोरिको विशेषणत्वे तु 'भेत्ता' इत्यत्रापि गुणो न स्यात्तकाररूपरयैकवर्णस्य व्यवधानेन सार्वधातुकाऽव्यवहितत्वाऽभावादित्याशङ्क्य समाधत्ते—'येन नाव्यवधानं तेन व्यवहितेऽपि भवति' इति। यद्वर्णकर्तृकव्यवधानशून्यत्वं न सम्भवति तद्वर्ण्यव्यवधानेऽपि भवतीति तदर्थः। तथाच सूत्रसार्थक्यायैकवर्णव्यवधाने प्रवृत्ताव-यनेकवर्णव्यवधानेऽप्रवृत्त्या 'भेत्ता' इत्यत्र गुणो जातः, 'भिनत्ती'त्यादौ तदभावश्च। "दीधी-वेवीटाम्" इत्यत्रयेङ्ग्रहणस्यैवात्र ज्ञापकत्वम्। एवञ्च अस्मिन्निषेधसूत्रे गुणाऽभावार्थमेवेटो ग्रहणम्, उक्तरीत्या गुणाऽभावोपपादनेन व्यर्थमेवेटो ग्रहणं; ज्ञापिते तूक्तार्थे सर्वं समञ्जसम्।

भवतात् इत्यत्रापवादभूतस्यापि "ङिच्च" इत्यस्य कथमुत्सर्गेण बाधो दर्शितः? तत्सङ्गतार्थतां प्रदर्शयत। 'परनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीयः' इति परापेक्षयाऽपवा-दस्य प्रबलत्वात् भवतादित्यादिषु "ङिच्च" इत्यन्तादेशत्वमेव युक्तमिति चेद्, सत्यम्। तथापि अन्तादेशत्वादन्यार्थशून्येषु आनञादिषु चरितार्थो "ङिच्च" इति विधिः, द्विष्टादित्यादौ लघू-पधादिगुणनिषेधेन, स्तुतात् स्तुतादित्यादौ "उतो वृद्धिर्लुकि हलि" इति विहिताया वृद्धेर्निषेधेन उष्टादित्यत्र सम्प्रसारणेन च सम्भवत्प्रयोजने तातङो ङकारे मन्दं मन्दं प्रवृत्तः सन् परेणोत्स-र्गसूत्रेण बाध्यते। ननु तातङ्विषये "ङिच्च" इति विधिर्मन्दं प्रवर्तताम्, तथापि पूर्वोक्तपरि-भाषया परस्यापि सर्वादेशविधेरपवादभूतेन "ङिच्च" इत्यनेन बाध एवोचितः। सत्यम्। तथापि इहोत्सर्गापवादयोर्द्वयोरपि समबलत्वम्। अपवादशास्त्रस्य हि परनित्यान्तरङ्गापेक्षया प्राबल्ये निरवकाशत्वमेव बीजम्। तेन "ङिच्च" इति विधिः आनञादिङित्त्वमन्तादेशत्वैकप्र-योजनकं प्रयोजनान्तरविरहेण निरवकाशत्वात् झटिति परिगृह्णन् कृतार्थतामनुभवन् तातङो ङित्त्वं प्रयोजनान्तरसत्त्वेन सावकाशत्वादुपेक्षते।

धातुटो ङित्करणेन 'भूयात्' इत्यत्र गुणाभावरूपस्य फलस्य सत्त्वेऽपि कथं "ङिच्चा-क्तेः" इत्यादिग्रन्थेन प्रतिपादितो दीक्षितताभिप्रायः सङ्गच्छते। कथं वा ङिच्चोक्ते

रूपलेखन-पङ्क्तिलेखनप्रकारः

"हलादिः शेषः" इत्यस्य तथा व्याख्यानं कुरुत, येन 'आट, आटतुः' इत्यत्र दोषो न भवेत्। "हलादिः शेषः" अभ्यासस्यादिर्हल् शिष्यते, अन्ये हलोलुप्यन्ते इति सूत्रार्थः 'पपाच' इत्यादौ अभ्यासस्यादिर्हल् वर्तते, तत्र अन्यहलो लोपो भवति। ननु 'आट, आटतुः' इत्यादौ तु अभ्यासस्याद्यक्षरो हल् नास्ति तत्र कथ हल्लोपः स्यादिति चेदुच्यते—"हलादिः शेषः" इति संहितापाठ, अभ्यासस्य ह्रस्वो भवतु। ततोऽभ्यासोऽहल् भवतु-हल्लोपो भवतु, ततोऽभ्यासस्यादिः शिष्येत्, अभ्यासस्याद्यक्षरो वर्तत नान इति वाक्यार्थत्रयेण। जादिधातुष्वपि अभ्यासोऽहल् भवतु इति वाक्यार्थेन न कोप्यनुपपत्तिरिति दिक्।

'येन नाव्यवधानम्' इत्यस्याभिप्रायो दर्शनीयः। ननु "पुगन्तलघूपधस्य च" इत्य "सार्वधातुकार्धधातुकयोः" इत्यस्याङ्गविशेषणत्व सार्वधातुकार्द्धधातुकाऽव्यवहितस्याङ्गस्यैको गुणो भवतीत्यर्थकरणे भिनत्तीत्यत्रापि गुणापत्तिः, तयोश्चो विशेषणत्वे तु 'भेत्ता' इत्यत्रापि गुणो न स्यात्तकाररूपयैकवर्णस्य व्यवधानेन सार्वधातुकाऽव्यवहितत्वाभावादित्याशङ्क्य समाधत्ते—'येन नाव्यवधानं तेन व्यवहितेऽपि भवति' इति। यद्वर्णकृतव्यवधानशून्यत्वं न सम्भवति तद्वर्णव्यवधानेऽपि भवतीति तदर्थः। तथाच सूत्रसार्थक्यायैकवर्णव्यवधाने प्रवृत्तावपि यनेकवर्णव्यवधानेऽप्रवृत्त्या 'भेत्ता' इत्यत्र गुणो जातः, 'भिनत्ती'त्यादौ तदभावश्च। "दीधीवेवीटाम्" इत्यत्रत्येड्ग्रहणस्यैवात्र ज्ञापकत्वम्। एवञ्च अभिन्नत्वेषधसूत्रे गुणाऽभावार्थमेवेटो ग्रहणम्, उक्तरीत्या गुणाऽभावोपपादनेन व्यर्थमेवेटो ग्रहणः ज्ञापते तूक्तार्थं सर्वं समञ्जसम्।

भवतात् इत्यत्रापवादभूतस्यापि "ङिच्च" इत्यस्य कथमुत्सर्गेण बाधो दर्शितः? तत्सङ्गतार्थतां प्रदर्शयत। 'परानित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीयः' इति परिभाषाऽपवादस्य प्रबलत्वात् भवतादित्यादिषु "ङिच्च" इत्यन्तादेशत्वमेव युक्तमिति चेद्, सत्यम्। तथापि अन्तादेशत्वादन्यार्थशून्येषु आनङादिषु चरितार्थो "ङिच्च" इति विधिः, द्विष्टादित्यादौ लघूपधादिगुणनिषेधेन, स्तुतात् युतादित्यादौ "उतो वृद्धिर्लुकि हलि" इति प्राप्तायाः वृद्धेर्निषेधेन उष्टादित्यत्र सम्प्रसारणेन च सम्भवत्प्रयोजनेन तातङो ङकारे मन्द मन्द प्रवृत्तिः सन् परेणोत्सर्गेणार्पवादेन बाध्यते। ननु तातङ्विषये "ङिच्च" इति विधिर्मन्दं प्रवर्तताम्, तथापि पूर्वोक्तपरिभाषया परस्यापि सर्वादेशविधेरपवादभूतेन "ङिच्च" इत्यनेन बाध उचितः। सत्यम्। तथापि इहोत्सर्गापवादयोर्द्वयोरपि समबलत्वम्। अपवादशास्त्रस्य हि परानित्यान्तरङ्गापेक्षया प्राबल्ये निरवकाशत्वमेव बीजम्। तेन "ङिच्च" इति विधिः आनङादिसत्वमन्तादेशत्वैकप्रयोजनकं प्रयोजनान्तरविरहेण निरवकाशत्वात् झटिति परिगृह्णन् कृतार्थतामनुभवन् तातङो ङित्त्वं प्रयोजनान्तरसत्त्वेन सावकाशत्वादुपेक्षते।

वासुटो ङिच्करणेन 'भूयात्' इत्यत्र गुणाभावरूपस्य फलस्य सत्त्वेऽपि कथं "ङित्त्वोक्तेः" इत्यादिग्रन्थेन प्रतिपादितो दीक्षितताभिप्रायः सङ्गच्छते। कथ वा ङित्त्वोक्त

परित्यज्य शानचः शित्त्वमाश्रितमित्युदाहरणपुरस्सरं लेखसोष्ठवेन व्याख्येयम्। भूयादित्यत्र यासुटो ङित्त्वस्य गुणाभावरूपं न फलं, गुणाभावस्य लिङो ङित्त्वेनैव सिद्धत्वात्। 'यदागमा' इति न्यायेन यासुडागमो लिङादेशपरस्मैपदावयवः। अवयवे कृतं ङित्त्वमानर्थक्यात्तदङ्गन्यायेन समुदाये आगमविशिष्टतिबादौ विश्राम्यति, ततश्च स्थानिवत्वेनैव ङित्त्वसिद्धेर्यासुटो ङित्त्वविधिव्यर्थः। न च स्थानिभूतलिङो लकारस्याल इत्त्वेन गुणनिषेधविधावाश्रयणादनलिबधाविति निषेधः शङ्क्यः। "घुमास्थागापाजहातिसां हलि" इति "कृङिति" विहितस्य ईत्त्वस्य "न ल्यपि" इति निषेधेनानुबन्धकार्येऽनलिबधाविति निषेधाभावज्ञापनादतो दीक्षिताभिप्रायः सङ्गत एव। ननु क्वचिदनुबन्धकार्येऽप्यनलिबधाविति निषेध इत्यत्र यासुटो ङित्त्ववचनं ज्ञापकं भवितुं नार्हति। अनुबन्धकार्ये सर्वत्रानलिबधाविति निषेधाभावे सत्यपि यासुटो ङित्त्वस्य तिप्सिप्मिवागमयासुटो ङित्त्वार्थमावश्यकत्वात्। नहि लिङादेशत्वेऽपि तिपसिप्मिपां ङित्त्वं स्थानिवत्त्वलभ्यम्। "हलः श्नः शानज्झौ" इति सूत्रभाष्ये "ङिच्च पिन्न पिच्च ङिन्न" इति प्रपञ्चितत्वात्। अत एव रुधादित्यादौ विशेषविहितेन ङित्त्वेन पित्त्वस्य बाधात् "उतो वृद्धिर्लुकि हलि" इति न प्रवर्तते इत्यपरितोषात् ङित्त्वोक्तिः परित्यज्य शानचः शित्त्वमाश्रितम्।

यासुटो ङित्करणस्य प्रयोजनं निरूप्य। "न ल्यपि" इति सूत्रेणाऽनु बन्धकार्ये कर्तव्ये "अनलिबधौ" इति निषेधो न प्रवर्तते इति ज्ञापितेन स्थानिवद्भावात् लिङ्वृत्तिङित्त्वधर्मस्यानयनेन ङित्त्वप्रयुक्ते कार्ये सिद्धे "यासुट् परस्मैपदेषूदात्तो ङिच्च" इति सूत्रे ङिद्ग्रहणं व्यर्थमेव। तदेव व्यर्थं सत् 'क्वचिदनुबन्धकार्येऽपि "अनलिबधौ" इति निषेधः प्रवर्तते' इति ज्ञापयति। तेन 'वक्ष्यमाणा' इत्यत्र ङीपोऽभावः सिद्ध इति फलम्। न च भाष्ये "पिच्च ङिन्न ङिच्च पिन्न" इति व्याख्यानादौपदेशिकत्वेन तिबादिवृत्तिपित्त्वेन आरोपितो लिङ्वृत्तिङित्त्वधर्मो बाध्यते इति "यासुट्" इति सूत्रे ङिद्ग्रहणं सफलमिति वाच्यम्? "हलः श्नः शानज्झौ" इत्यत्र पूर्ववत्स्थानिवत्त्वेन शित्त्वधर्मस्य आनयनेन सिद्धौ व्यर्थीभूतेन शानज्झुटकशकारेण पूर्वार्धस्य ज्ञापितत्वात्।

"अतो येयः" इत्यत्र 'सार्वधातुके' इत्यनुवृत्तेः फलं लिख। "अतो येयः" इत्यत्र सार्वधातुकपदाननुवृत्तौ मध्ये पठिता अपवादाः पूर्वान् विधीन् बाधन्ते नोत्तरान्" इति न्यायात् "अतो येयः" इति शास्त्रम् "अतो लोप" इत्यस्यैव बाधको भवेत्, न तु "अतो दीर्घो यञि" इति सूत्रस्य। एवञ्च 'चिकीर्ष्यात्' इत्यत्र इयादेशापत्तिः, भवेदित्यत्र च परत्वाद् "अतो दीर्घो यञि" इति सूत्रेण दीर्घापत्तिरिति दोषद्वयपरिहारार्थं सार्वधातुकपदानुवृत्तिः कार्येति दिक्।

'भवेयुः' इत्यत्र "उस्यपदान्तात्" इत्यस्य प्राप्तिः कथं वारिता। 'भवया—उस्' इति जाते अत्र परत्वान्नित्यत्वाच्च "उस्यपदान्तात्" इति सूत्रं बाधित्वा "अतो येयः" इति इयादेशे 'भवेयुः' इति प्राञ्चः। वस्तुतस्तु सार्वधातुकसंज्ञानिरपेक्षस्य "उस्यपदान्तात्" इति सूत्रस्यान्तरङ्गत्वेन परत्वान्नित्यत्वाच्च प्रथमेव प्राप्यं स्यादिति "अतो येयः" इति सूत्रस्य सार्वधातुकावयवस्य यास् इत्यस्यैवादेशः स्यादिति व्याख्या कार्या। तेन च सञ्ज्ञोपसर्जनापवाद इय् स्यात्। न च 'अतो यास् इय्' इत्यत्र सत्यस्य रुत्वे यत्वे लोपे च सति यञोपस्यासिद्धत्वाद् गुणो न भवतीति वाच्यम्। [illegible]इति दिक्।

'प्रत्यये किम् ? ववश्च, इमां फक्किकां यथार्थं प्रतिपादय। ओव्रश्चू छेदने, लिटि णल् द्वित्वं "लिट्यभ्यासस्य" इति अभ्यासेरफस्य सम्प्रसारणम् ऋकारः। उरत्। रपरत्वम्। हलादिः शेषः। 'वव्रश्च' इति रूपम्। "उरत्" इत्यत्र अङ्गस्याधिकारो वर्तते। ततश्चाङ्गावयवाभ्यासकारस्याऽत्यात्प्रत्यये परे इति सूत्रार्थो भवति। एवञ्चात्त्वादेशः परिनिमित्तो भवतीति वकारस्य सम्प्रसारणे कर्तव्ये "अचः परस्मिन् पूर्वविधौ" इति सूत्रेण ऋकारवृत्तिसम्प्रसारणत्वमकारे आनीय "न सम्प्रसारणे सम्प्रसारणम्" इति सूत्रेण वकारस्य सम्प्रसारणं न भवति। यदि अङ्गेन प्रत्ययस्याक्षेपो न स्यात्तदा "अचः परस्मिन्" इति सूत्राप्रवृत्त्या वकारस्य सम्प्रसारणं स्यादेव।

आमो मकारस्येत्वाभावं निरूप्य "कृञग्रहणसामर्थ्यादन्यस्याप्रयोगे प्रमाणं दर्शय। ननु "इजादेश्च गुरुमतोऽनृच्छः" इत्येतत्सूत्रविहिताऽऽमघटकमकारस्य हलन्तेन इत्संज्ञा स्यादिति चेद् ? न। आस्धातोः कास्धातोश्च "दयायासश्च" "कास्प्रत्ययादाममन्त्रे लिटि" इति आम्विधानसामर्थ्यात्। यत्र मकारस्येत्संज्ञा स्यात्तदा आस्धातोः कास्धातोश्चाऽऽम्विधानं व्यर्थं स्यात्तत्रापीत्संज्ञाया दुर्वारत्वादिति तत्सामर्थ्यादित्संज्ञाऽभावकल्पनेन न प्रकृते काप्यापत्तिः। नच मित्त्वादन्यादचः परत्वसामर्थ्यादसंजातविरोधिन्यायेन सवर्णदीर्घस्यैव बाधोऽस्तिति वाच्यम्। सवर्णदीर्घबाधापेक्षया इत्संज्ञाबाधस्यैव समुचितत्वात्। ननु "कृञ्चानुप्रयुज्यते" इत्यतः कृञोऽनुवृत्त्यैव सिद्धे "आम्प्रत्ययवत्कृञोऽनुप्रयोगस्य" इत्यत्रत्यकृञ्ग्रहणं फलाभावद्वयर्थं सञ्ज्ञापयति—भवत्यन्यस्याऽप्यनुप्रयोगः। तेन "कृभ्वस्तियोगे सम्पद्यमाने कर्तरि च्विः" इत्यत्र कृशब्दमादाय "कृञो द्वितीया" इत्येतद्घटकत्वेन कृञ्प्रत्याहाराश्रयणेन कृभ्वस्तीनामनुप्रयोगलाभः। तेषां कृभ्वस्तीनां क्रियासामान्यवाचकत्वेनाऽऽम्प्रकृतीनां क्रियाविशेषवाचित्वेन तदर्थयोरभेदान्वयः सामान्यविशेषयोर्धर्मो नीलघट इत्यादौ विधेयांशेऽधिकावगाहिशाब्दबोधस्य नवीनैरभ्युपगमात्। नचोक्तरीत्या कृभ्वस्तिलाभे सम्पदोऽपि प्रत्याहारान्तर्गतत्वेन लाभात्किमुतो न प्रयोग इति वाच्यम्। तस्य तथात्वेऽपि अनन्वितार्थत्वेन अप्रयोगात्। तथा च-एधाञ्चक्रे इत्यादित एककर्तृकभूतानद्यतनपरोक्षकालिकधृद्वयभिन्नक्रियेति शाब्दबोधः।

'इन्दाञ्चकार' इत्यत्रापि कुतो न तङिति साधु वदत। नन्विन्दाञ्चकारेत्यादौ परगामिनि क्रियाफले "आम्प्रत्ययवत्" इति सूत्रेण मास्त्वात्मनेपदम् 'इदि परमैश्वर्ये' इति धातोः परस्मैपदित्वेनात्मनेपदाभावात्। आत्मगामिनि तु क्रियाफले "स्वरितञितः" इत्यात्मनेपदं दुर्वारम्। अस्य सूत्रस्य एधाञ्चक्रे इत्यादौ परगामिनि क्रियाफले आत्मनेपदस्याप्राप्तस्य विधान एव समर्थतया तत्रात्मनेपदस्य निवारणे सामर्थ्याभावात् इति प्रष्टुराशयः। उत्तरयितुस्त्वयमाशयः—अस्मिन् सूत्रे "पूर्ववत्सनः" इति पूर्वसूत्रात्पूर्ववदित्यनुवर्त्य "आम्प्रत्ययवत्कृञोऽनुप्रयोगस्य" इत्येकं वाक्यं, "पूर्ववत्कृञोऽनुप्रयोगस्य" इति द्वितीयं वाक्यम्। तत्र पूर्ववदिति तृतीयान्ताद्वतिः। पूर्वेण पूर्वप्रयुक्तेन एधादिधातुना तुल्यमित्यर्थः। तत्र वाक्यद्वयस्य समानार्थकत्वे वैयर्थ्याद् द्वितीयं वाक्यं नियमार्थं सम्पद्यते पूर्ववदेवात्मनेपदं नतु तद्विपरीतमिति। एवञ्च पूर्ववाक्येन एधाञ्चक्रे इत्यादौ कृञः परगामिन्यपि क्रियाफले आत्मनेपदविधिः, द्वितीयवाक्येन तु इन्दाञ्चकारेत्यादौ कर्तृगामिनि क्रियाफले "स्वरितञित" इत्यात्मनेपदस्य निवृत्तिः क्रियते।

"एकाच उपदेशेऽनुदात्तात्" इति सूत्रे एकाचग्रहणस्य प्रयोजनमुपपाद्य । ननु ऊदन्तैरित्यादिना परिगणितानामनुदात्तोपदेशधातूनामेकाच्त्वाव्यभिचारादेकाज्ग्रहणं मास्तु । 'उपदेशेऽनुदात्तात्' इत्येवास्तु । एतावतैव कर्तृ चकृषे इत्यादाविड्निषेधसिद्धेरिति प्रष्टुराशयः । उत्तरदित्सोस्त्वयमाशयः । यङ्लुकि चकेरितेत्यादौ इण्निषेधव्यावृत्तये एकाज्ग्रहणम् । न च कृतेऽप्येकाज्ग्रहणे कथं यङ्लुग्व्यावृत्तिः । कृते द्वित्वेऽनेकाच्त्वेऽपि धातूपदेशे एकाच्त्वादिति वाच्यम् । "स्तिपाशपाऽनुबन्धेन" इत्यादिकारिकया तन्निषेधात् । एवञ्च व्यर्थीभूतेनानेनैकाज्ग्रहणेनैव ज्ञाप्यते । न च स्तिपाशपाधंशे कथमिदं ज्ञापकमिति शङ्क्यम् । एकदेशानुमतिद्वारा सर्वत्र ज्ञापनस्य "उपपदमतिङ्" इत्यादौ दृष्टत्वात् ।

'आदेशश्चेह वैरूप्यसम्पादक एव गृह्यते, शसिदघोः प्रतिषेधवचनाज्ज्ञापकात्' इयं फक्किका व्याख्येया । "अत एकहल्मध्येऽनादेशादेर्लिटि" इति सूत्रेऽनादेशादेरिति पदं आदेश आदौ यस्य स आदेशादिः न आदेशादिरनादेशादिस्तस्येति समासे जाते आदेशपदेन यो हि वैरूप्यस्य रूपान्तरस्य सम्पादकः—कारकः, स एव ग्राह्यः । यथा—'जगाद' इत्यत्र गकारस्य जकारादेशो भवति । तत्र गकारस्यान्यद्रूपं जायते । तथा च दधधात्वादौ दकारस्य दकाररूपादेशे जातेऽपि एत्वाभ्यासलोपौ भवत एव । प्रमाणञ्चात्र "न शसददवादिगुणानाम्" इति सूत्रे एत्वप्रतिषेधार्थं शसिदघोः पाठः । अन्यथा आदेशपदेन यदि सामान्यादेशस्य ग्रहणं स्यात्तदा शसिदघोरपि "अभ्यासे चर्च" इति सूत्रेण शकारस्य शकाररूपादेशो दकारस्य च दकाररूपादेशो भवत्येवेति तत्रैतद्विधायकसूत्राप्रवृत्तौ निषेधकशास्त्रे तयोः पाठो निष्फल एव ।

षोपदेशकारिका व्याख्यायताम् । षोपदेशान् संगृह्णाति—"सेक्-सूप्-सू-स्तृ-सूज्-स्तु-स्त्याऽन्ये दन्त्याजन्तसादयः । एकाचः षोपदेशाःष्वष्क्-ष्विद्-ष्वद-ष्वञ्ज-ष्वप्-ष्मिङः ॥" इति । सेगिति—दन्त्याजन्तसादयः एकाचः षोपदेशाः स्युरित्यन्वयः । दन्त्यश्च अच्च दन्त्याचौ तौ अन्तौ अव्यवहितपरौ यस्य स दन्त्याजन्तः, तथाविधः सः—सकारः आदिर्येषां ते दन्त्याजन्तसादयः । दन्त्यपरकोऽच्परकश्च यः सकारस्तदादय एकाचो धातव इदानीं कृतसत्वास्सकारादित्वेन परिदृश्यमाना अपि षकारादित्वेनोपदिष्टा इति प्रत्येतव्या इत्यर्थः । नन्वेवं सेकृप्रभृतीनामपि षोपदेशत्वं स्यात्, आद्यानां चतुर्णामच्परकसादित्वादन्त्यानाञ्च त्रयाणां दन्त्यपरकसादित्वादतः सेकृप्रभृतीन्वारयति । नन्वेवमपि ष्वष्कादीनामसङ्ग्रहः स्यात्, एषु सकारस्य दन्त्याच्परकत्वाभावात्, अतस्तान्संगृह्णाति—ष्वष्केत्यादिना । अत्र दन्त्यपदेन केवलदन्त्यो गृह्यते, न तु दन्त्योष्ठजोऽपि ष्वष्कादीनां पृथग्ग्रहणज्ञापकात् ।

"तस्मान्नुड् द्विहलः" इति सूत्रे ऋकारैकदेशस्य रेफस्य हल्त्वेन ग्रहणे द्विहल्ग्रहणस्यानेकहल्लक्षणत्वे च प्रमाणं प्रदर्शयत । "तस्मान्नुड् द्विहलः" इति सूत्रे ऋकारैकदेशस्य रेफस्य हल्त्वेन ग्रहणे इदं प्रमाणम्—'एओङ्' 'ऐऔच्' इति हि सूत्रभाष्ये "नुड्विधिलादेशविनामेषु ऋकारग्रहणं कर्तव्यम्" इति प्रतिपाद्य 'वर्णैकदेशा वर्णग्रहणेन गृह्यन्ते' इति समर्थितम्। इदमेव च तत्र मानम् । द्विहलग्रहणस्यानेकहल्लक्षणत्वे च द्विग्रहणमेव प्रमाणम् ।

अन्यथा हल इत्येव विदध्यात्। आत आटेत्यादौ एकहल्धातुषु तु न दोषः "अश्नोतेश्च" इति नियमात् तस्मादुक्तार्थे प्रमाणं प्रदर्शितम्।

'उवोख' इत्यत्रामोऽभावं निरूप्य 'ऊखतुः' इति रूपं शङ्कानिरासपूर्वकं साधय। उखधातोः "परोक्षे लिट्" इति लिटि, तिपि, णलि, द्वित्वे, अभ्यासकार्ये कृते 'उ उख् अ' इति भूते "पुगन्तलघूपधस्य च" इति गुणे "अभ्यासस्यासवर्णे" इत्युवङि 'उवोख' इति जायते। न च अत्र इजादिगुरुमत्वात् आम् स्यादिति वाच्यम्। सन्निपातपरिभाषाविरोधात्। तथाहि—आर्धधातुकाव्यवहिताङ्गावयव इक् इत्याकारकसम्बन्धेन जायमानो गुणादेशो गुरुमत्वेन इगाधधातुकयोर्मध्ये पतिष्यतः आमप्रत्ययस्य निमित्तं न स्यात्। उखधातोः "परोक्षे लिट्" इति लिटि, लिटस्तसि, "परस्मैपदानां णलतुसुस्थल०" इत्यादिना अतुसि द्वित्वे अभ्यासकार्ये उ उख् इति स्थितेऽङ्गाधिकारत्वात् "वार्णादाङ्गं बलीयः" इति परिभाषया 'पर्जन्यवल्लक्षणप्रवृत्तिर्भवति' इति युक्त्या पूर्वं ह्रस्वो भवति ततो दीर्घः। दीर्घे च कृते "लक्ष्ये लक्षणं सकृदेव प्रवर्तते" इति न्यायात् पूर्वान्तवद्भावेनैकादेशे प्राप्तो ह्रस्वो न भवति। परत्वाच्चेत्यस्यायमाशयः—"अकः सवर्णे दीर्घः" इति सूत्रस्य परत्वान्नाम परकालेन प्रवृत्तत्वात्। तथा च "हलादिः शेषः" इति सूत्रात्पूर्वं ह्रस्वस्ततः खनोपस्ततो दीर्घः। एवञ्चैकस्मिन् काले ह्रस्वदीर्घयोः प्रवृत्त्यभावेन "वार्णादाङ्गम्" इति परिभाषाया विषय एव नास्तीति दीर्घे कृते 'लक्ष्ये लक्षणम्' इति न्यायाद्ध्रस्वाभावः।

'विव्यतुः' इति शङ्कानिरासपूर्वकं साधय। अजधातोः "परोक्षे लिट्" इति लिटि, "लिट् च" इति आर्धधातुकसंज्ञायाम् "अजेर्व्यघञपोः" इति वीभावे सति लिटोऽतुमि "लिटि धातोरनभ्यासस्य" इति द्वित्वे अभ्याससंज्ञायाम् अभ्यासकार्ये च कृते "असंयोगाल्लिट् कित्" इति लिटः कित्त्वाद्गुणाभावे इयङ्पवादे "एरनेकाच" इति यणि 'विव्यतुः' इति रूपम्। नन्वत्र द्वितीयवकारस्य यकारात्मकहल्परकत्वात् "उपधायाञ्च" इति इकारस्य दीर्घः स्यादिति चेद्? न। ईकारस्थानिकस्य यकारस्य "अचः परस्मिन्" इति स्थानिवत्त्वेन हल्परत्वाभावात्। न च "न पदान्त" इति स्थानिवद्भावस्य निषेधः स्यादिति शङ्क्यम्, "स्वरदीर्घयलोपेषु लोपाजादेश एव न स्थानिवत्" इत्युक्तेः।

क्रादीनां चतुर्णां ग्रहणस्य नियमार्थत्वमुपपाद्य नियमाकारः स्पष्टमुपपादनीयः। ननु "कृसृभृ" एषां त्रयाणामनुदात्तत्वात् "एकाच उपदेशेऽनुदात्तात्" इत्यनेन वृञ उदात्तत्वात् "श्रयुकः किति" इत्यनेन थलोऽकित्वात् "श्रयुकः किति" इत्यस्याप्रवृत्त्या 'ववर्थ' इति वेदे निर्देशाच्च सर्वत्रैवेण्निषेधे सिद्धे चतुर्णां ग्रहणं व्यर्थं सत् "एकाच उपदेशेऽनुदात्तात्" इति प्रकृत्याश्रयेण "श्रयुकः किति" इति प्रत्ययाश्रयेण च लिटीण्निषेधश्चेत्तर्हि क्रादिभ्यश्चतुर्भ्य एवेति नियमयति। वृञस्तु वेदे एवेति च। तेनान्येषां धातूनां लिटीट्, लोके 'ववरिथ' इति च रूपद्वयं सिद्ध्यति। स्वादीनां चतुर्णां ग्रहणं तु विधिनसम्भावनया भारद्वाजमतेन ऋदन्तातिरिक्तस्वादीनां थलीडागमः प्राप्नोति तन्निषेधार्थम्। वमादिषु क्रादिनियमेन प्राप्तस्येण्निषेधार्थम्चेति विध्यर्थमेव। तथाहि—क्रादिनियमात् क्राद्यन्येषां धातूनां लिटीट् प्राप्तौ भ्रञ्जन्ता-

नाम् "अचस्तास्वत्थल्यनिटो नित्यम्" इत्यनेन थलीण्निषेधे सिद्धे "ऋतो भारद्वाजस्य" इति सूत्रं व्यर्थं सत् अजन्तानामकारवताञ्च थलीण्निषेधश्चेत्तर्हि ऋदन्तानामेवेति सामान्यापेक्षया नियामकम्। तेन थलि ऋदन्तादन्येषां धातूनां भारद्वाजमतेनेटि, अन्येषामाचार्याणां मते इडभावे च पेचिथ पपक्थ विवयिथ विवेथेत्यादिस्थलेषु द्वे द्वे रूपे सिध्यतः। नच भारद्वाजनियमेन स्वादीनामपि थलीट् स्यादिति वाच्यम्। 'अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा" इति परिभाषया "अचस्तास्वत्थल्यनिटो नित्यम्" "उपदेशेऽत्वतः" इति सूत्रद्वयेन प्राप्तस्यैवेण्निषेधस्य भारद्वाजनियमस्य निवर्तकत्वात्। क्रादिनियमेन स्वादिग्रहणम् "अचस्तास्वत्" इति "उपदेशेऽत्वतः" इति सूत्रद्वयञ्चेण्निषेधार्थं वर्तते। तथाच—यथा भारद्वाजनियमेन ऋदन्तातिरिक्तधातुषु सूत्रद्वयं न प्रवर्तते, तथैव स्वादिग्रहणमपि न प्रवर्ततामिति न शङ्क्यम्। "अनन्तरस्य" इति न्यायादित्यलम्।

'संज्ञायाः कार्यकालत्वात्' इति कारिका व्याख्येया। शास्त्रेऽस्मिन् 'कार्यकालं संज्ञापरिभाषम्' 'यथोद्देशं संज्ञापरिभाषम्' इति पक्षद्वयमप्यस्ति। तत्र कार्यकालपक्षपातिमाधवमतं तावद्व्याचष्टे—संज्ञाया इत्यादिना। "सन्वल्लघुनि" "दीर्घो लघोः" इति सूत्रद्वये अङ्गस्येति अभ्यासस्येति चानुवर्तते। तेनाङ्गस्य ये द्वे तयोः पूर्वोऽभ्याससंज्ञकस्तस्येति फलितम्। द्वे इत्यत्र च उच्चारणे इति विशेष्यसमर्पकमध्याहियते। तथोगादङ्गस्येति कर्मणि षष्ठी। तेन यत्र कृत्स्नमङ्गं द्विरुच्यते न तु तदेकदेशमात्र तत्रैव पूर्वस्य दीर्घसन्वद्भावौ स्त इति। एवञ्चाङ्गस्य एकाच्कत्वे सत्येव तयोः प्रवृत्तिः, नत्वनेकाच्केषु चकास्त्यर्थापयत्यूर्णोत्यादिषु। अत्र ण्यन्तेभ्य एभ्यश्चङि कृत्स्नमङ्गं न द्विरुच्यते, अपि तु हलादेः प्रथमावयवोऽजादेस्तु द्वितीयावयवो द्विरुच्यते। एवञ्चैतेषाम् अचचकासत्; आर्तयपत्। और्णुनवत् इत्येवं रूपाणि भवन्ति। नन्वेवं ह्रस्वहलादिःशेषश्चुत्वादीन्यपि अनेकानि न स्युः। नचेष्टापत्तिः। दिदरिद्रासति, जिगणयिषतीत्यादि लक्ष्यस्य सर्वसम्मतत्वात्। तन्निर्वाहार्थं यथोद्देशपक्षाश्रयत्वाद् आह—वस्तुत इति। अङ्गस्येत्यस्यावयवषष्ठीत्वादङ्गावयवाभ्यासस्येति लभ्यते। ततश्च ऊर्णोञि ण्यन्ते चकि तु इत्येकदेशस्यापि द्वित्वे और्णुनवदित्यत्र "दीर्घो लघोः" इत्यभ्यासदीर्घो भवति। अर्थमाचष्टे इत्यर्थे णिच्यापुगागमोऽर्थापिधातोश्चङि णिलोपे उपधाह्रस्वे थप् इत्यस्य द्वित्वेऽपि दीर्घस्य 'सन्वत्' इतीत्वस्य च प्रवृत्तौ आर्तिथपदित्येवरूपं भवतीति जानीम इति तृतीयश्लोकार्थः।

अङ्गस्यावयव इति पक्षेऽपि चकास्तौ विशेषमाह—चकास्ताविति। उभयमिदमित्यस्य दीर्घः सन्वच्चेत्येतद् द्वयमित्यर्थः। न स्यात्स्याच्च व्यवस्थया—व्यवस्थया पक्षभेदेनेत्यर्थः। चङ्परे णौ यल्लघ्विति व्याख्याने न स्यात्। चङ्परे णौ यदङ्गमिति व्याख्याने तु स्यात्। एवञ्च अचचकासत्, अचीचकासदिति व्याख्याभेदेन रूपद्वयमित्यर्थः। नन्वस्मिन् व्याख्यानभेदे किं प्रमाणमित्यत आह—इति व्याख्याविकल्पस्यैति। ननु णौ इत्यस्यावृत्तिमभ्युपगम्याऽग्लोपेऽपि तदन्वयः किमर्थं इत्यत आह—णेरग्लोपेऽपीति। अगितामपीति—कमु कान्तावित्यादीनामपीत्यर्थः। सिद्धये—दीर्घसन्वद्भावसिद्ध्यर्थमित्यर्थः। अन्यथा कमुप्रभृतीनामुकारानुबन्धलोपादाग्लोपित्वाद्दीर्घसन्वद्भावौ न स्यातामित्यलम्।

'कथं उद्यति' इति शङ्कासमाधानपूर्वकं लिख। ननु अयधातुरात्मनेपदे पठित इति शानच्प्रत्ययस्यैव युक्तत्वेनोदयतीति शतृप्रत्ययान्तप्रयोगः कथमिति चेद्? न। कटीत्यत्र प्रश्लिष्टस्य ईधातोः प्रयोगस्य सत्त्वात्। अथवा चक्षिङ्धातौ इकाररूपानुदात्तस्वरेणैवात्मनेपदे सिद्धे डकारोपादानं व्यर्थं सद् "अनुदात्तेत्वनिमित्तकमात्मनेपदमनित्यं भवति" इति बोधयति। तेन अयधातोरनुदात्तत्वेऽपि उक्तवचनेन शतृप्रत्ययस्य सिद्धिरिति स्वांशे चरितार्थम्। अन्यत्र फलन्तु 'स्फायन्' इत्यत्र अनुदात्तेत्वलक्षणात्मनेपदस्याभाव इति दिक्।

चिण्प्रत्ययान्तक्रियायां सर्वत्र तृतीयान्तस्य कर्तुरन्वयो दृश्यते, एवं सति 'अप्यायि तरुहस्तोऽसौ' इत्यत्र असौ इत्यस्य अप्यायि इत्यत्र अन्वयः कथं सङ्गच्छते इति प्रतिपादय। अत्र चिण्प्रत्ययो भावकर्मणोर्विधीयते तत्रैव कर्ता तृतीयान्तो भवति, प्रत्ययेन भावकर्मणोरुक्तत्वात्कर्तुश्चानुक्तत्वात् अनुक्ते कर्तरि तृतीयाविधानात्। 'अप्यायि तरुहस्तोऽसौ' इत्यत्र तु "दीपजन" इत्यादिना कर्तर्येव चिण्विधानेन कर्तुरभिहितत्वात्प्रथमैव युक्ता। अतोऽसाविति पदस्य नामङ्गतिः।

'घस्लृ-अदने' अस्य प्रयोगः क्रिमन् लकारे भवति क्रिमन् लकारे नेति सप्रमाणं लिख। घस्लृ-अदने अस्यं न सर्वत्र प्रयोगः। यद्ययं सार्वत्रिकः स्यात् तदा लिट्यपि प्रयुज्येत। ततश्च 'अद भक्षणे' इति धातोः "लिट्यन्यतरस्याम्" इति घस्लृभावविधिर्व्यर्थः स्यात्। ननु असार्वत्रिकत्वे सति क्व प्रयोगः क्व नेति चेद्? यत्र घस्लृधातोः प्रयोगे ज्ञापक प्रत्यक्षवचनं वास्ति तत्रैवास्य प्रयोगः। यथा—भ्वादिगणे अत्रैव क्रमे अस्य पाठः शपि परस्मैपदे प्रयोगे लिङ्गमित्यर्थः। न च धातुसंज्ञार्थः पाठः इति शङ्क्यम्, धुत दीप्तावित्यतः प्राक् पाठेनैव सिद्धे अत्र क्रमे तत्पाठवैयर्थ्यात्। लकारोपादानम् अङि प्रयोगं बोधयति। अनिट्कारिकासु पाठो वलाद्यार्धधातुके प्रयोगं बोधयति। "सुघस्यदः क्मरच्" इति सूत्रं क्मरच्प्रत्ययविषये प्रयोगो भवतीति बोधयति। एवञ्च—लिङ्गवचनाभावादाशिष्यस्याप्रयोगः।

स्यन्दूप्रस्रवणे धातोर्लृटि प्रथमपुरुषैकवचने शङ्कानिरासपूर्वकं रूपं प्रसाधय। ननु लृटि स्ये सति "वृद्भ्यः स्यसनोः" इति परस्मैपदपक्षे परत्वादूदित्लक्षणमिड्विकल्पं बाधित्वा "न वृद्भ्यश्चतुर्भ्यः" इति इण्निषेधे स्यन्त्स्यतीत्येव रूपमिष्यते, न तु स्यन्दिष्यति इति। तदयुक्तम्, अन्तरङ्गतया ऊदित्लक्षणस्यैव इड्विकल्पस्य उचितत्वात् सकारादिविशेषापेक्षतया तङानामावनिमित्तापेक्षतया च "न वृद्भ्यश्चतुर्भ्यः" इति निषेधस्य बहिरङ्गत्वादिति चेद्, न। "वृद्भ्यः स्यसनोः" इति परस्मैपदे कृते ऊदित्लक्षणमन्तरङ्गमपि विकल्पं बाधित्वा "न वृद्भ्यश्चतुर्भ्यः" इति निषेधः, चतुर्ग्रहणसामर्थ्यात्। यदि अत्र ऊदित्लक्षण इड्विकल्प एव स्यात्, न तु "न वृद्भ्यश्चतुर्भ्यः" इति निषेधः, तर्हि चतुर्भ्यः इति व्यर्थं स्यात्। न च कृपूर्त्यार्तिस्तत्फलमिति शङ्क्यम्, "तासि च क्लृपः" इति चकारेण सकारार्धधातुकेऽपि नित्यमिण्निषेधप्रवृत्तेर्वक्ष्यमाणत्वात्। तथाच चतुर्ग्रहणं चतुर्णामपि सर्वत्र इण्निषेधार्थमिति दिक्।

'मस्योदके अनुष्यन्देते' इत्यत्र षत्वं कथमिति ब्रूत। ननु 'मस्योदके अनुष्यन्देते'

इत्यत्र कथं षत्वं प्राणिकर्तृकत्वस्याऽपि सत्वादिति चेदुच्यते—अप्राणिषु इति पर्युदासात् मत्स्योदके अनुष्यन्देते इत्यत्रापि पक्षे षत्वं भवत्येव। प्राणिकर्तृकस्य नेति न प्रतिषेधः, येनात्र प्राणिकर्तृकत्वस्यापि सत्वात् षत्वं न स्यात्। किन्तु प्राणिभिन्नकर्तृकस्येति पर्युदास आश्रीयते। एवञ्च प्राण्यप्राणिकर्तृकस्यापि अप्राणिकर्तृकत्वानपायादिह षत्वं निर्बाधमिति दिक्।

'कमलवनोद्घाटनम्' अत्र शङ्कासमाधानं निरूप्यताम्। ननु धातुपाठेऽर्थनिर्देशस्योपलक्षणत्वादर्थान्तरवृत्तेरपि घटधातोर्घटादिकार्यम्भवत्येव, अत एव घटयति विघटयतीत्यादावपि—संश्लेषयति विश्लेषयतीत्याद्यर्थेऽपि ह्रस्वः प्रवर्तते। एवञ्च विकसनार्थेऽपि उद्घाटनमित्यादिषु घटधातोर्णौ मित्त्वात् ह्रस्वः स्यादिति शङ्काकर्तुराशयः। समाधित्सोस्त्वयमाशयः—चुरादौ 'घट सङ्घाते' इति धात्वन्तरम्, तस्य णौ मित्त्वाभावादुपधाह्रस्वाभावे उद्घाटनं प्रविघाटयेत्यादिरूपम्। अर्थनिर्देशस्योपलक्षणतया सङ्घातादन्यत्र विकसनेऽपि तस्य वृत्तिरिति। न च चौरादिकस्य घट चेष्टायामित्यस्यैवार्थविशेषे मित्त्वार्थमनुवादोऽयमिति वाच्यम्। "नान्ये मितोऽहेतौ" इति निषेधात्। अहेतौ—स्वार्थे णिचि ज्ञपादिपञ्चकव्यतिरिक्ताश्चुरादयो मितो नेति तदर्थः।

'विव्यथे' इति रूपं शङ्कानिरासपूर्वकं प्रसाधय। व्यथ् व्यथ् ए इति स्थिते 'सत्यपि सम्भवे बाधनं भवति' इति वचनेन यलोपविषये हलादिशेषलभ्यं यकारस्य लोपं बाधित्वा "व्यथो लिटि" इति सूत्रेण सम्प्रसारणे थकारस्य "हलादिशेषः" इति लोपे "न सम्प्रसारणे सम्प्रसारणम्" इति निषेधे च कृते 'विव्यथे' इति रूपम्। न च 'अभ्यासविकारे बाध्यबाधकभावो नास्ति' इति वचनेन 'हलादिशेषापवादः' इति ग्रन्थासङ्गतिरिति वाच्यम्। "लिट्यभ्यासस्योभयेषाम्" इति सूत्रे उभयेषां ग्रहणसामर्थ्येन अभ्यासलोपविषये उक्तवचनाप्रवृत्तेः।

'विज्ञापना भर्तृषु सिद्धिमेति' 'तज्ज्ञापयत्याचार्यः' इत्यत्र च "मितां ह्रस्वः" इति कस्मान्न प्रवर्तते। घटादौ मित्त्वप्रकरणे "मारणतोषणनिशामनेषु ज्ञा" इति पठितम्। तत्र निशामनं चाक्षुषज्ञानम् इति माधवः। अन्ये तु ज्ञापनमात्रम् अर्थमाहुः। हरदत्तादयस्तु निशामन इत्यत्र निशानेष्विति पेठुः। निशानञ्च तीक्ष्णीकरणम्। एष्वेवार्थेषु मित्त्वं नान्यत्रेत्यनेन नियम्यते। विज्ञापनेत्यत्र तज्ज्ञापयतीत्यत्र च अचाक्षुषज्ञानस्यैवात्मज्ञानस्य विवक्षितत्वात् मित्त्वाभावान्माधवमते ह्रस्वो न प्रवर्तते। बोधनमात्रे तु उक्तं रूपद्वयं ज्ञा नियोगे इति चौरादिकस्य बोध्यम्। धातूनामनेकार्थत्वाच्च तस्य ज्ञापने वृत्तिः। 'नान्ये मितोऽहेतौ" इति निषेधान्न मित्त्वम्। निशानेष्विति हरदत्तादीनां मते तु उक्तप्रयोगयोर्ज्ञापनार्थवृत्तित्वात् ज्ञापनस्य च मारणतोषणतीक्ष्णीकरणान्यत्वात् तस्मिन्नर्थे ज्ञाधातोर्मित्त्वप्रसक्तिरेव नास्तीति दिक्।

"न कम्यमिचमाम्" इत्यतो न उत्तरत्रानुवर्तते न वेति व्याख्येयम्। स्वामी "न कम्यमिचमाम्" इति सूत्रात् शमो दर्शने इत्यादिसूत्रत्रये नञ्पदस्यानुवृत्तिं न करोतीति स्वामिमते—आशामयतीति उदाहरणे आयमयतीति स्यात्। यमयतीति प्रत्युदाहरणे यामयति ब्राह्मणानिति स्यात्। एवमवस्खादयति परिस्खादयतीत्युदाहरणे अवस्खदयति परिस्खदयतीति स्यात्। प्रत्युदाहरणे च प्रस्खादयतीति स्यात्। एवञ्च

पर्यवसितं नियमयन्निति प्रयोगः साधुरेव। नन्वदानुवृत्तौ तु यमोऽपरिवेषणे "स्वदिरवपरि-व्याञ्च" इति सूत्रद्वये उदाहरणप्रत्युदाहरणयोर्व्यत्यासः। इदं च स्वामिमतं वृत्तिन्यासादिवि-रोधाद्धेयमेव।

भ्राजधातोरुभयत्र पाठे को विशेष इति लिख। भ्राजधातोः फणादौ पाठः "फणाञ्च सप्तानाम्" इति सूत्रेण णत्वाभ्यासलोपार्थः। पूर्वं पाठस्तु "व्रश्चभ्रस्ज०" इति सूत्रेण प्राप्तस्य षत्वस्य निषेधार्थः। तत्र हि राजधातुः फणादिर्गृह्यते, तत्साहचर्याच्च भ्राजधातुरपि फणादिरेव ग्राह्यः, इति पूर्वपठितभ्राजधातुविषये षत्वाभावः सिद्ध्यतीति दिक्।

'सस्वरिव' इत्यत्रेडागमः केन भवतीति प्रदर्शय। "आर्धधातुकस्येड्वलादेः" इत्या-दिविधिशास्त्रेभ्यः प्राक् "नेड्वशिकृति" "अचकः क्ङिति" इत्यादिसूत्राणां प्रकरणमात्रार्थेन कृतमिति तत्सामर्थ्येन परमपि "स्वरतिसूति०" इत्यादिसूत्रं बाधित्वा "अचकः क्ङिति" इति निषेधः प्राप्तस्तमपि बाधित्वा क्रादिनियमात्तित्यांमट् भवतीति दिक्।

'प्रणिमयते' इत्यत्र मारूपाभावात् णत्वं कथमिति ब्रूत। ननु प्रणिमयत इत्यत्र "नेर्गदनद०" इति णत्वं न सम्भवति, शिड्विषये आत्वाभावेन मारूपाभावात्। तथा प्रणिमा-नशब्देऽपि णत्वं न सम्भवति, तत्र मेडः कृत्वात्वस्य लाक्षणिकमारूपत्वात्। "गामादाग्रहणे-ष्वविशेषः" इत्याश्रित्य मेडोऽपि कृतात्वस्य णत्वविधौ ग्रहणे तु मानातिमिनोत्योरात्वे प्रनि-माता प्रनिमास्यति इत्यत्रापि नेर्णत्वापत्तिरिति चेद्? उच्यते। "नेर्गदनद०" इति णत्वविधौ घुमित्यस्य स्थाने घुप्रकृतिमाङिति पठित्वा तत्र प्रकृतिशब्दस्य घुमाङ्प्रकृतिपरत्वमाश्रित्य घौ माङ्धातौ घुमाङ्प्रकृतौ च परतः इति पर्यवसानमाश्रित्य माप्रकृतेर्ङितो मेङ्धातोः कृतात्व-स्यापि ग्रहणस्य भाष्यकृता अभ्युपगतत्वात्। एवञ्च प्रणिमयते इत्यत्र नान्यासिः, मेडः कृतात्व-माकृतित्वे सति ङित्वात्। नापि मीनातिमिनोत्योरात्वे प्रनिमाता प्रनिमास्यतीत्यत्र अति-व्याप्तिः, मारूपस्य ङित्वाभावात्। एतच्च घुसंज्ञासूत्रे भाष्ये स्थितम्।

'परिष्कण्णः' इत्यत्र णत्वं भवति न वेति युक्तियुक्तं प्रतिपादय। 'परिष्कन्दत्' इति स्थिते 'अनिदिताम्' इति नलोपे "रदाभ्याम्" इति निष्ठातकारस्य तत्पूर्वदकारस्य च नत्वे सस्यानेन षत्वपक्षे प्रथमनकारस्य रेफापेक्षया भिन्नपदस्थत्वेऽपि यात् परत्वात् णत्वे द्वितीयन-कारस्य ष्टुत्वेन णत्वे 'परिष्कण्णः' इति रूपम्। ननु दकारस्थानिकनकारस्य षकारनिमित्तकं णत्वमन्तरङ्गम्, निमित्तनिमित्तिनोरेकपदस्थत्वात्। षत्वं तु परि इत्युपसर्गात्मकपदान्तर-स्थमिणं निमित्तीकृत्य प्रवर्तमानं बहिरङ्गम्। ततश्च णत्वे कर्तव्ये बहिरङ्गस्य षत्वस्यासिद्धत्वात् पात्परत्वाभावात् कथं णत्वमिति चेद्? उच्यते। पदद्वयाश्रयतया बहिरङ्गस्य षत्वस्यासिद्धत्वं यत्प्रसक्तं तत्राश्रीयते। "धातूपसर्गयोः कार्यमन्तरङ्गम्' इत्यभ्युपगमात्। पूर्वं धातुरूपसर्गेण सह युज्यते—सन्यादिकार्यं लभते। पश्चात्—धातूपसर्गकार्यप्रवृत्त्यनन्तरं साधनेन युज्यते। पूर्वं धातुः साधनेन युज्यते, पश्चादुपसर्गेण इति पक्षे तु षत्वस्य बहिरङ्गतया असिद्धत्वान्न णत्व-मिति याक्त्।

'विव्याय' इत्यत्र परत्वात् हलादिशेषेण यकारलोपे सति वकारस्य सम्प्रसारणं

प्राप्तं तत्कथा रीत्या वार्यते। व्येञ् धातोर्लिटि तिपि णलि व्ये अ इति स्थिते "अचो ञ्णिति" इति वृद्धौ 'व्यै अ' इति जाते, ननु तत्र द्वित्वे "लिट्यभ्यासस्य" इत्यभ्यासे यकारस्य सम्प्रसारणे पूर्वरूपे उत्तरखण्डस्य आयादेशे 'विव्याय' इति रूपं भवति, तदयुक्तम्, सम्प्रसारणात्प्राक् परत्वात् हलादिशेषेण यकारस्य निवृत्तौ वकारस्य सम्प्रसारणे उकारे सति 'उव्याय' इत्यापत्तेरिति चेद्? न। परमपि हलादिशेषं बाधित्वा यस्य सम्प्रसारणम्, उभयेषां ग्रहणसामर्थ्यात्। अन्यथा वच्यादीनां ग्रह्यादीनाञ्चानुवृत्त्यैव सिद्धे किन्तेन।

'जक्षतुः' इत्यत्र स्थानिवद्भावः कथं वारित इति लिख। ननु 'जक्ष् अतुस्' इति स्थितौ "गमहनजनखनघसाम्" इत्युपधालोपे तस्य "अचः परस्मिन् पूर्वविधौ" इति स्थानिवत्वेन व्यवधानात् खरपरत्वाऽभावाच्चर्त्वाऽप्राप्त्या जक्षतुरिति न सिद्ध्येदिति चेद्? उच्यते। "न पदान्तद्विर्वचन०" इति सूत्रेण चर्त्वं प्रति स्थानिवत्त्वनिषेधात् सर्वमुपपन्नमिति यावत्।

'जहि' इत्यत्र "अतो हेः" इति हेर्लुक् कुतो नेति वद। ननु हन्तेर्लोटि मध्यमपुरुषैकवचने हौ, तस्मिन् परे "हन्तेर्जः" इत्यनेन हन्तेर्जादेशे "अतो हेः" इति हेर्लुक् दुर्वार इति चेद्? उच्यते—"असिद्धवदत्राभात्" इत्यनेन आभीयतया जस्यासिद्धत्वाद्धेर्न लुक्।

'चक्षिङ्' इत्यत्र ङित्त्वादेवात्मनेपदे सिद्धे इकारोच्चारणं किमर्थमिति ब्रूत। ननु चक्षिङ् इत्यत्र इकारोच्चारणं व्यर्थम्। न च सुखोच्चारणार्थं तदिति वाच्यम्, अकारोच्चारणेनैव तत्सिद्धेः। नाप्यनुदात्तेत्त्वप्रयुक्तात्मनेपदार्थं तदिति शक्यं वक्तुम्, ङित्त्वादेव तत्सिद्धेरिति चेद्? न। "अनुदात्तेतश्च हलादेः" इति ल्युडपवादयुच्प्रत्ययार्थत्वात्। ततश्च "विचक्षणः" इति प्रयोगः सिद्ध्यति, नुम् तु न भवति। यत्र धातौ इकारोऽन्तावयवो भवति, तत्रैव "इदितो नुम् धातोः" इत्यनेन नुम्भवतीति व्याख्यानात्। एवञ्च इकारस्यानुदात्तत्वात् "अनुदात्तङित आत्मनेपदम्" इत्यनेनानुदात्तेत्निमित्तके आत्मनेपदे सिद्धे ङकारोपादानं व्यर्थमेव। तदेव व्यर्थं सत् अनुदात्तेत्त्वलक्षणमात्मनेपदमनित्यम्' इति ज्ञापयति। तेन स्फायन्निति प्रयोगे शतृप्रत्ययस्य सिद्धिरिति दिक्।

'अत्र भाष्ये ख्शादिरयमादेशः' इयं फक्किका व्याख्येया। अत्रेदं तात्पर्यम्—'चक्षिङः ख्याञ्' इत्यनेन न चक्षिङः ख्याञादेशः, किन्तु ख्शाञादेश एव, तेन पुंख्यानमित्यत्र न "पुमः खय्यम्परे" इति रुत्वमित्यादि हलन्धावेवोक्तम्। असिद्धकाण्डे "शस्य यो वा" इति स्थितम् इति तेन णत्वप्रकरणानन्तरमिति शेषः। अत एव शकारेण व्यवधानान्न "कृत्यचः" इत्यनेन पर्याख्यानमित्यत्र णत्वम्। नापि सुप्रख्येन निर्वृत्तं सौप्रख्यम्, तत्र भवः सौप्रख्यीयः इत्यत्र यत्वासिद्धत्वेन "धन्वयोपधाद्" इति वुञ्, किन्तु छप्रत्यय एवेति दिक्।

'युयात्' इत्यत्र "उतो वृद्धिर्लुकि हलि" इति वृद्धिः कुतो नेति वद। ननु लिङ्स्थानिकादेशस्य तिपः पित्त्वात्तस्य च "यदागम" परिभाषया यासुट्विशिष्टे सत्त्वात्तस्मिन् "उतो वृद्धिर्लुकि" इत्यनेन वृद्धिर्दुर्वारेत्यत उच्यते—इह उतो वृद्धिर्न, भाष्ये 'पिच्च ङिन्न ङिच्च पित्' इति व्याख्यानात्। "सार्वधातुकमपित्" इत्यस्यावृत्त्याऽस्य लाभः। न च पूर्ववाक्येन ङित्त्वमपि दुर्लभमिति वाच्यम्। विशेषविहितेन ङित्त्वेन पित्त्वस्य बाधादित्यलम्।

'अभीयात्' इत्यत्र "एतेर्लिङि" इति ह्रस्वः कुतो नेति वद। ननु पूर्वान्तवद्भावेनोपसर्गत्वं परादिवद्भावेन च धातुत्वं वर्तत एवेति "एतेर्लिङि" इत्यनेनोपसर्गात्परस्येणोऽणो ह्रस्वविधानात् 'अभीयात्' इत्यत्रापि ह्रस्वो दुर्वार इति चेद्? न। "उभयत आश्रयणे नान्तादिवत्" इति वचनेन निषेधात्। यथा द्वयोरेकः प्रेष्यस्ताभ्यां युगपद्भिन्नदेशकार्ये प्रेरितोऽविरोधार्थी न कस्यापि करोति कार्यन्तद्वत् पूर्वपरशब्दाभ्यामन्तादिशब्दाभ्यान्न विरोधस्य स्फुटत्वाद्विरुद्धातिदेशस्य युगपदसम्भव इति तात्पर्यम्। नैतद्विषये स्थानिवद्भावप्रवृत्तिः, आनुमानिकस्थान्यादेशभावे विशिष्टस्य स्थानित्वेऽपि प्रत्येक तयोः स्थानित्वे मानाऽभावात् वर्णयोरेव श्रौतस्थान्यादेशभावविधानाच्चेति दिक्।

'अध्ययै' इति यथाशास्त्रं साधय। ननु पूर्वं धातुरुपसर्गेण युज्यते पश्चात्साधनेनेत्यभियुक्तोक्त्या अन्तरङ्गत्वाद्गुणादेः प्रागेव सवर्णदीर्घे यणि 'अध्ययै' इति न स्यादिति चेद्, उच्यते। 'पूर्वं धातुः साधनेन युज्यते पश्चादुपसर्गेण' इति पक्षस्य "सुट्कात्पूर्वः" इत्यत्र भाष्ये सिद्धान्तितत्वात् पूर्वं गुणायादेशयोः कृतयोरुपसर्गस्य यण्। 'पूर्वं धातुरुपसर्गेण युज्यते' इति मते तु धातूपसर्गयोः कार्यं पूर्वं स्यादिति अन्तरङ्गत्वात्प्राप्तो दीर्घो "शेरध्ययने वृत्तम्" इति सूत्रे 'अध्ययने' इति पदनिर्देशान्न भवति। यदि पूर्वं दीर्घः स्यात्तदोक्तप्रयोगनिर्देशोऽनुपपन्नः स्यात्।

"अयं सार्वधातुकमात्रविषयः" इत्यस्याशयः स्फुटं वर्णनीयः। अस्य ख्याधातोः सार्वधातुक एव प्रयोगो न त्वार्धधातुके इत्यर्थः। अत्र च 'सस्थानत्वं नमः ख्यात्रे' इति वार्तिकं नञमध्याहृत्य 'नमः ख्यात्रे' इत्यत्र सस्थानत्वं जिह्वामूलीयत्वं न भवतीति व्याख्यानरूपं भाष्यञ्च प्रमाणम्। अत्र हि चक्षिङः ख्शाञादेशे शस्य यकारे शकारस्थानिकयत्वस्यासिद्धत्वात् "शर्परे विसर्जनीयः" इति इष्टो विसर्जनीयः सिध्यति, जिह्वामूलीयस्त्वनिष्टो न भवतीति भाष्यवार्तिकहृदयम्। अस्य ख्याधातोरार्धधातुकेऽपि प्रयोगसत्त्वे तु तृजन्ते ख्यातृशब्दे यकारस्य शकारस्थानिकत्वाभावात् असिद्धत्वाभावात् "शर्परे विसर्जनीयः" इत्यस्याप्रवृत्तौ "कुप्वोः" इति जिह्वामूलीयो दुर्वारः स्यात्। ततश्चार्धधातुके ख्याधातोर्न प्रयोगः इति विज्ञाप्यते। ज्ञापकस्य सामान्याप्येतत्वादिति दिक्।

दरिद्राधातोर्लिटि प्रथमपुरुषैकवचने रूपाणि विविच्य प्रसाधयत। दरिद्राधातोर्लिटि दरिद्राञ्चकार, ददरिद्रौ, ददरिद्र इति रूपत्रयमुक्तं ग्रन्थकृता। तत्राद्यं द्वयं न्याय्यं तृतीयन्त्वन्याय्यम्। "कास्प्रत्ययादाममन्त्रे लिटि" इति सूत्रभाष्ये दरिद्राधातोराम उक्तत्वात् 'दरिद्राञ्चकार' इति न्याय्यम्। "आत औ णलः" इत्यत्र प्रथमातिक्रमे कारणाभावात् ओकार एव विधातुमुचितः। वृद्धौ सत्यां तावतैव 'ययौ' इत्यादिसिद्धेः। तस्मादौकारविधानं दरिद्राधातोर्णलि 'दरिद्रातेरार्धधातुके लोपो वक्तव्यः' इत्यालोपे 'ददरिद्रौ' इत्योकारश्रवणार्थं सम्पद्यते। ओकारविधाने तु आल्लोपे सति वृद्धेरसम्भवात् ददरिद्रो इत्योकार एव श्रूयते। अत एव लिटि आम्नेति विज्ञायते। आमि सति णल एवाप्रसक्तेः इति "वस्वेकाजाद्घसाम्" इति सूत्रभाष्ये

ध्वनितं, कैयटेन च स्पष्टीकृतम्। अतो द्वितीयं ददरिद्रौ इत्यपि न्याय्यम्। तृतीयन्तु सुतराम-न्याय्यमिति दिक्।

'ऐयः' इति रूपं प्रसाध्य 'धत्तः' एतत् शङ्कानिरासपूर्वकं साधय। ऋधातोर्लङि तिपि सार्वधातुकसंज्ञायां "कर्तरि शप्" इति शपि, "जुहोत्यादिभ्यः श्लुः" इति श्लौ "श्लौ" इति धातोर्द्वित्वे "उरत्" इति अभ्यासस्य ऋकारस्याकारे रपरे "हलादिः शेषः" इति लोपे "अर्ति-पिपर्त्योश्च" इति अभ्यासस्याकारस्येत्वे "अभ्यासस्यासवर्णे" इतीयङि "आडजादीनाम्" इत्याटि "आटश्च" इति वृद्धौ "सार्वधातुकार्धधातुकयोः" इति गुणे "इनश्च" इतीकारलोपे "हल्ङ्याब्भ्यः" इति तकारस्य लोपे रेफस्य विसर्गे च रूपम्।

धत्तः—धाधातोर्लटि तसि सार्वधातुकसंज्ञायां "कर्तरि शप्" इति शपि "जुहोत्यादिभ्यः श्लुः" इति श्लौ "श्लौ" इति धातोर्द्वित्वे पूर्वस्य अभ्यासंज्ञायां "ह्रस्वः" इति ह्रस्वे "अभ्यासे चर्च" इति धकारस्य दकारे "उभे अभ्यस्तम्" इति अभ्यस्तसंज्ञायां "श्नाभ्यस्तयोरातः" इति आकारस्य लोपे "दधस्तथोश्च" इति भषभावे "खरि च" इति चर्त्वे सकारस्य रुत्वे विसर्गे च रूपम्। न चात्र "अचः परस्मिन् पूर्वविधौ" इति सूत्रेण आकारस्य स्थानिवद्भावेन ऋधन्तत्वा-भावाद् भषभावो न स्यादिति वाच्यम्। अत्र भषभावे कर्तव्ये आलोपो न स्थानिवत्, सूत्रा-रम्भसामर्थ्यात्। वस्तुतस्तु "पूर्वत्रासिद्धे न स्थानिवत्" इति परिभाषया त्रिपादिस्थे भषभावे कर्तव्ये सपादसप्ताध्यायीस्थाकारलोपस्य स्थानिवत्त्वनिषेधात्। परिभाषारूपयुक्त्या कार्यनिर्वाहे सति वचनारम्भाश्रयणन्निष्फलमिति दिक्।

'अश्लिक्षत्' इति रूपं शङ्कासमाधिपूर्वकं साधय। श्लिष् धातोर्लुङि तिपि "च्लि लुङि" इति च्लौ पुषादित्वादङि प्राप्ते "निरवकाशो विधिरपवादः" इति वचनेन अपवादत्वात् "श्लिषः" इति सूत्रेण क्से अनुबन्धलोपे "षढोः कः सि" इति षस्य कत्वे कात्परकत्वात् षत्वे अटि च 'अश्लिक्षत्' इति रूपम्। न च "चिण् भावकर्मणोः" इति सूत्रेण प्राप्तस्य चिणोऽपि "श्लिषः" इति सूत्रेण बाधः स्यादिति वाच्यम्। पुरस्तादपवादन्यायेन पुषाद्यङ एव बाधक-त्वात्। एवञ्च "श्लिषः" इति सूत्रेणाऽऽलिङ्गनरूपधात्वर्थे क्से सिद्धे "आलिङ्गने" इति योग-विभागेन श्लिषधातोरालिङ्गनेऽर्थे एव क्सो नान्यत्रेति नियम्यते। तथा च यदि "शल इगुप-धादनिटः क्सः" इति सूत्रविहितस्य क्सस्य "आलिङ्गने" इत्यनेन नियमो न स्यात्तदा पुनरपि योगविभागो व्यर्थ एव, व्यर्थः सन् "शलः" इत्यादिसूत्रविहितस्यापि क्सस्य नियमं करोति। ततश्चानालिङ्गने 'समश्लिषज्जतु काष्ठम्' इत्यत्राङ्। कर्मणि प्रत्ययें तु चिण् सिद्ध्यतीति दिक्।

ञिमिदा स्नेहने धातोर्दिवादौ पाठः किमर्थः। भ्वादौ द्युतादिगणे पाठेनैव अमिदत् अमेदिष्ट, इति रूपद्वयसिद्धौ दिवादिगणे पाठोऽमेर्दीदिति रूपनिवारणार्थः। इत्थञ्च गणद्वये पाठेन यदि रूपद्वयसिद्धिरेवेष्टा तदा द्युतादिभ्यः पृथगात्मनेपदिषु भ्वादौ पाठेनामेदिष्टेतिरूपम्। पुषादौ दिवादिगणे पाठेन च अमिददिति रूपञ्च सिद्धम्भवतीति द्युतादिगणे पाठो निष्फल एवेति प्रतिभाति॥

'विव्यच' इत्यत्र सम्प्रसारणं कुतो नेति वद। 'व्यचेः कुटादित्वमनसि' इति वार्तिकं

यत्राभिन्नः असदृशः कृदन्तीयप्रत्ययः स्यात्तत्रैव लगति। यथा—'अब्राह्मणमानय' इत्युक्तौ ब्राह्मणभिन्नं ब्राह्मणसदृशं कञ्चन नरमानीय कृती भवति न तु लोष्टकाष्ठादिकम्, तद्वत्। तेन 'उद्विचितुम्' इत्यादिकृदन्तस्थले कुटादित्वेन "गाङ्कुटादिभ्योऽञ्णिङित्" इति ङित्त्वेन "ग्रहिज्यावयि" इत्यादिना सम्प्रसारणं सिद्ध्यति। विव्यचेत्यत्र तु तिङन्तत्वेन णित्वाभावपक्षे वार्तिकाप्रवृत्त्या सम्प्रसारणाभावः। अन्यथा तत्रापि सम्प्रसारणं स्यात्। सादृश्यञ्च कृदन्तत्वेन ग्राह्यम्।

'शे तृम्फादीनां नुम् वाच्यः' अस्यार्थं करणीयः। "शे तृम्फादीनाम्" इति वार्तिके आदिशब्दः प्रकाररूपार्थस्य वाचकः। तथा तृम्फसदृशानां धातूनां नुम् स्यादित्यर्थो भवति। सादृश्यञ्च नकारयुक्तत्वेन गृह्यते। एवं हि नकाररहिततृफादिधातुषु नुम्न भवतीत्यलम्।

'ममङ्क्थ इति सम्यक् साधय। मस्ज्धातोर्लिटि सिपि "परस्मैपदानाम्" इत्यादिना थलि, "लिटि धातोः" इति द्वित्वे पूर्वस्याभ्यासस्य "हलादिः शेषः" इति लोपे ङडभावपक्षे "मस्जिनशोर्झलि" इति "मस्जेरन्त्यात्पूर्वो नुम्वाच्यः" इति वचनेन जकारात्पूर्वं नुमि "रषोः संयोगाद्योरन्ते च" इत्यादिना सकारलोपे "चोः कुः" इति कुत्वे चर्त्वे नकारस्यानुस्वारे परसवर्णे च कृते रूपम्।

'सञ्चस्करतुः' अस्य सिद्धिं शङ्कासमाधिपूर्वकं प्रदर्श्य 'सञ्चस्करिथ' इत्यत्र इडागमः कथमिति प्रदर्शनीयः। सम्पूर्वात्कृधातोः 'पूर्वं धातुरुपसर्गेण युज्यते' इति सिद्धान्तमाश्रित्य 'धातूपसर्गयोः कार्यमन्तरङ्गम्' इति पूर्वं "सम्परिभ्यां करोतौ भूषणे" इति सुटि संस्कृ इत्यस्मात्लिटस्तसोऽतुसि इत्यस्य द्वित्वे उरदत्वे "शर्पूर्वाः खयः" इति रेफसकारयोर्निवृत्तौ अभ्यासत्वे "ऋतश्च संयोगादेर्गुणः" इति गुणे 'सञ्चस्करतुः इति रूपसिद्धेः। "कात्पूर्वः" "अडभ्यासव्यवायेऽपि" इति च न कर्तव्यमिति भाष्यकाराशयः। एवं समस्करोदित्यत्रापि विकरणान्ताङ्गभक्ताडागमापेक्षया अन्तरङ्गत्वात्प्रथमं सुट् भविष्यतीति कृत्वा 'अडव्यवायेऽपि' इत्यंशो न कर्तव्य इति दिक्।

ननु सञ्चस्करिव सञ्चस्करिथ इत्यत्र च "वृसृभृवृ" इति "ऋतो भारद्वाजस्य" इति च इण्निषेधः स्यादिति चेद्? न। "कृसृभृवृ" इत्यत्र "ऋतो भारद्वाजस्य" इत्यत्र च "कृञोऽसुट इति वक्तव्यम्" इति वार्तिकस्य जागरूकत्वात्।

'संस्क्रियात्' अस्य सिद्धिः प्रदर्शनीया। सम्पूर्वात्कृधातोः 'पूर्वं धातुरुपसर्गेण युज्यते' इति सिद्धान्तमाश्रित्यान्तरङ्गत्वात्पूर्वं सुटि तत आशीर्लिङि तिपि यासुडागमे "रिङ्शय" इति ऋकारस्य रिङादेशे यासुटः सकारस्य "स्कोः" इति लोपे संस्क्रियादिति रूपम्। न चात्र लकारोपदेशकाले धातोः संयोगादित्वात् "गुणोर्तिसंयोगाद्योः" इति गुणः कुतो नेति वाच्यम्। अत्र सूत्रे 'पूर्वं सुटो विहितत्वेन "नित्य छन्दसि" इत्यतो नित्यमित्यनुवर्तते। तेन नित्यं संयोगादि—धातूपदेशकाले यः संयोगादिः इत्यर्थाद् गुणाप्रवृत्तेः।

'अबान्धाम्' इति रूपं शङ्कानिरासपूर्वकं विधेयम्। बन्धधातोर्लुङि तसि "तस्थस्" इत्यादिना वामि, "च्लि लुङि" इति च्लौ "च्लेः सिच्" इति सिजादेशे अटि "पूर्वत्रासिद्धम्"

इति भष्भावात्पूर्वसिन् सिज्लोपे "झषस्तथोर्धोऽधः" इति धकारे "अतो हलादेर्लघोः" इति वृद्धौ नलोपे जश्त्वे च रूपम्। नचात्र "एकाचो वशो भष् झषन्तस्य स्ध्वोः" इति भष्भावः स्यादिति वाच्यम्। "पूर्वत्रासिद्धम्" इति शास्त्रेण भष्भावविधायकस्यासिद्धत्वेन सिज्लोपात्सकारोभावात्। न च प्रत्ययलक्षणेन पुनरपि भष्भाव इति वाच्यम्। "प्रत्ययलोपे" इति सूत्रम्प्रति सिज्लोपस्यासिद्धत्वात्।

चितिधातोरिदित्करणस्य णिचः पाक्षिकत्वे ज्ञापकत्वम्, मतभेदेन विशेषापेक्षसामान्यापेक्षत्वयोः प्रमाणञ्च फलप्रदर्शनपुरःसरं सोपपत्तिकं निरूपणीयम्। ननु चितिधातो इदित्करणं मास्तु, प्रक्रियालाघवात् 'चिन्त स्मृत्याम्' इत्येवोच्यताम्। न च नलोपनिवृत्त्यर्थमिदित्त्वमिति वाच्यम्, चिन्तयतीत्यादौ णिचः ङित्त्वाभावादेव नलोपस्याप्रसक्तेः। न च णिजभावे आशीर्लिङि चिन्त्यादिति, कर्मणि लकारे यकि सति चिन्त्येत इत्यत्र च नलोपनिवृत्त्यर्थमिदित्त्वमिति शङ्क्यम्। चुरादिणिचो नित्यत्वेन णिचं विना केवलात् चिन्त्यात् चिन्त्येत, इति प्रयोगस्य असम्भवादिति चेद्? उच्यते—अत्रत्यमिदित्करणं णिचः पाक्षिकत्वे लिङ्गम्। एवं हि कदाचिद् चिन्त्यात् चिन्त्येत इति प्रयोगस्य सत्त्वात् तत्र नलोपनिवृत्त्यर्थमिदित्करणमिति स्वांशे चरितार्थम्। फलञ्च—चिन्तति चिन्तेत् इत्यादिप्रयोगोपपत्तिः। इदं हि ज्ञापकं चुरादित्वसामान्यापेक्षमिति वृत्तिकारादयः। तेन जगाण, जगणतुः इत्यादीनां सिद्धिः। ज्ञापकस्य चितिधातुमात्रविषयकत्वे चौरादिकस्य गणधातोर्जगाण, जगणतुः इत्याद्युदाहरणानुपपत्तिः स्यात्। न चैवम् "आधृषाद्वा" इति व्यर्थमिति वाच्यम्। ज्ञापकसिद्धरयासार्वत्रिकत्वात्। केचित्तु सर्वस्यापि चुरादेर्णिज्विकल्पे सति "आधृषाद्वा" इति कतिपयचुरादन्तर्गणपठितानां णिज्वकल्पविधेर्वैयर्थ्यमाशङ्क्य ज्ञापकं चितिधातुमात्रविषयकमाहुः। अस्मिन्नेव पक्षे ग्रन्थाकारस्य सम्मतिरित्यलम्।

चुरादौ पृधातोः दीर्घोच्चारणस्य फलमुच्यताम्। नन्वयं धातुर्ह्रस्वान्त एव निर्दिश्यतां तावतैव परयतीत्यादिसिद्धेः। न च णिजभावपक्षे परिता परिष्यतीत्यत्र इडर्थं दीर्घोच्चारणम्। ऋदन्तत्वेऽनिट्कत्वप्रसङ्गादिति वाच्यम्। चुरादिणिचो नित्यत्वेन ततो णिजभावस्यात्यन्तमसम्भवादिति प्रष्टुराशयः। उत्तरयितुस्त्वयमाशयः—पृधातोर्दीर्घोच्चारणमिडर्थम्, ह्रस्वान्तत्वे "ऊदृदन्तैः" इत्यनिट्कारिकासु ऋदन्तस्य पर्युदासेन ऋदन्तस्यानिट्कत्वावगमादिण्न स्यात्। तच्च तदैवं सार्थकं भवेत्, यदाऽस्माद्धातोर्णिचो विकल्पः स्यात्, अन्यथा पारीति णिजन्तस्य धात्वन्तरत्वात्सेट्कत्वे किं तेन। एवञ्च दीर्घोच्चारणं णिचः पाक्षिकत्वे लिङ्गम्। तेन पृणातिपिपर्तिभ्यां 'परिता' इत्यादिसिद्धावपि पारयति, परति इत्यादिसिद्धिश्च दीर्घोच्चारणस्य फलम्।

'अचीकृतत्' इति रूपं साधय। कृतधातोश्चुरादित्वात् णिचि तस्माच्छ्लि तिपि अटि च्लौ "णिश्रिद्रुस्रुभ्यः" इति चङि "उपधायाश्च" इतीत्वं बाधित्वा "उर्ऋत्" इति पाक्षिके ऋकारादेशे "चङि" इति द्वित्वे पूर्वस्याभ्याससंज्ञायाम् "उरत्" इत्यत्वे रपरे "हलादिः शेषः" इति लोपे "सन्वल्लघुनि" इत्यादिना सन्वद्भावे "सन्यतः" इतीकारे "कुहोश्चुः" इति चुत्वे "दीर्घो लघोः" इति दीर्घे "इतश्च" इतीकारलोपे रूपम्। ऋकारादेशाभावे तु "उपधायाश्च" इतीत्वे रपरे कीर्त्यादन्तस्य द्वित्वे पूर्वाभ्यासदीर्घे 'अचिकीर्तत्' इति रूपम्।

'ओः पुयण्ज्यपरे' इति सूत्रे वर्गप्रत्याहारजग्रहो लिङ्गमिति फक्किका विस्तरं व्याख्यायताम्। "ओः पुयण्ज्यपरे" इति सूत्रस्य पिपावयिषति बिभावयिषति यियावयिषति रिरावयिषति लिलावयिषति जिजावयिषति इत्युदाहरणेषु द्वित्वप्रत्यनिमित्ते णिचि "द्विर्वचनेऽचि" इति निषेधाऽप्रवृत्त्या द्वित्वात्प्रागेव परत्वाद्वृद्ध्यावादेशयोः कृतयोरभ्यासेष्वाकारस्य ह्रस्वे सति "सन्यतः" इत्वेत्वसिद्धेः पवर्गयण्प्रत्याहारजकारग्रहणं व्यर्थम्। ओः पययोरपरयोरित्येव सूत्रमस्तु। पिपावयिषति यियावयिषतीत्यत्रोक्तरीत्या "सन्यत" इतीत्वसिद्धावपि पिपविषति यियविषतीत्यत्र पूङ्धातोर्युधातोश्चाण्यन्तात् सनि अभ्यासे इत्वार्थं तदावश्यकत्वात्। वर्गप्रत्याहारजकारग्रहणन्तु व्यर्थमेव, एवञ्च तदुक्तार्थे ज्ञापकम्। 'णिच्यच आदेशो न स्यात् द्वित्वे कर्तव्ये' ज्ञापितेऽस्मिन्नर्थे बिभावयिषतीत्यादिषु णिचि लुप्ते सति "चङि" इति द्वित्वे कार्ये प्रत्ययलक्षणमाश्रित्य णिचि गुणावादेशयोः प्रतिषेधे सति उवर्णान्तानां द्वित्वेऽभ्यासेऽकाराभावेन "सन्यतः" इत्यस्याप्रवृत्त्या वर्गप्रत्याहारजकारग्रहणं स्वांशे चरितार्थम्। ज्ञापनफलन्तु—तुतावयिषति, अतूतवत्, ऊर्णुनावयिषति, आर्णुनवत्, पुस्फारयिषति, अपुस्फरदिति।

'औननत्' इति रूपं सप्रक्रियासमाधि साधनीयम्। ननु उनधातोर्णिचि धातुत्वाल्लुङि तिपि च्लौ "णिश्रि०" इत्यादिना चङि आडागमे 'आ उन इ अ त्' इति स्थिते यियवयिषति पिपविषते इति प्रयोगद्वये इटि सति "द्विर्वचनेऽचि" इति निषेधेन पूर्वं द्वित्वेऽभ्यासेऽकाराभावेनेत्वं दुर्लभं स्यादिति तत्र इकारलाभार्थम् "ओः पययोः" इत्येव सूत्रयितव्ये वर्गप्रत्याहारजकारग्रहणं व्यर्थीभूय 'णिचि अच आदेशो न स्याद् द्वित्वे कर्तव्ये' इति ज्ञापयति। तेन "आ उन इ अ त्" इत्यत्र उक्तज्ञापनेन पूर्वं द्वित्वे ततोऽनो लोपे वृद्धौ च 'औननत्' इति रूपं सिद्ध्यति। अन्यथा प्रथममकारलोपे ततो णिशब्दस्य द्वित्वे, औनिनत् इति रूपापत्तिः। अधीभवत् इत्यादौ परिनिष्ठिते रूपे औननत् इत्यत्र च साधनदशायां द्वित्वस्योत्तरखण्डेऽकारलाभेन ज्ञापकस्य सजातीयापेक्षत्वाद्यत्र द्विरुक्तादुत्तरखण्डेऽवर्णो लभ्यते, तत्रैव परिभाषा लगति। एवं हि अचिकीर्तदिति रूपं सिद्धम्भवति। अन्यथा तत्रापि परिभाषाप्रवृत्तौ तु पूर्वं कृतशब्दस्य द्वित्वे उक्तरूपासिद्धिः। परिभाषा अप्रवृत्तौ तु पूर्वम् "उपधायाश्च" इति सूत्रेणेत्वे ततो द्वित्वादौ उक्तरूपसिद्धिः सुलभा।

आख्यानात्कृतस्तदाचष्टे कृल्लुक् प्रकृतिप्रत्यापत्तिः प्रकृतिवच्च कारकमित्यस्यार्थं प्रदर्श्य उदाहरणे योजयत। आख्यायत इत्याख्यानं तदाचष्टे, तत्—द्वितीयान्तात् कृतः—कृत्प्रत्ययान्तात् "कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणम्" इति परिभाषया कंसवधादेरपि कृदन्तत्वम्, आचष्टे इत्यर्थे णिच् स्यात्। कृल्लुक्—कृत्प्रत्ययस्य लुक्, प्रकृतिप्रत्यापत्तिः—तस्यैव कृतः या प्रकृतिः हनादिधातुरूपा, तस्याः प्रत्यापत्तिः—आदेशादिविकारपरित्यागेन स्वरूपेणावस्थानम्भवतीत्यर्थः। कारकञ्च—चातकार्यम्, हेतुमण्णिचः प्रकृतेर्हन्यादेर्हेतुमण्णौ यादृशं कारकं धातावन्तर्भूतं द्वितीयान्तं यादृशञ्च कार्यं कृत्वतत्वादि तदिहापीत्यर्थः। कंसवधमाचष्टे कंसं घातयतीत्युदाहरणम्। हननं वधः "हनश्च वधः" इति भावे हन्धातोरप्प्रत्ययः प्रकृतेर्वधादेशश्च। कंसस्य वधः कंसवधः, तमाचष्टे इत्यर्थे णिच्। अप्प्रत्ययस्य कृतो लुक् प्रकृति-

भूतस्य हन्धातोर्वधादेशस्य च निवृत्तौ 'कंसं हन् इ' इति स्थिते कुत्वतत्वादिकार्ये च उक्तं रूपम् ।

'कंसमजीघतत्' इति रूपं साधय । कसवधमाचष्टे इत्यर्थे कसवधशब्दात् णिचि, तस्मात् लुङि तिपि च्लेश्चङि "आख्यानात् कृतस्तदाचष्टे कृल्लुक्प्रकृतिप्रत्यापत्तिः प्रकृतिवच्च कारकम्" इति कंसं हन् इति जाते "चङि" इति द्वित्वे पूर्वस्याभ्याससंज्ञायां "हलादिः शेषः" इति लोपे "कुहोश्चुः" इति चुत्वे "हनस्तोऽचिण्णलोः" इति तकारेऽन्तादेशे "हो हन्तेः" इति हकारस्य घकारे अटि सन्वद्भावे "सन्यतः" इतीत्वे "दीर्घो लघोः" इति दीर्घे "इतश्च" इतीकारलोपे च रूपम् । ननु कंसवधशब्दाद् णिचि कृते कंसवधशब्दस्याङ्गसंज्ञा धातुसंज्ञा च भवति, ततः कंसवधशब्दात्पूर्वमडागमः कंसशब्दस्य द्वित्वञ्च भवितुमर्हति ? किञ्च 'धातोः स्वरूपग्रहणे तत्प्रत्यये कार्य्यविज्ञानम्' इति परिभाषया कुत्वतत्वे न भवतस्तन्न, प्रकृतिवच्चेति चकारो भिन्नक्रमः कारकं चात्कार्य्यम् , हेतुमण्णिचः प्रकृतेर्हेन्यादेर्हेतुमण्णौ यादृशं कारकं धातावनन्तर्भूतं द्वितीयान्तं यादृशञ्च कार्य्यं कुत्वतत्वादि तदिहापीत्यर्थात् । अत्र "हनश्च वधः" इति अप्प्रत्यये वधादेशश्चेति दिक् ।

इति रूपलेखन-पङ्क्तिलेखनप्रकारः समाप्तः ।

प्राप्तिस्थानम्—

चौखम्बा-संस्कृत-पुस्तकालय,

बनारस सिटी ।

भ्वाद्यादिचुराद्यन्तर्गतसूत्रसूची

सूत्राङ्काः	सूत्रम्	सूत्राङ्काः	सूत्रम्	सूत्राङ्काः	सूत्रम्	सूत्राङ्काः	सूत्रम्
२२६८	अकृत्सार्व	२२९०	अभ्यासस्या	२३०५	आयादय आर्ध	२३१६	उपसर्गस्यायतौ
२३१८	अकोऽन्यतर	२४१०	अभ्यासाच्च	११८७	आर्धधातुकं	२२७०	उपसर्गात्सुनोति
२२९४	अचस्तास्व	२१८२	अभ्यासे चर्च	२१८४	आर्धधातुकस्ये	२२८७	उपसर्गादसमा
२५४१	अचि विभा	२३११	अयामन्ताल्वा	२३०७	आर्धधातुके	२५५२	उपात्प्रतियत्ने
२१७६	अजादेर्द्वितीय	२४१३	* र्तिपिपर्त्योश्च	२४३२	आर्धधातुके	२२१४	उरत्
२२९२	अजेर्व्यघञपोः	२५७०	अर्तिह्रीव्लीरी	२१९५	आशिषि लिं	२२५७	उर्कत्
२५४६	अञ्नेः सिचि	२२५३	अवाद्यालम्बना	२४५१	आहस्थः	२३६८	उश्च
२४७६	अङ्गार्यगालव	२५३३	कभ्नोतेश्च	२२३७	इजादेश्च गुरुम	२३४१	उषविदजागृ
२२४८	अत आदेः	२२४२	असंयोगाल्लिट्	२२६६	इट ईटि	२२१४	ऊ इयपद्गान्नात्
२४६७	अत उत्सार्व	२१८३	असिद्धवदत्रा	२२५७	इटोऽत्	२२७४	ऊतियूति
२२८२	अत उपधायाः	२२२५	अस्ति सिचो	२२८४	इडत्त्यतिव्यय	२२६४	ऊदुपधाया
२२६०	अत एकहल्म	२४७०	अस्तेर्भूः	२२४७	इण्नः षीध्वंलु	२४४५	ऊर्णोतेर्विभाषा
२१७०	अतो दीर्घो	२१६४	आमद्वत्तमः	२१५८	इण्नो गा लुडि	२४ ४	ऊर्णोतेर्विभा
२२१२	अतो येयः	२१३८	अर्यतिदर्कि	२४५५	इण्नो णक्	२२८३	ऋच्छत्यृताम्
२२०८	अतो लोपः	२५२०	अर्यतेस्थुक्	२२०७	इतश्च	२५२६	ऋतश्च संयोगा
२३२०	अतो लसान्त	२४११	आ च हौ	२२६२	इदितो नुम्धा	२३७९	ऋतश्च संयोगा
२२८४	अतो हलादेर्ल	२२५४	आडजादीनाम्	२४८२	इदिरिद्रस्य	२४०२	ऋतेरीयङ्
२२८२	अतो हेः	२२०४	आदृत्तमस्य	२२६९	इरितो वा	२२९६	ऋनो भारद्वाज
२५६६	आस्मृदृत्वर	२३७१	आत औ णलः	२४००	इषुगमियमां	२४०३	ऋदशोऽञ्गुण
२४७९	अदश्यम्लात्	२२२७	आतः	२५७३	ई च गणः	२३६६	ऋद्धनोः स्ये
२६२६	अदः सर्वेषाम्	२०३५	आतो ङितः	२४४०	ईडजनोश्च च	२३९०	ऋत इद्धातोः
२४२३	अदिप्रभृतिभ्य	२३७२	आतो लोप	२४३१	ईशः से	२२४३	एकाच उपदेशे
२२८५	अनद्यतने लङ	२२५८	आत्मनेपदेष्व	२४९७	ई हल्यघोः	२१७५	एकाचो द्वे प्रथ
२१८५	अनद्यतने लुट	२४१९	आत्मनेपदेष्व	२३३४	उतश्च प्रत्ययाद	२२२३	एत ऐ
२४७८	अनिते	२२८९	आदिर्ञिटुडवः	२४४३	उतो वृद्धिर्लुकि	२४५७	एतेर्लिङि
२१५७	अनुदात्तङित	२३७०	आदेच उपदेशे	२४९४	उदोष्ठ्यपूर्वस्य	२११६	एरुः
२४०२	अनुदात्तस्य	२२३१	आनि लोट	२२९८	उपदेशेऽत्वतः	२३७४	एर्लिङि
२४२८	अनुदात्तोपदेश	२२३८	आमः	२२६५	उपधायां च	२५५७	ओः पुयण्ज्यपरे
२३४९	अनुविपर्यभि	२२५१	आमेतः	२५७१	उपधायाश्च	२५१०	ओतः श्यनि
२४१७	अभ्यस्तस्य च	२२४०	आम्प्रत्ययवत	२४७२	उपसर्गात्सु	२३१०	कमेर्णिङ्

सूत्राङ्कः	सूत्रम्
२१६७	कर्तरि शप्
२३०६	कास्प्रत्ययादाम्
३२१६	किदाशिषि
२६३९	किरतौ लवने
२२४५	कुहोश्चुः
२२३९	कृञानुप्रयुज्य
२३५०	कृपो रो लः
२२६३	कृसृभृवृस्तु
२२१७	क्किक्तिच्च
२३२२	क्रमःपरस्मैपदे
२५५४	क्र्यादिभ्यः
२३३७	क्वसस्याचि
२३६३	गमहनजनखन
२४०१	गमेरिट् परस्मै
२४६१	गाङ्कुटादिभ्यो
२५९९	गाङ् लिटि
२२२३	गातिस्थाघुपा
२५४८	गुणोऽपृक्ते
२३८०	गुणोर्तिसंयो
२३०३	गुपूधूपविच्छि
२३९३	गुरुमिज्किन्नयः
२७१२	ग्रहिज्यावयि
२५६२	ग्रहोऽलिटि
२४६२	घुमास्थागापा
२४७१	घ्वसोरेद्धाव
२४३६	चक्षिङ्ःख्याञ्
२३१९	चङि
२३२६	चिणो लुक्
२५१३	चिण् ते पदः
२२६९	चिस्फुरोर्णौ
२५६१	च्छ्वोः शूडनु
२२२१	च्फ क्नुसि

सूत्राङ्कः	सूत्रम्
२२२२	च्लेः सिच्
२१०४	जनसनखनां
२५१२	जनिवध्योश्च
२४९८	जहातेश्च
२४८०	जाम्रोऽविचि
२४८१	जुसि च
२४८९	जुहोत्यादिभ्यः
२२९१	जृस्तम्भु
२५११	ज्ञाजनोर्जा
२२८१	झलो झलि
२२८०	झषस्तथोर्धो
२२५६	झस्य रन्
२२१३	झेर्जुस्
२१६९	झोऽन्तः
२२३३	टित आत्मनेप
२३३५	ठो ढे लोपः
२२८३	थलुत्तमो वा
२५६४	णिचश्च
२३१२	णिश्रिद्रुस्रुभ्यः
२३१३	णेरनिटि
२२८६	थो नः
२३१४	थो धन्युपधा
२१५६	तङानावात्मने
२४६६	तनादिकृञ्भ्य
२५४७	तनादिभ्यस्त
२३३९	तनूकरणे तक्षः
२१९९	तस्थस्थमिपां
२२८८	तस्मान्नुड् द्वि
२१६१	ताम्येकवचन
२१९१	तासस्त्योर्लोपः
२१५२	तासि च क्लृपः

सूत्राङ्कः	सूत्रम्
२१६०	तिङस्त्रीणि
२१६६	तिङ्शित्सार्व
२१५४	तिप्तस्झिसिप्थ
२४८४	तिप्यनस्तेः
३४०	तिपस्सझ्यु
२५३४	तुदादिभ्यः शः
२४४४	तुदस्तुदात्मथमः
२१९७	तुह्योस्तातङ्
२५४५	तृणह इम्
२३०१	तृफलभजत्रपः
२२३०	तेप्राग्धातोः
२२६१	थलि च सेटि
२२३६	थासः से
२३९६	दंशसञ्जस्वञां
२५०१	दधस्तथोश्च
२३८८	दयतेर्दिगि
२३२४	दयायासश्च
२४६८	दश
२३७३	दाधा ध्वदाप्
२६०५	दिवादिभ्यः
२६०७	दीङो युडचि
२१९०	दीधीवेवीटाम्
२२८	दीपजनबुध
२४५६	दीर्घ इणः
२३१८	दीर्घो लघोः
२३७४	दुतिस्वाभ्योः
२३७५	दुदुभ्यो दुक्
२२४३	द्विर्वचनेऽचि
२७३५	द्विर्वचः
२२६४	धात्वादेः षः
२२४१	धि च
२३३२	धिन्विकृण्व्योः

सूत्राङ्कः	सूत्रम्
२४०७	न दधः
२४७६	न म्द्राः संयो
२२२८	न माङ्योगे
२५२९	न लिटि
२३४८	न वृञ्यञ्यतु
२४१६	न व्यो लिटि
२२६३	न शासदद्वादि
२५१८	नक्षेः षात्मस्य
२५७२	नाग्लोपिशा
२५०३	नाम्यस्तस्या
२५०२	निजां त्रयाणां
२५४८	निर्यं करोतेः
२२००	निर्यं क्तितः
२५६०	निरः कुषः
२४०३	निसस्तपता
२२६८	नेटि
२५१६	नेट्यलिटि रधेः
२५५९	नेतराच्छन्द
२२८५	नेगंदनदपत
२३५५	पतः पुम्र
२१७३	परस्मैपदानां
२२७५	परिनिविभ्यः
२२४१	परेर्वर्जने
२३९९	परेश्च
२१७१	परोक्षे लिट्
२३६०	पाघ्राध्मास्था
२१८९	पुगन्तलघूपध
२३४३	पुषादिद्युता
२१७८	पूर्वोऽभ्यासः
२१६३	प्रहासे च
२२७६	प्राक्सितादड्
२५८८	प्वादीनां ह्रस्वः

सूत्राङ्कः	सूत्रम्
२३५४	कर्णा च सप्ता·
२५२७	बभूवाततन्थ
२४५२	ब्रुव ईट्
२४५०	ब्रुवः पञ्चानामा
२४५३	ब्रुवो वचिः
२१८१	भवतेरः
२४९२	भियोऽन्य·
२४९१	भीह्रीभृहुवां
२१७४	भुवो वुग्लुङ्
२२२४	भूसुवोस्तिङि
२४९६	भृञामित्
२५३६	भ्रस्जो रोपध
२५६५	भ्राजभासभाष
२५१७	मङ्क्षिनक्षोर्झं
२२११	माङि लुङ
२३९४	माम्वधदान्शा
२५६८	मितां ह्रस्वः
२३४६	मिदेर्गुणः
२५०८	मीनातिमिनो·
२४७३	मृजेर्वृद्धिः
२२०३	मेर्निः
२५३८	म्रियतेर्लुङ्लि·
२३०९	य्वोरच
२३७७	यमरमनमातां
२५९१	यसोऽनुपसर्गा
२२०९	यासुट् परस्म·
२४८८	यीवर्णयोर्दी
२१६२	युष्मद्यपपदे
२५४१	ये च
२३१९	ये विभाषा
२३६७	रञ्जेश्च
२५१५	रधादिभ्यश्च
२३०२	रभिजभोरचि
२५३२	राधो हिंसाया·
२३६७	रिङ्शयग्लिङ्·
२१९२	रि च
२४७६	रुदश्च पञ्चभ्यः
२४७४	रुदादिभ्यः सार्व
२५४३	रुधादिभ्यः श्न
२१६२	लः कर्मणि च
२१५५	लः परस्मैपदम्
२४६३	लक्षः शाकटाय
२१६३	लक्ष्य
२२११	लिङः सलोपः
२२५५	लिङः सीयुट्
२२१५	लिङाशिषि
२२२९	लिङ्निमित्ते
२३००	लिङ्सिचावा
२५२८	लिङ्सिचोरा
२२४१	लिटस्तझयोरे
२१७७	लिटि धातोः
२४१३	लिटि वयो यः
२१७२	लिट् च
२४२४	लिट्यन्यतर
२४०८	लिट्यभ्यास
२३२७	लिड्यङोश्च
२४१८	लिपिसिचिह्नः
२३६५	लुग्वा दुहदिह
२२१८	लुङ्
२४३४	लुङि च
२२०६	लुङ्लङ्लृङ्
२४२७	लुङ् सनोर्घस्लृ
२१८८	लुटः प्रथमस्य
२३६१	लुटि च
२१९६	लुट् शेषे च
२१९८	लोटो लङ्वत्
२११४	लोट् च
२३३३	लोपश्चास्या·
२५००	लोपो यि
२४५४	वच उम्
२४०९	वचिस्वपि
२२६७	वदव्रजहलन्त
२४२१	वमोर्वा
२१६१	वर्तमाने लट्
२४१४	वश्चास्यान्यतर
२३५६	वा जृभ्रमुत्र
२३७८	वाऽन्यस्य
२३२१	वा भ्राशम्भ्रा
२४३७	वा लिटि
२५३६	विज इट्
२४६९	विदांकुर्वन्त्यि
२४६४	विदो लटो वा
२२०८	विधिनिमन्त्र
२३७६	विभाषा घ्राधे
२५२९	विभाषा घेः
२३५५	विभाषा धेट्
२५०९	विभाषा लीय
२४६०	विभाषा लुङ्लृ
२४२०	विभाषा रुधः
२४०४	विभाषा सृजि
२३२५	विभाषेटः
२४४७	विभाषोर्णोः
२३४७	सृजयः श्यसनो
२३९१	वृतो वा
२३९८	वेः स्कन्देरनि
२५१६	वेः स्कन्नातेर्नि
२४१९	वेञः
२४११	वेञो वयिः
२२७४	वेरपृक्तस्य
२३५३	व्यथो लिटि
२३६२	शदेः शितः
२५१९	शमामष्टानां
२२५१	शर्पूर्वाः खयः
२३३६	शल इगुपधा
२०८६	शास इदङ्हल
२४१०	शासिवसि·
२४८७	शाहौ
२४४·	शीङः सार्वधा
२४४२	शीङो रुट्
२४३·	शृदृप्रां ह्रस्वो
२५४२	शे मुचादीनाम्
२१५९	शेषात्कर्तरि
२१६५	शेषे प्रथमः
२२३·	शेषे विभाषा·
२४३९	श्नसोरल्लोपः
२५४४	श्नान्न लोपः
२४८३	श्नाभ्यस्तयोः
२३८६	श्रुवः श्रुच
२३८१	श्रयुकः किति
२५१४	श्लिष आलिङ्गने
२४९०	श्लौ
२४२१	श्वयतेरः
२१२०	श्विडुक्षुमुचमां
२३४२	सः स्यार्धधातु
२१२२	संयसञ्च
२३८२	सर्तिशास्त्यर्ति
२५६३	सत्यापपाश·

सूत्राङ्काः सूत्रम्	सूत्राङ्काः सूत्रम्	सूत्राङ्काः सूत्रम्	सूत्राङ्काः सूत्रम्
२२७१ सदिरप्रतेः	२२६७ सिचि वृद्धिः	२२७२ स्तम्भेः	२५७४ हनस्तोऽचिण्ण-
२३६१ सदेः परस्य	२२२६ सिजभ्यस्तवि-	२५८० स्तम्भुसिवुस-	२४३३ हनो वध लि-
२३०४ सनाद्यन्ता	२४८५ सिपि धातो रु-	२३८५ स्तुसुधूञ्भ्यः	२४३१ हन्तेर्जः
२३६५ सन्यङोः	२३५९ सिवादीनां	२३८६ स्थाघ्वोरिच्च	२५५९ हलः
२३१७ सन्यतः	२५५३ सुट्कात्पूर्वः	२२७७ स्थादिष्वभ्या-	२५५७ हलः श्नः
२३३१ सन्लिटोर्जः	२२१० सुट् तिथोः	२३२३ स्नुक्रमोरन-	२१७६ हलादिः शेषः
२३१६ सन्वल्लघुनिचङ-	२५२४ सुनोतेः स्यसने	२५३७ स्फुरतिस्फुल-	१५४० हिंसायां प्रतेः
२५५० संपरिभ्यां	२४७७ सुविनिर्दुर्भ्यः	२२२० स्मोत्तरे लङ्	२५३० हिनुमीना
२५५१ समवाये च	२४०६ सृजिदृशोर्झल्य-	२१८६ स्यतासी लृलु	२४२५ हुझल्भ्यो हेर्धि
२२५२ सवाभ्यां	२२७८ सेधतेर्गतौ	२१८८ स्यदो जवे	२३८७ हुश्नुवोः सार्व-
२३५७ सहिवहोरोद-	२२०१ सेर्ह्यपिच्च	२२७६ स्वरतिसूति-	२५३१ हेरचङि
२२३४ सार्वधातुकम-	२५०६ सेऽसिचिकृत-	२१५८ स्वरितञितः	२२१९ ह्मन्तक्षणश्वस
२१६८ सार्वधातुकार्धः	२३५८ सोढः	२५२३ स्वादिभ्यः श्नुः	२१८० ह्रस्वः
२३९२ सिचि च परः	२५५१ स्तन्भुस्रुन्भु-	२२५० ह एति	२.६९ ह्रस्वादङ्गात्

भ्वाद्यादिचुराद्यन्तर्गतवार्तिकसूची

वार्तिकं सूत्राङ्काः	वार्तिकं सूत्राङ्काः	वार्तिकं सूत्राङ्काः	वार्तिकं सूत्राङ्काः
अडभ्यासव्य- २५१३	उत्तरपदत्वे चा ४४२	दृम्भश्च २५०३	शतसहस्रयोरेव १८४६
अधिकरणाचेति २४६४	ऊर्णोतेराम २४४५	दरिद्रातेरार्ध- २४८३	शस्य यो वा २४३७
अन्तःशब्दस्या- २२३१	ऋदुपधे २२८९,२३०२	दानेर्जवे २३९४	शानेनिशाने २३६४
आख्यानात्कृत- २५७३	कमेरच्लेश्च ङ् २३१८	दुरः स्वपनस्व- २२३१	श्वयतेर्लिटय- २४२०
आडिचम इति २३२०	कितेर्ज्यधिप्र- २३९४	धूञ्भ्रीञोर्नुग्व- २५७२	षष्ठ्यामन्त्रित- ३६५६
आनुपूर्व्यं हे २१४७	कृञोऽसुट् २५५:	बधश्चित्तविकारे २३६४	संस्थानत्वं नमः २४२३
आशिषि २२५९,२६८७	किडति रमाग २५:२	मज्जेरन्त्यात्पूर्वो २५४१	सिज्लोप एका- २२६६
इण्वदि २४६२,	किडत्यजादौ २४७:	मनोजिज्ञासाया २३९४	सुञधातुधिवु- २२८९
२६०७,२६१५	गुपेर्निन्दायाम् २३१:	लुङ् वा २४८३	स्पृशमृश २४०७
इस्वोत्त्वाभ्यां २३९०	चयो द्वितीयाः २४३७	वर्जने कशाम् २४३८	स्वञ्जेरुपसंख्या- २३९७
इर इत्संज्ञा वा २२६८	ण्यङ्लोपाविय- २३१३	वलादावार्धधा- २२९२	स्वरादीवयलोपेषु २२६२
इषेस्तकारे श्य २५६०	तिजेःक्षमायाम् २३९४	वुरदुटा २१८३,२५८७	

धातु-सूची

धातुः	धात्वङ्काः
अ	
अक	७९२
अकि	८७
अक्षू	६५४
अग	७६३
अगि	१४६
अधि	१०६
अङ्क	१६२७
अङ्ग	१६२८
अचि॒	८६२
अचु॒	८६२
अज	२३०
अजि	१७८६
अट	२६०
अट्ट	२७५
अट्ट	१५६१
अठि	२६१
अड	३५८
अड्ड	३४८
अण	४४४
अण	११७५
अत	३८
अति	६१
अद	१०११
अदि	६२
अन	१०७०
अन॒	११७९
अञ्चु	१८८
अञ्चु	८६२
अञ्चु	१७३६
अञ्जू	१४५८
अन्ध	१६२९
अबि	३७८
अभि॒	३८५
अभ्र्	५५६
अम	४६९
अम	१७२१
अय	४७४
अर्क	१६४४
अर्च	२०४
अर्च	१८०६
अर्ज	२२४
अर्ज	१७२६
अर्थ	१६०५
अर्द	५५
अर्द	१८२६
अर्व	४१५
अर्व	५०४
अर्ह	७५०
अर्ह	१७३२
अर्ह	१८३१
अल	५१५
अल॒	९१२
अव	६००
अश	१५२३
अशू	१२१४
अष॒	८८६
अस	८८६
अस्म	१०५०
अंस	१६१८
असु	१२०६
अह	१२७२
अहि	६३५
अहि	१७६८
आ	
आछि	२०६
आप्लृ	१२६०
आप्लृ	१८४०
आस	१०२१
इ	
इक्	१०४७
इख	१४०
इखि	१४१
इगि	१०३
इङ्	१०४६
इट	३१८
इण्	१०५५
इदि	६३
जि इन्धी	१४४८
इल	१३५७
इल	१६६१
इवि	५८७
इष	११२७
इष	१३०१
इष	१५२५
ई	
ईक्ष	६१०
ईखि	१४२
ईड्	११४३
ईज	१८२
ईज	१०१६
ईड	१६६८
ईर	१०१८
ईर	१८११
ईर्ष्य	५१०
ईर्ष्य	७११
ईश	१०२०
ईष	६११
ईष	६८४
ईह	६३२
उ	
उक्ष	६५७
उख	१२८
उखि	१२६
उङ्	६५३
उच	१२२३
उछि	२१५
उछि	१२६४
उछी	२१६
उछी	१२६५
उज्झ	१३०४
उठ	३३८
उध्रस॒	१०२४
उध्रस॒	१७४३
उन्दी	१४८७
उन्भ	१३२०
उब्ज	१३०३
उभ	१३१६
उर्द	२०
उर्वा	५६६६
उलडि॒	१५४२
उष	४६६
उहिर्	७५६
ऊ	
ऊठ॒	३३८
ऊन	१८८९
ऊर्णा	४८३
ऊर्ज	१३०६
ऊर्णुञ	१०३६
ऊष	६८३
ऊह	६४८
ऋ	
ऋ	६३६
ऋ	१०९८
ऋच्च	१३०२
ऋच्छ	१२६६
ऋज	१७६
ऋजि	१७७
ऋणु	१४६७
ऋधु	१२४५
ऋधु	१२७१
ऋन्फ	१३१६
ऋफ	१३१५
ऋषी	१२८७
ॠ	
ॠ	१४६७
ए	
एजृ	१७६
एजृ	२३४
एठ	२६७
एध	२
एषृ	६१८
ओ	
ओखृ	१२१
ओणृ	४५४
ओलडि	१५४२
क	
कक	६०
कंकि	४६
कख	१२०
कंचे	७८४
कंगे	७९१
कच	१६८
कचि	१६६
कटी	३२०
कटे	२९४
कठ	३३३
कठि	२६४
कठि	१८४८
कड	३६०
कड	१३८०
कडि	२८२
कडि॒	३६०
कंडि	१५८२
कडु	३४६
कण	४४६

कण ७९४
कण १७१६
कत्थ ३७
कत्र १६१५
कथ १८५२
कदि ७०
कदि ७७२
कनी ४६०
कपि ३७५
कबृ ३८०
कमु ४४३
कर्ज २२८
कर्ण॰ १६२४
कर्त॰ १६१५
कर्द ५६
कर्ब ४२०
कर्ब ५८१
कल ४६७
कल १६०४
कल १८६६
कल्ल ४६८
कश॰ १०२४
कष ६८५
कस ८६०
कस॰ १०२४
कसि १०२४
काङ्क्षि ६६७
काचि १७०
काल॰ १८८१
काश्ट ६४७
काश्ट ११६२
कास् ६२३
कि ११०१
किट ३०१
किट ३१९
कित ९६३
किल १३५३
कीट १६४१
कील ५२४
कु १०४२
कुक ६१
कुङ् ६५१
कुङ् १४०१
कुच १८४
कुच ८५७
कुच १३६८
कुजु १६६
कुट १३६६
कुट॰ १६६
कुटुम्ब॰ १६७९
कुट्ट १५५८
कुट्ट १७०३
कुठि ३४२
कुठि॰ १५८४
कुड १३८३
कुडि ३२२
कुडि १५८३
कुडि २७०
कुण १३३५
कुण १८६४
कुत्स १६६८
कुथ १११८
कुथ॰ १५१४
कुथि ४६
कुद्रि १५३६
कुब्ज १८५
कुन्थ १५४१
कुथ १२३३
कुप १७८०
कुवि ४२६
कुबि १६५६
कुभि॰ १६५६
कुमार १८७८
कुर १३४१
कुर्द २१
कुल ८४२
कुशि १७६६
कुष १५१८
कुस १२१८
कुसि १७६४
कुस्म १७१२
कुह १६०१
कूड॰ १४०१
कूज् २२३
कूट १७०२
कूट १८६१
कूण १६८६
कूण १८९६
कूल ५२५
कृञ् १२५३
(ड्)कृञ् १४७२
कृड १३८२
कृती १४३५
कृती १४४८
कृप १८७०
कृपि १७४६
कृपू ७६२
कृवि ५६८
कृश १२२७
कृष ६६०
कृष १२८६
कॄ १४०६
कॄ १४६६
कॄञ् १४८५
कत १६५४
केत॰ १८६२
केपृ ६३८
केल् ३५७
कै ६१६
क्नथ ८००
क्नसु १११३
क्नूञ् १४८०
क्नूयी ४८५
क्मर ५५५
क्रथ ८०१
क्रद॰ ७७३
क्रदि ७१
क्रदि ७७३
आङःक्रंद १७२८
क्रप ७७१
क्रमु ४७३
क्रु क्रीञ् १४७३
क्रीड् ३५०
क्रुड १३६४
क्रुध ११८६
क्रुञ्च १८६
क्रुश ८५६
क्लथ ८०२
क्लद॰ ७७४
क्लदि ७२
क्लदि ७७४
क्लप॰ १६५६
क्लमु १२०७
क्लिदि १५
क्लिदि ७३
क्लिदु १२४२
क्लिश ११६१
क्लिशू १५२२
क्लीबृ ३८१
क्लुङ्॰ ६५८
क्लेबृ॰ ५०६
क्लेश ६०७
क्षण ४५०
क्षथे ८४६
क्षजि ७६६
क्षणु १४६५
क्षपिः॰ ८१६
क्षपि १६२१
क्षमू १२०६
क्षमूष् ४४२
क्षर ८५१
क्षर १५६७
क्षि २३६
क्षि १२७६
क्षि १४०७
क्षिज २३७
क्षिणु १४६६
क्षिप ११२१
क्षिप १२८५
क्षिप १६४१
क्षीबृ ३८२
क्षीवु ५६७
क्षीष् १५०७
(टु)क्षु १०३६
क्षुदिर् १४४३
क्षुध ११६०
क्षुभ ७५१
क्षुभ १२३९
क्षुभ १५१६
क्षुर १३४४
क्षेवु १५६८
क्षे ६१३
क्षोट १८७६
क्षणु १०३७
क्ष्मायी ४८६
क्ष्मील ५२०
क्ष्विदा* ७४४
अभि क्ष्विदा २४४
क्ष्वेल् ५३६

ख

खच १५३१
खज २३२
खजि २३३

खट ३०९
खट्ट १६३३
खड १५८०
खडि २८३
खडि १५८१
खद ५०
खनु ८७८
खर्ज २२९
खर्द ६०
खर्ब ४२१
खर्व ५८२
खल ५४५
खव॰ १५३१
खष ६८६
खाद्द ४९
खिट ३०२
खिद ११७०
खिद १४३६
खिद् १४४९
खुड्॰ ९५४
खुजु २००
खुड॰ १३८७
खुडि १५८५
खुर १३४२
गुर्द २२
खेट १८७५
खेड॰ १८७५
खेल ५३८
खेवृ॰ ५०६
खै ९१२
खोड॰ १८७५
खोऋ ५५२
खोल ५५१
ख्या १०६०

ग

गज २४६
गज १६४८
गजि २४७
गड ७७७
गडि ६५
गडि ३६१
गण १८५४
गद ५२
गदी १८६१
गन्ध १६८५
गम्लृ ९८२
गर्ज २२६
गर्ज॰ १६६५
गर्द ५७
गर्द॰ १६६५
गर्ध॰ १६६५
गर्व ४२२
गर्व ५८३
गर्व १९०७
गर्ह ६३६
गर्हे १८४६
गल ५४६
गल १७००
गल्भ ३९२
गल्ह ६३७
गवेष १८८४
गा ११०६
गाङ् ९५०
गाधृ ४
गाहू ६४९
गु १३९९
गुङ् ९४९
गुज १३५९
गुजि २०३
गुठि॰ १५८४
गुड १३७०
गुडि १५८४
गुण १८९५
गुद २४
गुध ११२०
गुध १५१७
गुन्फ १३१८
गुप ९७०
गुप १२३४
गुप १७७२
गुपू ३९५
गुफ १३१७
गुरी १३९६
गुर्द २३
गुर्द १६६६
गुर्वी ५७४
गुहू ८९६
गूर १६९५
गूरी ११५४
गृ ९३७
गृ १७०८
गृज २४८
गृजि २४९
गृधु १२४६
गृह १८९९
गृहू ६५०
गॄ १४१०
गॄ १४९८
गेपृ ३६९
गेवृ ५०२
गेषृ ६१४
गै ९१७
गोम १८७७
गोष्ठ २५७
ग्रथि ३६
ग्रन्थ १५१३
ग्रन्थ १८२६
ग्रन्थ १८३९
ग्रस १७५०
ग्रसु ६३०
ग्रह १५३३
ग्राम १८९३
ग्रुचु १९७
ग्लसु ६३१
ग्लह ६५१
ग्लुचु १९८
ग्लुन्चु २०१
ग्लेपृ ३६६
ग्लेपृ ३७०
ग्लेवृ ५०३
ग्लेपॄ॰ ६१४
ग्लै ९०३

घ

घघ १५९
घट ७६३
घट १७२४
घट १७६७
घटि १७६८
घट्ट २५९
घट्ट १६३१
घष॰ ६५२
घस्लृ ७१८
घिणि ४३४
घुङ् ९५२
घुट ७४६
घुट १३८५
घुण ४३७
घुण १३२८
घुणि ४३५
घुर १३४५
घुषि ६५२
घुषिर् ६५३
घुसिर् १७२७
घूरी ११५५
घूर्ण ४३८
घूर्ण १३३९
घृ ९३८
घृ १०९६
घृ १६२१
घृणि ४३६
घृणु १४६९
घृषु ७०८
घ्रा ९२६

ङ

ङुङ् ९५४

च

चक ९३
चक ७८३
चकास् १०७४
चक्क १५९५
चक्षिङ् १०१७
चट १७२२
चट॰ २९४
चडि २७८
चण ७९६
चते ८६५
चर्द् ६८
चदे ८६६
चन॰ १८४१
चञ्चु १९०
चप ३९९
चप॰ १६२७
चपि १६२०
चमु ४६९
चमु १२७४
चय ४७८
चर ५५९
चर १७४६
चर्करीतं १०८१
चर्च ७१७
चर्च १२९९
चर्च १७१३
चर्ब ४२५
चर्व ५७५
चल ८३२

चल १३५६
चल १६०८
चलि: ८१२
चष ८९९
चह ७२९
चह १६२७
चह १८६७
चायृ ८८०
चि १७९५
चिञ् १६३०
चिञ् १२९१
चिट २१५
चित १६७४
चिति १५३५
चिती ३९
चित्र १९१७
चिरि १२७७
चिल १३०५
चिल्ल ५३३
चीक १८२८
चीभृ ३८४
चीव १७७५
चीवृ ८७९
चुक्ष १५१६
चुच्य ७१३
चुट १६१३
चुट १३७७
चुटि १६६०
चुट्ट १५६०
चुड १३१२
चुडि ३२५
चुड्ड ३४७
चुद १५९२
चुप ४०३
चुबि ४२१
चुबि १६३६
चुर १५३४
चुल १६०२
चुल्ल ५३१
चूरी ११५८
चूर्ण १५५२
चूर्ण १३४२
चूष ६७३
चृती १३२४
चेपृ १८२१
चेरृ ५३६
चेष्ट २५६
च्यु १७४७
च्युङ् ६०५
च्युतिर् ४०
च्युस १७३०

छ

छजि १३२२
छद १८३४
छद १६३५
छदि १०७७
छदिर् ८१३
छमु ४७०
छर्द १५८१
छष ८९०
छिदिर् १४४०
छिद्र १६२४
छुट १३७८
छुट १३८८
छुप १४१८
छुर १३७२
उच्छृदिर् १४४५
छृदी १८२१
छृप १८२१
छेद १६३४
छो ११४६

ज

जत १०७१
जज २४२
जजि २४३
जट ३०५
जन ११०५
जनी ११४६
जप ३९७
जभि १७१७
जभी ३८८
जमु ४७१
जर्ज ७१६
जर्ज १२९८
जल १५४३
जल ८३३
जल्प ६९८
जष ६८८
जम्भि १६६७
जपु १६६९
जपु १७१६
जसु १२११
जागृ १०७२
जि ७६१
जि ९४६
जि १७९४
जिमु ४७२
जिरि १२७८
जिवि ७६४
जिषु ६६७
जीव ५६२
जुगि १५७
जुट १३७६
जुड १३२६
जुड १६४७
जुतृ ३२
जुन १३२६
जुष १८३५
जुषी १२८८
जूरी ११२६
जूष ६८१
जृभि ३८६
जृ १४६४
जृ १८१५
जृर् ११३०
जेष ६१६
जेह ६४४
जै ६१४
ज्ञप १६२५
ज्ञा ८११
ज्ञा १५०७
ज्ञा १७३३
ज्या १४६६
ज्युङ् ९५६
ज्रि ६४७
ज्रि १८१६
ज्वर ७७६
ज्वल ८०४
ज्वर ८३१

झ

झट ३०६
झमु ४७२
झर्ष १३००
झर्ष ७१८
झष ६८६
झष ८६१
झृ १४६४
झष् ११३१

ट

टकि १६३६
टल ८३४
टिकृ १०३
टीकृ १०४
टूवल ८३५

ड

डप १३७७
डिप १३७२
डिप् १३७८
डिप १३७१
डिप १२३२
डीङ् ६६८
डीङ् ११३५

ढ

ढौकृ ६८

ण

णत्त ६६२
णम्ब १३४
णबि १३५
णट ३१०
णट ७८१
णद ५४
णद १७७६
णभ १५२०
णभ ७५२
णभ १२४०
णभ ६८१
णय ४८०
णल ८३८
णश ११६४
णस ६२७
णह ११६६
णासृ ६२५
णिच्च ६५६
णिजि १०२६
णिजिर् १०६३
णिदि ६६
णिद ८७१
णिल १३६०
णिवि ५६०
णिश ७२२
णिसि १०२५

णीञ् ९०१
णीध ५६६
णु १०३५
णुद १२८२
णुद १४२६
णू १३९७
णेद ८७२
णेपृ ६१७

त

तक १ १७
तकि ११८
तक्ष ६६५
तक्षू ६५७
तगि १४९
तट ३०८
तड १२७९
तड १८०२
तडि २८२
तत्रि १३७९
तनु १४६३
तनु १८४१
तन्त्र १९१
तन्त्र १४५९
तप ११५९
तप ९८२
तप १८१९
तमु १२०२
तय ४७९
तर्क १७८१
तर्ज २२७
तर्ज १६८२
तर्द ५८
तल १५९८
तसि १७३०
तसु १२१२
ताय् ४८९
तिक १२६६
तिक् १०५
तिग १२६७
तिज ९७१
तिज १६५३
तिज् १०९
तिज १६०७
तिज्ञ ५३४
तीक् १०६
तीर १९१२
तीव ५६०
तुज २४४
तुज १२२६
तुजि २४७
तुजि १५६६
तुजि १७०६
तुट १३७६
तुड १३८६
तुडि २७६
तुड् ३५१
तुग १३३२
तुन्थ १९४३
तुद १२८१
तुम्प ४०५
तुम्प १३१०
तुम्फ ४०९
तुम्फ १३१२
तुप ४०४
तुप १३०९
तुफ ४०८
तुफ १३११
तुबि १६५८
तुबि ४२८
तुभ ७५३
तुभ १५२१
तुभ १२४१
तुर ११०२
तुर्वी ५७०
तुल १५९९
तुप ११८४
तुग ७१०
तुहिर् ७३७
तूड्ञ् ३५१
तृग १६९०
तृरी ११५२
तूल ५२७
तूप ६७३
तृगु १४३८
तृजूरिर् १४४६
तन्फ १३०८
तन्दू १३५०
तप १२९५
तपञ् १२७१
तृप १८२०
तप १३०७
तफञ् १३०७
तिं तृषा १२२८
तह १४००
तह् १३४८
तृ ९३९
तेज २३१
तेपृ ५६३
तेवृ ४९९
त्यज ९८६
त्रकि ९७
त्रक्ष ६६०
त्रप ९५९
त्रपञ् १५५
त्रदि ६९
त्रपि ८१६
त्रपुष् ३७४
त्रस १७४२
त्रसी ११९७
त्रिखिञ् १५५
त्रिसि १७६२
त्रुट १३७५
त्रुट १६९९
त्रुन्प ४०७
त्रुन्फ ४११
त्रुप ४०६
त्रफ ४१०
त्रङ् ९६५
त्रौक् ९९
त्वक्षू ६५६
त्वगि १५०
त्वच १३०१
त्वन्चु १९२
त्विषरा ७५८
त्विष १००१
त्सर ५५४

थ

थुड १३८७
थुर्वी ५७१

द

दक्ष ६०८
दक्ष ७७०
दघ १२७३
दाढ १९२६
दद १७
दध ८
दन्भु १२७०
दन्श ९८९
दभु १२०३
दय ४८१
दरिद्रा १०७३
दल ५४८
दल १७५२
दलिञ् ८१६
दशि १६७५
दशि १७३५
दसञ् १६७३
दसि १६७६
दसि १७८७
दसु १२१३
दह ९९१
डु दाञ् १०९१
दाग् ९३०
दान ९९४
दाप् ५०२९
दाश १२७९
दाश्व ८८२
दासृ ८७४
दिवि ७९२
दिवु ११०७
दिवु १७०७
दिवु १७२५
दिश १२८३
दिह १०१६
दीक्ष ६०९
दीङ् ११३४
दीधीङ् १०७६
दीपी ११२०
दु ९४४
(दु)दु १२५६
दुःख १९३०
दुल १६००
दुर्वी ५७२
दुष ११८५
दुह १०१४
दुहिर् ७३८
दृङ् ११३३
दृ १२८०
दृक् १४११
दृन्फ १३१४
दृप ११९६

इषः॑	१८२१			धोर्क	५५३	निवास	१८८६
इष	१३१३	घ		ध्मा	९२७	निष्क	१६८७
इष॑	१३१३	धक	१५१४	ध्यै	९०८	नील	५२२
इभ	१८२३	धणि॑	४५३	ध्रज	२१९	नृती	१११६
इभी	१३२३	धन	११०४	ध्रजि	२२०	न	८०९
इभी	१८२२	धवि	५१७	ध्रण	४५९	६ नृ	१४१५
इंशिर्	१८८	(डु)धाञ्	१०१२	(उ)ध्रस	१५२४	प	
इह	७३३	धातु	६०१	(उ)ध्रस	१७४३	पक्ष॑	६६५
इहि	७३४	धि	१४०६	ध्राक्षि	६७१	पक्ष	१५५०
६	८०८	धिक्ष	६०३	ध्राख्	१२५	डुपचष्	९९६
६	१४१३	धिवि	५१३	धाघृ॑	११४	पचि	१७४
देङ्	१६२	धिष	११०३	ध्राड्	२८८	पचि	१६५२
देष्टृ	५००	धीङ्	११३६	ध्रु	९४३	पट	२९६
दैप्	१२४	धुक्ष	६०२	ध्रु	१४००	पट	१७५३
दो	११४८	धुञ्	१२५५	ध्रुव॑	१४००	पट	१८५७
द्यु	१०४०	धुर्वी	५७३	ध्रेकृ	७१	पठ	३३०
द्युत	७४१	धू	१३१८	ध्रै	१०७	पडि	२८१
द्यै	१०५	धृञ्॑	१२५५	ध्वज	२२१	पडि	१६१५
द्रम	४६६	धृञ्	१४८७	ध्वजि	२२२	पण	४३१
द्रा	१०५४	धृञ्	१८३६	ध्वण	४५३	पत॑	११५१
द्राक्षि	६७०	धृप	३९६	ध्वन	८१६	पत	१८६२
द्राख्	१२४	धृप	१७७३	ध्वन	८२८	पत्लृ	८४५
द्राघृ	११४	धृरी	११५३	ध्वन	१८१०	पथ॑	१५७५
द्राड्	२८७	धृश॑	१६४०	ध्वनि॑	८१६	पथि	१५७५
दाह	६४६	धृष॑	१६४०	ध्वन्सु	७०५	पथे	८४७
द्रु	१४५	धृस	१६४०	ध्वाक्षि	६७२	पद	११६१
द्रुण	१३३७	धृङ्	१६०	ध्वृ	१३१	पद	१८१८
द्रुह	११११७	धृङ्	१४१२	न		पन	४४०
द्रुञ्	४८१	धृज	२१७	नक्क	१५१३	पय	४७६
द्रेकृ	७८	धृजि	२१८	नट	१५४५	पर्ण	१३३१
द्रै	१०६	धृञ्	९००	नट	१७१२	पर्द	२१
द्विष	१०१३	धृष	१८५१	(टु)नदि	६७	पर्प	४१२
दृष्ट	१३४	ञि धृषा	१२६१	नर्द	५६	पर्ब	४१६
		धृ॑	१४१४	नल	१८०३	पर्व	५७७
		धेक	१९१४	नाथृ	६	पल	८३१
		धेट्	९०२	नाध	७	पल्वूल	१८८२
						पश	१७२०
						पष	१८६३
						पसि	१६१६
						पा	११२५
						पा	१०५६
						पार	१११९
						पाल	१६०१
						पि	१४०५
						पिच्छ	१५७६
						पिज॑	१५६७
						पिजि	१०२८
						पिजि	१५६७
						पिजि	१७५८
						पिट	३१९
						पिठ	३११
						पिडि	२७४
						पिडि	१६७०
						पिवि	५८८
						पिशि	१४३७
						पिष्लृ	१४५२
						पिस	१५६८
						पिसि	१७६३
						पिसृ	७१९
						पीङ्	११४१
						पीड	१५४४
						पील	५२५
						पीव॑	५६३
						पुट	१३६७
						पुट	१७५४
						पुट	१९१३
						पुटि	१७९३
						पुट्ट	१५५९
						पुड	१३८४
						पुडि॑	३२६
						पुण	१३३३
						पुण॑	१६३७

पुथ १११६
पुथि १७७६
पुथि ४४
पुर १३४६
पुर्व ५७६
पुल ८४१
पुल १६०१
पुल १६३७
पुष ७००
पुष ११८२
पुष १५२६
पुष १७८१
पुष्प ११२२
पुंस १६३८
पुस्त १५६०
पूङ् ६६६
पूज १६४३
पूञ् १४८२
पूर्यी ४८४
पूरी ११५१
पूरी १८०४
पूर्ण॰ १६३७
पूल ५२८
पूष ६७५
पृ॰ १०८६
पृ १२५८
पृङ् १४०२
पृच १८०८
पृची १०३०
पृची १४६२
पृजि॰ १०२८
पृड १३२८
पृण १३२६
पृथ १५५४
पृषु ७०५
पॄ १०८६
पॄ १४८६
पॄ १५४८
पेल् ५४१
पेषृ ५०४
पेषृ ६१५
पेसृ ७२०
पै ६२०
पैण् ४५८
ओ प्यायी ४८८
प्यैङ् ६६४
प्रच्छ् १४१३
प्रथ ७६८
प्रथ १५५३
प्रस ७६६
प्रा १०६१
प्रीङ् ११४४
प्रीञ् १४७४
प्रीञ् १८३७
प्रुङ् ६५७
प्रुड ३२४
प्लुषु ७०३
प्लूष १५२७
प्लेष्ट ६१६
प्लैण्॰ ४५८
प्रोथृ ८६७
प्लिह ६४२
प्ली १५०३
प्लुङ् ६५८
प्लुष १११५
प्लुष १२१६
प्लुष १५२८
प्लुषु ७०४
प्सा १०५५

फ

फक्क ११६
फण ८२१
फल ५३०
फलि ५१६
फुल १३६०
फुल्ल ५३२
फल् ५४२

ब

बण॰ ४५६
बद ५१
बध ६७३
बध १५४७
बन्ध॰ १५४०
बन्ध १५०८
बर्ब ४१८
बर्ह ६३८
बर्ह १६६५
बर्ह १७७०
बल ८४०
बल १६२६
बल्ह ६३६
बल्ह १७७१
बस्त १६८४
बाड् २८६
बाधृ ५
बाह् ६४५
बिट ३१७
बिदि ६४
बिल १३५६
बिल १६०६
बुक्क ११६
बुक्क १७१४
बुगि १५८
बुध ८५८
बुध ११७२
बुधिर ८७५
(उ) बुन्दिर ८७६
बुस १२१९
बुस्त १५६१
बृह ७३५
बृहि ७३६
बृहि १७६६
बृहिर्॰ ७३६
बृह्॰ १३४७
वेह्॰ ६४३
ब्रश्च् १०४४
ब्रूस १६६४

भ

भक्ष ८६३
भक्ष १५५७
भज ९६८
भज १७३४
भजि १७६०
भट ३०७
भट ७८०
भडि २७३
भडि १५८८
भण ४४७
भदि १२
भन्जो १४५३
भर्त्स १६८३
भर्व ५८०
भल ४६५
भल १७०१
भल्ल ४९८
भष ६६५
भस ११००
भा १०५१
भाज १८८७
भाम ४४१
भाम १८७३
भाष ६१२
भास् ६२४
भिक्ष ६०६
भिदि* ६४
भिदिर् १४३९
(भि) भी १०८४
भुज १४५४
भुजो १४१७
भुवः १७४८
भू १
भृ १८४५
भूष ६८२
भूष १७३१
भृजी १७८
भृञ् ८६८
भृञ् १०८७
भृड १३६५
भृशु १७८८
भृष्ट १२२४
भृ १४६१
भेषृ ८८३
भ्यस ६२८
भ्रक्ष ८६२
भ्रण ४५२
भ्रन्शु॰ ७५६
भ्रन्शु १२२५
भ्रम्सु ७५६
भ्रमु ८५०
भ्रमु १२०५
भ्रस्ज १२८४
भ्राजृ १८१
(टु) भ्राजृ ८२३
(टु) भ्राश्च् ८२४
भ्री १५०५
भ्रूण १९९१
भ्रेजृ १८०
भ्रेषृ ८८४
भ्लक्ष ८९३
टु भ्लाश्च् ८२५
भ्लेषृ ८८५

म

मक्कि ८९

मख १३२
मखि १३३
मगि १४८
मघि १११
मघि १६०
मच १७१
मचि १७३
मठ ३३२
मठि २६३
मडि २७२
मडि ३२१
मडि १९८७
मण ४४८
मन्त्रि १६८०
मथि ४६
मथे ८४८
मद १७०६
मदि १३
मदी ८१५
मदी १२०८
मन ११७६
मनु १४७१
मन्थ ४२
मन्थ १५११
मभ्र ८८८
मय ४७७
मर्च १६९०
मर्ब ४१९
मर्व ९७८
मल ४९३
मल्ल ४९४
मच ५९९
मव्य ९०८
मश ७२४
मष ६९२
मसी १२२१
मस्क १०२
टु मस्जो १४१५
मह ७३०
मह १८६८
महि ६३४
महि १८००
मा १०६२
मास्ति ६६९
माङ् १०८८
माङ् १४४२
मान ९७२
मान १७१०
मान १८४४
मार्ग १६१८
मार्ग १८४७
मार्ज १६४९
माह ८९०
मिच्छ १२९७
मिजि १७५७
(डु)मिञ्१२९०
मिथृ॰ ८६८
जि मिदा ७४३
ञि मिदा १२४३
मिदि १५४१
मिद ८६८
मिथृ॰ ८६८
मिल १३६४
मिल १४२९
मिवि ५८९
मिश ७२३
मिश्र १९२१
मिष १३९२
मिषु ६९९
मिह ९९२
मी १८२५
मीङ् ११३७
मीञ १४७६
मीमृ ४६८
मील ५१७
मीव ५६३
मुच १७४४
मुचि १७२
मुच्लृ १४३०
मुज २५०
मुजि २५१
मुट १३७४
मुद १६१४
मुठि २०५
मुड ३२३
मुडि २७८
मुडि ३२६
मुण १३३४
मुद १६
मुद १७४१
मुर १३४३
मूर्च्छा २१२
मूर्वा ८७५
मृष १९३०
मृ १२२०
मुस्त १६३२
मृह ११९८
मृङ् ९६७
मूत्र ११०६
मूल ५२९
मूल १६०३
मूष ६७६
मृक्ष ६६४
मृग १९००
मृङ् १४०३
मृजू १८४९
मृजूष् १०६६
मृड १३२७
मृड १९१६
मृण १३३१
मृद ७६७
मृद १९१५
मृधु ८७४
मृश १४२५
मृष ११६४
मृष १८८०
मृषु ७०७
मृ १४९२
मेङ् ६६१
मेथृ॰ ८६६
मेट ८३६
मेध ८७०
मेधृ॰ ८६६
मेधृ ३७१
मेवृ ५०५
म्ना ६२६
म्रक्ष॰ ६६४
म्रद १६६२
म्रदु १६०
म्रन्चु १६३
म्रेड् २६३
म्लुचु १६६
म्लुच्चु १६४
म्लेच्छ २०५
म्लेच्छ १६६३
म्लेट् २६२
म्लेषृ ५०६
म्लै १०४

य
यक्ष १६६३
यज १००२
यत १७३६
यती ३०
यत्रि १५३६
यभ ६८०
यम ६८४
यमः ८१६
यम १६२६
यसु १२१०
या १०४६
(ट्)याचृ ८६३
यु १०३०
यु १७७६
युगि १९६
युछ २१४
युज ११७७
युज १८०७
युजिर १४४४
युप् १४७६
युतृ ३१
युध ११७३
युप १२३५
यूष ६८०
योट्ट २६१

र
रक १७३७
रक्ष ६५८
रख १३६
रखि १३७
रग॰ १०३८
रगि १४४

रगे ७८९
रघ॰ १७३८
रघि १०७
रघि १७९६
रच १८६५
रट २६७
रट ३३४
रठ॰ ३३४
रण ४४५
रण ७९५
रणि॰ ८१६
रद ९३
रध ११९३
रन्ज ९६९
रन्ज ११६७
रप ४०१
रफ ४१३
रफि ४१४
रबि ३७३
रभ ६७४
रभि॰ ३८५
रमु ८९३
रय ४८२
रवि ९९६
रस ७१३
रस १६३१
रह ७३१
रह १६२८
रह १८५९
रहि ७३२
रहि १७९९
रा १०५७
राखृ १२२
राघृ ११२
राजृ ८२२
राधः ११८०
राध १२६२
रास् ६२६
रि १४०४
रि १२७५
रिख॰ १९९
रिंग १९४
रिच १८१७
रिचिर् १४४१
रिफ १३०६
रिवि ५६९
रिश १४२०
रिष ६९४
रिष १२३१
रिह॰ १३०६
री १९००
रीङ् ११३८
रु १०३४
रुङ् ९९९
रुच ७४५
रुज १८०५
रुजो १४१६
रुट ७४७
रुट॰ १६७१
रुट १७८४
रुटि ३२७
रुठ ३२६
रुठि* ३२७
रुठि ३४५
रुडि॰ ३२७
रुदिर् १०६७
रुध ११७४
रुधिर् १४३८
रुष १२३६
रुश १४१६
रुशि १७८९
रुष ६९३
रुष १२३०
रुष १६७१
रुसि १७९१
रुह ८५६
रूक्ष १९१०
रूप १६३३
रूष ६७८
रेकृ ८०
रेट् ८६४
रेपृ ३७२
रेभृ ३८७
रेषृ ५०७
रेषृ ६२
रै १०६
रोडृ ३९६
रोडृ ३५७

ल

लक्ष १६६७
लक्ष १९३८
लख १३८
लखि १३६
लग १७३८
लगि १४५
लगे ७८६
लघि १०८
लघि १७६१
लघि १७६७
लछ २०६
लज २३८
लज॰ १९४३
लज १६२०
लजि २३६
लजि॰ १५६६
लजि १७८९
लजि॰ १९२०
ओलजी १२६०
लट २६८
लड ३५६
लड १५४०
लडिः ८१४
लडि १८०१
ओलडि॰१५४२
लप ४०२
लबि ३७७
लबि ३७६
(डु) लभष्
६७५
लर्ब ४१७
लल॰ ३९६
लल १६८८
लष ८८८
लस ७१४
लस १७२९
(ओ) लस्जी
१२९१
ला १०५८
लाखृ १२३
लाघृ ११३
लाछि २०७
लाज २४०
लाजि २४१
लाभ ११३६
लिख १३९५
लिंग १५९
लिंग १७४०
लिप १४३३
लिश ११७९
लिश १२४१
लिह १०१६
ली १८१२
ली १९०१
लीङ् ११३६
लुजि॰ १९६७
लुजि १७०९
लुट ३१४
लुट ७४८
लुट १३८१
लुट १७५९
लुटि ३२८
लुठ ३३७
लुठ ७४६
लुड १२२२
लुठि॰ ३२८
लुठि ३४३
लुठि ३४६
लुड॰ ३१४
लुडि॰ ३२८
लुण्ठ १५६३
लुथि ४९
लुब्ध १८७
लुप १२३७
लुप्लृ १४३१
लुबि ४२७
लुबि १६९७
लुभ १२३८
लुभ १३०५
लूज १४८३
लूष ६७७

लूष १६१०
लेपृ ३७३
लोकृ ७६
लोकृ १७७७
लोचृ १६४
लोचृ १७७८
लोडृ ३५७
लोष्ट २५८

व

वकि ८८
वकि ९५
वक्ष ६३६
वख १३०
वखि १३१
वगि १४७
वधि ११०
वच १०६३
वच १८४३
वज २५२
वज १६१७
वट ७७६
वट १८५८
वट १९१९
वट ३००
वटि १५८६
वटि॰ १९१६
वठ ३३१
वठि २६२
वडि २७१
वडि॰ १५८६
वण ४४६
वण १५५१
वद १००६
वद १८४२
वदि ११
वन ४६२
वन ४६३
वन ८०३
वनु॰ ८०३
वनु १४७०
वप्रु १८६
वप्नु १७०४
(डु)वप् १००३
वभ्र ५५७
(टु)वम् ८४९
वय ४७५
वर १८५३
वर्च १६२
वर्ण॰ १५५१
वर्ण १९३८
वर्ध १६५५
वर्ष ६१३
वर्ह ६४०
वल ४९१
वलि॰ ८१६
वल्क १५७१
वल्क १९१६
वल्ग १४३
वल्म ३११
वल्ल ४९३
वल्ह ६४१
वश १०८०
वष ६११
वस १००५
वस १०२३
वस १७४५
वस १६४२
वसु १२१४
वस्क १०१
वह १००४
वहि ६३३
वा १०५०
वाञ्छि ६६८
वाछि २०८
वात १८८३
वाघृतु॰ ११६०
वाश्र ११६३
वास १८८५
वाह॰ ६४५
विचिर् १४४२
विच्छ ५४२३
विच्छ १७७४
विजिर् १०६४
ओ विजी १४८६
ओ विजी १४६०
विट ३१६
विथ ३३
विद १०६४
विद ११७१
विद १४५०
विद १७०६
विदूल् १४३२
विध १३२५
विल १३५८
विल १६०५
विश १४२४
विष १५२६
विषु ६६८
विष्ल् १०६५
विष्क १६८६
विष्क १६४०
विस १२१७
वी १०४८
वीर १६०३
वुस॰ १२१५
वृक ६२
वृक्ष ६०४
वृङ् १५०६
वृजि॰ १०२६
वृजी १०२९
वृजी १४६१
वृजी १८१३
वृञ १२५४
वृञ् १८१४
वृण १३३०
वृत १७८८
वृत ११६०
वृत १७८२
वृधु ७५६
वृधु १७८
वृश १३२६
वृष १७०५
वृषु ७०६
वृहू १३४७
वृ १४६०
वृञ् १४८६
वेञ् १००६
वेणृ ८७७
वेथ ३४
वेनृ॰ ८७७
वेपृ ३६७
वेल १८८१
वेल्ल् ५१५
वेल्ल ५४०
वेवीङ् १००७
वेष्ट २५५
वेह्ल् ६४३
(ओ) वै ६२१
व्यच १२६३
व्यथ ७६४
व्यध ११८१
व्यय ८८१
व्यय १६३२
व्युष १११४
व्युष १२१५
व्युस॰ १२१५
व्येञ् १००७
व्रज २५३
व्रण ४५१
व्रण १६३७
ओव्रश्चू १२६२
व्री १५०४
व्रीङ् ११४६
व्रीड् ११२०
व्रुड १३६३
व्ली १५०२

श

शक ११८७
शकि ८६
शक्लृ १२६१
शच १६५
शट २६६
शठ ३४०
शठ १५६४
शठ १६६२
शठ १८५५
शडि २७६
शण ७६७

शद्ल ८५९
शद्लृ १४२८
शप १०००
शप ११६८
शब्द १७१९
शम १६१६
शमु १२०१
शमो ८१८
शर्व १५५६
शर्व ४२३
शर्व ५८५
शल ४९०
शल ८४३
शल्भ ३९०
शव ७२५
शश ७२६
शष ६१०
आङ् शसि २२१
शसु ७२७
शंसु ७२८
शाखृ १२६
शाङ् २८६
शान १६९५
आङ् शासु १०२२
शासु १०७५
शिक्ष ६०५
शिखि ॐ १५५
शिघि १६१
शिजि १०२७
शिञ् १२४६
शिट ३०३
शिल १३६२
शिष ६८७
शिष १८१८
शिल्ल १४५१
शीक १७१०
शीक १८२७
शीकृ ७५
शीङ् १०३२
शीभृ ३८३
शील ५२३
शील १८७६
शुच १८३
शुचिर् ११६५
शुच्य ५१३
शुठ ३४१
शुठ १६४५
शुठि ॐ ३४१
शुठि ३४४
शुठि १६४६
शुध ११६१
शुन १३३६
शुन्ध ७४
शुन्ध १८३३
शुम्भ ४३३
शुम्भ १६२३
शुभ ४३२
शुभ ७५०
शुभ १३२१
शुल्क ११६६
शुल्ब १६११
शुष ११८३
शूर १६०२
शूरी ११८७
शूर्प १६१२
शूल ५२६
शूष ६७६
शृधु ७६०
शृधु ८७३
शृधु १७३५
शृ १४८८
शेल्ल ५४३
शेवृ ॐ ५०६
शै ९१८
शो १४५
शोण ४५५
शौट २६०
श्च्युतिर् ४१
श्मील ५१८
श्यैङ् ६६३
श्रकि ८४
श्रगि १५१
श्रण ७६८
श्रण १५७८
श्रथ ७६६
श्रथ १५४६
श्रथ १८२४
श्रथ १८७१
श्रथि ३५
श्रन्थ १५१०
श्रन्थ १५१२
श्रन्थ १८३८
श्रन्भु ३६३
श्रमु १२०४
श्रा ८१०
श्रा १०५३
श्रिञ् ८६७
श्रिषु ७०१
श्रीञ् १४७५
श्रु ६४२
श्रै ६१६
श्लोणृ ४५६
श्लकि ८५
श्लगि १५२
श्लथ ८००
श्लाखृ १२७
श्लाघृ ११५
श्लिष १११८६
श्लिष १५७४
श्लिषु ७०२
श्लोकृ ७७
श्लोणृ ४५७
श्वकि ६६
श्वच १६६
श्वचि १६७
षठ १५६५
षठ १८५६
षठि ॐ १५६५
षभ्र १६२४
षर्त १६२३
षल ५४६
षल्क १५७०
षल्ल ५५०
षस १०६६
टुओ श्वि १०१०
षिता ७४२
षिदि १०
ष
षगे ७८६
षच १२६८
षच १६३
षच ६६७
षट ३१३
षट्ट १६३४
षण ४६४
षणु १४६४
षद १८३२
षद्लृ ८५४
षदॢ १४२७
षञ्ज ६८७
षम्ब १५५८
षप ४००
षम ८२९
षर्ज २२५
षर्ब ४२४
षर्व ५८६
षल ५४७
षस १०७८
षस्ज २०२
षस्ति १०७९
षह ८५२
षह ११२८
षह १८१०
षाम्ब १५६६
षिच १४३४
षिञ् १२४८
षिञ् ५४७७
षिट ३४०
षिध ४७
षिधु ११६२
षिधृ ४८
षिमिॐ ४३१
षिभुॐ ४३०
षिल १३६३
षिविॐ ५६०
षिवु ११०८
षु ६४१
षु १०४१
षुञ १२४७
षुट्ट १५६२
षुर १३४०
षुह ११२९
षू १४०८
षूङ् १०३१
षूङ् ११३२
षूद २६
षूद १७१८
षृन्भु ४३१
षृभु ४०३
षेलृॐ ५४३
षेवृ ५०१
षै ६१५
षो ११४७
ष्टक ७८२
ष्टगे ७६०
ष्टन ४६१
ष्टभि ३८६
ष्टम ८३०
ष्टिघ १२५५
ष्टिपृ ३६४
ष्टिम ११२४
ष्टीम ११२६
ष्टुच १७५

ष्टुञ् १०४३
ष्टुप १६७३
ष्टुभु ३९४
ष्टेपृ ३६९
ष्टै ६२२
ष्ठ्यै ६११
ष्ट्रक्त ६६१
ष्ठल ८३६
ष्ठा ९२८
ष्ठिवु ५६०
ष्ठिवु १११०
ष्णसु १११२
ष्णा १०५२
ष्णिह १२००
ष्णिह १५७२
ष्णु १०३८
ष्णुसु १११९
ष्णुह ११९९
ष्णै ६२३
ष्मिङ ६४८
ष्मिङ ५८७३
ष्वष्क १००
ष्वष्ज ६७६
ष्वद १८
ष्वद १८०६
ष्वप् १०६८
ष्विदा ७४४
ष्विदा ६७८
ष्विदा ११८८

स

सङ्केत १८६२
सङ्ग्राम १९२२
सत्र १९०६
समाज १८८८
समी १२२१
साध १२६३
साम १८८०
साम्ब १५५६
सार १८६९
सुख १९२९
सूच १८७४
सूत्र १९०८
सूर्च्छ ६६६
सूर्च्य ५०९
सृ ९३५
सृ १०९९
सृज १११८
सृज १४१४
सृप्ल ६८३
सेकृ ८१
स्कन्दिर १७९
स्कभि ३८७
स्कुञ् १४७८
स्कुदि ६
स्खद् ७६८
स्खदिर् ८२०
स्खल ५४४
स्खली ८१६
स्तन १८६०
स्तृञ् १२५२
स्तृहू १३४९
स्तृञ् १४८४
स्तेन १८९७
स्तोम १६२३
स्त्य ९१०
स्थुड १३८८
स्थूल १६०४
स्पदि १४
स्पर्ध ३
स्पश ८८७
स्पश १६८१
स्पृ १२५९
स्पृश १४२२
स्पृ १८७२
स्फर १३९०
स्फायी ४८७
स्फिट १५७२
स्फिट्ट १६३५
स्फुट २६०
स्फुट १३७३
स्फुट १७२३
स्फुटि १५२७
स्फुटि ३२६
स्फुटिर् ३२६
स्फुड १३६१
स्फुडि १५३७
स्फुर १३८६
स्फुर्छा २१३
स्फुल १३९०
स्फूर्जि २३५
स्मिट १५७१
स्मील ५१६
स्मृ ८०७
स्मृ ९३२
स्मृ १२५६
स्यन्दू ७६१
स्यम १६९४
स्यमु ८२६
स्रकि ८३
स्रन्सु ३६३
स्रम्भु ७५७
स्रसु ७५४
स्रिवु ११०६
स्रु ९४०
स्रेकृ ८२
स्वन ८१७
स्वन ८२७
स्वर १८६४
स्वर्द १९
स्वाद २८
स्वाद १८०६
स्वृ ९३२

ह

हट ३१२
हठ ३३९
हद १७७
हन १०१२
हम्म ४६७
हय ५१२
हय ५१५
हल ८३७
हसे ७२१
ओहाक् १०६०
ओहाङ १०८६
हि १२५७
हिक्क ८६१
हिट्ट ३१७
हिडि २६८
हिल १३६१
हिवि ५६१
हिष्क १६८६
हिंसि १४५६
हिंसि १८३०
हुडि १०८३
हुडि २६९
हुडि २७७
हुड्ड २५२
हुर्छी २११
हुल ८४४
हूड्ड ३५३
हृ १०९७
हृञ् ८९६
हृष १२२६
हृषु ७०९
हेठ १५३२
हेठ २६६
हेड ७७८
हेड्ड २८४
हेर्ष ६२१
होड् २८९
होड् २५४
ह्रक्ष १०८२
ह्रीले ८०६
ह्वगे ७८७
ह्वस ७११
ह्वाद २६
ह्वी १०८९
ह्वीच्छ २१०
ह्वेष ६२२
ह्वगे ७८८
ह्वेप १६५९
ह्वस ७१२
ह्वार्दी २७
ह्वल ८०५
ह्वृ ९३१
ह्वेञ् १००८

सौत्रधातवः

ऋति २४२२
(उ)कञ्ज ४१७
(उ)कडिः ५२२
(उ)कदिः ५२२
(उ)कर्दिः २५०
कुः ३१३०
(उ)तर्दिः ५०६
(उ)तव ४८
तुः २४४४
दभिः (वा)
(उ)प्रीयुः ३५६
(उ)भडः ५४
(उ)युषः ६७
(उ)वर्णिः ५६३
(उ)शुः १८३
सांति २६८०
स्वन्भुः २५५९
स्कुम्भुः ,,
स्तन्भुः ,,
स्तुम्भु ,,

* एतच्चिह्नाङ्किताः पाठान्तरेऽपि पठिताः।

॥ श्रीः ॥

काशी-संस्कृत-ग्रन्थमाला

१३६

(व्याकरणविभागे (१७) सप्तदशं पुष्पम्)

वासुदेववदीक्षितकृत 'बालमनोरमा' सहिता

वैयाकरणसिद्धान्तकौमुदी

वैदिकभागे श्रीमज्जयकृष्णपण्डितविरचितसुबोधिनीव्याख्यया,
लिङ्गानुशासनभागे भैरवीव्याख्यया च संयोजिता।
रूपलेखन-पङ्क्तिलेखनप्रकाराख्यपरिशिष्टद्वयविभूषिता
व्याकरणाचार्य-सदाशिवशास्त्रिभिः सम्पादिता

(द्वितीयं संस्करणम्)

[चतुर्थो भागः]

प्रकाशकः

जयकृष्णदास-हरिदास गुप्तः,
चौखम्बा संस्कृत सीरिज आफिस,
विद्याविलास प्रेस, बनारस।

सं० २००६] मूल्य ५) [सन् १९४९.

[सर्वाधिकाराः प्रकाशकाधीनाः]

ण्यन्तादि-प्रकरणानुक्रमणिका

क्रमाङ्कः		पृष्ठम्
११	णिच्प्रकरणम्	२९१
१२	सन्प्रकरणम्	३०४
१३	यङ्प्रकरणम्	३१९
१४	यङ्लुक्प्रकरणम्	३२५
१५	नामधातुप्रकरणम्	३४४
१६	कण्ड्वादिप्रकरणम्	३६९
१७	प्रत्ययमालाप्रकरणम्	३७०
१८	आत्मनेपदप्रकरणम्	३७२
१९	परस्मैपदप्रकरणम्	३९५
२०	भावकर्मतिङ्प्रकरणम्	३९९
२१	कर्मकर्तृतिङ्प्रकरणम्	४१३
२२	लकारार्थप्रकरणम्	४२४
२३	कृदन्तकृत्यप्रकरणम्	४४२
२४	पूर्वकृदन्तप्रकरणम्	४५९
२५	उणादिप्रकरणम्	५२७
	प्रथमपादः	५२७
	द्वितीयपादः	५५०
	तृतीयपादः	५६४
	चतुर्थपादः	५८२
	पञ्चमपादः	६०६
२६	उत्तरकृदन्तप्रकरणम्	६१२
२७	वैदिकप्रकरणम्	६६१
२८	स्वरप्रकरणम्	७१८
	साधारणस्वराः	७१८
	धातुस्वराः	७२८
	प्रातिपदिकस्वराः	७३०
	फिट्सूत्राणि	७३५
	स्वरशेषाः	७४३
	समासस्वराः	७५१
	तिङन्तस्वराः	७९८
	स्वरसंचारप्रकारः	८१०
२९	लिङ्गानुशासनप्रकरणम्	८११
	स्त्र्यधिकारः	८११
	पुंलिङ्गाधिकारः	८१५
	नपुंसकाधिकारः	८१९
	स्त्रीपुंसाधिकारः	८२३
	पुंनपुंसकाधिकारः	८२३
३०	पाणिनीयशिक्षा	८२५
३१	गणपाठः	८२७
३२	रूपलेखन-पंक्तिलेखन-प्रकारः	८५१
३३	सूत्रसूचिका	८६७
३४	वार्तिकसूचिका	८७७
३५	परिभाषासूचिका	८८०
३६	उणादिसूत्रसूचिका	८८१
३७	फिट्सूत्रसूचिका	८८७

॥ श्रीः ॥

सिद्धान्तकौमुदी-बालमनोरमा

[चतुर्थो भागः]

अथ तिङन्ते णिच्प्रकरणम् ॥ ११ ॥

२५७५ तत्प्रयोजको हेतुश्च १।४।५५॥ कर्तुः प्रयोजको हेतुसंज्ञः कर्तृसंज्ञश्च स्यात्। २५७६ हेतुमति च ३।१।२६॥ प्रयोजकव्यापारे प्रेषणादौ वाच्ये धातोर्णिच्स्यात्। भवन्तं प्रेरयति भावयति। 'णिचश्च' (सू २५६४) इति कर्तृगे फले आत्मनेपदम्। भावयते। भावयांबभूव। २५७७ आः पुयण्ज्यपरे ७।

अथ 'हेतुमति च' इति णिज्विधि वक्तुमुपक्रमते—'तत्प्रयोजको हेतुश्च'। 'स्वतन्त्रः कर्ता' इति पूर्वसूत्रोपात्तः कर्ता तच्छब्देन परामृश्यते। तस्य कर्तुः प्रयोजकः प्रवर्तयिता तत्प्रयोजकः। तदाह—कर्तुः प्रयोजको हेतुसंज्ञ इति। चकारः पूर्वसूत्रोपात्तां कर्तृसंज्ञां समुच्चिनोति। तदाह—कर्तृसंज्ञश्चेति। देवदत्तः पचति, तं प्रेरयति यज्ञदत्त इत्यत्र देवदत्तस्यैव पाकानुकूलव्यापारात्मकपचधात्वर्थाश्रयत्वरूपकर्तृत्वसत्त्वात् प्रयोजकस्य तदभावादिह कर्तृसंज्ञाविधिः। प्रयोजकस्य प्रयोज्यकर्त्रा अन्यथासिद्धत्वाद्धेतुत्वाऽप्राप्तौ हेतुसंज्ञाविधिः। हेतुमति च। 'सत्यापपाश' इत्यतो णिजित्यनुवर्तते। हेतुः प्रयोजक आधारतया अस्यास्तीति हेतुमान् प्रयोजकनिष्ठः प्रेषणादिव्यापारः, तस्मिन् वाच्ये णिच् स्यादित्यर्थः। 'धातोरेकाचो हलादेः' इत्यतो धातोरित्यनुवर्तते। तदाह—प्रयोजकव्यापार इति। प्रेषणादिविशेषादिशब्देन अध्येषणानुमत्युपदेशादीनां ग्रहणम्। तत्र भृत्यादेर्निकृष्टस्य प्रवर्तना प्रेषणम् आज्ञेत्यर्थः। समानस्याऽधिकस्य च सख्याचार्यादेः प्रवर्तना अध्येषणा। अनुमतिः राजादेः सम्मतिः। ज्वरितस्य कषायपाने हितावबोधनेन प्रवर्तना उपदेशः। इननाद्भीत्या पलायमानस्य निरोधाचरणमपि प्रयोजकव्यापारः। प्रयोजकनिष्ठप्रवर्तनायां णिजिति फलितम्। एते तु विशेषाः प्रकरणादिना अवगम्यन्ते। 'कुलालो घटं करोती'त्यत्र तु न णिच प्रयोज्यप्रयोजकोभयसमभिव्यवहार एव तत्प्रवृत्तेरित्यन्यत्र विस्तरः। भवन्तमिति। देवदत्तो यज्ञा भवति। तं प्रेरयति याजक इत्यार्थे भूधात्वर्थस्य भवनस्य मुख्यकर्ता यज्ञा तस्य यज्ञभवने प्रवर्तयिता याजकादिः प्रयोजकः, तन्निष्ठायां प्रेरणायां भूधातोर्णिच् वुच्युयादेशौ भावीति णिजन्तम्। तस्माद्भवनानुकूलव्यापारा[कात् लटि 'भावयती'ति रूपम्। भवन्तं प्रेरयतीति फलितोऽर्थः। भावयाम्बभूवेति। कर्तृगामिन्यपि क्रियाफले भूधातोरात्मनेपदित्वात् अनुप्रयुज्यमानादपि आत्मनेपदमिति भावः। आः पुयण्। 'उ' इत्यस्य 'आ'रिति षष्ठी। 'पुयण्जि' इति च्छेदः। पुश्च यण् च ज् चेति समाहारद्वन्द्वात्सप्तमी। आः परो यस्मादिति बहुव्रीहिः। 'सन्यतः' इत्यस्मात्सनीत्यनुवर्तते। अङ्गस्येत्यधिकृतम्। 'अङ्ग

४।८०॥ सनि परे यदङ्गं तदवयवाभ्यासोकारस्येत्त्वं स्यात्पवर्गयण्जकारेष्ववर्णपरेषु परतः। अबीभवत्। अपीपवत्। मूढ—अमीमवत्। अयीयवत्। अरीरवत्। अलीलवत्। अजीजवत्। २५७८ स्रवतिश्रृणोतिद्रवतिप्रवतिप्लवतिच्यवतीनां वा ७।४।८१॥ एषामभ्यासोकारस्य इत्त्वं वा स्यात्सन्यवर्णपरे धात्वक्षरे परे। असिस्रवत्। असुस्रवत्। 'नाऽग्लोपि' (सू २५७२) इति ह्रस्वनिषेधः। अशशासत्। अडुढौकत्। अचीचकासत्। मतान्तरे, अचचकासत्। अग्लोपि इति सुब्धातुप्रकरणे उदाहरिष्यते। ण्यन्ताण्णिचि पूर्वविप्रतिषेधादपवादत्वाद्वा वृद्धि

लोपः' इत्यस्मादभ्यासस्येति, भृञामित्यस्मादिदिति चानुवर्तते। तदाह—सनि परे इत्यादिना। अबीभवदिति। भू इ अत् इति स्थिते द्वित्वे कार्ये णौ अच आदेशस्य निषेधादुद्धयावादेशाभ्यां प्रागेव 'भू' इत्यस्य द्वित्वे उत्तरखण्डस्य वृद्धयावादेशयोः कृतयोरुपधाह्रस्वे अभ्यासे अकाराभावेन 'सन्यतः' इत्यस्याऽप्रवृत्त्या सन्वत्त्वादनेन इत्त्वे दीर्घे इति भावः। अपीपवदिति। पूङ्धातो रूपम्। मूङित्यस्माद्धातोरमीमवदिति रूपमित्यर्थः। अयीयवदिति। युधातो रूपम्। अरीरवदिति। रुधातो रूपम्। अलीलवदिति। लूञ्धातो रूपम्। अजीजवदिति। जुः सौत्रो धातुः जुचङ्क्रम्येत्यत्र निर्दिष्टः। ननु भू भू इति द्वित्वोत्तरं वृद्धयावादेशयोः कृतयोः उपधाह्रस्वे तस्य स्थानिवत्त्वेन लघुपरत्वाभावात् सन्वत्त्वाऽप्रसक्त्या कथमिहाभ्यासोवर्णस्य इत्त्वमिति चेत्, न। आरम्भसामर्थ्यादेव स्थानिवत्त्वाऽप्रवृत्तेरित्यलम्। स्रवतिश्रृणोति। अपर इत्यनुवर्तते न तु पुबण्जि इति, पवर्गजकारयोरसम्भवात्, स्रवत्यादौ यणः सत्त्वेऽप्यव्यभिचारात्। तदाह—अवर्णपरे धात्वक्षरे इति। अक्षरशब्दो वर्णपरः। असिस्रवत् असुस्रवदिति। द्विहल्व्यवधानेन लघुपरकत्वाऽभावान्न सन्वत्त्वमिति भावः। अशिश्रवत्—अशुश्रवत्। अदिद्रवत्—अदुद्रवत्। अपिप्रवत्—अपुप्रवत्। अपिप्लवत्—अपुप्लवत्। अचिच्यवत्—अचुच्यवत्। अथ आसुधातोरशशासदित्यत्राह—नाग्लोपीति। अडुढौकदिति। ढौकृ गतावित्यस्य ऋदित्त्वादिति भावः। अचीचकासदिति। चकासृ दीप्तौ। ऋदिरवाङ्गोपधाह्रस्वः। 'चङपरे' णौ यदङ्गं तस्य योऽभ्यासो लघुपर इति पक्षे सन्वत्त्वम्, अभ्यासदीर्घश्चेति भावः। मतान्तरे त्विति। 'अङ्गं यत्र द्विरुच्यते' इति मते 'चङ्परे णौ यल्लघु तत्परो योऽङ्गस्य अभ्यासः' इति मते चेत्यर्थः। अग्लोपीतीति। अग्लोपिन उपधाह्रस्वनिषेधे मा भवानूननदिति उदाहृतम्। अतितिरायदित्याद्युदाहरणान्तरं सुब्धातुनिरूपणे वक्ष्यते इत्यर्थः। ननु 'चुर स्तेये' इत्यस्मात्स्वार्थे णिचि उपधागुणे 'चोरि' इति रूपम्। तस्माद्धेतुमण्णौ प्रथमस्य णेर्लोपे सति 'चोरि' इत्येव हेतुमण्ण्यन्तम्। तस्माल्लटि तिपि ऋपि गुणे अयादेशे चोरयतीत्येव रूपमिष्यते। तन्नोपपद्यते, हेतुमण्णौ परे प्रथमस्य णेर्लोप बाधित्वा परत्वादुद्धौ आयादेशे चोराय् इ इत्यस्माल्लटि चोरायतीत्यापत्तेरित्यत आह—ण्यन्ताण्णिचीति। ण्यन्ताण्णिचि वृद्धिं बाधित्वा

धाधित्वा णिलोपः। चोरयति। 'णौ चङ्धि–' (सू २३१४) इति ह्रस्वः। 'दीर्घो लघोः' (सू २३१८)। न चाग्लोपित्वात् द्वयोरप्यसम्भवः। ण्याकृतिनिर्देशात्। अचूचुरत। २५७९ **णौ च संश्चङोः** ६।१।३१॥ सन्परे चङ्परे च णौ श्वयतेः संप्रसारणं वा स्यात्। 'सम्प्रसारणं तदाश्रयं च कार्यं बलवत्' (प १२९) इति वचनात्सम्प्रसारणं पूर्वरूपम्। अशूशवत्। अलघुत्वान्न दीर्घः। अशिश्वयत्। २५८० **स्तम्भुसिवुसहां चङि** ८।३।११६॥ उपसर्गनिमित्तः एषां सस्य षो

णिलोप इत्यन्वयः। कुत इत्यत आह—पूर्वविप्रतिषेधादिति। 'ण्वुल्तृचौ' 'युवोरनाकौ' 'पाघ्राध्मास्थाम्नादाण्दृश्यर्त्तिसर्त्तिशदसदां पिबजिघ्रधमतिष्ठमनयच्छपश्यर्च्छधौशीयसीदाः' 'आतो युक् चिण्कृतोः' 'सनाशंसभिक्ष उः' 'ऊडिदम्पदादिपुंसि' 'भीह्रीभृहुवां श्लुवच्च' 'नित्यं सपत्न्यादिषु' 'अचो यत्' 'ईद्यति' 'एरच्' 'ण्यासश्रन्थघट्टवतिचर्तिसदिसादिमन्दिप्रमदिभ्यः' 'ण्यक्षत्रियार्षञितो यूनि लुगणिञोः' 'गोत्रेऽलुगचि' 'फक्फिञोरन्यतरस्याम्' 'तद्धितेष्वचामादेः' 'यञञोश्च' 'न यौधेयादीनाम्' 'शिवादिभ्योऽण्' 'कुर्वादिभ्यो ण्यः' 'तस्यापत्यम्' 'दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः' 'ऋष्यन्धकवृष्णिकुरुभ्यश्च' 'हलस्तद्धितस्य' 'यस्येति च' 'ओर्गुणः' 'अतो हलादेर्लघोः' 'टेः' 'तद्धितेष्वचामादेः' 'किति च' 'आदेचोपदेशेऽशिति' 'एचोऽयवायावः' 'आयादय आर्धधातुके वा' 'क्ङिति च' 'सार्वधातुकमपित्' 'सार्वधातुकार्धधातुकयोः' 'तिङशित्सार्वधातुकम्' 'शपः श्लुः' 'अदिप्रभृतिभ्यः शपः' 'लुङ्लङ्लृङ्क्ष्वडुदात्तः' 'आडजादीनाम्' 'अचि श्नुधातुभ्रुवां य्वोरियङुवङौ' 'अभ्यासाच्च' 'हुझल्भ्यो हेर्धिः' 'जुहोत्यादिभ्यः श्लुः' 'बहुलं छन्दसि' 'भुवो वुग्लुङ्लिटोः' 'एरनेकाचोऽसंयोगपूर्वस्य' 'लोपो व्योर्वलि' 'क्यचि च' 'अतो लोपः' 'यस्य हलः' 'आतो लोपः' 'ई च द्विवचने' 'ये च' 'घि च भावकरणयोः' 'आतश्चोपसर्गे' 'क्तिच्क्तौ च संज्ञायाम्' 'गाङ्कुटादिभ्यो ञ्णिन्ङित्' 'सिचि वृद्धिः परस्मैपदेषु' 'इरयो रे' 'ऋतश्च संयोगादेः' 'गुणोऽर्तिसंयोगाद्योः' 'सार्वधातुकमपित्' 'ङिच्च' 'आर्धधातुकस्येड्वलादेः' 'सनाद्यन्ता धातवः' 'उपसर्गाः क्रियायोगे' 'गतिर्गतौ' 'तिङि चोदात्तवति' 'फणां सप्तानाम्' 'नमस्पुरसोर्गत्योः' 'कृत्याः प्रतिपदोक्ताः' 'तयोर्यावः' 'तव्यत्तव्यानीयरः'

न स्याच्चङि। अवातस्तम्भत्। षर्यसीषिवत्। न्यसीषहत्। आटिटत्। आशिशत्। बहिरङ्गोऽप्युपधाह्रस्वो द्वित्वात्प्रागेव। ओर्णेर्ऋदित्करणाल्लिङ्गात्। मा भवानिदिधत्। एजादावेधतौ विधानान्न वृद्धिः। मा भवान्प्रेदिधत्। 'न न्द्राः-' (सू २४४६) इति नदराणां न द्वित्वम्। औन्दिदत्। आड्डिडत्। आर्चिचत्। उञ्ज आर्जवे। उपदेशे दकारोपधोऽयम्। 'भुजन्युब्जौ पाण्युपतापयोः' (सू २८७७)

प्राप्ते—स्तम्भुसिवु। 'उपसर्गनिमित्तस्य प्रतिषेध' इति वार्तिकम्। 'न रपरसृपी'त्यतो नेत्यनुवर्तते। 'सहेः साडः सः' इत्यतः स इति षष्ठ्यन्तमनुवर्तते। 'मूर्धन्यः' इत्यधिकृतम्। तदाह—उपसर्गनिमित्त इत्यादि। स्तम्भुः सौत्रो धातुः। 'षिवु तन्तुसन्ताने' 'षह मर्षणे'। पर्यसीषिवत् न्यसीषहदिति। 'परिनिविभ्यः सेव' इत्युपसर्गनिमित्तं षत्वं न। अभ्यासनिमित्तं तु षत्वं भवत्येव। आटिटत् आशिशत् इति। आट् ह अ त्, आश् ह अ त् इति स्थिते 'णौ चङि' इत्युपधाह्रस्वात् प्रागन्तरङ्गत्वात् 'चङि' इति द्वित्वमाशङ्क्य आह—बहिरङ्गोऽपीति। उपधाह्रस्वः चङ्परण्यपेक्षत्वात् बहिरङ्गः। द्वित्वं तु चङ्मात्रापेक्षत्वादन्तरङ्गम्। अथापि द्वित्वात् प्रागेव उपधाह्रस्व इत्यर्थः। कुत इत्यत आह—ओर्णेरिति। 'ओर्णृ अपनयने' इति धातोः ऋदिदित्करणम् औणिणदित्यत्र 'नाग्लोपि' इति उपधाह्रस्वप्रतिषेधार्थम्। यदि तु उपधाह्रस्वात्प्रागेव अन्तरङ्गत्वात् द्वित्वं स्यात् तदा ओर्ण् ह अ त् इत्यत्र 'अजादेर्द्वितीयस्य' इति णि इत्यस्य णिचा सह द्वित्वे सति पञ्चादोकारस्य चङ्परे णौ उपधात्वाऽभावादेव ह्रस्वस्याऽप्रसक्तत्वात् ऋदित्करणं व्यर्थं स्यात्। 'द्वित्वात्प्रागेव उपधाह्रस्व' इत्यभ्युपगमे तु ओर्ण् ह अ त् इत्यस्यामवस्थायां प्राप्तस्य ह्रस्वस्य निषेधार्थमृदित्करणमर्थवत्। अतः 'बहिरङ्गोऽप्युपधाह्रस्वो द्वित्वात् प्रागेवे'ति विज्ञायते इत्यर्थः। ननु आटिटत्, आशिशत्, इत्यत्र द्वित्वप्रवृत्त्यनन्तरमुपधाह्रस्वस्याभावेऽपि 'आदृच्' इति वृद्धौ आटित्, आशिशत् इति सिध्यत्येवेति किमनेन ज्ञापनेनेत्यत आह—मा भवानिदिधदिति। एध् ह अ त् इति स्थिते पूर्वं द्वित्वप्रवृत्तौ 'धि' इत्यस्य द्वित्वे पञ्चादेकारस्य ह्रस्वो न स्यात्। द्वित्वात्प्रागेव उपधाह्रस्वे तु इध् ह अ त् इति स्थिते 'धि' इत्यस्य द्वित्वे माङ्योगादाडभावे इदिधदिति इष्टं सिध्यतीत्यर्थः। ननु मा भवान् प्रेदिधदित्यत्र प्र इदिधदिति स्थिते कृतेऽपि ह्रस्वे एकदेशविकृतन्यायेन एधधातुत्वात् 'एत्येधत्यूठसु' इति वृद्धिः स्यादित्यत आह—एजादावधताविति। 'अवर्णादेजाद्योरेत्येधत्योरि'ति व्याख्यातत्वादिति भावः। औन्दिददिति। उन्द् ह अ त् इति स्थिते 'दि' इत्यस्य द्वित्वमिति भावः। आड्डिडदिति। अड्डधातुर्दोपधः ष्टुत्वस्यासिद्धो डकारः। अड्ड अ त् इति स्थिते ष्टुत्वस्याऽसिद्धत्वेन डकारात्परस्य 'डि' इत्यस्य द्वित्वमिति भावः। आर्चिचदिति। अर्च् ह अ त् इति स्थिते रेफात् परस्य 'चि' इत्यस्य द्वित्वमिति भावः। उञ्ज आर्जवे इति। ननु चङि 'ञ्जि' इत्यस्य द्वित्वे हला-

इति सूत्रे निपातनादस्य वः। स चान्तरङ्गोऽपि द्वित्वविषये 'नन्द्राः–' (सू २४४६) इति निषेधाज्जिशब्दस्य द्वित्वे कृते प्रवर्तते। न तु ततः प्राक्। दकारोच्चारणसामर्थ्यात्। औब्जिजत्। अजादेरित्येव। नेह। अदिद्रपत्। **२५८१ रभेरशब्लिटोः ७।१।६३॥** रभेर्नुम् स्यादचि न तु शब्लिटोः। **२५८२ लभेश्च ७।१।६४॥** अरारम्भत्। अललम्भत्। 'हेरचङि' (सू २५३१) इति सूत्रे अचङि इत्युक्तेः कुत्वं न। अजीहयत्। अस्मृदृत्वरप्रथम्रदम्भमाम्' (सू २५६६)। असस्मरत्। अदद्रत्। तपरत्वसामर्थ्यादत्र लघोर्न दीर्घः। **२५८३ विभाषा वेष्टिचेष्ट्योः ७।४।६६॥** अभ्यासस्यात्वं वा स्याच्चङ्परे णौ। अवावेष्टत्।

दिशेष औब्जिदिति रूपं स्यात्। औब्जिजदित्येव तु इष्यते। तत्राह—उपदेशे दकारोपधोऽयमिति। ततश्च 'न न्द्रा' इति दकारस्य द्वित्वनिषेधात् जि इत्यस्येव द्वित्वमिति भावः। तर्हि दकारः कुतो न श्रूयते इत्यत आह—मुञ्चन्त्युच्चारयितारमिति। ननु द्वित्वात्प्रागन्तरङ्गत्वात् दकारस्य वकारादेशे सति 'न न्द्राः' इति निषेधस्य कथमिह प्रवृत्तिरित्यत आह—स चेति। ननु 'द्रु गतौ' द्रावयति। चङि 'द्रु' इत्यस्य द्वित्वे उत्तरखण्डस्य वृद्ध्यावादेशयोः उपधाह्रस्वे 'स्रवतिश्रृणोति' इत्यभ्यासस्य ह्रस्वे अदिद्रवदिति इष्यते। तन्नोपपद्यते। 'न न्द्राः' इति दकारस्य द्वित्वनिषेधादित्यत आह—अजादेरित्येवेति। 'न न्द्राः' इत्यत्र अजादेरित्यनुवर्तत एवेत्यर्थः। 'आदिभूताद्यचः' इति व्याख्यातं प्राक्। ततश्च आदिभूतादचः पराः नदराः द्विर्न भवन्तीति फलितम्। नेहेति। प्रकृते आदिभूतादचः परत्वाऽभावान्न दकारद्वित्वनिषेध इत्यर्थः। 'अदिद्रप' दिति पाठे द्राधातोर्णिचि पुकि 'द्रापि' इत्यस्मादङ्। ननु 'लावस्थायाम्'। डिति पक्षे अचः परत्वमस्त्येवेति चेत्, न—'न न्द्राः' इत्यत्र 'लिटि धातोः' इत्यतो धातोरित्यनुवर्त्य धातुसंज्ञाकाल्किादादेरचः पराः नदराः द्विर्नेति व्याख्यानादित्याहुः। रभेरशब्लिटोः। 'हृदितो नुम्धातोः' इत्यतो नुमिति 'रधिजभोरचि' इत्यतः अचीति चानुवर्तते। तदाह—रभेर्नुमित्यादि। लभेश्च। लभेरपि नुम् स्यात् अचि, नतु शब्लिटोरित्यर्थस्य स्पष्टत्वादनुक्तिः। अरारम्भदिति। नुमि कृते संयोगपरत्वेन अकारस्य लघुत्वाऽभावान्न सन्वत्त्वमिति भावः। 'हि गतौ वृद्धौ च' इत्यस्माच्चङि अजीहयदित्यत्र 'हेरचङि' इति हकारस्य कुत्वं नेत्याह—हेरचङीति। 'अत स्मृदृत्वर' इति सूत्रं चुरादौ 'प्रथ प्रख्याने' इति धातौ व्याख्यातम्। असस्मरदिति। अत्र 'सन्यतः' इतीत्वे प्राप्ते अत्त्वम्। अत एव ज्ञापकादनेकहल्पर्वधानेऽपि लघुपरत्वमित्युक्तं प्राक्। संयोगपरत्वेन लघुत्वाऽऽभावान्नाऽभ्यासदीर्घः। अदद्रदिति। द्रु विदारणे इत्यस्य रूपम्। अत्रापि 'सन्यतः' इत्यस्यापवादः अत्त्वम्। 'दीर्घो लघोः' इति दीर्घमाशङ्क्य आह—तपरत्वसामर्थ्यादिति। अतस्वरत्। अपप्रथत्। अमम्रदत्। अतस्तरत्। अपस्पशत्। विभाषा वेष्टिचेष्ट्योः। 'अत लोपः' इत्यस्मादभ्यासस्येत्यनुवर्तते। 'अत्

अविवेष्टत्। अचचेष्टत्-अचिचेष्टत्। 'भ्राजभास-' (सू २५६५) इत्यादिना वोपधाह्रस्वः। अबिभ्रजत्-अबभ्राजत्। 'काण्यादीनां वेति वक्तव्यम्' (वा ४६१३) ण्यन्ताः कणरणभणश्रणलुपहेठाः काण्यादयः षट् भाष्ये उक्ताः। ह्रायिवाणिलोठिलापयश्चत्वारोऽधिकाः न्यासे। चाणिलोटी इत्यप्यन्यत्र। इत्थं द्वादश। अचीकणत्-अचकाणत्। २५८४ **स्वापेश्चङि** ६।१।१८॥ ण्यन्तस्य स्वपेश्चङि सम्प्रसारणं स्यात्। असूषुपत्। २५८५ **शाच्छासाह्वाव्यावेषां युक्** ७।३।३७॥ णौ परे। पुकोऽपवादः। शाययति। छाययति। साययति। ह्वाययति। व्याययति। २५८६

स्मृदृत्वर' इत्यतः अदिति 'सन्वल्लघुनि'। इत्यतः चङ्परे इति। चङ् परो यस्मादिति बहुव्रीहिः। आविस्यार्थिकम्। तदाह—अभ्यासस्याऽसवर्णमिति। अबिभ्रजदिति। उपधाह्रस्वपक्षे लघुपरत्वात् सन्वत्त्वादभ्यासस्य इत्वम्। 'दीर्घो लघोः' इति तु, न संयोगपरत्वादलघुत्वात्। काण्यादीनां वेति। णौ चङ्युपधायाः इति ह्रस्व इति शेषः। ण्यन्ताः कणरणेति। 'कण निमीलने, रण शब्दे, श्रण दाने, लुप छेदने, हेठ विबाधायाम्' इति षट् धातवो ण्यन्ताः काण्यादयो भाष्ये पठिता इत्यर्थः। ह्रायीति। 'ह्वेञ् स्पर्धायां शब्दे च' आत्वे युकि च निर्देशः, 'वण शब्दे' दन्त्योष्ठ्यादिः, 'लुठ प्रतीघाते' टवर्गद्वितीयोपधः 'लप व्यक्तायां वाचि' इति जत्वारो ण्यन्ताः भाष्योक्तेभ्योऽधिकाः न्यासग्रन्थे पठिता इत्यर्थः। चाणिलोटी इति। 'वण दाने' तालव्यादिः 'लुट स्तेये' टवर्गप्रथमान्तः भ्वादिः। चुरादौ भावार्थकोऽपि। एतावपि ण्यन्तौ द्वौ भाष्यन्यासग्रन्थाभ्यामन्यत्र क्वचित् ग्रन्थे पठितौ इत्यर्थः। इत्थं द्वादशेति। अनेन मतभेदेन काण्यादयो द्वादशेत्यर्थः। अचीकणदिति। उपधाह्रस्वापक्षे लघुपरत्वात् सन्वत्त्वदीर्घौ च। अचकाणदिति। उपधाह्रस्वाभावपक्षे रूपम्। अरीरणत्—अरराणत्। अबीभणत्-अबभाणत्। अशिश्रणत्—अशश्राणत्। अलूलुपत्—अलुलोपत्। अजीहिठत्—अजिहेठत्। अजूह्वत्-अजुह्वावत्। अवीवणत्—अववाणत्। अलूलुटत्—अलुलोठत्। अलीलपत्—अलुलापत्। अचीचणत्—अचचाणत्। अलूलुटत्—अलुलोटत्। स्वापेश्चङि। सम्प्रसारणमिति। व्यङः सम्प्रसारणमित्यतस्तदनुवृत्तेरिति भावः असूषुपदिति। 'सम्प्रसारणं तदाश्रयं च कार्यं बलवत्' इति वचनात्कृते सम्प्रसारणे द्वित्वं पूर्वरूपं सन्वत्त्वदीर्घौ षत्वमिति भावः। शाच्छासा। 'शो तनूकरणे' 'छो छेदने' षो अन्तकर्मणि' ह्वेञ् स्पर्धायां शब्दे च, 'ष्यञ् संवरणे' एषां कृतद्वित्वानां दैशः। 'वेञ् तन्तुसन्ताने' 'पा पाने' भ्वादिः। एषां द्वन्द्वात् षष्ठीबहुवचनम्। णौ परे इति। शेषपूरणमिदम्। आदन्तलक्षणपुकोऽपवादः। युकि ककार इत् उकार उच्चारणार्थः विचित्रा ह्यागमाः अत्र 'लुग्विकरणालुग्विकरणयोरलुग्विकरणस्य ग्रहणम्' इति वचनात् 'ना रक्षणे' इति न गृह्यते। तस्य तु पालयतीति रूपमनुपदमेव वक्ष्यति। शाययतीति। लुङि अशीशयत्। ह्रायतीति। अजिह्वयत्। साययतीति। असीषयत्। ह्वाययतीति।

ह्वः सम्प्रसारणम् ६।१।३२॥ सन्परे चङ्परे च णौ ह्वः सम्प्रसारणं स्यात्। अजूहवत्–अजुहावत्। २५८७ लोपः पिबतेरीच्चाभ्यासस्य ७।४।४॥ पिबतेरुपधाया लोपः स्यात् अभ्यासस्य ईदन्तादेशश्च चङ्परे णौ। अपीप्यत्। 'अर्तिह्री–' (सू २५७०) इति पुक्। अर्पयति। हेपयति। व्लेपयति। रेपयति। यलोपः। क्नोपयति। क्ष्मापयति। स्थापयति। २५८८ तिष्ठतेरित् ७।४।५॥ उपधाया इदादेशः स्याच्चङ्परे णौ। अतिष्ठिपत्। २५८९ जिघ्रतेर्वा ७।४।६॥ अजिघ्रिपत्–अजिघ्रपत्। 'उर्ऋत्' (सू २५६७)। अचीकृतत्–अचिकीर्तत्–अवीवृतत्–

लुङि तु विशेषो वक्ष्यते। व्याययतीति। अविव्ययत्। वाययति। अवीवयत्। पाययति। लुङि तु विशेषो वक्ष्यते। ह्वः सम्प्रसारणम्। ह्वेञः कृतात्त्वस्य 'ह्व' इति षष्ठी। 'णौ च संश्चङोः' इत्यनुवृत्तिमभिप्रेत्य आह—सन्पर इत्यादि। अजूहवदिति। ह्वा ह् अत् इति स्थिते 'सम्प्रसारणं तदाश्रयं च कार्यं बलवत्' इति वचनात् कृते सम्प्रसारणे पूर्वरूपे च ह् इत्यस्य द्वित्वे उत्तरखण्डस्य वृद्ध्यावादेशयोः कृतयोरुपधाह्रस्वे सन्वत्त्वदीर्घाविति भावः। अत्र कृते सम्प्रसारणे पूर्वरूपे च ह्वारूपाभावान्न यक्। पाधातोर्णौ युगागमे पायि इत्यस्मात्लुङि चङि द्वित्वादौ अपीपय् अ त् इति स्थिते—लोपः पिबतेः। चङ्परे णाविति। 'णौ चङ्युपधायाः' इत्यतस्तदनुवृत्तेरिति भावः। अपीप्यदिति। 'नानर्थकेऽलोऽन्त्यविधिः' इत्यस्य अनभ्यासविकार इति निषेधादभ्यासाऽन्त्यस्य ईत्त्वम्। हृह उपधालोपे कृते अल्लोपित्वादलघूपधत्वाच्च सन्वत्त्वदीर्घयोरप्राप्तावीत्त्वविधिः। अनिहो इति पुगिति। क्रमेणोदाहियत इति शेषः। अर्पयतीति। ऋधातोरुदाहरणम्। वृद्धि बाधित्वा नित्यत्वात् पुक्। गुणः। हेपयतीति। 'ह्री लज्जायाम्' इत्यस्य रूपम्। व्लेपयतीति। 'व्ली विशरणे' इत्यस्य रूपम्। रेपयतीति। 'री क्षये' इत्यस्योदाहरणम्। 'क्नूयी शब्दे' इत्यस्य क्नोपयतीत्युदाहरिष्यन्नाह—यलोप इति। क्नूयीधातोर्णौ पुकि 'लोपो व्योः' इति यलोप इत्यर्थः। ततः क्नूप् इ इति स्थिते अलघूपधत्वेऽपि पुगन्तत्वाद्गुणः। क्ष्मायो विधूनने' अस्माण्णौ पुकि यलोपः। आदन्तस्योदाहरति—स्थापयतीति। लुङि चङि अतिष्ठप् अ त् इति स्थिते—तिष्ठतेरित्। 'णौ चङ्युपधायाः' इत्यनुवर्तते। तदाह—उपधाया इति। जिघ्रतेर्वा। घ्राधातोरुपधाया इद्वा स्याच्चङ्परे णाविति यर्थः। अजिघ्रप् अ त् इति स्थिते उपधाया इत्त्वविकल्पः। उर्ऋदिति। धातोरुपधायाः ऋकारस्य ऋद्वा चङ्परे णाविति व्याख्यातं चुरादौ। अचीकृतदिति। कृत् ह् अ त् इति स्थिते ऋत्वपक्षे कृत् इत्यस्य द्वित्वे उदरत्वे हलादिशेषे अभ्यासचुत्वे सन्वत्त्वात् ह्रस्वे तस्य दीर्घं रूपम्। अचिकीर्तदिति। कृत् ह् अ त् इति स्थिते 'उर्ऋत्' इत्युपधाया ऋत्वाऽभावपक्षे 'उपधायाश्चे'ति ह्रस्वे रपरत्वे 'किर्त' इत्यस्य द्वित्वे उत्तरखण्डे 'उपधायां चे'ति दीर्घं रूपम्। अवीवृतदिति। 'वृतु वर्तने'। ण्यन्तं लघूपधगुणं बाधित्वा 'उर्ऋत्'। चङि, वृत् इत्यस्य

अववर्तत् । अमीमृजत्-अममार्जत् । 'पातेर्णौ लुगवक्तव्यः' (वा ४५२०) पुकोऽपवादः । पालयति । २५६० **वो विधूनने जुक्** ७।३।३८॥ वातेर्जुक्स्याण्णौ कम्पेऽर्थे । वाजयति । कम्पे किम् । केशान्वापयति । 'विभाषा लीयतेः' (सू २५०६) । २५६१ **लीलोर्नुग्लुकावन्यतरस्यां स्नेहनिपातने** ७।३।३६॥ लीयतेर्लातेश्च क्रमान्नुग्लुकावागमौ वा स्तो णौ स्नेहद्रवे । विलीनयति । विलाययति । विलालयति । विलापयति वा घृतम् । ली ई इति ईकारप्रश्लेषादात्वपक्षे नुग्न । स्नेहद्रवे किम् । लोहं विलापयति । 'प्रलम्भनाभिभवपूजासु लियो नित्यमात्वमशिति वाच्यम्' (वा३४८३) २५६२ **लियः सम्माननशालिनीकरण-**

द्वित्वे उरदत्वे सन्वत्त्वात् ह्रस्वं दीर्घश्चेति भावः । अववर्तदिति । ऋत्वाऽभावपक्षे वृत् इत्यस्य द्वित्वे उरदत्वे उत्तरखण्डस्य लघूपधगुणे रूपम् । लघुपरकत्वाऽभावान्न सन्वत्त्वदीर्घौ । अममीमृजदिति । उपधाया ऋत्वपक्षे रूपम् । अममार्जादिति । उपधाया ऋत्वाभावपक्षे द्वित्वे उरदत्वे उत्तरखण्डे 'मृजेर्वृद्धिः' इति वृद्धौ रपरत्वे रूपम् । लघुपरत्वाभावान्न सन्वत्त्वम् । पातेर्णौ लुगिति । लुगागम इत्यर्थः । पुकोऽपवाद इति । आदन्तलक्षणपुकोऽपवाद इत्यर्थः । यद्यपि 'पाल रक्षणे' इति धातोरेव सिद्धम्, तथापि पुको निवृत्तिः फलम् । वो विधून्ने । 'ओ वे शोषणे' इति धातोः कृनाद्यस्य वः इति षष्ठ्यन्तम् । 'अतिह्री' इत्यतः णावित्यनुवर्तते । तदाह—वातेरित्यादि । पुकोऽपवादो जुक् । केशान्वापयतीति । सुगन्धीकरोतीत्यर्थः । अत्र वैधातोः पुगेव । वाधातोस्त्विह न ग्रहणम्, लुग्विकरणत्वात् । केचित्तु वातेरेवात्र ग्रहणम्, ननु वेञः नापि वै इत्यस्य, लाक्षणिकत्वात्, सानुबन्धकत्वाच्चेत्याहुः । आत्त्वविधायकसूत्रं स्मारयति—विभाषा लीयतेरिति । लीलोर्नोरात्त्वं वा स्यादेज्विषये ल्यपि च इति व्याख्यातं प्राक् श्यन्विकरणे । तत्र लीयतेः इति यका निर्देशः, ननु श्यना । तेन 'ली श्लेषणे' इति श्नाविकरणस्य 'लीङ् श्लेषणे' इति श्यन्विकरणस्य च ग्रहणमिति च प्रागुक्तं न विस्मर्तव्यम् । लीलोः । ली ला इत्यनयोः षष्ठीद्विवचनम् । णाविति । 'अतिह्री' इत्यतस्तदनुवृत्तेरिति भावः । स्नेहस्य तैलस्य, निपातनं द्रावणं, स्नेहनिपातनम् । तदाह—स्नेहद्रवे इति । आत्त्वाऽभावपक्षे आह—विलीनयतीति । लीलीङोरीकारान्तयोर्नुकि रूपम् । द्रवीकरोतीत्यर्थः । लीलीङोरात्त्वनुगभावपक्षे आह—विलाययतीति । लाधातोर्लुगागमे आह—विलालयतीति । अत्र लातेरादादिकस्य कृनात्त्वबलायतेश्च ग्रहणम्, व्याख्यानात् । विलापयतीति । लुगागमाऽभावे रूपम् । ननु कृतात्त्वस्य लीधातोरपि एकदेशविकृतन्यायेन लीत्वान्नुक् स्यादित्यत आह—ली ई इति । लोहं विलापयतीति । नुग्लुकोरभावादात्वपक्षे पुक् । आत्त्वाऽभावे तु वृद्धयायादेशाविति भावः । प्रलम्भनाभिभवेति । प्रलम्भनं वञ्चना । अभिभवः तिरस्कारः । पूजा प्रसिद्धा । एष्वर्थेषु लीलीङोः एज्विषये नित्यमात्त्वं वक्तव्यमित्यर्थः । लियः सम्मानन । 'लियः' इति लीलीङोर्ग्रह-

यांश्च १।३।७०॥ लीङ्लियोर्ण्यन्तयोरात्मनेपदं स्यादकर्तृगेऽपि फले पूजाभिभवयोः प्रलम्भने चार्थे । जटाभिर्लापयते । पूजामधिगच्छतीत्यर्थः । श्येनो वर्तिकामुल्लापयते । अभिभवतीत्यर्थः । वालमुल्लापयते वञ्चयतीत्यर्थः । **२५६३ विभेतेर्हेतुभये ६।१।५६॥** विभेतेरेच आत्वं वा स्यात्प्रयोजकाद्भयं चेत् । **२५६४ भीस्म्योर्हेतुभये १।३।६८॥** आभ्यां ण्यन्ताभ्यामात्मनेपदं स्याद्धेतोश्चेद्भयस्मयौ । सूत्रे भयग्रहणं धात्वर्थोपलक्षणम् । मुण्डो भाषयते । **२५६५ भियो हेतुभये पुक् ७।३।४०॥** भी ई इति ईकारः प्रश्लिष्यते । ईकारान्तस्य भियः पुक्स्याण्णौ हेतुभये । भीषयते । **२५६६ नित्यं स्मयतेः ६।१।५७॥** स्मयतेरेव नित्यमात्वं स्याण्णौ हेतोः स्मये । जटिलो विस्मापयते । हेतोश्चेद्भयस्मयावित्युक्तेर्नेह । कुक्षिकर्यैनं भाययति । कथं तर्हि 'विस्मापयन्विस्मितमात्मवृत्तौ' इति । 'मनुष्यवाचा'

याम् । 'अनुदात्तङितः' इत्यतः आत्मनेपदमिति, 'णेरणौ' इत्यतो णेरिति चानुवर्तते । 'णिश्च' इति सिद्धेऽकर्त्रभिप्रायार्थमिदम् । सम्माननं पूजालाभः । शालिनीकरणम् अभिभवः । चकारात् । 'गृधिवञ्चयोः' इति पूर्वसूत्रात्प्रलम्भनग्रहणं समुच्चीयते । तदाह—लीङ्लियोरित्यादिना । विभेतेर्हेतुभये । 'आदेच उपदेशे' इत्यतः एच इति आदिति चानुवर्तते । 'विभाषा लीयतेः' इत्यतो विभाषेति, 'चिस्फुरोः' इत्यतो णाविति च । हेतुभयं प्रयोजकाद्भयम् । तदाह—विभेतेरेव इत्यादिना । भीस्म्योर्हेतुभये । 'अनुदात्तङितः' इत्यतः आत्मनेपदमिति 'णेरणौ' इत्यतो णेरिति चानुवर्तते । हेतुः प्रयोजकः । तदाह—आभ्यां ण्यन्ताभ्यामिति । अकर्त्रभिप्रायार्थमिदम् । ननु हेतोश्चेत् भयस्मयावित्यनुपपन्नम्, सूत्रे स्मयग्रहणाऽभावादित्यत आह—सूत्रे भयेति । सूत्रे भयग्रहणं स्मिङधात्वर्थस्य स्मयस्याप्युपलक्षणमित्यर्थः । मुण्डो भाषयते इति । अत्र आत्वं, पुक्, आत्मनेपदं च । भिय आत्वाऽभावपक्षे विशेषमाह—भियो हेतुभये पुक् । भी ई इति । ह्रस्वोः सवर्णदीर्घे भीशब्दात् षष्ठीति भावः । इदं च स्थानिवत्सूत्रे भाष्ये स्पष्टम् । ईकारप्रश्लेषलब्धमाह—ईकारान्तस्येति । तेन आत्वपक्षे न पुगिति फलितम् । णाविति । 'अतिहीं' इत्यतस्तदनुवृत्तेरिति भावः । नित्यं स्मयतेः । 'आदेच उपदेशे' इत्यतः एच इति आदिति चानुवर्तते । 'चिस्फुरोः' इत्यतो णाविति 'विभेतेर्हेतुभये' इत्यतः हेतुभये इति च । तत्र भयग्रहणं स्मयस्याप्युपलक्षणम्, अत्र तु स्मय एव विवक्षितः, स्मयतेर्भीत्यर्थकत्वाऽसम्भवात् । तदाह—स्मयतेरेव इत्यादि । 'विभाषा लीयतेः' इत्यतो विभाषानुवृत्तये नित्यग्रहणम् । अथ 'विभेतेर्हेतुभये' इति 'नित्यं स्मयतेः' इति च आत्वविधौ 'भीस्म्योर्हेतुभये' इति आत्मनेपदविधौ च हेतुग्रहणस्य प्रयोजनमाह—हेतोश्चेत् भयस्मयावित्युक्तेर्नेहेति । कुक्षिकर्यैनमिति । केशबन्धविशेषः कुक्षिका । तस्याश्च करणतया प्रयोजककर्तृत्वाऽभावात् आत्वं पुक् च नेति भावः । आक्षिपति-कथमिति । रघुवंशकाव्ये-

इति करणादेव हि तत्र स्मयः। अन्यथा शानजपि स्यात्। सत्यम्। विस्माययन् इत्येव पाठ इति साम्प्रदायिकाः। यद्वा मनुष्यवाक्प्रयोज्यकर्त्री विस्मापयते तया सिंहो विस्मापयन्निति ण्यन्ताण्णौ शता इति व्याख्येयम्। २५९७ स्फायो वः ७।३।४१॥ णौः।स्फावयति। २५९८ शदेरगतौ तः ७।३।४२॥ शदेर्णौ तोऽन्तादेशः स्यान्न तु गतौ। शातयति। गतौ तु गाः शादयति गोविन्दः। गमयतीत्यर्थः। २५९९ रुहः पोऽन्यतरस्याम् ७।३।४३॥ णौ। रोपयति-रोहयति। २६०० क्रीङ्जीनां णौ ६।१।४८॥ एषामेच आत्वं स्याण्णौ। क्रापयति। जाप॰

'तमार्यगृह्यं निगृहीतधेनुर्मनुष्यवाचा मनुवंशकेतुम्।
विस्मापयन् विस्मितमात्मवृत्तौ सिंहोरुसत्त्वं निजगाद सिंहः' ॥

इति श्लोके विस्मापयन्निति कथमित्याक्षेपः। प्रयोजकाङ्गयाऽभावेन आत्वपुगन्तुपपत्तेरिति भावः। ननु मनुष्यवागेव तत्र प्रयोजिकेत्यत आह—मनुष्येति। मनुष्यवाचेति तृतीयान्तगम्यकरणात् मनुष्यवागात्मकादेव हि तत्र स्मयः। ननु करणभूताऽपि मनुष्यवाक् प्रयोजिका कुतो नेत्यत आह—अन्ययेति। मनुष्यवाचः स्मयप्रयोजकत्वमभ्युपगम्य आत्वाश्रयणे 'भीस्म्योर्हेतुभये' इत्यात्मनेपदमपि स्यादित्यर्थः। स्मयोऽत्र प्रयोजकमूलको नेति युक्तमेव। किंत्वात्वपुगाक्षेपो न युज्यते इत्यर्थाङ्गीकारेण परिहरति—सत्यमिति। विस्माययन्निति। णौ आयादेशे स्मायि इत्यस्मात्लटः शतरि शपि णेर्गुणे अयादेशे विस्मापयन्नित्येव कालिदासो महाकविः प्रायुङ्क्त। 'विस्मापय'न्निति पकारपाठस्तु लेखकप्रमादकृत इति भावः। यद्वेति। राजा दिलीपो विस्मयते। तं सिंहोच्चारिता मनुष्यवाक् प्रयोजयति 'विस्मापयते मनुष्यवाक् राजानम्'। अत्र मनुष्यवाक् प्रयोजककर्त्री। राजा तु प्रयोज्यकर्तेति स्थितिः। अत्र स्मयस्य प्रयोजककर्तृभूतमनुष्यवाङ्मूलकत्वादात्वे पुक्। मूले 'प्रयोज्यकर्त्री'त्येव पाठः। प्रयोजककर्त्रीत्यर्थः। प्रयोज्यः कर्ता यस्याः सा प्रयोज्यकर्त्री इति बहुव्रीह्याश्रयणात्। 'प्रयोजककर्त्री'त्येव पाठः सुगमः। तां विस्मापयमानां प्रयोजककर्त्रीं मनुष्यवाचं प्रयोजयति सिंहः। विस्मापयति। स्मापि इति ण्यन्तात् णौ प्रथमणेर्लोपे स्मापि इत्यस्मात् शतृप्रत्यये शपि णेर्गुणे अयादेशे विस्मापयन्निति भवतीत्यभिप्रेत्य आह—तया सिंह इति। प्रयोजककर्तरि तृतीया। आत्मनेपदं भीस्मीप्रकृतिकण्यन्तादेव, ननु ण्यन्तप्रकृतिकण्यन्तादिति भावः। स्फायो वः। स्फायितिशेषपूरणम्। 'अर्तिही' इत्यतस्तदनुवृत्तेरिति भावः। शदेरगतौ तः। 'अर्तिही' इत्यतो णावित्यनुवृत्तिं मत्वा आह—शदेर्णाविति। तोऽन्तादेश इति। तकार इत्यर्थः। अकार उच्चारणार्थः। तः पो। णाविति शेषपूरणम्। क्रीङ्जीनां णौ। 'डु क्रीञ् द्रव्यविनिमये, 'ईङ् अध्ययने' 'जि जये' एषां ग्रहणम्। एच आत्वमिति। 'आदेच उपदेश' इत्यतस्तदनुवृत्तेरिति भावः। क्रापयति आपयतीति। आत्वे पुक्। क्रि

यति। अध्यापयति। २६०१ णौ च संश्चङोः २।४।५१॥ सन्परे चङ्परे च णौ इङो गाङ्वा स्यात्। अध्यजीगपत्। अध्यापिपत्। २६०२ सिध्यतेरपारलौकिके ६।१।४६॥ऐहलौकिकेऽर्थे विद्यमानस्य सिध्यतेरे आत्वं स्याण्णौ। अन्नं साधयति। निष्पादयतीत्यर्थः। अपारलौकिके किम्। तापसः सिध्यति। तत्त्वं निश्चिनोति। तं प्रेत्यति, सेधयति तापसं तपः। २६०३ प्रजने वीयतेः ६।१।५५॥ अस्यैव आत्वं वा स्याण्णौ प्रजनेऽर्थे। वापयति–वाययति वा गाः पुरोवातः। गर्भं ग्राहयतीत्यर्थः। 'ऊदुपधाया गोहः' (सू. २३६४)। गूहयति। २६०४ दोषो

अचिक्रपत्। अजीजपत्। अध्यापयतीति। इङः आत्वे पुकि रूपम्। अधि इ इ अ त् इति स्थिते। णौ च संश्चङोः। विषयसप्तमीयमित्याकरे स्पष्टम्। णौ विवक्षिते इति लभ्यते। 'इङश्च' इत्यतः इङ इति 'गाङ् लिटि' इत्यतो गाङिति 'विभाषा लुङ्लृङोः' इत्यतो विभाषेति चानुवर्तते। तदाह—सन्परे चङ्परे चेत्यादि। सन्परे चङ्परे च णौ विवक्षिते इत्यर्थः। अध्यजीगपदिति। णौ इङो गाङादेशे पुकि उपधाह्रस्वे अधि गप् इ अ त् स्थिते गप् इत्यस्य द्वित्वे हलादिशेषे अभ्यासहृस्वे सन्वत्त्वादित्वे दीर्घे अभ्यासचुत्वे रूपम्। नच द्वित्वे कार्ये 'णावजादेशो न' इति द्वित्वात् प्राक् गाङादेशनिषेधः शङ्क्यः, अभ्यासोत्तरखण्डे अवर्णसत्त्व एव तन्निषेधप्रवृत्तेरुक्तत्वात्। द्वित्वे कार्यं गाङादेशस्य निषेधे सति गाङः पूर्वम् 'अजादेर्द्वितीयस्य' इति णिच एव द्वित्वे सति प्रक्रियायां परिनिष्ठिते वा धातोरुत्तरखण्डे अवर्णाऽभावादिति भावः। अध्यापिपदिति। गाङभावे 'क्रीङ्जीनां णौ' इत्यात्त्वे पुकि अधि आप् इ अ त् इति स्थिते 'पि' इत्यस्य द्वित्वे रूपमिति भावः। सिध्यतेरपारलौकिके। 'आदेच उपदेशे' इत्यस्मादादेच इति 'क्रीङ्जीनाम्' इत्यस्माण्णाविति चानुवर्तते। तदाह—ऐहलौकिके इत्यादि। अन्नमिति। तन्निष्पादनं तृप्त्यर्थत्वादैहलौकिकमिति भावः। तत्त्वमिति। आत्मस्वरूपमित्यर्थः। सेधयति तापसं तप इति। तत्त्वं निश्चाययतीत्यर्थं। आत्मतत्त्वनिश्चयः आमुष्मिकफलक इति भावः। प्रजने वीयतेः। 'आदेच उपदेशे' इत्यस्मादादेच इति 'चिस्फुरोः' इत्यतो णाविति 'विभाषा लीयतेः' इत्यतो विभाषेति चानुवर्तते। तदाह—अस्यैव इत्यादि। 'वीयतेरि'ति न श्यना निर्देशः, 'वी गतिप्रजनस्थानाजनोपाजनेषु' इत्यस्य लुग्विकरणस्यत्वात्। किन्तु यका निर्देशोऽयम्। तेन व्येञोऽपि ग्रहणम्, तस्यापि सन्प्रसारणे वीधातुना तुल्यत्वादिति केचित्। वस्तुतस्तु व्येञो न ग्रहणम्। तस्य प्रजनार्थकत्वाऽभावात्। तस्य णौ 'शाच्छासा' इति पुगपवादयुग्विधानेन व्याययतीति रूपे विशेषाभावाच्चेति शब्देन्दुशेखरे प्रपञ्चितम्। गर्भं ग्राहयतीति। पुरोवातकाले गावो गर्भं गृह्णन्तीति प्रसिद्धिः। अथ 'गुहू संवरणे' इत्यस्य गुणनिमित्ते अजादौ प्रत्यये परे उपधाया ऊत्वविधिं स्मारयति—ऊदुपधाया गोह इति। गूहयतीति। ह्रस्वपवादो गुणापवादः ऊत्त्वमिति भावः। दोषो द्वौ। 'ऊदुपधाया' इत्यनुवर्तते। 'दुष वैकृत्ये' इति

णौ ६।४।६०।। दुषः इति सुवचम्। दुष्यतेरुपधाया ऊत्स्यात्। **दूषयति। २६०५ वा चित्तविरागे ६।४।६१।।** विरागोऽप्रीतता। चित्तं दूषयति-दोषयति वा कामः। 'मितां ह्रस्वः' (सू २५६८)। भ्वादौ चुरादौ च मित उक्ताः। घटयति। 'जनीजृष्—'। जनयति। जरयति। जृणातेस्तु जारयति। 'रञ्जेर्णौ मृगरमणे नलोपो वक्तव्यः' (वा ४०६७)। मृगरमणमाखेटकम्। रजयति मृगान्। 'मृग-' इति किम्। रञ्जयति पक्षिणः। रमणादन्यत्र तु रञ्जयति मृगान् तृणदानेन। चुरादिषु ज्ञपादिश्चिञ्। 'चिस्फुरोर्णौ' (सू २५६६)। चपयति—चययतीत्युक्तम्। चिनोतेस्तु चापयति-चाययति। स्फारयति-स्फोरयति। अपुस्फरत्-अपुस्फुरत्।

२६०६ उभौ साभ्यासस्य ८।४।२१।। साभ्यासस्यानितेरुभौ नकारौ णत्वं प्रा-

---

श्यन्विकरणः। तस्य कृतलघूपधगुणस्य निर्देशः। ततश्च गुणविषयकमेवेदम्-दुष्यतेरुपधाया ऊत्स्यादिति। णाविति शेषः। दूषयतीति। लघूपधगुणापवाद ऊत्। 'दूषो णौ' त्येव सुवचम्। वा चित्तविरागे। ऊदुपधाया इति, दोषो णाविति, चानुवर्तते। चित्तविरागे दुष उपधाया ऊद्वा स्यात् णाविति फलितम्। विरागपदस्य विवार्यं अप्रीततेति। इच्छाविरह इत्यर्थः। चित्तमिति। चित्तं दुष्यति स्नानसन्ध्यावन्दनादिनित्यकर्मसु विरक्तं भवति। तत्प्रयोजयति काम इत्यर्थः। मितां ह्रस्व इति। णौ मितामुपधाया ह्रस्वः इति प्राग्व्याख्यातमपि स्मारयति। जनीजृषिति। इदमपि व्याख्यातं स्मार्यते। जृणातेस्त्विति। श्नाविकरणस्य अपित्वात् न मित्त्वमिति भावः। रञ्जेर्णाविति। णेः कित्त्वाऽभावात् अनिदितामित्यप्राप्तो वचनम्। 'मृगरमण' पदस्य विवरणम्-आखेटकमिति। मृगयेत्यर्थः। रजयति मृगानिति। 'रञ्ज रागे' शब्विकरणः 'रञ्जेश्च' इति शपि नलोपः। 'रजन्ति मृगाः' ग्राह्या भवन्ति। तान् मृगान् तादर्थ्यव्यापारविषयान् करोति मृगवधासक्तो राजादिरित्यर्थः। अत्र नकारलोपः। रञ्जयति पक्षिणः इति। 'पक्षिणो रजन्ति' ग्राह्या भवन्ति। तान् तादर्थ्यव्यापारविषयान् करोतीत्यर्थः। पक्षिग्रहणमिदं न मृगयेति मन्यते। रञ्जयति मृगान् तृणदानेनेति। घातको मृगान् रक्षणाय तृणसमर्पणेन बन्धनस्थानगान् करोतीत्यर्थः। चुरादिष्विति। चुरादिषु ज्ञपादिपञ्चकान्तर्गतश्चिञ्धातुरस्ति। तस्मात् स्वार्थणिचि कृते 'चिस्फुरोः' इति आत्वपक्षे पुकि मित्त्वादुपधाह्रस्वे चपयतीति रूपम्। आत्वाऽभावे तु वृद्धौ आयादेशे मित्त्वाद्ध्रस्वे चययतीति रूपमुक्तं चुरादाविति्यर्थः। चिनोतेस्त्विति। श्नुविकरणस्य तु चिञ्धातोर्हेतुमण्णौ 'चिस्फुरोः' इति आत्वे पुकि मित्त्वाभावाद्ध्रस्वाऽभावे 'चापयती'ति रूपम्। आत्वाऽभावे वृद्धौ आयादेशे मित्त्वाऽभावाद्ध्रस्वाऽभावे चाययतीति रूपमित्यर्थः। स्फारयति-स्फोरयतीति। 'चिस्फुरोः' इत्यात्वविकल्पः। अपुस्फरत्-अपुस्फुरदिति। स्फुर् इ अ त् इति स्थिते द्वित्वे कर्तव्ये णावच आदेशस्य निषिद्धतया 'स्फुरित्युकारवतो द्वित्वे ततश्चिस्फुरोर्णाविति उत्तरखण्डे आत्वविक-

प्नुतो निमित्ते सति। प्राणिणत्। **२६०७ णौ गमिरबोधने २।३।४६॥** इणो गमिः स्याण्णौ। गमयति। बोधने तु प्रत्याययति। 'इण्वदिकः' (वा १५७७)। अधिगमयति। 'हनस्तोऽचिण्णलोः' (सू २५७४)। 'हो हन्तेः' (सू ३५८) इति कुत्वम्। घातयति। ईर्ष्ययति। 'ईर्ष्यतेस्तृतीयस्येति वक्तव्यम्' (वा ३४०६) तृतीयव्यञ्जनस्य तृतीयैकाच इति वार्थः। आद्ये षकारस्य द्वित्वं वारयितुमिदम्। द्वितीये तु 'अजादेर्द्वितीयस्य' (सू २१७६) इत्यस्यापवादतया सन्नन्ते प्रवर्तते। ऐर्ष्यियत्-ऐर्षिष्यत्। द्वितीयव्याख्यायां णिजन्ताच्चङि पकार एवाभ्यासे श्रूयते।

रूपः। आत्वपक्षे उपधाह्रस्व इति भावः। उभौ साभ्यासस्य। अनितेरित्यनुवर्तते। 'अन प्राणने' इति धातोरित्यर्थः। 'रषाभ्यां नो णः' इत्यधिकृतम्। 'उपसर्गादसमासेऽपि' इत्यतः उपसर्गादित्यनुवर्तते। तदाह—साभ्यासस्येत्यादिना। निमित्ते सतीति। उपसर्गस्थे रेफे सतीत्यर्थः। प्राणिणदिति। प्र अन् इ अ त इति स्थिते 'अनितेः' इति णत्वस्यासिद्धत्वात् नि इत्यस्य द्वित्वे उत्तरखण्डे नकारस्याभ्यासनकारेण व्यवधानाण्णत्वे अप्राप्ते उभयोर्नकारयोरनेन णत्वमित्यर्थः। नच 'पूर्वत्रासिद्धीयमद्विर्वचने' इति निषेधात् द्वित्वे कर्तव्ये णत्वस्याऽसिद्धत्वविरहेण परत्वात् कृते णत्वे ततः पश्चात् द्वित्वे 'प्राणिण'दिति सिद्धमिति वाच्यम्, अत एव 'पूर्वत्रासिद्धीयमद्विर्वचने' इत्यस्याऽनित्यत्वविज्ञानात्। तेन 'ऊर्णुनावे'त्यत्र णत्वात् पूर्वमेव नुशब्दस्य द्वित्वे कृते अभ्यासोत्तरखण्डे णत्वाभावसिद्धिरित्यन्यत्र विस्तरः। णौ गमिरबोधने। 'इणो गा लुङि'इत्यतः इण इत्यनुवर्तते। तदाह—इणो गमिरिति। मकारादिकार उच्चारणार्थः। गमयतीति। प्रापयतीत्यर्थः। प्रत्याययतीति। बोधयतीत्यर्थः। लुङि प्रत्याययित्। इणो णिचि 'इणो यण्' इति यणं बाधित्वा परत्वात् वृद्धौ आयादेशे आय् इ अ त् इति स्थिते 'यि' इत्यस्य द्वित्वम्। नच द्वित्वे कार्ये णावजादेशस्य निषिद्धत्वाद्वृद्धेर्निषेधः शङ्क्यः, 'अजादेर्द्वितीयस्य'इति णिचो द्वित्वे उत्तरखण्डे अवर्णाभावात्। 'इक् स्मरणे'इत्यस्य इण्वत्त्वमुक्तं स्मारयति—इण्वदिक इति। अधिगमयतीति। स्मारयतीत्यर्थः। हन्तेरिति णिति च तकारादेशमुक्तं णौ स्मारयति—हनस्तोऽचिण्णलोरिति। कुत्वमिति। 'हस्ये'ति शेषः। उपधावृद्धि मत्वा आह—घातयतीति। लुङि अजीघतत्। ईर्ष्यतीति। ईर्ष्यतेर्णौ रूपम्। वक्तव्यमिति। 'द्वित्व'मिति शेषः। इति वार्थ इति। 'न न्द्राः' इति सूत्रभाष्ये स्पष्टमिदम्। आद्ये इति। 'तृतीयस्य व्यञ्जनस्ये'ति पक्षे इत्यर्थः। षकारस्येति। अन्यथा ईर्ष्यं इ अ त इति स्थिते 'नन्द्राः' इति रेफं वर्जयित्वा षकारसहितस्य 'यि' इत्यस्य द्वित्वं स्यात्। ततश्च उत्तरखण्डे णिलोपे ऐर्षिष्यदिति स्यात्। ऐर्ष्यं यदितीष्टं न स्यात्। अतस्तृतीयव्यञ्जनस्येत्युक्तम्। एवञ्च यकारमात्रस्य द्वित्वे णिलोपे संयुक्तद्वियकारमिष्टं सिध्यतीत्यर्थः। द्वितीये इति। 'तृतीयैकाच' इति व्याख्याने इत्यर्थः। सन्नन्ते प्रवर्तते इति। 'उक्तवार्तिक'मिति शेषः। सनि ईट् ईर्ष्यं इस इति स्थिते ईर्ष्यं

हलादिशेषात्। द्वित्वं तु द्वितीयस्यैव। तृतीयाभावेन प्रकृतवार्तिकाप्रवृत्तेः। निवृत्तप्रेषणाद्धातोर्हेतुमण्णौ शुद्धेन तुल्योऽर्थः। तेन 'प्रार्थयन्ति शयनोत्थितं प्रियाः' इत्यादि सिद्धम्। एवं सकर्मकेषु सर्वेषूह्यम्। इति तिङन्ते णिच्प्रकरणम्।

अथ तिङन्ते सन्प्रकरणम् ॥ १२ ॥

२६०८ धातोः कर्मणः समानकर्तृकादिच्छायां वा ३।१।७॥ इषिक-

इति प्रथमैकाच् 'ष्यिस्' इति द्वितीयैकाच् स इति तृतीयैकाजिति स्थितिः। तत्र तृतीयैकाचः सम्भवात्तस्य द्वित्वविधिः। अन्यथा 'अजादेर्द्वितीयस्य' इति स्यादिति भावः। ऐर्ष्यत्यदिति। यकारमात्रस्य द्वित्वे खिलोपे संयुक्तद्वियकारं रूपम्। अथ द्वितीयव्याख्यायां रूपमाह—ऐर्षिष्यदिति। तदुपपादयति—द्वितीयव्याख्यायामिति। ण्यन्ताच्चङि ईर्ष्य् इ अ त् इति स्थिते 'न म्द्राः' इति निषेधाद्धेफं वर्जयित्वा 'अजादेर्द्वितीयस्य' इति ष्यि इत्यस्य द्वित्वम् ननु यकारमात्रस्य, प्रथमव्याख्याने एव तृतीयस्यैकाचस्तेऽभ्युक्तेः। तत्र 'ष्यि' इत्यस्य द्वित्वे कृतेऽपि अभ्यासे यकार एव हल् इकारशिरस्कः श्रूयते, ननु यकारोऽपीष्यर्थः। कुत इत्यत आह—हलादिशेषादिति। ननु तृतीयस्यैकाच इति द्वितीयव्याख्यायाम् इह द्वितीयस्यैकाचः कथं द्वित्वमित्यत आह—द्वित्वं तु द्वितीयस्यैवेति। 'एकाच' इति शेषः। कुत इत्यत आह—तृतीयाभावेनेति। ईर्ष्य् इ अ त् इत्यत्र ईर्ष्य् इति प्रथमैकाच्, ष्यि इति द्वितीयैकाच्, ननु चङि परे तृतीयैकाजस्ति अतोऽत्र 'तृतीयैकाच' इति वार्तिकं न प्रवर्तते। तस्मात् द्वितीयस्यैव एकाचो द्वित्वमित्यर्थः। एवञ्च 'तृतीयस्यैकाच' इति वार्तिकं सन्नन्त एव प्रवर्तते। ईर्ष्यतेरामः सत्त्वेन ततः परस्य लिटोऽभावादिति बोध्यम्। ननु 'प्रार्थयन्ति शयनोत्थितं प्रियाः' इति माघकाव्ये प्रार्थयतीति न चौरादिकस्वार्थिकणिजन्तम्, तस्याऽऽत्मनेपदप्रसङ्गात्। नापि हेतुमण्ण्यन्तम्। स्वाभीष्टं याचते इत्यर्थं तदसम्भवात्। नहि प्रयोजकव्यापाराभावे तत्प्रवृत्तिरस्तीत्यत आह—निवृत्तेति। निवृत्तं प्रेषणं यस्मात् सः निवृत्तप्रेषणः। सम्प्रति अविवक्षितप्रेषण इत्यर्थः। तस्माद्धातोः भूतपूर्वंगत्या प्रेषणमादाय हेतुमण्णौ कृते शुद्धेन णिज्विहीनेन धातुना तुल्योऽर्थः प्रतीयते इत्यर्थः। तदुक्तम्—'निवृत्तप्रेषणाद्धातोः प्राकृतेऽर्थे णिजिष्यते' इति। इदं च 'णेरणौ' इति सूत्रे भाष्ये स्पष्टम्। इति श्रीवासुदेवदीक्षितविदुषा विरचितायां सिद्धान्तकौमुदीव्याख्यायां बालमनोरमाख्यायां हेतुमण्ण्यन्तो निरूपणं समाप्तम्।

अथ सन्प्रक्रिया निरूप्यन्ते। धातोः कर्मणः। 'गुप्तिज्किद्भ्यः' इत्यतः सन्नित्यनुवर्तते। इच्छायाः श्रुतत्वात्तां प्रत्येव कर्मत्वं विवक्षितम्। तथा समानकर्तृकत्वमपि इच्छानिरूपितमेव विवक्षितम्। कर्मेति स्ववाचकशब्दद्वारा धातौ सामानाधिकरण्येनान्वेति। एवञ्च इच्छासमानकर्तृकत्वे सति इच्छाकर्मीभूतो यो व्यापारः तद्वाच-

र्मण इषिणैककर्तृकाद्धातोः सन्प्रत्ययो वा स्यादिच्छायाम्। धातोर्विहितत्वादिह सन आर्धधातुकत्वम्। इट। द्वित्वम्। 'सन्यतः' (सू २३१७)। पठितुमिच्छति पिपठिषति। कर्मणः किम्। गमनेनेच्छतीति करणान्माभूत्। समानकर्तृकात् किम्। शिष्याः पठन्त्वितीच्छति गुरुः। वाग्रहणात्पक्षे वाक्यमपि। लुङ्सनोर्घस्लृ' (सू २४२७)। 'एकाच उपदेशे-' (सू २२४६) इति नेट्। सस्य तत्वम्। अत्तुमिच्छति जिघत्सति। ईर्ष्यतेस्तृतीयस्य' (वा ३४०३) इति यिसनोर्द्वित्वम्। ईर्ष्ययिषति-ईर्ष्यिषति। २६०६ रुदविदमुषग्रहिस्वपिप्रच्छः संश्च १। २।८॥ एभ्यः सन् क्त्वा च कितौ स्तः। रुरुदिषति। विविदिषति। मुमुषिषति।

कादातोरिच्छायां सन् वा स्यादिति फलति। तदाह—इषिकर्मण इत्यादि। इषिरिच्छा। इषिणा एककर्तृकत्वात् इषिकर्मीभूतव्यापारवाचकादातोरित्यर्थः। ननु समानकर्तृकादित्युक्त्यैव धातोरिति लब्धम्। धात्वर्थव्यापाराश्रयस्यैव कर्तृत्वादित्यत आह—धातोरिति। धातोरिति विहितस्यैव प्रत्ययस्यार्धधातुकत्वं, ननु धातोः परस्य। अन्यथा जुगुप्सते इत्यत्र धातोरित्यविहितस्यापि 'गुप्तिज्किद्भ्यः' इति सन आर्धधातुकत्वापत्तौ लघूपधगुणापत्तेरिति भावः। अस्य सन आर्धधातुकत्वे फलमाह—इडिति। द्वित्वमिति। 'सन्यङोः' इत्यनेनेति भावः। अभ्यासस्य इत्त्वविधिं स्मारयति—सन्यत इति। पठितुमिच्छतीति। भावस्तुमुनर्थः 'अव्ययकृतो भावे' इत्युक्तेः। धात्वर्थ एव भाव इत्युच्यते। तथाच पठितुमित्यस्य पठनक्रियेत्यर्थः। तस्मिन् पठने इच्छाकर्मत्वम्, इच्छासमानकर्तृकत्वं च सना गम्यते। तथाच स्वकर्तृकं पठनमिच्छतीत्यर्थे पिपठिषतीति शब्दो वर्तत इत्युक्तं भवति। अथ 'अद भक्षणे' इति धातोः सनि घस्लृभावं स्मारयति—लुङ्सनोर्घस्लृ इति। घस् स इति स्थिते इट्माशङ्क्य आह—एकाच इति। नेडिति। घस् स इति स्थिते आह—सस्य तत्वमिति। 'सः स्यार्द्धातुके' इत्यनेनेति भावः। जिघत्सतीति। द्वित्वे अभ्यासजश्त्वचुत्वे इति भावः। यसनोर्द्वित्वमिति। 'तृतीयस्य ज्ञ्यञ्जनस्ये'ति पक्षे ईर्ष्य इस इत्यत्र यकारमात्रस्य द्वित्वे, सनः क्त्वे, संयुक्तद्वियकारं रूपमिति भावः। तदाह—ईर्ष्ययिषतीति। तथाच सन्नन्ते ईकाररेफषकारयकारद्वित्वेकारषकाराः। 'तृतीयस्त्वे'काच' इति पक्षे ईर्ष्य इ स इत्यत्र स इत्यस्य द्वित्वे अभ्यासेस्ये सकारद्वयस्यापि षत्वे रूपं मत्वा आह—ईर्ष्यिषतीति। अत्र तु सन्नन्ते ईकाररेफषकारयकारेकारषकारेकारषकाराऽकाराः। रुदविद। इका निर्देशात् सम्प्रसारणे गृहीते निर्देशः। स्वपीति इकारस्तु उच्चारणार्थः, न त्विका निर्देशः, सुपीति सम्प्रसारणप्रसङ्गात्। चकारात् 'मृडमृदगुध' इति पूर्वसूत्रस्थं क्त्वेति समुच्चीयते। तदाह—सन् क्त्वा चेति। किताविति। 'असंयोगाल्लिट्' इत्यतस्तदनुवृत्तेरिति भावः। रुत्वसाहचर्याद्वेस्तरेव ग्रहणमिति केचित्। अविशेषात्सर्वस्येत्यन्ये। 'हलन्ताच्च' इति सिद्धे रुदविदमुषां ग्रहणं 'रुको व्युपधात्' इति विकल्पबाधनार्थम्। ग्रहेस्तु क्त्वार्थो

२६१० सनि ग्रहगुहोश्च ७।२।१२॥ ग्रहेर्गुहेरुगन्ताच्च सन इण्न स्यात्। 'ग्रहिज्या-' (सू २४१२) इति सम्प्रसारणम्। सनः षत्वस्यासिद्धत्वाद्धष्भावः। जिघृक्षति। सुषुप्सति। **२६११ किरश्च पञ्चभ्यः ७।२।७५॥** कॄ, गॄ, दृङ्, धृङ्, प्रच्छ् एभ्यः सन इट् स्यात्। पिपृच्छिषति। चिकरिषति। जिगरिषति। जिगलिषति। अत्रेटो दीर्घो नेष्टः। दिदरिषते। दिधरिषते। कथम् 'उद्दिधीर्षुः' इति। भौवादिकयोर्धृङ्धृञोरिति गृहाण। **२६१२ इको झल् १।२।९॥** इगन्ता-

---

'न क्त्वा सेट्' इतिनिषेधबाधनार्थम्। स्वपिप्रच्छ्योस्तु क्त्वायां किरवेऽपि; सन अप्राप्तकित्त्वविधानार्थम्। रुरुदिषतीत्यादौ सनः किरवाल्लघूपधगुणाऽभावः। सनि ग्रहगुहोश्च। चकारात् 'श्र्युकः किति' इत्यतः उक इत्यनुकृष्यते, न तु श्रयतिः, तस्य 'सनीवन्तर्ध' इति विकल्पस्य वक्ष्यमाणत्वात्। 'नेड्वशिकृति' इत्यतः नेडिति चानुवर्तते। तदाह—ग्रहेरित्यादि। ग्रहधातोर्निष्ठयमिटि प्राप्ते गुहेः ऊदित्वात्तद्विकल्पे प्राप्ते वचनम्। ग्रहिज्येति। ग्रह् स इति स्थिते सनः किरवात् 'ग्रहिज्या' इति रेफस्य सम्प्रसारणम् ऋकार इत्यर्थः। ननु गृह् स इति स्थिते हस्य ढत्वे भष्भावापेक्षया परत्वात् कत्वे सस्य षत्वे च कृते झषन्तत्वाभावे कथं भष्भाव इत्यत आह—सनः षत्वस्येति। कत्वस्यासिद्धत्वादित्येव सुवचम्। जिघृक्षतीति। गृह् स इति स्थिते हकारादिणः परस्य सस्य षत्वं परत्वात् प्राप्तं, तस्यासिद्धत्वात् हस्य ढत्वे भष्भावः, ततः कत्वे कात्परस्य षत्वमिति क्रम इति भावः। गुहेः जुघुक्षतीत्युदाहार्यम्। उगन्तात् बुभूषति। अत्र 'श्र्युकः किती'त्यनेन तु न सिध्यति, तत्र कित एव निषेधात्। परत्वादिडागमे 'इको झलि'त्यस्याऽप्राप्तेः। स्पष्टं चेदं शब्देन्दुशेखरे। सुषुप्सतीति। सनः किरवात् 'वचिस्वपि' इति सम्प्रसारणं लघूपधगुणाभावश्च। किरश्च पञ्चभ्यः। किर इति पञ्चमी। 'किरादिभ्य इति विवक्षितम्। तुदादौ 'कॄ विक्षेपे, गॄ निगरणे, दृङ् आदरणे, धृङ् अवस्थाने, प्रच्छ ज्ञीप्सायाम्' इति स्थिताः। तदाह—कॄ गॄ इत्यादिना। सन इडिति। 'स्मिपूङ्रञ्ज्वशां सनि' इत्यतः 'इडत्यर्ति' इत्यतश्च तदनुवृत्तेरिति भावः। 'किरतिगिरत्योः 'इट् सनि वे'ति विकल्पे अन्येषां च 'एकाच' इति निषेधे प्राप्ते अयमिड्विधिः। शब्देन्दुशेखरे तु 'सनि ग्रहे'ति 'एकाच' इति च निषेधे प्राप्ते वचनमित्युक्तम्। पिपृच्छिषतीति। सनः किरवात् 'ग्रहिज्या' इति सम्प्रसारणम्। चिकरिषतीति। कृधातोः सनि इटि रूपम्। जिगरिषतीति। 'गॄ निगरणे' इत्यस्मात्सनि इटि रूपम्। जिगलिषतीति। 'अचि विभाषा' इति लत्वविकल्प इति भावः। 'इट् सनि वे'त्यस्यायमपवादः। चिकरिषति, जिगरिषति इत्यत्र 'वृतो वा' इति दीर्घमाशङ्क्य आह—अत्रेटो दीर्घो नेष्टः इति। वार्तिकमिदं वृतौ स्थितम्। भाष्ये तु न दृश्यते। दिदरिषते दिधरिषते इति। दृङो धृङश्च सनि इटि रूपम्। 'पूर्ववत्सनः' इत्यात्मनेपदम्। कथमिति। 'उद्दिधीर्षु'रिति कथमि-

ज्झलादिः सन्किरित्स्यात्। बुभूषति। दीङ्। दातुमिच्छति दिदीषते। एज्विषयत्वाभावात् 'मीनातिमिनोति–' (सू २५०८) इत्यात्वं न। अत एव 'मिज मीमा–' (सू २६२३) इति सूत्रे माधातोः पृथङ्मीग्रहणं कृतम्। **२६१३ हलन्ताच्च १।२।१०॥** इक्समीपाद्धलः परो झलादिः सन्किरित्स्यात्। गुहू–जुघुक्षति। बिभित्सति। इक्तः किम्। यियक्षते। झल् किम्। विवर्धिषते। हल्ग्रहणं जातिपरम्। तृंहू–तितृक्षति तितृंहिषति। **२६१४ अज्झनगमां सनि ६।४।**

त्यन्वयः। किरादित्वेन इट्प्रसङ्गादिति भावः। भौवादिकयोरिति। 'धृङ् अवस्थाने' 'धृञ् धारणे' इत्यनयोर्भौवादिकयोः सनि किरादित्वाभावादिडभावे 'अज्झनगमां सनि' इति दीर्घे 'ऋत इद्धातोः' इति इत्वे, रपरत्वे, 'हलि च' इति दीर्घे, षत्वे, ढत्वे, धीर्ष इत्यरमात्, 'सनाशंसभिक्ष उः' इत्युप्रत्यये ढद्विधीर्षुरिति रूपमिति गृहाण जानीहीति शङ्कं प्रति उत्तरम्। इको झल्। इगन्तादिति। सना आचिसघातुविशेषणत्वात्तदन्तविधिरिति भावः। सन् किदिति। 'रुदविदमुषग्रहि' इत्यतः 'असंयोगाल्लिट् कित्' इत्यतश्च तदनुवृत्तेरिति भावः। बुभूषतीति। किरत्वाच्च गुणः। उकः परत्वान्नेट्। दिदीषते इति। सनः किरत्वान्न गुणः। दीङो डित्त्वात् 'पूर्ववत्सनः' इत्यात्मनेपदम्। एज्विषयत्वाभावादिति। किरत्वे गुणनिषेधादिति भावः। अत एवेति। यद्येज्विषयादन्यत्राप्यात्वं स्यात् तदा मीमेति पृथक् ग्रहणमनर्थकं स्यात्। 'गामादाग्रहणेष्वविशेषः' इत्युक्तेरिति भावः। हलन्ताच्च। 'इको झल्' इति पूर्वसूत्रमनुवर्तते। 'हृदविदमुषः' इत्यतः सनिति 'असंयोगाल्लिट्' इत्यतः किदिति च। 'हलि'ति लुप्तषष्ठीकं पदम्। अन्तशब्दः समीपवाची। तदाह—इक्समीपादित्यादि। जुघुक्षतीति। सनः किरत्वाच्च गुणः। 'सनि ग्रहगुहोश्च' इत्यूदित्त्वेऽपि नित्यं नेट। हस्य ढत्वे भष्भावे कत्वषत्वे इति भावः। बिभित्सतीति। भिदेः सनः किरत्वान्न गुणः। यियक्षते इति। अत्र हलः इक्समीपत्वाऽभावाच्च किरत्वम्। सति तु किरत्वे यजेः सम्प्रसारणं स्यादिति भावः। विवर्धिषते इति। वृधेः सनि रूपम्। अत्र सन इटि झलादित्व नेति भावः। ननु 'तृंहु हिंसायाम्' तुदादिः नोपधोऽयम्। कृतानुस्वारस्य निर्देशः। अस्मात्सनः 'अनिदिताम्' इति नलोपार्थं किरवमिष्यते। तन्नोपपद्यते। न ह्यत्र इक्समीपादनुस्वारात् सन् परो भवति, हकारेण व्यवधानात्। हकारात्तु परः सन् इक्समीपाद्धलः परो न भवति, अनुस्वारेण व्यवधानादित्यत आह—हल्ग्रहणं जातिपरमिति। हस्वजात्याक्रान्तैकाऽनेकव्यक्तिपरमित्यर्थः। तृंहिति। तृंहूधातोः प्रदर्शनमिदम्। तितृक्षतीति। ऊदित्त्वादिडभावपक्षे रूपम्। सनः किरत्वान्नलोपः लघूपधगुणाभावश्च। ढत्वकत्वषत्वानि। इट्पक्षे आह—तितृंहिषतीति। झलादित्वाऽभावेन किरत्वाऽभावान्नलोपो नेति भावः। अज्झनगमां सनि। अच्, हन्, गम् एषां द्वन्द्वः। 'नोपधायाः' इत्यतः उपधायाः इत्यनुवृत्तं हनगमोरन्वेति न त्वजन्ते, असम्भवात्। अङ्गस्येत्यधिकृतम्।

१६॥ अजन्तानां हन्तेरजादेशस्यमेश्च दीर्घः स्याज्झलादौ सनि । 'सन्लिटोर्जेः' (सू २३३१)। जिगीषति । 'विभाषा चेः' (सू २५२५)। चिकीषति-चिचीषति । जिगांसति । २६१५ सनि च २।४।४७॥ इणो गमिः स्यात् सनि, न तु बोधने । जिगमिषति । बोधने प्रतीषिषति । 'इण्वदिकः' (वा १५७७) । अधिजिगमिषति । कर्मणि तङ् । 'परस्मैपदेषु' इत्युक्तेनेट् । 'झलादौ सनि' इति दीर्घः । जिगांस्यते । अधिजिगांस्यते । अजादेशस्येत्युक्तेर्गच्छतेर्न दीर्घः । जिगंस्यते । संजिगंसते । २६१६ इङश्च २।४।४८॥ इङो गमिः स्यात्सनि । अधिजिगांसते । २६१७ रलो व्युपधाद्धलादेः संश्च १।२।२६॥ उश्च इश्च वौ ते उपधे यस्य तस्माद्धलादेः रलन्तात्परौ कित्वासनौ सेटौ वा किनौ स्तः । 'द्युति-

अवस्तद्विशेषणत्वात्तदन्तविधिः गमधातुरिह । अजादेश एव विवक्षित इति प्रकृतसूत्रभाष्ये स्पष्टम् । 'ढ्रलोपे पूर्वस्य' इत्यतो दीर्घ इत्यनुवर्तते । तदाह—अजन्तानामित्यादिना । झलादौ सनीति । 'च्छ्वोः शूठ्' इति सूत्रभाष्ये 'अज्झनगमाम्' इत्यत्र सनं झलां विशेषणिष्याम इत्युक्तेरिति भावः । अथ जिघातोरभ्यासात् परस्य कुत्वविधिं स्मारयति-सन्लिटोर्जेरिति । जिगीषतीति । जेर्दीर्घं अभ्यासात्परस्य कुत्वम् । अथ चिञ्धातोरभ्यासात्परस्य कुत्वविकल्पं स्मारयति—विभाषा चेरिति । चिकीषतिचिचीषतीति । अजन्तत्वादीर्घः । जिघांसतीति । इनेः सनि 'अज्झन' इत्यकारस्य दीर्घः, न त्वभ्यस्य नकारस्य । दीर्घश्रुत्या 'अत्र' इत्युपस्थितेः । द्वित्वम् 'अभ्यासाच्च' इति कुत्वम् । 'नश्च' इत्यनुस्वारः । सनि च । 'इणो गा लुङि' इत्यतः इण इति 'णौ गमिरबोधने' इत्यतः गमिरबोधने इति चानुवर्तते । तदाह—इणो गमिरित्यादि । जिगमिषतीति । 'गमेरिट्' इत्यतः इडिति । अत्र 'अज्झनगमाम्' इति दीर्घो न 'झलादौ सनीत्युक्तेः । प्रतीषिषतीति । बोधयितुमिच्छतीत्यर्थः । अत्र बोधनार्थत्वाद्गिणो न गमिः । इ स इति स्थिते 'अजादेर्द्वितीयस्य' इति सनो द्वित्वे अभ्यासेत्वम् । प्रतिषा सषणं दीर्घं सकारद्वयस्यापि षत्वमिति भावः । 'इक् स्मरणे' इत्यस्याह—इण्वदिक इति । अनेन वार्तिकेन इक्धातुरिण्वद्भवतीत्यर्थः । ततश्च 'सनि च' इति गमिरादेश इति भावः । कर्मणि तङिति । इण्धातोरिरधातोश्च सन्नन्तात्कर्मणि लटस्तङित्यर्थः । 'भावकर्मणोः' इत्यनेनेति भावः । परस्मैपदेष्विति । 'गमेरिट् परस्मैपदेषु' इत्युक्तेस्तङि नेडित्यर्थः । झलादाविति । 'अज्झन' इति झलादौ सनि विहिता दीर्घ इत्यर्थः । जिगांस्यते इति । गन्तुमिच्छते इत्यर्थः । इगो रूपम् । अधिजिगांस्यते इति । स्मर्तुमिच्छत इत्यर्थः । इको रूपम् । जिगंस्यते इति । गम्ल्वादितोः सन्नन्तात्कर्मणि तङि रूपम् । गमेरजादेशत्वाऽभावाच्च दीर्घः । इङश्च । गमिः स्यात् सनीति । 'णौ गमिः' इत्यतः 'सनि च' इत्यतश्च तदनुवृत्तेरिति भावः । इङो ङित्त्वात् 'पूर्ववत्सनः' इति तङ् । परस्मैपदेष्वित्युक्तेर्नेट् । 'अज्झन' इति दीर्घ इति भावः । रलो । कित्सनाविति । चकारेण 'पूङः क्त्वा च'

स्वाप्योः सम्प्रसारणम्' (सू २३४४)। दिद्युतिषते-दिद्योतिषते। रुरुचिषते-रुरोचिषते। लिलिखिषति-लिलेखिषति। रलः किम्। दिदेविषति। व्युपधात् किम्। विवर्तिषते। हलादेः किम्। एषिषिषति। इह नित्यमपि द्वित्वं गुणेन बाध्यते। उपधाकार्यं हि द्वित्वात्प्रबलम्, ओगोर्ऋदित्करणस्य सामान्यापेक्षज्ञापकत्वात्। **२६१८ सनीवन्तर्धभ्रस्जदम्भुश्रिस्वृयूर्णुभरज्ञपिसनाम् ७।२।४९॥** इवन्तेभ्यः ऋधादिभ्यश्च सन इड्वा स्यात्। इडभावे 'हलन्ताच्च' (सू २६१३) इति कित्त्वम्। 'छ्वोः-' (सू २५६१) इति वस्य ऊठ्। यण्। द्वित्वम्। दुयूषति।

इत्यतः क्त्वाया अनुकर्षादिति भावः। सेटाविति। 'न क्त्वा सेट्' इत्यतस्तदनुवृत्तेरिति भावः। वा कितावित। 'नोपधात्थफान्ताद्वा' इत्यतः 'असंयोगाल्लिट् कित्' इत्यतश्च तदनुवृत्तेरिति भावः। दिद्युतिषते इति। 'द्युत दीप्तौ' अनुदात्तत्। सनि द्वित्वे किरवात् 'अतिस्वाप्योः' इत्यभ्यासस्य सम्प्रसारणे पूर्वरूपे सनः किरवान्न लघूपधगुण इति भावः। सनः किरवाऽभावे आह—दिद्योतिषते इति। 'पूर्ववत्सनः' इत्यात्मनेपदम्। एषिषिषतीति। इष्धातोः सन्। इट्। हलादित्वाऽभावेन किरवाभावाद्गुणे एष् इस इति इति स्थिते 'अजादेर्द्वितीयस्य' इति षिस् इत्यस्य द्वित्वे हलादिशेषे सनः षत्वे रूपम्। नन्विह सत्यपि कित्त्वे नित्यत्वात् परमपि गुणं बाधित्वा षिस् इत्यस्य द्वित्वे धात्ववयवस्य इकारस्य उपधात्वाऽभावादेव गुणाऽप्रसक्तेर्हलादेरिति व्यर्थमित्यत आह—इह नित्यमपि द्वित्वं गुणेन बाध्यते इति। कुत इत्यत आह—उपधाकार्यं हि द्वित्वात्प्रबलमिति। तच्च कुत इत्यत आह—ओगोरिति। ओगोः ऋदित्करणस्य ज्ञापकत्वादित्यन्वयः। तथाहि—ओण्धातोः ण्यन्तात्लुङि चङि 'ण्नौ चङ्युपधायाः' इति ह्रस्वस्य 'नाग्लोपिशास्वृदिताम्' इति निषेधे सति ओणि अ त् इति स्थिते णि इत्यस्य द्वित्वे मा भवानोणिणदिति रूपम्। अत्र उपधाह्रस्वनिषेधार्थमोगोः ऋदित्करणम्। उपधाह्रस्वे कृते तु उण् ह् अ त् इति स्थिते णि इत्यस्य द्वित्वे मा भवानुणिणदिति स्यात्। ओकारो न श्रूयेत इति स्थितिः। यदि तु नित्यत्वात् उपधाह्रस्वात् प्रागेव ओण् ह् अ त् इत्यस्यां दशायां द्वित्वं स्यात्। तदा ओकारस्य उपधात्वाऽभावादेव ह्रस्वाऽप्रसक्तेस्तन्निषेधार्थमृदित्करणमनर्थकं स्यात्। तस्मादुपधाह्रस्वात्मकं उपधाकार्यं द्वित्वात् प्रबलमिति विज्ञायते इत्यर्थः। ननु भवतु उपधाह्रस्वो द्वित्वात् प्रबलः। प्रकृते तु उपधागुणः कथं द्वित्वात् प्रबलः स्यादित्यत आह—सामान्यापेक्षेति। उपधाह्रस्वस्य उपधाकार्यत्वेन रूपेण द्वित्वात् प्राबल्यविज्ञानादित्यर्थः। वस्तुतस्तु 'णौ चङ्युपधायाः' इति सूत्रे 'यदयमाणिमूदितं करोति तत् ज्ञापयति' द्विर्वचनाद्ध्रस्वत्वं बलीय' इति भाष्ये विशिष्य ऊपधाह्रस्वग्रहणात् सामान्यापेक्षत्वं ज्ञापकस्य चिन्त्यमिति शब्देन्दुशेखरे प्रपञ्चितम्। सनीवन्तर्ध। सनि इवन्तेति च्छेदः। इवन्त, ऋध, भ्रस्ज, दम्भु, श्रि, स्वृ, यु, ऊर्णु, भर, ज्ञपि, सन्, एषां द्वन्द्वः। इव् भन्ते येषां ते

दिदेविषति । 'स्तौतिण्योरेव-' (सू २६२७) इति वक्ष्यमाणनियमान्न षः । सुस्यूषति । सिसेविषति । **२६१९ आप्ज्ञप्यृधामीत् ७।४।५५॥** एषामच इत्स्यात्सादौ सनि । **२६२० अत्र लोपोऽभ्यासस्य ७।४।५८॥** 'सनि मीमा-' (सू २६२३) इत्यारभ्य यदुक्तं तत्राभ्यासस्य लोपः स्यात् । आप्तुमिच्छति ईप्सति । रपरत्वम् । चर्त्वम् । ईर्त्सति । अर्दिधिषति । विभ्रज्जिषति-विभ्रक्षति बिभर्जिषति-बिभर्क्षति । **२६२१ दम्भ इच्च ७।४।५६॥** दम्भेरच इत्स्यादीच्च सादौ सनि ।

इवन्ताः । 'स्वरति' इत्यतः वेति 'ह्णिनष्ठायाम्' इत्यतः इडिति चानुवर्तते । तदाह-इवन्तेभ्यः इत्यादि । इवन्तस्य दिवुधातोरुदाहरिष्यन्नाह—दडभावे इति । वस्येति । वकारस्येत्यर्थः । यणिति । 'दकारादिकारस्य' इति शेषः । द्वित्वमिति । 'यू इत्यस्ये'ति शेषः । दुद्यूषतीति । 'अज्झन' इति दीर्घः । इटूपक्षे आह—दिदेविषतीति । अझलादित्वान्न सनः कित्त्वम् , अतो नोट् , किन्तु लघूपधगुण इति भावः । इवन्तस्योदाहरणान्तरं सिवुधातोः सुस्यूषतीति वक्ष्यते । तत्र द्वितीयस्य चत्वमाशङ्क्य आह—स्तौतिण्योरिति । सुस्यूषतीति । सिवुधातोः सनि इडभावे दुद्यूषतीतिवद्रूपम् । इटपक्षे आह—सिसेविषतीति । ऋधूधातोः सनि ईर्त्सतीति रूपं वक्ष्यन्नाह—आप्ज्ञप्यृधामीत् । सादौ सनीति । 'सनि मीमाघुरभ' इत्यतः सनीति अच इति चानुवर्तते । 'सः स्यार्द्धातुके' इत्यतः सीत्यनुवृत्तं सनो विशेषणम् । तदादिविधिरिति भावः । अत्र लोपोऽभ्यासस्य । 'सनि मीमा' इति 'आप्ज्ञप्यृधामीत्' इति 'दम्भ इच्च' इति 'सुधोऽकर्मकस्य गुणो वा' इति पूर्वसूत्रचतुष्टयविहितकार्यमत्रेत्यनेन परामृश्यते । तदाह—सनि मीमेत्यारभ्येति । सूत्रचतुष्टयकार्ये कृते सतीत्यर्थः । ईप्सतीति । आप्धातोः सनि आकारस्य इत्वे 'अजादेर्द्वितीयस्य' इति पस इत्यस्य द्वित्वे अभ्यासलोप इति भावः । रपरत्वमिति । ऋधेः सनि इडभावे ऋकारस्य ईत्वे रपरत्वमित्यर्थः । चर्त्वमिति । ईर्ध् स इति स्थिते धस्य चर्त्वं 'न द्राभ्यः' इति रेफं वर्जयित्वा 'अजादेर्द्वितीयस्य' इति 'स' इत्यस्य द्वित्वे अभ्यासस्य लोप इति भावः । 'पूर्वत्रासिद्धीयमद्विर्वे' इति वचनात् चर्त्वं कृते द्वित्वमिति बोध्यम् । इटूपक्षे आह—अदिधिषतीति । सनः सादित्वाऽभावादीत्वाऽभावे गुणे रपरत्वे अर् ध् इ स इति स्थिते धिस् इत्यस्य द्वित्वमिति भावः । भ्रस्जधातोः सनः इटि 'भ्रस्जो रोपधयो' इति रमागमाऽभावे आह—विभ्रज्जिषतीति । सस्य श्चुत्वेन शः, शस्य जश्त्वेन जः । ङिद्वद्भावात् 'ग्रहिज्या' इति सम्प्रसारणं न । विभर्जिषतीति । इटि रमागमपक्षे भ्रस्ज् इस इति स्थिते अकारादुपरि सकारात्प्राक् रेफागमे भकाराद्रेफस्य सकारस्य च निवृत्तौ भर्ज् इस इति स्थिते भर्ज् इत्यस्य द्वित्वे हलादिशेषे अभ्यासस्य इत्वे जश्त्वे सनः षत्वे च रूपम् । तदेवमिट्पक्षे रमागमतद्भावाभ्यां रूपद्वयम् । विभ्रक्षतीति । इडभावे रमागमाऽभावे च रूपम् । जश्त्व क्ष्त्व सस्य षः । विभर्क्षतीति । इडभावे रमागमे च रूपम् । तदेवमिडभावपक्षे रमागम-

अभ्यासलोपः। 'हलन्ताच्च' (सू २६१३) इत्यत्र हल्ग्रहणं जातिपरमित्युक्तम्। तेन सनः कित्त्वान्नलोपः। धिप्सति-धीप्सति-दिदम्भिषति। शिश्रीषति-शिश्रयिषति। 'उदोष्ठ्यपूर्वस्य' (सू २४९४)। सुस्वूर्षति। सिस्वरिषति। युयूषति। यियविषति। ऊर्णुनूषति। ऊर्णुनुविषति। ऊर्णुनविषति। नच परत्वाद्गुणावादेशयोः सतोरभ्यासे उकारो न श्रूयेतेति वाच्यम्। 'द्विर्वचनेऽचि' (सू २२४३)

तदभावाभ्यां द्वे रूपे। दम्भ इच्च। 'सनि मीमा' इत्यतः सनीति अच इति चानुवर्तते। चकारात् 'आप्ज्ञप्यृधाम्' इति सूत्रादीदिति समुच्चीयते। 'सः सि' इत्यतः सीत्यनुवृत्तं सनो विशेषणम्, तदादिविधिः। तदाह-दम्भेरच इत्यादि। अभ्यासलोप इति। 'अज्झनगमाम्' इत्यनेनेति शेषः। दिम्भ् स इति स्थिते इक्समीपादनुस्वारादव्यवहितपरत्वाभावेऽपि हलन्तादित्यस्य प्रवृत्तिमुपपादयति-हलन्ताच्चेत्यत्रेति। हल्ग्रहणं हक्त्वजात्याक्रान्तैकाऽनेकव्यक्तिपरमिति प्रागुक्तमित्यर्थः। ततः किमित्यत आह—नेनेति। धिप्सतीति। 'सनीवन्त' इति इडभावे इत्त्वे रूपम्। धीप्सतीति। इडभावे ईत्वे च रूपम्। दिदम्भिषतीति। इट्पक्षे सनो झलादित्वाऽभावादकित्त्वान्नलोपो नेति भावः। शिश्रीषतीति। 'सनीवन्त' इति इडभावे अज्झनेति दीर्घः। सनः कित्त्वान्न गुणः। इट्पक्षे आह—शिश्रयिषतीति। अझलादित्वान्न किरवं, नाप्यज्झनेति दीर्घः। स्वृधातोः सनि ऋकारस्य उत्त्वविधिं स्मारयति—उदोष्ठ्येति। सुस्वूर्षतीति। 'सनीवन्ते'ति इडभावे ऋकारस्य 'अज्झन' इति दीर्घ कृते उत्त्वे रपरत्वे 'उपधायां च' इति दीर्घ इति भावः। सिस्वरिषतीति। 'स्वृ' इत्यस्य द्विर्भावे उदरश्वे इत्त्वमिति भावः। युयूषतीति। 'सनीवन्त' इति इडभावे 'अज्झन' इति दीर्घः। यियविषतीति। इट्पक्षे 'द्विर्वचनेऽचि' इति गुणनिषेधात् 'यु' इत्यस्य द्वित्वं 'ओः पुयण्ज्य' इतीत्वमिति भावः। ऊर्णुनूषतीति। 'सनीवन्त' इति इडभावपक्षे 'न म्रेाः' इति रेफं वर्जयित्वा नुस इत्यस्य द्वित्वे 'अज्झनेति' दीर्घः। 'इको झल्' इति सनः कित्त्वान्न गुणः। इटपक्षे तु 'विभाषोर्णोः' इति सनः कित्त्वविकल्पं मत्वा आह—ऊर्णुनुविषतीति-ऊर्णुनविषतीति। कित्त्वपक्षे गुणाऽभावान्नुशब्दस्य द्वित्वे उत्तरखण्डे उवङ्। कित्त्वाभावपक्षे 'नु' इत्यस्य द्वित्वे उत्तरखण्डस्य गुणावादेशाविति भावः। उभयत्राप्यभ्यासे उवर्णः श्रूयते। ननु कित्त्वाभावपक्षे ऊर्णु इस इति स्थिते द्वित्वात् प्रागेव परत्वात् गुणे अवादेशे च कृते नवूसशब्दस्य द्वित्वे अभ्यासस्याऽत इत्त्वे ऊर्णिनविषतीति अभ्यासे इकार एव श्रूयेत, ननु उकार इत्याशङ्क्य निराकरोति—द्विर्वचनेऽचीति। अस्मिन् सूत्रे 'स्थानिवदि'त्यनुवर्त्यं रूपातिदेशं चाश्रित्य द्वित्वनिमित्ते अचि परे यः अजादेशः स द्वित्वे कर्तव्ये स्थानिरूपं प्रातिपद्यते इत्येकोऽर्थः। 'न पदान्त' इत्यतो नेत्यनुवर्त्यं द्वित्वनिमित्ते अचि यः अजादेशः स न स्यात् द्वित्वे कर्तव्ये इत्यन्योऽर्थः। तत्र प्रथमव्याख्याने तु कृतस्यापि गुणस्य स्थानिभूतोकाररूपप्रतिपत्त्या 'नु' इत्यस्य द्वित्वे अभ्यासे उकार एव श्रूयते। द्वि-

इति सूत्रेण द्वित्वे कर्तव्ये स्थानिरूपातिदेशादादेशनिषेधाद्वा । न च सन्नन्तस्य द्वित्वं प्रति कार्यित्वान्निमित्तता कथमिति वाच्यम् । "कार्यमनुभवन्हि कार्यी निमित्ततया नाश्रीयते, न त्वननुभवन्नपि" (प १११) । न चेह सन् द्वित्वमनुभवति-बुभूर्षति-बिभरिषति । ज्ञपिः पुगन्तो मित्सञ्ज्ञकः पकारान्तश्चौरादिकश्च । इडभावे 'इको झल्' (सू २६१२) इति कित्त्वान्न गुणः । 'अज्झन-' (सू २६१४) इति दीर्घः परत्वाण्णिलोपेन बाध्यते । 'आज्ञप्-' (सू २६१९) इति ईत् । ज्ञीप्सति । जिज्ञपयिषति । अमितस्तु जिज्ञापयिषति । 'जनसन-' (सू २५०४) इत्यात्त्वम् । सिषासति-सिसनिषति । 'तनिपतिदरिद्रातिभ्यः सनो वा इड्वाच्यः' (वा ५०५९) । २६२२ तनोतेर्विभाषा ६।४।१७॥ अस्योपधाया दीर्घो वा

तीयव्याख्यानेऽपि द्वित्वात् प्राक् गुणस्य निषिद्धतया नुशब्दस्यैव द्वित्वे अभ्यासे डकार एव श्रूयते इति भावः । ननु ऊर्णु इस इति सन्नन्तस्य द्वित्वरूपकार्यभाक्त्वे तदन्तर्गतस्य इस इत्यस्यापि कार्यित्वान्न द्वित्वनिमित्तत्वम्, 'नहि कार्यी निमित्ततया आश्रीयते' इत्युक्तेः । तथा च द्वित्वे कर्तव्ये द्वित्वनिमित्ताऽपरादेशस्य क्रियमाणोनिषेधः कथमिह गुणस्य प्रसज्यते इत्याशङ्क्य निराकरोति—न च सन्नन्तस्येति । कार्यमनुभवन्निति । अत्र व्याख्यानमेव शरणम् । न चेह सन्निति । किन्तु नुशब्द इत्यर्थः । बुभूर्षतीति । 'सनीवन्ते'ति इडभावपक्षे भू स इति स्थिते 'अज्झन' इति दीर्घे 'उदोष्ठ्यपूर्वस्य' इत्युत्त्वे रपरत्वे उत्तरखण्डस्य 'हलि च' इति दीर्घः। सनः कित्त्वान्न गुण इति भावः। इट् पक्षे आह—बिभरिषतीति। भृ इस इति स्थिते द्वित्वे उदरत्वे रपरत्वे हलादिशेषे अभ्यासस्य अत इत्त्वे उत्तरखण्डस्य गुणे रपरत्वमिति भावः । ज्ञपिः पुगन्तो मित्सञ्ज्ञक इति । 'सनीवन्त' इति सूत्रे गृह्यत इति शेषः।'मारणतोषणनिशामनेषु ज्ञा'इति घटादौ । ततो हेतुमण्णौ पुकि घटादित्वेन मित्त्वात् उपधाहस्वे'ज्ञपीति ण्यन्तो गृह्यत इत्यर्थः । पकारान्तश्चौरादिकश्चेति । 'ज्ञप मिच्च' इति चः स्वतः पकारान्तः पठितः चुरादौ, न तु पुगन्तः सोऽपि 'सनीवन्त' इति सूत्रे गृह्यते इत्यर्थः । इडभावे इति । उभयविधादपि ण्यन्तात् ज्ञपि इत्यस्मात् सनि इडभावपक्षे णेः परस्य सनः 'इको झल्' इति कित्त्वाण्णेर्गुणो नेत्यर्थः । परत्वादिति । णेर्लोपे सति अचोऽभावान्न दीर्घ इति भावः । तथाच 'ज्ञीप्' इत्यस्य द्वित्वे हलादिशेषे 'अभ्यासे चर्च' इत्यभ्यासचर्त्वे परिनिष्ठितमाह—ज्ञीप्सतीति । इट्पक्षे आह—जिज्ञपयिषतीति । अमितस्त्विति । मारणादिभ्यस्तिरश्चिकार्थकस्य घाटादिकस्य हेतुमण्ण्यन्तस्य 'ज्ञा नियोगे' इति चौरादिकण्यन्तस्य च मित्त्वाऽभावेन उपधाहस्वाऽभावात् 'सनीवन्त'इत्यत्र ज्ञपिग्रहणेनाऽग्रहणान्नित्यमेव इडिति भावः । तदाह—जिज्ञापयिषतीति । सनभ्यासोः सनि आह—जनसनेत्यात्त्वमिति । 'नकारस्येति' शेषः । सिषासतीति । आत्त्वे कृते सा इत्यस्य द्वित्वे अभ्यासस्य इत्त्वे अत इत्त्वे षत्वे रूपम्। नच 'स्तौतिण्योरेव'इति नियमान्न च इति शङ्क्यम्, सनः षत्वे

स्याज्झलादौ सनि । तितांसति । तितंसति । तितनिषति । 'आशङ्कायां सन्वक्तव्यः' (वा १७०७) श्वा मुमूर्षति । कूलं पिपतिषति । **६।१।२३ सनि मीमाघुरभलभशकपतपदामच इस् ७।४।५४॥** एषामच इस् स्यात्सादौ सनि । अभ्यासलोपः । 'स्कोः–' (सू ३८०) इति सलोपः । पिप्तिसति । दिदरिद्रिषति । दिदरिद्रासति । डु मिञ् , मीञ् आभ्यां सन् । कृतदीर्घस्य मिनोतेरपि मीरूपाविशेषादिस् । 'सः सि–' (सू २३४२) इति तः । मित्सति । मित्सते । मा माने–मित्सति । माङ्मेङोः–मित्सते । दोदाणोः–दित्सति । देङ्–दित्सते । दाञ्–दित्सति । दित्सते । धेट्–धित्सति । धाञ्–धित्सति । धित्सते । रिप्सते । लिप्सते ।

सत्येव तत्प्रवृत्तेः । इट्पक्षे त्वाह–सिसनिषतीति । अत्र 'जनसन' इत्यात्वं तु न, सनो झलादित्वाऽभावात् । 'स्तौतिण्योरेव' इति नियमान्न षत्वमिति भावः । तनिपतीति । प्राप्तविभाषेयम् । तनोतेर्विभाषा । उपधाया दीर्घ इति । 'नोपधायाः' इत्यतः 'ढ्रलोपे' इत्यतश्च तदनुवृत्तेरिति भावः । झलादौ सनीति । 'अज्झन' इत्यतस्तदनुवर्तते । तत्र झलादाविति भाष्ये स्थितमिति भावः । आशङ्कायामिति । आशङ्काविषयक्रियावृत्तेर्धातोः स्वार्थे सन्निर्देशः । श्वा मुमूर्षतीति । शङ्कितमरणो भवतीत्यर्थः । कूलं पिपतिषतीति । शङ्कितपतनं भवतीत्यर्थः । 'तनिपति' इति इट्पक्षे रूपम् । पतेः सनि इडभावपक्षे त्वाह—सनि मीमा । सादौ सनीति । 'सः सि' इत्यतः सोऽनुवृत्तेरिति भावः । अभ्यासलोप इति । 'अत्र लोपः' इत्यनेनेति भावः । पिप्त् स ति इति स्थिते आह—स्कोरिति । दरिद्रातेः सनि 'तनिपति' इति इड् विकल्पमुदाहरति—दिदरिद्रिषति । दिदरिद्रासतीति । डुमिञिति । 'डु मिञ् प्रक्षेपणे' स्वादिः, 'मीञ् हिंसायाम्' क्र्यादिः, आभ्यां सन्निर्देशः । 'सनि मीमा' इत्यत्र मीग्रहणेन एतयोरुभयोर्ग्रहणमिति भावः । ननु मी इति दीर्घश्रवणात् डु मिञ् इत्यस्य ह्रस्वान्तस्य कथं ग्रहणमित्यत आह—कृतदीर्घस्येति । डु मिञ्धातोः सनि 'अज्झन' इति कृतदीर्घस्य तथा 'मीञ् हिंसायाम्' इति स्वतः सिद्धदीर्घस्य च मारूपाविशेषादुभयोरपि ग्रहणमित्यर्थः । सः सीति । उभयोरपि धात्वोः मी स इति स्थिते 'सनि मीमा' इति इसादेशे द्वित्वे 'अत्र लोपः' इत्यभ्यासलोपे 'सः सि' इति सस्य तकार इत्यर्थः । मित्सति मित्सते इति । प्रकृतेर्नित्त्वात् 'ह्रस्वस्य' इति उभयपदित्वम् । माङ्मेङोरिति । मेङः सनि 'आदेचः' इत्यात्वे कृते मारूपत्वाऽविशेषात् 'सनि मीमा' इत्यत्र उभयोरपि ग्रहणमिति भावः । दोदाणोरिति । 'दो अवखण्डने' इति धातोः सनि आत्वे कृते दारूपाऽविशेषात् घुत्वादुभयोर्ग्रहणमिति भावः । दित्सतीति । 'हलन्ताच्च' इति कित्त्वान्नोपधागुणः । देङिति । तस्यापि कृतात्वस्य दारूपत्वेन घुत्वादिति भावः । दाञ्सति । 'डु दाञ् दाने' इति धातुरपि घुत्वात् गृह्यते इति भावः । धेडिति । अस्यापि कृतात्वस्य घुत्वात् 'सनि मीमा' इत्यत्र ग्रहणमिति भावः । रिप्सते इति । रभधातोः रूपम् । लिप्सते इति । लभधातोः रूपम् ।

शक्लृ-शिक्षति । शक मर्षणे इति दिवादिः स्वरितेत् । शिक्षति-शिक्षते । पित्सति । 'राधो हिंसायां सनीस् वाच्यः' (वा ४६३५) । रित्सति । हिंसायाम् किम् । आरिरात्सति । **२६२४ मुचोऽकर्मकस्य गुणो वा ७।४।५७॥** सादौ सनि । अभ्यासलोपः । मोक्षते । मुमुक्षते वा वत्सः स्वयमेव । अकर्मकस्य किम् । मुमुक्षति वत्सं कृष्णः । 'न वृद्भ्यश्चतुर्भ्यः' (सू २३४८) । विवृत्सति । तङि तु विवर्तिषते । 'सेऽसिचि-' (सू २५०६) इति वेट् । निनर्तिषति । निनृत्सति । **२६२५ इट् सनि वा ७।२।४१॥** वृङ्वृञ्भ्यामृदन्ताच्च सन इड्वा स्यात् । तितरिषति । तितरीषति । तितीर्षति । विवरिषति । विवरीषति । वुवूर्षति । वृङ् । वुवूर्षते । विवरिषते । दुध्वूर्षति । **२६२६ स्मिपूङ्रञ्ज्वशां सनि ७।२।७४॥** स्मिङ्, पूङ्, ऋ, अञ्जू, अश, एभ्यः सन इट् स्यात् । सिस्मयिषते । पिपविषते । अरिरिषति । इह रिशब्दस्य द्वित्वम् । इस् इति सनोऽवयवः

पित्सतीति । **पल्लृधातोः रूपम् । पदधातोः पित्सते इति रूपम् ।** सनि इस् वाच्य इति । **अकारस्येति शेषः ।** रित्सतीति । **सनि इसादेशः । 'अत्र लोपः' इत्यभ्यासलोपः ।** मुचोऽकर्मकस्य । सादौ सनीति । **शेषपूरणमिदम् । 'सः-सि' इत्यतः सीति 'सनि मीमा' इत्यतः सनीति चानुवृत्तेरिति भावः । 'हलन्ताच्च' इति किरश्वादृगुणनिषेधे प्राप्ते वचनम् ।** अभ्यासलोप इति । **'अत्र लोपः' इत्यनेनेति शेषः ।** मोक्षते इति । **'अत्र लोपः' इत्यभ्यासलोपः ।** तङित्विति । **'न वृद्भ्यः' इत्यत्र परस्मैपदग्रहणानुवृत्तेरुक्तत्वादिति भावः ।** निनृत्सतीति । **इडभावपक्षे 'हलन्ताच्च' इति किरत्वाच्च गुणः । इट् सनि वा । 'वृतो वा' इत्यतो 'वृत' इत्यनुवर्तत इति मत्वा आह—वृङ्वृञ्भ्यामित्यादि । 'सनि ग्रहगुहोश्च' इत्यस्यापवादः । चिकीर्षतीत्यादौ 'अज्झन' इति दीर्घे कृते सनि नेदं प्रवर्तते, 'एकाच उपदेश' इत्यत उपदेश इत्यनुवर्त्य उपदेशे ऋकारान्तादिति व्याख्यानात् ।** तितरिषति-तितरीषतीति । **तॄधातोः सनि क्ङिति 'वृतो वा' इति दीर्घः । इडभावे त्वाह—**तितीर्षतीति **'हलो झल्' इति किरश्वादृगुणाभावे तॄ इत्यस्य ऋकारस्य इरे रपरत्वे 'हलि च' इति दीर्घ इति भावः ।** विवरिषतीति । **वृङ्धातोः सनि इटि 'वृतो वा' इति दीर्घविकल्पः । इडभावे त्वाह—**वुवूर्षतीति । **'उदोष्ठ्य' इत्युरे रपरत्वे 'हलि च' इति दीर्घः ।** वुवूर्षते इति । **किरश्वादात्मनेपदम् ।** दुध्वूर्षतीति । **'ष्ठु कौटिल्ये' 'अज्झन' इति दीर्घः । 'उदोष्ठ्य' इत्युरे, 'हलि च' इति दीर्घ इति भावः ।** स्मिपूङ् । **स्मि, पूङ्, ऋ, अञ्जू, अश एषां द्वन्द्वः । ऋकारस्य यणि रेफे रञ्जिवति निर्देशः ।** इट् स्यादिति । **'इडत्यर्ति' इत्यतस्तदनुवृत्तेरिति भावः । पूजस्तु पुपूषतीत्येव । 'सनि ग्रह' इति इण्निषेधात् ।** सिस्मयिषते इति । **'स्तौतिण्योरेव' इति नियमान्न षः ।** पिपविषते इति । **पूङ्धातोः पू इत्यस्य द्वित्वे 'ओः पुयण्ज्य' इति इत्वम् ।** अरिरिषतीति ।

कार्यभागिति कार्यिणो निमित्तत्वायोगात्। 'द्विर्वचनेऽचि' (सू २२४३) इति न प्रवर्तते। अजिजिषति। अशिशिषते। 'उभौ साभ्यासस्य' (सू २६०६)। प्राणिणिषति। उच्छेस्तुक्। श्चुत्वम्। 'पूर्वत्रासिद्धीयमद्वित्वे' इति चछाभ्यां सहितस्येटो द्वित्वम्। 'हलादिः शेषः' (सू २१७९) उचिच्छिषति। 'निमितापाये नैमित्तिकस्याप्यपायः' इति त्वनित्यम्। 'च्छ्वोः' (सू २५६१) इति सतुक्कग्रहणाज्ज्ञापकात्। प्रकृतिप्रत्यापत्तिवचनाद्वा। 'णौ च संश्चङोः' (सू २५७६) (सू

ऋधातोः सनि इटि रूपम्। रिरित्सः इत्येति। गुणे रपरत्वे 'अज्ञादेर्द्वितीयस्य' इति रिस् इत्यस्य द्वित्वमित्यर्थः। ननु 'द्विर्वचनेऽचि' इति निषेधाद्गुणाऽसम्भवात् रिस् इत्यस्य कथं द्वित्वमित्यत आह—द्विर्वचनेऽचि इति न प्रवर्तते इति। कुत इत्यत आह—कार्यिणो निमित्तत्वाऽयोगादिति। 'नहि कार्यो निमित्ततया आश्रीयते' इति निषेधादिडादेः सनो द्वित्वरूपकार्यिणो न द्वित्वनिमित्तत्वमिति भावः। ननु इडागमः सम्भवति। ततश्च इस् इत्यस्य द्वित्वेऽपि समुदायस्य इस इत्यस्य द्वित्वकार्यित्वाऽभावात् द्वित्वनिमित्तत्वमित्यत आह—इस् इतीति। इस् इति सनोऽवयवो द्वित्वभागिति कृत्वा अवयवद्वारा इस इति समुदायस्य कार्यित्वमिति भावः। अजिजिषतीति। अज्जेः सनि इटि 'न म्लः' इति नकारस्य निषेधात् जिस् इत्यस्य द्वित्वम्। ऊदित्वादिड्विकल्पे प्राप्ते नित्यमिट्। अशिशिषते इति। 'अशू व्याप्तौ' ऊदित्वादिड्विकल्पे प्राप्ते नित्यमिट्। 'अश भोजने' इति क्रयादिस्तु नित्यं सेडेव। उच्छेरिति। 'उञ्छी विवासे'। अत्र 'छे च' इति तुगित्यर्थः। श्चुत्वमिति। तुक् इति शेषः। ननु उच्छ् इस इति स्थिते श्चुत्वस्याऽसिद्धत्वात्तकारसहितस्य द्वित्वे अभ्यासे तकारः श्रूयेत इत्यत आह—पूर्वत्रेत्यादि। हलादिः शेष इति। चिछस् इत्यस्य द्वित्वे हलादिशेषादभ्यासे छकारसकारयोर्निवृत्तौ तुक्शकारः इकारश्च शिष्यते इत्यर्थः। तदाह—उचिच्छिषतीति। उच्चरखण्डे छकारे परे इकारस्य तुक्श्चुत्वेन चकारः। ननु चिछस् इत्यस्य द्वित्वे हलादिशेषात्पूर्वखण्डे छकारसकारयोर्निवृत्तौ 'निमित्ताऽपाये नैमित्तिकस्याप्यपायः' इति न्यायेन तुकोऽपि निवृत्तेस्तदादेशचकारस्य कथमभ्यासे श्रवणमित्यत आह—निमित्तापाये इति। कथमनित्यत्वमित्यत आह—च्छ्वोरिति। पृष्टः, पृष्टवानित्यादौ प्रच्छेः छकारस्य 'च्छ्वोः' इति शकारे प्रश्नादिना शस्य षत्वे तुक्चकारस्य श्रवणप्राप्तौ तन्निवृत्त्यर्थं सतुक्कग्रहणम्। तत्र चकारस्य शकारे सति निमित्ताभावादेव तुकोऽपि निवृत्तिसिद्धेः सतुक्कग्रहणं व्यर्थमापद्यमानम् 'निमित्तापाये' इत्यस्याऽनित्यतां ज्ञापयतीत्यर्थः। प्रकृतिप्रत्यापत्तिवचनादेति। 'हनश्च वधः' इति हनधातोरप्प्रत्यये प्रकृतेर्वधादेशे वधशब्दः। कंसवधमाचष्टे कंसं घातयतीत्यादौ 'आख्यानात्कृतस्तदाचष्टे कृञ्लुक्प्रकृतिप्रत्यापत्तिः' इति अप्प्रत्ययस्य लुकि प्रकृतेर्वधादेशनिवृत्तिसिद्धेः प्रकृतिप्रत्यापत्तिवचनं व्यर्थमापद्य-

२६०१) इति सूत्राभ्यामिङो गाङ्, श्वयतेः सम्प्रसारणं च वा। अधिजिगापयिषति—अध्यापिपयिषति। शिश्वाययिषति—शुशावयिषति। 'ह्वः सम्प्रसारणम्' (सू २५८६)। जुहावयिषति। 'णौ द्वित्वात्प्रागच आदेशो न' इत्युक्तत्वादुकारस्य द्वित्वम्। पुस्फारयिषति। चुक्षावयिषति। 'ओः पुयण्ज्यपरे' (सू २५७७)। पिपावयिषति। विभावयिषति। यियावयिषति। रिरावयिषति। लिलावयिषति।

मानं 'निमित्तापाये' इत्यस्य अनित्यतां ज्ञापयतीत्यर्थः। यद्यप्यत्र वचसन्दे अप्प्रत्ययः वचादेशश्च युगपद्विहितः, नतु प्रत्यये परे। तथापि सन्नियोगशिष्टत्वात् प्रत्ययस्य निमित्तत्वं पर्यवसानगत्येति बोध्यम्। वस्तुतस्तु पुष्ययोर्गं जानाति पुष्येण योजयतीत्येतत्साधके 'पुष्ययोगे ज्ञि' इति वचने भाष्योक्तप्रकृतिप्रत्यापत्तिरित्यनुवृत्तिरिह ज्ञापिका। तत्र हि 'हजोः' इति धिति परतः कुत्वम्। अन्यथा कुत्वकुकि निमित्ताऽपायपरिभाषयैव कुत्वनिवृत्तौ कि प्रकृतिप्रत्यापत्त्यनुवृत्त्येति शब्देन्दुशेखरे विस्तरः। अथ 'इङ् अध्ययने' 'टु ओ श्वि गतिवृद्धयोः' इत्याभ्यां ण्यन्ताभ्यां सनि विशेषमाह—णौ चेति। 'णौ च संश्चङोः' इति सूत्रं द्वितीयस्य चतुर्थं पादे षष्ठस्य प्रथमे पादे च स्थितम्। 'सम्परे चङ्परे'च णौ इङो गाङ्चेति प्रथमस्यार्थः। सम्परे चङ्परे च णौ श्वयतेः सम्प्रसारणं वेति द्वितीयस्यार्थः। प्रथमसूत्रेण इङो गाङ्, द्वितीयसूत्रेण श्वयतेः सम्प्रसारणमित्युभयमपि पाक्षिकं भवतीत्यर्थः। अधिजिगापयिषतीति। इङो णौ विवक्षिते गाङि पुकि गापि इत्यस्मात्सनि रूपम्। 'णौ च संश्चङोः' इति गाङ्विधौ विषयसप्तमीति प्रागेवोक्तम्। गाङभावे आह—अध्यापिपयिषतीति। क्रीङ्जीनां णौ' इत्यात्वे पुक्। शिश्वाययिषतीति। श्विधातोर्णौ वृद्धावायादेशे श्वायि इत्यस्मात्सनि सम्प्रसारणाऽभावे रूपम्। सम्प्रसारणपक्षे आह—शुशावयिषतीति। ण्यन्तात्सनि इटि श्वि इ इस इति स्थिते 'सम्प्रसारणं तदाश्रयं च कार्यं बलवत्' इति वचनात्प्रथमं सम्प्रसारणं पूर्वरूपम्। 'शु' इत्यस्य द्वित्वे उत्तरखण्डे उकारस्य वृद्धावावादेशे णिचो गुणाऽयादेशाविति भावः। ह्वः सम्प्रसारणमिति। हेतुमण्ण्यन्तप्रक्रियायां व्याख्यातम्। जुहावयिषतीति। ह्वेञो ण्यन्तात्सनि इटि प्रथमं सम्प्रसारणं पूर्वरूपम्। हु इत्यस्य द्वित्वम्। उकारस्य वृद्ध्यावादेशौ, णिचो गुणाऽयादेशाविति भावः। ननु परत्वात् द्वित्वात् प्रागेव उकारस्य वृद्ध्यावादेशयोः कृतयोः हाव् इत्यस्य द्वित्वे अभ्यासस्याऽत इत्वे इकार एव श्रूयेतेत्यत आह—णौ द्वित्वादिति। पुस्फारयिषतीति। स्फुरतेः ण्यन्तात्सनि इटि 'चिस्फुरोर्णौ' इत्यस्मात् प्रागेव स्फुर् इत्यस्य द्वित्वम्, द्वित्वे कार्ये णावच आदेशस्य निषेधात्। 'ओः पुयण्ज्य' इति इत्वं तु न, षकारस्य सकारेण व्यवहिततया पवर्गपरत्वाऽभावात्। चुक्षावयिषतीति। क्षुधातोः ण्यन्तात् सनि इटि क्षु इत्यस्य द्वित्वम्। परिशिष्टे रूपे अवर्णपरत्वेन णावच आदेशस्य निषेधादिति भावः। ओः पुयण्ज्यपरे इति। हेतुमण्णिचप्रक्रियायामिदं व्याख्यातमपि स्मार्यते। पिपावयिषतीत्यादि। पृ, भू, यु, रु, लु, क्षु एभ्यो ण्यन्तेभ्यः सनि इटि द्वित्वे कार्ये णा-

जिजावयिषति। पुयण्ज्यि इति किम्। नुनावयिषति। अपरे किम्। बुभूषति। 'स्रवति–' (सू २५७८) इतीत्वं वा। सिस्रावयिषति। सुस्रावयिषतीत्यादि। अपरे इत्येव। शुश्रूषते। **२६२७ स्तौतिण्योरेव षण्यभ्यासात्** ८।३।६१॥

अभ्यासेणः परस्य स्तौतिण्यन्तयोरेव सस्य षः स्यात् षभूते सनि नान्यत्र। तुष्टूषति। 'द्युतिस्वाप्योः–' (सू २३४४) इट्टुत्वम्। सुष्वापयिषति। सिषाधयिषति। स्तौतिण्योः किम्। सिसिक्षति। उपसर्गात्तु 'स्थादिष्वभ्यासेन च—' (२२७७) इति षत्वम्। परिषिषिक्षति। षणि किम्। तिष्टासति। सुषुप्सति।

वच आदेशनिषेधात् उवर्णान्तानामेव द्वित्वे अभ्यासोवर्णस्य इत्त्वमिति भावः। ज्ञः सौत्रो धातुः, 'जुचङ्क्रम्य' इत्यत्रोक्तः। अथ 'स्रवति शृणोति' इति सूत्रं हेतुमण्णिचप्रक्रियायां व्याख्यातं स्मारयति—स्रवतीत्त्वं वेति। शुश्रूषते इति। 'ज्ञाश्रुस्मृदृशां सनः' इत्यात्मनेपदम्। स्तौतिण्योरेव। 'षणी'ति कृतषत्वस्य सनो ग्रहणम्। 'अपदान्तस्य मूर्धन्यः' इत्यधिकृतम् 'इण्कोः' इति च। तत्र कुग्रहणं निवर्तते असम्भवात्। णिग्रहणेन तदन्तग्रहणम्। 'सहे साडः स.' इत्यतः स इति षष्ठ्यन्तमनुवर्तते। तदाह—अभ्यासेण इत्यादि। षभूते इति। षकारं प्राप्ते सनीत्यर्थः। नान्यत्रेति। अभ्यासेणः परस्य चेत्तस्य षत्वं तर्हि स्तौतिण्यन्तयोरेवेत्यर्थः। नच 'आदेशप्रत्यययोः' इत्येव सिद्धे आरम्भसामर्थ्यादेव नियमलाभात् षकारो व्यर्थ इति वाच्यम्, षण्येवेति नियमनिरसनार्थत्वात्। 'षण्येवे'ति नियमे सति तुष्टावेत्यत्र षत्वाऽनापत्तेः। स्तौतेरुदाहरति—तुष्टूषतीति। 'अज्झन' इति दीर्घः। ण्यन्तस्योदाहरिष्यन्नाह—द्युतीति। उत्वमिति। वकारस्य सम्प्रसारणमुकार इत्यर्थः। सुष्वापयिषतीति। स्वपेर्णौ उपधावृद्धौ स्वापि इत्यस्मात् सनि इटि वकारस्य सम्प्रसारणे पूर्वरूपे सुप इत्यस्य द्वित्वे णेर्गुणे अया देशे सनः षत्वे अभ्यासेणः परस्य षत्वमिति भावः। सिषाधयिषतीति। अत्रापि ण्यन्तत्वादभ्यासेणः परस्य सस्य षत्वमिति भावः। सिसिक्षतीति। सेक्तुमिच्छतीत्यर्थः। सिच्धातोः सन् 'हलन्ताच्च' इति कित्त्वान्न लघूपधगुणः। अभ्यासेणः परस्य सस्य चेत् षत्वं तर्हि 'स्तौतिण्योरेव' इति नियमान्न ष इति भावः। ननु परिषिषिक्षतीत्यत्र अभ्यासेणः परस्य सस्य कथं षत्वं 'स्तौतिण्योरेव' इति नियमात् 'स्थादिष्वभ्यासेन च' इति षत्वस्याप्यनेन नियमेन निवृत्तेरित्यत आह—उपसर्गात्त्विति। 'स्तौतिण्योरेव' इति नियमेन मध्येऽपवादन्यायबलात् 'आदेशप्रत्यययोः' इति षत्वमेव बाध्यत इति भावः। षणि किमिति। कृतषत्वनिर्देशः किमर्थ इति प्रश्नः। तिष्ठासतीति। 'धात्वादेः' इति षस्य सत्वे स्था इत्यस्य द्वित्वे अभ्यासह्रस्वे इत्वे 'आदेशप्रत्यययोः' इति षत्वम्। कृतषत्वे सन्येवायं नियमः, अत्र तु सनः षत्वाऽभावेन नियमाऽप्रवृत्तेः षः निर्बाधमिति भावः। सुषुप्सतीति। स्वप्धातोः सनि 'ह्रस्वविदमुषग्रहिस्वपि' इति कित्त्वात् 'वचिस्वपि' इति सम्प्रसारणे कृते द्वित्वम्। कित्त्वान्न

अभ्यासादिःयुक्तेनेंह निषेधः । इण् । प्रतीषिषति । इक् । अधीषिषति । **२६२८**

सः स्विदस्वदिसहीनां च ८।३।६२ ॥ अभ्यासेणः परस्य प्यन्तानामेषां सस्य स एव, न षः, षणि परे । सिस्वेदयिषति । सिस्वादयिषति । सिसाहयिषति । 'स्यादिष्वेवाभ्यासस्य' इति नियमान्नेह । अभिसुसूषति ।

'शैषिकान्मतुबर्थीयाच्छैषिको मतुबर्थिकः ।
सरूपप्रत्ययो नेष्टः सन्नन्ताच्च सनिष्यते ॥' (भाष्यम्)

शैषिकाच्छैषिकः सरूपो न । तेन शालीये भव इति वाक्यमेव, न तु छान्ताच्छः । सरूपः किम् । अहिच्छत्रे भव आहिच्छत्रः, आहिच्छत्रे भव आहिच्छत्रीयः । अण्णन्ताच्छः । तथा मत्वर्थात्सरूपः स न । धनवानस्यास्ति । इह मतुबन्तान्मतुप्न । विरूपस्तु स्यादेव । दण्डिमती शाला । सरूप इत्यनुषज्यते । अर्थद्वारा सादृश्यं तस्यार्थः । तेन इच्छासन्नन्तादिच्छासन्न । स्वार्थसन्नन्तात्तु स्यादेव । जुगुप्सिषते । मीमांसिषते । इति तिङन्ते सन्प्रकरणम् ।

ऊधूपधगुणाः । इहापि 'स्तौतिण्योरेव' इति नियमो न भवति, सनः षत्वाऽभावादिति भावः । ननु 'षणि' इणः परस्य सस्य चेत् षत्वं तर्हि 'स्तौतिण्योरेषे'त्येतावदेवास्तु । अभ्यासादिति किमर्थमित्यत आह—अभ्यासादित्युक्तेनेंहेति । प्रतीषिषतीति । इण्धातोः सनि 'अजादेर्द्वितीयस्य' इति स इत्यस्य द्वित्वे अभ्यासेरवम् । इह चभूते सनि 'इण् गतौ' इति धातोः परस्य सस्य षत्वं भवत्येव, अभ्यासेणः परत्वे सत्येव नियमप्रवृत्तेरिति भावः । अधीषिषतीत्यप्येवम् । सः स्विदि । सः स्विदीतिच्छेदः । 'स्तौतिण्योरेव षण्यभ्यासात्' इति सूत्रं स्तौतिवर्जमनुवर्तते । 'सहेः साढः सः' इत्यतः स इति षष्ठ्यन्तं च । तदाह—अभ्यासेण इति । सकारविधिर्नियमार्थ इत्याह—सस्य स एवेति । सुनोतेः सनि 'स्तौतिण्योरेव' इति नियमादुत्तरखण्डस्य षत्वाऽभावे अभिसुसूषतीत्यत्र 'उपसर्गात्सुनोति' इत्यभ्यासस्य षत्वमाशङ्क्य आह—स्यादिष्वेवेति । शैषिकादिति । सन्निधायकसूत्रस्थमिदं वार्तिकम् । शैषिकात्सरूपः शैषिकः प्रत्ययो न । मतुबर्थीयात् सरूपो मतुबर्थिकः प्रत्ययो नेत्यन्वयः । शेषाधिकारे विहितः शैषिकः । भवार्थे अध्यात्मादित्वाट्ठञ् । मतुबर्थे भवो मतुबर्थीयः गहादित्वाच्छः । मतुबर्थोऽस्यास्तीति मतुबर्थिकः 'अत इनिठनौ' इति ठन् । शालीये इति । शालार्थां भवः शालीयः । 'वृद्धाच्छः' शालीये भव इत्यर्थे शालीयशब्दात् पुनः छो नेत्यर्थः । आहिच्छत्रे भव इति । आहिच्छत्रशब्दो भवार्थे अणन्तः । ततो भवार्थे 'वृद्धाच्छः' इति छ एव भवति । नतु पुनरणिति भावः । ननु जुगुप्सिषते इत्यादौ स्वार्थे सन्नन्तात् सन्निष्यत आह—सरूप इत्यनुषज्यते इति । सन्नन्तान्न सनिष्यते इत्यत्रापि सरूप इत्यनुषज्यते इत्यर्थः । नन्वेवमपि जुगुप्सिषते इत्यत्र सरूपस्य सनः कथं प्रवृत्तिरित्यत आह—अर्थद्वारेति । शब्दतो वैरूप्यस्याऽऽश्रयभावादर्थद्वारकमेव सारूप्यं विवक्षितमिति

अथ तिङन्ते यङ्प्रकरणम् ॥ १३ ॥

२६२६ धातोरेकाचो हलादेः क्रियासमभिहारे यङ् ३।१।२२॥ पौनःपुन्यं भृशार्थश्च क्रियासमभिहारः तस्मिन् द्योत्ये यङ् स्यात् । २६३० गुणो यङ्लुकोः ७।४।८२॥ अभ्यासस्य गुणः स्याद्यङि यङ्लुकि च । 'सनाद्यन्ताः–' (सू २३०४) इति धातुत्वाल्लडादयः । ङिदन्तत्वादात्मनेपदम् । पुनः पुनरतिशयेन वा भवति बोभूयते । बोभूयाञ्चक्रे । अबोभूयिष्ट । धातोः किम् । आर्धधातुकत्वं यथा स्यात् । तेन 'ब्रुवो वचिः' (सू २४५३) इत्यादि । एकाचः किम् । पुनः पुनर्जागर्ति । हलादेः किम् । भृशमीक्षते । भृशं शोभते रोचते इत्यत्र यङ् नेति भाष्यम् । पौनःपुन्ये तु स्यादेव । रोरुच्यते । शोशुभ्यते । 'सूचिसूत्रिमू-

---

भावः । तेनेति । इच्छासन्नन्तादिच्छासन्नेति लभ्यते इत्यर्थः । स्वार्थेति । स्वार्थसन्नन्तात्तु इच्छासन् भवत्यर्थवेत्यर्थः । इति श्रीवासुदेवदीक्षितविदुषा विरचितायां सिद्धान्तकौमुदीव्याख्यायां बालमनोरमाख्यायां सन्नन्तनिरूपणं समाप्तम् ।

अथ यङ्प्रक्रियाः निरूप्यन्ते । धातोरेकाचो । तस्मिन्द्योत्ये इति । वाच्यत्वे तु प्रत्ययवाच्यस्य प्रधानतया सन्नन्ते इच्छाया इव तस्य विशेष्यत्वं स्यादिति भावः । गुणो यङ्लुकोः । यङ् च लुक् च इति द्वन्द्वात् सप्तमी । लुगिह यङ एव विवक्षितः, उपस्थितत्वात् । 'अत लोप' इत्यतः अभ्यासस्येत्यनुवर्तते । तदाह—अभ्यासस्येति । इक्परिभाषया इगन्तस्येति लभ्यते । बोभूयते इति । 'सन्यङोः' इति द्वित्वम् । यङो ङित्त्वाद्गुणाभावस्य न गुणः । 'बोभूय' इत्यस्मात्तिपि शपि परूपम् । 'क्रियासमभिहारे द्वे वाच्ये' इति पुनर्द्वित्वं तु न, तस्य 'क्रियासमभिहारे' इति विहितलोडन्तमात्रविषयत्वात् । अत एव 'क्रियासमभिहारे लोट्' इति सूत्रभाष्ये 'क्रियासमभिहारे लोण्मध्यमपुरुषैकवचनस्य द्वे वाच्ये' इत्येव पठितम् । पौनःपुन्ये यङि तु 'नित्यवीप्सयोः' इति न द्वित्वम्, ''क्रियासमभिहारे द्वे' इत्यनेन पौनःपुन्येऽपि लोडन्तद्वित्वविधानेन पौनःपुन्यस्य अन्यतो लाभे सौत्रद्वित्वाऽप्रवृत्तेर्ज्ञापनादित्यलम् । धातोः किमिति । 'क्रियासमभिहारे' इत्यनेनैव धातोर्ज्ञाभाव्किमर्थं धातुग्रहणमिति प्रश्नः । आर्धधातुकत्वमिति । 'धातो'रित्यभावे आर्धधातुकत्वं न स्यात् । धातोरिति विहितप्रत्ययस्यैव आर्धधातुकत्वादिति भावः । ब्रुव इति । यङः आर्धधातुकत्वे सत्येव तस्मिन् परे 'ब्रुवो वचिः' 'वेञो वयिः' इत्यादि कार्यं सिध्यति । अन्यथा 'आर्धधातुके' इत्यधिकृत्य तद्विधानान्न स्यादिति भावः । भृशमीक्षते इति । नच भृशशब्देनैवात्र भृशार्थभावात् यङ् न भविष्यतीति वाच्यम्, भृशत्वं हि यङ्द्योत्यम्, न तु वाच्यम् । द्योतनं च उक्तस्यापि सम्भवतीति भावः । यङ नेति । अनभिधानादिति भाष्ये स्पष्टम् । पौनःपुन्ये त्विति । पुनश्च पुनश्चशब्दसमभिहारेऽपि यङस्त्येव, भृशार्थे पुवानभिधानोक्तेरिति

त्र्यट्यर्त्यशूर्णोतिभ्यो यङ् वाच्यः' (वा १७५१)। आद्याश्चयश्चुरादावदन्ताः। सोसूच्यते। सोसूत्र्यते। अनेकाच्कत्वेनाषोपदेशत्वात्षत्वं न। मोमूत्र्यते। **२६३१ यस्य हलः ६।४।४९॥** यस्य इति सङ्घातग्रहणम्। हलः परस्य यशब्दस्य लोपः स्यादार्धधातुके। 'आदेः परस्य' (सू ४४)। 'अतो लोपः' (सू २३०८)। सोसूचाञ्चक्रे। सोसूचिता। सोसूत्रिता। मोमूत्रिता। **२६३२ दीर्घोऽकितः ७। ४।८३॥** अकितोऽभ्यासस्य दीर्घः स्याद्यङि यङ्लुकि च। अटाट्यते। **२६३३ यङि च ७। ३।३०॥** अर्तेः संयोगादेश्च ऋतो गुणः स्याद्यङि यङ्लुकि च। यकार-परेरफस्य न द्वित्वनिषेधः। अरार्यते इति भाष्योदाहरणात्। अरारिता। अशा-

---

भावः। सूचिसूत्रादि। सूचि, सूत्रि, मूत्रि, अटि, अर्ति, अशू, ऊर्णोति-एषां हल्त्वम्। 'सूच पैशुन्ये, सूत्र वेष्टने, मूत्र प्रस्रवणे' एते त्र्यश्चुराद्यन्तर्गणे कथादावदन्ताः। तेषा-मनेकाच्त्वाद्प्राप्तो यङ्वचनमित्याह—आद्याश्चय इति। 'अट गतौ, ऋ गतौ, अश भो-जने, अशू व्याप्तौ' एषां हलादित्वाभावाद्वचनम्। ऊर्णोस्तु हलादित्वाभावादेका-च्त्वाभावाच्च वचनम्। सोसूच्यते इति। ण्यन्ताद्यङि णिलोपे द्वित्वे 'गुणो यङ्लुकोः' इति अभ्यासगुणः। सूचेः षोपदेशत्वभ्रमं वारयति—अनेकाच्कत्वेनेति। षोपदेशत्वे तु 'धात्वादेः' इति षस्य सत्वे कृते आदेशसकारत्वादुत्तरखण्डस्य षत्वं स्यादिति भावः। लिटि सोसूच् य आमिति स्थिते—परस्य हलः। यकारादकारस्य उच्चारणार्थत्वभ्रमं वारयति—सङ्घातग्रहणमिति। यकाराकारसमुदायस्येत्यर्थः। 'हलः' इति पञ्चमी। 'आर्धधातुके' इत्यधिकृतम्। 'अतो लोपः' इत्यस्मात् लोप इत्यनुवर्तते। तदाह—हलः परस्येत्यादिना। ननु 'अलोऽन्त्यस्य' इति यकारादकारस्य लोपः स्यादित्यत आह—आदेः परस्येति। 'अलोऽन्त्यस्य' इत्यस्यायमपवाद इति भावः। अतो लोपः इति। यका-राऽकारसङ्घाते यकारस्य लोपे सति परिशिष्टस्याऽकारस्य 'अतो लोपः' इत्यर्थः। ननु मास्तु संघातग्रहणम्। यकारस्यैवात्र लोपो विधीयताम्। अतो लोपे सति इष्टसिद्धि-रिति चेत्, न-ईर्ष्य धातोस्तृचि इटि ईर्ष्यितेत्यत्र यकारलोपनिवृत्यर्थत्वादित्यलम्। अटधातोः यङि 'अजादेर्द्वितीयस्य' इति 'टय' इत्यस्य द्वित्वे हलादिशेषेण अभ्यासे यकारनिवृत्तौ अटटयते इति स्थिते—दीर्घोऽकितः। अभ्यासस्येति। 'अत्र लोपोऽभ्यास-स्य' इत्यतस्तदनुवृत्तेरिति भावः। यङि यङ्लुकि चेति। 'गुणो यङ्लुकोः' इत्यतस्तद-नुवृत्तेरिति भावः। 'अकित' इत्यस्य तु यंयम्यते इत्यादौ प्रयोजनं वक्ष्यते। ऋधा-तोर्यङि कृते ङित्त्वाद्गुणनिषेधे प्राप्ते—यङि च। 'गुणोऽर्तिसंयोगाद्योः' इति सूत्रमनु-वर्तते। 'रीङ् ऋतः' इत्यस्मात् ऋत इति च। तदाह—अर्तेरित्यादि। तथाच ऋ य इति स्थिते ऋकारस्य गुणे अकारे रपरत्वे अर् य इति स्थिते 'न म्द्राः' इति रेफस्य द्वित्वनिषेधे य इत्यस्य द्वित्वे 'दीर्घोऽकितः' इत्यभ्यासदीर्घे 'अर्यायते' इति प्राप्ते आह—यकारपररेफस्येति। भाष्योदाहरणादिति। 'धातोरेकाच' इति सूत्रे

शिता । उर्णोनूयते । बेभिद्यते । अत्लोपस्य स्थानिवत्त्वान्नोपधागुणः । बेभिदिता ।
२६३४ नित्यं कौटिल्ये गतौ ३।१।२३॥ गत्यर्थात्कौटिल्य एव यङ् स्यान्न तु क्रियासमभिहारे । कुटिलं व्रजति वाव्रज्यते । **२६३५ लुपसदचरजपजभदहदशगृभ्यो भावगर्हायाम् ३।१।२४॥** एभ्यो धात्वर्थगर्हायामेव यङ् स्यात् । गर्हितं लुम्पति लोलुप्यते । सासद्यते । **२६३६ चरफलोश्च ७।४।८७॥** अनयोरभ्यासस्यातो नुक् स्याद्यङ्यङ्लुकोः । नुक् इत्यनेनानुस्वारो लक्ष्यते । 'स च पदान्तवद्वाच्यः' (वा ४६६१) 'वा पदान्तस्य' (सू १२५) इति यथा स्यात् । **२६३७ उत्परस्यातः ७।४।८८॥** चरफलोरभ्यासात्परस्यात उत्स्याद्यङ्यङ्लुकोः । हलि च (सू ३५४) इति दीर्घः । चंचूर्यते-चञ्चूर्यते । पम्फुल्यते-पंफुल्यते । **२६३८**

इति शेषः । अरारीतेति । 'यस्य हलः' इति यकारलोपः । अशाशितेति । अशधातोर्यङि 'श्य' इत्यस्य द्वित्वे हलादिशेषेण अभ्यासे यकारनिवृत्तौ 'दीर्घोऽकितः' इति दीर्घे 'यस्य हलः' इति यकारलोपः । ऊर्णोनूयते इति । ऊर्णु य इति स्थिते 'नश्चा' इति 'नु' इत्यस्य द्वित्वे हलादिशेषे अभ्यासगुणे 'अकृत्' इति दीर्घः । बेभिद्यते इति । भिद् य इति स्थिते भिद् इत्यस्य द्वित्वे हलादिशेषे अभ्यासगुणः । ननु बेभिद्य इति यङन्तात्लुटि तासि इटि यलोपे अतो लोपे बेभिदितेत्यत्र तासि परे लघूपधगुणः स्यादित्यत आह—अत्लोपस्य स्थानिवत्त्वादिति । नित्यं कौटिल्ये गतौ । 'नित्य' शब्दः एवार्थे । कौटिल्ये इत्यस्योपरि द्रष्टव्यः । 'धातोरेकाचः' इत्यतो यङित्यनुवर्तते । तदाह—गत्यर्थात्कौटिल्य एवेति । गत्यर्थवृत्तेर्धातोः कौटिल्ये द्योत्य एव यङित्यर्थः । एवशब्दव्यवच्छेद्यमाह—न तु क्रियासमभिहारे इति । शब्देन्दुशेखरे तु गत्यर्थेभ्यः क्रियासमभिहारे यङस्त्येवेति प्रपञ्चितम् । लुपसद । लुप, सद, चर, जप, जभ, दह, दश, गृ एषां द्वन्द्वः । यङित्यनुवर्तते । भावः धात्वर्थः । तद्वता गर्हा भावगर्हाः । नित्यमित्यनुवृत्तम् एवकारार्थकम् । तदाह—एभ्य इत्यादि । चरफलोश्च । 'अत्र लोपः' इत्यस्मादभ्यासस्येत्यनुवर्तते । 'नुगतोऽनुनासिकान्तस्य' इत्यस्मात् अतो नुगिति । 'गुणो यङ्लुकोः' इत्यस्मात् यङ्लुकोरिति च तदाह—अनयोरित्यादि । नुकि ककार इत्, उकार उच्चारणार्थः । लक्ष्यते इति । 'नुगतोऽनुनासिकान्तस्य' इति पूर्वसूत्रे यंयम्यते, रंरम्यते, इत्यादौ अनुस्वारश्रवणार्थं नुगित्यनुस्वारोपलक्षणमाश्रयणीयम् । अन्यथा झलपरत्वाभावात् 'नश्च' इत्यनुस्वाराऽसम्भवात्ककार एव श्रूयेतेत्युक्तं भाष्ये । सत्यैवेहानुवृत्तेरत्राप्यनुस्वारोपलक्षणार्थत्वमिति भावः । पदान्तवदिति । 'नुगतोऽनुनासिकान्तस्य' इति पूर्वसूत्रस्थमिदं वार्तिकमत्राप्यनुवर्तते इति भावः । उत्परस्यातः । 'अत्र लोपः' इत्यस्मादभ्यासस्येत्यनुवृत्तं परञ्चेत्यर्थात् पञ्चम्या विपरिणम्यते । 'गुणो यङ्लुकोः' इत्यतः यङ्लुकोरिति 'चरफलोः' इति चानुवर्तते तदाह—चरफलोरित्यादि । दीर्घ इति । 'उकारस्ये'ति शेषः । चञ्चूर्यते इति । गर्हितं चरतीत्यर्थः । यदि

जपजभदहदशभञ्जपशां च ७।४।८६॥ एषामभ्यासस्य नुक् स्याद्यङ्लुकोः। गर्हितं जपति जञ्जप्यते इत्यादि। २६३९ **ग्रो यङि** ८।२।२०॥ गिरतेः रेफस्य लत्वं स्याद्यङि। गर्हितं गिलति जेगिल्यते। 'घुमास्था-' (सू २४६२) इतीत्वम्। गुणः। देदीयते। पेपीयते। सेषीयते। 'विभाषा श्वेः' (सू २४२०)। शोशूयते। शेश्वीयते। 'यङि च' (सू २६३३)। सास्म्यर्यते। 'रीङृतः' (सू १२३४)। चेक्रीयते। सुट्। सञ्चेस्क्रीयते। २६४० **सिचो यङि** ८।३।११२॥ सिचः सस्य षो न स्याद्यङि। निसेसिच्यते। २६४१ **न कवतेर्यङि** ७।४।६३॥ कवतेरभ्यासस्य चुत्वं न स्याद्यङि। कोकूयते। कौतिकुवत्योस्तु चो-

---

द्वित्वे हलादिशेषे अभ्यासाऽकारादुपरि अनुस्वारागमे 'वा पदान्तस्य' इति तस्य परसवर्णे अकारे उत्तरखण्डे अकारस्य उत्त्वे तस्य दीर्घः। परसवर्णाऽभावपक्षे त्वाह—चंचूर्यते इति। पम्फुल्यते इति। अत्र अनुस्वारस्य मकारः परसवर्णः। जपजभ। 'चरफलोम्र' इत्यत्र यदनुवृत्तं तासर्वंमहाप्यनुवर्तते। तदाह—एषामिति। इत्यादीति। जञ्जभ्यते। दन्दह्यते। दन्दश्यते। बम्भज्यते। पम्पश्यते। 'पस'धातुर्दन्त्यान्तः सौत्रो नित्यं इति माधवः। 'तालव्यान्त' इति काशिका। ग्रो यङि। 'गृ' इत्यस्य 'ग्रः' इति षष्ठ्यन्तवचनम्। 'कृपो रो लः' इत्यनुवर्तते। तदाह—गिरतेरित्यादि। दा, पा, सा, एभ्यो यङि विशेषमाह—घुमास्थेत्यादि। शोशूयते इति। शिवधातोर्यङि 'सम्प्रसारणं तदाश्रयं च कार्यं बलवत्' इति वचनात् सम्प्रसारणे पूर्वरूपे 'शु' इत्यस्य द्वित्वम्। 'अकृत्सार्वधातुकयोः' इति दीर्घः। सास्म्यर्यते इति। स्मृ य इति स्थिते सयोगादित्वात् 'यङि च' इति परत्वाद्गुणे रपरत्वे द्वित्वे 'दीर्घोऽकितः' इत्यभ्यासदीर्घः। चेक्रीयते इति। कृ य इति स्थिते परत्वात् ऋकारस्य रीङादेशे 'क्री' इत्यस्य द्वित्वे अभ्यासगुणः। सुडिति। 'सम्परिभ्यां करोतौ भूषणे' 'समवाये च' इत्यनेनेति शेषः। सिचो यङि। 'सहेः साडः सः' इत्यतः स इति षष्ठ्यन्तमनुवर्तते। 'मूर्धन्यः' इत्यधिकृतम् 'न रपरात्' इत्यतः नेत्यनुवर्तते। तदाह—सिच इति। निसेसिच्यते इति। 'उपसर्गात्सुनोति' इति 'स्यादिष्वभ्यासेन' इति च षत्वमनेन निषिध्यते। न कवतेर्यङि। 'अत लोपः' इत्यत अभ्यासस्येति 'कुहोश्चुः' इतश्चुरिति चानुवर्तते इति मत्वा आह—कवतेरभ्यासस्येति। ननु 'कोर्यङि' इत्येव सिद्धे शितपा निर्देशो व्यर्थ इत्यत आह—कौतिकुवत्योस्त्विति। शपा निर्देशार्थं कवतिग्रहणम्। तेन 'कु शब्दे' इति भ्वादेः 'कूङ् शब्दे' इति शविकरणस्य च ग्रहणं न लभ्यते इति भावः। नच 'को'रित्युक्तेऽपि दीर्घान्तस्य शविकरणस्य न ग्रहणप्रसक्तिरिति शङ्क्यम्, तुदादौ 'कुङ् शब्दे' इति ह्रस्वान्तपाठस्य न्याससम्मतत्वात्। वस्तुतस्तु न्याससम्मते तौदादिकेऽस्याप्रवृत्तिरेव फलम्। 'लुग्विकरणाऽलुग्विकरणयोरलुग्विकरणस्यैव ग्रहणम्' इति लुग्विकरणस्य ग्रहणनिवृत्तिरिति बोध्यम्।

कृयते। २६४२ नीग्वञ्चुस्रंसुध्वंसुभ्रंसुकसपतपदस्कन्दाम् ७।४।८४॥ एषामभ्यासस्य नीगागमः स्याद्यङ्यङ्लुकोः। अकित इत्युक्तेर्न दीर्घः। नलोपः। वनीवच्यते। सनीस्रस्यते इत्यादि। २६४३ नुगतोऽनुनासिकान्तस्य ७।४।८५॥ अनुनासिकान्तस्याङ्गस्य योऽभ्यासोऽदन्तस्तस्य नुक् स्यात्। नुका अनुस्वारो लक्ष्यते इत्युक्तम्। यँय्यम्यते-यंयम्यते। तपरत्वसामर्थ्यादभूतपूर्वदीर्घस्यापि न। भाम क्रोधे। बाभाम्यते। 'ये विभाषा' (सू २३२६) जाजायते-जञ्जन्यते। 'हन्तेर्हिंसायां यङि घ्नीभावो वाच्यः' (वा ४६२१)। जेघ्नीयते। हिंसायां किम्। जङ्घन्यते। २६४४ रीगृदुपधस्य च ७।४।९०॥ ऋदुपधस्य धातोरभ्यासस्य रीगागमः स्याद्यङ्यङ्लुकोः। वरीवृत्यते। ह्लुभ्नादित्वान्न णिः। नरीनृत्यते। जरीगृह्यते। उभयत्र लत्वम्। चलीक्लृप्यते। 'रीगृत्वत इति वक्त-

---

नीग्वञ्चु। अभ्यासस्येति। 'अत लोपः' इत्यतस्तदनुवर्तत इति भावः। यङ्लुकोरिति। यङि यङ्लुकि चेत्यर्थः। न दीर्घ इति। नीगागमात्प्राक् प्राप्तोऽभ्यासदीर्घो नेत्यर्थः। भविष्यदपि किरवं दीर्घप्रतिबन्धकमिति भावः। नलोप इति। 'अनिदिताम्' इत्यनेन नकारस्य लोपः इत्यर्थः। इत्यादीति। सनीस्रस्यते, दनीध्वस्यते, बनीभ्रस्यते, चनीकस्यते, पनीपत्यते, पनीपंयते, चनीस्कयते। नुगतोऽनु। अङ्गस्येत्यधिकृतम्। 'अत लोपः' इत्यतः अभ्यासस्येत्यनुवर्तते। 'गुणो यङ्लुकोः' इत्यतः यङ्लुकोरिति च। तदाह—अनुनासिकान्तस्येत्यादि। ननु 'यंयम्यते' इत्यत्र नुको नकारस्य अपदान्तत्वादझलपरकत्वाच्च कथं 'नश्च' इत्यनुस्वार इत्यत आह—नुकेति। नन्वभ्यासे ह्रस्वविधानादीर्घस्याऽभावात् नुग्विधावत इति तपरकरणं व्यर्थमित्यत आह-तपरत्वसामर्थ्यादिति। स्वाभाविक एव ह्रस्वः अकारः, तस्यैव ग्रहणम्, ननु दीर्घादेशभूतस्य ह्रस्वाऽकारस्येत्येतदर्थं तपरकरणमिति भावः। बाभाम्यते इति। अत्र आकारस्यानिकस्य ह्रस्वविधिसम्पन्नस्य अकारस्य न नुगिति भावः। जनधातोर्यङि नकारस्य आत्वविकल्पं स्मारयति-ये विभाषेति। घ्नीभाव इति। यद्यपीह ह्रीभावविधावपि 'अभ्यासाच्च' इति कुत्वे हकारस्य घकारः सिध्यति। तथापि प्रयत्नलाघवाऽभावात् प्रक्रियालाघवाच्च 'घ्नी'ति घकारोच्चारणमिति भावः। जेघ्नीयते इति। पुनः पुनरतिशयेन वा हिनस्तीत्यर्थः' अत्र 'यङी'ति विषयसप्तमी। यङि विवक्षिते सतीति लभ्यते। तेन हिंस्वस्य परत्वेऽपि प्रागेव घ्नीभाव इति बोध्यम्। जङ्घन्यते इति। गर्हितं गच्छतीत्यर्थः। रीगृदुपधस्य च। अभ्यासस्येति। 'अत लोपः' इत्यतः तदनुवृत्तेरिति भावः। यङ्लुकोरिति। 'गुणोयङ्लुकोः' इत्यतस्तदनुवृत्तेरिति भावः। वरीवृत्यते इति। 'वृतु वर्तने' अस्माद्यङि द्वित्वे उरत्वे हलादिशेषे अभ्यासस्य रीक्। नृतेर्यङि नरीनृत्यते इत्यत्र नुत्वमाशङ्क्य आह—ह्लुभ्नादित्वान्न ण इति। जरीगृह्यते इति। 'ग्रह उपादाने' अस्माद्यङि 'ग्रहिज्या' इति सम्प्रसारणे द्वित्वे उरदत्वे हलादिशेषे अभ्यासस्य रीक्।

ऽयम्' (वा ४६६२)। परीपृच्छ्यते। वरीवृश्च्यते। २६४५ स्वपिस्यमिव्येञां यङि ६।१।१६॥ सम्प्रसारणं स्याद्यङि। सोषुप्यते। सेसिम्यते। वेवीयते। २६४६ न वशः ६।१।२०॥ वावश्यते। २६४७ चायः की ६।१।२१॥ चेकीयते। २६४८ ई घ्राध्मोः ७।४।३१॥ जेघ्रीयते। देध्मीयते। २६४९ अयङ् यि क्ङिति ७।४।२२॥ शीङोऽयङादेशः स्याद्यादौ क्ङिति परे। शाशय्यते। अभ्यासस्य ह्रस्वः। ततो गुणः। डोढौक्यते। तोत्रौक्यते। इति तिङन्ते यङ्प्रकरणम्।

ऽभयत्रेति। कृपधातोर्यङि द्वित्वे उरदत्वे रपरत्वे हलादिशेषे रीक्। चक्रीकृप्यते 'कृपो रो लः' इत्यभ्यासे रेफस्य लकारः। उत्तरखण्डे ऋकारस्थाऽवयवो यो रेफः तस्य लकारसदृश इत्यर्थः। ननु व्रश्चधातोर्यङि वरीवृश्च्यते इत्यत्र कथमभ्यासस्य रीक्। धातोः शकारोपधत्वेन ऋदुपधत्वाऽभावादित्यत आह रोगृत्वत इति। 'रोगृदुपधस्य' इत्यत्र ऋदुपधस्येत्यपनीय 'ऋत्वत' इति वक्तव्यमित्यर्थः। ऋत् अस्यास्तीति ऋत्वत्। 'तसौ मत्वर्थे' इति भत्वात् पदत्वाभावाच्च जश्त्वम्। परीपृच्छ्यते इति। प्रच्छधातोर्यङि 'प्रहिज्या' इति रेफस्य सम्प्रसारणमृकारः। पूर्वरूपं द्वित्वं रपरत्वं हलादिशेषः रीक्। वरीवृश्च्यते इति। व्रश्चधातोर्यङि सम्प्रसारणे द्वित्वादि पूर्ववत्। स्वपिस्यमि। 'सम्प्रसारणं स्या'दिति शेषपूरणम्। 'व्यञः सम्प्रसारणम्' इत्यतस्तदनुवृत्तेरिति भावः। सोषुप्यते इति। स्वपधातोर्यङि वकारस्य सम्प्रसारणे उकारे पूर्वरूपे द्वित्वे अभ्यासगुणः। उत्तरखण्डे सस्य षत्वम्। सेसिम्यत इति। स्यमुधातोर्यङि यकारस्य सम्प्रसारणे पूर्वरूपे द्वित्वादि। अधोपदेशत्वान्न षः। वेवीयते इति। व्येञो यङि यकारस्य सम्प्रसारणे पूर्वरूपे द्वित्वादि। 'हलः' इति 'अकृत्सार्वधातुकयोः' इति वा दीर्घः। अथ वशधातोर्यङि 'वावश्यते' इत्यत्र 'प्रहिज्या' इति सम्प्रसारणे प्राप्ते तन्निषेधे स्मारयति-न वशः। वशधातोः छान्दसत्वं प्रायिकमिति प्रागेवोक्तम्। चायः की। 'यङी'ति शेषः। 'स्वपिस्यमिव्येञां यङि' इत्यतस्तदनुवृत्तेरिति भावः। चेकीयतेइति। 'चायृ पूजानिशामनयोः'। अस्माद्यङि प्रकृतेः कीभावे द्वित्वादि। ई घ्राध्मोः। घ्रा ध्मा अनयोः द्वन्द्वात् षष्ठीद्विवचनम्। 'यङी'ति शेषः, 'यङि च' इत्यतस्तदनुवृत्तेः। जेघ्रीयते। देध्मीयते इति। ईत्वे कृते द्वित्वादि। ह्रस्वस्य इकारस्य विधावपि 'अकृत्सार्वधातुकयोः' इति दीर्घसिद्धेः दीर्घोच्चारणम् 'अस्य च्वौ' इत्युत्तरार्थम्। अयङ् यि क्ङिति। 'यि' इति सप्तमी। क्ङ् एतौ इतौ यस्येति विग्रहः। शीङ इति। 'शीङः सार्वधातुके गुणः' इत्यतस्तदनुवृत्तेरिति भावः। अयङि ङकार इत्। यकाराकार उच्चारणार्थः। ङित्त्वादन्तादेशः। शाशय्यते इति। शी य इति स्थिते ईकारस्य अय्। ततो द्वित्वे आभ्यासदीर्घः। ढौकृधातोर्यङि विशेषमाह-अभ्यासस्य ह्रस्व इति। द्वित्वे अभ्यासह्रस्वे ढकारे तस्य 'गुणो यङ्लुकोः' इति गुण इत्यर्थः। तोत्रौक्यते इति। त्रौकेः रूपम्। इति श्रीवासुदेवदीक्षितविदुषा विरचितायां सिद्धान्तकौमुदीव्याख्यायां बालमनोरमाख्यायां यङ्निरूपणं समाप्तम्।

अथ णिङन्ते यङ्लुक्प्रकरणम् ॥ १४ ॥

२६५० यङोऽचि च २।४।७४॥ यङोऽप्रत्यये लुक् स्याच्चकारात्तं विनापि बहुलं लुक्स्यात् । अनैमित्तिकोऽयमन्तरङ्गत्वादादौ भवति । ततः प्रत्ययलक्षणेन यङन्तत्वात् द्वित्वम् । अभ्यासकार्यम् । धातुत्वाल्लडादयः । 'शेषात्कर्तरि' (सू २१५९) इति परस्मैपदम् । 'अनुदात्तङितः' (सू २१५७) इति तु न । ङित्त्वस्य प्रत्ययाप्रत्ययसाधारणत्वेन प्रत्ययलक्षणाप्रवृत्तेः । यत्र हि 'प्रत्ययस्यासाधारणं रूप-

---

अथ यङ्लुगन्तप्रक्रियाः निरूप्यन्ते । यङोऽचि च । अचि इति प्रत्ययग्रहणम् , नतु प्रत्याहारः, यङा साहचर्यात् । 'प्रत्ययनियमार्थं' इत्यतः लुगित्यनुवर्तते । तदाह—यङोऽप्रत्यये लुगिति । चकारात्तं विनापीति । अचप्रत्ययाऽभावेऽपीत्यर्थः । बहुलमिति । चकारात् 'बहुलं छन्दसि' इति पूर्वसूत्रादबहुलग्रहणमप्यनुकृष्यते इति भावः । एवञ्च अचप्रत्यये तदभावेऽपि यङो बहुलं लुगिति फलितम् । तेन लूनो यङन्तादचि यङो लुगभावपक्षे अतो लोपे 'लोलूय' इति रूपम् । लुकि तु 'लोलुव' इति रूपं सिध्यति । तथा अचप्रत्ययाऽभावेऽपि बोभूयते बोभवीति इत्यादौ यङो लुग्विकल्पः सिध्यतीति बोध्यम् । अनैमित्तिकोऽयमिति । अचप्रत्ययादन्यत्र 'बोभवीती'त्यादौ यङ्लुक् अनैमित्तिकः ततश्च परस्मादपि द्वित्वादिकार्यात्प्रागेव अन्तरङ्गत्वाद्यङो लुक् भवति, ततो द्वित्वादीति वस्तुतः स्थितिकथनमिदम् । अचप्रत्यये विधीयमानस्तु यङ्लुक् नैमित्तिकत्वाद्बहिरङ्ग एव । ततश्च परत्वान्नित्यत्वाच्च आदौ द्वित्वे कृते यङो लुकि अचप्रत्ययमाश्रित्य प्राप्तो गुणः 'न धातुलोप आर्धधातुके' इति निषेधान्न भवति, अचप्रत्ययस्य यङ्लोपनिमित्तत्वादिति बोध्यम् । नन्वेवं सति यङ्लुकि 'सन्यङोः' इति द्वित्वं न स्यात् । यङो लुका लुप्तत्वेन प्रत्ययलक्षणाऽभावादित्यत आह—तत इति । यङो लुगनन्तरमित्यर्थः । 'न लुमता' इत्यनेन हि लुमता शब्देन लुप्ते तन्निमित्तमङ्गकार्यं निषिध्यते । द्वित्वादिकं तु यङन्तस्य कार्यम् , नतु यङ्निमित्तकम् , यङि परतस्तद्विध्यभावादिति भावः । द्वित्वमिति । न च 'एकाचः' विधीयमानं द्वित्वं कथमिह यङ्लुकि स्यात् 'श्तिपा शपा' इति निषेधादिति वाच्यम् , 'गुणो यङ्लुकोः' इत्यादभ्यासकार्यविधिबलेन द्वित्वनिषेधाऽभावज्ञापनादिति भावः । अभ्यासकार्यमिति । गुणादीति भावः । धातुत्वादिति । यङो लुकि सत्यपि प्रत्ययलक्षणमाश्रित्य यङन्तत्वात् 'सनाद्यन्ताः' इति धातुत्वम् । नच 'न लुमता' इति निषेधः शङ्क्यः, धातुसंज्ञायाः यङन्तधर्मत्वेनाऽयङि परतोऽङ्गकार्यस्वाभावादिति भावः । यङो ङित्त्वात्तदन्तादात्मनेपदमाशङ्क्य आह—शेषादिति । ननु 'शेषात्कर्तरि' इत्यत्र आत्मनेपदनिमित्तहीनो धातुः शेषः । यङन्तधातुस्तु न तथा, आत्मनेपदनिमित्तङ्कारानुबन्धवत्त्वादित्यत आह—अनुदात्तङित इति तु नेति । कुत इत्यत आह—ङित्त्वस्येति । तदेवोपपादयति-यत्र हीति । यत्र प्रत्यये लुप्तेति प्रत्ययमात्रवृत्तिधर्मपुरस्कारेण तमाश्रित्य कार्यप्रवृत्तिरिष्यते तत्रैव प्रत्ययलक्षणम् । यथा 'राजे'त्यत्र । तत्र हि लुप्तं सुप्प्रत्ययं सुप्त्वात्मकप्रत्ययमात्रवृत्ति-

माश्रीयते तत्रैव तत्' । अत एव सुदृषत्प्रासाद इत्यत्र 'अत्वसन्तस्य-' (सू ४२५) इति दीर्घो न । येऽपि स्पर्धशीङादयोऽनुदात्तङितस्तेभ्योऽपि न । 'अनुदात्तङितः-' (सू २१५७) इत्यनुबन्धनिर्देशात् । तत्र च 'श्तिपा शपा—' (प १३२) इति निषेधात् । अत एव श्यन्नादयो न । गणेन निर्देशात् । किं तु शबेव । 'चर्करीतं च' इत्यादौ पाठाच्छपो लुक् । २६५१ यङो वा ७।३।९४॥ यङन्तात्परस्य

धर्मपुरस्कारेणास्य सुबन्ततया पदत्वात् 'नश्चोपः' इति नकारलोपप्रवृत्तिः । ङित्त्वं तु न प्रत्ययमात्रधर्मः । 'ऋतेरीयङ्' इत्यादिप्रत्ययेष्वप्रत्ययेष्वपि चिन्नकादिषु सत्त्वात् । ततश्च यङि लुप्ते सति प्रत्ययलक्षणेन तमाश्रित्य तद्वृत्तिङित्त्वप्रयुक्तं कार्यमात्मनेपदं न शङ्कितुं शक्यमिति भावः । ननु यत्किञ्चिद्धर्मपुरस्कारेण प्रत्ययाश्रयकार्यं प्रत्ययलक्षणा कुतो नेत्यत आह—अत एवेति । प्रत्ययमात्रवृत्तिधर्मपुरस्कारेण प्रत्ययाश्रयकार्यं प्रत्ययलक्षणाश्रयणादेवेत्यर्थः । दीर्घो नेति । सु शोभनाः दृषदः यस्य सः सुदृषत्प्रासाद इत्यत्र समासावयवत्वाल्लुप्तं जसं प्रत्ययलक्षणेनाऽऽश्रित्य प्राप्तः असन्तत्वलक्षणो दीर्घो न भवति । उणादीनामव्युत्पत्तिपक्षे च 'अस्वस्य' 'वेधा' इत्यादावप्रत्यये च असन्तत्वस्य सत्त्वेन प्रत्ययमात्रवृत्तित्वाऽभावेन तत्पुरस्कारेण दीर्घे क्रियमाणेप्रत्ययलक्षणाऽसम्भवादिति भावः । एतत्सर्वं प्रत्ययलक्षणसूत्रभाष्यकैयटादिषु स्पष्टम् । नच 'सुदृषत्प्रासाद' इत्यत्र जसो लुका लुप्तत्वात् 'न लुमता' इति निषेधादेव दीर्घो न भविष्यतीति वाच्यम् , दीर्घस्याऽसन्तकार्यत्वेन जसि परे अकृकार्यत्वाऽभावादित्यलम् । ननु उक्तरीत्या प्रत्ययलक्षणाभावात् लुप्तयङन्तात् ङित्त्वप्रयुक्तमात्मनेपदं मास्तु । ये तावत् स्पर्धादयः अनुदात्तेतः, ये च शीङादयो ङितः पठिताः । तेभ्यः आत्मनेपदं दुर्वारमित्यत आह—येऽपीति । तेभ्योऽपि नेति । तेभ्यो यङ्लुकि नात्मनेपदमित्यर्थः । कुत इत्यत आह—अनुदात्तङित इत्यनुबन्धनिर्देशादिति । नन्वनुबन्धनिर्देशेऽपि यङ्लुकि आत्मनेपदं कुतो न स्यादित्यत आह—तत्र च ङितेति । न चाऽनुबन्धनिर्देशादेव ङित्त्वप्रयुक्तमपि कार्यमात्मनेपदं यङ्लुकि न भविष्यति । अतः प्रत्ययाऽसाधारणधर्माऽश्रयत्वे सत्येव प्रत्ययलक्षणमिति क्लेशाऽनुभवो वृथेति वाच्यम् , यङो ककारस्य प्रत्ययानुबन्धत्वेन यङन्तस्य धातोरनुबन्धेनाऽनिर्देशादित्यलम् । अत एवेति । 'श्तिपा शपा' इति निषेधादेव यङ्लुकि श्यन्नादयो विकरणा नेत्यर्थः । 'श्तिपा शपा' इति निषेधमुपपादयति—गणेन निर्देशादिति । 'दिवादिभ्यः श्यन्' रुधादिभ्यः श्नम्' इत्यादिगणनिर्देशादित्यर्थः । किन्तु शबेवेति । 'कर्तरि शप्' इत्यस्य 'श्तिपा शपा' इति निषेधाऽविषयत्वादिति भावः । चर्करीतमिति । यङ्लुगन्तमदादौ बोध्यमिति व्याख्यातं प्राक् । अतो यङ्लुगन्ताच्छपो लुगित्यर्थः । एवञ्च भूधातोर्यङो लुकि द्वित्वादौ 'बोभू' इत्यस्माल्लटि तिपि शपो लुकि बोभू ति इति स्थिते—यङो वा । 'उतो वृद्धिः' इत्यतो हलीति 'नाभ्यस्तस्याचि' इत्यतः पितिसार्वधातुके इति 'ध्रुव ईट्' इत्यतः ईडिति

हलादेः पितः सार्वधातुकस्येड्वा स्यात्। 'भूसुवोः–' (सू २२२४) इति गुणनिषेधो यङ्लुकि भाषायां न। '—बोभूतु तेतिक्ते–' (सू ३५९६) इति छन्दसि निपातनात्। अत एव यङ्लुगभाषायामपि सिद्धः। न च यङ्लुक्यप्राप्त एव गुणाभावो निपात्यतामिति वाच्यम्। 'प्रकृतिग्रहणे यङ्लुगन्तस्यापि ग्रहणात्' (प १०१) 'द्विः-

---

चानुवर्तते। तदाह—यङन्तादित्यादिना। टित्त्वात्तिप आद्यवयव ईट्। तथाच बोभू ई ति इति स्थिते ऊकारस्य गुणे अवादेशे बोभवीतीति रूपं वक्ष्यति। 'भूसुवोस्तिङि' इति गुणनिषेधमाशङ्क्य आह—भूसुवोरिति। निपातनादिति। 'कृषेः छन्दसि' इत्यतः छन्दसीत्यनुवृत्तौ 'दाधर्ति दर्धर्ति दर्धर्षि बोभूतु तेतिक्ते' इत्यादिसूत्रे भूधातोर्यङ्लुगन्तस्य गुणाऽभावो निपात्यते। 'भूसुवोः' इत्येव तत्र गुणनिषेधे सिद्धे गुणाऽभावनिपातनं नियमार्थम्—'यङ्लुकि छन्दस्येवाऽयम् 'भूसुवोः' इति गुणनिषेधो नान्यत्र' इति। अतो लोकेऽपि यङ्लुगस्तीति विज्ञायते। एतेन'यङोऽचि च'इति यङ्लुग्विधौ 'बहुलं छन्दसि' इति पू ंसूत्राच्छन्दसीत्यनुवर्तयन्तः परास्ताः। तदाह–अत एव यङ्लुक् भाषायामपि सिद्ध इति। 'भूसुवोस्तिङि' इति सूत्रभाष्ये तु 'बोभूत्वित्येतन्नियमार्थम्। अत्रैव यङ्लुगन्तस्य गुणो न भवति, नान्यत्र। क मा भूत् बोभवीती'त्युक्तम्। अत्रैवेत्यस्य बोभूत्विति लोटयेवेत्यर्थः। यङ्लुगन्तस्येत्यस्य 'भूधातो'रिति शेषः। बोभवीतीत्येवोदाहृतत्वादिति शब्देन्दुशेखरे प्रपञ्चितम्। वस्तुतस्तु भाष्ये यङ्लुगन्तस्येति सामान्याभिप्रायमेव। भूधातुमात्रपक्षोपे मानाऽभावात्। 'बोभवीति' इत्युदाहरणं तु भाष्यान्तराणामपि प्रदर्शनपरमिति मूलकृदाशयः। ननु भूधातोर्यङ्लुकि 'बोभू' इत्यस्य 'भूसुवोस्तिङि' इति गुणनिषेधप्रसक्तिर्नास्ति, द्वित्वे सति यङ्लुगन्तस्य प्रकृत्यन्तरत्वेन भूरूपत्वाऽभावात्। ततश्च यङ्लुगन्तस्याऽप्राप्ते गुणाऽभावे तत्प्राप्त्यर्थमेव बोभूत्विति निपातनमिति युक्तम्। तथा च छन्दस्येव यङ्लुगन्तस्य गुणनिषेधः, न तु भाषायामिति नियमः कथं सिध्येदित्याशङ्क्य निराकरोति—न च यङ्लुगोति। प्रकृतीति। 'प्रकृतिग्रहणेन यङ्लुगन्तस्यापि ग्रहणम्' इति परिभाषया 'भूसुवोः' इत्यत्र भूग्रहणेन बोभू इति यङ्लुगन्तस्यापि ग्रहणाद्विस्यर्थः। ननु 'प्रकृतिग्रहणे यङ्लुगन्तस्यापि ग्रहणम्' इत्यत्र किं प्रमाणमित्याशङ्क्य न्यायसिद्धमिदमित्याह—द्विः प्रयोग इति। षष्ठाध्यायादौ 'एकाचो द्वे प्रथमस्य' इत्यत्र किमिदं द्वित्वंनम्—एकाचः प्रथमस्य एकस्य स्थाने द्वितीयात्मक आदेशः स्यान्यपेक्षया अन्यो विधीयते, उत स्थानिन एकस्य सतः द्विरुच्चारणं विधीयते, ननु तत्स्थानिनः अतिरिच्यते इति संशय्य 'द्विः प्रयोगो द्वित्वंनम्' इति सिद्धान्तितम्। तदधिकारस्थत्वात् 'सन्यङोः' इति द्वित्वंनमपि तथाविधमेव। ततश्च भू इत्यस्यैव 'बोभू' इति द्विः प्रयुज्यमानतया 'भूसुवोः' इति भूग्रहणेन ग्रहणाद्यङ्लुगन्तस्यापि निषेधसिद्धेः बोभूत्विति निपातनं छन्दस्येव यङ्लुकि गुणनिषेधः, ननु भाषायामिति नियमकाभावेऽपि यङ्लुक् सिद्ध इति

प्रयोगो द्विर्वचनं षाष्ठम्' इति सिद्धान्तात्। बोभवीति–बोभोति। बोभूतः। बोभुवति। बोभवाञ्चकार। बोभविता। अबोभवीत्–अबोभोत्। अबोभूताम्। अबोभवुः। बोभूयात्। बोभूयाताम्। बोभूयास्ताम्। 'गातिस्था—' (सू २२२३) इति सिचो लुक्। 'यङो वा' इतीट्पक्षे गुणं बाधित्वा नित्यत्वाद् वुक्। अबोभूवीत्। अबोभोत्। अबोभूताम्। अभ्यस्ताश्रयो जुस्। नित्यत्वाद्वुक्। अबोभूवुः। अबोभविष्यदित्यादि। पास्पर्धीति–पास्पर्द्धि। पास्पर्द्धः। पास्पर्धति। पास्पर्तिस।

भावः। बोभूत इति। अपित्त्वादीण्न। ङित्त्वाच्च न गुणः। बोभुवतीति। 'अदभ्यस्तात्' इत्यत्। ङित्त्वात् गुणाऽभावे उवङिति भावः। बोभवीषि—बोभोषि। बोभूथः। बोभूथ। बोभवीमि-बोभोमि। बोभूवः। बोभूमः। बोभवाञ्चकारेति। 'कास्यनेकाच्' इत्याम्। बोभविता। बोभविष्यति। बोभवीतु-बोभोतु—बोभूतात्। बोभूताम्। बोभुवतु। हेरपित्त्वादीण्न ङित्त्वाच्च गुणः। बोभूहि-बोभूतात्। बोभूतम्। बोभूत। आटः पित्त्वेन अङित्त्वात् गुणः। बोभवानि। बोभवाव। बोभवाम। लङ्याह—अबोभवीदित्यादि। अबोभवुरिति। 'सिजभ्यस्त' इति जुसि गुणे अवादेशः। अबोभवीः। अबोभोः। अबोभूतम्। अबोभूत। अबोभवम्। अबोभूव। अबोभूम। बोभूयादिति। विधिलिङि आशीर्लिङि च रूपम्। बोभूयातामिति। विधिलिङस्तामि रूपम्। बोभूयुः। बोभूयाः। बोभूयातम्। बोभूयात। बोभूयाम्। बोभूयाव। बोभूयाम। बोभूयास्तामिति। आशीर्लिङि तामि रूपम्। बोभूयास्त। बोभूयासम्। बोभूयास्व। बोभूयास्म। लुङस्तिपि सिचि कृते आह—गातिस्थेति। ईट्पक्षे इति। 'इतश्च' इति इकारलोपे कृते ईडागमे 'सार्वधातुकार्द्धधातुकयोः' इति गुणे परमपि बाधित्वा नित्यत्वात् 'भुवो वुग्लुङ्लिटोः' इति वुगित्यर्थः। गुणे कृते अकृते च प्राप्तेः वुको नित्यत्वं वोध्यम्। अबोभूवीदिति। वुकि कृते सति तेन व्यवधानादूकारस्य न गुणः। ननु लुङो झेर्जुसि वुकि अबोभूवुरिति रूपं वक्ष्यति। तदयुक्तम्, 'आतः' इति सूत्रे सिज्लुकि आदन्तादेव झेर्जुसिति नियमनादित्यत आह–अभ्यस्ताश्रयो जुसिति। 'सिजभ्यस्त' इत्यनेन अभ्यस्ताश्रयत्वात् जुसित्यर्थः। 'सिजभ्यस्तं' इति सूत्रे सिचः परत्वमाश्रित्य यो जुस् प्राप्तस्तस्यैवायं नियमः, न त्वभ्यस्ताश्रयजुस इति भावः। अबोभू उस् इति स्थिते 'जुसि च' इति गुणमाशङ्क्य आह–नित्यत्वाद्वुगिति। 'जुसि च' इति गुणापेक्षयेत्यर्थः। अबोभूवुरिति। न चाभ्यस्ताश्रयजुसं बाधित्वा परत्वात् 'अदभ्यस्तात्' इत्यदादेशः स्यादिति शङ्क्यम्, अभ्यस्ताश्रयजुसः अदादेशापवादत्वादिति भावः। अबोभूवीः–अबोभोः। अबोभूतम्। अबोभूत। अबोभूवम्। अबोभूव। अबोभूम। इत्यादीति। अबोभविष्यताम्। अबोभविष्यन् इत्यादि व्यक्तम्। पास्पर्धीतीति। स्पर्धधातोः यङ्लुकि द्विर्वे 'शर्पूर्वाः खयः' इति वकारस्थेवे 'दीर्घोऽकितः' इति दीर्घं पास्पर्ध् इत्यस्माल्लटस्तिपि शपि शपो लुकि 'यङो

'हुझल्भ्यो हेर्धिः' (सू २४२५)। पास्पर्धि। लङ्। अपास्पर्त्-अपास्पर्द्। सिपि 'दश्च' (सू २४६८) इति रुत्वपक्षे 'रो रि' (सू १७३) अपास्पाः। जागार्द्धि। जाधार्त्सि। अजाघात्। सिपि रुत्वपक्षे-अजाघाः। नाथृ-नानार्त्ति। नाना-

---

र्धा' इति ईडागमे रूपम्। इडभावे त्वाह—पास्पर्द्धीति। पास्पर्ध् ति इति स्थिते 'झषस्तथोर्धोऽधः' इति तकारस्य धकारः। 'झलां जश् झशि' इति पूर्वधकारस्य द इति भावः। मिप्यस्मस्सु पास्पर्धीमि—पास्पर्द्धिम। पास्पर्द्ध्वः। पास्पर्द्ध्मः। पास्पर्धाञ्चकार। पास्पर्धिता। पास्पर्धिष्यति। पास्पर्धीतु। पास्पर्द्धं। पास्पर्द्धात्। पास्पर्धंतु। हेरपित्त्वादीडभावं सिद्धवत्कृत्य आह—हुझल्भ्य इति। पास्पर्धीति। हेर्धिभावे 'झरो झरि' इति वा धलोपः। पास्पर्धात् पास्पर्धम्। पास्पर्धानि। पास्पर्धाव। पास्पर्धाम। लडिति। उदाहरणसूचनम्। ईटि अपास्पर्धीत् इति सिद्धवत्कृत्य ईडभावे आह—अपास्पर्तेति। अपास्पर्ध् त् इति स्थिते झलन्तत्वादिना तकारलोपे 'वाऽवसाने इति चर्त्वविकल्प इति भावः। अपास्पर्धात्। अपास्पर्धुः। सिपि तु अपास्पर्ध् स् इति स्थिते जश्त्वे 'दश्च' इति दकारस्य रुत्वपक्षे अपास्पर् र् स् इति स्थिते झलन्तत्वादिना सकारलोपे 'रो रि' इति रेफलोपे 'ढ्रलोपे' इति दीर्घे विसर्गे अपास्पाः इति रूपम्। नच दीर्घे 'दश्च' इति रुत्वमसिद्धमिति शङ्क्यम्, 'ढ्रलोपे' इति सूत्रे ढ्रग्रहणेन लण्सूत्रे 'जगृधेः अजघाः' इति भाष्यप्रयोगेण च पूर्वत्रासिद्धमित्यस्याऽप्रवृत्तिबोधनात्। अपास्पर्धम्। अपास्पर्ध्व। अपास्पर्द्ध्मं। लिङि—पास्पर्ध्यात्। पास्पर्ध्यातां। पास्पर्ध्यासुः, इत्यादि। लुङि अपास्पर्ध् स् इति स्थिते 'अस्तिसिचः' इति नित्यमिट्। 'इट ईटि' इति सलोपः। अपास्पर्धीत्। अपास्पर्धिष्टाम्। अपास्पर्धिषुः। अपास्पर्धिष्यत्। गाधबाधोर्यङ्गुणस्तात् झटस्तिपि इट्पक्षे जागाधीतीति सिद्धवत्कृत्य ईडभावे आह—जागार्द्धीति। जागाध् ति इति स्थिते 'झषस्तथोः' इति तकारस्य धः। जागाद्धः। जागाधति। सिपि ईट्पक्षे-जागाधीषीति सिद्धवत्कृत्य ईडभावपक्षे आह—जाघार्त्सीति। जागाध् सि इति स्थिते 'एकाचो बशः' इति भस्य धस्। धस्य चर्त्वमिति भावः। जागाद्धः। जागाद्ध। जागाद्धि। जागाद्धः। जागाद्धम्। जागाद्ध। जागाधानि। जागाधाव। जागाधाम। लङि-अजागाधीत्। अजाघात्। अजागाद्धाम्। अजागाधुः। सिपि ईट्पक्षे अजागाधीरिति सिद्धवत्कृत्य ईडभावपक्षे आह—सिपीति। अजागाध् स् इति स्थिते झषभावे, जश्त्वे, 'दश्च' इति दस्य रुत्वपक्षे, झलन्तत्वादिलोपे, रेफस्य विसर्गे, अजाघाः इति रूपमित्यर्थः। पक्षे अजाघात् इति बोध्यम्। अजागाद्धाम्। इत्यादि। जागाध्यात्। लुङि 'अस्तिसिचः' इति चिल्य मीट्। अजागाधीत्। अजागाधिष्टाम् इत्यादि। नाथृ इति। उदाहरणसूचनम्।

तः । दध-दादद्धि । दाद्धः । दाधर्त्ति । अदाधत् । अदादधुः । अदाधः । अदाधत् । लुङि, अदादाधीत्-अदादधीत् । चोस्कुन्दीति । चोस्कुन्ति । अचोस्कुन् । अचोस्कुन्ताम् । अचोस्कुन्दुः । मोमुदीति । मोमोत्ति । मोमोदाञ्चकार । मोमोदितम् अमोमुदीत्-अमोमोत् । अमोमुत्ताम् । अमोमुदुः । अमोमुदीः-अमोमोः ।

वर्गद्वितीयान्तोऽयं धातुः न झषन्तः । तस्य ईट्पक्षे नानाथीति इति सिद्धवत्कृत्य ईडभावपक्षे आह—नानात्तीति । नानाथ् ति इति स्थिते 'खरि च' इति थस्य चर्त्वम् । 'झषस्तथोः' इति 'एकाचो बशो भष्' इति च न, अझषन्तत्वात् । नानात्तः । नानाथति । नानाथीवि । नानाथिस । नानात्थः । नानाथ । नानाथीमि । नानाथ्मि । नानाथ्वः । नानाथ्मः । लोटि नानाथीतु । नानात्तु । हेर्धिः । थस्य जश्त्वेन दः । नानाद्धि । नानाथानि । नानाथाव । नानाथाम । लङि—अनानाथीत् । अनानात् । अनानात्ताम् । अनानाथुः । इत्यादि । लुङि 'अस्तिसिचः' इति नित्यमीट् । अनानाथीत् । अनानाथिष्टाम् । इत्यादि । दधेति । उदाहरणसूचनमिदम् । दधातोर्लटस्तिपि ईट्पक्षे दादधीतीति सिद्धवत्कृत्य ईडभावपक्षे आह—दादद्धीति । दधाध् ति इति स्थिते 'झषस्तथोः' इति तकारस्य धः । दादधीतीति सिद्धवत्कृत्य आह—दाधर्त्तीति । 'एकाचो बशः' इति दस्य भष् । धस्य 'खरि च' इति चर्त्वमिति भावः । दादत्थः । दादत्थ । दादधिम । इत्यादि । लोटि दादधीतु । दादद्धु । दादद्धि । दादधानि । झिलस्तिपि ईटि अदादधीत् इति सिद्धवत्कृत्य ईडभावे आह—अदाधत् इति । अदादध् त् इति स्थिते हल्ङ्यादिलोपे भाष्भावे धस्य 'वावसाने' इति चर्त्वविकल्प इति भावः । सिपि ईटि अदादधीरिति सिद्धवत्कृत्य ईडभावे आह—अदाध इति । अदादध् स् इति स्थिते जश्त्वे 'दश्च' इति दस्य रुत्वे हल्ङ्यादिना सलोपे रुत्वजश्त्वयोरसिद्धत्वेन झषन्तत्वात् दस्य भवितेति भावः । अदाधदिति पक्षे रूपम् । 'अस्तिसिचः' इति नित्यमीडिति मत्वा आह—अदादधीदिति । 'अतो हलादेः' इति वृद्धिविकल्पः । अदादधिष्टाम् । इत्यादि । 'स्कुदि आप्रवणे' इदित्त्वान्नुम् । अस्माद्यङ्लुकि उदाहरति—चोस्कुन्दीति । ईटि रूपम् । तदभावे त्वाह—चोस्कुन्तीति । 'झरो झरि सवर्णे' इति दकारस्य लोपविकल्पः । इह यङो लुगित्वादिदित्त्वाच्च यङं तिङं चाश्रित्य नलोपो न । लङि इट् पक्षे अचोस्कुन्दीदिति सिद्धवत्कृत्य ईडभावे आह—अचोस्कुन्निति । अचोस्कुन् दू त् ईति स्थिते हल्ङ्यादिना तकारलोपे दकारस्य संयोगान्तलोपः । लुङि तु 'अस्तिसिचः' इति नित्यमिट् । अचोस्कुन्दीत् । अचोस्कुन्दिष्टाम् । इत्यादि । मोमुदीतीति । 'मुद हर्षे' ईटि 'नाभ्यस्तस्याचि पिति सार्वधातुके' इति लघूपधगुणो न मोमोत्तीति । ईडभावे अप्पराकरत्वाभावात् 'नाभ्यस्तस्याचि' इति लघूपधगुणनिषेधो न । मोमीदितेति । 'न क्ङिसार्वधातुकोः' इति गुणनिषेधस्तु न, भारद्वाजनियमात् क्ङिति सार्वधातुके परे एव तन्निषेधस्य प्रवृत्तेः, इह च यङ्लुकः अनैमि-

अमोमोत् । लुङि गुणः । अमोमोदीत् । चोकूर्ति । चोकूर्दीति । लङ् । तिप् । अचोकूर्त् । अचोकूर्दीत् । सिप्पक्षे-अचोकूः । अचोखूः । अजोगूः । वनीवश्चीति । वनीवङ्क्ति । वनीवक्तः । वनीवचति । अवनीवश्चीत् । अवनीवन् । जङ्गमीति । जङ्गन्ति । 'अनुदात्तोपदेशः' (सू २४२८) इत्यनुनासिकलोपः । जङ्गतः । जङ्गमति । 'म्वोश्च' (सू २३०९) । जङ्गन्मि । जङ्गन्वः । एकाज्ग्रहणेनोक्तत्वान्नेण्निषेधः । जङ्गमिता । अनुनासिकलोपस्याऽभीयत्वेनासिद्धत्वान्न हेर्लुक् । जङ्गहि । 'मो नो धातोः' (सू ३४१) । अजङ्गन् । अनुबन्धनिर्देशान्न च्लेरङ् । 'ह्यय्न्त—'

सिकत्वस्य उक्तत्वात् । लुङि गुण इति । सिज्निमित्तक इति शेषः । अतो 'नाभ्यस्तस्य' इति गुणनिषेधो न शङ्क्यः । चोकूर्तीति । कुर्द क्रीडायाम्, यङ्लुक् द्वित्वादि । ईडभावे 'उपधायां च' इति दीर्घः । अचोकूर्त् इति । लङस्तिपि अचोकूर्दत् इति स्थिते हल्ङ्यादिलोपे 'रात्सस्य' इति नियमान्न संयोगान्तलोपः इति भावः सिप्पक्षे इति । लङः सिपि ईडभावे अचोकूर्दस् इति स्थिते 'दश्च' इति रुत्वपक्षे हल्ङ्यादिना सलोपे 'रो रि' इति प्रथमरेफलोपे दीर्घे दकारस्थानिकरेफस्य विसर्गे अचोकूरिति रूपमित्यर्थः । अचोखूरिति । खुर्दं धातोर्यङ्लुगन्तात् लङः सिपि कूर्दवद्रूपम् । अजोगूरिति । गुर्दं धातोर्यङ्लुगन्तात् सिपि रूपम् । वनीवश्चीतीति । 'वञ्चु गतौ, अस्मात् 'नित्यं कौटिल्ये गतौ' इति यङन्तस्य लुक् । द्वित्वादि । 'नीग्वञ्चु' इत्यादिना अभ्यासस्य नीगागमः । यङो लुका लुप्तत्वान्न तदाश्रितो नलोपः । तिपः पित्त्वेन अङित्त्वान्न तदाश्रितोऽपि नलोपः । ईकारोच्चारणसामर्थ्यान्नीको न गुणः । अन्यथा निकमेव विदध्यात् । अत्र 'नीग्वञ्चु' इत्यनुबन्धनिर्देशाद्यङ्लुकि नीक् दुर्लभ इति शङ्क्यम्, तत्र यङ्लुकोः इत्यनुवृत्तिसामर्थ्येन अदोषादिति भावः । वनीवङ्क्तीति । ईडभावे चस्य कुत्वेन कः । नकारस्थानिकानुस्वारस्य परसवर्णो ङकार इति भावः । वनीवक्त इति । तसो ङित्त्वादिह स्यादेव 'अनिदिताम्' इति नलोपः । लोटि वनीवञ्चीतु—वनीवङ्क्तु—वनीवक्तात् । वनीवक्ताम् । वनीवचतु । हेर्धिः । अपित्त्वेन ङित्त्वान्नलोपः । अत एव ईडपि न । वनीवर्धि । वनीवञ्चानि । आटः पित्त्वादङित्त्वान्नलोपो न । लङि तिपि ईट्पक्षे आह-अवनीवन्, वञ्चीदिति । ईडभावे त्वाह-अवनीवन् इति । हल्ङ्यादिना तलोपे चकारस्य संयोगान्तलोपः जङ्गमीतीति । गमेर्यङ्लुगन्तान्लटस्तिपि ईट् । 'नुगतोऽनुनासिकान्तस्य' इति नुक् । 'नश्च' इत्यनुस्वारः परसवर्णश्चेति भावः । तसि आह—अनुदात्तेति । अजङ्गमतीति । 'गमहन' इत्युपधालोप इति भावः । ननु गमेरनिट्कत्वात् प्रकृतिग्रहणे यङ्लुगन्तस्यापि ग्रहणाज्जङ्गमितेत्यत्र कथमिडित्यत आह—एकाज्ग्रहणेनेति । ननु 'जङ्गहीत्यत्र अनुनासिकलोपे कृते 'अतो हेः' इति लुक् स्यादित्यत आह—अनुनासिकलोपस्येति । लङस्तिपि अजङ्गमीदिति सिद्धवत्कृत्य ईडभावे आह-मो न इति । अजङ्गम् त् इति स्थिते हल्ङ्यादिना तलोपे 'मो नो धातोः' इति मस्य न इत्यर्थः । तदाह—अजङ्गन्निति ।

(सू २२९९) इति न वृद्धिः । अजङ्गमीत् । अजङ्गमिष्टाम् । हन्तेर्यङ्लुक् । 'अभ्यासाच्च' (सू २४३०) इति कुत्वं यद्यपि 'हो हन्तेः—' (सू ३५८) इत्यतो हन्तेः इत्यनुवर्त्य विहितम् । तथापि यङ्लुकि भवत्येवेति न्यासकारः । 'शितपा शपा' (प १३२ इति निषेधस्त्वनित्यः । 'गुणो यङ्लुकोः' (सू २६३०) इति सामान्यापेक्षज्ञापकादिति भावः । जङ्घनीति-जङ्घन्ति । जङ्घतः । जङ्घ्नति । जङ्घनिता । शितपा निर्देशाज्जादेशो न । जङ्घहि । अजङ्घनीत्-अजङ्घन् । जङ्घन्यात् । आशिषि तु-वध्यात् । अवधीत् । अवधिष्टामित्यादि । वधादेशस्य द्वित्वं तु न भवति । स्थानिवत्त्वेन 'अनभ्यासस्य' इति निषेधात् । तद्धि समानाधिक-

---

अजङ्गताम् । अजङ्गग्मुः । अजङ्गन् । अजङ्गतम् । अजङ्गत । अजङ्गमम् । अजङ्गम्व । अजङ्गम्म । लुङि अजङ्गमीदित्यत्र 'पुषादिद्युताद्यलृदित' इत्यङमाशङ्क्य आह—अनुवर्त्तेति । हन्तेर्यङ्लुगिति । 'हिंसार्थे क्रियासमभिहारे गम्यर्थत्वे तु कौटिल्ये इति बोध्यम् । हन्तेरित्यनुवर्त्येति । तथाच 'शितपा शपा' इति निषेधात्कथमिह हन्तेः कुत्वमित्याक्षेपः । गुणः इति । 'गुणो यङ्लुकोः' इति ज्ञापकादित्यन्वयः । 'एकाचो द्वे प्रथमस्य' इत्यत्र एकाज्ग्रहणाद्यङ्लुकि द्विर्वचनस्याऽप्रवृत्त्या अभ्यासाऽभावात् 'गुणो यङ्लुकोः' इत्यभ्यासस्य गुणविधानं व्यर्थं सत् 'शितपा शपा' इत्यादिनिषेधस्य क्वचिद्यङ्लुकि अप्रवृत्तिं ज्ञापयतीत्यर्थः । नन्वेकाज्ग्रहणविधेरेव यङ्लुकि क्वचिदप्रवृत्तिज्ञापनलाभेऽपि हन्तेः इति शितपा निर्देशनिमित्तकनिषेधस्य कथं यङ्लुकि अप्रवृत्तिः स्यादित्यत आह–सामान्यापेक्षेति । 'गुणो यङ्लुकोः' इत्यभ्यासस्य गुणविधानमेकाज्ग्रहणस्यानित्यत्वं ज्ञापयत् तद्वचनोपात्तत्वसामान्यात् 'शितपा शपा' इत्यादिसर्वनिषेधानां यङ्लुकि क्वचिदप्रवृत्तिं ज्ञापयतीत्यर्थः । इति भाव इति । न्यासकृत इति शेषः । जङ्घनीतीति । 'नुगतः' इति नुक् । जङ्घतः इति । 'अनुदात्तोपदेश' इत्यनुनासिकलोपः । जङ्घ्नतीति । 'गमहन' इत्युपधालोपः । जङ्घनितेति । एकाज्ग्रहणादिण्निषेधो न । जङ्घहीत्यत्र 'हन्तेर्जः' इत्याशङ्क्य आह—शितपेति । अजङ्घन्निति । लङस्तिपि ईडभावे अजङ्घन् त् इति स्थिते हल्ङ्यादिलोप इति भावः । आशिषि तु वध्यादिति । जङ्घन्न इत्यस्मादाशीर्लिङि 'हनो वध लिङि' इति वधादेशः, प्रकृतिग्रहणेन यङ्लुगन्तस्यापि ग्रहणादिति भावः । अवधीदिति । जङ्घन् इत्यस्माल्लुङस्तिपि 'लुङि च' इति वधादेशे 'अस्तिसिचः' इति नित्यमीडिति भावः । ननु हनो यङ्लुगन्तात् आशीर्लिङो लुङस्तिपि द्वित्वात्प्रागेव वधादेशे कृते तस्य द्वित्वं कुतो न स्यादित्यत आह—वधादेशस्य द्वित्वं तु न भवतीति । कुत इत्यत आह—स्थानिवत्त्वेनेति । वधादेशात्परत्वादादौ द्वित्वे कृते सति कृतद्विर्वचनस्य स्थाने वधादेशः । तस्य च स्थानिवत्त्वेन साभ्यासतया 'अनभ्यासस्ये'ति निषेधान्न द्वित्वमित्यर्थः । ननु साभ्यासस्य स्थाने भवन् वधादेशः स्थानिवत्त्वेन साभ्यासोऽस्तु । द्वित्वं तु दुर्वारम् । साभ्यासत्वेऽप्यभ्यासाऽनात्मक-

रणं धातोर्विशेषणम्, बहुव्रीहिबलात् । आङ्पूर्वात्त 'आङो यमहनः' (सू २६९५) इत्यात्मनेपदम् । आजङ्घ्नते इत्यादि । 'उत्परस्य—' (सू २६३७) इति तपरत्वान्न गुणः । 'हलि च' (सू ३५४) इति दीर्घस्तु स्यादेव । तस्यासिद्धत्वेन तपरत्वनिवर्त्यत्वायोगात् । चञ्चुरीति–चञ्चूर्ति । चञ्चूर्तः । चञ्चुरति । अचञ्चुरीत् । अचञ्चूः । चङ्क्नीति–चङ्क्नन्ति । 'जनसन—' (सू २५०४) इत्यात्वम् । चङ्क्नातः । 'गमहन—' (सू २३६३) इत्युपधालोपः । चङ्क्ष्नति । चङ्क्नाहि । चङ्क्नानि । अचङ्क्नीत् । अचङ्क्नन् । अचङ्क्ष्नुः । 'ये विभाषा' (सू २३१९) चङ्क्नायात् ।

स्यात् 'अनभ्यासस्ये'त्यनेन धातोरवयवस्याभ्यासस्य द्वित्वनिषेधादित्यत आह—तद्धीति । 'धात्ववयवस्य अभ्यासस्ये'ति नार्थः । किन्तु अनभ्यासो यो धातुः तदवयवस्यैकाच इत्येवम् अनभ्यासग्रहणं सामानाधिकरण्येन धातोर्विशेषणमित्यर्थः । नन्वेवमपि न अभ्यासः अनभ्यासः इति विग्रहे द्वित्वं दुर्निवारमेव, वधादेशस्य स्थानिवत्त्वेन साभ्यासत्वेऽप्यभ्यासानात्मकत्वादित्यत आह—बहुव्रीहिबलादिति । न विद्यते अभ्यासो यस्य धातोरिति बहुव्रीहिमाश्रित्य अनभ्यासस्येत्येतद्धातोः सामानाधिकरण्येन विशेषणमित्यर्थः । प्रकृते च वधादेशस्य स्थानिवत्त्वेन साभ्यासत्वादभ्यासहीनत्वाऽभावान्न द्वित्वमिति भावः । आङ्पूर्वात्तिति । 'यङ्लुगन्ताद्धनधातोरि'ति शेषः । 'आङो यमहनः' इत्यत्र हन्ग्रहणेन यङ्लुगन्तस्यापि ग्रहणम्, प्रकृतिग्रहणे यङ्लुगन्तस्यापि ग्रहणादिति भावः । उत्परस्येति । 'चर गतौ भक्षणे च' अस्माद्यङ्लुकि लटस्तिपि ईडभावे द्वित्वे 'चरफलोश्च' इत्वाभ्यासस्य नुक् । 'उत्परस्यातः' इत्युत्तरखण्डे अकारस्य उत्वम्, 'हलि च' इति दीर्घः । चञ्चूर्तीति रूपम् । तिपमाश्रित्य उकारस्य लघूपधगुणस्तु न, उदिति तपरकरणसामर्थ्यात् । अन्यथा 'उरित्युक्तेऽपि 'भाव्यमानोऽप्यु सवर्णान् न गृह्णाति' इत्येव दीर्घादिश्यावृत्तेरित्यर्थः । ननु उदिति तपरकरणाद्यथा गुणो निवर्तते तथा 'हलि च' इति दीर्घोऽपि निवर्तेत इत्यत आह—हलि चेति दीर्घस्तु स्यादेवेति । कुत इत्यत आह—तस्येति । 'हलि च' इति दीर्घशास्त्रस्य त्रैपादिकत्वेन 'उत्परस्यातः' इति शास्त्रं प्रत्यसिद्धतया तपरकरणेन तन्निवृत्तेरसम्भवादित्यर्थः । वस्तुतस्तु गुणस्याऽपि बहिरङ्गतया असिद्धत्वात्तपरत्वनिवर्त्यत्वं न भवति । अत एव विप्रतिषेधसूत्रे भाष्ये 'उदोष्ठ्य' इत्युक्त्वा पोपूर्यते इत्यत्राभ्यासगुणो दृश्यमान उपपद्यते इति शब्देन्दुशेखरे प्रपञ्चितम् । अचञ्चूरिति । लङस्तिपि ईडभावे हल्ङ्यादिना तलोपे प्रत्ययलक्षणेन पदान्तत्वात् 'हलि च' इति वा 'वेरपृक्तस्ये'ति वा दीर्घः । नन्वु अवधारणे, अस्माद्यङ्लुकि उदाहरति—चङ्क्नीतीति । चङ्क्नातीति । हेरपित्त्वेन ङित्त्वात् 'जनसन' इत्यात्वम् । अचङ्क्नीदिति । 'अस्तिसिचः' इति त्रिस्यप्रीट् । 'मलो हलादेः' इति वृद्धिविकल्पः । युधातोः । योगोतीत्यत्र, ङ्तो

चङ्क्रन्यात्। अचङ्क्रनीत्। अचङ्क्रानीत्। 'उतो वृद्धिः—' (सू २४४३) इत्यत्र 'नाभ्यस्तस्य' इत्यनुवृत्तेरुतो वृद्धिर्न। योयोति। योयवीति। अयोयवीत्-अयोयोत्। योयुयात्। आशिषि दीर्घः। योयूयात्। अयोयावीत्। नोनवीति। नोनोति। जाहेति। जाहाति। 'ई हल्यघोः' (सू २४९७) जाहीतः। इह 'जहातेश्च' (सू २४९८) 'आ च हौ' (सू २४९९) 'लोपो यि' (सू २५००) 'घुमास्था' (सू २४६१) एर्लिङि' (सू २३७४) इत्येते पञ्चापि न भवन्ति। श्तिपा निर्देशात्। जाहति। जाहासि। जाहेषि। जाहीथः। जाहीथ। जाहीहि। अजाहेत्। अजाहात्। अजाहीताम्। अजाहुः। जाहीयात्। आशिषि जाहायात्। अजाहासीत्। अजाहासिष्टाम्। अजाहिष्यत्। लुका लुसे प्रत्ययलक्षणाभावात् 'स्वपिस्यमि—'

वृद्धिः' इति वृद्धिमाशङ्क्य आह—उतो वृद्धिरित्यत्रेति। आशिषि दीर्घः इति। 'अकृत्सार्वधातुकयोः' इत्यनेनेति भावः। अयोयावीदिति। ईटि सिचि वृद्धिः। नुधातोरपि युधातुवद्रूपाणीति मत्वा आह—नोनवीतीति। हाङ्हाकोर्यङ्लुकि तुल्यानि रूपाणि किन्त्वप्रयुक्तात्मनेपदस्य यङ्लुकि अप्रवृत्तेरुक्तत्वादिति मत्वा आह—जाहेतीति। हाङ्हाकोर्यङ्लुगन्तालटस्तिपि ईटि आदृगुणे रूपम्। नच हाङोऽभ्यासस्य 'भृञामित्' इति इत्वम्, हाकस्तु तन्नास्ति, भृञ् माङ् ओहाङ् एषां त्रयाणामेव तत्र प्रहणात्। तत् कथं हाङ्हाकोस्तुल्यत्वमिति शङ्क्यम्, "भृञामित्" इत्यस्य इलावेव प्रवृत्तेः। न च अकित इति निषेधात् हाकोऽभ्यासस्य दीर्घाभावात् कथमुभयोस्तुल्यरूपत्वमिति वाच्यम्, क् इत् यस्य सः कित्, न विद्यते कित् यस्य स अकित्, तस्य अकित इति बहुव्रीहिगर्भबहुव्रीह्याश्रयणात्। इह च हाको धातोः कित्त्वेऽपि न किद्वत्त्वम्। तदभ्यासस्य तु दूरेतरां न किद्वत्त्वम्, 'द्विःप्रयोगो द्विर्वचनं षाष्ठम्' इति सिद्धान्तात्। बहुव्रीह्याश्रयणसामर्थ्यादेव व्यपदेशिवत्त्वेन हाको न किद्वत्त्वम्। अतो हाकोऽप्यभ्यासदीर्घो निर्बाध इति भावः। जाहीत इति। हाङ्हाकोस्तसि ईत्वमेव। ननु हाको 'जहातेश्च' इति इत्वविकल्पः कुतो नेत्यत आह—इहेति। हलादौ किङति सार्वधातुके 'जहातेश्च' इति इत्वविकल्पः, तथा 'आ च हौ' इति जहातेर्हौ परे आत्वमित्त्वमीत्वं च, तथा 'लोपो यि' इति यादौ सार्वधातुके जहातेराल्लोपश्च, तथा 'घुमास्था' इति जहातेर्हलादौ किङ्त्यार्द्धधातुके ईत्वं च, तथा 'एर्लिङि' इति जहातेरार्द्धधातुके किति लिङ्येरं च इत्येते पञ्चापि विधयो यङ्लुकि न भवन्तीत्यर्थः। कुत इत्यत आह—श्तिपेति। एवञ्च 'जाहीत' इत्यत्र 'ई हल्यघोः' इति ईत्वमेव, न त्वित्वविकल्प इति स्थितम्। जाहतीति। 'अद्भ्यस्तात्' इत्यदादेशः, 'श्नाभ्यस्तयोः' इत्यात्वलोपः। जाहाञ्चकार। जाहिता। जाहिष्यति। जाहेतु। जाहातु। जाहितात्। जाहीताम्। जाहतु। जाहोहीति। हेरपित्त्वेन ङित्त्वाभावादीत्वम्। इह 'आ च हौ' इति न। विधिलङ्यह—जाहीयादिति। 'ई हल्यघोः' इति ईत्वमेव। 'लोपो यि' इत्यात्वलोपस्तु न। आशिषि जाहायादिति। इह 'घुमास्था' इति ईत्वं न। 'एर्लिङि' इत्यपि न। अजाहासीदिति। 'श्नमस्म' इति सगिटौ।

(सू २६४५) इत्युत्वं न । रुदादिभ्यः—' (सू २४७४) इति गणनिर्दिष्टत्वादिञ् । सास्वपीति । सास्वपि । सास्वपः । सास्वपति । असास्वपीत् असास्वप् । सास्वप्यात् । आशिषि तु 'वचिस्वपि—' (सू २४०९) इत्युत्वम् । सासुप्यात् । असास्वापीत् । असास्वपीत् । **२६५२ रुग्रिकौ च लुकि ७।४।९१॥** ऋदुपधस्य धातोरभ्यासस्य रुक् , रिक् , रीक् एते आगमाः स्युर्यङ्लुकि । **२६५३ ऋत श्च ७।४।९२॥** ऋदन्तधातोरपि तथा । वर्वृतीति । वरिवृतीति । वरीवृतीति । वर्वर्ति । वरिवर्ति । वरीवर्ति । वर्वृतः–वरिवृतः । वरीवृतः । वर्वृतति । वरिवृतति । वरीवृतति । वर्वर्तामास–वरिवर्तामास–वरीवर्तामास । वर्वर्तिता–वरिवर्तिता । वरीवर्तिता । गणनिर्दिष्टत्वात् 'न वृद्भ्यश्चतुर्भ्यः' (सू २३४८) इति न । वर्वर्तिष्यति । वरिवर्तिष्यति । वरीवर्तिष्यति । अवर्वृतीत् । अवरिवृतीत् । अवरीवृतीत् । अवर्वर्त् । अवरिसर्त्—अवरीवर्त् । सिपि 'दश्च' (सू २४६७) इति रुत्वपक्षे 'रो रि' (सू १७३) अवर्वाः । अवरिवाः । अवरीवाः । गणनिर्दिष्टत्वादङ् न । अवर्व-

---

'णि ष्वप शये' । अस्य यङ्लुकि 'स्वपिस्यमिव्येञां यङि' इति सम्प्रसारणमाशङ्क्य आह—लुका लुप्ते इति । उत्वं नेति । यस्य सम्प्रसारणं नेत्यर्थः । ईडभावपक्षे 'रुदादिभ्यः' इति इटमाशङ्क्य आह—रुदादिभ्य इति । असास्वप् इति । लङस्तिपि ईडभावे हल्ङ्यादिलोपः । असास्वापीत् इति । 'अतो हलादेः' इति वृद्धिविकल्पः । 'अस्तिसिचः' इति नित्यमीट् रुग्रिकौ च लुकि । 'रीगृदुपधस्य च' इत्यतः ऋदुपधस्येत्यनुवर्तते । रिगपि इह चकारात् समुच्चीयते । 'अभ्यासस्य च' इत्यतः अभ्यासस्येत्यनुवर्तते । 'गुणो यङ्लुकोः' इत्यतः यङ्ग्रहणं च । तदाह—ऋदुपधस्येत्यादिना । रुकि उकार उच्चारणार्थः । रिकि तु इकारः श्रूयत एव । एवं रीकि ईकारश्च, व्याख्यानात् । ऋतश्च । तथेति । अभ्यासस्य रुक् रिक् रीक् एते आगमाः स्युः यङ्लुकीत्यर्थः । 'वृतु वर्तने' अस्माद्यङ्लुगन्तात् वर्तृत् इत्यस्माल्लटस्तिपि ईट्पक्षे अभ्यासस्य क्रमेण रुकं रिकं रीकं चोदाहरति—वर्वृतीति वरिवृतीति वरीवृतीति इति । इट्पक्षे 'नाभ्यस्तस्याचि पिति सार्वधातुके' इति निषेधान्न लघूपधगुणः । ईडभावेऽपि रुगाद्यागमत्रयमुदाहरति—वर्वर्तीत्यादि ॥ इति नेति । इण्निषेधो नेत्यर्थः । लोटि वर्वृतीतु-वर्वर्तु-वर्वृत्तात् वर्वृत्ताम् वर्वृततु । वर्वृद्धि । वर्वर्तानि । लङस्तिपि ईटि आह—अवर्वृतीदिति ॥ ईडभावे त्वाह—अवर्वर्त् इति । हल्ङ्यादिना तिपो लोपः । 'रात्सस्य' इति नियमात् संयोगान्तलोपः । अवर्वा इति । लङः सिपि अवर्वर्त् स् इति स्थिते जश्त्वे 'दश्च' इति डकारस्य रुत्वे 'रो रि' इति पूर्वरेफस्य लोपे ढ्रलोपे इति दीर्घे हल्ङ्यादिना सिपो लोपे रेफस्य विसर्गे इति भावः । अङ् नेति । 'पुषादिद्युतादि' इत्यनेनेति शेषः । 'अस्तिसिचः' इति नित्यमीट् । अथ 'डु कृञ् करणे' इति धातोरुदाहरति—चर्करीती-

तीत्। अवरिवर्तीत्। अवरीवर्तीत्। चर्करीति। चर्कर्ति। चरिकर्ति। चरीकर्ति। चर्कृतः। चर्कति। चर्करांचकार। चर्करिता। अचर्करीत्। अचर्कः। चर्कर्यात्। आशिषि रीङ्। चर्किर्यात्। लुङि अचर्कारीत्। 'ऋतश्च' (सू २६५३) इति तपरत्वान्नेह। कृ विक्षेपे। चाकर्ति। तातर्ति। तातीर्तः। तातिरति। तातीर्हि। तातराणि। अतात्तरीत्। अतातः। अतातीर्ताम्। अतातरुः। अतातारीत्। अतातारिष्टामित्यादि। अर्तेर्यङ्लुकि द्वित्वेऽभ्यासस्योरदत्वं रपरत्वम्। 'हलादिः शेषः' (सू २१७९)। रुक्। रिम्रीकोस्तु 'अभ्यासस्यासवर्णे' (सू २२९०) इति इयङ्। अरर्ति-अरियर्ति। अररीति। अरियरीति। अर्क्तः। अरियृतः। झि अत्। यण्।

स्यादि। चर्कृयादिति। विधिलिङस्तिङः सार्वधातुकत्वात् 'अकृत्सार्वधातुकयोः' इति दीर्घो न। आशिषीति। आशीर्लिङ आर्धधातुकत्वात् 'रिङ् शयग्लिङ्क्षु' इति रिङिति भावः। लुङि अचर्कारीरिति। सिचि वृद्धिः। ऋतश्च इति तपरत्वान्नेहेति। 'कृग्रिम्रीक' इति शेषः। चाकर्तीति। ईडभावे रूपम्। न चाभ्यासहल्त्वाद्वे 'रीगृत्वतः' इति रीक् शङ्क्यः, नित्यत्वादुरदत्वस्य प्राप्तेः। चाकीर्तः चाकिरति इत्यादि। ङित्त्वादगुणाभावे ऋत इत्वं रपरत्वम्। ईट्टि चाकरीति चाकीर्तः चाकरति। चाकराञ्चकार। चाकरिता। चाकर्तु-चाकीर्तात् चाकिरतु। चाकीर्हि। चाकिराणि। लङि अचाकरीत्। अचाकः। अचाकीर्ताम्। अचाकरुः। विधावाशिषि च चाकीर्यात्। यासुटो ङित्त्वाद्गुणः। इत्वं 'हलि च' इति दीर्घः। चाकीर्यातां। चाकीर्यास्ताम् इत्यादि। लुङि अचाकारीत्। अचाकारिष्टाम् इत्यादि। एवं 'तृ प्लवनतरणयोः' इत्यस्यापि रूपाणि। अद्वैतदीपिकायां तु 'चोथं 'नावतरीतर्ती'ति लेखकप्रमादः। 'चोथं तु नावतातर्ती'ति पाठः प्रामाणिकः। अर्तेरिति। 'सूचिसूत्रि' इत्यादिना ऋधातोर्यङ्। 'तस्य लुक्। व्यपदेशिवत्त्वेन ऋ इत्यस्य आदिभूतादचः परत्वात् द्वितीयैकाच्त्वाच्च द्वित्वम्। अभ्यासऋवर्णस्य अरत्वे रपरत्वे अर् ऋ इति स्थिते अभ्यासस्य रुक्। लटस्तिपि ईडभावे अर् ऋ ति इति स्थिते हलादिशेषेण रेफस्य निवृत्तिः। अ ऋ इति स्थिते अभ्यासस्य रुक्। लटस्तिपि ईडभावे अर् ऋ ति इति स्थिते, तिपि, ऋकारस्य गुणे, अकारे, रपरे सति, अरर्तीति रूपमित्यर्थः। रिम्रीकोस्त्विति। यङ्लुकि द्वित्वे उरदत्वे हलादिशेषे अ ऋ इति स्थिते रिकि रीकि च कृते तिपि उत्तरखण्डस्य ऋकारस्य गुणे अकारे रपरे कृते अरि अर्ति अरी अर्तीति स्थिते अभ्यासे रेफादिवर्णस्य यणं बाधित्वा 'अभ्यासस्यासवर्णे' इति इयङि अरियर्तीति रिम्रीकोस्तुल्यं रूपमित्यर्थः। अथ लटस्तिपि ईट्पक्षे आह-अररीति अरियरीति। अर्क्तः इति। रुकि तपि रूपम्। ङित्त्वाद्गुणः। अरियृत इति। द्वित्वे उरदत्वे हलादिशेषे अ ऋ तस् इति स्थिते रिकि रीकि च कृते इयङादेशे रूपम्। झि अदिति 'झि' इत्यविभक्तिकनिर्देशः उदाहरणसूचनार्थः। 'अदभ्यस्तात्' इति झेः अदादेश इति यावत्। यणिति। रुकि

रुको 'रो रि' (सू १७३) इति लोपः। न च तस्मिन्कर्तव्ये यणः स्थानिवत्वम्। पूर्वत्रासिद्धे तन्निषेधात्। आरति। अरियर्ति। लिङि श्तिपा निर्देशात् "गुणोऽर्ति—" (सू २३८०) इति गुणो न। रिङ्। रलोपः दीर्घः। आरियात्। अरिरियात्। गृहू ग्रहणे जगृहीति। जगर्ढि। जगृढः। जगृहति। अजगर्ट्।

कृते अर् ऋ अति इति स्थिते ऋकारस्य यण् रेफ इत्यर्थः। तथाच अर् र् अतीति स्थिते आह—रुको रो रीति लोप इति। ननु रेफस्य लोपे कर्तव्ये यणादेशसम्पन्नस्य रेफस्य 'अचः परस्मिन्' इति स्थानिवत्त्वात् ऋकारपरकत्वाद्रेफपरकत्वाऽभावात् कथं पूर्वरेफस्य लोप इत्यत आह—पूर्वत्रासिद्धे तन्निषेधादिति। पूर्वत्रासिद्धीयकार्यं कर्तव्ये स्थानिवत्त्वनिषेधादित्यर्थः। आरतीति। अर् र् अति इति स्थिते पूर्वरेफस्य लोपे सति 'ढ्रलोपे' इति दीर्घः। नच यणः स्थानिवत्त्वं शङ्क्यम्, दीर्घविधौ तन्निषेधादिति भावः। अरियर्तीति। द्विर्त्वे उरदत्वे हलादिशेषे रिकि रीकि च कृते, परत्वाद्भ्यासस्य इयङि, ततो यणि रिग्रीकोस्तुल्यमेव रूपमित्यर्थः। अरर्षि। अरियर्षि। अररीषि। अरिरीषि। अर्ऋंथः। अरियृथः। अरर्मि। अरियर्मि। अररीमि। अरियरीमि। अर्ऋंवः—अरियृवः। अरराऋकार। अरियराऋकार। अररिता। अरियरिता। अररिष्यति। अरियरिष्यति। अरर्तु। अरियर्तु। अररीतु। अरियरीतु। अर्ऋतात्। अरियृतात्। अर्ऋंताम्-अरियृताम्। आरतु। अरियृतु। अर्ऋंहि। अरियृहि। अररार्णि—अरियराणि। अरराव। अरियराव। लङि-आरः—आरियः। आररीत्—आरियरीत्। आर्ऋंताम्—आरियृताम्। आररुः—आरियरुः। आरः—आरियः। आररीः—आरियरीः। आर्ऋंतम्—आरियृतम्। आर्ऋंत—आरियृत। आररम्। आरियरम्। आर्ऋंव। आरियृव। विधिलिङि-अर्ऋंयात्। अरियृतात्। अर्ऋंयाताम्। अर्ऋंयुः—अरियृयुः इत्यादि। आशीर्लिङि विशेषमाह-लिङि श्तिपेति। रुकि अर् ऋ यात् इति स्थिते अर्ति इति श्तिपा निर्देशात् 'गुणोऽर्ति' इति गुणो नेत्यर्थः। रिङीति। 'ऋकारस्ये'ति शेषः। तथाच अर् रि यात् इति स्थिते आह—दीर्घः इति। 'रो रि' इति लोपे 'ढ्रलोपे' इति दीर्घ इत्यर्थः। तथाच परिनिष्ठितमाह—आरियादिति। रिग्रीकोस्त्वाह—अरियियादिति। अरि ऋ यात, अरी ऋ यात् इति स्थिते इवर्णस्य इयङ् ऋकारस्य रिङ्। 'लोपो व्योः' इति यलोपस्तु न' बहिरङ्गत्वेन रिङोऽसिद्धत्वात् 'अचः परस्मिन्' इति स्थानिवत्त्वाच्च। 'न पदान्त' इति निषेधस्तु न शङ्क्यः, 'ज्वरदीर्घयलोपेषु लोपरूपाऽजादेश एव न 'स्थानिवत्' इत्युक्तेरित्यलम्। लुङि-आरारीत्। आरियारीत्। लृङि आररिष्यत्—आरियरिष्यत्। गृहू ग्रहणे इति। ऋदुपधोऽयम्। यङ्लुकि द्विर्त्वे उरदत्वे हलादिशेषे अभ्यासस्य रुग्रिग्रीकः। तदाह—जगृहीतीत्यादि। ईट्पक्षे 'नाभ्यस्तस्याचि पिति सार्वधातुके' इति लघूपधगुणनिषेधः। ईडभावे त्वाह—जगर्ढि इत्यादि। जगृह् ति स्थिते लघूपधगुणे रपरत्वे ढत्वधत्व

गृह्णातेस्तु जाग्रहीति-जाग्राढि । तसादौ ङिन्निमित्तं सम्प्रसारणम् । तस्य बहिरङ्गत्वेनासिद्धत्वान्न रुगादयः । जागृढः । जागृहति । जाग्रहीषि—जाग्रक्षि । लुटि-जाग्रहिता । 'ग्रहोऽलिटि-' (सू २५६२) इति दीर्घस्तु न । तत्र एकाच इत्यनुवृत्तेः । माधवस्तु दीर्घमाह । तद्भाष्यविरुद्धम् । जर्गृधीति—जर्गर्द्धि । जर्गृद्धः । जर्गृधति ।

ष्टुत्वढलोपाः । 'यणो मयः' इति शिष्टस्य दस्य द्वित्वविकल्पः । एवं जरिगर्ढि—जरीगर्ढि । जगृंढः इति । ढक् ढत्वधत्वष्टुत्वढलोपाः । ढित्त्वान्न गुणः । एवं जरिगृढः जरीगृढः । जगृंढतीति । 'अदभ्यस्तात्' इत्यत् । जगृंहीषि-जरिगृहीषि-जरीगृहीषि । 'नाभ्यस्तस्याचि पिति' इति न लघूपधगुणः । जर्घर्षि-जरिघर्षि-जरीघर्षि । जगृंढः-जरिगृढः-जरीगृढः । जगृंढ-जरिगृढ-जरीगृढ । जगृंहीमि-जरिगृहीमि-जरीगृहीमि । जर्गर्ह्मि-जरिगर्ह्मि-जरीगर्ह्मि । जगृह्वः-जरिगृह्वः-जरीगृह्वः । जगृह्मः-जरिगृह्मः-जरीगृह्मः । जगर्हाञ्चकार-जरिगर्हांचकार-जरीगर्हाञ्चकार । जगर्हिता-जरिगर्हिता-जरीगर्हिता । जगर्हिष्यति-जरिगर्हिष्यति-जरीगर्हिष्यति । जगृंहीतु-जरिगृहीतु-जरीगृहीतु । जगर्ढुं-जरिगर्ढुं-जरीगर्ढुं । जगृंढात्-जरिगृढात्-जरीगृढात् । जगृंढाम्-जरिगृढाम्-जरीगृढाम् । जगृंहतु-जरिगृहतु-जरीगृहतु । जगर्ढि-जरिगृढि-जरीगृढि । जगृंहाणि-जरिगृहाणि-जरीगृहाणि । लङि-अजगृंहीत्-अजरिगृहीत्-अजरीगृहीत् । ईडभावे तु अजगर्हं त् इति स्थिते हल्ङ्यादिना तलोपे हस्य ढत्वे गस्य भष् धकारः । अजर्घट् अजरिघट् अजरीघट् । एकाज्ग्रहणे सत्यपीह यङ्लुकि भष्, 'गुणो यङ्लुकोः' इत्यनेन 'ङितपा शपा' इति निषेधस्याऽनित्यत्वज्ञापनादित्याहुः । अजगृंढाम् ३ अजगृंहुः ३ । अजगृंहीः ३ अजर्घट् ३ अजगृंढम् ३ अजगृंढ ३ अजगृहम् ३ अजगृंह ३ अजगृह्म ३ । जगृह्यात् ३ । लुङि 'अस्तिसिचः' इति नित्यमिट् । अजगृंहीत् ३ । अजगर्हिष्यत् ३ । गृह्णातेस्त्वेवेत्ति । 'ग्रह उपादाने' इत्यस्मादित्यर्थः । अदुपधोऽयम् । ईटि आह—जाग्रहीतीति । यङो लुका लुप्तत्वात् तिपः पित्त्वाच्च 'ग्रहिज्या' इति सम्प्रसारणं नेति भावः । ईडभावे त्वाह—जाग्राढीति । जाग्रह् ति इति स्थिते ढत्वधत्वष्टुत्वढलोपदीर्घाः । जाग्रह् तस् इति स्थिते आह—तसादौवति । कृते सम्प्रसारणे ऋदुपधत्वात् रुगादीनाशङ्क्य आह—नस्येति । सम्प्रसारणस्येत्यर्थः । जागृढ इति । ढत्वधत्वष्टुत्वढलोपाः । 'ढ्रलोपे' इति दीर्घस्तु न, ऋकारस्यानण्त्वात् । जागृहति । सिपः पित्त्वात् सम्प्रसारणमिति मत्वा आह—जाग्रहीषि जाग्रक्षीति । ईडभावे, हस्य ढः, तस्य कः, सस्य षः, भष्भावः । जागृढः । जागृढ । जाग्रहीमि—जाग्रह्मि । जागृह्वः । जागृह्मः । इत्यनुवृत्तेरिति । 'एकाचो द्वे' इति सूत्रे हरदत्तेन तथोक्त्वादिति भावः । माधवस्त्विति । एकाऽग्रहणं नानुवर्तत इति तदाशयः । भाष्यविरुद्धमिति । 'एकाचो द्वे प्रथमस्य' इति सूत्रभाष्ये 'ग्रह उपादाने' इत्यस्माद्यङि सम्प्रसारणे अभ्यासस्य रीकि यङन्तात् जरीगृहिता, जरीगृहितम्, जरीगृहितव्यमित्यत्र इटो दीर्घाऽभावं सिद्धवत्कृत्य तत्र दीर्घमाशङ्क्य ग्रहोऽङ्गात्परस्य इटो दीर्घो विधीयते । 'जरीगृह'

जगर्धीषि—जघर्त्सि। अजगृधीत्। ईडभावे गुणः, हल्ङ्यादिलोपः, भष्भावः, जश्त्वचर्त्वे। अजघर्त्। अजगृद्धाम्। सिपि 'दश्च' (सू २४६८) इति पक्षे रुत्वम्। अजघाः। अजगर्धीत्। अजगर्धिष्टाम्। पाप्रच्छीति। पाप्रष्टि। तसादौ 'ग्रहिज्या–' (सू २४१२) इति सम्प्रसारणं न भवति। श्तिपा निर्देशात्। 'च्छ्वोः शू-

---

ह्यस्यङ्गं तच्च न ग्रहधातुरिति निरूप्याङ्गविशेषणसामर्थ्यादेव 'प्रकृतिग्रहणे यङ्लुगन्तस्याऽपि ग्रहणम्' इति नात्र प्रवर्तत इति समाहितम्। यङन्ते उक्तो न्यायो लङ्लुगन्तेऽपि जाग्रहितेत्यादौ समान इत्यादि प्रौढमनोरमायां ज्ञेयम्। न च हरदत्तमत एकाज्ग्रहणानुवृत्त्येवात्र दीर्घनिवारणे सति भाष्योक्तमिदं समाधानं नादरणीयमिति वाच्यम्, उपायस्य उपायान्तराऽदूषकत्वादित्यलम्। जाग्रहिष्यति। जाग्रहीतु-जाग्रहाणि। लङि अजाग्रहीत्। अजाग्रहट्। अजागृढाम्। अजागृढम्। अजागृढ। अजाग्रहम्। अजागृह्व। अजागृह्म। जागृह्यात्। लुङि-अजाग्रहीत्। 'ह्मयन्त' इति न वृद्धिः। 'अस्तिसिचः इति नित्यमीट्। अजाग्रहिष्यत्। 'गृधु अभिकाङ्क्षायाम्' अस्माद्यङ्लुगन्ताल्लटस्तिपि ईटि आह—जगृर्धीतीति। 'नाभ्यस्तस्य' इति न लघूपधगुणः। ईडभावे आह—जगर्द्धीति। जगृंध् ति इति स्थिते 'झषस्तथोः' इति तकारस्य धः। अघूपधगुणः रपरत्वम्। जगृद्धः इति। तसादौ क्ङित्त्वान्न गुणः। 'झषस्तथोः' इति तस्य धः। जगर्त्सीति। जगृंध् सि इति स्थिते, गस्य भष् धः, गुणः, रपरत्वं, धस्य चर्त्वम्। जगर्धिम ३-जगृंधीमि ३। अगृंध्वः ३। जगर्धीचकार ३। जगर्धिता ३। जगर्धिष्यति ३। जगृंधीतु ३-जगर्द्धुं ३-जगृंद्धात्। हौ जगृद्धि ३। जगृंधानि ३। लङि तिपि ईट् अजगृंधीत्। ईडभावे इति। अजगृंध् त् इति स्थिते पित्त्वादङित्त्वात् गुणे रपरत्वे हल्ङ्यादिना तकारलोपे पदान्तत्वात् गस्य भष् धकारः। धस्य जश्त्वेन दकारे तस्य 'वाऽवसाने' इति चर्त्वविकल्प इत्यर्थः। अजघर्त् इति। 'रात्सस्य' इति नियमान्न संयोगान्तलोपः। अजगृद्धाम्। अजगृंधुः सिपि ईडभावपक्षे अजगृंध् स् इति स्थिते, गुणे, रपरत्वे, हल्ङ्यादिलोपे भष्भावे, धस्य जश्त्वे, तस्य चर्त्वविकल्पे, पूर्ववदेव रूपं सिद्धवत्कृत्य आह—सिपि दश्चेति पक्षे रुत्वमिति। तथाच अजघर् र् इति स्थिते 'रो-रि' इति लोपे, 'ढ्रलोपे' इति दीर्घे, शिष्टरेफस्य विसर्गे, अजघाः इति रूपमित्यर्थः। अजगृद्धम्। अजगृद्ध। अजगृंधम्। अजगृंध्व अजगृभ्म। लुङि आह—अग्रगर्धीदिति। 'अस्तिसिचः' इति नित्यमीट्। पाप्रच्छीति। 'प्रच्छ ज्ञीप्सायाम्' अस्माद्यङ्लुगन्तालल्टस्तिपि ईटि रूपम्। ईडभावे आह—पाप्रष्टीति। 'ग्रश्चे'ति छ्रस्य षः। तकारस्य ष्टुत्वेन टः। 'च्छ्वोः' इति छ्रस्य शकारस्तु नात्र भवति, तस्य अनुनासिकादौ प्रत्यये क्वौ झलादौ किति ङिति च विहितत्वात्। नन्वत्र तिपः पित्त्वेन ङित्त्वाऽभावात् 'ग्रहिज्या' इति सम्प्रसारणाऽभावेऽपि तसो ङित्त्वात् सम्प्रसारणं दुर्वारमित्यत आह—

ड्—' (सू २५६१) इति शः। 'ब्रश्च—' (सू २९४) इति षः। पाप्रष्टः। पाप्रच्छति। पाप्रश्निम। पाप्रच्छ्वः। पाप्रश्मः। 'यकारवकारान्तानां तु ऊठ्भाविनां यङ्लुङ् नास्ति' इति 'च्छ्वोः-' (सू २५६१) इति सूत्रे भाष्ये ध्वनितम्। कैयटेन स्पष्टीकृतम्। इदं च 'च्छ्वोः—' (सू २५६१) इति यत्रोठ् तद्विषयकम्। 'ज्वर-

---

तसादाविति। ङितपेति। 'ग्रहिज्या' इति सूत्रे 'प्रच्छतीति ङितपा निर्देशादित्यर्थः। पाप्रच्छतीति। 'अदभ्यस्तात्' इत्यत्। प्राप्रच्छीषि। सिपि ईडभावे तु 'च्छ्वोः' इति छस्य न शः, सिपो झलादित्वेऽपि ङित्त्वाभावात्। किन्तु 'ब्रश्च' इति ष एव। 'षढोः' इति षस्य कः, सस्य षत्वम्। पाप्रक्षि पाप्रष्टः पाप्रष्ट। पाप्रश्मीति। अनुनासिकप्रत्ययपरकत्वात् छस्य 'च्छ्वोः' इति श इति भावः। पाप्रच्छ्वः इति। अत्र 'च्छ्वोः' इति न शः, वसो झलादित्वाभावात्। पाप्रश्मः इति। अनुनासिकादिप्रत्ययपरकत्वात् छस्य शः। प्राप्रच्छाञ्चकार। पाप्रच्छिता। पाप्रच्छिष्यति। पाप्रच्छीतु—प्राप्रष्टु—पाप्रष्टात्। प्राप्रष्टाम्। पाप्रच्छतु। 'हेर्द्धिः', अपित्त्वेन ङित्त्वात्, झलादित्वाच्च छस्य शः, तस्य 'ब्रश्च' इति षः, ष्टुत्वेन धस्य ढः, षस्य जश्त्वेन डः, प्राप्रड्ढि। पापच्छानि। लङि तिपि ईडि अपाप्रच्छीत्। ईडभावे तु अपाप्रच्छत् इति स्थिते झल्झयादिना तकोपे छस्य षः, तस्य जश्त्वचर्त्वे। अपाप्रट्। अपाप्रष्टाम्। अपाप्रच्छुः। अपाप्रच्छीः। अपाप्रट्। अपाप्रष्टम्। अपाप्रष्ट। अपाप्रच्छम्। अपाप्रच्छ्व। अपाप्रश्म। लिङि-पाप्रच्छ्यात्। लुङि अपाप्रच्छीत्। 'अस्तिसिचः' इति नित्यमीट्। अपाप्रच्छिष्यत्। ऊठ्भाविनामिति। 'भू प्राप्तौ' चुरादिराकृतीयः। तस्मात् 'आवश्यकाधमर्ण्ययोर्णिनिः' इति भविष्यदर्थे णिनिः। ऊठ् प्राप्स्यतामित्यर्थः। ऊठ्विषयाणामिति यावत्। ध्वनितमिति। सूचितमित्यर्थः। स्पष्टीकृतमिति। तथाहि 'च्छ्वोः' इति सूत्रे विकृद्ग्रहणानुवृत्तौ कांश्चित् दोषानुद्भाव्य परिहृत्य विकृद्ग्रहणानुवृत्तिं स्वीकृत्योक्तं भाष्ये-'एतावानेव विशेषः। अनुवर्तमाने विकृद्ग्रहणे 'छः षत्वं वक्तव्य' मिति। अत्र कैयटः-प्रष्टा पृष्टमित्यादौ 'च्छ्वोः' इति छस्य शत्वे कृते तस्य 'ब्रश्च' इति षत्वे ष्टुत्वमिति स्थितिः। तत्र विकृतीत्यनुवृत्तौ छस्य षत्वं न स्यात्। अतः छस्य षत्वं वक्तव्यमित्यर्थः। न च विकृद्ग्रहणानुवृत्तावत्र शत्वाभावेऽपि न दोषः। ब्रश्चादिना छस्य षत्वे इष्टसिद्धरिति वाच्यम्। 'च्छ्वोः' इत्यत्र 'छस्य षत्वं वक्तव्यम्' इत्यनेनैव प्रष्टेत्यादिसिद्धेः ब्रश्चादिसूत्रे छग्रहणं न कर्तव्यमित्याशयात्। नच प्रडिति क्विबन्तात् सोर्लोपे षत्वार्थं ब्रश्चादिसूत्रे छग्रहणमिति वाच्यम्। तत्रापि क्विब्निमित्तशादेशस्य दुर्निवारत्वात्। विच् तु प्रच्छधातोरनभिधानान्नास्ति। एवं चात्र भाष्ये 'ऊठ्भाविभ्यो यङ्लुङ्नास्ति' इत्युक्तप्रायम्। 'अन्यथा 'च्छोः' इत्यत्र विकृद्ग्रहणानुवृत्तौ दिवेर्यङ्लुकि तिवादौ ईडभावे लघूपधगुणे 'लोपो व्योः' इति वलोपे देदेवीत्यापद्यते अभावे रूपम्। तदनुवृत्तौ तु वस्य ऊठि देद्योति। देद्योषि इत्यादि रूपमिति विशेषस्य सत्त्वादेतावानेवेत्येवकारो विरुध्येत। अतः ऊठ्भाविनां यकारवकारान्तानां यङ्लुङ्-

त्वर—' (सू१६५४) इत्यूठ्भाविनोः स्त्रिविमव्योस्तु यङ्लुगस्त्येवेति न्याय्यम् । माधवादिसंमतं च । 'मव्य बन्धने', अयं यान्त ऊठ्भावी । 'तिवृ देवृ देवने' इत्यादयो वान्ताः । 'हय गतौ' । जाहयीति । जाहति । जाहतः । जाहयति । जाहयीषि । जाहसि । वलि लोपे यजादौ दीर्घः । जाहामि । जाहावः । जाहामः । 'हर्य गतिकान्त्योः' । जाहर्यीति । जाहर्ति । जाहर्तः । जाहर्यति । लोटि-जाहर्हि । अजाहः । अजाहर्ताम् । अजाहर्युः । 'मव बन्धने' । २६५४ ज्वरत्वरस्त्रिव्यविमवामुपधायाश्च ६।४।२०॥ ज्वरादीनामुपधावकारयोरूठ् स्यात्क्वौ झलादावनुनासिकादौ च प्रत्यये । अत्र क्ङिति इति नानुवर्तते । अवतेस्तुनि ओतुः इति दर्शनात् । अनुनासिकग्रहणं चानुवर्तते । अवतेर्मन्प्रत्यये तस्य टिलोपे ओम् इति

नास्तीति विज्ञायते इत्यलम् । इदं चेत 'छ्वोः' इति सूत्रेण यत्र ऊठ् प्रवर्तते तद्विषयकमेव इदम् उक्तं ज्ञापनमित्यर्थः । स्त्रिविमव्योस्त्विति । 'स्त्रिवु गतिशोषणयोः, 'मव्य बन्धने' इत्यनयोरित्यर्थः । न्याय्यमिति । उक्तज्ञापनस्य 'छ्वोः' इति सूत्रस्थभाष्यमूलकत्वादिति भावः । ननु ज्ञापनस्य सामान्यापेक्षत्वं कुतो नाश्रीयते इत्यत आह—माधवादिसम्मतं चेति । 'उक्तविशेषवत्त्व'मिति शेषः । ऊठ्भावीति । अतो नास्य यङ्लुगिति भावः । वान्ता इति । 'ऊठ्भाविन' इति शेषः । नैतेषामपि यङ्लुगिति भावः । ऊठ्भाविनामिति विशेषणस्य व्यावर्त्यं आह—हय गताविति । अस्य यान्तत्वेऽपि ऊठ्विषयत्वाभावदस्त्येव यङ्लुगिति भावः । जाहतीति । तिप ईडभावे 'लोपो व्योः' इति यलोपः । मिपि ईडभावे जाहय् मि इति स्थिते आह-वलि लोपे इति । ईटि जाहयीमि । जाहयाञ्चकार । जाहयिता । जाहयिष्यति । लोटि, जाहयीतु । जाहताद् । जाहताम् । जाहयतु । जाहहि । जाहयानि । जाहयाव । लङि-अजाहयीत् । अजाहत् । अजाहताम् । अजाहयुः । अजाहयीः । अजाहः । अजाहतम् । अजाहत । अजाहयम् । अजाहाव । अजाहाम । जाहय्यात् । लुङि 'ह्यन्त' इति न वृद्धिः । 'अस्तिसिचः' इति नित्यमिट् । अजाहयीत् । अजाहयिष्टाम् । अजाहयिष्यत् । जाहर्तीति । तिपि जाहर्य् ति इति स्थिते ईडभावे यलोपः । जाहर्तीति । हौ यलोपः । लङस्तिपि अजाहर्य् त् इति स्थिते यलोपः । हलन्त्यादिना तकारलोपः । रेफस्य विसर्ग इति मत्वा आह—अजाहः इति । सिप्यप्येवं रूपम् । ज्वरत्वरस्त्रिव्यविमवामुपधायाश्च । ज्वर, त्वर, स्त्रिवि, अवि, मव् एषां द्वन्द्वः । 'छ्वोः शूट्' इत्यतः वकारग्रहणम् , ऊठ्ग्रहणम्, अनुनासिके इति चानुवर्तते छस्य श इति नानुवर्तते, ज्वरादिषु छस्य अभावेन असम्भवात् । 'अनुनासिकस्य क्ङिझलोः क्ङिति' इत्यतः क्ङिझलोरिति चानुवर्तते । चकारो वकारसमुच्चयार्थस्तदाह-ज्वरादीनामिति । अवतेस्तुनीति । अवधातोरौणादिके तुन्प्रत्यये कृते, अकारवकारयोरूठि, तस्य गुणे, 'ओतु'रिति दृश्यते । क्ङितीत्यनुवृत्तौ तु तन्नस्यादिति भावः । ओमिति । 'अवतेष्टिलोपश्च' इत्यौणादिकसूत्रम् । 'अव रक्षणे' इति

दर्शनात्। ईडभावे ऊठि पिति गुणः। मामोति—मामवीति मामूतः। मामवति। मामोषि। मामोमि। मामावः। मामूमः। मामोतु—मामूतात्। मामूहि। मामवानि। अमामोत्। अमामोः। अमामवम्। अमामाव। अमामूम। तुर्वी हिंसायाम्। तोतूर्वीति। २६५५ राल्लोपः ६।४।२१॥ रेफात्परयोश्छ्वोर्लोपः स्यात्क्ङौ झलादावनुनासिकादौ च प्रत्यये। इति वलोपः। लघूपधगुणः। २६५६ न धातु-

---

धातोर्मन्प्रत्ययः स्यात्, प्रत्ययस्य टेर्लोपश्चेति तदर्थः। तथा च अव् म् इति स्थिते उपधाभूतस्य अकारस्य वकारस्य च ऊठि तस्य गुणे ओमिति दृश्यते। 'ज्वरत्वर' इत्यत्र अनुनासिकग्रहणाननुवृत्तौ तु मनिनि परे अवतेरूठ् न स्यात्, क्ङिझलोरेव तद्विधिलाभादिति भावः॥ ऊठि पितीति। मवधातोर्यङ्लुक्। मामव्ति इति स्थिते ईडभावपक्षे अकारवकारयोरेकस्मिन् ऊठि तिपः पित्त्वेन ङित्त्वाडभावादूकारस्य गुणे मामोतीति रूपमित्यर्थः। उपधायाः वकारस्य च प्रत्येकमूठ् इति पक्षे सवर्णदीर्घः। पक्षद्वयमपि 'एकः पूर्वपरयोः' इत्यत्र भाष्ये स्पष्टम्। ईट्पक्षे आह—मामवीतीति। अत्र ऊठ् न, क्ङौ झलादौ अनुनासिकादौ च प्रत्यये परे तद्विधानात्। मामूतः इति। अकारवकारयोरूठि तसो ङित्त्वाच्च गुणः इति भावः। मामवतीति। 'अदभ्यस्तात्' इत्यत्। 'मामवीषी'ति सिद्धवत्कृत्य आह—मामोमीति। अनुनासिकपरकत्वादूठ्, गुणः। मामावः इति। मामव् वस् इति स्थिते परनिमित्ताभावादूठ् न 'लोपो व्योः' इति वलोपे 'अतो दीर्घो यञि' इति दीर्घः। मामूमः इति। मामव् मस् इति स्थिते अनुनासिकपरकत्वादूठ् ङित्त्वान्न गुणः। मामवाञ्चकार। मामविता। मामविष्यति। लोटि आह—मामोत्विति। मामूतादिति। ङित्त्वान्न गुणः। मामूताम्। मामवतु। मामूहीति। ऊठि हेरपित्त्वेन ङित्त्वान्न गुणः। मामूतात्। मामूतम्। मामूत। मामावानीति। आटः पित्त्वादङित्त्वादूगुणः। मामवाव। मामवाम। लङस्तिप्याह—अमामोदिति। अमामूताम्। अमामवुः। सिप्याह—अमामोरिति। अमामूतम्। अमामूत। लिङि-मामव्यात्। लुङि 'अस्तिसिचः' इति नित्यमीट्। अमामवीत्। अमामावीत् अमामविष्यत्। ज्वरतेस्तु-जाज्वरीति। जाजूर्ति इत्यादि। स्वरतेस्तु-तात्वरीति। तातूर्ति इत्यादि। स्त्रिवेस्तु-सेस्त्रवीति। ईडभावे तु ऊठि सेस्त्रोति इत्यादि। अवतेस्तु यङभावात् क्ङिप्युदाहरणम्। ऊः उवौ उवः। ईत्याशूद्यम्। तोतूर्वीति। 'उपधायां च' इति दीर्घः। ईडभावे तोतुर्व् ति इति स्थिते—राल्लोपः। 'च्छ्वो शूडनुनासिके च' इति सूत्रं शूडनुवर्जमनुवर्तते। 'अनुनासिकस्य क्विझलोः' इत्यतः क्ङिझलोरिति च तदाह—रेफात्परयोरित्यादि। अत्रापि क्ङितीति नानुवर्तते, पूर्वसूत्रे तदननुवृत्तेः। वलोप इति। तथा च तोतुर् ति इति स्थिते उकारस्य लघूपधगुणः, तिपः पित्त्वेन अङित्त्वादित्यर्थः। न धातुलोपे। 'इको गुणवृद्धी' इत्यनुवर्तते। तत्र धातुलोपे सति 'इको गुणवृद्धी' न स्तः आर्द्धधातुके परत इत्यर्थे, लूधातोः यङन्तात् पचाद्यचि, यङो लुकि, लो-

लोप आर्धधातुके १।१।४॥ धात्वंशलोपनिमित्ते आर्धधातुके परे इको गुणवृद्धी न स्तः। इति नेह निषेधः। तिवादीनामनार्धधातुकत्वात्। तोतोर्ति। 'हलि च' (सू ३५४) इति दीर्घः। तोतूर्तः। तोतूर्वति। तोथोर्ति। दोदोर्ति। दोधोर्ति। मुच्छी। मोमोर्ति। मोमूर्तः। मोमूर्च्छतीत्यादि। आर्धधातुके इति विषयसप्तमी। तेन

ष्णुव इत्यत्र गुणनिषेधाऽभावप्रसङ्गात्, अत्र धात्ववयवस्य यङो लोपेऽपि धातोर्लोपाभावात्। 'धात्ववयवलोपे सतीत्यर्थं तु शीङ्धातोस्तृचि शयिता इत्यत्र गुणो न स्यात् तत्र धात्ववयवङकारलोपसत्त्वात्। 'आर्धधातुके परे यो धात्ववयवलोपः तस्मिन् सतीत्यर्थः' क्नोपयतीत्यत्रापि गुणनिषेधः स्यात्। तत्र यकारलोपस्य आर्धधातुकपरकत्वमसत्त्वादित्यतो व्याचष्टे—धात्वंशलोपनिमित्त इति। धातु लोप्यतीति धातुलोपः कर्मण्यण्। धातुलोपनिमित्ते आर्धधातुके परे इति यावत्। 'लोलुवः' इत्याद्युदाहरणम्। लूञ्धातोर्यङन्तात् पचाद्यचि 'यङोऽचि च' इत्यच्प्रत्ययमाश्रित्य यङो लुकि, अच्प्रत्ययमाश्रित्य प्राप्तो गुणोऽनेन निषिध्यते। 'मरीमृज' इति तु वृद्धिनिषेधोदाहरणम्। धात्विति किम् शीङ्, शयिता। इह 'उरुष्टानुबन्धस्य धातुत्वं, नतु सानुबन्धस्ये'ति कैयटादिमते तु धातुग्रहणं स्पष्टार्थम्। इदं सूत्रं भाष्ये प्रत्याख्यातम्। हरदत्तेन पुनरुद्धृतम्। कौस्तुभे तु तदपि दूषयित्वा प्रत्याख्यातमेव।

इति नेहेति। तोतोर्तीत्यत्र अयं गुणनिषेधो नेत्यर्थः। हलि चेति। तोतुव्तस् इति स्थिते 'लोपो व्योः' इति वकारस्य लोपं बाधित्वा 'क्ङिति च' इत्यूठि प्राप्ते, वकारस्यानेन लोपे, 'हलि च' इति दीर्घ इत्यर्थः। यद्यपि तोतोर्तीत्यत्र 'क्ङिति च' इत्यूठः अप्रवृत्तेर्वकारस्य 'लोपो व्योः' इति लोपः सिध्यति। तथापि तोतूर्तः इत्यादौ ऊठो बाधनाय आवश्यकोऽयं लोपो न्याय्यत्वात्तोतोर्तीत्यत्रोपन्यस्त इति बोध्यम्। तोतूर्वीतीति। 'अदभ्यस्तात्' इत्यत्। 'उपधायां च' इति दीर्घः। तोतूर्वीषि-तोतोर्षि। तोतूर्थः। तोतूर्थ। तोतूर्वीमि। तोतोर्मि। तोतूर्वः। तोतूर्मः। तातूर्वाञ्चकार। तोतूर्विता। तोतूर्विष्यति। तोतूर्वीतु। तोतोर्तु। तोतूर्तात्। तोतूर्ताम् तोतूर्वन्तु। तोतूर्हि। तोतूर्वाणि। लङि अतोतूर्वीत्। अतोतोः अतोतूर्ताम् अतोतूर्वुः। अतोतूर्वीः। अतोतोः। अतोतूर्तम्। अतोतूर्तं। अतोतूर्वम्। अतोतूर्वं। अतोतूर्मं। तोतूर्यात्। लुङि 'अस्तिसिचः' इति नित्यमीट्। अतातूर्वीत्। अतातूर्विष्यत्। धुर्वीधातोरुदाहरति—तोधोर्तीति। धुर्वीवद्रूपाणि। दोधोर्तीति। दुर्धीधातोः रूपम्। धोधोर्तीति। धुर्वीधातोः रूपम्। मुच्छीधातोः मोमूर्च्छीति सिद्धवत्कृत्य इंडभावे आह—मोमोर्तीति। 'राल्लोपः इति छस्य लोपः। इत्यादीत। मोमूर्च्छीषि-मोमोर्षि। मोमूर्च्छीमि-मोमोर्मि। मोमूर्च्छ्वः। मोमूर्ह्वः। अमोमूर्च्छीत्। अमोमुः। सिच्यप्येवम्। लुङि 'अस्तिसिचः' इति नित्यमीट्। अमोमूर्च्छीत्। अमोमूर्च्छिष्यत्। विषयसप्तमीति। 'अजेर्व्यघञपोः, इति वीभावविधौ आर्धधातुके इत्यनुवृत्त विषयसप्तम्यन्तमाश्रीयते।

यङि विवक्षिते अजेर्वी । 'वीयते' अस्य यङ्लुगस्ति । लुकापहारे विषयत्वासम्भवेन वीभावस्याप्रवृतेः । इति तिङन्ते यङ्लुक्प्रकरणम् ।

अथ तिङन्ते नामधातुप्रकरणम् ॥ १५ ॥

२६५७ सुप आत्मनः क्यच् ३।१।८॥ इषिकर्मणः एषितृसम्बन्धिनः सुबन्तादिच्छायामर्थे क्यच्प्रत्ययो वा स्यात् । धात्ववयवत्वात्सुब्लुक् । **२६५८ क्यचि च ७।४।३३॥** अस्य ईत् स्यात् । आत्मनः पुत्रमिच्छति पुत्रीयति । 'वान्तो यि प्रत्यये' (सू ६३) गव्यति । नाव्यति । 'लोपः शाकल्यस्य' (सू ६७) इति तु न । अपदान्तत्वात् । तथा हि । **२६५९ नः क्ये १।४।१५॥**

ननु परसप्तम्यन्तमित्यर्थः । ततः किमित्यत आह—तेनेति । विषयसप्तम्याश्रयणेनेत्यर्थः । विवक्षिते । यङि विवक्षिते ततः प्रागेव अजेर्वीभाव इत्यर्थः । एवञ्च कृते वीभावे इलादित्वाद्यङ् लभ्यते इति मत्वा आह—वेवीयते इति । ननु अजेर्वीभावानन्तरं यङि सति तस्य 'यङोऽचि च' इति पाक्षिको लुक् कृतो नोदाहियते इत्यत आह—अस्य यङ्लुङ् नास्तीति । विषयभेदेति । लुका लुप्तयङः भाविज्ञानविषयत्वाभावेनेत्यर्थः ।

इति श्रीवासुदेवदीक्षितविदुषा विरचितायां सिद्धान्तकौमुदीव्याख्यायां बालमनोरमाख्यायां यङ्लुगन्तप्रक्रिया समाप्ता ।

अथ नामधातुप्रक्रियाः निरूप्यन्ते । सुप आत्मनः क्यच् । प्रत्ययग्रहणपरिभाषया सुबन्तादिति लभ्यते । 'धातोः कर्मणः' इति सूत्रात्कर्मणः इच्छायां वेत्यनुवर्तते । कर्मण इति पञ्चमी । कर्मकारकादिति लभ्यते । सन्निधानादिच्छां प्रत्येव कर्मत्वं विवक्षितम् । आत्मन्शब्दः स्वपर्यायः । तादर्थ्यस्य शेषत्वविवक्षायां षष्ठी । स्वार्थात्कर्मण इति लभ्यते । स्वञ्च इच्छायां सन्निधापितत्वादेषितैव विवक्षितः । तथाच स्वस्मै यदिष्यते कर्मकारकं तदुत्तेस्सुबन्तादिच्छायां क्यज्वा स्यादिति फलति । तदिदमभिप्रेत्य आह—इषिकर्मणः एषितृसम्बन्धिनः इत्यादिना । एषिन्नर्थादिषिकर्मण इत्यर्थः । एषिन्ना स्वार्थं यदिष्यते कर्मकारकं तद्वाच्कात्सुबन्तादिति यावत् । धात्ववयवत्वादिति । सुबन्तात् क्यचि कृते तदन्तस्य सनाद्यन्ताः इति धातुत्वादिति भावः । क्यचि च । 'अस्य च्वौ' इत्यतोऽस्येत्यनुवर्तते । 'ई घ्राध्मोः' इत्यतः ईग्रहणं चेति मत्वा शेषं पूरयति—अस्येति । अकारस्येत्यर्थः । पुत्रीयतीति । क्यचि पुत्र य इति स्थिते ईत्वे पुत्रीय इति धातोर्लडादिरित्यर्थः । आत्मनः किम् । राज्ञः पुत्रमिच्छति । पदविधित्वेन समर्थपरिभाषायाः प्रवृत्तेः महान्तं पुत्रमिच्छतीत्यत्र पुत्रशब्दान्न क्यच् । गव्यतीति । गामात्मन इच्छतीत्यर्थः । नाव्यतीति । नावमात्मन इच्छतीत्यर्थः । अपदान्तत्वादिति । 'लोपः शाकल्यस्य' इत्यस्य पदान्त एव प्रवृत्तिरिति भावः । नन्वन्तर्वर्तिविभक्त्या पदत्वमस्त्येवेत्यत आह—तथा हीति । यथा पदत्वं न भवति तथो

क्यचि क्यङि च नान्तमेव पदं स्यान्नान्यत्। सन्निपातपरिभाषया क्यचो यस्य लोपो न। गव्याञ्चकार। गव्यिता। नाव्याञ्चकार। नाव्यिता। नलोपः। राजीयति। 'प्रत्ययोत्तरपदयोश्च' (सू १३७३)। त्वयति। मयति। एकार्थयोः इत्येव। युष्मयति। अस्मयति। 'हलि च' (सू ३५४)। गीर्यति। पूर्यति। धातोः इत्येव। नेह। दिवमिच्छति दिव्यति। इह पुरमिच्छति पुर्यतीति माधवोक्तं प्रत्युदाहरणं चिन्त्यम्। पुगिरोः साम्यात्। दीव्यतीति दीर्घस्तु प्राचः प्रामा-

क्यते इत्यर्थः। नः क्ये। नकारादकार उच्चारणार्थः। 'सुप्तिङन्तम्' इत्यतः सुबन्तं पदमित्यनुवर्तते। सुबन्तं नकारेण विशेष्यते। तदन्तविधिः। नकारान्तं सुबन्तं पदसञ्ज्ञं स्यादिति लभ्यते। सुबन्तत्वादेव पदत्वे सिद्धे नियमार्थमिदम्। क्यग्रहणेन क्यच्क्यङोर्ग्रहणम्। न तु क्यषः 'लोहितडाज्भ्यः क्यष्वचनम्' इति वक्ष्यमाणतया हलन्तात् क्यषोऽभावात्। तदाह—क्यचि क्यङि चेत्यादिना। ननु गव्यांचकारेत्यत्र आम आर्धधातुकत्वात्तस्मिन् परे वकाराद्धल उत्तरस्य यकारस्य 'यस्य हलः' इति लोपः स्यादित्यत आह—सन्निपातेति। यकारनिमित्तकावादेशसम्भवद्यकारस्य यकारलोपं प्रति निमित्तत्वाऽसम्भवादिति भावः। गव्यितेति। इटि अतो लोपः। राजीयतीत्यत्र आह—नलोप इति। राजानमिच्छतीत्यर्थे क्यचि राजन् य ति इति स्थिते 'नः क्ये' इति पदत्वान्नकारस्य लोप इत्यर्थः। कृते नलोपे 'क्यचि च' इत्यकारस्य ईत्वमिति मत्वा आह—राजीयतीति। न च ईत्वे कर्तव्ये नलोपस्यासिद्धत्वं शङ्क्यम, 'नलोपः सुप्स्वर' इति नियमादित्यलम्। ननु त्वामात्मनः इच्छति, मामात्मनः इच्छतीत्यत्र युष्मदस्मदर्थयां क्यचि धात्ववयवत्वात् सुपो लुकि प्रत्ययलक्षणाऽभावात् 'त्वमावेकवचने' इति कथं त्वमौ स्याताम्, विभक्तौ परत एव तद्विधानादित्यत आह—प्रत्ययोत्तरपदयोश्चेति। सुपो लुका लुप्तत्वेऽपि क्यचमादाय मपर्यन्तस्य त्वमाविति भावः। ननु युष्मानात्मनः इच्छति, अस्मानात्मनः इच्छति, युष्मयति अस्मयति इत्यत्रापि क्यचमादाय त्वमौ स्यातामित्यत आह—एकार्थयोरित्येवेति। 'प्रत्ययोत्तरपदयोश्च' इत्यत्र 'त्वमावेकवचने' इति सूत्रमनुवृत्तम्। एकवचनशब्दश्च न रूढः, किन्तु एकत्वविशिष्टार्थवृत्तित्वमेकवचनशब्देन विवक्षितमिति युष्मदस्मत्प्रक्रियायां प्रपञ्चितं प्राक्। तथा च युष्मदस्मदोरेकत्वविशिष्टार्थवृत्तित्वाऽभावान्न त्वमाविति भावः। गिरमात्मनः इच्छति, पुरमात्मनः इच्छतीत्यत्र गिरशब्दात्पुरशब्दाच्च क्यचि विशेषमाह—हलि चेति। उपधादीर्घ इति शेषः। ननु दिवमिच्छति दिव्यतीत्यत्रापि 'हलि च' इति दीर्घः स्यादित्यत आह—धातोरित्येवेति। 'हलि च' इति सूत्रे 'सिपि धातोः' इत्यतस्तदनुवृत्तेरिति भावः। दिव्यतीति। दिव्शब्दः अव्युत्पन्नं प्रातिपदिकमिति भावः। इहेति। 'हलि च' इति सूत्रे धातोरित्यनुवृत्तेः पुर्यतीत्यत्र न दीर्घ इति माधवग्रन्थश्चिन्त्य इत्यर्थः। कुत इत्यत आह—पुगिरोः साम्यादिति। 'गॄ शब्दे' 'पॄ पालनपूरणयोः' इताभ्यां क्विप 'ऋत इद्धातोः' इति 'उदोष्ठ्यपूर्वस्य' इति च इत्वे उत्वे

दिक एव। अदस्यति 'रीङृतः' (सू १२३४)। कर्त्रीयति। 'क्यच्व्योश्च' (सू २११६)। गार्गीयति। वात्सीयति। 'अकृत्सार्व-' (सू २२६८) इति दीर्घः। कवीयति। वाच्यति। समिध्यति। २६६० **क्यस्य विभाषा** ६।४।५०॥ हलः परयोः क्यच्क्यङोर्लोपो वा स्यादार्द्धधातुके। 'आदेः परस्य' (सू ४४)। 'अतो लोपः' (सू २३०८)। तस्य स्थानिवत्त्वाल्लघूपधगुणो न। समिधिता समिध्यिता। 'मान्तप्रकृतिकसुबन्तादव्ययाच्च क्यच् न' (वा १७१४)। किमिच्छति। इदमिच्छति। स्वरिच्छति। २६६१ **अशनायोदन्यधनाया बुभुक्षा-**

च कृते रपरत्वे गिर्शब्दस्य पुर् शब्दस्य च निष्पत्तेरिति भावः। प्रामादिक एवेति। दिवृशब्दस्य अव्युत्पन्नप्रातिपदिकत्वाच्च धातुत्वम्। दिव्धातोः किबन्तात् ऊठि द्यृशब्दाच्च क्यचि 'द्यूयती'त्येव उचितम्। विचि तु लघूपधगुणे 'लोपो व्योः' इति लोपे देशब्दात् क्यचि देयतीत्येवोचितमिति भावः। अदस्यतीति। अमुमात्मनः इच्छतीत्यर्थे अदसशब्दात् क्यचि सुपो लुक्। लुप्तत्वाद्विभक्तिपरकत्वाऽभावाच्च स्यदाद्यत्वम्। सान्तत्वान्नोत्वमत्वे। 'नः क्ये' इति नियमेन पदान्तत्वाऽभावाच्च सस्य रुत्वमिति भावः। कर्तृशब्दात् क्यचि विशेषमाह—रीङृत इति। गार्ग्यशब्दात् क्यचि विशेषमाह—क्यच्व्योश्चेति। आपत्यस्य यञो यकारस्य लोप इति भावः। कृते यलोपे 'क्यचि च' इत्यकारस्य ईत्त्वं मत्वा आह—गार्गीयतीति। वात्स्यशब्दात् क्यचि पूर्ववत्। कविशब्दात् क्यचि विशेषमाह—अकृत्सार्वेति। वाच्यतीति। वाच्शब्दात् क्यचि 'नः क्ये' इति नियमेन पदत्वाऽभावाच्च कुत्वम्। 'वचिस्वपि' इति सम्प्रसारणं तु न, धातोः कार्यमुच्यमानं धातुविहितप्रत्यये एवेति नियमात्। समिध्यतीति। समिध्शब्दात् क्यचि 'नः क्ये' इति नियमेन पदत्वाऽभावाच्च जश्त्वम्। क्षुटस्तासि इटि समिध्य इता इति स्थिते 'यस्य हलः' इति नित्ये यलोपे प्राप्ते—क्यस्य विभाषा। 'यस्य हलः' इत्यतः हल इति पञ्चम्यन्तमनुवर्तते। 'आर्द्धधातुके' इत्यधिकृतम्। तदाह—हलः परयोः क्यच्क्यङोरिति। क्यष् तु नात्र गृह्यते, 'लोहितडाज्भ्यः क्यष्वचनम्' इति वक्ष्यमाणतया हलन्तात्तदभावात्। अन्तलोपमाशङ्क्य आह—आदेः परस्येति। तथा च समिध् अ इता इति स्थिते आह—अतो लोपः इति। तथा च समिध् इता इति स्थिते लघूपधगुणमाशङ्क्य आह—तस्य स्थानिवत्त्वादिति। क्यच्सूत्रे 'मान्ताव्ययेभ्यः प्रतिषेधः' इति वार्तिकम्। मान्तेभ्यः अव्ययेभ्यश्च प्रतिषेध इत्यर्थः पुत्रमात्मनः इच्छति पुत्रीयतीत्यत्र न स्यात्। पुत्रादिच्छतीत्यादावेव स्यात्। मान्तानि अव्ययानि मान्ताव्ययानि तेभ्य इत्यर्थे स्वरिच्छतीत्यत्र क्यचः प्रतिषेधो न स्यात्। अतस्तद्वार्तिकं विवृण्वन्नाह—मान्तप्रकृतिकसुबन्तादव्ययाच्च क्यच् नेति। अशनायोदन्य। अशनाय, उदन्य, धनाय इत्येषां द्वन्द्वः। क्यजन्ता इति। एते त्रयः शब्दाः क्रमेण बुभुक्षादिष्वर्थेषु निपात्यन्ते इत्यर्थः। भोक्तुमिच्छा बुभुक्षा। पातु-

पिपासागर्धेषु ७।४।३४ ॥ क्यजन्ता निपात्यन्ते । अशनायति । उदन्यति । धनायति । बुभुक्षादौ किम् । अशनीयति। उदकीयति । धनीयति। **२६६२ अश्व-क्षीरवृषलवणानामात्मप्रीतौ क्यचि ७।१।५१॥** एषां क्यचि असुगागमः स्यात् । 'अश्वक्षीवृषयोर्मैथुनेच्छायाम्' (वा ४३०६) अश्वस्यति वडवा । वृषस्यति गौः । 'क्षीरलवणयोर्लालसायाम्' (वा ४३१५) । क्षीरस्यति बालः । लवणस्यत्युष्ट्रः । 'सर्वप्रातिपदिकानां क्यचि लालसायां सुगसुकौ' (वा ४६१६-१७) दधिस्यति-दध्यस्यति । मधुस्यति । मध्वस्यति । **२६६३ काम्यच्च ३।१।९॥** उक्तविषयो काम्यच् स्यात् । पुत्रमात्मनः इच्छति पुत्रकाम्यति । इह 'यस्य हलः' (सू २६३१) इति लोपो न, अनर्थकत्वात् । यस्य इति सङ्घातग्रहणमित्युक्तम् । यशस्काम्यति । सर्पिष्काम्यति । मान्ताव्ययेभ्योऽप्ययं स्यादेव । किंकाम्यति ।

मिच्छा पिपासा । गर्द्धः अभिकाङ्क्षा । अश्नायतीति । अश्यते यत् तदशनम् अन्नं, तद्भोक्तुमिच्छतीत्यर्थः । क्यचि च' इति ईत्वाऽभावो निपात्यते । 'अकृत्सार्वे' इति दीर्घः । उदन्यतीति । उदकं पातुमिच्छतीत्यर्थः । उदकशब्दस्य उदन्नादेशो निपात्यते नलोपाऽभावश्च । धनायतीति । जीवनार्थं सत्यपि धने अधिकं धनं वाञ्छतीत्यर्थः । ईत्वाऽभावो निपात्यते । अशनीयतीति । अशनम् अन्नं तत्संग्रहीतुमिच्छति वैश्वदेवाद्यर्थमित्यर्थः । उदकीयतीति । सत्यादिसेचनार्थमुदकमिच्छतीत्यर्थः । धनीयतीति । दरिद्रः सन् जीवनाय धनमिच्छतीत्यर्थः । अश्वक्षीर । क्यचि । 'परे असु'गिति शेषपूरणम्, 'आज्जसेरसुक्' इत्यतस्तदनुवृत्तेरिति भावः । असुकि ककार इत्, उकार उच्चारणार्थः । कित्त्वादन्त्यावयवः । अश्वक्षीवृषयोः इति । वार्तिकम् । अश्वस्यति वडवेति । मैथुनार्थमश्वमिच्छतीत्यर्थः । वृषस्यति गौरिति । मैथुनार्थं वृषभमिच्छतीत्यर्थः । 'वृषस्यन्ती तु कामुकी' इति कोशस्तु अश्ववृषकृत्यप्रकृत्यर्थपरित्यागेन मैथुनेच्छामात्रे लाक्षणिकः । क्षीरलवणयोरिति । वार्तिकम् । असुगिति शेषः । लालसा-उत्कटेच्छा । सर्वप्रातिपदिकानामिति । इदमपि वार्तिकम् । लालसायां सर्वेषां प्रातिपदिकानां क्यच् वक्तव्यः । तस्मिन् परे प्रकृतीनां सुगसुकौ च वक्तव्यौ इत्यर्थः । न चानेनैव वार्तिकेन सिद्धे 'क्षीरलवणयोर्लालसायाम्' इति वार्तिकं व्यर्थमिति शङ्क्यम्, 'क्षीरलवणयोः' इति वार्तिकं कात्यायनीयं, 'सर्वप्रातिपदिकानाम्' इति तु मतान्तरमित्यदोषात् । एवञ्च भाष्ये 'अपर आहे'त्यनेन उक्तमिदम् । काम्यच् । 'सुप आत्मनः क्यच्' इत्युत्तरमिदं सूत्रम् । तदाह—उक्तविषये इति । पुत्रकाम्यतीति । कस्येत्संज्ञा तु न, फलाभावात् । अनर्थकत्वादिति । काम्यचः एकदेशस्य यकारस्य अर्थाऽभावादित्यर्थः । ननु वेभिदिता इत्यत्राऽपि यकारस्य अनर्थकत्वाल्लोपो न स्यादित्यत आह—यस्य इतीति । 'यस्य हलः' इत्यत्र 'यस्ये'त्यनेन यकाराऽकारसङ्घातग्रहणमित्यनुपदमेवोक्तमित्यर्थः । तथाच वेभिद्य इता इति स्थिते यको यस्य सङ्घातस्यार्थवत्त्वाद्यकारलोपो निर्बाधः । प्रकृते

स्वः काम्यति। २६६४ उपमानादाचारे ३।१।१०॥ उपमानात्कर्मणः सुबन्तादाचारार्थे क्यच् स्यात्। पुत्रमिवाचरति पुत्रीयति छात्रम्। विष्णूयति द्विजम्। 'अधिकरणाच्चेति वक्तव्यम् (वा १७१७)। प्रासादीयति कुट्यां भिक्षुः। कुटीयति प्रासादे। २६६५ कर्तुः क्यङ् सलोपश्च ३।१।११॥ उपमानात्कर्तुः सुबन्तादाचारे क्यङ् वा स्यात्, सान्तस्य तु कर्तृवाचकस्य लोपो वा स्यात्। क्यङ् वेत्युक्तेः पक्षे वाक्यम्। सान्तस्य लोपस्तु क्यङ्सन्नियोगशिष्टः। स च व्यवस्थितः। 'ओजसोऽप्सरसो नित्यमितरेषां विभाषया' (वा १७१९-२०)। कृष्ण इवाचरति कृष्णायते। ओजशब्दो वृत्तिविषये तद्वति। ओजायते। अप्सरायते। यशायते। यशस्यते। विद्वायते। विद्वस्यते। त्वद्यते। मद्यते। अनेकार्थत्वे तु

तु काम्यजेकदेशस्य यस्याऽनर्थकत्वाल्लोपो नेति भावः। यशस्काम्यतीति। 'सोऽपदादौ' इति सत्वम्। ननु किमात्मनः इच्छति किंकाम्यति स्वःकाम्यति कथम्? 'मान्ताव्ययानां नेत्यनुवृत्तेरित्यत आह—मान्ताव्ययेभ्योऽप्ययमिति। उपमानादाचारे। 'सुप आत्मनः क्यच्' इत्यतः सुप इत्यनुवर्तते। 'धातोः कर्मणः समानकर्तृकात्' इत्यतः कर्मण इति। तदाह—उपमानात्कर्मण इत्यादिना। उपमानं यत्कर्मकारकं तदवृत्तेः सुबन्तादित्यर्थः। पुत्रमिवेति। 'धातोः कर्मणः' इत्यतः वेत्यनुवृत्तिरनेन सूचिता। छात्रं पुत्रत्वेन उपचरतीत्यर्थः। विष्णूयतीति। द्विजं विष्णुत्वेन उपचरतीत्यर्थः। अधिकरणाच्चेति। उपमानभूताधिकरणवृत्तेरपि सुबन्तादाचारे क्यजिति वक्तव्यमित्यर्थः। प्रासादीयति कुट्यामिति। प्रासादे इव कुट्यां हृष्टो वर्तते इत्यर्थः। कुटीयति प्रासादे इति। कुट्यामिव प्रासादे विलष्टो वर्तते इत्यर्थः। कर्तुः क्यङ् सलोपश्च। 'कर्तुरिव्याचरते। 'कर्तुः क्यङि'त्येकं वाक्यम्। अत्र कर्तुरिति पञ्चम्यन्तम्। उपमानादाचारे इत्यनुवर्तते। 'धातोः कर्मणः' इत्यतः वेति च। तदाह—उपमानादिति। उपमानं यत्कर्तृकारकं तदवृत्तेः सुबन्तादित्यर्थः। 'कर्तुः सलोपश्चे'ति द्वितीयं वाक्यम्। चकारः 'तु' पर्यायः भिन्नक्रमः। 'स' इति लुप्तषष्ठीकं पृथक्पदम्। 'कर्तुरि'ति पञ्चम्यन्तस्य विशेषणम्। तदन्तविधिः। तदाह—सान्तस्य लोपस्त्विति। एतच्च महाभाष्ये स्पष्टम्। क्यङि सलोपविकल्पः सर्वत्र स्यादित्यत आह—स च व्यवस्थित इति। सान्तस्य सलोप इत्यर्थः। व्यवस्थामेव दर्शयति—ओजसोऽप्सरस इति। इदं वार्तिकम्। ओजश्शब्दः इति। व्यङन्तोऽयम्। 'सनाद्यन्ता' इति धातुत्वात् वृत्तिः। तत्र ओजश्शब्दः ओजस्विनि वर्तत इत्यर्थः। ओजायते इति। ओजस्वीवाचरतीत्यर्थः। ओजश्शब्दात् क्यङि सलोपे 'अकृत्सार्व' इति दीर्घ इति भावः। अप्सरायते इति। अप्सरश्शब्दात् क्यङि सलोपदीर्घौ। क्यङो ङित्त्वादात्मनेपदम्। 'इतरेषां विभाषये'त्यस्योदाहरति-यशायते यशस्यते इति। यशस्वीवाचरतीत्यर्थः। विद्वायते विद्वस्यते इति। विद्वानिवाचरतीत्यर्थः। विद्वच्छब्दात् क्यङि सलोपविकल्पः। त्वद्यते मद्यते इति। त्वमिव अहमिव आचरतीत्य-

युष्मद्यते। अस्मद्यते। 'क्यङ्मानिनोश्च' (सू ८३७)। कुमारीवाचरति कुमारायते। हरिणीवाचरति हरितायते। गुर्वीव गुरूयते। सपत्नीव सपत्नायते। सपतीयते। सपत्नीयते। युवतिरिव युवायते। पट्वीमृद्वयाविव पट्वीमृदूयते। 'न कोपधायाः' (सू ८३८)। पाचिकायते। 'आचारेऽवगल्भक्लीबहोडेभ्यः क्विब्वा' (वा १७२१।) वाग्रहणात् क्यङपि। अवगल्भादयः पचाद्यजन्ताः। क्विप्सन्नि-

---

र्थः। युष्मदस्मच्छब्दात् क्यङि 'प्रत्ययोत्तरपदयोश्च' इति मपर्यन्तस्य त्वमौ। युष्मद्यते अस्मद्यते इति। यूयमिव वयमिव आचरतीत्यर्थः। 'त्वमावेकवचने' इत्यस्मात् 'प्रत्ययोत्तरपदयोश्च' इति सूत्रे 'एकवचने' इत्यनुवृत्तेरेकत्वविशिष्टार्थवृत्तित्वे सत्येव युष्मदस्मदोस्त्वमाविति भावः। कुमार्यादिशब्दात् क्यङि पुंवत्वं स्मारयति—क्यङ्मानिनोश्चेति। कुमारायते इति। पुंवत्वेन ङीषो निवृत्तौ दीर्घः। हरितायते इति। हरिणीशब्दात् क्यङि पुंवत्वेन 'वर्णादनुदात्तात्' इति नत्वस्य ङीषश्च निवृत्तौ दीर्घः। गुरूयते इति। गुर्वीशब्दात् क्यङि ङीषो निवृत्तौ दीर्घः। सपत्नायते इति। शत्रुपर्यायात् सपत्नशब्दात् शार्ङ्गरवादित्वेन ङीनन्तात् पुंवत्वेन ङीनो निवृत्तौ दीर्घ इति भावः। सपतीयते इति। समानः पतिः स्वामी यस्याः इति बहुव्रीहौ सप्तिशब्दस्य नत्वे ङीपि च निष्पन्नात् सपत्नीशब्दात् क्यङि पुंवत्वेन ङीषनत्वयोर्निवृत्तौ दीर्घ इति भावः। सपत्नीयते इति। विवाहनिबन्धनं पतिशब्दमाश्रित्य समानः पतिः यस्याः इति बहुव्रीहौ सपत्नीशब्दस्य नित्यस्त्रीलिङ्गत्वान्न पुंवत्वमिति भावः। युवायते इति। युवतिशब्दात् क्यङि पुंवत्वे तिप्रत्ययस्य निवृत्तौ नलोपे दीर्घ इति भावः। वयोवाचिनां जातिकार्यं चैकस्मिन्नेकमिति 'जातेरस्त्रीविषयात्' इत्यत्र भाष्ये स्पष्टम्। एतेन 'जातेश्च' इति निषेधादिह पुंवत्त्वं दुर्लभमित्यपास्तमिति शब्देन्दुशेखरे स्थितम्। पट्वीमृदूयते इति। इह पूर्वपदस्य क्यङ्परकत्वाऽभावान्न पुंवत्वम्। ननु पाचिकेवाचरति पाचिकायते इत्यत्रापि 'क्यङ्मानिनोश्च' इति पुंवत्वेन टापः 'प्रत्ययस्थात्' इति ह्रस्वस्य च निवृत्तौ पाचिकायते इति स्यादित्यत आह—न कोपधाया इति। 'आचारेऽवगल्भक्लीबहोडेभ्यः क्विब्वा' इति वार्तिकम्। उपमानादित्यनुवर्तते। 'धातोः कर्मणः' इत्यतो वाग्रहणस्यास्मिन्प्रकरणे अनुवृत्त्यैव सिद्धे वाग्रहणं व्यर्थमित्यत आह—वाग्रहणात् क्यङपीति। अन्यथा विशेषविहितत्वात् क्विपा क्यङो बाधः स्यादिति भावः। तथाचाऽत्र वाशब्दो विकल्पार्थक इति फलितम्। अत्र सुप इति नानुवर्तते। प्रातिपदिकात् क्यङोऽप्राप्तौ वाग्रहणात् समुच्चीयते इति केचित्। अवगल्भादय इति। 'गल्भ धाष्टर्ये' अवपूर्वः, 'क्लीब अधाष्टर्ये' 'होड अनादरे' एभ्यः पचाद्यचि अवगल्भादिशब्दाभ्यो निष्पन्ना इत्यर्थः। तथा च अवगल्भ इवाचरति, क्लीब इवाचरति, होड इवाचरतीत्यर्थे अवगल्भादिशब्देभ्यः क्विप्क्यङाविति स्थितम्। अवगल्भते इत्यात्मनेपदलाभायाह—क्विप्सन्नियोगेनेति। अन्त्यस्य अकारस्य अनुदात्तत्वमनुनासिकत्वं चात्र प्रतिज्ञायते।

योगेनानुदात्तत्वमनुनासिकत्वं चाच्प्रत्ययस्य प्रतिज्ञायते। तेन तङ्। अवगल्भते। क्लीबते। होडते। भूतपूर्वादप्यनेकाच आम्। एतद्वार्तिकारम्भसामर्थ्यात्। न च अवगल्भते इत्यादिसिद्धिस्तत्फलम्। केवलानामेवाचारेऽपि वृत्तिसम्भवात् धातूनामनेकार्थत्वात्। अवगल्भाञ्चक्रे। क्लीबाञ्चक्रे। होडाञ्चक्रे। वार्तिकेऽवेत्युपसर्गविशिष्टपाठात्केवलादुपसर्गान्तरविशिष्टाच्च क्यङ्केति माधवादयः। तङ् नेति तूचितम्। 'सर्वप्रातिपदिकेभ्यः क्विब्वा वक्तव्यः' (वा १७२२)। पूर्ववार्तिकं तु अनुबन्धा-

---

ततश्च तस्य इत्संज्ञायां लोपे अनुदात्तेत्त्वादात्मनेपदं लभ्यते। तदाह—तेन तङिति। अवगल्भते इति। क्विबपि भकारादकारस्य लोपे हलन्ताल्लडादौ तङि शबिति भावः। ननु अवगल्भाञ्चक्रे, क्लीबाञ्चक्रे, होडाञ्चक्रे इत्यत्र कथमाम्? अन्त्यस्य च इत्संज्ञालोपाभ्यामपहारेण धातूनामेकाक्षत्वेन 'काम्यनेकाच्' इत्यस्याऽप्रवृत्तेः। नच 'अवगल्भ' इत्यस्य क्विबन्तस्य धातोरनेकाच्कत्वमस्तीति वाच्यम्, उपसर्गसमानाकारं पूर्वपदं धातुसंज्ञाप्रयोजके प्रत्यये चिकीर्षिते पृथक् क्रियते' इत्यनुपदमेव वक्ष्यमाणत्वादित्यत आह—भूतपूर्वादपीति। क्विबुत्पत्तेः प्राक्तनमनेकाक्षत्वं भूतपूर्वगत्या आश्रित्येत्यर्थः। भूतपूर्वगत्याश्रयणे प्रमाणमाह—एतद्वार्तिकेति। 'सर्वप्रातिपदिकेभ्यः क्विब्वा' इति वक्ष्यमाणवार्तिकादेव अवगल्भते, अवजगल्भे इत्यादिसिद्धौ पुनरेभ्यः क्विब्विधानं तत्संनियोगेन अन्त्यवर्णस्य अनुदात्तत्वानुनासिकत्वप्रतिज्ञानार्थं सद् भूतपूर्वगत्या अनेकाक्षत्वाश्रयणं ज्ञापयतीत्यर्थः। नन्वनुदात्तत्वानुनासिकत्वप्रतिज्ञानस्यात्मनेपदसिद्धावुपक्षीणत्वात् कथमुक्तज्ञापकतेत्याशङ्क्य निराकरोति—न चावगल्भते इत्यादिसिद्धिस्तत्फलमिति। कुत इत्यत आह—केवलानामिति। अप्रत्ययरहितानां धातुपाठसिद्धानामनुदात्तेतामेव गल्भादिधातूनामवगल्भ इवाचरतीत्यर्थेषु वृत्तिसम्भवात्। तच्च कुत इत्यत आह—धातूनामनेकार्थत्वादिति। एवञ्च 'आचारेऽवगल्भ' इति क्विब्विधानमनुबन्धासञ्जनार्थं सद् भूतपूर्वगत्या अनेकाक्षत्वाश्रयणं ज्ञापयतीति सिद्धम्। नच 'सर्वप्रातिपदिकेभ्यः' इति क्विपि अवगल्भतीत्यादिवारणाय अनुबन्धासञ्जनमुपक्षीणमिति कथं तस्य उक्तज्ञापकतेति वाच्यम्, 'सर्वप्रातिपदिकेभ्यः' इति वार्तिकेन क्विपि तथा प्रयोगे इष्टापत्तेः भूतपूर्वाश्रयणपरभाष्यप्रामाण्येन 'सर्वप्रातिपदिकेभ्यः' इति वार्तिकस्य अवगल्भादिभ्यः अप्रवृत्तिविज्ञानाद्वेत्यास्तां तावत्। 'आचारेऽवगल्भ' इत्यत्र अवेत्यस्य प्रयोजनमाह—अवेत्युपसर्गेति। केवलादिति। उपसर्गविहीनाद्गल्भशब्दादित्यर्थः। उपसर्गान्तरेति। प्रगल्भादनुगल्भादिशब्दादित्यर्थः। क्यङ्केति। ननु क्विबित्यर्थः। माधवादयः इत्यस्वरसोद्भावनम्। तदूहोजमाह—तङ् नेति तूचितमिति। केवलादुपसर्गान्तरविशिष्टाच्च गल्भशब्दात् प्रगल्भादिशब्दाच्च अनेन क्विबभावेऽपि 'सर्वप्रातिपदिकेभ्यः। इति वार्तिकेन क्विप् निर्बाधः। परन्तु अवपूर्वत्व एवानुबन्धसञ्जनादात्मनेपदमेव तत्र नेति वक्तुमुचितमित्यर्थः। सर्वप्रातिपदिकेभ्य इति। 'आ-

सञ्जनार्थम्। तत्र क्विबनूद्यते। प्रातिपदिकग्रहणादिह सुप इति न सम्बध्यते। तेन पदकार्यं न। कृष्ण इवाचरति कृष्णति। 'अतो गुणे' (सू० १९१) इति शपा सह पररूपम्। अ इवाचरति अति। अतः। अन्ति। प्रत्ययग्रहणमपनीय अनेकाच इत्युक्तेर्नाम्। औ। अतुः। उः। द्वित्वम्। 'अतो गुणे' (सू १९१), 'अत आदेः' (सू २२४८) इति दीर्घः, णत्वं औ, वृद्धिः। अतुसादिषु तु 'आतो लोप

चारे' इति शेषः। नन्वनेनैव वार्तिकेन सिद्धे 'आचारेऽवगलभ' इति वार्तिकं व्यर्थमित्यत आह—पूर्ववार्तिकं क्विबिति। अन्त्यवर्णस्य इत्संज्ञासिद्ध्यर्थमित्यर्थः। तर्हि तत्र क्विग्रहणं व्यर्थमित्यत आह—तत्र क्विबनूद्यते इति। तत्संनियोगेनानुबन्धासङ्गार्थमित्यर्थः। पदकार्यं नेति। 'राजानती'त्यादौ नलोपादिकं नेत्यर्थः। अन्यथा अन्तवर्तिविभक्त्या पदत्वान्नलोपादिकं स्यादिति भावः। पररूपमिति। कृष्णशब्दात् क्विबन्तान्नडादौ शपि 'अतो गुणे' इति पररूपमित्यर्थः। कृष्णाञ्चकार। कृष्णिता। कृष्णिष्यति। कृष्णतु। अकृष्णत्। कृष्णेत्। कृष्णायात्। अतो लोपात्परत्वात् 'अकृत्सार्व' इति दीर्घः। पूर्वविप्रतिषेधस्य विहितत्वादतो लोप इत्यन्ये। अ इवेति। अः विष्णुः। स इवेत्यर्थः। अतीति। शपा पररूपम्। असि। अथः। अथः। आमि। आवः। आमः। क्विप्प्रत्ययान्तत्वाद्वृटि 'कास्प्रत्ययात्' इत्याम्प्रत्ययमाशङ्क्य आह—प्रत्ययग्रहणमपनीयेति। आ, अतुः, उः इति सिद्धरूपप्रदर्शनम्। तत्र प्रक्रियां दर्शयति—द्वित्वमिति। णलि 'द्विर्वचनेऽचि' इति लोपस्य निषेध इति भावः। अतो गुणे इति। द्वित्वे कृते अ अ अ इति स्थिते अन्तरङ्गत्वादतो लोपं बाधित्वा पररूपमिति भावः। अत आदेरिति। नच परत्वान्नित्यत्वादपवादत्वाच्च 'अतो गुणे' इत्यस्मात्प्राक् 'अत आदेः' इत्यस्य प्रवृत्तिरिति वाच्यम्। तस्य बहिरङ्गत्वात् 'अत आदेः' इत्यस्यापवादत्वेऽपि आनर्देत्यत्र हलादिशेषात्प्रागेव परत्वात् 'अत आदेः' इत्यस्य चरितार्थत्वेन बाधकत्वाऽसम्भवात् 'अपवादोऽपि यद्यन्यत्र चरितार्थस्तदन्तरङ्गेण बाध्यते' इत्युक्तेरित्यन्यत्र विस्तरः। यद्यप्यत्र प्रक्रियायुक्रमे फलविशेषो नास्ति, तथापि न्याय्यत्वादेवमुक्तम्। णल औ इति। पररूपे दीर्घे च आ अ इति स्थिते 'आत औ णलः' इत्यौत्वमिति भावः। वृद्धिरिति। आ औ इति स्थिते 'वृद्धिरेचि' इति वृद्धिरित्यर्थः। तथाच 'औ' इति रूपं परिनिष्ठितम्। अतुसादिष्विति। अ अतुस्, अ उस्, इति स्थिते द्वित्वे पररूपे 'अत आदेः' इति दीर्घे आतो लोप इत्यर्थः। अतुः उः। इति प्रत्ययमात्रं शिष्यते। थलि इटि द्वित्वे दीर्घे आतो लोपे, इथ। अथुः। अ। औ। इव। इम। वस्तुतस्तु 'कास्यनेकाज्ग्रहणम्' इति वार्तिकव्याख्यावसरे प्रत्ययग्रहणमपनीयेति भाष्ये नोक्तम्। कासेश्च प्रत्ययान्ताच्च आमिति लभ्यते। अत एव 'आचारेऽवगलभक्लीबहोडेभ्यः' इति वार्तिके अवगलभाञ्चक्रे इत्यादौ अन्यवर्णस्यानुबन्धत्वेन एकाज्त्वे-

इटि च' (सू २३७२) इत्याल्लोपः । मालेवाचरति मालाति । लिङ्गविशिष्टपरिभाषयैकादेशस्य पूर्वान्तत्वाद्वा क्विप् । मालाञ्चकार । लङि अमालात् । अत्र ह्रस्वादिलोपो न । ह्रीप्साहचर्यादापोऽपि सोरेव लोपविधानात् । इट्सकौ । अमालासीत् । कविरिव कवयति । आशीर्लिङि कवीयात् । 'सिचि वृद्धिः—' (सू २२९७) इत्यत्र धातोः इत्यनुवर्त्य धातुरेव यो धातुरिति व्याख्यानान्नामधातोर्न वृद्धिरिति कैयटादयः । अकवयीत् । माधवस्तु नामधातोरपि वृद्धिमिच्छति । अकवायीत् । विरिव वयति । विवाय । विव्यतुः । अवयीत्-अवाशीत् । श्रीरिव श्रयति । शिश्राय । शिश्रियतुः । पितेव । पितरति । आशिषि रिङ् । पित्रियात् । भूरिव भवति । अत्र 'गातिस्था—' (सू २२२३) इति, 'भुवो वुक्—' (२१७४) इति, 'भवतेरः—' (सू २१८१) इति च न भवति । अभिव्यक्तत्वेन धातुपाठस्थस्यैव तत्र ग्रहणात् । अभावीत् । बुभाव । द्रुरिव द्रवति । 'णिश्रि—' (सू

ऽपि 'काम्प्रत्ययात्' इत्याम्त्युक्तं भाष्ये इति शब्देन्दुशेखरे प्रपञ्चितम् । इता । इष्यति । अतु-अताम् । अन्तु । अ-अतात् । अतम् । अत । आनि । आव । आम । आत् । आताम् । आन् । आः । आतम् । आत । आम् । आव । आम । विधिलिङि एत् । एताम् । एयुः । एः । एतम् । एत । एयम् । एव । एम । यात् । यास्ताम् । यासुः । लुङि 'इट ईटि' इति सिज्लोपे 'आटश्च' इति वृद्धि बाधित्वा परत्वादतो लोपे इटा सह आटो वृद्धौ ऐत् ऐष्टाम् ऐषुः, इत्यादीति केचित् । आर्धधातुकोपदेशकाले एव परत्वादतो लोपे अङ्गस्याभावादाट् नेत्यन्ये । ईत् इष्टाम् इत्यादि । ऐष्यत् । ननु मालाशब्दस्य टाप्प्रत्ययान्तत्वेन प्रातिपदिकत्वाऽभावात्ततः कथं क्विबित्यत आह—लिङ्गविशिष्टेति । वस्तुतस्तु आबन्तेभ्यः आचारे क्विप् नास्त्येवेति विश्वपाशब्दनिरूपणे प्रपञ्चितम् । ह्रीप्साहचर्यादिति । क्यन्तादाचारक्विबन्तात् गौरीशब्दात् लुङि अगौरयत् इत्यादौ तिस्योऽर्यन्तात्परत्वाऽसम्भवात् तत्साहचर्यादाबन्तादपि न तयोर्लोप इत्यर्थः । कवयतीति । शपि गुणाऽयादेशौ । कवीयादिति । 'अकृत्सार्व' इति दीर्घः । लुङि अकवि ईत इति स्थिते सिचि वृद्धिमाशङ्क्य आह—सिचि वृद्धिरित्यत्रेति । सिचा धातोरालेपतो लाभेऽपि 'ऋत इद्धातोः' इत्यतस्तदनुवृत्तेर्धातुरेव यो धातुरिति लभ्यते इति भावः । कैयटादय इति । 'इको गुणवृद्धी' इति सूत्रे गोशब्दादाचारक्विपि अगवीदित्युपक्रम्य तथोक्तत्वादिति भावः । माधवस्त्विति । 'सिचि वृद्धिः' इत्यत्र 'ऋत इद्धातोः' इत्यतो धातुग्रहणानुवृत्तौ मानाऽभावेन धातुरेव यो धातुरित्युक्तार्थाऽलाभादिति तदाशयः । वस्तुतस्तु 'इको गुणवृद्धी' 'वदव्रजहलन्तस्याचः' इत्यादिसूत्रस्थभाष्ये सिचि परतः एजन्तं नास्तीत्युक्तत्वादेजन्तेभ्यः आचारक्विप् नास्त्येवेति शब्देन्दुशेखरे प्रपञ्चितम् । विरिवेति । विः पक्षी स इवेत्यर्थः । अभिव्यक्तत्वेनेति । 'अभिव्यक्तपदार्था ये' इति न्यायेनेति

२३१२) इति चङ् न। अद्रावीत्। २६६६ **अनुनासिकस्य क्विझलो क्ङिति** ६।४।१५॥ अनुनासिकान्तस्योपधाया दीर्घः स्यात्क्वौ झलादौ च क्ङिति। इदमिवाचरति इदामति। राजेव राजानति। पन्था इव पथीनति। मथीनति। ऋभुक्षीणति। द्यौरिव दैवतीति माधवः। अत्र ऊठि द्यवतीत्युचितम्। क इव कति। चकौ इति हरदत्तः। माधवस्तु 'व्यल्लोपौ' इति वचनाण्णलि वृद्धि बाधित्वा अतो लोपात् चक इति रूपमाह। स्व इव सस्वौ। सस्व। यत्तु स्वामास स्वाञ्चकार इति तदनाकरमेव। २६६७ **भृशादिभ्यो भुव्यच्वेर्लोपश्च हलः** ३।१।१२॥ अभूततद्भावविषयेभ्यो भृशादिभ्यो भवत्यर्थे क्यङ् स्याद्धलन्तानामेषां लोपश्च। अभृशं

भावः। अभावीदिति। इह 'गातिस्था' इति सिचो न लुक्। बुभावेति। इह न वुक्। अभ्यासस्य अत्त्वं च न। चङ् नेति। 'णिश्रि' इति सूत्रे द्रुग्रहणेन धातुपाठस्थस्यैव ग्रहणादिति भावः। अनुनासिकस्य। अङ्गस्येत्यधिकृतमनुनासिकेन विशेष्यते। तदन्तविधिः। 'नपोधायाः' इत्यतः उपधाया इति 'ढ्रलोपे' इत्यतो दीर्घ इति चानुवर्तते। तदाह—अनुनासिकान्तस्येत्यादिना। इदामतीति। 'हलन्तेभ्यः आचारक्विप् नास्ति' इति 'हस्वनद्यापः' इति सूत्रभाष्ये स्पष्टमिति शब्देन्दुशेखरे स्थितम्। पथीनतीति। पथिन्शब्दात् क्विपि 'अनुनासिकस्ये'ति इकारस्य दीर्घः। इदं तु माधवानुरोधेन। 'क्विबभ्युपगमेऽपि तिपि पथेनतीत्येव युक्तम्, 'इन्हन्' इति नियमेन दीर्घाऽप्राप्तेः। नच नियमस्य सजातीयापेक्षत्वात् सुबानन्तयें एवाऽयं नियमो नाम्यन्ते वाच्यम्, तथाऽसति वृत्रघ्नः स्त्री वृत्रघ्नीत्यत्रापि अल्लोपं बाधित्वा अन्तरङ्गत्वात् 'अनुनासिकस्य' इत्युपधादीर्घापत्तेरित्याहुः। देवतीति। दिव्शब्दादाचारक्विबन्तात् शपि लघूपधगुणः। 'नः क्ये' इति नियमेन अपदान्तत्वात् 'दिव उत्' इत्युत्वं नेति भावः। अत्र ऊठीति। दिव्शब्दात् क्विपि 'च्छ्वोः' इति वकारस्य ऊठि कृते लघूपधगुणं बाधित्वा परत्वादिकारस्य यणि द्यूशब्दात् शपि ऊकारस्य गुणे अवादेशे च द्यवतीति रूपमुचितमित्यर्थः। चकाविति। कशब्दात् क्विबन्तात्लिटि णलि द्वित्वे चुत्वे चक अ इति स्थिते ककारादकारस्य अतो लोपापरपर्यायवृद्धौ आकारे 'आत औ णलः' इत्यौत्वे वृद्धिरेकादेश इति भावः। माधवस्त्विति। चक अ इति स्थिते पूर्वविप्रतिषेधाद्वृद्धिं बाधित्वा ककारादकारस्य अतो लोपे कृते णलोऽकारेण सह चक इति रूपमित्यर्थः। नचैवं सति अ इवाचरति अति, औ, अतुः इत्यत्रापि लिटि 'अत आदेः' इति दीर्घं बाधित्वा अतो लोपः स्यादिति वाच्यम्, 'व्यल्लोपा'दिति पूर्वविप्रतिषेधलभ्यः अतो लोपः सन्निहितत्वेन 'अकृत्सार्वं' इति दीर्घं बाधते, न तु 'अत आदेः' इति दीर्घमपि, 'अनन्तरस्य' इति न्यायादिति माधवाशय इत्याहुः। तदनाकरमेवेति। अनेकाच्त्वाभावादिति भावः। वस्तुतस्तु 'प्रत्ययग्रहणमपनीये'त्यस्य भाष्ये अदर्शनात् प्रत्ययान्तत्वादाम्भवत्येवेति युक्तमेवेत्यनुपदमेवोक्तम्। भृशादिभ्यो।

भृशो भवति भृशायते। अच्वेः इति पर्युदासबलात् अभूततद्भावे इति लब्धम्। तेनेह न। क्व दिवा भृशा भवन्ति। ये रात्रौ भृशा नक्षत्रादयस्ते दिवा क्व भवन्तीत्यर्थः। सुमनस्, अस्य सलोपः। सुमनायते। चुरादौ 'संग्राम युद्धे' इति पठ्यते। तत्र संग्राम इति प्रातिपदिकम्। तस्मात् 'तत्करोति-' इति णिच् सिद्धः। तत्संनियोगेनानुबन्ध आसज्यते। युद्धे योऽयं ग्रामशब्दः इत्युक्तेऽपि सामर्थ्या-

---

भवनं भूः, भाव क्विप्। तदाह—भवत्यर्थे इति। भवने इत्यर्थः। क्यङ् स्यादिति। 'कर्तुः क्यङ् सलोपश्च' इत्यतस्तदनुवृत्तेरिति भावः। हलन्तानामेषामिति। भृशादिषु ये हलन्ताः तेषां लोपः, क्यङ् चेत्यर्थः। ननु 'अभूततद्भावे' इति कुतो लब्धमित्यत आह-अच्वेरिति पर्युदासबलादिति। 'अभूततद्भावग्रहण'मिति वार्तिकमेतल्लब्धार्थकथनपरमिति भावः। ये रात्रौ भृशा इति। प्रकाशाऽतिशयवन्त इत्यर्थः। भृशादिषु हलन्तमुदाहरति-सुमनस् इति। सुमनायते इति। असुमनाः सुमनाः भवतीत्यर्थः। यद्यपि स्त्रियामित्यधिकारे 'अल्सुमनस्समासिकतावर्षाणां बहुत्वं च' इति लिङ्गानुशासनसूत्रे सुमनशब्दस्य नित्यं बहुवचनं विहितम्, तथापि तदेवादिपर्यायरूढविषयम्। सु शोभनं मनो यस्येति सुमनाः इति बहुव्रीहियौगिक इति भावः। सुमनायते इति। क्यङि सलोपे 'अकृत्सार्वं' इति दीर्घः। ननु लुकि मनशब्दात्प्रागटि 'स्वमनायत' इति वक्ष्यमाणमनुपपन्नम् अकृत्स्य अहविधानात् सुमनशब्दस्य समस्तस्यैव अङ्गं प्रत्यङ्गत्वात् 'प्रत्ययग्रहणे यस्मात् स विहितस्तदादेस्तदन्तस्य ग्रहणम्' इति न्यायादित्याशङ्क्य आह-चुरादौ संग्राम युद्धे पठ्यते इति। ततश्च क्वचित् सोपसर्गपाठबलादन्यस्मात् सोपसर्गादाचारक्विपि उपसर्गस्य न धातुसंज्ञाप्रवेश इति विज्ञायते इत्यर्थः। ननु चुरादौ 'संग्रामे'ति समस्तो धातुः, न तु सोपसर्गो ग्रामशब्दः। एवं चास्य प्रातिपदिकत्वाऽभावात् सोपसर्गात् क्विपि उपसर्गस्य न धातुसंज्ञाप्रवेश इत्यत्र कथमिदं गमकमित्यत आह-तत्र संग्राम इति प्रातिपदिकमिति। 'प्रसेरा च' इत्यौणादिके मनूप्रत्यये निष्पन्नस्य ग्रामशब्दस्य 'कृत्तद्धित' इति प्रातिपदिकत्वम्। अव्युत्पत्तिपक्षे 'अर्थवदधातुः' इति प्रातिपदिकत्वमित्यर्थः। ननु चुरादावस्य पाठो ज्ञात्वधिकारविहितचौरादिकणिजर्थः। एवं च प्रातिपदिकत्वेन चुरादौ तस्य पाठो व्यर्थ इत्यत आह—तस्मादिति। तस्मात् संग्राम इति प्रातिपदिकात् चौरादिकणिजसम्भवेऽपि 'तत्करोति' इत्यर्थे णिच् सिद्ध इत्यर्थः। ननु 'तत्करोति' इत्यनेनैव संग्रामशब्दात् प्रातिपदिकाण्णिचि सिद्धेः किमर्थमिह चुरादौ तस्य पाठ इत्यत आह—तत्सन्नियोगेनेति। णिच्सन्नियोगेन अकारस्य इत्संज्ञकस्य अनुदात्तेत्त्वार्थकस्य आसञ्जनार्थ इत्यर्थः। नच मकारादकारस्य इत्संज्ञकत्वे अलोपस्य निमित्तकार्याभावादसंप्रमाद इत्यत्र 'णौ चङ्युपधाया' इत्युपधाह्रस्वः स्यादिति वाच्यम्, संग्रामेत्यत्र हि कथादित्वाद्दन्तः। तस्मादकारो भिन्न एव अनुबन्धत्वेनासज्यते इत्यर्थः। एवं च णौ अतो लोपे सति

त्संग्रामशब्दे लब्धे विशिष्टपाठो ज्ञापयति—'उपसर्गसमानाकारं पूर्वपदं धातुसंज्ञाप्रयोजके प्रत्यये चिकीर्षिते पृथक् क्रियते' इति। तेन मनःशब्दात्प्रागट्। स्वमनायत। उन्मनायते। उदमनायत। एवं च अवागल्भत अवागल्भिष्टेत्यादावप्यवेत्यस्य पृथक्करणं बोध्यम्। ज्ञापकं च सजातीयविषयम्। तेन यत्रोपसर्गस्वरूपं सकलं श्रूयते; न त्वादेशेनापहृतं तत्रैव पृथक्कृतिः। एवं च 'आ ऊढः ओढः' स

णावरलोपित्वान्नोपधाह्रस्वः। कथादित्वलक्षणाऽदन्तत्वबलाभावेनाऽस्य चुरादौ पाठ इति भावः। ननु चुरादौ संग्रामशब्दस्य 'तत्करोति' इति णिचि परे अस्त्वनुबन्धाऽऽसङ्गः। तथापि आचारक्विपि उपसर्गस्य न धातुसंज्ञाप्रवेश इत्यत्र कथमस्य ज्ञापकत्वमित्यत आह—युद्धे इति। सामर्थ्यादिति। 'ग्राम युद्धे' इत्येतावतैव संग्रामशब्दो लभ्यते, केवलस्य ग्रामशब्दस्य युद्धे प्रयोगाऽभावादित्यर्थः। विशिष्टपाठ इति। संग्रामशब्दपाठ इत्यर्थः। ज्ञाप्यमर्थमाह—समानाकारमिति। संग्रामशब्दे युद्धवाचिनि समित्यस्य क्रियायोगाऽभावात् समानाकारमित्युक्तम्। धातुसंज्ञाप्रयोजके इति। 'क्विबादा'विति शेषः। पृथक् क्रियते इति। तथा च न तस्य धातुसंज्ञाप्रवेश इत्यर्थः। ततः किमित्यत आह—तेनेति। सम् इत्यस्य धातुसंज्ञाप्रवेशाऽभावेनेत्यर्थः। तथा च सुमनशब्दात् आचारक्विपि विवक्षिते मनश्शब्दमात्रस्य धातुत्वात्ततो लङि मनश्शब्दस्यैवाङ्त्वात्ततः प्रागेव अट्। न तु सुमनस् इति समुदायात्प्रागित्यर्थः। एतेन 'संग्रामयते'रेव सोपसर्गात् 'नाऽन्यस्मा'दित्यादि भाष्यं 'भृशादिभ्य' इति सूत्रस्थं व्याख्यातमिति बोध्यम्। उन्मनायते इति। भृशादित्वात् क्यङि सलोपः। एवं चेति। एवमुक्तरीत्या 'आचारेऽवगल्भ'-इति क्विबविधावपि अवेत्यस्य पृथक्करणात् गलभशब्दात्प्रागेव अट् इत्यर्थः। ननु आ ऊढः ओढः 'कुगति' इति समासः। अस्मादभृशादित्वात् क्यङि 'ओढायते' इत्यादि रूपम्। अत्रापि आङो धातुसंज्ञाप्रवेशो न स्यात्। तत्र क्यपि लङि ऊढशब्दाद्वा आङो वा प्राक् आटि न रूपे विशेषः। उभयथापि औढायतेत्येव रूपं सिद्धमेव। तथापि ओढायेति क्यङन्तात् क्त्वाप्रत्यये अतो लोपे ओढायिस्वेत्येवेष्यते अत्र क्यङि चिकीर्षिते उक्तरीत्या पृथक्करणे पृथक्कृतस्य आङः 'कुगतिप्रादयः' इति क्त्वाप्रत्ययान्तेन समासे सति 'समासेऽनञ्पूर्वे क्त्वो ल्यप्' इति ल्यप् स्यादित्यत आह—ज्ञापकं च सजातीयविषयमिति। तदेवोपपादयति-तेनेति। चुरादौ 'सङ्ग्राम युद्धे' इति सम्ग्रहणस्य उक्तार्थे पृथक्करणे ज्ञापकस्य सजातीयविषयकत्वाश्रयणेन यत्र उपसर्गस्वरूपमविकृतं श्रूयते नत्वेकादेशेनापहृतं तत्रैव उपसर्गस्य पृथक्कृतिरिति विज्ञायते इत्यर्थः, सङ्ग्रामे सम्ग्रहणस्य ज्ञापकस्य एवंविधत्वादिति भावः। ततः किमित्यत आह—एवञ्चेति। ओढायितेति। ओढशब्दात् भृशादित्वात् क्यङि ओढायेत्यस्मात् क्यङन्तात् क्त्वाप्रत्यये ततो लोपे रूपम्। अत्रेति। अत्र न ल्यदित्यन्वयः। क्यङि विवक्षिते आङः एकादेशेनापहृतत्वेन पृथक्करणाऽभावे सति

इवाचर्य ओढायित्वा, अत्र उन्मनाय्य, अवगलभ्य इतिवन्न ल्यप् । ज्ञापकस्य विशेषविषयत्वे षाष्ठवार्तिकं तद्ग्राह्यं च प्रमाणम् । तथाहि—'उस्योमाङ्च्वाटः प्रतिषेधः' (वा ३६३६) । उस्योमाङोश्च परयोराटः पररूपं नेत्यर्थः । उस्रामैच्छत् औस्रीयत् । औङ्कारीयत् । औढीयत् । 'आटश्च' (सू २६६) इति चशब्देन पुनर्वृद्धिविधानादिदं सिद्धमिति षाष्ठे स्थितम् । २६६८ लोहितादिडाज्भ्यः क्यष्

तस्य आङः क्त्वाप्रत्ययान्तेन समासाऽभावाच्च ल्यबिति भावः । उन्मनाय्य, अवगलभ्य इतिवदिति व्यतिरेकदृष्टान्तः।उन्मनस्शब्दात् भृशादित्वादाचारे क्यङि सकारलोपे 'अकृत्सार्वं'इति दीर्घे उन्मनायेत्यस्मात् , क्त्वो ल्यपि,अतो लोपे, उन्मनाय्येति रूपम् । अवगलभशब्दात् आचारेऽवगलभेति क्विबन्तात् क्त्वो ल्यपि रूपम् । अत्र 'उदित्यस्य 'अवेत्यस्य च उपसर्गस्वरूपस्य अनपहृतत्वेन क्यङि क्विपि च विवक्षिते पृथक्कृततया तयोः क्त्वान्तेन समासे सति ल्यबुचितः। इह तु ओढायित्वेत्यत्र न तथेति व्यतिरेकदृष्टान्तोऽयम । ज्ञापकस्य सजातीयत्वे प्रमाणं दर्शयति—ज्ञापकस्येति । षाष्ठं वार्तिकं दर्शयति—उस्योमाङ्च्वेति । उस्, ओम् , आङ् एषां द्वन्द्वः । षष्ठस्य प्रथमे पादे 'ओमाङोश्च' इति सूत्रे इदं वार्तिकं पठितम् । तदुदाहरणं दर्शयति—उस्योमाङोश्च परयोरिति । 'एङि पररूपम्' इत्यतः पररूपग्रहणानुवृत्तिं मत्वा आह—पररूपं नेति । उस्रि तावदुदाहरति—औस्रीयदिति । उस्रामात्मन ऐच्छदित्यर्थे 'सुप आत्मनः' इति क्यजन्तात्सन्नन्ते उस्रीयशब्दादङ्गात्प्रागटि कृते 'उस्यपदान्तात्'इति पररूपं प्राप्तमनेन निषिध्यते अर्थवद्ग्रहणपरिभाषा त्वनित्या, अस्मादेव भाष्योदाहरणात् । अन्यथा भिन्धुरित्यादौ पररूपं न स्यात् , आगमसहितस्य यूस एवार्थवत्त्वादिति भावः ओमि परतः उदाहरति—औङ्कारीयदिति ओङ्कारशब्दात् क्यजन्तात्सन्नन्ते अङ्गस्य आटि कृते 'ओमाङोश्च' इति पररूपं प्राप्तमनेन निषिध्यते । आङि उदाहरति—औढीयदिति । आ ऊढः ओढः, तस्मात् क्यजन्तात्सन्नन्ते अङ्गस्य ओढशब्दस्य आटि कृते 'ओमाङोश्च' इति पररूपं प्राप्तमनेन निषिध्यते । उदाहरणत्रयमिदं भाष्ये स्थितम् । तत्र यदि उपसर्गस्वरूपस्य एकादेशेनापहारेऽपि पृथक्करणं स्यात् , तर्हि क्यचि विवक्षिते आङः पृथक्कृतौ सत्यां धातुबहिर्भावादूढशब्दात् प्रागाङः परत्र आटि सति पररूपस्याप्रवृत्तेराङि पररूपप्रतिषेधो व्यर्थः स्यात् । उक्तज्ञापकस्य सजातीयविषयत्वे तु अत्र आङ एकादेशेनापहारात् पृथक्करणाभावादोढशब्दात् प्रागाङागमे सति आङि पररूपप्राप्तेस्तन्निषेधोऽर्थवान् भवति । अतो ज्ञापकस्य सजातीयविषयत्वे 'उस्योमाङश्च' इत्याङ्ग्रहणम् औढीयदिति तदुदाहरणपरभाष्यं च अत्र प्रमाणमिति भावः । ज्ञापकस्य सजातीयविषयत्वे प्रमाणान्तरमाह—आटश्चेति चशब्देनेति । 'आटश्च' इति चकारः पुनर्वृद्धिविधानार्थः । तथाच आटोऽपि वृद्धिरेव यथा स्यात् नाऽन्यत्पररूपमिति लभ्यते इत्यपि षष्ठाध्याये 'ओमाङोश्च' इति सूत्रे 'आटश्च' इति सूत्रे च भाष्ये स्थितमित्यर्थः । एवञ्च एतद्वार्तिकप्रत्याख्यानपरः सौत्रश्चकारस्तत्प्रत्याख्येयं चाऽत्र ज्ञापकमित्युक्तं भवति । लोहितादि ।

३।१।१३॥ लोहितादिभ्यो डाजन्ताच्च भवत्यर्थे क्यष् स्यात्। २६६९ वा क्यषः १।३।९०॥ क्यषन्तात्परस्मैपदं वा स्यात्। लोहितायति। लोहितायते। अत्र अच्वेः इत्यनुवृत्त्या अभूततद्भावविषयत्वं लब्धम्। तच्च लोहितशब्दस्यैव विशेषणम्। न तु डाचोऽसम्भवात्। नाप्यादिशब्दग्राह्याणाम्, तस्य प्रत्याख्यानात्। तथाच वार्तिकं-'लोहितडाज्भ्यः क्यष्वचनं भृशादिष्वितराणि' (वा १७२९-३०) इति। न चैवं काम्यच इव क्यषोऽपि ककारः श्रूयेत उच्चारणसामर्थ्यादिति वाच्यम्। तस्यापि भाष्ये प्रत्याख्यानात्। पटपटायति—पटपटायते। कृभ्वस्तियोगं विनापीह डाच्। डाजन्तात्क्यषो विधानसामर्थ्यात्। यत्तु—

लोहितश्यामदुःखानि हर्षगर्वसुखानि च। मूर्च्छानिद्राकृपाधूमाः करुणा नित्यचर्मणी॥

इति पठित्वा श्यामादिभ्योऽपि क्यषि पदद्वयमुदाहरन्ति। तद्भाष्यवार्तिकविरुद्धम्। तस्मात्तेभ्यः क्यङेव। श्यामायते। सुखादयो वृत्तिविषये तद्वति वर्तन्ते।

भवत्यर्थे इति। भृशादिभ्यो भुवि' इत्यतः भुवि इति अनुवृत्तेरिति भावः। वा क्यषः परस्मैपदमिति। 'शेषात्कर्तरि' इत्यतस्तदनुवृत्तेरिति भावः। लोहितायतीति। अलोहितो लोहितो भवतीत्यर्थः। अत्रेति। 'लोहितादि' इति सूत्रे इत्यर्थः। तच्चेति। अभूततद्भावविषयत्वमित्यर्थः। अभवदिति। अभ्यस्तानुकरणात् डाचो विहितत्वेन तस्य अभूततद्भावविषयत्वे अनुकरणत्वस्य भङ्गापत्तेरिति भावः। नाप्यादिशब्दग्राह्याणामिति। 'श्यामादिशब्दानामिति शेषः। तस्येति। आदिग्रहणाप्येष° इः। आदिग्रहणप्रत्याख्याने प्रमाणं दर्शयति-तथा चेति। आदिग्रहणमपनीय लोहितशब्दात् डाजन्तेभ्यश्च क्यष्वचनं कर्तव्यम्। इतराणि लोहितादिगणपठितानि श्यामादीनि प्रातिपदिकानि भृशादिष्वेव पठनीयानीत्यर्थः। एवञ्च श्यामादिनडेभ्यः क्यङि आत्मनेपदमेवेति फलितम्। तस्यापीति। आदिग्रहणस्येव क्यषः ककारस्यापि भाष्ये प्रत्याख्यातत्वादित्यर्थः। पटपटायतीति। 'अभ्यस्तानुकरणात् द्व्यजवरार्द्धादिनितौ डाच्' इति पटच्छब्दात् डाचि विवक्षिते सति 'डाचि विवक्षिते द्वे बहुलम्' इति द्विरुक्ते 'नित्यमाम्रेडिते डाचि' इति पूर्वखण्डान्तस्य तकारस्य उत्तरखण्डादेः पकारस्य च परूपे एकस्मिन् पकारे, डित्त्वाट्टिलोपे, पटपटाशब्दात् डाजन्तात् क्यषि तदन्तात्पञ्चडादीति भावः। 'अभूततद्भावे' इति तु नात्र सम्बध्यते इत्युक्तम्। न ह्यपटच्छब्दः पटच्छब्दो भवतीति युज्यते। ननु कृभ्वस्तियोगाऽभावादिह कथं डाजित्यत आह—कृभ्वस्तियोगं विनापीति। भवत्यर्थसत्तामात्रेणेत्यर्थः। कुत इत्यत आह—डाजन्तादिति। तद्भाष्येति। 'भृश दिब्बितराणि' इत्युक्तवार्तिकतद्भाष्यविरुद्धमित्यर्थः। तस्मादिति। उक्तवार्तिकभाष्यविरोधात् तेभ्यः श्यामादिभ्यः भृशादिष्वन्तर्गणेभ्यः क्यङेव न तु क्यषित्यर्थः। ततश्च 'वा क्यषः' इत्यस्याप्रवृत्तेः किरवादात्मनेपदमेवेति मत्वा आह—श्यामायत इति। श्यामो भवतीत्यर्थः। ननु देवदत्तः सुखायते इति

लिङ्गविशिष्टपरिभाषया लोहिनीशब्दादपि क्यष । लोहिनीयति । लोहिनीयते ।
२६७० कष्टाय क्रमणे ३।१।१४॥ चतुर्थ्यन्तात्कष्टशब्दादुत्साहेऽर्थे क्यङ् स्यात् ।
कष्टाय क्रमते कष्टायते । पापं कर्तुमुत्सहते इत्यर्थः । 'सत्रकक्षकष्टकृच्छ्रगहनेभ्यः
कण्वचिकीर्षायामिति वक्तव्यम्' (वा १७६१) । कण्वं पापम् । सत्रादयो वृत्ति-
विषये पापार्थाः । तेभ्यो द्वितीयान्तेभ्यश्चिकीर्षायां क्यङ् । पापं चिकीर्षतीत्यस्व-
पदविग्रहः । सत्रायते, कक्षायते इत्यादि । **२६७१ कर्मणो रोमन्थतपोभ्यां
वर्तिचरोः ३।१।१५॥** रोमन्थतपोभ्यां कर्मभ्यां क्रमेण वर्तनायां चरणे चार्थे
क्यङ् स्यात् । रोमन्थं वर्तयति रोमन्थायते । 'हनुचलने इति वक्तव्यम्' (वा
१७६२) । चर्वितस्याकृष्य पुनश्चर्वण इत्यर्थः । नेह । कोटो रोमन्थं वर्तयति ।

कथम् ? देवदत्तस्य सुखस्वाभावादित्यत आह—सुखादय इति । श्यामादिषु ये सुखदुः
खादिशब्दाः गुणवचनास्ते सुखादिगुणवति वर्त्तन्ते इत्यर्थः । एवं च 'सुखायते' इत्यस्य
सुखवान् भवतीत्यर्थः । एवं 'दुःखायते' इत्यादावपि । ननु लोहितशब्दाद्विहितः क्यष्
कथं लोहिनीशब्दात् स्यादित्यत आह—लिङ्गविशिष्टेति । कष्टाय क्रमणे । 'क्रमण'शब्दं
विवृणोति । उत्साह इति । अस्वरितत्वात् क्यषिति नानुवर्तते इति भावः । 'क्रियार्थो-
पपदस्ये'ति चतुर्थीति मत्वाऽऽह—पापं कर्तुमिति । क्रमते इत्यत्र 'वृत्तिसर्गतायनेषु
क्रमः' इति तङ् । 'कण्वचिकीर्षायाम्' इत्यत्र कण्वपदं व्याचष्टे—कण्वं पापमिति । सत्रा-
दिशब्दान् विवृणोति । सत्रादय इति । द्वितीयान्तेभ्य इति । चिकीर्षायां द्वितीयान्तस्यै-
वाऽन्वययोग्यत्वादिति भावः । कण्वशब्दस्तु सत्रादिशब्दानां कण्वपरत्वे तात्पर्यग्रा-
हकः । केचित्तु 'कण्वे'त्यविभक्तिकम् । कण्ववतिभ्यः इति व्याचक्षते । अस्वपदविग्रह
इति । वृत्तावेव सत्रादिशब्दानां पापवाचित्वादिति भावः । इदं कष्टशब्दादन्यत्रैव ।
'कष्टाय क्रमते' इति तु स्वपदविग्रहोऽस्त्येव । भाष्ये एवं विग्रहं प्रदर्श्य सत्रादिषु वि-
ग्रहाऽप्रदर्शनादित्याहुः । कर्मणो रोमन्थ । वृतुधातोर्ण्यन्तात् , 'धात्वर्थनिर्देशे ह्यवक्त-
व्यः' इति इकि वर्तशब्दः । आवर्तनमर्थः । चरेः सप्तदादित्वाद्भावे क्विप् । वर्ति-
चर इनयोर्द्वन्द्वात्सप्तमी । आवर्तने चरणे चेति लभ्यते । कर्मशब्देन कर्मकारकं विव-
क्षितम् । द्वित्वे एकवचनम् । तथाच कर्मकारकवृत्तिभ्यां रोमन्थतपश्शब्दाभ्यामिति
लभ्यते । यथासंख्यमन्वयः । तदाह—रोमन्थतपोभ्यामिति । रोमन्थमिति । उद्गीर्णस्य नि-
गीर्णस्य वा मन्थो रोमन्थ इति भाष्यम् । उद्गीर्णस्य उदराद्उपरि कण्ठद्वारा निर्गतस्य
निगीर्णस्य अपानद्वारा निर्गतस्य च मन्थः चर्वणं रोमन्थ इत्यर्थः । वर्तयतीति । आव-
र्तयतीत्यर्थः । हनुचलन इति । हनु तावु तच्चलने सत्येव अयं विधिरित्यर्थः । तथाच
उदरगतं भक्षितं द्रव्यं तृणादिकं पुनः पुनराकृष्य तावुचलनेन चूर्णितस्य पुनःपुनः प्राशने
रोमन्थशब्दात् क्यङिति फलितम् । तदाह—चर्वितस्येति । हनुचलनेन भक्षितस्य उदरं
प्रविष्टस्य पुनःपुनराकृष्य हनुचलनेन भक्षणे गम्ये इति फलितमित्यर्थः । कीट इति ।

अपानप्रदेशान्निस्सृतं द्रव्यमिह रोमन्थः। तदश्नातीत्यर्थ इति कैयटः। वर्तुलं करोतीत्यर्थ इति न्यासकारहरदत्तौ। 'तपसः परस्मैपदं च' (वा १७६६)। तपश्चरति तपस्यति। **२६७२ बाष्पोष्मभ्यामुद्गमने ३।१।१६॥** आभ्यां कर्मभ्यां क्यङ् स्यात्। बाष्पमुद्गमति बाष्पायते। ऊष्मायते। 'फेनाच्चेति वाच्यम्' (वा १७६४)। फेनायते। **२६७३ शब्दवैरकलहाभ्रकण्वमेघेभ्यः करणे ३।१।१७॥** एभ्यः कर्मभ्यः करोत्यर्थे क्यङ् स्यात्। शब्दं करोति शब्दायते। पक्षे 'तत्करोति—' इति णिजपीष्यत इति न्यासः। शब्दयति। 'सुदिनदुर्दिननीहारेभ्यश्च' (वा १७३६-३७)। सुदिनायते। **२६७४ सुखादिभ्यः कर्तृवेदनायाम् ३।१।१८॥** एभ्यः कर्मभ्यो वेदनायामर्थे क्यङ् स्याद्वेदनाकर्तुरेव चेत्सुखादीनि स्युः। सुखं वेदयते सुखायते। कर्तृग्रहणं किम्। परस्य सुखं वेदयते। **२६७५ नमोवरिवश्चित्रङः क्यच् ३।१।१९॥** करणे इत्यनुवृत्तेः क्रियाविशेषे पूजायां परिचर्यायामाश्चर्ये च। नमस्यति देवान्। पूजयतीत्यर्थः। वरिवस्यति गुरून्। शुश्रूषते इत्यर्थः। चित्रीयते। विस्मयते इत्यर्थः। विस्माप्यते इत्यन्ये। **२६७६ पु-**

इह हनुचलनाभावान्न क्यङिति भावः। तदेवोपपादयति—अपानेति। तपसः परस्मैपदं च। इति वार्तिकम्। तपश्शब्दः कर्मकारकवृत्तिः पूर्वसूत्राचरणे क्यङन्तमभते। ङित्वप्रयुक्तमात्मनेपदं बाधित्वा परस्मैपदमेव च लभते इत्यर्थः। तपस्यतीति। प्रातिपदिकादेवास्य क्यङुत्पत्तेरन्तर्वर्तिविभक्त्यभावात् 'नः क्ये' इति नियमाच्च पदत्वाऽभावान्न रुत्वमिति भावः। बाष्पोष्मभ्यामुद्गमने। आभ्यां कर्मभ्यामिति। 'कर्मणो रोमन्थ' इत्यतः कर्मग्रहणमनुवर्तते इति भावः। कर्मकारकवृत्तिभ्यामित्यर्थः। फेनायते इति। फेनमुद्गमतीत्यर्थः। शब्दवैर। करणं क्रिया। तदाह—करोत्यर्थे इति। 'तत् करोती'ति णिचोऽपवादः। पक्षे इति। कदाचिदित्यर्थः। न्यास इति। भाष्याऽनारूढत्वमत्र अरुचिबीजम्। सुदिनदुर्दिन इति। वार्तिकम्। 'करोत्यर्थं क्यङि'ति शेषः। सुखादिभ्यः। 'कर्तृ' इति पृथक् लुप्तषष्ठीकम्। 'कर्मणो रोमन्थ' इत्यतः कर्मग्रहणाऽनुवृत्तिं मत्वा आह—एभ्यः कर्मभ्य इति। वेदनायामिति। ज्ञाने इत्यर्थः। कर्तृत्वं च वेदनां प्रत्येव विवक्षितम्, उपस्थितत्वात्। वेदनाकर्तृवृत्तिवाचिभ्यः सुखादिशब्देभ्य इति लभ्यते। फलितमाह—वेदनाकर्तुरेव चेदिति। सुखं वेदयते इति। जानातीत्यर्थः। 'विद चेतनायाम्' इति चुरादौ। नमो वरिवस्। नमस्, वरिवस्, चित्रङ् एषां समाहारद्वन्द्वात्पञ्चमी। आत्मनेपदार्थं चित्रशब्दो डित्त्वित्। 'शब्दवैर' इत्यतः करणे इत्यनुवर्तते। करणं क्रिया। सा च पूजापरिचर्याऽऽश्चर्यात्मिका विवक्षिता, 'नमसः पूजायाम्' 'वरिवसः परिचर्यायाम्' 'चित्रङः आश्चर्ये' इति वार्तिकैः। तदाह—करणे इत्यनुवृत्तेरित्यादिना। नमस्यति देवानिति। कारकविभक्तेर्बलीयस्त्वात् द्वितीया। परिचर्या शुश्रूषेति मत्वा आह—शुश्रूषते इत्यर्थ इति। आश्चर्यशब्दो विस्मयवाचीति मत्वा आह—विस्मयते इत्यर्थ इति।

च्छभाण्डचीवराण्णिङ् ३।१।२०॥ 'पुच्छादुदसने व्यसने पर्यसने च' (वा १७४६) । विविधं विरुद्धं वोत्क्षेपणं व्यसनम् । उत्पुच्छयते । विपुच्छयते । परिपुच्छयते । 'भाण्डात्समाचयने' (वा १७४४) । संभाण्डयते । भाण्डानि समाचिनोति । राशीकरोतीत्यर्थः । समवभाण्डत । 'चीवरादर्जने परिधाने च' (वा १७४५) । संचीवरयते भिक्षुः । चीवराण्यर्जयति, परिधत्ते वेत्यर्थः । **२६७७ मुण्डमिश्रश्लक्ष्णलवणव्रतवस्त्रहलकलकृततूस्तेभ्यो णिच् ३।१।२१॥** कृञर्थे । मुण्डं करोति मुण्डयति । 'व्रताद्भोजनतन्निवृत्त्योः' (वा ५०६०) पयः शूद्रान्नं वा व्रतयति । 'वस्त्रात्समाच्छादने' (वा ५०६१) । संवस्त्रयति । 'हल्यादिभ्यो ग्रहणे' (वा ५०६२) । 'हलिकल्योरदन्तत्वं च निपात्यते' (वा १७४७) । हलिं कलिं वा गृह्णाति हलयति, कलयति । महद्धलं हलिः । परत्वाद् वृद्धौ सत्यामपीष्टवद्भावेनाऽगेव लुप्यते । अतः सन्वद्भावदीर्घौ न । अजहलत् । अचकलत् । कृतं गृह्णाति कृत-

---

विस्मापयत इत्यन्ये इति । **आश्चर्यशब्दो विस्मापनपर इति भावः । ततश्चित्रीयमाणोऽसाविति भट्टः । असौ मायामृगः विस्मयमुत्पादयन्नित्यर्थः ।** पुच्छभाण्ड । पुच्छादुदसने । **इति वार्तिकम् ।** उत्पुच्छयते इति । **विविधं विरुद्धं वा पुच्छमुत्क्षिपतीत्यर्थः ।** भाण्डात् समाचयने । **इत्यपि वार्तिकम् ।** समवभाण्डतेति । **'उपसर्गसमानाकारं पूर्वपदं धातुसंज्ञाप्रयोजके प्रत्यये चिकीर्षिते पृथक्क्रियते' इत्युक्तत्वात् सम्भाण्डशब्दात् क्वय इत्यपि भाण्डशब्दात् प्रागेवाऽडिति भावः । एवम् उदपुपुच्छत इत्यादावपि ।** चीवरादर्जने । **इत्यपि वार्तिकम् ।** मुण्डमिश्र । कृञर्थे इति । **शेषपूरणमिदम्, 'शब्दवैर' इत्यतः कर्णे इत्यनुवृत्तेरिति भावः ।** व्रताद्भोजन । **इति वार्तिकम् ।** पयः शूद्रान्नं वा व्रतयतीति । **पयो भुङ्क्ते, शूद्रान्नं वर्जयतीत्यर्थः ।** वस्त्रात्समाच्छादने । **इत्यपि वार्तिकम् । भाष्ये तु न दृश्यते ।** सवस्त्रयतीति । **वस्त्रेण सम्यगाच्छादयतीत्यर्थः। वस्त्रं परिधत्ते इति वा ।** हल्यादिभ्यो ग्रहणे । **इति वार्तिकम् । भाष्ये तु न दृश्यते ।** हलिकल्योरिति । **हलिकली इदन्तौ । हलकलशब्दावदन्तौ इदन्तौ च । यावदन्तौ तयोरत्वं निपात्यते इति भाष्ये स्पष्टम् ।** हलयति कलयतीति । **हलिकलिभ्यां णौ इकारस्य अकारे इष्टवत्त्वेन टेर्लोपे हलि कलि इति ण्यन्ताभ्यां लडादीति भावः ।** महद्धलं हलिरिति । **अत्र वृद्धप्रयोगः अन्वेषणीयः ।** नन्वनयोरिकारान्तयोरदन्तत्वनिपातनं व्यर्थम् । इकारस्य णाविष्टवत्त्वाल्लोपे हलयति कलयतीति सिद्धेः । नच अचहलत् अचकलत् इत्यत्र सन्वत्त्वाऽप्रवृत्तये अग्लोपित्त्वाय तयोरदन्तत्वमिति वाच्यम् । इकारलोपेऽप्यग्लोपित्त्वसिद्धेरित्यत आह—परत्वादिति । इकारस्य णौ इष्टवत्त्वे टिलोपात् प्रागेव परत्वात् 'अचो ञ्णिति' इति वृद्धौ कृतायां ऐकारस्य इष्टवाद् टिलोपे अग्लोपित्त्वं न स्यात् । इकारयोरत्वे तु अकारस्य टिलोपात् प्राक् परत्वाद्वृद्धौ सत्यामप्याकार

यति। तूस्तानि विहन्ति वितूस्तयति। तूस्तं केशा इत्येके। जटीभूताः केशा इत्यन्ये। पापमित्यपरे। मुण्डादयः 'सत्यापपाश—' (सू २५६३) इत्यत्रैव पठितुं युक्ताः। 'प्रातिपदिकाद्धात्वर्थे—' इत्येव सिद्धे केषांचिद्ग्रहणं सापेक्षेभ्योऽपि णिजर्थम्। मुण्डयति माणवकम्। मिश्रयत्यन्नम्। श्लक्ष्णयति वस्त्रम्। लवणयति व्यञ्जनम्। हलिकल्योरदन्तत्वार्थम्। सत्यस्यापुगर्थम्। केषांचित्तु प्राग्ग्रार्थम्। सत्यं करोत्याचष्टे वा सत्यापयति। 'अर्थवेदयोरप्यापुग्वक्तव्यः' (वा १७५८)। अर्थापयति, वेदापयति। पाशं विमुञ्चति विपाशयति। रूपं पश्यति रूपयति। वीणयोपगायत्युपवीणयति। तूलेनानुकृष्णात्यनुतूलयति। तृणाग्रं तूलेनानुघट्टयतीत्यर्थः। श्लोकैरुपस्तौति उपश्लोकयति। सेनयाभियाति अभिषेणयति। 'उपसर्गात्सुनोति—' (सू २२७०) इति षः। अभ्यषेणयत्। 'प्राक्सितात्—' (सू २२७६) इति षः। अभिषिषेणयिषति। 'स्थादिष्वभ्यासेन च—' (सू २२७७) इति षः। लोमान्यनुमार्ष्टि अनुलोमयति। 'त्वच संवरणे' घः। त्वचं गृह्णाति

एव इष्ठवत्त्वाल्लुप्यते इत्यर्थः। अत इति। अरलोपित्वात् सन्वत्त्वम्, 'दीर्घो लघोः' इति दीर्घश्च नेत्यर्थः। कृतं गृह्णातीति। उपकारं स्वीकरोतीत्यर्थः। पठितुं युक्ता इति। लाघवादेकसूत्रत्वं युक्तमित्यर्थः। केषांचिदिति। मुण्डादीनामित्यर्थः। सापेक्षेभ्योऽपीति। अन्यथा णिजन्तस्यास्य सनाद्यन्तधातुत्वाद्विशेषणसापेक्षत्वे मुण्डादिभ्यो णिच् न भवेत्, सविशेषणानां वृत्तिनिषेधात्। इह मुण्डादीनां पुनर्ग्रहणे तु तत्सामर्थ्यात् सापेक्षेभ्योऽपि मुण्डादिभ्यो णिच् सिध्यतीत्यर्थः। स्पष्टं चेदं 'सुप आत्मनः' इत्यत्र भाष्यकैयटयोः। मुण्डयति माणवकमिति। अत्र माणवकं मुण्डं करोतीत्यर्थे मुण्डशब्दस्य माणवकसापेक्षत्वेऽपि णिच् सिध्यति। अन्यथा यदा प्रकरणादिना माणवकादिविशेषो ज्ञायते तदैव मुण्डयतीति णिच् स्यादिति भावः। 'सुप आत्मनः' इति सूत्रभाष्ये तु 'मुण्डयति माणवकमित्यत्र गमकत्वाण्णिच्, 'महान्तं पुत्रमिच्छतीत्यादौ तु अगमकत्वात् न क्यजिच्युक्तम्। तदा प्रपञ्चार्थमेव मुण्डादिग्रहणमिति शब्देन्दुशेखरे स्थितम्। श्लक्ष्णयति वस्त्रमिति। निर्मलं करोतीत्यर्थः। लवणयति व्यञ्जनमिति। लवणयुक्तं करोतीत्यर्थः। हलिकल्योरिति। एवं च ताभ्यां सापेक्षाभ्यां न णिच्, तदग्रहणस्य अदन्तत्वनिपातनेन चरितार्थत्वादिति भावः। ननु सत्यशब्दात् तत्करोति इत्यादिनैव णिच्सिद्धेः 'सत्याप' इति सूत्रे सत्यग्रहणं व्यर्थमित्यत आह—सत्यस्यापुगर्थमिति। केषांचिदिति। पाशादीनामित्यर्थः। सत्यापयतीति। आपुग्विधिसामर्थ्याच्च टिलोपः। पाशं विमुञ्चतीत्यादौ 'प्रातिपदिकाद्धात्वर्थे' इति णिच्। अभिषिषेणयिषतीति। अभि, षेणि इति व्यन्तात्सनि रूपम्। ननु त्वचं गृह्णाति त्वचयतीति कथम्? त्वच्छब्दाच्चकारान्ताण्णिचि टिलोपे

त्वचयति । वर्मणा संनह्यति संवर्मयति । वर्णं गृह्णाति वर्णयति । चूर्णैरवध्वंसते अव-चूर्णयति । इष्टवदित्यतिदेशात्पुंवद्भावादयः । एनीमाचष्टे एतयति । दरदमाचष्टे दारदयति । पृथुं प्रथयति । वृद्धौ सत्यां पूर्वं वा टिलोपः । अपिप्रथत्-अपप्रथत् । मृदुं म्रदयति । अमम्रदत् । भृशं कृशं दृढं-भ्रशयति । क्रशयति । द्रढयति । अबभ्रशत् । अचक्रशत् । अदद्रढत् । परिद्रढयति । पर्यवद्रढत् । ऊढिमाख्यत् । औजिढत् । ढत्वादीनामसिद्धत्वात् हृतिशब्दस्य द्वित्वम् । 'पूर्वत्रासिद्धीयमद्वित्वे'

त्वयतीत्यापत्तेरित्यत आह—त्वचेति । 'त्वच संवरणे' इत्यस्मात् 'पुंसि संज्ञायां घः प्रायेण' इति घप्रत्यय इत्यर्थः । पुवद्भावादय इति । आदिना रभावटिलोपादिग्रहणम् । एतयतीति । 'भस्याऽढे' इति पुंवत्त्वस्य इष्टनि प्रवृत्तेः णावपि तस्याऽतिदेशात् 'वर्णादनुदात्तात्' इति स्त्रीप्रत्ययस्य तत्संनियोगशिष्टनत्वस्य च निवृत्तौ एतशब्दे तकारादकारस्य टिलोप इति भावः । नन्वेनीशब्दाण्णौ टिलोपेन स्त्रीप्रत्ययनिवृत्तौ तत्संनियोगशिष्टनत्वस्यापि निवृत्तौ एतयतीति सिध्यतीत्यस्वरसात् पुंवद्भावे उदाहरणान्तरमाह—दरदमिति । दरदिति कश्चिद्राजा, तस्यापत्यं दारदः 'द्व्यञ्मगध' इत्यण् । स्त्र्यपत्ये तु दरदोऽपत्यस्त्री दरत् 'अतश्च' इत्यणो लुक् । तामाचष्टे इत्यर्थे दरच्छब्दाण्णौ इष्टवत्त्वात् पुंवत्त्वेन स्त्रियामिष्टनुवृत्तौ 'अतश्च' इति स्त्रियां विहितस्य अणुप्रत्ययलुको निवृत्तौ दारदशब्दे टेर्लोपे दारदयतीति रूपं सिध्यति । पुंवद्भावाऽभावे तु दरदशब्दस्य टिलोपे सति दरयतीति स्यादिति भावः । टिलोपस्य अजादेशत्वेन स्थानिवत्त्वान्नोपधावृद्धिः । 'पृथुं मृदुं भृशं चैव कृशं च दृढमेव च । परिपूर्वं दृढं चैव षडेतान् रविणौ स्मरेत् ॥' इति । श्लो० ग० कारः । क्रमेणोदाहरति—पृथुमिति । 'आचष्टे' इति शेषः । प्रथयति । तत्र प्रक्रियां दर्शयति-वृद्धौ सत्यामिति । पृथु इ इति स्थिते परत्वादुवृद्धौ कृतायां टिलोपः । अथवा कृतायामकृतायां च वृद्धौ प्रवृत्त्या नित्यत्वादुवृद्धेः प्राक् टिलोपः । उभयथापि 'र ऋतः' इति रभावे प्रथयतीति रूपमिति भावः । वस्तुतस्तु अकृतायां वृद्धौ ऊकारस्य लोपः । कृतायां तु औकारस्य लोपः । तथा च 'शब्दान्तरस्य प्राप्नुवन् विधिरनित्यः' इति टिलोपः अनित्यः । ततश्च पररूपात् टिलोपात् प्राग्वृद्धिरेवेति 'मुण्डमिश्र' इति सूत्रे भाष्ये स्थितम् । वृद्धौ सत्यां पूर्वं वा टिलोप इति मूलं तु कृताऽकृतप्रपञ्चित्वाट्टिलोपस्य नित्यत्वमभिप्रेत्येति बोध्यम् । अपिप्रथदिति । वृद्धौ सत्यां टिलोपे अरलोपित्त्वाऽभावात् सम्वत्त्वे 'सन्यत' इति ह्रस्वमिति भावः । अपप्रथदिति । वृद्धेः पूर्वं टिलोपेन उकारस्य निवृत्तावरलोपित्वात् सम्वत्त्वाऽभावे रूपम् । अवभ्रशदित्यादौ वृद्धेः पूर्वं पश्चाद्वा टिलोपेऽपि अरलोपित्त्वान्न सम्वत्त्वमिति भावः । औजिढदिति । वहधातोः क्तिनि ढत्वधत्वष्टुत्वढलोपेषु ऊढिः । तस्मात् णौ टिलोपे ऊढि इति ण्यन्तात्लुङि चङि आटि वृद्धौ औढि अ त् इति स्थिते प्रक्रियां दर्शयति-ढत्वादीनामिति । ढत्वधत्वष्टुत्वढलोपानामसिद्ध-

इति त्वनित्यमित्युक्तम्। ढिशब्दस्य द्वित्वमित्यन्ये। औडिढत्। ऊढमाख्यत्। ओजढत्-औडढत्। 'ओः पुयण्—' (सू २५७७) इति वर्गप्रत्याहारजग्रहो लिङ्गं 'द्वित्वे कार्ये णावच आदेशो न' इति ऊनयतावुक्तम्। 'प्रकृत्यैकाच्' (सू २०१०) वृद्धिपुकौ। स्वापयति। त्वां मां वा आचष्टे त्वाययति मापयति। मपर्यन्तस्य त्वमौ। पररूपात्पूर्वं, नित्यत्वाट्टिलोपः वृद्धिः पुक्। त्वादयति, मादयति इति तु न्याय्यम्। अन्तरङ्गत्वात्पररूपे कृते 'प्रकृत्यैकाच्' (सू २०१०) इति

त्वात् 'अजादेर्द्वितीयस्य' इति हृतिशब्दस्य द्वित्वमित्यर्थः। हस्युक्तमिति।'ह्रस्विकरणप्रक्रियायां ऊर्णुञ्ग्धाता'विति शेषः। एवञ्च हृतिशब्दस्य द्वित्वे हलादिशेषे,'कुहोश्चुः' इति हस्य चुत्वमिति भावः। ढिशब्दस्येति। 'पूर्वत्रासिद्धीयमद्वित्वे' ह्यस्य क्वचिदनित्यत्वेऽप्यत्र तदप्रवृत्तौ मानाभावादिति भावः। ऊढमाख्यदिति। वहधाताः क्तप्रत्यये ढत्वधत्वष्टुत्वढलोपेषु ऊढशब्दात् ण्यन्तात्लुङि चङि ढत्वादीनामसिद्धत्वात् 'हृते' त्यस्य द्वित्वे हलादिशेषे अभ्यासस्य चुत्वे रूपम्। औडढदिति। 'पूर्वत्रासिद्धीयमद्वित्वे' इति ढत्वादीनामसिद्धत्वाऽभावपक्षे ढशब्दस्य द्वित्वे रूपम्। नन्विह परत्वात् टिलोपे सति णिच्सहितस्य हृतीति ह्रीत्यस्य वा द्वित्वे कृते अभ्यासे इकार एव श्रूयेत नत्वकार इत्यत आह-ओः पुयणित्यादि। स्वशब्दाण्णिचि टिलोपमाशङ्क्य आह-प्रकृत्यैकाजिति। प्रकृतिभावाट्टिलोपाऽभावे अकारस्य वृद्धौ आकारे पुगागमः। तदाह-वृद्धिपुकाविति। स्वापयति मापयति इत्यत्र प्रक्रियां दर्शयति-मपर्यन्तस्येति। युष्मदस्मद्भ्यां ङौ 'प्रत्ययोत्तरपदयोश्च' इति मपर्यन्तस्य त्वमौ। त्व अद् इ, म अद्, इति स्थिते आह—पररूपादिति। कृते अकृते च पररूपे टिलोपस्य प्रवृत्तेर्नित्यत्वं बोध्यम्। त्व इ, म इ इति स्थिते आह—वृद्धिरिति। अकारस्य आकारः। टिलोपस्य स्थानिवत्त्वं तु न शङ्क्यम्, अजादेशत्वाऽभावात्। पुगिति। 'अर्ति' ह्यत्रनेनेति भावः। तदेवं प्राचीनमतमुन्नीय्य स्वमतमाह-स्वादयतीत्यादिना। तदेवोपपादयति—अन्तरङ्गत्वादिति। त्व अद् इ, म अद् इ, इति स्थिते नित्यमपि टिलोपं बाधित्वा अन्तरङ्गत्वात्पररूपे कृते 'प्रकृत्यैकाच्' इति प्रकृतिभावे टिलोपस्याऽप्रवृत्तौ उपधावृद्धिरिति भावः। ननु द्वयेरेमेयस्तु किमुदाहरणमिति प्रश्ने प्रेयान् प्रेमा प्रेष्ठः इत्युदाहरणानि प्रदर्श्य, 'नैतदस्ति प्रयोजनं' 'प्रस्थस्फ' इति विहितप्रादीनामभीयत्वेनाऽसिद्धतया तत्र टिलोपाप्रसक्तेरित्युक्त्वा श्रेयान् श्रेष्ठः इत्यत्र 'प्रशस्यस्य श्रः' इति आदेशस्य पाञ्चमिकतया आभीयत्वाभावेनासिद्धत्वाभावात् टिलोपे प्राप्ते प्रकृतिभावविधिरित्युदाहरणान्तरं प्रदर्श्य 'आदेशे अकारोच्चारणसामर्थ्यात्टिलोपो न भविष्यती'त्युक्त्वा स्रग्विणमः स्रजिष्ठः इत्यत्र 'विन्मतोर्लुक्' इति लुकि टिलोपनिवृत्त्यर्थं प्रकृतिभावविधानमित्युक्त्वा प्राप्त एव टिलोपे आरभ्यमाणस्य लुकस्तदपवादतया लुका टिलोपस्य बाधो भविष्यतीति 'प्रकृत्यैकाच्' इत्यस्य भाष्ये प्रत्याख्यातत्वात् स्वादयति, माद-

प्रकृतिभावात् । न च प्रकृतिभावो भाष्ये प्रत्याख्यात इति भ्रमितव्यम् । भाष्यस्य प्रेष्ठाद्युदाहरणविशेषेऽन्यथासिद्धिपरत्वात् । युवामावां वा युष्मयति, अस्मयति । श्वानमाचष्टे शावयति । 'नस्तद्धिते' (सू ६७९) इति टिलोपः । प्रकृतिभावस्तु न, येन नाप्राप्तिन्यायेन 'टेः' (सू १७८६) इत्यस्यैव बाधको हि सः । भत्वात्सम्प्रसारणम् । अन्ये तु 'नस्तद्धिते' (सू ६७९) इति नेहातिदिश्यते, इष्ठनि तस्यादृष्टत्वात् । ब्रह्मिष्ठ इत्यादौ परत्वात् 'टेः' (सू २७८६) इत्यस्यैव प्रवृत्तेः ।

यति इत्यत्र प्रकृतिभावोपन्यासो न युज्यते इत्याशङ्क्य निराकरोति—नच प्रकृतिभावो भाष्ये प्रत्याख्यात इति भ्रमितव्यमिति । कुत इत्यत आह—भाष्यस्येति । उदाहृतभाष्यस्य हि प्रेयान् प्रेष्ठः इत्यादिनां प्रकृतिभावं विनाऽपि साधने तात्पर्यम्, न तु प्रकृतिभावप्रत्याख्यानमभिमतम्, स्वमाचष्टे स्वापयतीत्यादौ तदावश्यकत्वात् । अत एव 'प्रकृत्यैकाच्छ्रेयस्सु चेन्नैकाच उच्चारणसामर्थ्यादवचनात् प्रकृतिभावः' इति वार्तिकव्याख्यावसरे 'अन्तरेणापि वचनं प्रकृतिभावो भविष्यति' इति भाष्ये उक्तम् । अन्यथा 'अन्तरेणैव वचनमि'त्युच्येत इत्यास्तां तावत् । प्रत्ययोत्तरपदयोश्च' इत्यत्र एकवचने इत्यनुषक्तम् । तच्च यौगिकमाश्रीयते । एकत्वविशिष्टवाचिनोर्युष्मदस्मदो'रिति लभ्यते इति मत्वा आह—युवामावामिति । न च द्वयोरुक्तौ युवावादेशो शङ्क्यौ, विभक्तेर्लुका लुप्तत्वात् । न च लुकः प्रागेव युवावौ कि न स्यातामिति वाच्यम्, 'अन्तरङ्गानपि विधीन् बहिरङ्गो लुबाधते' इत्युक्तेरिति भावः । शावयतीति । श्वानमाचष्टे इत्यर्थः । श्वन्शब्दाण्णौ श्वन् इ इति स्थिते आह—नस्तद्धिते इति । 'प्रकृत्यैकाच्' इति प्रकृतिभावमाशङ्क्य आह—प्रकृतिभावस्तु नेति । कुत इत्यत आह—येनेति । 'टेः' इति टिलोपे प्राप्ते सत्येव 'प्रकृत्यैका'ज्जित्यारभ्यते 'नस्तद्धिते' इत्यस्य स्रजिष्ठः इत्यादौ अप्राप्तावपि प्रकृतिभाव आरभ्यते इति भावः । भत्वादिति । इष्ठवत्त्वेन भत्वात् 'श्वयुव' इति सम्प्रसारणमित्यर्थः । तथा च श्वन् इ इति स्थिते टिलोपे सति तस्याभीयत्वेनाऽसिद्धत्वादन्तरत्वात् वस्य सम्प्रसारणे पूर्वरूपे उकारस्य धृद्धौ आवादेशः । अन्येत्विति । इष्ठनि दृष्टस्यैव इष्ठवदित्यतिदेशः । टेरित्येव टिलोप इष्ठनि दृष्टः, नतु 'नस्तद्धिते' इति । अतो नाऽस्यातिदेश इत्यर्थः । नन्वतिशयेन ब्रह्मा ब्रह्मिष्ठ इत्यत्र नस्तद्धिते इति टिलोपो दृष्ट इत्यत आह—ब्रह्मिष्ठ इत्यादाविति । तेनेति । 'नस्तद्धिते' इत्यस्याऽप्रवर्तनेनेत्यर्थः । ततश्च प्रकृतिभावात् 'टेः' इति लोपस्याऽभावे सम्प्रसारणे शुनयतीति रूपमित्यर्थः । आहुरित्यस्वरसोद्भावनम् । तद्वीज्ं तु ब्रह्मवच्छब्दादिष्ठनि टेरिति टिलोपापवादे 'विन्मतोर्लुक्' इति मतुपो लुकि 'नस्तद्धिते' इति टिलोपो दृष्ट एव । ततश्च 'इष्ठनि तस्याऽदृष्टत्वा'दित्युक्तम् । किञ्च ब्रह्मिष्ठ इत्यादौ परत्वाट्टेरित्यस्य प्रवृत्ति'रित्युक्तम् । केवलस्य ब्रह्मन्शब्दस्य वेदादिवचनस्य गुणवचनत्वाऽभावेन इष्ठनो दुर्लभत्वात् 'अजादेर्गुण्यवचनादेव' इत्यु-

तेन शुनयतीति रूपमाहुः। विद्वांसमाचष्टे विद्वयति। अङ्गवृत्तपरिभाषया सम्प्रसारणं नेत्येके। सम्प्रसारणे वृद्धावावादेशे च विदावयतीत्यन्ये। नित्यत्वाट्टिलोपात्प्राक्सम्प्रसारणम्। अन्तरङ्गत्वात्पूर्वरूपम् टिलोपः। विद्यतीत्यपरे। उदञ्चमाचष्टे उदीचयति। उदैचिचत्। प्रत्यञ्चं प्रतीचयति। प्रत्यचिचत्। 'इकोऽसवर्णे—' (सू ९१) इति प्रकृतिभावपक्षे प्रतिअचिचत्। सम्यञ्चमाचष्टे समीचयति। सम्यचिचत्। समिअचिचत्। तिर्यञ्चमाचष्टे तिरायति। अञ्चेष्टिलोपेनापहारेऽपि

क्तः। मत्वन्तादिष्ठनि तु मतोर्लुकि तेन 'टेः' इत्यस्य प्रवृत्तिबाधेन लुगुत्तरं तदप्रवृत्त्या परत्वाद्विद्यत्यचसङ्कतिरिति शब्देन्दुशेखरे स्थितम्। विद्वयतीति। विद्वस्शब्दाण्णौ टिलोपः। ननु इष्ठवत्त्वात् भत्वे वसोः सम्प्रसारणमित्याशङ्क्य आह—अङ्गवृत्तेति। 'अङ्गवृत्ते पुनर्वृत्तावविधिः' इति परिभाषयेत्यर्थः। अङ्गकार्ये कृते पुनर्नाङ्गकार्यम् इति तदर्थः। वस्तुतस्तु विद्वयतीत्यत्र 'टेः' इत्यसो लोपे वस्वन्तत्वाऽभावात् सम्प्रसारणाऽप्रसक्तेरङ्गवृत्तपरिभाषोपन्यासो वृथेत्यस्वरसं सूचयति—इत्येके इति। सम्प्रसारणे इति। विद्वच्छब्दाण्णौ इष्ठवत्त्वेन टिलोपे कृते वकारस्य सम्प्रसारणे पूर्वरूपे उकारस्य वृद्धौ आवादेशे विदावयतीत्यन्ये मन्यन्ते इत्यर्थः। अत्रापि पूर्ववदेवाऽस्वरसः, टिलोपे सति वस्वन्तत्वाऽभावात्। नित्यत्वादिति। टिलोपे कृते अकृते च प्रवृत्तेः सम्प्रसारणं नित्यम्। टिलोपस्तु कृते सम्प्रसारणे पूर्वरूपे च कृते उसो भवति, अकृते तु अस इत्यनित्यः, 'शब्दान्तरस्य प्राप्नुवन्विधिरनित्यः' इति न्यायादिति भावः। ननु कृतेऽपि सम्प्रसारणे पररूपात्प्राक् अस एव टिलोप इति तस्य नित्यत्वमित्यत आह—अन्तरङ्गत्वात्पूर्वरूपं टिलोप इति। सम्प्रसारणे पूर्वरूपे च कृते उसो लोपेऽपि वस्वन्तत्वस्य विनङ्क्ष्यत्त्वान्न सम्प्रसारणमित्यस्वरसं सूचयति—इत्यपरे इति। एवञ्च विद्वयतीति प्रथमपक्ष एव स्थितः। अत्राङ्गवृत्तपरिभाषोपन्यास एव वृथेति स्थितम्। उदीचयतीति। उत्पूर्वकादञ्चेः ऋत्विगित्यादिना क्विनि 'अनिदिताम्' इति नलोपे उदञ्चशब्दः। तस्माण्णौ इष्ठवत्त्वेन भत्वाद्च इत्यकारलोपं बाधित्वा 'उद ईत्' इति ईत्त्वे 'उदीचि' इति प्यन्तात्पूर्वलडादय इति भावः। उदैचिचदिति। लुङि 'द्विर्वचनेऽचि' इति णिलोपनिषेधात् चिक्षब्दस्य द्वित्वम् 'उपसर्गसमानाकारं पूर्वपदं धातुसंज्ञाप्रयोजके प्रत्यये चिकीर्षिते पृथक् क्रियते' इत्युक्तेरुदः ऊपर्यादिति भावः। एवञ्च उदः पृथक्करणेन 'प्रकृत्यैकाच्' इति प्रकृतिभावाच्च टिलोपः। प्रतीचयतीति। 'अच' इत्यचलोपे 'चौ' इति पूर्वस्य दीर्घः। प्रत्यचिचदिति। इह 'अच' इत्यचलोपे चिशब्दात्परागटि तकारादिकारस्य यण्। अच इत्यकारलोपस्याभीयस्त्वेऽपि असमानाश्रयत्वान्नाऽसिद्धत्वम्, लोपस्य णिनिमित्तत्वाद् आटस्तु द्विर्निमित्तत्वात्। इकोऽसवर्णे इतीति। 'न समासे' इति तु न, पृथक्करणेन समासनिवृत्तेः। समीचयतीति। 'समः समि' इति सम्यादेशः। अच इति लोपे चाविति दीर्घः। सम्यचिचदिति। सम्यादेशस्य स्थानिवत्त्वेनोपसर्गत्वात् पृथक्करणम्,

बहिरङ्गत्वेनासिद्धत्वात्तिरसस्तिरिः । 'असिद्धवदत्र—' (सू २१८३) इति चिणो लुङन्यायेन प्रथमटिलोपोऽसिद्धः । अतः पुनष्टिलोपो न । अङ्गवृत्तपरिभाषया वा । चङयग्लोपित्वादुपधाहस्वो न । अतितिरायत् । सध्रयञ्चमाचष्टे सध्राययति । असस्रध्रायत् । विष्वद्रयञ्चम् अविविष्वद्रायत् । देवद्रयञ्चम् अदिदेवद्रायत् । अदद्रयञ्चम् आददद्रायत् । अमुमुञ्चम् अमुमुञ्चायययति । चङ् । आमुमुमुञ्चायत् । अदमुय-

पृथक्करणेन उत्तरपदपरत्वाऽभावेऽप्यन्तरङ्गत्वाज्जातः सध्र्यादेशो न निवर्तते । तिरायययतीति । 'तिरस्' इत्यव्ययम् । तत्पूर्वात् अञ्चेः क्विनि नलोपे तिरस् अच् इत्यस्मात् ण्यौ टिलोपेन धातोर्निष्पन्नौ 'तिरसस्तिर्यलोपे' इति तिरिभावे इकारस्य वृद्धावायादेशे 'तिरायि' इत्यस्मात् ण्यन्ताल्लडादीति भावः । न च निरसः पृथक्करणे सति धातोः 'प्रकृत्यैकाच्' इति प्रकृतिभावात् कथं टिलोप इति वाच्यम् । तिरसित्यस्य कदाप्यंनुपसर्गतया उपसर्गसमानाकारत्वाऽभावेन पृथक्करणाऽभावात् । नन्वेवं सति अञ्चतेष्टिलोपेनापहारे सति अञ्चतिपरकत्वविरहात्कथमिह तिरसस्तिरिभाव इत्यत आह—अञ्चेष्टिलोपेनेति । बहिरङ्गत्वेनेति । बहिर्भूतनिमित्तकत्वादिति भावः । नन्वस्तु तिरसस्तिरिः । तत्र रेफादिकारस्य टेरिति लोपः स्यादित्यत आह—असिद्धवदत्रेति । प्रथमटिलोपोऽसिद्ध इत्यन्वयः । तिरस् अच् इ इति स्थिते प्रथमप्रवृत्तः अच् इत्येवंरूपटेर्लोपः तिरेः टिलोपे कर्तव्ये आभीयत्वादसिद्ध इत्यर्थः । ननु प्रथमटिलोपस्य कथं तिरेष्टिलोपे कर्तव्ये असिद्धत्वम् टिलोपशास्त्रस्य एकत्वादित्यत आह—चिणो लुङन्यायेनेति । पच्धातोर्भावकर्मणोर्लुङ्लस्तङि प्रथमपुरुषैकवचने तशब्दे परे 'चिण् भावकर्मणोः' इति च्लेश्चिणि उपधावृद्धौ अटि अपाचि त इत्यस्मात् 'तिङश्च' इति तरपि तदन्तात् 'किमेत्तिङव्ययघादाम्' इत्याम्प्रत्यये अपाचितरामिति स्थिते 'चिणो लुक्' इति प्रथमस्य तशब्दस्य लुकि कृते पुनस्तरप्प्रत्ययतशब्दस्य लुङ् न भवति, स्थानिभेदेन लुको भेदमाश्रित्य प्रथमलुकः असिद्धत्वेन व्यवधानादिति स्थितिः । एवमिहापीत्यर्थः । अत इति । प्रथमटिलोपस्याऽसिद्धत्वादित्यर्थः । अङ्गवृत्तपरिभाषया वेति । 'पुनष्टिलोपो नेत्यनुषज्यते । न च तिरेरिकारस्याङ्गवृत्तपरिभाषया 'टे'रिति लोपाऽभावे तिरायययतीति वृद्धिरपि तस्य न स्यादिति वाच्यम्, अङ्गवृत्तपरिभाषाया अनित्यत्वेन वृद्धिविषये तदप्रवृत्तेः । अग्लोपित्वादिति । तिरस् अच् इ इति स्थिते 'टेः' इत्यचो धातोर्लोपे सति तिरि इत्यस्य अग्लोपित्वम् अचो धातोर्लोपे अकारस्यापि लोपसत्वादित्यभिमानः । सध्राययतीति । सहस्य सध्रिः । तिरायययतीतिवद्रूपम् । सहेत्यस्य उपसर्गत्वाऽभावान्न पृथक्करणम् । तदाह—असस्रध्रायदिति । विष्वद्रयञ्चमिति । विष्वक् अच् इ इति स्थिते 'विष्वग्देवयोश्च' इति विष्वकशब्दटेरद्रयादेशे टेरित्यचो धातोर्लोपे विष्वद्रि इ इति स्थिते वृद्धौ आयादेशे विष्वद्रायि इति ण्यन्ताल्लटि विष्वद्रायययतीति रूपम् । देवद्रयञ्चमिति । देवशब्दस्य टेरद्रयादेशे देवद्राययतीति सिद्धवत्कृत्य लुङ्याह—अदिदे

घम् अदमुआययति। आददमुआयत्। भुवं भावयति। अबीभवत्। भ्रुवम् अबुभ्रवत्। श्रियम् अशिश्रयत्। गाम् अजूगवत्। रायम् अरीरयम्। नावम् अनूनवत्। स्वश्वं स्वाशश्वत्। स्वः। अव्ययानां भमात्रे टिलोपः। स्वयति। असस्वत्। असिस्वत्। बहून् भावयति बहयतीत्यन्ये। स्रग्विणं स्रजयति। संज्ञापूर्वकत्वान्न वृद्धिः। श्रीमतीं श्रीमन्तं वा श्रायययति। अशिश्रयत्। पयस्विनीं पयसयति। इह

वद्रायदिति। आततिरायदितिवद्रूपम्। आददद्रायदिति। सर्वनामत्वाददसश्चदस्य टेर्द्रयादेशः। 'त्यदाद्यत्वे सत्येव उरमरे' इति पक्षे हदम्, अदसश्चदादिभक्तेः लुका लुप्तत्वेन विभक्तिपरकत्वाऽभावेन त्यदाद्यत्वाऽप्रवृत्तेः। त्यदाद्यत्वाऽविषयत्वेऽपि उरमत्वे रत इति मतमाश्रित्य आह—अमुमुयञ्चिति। अदस् अच् इ इति स्थिते टेरद्रयादेशे अच् इत्यस्य टेर्लोपे अदद्रि इ इति स्थिते 'अदसोऽदेः पृथक्त्वम्' इति मते दकाराकारयोर्दकाररेफयोश्च मत्वोरत्वयोः कृतयोः अमुमु इ इति स्थिते, प्रथमस्य इकारस्य णिचि वृद्धौ आयादेशे अमुमु आयि इति पयन्तात्लडादिरिति भावः। मुत्वस्याऽसिद्धत्वान्न यण्। अदमुआययतीति। 'केचिदन्त्यसदेशस्य' इति मते इदम्। भुवमिति। भुवमाचष्टे इत्यर्थे भूशब्दात् णिच् वृद्ध्यावादेशौ भावि इत्यस्मात्लडादीति भावः। अबीभवदिति। 'ओः पुयण्जि' इति इत्त्वम्। अबुभ्रवदिति। अवर्णपरकपवर्गादिपरत्वाभावात् 'ओः पुयण्जि' इति न। स्वश्वमिति। सु शोभनः अश्व इति विग्रहः। स्वाश्वइवेति। उपसर्गसमानाकारस्य पृथक्करणादश्वशब्दस्य 'अजादेर्द्वितीयस्य' इति द्वित्वमाडागमश्च। स्वरिति। स्वर् इत्यस्माण्णिचि 'अव्ययानां भमात्रे' इति टिलोपः इष्टत्वेन भत्वात्। 'प्रकृत्यैकाच्' इति प्रकृतिभावस्तु येन नाप्राप्तिन्यायेन 'टेरित्यस्यैव बाधकः। असस्वदिति। द्वित्वे कार्ये णावजादेशस्य निषेधात् टिलोपं बाधित्वा स्वरशब्दस्य द्वित्वम्, 'अचित्यस्य लोपे अकारस्यापि लोपसत्त्वेन अजादेशत्वादिति भावः। असिस्वदिति। अलोपस्य अजादेशत्वं नेति द्वित्वे कार्ये णौ टिलोपस्य निषेधाऽभावात् टिलोपे कृते णिचा सह स्विशब्दस्य द्वित्वमिति भावः। बहूनिति। बहुशब्दाण्णिचि 'णाविष्ठव'दित्यतिदेशात् 'बहोर्लोपो भू च बहोः' इति बहोर्भूभावः। 'इष्टस्य यिट् चे'ति यिडागमस्तु न, 'णाविष्ठव'दिति सप्तम्या इष्टनि परे इष्टस्यैव कार्यस्यातिदेशादिति भावः। बहयतीति। यिडभावे सत्सन्नियोगशिष्टस्य भूभावस्याप्यभावादिति भावः। स्रजयतीति। इष्टत्वात् 'विन्मतोः' इति लुक्। नचाऽजादौ गुणवचनादेवेति इष्टनिप्रत्ययः स्रग्विनूशब्दात् दुर्लभ इति इष्टत्वत्वमत्र कथमिति शङ्क्यम्, 'विन्मतोः' इति लुग्विधानेन स्रग्विनूशब्दादिष्टत्वत्वसिद्धेरिति भावः। उपधावृद्धिमाशङ्क्य आह—संज्ञापूर्वकत्वान्न वृद्धिरिति। 'णाविष्ठव'दित्यनेनातिदेशेन। विनो लुकः सत्त्वादङ्गवृत्तपरिभाषया न वृद्धिरिति कैयटः। श्रीमतीमिति। श्रीमतीशब्दाण्णिचि 'णाविष्ठव'दित्यतिदेशेन 'भस्याढे' इति पुवत्वे 'विन्मतोः' इति मतो लुकि रेफादिकारस्य वृद्ध्यायादेशयोः 'आयि' इत्यस्मात् लडादीति भावः। अशिश्र-

टिलोपो न। तदपवादस्य लुकः प्राप्तत्वात्। स्थूलं स्थवयति। दूरं दवयति। कथं तर्हि 'दूरयत्यवनते विवस्वति' इति। दूरमतति अयते वा दूरात्, दूरातं कुर्वतीत्यर्थः। युवानं यवयति कनयति। 'युवाल्पयोः—' (सू २०१९) इति वा कन्। अन्तिकं नेदयति। बाढं साधयति। प्रशस्यं प्रशस्ययति। इह श्रज्यौ न, उपसर्गस्य पृथक्कृतेः। वृद्धं ज्यापयति। प्रियं प्रापयति। स्थिरं स्थापयति। स्फिरं स्फापयति। उरुं वरयति। वारयति। बहुलं बंहयति। गुरुं गरयति। वृद्धं वर्षयति।

यदिति। णावच आदेशो नेति वृद्धयायादेशयोः प्रागेव श्रीशब्दस्य द्वित्वे उत्तरखण्डे वृद्धयायादेशयोः कृतयोरुपधाह्रस्व इति माधवः। मतुपो लुकि अकारस्यापि लोपस्त्वेन आलोपित्वान्नोपधाह्रस्वः इत्यन्ये। पयस्विनीमिति। णिचि इष्टवत्त्वाद्विन्मतोरिति मतुपो लुगिति भावः। पयसयतीत्यत्र इष्टवत्त्वात् टिलोपमाशङ्क्य आह—इह टिलोपो नेति। कुत इत्यत आह—तदपवादस्येति। न च टिलोपं बाधित्वा मतुपो लुकि कृते पयसष्टेर्लोपः कुतो न स्यादिति वाच्यम्, 'सत्यपि सम्भवे बाधन'मिति न्यायेन पयसष्टिलोपस्यापि मतुपो लुका बाधात्। स्थवयतीति। स्थूलशब्दात् णिचि इष्टवत्त्वात् स्थूलदूरेति स्थूलशब्दस्य यण्णादेर्लोपे ऊकारस्य गुणे अवादेशे स्थवि इत्यस्मात्तडादीति भावः। गुणे ओकारस्याऽचो ञ्णितीति वृद्धिस्तु न शङ्क्या, अङ्गकार्यं कृते पुनरङ्गकार्यस्याऽप्रवृत्तेः। दवयतीति। पूर्ववद्यणादिलोपो गुणश्च। कथं तर्हीति। 'स्थूलदूरे'ति यण्णादिलोपस्य टिलोपाऽपवादत्वादिति भावः। दूरमतनीति। 'अत सातत्यगमने' इति धातोः 'अन्येभ्योऽपि दृश्यते' इति क्विपि दूरादिति रूपम्। अय गतावित्यस्मात् क्विपि 'लोगो व्योः' इति यलोपे 'ह्रस्वस्य पिति' इति तुकि दूरादित्येव रूपम्। तस्माण्णौ टिलोपे दूरि इति ण्यन्तात् शतृप्रत्यये शपि इकारस्य गुणे अवादेशे दूरयच्छब्दस्य दूरयतीति सप्तम्यन्तमिति भावः। तदाह—दूरातं कुर्वतीत्यर्थ इति। 'कुर्वतीति' सप्तम्यन्तम्। यवयतीति। युवन्शब्दात् णौ स्थूलदूरेति यनो यण्णादेर्लोपः। पूर्वस्य उकारस्य गुणे अवादेशः। यवि इत्यस्मात्लघादि। कनयतीति। युवन्शब्दस्य कनादेशपक्षे रूपम्। तदाह—युवाल्पयोरिति। नेदयतीति। अन्तिकशब्दस्य णौ नेदादेशः। अन्तिकबाढयोर्नेदसाधावित्युक्तेः। साधयतीति। बाढशब्दस्य णौ साधादेशः। इहेति। प्रशस्ययतीत्यत्र 'प्रशस्यस्य श्रः' 'ज्य च' इति श्रज्यो नेत्यर्थः। कुत इत्यत आह—उपसर्गस्येति। तत्पृथक्करणे सति विशिष्टस्य स्थानिनोऽभावाच्छ्रादेशाविति भावः। वृद्धं ज्यापयतीति। 'वृद्धस्य चे'ति वृद्धशब्दस्य ज्यादेशे वृद्धो पुगिति भावः। 'प्रियस्थिर' इति सूत्रक्रमेणोदाहरति—प्रियं प्रापयतीति। प्रियशब्दस्य प्रादेशे वृद्धिः पुक्। स्थापयतीति। स्थिरशब्दस्य स्थादेशे वृद्धिपुकौ। वरयति वारयतीति। उरुशब्दस्य वर्। संज्ञापूर्वकविधेरनित्यत्वादुपधावृद्धिविकल्प इति माधवः। बंहयतीति। बहुलस्य बंहादेशः। गरयतीति। गुरोः गर्। वृद्धं वर्षयतीति।

तृप्रं त्रापयति । दीर्घं द्राघयति । वृन्दारकं वृन्दयति ।

इति तिङन्ते नामधातुप्रकरणम् ।

अथ तिङन्ते कण्ड्वादिप्रकरणम् ॥ १६ ॥

२६७८ कण्ड्वादिभ्यो यक् ३।१।२७॥ एभ्यो धातुभ्यो नित्यं यक् स्यात्स्वार्थे । धातुभ्यः किम् । प्रातिपदिकेभ्यो मा भूत् । द्विधा हि कण्ड्वादयः, धातवः प्रातिपदिकानि च । १ कण्ड्ञ गात्रविघर्षणे । कण्ड्यति । कण्ड्यते । २ मन्तु आराधे । रोष इत्येके । मन्तूयति । चन्द्रस्तु ञितमाह । मन्तूयते । ३ वल्गु पूजामाधुर्ययोः, वल्गूयति । ४ असु उपतापे, असु असूञ् इत्येके । अस्यति । असूयति–असूयते । ५ लेट् ६ लोट् धौर्त्ये पूर्वभावे, स्वप्ने च दीप्तावित्येके । लेट्यति–लेटिता । लोट्यति–लोटिता । ७ लेला दीप्तौ । ८ इरस्, ९ इरज्, १० इरञ्, ईर्ष्यायाम् । इरस्यति । इरज्यति । 'हलि च' (सू ३५४) इति दीर्घः । ईर्यति । ईर्यते । ११ उषस् प्रभातीभावे । १२ वेद धौर्त्ये, स्वप्ने च । १३ मेधा आशुग्रहणे । मेधायति । १४ कुषुभ क्षेपे । कुषुभ्यति । १५ मगध परिवेष्टने । नीचदास्ये इत्यन्ये । १६ तन्तस् १७ पन्थस् दुःखे । १८ सुख १९ दुःख तत्क्रियायाम् । सुख्यति । दुःख्यति । सुखं दुःखं चानुभवतीत्यर्थः । २० सपर पूजायाम् । २१ अरर आराकर्मणि । २२ भिषज् चिकित्सायाम् । २३ भिष्णज् उपसेवायाम् । २४ इषुध शरधारणे । २५ चरण २६ वरण गतौ । २७ चुरण चौर्ये । २८ तुरण त्वरायाम् । २९ भुरण धारणपोषणयोः । ३० गद्गद वाक्-

---

वृद्धस्य वर्षादेशः 'वृद्धस्य चे'ति उशादेशेन विकल्प्यते । त्रापयतीति । तृप्रस्य त्रप आदेशः । अदुपधः । संज्ञापूर्वकत्वान्न वृद्धिः । गरयतीत्यादिवत् । त्रापयतीति क्वचित्पाठः । द्राघयतीति । दीर्घस्य द्राघ्रादेशः । वृन्दयतीति । वृन्दारकस्य वृन्दादेशः ।

इति श्रीवासुदेवदीक्षितविदुषा विरचितायां सिद्धान्तकौमुदीव्याख्यायां
बालमनोरमाख्यायां नामधातुप्रक्रिया समाप्ता ।

अथ कण्ड्वादिप्रक्रिया निरूप्यन्ते । कण्ड्वादिभ्यो यक् । धातुभ्य इति । 'धातोरेकाचः' इत्यतस्तदनुवृत्तेरिति भावः । नित्यमिति । वाग्रहणं तु निवृत्तमिति भावः । अन्यथा कण्ड्वतीत्यादावपि स्यादिति भावः । द्विधा हीति । एतच्च भाष्ये स्पष्टम् । तेन कण्डुरित्याद्यविगृहीतरूपसिद्धिः । लेटितेति । 'यस्य हल' इति यलोपः । मेधा आशुग्रहणे इति । आशुग्रहणं त्वरया बोधः । 'सुग्रहणे' इति पाठान्तरम् । सुख्यतीति । यकि अतो लोपः । प्रातिपदिकेभ्यो यकि तु आर्धधातुकत्वाभावाद्लोपो न स्यादिति बोध्यम् । चौरादिकयोस्तु सुखयति दुःखयतीत्युक्तम् । अरर आराकर्मणीति आरा अतोऽः तत्क-

स्खलने । ३१ एला ३२ केला ३३ खेला विलासे । ३४ इला इत्यन्ये । ३५ लेखा स्खलने च । अदन्तोऽयमित्यन्ये । लेख्यति । ३६ लिट अल्पकुत्सनयोः । लिट्यति । ३७ लाट जीवने । ३८ ह्रणीङ् रोषणे लज्जायां च । ३९ महीङ् पूजायाम् । महीयते । पूजां लभते इत्यर्थः । ४० रेखा श्लाघासादनयोः । ४१ द्रवस् परितापपरिचरणयोः । ४२ तिरस् अन्तर्धौ । ४३ अगद नीरोगत्वे । ४४ उरस् बलार्थः । उरस्यति बलवान्भवतीत्यर्थः । ४५ तरण गतौ । ४६ पयस् प्रसूतौ । ४७ सम्भूयस् प्रभूतभावे । ४८ अम्बर ४९ संवर संवरणे । आकृतिगणोऽयम् ।

इति तिङन्ते कण्ड्वादिप्रकरणम् ।

अथ तिङन्ते प्रत्ययमालाप्रकरणम् ॥ १७ ॥

कण्डूयतेः सन् । 'सन्यङोः' (सू २३९५) इति प्रथमस्यैकाचो द्वित्वे प्राप्ते 'कण्ड्वादेस्तृतीयस्येति वाच्यम्' (वा ३४०४) । कण्डूयियिषति । क्यजन्तात्सन् । 'यथेष्टं नामधातुषु' (वा ३४०६) । आद्यानां त्रयाणामन्यतमस्य द्वित्वमित्यर्थः । अजादेस्त्वाद्येतरस्य । पुपुत्रीयिषति-पुतित्रीयिषति-पुत्रीयियिषति । अशिश्वीयिषति-अश्वीयियिषति । नदराणां संयुक्तानामचः परस्यैव द्वित्वनिषेधः । इन्द्रीयतेः सन् । द्रीशब्दयिशब्दयोरन्यतरस्य द्वित्वम् । इन्दिद्रीयिषति इन्द्रीयिषि-

---

रणकं कर्म आराकर्म । भिषज् चिकित्सायाम । जान्तोऽयम् । भिषज्यति । लेखा स्खलने चेति । लेखायति । लेख्यतीति । अदन्ताद्यकि अतो लोपः । आकृतिगणोऽयमिति । कण्ड्वादिरित्यर्थः । तेन दुवस सन्दीपने इत्यादिसंग्रहः । 'समिधा अग्निं दुवस्यते' ।

इति श्रीवासुदेवदीक्षितविदुषा विरचितायां सिद्धान्तकौमुदीव्याख्यायां बालमनोरमाख्यायां कण्ड्वादयः समाप्ताः ।

अथ प्रत्ययमालां वक्ष्यन्नाह-कण्डूयतेः सन्निति । 'धातोः कर्मणः' इत्यनेनेति भावः । प्रथमस्यैकाचः इति । 'अजादेर्द्वितीयस्य' इति द्वितीयैकाचो द्वित्वे प्राप्ते इत्यपि ज्ञेयम् । कण्ड्वादेस्तृतीयस्येति । 'एकाचो द्वित्व'मिति शेषः । 'कण्ड्वादे'रित्यन्तरं 'यगन्तस्ये'ति शेषः, केवलकण्ड्वादिषु तृतीयैकाचोऽभावात् । कण्डूयियिषतीति । कण्डूयेति यगन्तात् सनि इटि अतो लोपः । इस् इति तृतीयस्यैकाचो द्वित्वम् । असु उपतापे, कण्ड्वादिः । असूयियिषति । अजादेस्तृतीयस्य एकाचो द्वित्वम् । क्यजन्तात्सन्निति । उदाहियते इति शेषः । यथेष्टं नामधातुषु । इत्यपि वार्तिकम् । नाम प्रातिपदिकं तद्धटितधातुष्वित्यर्थः । अजादेरित्यनुवृत्या आदिभूतादचः परेषामेकाचां यथेष्टमित्यर्थलाभादिति भावः । नदराणामिति । तेषां मध्ये, आदिभूतादचः परस्यैवेत्यर्थः । इन्द्रीयतेः सन्निति । इन्द्रद्र उदात् क्यजन्तात्सन्निरित्यर्थः । द्रीशब्दयिशब्दयोरिति । नकारा-

षति। चिचन्द्रीयिषति चन्दिद्रीयिषति—चन्द्रीयियिषति। प्रियमाख्यातुमाचक्षाणं प्रेरयितुं वेच्छति पिप्रापयिषति। प्रापिपयिषति। प्रापयियिषति। उरुं विवारयिषति। वारिरयिषति। वारयियिषति। बाढं सिसाधयिषतीत्यादिरूपत्रयम्। षत्वं तु नास्ति। 'यङ्सनण्यन्तात्सन्'। बोभूयिषयिषति। यङ्णिच्सन्ताण्णिच्। बोभूयियिषयतीत्यादि। इति तिङन्ते प्रत्ययमालाप्रकरणम्।

रस्य आदिभूतादचः परत्वाच्च द्वित्वम्। दकारस्य तु आदिभूतादचः परत्वाऽभावाच्च द्वित्वनिषेध इति भावः। चिचन्द्रीयिषतीति। चन्द्रीयतेः सनि प्रथमस्यैकाचो द्वित्वम्। चन्दिद्रीयिषतीति। द्वितीयस्यैकाचो द्वित्वम्। 'न न्द्राः' इति नकारस्य न द्वित्वमिति माधवः। आदिभूतादचः परेषां नदराणां न द्वित्वमित्येव भाष्यसम्मतम्। अत्र नकारस्यापि द्वित्वमित्येव युक्तम्। चन्द्रीयियिषतीति। तृतीयस्यैकाचो द्वित्वम्। प्रियमिति। प्रियमाख्यातुमिच्छतीत्यर्थं 'तत्करोति तदाचष्टे' इति ण्यन्तात्सनि इटि ण्यावित्यवस्वा-स्प्रियशब्दस्य 'प्रियस्थिर' इति प्रादेशे वृद्धौ पुकि णिचो गुणाऽयादेशयोः षत्वे प्रापयिषेत्येव सन्नन्तम्। प्रियमाचक्षाणं प्रेरयितुमिच्छतीत्यर्थं तु प्रापि इतिण्यन्तादुक्षाद्धेतुमण्णौ तदन्तात् सनि इटि द्वितीयं णिचमाश्रित्य प्रथमणिचो लोपे द्वितीयणिचो गुणायादेशयोः प्रापयिषेत्येव सन्नन्तम्। तत्र यथेष्टं नामधातुत्वित्याद्यानां त्रयाणामेकाचामेकैकस्य द्वित्वे पिप्रापयिषतीत्यादिरूपत्रयमित्यर्थः। उरुमिति। उरुमाख्यातुमाचक्षाणं प्रेरयितुं वेच्छतीत्यर्थं उरुशब्दादाचष्टे इत्यर्थे णिचि 'प्रियस्थिर' इति वरादेशे उपधावृद्धौ वारि इति ण्यन्तात्सनि इटि णिचो गुणाषादेशयोः षत्वे वारयिषेति सन्नन्तम्। माधवमते वृद्धयभीकारात् वारि इत्यस्मात् हेतुमण्यन्तात् सनि इटि प्रथमणेर्लोपे षत्वे वारयिषेत्येव रूपम्। तत्र यथेष्टं नामधातुत्वित्येकैकस्य एकाचो द्वित्वे विवारयिषतीत्यादिरूपत्रयमित्यर्थः। बाढं सिसाधयिषतीति। बाढमाख्यातुमाचक्षाणं प्रेरयितुं वेच्छतीत्यर्थं णिजादि पूर्ववत्। अन्तिकबाढयोरिति साधादेशः। तत्र सकारस्यादेशत्वाऽभावाच्च षत्वम्। तदाह—षत्वं तु नास्तीति। बोभूयिषयिषतीत्यत्र प्रक्रियां दर्शयति—यङिति। 'भूधातो' रिति शेषः। द्वित्वे बोभूयेति स्थितम्। सन्निति। इटि अतो लोपे षत्वे बोभूयिषेति स्थितम्। ण्यन्तात् सन्निति। बोभूयिषेत्यस्मात् हेतुमण्णिचि अतो लोपे बोभूयिषि इति स्थितम्। तस्मात् सनि इटि णिचो गुणाऽयादेशयोः षत्वे बोभूयिषयिषेति स्थितम्। ततो लटस्तिपि शपि परूपे बोभूयिषयिषतीति रूपम्। 'अनभ्यासस्थे' त्युक्तेर्न पुनर्द्वित्वम्। अथ बोभूयियिषयतीत्यत्र प्रक्रियां दर्शयति—यङिति। 'भूधातो' रिति शेषः। द्वित्वे बोभूयेति स्थितम्। णिजिति। बोभूयेत्यस्माद्धेतुमण्णौ अतो लोपे बोभूयि इति स्थितम्। सन्नन्ताण्णिजिति। बोभूयि इत्यस्मात्सनि इटि णिचो गुणाऽयादेशयोः षत्वे बोभूययिषेति स्थितम्। तस्माद्धेतुमण्णिचि अतो लोपे बोभूययिषि इत्यस्माल्लटस्तिपि शपि गु-

अथ निरूप्यते आत्मनेपदप्रकरणम् ॥ १८ ॥

'अनुदात्तङित आत्मनेपदम्' (सू २१५७) । आस्ते । शेते । २६७६ भाव-कर्मणोः १ । ३ । १३ ॥ बभूवे । अनुबभूवे । २६८० कर्तरि कर्मव्यतिहारे १ । ३ १४॥ क्रियाविनिमये द्योत्ये कर्तर्यात्मनेपदं स्यात् । व्यतिलुनीते । अन्यस्य योग्यं लवनमन्यः करोतीत्यर्थः । 'शनसोरल्लोपः' (सू २४६९) । व्यतिस्ते । व्यतिषाते । व्यतिषते । 'तासस्त्योः—' (सू २१६१) इति सलोपः । व्यतिसे । 'धि च' (सू २२४९) । व्यतिध्वे । 'ह एति' (सू २२५०) । व्यतिहे । व्यत्यसे । व्यत्यास्त । व्यतिषीत । व्यतिरिते । व्यतिरिरते । व्यतिरिरते । व्यतिभिते । व्यतिभाते । व्यतिभाते । व्यतिबभे । २६८१ न गतिहिंसार्थेभ्यः १ । ३ । १५ ॥ व्यतिगच्छन्ति । व्यतिघ्नन्ति । 'प्रतिषेधे हसादीनामुपसङ्ख्यानम्' (वा ८९८) ।

आऽयादेशयोः बोभूयधिषयतीति रूपं सिद्धम् । इति श्रीवासुदेवदीक्षितविदुषा विरचितायां सिद्धान्तकौमुदीव्याख्यायां बालमनोरमाख्यायां प्रत्ययमाला समाप्ता ।

अथ आत्मनेपदप्रक्रिया निरूप्यते । आत्मनेपदपरस्मैपदव्यवस्थापकानि सूत्राणि प्रथमस्य तृतीयपादे पठितानि । तानि क्रमेण व्याख्यास्यन् व्याख्यातमपि सूत्रं पुनः स्मारयति–अनुदात्तङित इति । 'आत्मनेपद'मित्येतत् 'शेषात्कर्तरि परस्मैपदम्' इत्यतः प्रागनुवर्तते । भावकर्मणोः । भावः भावना क्रियेति पर्यायाः । कर्मशब्दः कर्मकारके वर्तते । भावे कर्मणि च यो लकारस्तस्यात्मनेपदमित्यर्थः । भावे उदाहरति–बभूवे इति । वृत्ता भवनक्रियेत्यर्थः । कर्मण्युदाहरति–अनुबभूवे इति । 'आनन्द' इति शेषः । आनन्दकर्मिका वृत्ता अनुभवक्रियेत्यर्थः । कर्तरि कर्म । कर्मव्यतिहारशब्दं विवृण्वन्नाह–क्रियाविनिमये द्योत्ये इति । एवं च कर्मशब्दः क्रियापरः व्यतिहारशब्दो विनिमयपर इत्युक्तं भवति । अन्यस्येति । शूद्रादियोग्यं सस्यादिलवनं ब्राह्मणः करोतीत्यर्थः । परस्परकरणमपि कर्मव्यतिहार इति कैयटः । सम्प्रहरन्ते राजानः । कर्तृग्रहणं भावकर्मणोरित्यस्यानुवृत्तिनिवृत्त्यर्थम् । अन्यथा व्यतिलुनीत इत्यत्र न स्यात् । वस्तुतस्तु पृथक् सूत्रारम्भादेव सिद्धे कर्तृग्रहणमुत्तरार्थमिति भाष्ये स्पष्टम् । व्यति अस् ते इति स्थिते आह—शनसोरिति । व्यतिस्ते इति । तपसे अयोग्यः शूद्रस्तपस्वी भवतीत्यर्थः । इह 'उपसर्गात्प्रादुर्भ्यांम्' इति न षः यण्परकत्वाभावादिति भावः । व्यतिषाते इति । इह अच्परकत्वादुपसर्गात्प्रादुर्भ्यामिति षः । व्यति स् से इति स्थिते आह—तासस्त्योरिति । 'उपसर्गात्प्रादुर्भ्यांम्' इति नेह षत्वम्, अस्त्यवयवस्य सकारस्य लुप्तत्वात् । व्यतिषाथे । व्यति स् ध्वे इति स्थिते आह—धि चेति । सलोप इति शेषः । व्यतिस् ए इति स्थिते आह–ह एतीति । सकारस्य हकार इति भावः । व्यत्यसे इति । लोहुत्तमपुरुषैकवचनम् । व्यत्यास्तेति । लङि रूपम् । व्यतिषीतेति । लिङि रूपम् । व्यतिरिते इति । लटि प्रथमपुरुषै-

हसादयो हसप्रकाराः शब्दक्रियाः। व्यतिहसन्ति। व्यतिजल्पन्ति। 'हरतेरप्रतिषेधः' (वा ८९९)। सम्प्रहरन्ते राजानः। २६८२ **इतरेतरान्योऽन्योपपदाच्च १।३।१६** ॥ 'परस्परोपपदाच्चेति वक्तव्यम्' (वा ९००)। इतरेतरस्यान्योऽन्यस्य परस्परस्य वा व्यतिलुनन्ति। २६८३ **नेर्विशः १।३।१७** ॥ निविशते। २६८४ **परिव्यवेभ्यः क्रियः १।३।१८** ॥ अकर्त्रभिप्रायार्थमिदम्। परिक्रीणीते। विक्रीणीते। अवक्रीणीते। २६८५ **विपराभ्यां जेः १।३।१९** ॥ विजयते। पराजयते। २६८६ **आङो दोऽनास्यविहरणे १।३।२०** ॥ आङ्पूर्वाद्दातेर्मुखविकसनादन्यत्रार्थे वर्तमानादात्मनेपदं स्यात्। विद्यामादत्ते। अनास्य—इति किम्। मुखं व्याददाति। आस्यग्रहणमविवक्षितम्। विपादिकां व्याददाति। पादस्फोटो विपादिका। नदी कूलं व्याददाति। 'पराङ्गकर्मकान्न निषेधः' (वा ९०३)। व्याददते पिपीलिकाः पतङ्गस्य मुखम्। २६८७ **क्रोडोऽनुसंपरिभ्यश्च १।३।२१** ॥ चादाङः। अनुक्रीडते। सङ्क्रीडते। परिक्रीडते। आक्रीडते। अनोः कर्मप्रवचनी-

---

कद्विबहुवचनेषु समानमेव रूपम्। व्यतिभाते इति। भाधातोः रूपम्। व्यतिबभे इति। लिटि रूपम्। न गतिहिंसार्थेभ्यः। कर्मव्यतिहारे आत्मनेपदं नेत्यर्थः। हसादिगणस्य अदर्शनादाह—इसप्रकारा इति। उपसर्गमनपेक्ष्य ये गतिहिंसयोर्वर्तन्ते तेषामेव ग्रहणलाभाय अर्थग्रहणम्। हृञ्जयातुस्तु उपसर्गबलाद्धिंसायां वर्तते इति न तस्य प्रतिषेध इत्याह—इतरेतरप्रतिषेध इति। अर्थग्रहणलभ्यमिदं वार्तिकम्। इतरेतर। 'नात्मनेपद'मिति शेषः। नेविंशः। निपूर्वाद्विशः आत्मनेपदं स्यादित्यर्थः। नेति निवृत्तम्। यद्यपि न्यविशतेत्यत्र न विशिनैः परः, अटा व्यवधानात् अटो विकरणान्ताङ्गभक्तत्वेन विशधात्ववयवत्वाऽभावात्। तथापि 'अड्व्यवाये उपसंख्यानम्' इति वार्तिकान्नवतीति 'शदेः शितः' इत्यत्र भाष्ये स्पष्टम्। परिव्यवेभ्यः। परि वि अव एभ्यः परस्मात् क्रीञ्धातोरात्मनेपदमित्यर्थः। क्रियादात्मनेपदसिद्धेः किमर्थमिदमित्यत आह—अकर्त्रभिप्रायार्थमिति। विपराभ्यां जेः। वि परा आभ्यां परस्मात् जिधातोरात्मनेपदमित्यर्थः। विजयते इति। उत्कृष्टो भवतीत्यर्थः। पराजयते इति। निकृष्टो भवतीत्यर्थः। आङो दो। आस्यविहरणं मुखविकसनम्। दा इत्यस्य दः इति पञ्चमी। तदाह—इदातेर्मुखविकसनादन्यत्रेति। विद्यामादत्ते इति। गृह्णातीत्यर्थः। दाङो त्रिष्वेऽप्यकर्त्रभिप्रायार्थमिदम्। अविवक्षितमिति। 'अविहरणे' इत्येतावदेव विवक्षितमित्यर्थः। विपादिकां व्याददातीति। क्षारौषधादिना विदारयतीत्यर्थः। अत्र आस्यविहरणाऽभावेऽपि विकसनसत्त्वात्तात्मनेपदमिति भावः। नदी कूलं व्याददातीति। भिनत्तीत्यर्थः। अत्रापि विकसनसत्त्वादास्यविहरणाऽभावेऽपि नात्मनेपदम्। पराङ्गकर्मकान्न निषेध इति। वार्तिकम्। पतङ्गस्येति। पक्षिणो मुखं भक्षणाय

याज्ञ । उपसर्गेण समा साहचर्यात् । माणवकमनुक्रीडति । तेन सहेत्यर्थः । 'तृतीयार्थे' (सू ५४६) इत्यनोः कर्मप्रवचनीयत्वम् । 'समोऽकूजने' (वा ९०४) । सङ्क्रीडते । कूजने तु सङ्क्रीडति चक्रम् । 'आगमेः क्षमायाम्' (वा ९०५) । प्यन्तस्येदं ग्रहणम् । आगमयस्व तावत् । मा त्वरिष्ठा इत्यर्थः । 'शिक्षेर्जिज्ञासायाम्' (वा ९०६) धनुषि शिक्षते । धनुर्विषये ज्ञाने शक्तो भवितुमिच्छतीत्यर्थः । 'आशिषि नाथः' (वा ९१०) आशिष्येवेति नियमार्थं वार्तिकमित्युक्तम् । सर्पिषो नाथते । सर्पिर्मे स्यादित्याशास्त इत्यर्थः । कथं 'नाथसे किमु पतिं न भूभृताम्' इति । 'नाधसे' इति पाठ्यम् । 'हरतेर्गतताच्छील्ये' (वा ९०८) । गतं प्रकारः । पैतृकमश्वा अनुहरन्ते । मातृकं गावः । पितुर्मातुश्च गतं प्रकारं सततं परिशीलयन्तीत्यर्थः । ताच्छील्ये किम् । मातुरनुहरति । 'किरतेर्हर्षजीविकाकुलायकरणेष्विति वाच्यम्' (वा ९०७) । हर्षादयो विषयाः । तत्र हर्षो चित्तेपस्य कारणम् । इतरे

विकासयन्तोत्यर्थः । क्रीडाऽनु । चादाक इति । तथाच अनु सम् परि आङ् एभ्यः परस्मात् क्रीडधातोरात्मनेपदमित्यर्थः। 'अनोः कर्मप्रवचनीयाच्च' इति वार्तिकम् । तदिदं न्यायसिद्धमित्याह—उपसर्गेण समेति । 'समोऽकूजने' इति वार्तिकम् । समः परस्मात् अकूजने विद्यमानात् क्रीडेरात्मनेपदमित्यर्थः । कूजने तु संक्रीडति चक्रमिति । कूजतीत्यर्थः । आगमेः क्षमायामिति । 'आत्मनेपद'मिति शेषः । वार्तिकमिदम् । प्यन्तस्येदं ग्रहणमिति । भाष्ये ण्यन्तस्यैवोदाहरणादिति भावः । आगमयस्व तावदिति । कञ्चित्कालं सहस्वेत्यर्थः । आङुपसर्गवशात् गमधातुः क्षमायां वर्तते । 'हन्यर्थाश्च' इति चुरादिगणसूत्रेण स्वार्थे णिच् । चुरादेराकृतिगणत्वाद्वा । मा त्वरिष्ठा इति । फलितार्थकथनम् । 'शिक्षेर्जिज्ञासायाम्' इत्यपि वार्तिकम् । धनुषि शिक्षते इति । वैषयिके आधारे सप्तमी । शक्तिः सङ्गन्तः । 'सनि मीमा' इति इस् । अभ्यासलोपश्च । तदाह—धनुर्विषये इत्यादि । 'शिक्ष विद्योपादाने' इत्यस्य तु नेह ग्रहणम् , अनुदात्तेत्त्वादेव सिद्धेरिति भावः । कथमिति । भूभृतां पतिं किमु न नाथसे न याचसे इत्यर्थः । आशिषः अप्रतीतेः कथमात्मनेपदमित्यर्थः । नाधसे इति पाठ्यमिति । तवर्गचतुर्थान्तोऽयम् । 'आशिषि नाथः' इति नियमस्तु तवर्गद्वितीयाम्तस्यैवेति भावः । 'हरतेर्गतताच्छील्ये' इति वार्तिकम् । आत्मनेपदमिति शेषः । गतं प्रकार इति । वृत्तमित्यर्थः । ताच्छील्यं स्वभावानुसरणम् । गतिताच्छील्यमिति यावत् । गतेति पाठे भावे क्तः । पैतृकमश्वा इति । पतृकं वृत्तम् अश्वाः स्वभावादनुसरन्तीत्यर्थः । मातृकं गाव इति । अनुहरन्ते इत्यनुषज्यते । मातुरनुहरतीति । अनुकरोतीत्यर्थः । अत्र सादृश्यमात्रं विवक्षितं, न तु गतिताच्छील्यमिति भावः । किरतेरिति । वार्तिकम् । हर्षः प्रमादः, जीविका जीवनोपायभक्षणम्, कुलायकरणं आश्रयसम्पत्तिः, एषु कृधातोरात्मनेपदमित्यर्थः । नन्वेषु कृधातोर्विशेषार्थकस्य कथमेषु वृत्तिरित्यत आह—हर्षादयो विषया इति । आत्मनेपदार्थत्वाऽभावेऽपि पदान्तरसम-

फले। २६८८ अपाच्चतुष्पाच्छकुनिष्वालेखने ६।१।१४२॥ अपात्किरतेः सुट् स्यात्। 'सुडपि हर्षादिष्वेव वक्तव्यः' (वा ३७०६)। अपस्किरते वृषो हृष्टः, कुक्कुटो भक्षार्थी, श्वा आश्रयार्थी च। हर्षादिषु इति किम्। अपकिरति कुसुमम्। इह तङ्सुटौ न। हर्षादिमात्रविवक्षायां यद्यपि तङ् प्राप्तस्तथापि सुड्भावे नेष्यते इत्याहुः। गजोपकिरति। 'आङ्निनुप्रच्छ्योः। (वा ६०६)। आनुते। आपृच्छते। 'शप उपालम्भे' (वा ९११)। आक्रोशार्थात्स्वरितेतोऽकर्तृगेऽपि फले शपथरूपेऽर्थे आत्मनेपदं वक्तव्यमित्यर्थः। कृष्णाय शपते। २६८९ समवप्रविभ्यः स्थः १।३।२२॥ संतिष्ठते। 'स्थाघ्वोरिच्च' (सू २३८६)। समस्थित। समस्थिषाताम्। समस्थिषत। अनुतिष्ठते। प्रतिष्ठते। वितिष्ठते। 'आङः प्रतिज्ञायामुपसंख्यानम्' (वा ६१२)। शब्दं नित्यमातिष्ठते। नित्यत्वेन

भिव्याहारगम्या इत्यर्थः। तत्रेति। तेषु हर्षादिष्वित्यर्थः। कारणमिति। तथाच हर्षमूलकत्वं विक्षेपस्य लभ्यते इति भावः। इतरे इति। जीविकाकुलायकरणे विक्षेपस्य साध्ये इति लभ्यते। हर्षादीनामेवंविधविषयत्वे सत्येवात्मनेपदमिति फलितम्, भाष्ये तथैवोदाहृतत्वादिति भावः। अपाच्चतुष्पात्। 'सुट्कात्पूर्वः' इत्यधिकृतम्। 'किरतौ लवने' इत्यतः किरतावित्यनुवर्तते। तदाह—अपात् किरतेः सुट् स्यादिति। चतुष्पात्सु शकुनिषु च गम्येष्वित्यपि शेषम्। आलेखनं खननम्। सुडपि हर्षादिष्वेवेति वार्तिकम्। अपस्किरते वृषो हृष्ट इति। हर्षाद्भूमिं लिखन् धूल्यादि विक्षिपतीत्यर्थः। कुक्कुटो भक्षार्थीति। 'अपस्किरते' इत्यनुषज्यते। श्वा आश्रयार्थीति। 'अपस्किरते' इत्यनुषज्यते। अपकिरति कुसुममिति। 'वृषादि'रिति शेषः। ह्रियमाणो वृषादिः पादैः कुसुममवकिरतीत्यर्थः। अत्र हर्षाद्यभावान्नात्मनेपदम्। नापि सुट्। तदाह—इह तङ्सुटौ नेति। ननु 'अपस्किरते वृषो हृष्ट' इत्यादुदाहरणत्रये यदि हर्षजीविकाकुलायकरणान्येव विवक्षितानि तत्त्वालेखनमपि तदा तङेव स्यान्न तु सुट् इत्यत आह—हर्षादिमात्रेत्यादि। आलेखनाऽभावेऽपीत्यर्थः। नेष्यते इति। 'किरतेर्हर्षजीविकेऽर्थेऽत्मनेपदविधौ ससुट्कानामेव भाष्ये उदाहरणादिति भावः। भाष्यस्थान्युदाहरणान्यालेखनविषयाण्येव भविष्यन्तीत्यस्वरसं सूचयति—आहुरिति। गजोऽपकिरतीति। स्वभावाख्यानमत्रेति भावः। 'आङि नुप्रच्छ्योः' इतिवार्तिकम्। आनुते इति। शृगाल इति भाष्यम्। शृगालः उत्कण्ठापूर्वकं शब्दं करोतीत्यर्थ इति कैयटः। ननु 'शप आक्रोशे' इत्यस्य स्वरितेत्वादेव सिद्धे 'शप उपालम्भे' इत्यात्मनेपदविधिर्व्यर्थं इत्यत आह—आक्रोशार्थादिति। 'शप आक्रोशे' इति स्वरितेतः कर्तृगामिन्येव फले आत्मनेपदं प्राप्तम्। अकर्तृगेऽपि फले, शपथात्मकनिन्दाविशेषे विद्यमानात् तस्मात् शपधातोरात्मनेपदार्थमिदमित्यर्थः। कृष्णाय शपते इति। 'श्लाघह्नुङ्स्थाशपाम्' इति सम्प्रदानत्वाच्चतुर्थी। समवप्रविभ्यः स्थः। स्थः इति पञ्चमी। सम् अव प्र वि एभ्यः परस्मात्

प्रतिजानीते इत्यर्थः । २६६० प्रकाशनस्थेयाख्ययोश्च १।३।२३॥ गोपी कृष्णाय तिष्ठते । आशयं प्रकाशयतीत्यर्थः । 'संशय्य कर्णादिषु तिष्ठते यः' कर्णादीन्निर्णेतृत्वेनाश्रयतीत्यर्थः । २६६१ उदोऽनूर्ध्वकर्मणि १।३।२४॥ मुक्तावुत्तिष्ठते । अनूर्ध्व—इति किम् । पीठादुत्तिष्ठति । 'ईहायामेव' (वा ६१३) नेह । ग्रामाच्छतमुत्तिष्ठति । २६६२ उपान्मन्त्रकरणे १।३।२५॥ आग्नेय्या आग्नीध्रमुपतिष्ठते । मन्त्रकरणे किम् । भर्तारमुपतिष्ठति यौवनेन । 'उपाद्देवपूजासंगतिकरणमित्रकरणपथिष्विति वाच्यम्' (वा ९१४) । आदित्यमुपतिष्ठते । कथं तर्हि 'स्तुत्यं स्तुतिभिरर्थ्याभिरुपतस्थे सरस्वती' इति । देवतात्वारोपात् । नृपस्य देवतांशत्वाद्वा । गङ्गा यमुनामुपतिष्ठते । उपश्लिष्यतीत्यर्थः । रथिकानुपतिष्ठते । मित्रीकरोतीत्यर्थः । पन्थाः घ्नन्नुपतिष्ठते । प्राप्नोतीत्यर्थः । 'वा लिप्सायामिति वक्त-

---

स्थाधातोरात्मनेपदमित्यर्थः । सन्तिष्ठते इति । समाप्तं भवतीत्यर्थः । प्रकाशन । प्रकाशनं स्वाभिप्रायाविष्करणम् । स्थेयः विवादपदनिर्णेता । तिष्ठति विश्राम्यति । विवादपदनिर्णयोऽस्मिन्नित्यर्थे बाहुलके अधिकरणे 'अचो यत्' इति यति ईत्वे स्थेयशब्दव्युत्पत्तेः । 'स्थेयो विवादस्थानस्य निर्णेतरि पुरोहिते' इति मेदिनि । इह तु विवादपदनिर्णेतृत्वेनाध्यवसायो विवक्षितः । आख्या अभिधानम् । प्रकाशनाख्यायां स्थेयाख्यायां च वर्तमानात् स्थाधातोरात्मनेपदमित्यर्थः । प्रकाशने उदाहरति—गोपी कृष्णाय तिष्ठते इति । 'श्लाघह्नुङ्स्थाशपाम्' इति सम्प्रदानत्वाच्चतुर्थी । स्थेये उदाहरति—संशय्येति । कर्णादिष्विति विषयसप्तमी । फलितमाह—कर्णादीनिति । उदोनूर्ध्वकर्मणि । ऊर्ध्वदेशसंयोगानुकूला क्रिया ऊर्ध्वकर्म । तन्निघ्नमनूर्ध्वकर्म तद्वृत्तेः स्थाधातोरुत्पूर्वादात्मनेपदमित्यर्थः । मुक्तावुत्तिष्ठते इति । गुरूपगमनादिना यतते इत्यर्थः । पीठादुत्तिष्ठतीति । उत्पततीत्यर्थः । 'ईहायामेव' इति वार्तिकम् । ईहा कायपरिस्पन्दः । ग्रामाच्छतमुत्तिष्ठतीति । उत्पद्यत इत्यर्थः । उपान्मन्त्रकरणे । मन्त्रकरणकेऽविद्यमानात्स्थाधातोरात्मनेपदमित्यर्थः । आग्नेय्या आग्नीध्रमुपतिष्ठते इति । आग्नेय्या ऋचा आग्नीध्राख्यमण्डपविशेषमुपेत्य तिष्ठतीत्यर्थः । स्थितेरकर्मकत्वेऽपि उपेत्येतदपेक्षय सकर्मकत्वम् । केचित्तु मन्त्रकरणके समीपावस्थितिपूर्वकस्तवेऽविद्यमानात् स्थाधातोरात्मनेपदमिति व्याचक्षते । तत्र स्तवः गुणवत्त्वेन संकीर्तनमिति स्तुतशब्दाधिकरणे प्रपञ्चितमस्माभिः । श्लोकैः राजानं स्तौतीत्यर्थे श्लोकैरुपतिष्ठते इत्यात्मनेपदं न, मन्त्रकरणकत्वाऽभावात् । 'उपाद्देवपूजा' इति वार्तिकम् अमन्त्रकरणकत्वार्थम् । आदित्यमुपतिष्ठते इति । अभिमुखीभूयाऽवस्थितिपूर्वकस्तुत्यादिभिः पूजयतीत्यर्थः । कथं तर्हीति । रघोर्देवतात्वाभावादिति भावः । समाधत्ते-देवतात्वारोपादिति । नृपस्येति । 'आ विष्णुः पृथिवीपतिः' इत्यादिस्मरणादिति भावः । वा लिप्सायामिति । लिप्साहेतु-

व्यम्' (वा ९१९)। भिक्षुकः प्रभुमुपतिष्ठते, उपतिष्ठति वा। [लिप्सया उपगच्छतीत्यर्थः। २६९३ **अकर्मकाच्च** १।३।२६॥ उपात्तिष्ठतेरकर्मकादात्मनेपदं स्यात्। भोजनकाल उपतिष्ठते। सन्निहितो भवतीत्यर्थः। २६९४ **उद्भिभ्यां तपः** १।३।२७॥ अकर्मकात् इत्येव। उत्तपते। वितपते। दीप्यते इत्यर्थः। 'स्वाङ्गकर्मकाच्चेति वक्तव्यम्' (वा ९१६) स्वमङ्गं स्वाङ्गं, न तु 'अद्रवम्' इति परिभाषितम्। उत्तपते वितपते पाणिम्। नेह। सुवर्णमुत्तपति। सन्तापयति, विलापयति, वेत्यर्थः। चैत्रो मैत्रस्य पाणिमुत्तपति। सन्तापयतीत्यर्थः। २६९५ **आङो यमहनः** १।३।२८॥ आयच्छते। आहते। अकर्मकात्स्वाङ्गकर्मकादित्येव। नेह। परस्य शिर आहन्ति। कथं तर्हि 'आजघ्ने विषमविलोचनस्य वक्षः' इति भारविः॥ [प्राहध्वं मा रघूत्तमम्' इति भट्टिश्च। प्रमाद एवायमिति भागवृत्तिः। प्राप्येत्यर्थाहारो वा। ल्यब्लोपे पञ्चमीति तु ल्यबन्तं विनैव तदर्थावगतिर्यत्र तद्विषयम्। भेत्तुमित्यादितुमुन्नन्ताध्याहारो वास्तु। समीपमेत्येति वा। २६९६ **आत्म-**

काऽर्थवृत्तेः स्थाधातोरात्मनेपदं वेत्यर्थः। अकर्मकाच्च। उपात्तिष्ठतेरिति। 'उपान्मन्त्रकरणे' इत्यतः 'समवप्रविभ्यः स्थः' इत्यतश्च तदनुवृत्तेरिति भावः। उद्भिभ्यां तपः। 'अकर्मकादित्येवे'ति भाष्यम्। दीप्यते इति। दीप्तिमान् भवतीत्यर्थः। स्वाङ्गकर्मकाच्चेति। 'उद्भिभ्यां तप' इत्यनुवर्तते। चकारादकर्मकसमुच्चयः। स्वाङ्गशब्दोऽत्र यौगिक इत्याह—स्वमङ्गमिति। सुवर्णमुत्तपतीति। अस्वाङ्गकर्मकत्वादकर्मकत्वाऽभावाच्च नात्मनेपदमिति भावः। स्वाङ्गशब्दोऽत्र न पारिभाषिकः। किन्तु यौगिक इत्यस्य प्रयोजनमाह—चैत्रो मैत्रस्य पाणिमुत्तपतीति। अत्र 'अद्रवं मूर्तिम'दित्यादिपरिभाषितस्वाङ्गकर्मकत्वेऽपि स्वकीयाङ्गकर्मकत्वाभावान्नात्मनेपदमिति भावः। आङो यमहनः। आङः परस्मात् यमो हनश्चात्मनेपदमित्यर्थः। आयच्छते इति। रज्जुर्दीर्घो भवतीत्यर्थः। दीर्घीकरोति पादमिति वा। आहत इति। 'स्वोदर'मिति शेषः। परस्य शिरः आहन्तीति स्वीयाऽङ्गकर्मकत्वाऽभावादकर्मकत्वाऽभावाच्च नात्मनेपदम्। कथं तर्हीति। स्वीयाऽङ्गकर्मकत्वाऽभावादकर्मकत्वाऽभावाच्चात्मनेपदाऽसम्भवादिति भावः। प्राप्येति। विषमविलोचनस्य वक्षः प्राप्य आजघ्न इति, रघूत्तमं प्राप्य माऽऽहध्वमिति च प्राप्तिक्रियां प्रत्येव विषमविलोचनस्य रघूत्तमस्य च कर्मतया हन्तेरकर्मकत्वादात्मनेपदं निर्बाधमिति भावः। यद्यपि हननक्रियां प्रत्यपि तयोरेव वस्तुतः कर्मत्वं तथापि तस्याऽविवक्षितत्वादकर्मकत्वमेव, 'धातोरर्थान्तरे वृत्तेर्धात्वर्थेनोपसंग्रहात्। प्रसिद्धेरविवक्षातः कर्मणोऽकर्मिका क्रिया। इत्यनुपदमेव वक्ष्यमाणत्वादिति बोध्यम्। ननु प्राप्येत्यध्याहारे 'प्रासादाग्रेक्षते' इत्यादिवत्पञ्चमी स्यादित्यत आह—ल्यब्लोपे इति। 'ल्यब्लोपे पञ्चमी'त्येतत्तु यत्राऽर्थाध्याहारमाश्रित्य ल्यबन्तार्थावगतिः तद्विषयकम्। अत्र तु ल्यबन्तशब्दाध्याहाराऽऽश्रयेण पञ्चमीत्यर्थः। भेत्तुमित्यादीति। पुनश्च ल्यब्लोपपञ्च-

नेषदेष्वन्यतरस्याम् २।४।४४॥ हनो वधादेशो वा लुङि आत्मनेपदेषु परेषु। आवधिष्ट। आवधिषाताम्। २६९७ **हनः सिच् १।२।१४॥** कित्स्यात्। अनुनासिकलोपः। आहत। आहसाताम्। आहसत। २६९८ **यमो गन्धने १।२।१५॥** सिच्कित्स्यात्। गन्धनं सूचनं परदोषाविष्करणम्। उदायत। गन्धने किम्। उदायंस्त पादम्। आकृष्टवानित्यर्थः। २६९९ **समो गम्यृच्छिभ्याम् १।३।२९॥** अकर्मकाभ्याम् इत्येव सङ्गच्छते। २७०० **वा गमः १।२।१३॥** गमः परौ झलादी लिङ्सिचौ वा कितौ स्तः। सङ्गंसीष्ट। सङ्गसीष्ट। समगत। समगंस्त। समृच्छते। समृच्छिष्यते। अकर्मकाभ्याम् किम्। ग्रामं सङ्गच्छति। 'विदिप्रच्छिस्वरतीनामुपसङ्ख्यानम्' (वा ९१८)। वेत्तेरेव ग्रहणम्। संवित्ते। संविदाते। २७०१ **वेत्तेर्विभाषा ७।१।७॥** वेत्तेः परस्य झादेशस्यार्धधातुकस्य रुडागमो वा स्यात्। संविद्रते। संविदते। सम्पृच्छते। संस्वरते। 'अर्तिश्रुदृशिभ्यश्चेति वक्तव्यम्' (वा ९२६)। अर्तीति द्वयोर्ग्रहणम्। अर्द्विधौ त्वियर्तेरेवेत्युक्तम्।

त्या न प्रसक्तिरिति भावः। 'आजघ्ने विषम'इत्यत्र परिहारान्तरमाह-समीपमैत्येति वेति। अध्याहार इति शेषः। विषमविलोचनस्य समीपमेत्य स्वीयमेव वक्षः मल्ल इव वीरा वेशादास्फालयांचक्रे इत्यर्थः। तथाच स्वाङ्गकर्मकत्वादात्मनेपदं निर्बाधमिति भावः। लुङि आहन् स् त इति स्थिते—हनः सिच्। कित्स्यादिति शेषपूरणम्। 'असंयोगाल्लिट् कित्' इत्यतः तदनुवृत्तेरिति भावः। हनधातोः परः सिच् कित्स्यादिति फलितम्। अनुनासिकलोपः इति। 'अनुदात्तोपदेश' इति नकारलोप इत्यर्थः। उत् आयम् स् त इति स्थिते—यमो गन्धने। सिच्कित्स्यादिति। शेषपूरणम्। सिचः कित्त्वे मकारस्य 'अनुदात्तोपदेश' इति लोपः। समो गम्यृच्छिभ्याम्। 'आत्मनेपद'मिति शेषः। अकर्मकाभ्यामित्येवेति। 'स्वाङ्गकर्मकाच्वे'ति तु निवृत्तमिति भावः। सङ्गच्छते इति। सङ्गतं भवतीत्यर्थः। वा गमः। 'इको झल्' इत्यतो झलिति 'लिङ्सिचावात्मनेपदेषु' इत्यतो लिङ्सिचाविति 'असंयोगाल्लिट्' इत्यतः किदिति चानुवर्तते। तदाह—गमः परावित्यादि। समगतेति। लुङि रूपम्। सिचः कित्त्वपक्षे 'अनुदात्तोपदेश' इति मकारलोपे 'हल्ङ्यादिलोपात्' इति सिचो लुक्। समृच्छते इति। 'ऋच्छ गतीन्द्रियप्रलयमूर्तिभावेषु' इति तौदादिकस्य रूपम्। अत्र तौदादिकस्य ऋच्छतेरेव ग्रहणं, नतु ऋच्छाद्देशस्येति सूचयितुं लृदन्तमप्युदाहरति—समृच्छिष्यते इति। विदिप्रच्छिस्वरतीनामिति। सम इत्यनुवर्तते। सम्पूर्वेभ्यो विदिप्रच्छिस्वरतिभ्यः आत्मनेपदमित्यर्थः। वेत्तेरिति। लुग्विकरणस्यैव विदेर्ग्रहणमित्यर्थः, व्याख्यानादिति भावः। वेत्तेर्विभाषा। 'झोऽन्तः' इत्यतः झ इत्यनुवर्तते। 'अदभ्यस्तात्' इत्यतः अदित्यनुवृत्तं षष्ठ्या विपरिणम्यते। 'झोऽन्त' इतित्यतो इतिति च। तदाह—वेत्तेः परस्येत्यादिना। अर्तिश्रुदृशिभ्य इति। 'सम्पूर्वेभ्यस्त'इति शेषः। द्वयोरिति। भावादिकस्य, इयर्तेश्चेत्यर्थः। अत-

मा समृत। मा समृषाताम्। मा समृषत इति। समार्त। समार्षाताम्। समार्षत इति च भ्वादेः। इयर्तेस्तु, मा समरत। मा समरेताम्। मा समरन्त इति, समारत। समारेताम्। समारन्त इति च। संश्रृणुते। सम्पश्यते। अकर्मकादित्येव। अत एव 'रक्षांसीति पुरापि संश्रृणुमहे' इति मुरारिप्रयोगः। प्रामादिक इत्याहुः। अध्याहारो वा 'इति कथयद्भ्यः'इति। अथास्मिन्नकर्मकाधिकारे हनिगम्यादीनां कथमकर्मकतेति चेत्? शृणु। धातोरर्थान्तरे वृत्तेर्धात्वर्थेनोपसङ्ग्रहात्। प्रसिद्धेरविवक्षातः कर्मणोऽकर्मिका क्रिया॥

वहति भारम्। नदी वहति। स्यन्दते इत्यर्थः। जीवति। नृत्यति। प्रसिद्धे-

---

विधौ त्विति। **सर्तिशास्त्यर्तिभ्यश्च' इत्यत्रेत्यर्थः**। मा समृतेति। **'उश्च' इति सिचः कित्त्वाद्** गुणः। **'हस्वादङ्गात्' इति सिचो लोपः। माङ्योगे मा समृतेत्यादि। माङ् योगाभावे तु समार्तेत्यादि इत्येवं भ्वादिकस्य ऋधातोः रूपमित्यर्थः। माङ्योगादाडभावः। अथ माङ्योगाभावे आडागमे उदाहरति।** समार्तेति। **सम् आ ऋ स् त इति स्थिते 'उश्च' इति कित्त्वाद्गुणनिषेधे 'आटश्च' इति वृद्धि बाधित्वा परत्वात् 'हस्वादङ्गा'दिति सिचो लोपे 'आटश्च' इति ऋकारस्य वृद्धौ रपरत्वे रूपम्। नच सिज्लोपस्याऽसिद्धत्वात् आटश्चेति वृद्धौ कृतायां हस्वादङ्गादिति सिज्लोपस्याऽप्रवृत्त्या समार्ष्टेत्येवोचितमिति वाच्यम्, 'सिज्लोप एकादेशे सिद्धो वाच्यः' इति वचनेन पूर्वं सिज्लोपे पश्चादाटश्चेति वृद्धेः प्रवृत्तिसम्भवादित्यलम्। इयर्तेस्त्विति। श्लुविकरणऋधातोरित्यर्थः।** मा समरतेति। **'सर्तिशास्त्यर्ति' इत्यङ्, तत्र इयर्तेर्ग्रहणादिति भावः। 'ऋदृशोऽङि' इति गुणः।** समारेतेति। **'आटश्च' इति वृद्धिः। इति चेति इयर्तेः रूपमित्यन्वयः। तदेवमर्तिश्रुदृशिभ्यः इत्यत्र अर्तिप्रपञ्चमुक्त्वा श्रुधातोरुदाहरति—** संश्रृणुते इति। **इशेरुदाहरति—**सम्पश्यते इति। अकर्मकादित्येवेति। **'समो गम्यृच्छिभ्याम्' इत्यत्र अकर्मकादित्यनुवृत्तेरभ्युपगतत्वेन तत्रोपसंख्यातवार्तिकेऽस्मिन् तदनुवृत्तेर्युक्तत्वादिति भावः।** अत एवेति। **'प्रामादिक इत्याहु'रित्यन्वयः, सकर्मकत्वेनात्मनेपदासम्भवादिति भावः।** अध्याहारो वेति। **'इति कथयद्भ्य' इत्यध्याहारो वेत्यन्वयः। तथाच रक्षांसीति कथयद्भ्यः पुरा संश्रृणुमहे इत्यत्र कथन एव रक्षसामन्वितत्वात् श्रुवः अकर्मकत्वादात्मनेपदं निर्बाधमिति भावः।** धातोरिति। **धातोरर्थान्तरे वृत्तेरिति, धात्वर्थेनोपसङ्ग्रहादिति, प्रसिद्धेरिति, अविवक्षातः इति चत्वारि वाक्यानि। अकर्मिका क्रियेति सर्वत्राम्बेति। 'कर्मण्य' इति तु द्वितीयादिषु वाक्येष्वम्बेति।** वहति भारमिति। **प्रापयतीत्यर्थः। अत्र सकर्मकत्वमिति भावः। अस्याऽर्थान्तरे क्वचिदकर्मकत्वमुदाहरति—**नदी वहतीति। स्यन्दते इति। **प्रस्रवतीत्यर्थः। धात्वर्थोपसङ्ग्रहे उदाहरति—**जीवतीति। नृत्यतीति। **जीवेः प्राणधारणमर्थः। नृतेस्त्वङ्गविक्षेपः। उभयत्रापि कर्मणो धात्वर्थान्तर्भावान्न सकर्मकत्वमिति 'सुप आत्मनः' इति,**

र्यथा—मेघो वर्षति । कर्मणोऽविवक्षातो यथा—'हितान्न यः संशृणुते स किंप्रभुः'। 'उपसर्गादस्यत्यूह्योर्वेति वाच्यम्' (वा ६२०)। अकर्मकात् इति निवृत्तम्। बन्धं निरस्यति—निरस्यते। समूहति। समूहते। **२७०२ उपसर्गाद्ध्रस्व ऊहतेः** ७।४।२३॥ यादौ क्ङिति। ब्रह्म समुह्यात्। अग्निं समुह्य। **२७०३ निसमुपविभ्यो ह्वः** १।३।३०॥ निह्वयते। **२७०४ स्पर्धायामाङः** १।३।३१॥ कृष्णश्चाणूरमाह्वयते। स्पर्धायाम् किम्। पुत्रमाह्वयति। **२७०५ गन्धनावक्षेपणसेवनसाहसिक्यप्रतियत्नप्रकथनोपयोगेषु कृञः** १।३।३२॥ गन्धनं हिंसा। उत्कुरुते। सूचयतीत्यर्थः। सूचनं हि प्राणवियोगानुकूलत्वाद्धिंसैव। अवक्षेपणं, भर्त्सनम्। श्येनो वर्तिकामुदाकुरुते। भर्त्सयतीत्यर्थः। हरिमुपकुरुते। सेवते। परदारान्प्रकुरुते। तेषु सहसा प्रवर्तते। एधोदकस्योपस्कुरुते। गुणमाधत्ते।

सूत्रे भाष्ये स्पष्टम्। मेघो वर्षतीति। **वर्षणकर्मणो जलस्य प्रसिद्धत्वादकर्मकत्वम्।** हितान्न य इति। **हितात्पुरुषात् यः न संशृणुते स्वहितं न मन्यते स किंप्रभुः, कुत्सित इत्यर्थः। अत्र स्वहितस्य वस्तुतः कर्मत्वेऽपि तदविवक्षया अकर्मकत्वमिति भावः। एवं चाग्निष्टकर्माधिकारे हनिगम्यादीनां सतोऽपि कर्मणः अविवक्षया अकर्मकत्वं सिद्धमिति बोध्यम्। अकर्मकत्वनिर्णयोऽयं 'लः कर्मणि' इत्यादौ उपयुज्यते।** उपसर्गादस्यत्यूह्योर्वेति। **'आत्मनेपद'मिति शेषः।** निवृत्तमिति। **सोपसर्गयोरस्यत्यूह्योः सकर्मकत्वनियमादिति भावः।** उपसर्गाद्ध्रस्व ऊहतेः। **'यादौ क्ङिति' इति शेषपूरणम्। 'अयङ् यि क्ङिति' इत्यतः तदनुवृत्तेरिति भावः।** ब्रह्म समुह्यादिति। **ऊह वितर्के, सम्यग्विचारयेदित्यर्थः।** अत्र आशीर्लिङि यासुटः कित्त्वेन ऊकारस्य ह्रस्वः। अग्निं समुह्येति। **परितः संभृत्योत्यर्थः।** क्त्वादेशस्य ल्यपः कित्त्वमिति भावः। निसमुपवि। **ह्वेञः कृताम्बस्य ह्वः इति पञ्चम्यन्तम्।** निह्वयते इति। **संह्वयते। उपह्वयते। विह्वयते। अकर्त्रभिप्रायार्थमिदम्।** स्पर्धायामाङः। **आङ्पूर्वकात् स्पर्धाविषयकात् ह्वेञः आत्मनेपदमित्यर्थः।** कृष्णश्चाणूरमाह्वयते इति। **स्पर्धार्थमाकारयतीत्यर्थः।** गन्धनावक्षेपण। **'आत्मनेपदम्। अकर्त्रभिप्रायेऽपी'ति शेषः।** गन्धनं हिंसेति। **गन्ध अर्दने। अर्द हिंसायामित्युक्तेरिति भावः।** सूचयतीति। **परदोषमाविष्करोतीत्यर्थः।** नन्वेवं सति कथमस्य गन्धने वृत्तिः? हिंसायाः असत्त्वादित्यत आह—सूचनं हीति। श्येनो वर्तिकामिति। **वर्तिका शकुनिविशेषः।** साहसिक्ये उदाहरति—परदारान् प्रकुरुते इति। **साहसप्रवृत्तिविषयीकरोतीत्यर्थः।** सहसा वर्तते साहसिकः। **'ओजःसहोऽम्भसा वर्तते' इति ठक्। तस्य कर्म असमीक्ष्यकरणं साहसिक्यम्। तदाह—तेषु सहसा प्रवर्तते इति। फलितार्थकथनमिदम्, साहसप्रवृत्तिमात्रार्थकत्वे द्वितीयानुपपत्तेः। अतः साहसप्रवृत्तिविषयीकरणपर्यन्तानुधावनमिति बोध्यम्।** प्रतियत्ने उदाहरति—एधोदकस्योपस्कुरुते इति। **एधशब्दः अदन्तः 'अवोदैधौद्मप्रथहिमश्रथाः' इति सूत्रे निपातितः। एधस्य**

गाथाः प्रकुरुते । प्रकथयति । शतं प्रकुरुते । धर्मार्थं विनियुङ्क्ते । एषु किम् । कटं करोति । २७०६ **अधेः प्रसहने १।३।३३॥** प्रसहनं क्षमाभिभवश्च । षह मर्षणेऽभिभवे च इति पाठात् । शत्रुमधिकुरुते । क्षमते इत्यर्थः । अभिभवतीति वा । २७०७ **वेः शब्दकर्मणः १।३।३४॥** स्वरान्विकुरुते । उच्चारयतीत्यर्थः । शब्दकर्मणः किम् । चित्तं विकरोति कामः । २७०८ **अकर्मकाच्च १।३।३५॥** वेः कृञः इत्येव । छात्रा विकुर्वते । विकारं लभन्ते । २७०९ **सम्माननोत्सञ्जनाचार्य्यकरणज्ञानभृतिविगणनव्ययेषु नियः १।३।३६॥** अत्रोत्सञ्जनज्ञानविगणनव्ययाः नयतेर्वाच्याः । इतरे प्रयोगोपाधयः । तथा हि, शास्त्रे नयते । शास्त्रस्थं सिद्धान्तं शिष्येभ्यः प्रापयतीत्यर्थः । तेन च शिष्यसंमाननं फलितम् । उत्सञ्जने—दण्डमुन्नयते । उत्क्षिपतीत्यर्थः । माणवकमुपनयते । विधिना आत्मसमीपं प्रापयतीत्यर्थः । उपनयनपूर्वकेणाध्यापनेन हि उपनेतरि आचार्यत्वं क्रि-

---

दकं चेति समाहारद्वन्द्वः। यद्वा एधश्शब्दः सकारान्तो नपुंसकलिङ्गः। एधश्च दकं चेति विग्रहः। दकशब्दः उदकवाची 'प्रोक्तं प्राज्ञैर्भुवनममृतं जीवनीयं दकं च' इति हलायुधः। 'काष्ठं दार्विन्धनं स्वेध इध्ममेधः समित् स्त्रियाम्' इत्यमरः। प्रतियतो गुणाधानमित्यभिप्रेत्य आह—गुणमाधत्ते इति। काष्ठस्य शोषणादिगुणाधानम्। दकस्य तु गन्धद्रव्यसम्पर्कजनितगन्धाधानम्। अधेः प्रसहने। अधेः परस्मात् कृञः प्रसहनवृत्तेरात्मनेपदमित्यर्थः। वेः शब्दकर्मणः। शब्दः कर्मकारकं यस्य तस्मात् कृञो विपूर्वादात्मनेपदमित्यर्थः। अकर्मकाच्च। वेः कृञ इत्येवेति। तथाच अकर्मकात् विपूर्वात् कृञ आत्मनेपदमित्यर्थः। 'विकुर्वते' इत्येतद्व्याचष्टे—विकारं लभन्ते इति। लाभे विकारस्य कर्मत्वेऽपि धात्वर्थोपसंग्रहादकर्मकत्वम्। संमाननोत्सञ्जन। एषु गम्येषु णीञ्धातोरात्मनेपदमित्यर्थः। परगामित्यपि फले आत्मनेपदार्थमिदम्। इतरे इति। संमाननाऽऽचार्यकरणप्रभृतयः इत्यर्थः। प्रयोगोपाधय इति। वाच्यत्वाऽभावेऽपि आर्थिकाः, सत्तामात्रेण शब्दप्रयोगे निमित्तभूता इत्यर्थः। आत्मनेपदमित्या इति यावत्। तदेवोपपादयितुं प्रतिजानीते—तथा हीति। संमानने उदाहरति—शास्त्रं नयते इति। अत्र णीञ् प्रापणार्थकः। 'सिद्धान्त' मित्यध्याहार्यम्। सिद्धान्तं प्रत्यधिकरणत्वात् शास्त्रे इति सप्तमी। तदाह—शास्त्रस्थमिति। तेनेति। सिद्धान्तप्रापणेनेत्यर्थः। फलितमिति। अर्थादिति भावः। उत्सञ्जने इति। 'उदाहियते' इति शेषः। उत्सञ्जनमुत्क्षेपः। उत्क्षिपतीत्यर्थ इति। धातूनामनेकार्थत्वादिति भावः। आचार्यकरणे उदाहरति—माणवकमुपनयते इति। उपपूर्वो णीञ् समीपप्रापणार्थकः। सामीप्यं च प्रत्यासत्त्या प्रापयितृपेक्षमेव। तच्च माणवकीयमात्मसमीपप्रापणं वैधमेव विवक्षितम्, पूर्वोत्तराऽङ्गकलापाम्नानसामर्थ्यात्। तदाह—विधिना आत्मसमीपं प्रापयतीति। तत्राऽऽचार्यकरणत्वाधिकरत्वमुपपादयति—उपनयनपूर्वकेणेति। 'माणवकमुपनयीत, तमध्यापयीते'त्यध्यापनार्थत्वमुपनयनस्याङ्

यते। ज्ञाने। तत्त्वं नयते। निश्चिनोतीत्यर्थः। कर्मकरानुपनयते। भृतिदानेन स्वसमीपं प्रापयतीत्यर्थः। विगणनमृणादेर्निर्यातनम्। करं विनयते। राज्ञे देयं भागं परिशोधयतीत्यर्थः। शतं विनयते, धर्मार्थं विनियुङ्क्ते इत्यर्थः। **२७१० कर्तृस्थे चाशरीरे कर्मणि १।३।३७॥** नियः कर्तृस्थे कर्मणि यदात्मनेपदं प्राप्तं तच्छरीरावयवभिन्न एव स्यात्। सूत्रे शरीरशब्देन तदवयवो लक्ष्यते। क्रोधं विनयते। अपगमयति। तत्फलस्य चित्तप्रसादस्य कर्तृगत्वात् 'स्वरितञितः—' (सू २१५८) इत्येव सिद्धे नियमार्थमिदम्। तेनेह न। गडुं विनयति। कथं तर्हि 'विगणय्य नयन्ति पौरुषम्' इति। कर्तृगामित्वाविवक्षायां भविष्यति। **२७११ वृत्तिसर्गतायनेषु क्रमः १।३।३८॥** वृत्तिरप्रतिबन्धः। ऋचि क्रमते बुद्धिः। न प्रतिहन्यते इत्यर्थः। सर्गः उत्साहः। अध्ययनाय क्रमते। उत्सहते। क्रमन्तेऽस्मिन्

गतम्, अध्यापनादाचार्यत्वं सम्पद्यते, 'उपनीय तु यः शिष्यं वेदमध्यापयेद्द्विजः। सकल्पं सरहस्यं च तमाचार्यं प्रचक्षते॥' इति स्मरणात्। तथा च आचार्यकरणमुपनयनसाध्यत्वादार्थिकमिति भावः। ज्ञान इति। 'उदाहियते' इति शेषः। निश्चिनोतीत्यर्थ इति। नयतिर्निश्चयार्थक इति भावः। भृतौ उदाहरति-कर्मकरानुपनयते इति। भृतिः-वेतनं, तदर्थं कर्म करोतीति कर्मकरः। 'कर्मणि भृतौ' इति टप्रत्ययः। कर्मण्युपपदे कृञः टः स्यात्कर्तरीति तदर्थः। उपपूर्वको णीञ् समीपप्रापणार्थकः, समीपप्रापणं च भृत्यर्थमिति कर्मकरशब्दसमभिव्याहारादुच्यते। फलितमाह-भृतिदानेनेति। ऋणादेरिति। आदिना करादिसंग्रहः। निर्यातनं प्रत्यर्पणादि। करं विनयते इति। राज्ञे देयो भागः करः, विपूर्वो णीञ् परिशोधनार्थकः। तदाह—राज्ञे देयं भागं परिशोधयतीति। परिगणयति ज्ञातुमित्यर्थः। व्यये उदाहरति—शतं विनयते धर्मार्थमिति। अत्र विपूर्वो णीञ् व्ययार्थकः। तदाह—विनियुङ्क्ते इत्यर्थ इति। कर्तृस्थे। नियः इति। कर्मकारके कर्तृस्थे सति णी धातोर्यदात्मनेपदं कर्तृगे फले णिच्त्वात् प्राप्तं, तत् शरीरावयवभिन्न एव सति कर्मकारके स्यात्। कर्मणः शरीरावयवत्वे तु कर्तृगेऽपि फले परस्मैपदमेवेत्यर्थः। ननु सूत्र शरीरग्रहणात् कथं शरीरावयवेत्युक्तमित्यत आह—सूत्रे इति। शरीरतादात्म्यापन्नस्यैव कर्तृतया शरीरस्य कर्तृस्थत्वं न सम्भवति। शरीरावयवानां तु समवायेन आधारतया तत्सम्भवतीति भावः। ननु क्रोधापगमस्य क्रोधविषयशत्रुगतानिष्टपरिहारफलकत्वात् णिच्त्वेऽप्यात्मनेपदाऽप्राप्तेस्तद्विधयेत्वात्कथमुक्तनियमार्थत्वमस्य सूत्रस्येत्यत आह—तत्फलस्येत्यादि। गडुं विनयतीति। कर्मणो गडोः शरीरावयवत्वान्नात्मनेपदमित्यर्थः। कथं तर्हीति। पौरुषस्य कर्मणः शरीरावयवभिन्नतया आत्मनेपदप्रसङ्गादिति भावः। कर्तृगामित्वेति। कर्तृस्थे कर्मणि नियः कर्तृगे फले णिच्त्वात् प्राप्तमात्मनेपदं शरीरावयवभिन्न एवेति नियम्यते, ननु विधीयते। अत्र तु फलस्य कर्तृगामित्वं सदपि न विवक्षितम् अतो नात्मनेपदमिति भावः। वृत्तिसर्ग।

शास्त्राणि । स्फीतानि भवन्तीत्यर्थः । २७१२ **उपपराभ्याम् १।३।३६** ॥ वृत्त्यादिष्वाभ्यामेव क्रमेर्न तूपसर्गान्तरपूर्वात् । उपक्रमते । पराक्रमते । नेह, संक्रामति । २७१३ **आङ उद्गमने १।३।४०** ॥ आक्रमते सूर्यः । उदयते इत्यर्थः । 'ज्योतिरुद्गमने इति वाच्यम्' (वा ६२१) । नेह । आक्रामति धूमो हर्म्यतलात् । २७१४ **वेः पादविहरणे १।३।४१** ॥ साधु विक्रमते वाजी । पादविहरणे किम् । विक्रामति सन्धिः । द्विधा भवति । स्फुटतीत्यर्थः । २७१५ **प्रोपाभ्यां समर्थाभ्याम् १।३।४२** ॥ समर्थौ तुल्यार्थौ । शकन्ध्वादित्वात् पररूपम् । प्रारम्भेऽनयोस्तुल्यार्थता । प्रक्रमते । उपक्रमते । समर्थाभ्याम् किम् । प्रक्रामति । गच्छतीत्यर्थः । उपक्रामति । आगच्छतीत्यर्थः । २७१६ **अनुपसर्गाद्वा १।३।४३** ॥ क्रामति – क्रमते । अप्राप्तविभाषेयम् । वृत्त्यादौ तु नित्यमेव । २७१७ **अपह्नवे ज्ञः १।३।४४** ॥ शतमपजानीते । अपलपतीत्यर्थः । २७१८ **अकर्मकाच्च १।३।४५**॥ सर्पिषो जानीते । सर्पिषोपायेन प्रवर्तते इत्यर्थः । २७१९ **सम्प्रतिभ्यामनाध्याने १।३।४६** ॥ शतं सञ्जानीते । अवेक्षत इत्यर्थः । शतं प्रतिजानीते ।

'आत्मनेपद'मिति शेषः । तायने उदाहरति–क्रमन्तेऽस्मिन्निति । तायनं वृद्धिः । **तदाह**—स्फीतानीति । उपपराभ्याम् । **'वृत्तिसर्गतायनेषु क्रमः' इत्यनुवर्तते । तेनैव सिद्धे नियमार्थमिदम् । तदाह**—'आभ्यामेव क्रमेरिति । **आत्मनेपदमिति शेषः । आङ उद्गमने । आङः परस्मादुद्गमनवृत्तेः क्रमः आत्मनेपदमित्यर्थः ।** आक्रमते सूर्य इति । **आङ्पूर्वः क्रमिरुद्गमनार्थकः । तदाह**—उदयते इत्यर्थ इति । **उपसर्गवशादिति भावः ।** वेः पादविहरणे । **पादविहरणं पादविक्षेपः । तद्वृत्तेर्विपूर्वात् क्रमेरात्मनेपदमित्यर्थः ।** साधु विक्रमते वाजीति । **सम्यक्पदानि विक्षिपतीत्यर्थः ।** प्रोपाभ्याम् । **'क्रम आत्मनेपद'मिति शेषः । समौ अर्थौ ययोरिति विग्रह इत्याह**—समर्थौ तुल्यार्थाविति । **सवर्णदीर्घमाशङ्क्य आह**—शकन्ध्वादिरयमिति । **ननु 'प्रक्रमते' इत्यत्र अतिशयितपदविक्षेपार्थप्रतीतेः, उपक्रमते इत्यत्र समीपे पदानि विक्षिपतीति प्रतीतेः कथमनयोस्तुल्यार्थकत्वमित्यत आह**—प्रारम्भेऽनयोस्तुल्यार्थतेति । **तथाच आरम्भार्थकाभ्यामिति फलितमिति भावः । अनुपसर्गाद्वा । 'क्रम आत्मनेपद'मिति शेषः ।** अप्राप्तविभाषेयमिति । **अनुपसर्गात् क्रमेः आत्मनेपदस्य कदाप्यप्राप्तेरिति भावः ।** वृत्त्यादाविति । **वृत्तिसर्गतायनेषु तु पूर्वविप्रतिषेधान्नित्यमेवेत्यर्थः । अपह्नवे ज्ञः । अपह्नवः अपलापः । तदाह**—ज्ञातोरात्मनेपदमित्यर्थः । **अकर्मकाच्च । 'ज्ञः आत्मनेपद'मिति शेषः ।** सर्पिषो जानीते इति । **अत्र ज्ञाधातुः प्रवृत्तौ वर्तते । 'ज्ञोऽविदर्थस्य करणे' इति तृतीयार्थे षष्ठी । तदाह**—सर्पिषोपायेन प्रवर्तते इति । **'अनुपसर्गात् ज्ञः' इति वक्ष्यमाणेनैव सिद्धे सोपसर्गार्थमिदम् । सर्पिषोऽनुजानीते ।** सम्प्रतिभ्यामनाध्याने । **'ज्ञः आत्मनेपद'मिति शेषः ।**

अङ्गीकरोतीत्यर्थः। अनाध्याने इति योगो विभज्यते। तत्सामर्थ्यात् 'अकर्मकाच्च' (सू २७१८) इति प्राप्तिरपि बाध्यते। मातरं मातुर्वा सञ्जानाति। कर्मणः शेषत्वविवक्षायां षष्ठी। २७२० **भासनोपसम्भाषाज्ञानयत्नविमत्युपमन्त्रणेषु वदः १।३।४७** ॥ उपसम्भाषोपमन्त्रणे धातोर्वाच्ये, इतरे प्रयोगोपाधयः। शास्त्रे वदते। भासमानो ब्रवीतीत्यर्थः। उपसम्भाषा उपसान्त्वनम्। भृत्यानुपवदते। सान्त्वयतीत्यर्थः। ज्ञाने-शास्त्रे वदते। यत्ने-क्षेत्रे वदते। विमतौ-क्षेत्रे विवदन्ते। उपमन्त्रणमुपच्छन्दनम्। उपवदते। प्रार्थयते इत्यर्थः। २७२१ **व्यक्तवाचां**

अवैक्षते इत्यर्थ इति। अकर्मकत्वाऽभावात् पूर्वेणाप्राप्तिरिति भावः। अनाध्याने किम्? मातरं सञ्जानाति। आध्यायतीत्यर्थः। उत्कण्ठापूर्वक स्मरणमाध्यानम्। ननु यदा आध्याने कर्मणः शेषत्वविवक्षया षष्ठीमाश्रित्य मातुः सञ्जानाति इति प्रयुज्यते, तदा सम्पूर्वो जानातिरयमकर्मक इति स्थितिः। तत्र 'सम्प्रतिभ्यामनाध्याने' इत्यात्मनेपदस्याऽप्रवृत्तावपि 'अकर्मकाच्च' इति सूत्रेणात्मनेपदं दुर्वारम्, तत्र अनाध्याने इत्यभावात्। सम्प्रतिभ्यामित्यत्र अनाध्यानग्रहणस्य मातरं सञ्जानातीति सकर्मके चरितार्थत्वादित्यत आह—अनाध्याने इति योगो विभज्यते इति। ततश्च 'सम्प्रतिभ्याम्' इत्येको योगः। सम्प्रतिपूर्वात् ज्ञः आत्मनेपदमित्यर्थः। 'अनाध्याने' इति योगान्तरम्। अनाध्याने सम्प्रतिभ्यामात्मनेपदमित्यर्थः। ततः किमित्यत आह—अकर्मकाच्चेति प्राप्तिरपि बाध्यते इति। ननु अनन्तरस्येति न्यायेन 'सम्प्रतिभ्या'मित्यस्यैव बाधो युक्त इत्यत आह—तत्सामर्थ्यादिति। एकसूत्रत्वेनैव सिद्धे अनाध्याने इति योगविभागाद्व्यवहितस्यापि बाध इत्यर्थः। ननु 'मातरं मातुर्वा सञ्जानाति' इत्यत्र मातुः कर्मत्वात् द्वितीयैव युक्तेरत्यत आह—कर्मणः शेषत्वविवक्षायां षष्ठीति। न चैवमपि 'अधीगर्थदयेशां कर्मणि' इति षष्ठ्येव स्यान्न तु द्वितीयेति वाच्यम्, तत्र शेष इत्यनुवर्त्य कर्मणः शेषत्वविवक्षायां षष्ठी, कर्मत्वविवक्षायां तु द्वितीयेत्यभ्युपगमात्। न चैवं सति 'षष्ठी शेषे' इत्यनेनैव सिद्धत्वात् 'अधीगर्थ' इति व्यर्थमिति वाच्यम्, 'मातुः स्मरण'मित्यादौ शेषषष्ठ्याः समासाऽभावार्थत्वादिति कारकाधिकारे प्रपञ्चितम्। भासनोपसम्भाषा। 'आत्मनेपद'मिति शेषः। इतरे इति। भासनज्ञानादय इत्यर्थः। प्रयोगोपाधय इति। इदं 'सम्माननोत्सञ्जन' इत्यत्र व्याख्यातं प्राक्। भासनं तु तत्तदाक्षेपेषु समाधानाय नवनवयुक्त्युल्लेखः। शास्त्रे वदते इति। विषयसप्तम्येषा। भासमान इति। नवनवयुक्तीरुल्लिखतीत्यर्थः। शास्त्रे वदते इति। विषयसप्तमी। व्यवहरतीत्यर्थः। व्यवहारश्च ज्ञानं विना न सम्भवतीति ज्ञानमार्थिकम्। ज्ञात्वा व्यवहरतीति फलितम्। क्षेत्रे विवदन्ते इति। विरुद्धं व्यवहरन्तीत्यर्थः। विरुद्धव्यवहारश्च वैमत्यमूलक इति विमतिरार्थिकी। उपवदते इति। उपपूर्वस्य वदेः प्रार्थनमर्थः। तदाह-प्रार्थयते इत्यर्थ इति। व्यक्तवाचाम्। व्यक्ताः अञ्जसभेदेन स्पष्टो-

समुच्चारणे १।३।४८॥ मनुष्यादीनां सम्भूयोच्चारणे वदेरात्मनेपदं स्यात्। सम्प्रवदन्ते ब्राह्मणाः। नेह–सम्प्रवदन्ति खगाः। २७२२ **अनोरकर्मकात्** १।३।४९॥ व्यक्तवाग्विषयादनुपूर्वादकर्मकाद्वदेरात्मनेपदं स्यात्। अनुवदते कठः कलापस्य। अकर्मकात् किम्। उक्तमनुवदति। व्यक्तवाचां किम्। अनुवदति वीणा। २७२३ **विभाषा विप्रलापे** १।३।५०॥ विरुद्धोक्तिरूपे व्यक्तवाचां समुच्चारणे उक्तं वा स्यात्। विप्रवदन्ते विप्रवदन्ति वा वैयाः। २७२४ **अवाद्ग्रः** १।३।५१॥ अवगिरते। 'गृणातिस्त्ववपूर्वो न प्रयुज्यत एव' इति भाष्यम्। २७२५ **समः प्रतिज्ञाने** १।३।५२॥ शब्दं नित्यं सङ्गिरते। प्रतिजानीते इत्यर्थः। प्रतिज्ञाने किम्। सङ्गिरति ग्रासम्। २७२६ **उदश्चरः सकर्मकात्** १।३।५३॥ धर्ममुच्चरते। उल्लङ्घ्य गच्छतीत्यर्थः। सकर्मकात् किम्। बाष्पमुच्चरति। उपरिष्टाद्गच्छतीत्यर्थः। २७२७ **समस्तृतीयायुक्तात्** १।३।५४॥ रथेन सञ्चरते। २७२८ **दाणश्च सा चेच्चतुर्थ्यर्थे** १।३।५५॥ सम्पूर्वाद्दाणस्तृतीयान्तेन युक्ता-

---

चारिताः वाचः शब्दा येषामिति विग्रहः। समित्येकीभावे। तदाह–मनुष्यादीनामिति। सम्प्रवदन्ते ब्राह्मणा इति। सम्भूयोच्चारयन्तीत्यर्थः। अनोरकर्मकात्। 'व्यक्तवाचा'मित्यनुवृत्तं विषयषष्ठ्यन्तमाश्रीयते। समुच्चारणे इति निवृत्तम्। तदाह—व्यक्तवाग्विषयादिति। मनुष्यकर्तृकादित्यर्थः। अनुवदते इति। अनुः सादृश्ये। 'तुल्यार्थैरतुलोपमाभ्याम्' इति षष्ठी। कठः कलापेन तुल्यं वदतीत्यर्थः। वस्तुतस्तु शेषषष्ठीत्येवोचितम्। 'तुल्यार्थैः' इत्यत्र 'अतुलोपमाभ्या'मिति पर्युदासेन अनव्ययानामेव तुल्यार्थानां ग्रहणात्। अन्यथा 'चन्द्र इव मुख'मित्यादावपि तृतीयाषष्ठ्योरापत्तेरित्यलम्। विभाषा विप्रलापे। 'व्यक्तवाचां समुच्चारणे' इत्यनुवर्तते। विरुद्धोक्तिर्विप्रलापः। तदाह–विरुद्धोक्तिरूपे इति। अवाद्ग्रः। 'आत्मनेपद'मिति शेषः। 'गॄ' इत्यस्य 'ग्र' इति पञ्चमी। 'प्रकृतिवदनुकरणमि'त्यस्यानित्यत्वात् 'ऋत इद्धातोः' इति न भवति। तदनित्यत्वे इदमेव मानम्। अवगिरत इति। शविकरणोऽयम्। 'अवगृणातीत्यस्याप्यात्मनेपदमाशङ्क्य आह—गृणातिस्त्विति। ५वस्त्र तुदादेरेव ग्रहणमिति भावः। समः प्रतिज्ञाने। गिरतेरात्मनेपदमित्यर्थः। प्रतिज्ञानम् अभ्युपगमः। सङ्गिरति ग्रासमिति। भक्षयतीत्यर्थः। उदश्चरः। उत्पूर्वाच्चरधातोः सकर्मकादात्मनेपदमित्यर्थः। समस्तृतीया। सकर्मकादिति निवृत्तम्। सम्पूर्वात् तृतीयान्तसमभिव्याहृताच्चरेरात्मनेपदमित्यर्थः। तृतीयायुक्तादिति किम्? रथिकाः सञ्चरन्ति। अत्र यद्यपि रथेनेत्यर्थाद्गम्यते, तथापि तृतीयान्तश्रवणाऽभावान्नात्मनेपदम्। एतदर्थमेवायोगग्रहणम्। अन्यथा 'तृतीययेत्येवावक्ष्यत्। सकर्मकादप्येतदात्मनेपदं भवति, अविशेषात्, अत एव 'तृतीयायुक्तादिति किम्? डमौ लोकौ सञ्चरसीमं चामुं च लोकम्' इति भाष्यं सङ्गच्छते। दाणश्च

दुक्तं स्यात्, सा च तृतीया चेच्चतुर्थ्यर्थे । दास्या संयच्छते । पूर्वसूत्रे समः इति षष्ठी । तेन सूत्र यमिदं व्यवहितेऽपि प्रवर्तते । रथेन समुदाचरते । दास्या सम्प्रयच्छते । २७२९ **उपाद्यमः स्वकरणे १।३।५६** ॥ स्वकरणं स्वीकारः । भार्यामुपयच्छते । २७३० **विभाषोपयमने १।२।१६** ॥ यमः सिच् किद्वा स्यादिवाहे । रामः सीतामुपायत-उपायंस्त वा । उदवोढेत्यर्थः । गन्धनाङ्गे उपयमे तु पूर्वविप्रतिषेधान्नित्यं कित्त्वम् । २७३१ **ज्ञाश्रुस्मृदृशां सनः १।३।५७** ॥ सन्नन्तानामेषां प्राग्वत् । धर्मं जिज्ञासते । शुश्रूषते । सुस्मूर्षते । दिदृक्षते । २७३२ **ना-**

सा । **समस्तृतीयायुक्तात्' इत्यनुवर्तते । तदाह**—सम्पूर्वादिति । उक्तं स्यादिति । **आत्मनेपदमित्यर्थः** । सा चेदिति । **तच्छब्देन तृतीया परामृश्यते । तदाह**—तृतीया चेदिति । दास्या संयच्छते इति । **'अभिव्यवहारे दाणः प्रयोगे चतुर्थ्यर्थे तृतीया वाच्या' इति तृतीया । ननु 'रथेन समुदाचरते' इत्यत्र 'समस्तृतीयायुक्तात्' इति पूर्वसूत्रस्य न प्रवृत्तिः । आङा व्यवहितत्वेन सम्पूर्वकत्वाभावात् 'तस्मादित्युत्तरस्य' इति परिभाषया सम इति पञ्चम्या चरेः अव्यवहितपरत्वाल्लाभात् । तथा 'दास्या सम्प्रयच्छते' इत्यत्रापि 'दाणश्च सा चेत्' इति कथं प्रवर्तते । प्रशब्देन व्यवधानादित्यत आह**—पूर्वसूत्रे समः इति षष्ठीति । **तथा च षष्ठ्या पौर्वापर्यमेव गम्यते । न त्वव्यवहितत्वमिति** भावः । **तेनेति । षष्ठ्याश्रयणेनेत्यर्थः । सूत्रद्वयमिति । 'समस्तृतीयायुक्तात्' इति पूर्वसूत्रस्थस्य षष्ठ्यन्तस्यैव 'समः' 'दाणश्च' इति सूत्रेऽप्यनुवृत्तेरिति भावः । उपाद्यमः । 'आत्मनेपद'मिति शेषः । ननु 'स्वं वस्त्रमुत्पादयता'त्यर्थे 'वस्त्रमुपयच्छती'त्यत्राप्यात्मनेपदं स्यादित्यत आह**—स्वकरणं स्वीकारः इति । **अस्वस्य सतः स्वत्वेन परिग्रहः स्वकरणशब्देन विवक्षित इत्यर्थः । ननु प्रत्ययस्तु वैकल्पिकः, 'समर्थानां प्रथमाद्वा' इत्युक्तेरिति भाष्ये स्पष्टम् । भार्यामुपयच्छते इति । अन्यदीयां कन्यां भार्यात्वेन परिगृह्णातीत्यर्थः । विभाषोपयमने । 'यमो गन्धने' इत्यतो यम इति 'हनः सिच्' इत्यतः सिजिति 'असंयोगात्' इत्यतः किदिति चानुवर्तते तदाह**—यमः सिच्किद्वा स्यादिवाहे इति । **उपयमशब्दो विवाहे वर्तते इति भावः । रामः सीतामुपायतेति । भार्यात्वेन स्वीकृतवानित्यर्थः । सिचः कित्त्वपक्षे 'अनुदात्तोपदेश' इति मकारलोपे 'हस्वादङ्गात्' इति सिचो लोपः । उदवोढेति । भार्यात्वेन परिग्रहः उद्वाहः । गन्धनाङ्गे उपयमे त्विति । हिंसापूर्वके विवाहे त्वित्यर्थः । राक्षसविवाहे त्विति यावत् । 'हत्वा भित्त्वा च शीर्षाणि रुदतीं रुदतो हरेत् । स राक्षसो विवाहः' इति स्मृतेः । नित्यं कित्त्वमिति । 'यमो गन्धने' इति पूर्वसूत्रेणेति शेषः । यदि गन्धनाङ्गकेऽप्युपयमने परत्वादियं विभाषा स्यात् तर्हि एषा प्राप्तविभाषा स्यात् । ततश्च 'न वेति विभाषा' इत्यत्र भाष्ये अप्राप्तविभाषासु अस्याः परिगणनं विरुध्येत । अतः पूर्वविप्रतिषेध आश्रयणीय इति** भावः । **ज्ञाश्रु । प्राग्वदिति । आत्मनेपदमित्यर्थः । यद्यपि 'अपह्नवे ज्ञः' अकर्मकाच्च,**

नोर्झः १।३।५८॥ पुत्रमनुजिज्ञासति । पूर्वसूत्रस्यैवायं निषेधः । 'अनन्तरस्य—' (प ६२) इति न्यायात् । तेनेह न । सर्पिषोऽनुजिज्ञासते । सर्पिषा प्रवर्तितुमिच्छतीत्यर्थः । 'पूर्ववत्सनः' (सू २७३४) इति तङ् । 'अकर्मकाच्च' (सू २७१८) इति केवलाद्विधानात् । **२७३३ प्रत्याङ्भ्यां श्रुवः १।३।५९॥** आभ्यां सन्नन्ताच्छ्रुव उक्तं न स्यात् । प्रतिशुश्रूषति । आशुश्रूषति । कर्मप्रवचनीयात्स्यादेव । देवदत्तं प्रति शुश्रूषते । 'शदेः शितः' (सू २३६२), 'ह्रियतेर्ह्रुङ्लिङोश्च' (सू २५३८) व्याख्यातम् । **२७३४ पूर्ववत्सनः १।३।६२॥** सनः पूर्वो यो धातुस्तेन तुल्यं सन्नन्तादप्यात्मनेपदं स्यात् । एदिधिषते । शिशयिषते । निविविक्षते । पूर्ववत् किम् । बुभूषति । 'शदेः—' (सू २३६२) इत्यादिसूत्रद्वये 'सनो' 'न'

'सम्प्रतिभ्यामनाध्याने' इति सूत्रैः 'अतिश्रुदृशिभ्यश्च' इति वार्तिकेन च ज्ञादिभ्यः आत्मनेपदे कृते 'पूर्ववत्सनः' इत्यात्मनेपदं सिद्धम् । तथाप्यपङ्क्तवाद्यभावेऽप्यात्मनेपदार्थं ज्ञाश्रुदृशीनामिह ग्रहणमिति मत्वोदाहरति—धर्मं जिज्ञासते इति । ज्ञातुमिच्छतीत्यर्थः । शुश्रूषते इति । 'अज्झनगमां सनि' इति दीर्घः । 'इको झल्' इति सनः कित्त्वम् । 'श्युकः किति' इति ह्नुणिनिषेधः । सुस्मूर्षते इति । स्मृधातोः सनि 'अज्झन' इति दीर्घे 'ह्रदोष्ठ्यपूर्वस्य' इत्युत्वे रपरत्वे 'हलि च' इति दीर्घः । नानोर्झः । अनुपूर्वात् ज्ञाधातोः सन्नन्तात् नात्मनेपदमित्यर्थः । पुत्रमनुजिज्ञासतीति । **अनुज्ञातुमिच्छतीत्यर्थः । ननु सर्पिषा प्रवर्तितुमिच्छतीत्यर्थे 'सर्पिषोऽनुजिज्ञासते' इत्यत्रापि 'अपङ्क्तवे ज्ञः' 'अकर्मकाच्च' इत्यात्मनेपदस्याप्यनेन निषेधे सति सन्नन्तात्परस्मैपदमेव स्यादित्यत आह**—पूर्वसूत्रस्यैवेति । एवं च 'सर्पिषोऽनुजिज्ञासते' इत्यत्र 'अकर्मकाच्च' इत्यात्मनेपदं 'निर्बाधमिति' भावः । ननु 'अकर्मकाच्च' इति ज्ञाधातोरात्मनेपदे सन्नन्तात्कथमात्मनेपदलाभ इत्यत आह—पूर्ववदिति । **केवलात् सन्विहीनात् ज्ञाधातोरात्मनेपदविधानात् सन्नन्तादपि तस्मात् 'पूर्ववत्सनः' इत्यात्मनेपदमित्यर्थः ।** प्रत्याङ्भ्यां श्रुवः । उक्तं नेति । **आत्मनेपदं नेत्यर्थः । प्रत्याङ्भ्यां हि उपसर्गाभ्यामेव गृह्यते, व्याख्यानात् । तदाह**—कर्मप्रवचनीयात्स्यादेवेति । **'आत्मनेपदमिति' शेषः** देवदत्तं प्रतीति । 'लक्षणेत्थम्भूत' इति प्रतिः कर्मप्रवचनीयः । पूर्ववत्सनः । **पूर्वेणैव पूर्ववत् । 'तेन तुल्य'मिति तृतीयान्तादिति । पूर्वशब्देन सन्प्रकृतिर्विवक्षिता । तदाह**—सनः पूर्वं इत्यादि । एदिधिषते इति । **सन्प्रकृतेरेधधातोरात्मनेपदित्वात्तत्प्रकृतिकसन्नन्तादात्मनेपदम् । 'नेर्विशः' इत्यात्मनेपदविधानात्तत्प्रकृतिकसन्नन्तादपि आत्मनेपदम् । ननु 'शदेः शितः' 'ह्रियतेर्ह्रुङ्लिङोश्च' इत्यात्मनेपदविधानात् शिशयिषति सुमूर्षति, इत्यत्रापि सन्नन्तादात्मनेपदं स्यादित्यत आह**—शदेरित्यादीति । आदिना 'ह्रियतेर्ह्रुङ्लिङोश्च' इत्यस्य ग्रहणम् । 'शदे'रित्यादिसूत्रद्वये 'पूर्ववत्सनः' इति 'नानोर्झः' इत्यतो नेति चानुवर्त्य शदेर्ह्रियतेश्च सन्नन्ताभ्यामात्मनेपदमिति व्याख्येयमित्यर्थः । नन्वेवं

इत्यनुवर्त्त वाक्यभेदेन व्याख्येयम्। तेनेह न। शिशत्सति। मुमूर्षति। 'आम्प्रत्ययवत्कृञोऽनुप्रयोगस्य' (सू २२४०) एधाञ्चक्रे। २७३५ **प्रोपाभ्यां युजेरयज्ञपात्रेषु १।३।६४॥** प्रयुङ्क्ते। उपयुङ्क्ते। 'स्वराद्यन्तोपसर्गादिति वक्तव्यम्' (वा ९३९)। उद्युङ्क्ते। निर्युङ्क्ते। अयज्ञपात्रेषु किम्। द्वन्द्वं न्यञ्चि पात्राणि प्रयुनक्ति। २७३६ **समः क्ष्णुवः १।३।६५॥** संक्ष्णुते शस्त्रम्॥ २७३७ **भुजोऽनवने १।३।६६॥** ओदनं भुङ्क्ते। अभ्यवहरतीत्यर्थः। 'बुभुजे पृथिवीपालः पृथिवीमेव केवलाम्।' 'वृद्धो जनो दुःखशतानि भुङ्क्ते'। इह उपभोगो भुजेरर्थः। अनवने किम्। महीं भुनक्ति। २७३८ **णेरणौ यत्कर्म णौ चेत्स कर्ताऽनाध्याने १।३।६७॥** ण्यन्तादात्मनेपदं स्यादणौ या क्रिया सैव चेण्ण्यन्ते-

---

सति शीयते म्रियते इत्यादावात्मनेपदं न लभ्येतेत्यत आह—वाक्यभेदेनेति। 'शदेः शितः, म्रियतेर्लुङ्लिङोः' इति एकं वाक्यम्। शिद्भाविनः शदेरात्मनेपदं स्यात्, मृङो लुङ्लिङ्प्रकृतिभूतात्, शित्प्रकृतिभूताच्चात्मनेपदं स्यात् नान्यत्रेत्यर्थः। तेन शीयते म्रियते ममारेत्यादि सिध्यति। 'सनो नेत्यपरं वाक्यम्। शदेः म्रियतेश्च सन्नन्तान्नात्मनेपदमित्यपरम्। तेन शिशत्सति, मुमूर्षति इत्यादौ नात्मनेपदमित्यर्थः। प्रोपाभ्यां। 'आत्मनेपद'मिति शेषः। स्वरेति। स्वरौ अचौ आद्यन्तौ यस्य सः स्वराद्यन्तः। तथाभूतोपसर्गात्परत्व एव युजेरात्मनेपदमित्यर्थः। द्वन्द्वमिति। द्वन्द्वं द्विशः न्यञ्चि अधोविलानीत्यर्थः। समः क्ष्णुवः। 'आत्मनेपदम्' इति शेषः। 'समो गम्यृच्छिभ्याम्' इत्यत्रैव 'समो गम्यृच्छिक्ष्णुवः' इति न सूत्रितम्, तथा सति अकर्मकादित्यनुवृत्त्या सकर्मकात्र स्यात्। तत्सूचयन्नुदाहरति—संक्ष्णुते शस्त्रमिति। तीक्ष्णीकरोतीत्यर्थः। भुजोऽनवने। अवनं रक्षणम्। ततोऽन्यत्र भुजेरात्मनेपदमित्यर्थः। ननु 'भुज पालनाऽभ्यवहारयोः' इति धातुपाठे स्थितम्। तत्र 'बुभुजे पृथिवीपालः पृथिवीम्' इत्यत्र न पालनमर्थः। तथा सति 'अनवने' इति पर्युदासादात्मनेपदायोगात्। नाप्यभ्यवहरणम्, असम्भवात्। नहि पृथिव्या अभ्यवहरणं सम्भवति। तथा 'वृद्धो जनो दुःखशतानि भुङ्क्ते' इत्यपि न युज्यते, दुःखशतानां पालनस्य अभ्यवहार्यस्य चाऽसम्भवात्। तत्राह—इह उपभोगो भुजेरर्थः इति। धातूनामनेकार्थकत्वादिति भावः। महीं भुनक्तीति। रक्षतीत्यर्थः। अत्र रौधादिकस्यैव 'भुज पालनाभ्यवहारयोः' इत्यस्य ग्रहणम्। ननु 'भुजो कौटिल्ये' इति तौदादिकस्याऽपीति भाष्यम्। भुजति वासः। कुटिलीभवतीत्यर्थः। णेरणौ। इह चत्वार्यवान्तरवाक्यानि। 'णेरिति प्रथमं वाक्यम्। प्रत्ययग्रहणपरिभाषया णेरिति तदन्तग्रहणम्। आत्मनेपदमित्यधिकृतम्। तदाह—ण्यन्तादात्मनेपदं स्यादिति। 'अणौ यत् कर्म णौ चे'दिति द्वितीयं वाक्यम्। 'कर्तरि कर्मव्यतिहारे' इतिवत्कर्मशब्दोऽत्र क्रियापरः। यत्तदोर्नित्यसम्बन्धात् तदिति लभ्यते। तथा च अणौ या क्रिया सा ण्यन्ते चेदिति लभ्यते। एवं सति पचति पाचयतीत्यादौ सर्वत्र अणौ क्रियायाः

नोच्येत, अणौ यत्कर्मकारकं स चेण्णौ कर्ता स्याच्च त्वाध्याने। 'णिचश्च' (सू २५६४) इति सिद्धेऽकर्त्रभिप्रायार्थमिदम्। कर्त्रभिप्राये तु 'विभाषोपपदेन—' (सू २७४४) इति विकल्पे 'अणावकर्मकात्—' (सू २७५४) इति परस्मैपदे च परत्वात्प्राप्ते पूर्वविप्रतिषेधेनेदमेवेष्यते। कर्तृस्थभावकाः कर्तृस्थक्रियाश्चोदा-

ण्यन्ते अवश्यं सत्त्वाद्वाक्यमिदमनर्थकम्। तस्मात् अणौ या क्रिया सैव ण्यन्ते चेदित्येवकारो लभ्यते। ततश्च द्वितीयवाक्यस्य फलितमाह—अणौ या क्रिया सैव चेण्यन्ते नोच्यते इति। 'स कर्ते'ति तृतीयं वाक्यम्। अत्र 'अणौ यत् कर्म णौ चे'त्यनुवर्तते। कर्मशब्दोऽत्र कारकविशेषपरः। शब्दाधिकाराश्रयणात्। तदेतदाह—अणौ यत्कर्मकारकं स चेण्णौ कर्ता स्यादिति। अत्र तच्छब्दस्य विधेयसमर्पककर्तृशब्दानुसारेण 'पुँल्लिङ्गता ज्ञेया, 'लैङ्गं हि यत्सा प्रकृतिर्जलस्य' इतिवत्। अथ 'अनाध्याने' इति चतुर्थं वाक्यं व्याचष्टे—न त्वाध्याने इति। आध्यानमुत्कण्ठापूर्वकं स्मरणम्। तत्र नात्मनेपदमिति प्रसज्यप्रतिषेधोऽयमिति मन्यते। वस्तुनस्तु आध्याने आत्मनेपदं नेत्यर्थः। श्रयणे भवतीत्यत्र नञोऽन्वितत्वेन असामर्थ्यादाध्यानशब्देन समासाऽसम्भवात् पर्युदास एवायम्। 'न त्वाध्याने' इति मूलं तु फलितार्थकथनपरमेव। तथा च आध्यानभिन्नेऽर्थे विद्यमानात् ण्यन्तादात्मनेपदं स्यादित्येवं प्रथमवाक्य एव आध्याने इत्यस्यान्वयात् त्रीण्येवाऽत्रावान्तरवाक्यानीति युक्तम्। 'वाक्यत्रय'मित्येव च भाष्ये दृश्यते। ननु 'णिचश्च' इति सिद्धे किमर्थमिदं सूत्रमित्यत आह—णिचश्चेति। परागामिन्यपि फले आत्मनेपदार्थमित्यर्थः। स्यादेतत् 'विभाषोपपदेन प्रतीयमाने' इति सूत्रं वक्ष्यते। कर्तृगामिनि क्रियाफले यदात्मनेपदं विहितं, तत् उपपदेन क्रियाफलस्य कर्तृगामित्वे गम्ये वा स्यादिति तदर्थः। 'स्वं यज्ञं यजति यजते वे'त्यादुदाहरणम्। 'णेरणौ' इत्यस्य तु दर्शयते भव इत्यनुपदमेव उदाहरणं वक्ष्यते इति स्थितिः। तत्र 'दर्शयते भवः स्वयमेवे'त्यत्र फलस्य कर्तृगामित्वविवक्षार्थं 'णेरणा'विति नित्यमात्मनेपदमिष्यते। तत्र परत्वात् 'विभाषोपपदेन' इति विकल्पः स्यात्, 'णेरणौ' इत्यस्य फले आत्मगामित्वगमकोपपदाऽभावे सावकाशत्वात्। किञ्च 'अणावकर्मकाच्चित्तवत्कर्तृकात्' इति वक्ष्यते। अण्यन्ते यो धातुरकर्मकः चित्तवत्कर्तृकश्च तस्मात् ण्यन्तात् परस्मैपदं स्यादिति तदर्थः। शेते कृष्णः। तं गोपी शाययतीत्युदाहरणम्। णेरणावित्यस्य तु दर्शयते भव इत्युदाहरणं विषय इति स्थितिः। तत्र लूञ्धातोः लुनाति केदारं देवदत्तः इत्यत्र चित्तवत्कर्तृकत्वात्, लूयते केदारः इति कर्मकर्तरि, कर्मणः केदारस्य कर्तृत्वेन विवक्षिततया अकर्मकत्वाच्च 'लावयते केदार' इति ण्यन्तात् 'णेरणौ' इत्यात्मनेपदं बाधित्वा परत्वात् 'अणावकर्मकात्' इति परस्मैपदमेव स्यात्। णेरणावित्यस्य दर्शयते भवः इत्यत्र सावकाशत्वादित्यत आह—कर्त्रभिप्राये तिति। पूर्वविप्रतिषेधेनेति। पूर्वविप्रतिषेधाश्रयणे 'राजा दर्शयते' इति भाष्यप्रयोगो मानम्,

हरणम्। तथा हि—पश्यन्ति भवं भक्ताः। चाक्षुषज्ञानविषयं कुर्वन्तीत्यर्थः। प्रेरणांशत्यागे पश्यति भवः। विषयो भवतीत्यर्थः। ततो हेतुमण्णिच्। दर्शयन्ति

अन्यथा तत्र 'अणावकर्मकात्' इति परस्मैपदापत्तेः। दर्शनविषयो भवतीत्यर्थं पश्यति भवः इत्यत्र दृशेरणावकर्मकत्वात् चित्तवत्कर्तृकत्वाच्च। 'विभाषोपपदेन' इति विकल्पबाधविषये पूर्वविप्रतिषेधाश्रयणे तु व्याख्यानमेव शरणम्। अन्ये तु 'दर्शयते राजा' इति भाष्यप्रयोगः फलस्य परगामित्वविषयो भविष्यति। एवं च कर्तृगामिनि क्रियाफले परत्वादणावकर्मकादित्यस्य प्रवृत्तौ न किञ्चिद्बाधकमिति पूर्वविप्रतिषेधाश्रयणं चिन्त्यमित्याहुः। तच्चिन्त्यम्, 'अणावकर्मका'दित्यस्य परगामिन्यपि फले परत्वात् प्रवृत्तेर्दुर्वारत्वात्। न ह्यणावकर्मकादित्यत्र कर्त्रभिप्राय इत्यस्ति। 'त्वरितञ्जितः कर्त्रभिप्राये' इत्यस्य बहुव्यवहितत्वादिति शब्दरत्ने प्रपञ्चितम्। ननु दर्शनविषयो भवतीत्यर्थं 'दर्शयते भवः' इत्यत्र वस्तुतो दर्शनकर्मीभूतस्यैव भवस्य कर्तृत्वविवक्षायां तस्य 'कर्मवत्कर्मणा' इति कर्मवद्भावात् 'भावकर्मणोः' इत्यात्मनेपदसिद्धेः 'णेरणौ' इति सूत्रं व्यर्थमित्यत आह—कर्तृस्थेति। कर्तृस्थः भावो येषां ते कर्तृस्थभावकाः, कर्तृस्था क्रिया येषां ते कर्तृस्थक्रियाः, एवंविधा धातव इह सूत्रे उदाहरणम्। 'कर्मवत्कर्मणा' इत्यस्य तु कर्मस्थभावकाः कर्मस्थक्रियाश्चोदाहरणमिति प्रकृतसूत्रे 'कर्मवत्कर्मणा' इति सूत्रे च भाष्ये स्पष्टम्। अतो विषयभेदात् 'कर्मवत् कर्मणा' इत्यनेन 'णेरणौ' इत्यस्य न गतार्थतेति भावः। 'अपरिस्पन्दनसाधनसाध्यो धात्वर्थो भावः। यथा दर्शनश्रवणादिः। सपरिस्पन्दनसाधनसाध्यो धात्वर्थः क्रिया'। यथा पाकादिः। यद्यपि दर्शने चक्षुरुन्मीलनादिरूपं स्पन्दनमस्ति। तथापि तद्विशिष्टहस्तपादादिचेष्टैवात्र स्पन्दनमित्यविरोधः। तत्र कर्तृस्थभावकमुदाहरति—पश्यन्ति भवं भक्ताः इति। सकर्मकेषु धातुषु, फलव्यापारयोर्धातुर्वर्तते। यथा पचेर्विक्लित्त्यनुकूलो व्यापारः। तत्र विक्लित्तिः फलम्। तदनुकूलोऽधिश्रयणादिर्व्यापारः। धातूपात्तव्यापाराश्रयः कर्ता देवदत्तादिः। व्यापारव्यधिकरणधातूपात्तफलाश्रयभूतं कर्म। यथा तण्डुलान् पचतीत्यत्र विक्लित्त्याश्रयास्तण्डुला इति स्थितिः। प्रकृते च दृशेश्चाक्षुषज्ञानानुकूलव्यापारार्थकत्वे सकर्मकत्वानुपपत्तिः, फलस्य चाक्षुषज्ञानस्य तदनुकूलप्रयत्नादेश्च समानाधिकरणत्वात्। अतो दृशेश्चाक्षुषज्ञानविषयत्वापर्यनुकूलव्यापारोऽर्थः। तत्र ज्ञानविषयत्वापत्तिः फलम्। तदनुकूलः प्रयत्नादिव्यापारो देवदत्तनिष्ठः। एवञ्च प्रयत्नादिव्यापारव्यधिकरणचाक्षुषज्ञानविषयत्वरूपफलाश्रयो घटादिः कर्मेति युज्यते। तदेतदाह—चाक्षुषज्ञानविषयं कुर्वन्तीत्यर्थ इति। प्रेरणेति। यदा चाक्षुषज्ञानविषयत्वापत्तिरेव दृशेरर्थो विवक्षितः। न तु तदनुकूलव्यापारः कृञ्धातुगम्यः प्रेषणांशः। तदा पश्यति भवः इत्यस्य चाक्षुषज्ञानविषयः सम्पद्यते इत्यर्थः। सौकर्यातिशयविवक्षया अनुकूलव्यापारांऽशस्य अविवक्षा बोध्या। तथा च चाक्षुषज्ञानविषयत्वापत्तिरेव दृश्यर्थत्वात्तदाश्रयस्य भवस्य कर्तृत्वमेव। तदाह—विषयो भव-

भवं भक्ताः। पश्यन्तीत्यर्थः। पुनर्ण्यर्थस्याविवक्षायां दर्शयते भवः। इह प्रथम-तृतीययोरवस्थयोर्द्वितीयचतुर्थ्योश्च तुल्योऽर्थः। तत्र तृतीयकक्ष्यायां न तङ्। क्रिया-

तीत्यर्थ इति। लक्षणया चाक्षुषज्ञानविषयो भवतीत्यर्थ इत्यर्थः। न चात्र भवस्य वस्तुतो दर्शनकर्मणः इह कर्तृत्वात् 'कर्मवत्कर्मणा तुल्यक्रियः' इति कर्मवत्त्वाद्यगादिकमेव स्याच्च तु शबादीति शङ्क्यम्, 'कर्मवत्कर्मणा' इत्यस्य कर्मस्थभावकेषु कर्मस्थक्रियेषु च प्रवृत्तेः। अतः कर्मकर्तर्यपि शबादिकमेवेति भावः। तत इति। कृष्धातुगम्यं प्रेषणांशं विहाय चाक्षुषज्ञानविषयत्वापत्तिवृत्तेर्हशेर्हेतुमण्णिजित्यर्थः। दर्शयन्ति भवं भक्ता इति। चाक्षुषज्ञानविषयत्वमापादयन्तीति णिजन्तस्य फलितोऽर्थः। तदाह—पश्यन्तीत्यर्थ इति। चाक्षुषज्ञानविषयं कुर्वन्तीत्यर्थः। पुनरिति। चाक्षुषज्ञानविषयत्वमापादयन्तीत्यर्थके 'दर्शयन्ति भवं भक्ता' इत्युक्तोदाहरणे णिजर्थस्य आपादनांशस्य अविवक्षायां प्रकृतसूत्रेणात्मनेपदे सति 'दर्शयते भव' इत्युदाहरणमित्यर्थः। अत्र ण्यन्तस्य प्रेरणारहितेऽर्थे लक्षणा। 'गङ्गायां घोष' इत्यत्र टाप इव णिचः स्थितिः। चुरादेराकृतिगणत्वात् स्वार्थिको णिजित्यन्ये। इहेति। अवस्था पदविशेषात्मकावयवसन्निवेशविशेषः। प्रथमा च तृतीया च प्रथमतृतीये। तयोरवस्थयोरिति विग्रहः। 'सर्वनाम्नो वृत्तिमात्रे' इति प्रथमाशब्दस्य पुंवत्वम्। पश्यन्ति भवं भक्ता इति प्रथमावस्था। पदविशेषसन्दर्भ इति यावत्। अवस्थैव कक्ष्येति व्यवहरिष्यते मूले। कक्षया हि राजधान्यादौ जनविशेषसङ्घातनिवासात्मिका अनन्तरस्थानप्रापिका। तद्यथा रामायणे—'आ पञ्चमायाः कक्षयायाः नैनं कश्चिदवारयत्' इत्यादि। इदं च प्रथमवाक्यं, प्रेरणांशत्यागे पश्यति भव इति द्वितीयवाक्यस्य उपपादकम्। चाक्षुषज्ञानविषयत्वापादाने दृश्यर्थं प्रेरणांशत्यागस्य प्रेरणाविशिष्टार्थकदृशिघटितप्रथमवाक्याऽभावे असङ्गमात्। प्रेरणांशत्यागे पश्यति भव इति द्वितीया कक्ष्या तु दर्शनविषयत्वापत्तिमात्रार्थकाद्धेतुमण्णिचि दर्शयन्ति भवं भक्ता इति तृतीयवाक्यस्य, 'पश्यन्ति भवं भक्ता' इति प्रथमवाक्यसमानार्थकस्य उपपादिका, चाक्षुषज्ञानविषयत्वापादनानुकूलव्यापारार्थकृत्तेर्हशेर्हेतुमण्णिचि चाक्षुषज्ञानविषयत्वापत्त्यनुकूलव्यापारान्तरस्यापि प्रवेशापत्तेः। तृतीयं वाक्यं त्विदं दर्शयन्तीति, ण्यर्थस्याविवक्षायां दर्शयते भवः इति चतुर्थवाक्यस्य दर्शनविषयो भवतीति द्वितीयवाक्यसमानार्थकस्य ण्यन्तघटितस्योपपादकमिति स्पष्टमेव। तथा च प्रथमतृतीययोः कक्ष्ययोः पश्यन्ति भवं भक्ताः, दर्शयन्ति भवं भक्ताः इत्यनयोः, तथा पश्यति भवः, दर्शयते भवः इति द्वितीयचतुर्थ्योः कक्ष्ययोश्च तुल्योऽर्थ इत्यर्थः। तत्र प्रथमद्वितीययोः कक्ष्ययोः दृशेर्ण्यन्तत्वाभावादेव तङो न प्रसक्तिरिति मत्वा आह—तत्र तृतीयकक्ष्यायां न तङिति। कुत इत्यत आह—क्रियासाम्येऽपीति। 'दर्शयन्ति भवं भक्ता' इति तृतीयकक्ष्यायाः, 'पश्यन्ति भवं भक्ताः' इति प्रथमकक्ष्यासमानार्थकतया 'अजौ या क्रिया सैव चेण्यन्तेनोच्यतेऽस्यंशस्य सत्त्वेऽपि प्रथमकक्ष्यायामणौ कर्मकारकस्य भवस्य 'दर्शयन्ति भवं भक्ता' इति तृतीयकक्ष्यायां

साम्येऽप्यणौ कर्मकारकस्य णौ कर्तृत्वाभावात्। चतुर्थ्यां तु तङ्। द्वितीयामादाय क्रियासाम्यात्। प्रथमायां कर्मणो भवस्येह कर्तृत्वाच्च। एवमारोहयते हस्तीत्यप्युदाहरणम्। आरोहन्ति हस्तिनं हस्तिपकाः। न्यग्भावयन्तीत्यर्थः। तत आरोहति हस्ती। न्यग्भवतीत्यर्थः। ततो णिच् आरोहयन्ति। आरोहन्तीत्यर्थः॥ तत आरोहयते। न्यग्भवतीत्यर्थः। यद्वा पश्यन्त्यारोहन्तीति प्रथमकक्ष्या प्राग्वत्।

णौ कर्तृत्वाऽभावादित्यर्थः। एवं चतुर्थकक्ष्योपपादिका तृतीयकक्षयैषा प्रत्युदाहरणं चेत्युक्तं भवति। अणौ या क्रिया सैव चेण्यन्तेनोच्येतेत्यंशस्य तु अध्यारोपितप्रेरणपक्षे द्वितीयकक्ष्यायां न तङिति फलं वक्ष्यते। चतुर्थकक्ष्या तु प्रकृतसूत्रस्योदाहरणमित्याह—चतुर्थ्यां तु तङिति। 'णेरणौ' इति प्रकृतसूत्रेणेति शेषः। तदेवोपपादयति—द्वितीयामादायेति। 'पश्यति भव' इति द्वितीयकक्ष्यायां या चाक्षुषज्ञानविषयत्वापत्तिरूपा क्रिया तस्या एव 'दर्शयते भव' इति चतुर्थकक्ष्यायां ण्यन्तदृश्यर्थत्वादित्यर्थः। अनेन 'अणौ या क्रिया सैव चेण्यन्तेनोच्येते'त्यंश उपपादितः। अथ 'अणौ यत्कर्मकारकं णौ स चेत्कर्ता स्यादित्यंशमुपपादयति—प्रथमायामिति। 'पश्यन्ति भवं भक्ता' इति प्रथमकक्ष्यायाम् अण्यन्तदृशिकर्मणो भवस्य 'दर्शयते भव' इति चतुर्थकक्ष्यायां ण्यन्तदृशिकर्तृत्वाच्चेत्यर्थः। अथ कर्तृस्थक्रियाधातुमुदाहरति—एवमारोहयते हस्तीत्यप्युदाहरणमिति। तत्र प्रथमकक्ष्यामाह—आरोहन्ति हस्तिनं हस्तिपकाः इति। हस्तिनं पान्तीति हस्तिपाः। त एव हस्तिपकाः। स्वार्थे कः। उपरिभागाक्रमणानुकूलव्यापारो रुहेरर्थः। तत्र प्रासादमारोहतीत्यादौ उपरिभागाक्रमणानुकूलव्यापारः सोपानगमनादिः। इह तु उच्चस्थ हस्तिनो न्यग्भावनमेव उपरिभागाक्रमणानुकूलो व्यापारो विवक्षितः। तच्च नीचीकरणम्। तदाह—न्यग्भावयन्तीति। अत्र उपरिभागाक्रमणानुकूलन्यग्भवनानुकूलोऽङ्कुशपातादिः व्यापारः। उपरिभागाक्रमणानुकूलन्यग्भवनं फलम्। तदाश्रयत्वाद्धस्ती कर्म। तादृशव्यापाराश्रयत्वाद्धस्तिपकाः कर्तारः। अथ द्वितीयकक्ष्यामाह—तत इति। प्रेरणांशपरित्यागे सति उपरिभागाक्रमणानुकूलन्यग्भवनार्थकाल्लटि आरोहति हस्तीति न्यग्भवतीत्यर्थः। प्रेषणांऽशपरित्यागे फलितमाह—न्यग्भवतीत्यर्थः इति। अथ तृतीयकक्ष्यामाह—ततो णिजिति। प्रेषणांऽशं परित्यज्य न्यग्भवनार्थकत्वमाश्रितात् धातोः प्रेषणविवक्षायां हेतुमण्णिजिति भावः। आरोहयन्तीति। 'हस्तिनं हस्तिपका' इति शेषः। प्रेष्यांशनिवृत्तौ णिजन्तस्य फलितमर्थमाह—आरोहन्तीत्यर्थ इति। आक्रमणाय हस्तिनं न्यग्भावयन्तीति यावत्। चतुर्थकक्ष्यामाह—ततः इति। अविवक्षितप्रेषणात् ण्यन्तात् प्रकृतसूत्रेणात्मनेपदे आरोहयते इति रूपमित्यर्थः। प्रेषणांशत्यागे सति ण्यन्तस्य फलितमर्थमाह—न्यग्भवतीत्यर्थः इति। तदेवं निवृत्तप्रेषणाद्धातोः प्राकृतेऽर्थे णिजिष्यते इति पक्षमाश्रित्योदाहृतम्। इदानीमध्यारोपितप्रेषणपक्षमाश्रित्य आह—यद्वेति। पश्य-

ततः कर्मण एव हेतुत्वारोपाण्णिच्। दर्शयति भवः। आरोहयति हस्ती। पश्यत आरोहतश्च, प्रेरयतीत्यर्थः। ततो णिज्भ्यां तत्प्रकृतिभ्यां च उपात्तयोर्द्वयोरपि प्रेषणयोस्त्यागे, दर्शयते आरोहयते इत्युदाहरणम्। अर्थः प्राग्वत्। अस्मिन्पक्षे द्वितीयकक्ष्यायां न तद्। समानक्रियात्वाभावाण्णिजर्थस्याधिक्यात्। अनाध्याने किम्। स्मरति वनगुल्मं कोकिलः। स्मरयति वनगुल्मः। उत्कण्ठापूर्वकस्मृतौ

न्तीति। पश्यन्ति भवं भक्ता इति, आरोहन्ति हस्तिनं हस्तिपका इति च, प्रथमकक्ष्यया पूर्ववद्व्याख्येयेत्यर्थः। द्वितीयकक्ष्यामाह—ततः कर्मणः इति। हशेः रुहेश्च प्रथमकक्ष्यायां कर्मीभूतस्य भवस्य हस्तिनश्च प्रयोजककर्तृत्वरूपहेतुत्वारोपाद्धेतुमण्णिजित्यर्थः। दर्शयति भवः इति। 'भक्तान्' निति शेषः। तदाह—पश्यत आरोहतश्च प्रेरयतीत्यर्थः इति। चाक्षुषज्ञानविषयत्वमापादयतो भक्तान् भवः प्रेरयति, न्यग्भावयतो हस्तिपान् हस्ती प्रेरयतीत्यर्थः। उभयत्र हेतुमण्णिच्। तत्र प्रकृतिभ्यां हशिरुहिभ्यामेकैकं प्रेरणम्। णिचा तु तद्विषयकमेकैकं प्रेरणान्तरं प्रतीयते इति स्थितिः। चतुर्थकक्ष्यामाह—ततो णिज्भ्यामिति। हेतुमण्णिज्भ्यां तत्प्रकृतिभूतहशिरुहिभ्यां च उपात्तयोः प्रेरणयोस्त्यागे सति चाक्षुषज्ञानविषयो भवति भव इति, न्यग्भवति हस्तीति चार्थः पर्यवस्यति। तत्र प्रकृतसूत्रेणात्मनेपदे दर्शयते भवः, आरोहयते हस्तीति च सिद्धमित्यर्थः। पश्यन्ति भवं भक्ता इति, आरोहन्ति हस्तिनं हस्तिपका इति च प्रथमकक्ष्यायां कर्मणो भवस्य हस्तिनश्च तृतीयकक्ष्यायां कर्तृत्वात्, प्रथमकक्ष्यायां अणौ या क्रिया तस्या एवाऽत्र तृतीयकक्ष्यायां सत्त्वाच्चेति तृतीयकक्ष्यायामुदाहरणे सूत्रप्रवृत्तिरुपपाद्या। नच प्रथमकक्ष्यायां चाक्षुषज्ञानविषयं कुर्वन्तीति न्यग्भावयन्तीति प्रकृत्युपात्तस्य प्रेषणांशस्य तृतीयकक्ष्यायां त्यागादणौ या क्रिया सैव चेण्यन्तेनोच्यतेत्यंशस्य कथं प्रवृत्तिरिति वाच्यम्, 'सैव चेण्यन्तेने'त्यत्र आश्रित्यमात्रं ण्यवच्छिद्यते, नतु न्यूनत्वमपि इत्यदोषात्। ननु द्वितीयकक्ष्यायामेव कुतो न तच्छिष्यत आह—अस्मिन्पक्षे द्वितीयेति। कुत इत्यत आह—समानक्रियात्वाभावादिति। द्वितीयकक्ष्यायां अणौ या क्रिया सैव चेण्यन्तेनोच्यतेत्यंशस्याऽभावादिति यावत्। तदेवोपपादयति—णिजर्थस्येति। णेरिति किम्? पश्यत्यारोहतीति निवृत्तप्रेषणान्मा भूत्। स्मरति वनगुल्मं कोकिल इति। स्मृतिविषयत्वमापादयतीत्यर्थः। पक्षद्वयेऽप्येषा प्रथमकक्ष्या द्वितीयतृतीयकक्ष्ययोरप्युपलक्षणम्। तत्र निवृत्तप्रेषणपक्षे 'स्मरति वनगुल्मं' इति द्वितीयकक्ष्या। स्मृतिविषयो भवतीत्यर्थः। 'स्मरयति वनगुल्मं कोकिल' इति तृतीयकक्ष्या। स्मृतिविषयत्वमापादयतीत्यर्थः। अध्यारोपितप्रेषणपक्षे तु 'स्मरयति वनगुल्मः कोकिल'मिति द्वितीयकक्ष्या। स्मरन्तं प्रेरयतीत्यर्थः। स्मरयति वनगुल्म इति। प्रत्युदाहरणमिदम्। निवृत्तप्रेषणपक्षे चतुर्थकक्ष्यैषा। अध्यारोपितप्रेषणपक्षे तु तृतीयकक्ष्येति बोध्यम्। 'स्मृ आध्याने' इति घाटादिकत्वेन मित्त्वाद्ध्रस्वः। विस्तरस्त्वत्र

विषयो भवतीत्यर्थः। 'भीस्म्योर्हेतुभये' (सू २५६४)। व्याख्यातम्। २७३६ **गृधिवञ्च्योः प्रलम्भने १।३।६६॥** प्रतारणेऽर्थे ण्यन्ताभ्यामाभ्यां प्राग्वत्। माणवकं गर्धयते, वञ्चयते वा। प्रलम्भने किम्। श्वानं गर्धयति। अभिकाङ्क्षामस्योत्पादयतीत्यर्थः। अहिं वञ्चयति। वर्जयतीत्यर्थः। 'लियः संमाननशालिनीकरणयोश्च' (सू २५९२)। व्याख्यातम्। २७४० **मिथ्योपपदात्कृञोऽभ्यासे १।३।७१॥** णेः इत्येव। पदं मिथ्या कारयते। स्वरादिदुष्टमसकृदुच्चारयतीत्यर्थः। मिथ्योपपदात् किम्। पदं सुष्ठु कारयति। अभ्यासे किम्। सकृत्पदं मिथ्या कारयति। 'स्वरितञितः कर्त्रभिप्राये क्रियाफले' (सू २१५८)। यजते। सुनुते। कर्त्रभिप्राये किम्? ऋत्विजो यजन्ति। सुन्वन्ति। २७४१ **अपाद्वदः १।३।७३॥** न्यायमपवदते। कर्त्रभिप्राये इत्येव। अपवदति। 'णिचश्च' (सू २५६४)। कारयते। २७४२ **समुदाङ्भ्यो यमोऽग्रन्थे १।३।७५॥** अग्रन्थे इति च्छेदः। व्रीहीन् संयच्छते। भारमुद्यच्छते। वस्त्रमायच्छते। अग्रन्थे किम्। उद्यच्छति वेदम्। अधिगन्तुमुद्यमं करोतीत्यर्थः। कर्त्रभिप्राये इत्येव। व्रीहीन् संयच्छति। २७४३ **अनुपसर्गाज्ज्ञः १।३।७६॥** गां जानीते। अनुपसर्गात् किम्। 'स्वर्गं लोकं न प्रजानाति'। कथं तर्हि भट्टिः—'इत्थं नृपः पूर्वमवालुलोचे ततोऽनुजज्ञे गमनं सुतस्य' इति। कर्मणि लिट्। नृपेणेति विपरिणामः। २७४४

प्रौढमनोरमायां शब्दरत्नशब्देन्दुशेखरेऽवनुसंधेयः। गृधिवञ्च्योः। प्रलम्भनं प्रतारणमिति मत्वा आह—प्रतारणेऽर्थे इति। प्राग्वदिति। आत्मनेपदमित्यर्थः। धातूनामनेकार्थकत्वादनयोः प्रतारणे वृत्तिः। मिथ्योपपदात्। अभ्यासवृत्तेर्मिथ्याशब्दोपपदकात् कृञः आत्मनेपदमित्यर्थः। इत ऊर्ध्वं णेरिति निवृत्तम्। अपाद्वदः। अपपूर्वाद्वदधातोरात्मनेपदमित्यर्थः। न्यायमपवदते इति। वचनेन निरस्यतीत्यर्थः। 'किमिह वचनं न कुर्याद्वास्ति वचनस्यातिभारः' इति न्यायात्। समुदाङ्भ्यो। सम्, उत्, आङ् एतत्पूर्वात् अग्रन्थविषयकात् यमेरात्मनेपदमित्यर्थः। व्रीहीन् संयच्छते इति। संगृह्णातीत्यर्थः। भारमुद्यच्छते इति। उदूर्ध्वं गृह्णातीत्यर्थः। वस्त्रमायच्छते इति। कट्यादौ निबध्नातीत्यर्थः कर्त्रभिप्राये इत्येवेति। व्रीहीन् संयच्छतीति। परार्थं संगृह्णातीत्यर्थः। 'आङो यमहनः' इत्येव सिद्धे आङ्ग्रहणं सकर्मकार्थम्, तस्य अकर्मकादेव प्रवृत्तेरिति बोध्यम्। अनुपसर्गाज्ज्ञः। अनुपसर्गात् ज्ञाधातोरात्मनेपदमित्यर्थः। 'अकर्मकाच्च' इत्येव सिद्धे सकर्मकार्थमिदम्। तदाह—गां जानीते इति। कथमिति अनुपूर्वकस्य अनुभत्यर्थकस्य ज्ञाधातोरुपसर्गपूर्वकतया प्रकृतसूत्रस्याप्रवृत्तेः, सकर्मकतया 'अकर्मकाच्च' इत्यस्याप्यप्रवृत्तेः अनुजज्ञे इति कथमात्मनेपदमित्यर्थः। समाधत्ते—कर्मणि लिडिति। तथाच 'भावकर्मणोः' इत्यात्मनेपदमिति भावः। सुतस्य गमनमनुज्ञातमित्यर्थः फलति। नृपे सति नृप

विभाषोपपदेन प्रतीयमाने १।३।७७॥ 'स्वरितञितः' इत्यादिपञ्चसूत्र्या यदात्मनेपदं विहितं तत्समीपोच्चारितेन पदेन क्रियाफलस्य कर्तृगामित्वे द्योतिते वा स्यात्। स्वं यज्ञं यजति-यजते वा। स्वं कटं करोति-कुरुते वा। स्वं पुत्रमपवदति-अपवदते वा। स्वं यज्ञं कारयति—कारयते वा। स्वं व्रीहि संयच्छति-संयच्छते वा। स्वां गां जानाति-जानीते वा। इति तिङन्ते आत्मनेपदप्रकरणम्।

अथ तिङन्ते परस्मैपदप्रकरणम् ॥ १९ ॥

'शेषात्कर्तरि परस्मैपदम्' (सू २१५९)। अत्ति। **२७४५ अनुपराभ्यां कृञः** १।३।७९॥ कर्तृगेऽपि फले गन्धनादौ च परस्मैपदार्थमिदम्। अनुकरोति। पराकरोति। कर्तरीत्येव। भावकर्मणोर्मा भूत्। न चैवमपि कर्मकर्तरि प्रसङ्गः।

इति प्रथमान्तस्य कथमिहान्वय इत्यत आह—नृपेणेति विपरिणाम इति। **अवालुलोचे इत्यत्रान्वितं नृप इति प्रथमान्तं तृतीयया विपरिणमितमत्रानुषज्यते** इत्यर्थः। विभाषोपपदेन। स्वरितञित इत्यादीति। **'स्वरितञितः कर्त्रभिप्राये क्रियाफले, 'अपाद्वदः,' 'णिचश्च,' 'समुदाङ्भ्यो यमोऽग्रन्थे,' 'अनुपसर्गाज्ञः'** इति पञ्चसूत्रीत्यर्थः। **समीपोच्चारितं पदमुपपदम्, ननु तत्रोपपदं सप्तमीस्थम्' इति सङ्केतितम्। असम्भवात्।** तदाह—समीपोच्चारितेन पदेनेति। **फलस्य कर्तृगामित्वे नित्यमात्मनेपदे पञ्चसूत्र्या प्राप्ते विभाषेयमिति 'न वेति विभाषा'** इति सूत्रे भाष्ये स्पष्टम्। स्वं यज्ञमिति। **स्वीयमित्यर्थः।** अत्र **स्वशब्देनैव फलस्याऽऽत्मगामित्वावगमात् 'स्वरितञितः'** इति नित्यात्मनेपदस्यानेन विकल्पः। **स्वं यज्ञं कारयतीत्यत्र 'णिचश्च'** इत्यस्याऽनेन विकल्पः। स्वं व्रीहिमिति। **अत्र 'समुदाङ्भ्यो यमः'** इत्यस्याऽनेन विकल्पः। स्वां गामिति। **अत्र 'अनुपसर्गाज्ञः'** इत्यस्याऽनेन विकल्पः। इति श्रीवासुदेवदीक्षितविदुषा विरचितायां सिद्धान्तकौमुदीव्याख्यायां बालमनोरमाख्यायाम् आत्मनेपदव्यवस्था समाप्ता।

अथ परस्मैपदव्यवस्थां निरूपयितुमुपक्रमते—शेषात्कर्तरीति। अनुपराभ्यां कृञः। **'परस्मैपद'मिति शेषः। ननु 'स्वरितञितः' इत्यात्मनेपदस्य कर्तृगामिन्येव फले विधानादकर्तृगामिनि फले 'शेषात्कर्तरि'** इति परस्मैपदस्य सिद्धत्वात् **किमर्थमिदमित्यत** आह—कर्तृगेऽपीति। गन्धनादाविति। **'गन्धनावक्षेपणसेवनसाहसिकप्रतियत्नप्रकथनोपयोगेषु' इत्यर्थः। मा भूदिति। भावे कर्मणि लकारस्य कर्तृगे फले परस्मैपदनिवृत्त्यर्थं कर्तरीत्यस्याऽनुवृत्तिरिति भावः। ननु कर्तरीत्यस्यानुवृत्तावपि 'अनुक्रियते शब्दः स्वयमेवे'त्यत्र कर्मकर्तरि परस्मैपदं दुर्वारमित्याशङ्क्य परिहरति**—नचेति। **एवमपि कर्तरीत्यस्यानुवृत्तावपि कर्मकर्तरि आत्मनेपदस्य प्रसङ्गो न शङ्क्य इत्यर्थः। कुत इत्यत आह**—कार्यातिदेशेति। **तत्र कर्मकर्तरि 'कर्मवत्कर्मणा तुल्यक्रियः' इत्यात्मनेपदेन परेणाऽस्य परस्मैपदस्य बाधादित्यन्वयः। ननु कर्मणि यच्छास्त्रं तत् 'कर्मवत्क-**

कार्यातिदेशपक्षस्य मुख्यतया तत्र 'कर्मवत्कर्मणा—' (सू २७६६) इत्यात्मनेपदेन परेणास्य बाधात्। शास्त्रातिदेशपक्षे तु 'कर्तरि कर्म' (सू २६८०) इत्यतः 'शेषात्—' (सू २१५९) इत्यतश्च कर्तृग्रहणद्वयमनुवर्त्य कर्तैव यः कर्ता न तु कर्मकर्ता तत्रेति व्याख्येयम्। २७४६ **अभिप्रत्यतिभ्यः क्षिपः** १।३।८०॥ क्षिप प्रेरणे। स्वरितेत्। अभिक्षिपति। २७४७ **प्राद्वहः** १।३।८१॥ प्रवहति। २७४८ **परेर्मृषः** १।३।८२॥ परिमृष्यति। भौवादिकस्य तु परिमर्षति। इह परेरिति योगं विभज्य वहेरपीति केचित्। २७४९ **व्याङ्परिभ्यो रमः** १।३।८३॥ विरमति। २७५० **उपाच्च** १।३।८४॥ यज्ञदत्तमुपरमति। उपरमयतीत्यर्थः। अन्तर्भा-

---

र्मणा' इति कर्मकर्तर्यतिदिश्यते। तथा चाऽत्र कर्मकर्तरि 'भावकर्मणोः' इत्यात्मनेपदशास्त्रमिह प्राप्तम्। तस्य च परत्वाभावात् 'अनुपराभ्यां कृञः' इत्यनेन कथं बाधः स्यादित्यत आह—कार्यातिदेशपक्षस्य मुख्यतयेति। शास्त्रातिदेशस्य कार्यातिदेशार्थतया कार्यातिदेशस्य मुख्यत्वम्। ततश्च 'कर्मवत् कर्मणेत्यनेन कर्मणि विहितमात्मनेपदं कर्मकर्तरि विधीयते। तस्य च परत्वात्तेनात्मनेपदेन 'अनुपराभ्याम्' इति परस्मैपदं कर्मकर्तरि बाधमर्हतीति भावः। 'कर्मवत्कर्मणा' इत्यत्र शास्त्रातिदेशमभ्युपगम्य आह—शास्त्रातिदेशपक्षे त्विति। 'अनुपराभ्यां कृञः' इत्यत्र 'कर्तरि कर्मव्यतिहारे' इत्यस्मादेकं कर्तृग्रहणमनुवर्तते। तथा 'शेषात् कर्तरि परस्मैपदम्' इत्यस्मात् द्वितीयं कर्तृग्रहणमनुवर्तते। तथा च 'स्वभावत एव यः कर्ता, नतु विवक्षाधीनः कर्मकर्ता तथाविधकर्तर्येव अनुपराभ्यां कृञः परस्मैपद'मिति लभ्यते। एवञ्च कर्मकर्तरि नास्य प्रवृत्तिरित्यर्थः। अभिप्रति। 'परस्मैपद'मिति शेषः। स्वरितेदिति। ततश्च कर्तृगामिनि फले आत्मनेपदे प्राप्ते अनेन तत्रापि परस्मैपदमिति भावः। अभिक्षिपतीति। प्रतिक्षिपति अतिक्षिपति इत्यप्युदाहार्यम्। प्राद्वहः। प्रपूर्वाद्वहेः परस्मैपदमित्यर्थः। वहेः स्वरितेत्त्वात् कर्तृगामिन्यात्मनेपदे प्राप्ते तत्राप्यनेन परस्मैपदम्। परेर्मृषः। 'परस्मैपद'मिति शेषः। 'मृष तितिक्षायाम्' इति दैवादिकस्य स्वरितेत्त्वात् पदद्वये प्राप्ते अयं विधिः तदाह—परिमृष्यतीति। चौरादिकस्यापि 'आघृषाद्वा' इति णिजभावे स्वरितेत्त्वेऽपि परस्मैपदमेव परिमर्षतीति। भौवादिकस्य त्विति। 'मृषु सहने सेचने च' इति भौवादिकस्य तु परस्मैपदित्वात् परिमर्षतीत्येव रूपं सिद्धम्। अतोऽस्मिन् सूत्रे तस्य न ग्रहणमिति भावः। ईहेति। 'परे'रिति योगो विभज्यते। 'वह'इत्यनुवर्तते। परेर्वहः परस्मैपदमित्यर्थः। परिवहति। 'मृष' इति योगान्तरम्। तत्र परेः इत्यनुवर्तते, परेः मृषः परस्मैपदमित्युक्तोऽर्थः। इति के चिदाहुरित्यर्थः। भाष्ये त्वयं योगविभागो न दृश्यते। व्याङ्परिभ्योरमः। 'परस्मैपद'मिति शेषः। रमेरनुदात्तेत्त्वाद्विधिरयम्। विरमतीति। आरमति, परिरमति, इत्यप्युदाहार्यम्। उपाच्च। उपपूर्वादपि रमेः परस्मैपदमित्यर्थः। उत्तरसूत्रे उपादित्यस्यैवाऽनुवृत्तये 'व्याङ्परिभ्यो रमे'रिति नोक्तम्।

वितव्यर्थोऽयम्। २७५१ **विभाषाऽकर्मकात्** १।३।८५॥ उपाद्रमेरकर्मकात्परस्मैपदं वा। उपरमति-उपरमते वा। निवर्तते इत्यर्थः। २७५२ **बुधयुधनशजनेङ्प्रुद्रुस्रुभ्यो ण्यः** १।३।८६॥ एभ्यो ण्यन्तेभ्यः परस्मैपदं स्यात्। 'णिचश्च' (सू २५६४) इत्यस्यापवादः। बोधयति पद्मम्। योधयति काष्ठानि। नाशयति दुःखम्। जनयति सुखम्। अध्यापयति। प्रावयति। प्रापयतीत्यर्थः। द्रावयति। विलापयतीत्यर्थः। स्रावयति। स्यन्दयतीत्यर्थः। २७५३ **निगरणचलनार्थे-**

अत्र विरमतीत्यर्थे उपरमतीति नोदाहरणम्। तस्य अकर्मकतया उत्तरसूत्रेण परस्मैपदविकल्पविधानात्। अतः सकर्मकमुदाहरति—यत्तदन्तमुपरमतीति। ननु विरामार्थकत्वात् कथं सकर्मकतेत्यत आह—उपरमयतीत्यर्थ इति। ननु णिजभावात् कथमयमर्थो लभ्यते इत्यत आह—अन्तर्भावितण्यर्थोऽयमिति। धातूनामनेकार्थत्वादिति भावः। विभाषाऽकर्मकात्। उपादिति, रम इति परस्मैपदमिति चानुवर्तते। तदाह-उपाद्रमेरिति। बुधयुध। बुध युध नश जन इङ् प्रु द्रु स्रु एषां द्वन्द्वः। बोधयति पद्ममिति। 'सूर्यं' इति शेषः। बुध्रिर्विकसनार्थकः। विकसति पद्मम्। तद्विकासयति सूर्यं इत्यर्थः। 'अणावकर्मकाच्चित्तवत्कर्तृकात्' इति परस्मैपदं तु न सिध्यति, अणौ पद्मस्य कर्तृतया चित्तवत्कर्तृकत्वाऽभावात्। योधयति काष्ठानीति। काष्ठानि युध्यन्ते स्वयमेव। तानि योधयतीत्यर्थः। अणावचित्तवत्कर्तृकत्वात् 'अणावकर्मकात्' इत्यस्य न प्राप्तिः। अत एव योधयति देवदत्तमिति नोदाहृतम् 'अणावकर्मकाच्चित्तवत्कर्तृकात्' इत्येव सिद्धेः। एवमग्रेऽपि ज्ञेयम्। नाशयति दुःखमिति। दुःखं नश्यति, तत् नाशयति हरिरित्यर्थः। जनयति सुखमिति। जायते सुखम्, तत् जनयति हरिरित्यर्थः। अध्यापयतीति। अधीते वेदं विधिः, तमध्यापयतीत्यर्थः। 'प्रु गतौ' इत्यस्योदाहरति—प्रावयतीति। गत्यर्थकत्वं मत्वा आह—प्रापयतीत्यर्थ इति। द्रावयतीति। द्रवत्याज्यं तत् द्रावयतीत्यर्थः। धातोर्द्रवीभावार्थकत्वं मत्वा आह—विलापयतीत्यर्थ इति। स्रावयतीति। स्रवति जलं, तत्स्रावयतीत्यर्थः। धातोः स्यन्दनार्थकत्वं मत्वा आह—स्यन्दयतीत्यर्थ इति। 'प्रीति भक्तजनस्य यो जनयते' इत्यात्मनेपदं तु प्रामादिकमेव। यद्वा भक्तजनः हरौ प्रीति जनयत्यात्मविषये तां हरिः जनयते इति ण्यन्ताण्णौ रूपम्। प्रयोज्यकर्तुः शेषत्वविवक्षया भक्तजनस्येति षष्ठीत्याहुः। निगरण। निगरणं भक्षणम्। चलनं कम्पनम्। एतदर्थकेभ्यो ण्यन्तेभ्यः परस्मैपदमित्यर्थः। पूर्वसूत्रे प्रुद्रुस्रूणां ग्रहणं तु अचलनार्थानामेव। अत एव मूले प्रापयतीत्यादि व्याख्यातम्। पानमपि भक्षणमेव 'अपोऽश्नाति' इति श्रुतेः। अत एव 'न पादस्याद्यमाद्यस्य' इति सूत्रे पाग्रहणमर्थवत्। 'न पीयतां नाम चकोरजिह्वया कथंचिदेतन्मुखचन्द्रचन्द्रिका। इमां किमाचामय सेन चक्षुषी चिरं चकोरस्य भवन्मुखत्पृशी॥' इति श्रीहर्षश्लोके आचामयेति पृथक्पदम्। अः विष्णुः तस्य स्त्री ईः लक्ष्मीः। तया

भ्यश्च १।३।८७॥ निगारयति । आशयति । भोजयति । चलयति । कम्पयति । 'अदेः प्रतिषेधः' (वा ९५९) आदयते देवदत्तेन । 'गतिबुद्धि—(सू ५४०) इति कर्मत्वम् 'आदिखाद्योर्न' (वा ११०९) इति प्रतिषिद्धम् । 'निगरणचलन—' इति सूत्रेण प्राप्तस्यैवायं निषेधः । शेषादित्यकर्त्रभिप्राये परस्मैपदं स्यादेव । आदयत्यन्नं बटुना । **२७५४ अणावकर्मकाच्चित्तवत्कर्तृकात् १।३।८८॥** प्यन्तात्परस्मैपदं स्यात् । शेते कृष्णः तं गोपी शाययति । **२७५५ न पादम्याङ्यमाङयसपरिमुहरुचिनृतिवदवसः १।३।८९॥** एभ्यो प्यन्तेभ्यः परस्मैपदं न । पिबतिर्निगरणार्थः । इतरे चित्तवत्कर्तृका अकर्मकाः । नृतिश्चलनार्थोऽपि । तेन सूत्रद्वयेन प्राप्तिः । पाययते । दमयते । आयामयते । आयासयते । परिमोहयते ।

सहिता से इत्येकारान्तस्य सेशब्दस्य सम्बोधनम् । 'एकहल्वात्' इति सम्बुद्धिलोप इति व्याख्येयमिति प्रौढमनोरमायां स्थितम् । वस्तुतस्तु चक्षुषोर्मुखचन्द्रिकाकर्मकपानात्मकाचनमनाऽसम्भवादाचामिरादरे लाक्षणिकः । अतो निगरणार्थकत्वाऽभावाच्च परस्मैपदम् । नचैवं सति प्रत्यवसानार्थकत्वाभावाच्चक्षुषोः 'गतिबुद्धि' इति कर्मत्वं न स्यादिति शङ्क्यम्, न ह्याचामिरत्र केवले आदरे वर्तते । किन्तु दर्शनपूर्वकादरे वर्तते । सादरज्ञाने लाक्षणिक इति यावत् । ततश्च बुद्ध्यर्थकत्वादाचामेः चक्षुषोः कर्मत्वं निर्बाधमित्यादि शब्देन्दुशेखरे प्रपञ्चितम् । अदेः प्रतिषेधः इति । अदेर्ण्यन्तात् निगरणार्थकतया प्राप्तस्य परस्मैपदस्य प्रतिषेधो वक्तव्य इत्यर्थः । 'आदयते देवदत्तेनेत्यत्र अदेः प्रत्यवसानार्थकत्वात् प्रयोज्यकर्तुर्देवदत्तस्य कर्मत्वमाशङ्क्य आह—गतिबुद्धीति । नन्वादयत्यन्नं बटुनेति कथम् । निगरणार्थकतया प्राप्तस्य परस्मैपदस्य अदेः प्रतिषेधादित्यत आह—निगरणचलनेति सूत्रेण प्राप्तस्यैवायं निषेध इति । नतु शेषात्कर्तरि इति प्राप्तस्येत्येवकारार्थः, 'अनन्तरस्य' इति न्यायादिति भावः । अणावकर्मकात् । प्यन्तादिति शेषपूरणम्, णेरित्यनुवृत्तेरिति भावः । अणौ यो धातुरकर्मकः चित्तवत्कर्तृकश्च, तस्मात् प्यन्तात्परस्मैपदमिति यावत् । चित्तवत्कर्तृकादिति किम् । व्रीहयः शुष्यन्ति, तान् शोषयते । अकर्मकात्किम् । कटं करोति तं प्रयुङ्क्ते । कटं कारयते । न पादम्याङयम् । पा दमि आङयम् आङयस परिमुह रुचि नृति वद वस् एषां समाहारद्वन्द्वात्पञ्चमी । प्राप्तस्य निषेध्यत्वात् प्राप्तिमुपपादयति—पिबतिर्निगरणार्थ इति । ततश्च 'निगरणचलनार्थेभ्यः' इति प्राप्तिरिति भावः । इतरे इति । दम्यादयः अणौ चित्तवत्कर्तृका अकर्मकाश्चेत्यर्थः । ततश्च 'अणावकर्मकाच्चित्तवत्कर्तृकात्' इति प्राप्तिरिति भावः । नृतिरिति । नृतिश्चलनार्थकः । अणौ चित्तवत्कर्तृकः, अकर्मकश्चेत्यर्थः । सूत्रद्वयेनेति । 'अणावकर्मकात्' इति 'निगरणचलनार्थेभ्यश्च' इति च सूत्रद्वयेनेत्यर्थः । पाययते इति । 'ण्यासश्रन्थघट्टवतिकषपतपदो युक्' इति पुकोऽपवादो युक् । दमयते इति । 'जनीजृष्क्नसुरञ्जोऽमन्ताश्च' इति मित्त्वाद्भस्वः । नन्वु दिवादौ दमिः सकर्मक

रोचयते । नर्तयते । वादयते । वासयते । 'घेट उपसंख्यानम्' (वा ९६२) । 'धापयेते शिशुमेकं समीची' । अकर्त्रभिप्राये 'शेषात्—' (सू २१५६) इति परस्मैपदं स्यादेव । वत्सान्पाययति पयः । दमयन्ती कमनीयतामदम् । भिक्षां वासयति । 'वाक्यषः' (सू २६६९) लोहितायति । लोहितायते । 'शुभ्रयो लुङि' (सू २३४५) । अद्युतत्–अद्योतिष्ट । 'वृद्भ्यः स्यसनोः' (सू २३४७) । वर्त्स्यति-वर्तिष्यते । विवृत्सति–विवर्तिषते । 'लुटि च क्लृपः' (सू २३५१) । कल्प्ता । कल्प्तासि । कल्पितासे । कल्प्स्यति । कल्पिष्यते । कल्प्स्यते । चिक्लृप्सति । चिकल्पिषते । चिक्लृप्सते । इति तिङन्ते परस्मैपदप्रकरणम् ।

अथ भावकर्मतिङ्प्रकरणम् ॥ २० ॥

अथ भावकर्मणोर्लडादयः । 'भावकर्मणोः' (सू २६७६) इति तङ् । **२७५६ सर्वधातुके यक्** ३।१।६७॥ धातोर्यक्प्रत्ययः स्याद्भावकर्मवाचिनि सार्वधातुके

इत्युक्तम् । अतः कथमिह 'अणावकर्मकात्' इति प्राप्तिरिति चेत् दमेः परस्मैपदनिषेधादेव दमिरकर्मकोऽपि । अतो दमिः सकर्मक इत्यस्य न विरोधः । आयामयते इति । 'यमोऽपरिवेषणे' इति मित्त्वनिषेधान्न ह्रस्वः । वासयते इति । 'वस निवासे' इति भौवादिकस्यैवात्र ग्रहणम् । ननु 'वस आच्छादने' इत्यादादिकस्याऽपि, तस्य सकर्मकत्वादेवाऽप्राप्तेः । 'लुग्विकरणालुग्विकरणयोर्लुग्विकरणस्यैव ग्रहण'मित्युक्तेश्च । घेट उपसंख्यानमिति । 'परस्मैपदनिषेधस्ये'ति शेषः । धापयेते शिशुमिति मन्त्रः । ननु 'वत्सान् पाययति पयः', 'दमयन्ती कमनीयतामदम्' 'भिक्षां वासयति' इति च कथम् । 'न पादम्याङ्यमाङ्यस' इति परस्मैपदस्य निषेधादित्यत आह—अकर्त्रभिप्राये इति । 'अनन्तरस्य' इति न्यायेन 'निगरणचलनार्थेभ्यश्च' 'अणावकर्मकात्' इति सूत्रद्वयप्राप्तस्यैव 'न पादम्याङ्यमाङ्यस' इति निषेध इति भावः । 'वा क्यषः' इत्यादि प्राग्व्याख्यातमपि सूत्रक्रमेण पुनरुपात्तम् । इति श्रीवासुदेवदीक्षितविदुषा विरचितायां सिद्धान्तकौमुदीव्याख्यायां बालमनोरमाख्यायां परस्मैपदव्यवस्था समाप्ता ।

अथ भावकर्मतिङ्प्रकरणं निरूप्यते । 'लः कर्मणि' इत्यत्र सकर्मकेभ्यो धातुभ्यः कर्मणि कर्तरि च, अकर्मकेभ्यस्तु भावे कर्तरि च लकारा विहिताः । तेषु कर्तरि लकारा निरूपिताः । अथेदानीं भावकर्मणोर्लकारा निरूप्यन्ते इति प्रतिजानीते—अथ भावकर्मणोर्लडादय इति । निरूप्यन्ते इति शेषः । तत्र 'शेषात्कर्तरि परस्मैपदम्' 'अनुपराभ्यां कृञः' इत्यादिपरस्मैपदविधिषु प्राप्तेष्वाह – भावकर्मणोरिति तङिति । सार्वधातुके यक् । धातोरिति । 'धातोरेकाच' इत्यतस्तदनुवृत्तेरिति भावः । भावकर्मवाचिनीति । 'चिण्भावकर्मणोः' इत्यतस्तदनुवृत्तेरिति भावः । घटस्य भावो घटत्वमित्यादौ प्रकृतिजन्यबोधे प्रकारो भावः । कवेरयं भावः इत्यादौ अभिप्रायः । 'भावः पदार्थसं-

परे । भावो भावना उत्पादना क्रिया । सा च धातुत्वेन सकलधातुवाच्या भावार्थ-

त्तायां क्रियाचेष्टात्मयोनिषु । विद्वल्लीलास्वभावेषु भूत्यभिप्रायजन्तुषु ॥' इति नानार्थरत्नमाला । 'भावः सत्तास्वभावाभिप्रायचेष्टात्मजन्तुषु' इत्यमरः । इह तु 'लः कर्मणि' इत्यत्र भावशब्दो भावनायां यौगिक इत्याह—भावो भावनेति । 'लः कर्मणि' इत्यत्र भावशब्देन भावना विवक्षितेति भावः । भावनाशब्दस्य चिन्तायामपि प्रसिद्धत्वादाह—उत्पादनेति । उत्पत्त्यनुकूलो व्यापार इत्यर्थः । एवञ्च भूधातोरुत्पत्त्यर्थकाद्धेतुमण्ण्यौ वृद्ध्यावादेशयोः भाविशब्दात् 'एरच्' इति भावे अचि णिलोपे भावशब्दः, भावयतेरुत्पत्त्यर्थकाद्धेतुमण्ण्यौ स्त्रियामित्यधिकारे 'ण्यासश्रन्थो युच्' इति युचि अनादेशे टापि भावनाशब्द इति बोध्यम् । उत्पादना चेयं धात्वर्थातिरिच्यते इति दर्शयितुमाह—क्रियेति । धात्वर्थात्मिकक्रियैव उत्पादनेत्यर्थः । तथाहि फलव्यापारयोर्धातुरिति सिद्धान्तः । पचधातोः पाकोऽर्थः । पाको विक्लित्त्यनुकूलव्यापारः । तत्र विक्लित्त्यंशः फलम् । अधिश्रयणादिस्तदनुकूलो व्यापारः । तथाविधव्यापाराश्रयो देवदत्तादिः कर्ता, 'धातूपात्तव्यापाराश्रयः कर्ते'ति सिद्धान्तात् । अधिश्रयणादिव्यापारजन्या विक्लित्तिः फलं, तदाश्रयत्वादोदनं कर्म, 'व्यापारजन्यफलशालि कर्मे'ति सिद्धान्तात् । एवं सकर्मकेषु सर्वत्र ज्ञेयम् । 'एध वृद्धौ' इत्यस्मिन्नकर्मकेऽपि वृद्ध्यनुकूलव्यापारो धात्वर्थः । नचैवं सति 'एधते देवदत्त' इत्यत्र धातूपात्तव्यापाराश्रयत्वाद्व्यापारजन्यवृद्धिरूपफलाश्रयत्वाच्च कर्तृत्वं कर्मत्वं च स्यादिति वाच्यम्, 'धातूपात्तव्यापारजन्यतद्व्यापाराधिकरणफलाश्रयत्वं कर्मत्व'मिति सिद्धान्तात् । एवञ्च फलोत्पत्त्यनुकूलव्यापारात्मिका क्रिया धात्वर्थ इति सिद्धम् । एतेन क्रियावाची धातुः, धातुवाच्या क्रियेत्यन्योन्याश्रयोऽपि निरस्तः । उत्पत्त्यनुकूलव्यापारस्यैव क्रियात्वात् । तदुक्तम्—'व्यापारो भावना सैवोत्पादना सैव च क्रिया' इति । नन्वुत्पत्त्यनुकूलव्यापारस्यैव सर्वत्र धातुवाच्यत्वे सर्वेषां धातूनामेकार्थत्वापत्तिः । विक्लित्त्यादितत्तत्फलोत्पत्त्यनुकूलव्यापारार्थकत्वं तु न सम्भवति । एकैकस्य धातोर्विक्लित्त्यादितत्तत्फलांशे, तदनुकूलव्यापारात्मकव्यापारसामान्ये च वाचकत्वानुपपत्तेरित्यत आह—सा च धातुत्वेन सकलधातुवाच्येति । पचत्यादयो धातुत्वेन रूपेण उत्पत्त्यनुकूलव्यापारात्मिकां क्रियामाहुः । पचित्वादिविशेषरूपेण तु विक्लित्त्यादितत्तत्फलांशमाहुः । तथाच वाचकतावच्छेदकभेदाद्विक्लित्त्यादिफलविशेषस्य क्रियासामान्यस्य च वाच्यता सङ्गच्छते इति भावः । तथाच भट्टिराह—'विभज्य सेनां परमार्थकर्मा सेनापतीश्चापि पुरन्दरोऽथ । नियोजयामास स शत्रुसैन्ये करोतिरर्थेष्विव सर्वधातून् ॥' इति । अस्तिभवतिविद्यतीनामपि सत्तानुकूलव्यापार एवार्थः । तत्र सत्ता आत्मभरणम् । तदनुकूलव्यापारस्तु जायते, अस्ति, विपरिणमते, वर्धते, अपक्षीयते, विनश्यति, इति वार्द्धर्यवियुक्तेषड्भावविकारेष्वन्यतमो यथायथं ज्ञेयः । भूवादिसूत्रे भाष्ये स्पष्टमेतत् । प्रपञ्चितं च मञ्जूषायामित्यलम् । नन्वु उत्पादनात्मकक्रियारूपस्य भावस्य

कलकारेणानूद्यते। युष्मदस्मद्भ्यां सामानाधिकरण्याऽभावात्प्रथमपुरुषः। तिङ्वाच्यभावनाया असत्त्वरूपत्वेन द्वित्वाद्यप्रतीतेर्न द्विवचनादि। किन्त्वेकवचनमेव। तस्यौत्सर्गिकत्वेन संख्यानपेक्षत्वात्। अनभिहिते कर्तरि तृतीया। त्वया। मया अन्यैश्च भूयते। बभूवे। २७५७ **स्यसिच्सीयुट्तासिषु भावकर्मणोरुपदेशेऽज्झनग्रहदृशां वा चिण्वदिट् च** ६।४।६२॥ उपदेशे योऽच् तदन्तानां हनादीनां

धातुवाच्यत्वे 'लः कर्मणि च भावे च' इति भावे कथं लकारविधिः। अनन्यलभ्यस्यैव शब्दार्थत्वादित्यत आह—भावार्थकलकारेणानूद्यते इति। 'द्वौ, त्रयः' इत्यादौ द्विवचनबहुवचनवदिति भावः। युष्मदस्मद्भ्यामिति। **युष्मदि अस्मदि च तिङ्समानाधिकरणे उपपदे मध्यमोत्तमपुरुषौ विहितौ। युष्मदस्मदोस्तिङ्सामानाधिकरण्यं च तिङ्वाच्यकारकवाचित्वमेव। भावे लकारे तु 'आस्यते त्वया' 'आस्यते मया' इत्यादौ भाव एव तिङ्वाच्यः ननु युष्मदस्मदर्थौ। अतो न मध्यमोत्तमावित्यर्थः। कर्मलकारे तु 'त्वं वन्द्यसे,' 'अहं वन्दे' इत्यादौ लकारस्य युष्मदस्मदोश्च सामानाधिकरण्यसम्भवात्पुरुषत्रयमपि यथायथमुदाहरिष्यते।** तिङ्वाच्येति। **सत्त्वं द्रव्यं लिङ्गसंख्यान्वययोग्यम्। तिङ्वाच्या या भावना क्रिया सा असत्त्वरूपा लिङ्गसंख्यान्वययोग्या, शब्दशक्तिस्वभावात्। ततश्च तस्यां तिङ्वाच्यभावनायां द्वित्वबहुत्वयोरप्रतीतेः युवाभ्यां युष्माभिर्वा आस्यते इत्यादौ न द्विवचनं, बहुवचनं चेत्यर्थः। तिङ्वाच्येत्यनेन कृद्वाच्यायाः क्रियायाः लिङ्गसंख्यान्वयित्वात्मकं सत्त्वरूपत्वमस्तीत्युक्तं भवति। तद्यथा—पाकौ पाकाः इत्यादि। तदुक्तं—'सार्वधातुके यक्' इति सूत्रे भाष्ये 'कृदभिहितो भावो द्रव्यवत्प्रकाशते' इति। द्रव्यवत् लिङ्गसंख्यान्वयं लभते इत्यर्थः, शब्दशक्तिस्वभावादिति भावः। ननु तिङ्वाच्यभावनाया असत्त्वरूपतया द्विवहुवचनाऽभावे आस्यते इत्यादौ एकवचनं च न स्यादित्यत आह—किं त्वेकवचनमेवेति। तिङ्वाच्यभावलकारस्येति शेषः। तस्येति। 'तुल्येकयोर्द्विवचनैकवचने' 'बहुषु बहुवचनम्' इति सूत्रभ्यासं भङ्क्त्वा 'एकवचनं' द्विबहुषु द्विबहुवचने' इति सूत्रभ्यासः कर्तव्यः। तत्र द्वित्वबहुत्वयोर्द्विबहुवचननियमे सति तयोरविषये एकवचनमिति लभ्यते इति भाष्ये स्पष्टम्। एवञ्च एकवचनस्य एकत्वमुत्सृज्य द्विबहुवचनान्यविषये विहितत्वेन औत्सर्गिकतया एकत्वसंख्यानपेक्षत्वात् भावलकारस्य असत्त्वरूपभाववाचित्वेऽप्येकवचनमेवेति भावः। अनभिहिते इति। भावलकारे कर्तुस्तिङ्वाच्यत्वाभावेन अनभिहितत्वात्तृतीयेत्यर्थः। त्वया मयेति। त्वत्कर्तृकं मत्कर्तृकम् अन्यकर्तृकं भवनमित्यर्थः। स्यसिच्। अच् हन् ग्रह दृश् एषां द्वन्द्वात् षष्ठी। उपदेश इत्यत्र एव विशेषणम्, नेतरेषाम्, अव्यभिचारात्। तदाह—उपदेशे योऽजिति। 'अजि'त्यस्य उपदेशान्वयित्वेऽपि सौत्रः समासः। 'अजि'ति लुप्तषष्ठीकं वा। 'चिण्व' दिति सप्तम्यन्ताद्वतिः 'स्यसिच्सीयुट्ता-

च चिणीवाङ्गकार्यं वा स्यात्स्यादिषु परेषु भावकर्मणोर्गम्यमानयोः स्यादीनामिडागमश्च । अयमिट् चिण्वद्भावसन्नियोगशिष्टत्वात्तदभावे न । इह धार्तुके इत्यधिकृतं सीयुटो विशेषणं, नेतरेषामव्यभिचारात् । चिण्वद्भावाद्वृद्धिः । (नित्यश्चायं वल्लि-

---

सिच्वि'त्युपमेयतः सप्तमीदर्शनात् । तदाह—चिणीवेति । अङ्गकार्यमिति । अङ्गस्येत्यधिकृतत्वादिति भावः । 'भावकर्मवाचिषु स्यादिच्वि'ति नार्थः, सीयुटो लिङागमतया भावकर्मवाचित्वेऽपि स्यसिच्तासीनां भावकर्मवाचित्वाऽभावात् । नापि भावकर्मवाचिनि प्रत्यये परे ये स्यादयस्तेच्वित्यर्थः, स्यसिच्तासीनां भावकर्मवाचिप्रत्ययपरत्वसम्भवेऽपि सीयुटस्तदसम्भवात् । सीयुडागमविशिष्टस्यैव लिङो भावकर्मवाचितया केवलसीयुटो न भावकर्मवाचिप्रत्ययपरकत्वमस्ति अतो विषयसप्तमीति मत्वा आह—भावकर्मणोर्गम्यमानयोरिति । इड्विधौ स्यसिच्सीयुट्तासिषु इति सप्तमी षष्ठ्या विपरिणम्यते इति मत्वा आह—स्यादीनामिडागमश्चेति । अत्र अङ्गनप्रहदशां स्यादीनां च न यथासङ्ख्यम् , व्याख्यानात् । 'स्यादिषु परेषु अङ्गस्य इ'डिति नार्थः, 'आर्द्धधातुकस्येड्वलादेः' इत्यत्र 'आर्द्धधातुके' इति योगं विभज्य 'यावानिट् स आर्द्धधातुकस्यैवे'ति भाष्ये उक्तत्वात् । चिणि यदङ्गाधिकारविहितं कार्यं तस्यैवात्रातिदेशः, नतु चिणि दृष्टमात्रस्य । तेन 'घानिष्यते' इत्यत्र 'हनो वध लिङि, 'लुङि च' इति चिणि दृष्टो वधादेशश्चिण्वदिति नातिदिश्यते, तस्य द्वैतीयीकत्वेन अङ्गाधिकारविहितत्वाऽभावात् । तथा आयिष्यते इत्यत्र इणो गादेशो न । 'अध्यायिष्यते' इत्यत्र इङो गादेशो न, द्वैतीयीकत्वात् । चिण्वत्त्वाऽभावे अयमिट् नेत्याह—अयमिडिति । सेट्कस्य वलादिरवलक्षण इट् तु स्यादेवेति भावः । ननु भूयेतेति विधिलिङि चिण्वत्त्वम् इ् च स्यातामित्यत आह—इहार्द्धधातुके इति नेतरेषामिति । स्यसिच्तासीनां न विशेषणमित्यर्थः । अव्यभिचारादिति । स्यसिच्तासीनां स आर्द्धधातुकत्वनियमादितिभावः । अत्र वार्तिकम्—

'चिण्वद्वृद्धिर्युक् च हन्तेश्च घत्वं दीर्घश्चोक्तो यो मितां वा चिणीति ।
इट् चासिद्धस्तेन मे लुप्यते णिर्नित्यश्चायं, वल्निमित्तो विधातौ ॥' इति ।

स्यसिच्सीयुडिति सूत्रस्य वृद्ध्यादि प्रयोजनमित्यर्थः । तत्र वृद्धिं दर्शयति—चिण्वद्भावाद्वृद्धिरिति । लुटि भू ता इति स्थिते चिण्वत्त्वात् 'अचोऽञ्णिति' इति वृद्धिरित्यर्थः । इडागमश्चेत्यपि बोध्यम् । तत्फलं तु वक्ष्यते । तथा दाधातोर्लुटि 'आतो युक् चिण्कृतोः' इति युक् । तथा लृटि 'घानिष्यते' इत्यत्र 'हो हन्तेर्ञ्णिन्नेषु' इति घत्वम् । शमेर्हेतुमण्ण्यन्तात्लुटि शामिता, शामितेत्यत्र 'चिण्णमुलोः इति दीर्घः । तथा अनेनैवात्र इटि कृते तस्य आभीयत्वेनासिद्धत्वात् अनिटीति निषेधाऽभावात् णिलोपः । तथा 'भाविष्यते' इत्यत्र भू स्य इति स्थिते परमपि वलादिलक्षणं इटं बाधित्वा नित्यत्वादनेन इट् , वल्निमित्ते इटि कृतेऽकृते च चिण्वदिटः प्रवृत्त्या कृताऽकृतप्रसङ्गित्वात् । वलादिलक्षणस्त्विट् न नित्यः, 'चिण्वदिटि कृते

मित्तो विधाती) । भाविता । भविता । भाविष्यते । भविष्यते । भूयताम् । अभूयत । भूयेत । भाविषीष्ट । भविषीष्ट । **२७५८ चिण्भावकर्मणोः ३।१।६६॥** च्लेश्चिण्स्याद्भावकर्मवाचिनि तशब्दे परे । अभावि । अभाविष्यत । अभविष्यत । तिङोक्तत्वात्कर्मणि न द्वितीया । अनुभूयते आनन्दश्चैत्रेण त्वया मया च । अनुभूयेते । अनुभूयन्ते । त्वमनुभूयसे । अहमनुभूये । अन्वभावि । अन्वभाविषाताम्—अन्वभविषाताम् । णिलोपः । भाव्यते । भावयांचक्रे । भावयांबभूवे । भावयामासे । इह तशब्दस्य एशि, इट एत्वे च कृते 'ह एति' (सू २२५०) इति हत्वं न, तासिसाहचर्यादस्तेरपि व्यतिहे इत्यादौ सार्वधातुके एव हत्वप्रवृत्तेरित्याहुः । भावि-

---

वलादित्वस्य विहितत्वेन वलादिलक्षणस्य इटः अप्रवृत्तेः। नित्यश्चायमित्यस्य 'चिण्वदि'डिति शेषः। वक्ष्यमिमित्त इत्यनन्तरं 'इडनित्य' इति शेषः। अनित्यत्वे हेतुः-'विघातो'ति। चिण्वदिटो वलादिनिमित्तविघातकत्वादित्यर्थः एवञ्च सेट्कत्वेऽप्यनेनैव इट्। एतदभावपक्षे तु सेट्कत्वे वलादिलक्षण इडिति बोध्यम्। तदाह—भवितेति। चिण्वदिडभावपक्षे वलादिलक्षण इडिति भावः। चिण्भावकर्मणोः। च्लेरिति। 'च्लेः सिच्' इत्यतस्तदनुवृत्तेरिति भावः। तशब्दे परे इति। 'चिण् ते पदः'इत्यतस्तदनुवृत्तेरिति भावः। अभावीति। च्लेश्चिणि कृते 'चिणो लुक्' इति तशब्दस्य लोपः। चिण्वधौ तशब्दे किम्। अभाविषाताम्। अथ अनुपूर्वात् भूधातोरुपभोगार्थकात्सकर्मकात्कर्मणि लकारे विशेषमाह—तिङोक्तत्वादिति। कर्तुस्त्वनभिहितत्वात् तृतीयैवेति भावः। तदाह—अनुभूयते आनन्दश्चैत्रेण त्वया मया चेति। इहाऽऽनन्दस्य तिङाभिहितत्वात् प्रथमेति भावः। युष्मदस्मदुपात्तयोः कर्त्रोस्त्वनभिहितत्वात् तृतीया। अनुभूयेते इति। 'सुखदुःखे' इति शेषः। अनुभूयन्त इति। 'सुखानी'ति शेषः। णिलोप इति। भूधातोर्णौ वृद्धौ आवादेशे भावि इति ण्यन्तात् कर्मणि लटस्तादेशे यकि णिलोप इत्यर्थः। भावयामासे इति। प्रथमपुरुषैकवचने उत्तमपुरुषैकवचने च रूपम्। इहेति। 'भावयामासे' इत्यत्र प्रथमैकवचनतशब्दस्य 'लिटस्तझयोः' इति एशादेशे उत्तमपुरुषैकवचनस्य इटश्च 'टित आत्मनेपदानाम्' इत्येत्वे च कृते भावयामास् ए इति स्थिते 'ह एति' इति सकारस्य हकारः प्राप्तो न भवतीत्यर्थः। कुत इत्यत आह—तासीति। 'ह एति' इत्यत्र तासस्त्योरित्यनुवर्तते। तत्र एधिताहे इत्यादौ तासेः सस्य सार्वधातुक एव एति परे हकार इति निर्विवादम्। तथाविधतासिसाहचर्यादस्तेरपि सकारस्य 'व्यतिहे' इत्यादौ सार्वधातुक एव परे प्रवृत्तिः। अतो 'भावयामासे' इत्यत्र नास्तेः सकारस्य हकारः, एकारस्यार्द्धधातुकत्वादित्यर्थः। भावितेति। ण्यन्तात् भावि ता इति स्थिते परत्वाद्वलादिलक्षणमिटं बाधित्वा चिण्वदिटि तस्याऽऽभीयत्वेनाऽसिद्धत्वाद्वनिटीति निषेधाऽभावाण्णिलोपे भावितेति रूपम्। अत एव चिण्वदिड्विधौ 'उपदेशे योऽ'जित्येव व्याख्यातम्, नतु 'उपदेशे अजन्तस्ये'ति, तथा सति हि

ता । चिण्वदिटः आभीयत्वेनासिद्धत्वाण्णिलोपः । पक्षे भावयिता । भाविष्यते । भावयिष्यते । भाव्यताम् । अभाव्यत । भाव्येत । भाविषीष्ट-भावयिषीष्ट । अभावि । अभाविषाताम् । अभावयिषाताम् । बुभूष्यते । बुभूषांचक्रे । बुभूषिता । बुभूषिष्यते । बोभूय्यते । यङ्लुगन्तात्तु—बोभूयते । बोभवांचक्रे । बोभाविता । बोभविता । 'अकृत्सार्व—' (सू २२९८) इति दीर्घः । स्तूयते विष्णुः । तुष्टुवे । स्ताविता—स्तोता । स्ताविष्यते-स्तोष्यते । अस्तावि । अस्ताविषाताम्-अस्तोषाताम् । 'गुणोऽर्ति' (सू २३८०) इति गुणः । अर्यते । स्मर्यते । सस्मरे । परत्वान्नित्यत्वाच्च गुणे रपरे कृते अजन्तत्वाभावेऽप्युपदेशग्रहणाच्चिण्वदिट् । आरिता । अर्ता । स्मारिता । स्मर्ता । 'गुणोऽर्ति-' (सू २३८०) इत्यत्र नित्यग्रह-

---

णिजन्तस्य उपदेशाभावाच्च स्यादिति भावः । वलादिलक्षणे इटि कृते तु तस्य अनाभीयत्वेन असिद्धत्वाभावादनिटीति निषेधाण्णिलोपाभावे णेर्गुणाऽयादेशयोः कृतयोर्भावयितेति रूपमिति मत्वा आह—पक्षे भावयितेति । अथ सन्नन्तात् भूधातोः भावलकारे उदाहरति—बुभूष्यते इति । यकि सनोऽकारस्य 'अतो लोपः' इति लोपः । बुभूषिता । बुभूषिष्यते इति । चिण्वदिटि वलादिलक्षणे इटि च रूपं तुल्यम् । चिण्वदिड्भावपक्षेऽपि तदतिदेशेन प्राप्तां वृद्धिं बाधित्वा परत्वादतो लोपः । अथ यङन्तात् भूधातोः भावलकारे उदाहरति—बोभूय्यते इति । यकि यङोऽकारस्य पूर्ववदतो लोपः । द्वियकारकं रूपम् । यङ्लुगन्तात् बोभूयते इति एकयकारं रूपम् । ष्टुञ्धातोः कर्मलकारे यकि तस्यार्द्धधातुकत्वात् 'अतो दीर्घो यञि' इत्यप्राप्तावाह—अकृत्सार्वेति । स्ताविता स्तोतेति । चिण्वदिड्भावपक्षे अनिट्कत्वान्नेट् । अथ ऋधातोः कर्मणि लकारे यकि कृते कित्त्वाद्गुणनिषेधे प्राप्ते आह-गुणोऽर्तीति । अर्यते इति । गुणे कृते रपरत्वम् । 'स्मृ' धातोः कर्मणि लकारे आह—स्मर्यते इति । 'गुणोऽर्ति' इति संयोगादित्वात् गुणे रपरत्वमिति भावः । नन्वृटि ऋ ता, स्मृ ता इति स्थिते चिण्वदिटं बाधित्वा परत्वात् गुणः प्राप्नोति नित्यत्वाच्च, अकृते कृते च चिण्वदिटि गुणस्य प्राप्तेः । कृते तु गुणे रपरत्वेऽजन्तत्वाभावाच्चिण्वदिड्भावे अनिट्त्वाद्वलादिलक्षणेऽभावे अर्ता स्मर्तेत्येव स्यात्, आरिता स्मारितेति न स्यादित्यत आह—परत्वादित्यादि । कृते गुणे रपरत्वे अजन्तत्वाऽभावेऽपि उपदेशे योऽच् तदन्तस्येत्युक्तेश्चिण्वदिट् निर्बाध इत्यर्थः । आरितेति । कृतेऽपि गुणे रपरत्वे चिण्वदिटि उपधावृद्धिः । अर्तेति । चिण्वदिड्भावे रूपम् । एवं स्मारिता स्मर्तेत्यपि । नन्वृ सम्पूर्वात् कृञः कर्मणि लकारे यकि 'रिङ् शयग्लिङ्क्षु' । इति रिङादेशे 'सम्परिभ्यां करोतौ भूषणे, 'समवाये च' इति सुटि संस्क्रियते इति वक्ष्यते । तत्र 'गुणोऽर्ति' इति संयोगादित्वात् गुणः स्यादित्यत आह—नित्यग्रहणानुवृत्तेरिति । 'नित्यं छन्दसि' इत्यतो नित्यमित्यनुवृत्तेः 'गुणोऽर्ति' इत्यत्र नित्यं यः संयोगादिस्तस्यैव संयोगादिल-

णानुवृत्तेरुक्तत्वान्नेह गुणः। संस्क्रियते। 'अनिदिताम्—' (सू ४१५) इति नलोपः। स्रस्यते। इदितस्तु नन्यते। सम्प्रसारणम्। इज्यते। 'अयङ् यि क्ङिति' (सू २६४९)। शय्यते। **२७५६ तनोतेर्यकि ६।४।४४॥** आकारोऽन्तादेशो वा स्यात्। तायते। तन्यते। 'ये विभाषा' (सू २३१९)। जायते। जन्यते। **२७६० तपोऽनुतापे च ३।१।६५॥** तपश्च्लेश्चिण्न स्यात्कर्मकर्तर्यनुतापे च। अन्वतप पापेन। पापं कर्तृ। तेनाभ्याहत इत्यर्थः। कर्मणि लुङ्। यद्वा पापेन पुंसा कर्त्रा अशोचीत्यर्थः। 'घुमास्था—' (सू २४६२) इतीत्त्वम्। दीयते। धीयते। 'आदेचः—' (सू २३७०) इत्यत्र अशितीति कर्मधारयादित्संज्ञकशकारादौ निषेधः। एशः आदिशित्त्वाभावात्तस्मिन्नात्त्वम्। जग्ले। **२७६१ आतो युक्चिण्कृतोः**

क्वणो गुण इति लभ्यते। कृञ् तु न नित्यं संयोगादिः, सम्परिपूर्वकत्वाऽभावे तदभावादिति भावः। अथ स्रंसधातोर्भावलकारे यकि विशेषमाह—अनिदितामिति नलोप इति। इदितस्तिष्ठति। 'टु नदि समृद्धौ' इत्यस्माद्भावलकारे यकि इदित्त्वान्नलोपो नेत्यर्थः। अथ यजधातोः कर्मलकारे यकि विशेषमाह—सम्प्रसारणमिति। **वचिस्वपियजादीनाम्** इत्यनेनेति भावः। शीङ्धातोर्भावलकारे यकि विशेषमाह—अयङ्यि क्ङितीति। तनोतेर्यकि। **'विड्वनोः** इत्यतः आदिति **'ये विभाषा'** इत्यतः विभाषेति चानुवर्तते। तदाह—आकारोऽन्तादेशो वा स्यादिति। शेषपूरणमिदम्। तायते तन्यते इति। कर्मणि लकारः। तपोऽनुतापे च। **'च्लेः सिच्'** इत्यतः च्लेरिति **'चिण् ते'** इत्यतश्चिण् इति **'न दधः'** इत्यतो नेति चानुवर्तते। चकारात् **'अचः कर्म'** इत्यतः कर्मक इति समुच्चीयते। तदाह—तपश्च्लेरित्यादि। तत्र कर्मकर्तरि कर्मकर्तृप्रक्रियायामुदाहरिष्यति। अनुतापे कर्मलकारे उदाहरति—अन्वतप पापेनेति। पापेनेति कर्तरि तृतीयेति मत्वा आह=पापं कर्त्रिति। अनुपूर्वस्य तपेः पश्चात्तापार्थकत्वे असङ्गतिः। नहि पापस्य सूर्यादिवत्तपनशक्तिरस्ति। शोकार्थकत्वे अकर्मकत्वापत्तिरित्यत आह—अभ्याहत इति। अनुपूर्वस्तपिरिह उपसर्गवशात् अभिहननार्थक इति भावः। तस्य च सकर्मकत्वात् कर्मलकार उपपद्यते इति मत्वा आह—कर्मणि लुङिति। शोकार्थकत्वमाश्रित्य भावे वा लुङित्याह—यद्वा पापेन पुंसा कर्त्रेति। परिणाममसमीक्ष्य सहसा किञ्चिदकृत्यं कृत्वा पश्चात् दुःखमन्वभवदित्यर्थः। दुःखानुभवः शोकः। धात्वर्थोपसङ्ग्रहादकर्मकः। 'शुच शोके' अकर्मकः। 'पुत्रमनुशोचती'त्यत्र तु वियुक्तं पुत्रं स्मृत्वा शोचतीत्यर्थः। स्मरणे पुत्रस्य कर्मत्वात् द्वितीयेत्यविरोधः। अथ दाधातोर्धाधातोश्च कर्मलकारे यकि विशेषमाह—घुमास्थेतीत्त्वमिति। ग्लैधातोर्भावे क्ङिटस्तादेशस्य एशादेशे 'आदेचः' इत्यात्त्वस्य अशितीति निषेधमाशङ्क्य आह—आदेच इत्यत्रेति। श्वासाविच्छ इति कर्मधारयाश्रयणादित्संज्ञकशकारादौ प्रत्यये परे आत्त्वस्य निषेधो लभ्यते। एशः शित्त्वेऽपि आदिभूतशकारेत्कत्वाभावान्निषेधाऽभावात्तस्मिन् एशि परे आत्त्वं भवत्येवेत्यर्थः। जग्ले इति। आत्त्वे कृते 'आतो लोप इटि च' इति तस्य लोप

७।३।३३॥आदन्तानां युगागमः स्याच्चिणि ञिति णिति कृति च। दायिता—दाता। दायिषीष्ट-दासीष्ट। अदायि। अदायिषाताम्-अदिषाताम्। अधायिषाताम्-अधिषाताम्। अग्लायिषाताम्-अग्लासाताम्। हन्यते। 'अचिण्णलोः' (सू २५७४) इत्युक्तेर्हनस्तो न। 'हो हन्तेः-' (सू ३५८) इति कुत्वम्। घानिता। हन्ता। घानिष्यते-हनिष्यते। आशीर्लिङि वधादेशस्यापवादश्चिण्वद्भावः। आर्धधातुके सीयुटीति विशेषविहितत्वात्। घानिषीष्ट। पक्षे वधिषीष्ट। अघानि।

इति भावः। आतो युक्। अङ्स्येत्यधिकृतमाता विशेषितम्, तदन्तविधिः॥ 'अचो ञ्णिति' इत्यतो ञ्णितीत्यनुवृत्तं कृत एव विशेषणम्, ननु चिणः, तस्य णिस्वाऽऽद्यभिचारात्। तदाह—आदन्तानामित्यादि। दायितेति। चिण्वदिट्पक्षे युक्। अदायिषातामिति। 'स्थाघ्वोरिच्च' इत्येतत् बाधित्वा परत्वाच्चिण्वदिटि कृते 'घुमास्था' इतीत्वं न, अजादित्वात्। पुनः 'स्थाघ्वोरिच्च' इति तु न भवति, अङ्गलादित्वात्। तत्र हि 'हको झल' इति सूत्रात् झल् इत्यनुवृत्तम्। तथाच झलादिरेव सिच् किदिति लाभादिडादिः सिच् न कित्। तत्संनियोगादित्वमपि न भवतीत्याहुः। वस्तुतस्तु सत्यपि तस्मिन्नात्र काचित् क्षतिः। सिचः कित्त्वेऽप्यनिग्लक्षणया वृद्ध्या रूपसिद्धेरिति दिक्। अथ हनधातोः कर्मलकारे आह—हन्यते इति। अचिण्णलोरिति। क्ङिति चिण्वदिटि वृद्धौ 'हनस्तोऽचिण्णलोः' इति हनो नकारस्य तकारो न भवति, चिण्वत्त्वादित्यर्थः। कुत्वमिति। तस्य णिति विहितत्वाऽऽत्र चिण्वत्त्वात् प्राप्तिरिति भावः। घानिष्यते इति। 'ऋद्धनोः' इति बाधित्वा नित्यत्वाच्चिण्वदिट्। 'ऋद्धनोः' इति तु चिण्वदिटि कृते न भवतीत्यनित्यम्, तत्र बलीत्यनुवृत्तेरिति भावः। नन्वाशीर्लिङि घानिषीष्टेत्यत्र हन् सीष्ट इति स्थिते परमपि चिण्वत्त्वं बाधित्वा वधादेशः प्राप्नोति आर्धधातुके विवक्षिते विहितत्वेन वधादेशस्याऽन्तरङ्गत्वादित्यत आह—आशीर्लिङि वधादेशस्यापवादश्चिण्वद्भाव इति। ननु घानितेत्यादौ अप्राप्तेऽपि वधादेशे आरम्भात् कथं वधादेशस्य चिण्वद्भावः अपवादः स्यादित्यत आह—आर्धधातुके सीयुटीति। 'स्यसिच्सीयुट्' इति सूत्रे अजन्तस्य स्ये, अजन्तस्य सिचि, अजन्तस्य आर्धधातुके सीयुटि, अजन्तस्य तासौ, इत्यजन्तस्य चत्वारि वाक्यानि। एवं हनग्रहदृशामप्येकैकस्य चत्वारि वाक्यानीति स्थितिः। तत्र हनः आर्धधातुके सीयुटि चिण्वदिट्विधिनिरवकाशत्वाद्वधादेशापवादः, अप्राप्त एव वधादेशे आरम्भात्। वधादेशस्तु न चिण्वदिटोऽपवादः, तस्य वध्यादित्यत्र कर्तरि लिङि चरितार्थत्वादिति भावः। पक्षे इति। चिण्वत्त्वाऽभावपक्षे 'हनो वध लिङि' इति वधादेशे वलादिलक्षणे इटि अतो लोपे रूपम्, वधादेशस्याऽदन्तत्वात्। नच हनधातोरनुदात्तत्वादुपदेशे एकाच्त्वात्तदीयवधादेशस्यापि तथाविधत्वादिह कथं वलादिलक्षण इडिति वाच्यम्, 'एकाच उपदेश' इत्यत्र 'अच' इत्येकत्वसामर्थ्यादेकत्वे सिद्धे पुनरेकग्रहणबलेन 'य उपदेशे एकाजेव नतु कदाप्यनेका'जिति लभ्यते तेन

अघानिषाताम् । अहसाताम् । पक्षे वधादेशः । अवधि । अवधिषाताम् । 'अघानिष्यत–अहनिष्यत । नच स्यादिषु चिण्वदित्यतिदेशाद्वधादेशः स्यादिति वाच्यम् । 'अङ्गस्य' (सू २००) इत्यधिकारादाङ्गस्यैवातिदेशात् । गृह्यते । चिण्वदिटो न दीर्घत्वम् । प्रकृतस्य वलादिलक्षणस्यैवेटो 'ग्रहोऽलिटि'–(सू २५६२) इत्यनेन दीर्घविधानात् । ग्राहिता–ग्रहीता । ग्राहिष्यते–ग्रहीष्यते । ग्राहिषीष्ट–ग्रहीषीष्ट । अग्राहि । अग्राहिषाताम्–अग्रहीषाताम् । दृश्यते । अदर्शि । अदर्शिषाताम् । सिचः कित्त्वादम्न । अदृक्षाताम् । गिरतेर्लुङि ध्वमि चतुरधिकं शतम् । तथा हि–

वधेर्हन्त्युपदेशमादाय एकाचोऽपि न निषेधः । आदेशोपदेशे अनेकाच्त्वादित्युक्तं प्राक् । लुङि तु सिचश्चिणि उपधावृद्धौ कृत्वेन घः । 'आत्मनेपदेष्वन्यतरस्या'मिति वधादेशाऽभावः । अघानिषातामिति । चिण्वदिटि वधादेशाऽभावपक्षे रूपम् । अहसातामिति । चिण्वदिडभावपक्षे 'हनः सिच्' इति कित्त्वादनुदात्तोपदेशेत्यनुनासिकलोपः । पक्षे अवधीति । 'आत्मनेपदेष्वन्यतरस्याम्' इति वधादेशपक्षे इत्यर्थः । अवधिषातामिति । 'आत्मनेपदेष्वन्यतरस्याम्' इति वधादेशस्यापि पाक्षिकतया अप्राप्तेऽपि वधादेशे चिण्वत्त्वस्यारम्भसामर्थ्यादत्त्वमिति भावः । ननु चिणि वधादेशस्य दृष्टत्वात् स्यादिषु चिण्वत्त्वाद्वधादेशः स्यादित्याशङ्क्य परिहरति—न चेत्यादिना । आङ्गस्यैवेति । वधादेशस्तु द्वैतीयीकः, न त्वङ्गाधिकारस्थ इति भावः । अथ 'ग्रह उपादाने' इत्यस्मादुपधात् कर्मलकारे उदाहरति—गृह्यते इति । 'ग्रहिज्या' इति सम्प्रसारणम् । अथ लुटि तासि चिण्वदिटि 'ग्रहोऽलिटि' इति दीर्घमाशङ्क्य आह—चिण्वदिटो न दीर्घत्वमिति । कुत इत्यत आह—प्रकृतस्येति । वलादिलक्षणस्य इटः प्रकृतत्वात्तस्यैव 'ग्रहोऽलिटि' इति दीर्घविधौ ग्रहणम्, ननु चिण्वदिटः इति भाष्ये स्पष्टम् । ग्राहितेति । चिण्वदिटि रूपम् । ग्रहीतेति । चिण्वदिडभावपक्षे वलादिलक्षणस्य इटो दीर्घे रूपम् । अथ दृशेः कर्मलकारे उदाहरति—दृश्यत इति । लिटि ददृशे । लुटि तासि चिण्वदिट्पक्षे दर्शिता । चिण्वत्त्वाऽभावे 'सृजिदृशोः' इत्यम् । द्रष्टा । दर्शिष्यते द्रक्ष्यते । दर्शिषीष्ट । चिण्वदिडभावे तु 'लिकृसिचावात्मनेपदेषु' इति कित्त्वात् 'सृजिदृशोः' इत्यम्न । नापि लघूपधगुणः । दक्षीष्ट । अदर्शीति । चिणि लघूपधगुणः । अदर्शिषातामिति । चिण्वदिटि रूपम् । चिण्वत्त्वाऽभावे त्वाह—सिचः कित्त्वादम्नेति । 'लिकृसिचावात्मनेपदेषु' इति सिचः कित्त्वात् 'सृजिदृशोः' इत्यम्न भवति, अकितीति पर्युदासादित्यर्थः । अथ गृधातोः कर्मलकारे यकि ऋत इत्वे 'हलि च' इति दीर्घं-गीर्यते । जगरे । लुटि तासि चिण्वत्त्वपक्षे, गारिता । चिण्वत्त्वाऽभावे वलादिलक्षणे इटि गुणे रपरत्वे गरिता—गरीता, 'वृतो वा' इति दीर्घः । गारिष्यते । गरिष्यते । गरीष्यते । गीर्यताम् । अगीर्यत । गीर्येत । गारिषीष्ट । चिण्वत्त्वाऽभावपक्षे तु 'लिकृसिचोरात्मनेपदेषु' इति इड्विकल्पः । इडभावपक्षे 'उश्च' इति कित्त्वम् । इत्त्वम् । रपरत्वम् । 'हलि च' इति दीर्घः ।

चिण्वदिटो दीर्घो नेत्युक्तम् । अगारिध्वम् । द्वितीये त्विटि 'वृतो वा' (सू २३९१) इति वा दीर्घः । अगरीध्वम् । अगरिध्वम् । एषां त्रयाणां लत्वं ढत्वं द्वित्वत्रयं चेति पञ्च वैकल्पिकानि । इत्थं षण्णवतिः । 'लिङ्सिचोः—' (सू २५२८) इति विकल्पादिङभावे 'उश्च' (२३६८) इति कित्त्वम् । इत्वं रपरत्वं 'हलि च' (सू ३५४) इति दीर्घः । 'इणः षीध्वम्—' (सू २२०७) इति नित्यं ढत्वम् । अगीढ्वम् । ढवमानां द्वित्वविकल्पेऽष्टौ । उक्तषण्णवत्या सह सङ्कलने उक्ता संख्येति ।

वत्वम् । गीर्षीष्ट । इट्पक्षे तु, गरिषीष्ट । लुङि अगारि । अगारिषाताम् । अगीर्षाताम् । अगरिषाताम् । इति सिद्धवत्कृत्य आह—लुङि ध्वमि चतुरधिकं शतमिति । रूपाण्यीति शेषः । तदेवोपपादयति—तथाहीति । अगारिध्वमिति । गृ सु ध्वम् इति स्थिते चिण्वदिटि वृद्धौ रपरत्वे 'धि च' इति सलोपे रूपमिति भावः । द्वितीये त्विटीति । चिण्वदिडभावपक्षे वलादिलक्षणे सिचः इटि ऋकारस्य गुणे रपरत्वे 'धि च' इति सलोपे 'वृतो वा' इति दीर्घविकल्पे अगरिध्वम्, अगरीढ्वम् इति रूपद्वयमित्यर्थः । एषामिति । एषां त्रयाणां मध्ये एकैस्मिन् रेफस्य 'अचि विभाषा' इति लत्वम् । 'विभाषेटः' इति वा धस्य ढत्वम् । तथा धस्य तदादेशढस्य, वस्य, मस्य च द्वित्वत्रयमित्येवं पञ्च वैकल्पिकानीत्यर्थः । तत्र धढयोर्मस्य च 'अनचि च' इति द्वित्वविकल्पः । वकारस्य तु 'मय' इति पञ्चमीमाश्रित्य 'यणो मयः' इति द्वित्वविकल्प इति विवेकः । यद्यपि धढयोर्वस्य मस्य च द्वित्वचतुष्टयमिति वक्तुमुचितम्, तथापि ढस्य धस्यानिकतया धढयोरैक्यमभिप्रेत्य 'द्वित्वत्रय'मित्युक्तिः । इत्थमिति । एवञ्च त्रयाणामेषां लत्वविकल्पे रेफवन्ति त्रीणि, लकारवन्ति त्रीणि इति षट् । एषु षट्सु धस्य द्वित्वविकल्पे एकधानि षट्, द्विधानि च षडिति द्वादश । तथा रेफवत्सु त्रिषु लकारवत्सु च त्रिषु ढस्य द्वित्वविकल्पे एकढानि षट्, द्विढानि च षडिति द्वादश । उभयेषामपि द्वादशानां मेलने चतुर्विंशतिः । एषु वस्य द्वित्वविकल्पे एकवानि चतुर्विंशतिः, द्विवानि चतुर्विंशतिरित्यष्टाचत्वारिंशत् । एषु मस्य द्वित्वविकल्पे एकमान्यष्टाचत्वारिंशत्, द्विमान्यष्टाचत्वारिंशदिति षण्णवतिरित्यर्थः । लिङ्सिचोरितीति । चिण्वदिडभावपक्षे वलादिलक्षणस्य इटो 'लिङ्सिचोः' इति विकल्पितत्वात्तदभावपक्षे, 'उश्च' इति सिचः कित्त्वादगुणाभावे ऋत इत्वे रपरत्वे 'हलि च' इति दीर्घे रेफादिण्यः परत्वात् 'इणः षीध्वम्' इति नित्यं ढत्वे अगीढ्वमिति रूपमित्यर्थः । ढवमानामिति । ढस्य 'अचो रहाभ्याम्' इति द्वित्वविकल्पे एकढं द्विढमिति द्वे रूपे । तयोः वस्य 'यणो मयः' इति द्वित्वविकल्पे एकवे द्वे, द्विवे द्वे इति चत्वारि । एषु चतुर्षु मस्य 'अनचि च' इति द्वित्वविकल्पे एकमानि चत्वारि, द्विमानि चत्वारीत्यष्टौ रूपाणीत्यर्थः । षण्णवत्येति । उक्तषण्णवत्या अष्टानां मेलने सति या संख्या सिध्यति सा चतुरुत्तरशतसंख्या उक्तेति ज्ञेयमित्यर्थः । उक्तप्रक्रियां श्लोकेन सङ्गृ-

इट् दीर्घश्चिण्वदिट् लत्वढत्वे द्वित्वत्रिकं तथा।
इत्यष्टानां विकल्पेन चतुर्भिरधिकं शतम्॥

हेतुमण्यन्तात्कर्मणि लः। यक् णिलोपः। शम्यते मोहो मुकुन्देन। २७६२

चिण्णमुलोर्दीर्घोऽन्यतरस्याम् ६।४।९३॥ चिण्परे णमुलपरे च णौ मितामुपधायाः दीर्घो वा स्यात्। प्रकृतो 'मितां ह्रस्वः' (सू २५६८) एव तु न विकल्पितः। ण्यन्ताण्णौ ह्रस्वविकल्पासिद्धेः। दीर्घविधौ हि णिचो लोपो न स्थानिवदिति दीर्घः सिध्यति। ह्रस्वविधौ तु स्थानिवत्त्वं दुर्वारम्। भाष्ये तु 'पूर्वत्रासिद्धे न स्था-

---

ह्वाति—ह्वट्दीर्घ इत्यादिना। बलादिलक्षण इट्, 'वृतो वा' इति दीर्घः। अजन्तलक्षणः चिण्वदिट् 'अचि विभाषा' इति ह्रस्वं, 'विभाषेट' इति वा ह्रस्वं धत्वमानां द्वित्वत्रिकमित्यष्टानां विकल्पात् चतुरधिकं शतं रूपाणीत्यर्थः। 'शम्यते मोहो मुकुन्देने'त्यत्र प्रक्रियां दर्शयति—हेतुमण्यन्तादिति। शमधातोर्हेतुमण्णौ उपधावृद्धौ अमन्तत्वेन मिस्वादुध्रस्वे शमीत्यस्मात्कर्मणि लः, नतु भावे, हेतुमण्यन्तस्य सकर्मकत्वनियमादिति भावः। यगिति। तस्मिन् कृते 'सार्वधातुके यक्' इत्यनेनेति शेषः। णिलोप इति। 'णेरनिटि' इत्यनेनेति शेषः। लुटि तासि ऋमि ह ता इति स्थिते अमन्तत्वेन मिस्वादित्यमुपधाह्रस्वे प्राप्ते—चिण्णमुलोः। 'दोषो णौ' इत्यतो णाविति 'ऊदुपधाया गोहः' इत्यस्मादुपधाया इति 'मितां ह्रस्वः' इत्यतो मितामिति चानुवर्तते। तदाह—चिण्परे इत्यादिना। नन्विह दीर्घग्रहणं व्यर्थम्। 'चिण्णमुलोरन्यतरस्या'मित्येतावतैव मितां ह्रस्वः' इति पूर्वसूत्रादनुवृत्तस्य ह्रस्वस्य विकल्पे दीर्घविकल्पस्य सिद्धेरित्यत आह—प्रकृतो मितां ह्रस्व एव तु न विकल्पितः इति। कुत इत्यत आह—ण्यन्ताण्णाविति। शमधातोर्ण्यन्ताण्णौ पूर्वणेर्लोपे लुटि तासि ण्यन्तस्याऽजन्तत्वाच्चिण्वदिटि तस्याऽऽभीयत्वेनासिद्धतया 'अनिटी'ति निषेधाऽभावाण्णिलोपे दीर्घविकल्पे सति शमिता शामितेति रूपद्वयमिष्यते। ह्रस्वविकल्पस्य विधौ तु ह्रस्वविकल्पो न स्यात्। प्रथमणिलोपस्य 'अचः परस्मिन्' इति स्थानिवत्त्वेन व्यवहिततया चिण्परकणिपरकत्वाभावादित्यर्थः। दीर्घविकल्पविधौ तु न दोष इत्याह—दीर्घविधाविति। दीर्घविकल्पविधौ हि प्रथमस्य णिचो लोपो न स्थानिवत्, दीर्घविधौ स्थानिवत्त्वनिषेधात् अतोऽत्र दीर्घविकल्पः सिध्यति। ह्रस्वविधौ तु प्रथमणिलोपस्य स्थानिवत्त्वं दुर्वारम्, तत्र स्थानिवत्त्वनिषेधाभावादित्यर्थः। भाष्ये स्विति। न पदान्तसूत्रस्थभाष्ये तु 'पूर्वत्रासिद्धे न स्थानिवत्' इत्येव सिद्धत्वात् 'न पदान्त' सूत्रे द्विर्वचनसवर्णानुस्वारदीर्घजश्चरःप्रत्याख्याताः। सुदुध्युपास्य इत्यत्र 'अनचि च' इति द्विर्वचनस्य, शिण्ढीत्यत्र 'नश्च' इत्यनुस्वारस्य 'अनुस्वारस्य ययि' इति परसवर्णस्य च, प्रतिदीव्न इत्यत्र 'हलि च' इति दीर्घस्य, सरिधरित्यत्र 'झलां जश् झशि' इति जश्त्वस्य, जक्षतुरित्यत्र 'खरि च' इति चर्त्वस्य च पूर्वत्राऽसिद्धीयत्वादित्यर्थः। नन्वेवं ण्यन्ताण्णौ 'चिण्णमुलोः'

णिवत्' इत्यवष्टभ्य द्विर्वचनसवर्णानुस्वारदीर्घजश्चरः प्रत्याख्याताः। णाविति जाति-परो निर्देशः। दीर्घग्रहणं चेदं मास्तिवति तदाशयः। शामिता। शमिता-शमयिता। शामिष्यते-शमिष्यते-शमयिष्यते। यङन्ताण्णिच्। शंशम्यते। शंशामिता-शंशमिता-शंशमयिता। यङ्लुगन्ताण्णिच्यप्येवम्। भाष्यमते तु यङन्ता-च्चिण्वदिटि दीर्घो नास्तीति विशेषः। ण्यन्तत्वाभावे शम्यते मुनिना। २७६३ **नोदात्तोपदेशस्य मान्तस्यानाचमेः** ७।३।३४॥ उपधाया वृद्धिर्न स्याच्चिणि ञिणि णिति कृति च। अशमि। अदमि। उदात्तोपदेशस्य इति किम्। अगामि। मान्तस्य किम्। अवादि। अनाचमेः किम्। आचामि। 'अनाचमिकमिवमीना-

इति दीर्घे कर्तव्ये प्रथमणिलोपस्य स्थानिवत्वं दुर्वारम्, 'चिण्णमुलोः' इति दीर्घस्य पूर्वत्रासिद्धीयत्वाऽभावात्। ततश्च प्रथमणिचा व्यवहितत्वात् दीर्घाऽनापत्तिः। एवञ्च तत्र दीर्घे कर्तव्ये स्थानिवत्वनिवारणाय दीर्घग्रहणस्यावश्यकत्वात्कथं दीर्घग्रहण-प्रत्याख्यानमित्यत आह—णाविति। 'चिण्णमुलोः' इति दीर्घविधौ चिण्परे णमुल्परे च 'णौ' इत्यत्र णाविति णित्वजातिप्रधानो निर्देशः। चिण्णमुल्परकणित्वजातौ परतः इति लभ्यते। णित्वजातिश्च णिद्वयेऽस्तीति प्रथमणेः स्थानिवत्वेऽपि दीर्घो निर्बाध इति 'न पदान्त' सूत्रे दीर्घग्रहणप्रत्याख्यानभाष्यस्याशय इत्यर्थः। शामिता-शमितेति। शमधातोर्ण्यन्तात्लुटि तासि चिण्वदिटि दीर्घविकल्पः। शमयितेति। चिण्व-त्वाऽभावे वलादिलक्षणे इटि रूपम्। यङन्तादिति। शमधातोर्यङि शंशम्य इत्य-स्मात् हेतुमण्णौ 'यस्य हलः' इति यकारलोपे अतो लोपे 'शंशमि' इत्यस्मात् कर्म-ण्यकारे णिलोपे 'शंशम्यते' इति रूपमित्यर्थः। शंशामिता—शंशमितेति। 'चिण्णमुलोः' इति दीर्घविकल्पः। शंशमयितेति। चिण्वत्त्वाऽभावे वलादिलक्षणे इटि रूपम्। भाष्य-मते त्विति 'न पदान्त' सूत्रे दीर्घग्रहणप्रत्याख्यानपरभाष्यमते त्वित्यर्थः। यङन्तादिति। 'ण्यन्ता'दिति शेषः। यङन्ताण्णिचि यङ्लोपे अयङ्लोपे च कृते 'शंशमी' त्यस्मात्लुटि तासि चिण्वदिटि कृते तस्यासिद्धत्वाण्णिलोपे 'शंशमिते' त्यत्र अयङ्लोपस्य स्थानिवत्वेन णिच्परकत्वाऽभावात् 'चिण्णमुलोः' इति दीर्घो नास्ति, भाष्यमते 'न पदान्त' सूत्रे दीर्घग्रहणाऽभावेन स्थानिवत्वनिषेधाऽभावादित्यर्थः। शम्यते मुनिनेति। अकर्मकत्वा-द्भावे लः इति भावः। नोदात्तोपदेशस्य। 'मृजेर्वृद्धिः' इत्यतो वृद्धिरिति 'अत उपधायाः' इत्यतः उपधाया इति 'अचो ञ्णिति' इत्यतो ञ्णितीति 'आतो युक्' इत्यतश्चिण्ण-कृतोः इति चानुवर्तते। तत्र ञ्णितीति कृत एव विशेषणम्, नतु चिण्णः अस्यभिचा-रात्। तदाह—उपधाया इत्यादिना। अनुदात्तोपदेशाः सकृद्गृहीताः। ततोऽन्यः सर्वोऽपि धातुरुदात्तोपदेशः। आदूपूर्वमिराचमिः तद्भजंस्येत्यर्थः। अशमि। अदमीति। शम-धातोर्दमधातोश्च लुकि चिणि 'अत उपधायाः' इति वृद्धिर्न। अगामीति। गमेरनुदा-त्तोपदेशत्वादिति भावः। अवादीति। वदधातुर्न मान्त इति भावः। आचामीति। अ-

मिति वक्तव्यम्' (वा ४५१८)। चिणि 'आयादयः—' (सू २३०५) इति णिङभावे। अकामि। णिङ्णिचोरप्येवम् अवामि। वध हिंसायाम्, हलन्तः। 'जनिवध्योश्च' (सू २५१२) इति न वृद्धिः। अवधि। 'जाग्रोऽविचिण्णल्ङित्सु' (सू २४८०) इत्युक्तेर्न गुणः। अजागारि। **२७६४ भज्जेश्च चिणि ६।४।३३॥** नलोपो वा स्यात्। अभाजि-अभञ्जि। **२७६५ विभाषा चिण्णमुलोः ७।१।६९॥** लभेर्नुमागमो वा स्यात्। अलम्भि-अलाभि। व्यवस्थितविकल्पत्वात्प्रादेर्नित्यं नुम्। प्रालम्भि। द्विकर्मकाणां तु।

गौणे कर्मणि दुह्यादेः प्रधाने नीह्रकृष्वहाम्।
बुद्धिभक्षार्थयोः शब्दकर्मकाणां निजेच्छया॥
प्रयोज्यकर्मण्यन्येषां ण्यन्तानां लादयो मताः।

नाचमेरित्युक्तेरिह नोपधावृद्धिनिषेधः। अनाचमिकमिवमीनामिति। आचमिकमिवमिवर्ज्यानाम् इत्यर्थः। एवञ्च कमिवमोरपि न निषेध इति फलितम्। ननु कमेर्णिङन्तत्वात् केवलस्य तस्य चिण्यादौ प्रयोग एव नास्तीत्यत आह—चिण्यादय इति। णिङ् णिचोरप्येवमिति। णिङन्तात्णिजन्ताद्वा कमेश्चिणि णिलोपे सति पूर्ववत् रूपं शिष्यते इत्यर्थः। ननु 'जनिवध्योश्च' इति वधेरुपधावृद्धिनिषेधोऽव्यर्थः। वधादेशस्याऽदन्ततया अङ्गोपस्य स्थानिवत्त्वादेव अवधीत्यादौ उपधावृद्ध्यभावसिद्धेरित्याशङ्क्य वधिर्धात्वन्तरं हलन्तमेव 'जनिवध्योश्च' इत्यत्र गृह्यत इत्यभिप्रेत्य आह—वध हिंसायां हलन्त इति। भज्जेश्च चिणि। 'श्नाञ्लोपः' इत्यतो नेति लुप्तषष्ठीकं, लोप इति चानुवर्तते। 'जान्तनशां विभाषा' इत्यतो विभाषेति मत्वा शेषं पूरयति—नलोपो वा स्यादिति। अभाजीति। नञ्लोपपक्षे उपधावृद्धिः। विभाषा चिण्णमुलोः। 'लभेश्च' इत्यतो लभेरिति 'हृदितो नुम्' इत्यतो नुमिति चानुवर्तते इति मत्वा शेषं पूरयति—लभेर्नुमागमो वेति। ननु प्रालम्भि उपालम्भीत्यादौ उपसर्गपूर्वस्यापि लभेः नुम्विकल्पः स्यादित्यत आह—व्यवस्थितेति। प्रादेरुपसर्गात्परस्य लभेर्नित्यं नुम्। अनुपसर्गात्परस्य तु लभेर्विभाषा नुमिति व्यवस्थितविकल्पाश्रयणादुपसर्गपूर्वस्य लभेर्नित्यं नुमित्यर्थः। वस्तुतस्तु 'चिण्णमुलोरनुपसर्गस्य' इति वार्तिकात् भाष्ये 'उपसर्गात् खलञोः' इत्यतः उपसर्गादिति 'न सुदुर्भ्याम्' इत्यतो नेति चानुवर्त्य उपसर्गात्परस्य लभेः 'विभाषा चिण्णमुलोः' इति नेति व्याख्यातम्। तेन प्रपूर्वस्य लभेर्नित्यं नुमिति व्याख्यानं परास्तम्। 'लः कर्मणि' इति लकारा विहिताः। तथा 'तयोरेव कृत्यक्तखलर्थाः' इति कर्मणि कृत्यादिप्रत्यया वक्ष्यन्ते। ते तावत् द्विकर्मकधातुषु कतरस्मिन् कर्मणि भवन्तीत्यत्र व्यवस्थामाह—'द्विकर्मकाणां रिति। 'कर्मप्रत्ययव्यवस्था वक्ष्यते' इति शेषः। तां व्यवस्थां सार्धश्लोकेन दर्शयति—गौणे कर्मणीत्यादिना। दुह्याच्पच्दण्डृरुधिप्रच्छिचिब्रूशासुजिमथ्मुषां गौणे कर्मणि लादयो मता इत्यन्वयः। 'अकथितं

(१०९०—१०९५ वार्तिकार्थः) । गौर्दुह्यते पयः । अजा ग्रामं नीयते । हियते । कृष्यते । उह्यते । बोध्यते माणवकं धर्मः, माणवको धर्ममिति वा । भोज्यते माणवकमोदनः, माणवक ओदनं वा । देवदत्तो ग्रामं गम्यते । 'अकर्मकाणां

च' इति सूत्रेण यस्य कर्मसंज्ञा तत् गौणं कर्मेति बोध्यम् । प्रधाने इति । नीहृकृष्वहां प्रधाने कर्मणि लादयो मता इत्यन्वयः । 'अकथितं च' इति सूत्रादनेन यस्य कर्मसंज्ञा तत्प्रधानं कर्मेति बोध्यम् । अथ 'गतिबुद्धि' इति सूत्रेण ये द्विकर्मकाः तेषु व्यवस्थामाह—बुद्धीति । बुद्ध्यर्थकस्य भक्ष्यार्थकस्य शब्दकर्मकाणां च प्रधाने वा गौणे वा कर्मणि स्वेच्छया लादयो मता इत्यन्वयः । इह 'गतिबुद्धि' इत्यनेन यस्य कर्मसंज्ञा तत् गौणं कर्म । तद्वितरत्तु प्रधानं कर्म । प्रयोज्येति । अन्येषां गत्यर्थानां अकर्मकाणां 'हृक्रोः' इति सूत्रोपात्तहृकृभ्योश्च प्रयोज्यकर्मणि लादयो मता इत्यन्वयः । अयं सार्धश्लोकः 'अकथितं च' इति सूत्रस्थवार्तिकभाष्यसंग्रह इति बोध्यम् । गौर्दुह्यते पयः इति । 'गोपेनेति' शेषः । अत्र गोरप्रधानकर्मत्वात्तस्मिन् कर्मणि लकारः । तिङा अभिहितत्वात् गोः प्रथमा । प्रधानकर्मत्वात्पय इति द्वितीयान्तम्, तस्य तिङा अनभिहितत्वात् । बलिर्याच्यते वसुधाम् । अविनीतो विनयं याच्यते । तण्डुलाः ओदनं पच्यन्ते गर्गाः शतं दण्ड्यन्ते । व्रजो रुध्यते गाम् । माणवकः पन्थानं पृच्छ्यते । वृक्षोऽवचीयते फलानि । माणवको धर्मम् उच्यते । शिष्यते वा । शतं जीयते देवदत्तः । सुधां क्षीरोदधिर्मथ्यते । देवदत्तः शतं मुष्यते । एतेषु गौणकर्मणि लकारः । अथ 'प्रधाने नीहृकृष्वहाम्' इत्यत्रोदाहरति—अजा ग्रामं नीयते, ह्रियते, कृष्यते, उह्यते इति । प्रतिक्रियमजा ग्राममित्यन्वेति । उह्यत इत्यत्र वहतेर्यंजादित्वात्सम्प्रसारणम् । अत्र अजायां प्रधानकर्मणि लकारः, ग्रामस्याऽनभिहितत्वात् द्वितीया । बुद्ध्यर्थस्योदाहरति—बोध्यते माणवकं धर्मः, माणवको धर्ममिति वेति । 'गुरुणे'ति शेषः । अत्र माणवके गौणकर्मणि धर्मे वा प्रधानकर्मणि व्यन्तात् लकारः । भक्ष्यार्थस्य तु 'अश्यन्ते देवाः अमृतं हरिणा' अश्यतेऽमृतं देवानिति वा उदाहार्यम् । शब्दकर्मकस्य तु वेदोऽध्याप्यते विधिं हरिणा, वेदमध्याप्यते विधिरिति वेत्युदाहार्यम् । यदुक्तं 'गत्यर्थानामकर्मकाणां हृकृभ्योश्चेत्येतेषां प्रयोज्यकर्मणि लकार इति । तत्र गत्यर्थस्योदाहरति—देवदत्तो ग्रामं गम्यते इति । 'यज्ञदत्तेने'ति शेषः । अत्र प्रयोज्यकर्मणि देवदत्ते गमेर्व्यन्तात् लः । ननु अकर्मकाणां व्यन्तानां प्रयोज्यकर्मण्येव लादय इति व्यवस्था व्यर्था । तत्र प्रयोज्यं विना अन्यस्य कर्मणोऽभावादित्याशङ्क्य 'अकर्मकधातुभिर्योगे देशः कालो भावो गन्तव्योऽध्वा च कर्मसंज्ञक इति वाच्यम्, इति वार्तिकेन अकर्मकधातूनामपि देशकालादिकर्मत्वेन व्यन्तानां तेषां द्विकर्मकतया प्रयोज्यकर्मण्येव तत्र लादय इति व्यवस्था प्रयोजनवतीत्यभिप्रेत्य 'मासमास्यते माणवक' इति व्यन्ते प्रयोज्यकर्माण माणवके एव लः, नतु मासे कर्मणि इत्युदाहरिष्यते । एवं तर्हि अव्यन्तेष्वकर्मकेषु 'मासमास्यते देवदत्तेने'ति भावे लकारो न स्यात्, 'सकर्मकेभ्यः कर्मणि कर्तरि च ल' इति नियम-

कालादिकर्मकाणां कर्मणि भावे च लकार इष्यते'। मासो मासं वा आस्यते देवदत्तेन। णिजन्तात्तु प्रयोज्ये प्रत्ययः। मासमास्यते माणवकः।

इति भावकर्मतिङ्प्रकरणम्।

अथ कर्मकर्तृतिङ्प्रकरणम् ॥ २१ ॥

यदा सौकर्यातिशयं द्योतयितुं कर्तृव्यापारो न विवक्ष्यते तदा कारकान्तराण्यपि कर्तृसंज्ञां लभन्ते। स्वव्यापारे स्वतन्त्रत्वात्। तेन पूर्वं करणत्वादिसत्वेऽपि

मात्। 'मास आस्यते देवदत्तेने'त्येव कर्मणि मासे लकारः स्यादित्याशङ्क्य आह—अकर्मकाणामित्यादि। ये अकर्मकाः 'कर्तुरीप्सिततमं कर्म, तथायुक्तं चानीप्सितम्' इति सूत्रसिद्धकर्मरहिताः 'आस उपवेशने' वृतु वर्तने' इत्यादयः, तेषां 'अकर्मकधातुभिर्योगे' इति वार्तिकसिद्धकर्मकाणां कर्मणि भावे च लकार इष्यते इत्यर्थः। न चेदं वार्तिकमिति भ्रमितव्यम्, भाष्ये अदर्शनात्। किन्तु न्यायमूलकमेव, अकर्मकधातुभिर्योगे देशकालादीनां कर्मसंज्ञाविकल्पस्य भाष्याद्यभिमतत्वात्। यथा चैतत्तथा कारकाधिकारे 'अकर्मकधातुभिर्योगे' इति वचनव्याख्यावसरे अवोचाम। तदाह—मासो मासं वा आस्यते देवदत्तेनेति। अत्र मासस्य कर्मत्वपक्षे कर्मणि लकारः, मासस्याऽभिहितत्वात् प्रथमा। मासस्य कर्मत्वाऽभावपक्षे तु भावे लकारः। मास इति सप्तमी। मासमिति त्वपपाठः। अथ प्रकृतमनुसरति—णिजन्तादिति। आसधातोः प्रकृतिसिद्धकर्मरहितत्वेन अकर्मकाण्णौ मासस्य कर्मत्वपक्षेऽपि प्रयोज्यकर्मण्येव लकार इत्यर्थः। मासमास्यते माणवक इति। ण्यन्तात्प्रयोज्यकर्मणि माणवके लः। मासस्याऽनभिहितत्वात् द्वितीया। हक्रोरन्यतरस्यां' इति णिच्। हारयते कार्यते वा भृत्यैः कटं देवदत्तेन। इति श्रीवासुदेवदीक्षितविदुषा विरचितायां सिद्धान्तकौमुदीव्याख्यायां बालमनोरमाख्यायां भावकर्मप्रक्रिया समाप्ता।

अथ कर्मकर्तृप्रक्रियां निरूपयिष्यन् कर्मणः कर्तृत्वं साधयितुमाह—यदेति। 'फलव्यापारयोर्धातु'रिति सिद्धान्तः। पचिर्हि विक्लित्त्यनुकूलव्यापारे वर्तते। तत्र विक्लित्तिः फलम्। तदाश्रय ओदनं कर्म। तदनुकूलो अधिश्रयणादिः पुरुषप्रयत्नरूपो व्यापारः। तत्राधिश्रयणं चुल्ल्या उपरि तण्डुलयुक्तस्थाल्याः स्थापनम्। स्थापनं स्थित्यनुकूलव्यापारः। तत्र स्थितिः स्थालीतण्डुलनिष्ठा। तदनुकूलः पुरुषचेष्टाविशेषः। धात्वर्थोक्तव्यापाराश्रयः पुरुषः कर्ता, स्वतन्त्रत्वात्। स्वातन्त्र्यं प्राधान्यमिति भाष्यम्। कर्मकरणादिकं तु पुरुषप्रयत्नपरतन्त्रत्वान्न कर्तृत्वं लभते इति स्थितिः। तत्र यदा सौकर्यातिशयविवक्षया कर्तुः पुरुषस्य व्यापारः प्रयत्नः न विवक्ष्यते, किन्तु कर्मादिगत एव व्यापारः विक्लित्त्यादिफलानुकूलत्वेन विवक्ष्यते तदा कर्मादिकारकाण्यपि कर्तृसंज्ञां लभन्ते इत्यर्थः। ननु कर्मादिगतव्यापारस्य पुरुषप्रयत्नाधीनत्वात् स्वतन्त्रत्वात्कथं कर्मणः कर्तृत्वमित्यत आह—स्वव्यापारे स्वतन्त्रत्वादिति। स्वातन्त्र्येण विवक्षितत्वादित्यर्थः। तदुक्तं 'कर्मवत्कर्मणा' इत्यत्र भाष्ये-'कर्मकर्तरि कर्तृत्वं स्वा-

सम्प्रति कर्तृत्वात्कर्तरि लकारः। साध्वसिश्छिनत्ति। काष्ठानि पचन्ति। स्थाली पचति। कर्मणस्तु, कर्तृत्वविवक्षायां प्राक्सकर्मका अपि प्रायेणाकर्मकाः। तेभ्यो भावे कर्तरि च लकाराः। पच्यते ओदनेन। भिद्यते काष्ठेन। कर्तरि तु-२७६ **कर्मवत्कर्मणा तुल्यक्रियः ३।१।८७॥** कर्मस्थया क्रियया तुल्यक्रियः कर्ता कर्मवत्स्यात्। कार्यातिदेशोऽयम्। तेन यगात्मनेपदचिण्क्विण्वदिटः स्युः। कर्तुर-

---

तन्त्रस्य विवक्षितत्वात्' इति। अत्र कर्मग्रहणं करणादिकारकस्याप्युपलक्षणम्। तेनेति। असिना छिनत्तीत्यादिप्रयोगदशायां असिकुठारादीनां करणत्वादिसत्त्वेऽपि, 'असिः छिनत्ति' इत्यादिप्रयोगदशायां कर्तृत्वेन विवक्षितत्वात् कर्तरि लकार इत्यर्थः। सा-ध्वसिः छिनत्तीति। अत्र करणस्य कर्तृत्वविवक्षा। 'साधु' इति क्रियाविशेषणं सौकर्या-तिशयद्योतनाय। अतितैक्ष्ण्यात् पुरुषप्रयत्नविशेषमाघातातिशयं विना स्वयमेव असिः छिनत्तीत्यर्थः। काष्ठानि पचन्तीति। अत्रापि करणानां कर्तृत्वविवक्षा। स्थाली पचतीति। अत्राधिकरणस्य कर्तृत्वविवक्षा। काष्ठानामतिशुष्कत्वात् धमनफूत्कारानपेक्षया स्था-ल्या अतिलघुत्वादविलम्ब्यश्रपणतया सौकर्यं बोध्यम्। कर्मणस्त्विति। ये छिदिभि-दिप्रभृतयः एककर्मकाः, तत्र कर्मणः कर्तृत्वविवक्षायां 'वृक्षः छिनत्ती'त्यादौ प्राक्सक-र्मकत्वेऽपि सम्प्रति कर्मणः कर्तृत्वविवक्षायामकर्मका एते इत्यर्थः। ये तु द्विकर्मकाः, तत्र एकस्य कर्मणः कर्तृत्वविवक्षायामपि इतरेण कर्मणा सकर्मकत्वसत्त्वात्प्रायेणेत्यु-क्तिः। ततश्च तेषु द्विकर्मकेषु कर्मणि कर्तरि च लकारः। तत्र कर्मणि लकारे यथा—'सुधां क्षीरसागरो मथ्नते'। कर्तरि यथा—'सुधां क्षीरसागरो मथ्नाति'। अथ यदु-क्तं-एककर्मकेषु कर्मणः कर्तृत्वविवक्षायामकर्मकत्वमिति, तस्य प्रयोजनमाह—तेभ्यो भावे कर्तरि च लकारा इति। नतु कर्मणि, असम्भवात्। अत एव 'अकर्मकेभ्यो भावे कर्तरि ल' इत्युक्तमिति भावः। तत्र एककर्मकेभ्यः कर्मणः कर्तृत्वविवक्षायां भावे ल-कारमुदाहरति—पच्यते ओदनेनेति। ओदनकर्तृकः पाक इत्यर्थः। एवं भिद्यते काष्ठेने-त्यपि। यद्यपि पचेर्द्विकर्मकत्वम्, तथापि तण्डुलानामविवक्षायाम् एककर्मकत्वं पचेरा-श्रितम्। कर्तरि त्विति। एककर्मकेषु कर्मणः कर्तृत्वविवक्षायां कर्तरि लकारे विशेषो वक्ष्यते इत्यर्थः। कर्मवत्कर्मणा। 'कर्तरि शप्' इत्यतः कर्तरीत्यनुवृत्तं प्रथमया विपरि-णम्यते। तुल्या क्रिया यस्य सः तुल्यक्रियः कर्ता। 'कर्मणे'त्यनेन कर्मकारकस्था क्रिया विवक्षिता, क्रियायाः कर्मकारकेण। तुल्यत्वस्य तत्स्थक्रियामादायैव उपपाद्यत्वात्। तदाह—कर्मस्थयेत्यादिना। कर्मणः कर्तृत्वेन विवक्षायां कर्ता कर्मवदिति यावत्। व्याकरणाऽभावे तु कर्मसंज्ञक इत्यर्थशङ्का स्यात्। तथा सति सकर्मकत्वात् पच्यते ओदनेन भिद्यते काष्ठेनेति भावे लो न स्यात्। कार्यातिदेशोऽयमिति। यद्यपि शास्त्राति-देशे कार्यातिदेशे वा न फलभेदः। तथापि शास्त्रातिदेशस्यापि कार्यातिदेशार्थत्वा-न्मुख्यत्वात् कार्यातिदेश एवाश्रयणीय इत्यर्थः। तेनेति। 'स्युरित्यत्रान्वेति। कर्म-वत्त्ववचनेन कर्मकार्याणि 'सार्वधातुके यक्' इति यक्, 'भावकर्मणोः' इत्यात्मने-

भिहितत्वात् प्रथमा। पच्यते ओदनः। भिद्यते काष्ठम्। अपाचि। अभेदि। ननु भावे लकारे कर्तुर्द्वितीया स्यादस्मादतिदेशादिति चेन्न। लकारवाच्य एव हि कर्ता कर्मवत्। 'लिङ्याशिष्यङ्' (सू ३।३४) इति द्विलकारकात् लः इत्यनुवृत्तेः, भावे प्रत्यये च कर्तुर्लकारेणानुपस्थितेः। अत एव कृत्यक्तखलर्थाः कर्मकर्तरि न भवन्ति। किंतु भाव एव। भेत्तव्यं कुसूलेन। ननु पचिभिद्योः कर्मस्था क्रिया विक्तित्तिर्द्विधाभवनं च। संवेदानीं कर्तृस्था ननु तत्तुल्या। सत्यम्। कर्मत्वकर्तृत्वाव-

---

पदम्, 'चिण् भावकर्मणोः' इति चिण्, 'स्यसिच्सीयुट्तासिषु' इति चिण्वत्त्वं, तस्य नियोगशिष्टः इट् च स्युरित्यर्थः कर्मणः कर्तृत्वविवक्षायां कर्तरि विहितानि शास्त्रान्येव न स्युरिति भावः। कर्तुरिति। कर्मणः कर्तृत्वविवक्षायां कर्तरि लकारे सति तदादेशादिति कर्तुरभिहितत्वादित्यर्थः। पच्यते ओदन इति। फूत्कारादिपुरुषश्रमातिशयविशेषं विना विक्लित्त्याश्रयो भवतीत्यर्थः। भिद्यते काष्ठमिति। कुठारादिदृढाघातं पुरुषश्रमं विना द्विधा भवतीत्यर्थः। अत्र कर्मणः कर्तृत्वेऽपि कर्मत्वादतिदेशाच्च। अपाचि अभेदीति। अत्र कर्मवत्त्वाच्चिण्। ननु कर्मणः कर्तृत्वविवक्षायां भावलकारे पच्यते ओदनेन, भिद्यते काष्ठेनेत्यत्र कर्मकर्तुस्तिङाऽनभिहितत्वात् द्वितीया स्यात्, कर्मवत्त्वातिदेशादित्याशङ्क्ते—नन्विति। परिहरति—नेति। नायमाक्षेप उन्मिषतीत्यर्थः। कुत इत्यत आह—लकारवाच्य एव हि कर्ता कर्मवदिति। तच्च कुत इत्यत आह—लिङ्याशिषीति। 'ञ्यत्ययो बहुलम्, लिङ्याशिष्यङ्' इति संहितया पाठे लकारात् पूर्वं लकारान्तरं 'हलो यमाम्' इति लुप्तं प्रश्लिष्यते। ततश्च ल् ङ् इति द्विलकारात् सूत्रात् ल् इति षष्ठ्यन्तं 'कर्मवत्कर्मणा' इत्यत्रानुवर्तते। तथाच लः कर्ता कर्मवदिति लभ्यते। वाच्यत्वं षष्ठ्यर्थः। तथाच लकारवाच्यः कर्ता कर्मवदिति पर्यवस्यतीत्यर्थः। अस्त्वेवम्, प्रकृते किमायातमित्यत आह—भावे प्रत्यये च कर्तुर्लकारेणानुपस्थितेरिति। तत्र भावस्यैव तद्वाच्यत्वादिति भावः। अत एवेति। लकारवाच्यस्यैव कर्मकर्तुः कर्मवत्त्वविधानादेव कृत्यक्तखलर्थाः प्रत्ययाः कर्मणि विहिताः कर्मकर्तरि न भवन्ति, तस्य लकारवाच्यत्वाऽभावेन कर्मवत्त्वस्य तत्राऽप्रवृत्तेरित्यर्थः। एतच्च भाष्ये स्पष्टम्। ननु 'सिनोतेर्ग्रासकर्मकर्तृकस्य' इति निष्ठानत्ववार्तिके 'सिनो ग्रासः स्वयमेवे'ति भाष्ये कथमुदाहृतम्। क्तप्रत्ययस्य कर्मकर्तर्यभावादिति चेत्? उच्यते—अत एव भाष्यात् 'निष्ठा' इति सूत्रविहितकर्माधंकक्तप्रत्ययस्यैव कर्मकर्तर्यभाव इति विज्ञायते। 'सिनो ग्रासः स्वयमेवे'त्यत्र तु 'गत्यर्थाकर्मके'त्यादिना कर्तरि विहितक्तप्रत्ययः कर्मकर्तरि भवत्येवेति शब्देन्दुशेखरे विस्तरः। भेत्तव्यं कुसूलेनेति। पुरुषप्रयत्नमनपेक्ष्य कुसूलकर्तृका भिदिक्रियेत्यर्थः। शङ्क्ते—नन्विति। इदानीमिति। कर्मणः कर्तृत्वविवक्षादशायामित्यर्थः। ननु तत्तुल्येति तुल्यत्वस्य भेदघटितत्वादिति भावः। अर्धाङ्गीकारेण परिहरति—सत्यमिति। विक्लित्तिर्द्विधाभवनं च कर्मस्थमेव सम्प्रति कर्तृस्थमिति युक्तम्

स्थाभेदोपाधिकं तत्समानाधिकरणक्रियाया भेदमाश्रित्य व्यवहारः। कर्मणा इति किम्। करणाधिकरणाभ्यां तुल्यक्रिये पूर्वोक्ते साध्वसिरित्यादौ मा भूत्। किंच कर्तृस्थक्रियेभ्यो मा भूत्। गच्छति ग्रामः। आरोहति हस्ती। 'अधिगच्छति शास्त्रार्थः स्मरति श्रद्दधाति वा।' यत्र कर्मणि क्रियाकृतो विशेषो दृश्यते, यथा पक्वेषु तण्डुलेषु, यथा वा छिन्नेषु काष्ठेषु, तत्र कर्मस्था क्रिया। नेतरत्र। न हि पक्वतण्डुलेष्विव गतागतग्रामेषु वैलक्षण्यमुपलभ्यते। करोतिरुत्पादनार्थः। उत्पत्तिश्च

तथापि तयोस्तुल्यत्वाऽभावस्तु नेत्यर्थः। कर्मत्वेति। कर्मत्वकर्तृत्वे ये अवस्थे धर्मविशेषौ तयोर्भेदः स एव उपाधिः निमित्तं यस्य तथाविधं कर्मत्वकर्तृत्वसमानाधिकरणक्रियाभेदमाश्रित्य तुल्यत्वव्यवहार इत्यर्थः। वास्तवभेदाऽभावेऽपि औपाधिकभेदात्कर्मस्थक्रियातुल्यक्रियत्वं कर्मकर्तुरिति भावः। करणाधिकरणाभ्यामिति। 'असिना छिनत्ति' स्थाल्यां पचतीत्यत्र करणाधिकरणयोर्यो व्यापारः स एव 'असिश्छिनत्ति' 'स्थाली पचतो'त्यत्र कर्तुस्थ इति तत्रापि कर्मत्वं स्यात्। तन्निवृत्त्यर्थं कर्मणेति पदमित्यर्थः। ननु 'कर्मवत्कर्मणा' इत्यत्र 'धातोरेकाचः' इत्यतः धातोरित्यनुवर्तते। धातोर्या क्रिया तुल्यक्रिय इत्यर्थः। करणत्वाद्यवस्थायां वस्तुतः सत्त्वपि असिस्थाल्योर्व्यापारो न धातूपात्त इति नोक्तदोष इत्यस्वरसादाह—किञ्चेति। गच्छतिग्राम इति। मार्गस्य अविषमनिष्कण्टकतया प्रत्यासन्नतया च श्रमं विना प्राप्त्याश्रयो भवतीत्यर्थः। आरोहति हस्तीति। अङ्कुशाऽऽघातादिहस्तिपकव्यापारं विना स्वयमेव श्रमभवन् आरोहणाश्रयो भवतीत्यर्थः। अधिगच्छति शास्त्रार्थः स्मरति श्रद्दधाति वेति। पूर्वार्द्धमिदम्। 'यत्कृपालेशतस्तस्मै नमोऽस्तु गुरवे सदा।' इत्युत्तरार्द्धम्। गुरुकृपालेशादेव श्रमं विना स्वयमेव शास्त्रार्थः अधिगच्छति निश्चयविषयो भवति, स्मृतिविषयो भवति, श्रद्धाविषयो भवतीत्यर्थः। अत्र कर्मकर्तुः ग्रामादेः कर्तृस्थक्रियावत्त्वेन कर्मस्थक्रियावत्त्वाऽभावात् न कर्मवत्त्वम्। अतः न कर्मकार्यं यगादि। किन्तु कर्तृकार्यं शबाद्येवेति भावः। ननु कर्मकर्तुः ग्रामादेः प्राप्त्याद्याश्रयत्वेन कर्मस्थक्रियत्वमस्त्येवेत्यत आह—तत्रेति। यत्र क्रियाकृतः विशेषः वैलक्षण्यं दृश्यते प्रत्यक्षमुपलभ्यते, तत्र कर्मणि विद्यमाना क्रिया कर्मस्थक्रियेत्युच्यते इत्यन्वयः। तदुदाहृत्य दर्शयति—यथा पक्वेषु तण्डुलेष्विति। 'तण्डुलावस्थापेक्षया विक्लित्तिकृतो विशेषो दृश्यते' इति शेषः। अन्यत्रापि क्रियाकृतं वैलक्षण्यमुदाहृत्य दर्शयति—यथा वा छिन्नेषु काष्ठेष्विति। 'अच्छिन्नापेक्षया वैलक्षण्यं दृश्यते इति शेषः। 'गच्छति ग्राम' इत्यादौ तु नैवमित्याह—न हीति। ग्रामेष्विति। उपलक्षणमिदम्। पक्वाऽपक्वतण्डुलेषु यथा क्रियाकृतं वैलक्षण्यमुपलभ्यते तथा गताऽगतग्रामे आरूढानारूढहस्तिनि अधिगताऽनधिगते स्मृताऽस्मृते श्रद्धिताऽश्रद्धिते च शास्त्रार्थे क्रियाकृतवैलक्षण्यं न दृश्यते इत्यर्थः, ग्रामगमनादौ कर्तर्येव श्रमादिवैलक्षण्यदर्शनादिति भावः। ननु ज्ञानेच्छयोरिव यत्न-

कर्मस्था। तेन करिष्यते घट इत्यादि। यत्नार्थत्वे तु नैतत्सिध्येत्। ज्ञानेच्छादिवद्यत्नस्य कर्तृस्थत्वात्। एतेनानुव्यवस्यमानेऽर्थे इति व्याख्यातम्। कर्तृस्थत्वेन यगभावाच्छ्यनि कृते ओलोपे च रूपसिद्धेः। ताच्छील्यादावयं चानश् न त्वात्मनेप-

स्याऽपि कर्तृस्थत्वात् तद्वाचिनः कृञोऽपि कर्ता न कर्मवत्स्यात्। ततश्च 'क्रियते घटः स्वयमेवे'ति यगादिः न सिध्येदित्याशङ्क्य कृञो न यत्नार्थत्वमित्याह—करोतिरुत्पादनार्थ इति। उत्पत्त्यनुकूलव्यापारार्थक इत्यर्थः। एतच्च भूवादिसूत्रे भाष्ये स्पष्टम्। करोतेरुत्पादनार्थकत्वे तु कर्मस्थक्रियत्वं तात्कृतुंरुपपादयति—उत्पत्तिश्च कर्मस्थेति। उत्पन्ने अनुत्पन्ने च वैलक्षण्यस्य प्रत्यक्षत्वादिति भावः। तेनेति। कृञः कर्तुः कर्मस्थक्रियत्वेनेत्यर्थः। तथाच क्रियते घटः स्वयमेवेत्यत्र यक्, तासि तु चिण्वदिटपक्षे कारिता, तदभावे तु कर्ता इति सिद्धवत्कृत्य आह—करिष्यते घट इत्यादीति। चिण्वदिटपक्षे कारिष्यते इति रूपम्। तदभावपक्षे तु 'ऋद्धनोः स्ये' इति इट्—करिष्यते। सीयुटश्चिण्वदिटि कारषीष्ट। तदभावे तु कृषीष्ट। लुङि अकारि अकृत। नैतदिति। कर्मवत्त्वं न सिध्येत्यर्थः। 'यतते' इतिवत्सकर्मकत्वमेव न स्यादित्यपि बोध्यम्। एतेनेति। ज्ञानस्य कर्तृस्थत्वव्युत्पादनेनेत्यर्थः। अनुव्यवस्यमानेऽर्थे इति। अर्थे स्वयमेव निश्चयविषयतां सम्पद्यमाने इत्यर्थः। व्याख्यातमिति। समर्थितमित्यर्थः। कथं समर्थितमित्यत आह—कर्तृस्थत्वेन यगभावादिति। अनुव्यवसायः निश्चयः, तत्र कर्मकर्ता अर्थः, स न कर्मस्थक्रियः, अर्थे अनुव्यवसायकृतवैलक्षण्याऽभावात्। किन्तु कर्तृस्थक्रिय एव, अनुव्यवसायकर्तरि देवदत्ते इवादिदर्शनात्। ततश्च कर्मवत्त्वाऽभावान्न यक्। यकि तु किरवात् 'घुमास्थागापाजहातिसाम्' इति ईत्त्वे 'अनुव्यवसीयमान' इति स्यादित्यर्थः। नन्वेवं यगभावे कथं यकारश्रवणमित्यत आह—श्यनीति। 'धो अन्तकर्मणि' इति धातोरनुव्यवपूर्वादुपसर्गवशेन निश्चयवृत्तेः आने कृते श्यनि 'ओतः श्यनि' इत्योकारलोपे 'अनुव्यवस्यमान' इति रूपसिद्धेरित्यर्थः। ननु कर्मवत्त्वाऽभावे 'भावकर्मणोः' इत्यात्मनेपदाऽभावात् कथमिह घटः ज्ञानच्। तस्यात्मनेपदत्वादित्यत आह—ताच्छील्यादाविति। 'ताच्छील्यवयोवचनशक्तिषु चानश्' इत्यनेन चानशित्यर्थः। तस्य च लादेशत्वाऽभावेन आत्मनेपदत्वाऽभावात् कर्मवत्त्वाऽभावेऽपि कर्मकर्तरि प्रवृत्तिर्निर्बाधा। तदाह—न त्वात्मनेपदमिति। ननु 'अन्योन्यं स्पृशतः स्वयमेव यज्ञदत्तदेवदत्ता'वित्यत्रापि कर्मवत्त्वाद्यगादि स्यात्। तत्र हि स्पृशिः संयोगानुकूलव्यापारार्थकः। उभावपि कर्तारौ, कर्मभूतौ च। स्पर्शनक्रियाया एकत्वेऽपि आश्रयभेदात्तद्भेदमाश्रित्य यज्ञदत्तनिष्ठां स्पर्शनक्रियां प्रति देवदत्तस्य कर्मत्वम्। एवं देवदत्तनिष्ठां स्पर्शनक्रियां प्रति यज्ञदत्तस्य कर्मत्वम्। एवं कर्तृत्वमप्युभयोर्ज्ञेयम्। एवं च उभयोः कर्तृत्वकर्मत्वसत्त्वादेकस्मिन् कर्तरि कर्मणि वा या स्पृशिक्रिया सैवेतरस्मिन् कर्तरि कर्मणि वा वर्तते इति कर्मवत्त्वं स्यात्, आश्रयनिबन्धनं भेदमाश्रित्य

दम् । 'सकर्मकाणां प्रतिषेधो वक्तव्यः' (वा १८७३) । अन्योन्यं स्पृशतः । अजा ग्रामं नयति 'दुहिपच्योर्बहुलं सकर्मकयोरिति वाच्यम्' (वा १८७६) ।

२७६७ न दुहस्नुनमां यक्चिणौ ३।१।८६ ॥ एषां कर्मकर्तरि यक्चिणौ न स्तः । दुहेरनेन यक एव निषेधः । चिण्तु विकल्पिष्यते । शप् , लुक् । गौः पयो दुग्धे । **२७६८ अचः कर्मकर्तरि ३।१।६२॥** अजन्ताच्च्लेक्षिण्वा स्यात् कर्मकर्तरि तशब्दे परे । अकारि-अकृत । **२७६९ दुहश्च ३।१।६३ ॥** अदोहि । पक्षे क्सः ।

तुक्यक्रियत्वोपपत्तेः । स्पृष्टाऽस्पृष्टयोरन्योन्यसंयोगकृतहर्षादितदभावदर्शनाच्चेष्यत आह—सकर्मकाणां प्रतिषेध इति । एककर्मकाणां छिदिभिदिप्रभृतीनां कर्मणः कर्तृत्वविवक्षया अकर्मकाणां कर्तुः कर्मवत्त्वमुक्तम् । ये तु द्विकर्मकाः कर्मणः कर्तृत्वविवक्षायामपि सकर्मका धातवः तेषां धातूनां कर्मकर्तुः कर्मवत्त्वप्रतिषेधो वक्तव्यः इत्यर्थः । अन्योन्यं स्पृशतः इति । कर्मवत्त्वे तु यकि तस्मि च 'स्पृश्येते' इति स्यादिति भावः । 'सकर्मकाणां प्रतिषेधः' इत्यस्य उदाहरणान्तरमाह—अजा ग्रामं नयतीति । अजा ग्रामं स्वयमेव प्राप्नोतीत्यर्थः । अत्र नयनं प्रत्यजायाः कर्मणः कर्तृत्वविवक्षायामपि ग्राममादाय सकर्मकत्वात् कर्मवत्त्वमिति भावः । वस्तुतस्तु गते अगते च ग्रामे वैलक्षण्याऽभावादेवाऽत्र कर्मवत्त्वस्याऽप्राप्तिरिति नेदमस्य वार्तिकस्योदाहरणम् । अत एव भाष्ये अन्योन्यमाश्लिष्यतः, अन्योन्यं स्पृशतः, अन्योन्यं संगृह्णीतः इत्येवोदाहृतमिति शब्देन्दुशेखरे स्पष्टम् । दुहिपच्योरिति । 'कर्मवत्त्व'मिति शेषः । अनयोर्द्विकर्मकत्वादेकस्य कर्मणः कर्तृत्वविवक्षायामपि अन्यकर्मणा सकर्मकत्वात्पूर्ववार्तिकेन कर्मवत्त्वनिषेधे प्राप्ते प्रतिप्रसवोऽयम् । न दुह । दुह स्नु नम् एषां द्वन्द्वः । कर्मकर्तरीति । एतत्तु नानुवृत्तिलभ्यम् , पूर्वत्रानुपस्थितत्वात् । किन्तु 'कर्मवत्कर्मणा तुल्यक्रियः' इति समभिव्याहारलभ्यमेव । 'अचः कर्मकर्तरि' इत्यतो मण्डूकप्लुत्या तदनुवृत्तिर्वा । दुहेरनेनेति । 'न दुहस्नुनमाम्' इत्यनेन दुहेः कर्मकर्तरि यक एव निषेधः । चिण्तु 'दुहश्च' इति वक्ष्यमाणसूत्रेण विकल्पितो वक्ष्यते इत्यर्थः । कर्मकर्तरि तशब्दे परे दुहेश्चिण्वेति तदर्थः । चिण्तु विकल्पेनेष्यते इति क्वचित्पाठः । दुग्धे इत्यत्र प्रक्रियां दर्शयति—शप् लुगिति । दुहेः कर्मकर्तरि यकि निर्दिष्टे शप् प्रवर्तते । तस्य 'अदिप्रभृतिभ्यः' इति लुगित्यर्थः । गौः पयो दुग्धे इति । गौः स्वयमेव पय उत्सृजतीत्यर्थः । कर्मकर्तृभूतायां गवि लः । स्वरितेत्त्वेऽपि 'भावकर्मणोः' इत्यात्मनेपदमेव । 'न दुह' इति न यक् । 'गां पयो दुग्धे' इति तु नोदाहृतम् , 'गौणे कर्मणि दुह्यादेर्लादयो मताः' इत्युक्तेः । अचः कर्मकर्तरि । 'श्लेः सिच्' इत्यतः श्लेरिति 'चिण् ते पदः' इत्यतः चिण्ते इति, 'दीपजन' इत्यतः अन्यतरस्यामिति चानुवर्तते । 'धातोरेकाचः' इत्यतोऽनुवृत्तस्य धातुग्रहणस्य अचा विशेषितत्वात्तदन्तविधिः । तदाह—अजन्तादित्यादिना । अकारीति । 'कटः स्वयमेवे'ति शेषः । कर्मकर्तरि लुक् । च्लेश्चिण् । वृद्धिः । रपरत्वम् । 'चिणो लुक्' इति तशब्दस्य लुक् । अकृतेति । चिणभावपक्षे 'हस्वादङ्गात्' इति सिचो लोपः । दुहश्च ।

'लुग्वा—' (सू २३६५) इति पक्षे लुक्। अदुग्ध-अधुक्षत। उदुम्बरः फलं पच्यते। 'सृजियुज्योः श्यंस्तु' (वा १८७७)। अनयोः सकर्मकयोः कर्ता बहुलं कर्मवद्भावपवादश्च श्यन्वाच्य इत्यर्थः। 'सृजेः श्रद्धोपपन्ने कर्तर्येवेति वाच्यम्' (वा ५०५४)। सृज्यते स्रजं भक्तः। श्रद्धया निष्पादयतीत्यर्थः। असर्जि।

'अच' इतिवर्जं पूर्वसूत्रं तत्राऽनुवृत्तं यत्तत्सर्वमिहाऽनुवर्तते। कर्मकर्तरि तशब्दे परे दुहेश्च्विण्वा स्यादित्यर्थः स्पष्ट इति न व्याख्यातम्। अनुवृत्तिसौकर्यार्थमेव पूर्वसूत्रं प्रकृतदुहधातावनुपयुक्तमप्युपन्यस्तम्। अदोहीति। दुहेः कर्मकर्तरि क्ते। 'स्वयमेव गौः पय' इति शेषः। चिण्पक्षे लघूपधगुणः। चिणभावपक्षे आह—पक्वे क्स इति। 'शल इगुपधात्' इत्यनेनेति भावः। लुग्वेति। 'लुग्वा दुहदिहलिहगुहाम्' इति क्सस्य पाक्षिको लुगित्यर्थः। अथ 'दुहिपच्योर्'रित्यत्र पचेरुदाहरति—उदुम्बरः फलं पच्यते इति। 'उदुम्बरवृक्षं फलं पचति कालविशेषः' इत्यत्र द्विकर्मकः पचिः। इह तु उदुम्बरो वृक्षः स्वयमेव कालविशेषमनपेक्ष्य फलं पक्वाश्रयं करोतीत्यर्थः। अत्र उदुम्बरस्य गौणकर्मणः कर्तृत्वेन विवक्षायां फलेन प्रधानकर्मणा सकर्मकत्वात् 'सकर्मकाणां प्रतिषेधः' इति कर्मवत्त्वस्य प्रतिषेधे प्राप्ते 'दुहिपच्योः' इति कर्मवत्त्वस्य प्रतिप्रसवाद्यगादिकमिति भावः। वस्तुतस्तु भाष्ये द्विकर्मकेषु पचेरपरिगणनाद्द्विकर्मकत्वमिति कारकाधिकारे प्रपञ्चितमस्माभिः। तथाच कर्मकर्तरि 'फलं पच्यते' इत्यत्र फलस्यैव कर्मतया तस्य कर्तृत्वविवक्षायां पचेरकर्मकत्वात् 'सकर्मकाणाम्' इति प्रतिषेधस्याऽप्रसक्तेः प्रतिप्रसवविधिरित्यं व्यर्थं इति यद्यपि, तथाप्यत्र मते 'उदुम्बरः फलं पचती'त्यत्र कर्तृकारके पचेः कर्तृस्थक्रियत्वात् कर्मस्थक्रियत्वाऽभावादुदुम्बरः फलं पच्यत इति कर्मकर्तरि'कर्मवत्कर्मणा' इति कर्मवत्त्वस्याऽप्राप्तौ 'दुहिपच्योः' इति कर्मवत्त्वस्य बहुलं पचेरपूर्वविधिरित्यन्यत्र विस्तरः। 'सृजियुज्योः श्यंस्तु' इति वार्तिकम्। 'अनयोः सकर्मकयोः' इत्यादि तद्भाष्यम्। अत्र सृजियुज्योर्देवादिकयोर्न ग्रहणम्। तयोरकर्मकताया उक्तत्वात्। किन्तु 'सृज विसर्गे' इति तौदादिकस्य 'युजिर्योगे' इति रौधादिकस्य च ग्रहणम्, तत्र विसर्गः उत्पादनम्। यथा प्रजाः सृजतीति। योगः संयोजनम्। यथा अश्वं युनक्तीति। रथादिना संयोजयतीति गम्यते। सृजेः श्रद्धोपपन्ने इति। श्रद्धायुक्ते मुख्यकर्तर्येव उक्तो विधिरित्यर्थः। तत्र मुख्यकर्तरि अत्यन्ताऽप्राप्तं कर्मवत्त्वमिह बहुलं विधीयते। 'युजेस्तु कर्मकर्तर्येव उक्तविधिः' इति भाष्यात्तत्रापि कर्मणि क्रियाकृतवैलक्षण्याऽभावादप्राप्तं कर्मवत्त्वमिह बहुलं विधीयते। कर्मवत्त्वे सति यकि प्राप्ते तदपवादः श्यन्विधीयते। 'तेन ञ्णित्यादिनित्यम्' इत्याद्युदात्तत्वं सिध्यति। यकि तु 'तास्यनुदात्तेत्' इत्यादिना लसार्वधातुकानुदात्तत्वे प्रत्ययस्वरेण यकः उदा त्वं स्यात्। सृज्यते स्रजं भक्त इति। अत्र मुख्यकर्तरि लकारः। कर्मवत्त्वादात्मनेपदम्। यगपवादः श्यन्। श्रद्धया निष्पादयतीत्यर्थ इति। धातूनामनेकार्थत्वादिति भावः। 'सृज्यते स्रजं भक्तः'

युज्यते ब्रह्मचारी योगम् । 'भूषाकर्मकिरादिसनां चान्यत्रात्मनेपदात्' (वा १८८०) भूषावाचिनां किरादीनां सन्नन्तानां च यक्चिणौ चिण्वदिट् च नेति वाच्यमित्यर्थः । अलङ्करुते कन्या । अलमकृत । अवकिरते हस्ती । अवाकीर्ष्ट । गिरते । अगीर्ष्ट । आद्रियते । आदृत । किरादिस्तुदाद्यन्तर्गणः । चिकीर्षते कटः । अचिकीर्षिष्ट ।

इत्यत्र यदा तु निष्पादयतीत्येवाऽर्थः, नतु भवत्येति तदा सृजति स्रजमित्येव भवति । अथ युज्देरुदाहरति—युज्यते ब्रह्मचारी योगमिति । अत्र 'कर्मकर्तरि यगपवादः श्यन्' इति भाष्यम् । योगश्चित्तवृत्तिनिरोधः योगशास्त्रप्रसिद्धः । ब्रह्मचर्यं स्त्रीसङ्गराहित्यम् । तद्योगाङ्गम् इति च योगशास्त्रप्रसिद्धम् , स योगः ब्रह्मचारिणं युनक्ति आत्मदर्शनेन संयोजयतीति कर्तृलकारे संयोजनक्रियायां योगो मुख्यकर्ता । ब्रह्मचारी तु कर्मेति स्थितिः । तत्र कर्मणो ब्रह्मचारिणः कर्तृत्वविवक्षायां 'युज्यते ब्रह्मचारी योग' मिति कर्मकर्तरि ब्रह्मचारिणि लकारः, कर्मवत्त्वात्तदेव यगपवादः श्यन् । ब्रह्मचारी प्राणायामाभ्यासादिश्रमबाहुल्यं विना स्वयमेव योगेन सम्बध्यते इत्यर्थः । तत्र ब्रह्मचारिणि कर्मकर्तरि धात्वर्थसम्बन्धः अप्रयोगितया वर्तते । योगे तु प्रतियोगितया वर्तत इति स्थितिः । तत्र यद्यपि प्रतियोगिनो योगात् 'सहयुक्तेऽप्रधाने' इति तृतीयया भवितव्यम् , तथापि युजेः प्रतियोगित्वावच्छिन्नसम्बन्धोऽर्थः । तत्र प्रतियोगित्वं फलं, सम्बन्धो व्यापारः । प्रतियोगित्वरूपफलाश्रयत्वात् द्वितीयेति समाहितं शब्देन्दुशेखरे । अत्र भाष्यप्रयोगादेव योगात् द्वितीयेत्यन्ये । भूषाकर्मेति वार्तिकम् । भूषाकर्म, किरादि, सन् एषां द्वन्द्वः । अन्यत्रेति प्रथमान्तात्स्वार्थे अण् । आत्मनेपदात् अन्यकर्मकार्यमिति लभ्यते । भूषा कर्म क्रिया येषां वाच्यतया ते भूषाकर्माणः धातवः । भूषणक्रियावाचिनामिति यावत् । तदाह—भूषावाचिनामित्यादिना । अलङ्करुते कन्येति । स्वयमेव अन्यप्रयत्नं विना भूषणक्रियावतीत्यर्थः । अत्र भूषार्थकत्वात् कर्मकर्तरि तङेव, नतु यक् । अलमकृतेति । अत्र तङेव नतु चिण् । लुटि तु अलङ्कर्तेत्येव । नतु चिण्वदिटो । अवकिरते हस्तीति । हस्तिनमवकिरति कुसुमादिरित्यत्र मुख्यकर्तरि लकारः । तत्र हस्ती कम । तस्य कर्तृत्वविवक्षायां स्वयमेव पुरुषप्रयत्नं विना क्षुधादिसमीपं गच्छन् पुष्पादिभिः अवकीर्णवान् भवतीत्यर्थः । अत्रापि तङेव, नतु यगादि । अवाकीर्ष्टेति । 'लिङ्सिचोरात्मनेपदेषु' इति वेट् । गिरते इति । 'ओदनं स्वयमेवे'ति शेषः । 'गॄ निगरणे' अयं किरादिः । आद्रियते इति । 'इङ् आदरणे' अयमपि किरादिः । आप्रत्यये 'रिङ् शयग्लिङ्क्षु' इति रिङ् । अतिथिमाद्रियते इति मुख्यकर्तरि । आद्रियतेऽतिथिरिति कर्मकर्तरि । स्वयमेव आदरणाश्रय इत्यर्थः । अत्र यद्यपि शे यकि च न विशेषः । तथापि न्याय्यः श एव, यको निषिद्धत्वात् । स्वरे वा विशेषः । तङ् तु डित्त्वादेव सिद्धः । अतिथेरामहितत्वात् प्रथमेति विशेषः । आदृतेति । चिणोऽनेन निषेधे 'हस्वादङ्गात्' इति सिचो लोपः । 'उश्च' इति कित्त्वम् । अथ सन्नन्तस्योदाहरति—चिकीर्षते कट इति । स्वयमेव कर्तुमिच्छाविषय इत्यर्थः । नन्विच्छायाः पुरुष-

इच्छायाः कर्तृस्थत्वेऽपि करोतिक्रियापेक्षमिह कर्मस्थक्रियत्वम्। २७७० न रुधः ३।१।६४॥ अस्माच्छ्लेश्चिण्न। अवारुद्ध गौः। कर्मकर्तरीत्येव। अवारोधि गौर्गोपेन। २७७१ तपस्तपःकर्मकस्यैव ३।१।८८॥ कर्ता कर्मवत्स्यात्। विध्यर्थमिदम्। एवकारस्तु व्यर्थ एवेति वृत्त्यनुसारिणः। तप्यते तपस्तापसः। अर्जयतीत्यर्थः। 'तपोऽनुतापे च' (सू २७६०) इति चिण्निषेधात्सिच्। अतप्त। तपःकर्मकस्य इति किम्। उत्तपति सुवर्णं सुवर्णकारः। 'न दुहस्नुनमां यक्चिणौ'

रूपकर्तृनिष्ठत्वात् कटरूपकर्मनिष्ठत्वाऽभावात् इच्छायां सत्यामसत्यां च कटे कर्मणि वैलक्षण्यादर्शनाच्च कर्मस्थक्रियत्वाभावादिह कर्मवत्त्वस्याऽप्रसक्तेस्तन्निषेधो व्यर्थ इत्यत आह—इच्छायाः इति। न रुधः। 'श्लोः सिच्' इत्यतः श्लेरिति 'चिण्ते पदः' इत्यतश्चिणिति चानुवर्तते। तदाह—अस्माच्छ्लेश्चिण् नेति। अवारुद्ध गौरिति। 'स्वयमेवे'ति शेषः। कर्मकर्तरीत्येवेति। 'अचः कर्मकर्तरि' इत्यतस्तदनुवृत्तेरिति भावः। अवारोधि गौर्गोपेनेति। इह गोः कर्मणः कर्तृत्वविवक्षाया अभावान्न चिण्निषेध इति भावः। तपस्तपःकर्मकस्यैव। आद्यं तपः इति षष्ठ्यन्तम्। तपःकर्मकस्यैव तपधातोरिति लभ्यते। 'कर्तरि शप्' इत्यतः कर्तरीत्यनुवृत्तं प्रथमया विपरिणम्यते। 'कर्मवत्कर्मणा' इत्यतः कर्मवदित्यनुवर्तते इति मत्वा सूत्रशेषं पूरयति—कर्ता कर्मवदिति। विध्यर्थमिदमिति। एतच्चानुपदमेव उदाहरणव्याख्यावसरे स्पष्टीभविष्यति। ननु विध्यर्थत्वे एवकारो व्यर्थ इत्यत आह—एवकारस्त्विति। तप्यते तपस्तापसः इति। अत्र तपिरार्जनार्थक इत्याह—अर्जयतीत्यर्थः इति। प्राजापत्यचान्द्रायणादिकृच्छ्राद्यात्मकं तपः सम्पादयतीत्यर्थः। मुख्यकर्तरि लः। सम्पाद्यस्य तापसात्मककर्तृस्थत्वात् तपोरूपकर्मस्थत्वाऽभावात् 'कर्मवत्कर्मणा' इत्यप्राप्तं कर्मवत्त्वमनेन सूत्रेण विधीयते। तेन यगात्मनेपदादि। यदा तु तदपि दुःखजननात्मके सन्तापे वर्तते तदा 'तापसं तपस्तपती'त्येव भवति। दुःखयतीत्यर्थः। अत्र मुख्यकर्तृ तपः। तापसस्तु कर्म। अत्रापि दुःखजननव्यापारस्य तपोरूपकर्तृस्थतया तापसरूपकर्मस्थत्वाऽभावात् 'कर्मवत् कर्मणा' इत्यनेन कर्मवत्त्वं न भवति। तपःकर्मकत्वाऽभावादनेनापि न कर्मवत्त्वम्। अतो न यगादिकर्मकार्यम्। अथ लुङि अतप्तेत्यत्र कर्मवत्त्वाच्चिण्माशङ्क्य आह—तपोऽनुतापे च इति। चिण्निषेधात् सिजिति। तस्य 'झलो झलि' इति लोपे परिनिष्ठितमाह—अतप्तेति। उत्तपति सुवर्णं सुवर्णकार इति। अत्र तपःकर्मकत्वाऽभावान्न कर्मवत्त्वमिति भावः। भाष्ये तु एवकारादिदं सूत्रं नियमार्थमित्युक्तमिति शब्देन्दुशेखरे प्रपञ्चितमेतत्। वृत्त्यनुसारिण इत्यनेन भाष्यविरोधः सूचित इत्यलम्। 'दुहिपच्योर्बहुलं' इति कर्मवत्त्वविधिस्थदुहिग्रहणात् 'न दुहस्नुनमाम्' इति सूत्रमुपन्यस्तं प्राक्। इदानीं सिंहावलोकनन्यायेन स्नुनमोरुदाहर्तुं पुनः सूत्रमुपन्यस्यति—न दुह-

(सू २७६७) । प्रस्नुते । प्रास्नाविष्ट । प्रास्नोष्ट । नमते दण्डः । अनंस्त । अन्तर्भावितण्यर्थोऽत्र नमिः । यक्चिणोः प्रतिषेधे 'हेतुमण्णिश्रिन्ब्रूत्रामुपसंख्यानम्' (वा १८८१) । कारयते । अचीकरत । उच्छ्रयते दण्डः । उदशिश्रियत । चिण्वदिट् तु स्यादेव । कारिष्यते । उच्छ्रायिष्यते । ब्रूते कथा । अवोचत । भारद्वा-

---

स्नुनमां यक्चिणाविति । तत्र स्नुधातोरुदाहरति—प्रस्नुते इति । स्नुधातुः क्षीरप्रस्रवणविषयोत्कण्ठीकरणे वर्तते । वत्सो गां प्रस्नौतीति मुख्यकर्तरि लकारे वत्सो गां क्षीरप्रस्रवणविषये उत्कण्ठयतीत्यर्थः । अन्तर्भावितण्यर्थोऽत्र स्नुधातुः । अत्र गौः कर्म । उत्कण्ठनव्यापारस्तु कर्तृभूतवत्सनिष्ठः । उत्कण्ठा तु गोरूपकर्मनिष्ठा । गोः कर्मण्यः कर्तृत्वविवक्षायां तु प्रस्नुते गौः, स्वयमेव क्षीरप्रस्रवणविषये उत्कण्ठावतीत्यर्थः । तत्र उत्कण्ठा पूर्वं कर्मगता । सम्प्रति तु कर्तृगता । उत्कण्ठाकृतं च वैलक्षण्यं प्रस्रवणं दृश्यत एव । ततश्च कर्मस्थक्रियत्वात् कर्मवद्भावे यकि प्राप्ते अनेन निषेधः । प्रास्नाविष्टेति । अत्र कर्मवत्त्वात् प्राप्तश्चिण् न । किंतु चिण्वदिटौ पक्षे स्तः । चिण्वदिडभावे तु 'स्नुक्रमोः' इति नियमाद्वलादिलक्षण इण्न । तदाह—प्रास्नोष्टेति । णम उदाहरति—नमते दण्ड इति । नमति दण्डं कश्चित् । नमयतीत्यर्थः । कर्मणः कर्तृत्वविवक्षायां तु 'नमते दण्डः' । अत्र कर्मवत्त्वेऽपि न यक् । अनंस्तेति । अत्र कर्मवत्त्वेऽपि न चिण् । नन्वत्र नमधातोः प्रह्वीभावार्थकस्याऽकर्मकत्वात् कर्मवत्त्वाप्रसक्तेर्यक्चिणोर्न प्रसक्तिरित्यत आह—अन्तर्भावितण्यर्थोऽत्र नमिरिति । धातूनामनेकार्थकत्वादिति भावः । यक्चिणोरिति । 'न दुहस्नुनमाम्' इति यक्चिणोः प्रतिषेधसूत्रे दुहस्नुनमां हेतुमण्णिश्रिन्ब्रूत्रामिति च वाच्यमित्यर्थः । कारयते इति । 'स्वयं देवदत्त' इति शेषः । करोति देवदत्तः, तं प्रेरयति यज्ञदत्त इति ण्यन्तान्मुख्यकर्तरि लकारः । अत्र ण्यन्तकर्मणो देवदत्तस्य यज्ञदत्तप्रेरणमनपेक्ष्य कर्तृत्वविवक्षायां कर्मकर्तरि लकारः । कर्मवत्त्वेऽपि तङेव, न यगिति भावः । अचीकरतेति । अत्र कर्मवत्त्वेऽपि न चिण् 'णिश्रि' इति चङेव । उच्छ्रयते दण्ड इति । 'स्वयमेवे'ति शेषः । 'दण्डमुच्छ्रयति कश्चि'दिति मुख्यकर्तरि लकारः । तत्र कर्मणो दण्डस्य कर्तृव्यापारमनपेक्ष्य कर्तृत्वविवक्षायां कर्मकर्तरि लकारः । कर्मवत्त्वेऽपि न यक्, तङेव । उदशिश्रियतेति । कर्मवत्त्वेऽपि चिणभावात् 'णिश्रि' इति चङ् । नन्वत्र 'कारिष्यते' इत्यत्र कथं चिण्वदिटौ । ण्यन्तस्याऽजन्तस्य उपदेशाऽभावादित्यत आह—चिण्वदिट् तु स्यादेवेति । 'स्यसिच्सीयुट्तासिषु' इत्यत्र हि उपदेशे अजन्तस्येति नार्थः । किंतु उपदेशे योऽच् तदन्तस्येत्यर्थः । तथाच णिजन्तस्योपदेशाऽभावेऽपि णेरुपदेशसत्त्वान्न दोष इति भावः । उच्छ्रायिष्यते इति । श्रिणः उपदेशे योऽच् तदन्तत्वाच्चिण्वदिटौ । ब्रूते कथेति । 'स्वयमेवे'ति शेषः । कथां ब्रवीति कश्चिदिति मुख्यकर्तृकारे कथा कर्म, तस्य पुरुषप्रयत्नाविवक्षायां कर्मकर्तरि लकारः । कर्मवत्त्वात् तङ् । न यक् । अवोचतेति । कर्मवत्त्वेऽपि न चिण् । किंतु 'ब्रुवो वचिः' 'अस्यतिवक्तिख्यातिभ्योऽङ्' 'वच उम्' इति

जीयाः पठन्ति—'णिश्रन्थिग्रन्थिब्रूञ्आत्मनेपदाकर्मकाणामुपसंख्यानम्' (वा १८८२) पुच्छमुदस्यति उत्पुच्छयते गौः । अन्तर्भावितण्यर्थतायाम् उत्पुच्छयते गाम् । पुनः कर्तृत्वविवक्षायाम् उत्पुच्छयते गौः । उदपुपुच्छत । यक्चिणोः प्रतिषेधाच्छप्चङौ । श्रन्थिग्रन्थ्योराधृषीयत्वाण्णिजभावपक्षे ग्रहणम् । ग्रन्थति ग्रन्थम् । श्रन्थति मेखलां देवदत्तः । ग्रन्थते ग्रन्थः । अग्रन्थिष्ट । श्रन्थते । अश्रन्थिष्ट । क्रैयादिकयोस्तु श्रथ्नीते ग्रथ्नीते स्वयमेव । विकुर्वते सैन्धवाः । वल्गन्तीत्यर्थः । 'वेः शब्दकर्मणः' (सू २७०७) 'अकर्मकाच्च' (सू २७०८) इति तङ् । अन्तर्भावितण्यर्थस्य

भावः । उच्चारणेन शब्देषु प्राकट्यरूपविशेषदर्शनात् कर्मस्थक्रियत्वं बोध्यम् । णिश्रन्थीति । ण्यन्तस्य ग्रन्थेः ग्रन्थेः ब्रूञः आत्मनेपदविधावकर्मकस्य च यक्चिणोः प्रतिषेधः भारद्वाजीयाऽभिमत इत्यर्थः । अत्र णि इति सामान्यस्य ग्रहणम् । ननु हेतुमण्णिच एव । ततश्च णिजन्तस्यापि न यक्चिणाविति मत्वा आह-पुच्छमुदस्यति उत्पुच्छयते गौरिति । 'पुच्छाङ्कसने' इति णिङ् । नन्वत्र उदसने पुच्छं कर्म । गौर्मुख्यकर्त्री । नतु कर्मकर्त्री । ततश्च नात्र यक्चिणोः प्रसक्तिरित्यत आह—अन्तर्भावितण्यर्थतायामिति । 'उदस्यती'त्यस्य उदासयतीत्यन्तर्भावितण्यर्थताश्रयणे उत्पुच्छयते गां देवदत्तः इत्यत्र गौः कर्म । तस्य गोरूपकर्मणः प्रेरयितृपुरुषप्रयत्नानपेक्षया कर्तृत्वविवक्षायां कर्मकर्तरि लकारे उत्पुच्छयते गौरिति भवतीत्यर्थः । स्वयमेव पुच्छमुदस्यति गौरिति बोधः । उदपुपुच्छतेति । अत्र न चिण् । अपूचञ्चाविति । 'उत्पुच्छयते गौ'रित्यत्र यकः प्रतिषेधात् शप् । उदपुपुच्छतेत्यत्र चिणः प्रतिषेधाच्चङित्यर्थः । ननु 'ग्रन्थ मोक्षणे, ग्रन्थ ग्रथने' इति श्रन्थिग्रन्थ्योः चौरादिकतया णिग्रहणेनैव सिद्धेः पुनर्ग्रहणं व्यर्थमित्यत आह—श्रन्थिग्रन्थ्योरिति । ग्रन्थति ग्रन्थमिति । रचयतीत्यर्थः । श्रन्थति मेखलां देवदत्तः इति । विस्रंसयतीत्यर्थः । 'देवदत्त' इत्युभयत्राप्येति । अत्र कर्मणो ग्रन्थस्य, मेखलायाश्च कर्तृत्वविवक्षायां ग्रन्थते ग्रन्थः, श्रन्थते मेखलेति च भवति । स्वयमेव ग्रन्थरचनाश्रयः स्रंसनाश्रयश्चेत्यर्थः । तत्र कर्मवत्त्वेऽपि न यगिति भावः । अग्रन्थिष्ट, अश्रन्थिष्टेत्यत्र च न चिण् । क्रैयादिकयोस्त्विति । कर्मवत्त्वेऽपि तयोर्यकि निषिद्धे श्नाविकरण इति भावः । आत्मनेपदविधावकर्मको यः, तमुदाहरति—विकुर्वते सैन्धवाः इति । सैन्धवाः अश्वाः । अत्र विपूर्वः कृञ् वल्गने वर्तते, उपसर्गवशात् । तदाह—वल्गन्तीति । शब्दं कुर्वन्तीत्यर्थः । धात्वर्थनोपसंग्रहादकर्मकोऽयम् । मुख्यकर्तरि लकारः । वेरिति । 'वेः शब्दकर्मणः' इत्यनन्तरं पठितेन 'अकर्मकाच्च' इति सूत्रेण परगामिन्यपि फले तङित्यर्थः । नन्वस्याकर्मकतया अश्वानां कर्मकर्तृत्वाऽभावात्र यकः प्रसक्तिरित्यत आह—अन्तर्भावितेति । विपूर्वकः कृञ् शब्दं कुर्वाणस्य प्रेरणे यदा वर्तते, तदा विकुर्वते सैन्धवानिति भवति । अश्वान् शब्दायतीत्यर्थः । तत्र सैन्धवानां कर्मणां पुरुषप्रेरणाऽविवक्षया कर्तृत्व विवक्षायां विकुर्वते सैन्धवा इति भवति । वल्गन्तीत्यर्थः । अत्र सैन्धवानां कर्मक-

पुनः प्रेषणत्यागे-विकुर्वते सैन्धवाः । व्यकारिष्ट । व्यकारिषाताम् । व्यकारिषत । व्यकृत । व्यकृषाताम् । व्यकृषत । **२७७२ कुषिरञ्जोः प्राचां श्यन परस्मैपदं च ३।१।९०।** अनयोः कर्मकर्तरि न यक् । किं तु श्यन्परस्मैपदं च । आत्मनेपदापवादः । कुष्यति-कुष्यते वा पादः । रज्यति-रज्यते वा वस्त्रम् । यगविषये तु नास्य प्रवृत्तिः । कोषिषीष्ट । रङ्क्षीष्ट । इति कर्मकर्तृतिङ्प्रकरणम् ।

अथ लकारार्थप्रकरणम् ॥ २२ ॥

२७७३ अभिज्ञावचने लृट ३।३।११२॥ स्मृतिबोधिन्युपपदे भूतानद्यतने

तृंणां कर्मवत्त्वेऽपि न यगित्यर्थः । व्यकारिष्टेति । **चिणि निषिद्धे** ण्यन्तत्वाऽभावाच्चङभावे सिचश्चिण्वदिटि वृद्धिरिति भावः । **चिण्वदिडभावपक्षे** आह—व्यकृतेति । **'ह्रस्वादङ्गात्'** इति सिचो लोपः । कुषिरञ्जोः । अनयोरिति । **'कुष निष्कर्षे, रञ्ज रागे'** इत्यनयोरित्यर्थः । कर्मकर्तरीति । **'अचः कर्मकर्तरि'** इत्यतो मण्डूकप्लुत्या तदनुवृत्तेरिति भावः । **'न दुहस्नुनमाम्'** इत्यतः नेति, यगिति चानुवर्तते । तदाह—न यगिति । किन्तु श्यनिति । यग्विषये इत्यर्थः । एवञ्च यग्विषयादन्यत्र न श्यनः प्रवृत्तिः । न यगित्यनुक्त्वा श्यनो विधाने तु यग्विषयादन्यत्रार्द्धधातुकेऽपि श्यन् स्यादिति भावः । प्राचां ग्रहणाद्विकल्पः । तदाह—कुष्यति कुष्यते वा पादः इति । **'स्वयमेवे'**ति शेषः । **'कुष्णाति पादं देवदत्तः'** इति मुख्यकर्तृकक्रियारे पादः कर्म । तस्य पुरुषप्रयत्नमनपेक्ष्य कर्तृत्वविवक्षायां श्यनि परस्मैपदे च कुष्यतीति रूपम् । तदुभयाभावे यकि आत्मनेपदे च कुष्यते इति रूपमिति भावः । यक्श्यनोः स्तरे विशेषः । श्यनि **'कुष्यन्ती वधू'**रित्यत्र **'क्ष्माप्रश्यनोर्नित्यम्'** इति नित्यं ङीप् । यकि तु **'आच्छीनद्योः'** इति विकल्पः स्यात् । रज्यति रज्यते वा वस्त्रमिति । अन्तर्भावितण्यर्थतायां देवादिकत्वात् श्यनि **'रज्यति वस्त्र'**मित्यत्र रञ्जयतीत्यर्थः । मुख्ये कर्तरि ञः । कर्मणः कर्तृत्वविवक्षायां तु रज्यति रज्यते वा वस्त्रमिति भवतीत्यर्थः । यगविषये तु नास्त्येवेति । श्यनिति शेषः । यकं प्रतिषिध्य तस्यां श्यनो विधिसामर्थ्यादित्यर्थः । कोषिषीष्टेति । आर्द्धधातुकत्वेन यगविषयत्वाच्च श्यन् । तत्सन्नियोगशिष्टत्वात् परस्मैपदं च श्यनभावे सति न भवतीति भावः । रङ्क्षीष्टेति । रञ्जेः सीयुटि जस्य कुत्वेन गः । तस्य चत्वेन कः । अनुस्वारपरसवर्णौ । अत्र कर्मकर्तृप्रकरणे सर्वत्र पच्यते ओदनः स्वयमेवेति, भिद्यते काष्ठं स्वयमेवेत्यादौ स्वयंशब्दस्य आत्मना करणेनेत्यर्थः, न स्वात्मना कर्त्रेति, तथा सति कर्मण्येव लः स्यादिति **'णेरनौ'** इति सूत्रे कैयटे स्पष्टम् । इति श्रीवासुदेवदीक्षितविदुषा विरचितायां सिद्धान्तकौमुदीव्याख्यायां बालमनोरमाख्यायां कर्मकर्तृप्रक्रिया समाप्ता ।

अथ लकारार्थप्रक्रिया निरूप्यते । अभिज्ञावचने लृट् । **अभिज्ञा स्मृतिः सा उच्यते बोध्यते अनेनेति विग्रहः ।** तदाह—स्मृतिबोधिन्युपपदे इति । **स्मृतिबोधकपदे समीपे**

धातोर्लृट् स्यात्। लङोपवादः। स्मरसि कृष्ण गोकुले वत्स्यामः। एवं बुध्यसे चेतयसे इत्यादियोगेऽपि। तेषामपि प्रकरणादिवशेन स्मृतौ वृत्तिसम्भवात्। **२७७४ न यदि ३।२।११३॥** यद्योगे उक्तं न। अभिजानासि कृष्ण यद्वने अभुञ्ज्महि। **२७७५ विभाषा साकाङ्क्षे ३।२।११४॥** उक्तविषये लृड् वा स्यात् लक्ष्यलक्षणभावेन साकाङ्क्षश्चेद्वाक्यार्थः। स्मरसि कृष्ण वने वत्स्यामस्तत्र गाश्चारयिष्यामः। वासो लक्षणं चारणं लक्ष्यम्। पक्षे लङ्। यच्छब्दयोगेऽपि 'न यदि' (सू २७७४) इति बाधित्वा परत्वाद्विकल्पः। 'परोक्षे लिट्' (सू २१७१)। चकार। उत्तमपुरुषे चित्तविक्षेपादिना पारोक्ष्यम्। 'सुप्तोऽहं किल विललाप' 'बहु जगद पुरस्तात्तस्य मत्ता किलाहम्'। 'अत्यन्तापह्नवे लिङ् वक्तव्यः' (वा २०८४)। कलिङ्गेष्ववात्सीः। नाहं कलिङ्गान् जगाम। **२७७६ हशश्वतोर्लङ् च ३।२।११६॥**

प्रयुज्यमाने सतीत्यर्थः। 'भूते' इत्यधिकृतम्। 'अनद्यतने लङ्' इत्यतः अनद्यतने इत्यनुवर्तते। तदाह—भूतानद्यतने इति। लङ इति। 'अनद्यतने लङि'त्यस्यापवाद इत्यर्थः। स्मरसीति। हे कृष्ण गोकुले अवसामेति यत् तत् स्मरसीत्यर्थः। अ वाक्यार्थः कर्म। कृतं गोकुलवासं स्मरसीति यावत्। एवमिति। स्मरसीति पदयोग इव बुध्यसे इत्यादिस्मृतिबोधकपदयोगेऽपि लृडित्यर्थः। ननु बुध्यत्यादेः स्मृतित्वेन रूपेण स्मृत्यर्थकत्वाऽभावात्कथमिह लृडित्यत आह—तेषामपीति। पर्यवसानस्या स्मृतिबोधकत्वात्तद्योगेऽपि लृट्। एतदर्थमेव वचनग्रहणमिति भावः। न यदि। 'यदी'ति सप्तमीति मत्वा आह—यद्योगे इति। उक्तं नेति। 'अभिज्ञावचने' इति लट् न भवतीत्यर्थः। अभिजानासीति। वने अभुञ्ज्महीति यत् तत् स्मरसीत्यर्थः। विभाषा। उक्तविषये इति। अभिज्ञाबोधिन्युपपदे इत्यर्थः। लक्ष्यलक्षणभावेनेति। ज्ञाप्यज्ञापकभावेनेत्यर्थः। अत्र व्याख्यानमेव शरणम्। स्मरसीति। पूर्वं वने अवसाम, तत्र वने गाः अचारयाम इति यत् तत् हे कृष्ण! स्मरसीत्यर्थः। अत्र यत् इत्यस्य गम्यत्वेऽपि तस्य प्रयोगाऽभावान्न यद्योगः। वासो लक्षणमिति। 'चारणस्ये'ति शेषः। उभयत्रापि लृड्विकल्पः। अभिज्ञानवचनयोगस्य अविशिष्टत्वादिति भावः। न च यद्योग एव 'विभाषा साकाङ्क्षे' इति विकल्पोऽस्त्विति भ्रमितव्यम्, 'यदि च अयदि चायं विकल्प' इति भाष्यात्तदाह—यच्छब्दयोगेऽपीति। **'परोक्षे लिट्'** इति प्राक् व्याख्यातमपि विशेषविवक्षया स्मार्यते। अहमर्थस्य प्रत्यक्षत्वात् परोक्षत्वाऽभावात् कथमस्य लिट उत्तमपुरुष इत्यत आह—उत्तमपुरुषे चित्तेति। सुप्त इति। सुप्तत्वादहं विललापेत्यर्थः। अत्र स्वापाद्विक्षिप्तविक्षेपः। बहु जगदेति। मत्तत्वात्तस्य पुरस्तादहं बहु जगदेत्यर्थः। अत्र उन्मादाद्विक्षिप्तविक्षेपः। आदिना व्यासङ्गसङ्ग्रहः। अत्यन्तापह्नवे इति। अपरोक्षार्थमिदम्। कलिङ्गेष्ववात्सीरिति। अतस्त्वं न सहवासयोग्य इति प्रश्नः। 'अङ्गवङ्गकलिङ्गेषु सौरा-

अनयोरुपपदयोर्लिङ्विषये लङ् स्यात्। चाल्लिट्। इति हाऽकरोच्चकार वा। शश्वद्-करोच्चकार वा। **२७७७ प्रश्ने चासन्नकाले ३।२।११७॥** प्रष्टव्यः प्रश्नः। आ-सन्नकाले पृच्छ्यमानेऽर्थे लिङ्विषये लङ्लिटौ स्तः। अगच्छत्किम्। जगाम किम्। अनासन्ने तु कंसं जघान किम्। **२७७८ लट् स्म ३।२।११८॥** लिटोपवादः। यजति स्म युधिष्ठिरः। **२७७९ अपरोक्षे च ३।२।११९॥** भूतानद्यतने लट् स्या-त्स्मयोगे। एवं स्म पिता ब्रवीति। **२७८० ननौ पृष्टप्रतिवचने ३।२।१२०॥** अनद्यतने परोक्ष इति निवृत्तम्। भूते लट् स्यात्। अकार्षीः किम्। ननु करोमि भोः। **२७८१ नन्वोर्विभाषा ३।२।१२१॥** नशब्दे नुशब्दे च लङ् वा स्यात्। अकार्षीः किम्। न करोमि। नाकार्षम्। अहं नु करोमि। अहं न्वकार्षम्। **२७८२ पुरि लुङ् चास्मे ३।२।१२२॥** अनद्यतनग्रहणं मण्डूकप्लुत्यानुवर्तते। पुराश-ब्दयोगे भूतानद्यतने विभाषा लुङ्, चाल्लट्, न तु स्मयोगे। पक्षे यथाप्राप्तम्। वसन्तीह पुरा छात्राः, अवात्सुः अवसन् ऊषुर्वा। अस्मे किम्। यजति स्म पुरा।

ट्रमगधेषु च। तीर्थयात्रां विना यातः पुनः संस्कारमेति।' इति वचनादिति भावः। नाहं कलिङ्गान् जगामेत्युत्तरम्। कलिङ्गशब्दस्य जनपदविशेषवाचित्वात् बहुवचनम्। अत्र तद्देशगमनोत्तरकालिकवासविषयकप्रश्ने कारणीभूतगमनस्यैवापलापादत्यन्ता-पह्नवो ज्ञेयः। कलिङ्गेष्ववात्सीरित्यत्र 'अकर्मकधातुभिर्योगे देशः कालो भावः' इति कर्मसंज्ञायाः पाक्षिकत्वाच्च द्वितीयेति कारकाधिकारे निरूपितम्। इदमश्वतोर्लक् च। स्पष्टम्। प्रश्ने चासन्नकाले। 'प्रश्ने' इत्यनेन प्रश्नविषयो विवक्षित इत्याह—प्रष्टव्यः प्रश्नः इति। अर्थं इत्यनन्तरं 'वर्तमानाद्धातो'रिति शेषः प्रयोक्तृदृष्टिपथातिक्रान्त-त्वमनासन्नकालत्वम्। वृत्तौ तु पञ्चवर्षातीतकालः अनासन्नकाल इत्युक्तम्। लट् स्मे। 'स्मेऽस्त्ययम्। तद्योगे लिङ्विषये लट् स्यादित्यर्थः। यजति स्मेति। स्मशब्दो भूतकालद्योतकः। अपरोक्षे च। एवं स्मेति। पिता एवमुक्तवानित्यर्थः। ननौ पृष्टः। निवृत्त-मिति। व्याख्यानादिति भावः। अकार्षीः किमिति प्रश्नः। ननु करोमीत्युत्तरम्। अकार्षमित्यर्थः। नन्विति सम्बोधने। नन्वोर्विभाषा। न नु अनयोर्हन्द्वः। तदाह—नशब्दे नुशब्दे चेति। लङ् वा स्यादिति। 'भूते' इति शेषः। अकार्षीः किमिति प्रश्नः। न करोमि नाकार्षमित्युत्तरम्। अहं नु करोमि, अहं न्वकार्षमिति च। 'तर्के नु स्यात्' इत्यमरः। पुरि लुङ् चास्मे। अस्मे इति च्छेदः। पुरेत्याकारान्तमव्ययम्। पुरीति तस्य सप्तम्येकवचनम्। आत इति योगविभागादाल्लोपः। मण्डूकप्लुत्येति। अत्रव्याख्यानमेव शरणम्। चाल्लडिति। तथाच लुङ् लट् च वेति फलितम्। पक्षे इति॥ एतदुभयाऽभावपक्ष इत्यर्थः। यथाप्राप्तमिति। अनद्यतनपरोक्षभूते लिट्। परोक्षत्वाऽविवक्षायां तु लडित्यर्थः। 'अभिज्ञावचने' इत्यारभ्य एतद्-

भविष्यतीत्यनुवर्तमाने-२७८३ **यावत्पुरानिपातयोर्लट्** ३।३।४॥ यावद्भुङ्क्ते। पुरा भुङ्क्ते। निपातावेतौ निश्चयं द्योतयतः। निपातयोः किम्। यावदास्यते तावद्भोक्ष्यते। करणीभूतया पुरा यास्यति। २७८४ **विभाषा कदाकर्ह्योः** ३।३।५॥ भविष्यति लट् वा स्यात्। कदा कर्हि वा भुङ्क्ते भोक्ष्यते भोक्ता वा। २७८५ **किंवृत्ते लिप्सायाम्** ३।३।६॥ किंवृत्तं विभक्त्यन्तम्। भविष्यति लड्वा स्यात्। कं कतरं कतमं वा भोजयसि-भोजयिष्यसि-भोजयितासि वा। लिप्सायाम् किम्। कः पाटलिपुत्रं गमिष्यति। २७८६ **लिप्स्यमानसिद्धौ च** ३।३।७॥ लिप्स्यमानेनान्नादिना स्वर्गादेः सिद्धौ गम्यमानायां भविष्यति लड्वा स्यात्। योऽन्नं ददाति-दास्यति-दाता वा, स स्वर्गं याति। यास्यति-याता वा। २७८७ **लोडर्थलक्षणे च** ३।३।८॥ लोडर्थः प्रैषादिर्लक्ष्यते येन तस्मिन्नर्थे वर्तमानाद्धातोर्भविष्यति लड्वा स्यात्। कृष्णचेद्भुङ्क्ते त्वं गाश्चारय। पक्षे लुट्लृटौ। २७८८

न्ताः विधयस्तृतीयस्य द्वैतीयीकाः। अथ तृतीयस्य तार्तीयीका विधयो वक्ष्यन्ते। भविष्यतीत्यनुवर्तमाने इति। 'भविष्यतिगम्यादयः' इति सूत्रादिति भावः। यावत्पुरा। यावत् पुरा इति द्वे पदे। अनयोः प्रयुज्यमानयोर्लट् स्यादित्यर्थः। क्षुडादेरपवादः। निश्चयं द्योतयत इति। 'यावत्तावच्च साकल्येऽवधौ मानेऽवधारणे' इत्यमरः। यावद्दास्यते तावद्भोक्ष्यते इति। यत्परिमाणकं तत्परिमाणकमित्यर्थः। 'यत्तदेतेभ्यः परिमाणे वतुप्' इति वतुबन्तत्वेन निपातत्वाऽभावान्न लडिति भावः। करणभूतयेति। पुरा यास्यतीति प्रत्युदाहरणान्तम्। पुरशब्दस्य पुरेति तृतीयान्तमिदम्। तत्सम्बोधनाय करणीभूतयेत्युक्तम्। विभाषा कदाकर्ह्योः। 'भविष्यति लड्वा स्या'दिति शेषपूरणम्। लडभावपक्षे लुट्लृटौ यथाप्राप्तम्। तदाह—कदा कर्हि वा भुङ्क्ते भोक्ष्यते भोक्ता वेति। नच कर्हियोगे लडभावपक्षे लुडेवोचितः, नतु लृट्। 'अनद्यतनेर्हिलन्यतरस्याम्' इति हिलन्तकर्हियोगविरोधादिति वाच्यम्, लुडुदाहरणस्य कदायोगमात्रविषयत्वादित्याहुः। किंवृत्ते लिप्सायाम्। किंशब्देन वृत्ते निष्पन्नं किंवृत्तमित्यभिप्रेत्य आह—विभक्त्यन्तमिति। लड्वेति। लडभावे तु लुट्लृटौ यथाप्राप्तम्। किंवृत्तशब्देन विभक्त्यन्ततरतमान्तानामेव ग्रहणमिति वृत्तिः। तेन कदादियोगे भविष्यति लट्। 'यद्वृत्तान्नित्यम्' इति सूत्रभाष्यरीत्या तु किंवृत्तानां सर्वेषां कदेत्यादीनामपि ग्रहणमिति युक्तम्। कं कतरं कतमं वेति। 'क्षुधितमन्नलिप्सु'मिति शेषः। लिप्स्यमानसिद्धौ च। लड्वेति। पक्षे यथाप्राप्तम्। लिप्स्यमानसिद्धौ लिप्सायाः सत्त्वेऽप्यकिंवृत्तार्थमिदमिति मत्वोदाहरति—योऽन्नमिति। योऽन्नं ददाति स स्वर्गं याति, योऽन्नं दास्यति स स्वर्गं यास्यति। योऽन्नं दाता स स्वर्गं यातेत्यन्वयः। लोडर्थलक्षणे च। लोडर्थः प्रैषादिरिति। 'विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु' इत्यनुवृत्तौ 'लोट् चे'ति लोड्विधानादिति भावः। कृष्णश्चेदिति। कृष्णभोजनकाले त्वं गाश्चारयेत्यर्थः। अत्र

लिङ् चोर्ध्वमौहूर्तिके ३।३।१६॥ ऊर्ध्वं मुहूर्तादुद्भवः ऊर्ध्वमौहूर्तिकः। निपातनात्समासः उत्तरपदवृद्धिश्च। ऊर्ध्वमौहूर्तिके भविष्यति लोडर्थलक्षणे वर्तमानाद्धातोर्लिङ्लटौ वा स्तः। मुहूर्तादुपरि उपाध्यायश्चेदागच्छेत्-आगच्छति—आगमिष्यति—आगन्ता वा, अथ त्वं छन्दोऽधीष्व। **२७८६ वर्तमानसामीप्ये वर्तमानवद्वा ३।३।१३१॥** समीपमेव सामीप्यम्। स्वार्थे ष्यञ्। 'वर्तमाने लट्' (सू २१५) इत्यारभ्य 'उणादयो बहुलम्' (सू ३१६९) इति यावद्येनोपाधिना प्रत्यया उक्तास्ते तथैव वर्तमानसमीपे भूते भविष्यति च वा स्युः। कदा आगतोऽसि। अयमागच्छामि। अहमागाम्। कदा गमिष्यसि। एष गच्छामि-गमिष्यामि वा। **२७९० आशंसायां भूतवच्च ३।३।१३२॥** वर्तमानसामीप्ये इति नानुवर्तते। भविष्यति

कृष्णभोजनं लोडर्थस्य गोचारणप्रैषस्य लक्षणम्, परिच्छेदकमिति यावत्। पक्षे लुट्-लृटाविति। कृष्णश्चेद्गोक्ता, भोक्ष्यते वा, त्वं गाश्चारयेत्युदाहार्यम्। लिङ् चोर्ध्वमौहूर्तिके। 'ऊर्ध्व'मिति विभक्तिप्रतिरूपकमव्ययम्। ऊर्ध्वं मुहूर्तात् भव इति विग्रहः। केचित्तु 'ऊर्ध्व'मिति द्वितीयान्तम्, 'अकर्मकधातुभिर्योगे' इतिकर्मत्वाद्विग्याहुः। ऊर्ध्वमौहूर्तिक इति। ऊर्ध्वमुहूर्तशब्दात् भावार्थे कालाट्ठञिति भावः। ननु तद्धितार्थेत्यत्र दिक्समूरूये इत्यनुवृत्तेः समानाधिकरणाधिकाराच्चात्र कथं समास इत्यत आह-निपतनादिति। पूर्वपदे आदिवृद्धिमाशङ्क्य आह—उत्तरपदवृद्धिश्चेति। निपातनादित्यनुवर्त्यते। ऊर्ध्वमौहूर्तिके इति। मुहूर्तादूर्ध्वकालीने इत्यर्थः। इदञ्च लोडर्थलक्षण इत्यन्वेति। लिङ्-लटाविति। चाच्छट् समुच्चीयत इति भावः। वा स्त इति। पक्षे लुट्लृटौ यथाप्राप्तम्। छन्द इति। वेदमित्यर्थः। इति तृतीयस्य तृतीये भविष्यतीत्यधिकारस्थाः लविधयः। अथाऽस्मिन्नेव तृतीयपादे कतिपयान् विधीनाह—वर्तमानसामीप्ये। स्वार्थे ष्यमिति। अस्मादेव निर्देशात् चतुर्वर्णादेराकृतिगणत्वाद्धेति भावः। इत्यारभ्येति। तृतीयस्य द्वितीये 'वर्तमाने लट्' इत्यारभ्य आपादसमाप्तेः, 'उणादयो बहुलम्' इति तृतीयपादादिमसूत्रात् प्राक् वर्तमानाधिकारः। तस्मिन्नधिकारे येन विशेषणेन याभ्यः प्रकृतिभ्यः वर्तमाने प्रत्यया विहिताः ते सर्वे तेनैव विशेषणेन ताभ्यः प्रकृतिभ्यः वर्तमानसमीपकाले भूते भविष्यति च वा भवन्तीत्यर्थः। अत्र भूते भविष्यति चेत्याधिक्यम्, तयोरेव वर्तमानसामीप्यसत्त्वात्। कदा आगतोऽसीत्यागतं प्रति प्रश्नः। अयमागच्छामीत्युत्तरम्। अव्यवहितपूर्वकाले आगतवानस्मीत्यर्थः। वर्तमानसमीपकाले भूते लट्। 'अय'मित्यनेन आगमनकालीन प्रश्नेदपरिकरबन्धावियुक्तं रूप निर्दिश्यते इदानीमागमनं सूचयितुम्। आगममिति। वर्तमानवत्त्वाऽभावे भूते लुङ्। कदा गमिष्यसीति गमनात्प्राक् प्रश्ने एष गच्छामि इत्युत्तरम्। अव्यवहितोत्तरकाले गमिष्यामीत्यर्थः। 'एष' इति तु अयमितिवत् व्याख्येयः। वर्तमानकालसमीपे भविष्यति लट्। गमिष्यामि वेति। वर्तमानवत्त्वाऽभावे

काले भूतवद्वर्तमानवच्च प्रत्यया वा स्युराशंसायाम्। देवश्चेदवर्षीत्–वर्षति–वर्षिष्यति वा। धान्यमवाप्स्म–वपामः–वप्स्यामो वा। 'सामान्यातिदेशे विशेषानतिदेशः'। तेन लङ्लिटौ न। **२७९१ क्षिप्रवचने लृट्** ३।३।१३३॥ क्षिप्रपर्याये उपपदे पूर्वविषये लृट् स्यात्। दृष्टिश्चेत्क्षिप्रमाशु त्वरितं वा यास्यति शीघ्रं वप्स्यामः। नेति वक्तव्ये लृङ्ग्रहणं लुटोऽपि विषये यथा स्यात्। श्वः शीघ्रं वप्स्यामः। **२७९२ आशंसावचने लिङ्** ३।३।१३४॥ आशंसावाचिन्युपपदे भविष्यति लिङ् स्यान्न तु भूतवत्। गुरुश्चेदुपेयादाशंसेऽधीयीय। आशंसे क्षिप्रमधीयीय। **२७९३ नानद्यतनवत्क्रियाप्रबन्धसामीप्ययोः** ३।३।१३५॥ क्रियायाः सातत्ये सामीप्ये च लङ्लुटौ न। यावज्जीवमन्नमदाद्दास्यति वा। सामीप्यं

भविष्यति लृट्। आशंसायां भूतवच्च। नानुवर्तते इति। अत्र व्याख्यानमेव शरणम्। अप्राप्तस्य प्रियस्य प्राप्तीच्छा आशंसा। सा च भविष्यद्विषयैव। भूते इच्छाविरहात्। तदाह—भविष्यति काले इति। देवश्चेदिति। देवः पर्जन्यः, अवर्षीच्चेत् धान्यमवाप्स्म। वर्षति चेत् वपामः। वर्षिष्यति चेत् वप्स्याम इत्यन्वयः। भूतवद्भावात् भविष्यति लुङ्—अवर्षीदिति अवाप्स्मेति च भवति। वपधातोर्लुङि उत्तमपुरुषबहुवचने अवाप्स्मेति भवति। वृष्टिवापयोरुभयोरप्याशंसाविषयत्वादुभयत्रापि लुङ्। वर्तमानवत्पक्षे तु लट्। तदुभयाऽभावे तु लृट्। ननु भूतवत्पक्षे लङ्लिटावपि कुतो न स्यातामित्यत आह—सामान्यातिदेशे इति। भूतत्वसामान्ये विहितस्याऽतिदेशादनद्यतनभूतत्वविशेषविहितयोर्लङ्लिटोर्नाऽतिदेश इत्यर्थः। एतच्च भाष्ये स्पष्टम्। क्षिप्रवचने लृट्। वचनग्रहणात् क्षिप्रपर्याये इति लभ्यते। तदाह—क्षिप्रपर्याये इति। पूर्वविषये इति। आशंसायामित्यर्थः। 'अशंसायां भूतवच्च' इत्यस्यापवादः। ननु क्षिप्रवचने नेत्येतावतैव आशंसायां क्षिप्रपर्याये उपपदे भविष्यति न भूतवत् न वर्तमानवदिति लाभाल्लृङ्ग्रहणमनर्थकमित्यत आह—नेति वक्तव्ये इति। क्षिप्रवचने नेत्युक्ते 'सामान्यातिदेशे विशेषानतिदेशः' इति न्यायेन भविष्यत्सामान्ये विहितस्य लृट एव निषेधः स्यात्, ननु लुटः, तस्य अनद्यतनभविष्यद्विशेषविधानात्। लृङ्ग्रहणे तु उक्तविषये लृडेव स्यात्, ननु लकारान्तरमिति लाभाल्लुटोऽपि विषये लृडेवेति लभ्यत इत्यर्थः। श्वः शीघ्रं वप्स्याम इति। अनद्यतनत्वद्योतनाय श्वस्शब्दः। अत्र न लुडिति भावः। आशंसावचने लिङ्। आशंसायाः प्राप्तीच्छायाः भूते असम्भवात् भविष्यतीति लभ्यत इति मत्वा आह—भविष्यतीति। 'आशंसायां भूतवच्च' इत्यस्यापवादः। तदाह—ननु भूतवदिति। गुरुश्चेदिति। गुरुरुपेयाच्चेत् क्षिप्रमधीयीयेत्याशंसे इत्यन्वयः। क्षिप्रयोगेऽपि परत्वाल्लिङेव, ननु लृडिति भावः। नाऽनद्यतनवत्। क्रियायाः प्रबन्धः सातत्यम्। तदाह—क्रियायाः सातत्ये इति। अनद्यतनवदित्यनेन अनद्यतनभूते भविष्यति च विहितौ लङ्लुटौ विवक्षितौ। तदाह—लङ्लुटौ नेति। अनद्यतने भूते लङ् न भवति। भविष्यत्यनद्यतने तु लुट् नेत्यर्थः। क्रियासातत्ये लङ्निषेधमुदाहरति—याव-

तुल्यजातीयेनाव्यवधानम् । येयं पौर्णमास्यतिक्रान्ता तस्यामग्नीनाधित । सोमेनायष्ट । येयममावास्याऽऽगामिनी तस्यामग्नीनाधास्यते । सोमेन यक्ष्यते । **२७६४ भविष्यति मर्यादावचनेऽवरस्मिन् ३।३।१३६॥** भविष्यति काले मर्यादोक्तावरस्मिन्प्रविभागेऽनद्यतनवत् । योऽयमध्वा गन्तव्यः आपाटलिपुत्रात्तस्य यदवरं कौशाम्ब्यास्तत्र सक्तून्पास्यामः । **२७६५ कालविभागे चानहोरात्राणाम् ३।३।१३७॥** पूर्वसूत्रं सर्वमनुवर्तते । अहोरात्रसम्बन्धिनि विभागे प्रतिषेधार्थमिदम् । योगविभाग उत्तरार्थः । योऽयं वत्सरः आगामी तस्य यदवरमाग्रहायण्यास्तत्र युक्ता अध्येष्यामहे । अनहोरात्राणाम् किम् । योऽयं मासः आगामी तस्य योऽवरः पञ्चदशरात्रस्तत्राध्येतास्महे । **२७६६ परस्मिन्विभाषा**

ज्जीवमन्नमदादिति । 'लुङि 'गातिस्था' इति सिचो लुक् । सामीप्ये उदाहरिष्यन्नाह—सामीप्यमिति । येयमिति । **पौर्णमास्या उपरि कृष्णपक्षे कतिपयाहोरात्रैः व्यवधानेऽपि सामीप्यमस्त्येव, पौर्णमास्यन्तरेण सजातीयेन व्यवधानाऽभावात्** । आधितेति । धाधातोर्लुङि 'स्थाध्वोरिच्च' इति धाधातोरित्वं सिचः किरवं च 'हस्वादङ्गात्' इति सिचो लोपः । सोमेनायष्टेति । **'येयं पौर्णमास्यतिक्रान्ता तस्या'मित्यनुषज्यते । अथ क्रियासातत्ये लुटो निषेधमुदाहरति**—येयममावास्येति । सोमेन यक्ष्यते इति । **'येयममावास्या आगामिनी तस्या'मित्यनुषज्यते** । भविष्यति मर्यादा । **'अवरस्मि'न्निति च्छेदः** । अनद्यतनवन्नेति । **लुट् नेत्यर्थः** । **'अक्रियाप्रबन्धार्थमिति भाष्यम्' 'असामीप्यार्थं चे'ति कैयटः** । योऽयमिति । **कस्मिंश्चिज्जनपदविशेषे वसतः पाटलिपुत्राख्यं नगरविशेषं जिगमिषोरिदं वाक्यम्** । **मध्येमार्गं कौशाम्बी नाम काचिन्नगरीति स्थितिः** । **तत्र आपाटलिपुत्रात् योऽयं गन्तव्योऽध्वा तस्य अध्वनः मध्यवर्तिन्याः कौशाम्ब्याः यदवरं पूर्वप्रदेशः तत्र सक्तून् श्वःप्रभृति पास्याम इति योजना** । **अत्र कौशाम्ब्या इति मर्यादा गम्यते । 'अवर'मित्यनेन अवरत्वं गम्यते । अत्र भविष्यत्यनद्यतने लुट् न, किंतु लृडेवेति** । कालविभागे । पूर्वसूत्रमिति । **'भविष्यति मर्यादावचनेऽवरस्मिन्' इति सूत्रमित्यर्थः** । **ननु कालमर्यादायामपि पूर्वसूत्रेणैव सिद्धमित्यत आह—अहोरात्रेति । तथाच अहोरात्रसम्बन्धिनि प्रविभागे 'भविष्यति मर्यादावचने' इत्युक्तविधिर्न भवतीत्यर्थः । ननु 'भविष्यति मर्यादावचनेऽवरस्मिन्' 'कालविभागे चानहोरात्राणाम्' इत्येकमेव सूत्रं कुतो नेत्यत आह—योगविभाग उत्तरार्थ इति । इदमुत्तरसूत्रे स्पष्टीभविष्यति** । योऽयं वत्सर आगामीति । **कालतो मर्यादायामुदाहरणम्** । आग्रहायण्या इति । **आर्गशीर्षपौर्णमास्या इत्यर्थः** । युक्ता इति । **नियमयुक्ता इत्यर्थः** । अध्येष्यामहे इति । **अत्र न लुट्, किन्तु लृडेवेति भावः** । पञ्चदशरात्र इति । **पञ्चदश रात्रयो यस्य पञ्चदश्येति बहुव्रीहिः** । **'अञ्प्रत्यन्ववपूर्वात्' इत्यत्र अजिति योगविभागादच्समासान्तः** । **यद्वा पञ्चदशानां रात्रीणां समाहारः पञ्चदशरात्रः** । **'अहःसर्वैकदेश' इत्यच्समासान्तः** ।

३।३।१३८॥ अवरस्मिन्वर्जं पूर्वसूत्रद्वयमनुवर्तते। अप्राप्तविभाषेयम्। योऽयं संवत्सर आगामी तस्य यत्परमाग्रहायण्यास्तत्राध्येष्यामहे, अध्येतास्महे। 'लिङ्निमित्ते लृङ् क्रियातिपत्तौ' (सू २२२९)। भविष्यतीत्येव। सुवृष्टिश्चेदभविष्यत्तदा सुभिक्षमभविष्यत्। २७६७ भूते च ३।३।१४०॥ पूर्वसूत्रं सम्पूर्णमनुवर्तते। २७६८ वोताप्योः ३।३।१४१॥ वा आ उताप्योः इति च्छेदः। 'उताप्योः–' (सू २८०९) इत्यतः प्राग्भूते लिङ्निमित्ते लृङ् वेत्यधिक्रियते। पूर्वसूत्रं तु 'उताप्योः' इत्यादौ प्रवर्तते इति विवेकः। २७६९ गर्हायां लडपिजात्वोः ३।३।१४२॥ आभ्यां योगे लट् स्यात् कालत्रये गर्हायाम्। लुङादीन्परत्वादयं बाधते। अपि जायां त्यजसि। जातु गणिकामाधत्से। गर्हितमेतत्। २८०० विभाषा कथमि लिङ् च ३।३।१४३॥ गर्हायामित्येव। कालत्रये लिङ्, चाल्लट्। कथं धर्मं त्यजेः त्यजसि वा। पक्षे कालत्रये लकारः। अत्र भविष्यति नित्यं लृङ् भूते वा। कथं

संख्यापूर्वं रात्रं क्लीबम्'इति तु 'लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्य' इति वचनाद्भवति। परस्मिन्विभाषा। अनुवर्तते इति। तथाच भविष्यति काले मर्यादोक्तौ परस्मिन् विभागे अनद्यतनवद्वेति फलितम्। 'लिङ्निमित्ते लृङ् क्रियातिपत्तौ' इति व्याख्यातं भूधातुनिरूपणे। भूते च। अधिकारोऽयम्। अनुवर्तते इति। तथाच 'लिङ्निमित्ते लृङ् क्रियातिपत्तौ'भूत इति अधिक्रियते इति फलितमिति भावः। वोताप्योः। अयमप्यधिकारः। वा आ उताप्योरिति च्छेदः। भूते इति लिङ्निमित्तेलृङिति चानुवर्तते तदाह–उताप्योरित्यतः प्रागिति। 'उताप्योः समर्थयो'रित्यतः प्रागित्यर्थः। ननवनेन 'उताप्योः'इत्यतः प्राक्भूते लिङ्निमित्तेलृङ्वेत्यधिकाराक्रान्तत्वात् भूते चेति पूर्वमधिकारसूत्रं निर्विषयमित्यत आह—पूर्वसूत्रं त्विति। 'उताप्योः समर्थयोर्लिङ्' इत्यारभ्य 'इच्छार्थेभ्यो विभाषा' इत्यतः प्राक् 'भूते च' इति पूर्वमधिकारसूत्रं प्रवर्तते इत्यर्थः। इमावधिकारौ यत्र लिङ्विधिस्तत्रैव प्रवर्तेते, नतु लडादिविधौ, लिङ्निमित्ताऽभावात्। गर्हायाम्। अपिजातु अनयोर्द्वन्द्वः। अत्र 'वोताप्योः' इति भूते लिङ्निमित्ते लृङ् वा इत्यधिकारो न सम्बध्यते। लृङ्विधानेन तद्विषये लिङ्निमित्ताऽभावात्। कालत्रये इति। वर्तमाने भूते भविष्यति चेत्यर्थः। भविष्यतीति निवृत्तम्। अतः कालसामान्ये लडिति भावः। परत्वादिति। अनवकाशत्वाच्चेत्यपि द्रष्टव्यम्। 'अपि जाया'मित्यत्र 'जातु गणिका'मित्यत्र च अपिजातुशब्दौ निन्दाद्योतकौ। तदाह—गर्हितमेतदिति। विभाषा कथमि लिङ् च। गर्हायामित्येवेति। अनुवर्तत एवेत्यर्थः। 'कालत्रये लिङि'ति शेषपूरणम्। भविष्यतीति निवृत्तमिति भावः। चाल्लडिति। 'समुच्चीयते' इति शेषः। तथाच कथमित्यस्मिन् प्रयुज्यमाने कालत्रये गर्हायां लिङ्लटौ वा स्त इति फलितम्। कथं धर्मं त्यजेरिति। त्यक्तवान्, त्यक्ष्यसि, त्यजसि वेत्यर्थः। 'गर्हितमेत'दिति कथंशब्दानूद्यते। लटि उदाहरति—त्यजति वेति। उक्तोऽर्थः। पक्षे इति। विभाषाग्रहणाल्लिङ्-

नाम तत्रभवान्धर्ममत्यक्ष्यत् । २८०१ **किंवृत्ते लिङ्लुटौ ३।३।१४४॥** गर्हायामित्येव । विभाषा तु नानुवर्तते । कः-कतरः-कतमो वा हरिं निन्देत्, निन्दिष्यति वा । लृङ् प्राग्वत् । २८०२ **अनवक्लृप्त्यमर्षयोरकिंवृत्तेऽपि ३।३।१४५॥** गर्हायामिति निवृत्तम् । अनवक्लृप्तिरसम्भावना । अमर्षोऽक्षमा । न सम्भावयामि न मर्षये वा भवान्हरिं निन्देत्, निन्दिष्यति वा । कः-कतरः-कतमो वा हरिं निन्देत्-निन्दिष्यति वा । लृङ् प्राग्वत् । २८०३ **किंकिलास्त्यर्थेषु लृट ३।३।१४६॥** अनवक्लृप्त्यमर्षयोरित्येतत् 'गर्हायां च' (सू २८०६) इति यावदनवर्तते । किंकिलेति समुदायः क्रोधद्योतक उपपदम् । अस्त्यर्थाः अस्तिभवतिविद्यतयः । लिङोऽपवादः । न श्रद्दधे न मर्षये वा किंकिल त्वं शूद्रान्नं भोक्ष्यसे । अस्ति भवति विद्यते वा शूद्रीं गमिष्यसि । अत्र लृङ् न । २८०४ **जातुयदोर्लिङ् । ३।३।१०७॥**

लटोरभावपक्षे भूते वर्तमाने भविष्यति च कालत्रये लिट्लङ्लुङ्लृट्लुट्लृट इत्यर्थः । अत्रेति । अत्र उक्तविषये भविष्यति काले क्रियायाः अनिष्पत्तौ गम्यमानायां 'लिङ्निमित्ते लृङ् क्रियातिपत्तौ' इति नित्यमेव लृङ्, कथमो गर्हायाश्च लिङ्निमित्तस्य सत्त्वादित्यर्थः विशेषविहितत्वादिति भावः । भूते वेति । 'वोताप्योः' इति भूते लिङ्निमित्ते लृङ् वेति अधिकृतत्वादुक्तविषये भूतकाले लृङ् वेत्यर्थः । भविष्यति नित्यं लृङित्यत्रोदाहरति—कथं नामेति । 'तत्रभवानि'ति समुदायः पूज्यवाची । वेदप्रामाण्यभ्युपगन्तेति यावत् । एवंविधः कथं धर्ममत्यक्ष्यत्, तत्त्यागस्य गर्हितत्वादिति भावः । किंवृत्ते लिङ्लुटौ । नानुवर्तते इति । व्याख्यानादिति भावः । विभक्त्यन्तं उतरडतमान्तं च किंशब्दनिष्पन्नं किंवृत्तमित्युक्तम् । तस्मिन्प्रयुज्यमाने गर्हायां लिङ्लुटौ स्त इत्यर्थः । सर्वलकाराणामपवादाविति वृत्तिः । लृङ प्राग्वदिति । भविष्यति नित्यं लृङ्, भूते वेति प्रागुक्तमिहाप्यनुसंधेयमित्यर्थः, लिङ्निमित्तस्य किंवृत्तस्य गर्हायाश्च सत्त्वादिति भावः । अनवक्लृप्त्यमर्ष । निवृत्तमिति । व्याख्यानादिति भावः । अनवक्लृप्त्यमर्षयोः लिङ्लुटोश्च यथासंख्यं नेष्यते, अलपाच्तरस्य अमर्षशब्दस्य पूर्वनिपातस्यागादिति वृत्तिः । न सम्भावयामीति । अकिंवृत्ते उदाहरणम् । भवान् हरिं निन्देदिति यत् तत् न सम्भावयामि न मर्षये वेत्यन्वयः । किंवृत्ते उदाहरति—कः कतर इति । लृङ् प्राग्वदिति । भविष्यति नित्यं लृङ्, भूते वेत्युक्तमिहाप्यनुसन्धेयमित्यर्थः । किंकिल । किंकिलेति समुदायस्य, अस्त्यर्थानां च द्वन्द्वः । यावदिति । 'गर्हायां च' इत्यतः प्रागित्यर्थः । किंकिलेत्यस्मिन् अस्त्यर्थेषु च प्रयुज्यमानेषु अनवक्लृप्त्यमर्षयोर्लृट् स्यादित्यर्थः । पूर्वसूत्रेण लृङ्लुटोः प्राप्तौ लृडेवेत्यर्थमिदम् । तदाह—लिङोऽपवादः इति । न श्रद्दधे इति । न सम्भावयामीत्यर्थः । त्वं शूद्रान्नं भोक्ष्यसे इति यत् तत् न श्रद्दधे न मर्षये वा किंकिलेत्यन्वयः । किंकिलेति क्रोधं द्योतयति । अस्तीति । शूद्रस्य स्त्री शूद्री । तां गमिष्यसीत्यस्ति भवति विद्यते वेत्यन्वयः । अत्र लृङ् नेति ।

लृटोऽपवादः । 'यदायद्योरुपसंख्यानम्' (वा २२७५)। जातु यद्यदा यदि वा त्वादृशो हरिं निन्देन्नावकल्पयामि न मर्षयामि । लृङ् प्राग्वत् । २८०५ **यच्चयत्रयोः ३।३।१४८॥** यच्च यत्र वा त्वमेवं कुर्याः न श्रद्दधे न मर्षयामि । २८०६ **गर्हायां च ३।३।१४९॥** अनवक्लृप्त्यमर्षयोरिति निवृत्तम् । यच्चयत्रयोर्योगे गर्हायां लिङेव स्यात् । यच्च यत्र वा त्वं शूद्रं याजयेः अन्याय्यं तत् । २८०७ **चित्रीकरणे च ३।३।१५०॥** यच्च यत्र वा त्वं शूद्रं याजयेः आश्चर्यमेतत् । २८०८ **शेषे लृडयदौ ३।३।१५१** यच्चयत्राभ्यामन्यस्मिन्नुपपदे चित्रीकरणे गम्ये धातोर्लृट् स्यात् । आश्चर्यमन्धो नाम कृष्णं द्रक्ष्यति । अयदौ किम् । आश्चर्यं यदि मूकोऽधीयीत । २८०९ **उताप्योः समर्थयोर्लिङ् । ३।३।१५२॥**

भविष्यति नित्यं लृङ्, भूते वेत्युक्तमिह न सम्भवति, अत्र लिङो विध्यभावेन लिङ्निमित्तविरहात् । जातुयदोर्लिङ् । जातु यदू अनयोः प्रयोगे अनवक्लृप्त्यमर्षयोर्लिङ् स्यादित्यर्थः । यदिति विभक्तिप्रतिरूपकमव्ययम् । 'अनवक्लृप्त्यमर्षयोरकिंवृत्तेऽपी'ति लिङ्लृटौ प्राप्तौ लिङेवेत्यर्थमिदम् । तदाह—लृटोऽपवादः इति । यदायद्योरिति । यदायद्योः प्रयोगेऽपि उक्तविषये लिङ उपसंख्यानमित्यर्थः । जात्वादिशब्दाः उदाहरणे अनवक्लृप्त्यमर्षद्योतकाः । त्वादृशो हरिं निन्देदित्येतत् नावकल्पयामि, न मर्षयामि वेत्यन्वयः । नावकल्पयामीत्यस्य न संभावयामीत्यर्थः । लृङ् प्राग्वदिति । भविष्यति नित्यं लृङ् भूते वेत्युक्तमिहाप्यनुसन्धेयमित्यर्थः, जात्वादियोगस्य अनवक्लृप्त्यमर्षयोश्च लिङ्निमित्तत्वादिति भावः । यच्चयत्रयोः । यच्चेति समुदाये यत्रशब्दे च प्रयुज्यमाने अनवक्लृप्त्यमर्षयोर्लिङ् स्यादित्यर्थः । लृटोऽपवादः । योगविभागस्तु उत्तरसूत्रे अनयोरेवानुवृत्त्यर्थः । उदाहरणे यच्चेति यत्रेति च अनवक्लृप्त्यमर्षद्योतकौ । त्वमेवं कुर्या इत्येतत् न श्रद्दधे न मर्षयामि वेत्यन्वयः । अत्रापि 'भविष्यति नित्यं लृङ्' 'भूते वेत्युक्तमनुसन्धेयम्, लिङ्निमित्तस्य सत्त्वात् । गर्हायां च । निवृत्तमिति । व्याख्यानादिति भावः । 'यच्चयत्रयोः' इति लिङिति चानुवर्तते । तदाह—यच्चयत्रयोर्योगे इति । लिङेवेति । नतु लकारान्तरमित्यर्थः । उदाहरणे यच्चेति यत्रेति च गर्हाद्योतकम् । 'त्वं शूद्रं याजये'रिति यत् तदन्याय्यमित्यन्वयः । लृङ् प्राग्वत् । चित्रीकरणे च । यच्चयत्रयोः प्रयोगे आश्चर्यं गम्ये लिङेव स्यात्, नतु लकारान्तरमित्यर्थः । उदाहरणे यच्चेति यत्रेति चाश्चर्यद्योतकम् । त्वं शूद्र याजयेरिति यत् तदाश्चर्यमित्यन्वयः । शेषे लृडयदौ । यच्चयत्राभ्यामन्यः शेषः । तदाह—यच्चयत्राभ्यामन्यस्मिन्निति । यदिभिन्ने इति शेषः । लृट्स्यादिति । नतु लकारान्तरमित्यर्थः । आश्चर्यमिति । अन्धः कृष्णं द्रक्ष्यतीत्याश्चर्यमित्यन्वयः । नामेत्यव्ययमाश्चर्यद्योतकम् । मूक इति । मूकोऽधीयीत इत्याश्चर्यमित्यन्वयः । यदीत्याश्चर्यद्योतकम् । उताप्योः । समौ अर्थौ ययोरिति विग्रहः । शकन्ध्वादित्वात्पररूपम् । एकार्थकयोरि-

बाढमित्यर्थेऽनयोस्तुल्यार्थता । उत अपि वा हन्यादघं हरिः । समर्थयोः किम् । उत दण्डः पतिष्यति । अपिधास्यति द्वारम् । प्रश्नः प्रच्छादनं च गम्यते । इतः प्रभृति लिङ्निमित्ते क्रियातिपत्तौ भूतेऽपि नित्यो लृङ् । २८१० **कामप्रवेदनेऽकच्चिति ३।३।१५३॥** स्वाभिप्रायाविष्करणे गम्यमाने लिङ स्यान्न तु कच्चिति । कामो मे भुञ्जीत भवान् । अकच्चिति इति किम् । कच्चिज्जीवति । २८११ **सम्भावनेऽलमिति चेत्सिद्धाप्रयोगे ३।३।१५४॥** अलमर्थोऽत्र प्रौढिः । सम्भावनमित्यलमिति च प्रथमया सप्तम्या च विपरिणम्यते । सम्भावनेऽर्थे लिङ् स्यात्, तच्चेत्सम्भावनमलमिति, अलमि सिद्धाप्रयोगे सति । अपि गिरिं शिरसा

स्यर्थः । कमर्थमादायानयोरेकार्थकत्वमित्यत आह—बाढमिति । तथाच बाढार्थकयोः उत अपि इत्यनयोः प्रयोगे लिङ् स्यान्न तु लकारान्तरमित्यर्थः । उत अपि वेति । उत हन्यादघं हरिः, अपि हन्यादघं हरिरित्यन्वयः । 'उतापी'बाढमित्यर्थकौ । गम्यते इति । 'उत दण्डः पतिष्यती'त्यत्र उतशब्देन प्रश्नो गम्यते । 'अपिधास्यति द्वार'मित्यत्र अपिना धात्वातोः प्रच्छादनार्थकत्वं गम्यत इत्यर्थः । इतः प्रभृतीति । 'वोताप्योः' इति मर्यादायामाङ् । 'उताप्योः' इत्यतः प्राक् भूते लिङ्निमित्ते लृङ् वेत्यधिक्रियते । 'उताप्योः'इत्यादिसूत्रेषु भूते 'लिङ्निमित्ते लृङ् क्रियातिपत्तौ' इत्येवाधिक्रियते इत्युक्तम् । एवञ्च 'उताप्योः' इति सूत्रप्रभृति लिङ्निमित्ते क्रियातिपत्तौ भूते लृङित्येवाधिक्रियते, नतु वाग्रहणम् । अतो नित्यमेवाऽत्र विषये क्रियातिपत्तौ भूते भविष्यति च लृङित्यर्थः । कामप्रवेदनेऽकच्चिति । **अकच्चितीति च्छेदः । तदाह**—नतु कच्चिती'ति । सर्वलकारापवादः अभिप्रायः इच्छा । काम इति । भवान् भुञ्जीतेति मे कामः । इच्छेत्यर्थः । अत्र लिङ्निमित्तस्य सत्त्वात् क्रियातिपत्तौ भूतेऽपि नित्यं लिङ् प्रथम एवायं कामप्रवेदनद्योतक इति प्राप्तिः । अत्र कच्चिच्छब्दस्य इच्छार्थकत्वाभावादिच्छार्थं'च्चिति वक्ष्यमाणं नात्र प्रवर्तते । सम्भावने । अलमर्थोऽत्र प्रौढिरिति । पर्याप्तिरित्यर्थः । विपरिणम्यते इति । सम्भावने इति यत् सप्तम्यन्तं तत् आवर्त्य प्रथमया सम्भावनमिति च विपरिणम्यते । यत्तु अलम् इति प्रथमान्तं तत् आवर्त्य सप्तम्या अलमि इति च विपरिणम्यत इत्यर्थः । 'छान्दसं विभक्तिव्यत्ययमाश्रित्ये'ति शेषः । तथाच सम्भावने इति सप्तम्यन्तं, सम्भावनमिति प्रथमान्तं च लभ्यते । तथा अलम् इति प्रथमान्तं अलमि इति सप्तम्यन्तं च लभ्यते । तत्र सम्भावने इति सप्तम्यन्तमर्थनिर्देशपरम् । तदाह—सम्भावनेऽर्थे लिङ् स्यादिति । 'उरुकटान्यतरकोटिकं ज्ञानं सम्भावन'मित्युच्यते । सम्भावनमिति प्रथमान्तं तु अलमिति प्रथमान्तेन विशेष्यते । इतिहेतौ । तदाह—तच्चेदिति । तत्सम्भावनम्, अलं पर्याप्तिहेतुकं चेदित्यन्वयः । विभक्तातोर्ज्ञानार्थात् 'मतिबुद्धि' इति वर्तमाने कर्मणि क्ते सिद्धशब्दः । सिद्धे गम्यमानेऽप्यलमर्थे अप्रयोगो यस्य सः सिद्धाप्रयोगः तस्मिन्निति विग्रहः । अलमि इति सप्तम्यन्तमत्र विशेष्य-

भिन्द्यात्। सिद्धाप्रयोगे किम्। अलं कृष्णो हस्तिनं हनिष्यति। २८१२ **विभाषा धातौ सम्भावनवचनेऽयदि ३।३।१५५॥** पूर्वसूत्रमनुवर्तते। सम्भावनेऽर्थे धातावुपपदे उक्तेऽर्थे लिङ् वा स्यात्, न तु यच्छब्दे। पूर्वेण नित्ये प्राप्ते वचनम्। सम्भावयामि भुञ्जीत भोक्ष्यते वा भवान्। अयदि किम्। सम्भावयामि यद्भुञ्जीथास्त्वम्। २८१३ **हेतुहेतुमतोर्लिङ् ३।३।१५६॥** वा स्यात्। कृष्णं नमेच्चेत्सुखं यायात्। कृष्णं नंस्यति चेत् सुखं यास्यति। 'भविष्यत्येवेष्यते' (वा २२७६) नेह। हन्तीति पलायते। २८१४ **इच्छार्थेषु लिङ्लोटौ ३।३।१५७॥** इच्छामि भुञ्जीत, भुङ्क्तां वा भवान्। एवं कामये प्रार्थये इत्यादियोगे बोध्यम्। 'कामप्रवेदने इति वक्तव्यम्' (वा २२३६)। नेह, इच्छन्करोति। २८१५ **लिङ् च ३।३।१५६॥** समानकर्तृकेषु इच्छार्थेषु लिङ्। भुञ्जीयेतीच्छति। २८१६ **इच्छार्थेभ्यो विभाषा वर्तमाने ३।३।१६०॥** लिङ् स्यात्पक्षे लट्। इच्छेत्। इच्छ-

---

समर्पकं सम्बध्यते। अलंशब्दप्रयोगं विनापि तदर्थं गम्यमाने इति यावत्। तदाह—सिद्धाप्रयोगे सतीति। 'अल'मिति शेषः। अपि गिरिमिति। बलवन्तं पुरुषमधिकृत्य आयुक्तिरियम्। प्रायेण शिरसा गिरिं भेत्तुमयं समर्थ इत्यर्थः। गिरिभेदसम्भावनस्य सामर्थ्यहेतुकत्वद्योतकः अपिशब्दः। अत्र लिङ्निमित्तसत्त्वात् क्रियातिपत्तौ भूते लृङ्। 'अकर्मकि सम्भावने सिद्धाप्रयोगश्चेत्' इति सूत्रम्। विभाषा धातौ। 'अयदी'ति च्छेदः। तदाह—नतु यदिति। लिङ्भावे लृट्, 'शेषे लृडयदौ' इत्यतस्तदनुवृत्तेः। सम्भावयामीति। प्रायेण भोक्तुं समर्थं इत्यर्थः। हेतुहेतुमतोर्लिङ्। पूर्वसूत्राद्विभाषानुवृत्तिं मत्वा आह—वा स्यादिति। पक्षे लृट्। हेतुभूते फलभूते वाऽर्थे वर्तमानाद्धातोर्लिङ् वा स्यादिति यावत्। भविष्यत्येवेति। लिङ्ग्रहणादिति भावः। हन्तीति। इतिहेतौ वर्तमानकालिकहननाद्धेतोरित्यर्थः। अत्र लिङ्निमित्तसत्त्वात् भविष्यति तु क्रियातिपत्तौ भूते च लृङ्। इच्छार्थेषु लिङ्लोटौ। इच्छार्थकधातुषु प्रयुज्यमानेषु लिङ्लोटौ स्तः। सर्वकारापवादः। असमानकर्तृकविषयमिदम्। समानकर्तृकेषु तु 'लिङ् च' इति वक्ष्यते। इच्छामीति। भुञ्जीत भवानिति इच्छामीत्यन्वयः। कामप्रवेदने इति। परं प्रति स्वाभिप्रायाविष्करणे 'इच्छार्थेषु लिङ्लोटौ' इति विधिरित्यर्थः। इच्छन्करोतीति। परं प्रति स्वाभिप्रायाविष्करणाभावान्न लिङ्लोटाविति भावः। 'कामप्रवेदनेऽकर्मकि इति सूत्रं तु प्रकरणादिना यत्र कामप्रवेदनं नत्वेच्छार्थकमुपपदमस्ति तद्विषयमिति बोध्यम्। इत उत्तरसूत्रं 'समानकर्तृकेषु तुमु'न्निति तु कृद्धिकारे व्याख्यास्यते। लिङ् च। समानकर्तृकेष्विति, इच्छार्थेष्विति चानुवर्तते। तदाह—समानेत्यादि। भुञ्जीयेती च्छतीति। अत्र भोक्तुरेव इच्छिकर्तृत्वात्समानकर्तृकत्वम्। 'समानकर्तृकेषु इच्छार्थेष्वि'ति कोटो निवृत्त्यर्थमिदं सूत्रम्। क्रियातिपत्तौ तु भविष्यति नित्यं लृङ्, भूते चेत्यधिकारः सम्पूर्णः। इच्छार्थेभ्यो। लिङित्येवानुवर्तते। समानकर्तृकेष्विति

ति । कामयेत । कामयते । 'विधिनिमन्त्रण' (सू २२०८) इति लिङ् । विधौ—यजेत । निमन्त्रणे—इह भुञ्जीत भवान् । आमन्त्रणे—इहासीत । अधीष्टे—पुत्रमध्यापयेद्भवान् । सम्प्रश्ने—किं भो वेदमधीयीय उत तर्कम् । प्रार्थने—भो भोजनं लभेय । एवं लोट् । २८१७ **प्रैषातिसर्गप्राप्तकालेषु कृत्याश्च ३।३।१६३॥** लोट् च । प्रैषो विधिः । अतिसर्गः कामचारानुज्ञा । भवता यष्टव्यम् । भवान्यजताम् । चकारेण लोटोऽनुकर्षणं प्राप्तकालार्थम् । २८१८ **लिङ् चोर्ध्वमौहूर्तिके ३।३।१६४॥** प्रैषादयोऽनुवर्तन्ते । मुहूर्तादूर्ध्वं यजेत, यजताम्, यष्टव्यम् । २८१९ **स्मे लोट् ३।३।१६५॥** पूर्वसूत्रस्य विषये । लिङः कृत्यानां चापवादः । ऊर्ध्वं मुहूर्तायजतां स्म । २८२० **अधीष्टे च ३।३।१६६॥** स्मे उपपदेऽधीष्टे लोट् स्यात् । त्वं स्माऽध्यापय । २८२१ **लिङ् यदि ३।३।१६८॥** यच्छब्दे उपपदे काल-

---

निवृत्तम् । तत् सूचयन्नुदाहरति—इच्छेत् इच्छतीति । 'विधिनिमन्त्रण' इति भूवादौ व्याख्यातमपि सूत्रक्रमप्राप्तत्वात् स्मारितम् । एवं लोडिति । लोट् चेति विध्यादिषु विहितो लोडप्येवमुदाहर्तव्य इत्यर्थः । प्रैषातिसर्गे । लोट् चेति । पूर्वसूत्रोपात्तो लोट् चकारात्समुच्चीयते । कृत्यसंज्ञकाः प्रत्ययाः वक्ष्यमाणा लोट् च प्रैषादिषु भवन्तीत्यर्थः । प्रैषे अतिसर्गे च कृत्यप्रत्ययमुदाहरति—भवता यष्टव्यमिति । भावे तव्यप्रत्ययः । लोडुदाहरति—भवान् यजतामिति । ननु चकारेण लोटोऽनुकर्षणं व्यर्थम्, प्रैषस्य विधिरूपतया, अतिसर्गस्य आमन्त्रणरूपतया च 'लोट् च' इत्यनेनैव सिद्धेरित्यत आह—चकारेणेति । प्राप्तकाले यथा—गुरुणा भोक्तव्यम् । गुरुर्भुञ्जीत । भोजनं प्राप्तावसरमित्यर्थः । 'प्राप्तकाले च कृत्याश्च' इत्युक्तौ तु निमन्त्रणादिष्वपि कृत्याः स्युः । अतः प्रैषादिग्रहणम् । लिङ् चोर्ध्वमौहूर्तिके । 'लोडर्थलक्षणे च' इत्युत्तरमेवज्ञातीयकमेव सूत्रं लिङ्लृङ्क्रियातिपत्तिष्वित्यतः प्राक् पठितम् । तत्र ऊर्ध्वमौहूर्तिकशब्दो व्याख्यातः । प्रैषादय इति । तथाच मुहूर्तादुपरितनकालके धात्वर्थे विद्यमानाद्धातोः प्रैषातिसर्गप्राप्तकालेषु लिङ् च स्यात्, लोट्, कृत्याश्चेत्यर्थः । क्रमेण लिङादीनुदाहरति—मुहूर्तादूर्ध्वं यजेत यजतां यष्टव्यमिति । अत्र प्राप्तकाले अप्राप्तस्य लिङो विधिः, विध्यादिसूत्रे लिङ्विधौ प्राप्तकालस्य ग्रहणाऽभावात् । प्रैषातिसर्गयोस्तु विध्यादिसूत्रेणैव लिङ् सिध्यति । लिङ एवात्र विधौ तु, तेन लोटः कृत्यानां च बाधः स्यात् । अतश्चकारेण तेषामपि विधिरिति ज्ञेयम् । स्मे लोट् । पूर्वसूत्रेति । तथाच मुहूर्तादुपरितनकाले प्रैषातिसर्गप्राप्तकाले लोडेव स्यात्, ननु लिङ् कृत्याश्चेत्यर्थः । तदाह—लिङः कृत्यानां चापवाद इति । अधीष्टे च । लोट् स्यादिति । अधीष्टे विहितस्य लिङोऽपवादः । अधीष्टं सत्कारपूर्वको व्यापार इत्युक्तम् । त्वं स्माध्यापयेति गुरुं प्रत्युक्तिः । 'स्मे लोडधीष्टे च' इत्येकसूत्रत्वेन सिद्धे योगविभागस्तु ऊर्ध्वमौहूर्तिक इत्यनुवृत्तिनिवृत्त्यर्थः । 'कालसमयवेलासु तुमुन्' इत्युत्तरसूत्रं तु कृदधिकारे व्याख्यास्यते ।

समयवेलासु च लिङ् स्यात्। कालः समयो वेला वा यद्भुञ्जीत भवान्। २८२२ अर्हे कृत्यतृचश्च ३।३।१६९ ॥ चाल्लिङ्। त्वं कन्यां वहेः। २८२३ शकि लिङ् च ३।३।१७२ ॥ शक्तौ लिङ् स्यात्, चात्कृत्याः। भारं त्वं वहेः। 'माङि लुङ्' (सू २२१९)। मा कार्षीः। कथं मा भवतु, मा भविष्यतीति। नायं माङ् किंतु माशब्दः। २८२४ धातुसंबन्धे प्रत्ययाः ३।४।१॥ धात्वर्थानां संबन्धे यत्र काले प्रत्यया उक्तास्ततोऽन्यत्रापि स्युः। तिङन्तवाच्यक्रियायाः प्राधान्यात्तदनुरोधेन गुणभूतक्रियावाचिभ्यः प्रत्ययाः। वसन्ददर्श। भूते लट्। अतीतवासकर्तृकर्तृकं दर्शनमर्थः। सोमयाज्यस्य पुत्रो भविता। सोमेन यक्ष्यमाणो

लिङ् यदि। कालसमयवेलास्वित्यनुवर्तते। सर्वलकारापवादः। तुमुनपवादश्च। भुञ्जीत भवानिति यत् तत्र्य कालः समयो वेला वेत्यन्वयः। अर्हे कृत्यतृचश्च। चाल्लिङिति। योग्ये कर्तरि गम्ये कृत्याः तृच् लिङ् चेत्यर्थः। त्वं कन्यां वहेरिति। कन्याविवाहस्य योग्य इत्यर्थः। शकि लिङ् च। 'शकृ' इति भावे क्विबन्तम्। शक्तौ गम्यमानायामित्यर्थः। भारं त्वं वहेरिति। वोढुं शक्त इत्यर्थः। माङि लुङिति व्याख्यातमपि क्रमप्राप्तं विशेषविवक्षया पुनः स्मार्यते। ननु सर्वलकारापवादोऽयमित्युक्तम्। एवं सति मा भवतु मा भविष्यतीति कथमिति शङ्कते—कथमिति। परिहरति—नायं माङिति। किंत्विति। लकारानुबन्धविनिर्मुक्तस्यापि अव्ययेषु पाठादिति भावः। नच माशब्दमादाय मा भवत्वित्यादिप्रयोगसत्त्वे 'माङि लुङ्' इति व्यर्थमिति वाच्यम्। सर्वलकारविषये 'न माङ्योगे' इत्यडाद्यहितलुङन्तप्रयोगार्थं तदावश्यकत्वात्। धातुसम्बन्धे। धातुशब्देन धात्वर्थो लक्ष्यते। धात्वोः सम्बन्ध इति विग्रहः, सम्बन्धस्य द्विनिष्ठत्वात्। तथा च धात्वर्थयोः सम्बन्धे सति प्रत्ययाः स्युरिति लब्धम्। कस्मिन्नर्थे इत्याकाङ्क्षायां काले इति गम्यते, 'वर्तमाने लट्' इत्यारभ्य तत्तत्कालविशेषेष्वेव प्रत्ययविधिदर्शनात्। तत्र तत्तद्विधिभिरेव तत्तत्कालविशेषे प्रत्ययसिद्धेस्ततोऽन्यस्मिन्काले इति गम्यते। तदाह—धात्वर्थानामित्यादिना। धात्वर्थयोरित्यर्थः। उदाहरणबहुत्वाभिप्रायं बहुवचनम्। 'वर्तमानसामीप्ये वर्तमानवद्वा' इत्यादिसूत्रे यत्र काले ये प्रत्यया उक्ताः ते धात्वर्थयोः सम्बन्धे गम्ये ततोऽन्यस्मिन्नपि काले स्युरिति यावत्। तथाच 'वसन् ददर्श' यत्र लडादेशः शतृप्रत्ययो' भूतकाले इति सिद्धं भवति। ननु 'वसन् ददर्श' इत्यत्र भूते लडिव वर्तमाने लिडित्यपि स्यादित्यत आह—तिङन्तेति। 'वसन् ददर्श'इत्यादौ तिङन्तवाच्या दर्शनादिक्रिया प्रधानम्। वासादिक्रिया तु दर्शनादिक्रियार्थत्वात् गुणभूता। अतः प्रधानभूतदर्शनादिक्रियानुसारेण गुणभूतवासादिक्रियावाचिभ्य एव इह प्रत्ययाः कालान्तरेषु विधीयन्त इत्यर्थः। भूते लडिति। एवञ्च उषित्वा ददर्शेत्यर्थः। तदाह—अतीतेति। अतीतवासे कर्ता यस्येति विग्रहः। 'सप्तमीविशेषणे बहुव्रीहौ' इति ज्ञापकाद्बहुव्रीहिकरणपदो

यः पुत्रस्तत्कर्तृकं भवनम् । २८२५ क्रियासमभिहारे लोट् लोटो हिस्वौ वा च तध्वमोः । ३।४।२ ॥ पौनःपुन्ये भृशार्थे च द्योत्ये धातोर्लोट् स्यात्तस्य च हिस्वौ स्तः । तिङामपवादः । तौ च हिस्वौ क्रमेण परस्मैपदात्मनेपदसंज्ञौ स्त-

---

बहुव्रीहिः । उदाहरणान्तरमाह—सोमयाजीति । सोमेन इष्टवान्यः स सोमयाजी । 'करणे यजः' इति भूते विहितो णिनिः, इह भवितेत्यनद्यतनभविष्यल्लुडन्तप्रधानक्रियानुसारेण अनद्यतनभविष्यति बोध्यः । तदाह—सोमेन यक्ष्यमाण इति । भवनमिति । उत्पत्तिरित्यर्थः । 'गोमानासी'दित्यप्युदाहार्यम् । अत्र गौरस्यास्तीति अस्तिक्रियायां वर्तमानायां 'तदस्यास्ती'ति विहितो मतुप् गौरस्यासीदिति भूतायामस्तिक्रियायां भवति, भात्वर्थद्वयसम्बन्धस्य सत्त्वात् । एतेन अर्थद्वारके धात्वोः सम्बन्धे इत्यपि व्याख्यानं परास्तम् । तथा सति परस्परसम्बन्धार्थबोधकधातुद्वयप्रयोगे प्रत्यया इत्यर्थलाभात् गोमानासीदित्यत्र मतुबनापत्तेः । नहि धात्वोरिह प्रयोगोऽस्ति । भात्वर्थयोः सम्बन्धे इत्यर्थाभ्युपगमे तु गोमानासीदित्यत्र धातुद्वयप्रयोगाभावेऽपि धात्वर्थद्वयस्य सत्त्वादासीदित्यर्थे मतुप् निर्बाध इत्यन्यत्र विस्तरः । क्रियासमभि । अत्र चत्वारि वाक्यानि । तत्र 'क्रियासमभिहारे लो'डिति प्रथमं वाक्यम् । पौनःपुन्यं भृशार्थश्च क्रियासमभिहार इत्युक्तम् । क्रियासमभिहारे इति धात्वर्थविशेषणम् । क्रियासमभिहारविशिष्टक्रियायां धातोरिति लभ्यते । लोट् तु द्योतकः । तदाह—पौनः पुन्ये भृशार्थे च द्योत्ये इति । क्रियासमभिहारविशिष्टक्रियावृत्तेर्धातोर्लोडिति यावत् । सर्वलकारापवादः । 'लोटो हिस्वा'वितिद्वितीयं वाक्यं व्याचष्टे—तस्येति । पूर्ववाक्यविहितस्य लोटः हिस्वावादेशौस्त इत्यर्थः । तिङामपवाद इति । अपवादावित्यर्थः । प्रत्येकाभिप्रायमेकवचनम् । ननु हिस्वयोरुभयोरपि लादेशत्वात् परस्मैपदत्वं स्यात् । तथा सति हेः परस्मैपदत्वं, स्वादेशस्य स्वात्मनेपदत्वमितीष्टा व्यवस्था न सिध्येत् । अस्य स्वादेशस्य तङ्प्रत्याहारप्रविष्टत्वाभावेन 'तङानावात्मनेपदम्' इत्यस्याऽप्रवृत्तेः । 'तिप्तस्झि' इत्यादिसूत्रोपात्तेषु ताऽऽतामादिष्वेव तङसञ्ज्ञाप्रवृत्तेः । किंच अनयोर्हिस्वयोः 'तिप्तस्झि' इति सूत्रानन्तर्भूतत्वात्तिङत्वं च दुर्लभमित्यत आह—तौ चेति । 'लोटो हिस्वा'वितिद्वितीयवाक्ये तावत् क्रियासमभिहारे लोडिति प्रथमवाक्यात् लोडित्यनुवृत्तं स्थानषष्ठ्या विपरिणतं तृतीयं वाक्यं सम्पद्यते । तत्र हि 'लोटो हिस्वौ' इति द्वितीयवाक्यात् हिस्वावित्यनुवृत्त धर्मपरमाश्रीयते । तथा च लोडादेशौ हिस्ववद्भवत इति लभ्यते । कौ भवतः इत्याकाङ्क्षायां पूर्ववाक्योपस्थितौ हिस्वाविति गम्यते । ततश्च यावितौ तिङन्तभूतौ हिस्वावुक्तौ तौ प्रसङ्गलोडादेशतिङन्तभूतहिस्ववत् भवत इति तृतीयं वाक्यं पर्यवस्यति । तिङन्तभूतहिस्वयोस्तावत् क्रमात् परस्मैपदत्वमात्मनेपदत्वं तिङ्त्वं च प्रसक्तम् । अतः प्रकृतौ हिस्वौ क्रमात् परस्मैपदात्मनेपदसंज्ञौ स्तः तिङ्संज्ञौ चेत्यर्थः । तिङ्त्वात्पदत्वासिद्धेः । ननु 'वा च तध्वमोः' इति तध्वमोर्हिस्वादेशविधि-

स्तिङ्संज्ञौ च। तध्वमोर्विषये तु हिस्वौ वा स्तः। पुरुषैकवचनसंज्ञे तु नानयोरतिदिश्येते। हिस्वविधानसामर्थ्यात्। तेन सकलपुरुषवचनविषये परस्मैपदिभ्यो हिः कर्तरि। आत्मनेपदिभ्यः स्वो भावकर्मकर्तृषु। २८२६ समुच्चयेऽन्यतरस्याम् ३।४।३॥ अनेककियासमुच्चये द्योत्ये प्रागुक्तं वा स्यात्। २८२७ यथाविध्यनुप्रयोगः पूर्वस्मिन् ३।४।४॥ आद्ये लोड्विधाने लोट्प्रकृतिभूत एव धातुरनुप्र-

---

कल्पविधिरनुपपन्नः। लोडादेशभूतहिस्वयोस्तिङ्त्वेपवादतया लोटस्तध्वमोरप्रसक्तिरित्यत आह—तध्वमोर्विषये त्विति। स्थानषष्ठीमाश्रित्य लोडादेशतध्वमोः स्थाने हिस्वावित्यर्थ इति न भ्रमितव्यम्, येनोक्तदोषः स्यात्। किन्तु विषयविषयिभावः षष्ठ्यर्थः। तथाच तध्वमोर्विषये लोटो हिस्वौ, पक्षे तध्वमाविति फलतीत्यर्थः। अत्र मध्यमपुरुषबहुवचनमेव तशब्दो गृह्यते। व्याख्यानात् ध्वंसाहचर्याच्च। ननु हिस्वयोरनयोर्मध्यमपुरुषैकवचनत्वस्याप्यतिदेशाद्युष्मत्सामानाधिकरण्ये एकत्वे च सत्येव हिस्वौ स्याताम्। तथाच 'हमौ हिस्वौ सर्वेषां पुरुषाणां, सर्वेषां च वचनानामिष्येते' इति भाष्यमनुपपन्नमित्यत आह—पुरुषैकवचनसंज्ञे त्विति। हिस्वयोर्मध्यमपुरुषसंज्ञा एववचनसंज्ञा च नातिदिश्यते इत्यर्थः। कुत इत्यत आह—हिस्वविधानेति। यदि हिस्वयोर्मध्यमपुरुषैकवचनसंज्ञे स्याताम्। तर्हि युष्मत्सामानाधिकरण्ये एकत्वे च सत्येव लोटो हिस्वौ स्याताम्। अन्यत्र तु यथायथं तिबाद्यादेशाः स्युः। तथा सति लोटो हिस्वविधानमनर्थकं स्यात्। अतो न पुरुषवचनातिदेश इत्यर्थः। तेनेति। हिस्वयोः पुरुषवचनातिदेशाऽभावेन क्रमात् परस्मैपदात्मनेपदसंज्ञालाभेन चेत्यर्थः। सकलेति। सकलपुरुषवचनविषये हिर्भवति। स च भवन् परस्मैपदिभ्य एव कर्तव्यैव भवति, न त्वात्मनेपदिभ्यो भावकर्मकर्तृष्वित्यर्थः, 'शेषात्कर्तरि परस्मैपदमि'त्युक्तेरिति भावः। आत्मनेपदिभ्यः स्वः इति। 'अनुदात्तङित आत्मनेपदम्' 'भावकर्मणोः' इत्यादिसूत्रविषयेभ्यो धातुभ्यः भावकर्मकर्तृषु लोटः स्व एव भवतीत्यर्थः। अनयोरत्र क्रमात् परस्मैपदात्मनेपदसंज्ञाविध्यभावे तु लादेशत्वेन उभयोः परस्मैपदत्वात् कर्तर्येव परस्मैपदमात्मनेपदिभ्योऽपि स्यादिति भावः। समुच्चये। समभिहार इति पदरहितं 'क्रिया, लोट् लोटो हिस्वौ वा च तध्वमोः' इति पूर्वसूत्रमनुवर्तते। क्रियेति लुप्तषष्ठीबहुवचनान्तं समुच्चय इत्यत्रान्वेति। तदाह—अनेककियासमुच्चये द्योत्ये इति। एवंच कारकसमुच्चयमाश्रित्य नाऽस्य प्रवृत्तिः। प्रागुक्तमिति। धातोर्लोट्, तस्य हिस्वौ प्रसिद्धहिस्वधर्मकौ, तध्वमोर्विषये वा इत्युक्तमित्यर्थः। यथाविध्यनुप्रयोगः। 'क्रियासमभिहारे' इति, 'समुच्चयेऽन्यतरस्याम्' इति च लोड्विधौ उक्तौ। तयोर्मध्ये यत्पूर्वसूत्रं 'क्रियासमभिहारे' इति तदेतत्पूर्वशब्देन परामृश्यते। तदाह—आद्ये लोड्विधाने इति। विधिमनतिक्रम्य यथाविधि। यस्याः प्रकृतेः लोड्विहितः तस्या अनुप्रयोग इति लभ्यते। तदाह—लोट्प्रकृतिभूत एवेति। अत्राऽनुप्रयोगः पश्चात्प्रयोगः,

बोध्यः । २८२८ समुच्चये सामान्यवचनस्य ३।४।५॥ समुच्चये लोऽविधौ सामान्यार्थकस्य धातोरनुप्रयोगः स्यात् । अनुप्रयोगाश्रयाश्रयं लडादयस्तिबादयश्च । ततः संख्याकालयोः पुरुषविशेषार्थस्य चाभिव्यक्तिः । 'क्रियासमभिहारे द्वे वाच्ये' (वा ४६९५) । याहि याहीति याति । पुनःपुनरतिशयेन वा यानं ह्यन्तस्यार्थः । एककर्तृकं वर्तमानं यानं 'याती'त्यस्य । इतिशब्दस्त्वभेदान्वये तात्पर्यं ग्राहयति । एवं यातः । यान्ति । यासि । याथः । याथ । यात यातेति यूयं यात । याहि याहीत्ययासीत् । अयास्यद्वा । अधीष्वाऽधीष्वेत्यधीते । ध्वंविषये पक्षे अधीध्वमधीध्वमिति यूयमधीध्वम् । समुच्चये तु सक्तूनिपब, धानाः खादेत्यभ्यवहरति । अन्नं भुङ्क्ष्व, दाधिकमास्वादयस्वेत्यभ्यवहरते । तध्वमोस्तु पिबत, खादतेत्यभ्यवहरत । भुङ्ग्ध्वमास्वदध्वमित्यभ्यवहरध्वम् । पक्षे हिस्वौ । अत्र समुच्चीय-

---

न त्वव्यवहितत्वं विवक्षितम्, 'लुनाहि लुनीहि इत्येवायं लुनातीति' भाष्यप्रयोगालिङ्गात् । समुच्चये सामान्यवचनस्य । उच्यतेऽनेनेति वचनः । सामान्यवाचिन इत्यर्थः । फलितमाह—सामान्यार्थकस्येति । समुच्चीयमानक्रियासामान्यवाचिन इत्यर्थः । अनुप्रयोगादिति । अनुप्रयुज्यमानादित्यर्थः । तत इति । अनुप्रयुज्यमानधातुप्रकृतिकलडादिभिरित्यर्थः । हिस्वाभ्यां तु न सङ्ख्याकारकाद्यभिव्यक्तिः । तथाच भाष्यम्—'हिस्वान्तमव्यक्तपदार्थकं तेनाऽपरिसमाप्तोऽर्थः' इत्यादि । 'क्रियासमभिहारे द्वे वाच्ये' इति वार्तिकं द्विरुक्तप्रक्रियायां व्याख्यातम् । इदमाद्यसूत्रविहितलोटन्तविषयमिति भाष्ये स्पष्टम् । क्रियासमभिहारे लोटमुदाहरति—याहि याहीति यातीति । भाष्ये 'इति' शब्दस्य दर्शनादिति भावः । ह्यन्तस्येति । याहि याहीत्यस्येत्यर्थः । एककर्तृकमिति । यातीति यानकर्तुस्तदेकत्वस्य च प्रतीतेरित्यर्थः । अभेदान्वये इति । तथाच पुनः पुनरतिशयेन वा यद्यानं तदात्मकमेककर्तृकं वर्तमानं यानमिति बोधः । तिङन्तेषु सर्वत्र क्रियाविशेष्यक एव बोध इति सिद्धान्तादेवमुक्तिः । एवमिति । याहि याहीति यातः । याहि याहीति यान्तीत्यादिसकलपुरुषवचनेषूद्दाहार्यमित्यर्थः । याहि याहीति ययौ । याहि याहीति याता । याहि याहीति यास्यति । याहि याहीति यातु । लोण्मध्यमपुरुषबहुवचनतादेशविषये लोटो हिभावविकल्प उक्तः—वा च तध्वमोरिति । तत्र हिभावपक्षे याहि याहीति यूयं यातेति सिद्धवत्कृत्य अभावपक्षे आह—यात यातेति यूयं यातेति । याहि याहीत्ययात् । याहि याहीति यायात् । लुङ्याह—याहि याहीत्ययासीदिति । लृङि उदाहरति—अयास्यदेति । याहि याहीत्ययास्यदिति लृङि रूपम् । यास्यति वेति पाठे लृटि उदाहरणम् । क्रमस्तु न विवक्षितः । पक्षे इति । ध्वंविषये स्वादेशाभावपक्षे इत्यर्थः । यूयमधीध्वम् इति । लोण्मध्यमपुरुषबहुवचनम् । भावकर्मणोस्तु भूयस्व भूयस्वेति भूयते । पच्यस्व पच्यस्वेति पच्यते इत्युदाहार्यम् । अथ 'समुच्चये सामान्यवचनस्य' इत्यस्योदाहरति—

मानविशेषाणामनुप्रयोगार्थेन सामान्येनाऽभेदान्वयः। पक्षे सक्तूनिपिबति। धानाः खादति। अन्नं भुङ्क्ते। दाधिकमास्वादयते। एतेन—

'पुरीमवस्कन्द लुनीहि नन्दनं मुषाण रत्नानि हराऽमराङ्गनाः।
विगृह्य चक्रे नमुचिद्विषा बली य इत्थमस्वास्थ्यमहर्दिवं दिवः॥'

माघ स. १ श्लो. ५१

इति व्याख्यातम् अवस्कन्दनलवनादिरूपा भूतानद्यतनपरोक्षा एककर्तृका अस्वास्थ्यक्रियेत्यर्थात्। इह पुनः पुनश्चस्कन्देत्यादिरर्थ इति व्याख्यानं भ्रममूलकमेव। द्वितीयसूत्रे 'क्रियासमभिहारे' इत्यस्याननुवृत्तेः। लोडन्तस्य द्वित्वापत्तेश्च। पूरीमवस्कन्देत्यादि मध्यमपुरुषैकवचनमित्यपि केषांचित् भ्रम एव। पुरुषवचनसंज्ञे इह नेत्युक्तत्वात्। इति लकारार्थप्रकरणम्।

समुच्चये विति। अभ्यवहरतीति। पानं द्रवद्रव्यस्य दन्तसंमर्दनं विना भक्षणम्। खादनं तु कठिनद्रव्यस्य चर्वणम्। तयोः सामान्यरूपमभ्यवहरणम्, यथाकथञ्चित् भक्षणात्मकत्वात्। पक्षे हिस्वाविति। तथ्वमोर्विषये कदाचित् हिस्वादेशौ पक्षे इत्यर्थः। 'पिब खादेत्यभ्यवहरते'त्युदाहार्यम्। अत्रेपि। 'पिब खादेत्यभ्यवहरती'त्यादौ समुच्चीयमानपानखादनादिक्रियाविशेषाणामनुप्रयुज्यमानधातुवाच्याभ्यवहरणात्मकक्रिया सामान्येन अभेदान्वय इत्यर्थः। पक्षे सक्तूनिति। समुच्चये लोडभावपक्षे अनुप्रयोगोऽपि सामान्यवचनस्य नास्तीति भावः।

एतेनेति। 'समुच्चयेऽन्यतरस्याम्' इति 'समुच्चये सामान्यवचनस्य' इति च सूत्रद्वयेन तदुदाहरणप्रदर्शनेन च 'पुरीमवस्कन्दे'त्यादि माघकाव्यस्थं श्लोकवाक्यं व्याख्यातमित्यर्थः। बली रावणः नमुचिद्विषा इन्द्रेण सह विगृह्य विरोधं प्राप्य, पुर्याः अमरावत्याः अवस्कन्दनं पीडनं, नन्दनवनस्य लवनं रत्नानां मोषणम्, अमराङ्गनानां हरणम् इत्येवंप्रकारेण अहर्दिवम् अहन्यहनि अस्वास्थ्यं चक्रे कृतवानित्यन्वयः इत्थंशब्दः इतिपर्यायः अवस्कन्दनादिक्रियाविशेषाणां अस्वास्थ्यक्रियासामान्ये अभेदं ग्राहयति फलितमाह—अवस्कन्दनलवनादीति। आदिना मोषणं हरणं च गृह्यते। भ्रममूलकत्वमुपपादयति—द्वितीयसूत्रे इति। अननुवृत्तेरिति। भाष्ये तदनुवृत्तेरनुक्तत्वादिति भावः। तदनुवृत्त्यभ्युपगमे बाधकमाह—लोडन्तस्येति। 'समुच्चयेऽन्यतरस्याम्' इति सूत्रे 'क्रियासमभिहारे' इत्यनुवृत्तौ 'अवस्कन्दे'त्यादिलोडन्तानां 'क्रियासमभिहारे द्वे वाच्ये' इति द्वित्वापत्तेरित्यर्थः। भ्रम एवेति। मध्यमपुरुषांशे एकवचनांशे च भ्रम एवेत्यर्थः। कुत इत्यत आह—पुरुषवचनसंज्ञे इह नेत्युक्तत्वादिति। अत्र भाष्ये हिस्वान्तयोरनभिव्यक्तसङ्ख्याकालकत्वात्तदभिव्यक्तये अनुप्रयोगस्य न्याय्यत एव प्राप्तत्वादनुप्रयोगविधिर्मास्तु इत्युक्तम्। एवञ्च 'तावीमान क्षुद्राण्यसकृदावर्तीनि भूतानि भवन्ति जायस्व म्रियस्वेत्येतत् तृतीयं स्थानम्' इति श्रुतौ 'समुच्च-

अथ कृदन्ते कृत्यप्रकरणम् ॥ ९३ ॥

२८२९ धातोः ३।१।९१॥ आ तृतीयसमाप्तेरधिकारोऽयम् । 'तत्रोपपदं सप्तमीस्थम्' (सू ७८१)। 'कृदतिङ्' (सू ३७४)। २८३० वाऽसरूपोऽस्त्रियाम् ३।१।९४॥ परिभाषेयम् । अस्मिन्धात्वधिकारेऽसरूपोऽपवादप्रत्ययः उत्सर्गस्य बाधको वा स्यात्स्त्र्यधिकारोक्तं विना । २८३१ कृत्याः ३।१।९५॥ अधिकारो-

---

येऽन्यतरस्याम्' इति लोटो हिस्वावेव भवतः, न त्वनुप्रयोगः । तत्र जननमरणक्रिययोरेव विवक्षिततया संख्याकालाभिव्यक्तेरविवक्षितत्वेन तत्राऽनुप्रयोगस्य प्रयोजनाऽभावात् । एतेन 'आ च सत्यलोकादाचाऽवीचेर्जायस्व म्रियस्व' इति विपरिवर्तमानमात्मानं जीवलोकं चालोक्याऽस्मिन् संसरे नित्याऽशुचिदुःखात्मकं प्रसरूपानमुपवर्तते' इति वाक्यस्थग्रन्थेऽपि जायस्व म्रियस्वेति व्याख्यातम् । नवात्र 'समुच्चयेऽन्यतरस्याम्' इत्यत्र 'क्रियासमभिहारे' इत्यस्यानुवृत्तेरुक्तत्वात् कथमिह पौनःपुन्यावगतिरिति वाच्यम्, आ च सत्यलोकादाचावीचेः विपरिवर्तमानम् इति समभिव्याहारेण तदुपपत्तेः । उदाहृतश्रुतौ तु पौनःपुन्यं असकृत्पदगम्यमित्यदोषः । कल्पतरुग्रन्थे तु जायस्व म्रियस्वेत्यत्र 'क्रियासमभिहार' इति सूत्रेण लोडित्युक्तम् । तत्तु द्विरुक्तेरुपेक्ष्यमिति शब्देन्दुशेखरे प्रपञ्चितम् । इति श्रीवासुदेवदीक्षितविदुषा विरचितायां सिद्धान्तकौमुदीव्याख्यायां बालमनोरमाख्यायां लकारार्थप्रक्रियानिरूपणं समाप्तम् ।

अथ कृदन्तप्रक्रिया निरूप्यन्ते । तदे । 'प्रत्ययः अथ कथ्यन्ते तृतीयाऽध्यायगोचराः' इति प्रतिज्ञातेषु तृतीयाऽध्यायस्थप्रत्ययेषु प्रथमपादे 'प्रत्ययः, 'परश्च' इत्यारभ्य 'कुषिरजोः प्राचां श्यन्' इत्यन्तैः सूत्रैर्विहिताः कतिचित्प्रत्यया निरूपिताः । अथ तदुत्तरसूत्रविहितान् निरूपयितुमुपक्रमते—धातोः । आ तृतीयेति । आ तृतीयाऽध्यायपरिसमाप्तेरित्यर्थः । एतच्च भाष्ये स्पष्टम् । तत्रोपपदं सप्तमीस्थम् इति । कृदतिङ् इति । व्याख्यातं प्राक् । वाऽसरूपोऽस्त्रियाम् । असरूपः इति छेदः । परिभाषेयमिति । अधिकारत्वे स्वरितत्वकल्पनागौरवादिति भावः । असरूपः इति लिङ्गनिर्देशः । यत्र असरूपप्रत्ययो विधास्यते तत्र वेत्यु पतिष्ठते । 'वे'त्यतः प्राक् 'बाधक' इति शेषः । असरूपो वा बाधको भवतीति यावत् । कस्य बाधको वेत्याकाङ्क्षायाम् उत्सर्गस्येत्यर्थो लभ्यते । फलितमाह—अस्मिन् धात्वधिकारे इत्यादिना । स्त्रीशब्दः स्वर्यते । तदाह—स्त्र्यधिकारोक्तं विनेति । 'स्त्रियां क्तिन्' इति वक्ष्यमाणस्त्र्यधिकारस्थमपवादं विनेत्यर्थः । स्त्र्यधिकारस्तु असरूपः प्रत्ययः उत्सर्गस्य नित्यमेव बाधक इति भावः । 'ण्वुल्तृचौ' इत्युत्सर्गः । 'हगुपधज्ञाप्रीकिरः कः' इत्यपवादः । तद्विषये ण्वुल्तृचावपि भवतः । विक्षिपः । विक्षेपकः । विक्षेपा । असरूप इति किम् । 'कर्मण्यण्' इत्युत्सर्गः । 'आतोऽनुपसर्गे कः' इत्यपवादः स तु सरूपत्वाविशेषं बाधक एव । गोदः । कम्बलदः । 'नानुबन्धकृतमसारूप्यम्' इति वचनात् अनुबन्धो न सारूप्यप्रतिबन्धकः।

ऽयं ण्वुलः प्राक्। २८३२ कर्तरि कृत् ३।४।६७॥ कृत्प्रत्ययः कर्तरि स्यादिति प्राप्ते—२८३३ तयोरेव कृत्यक्तखलर्थाः ३।४।७०॥ एते भावकर्मणोरेव स्युः। २८३४ तव्यत्तव्यानीयरः ३।१।९६॥ धातोरेते प्रत्ययाः स्युः। तकाररेफौ स्वरार्थौ। एधितव्यम्। एधनीयं त्वया। भावे औत्सर्गिकमेकवचनं क्लीबत्वं च। चेतव्यश्चयनीयो वा धर्मस्त्वया। 'वसेस्तव्यत्कर्तरि णिच्च' (वा १९२०)। वसतीति वास्तव्यः। 'केलिमर उपसंख्यानम्' (वा १९१९)। पक्तेलिमा माषाः। पक्तव्याः। भिदेलिमाः सरलाः। भेत्तव्याः। कर्मणि प्रत्ययः। वृत्तिकारस्तु 'कर्म-

---

अस्त्रियां किम्। 'स्त्रियां क्तिन्' इत्युत्सर्गः। 'अ प्रत्ययात्' इति प्रत्ययान्तादिहितः अकारप्रत्ययः तस्य अपवादः। स बाधक एव भवति। चिकीर्षा। ष्यावक्रोशी, ष्याक्रुष्टिः इत्यत्र तु 'कर्मण्यतिहारे णच् स्त्रियाम्' इति णच् क्तिनो बाधको वा भवत्येव। 'अस्त्रिया'मिति निषेधस्तु नास्ति, तस्य 'णचः स्त्रिया'मित्यधिकारोक्तत्वाऽभावात्। कृत्याः। कृत्यसंज्ञका इत्यर्थः। ततश्च 'प्रैषातिसर्गप्राप्तकालेषु कृत्याश्च,' 'अर्हे कृत्यतृचश्च,' शकि लिङ् च' इत्यादिषु प्रवर्तते। ण्वुलः प्रागिति। 'ण्वुल्तृचौ' इत्यतः प्रागित्यर्थः। एतच्च भाष्ये स्पष्टम्। कर्तरि कृत्। अर्थनिर्देशोऽयम्। इति प्राप्ते इति। वक्ष्यमाणतव्यदादिप्रत्ययानां कृत्संज्ञकत्वात्तेषां कर्तरि प्राप्तावित्यर्थः। तयोरेव कृत्यक्तखलर्थाः। 'लः कर्मणि च भावे च' इति सूत्रोपात्ते भावकर्मणी तच्छब्देन परामृश्येते। तदाह—एते भावकर्मणोरेवेति। ननु कर्तरीति भावः। वैशेषिकत्वादेव सिद्धे एवकारस्तु तव्यदादीनां कृत्संज्ञकतया प्राप्तकर्त्रर्थकत्वस्याऽभावमनुवदन् कृत्यसंज्ञया वैशेषिक्या कृत्संज्ञाया अबाध गमयति। तव्यत्तव्यानीयरः। तव्यत् तव्य अनीयर् एषां द्वन्द्वः। प्रत्ययाः स्युरिति। ते कृत्यसंज्ञकाः कृत्संज्ञकाश्च इत्यपि ज्ञेयम्। स्वरार्थाविति। 'तित्स्वरितम्' इति 'उपोत्तम रिति' इति च स्वरविशेषार्थावित्यर्थः। निरनुबन्धकस्य तु तव्यस्य प्रत्ययस्वरेण आद्युदात्तत्वमेवेति बोध्यम्। भावे उदाहरति—एधितव्यमिति। स्वत्कर्तृका एधनक्रियेत्यर्थः। ननु 'लः कर्मणि च' इत्यत्र असत्त्वभूतस्यैव भावस्य ग्रहणम्, तिङ्वाच्यभावनाया असत्त्वरूपतया उक्तत्वात्। ततश्च तस्य भावस्य असत्त्वरूपत्वात्र 'तयोरेव कृत्य' इति तच्छब्देन परामर्शात्तव्यदादीनामसत्त्ववाचितया लिङ्गसंख्यान्वयोऽनुपपन्न इत्यत आह—भावे औत्सर्गिकमेकवचनमिति। 'एकवचनम्, द्विबहुषु द्विबहुवचने' इति सूत्रपाठमभ्युपगम्य द्वित्वबहुत्वाऽभावे एकवचनमिति भाष्यसिद्धान्तादिति भावः। क्लीबत्वं चेति। 'एकश्रुतिः स्वरसवर्णनाम, लिङ्गसंवर्णनाम नपुंसकम्' इति 'दाण्डिनायन' इति सूत्रस्थभाष्यादिति भावः। कर्मण्युदाहरति—चेतव्य इति। 'वसेस्तव्यत् कर्तरि णिच्च' इति वार्तिकम्। वास्तव्य इति। वस्तेरर्थः। णित्त्वादुपधावृद्धिः। केलिमर इति। धातोरित्येव। भावकर्मणोरेवेदम्। केलिमरि ककाररेफौ। भिदेलिमा इति। किन्वाद्योपधागुणः। सरलाः वृक्षविशेषाः।

कर्तरि चायमिष्यते' इत्याह । तद्भाष्यविरुद्धम् । २८३५ कृत्यचः ८।४।२९॥ उपसर्गस्थान्निमित्तात्परस्याच उत्तरस्य कृत्स्थस्य नस्य णत्वं स्यात् । प्रयाणीयम् । अचः किम् । प्रमग्नः । 'निर्विण्णस्योपसंख्यानम्' (वा ५००४) अचः परत्वाभावादप्राप्ते वचनम् । परस्य णत्वम् । पूर्वस्य ष्टुत्वम् । निर्विण्णः । २८३६ णेर्विभाषा ८।४।३० ॥ उपसर्गस्थान्निमित्तात्परस्य ण्यन्ताद्विहितो यः कृत्तत्स्थस्य नस्य णो वा स्यात् । प्रयापणीयम् । प्रयापनीयम् । विहितविशेषणम् किम् । यका व्यवधाने यथा स्यात् । प्रयाप्यमाणं पश्य । 'णत्वे दुर उपसर्गत्वं न' इत्युक्तम् । दुर्यानम् । दुर्यापनम् । २८३७ हलश्चेजुपधात् ८।२।३१॥ हलादेरिजुपधात्कृल्लक्षणाच्चः परस्य णो वा स्यात् । प्रकोपणीयम् । प्रकोपनीयम् । हलः किम् । प्रोहणीयम् । इजुपधात् किम् । २८३८ इजादेः सनुमः ८।४।३२॥ सनुमश्चेद्भवति तर्हि इजादेर्हलन्ताद्विहितो

तद्भाष्येति । भाष्ये भिदेलिमा इत्युदाहृत्य 'भेत्तव्या' इत्येव विवरणादिति भावः । कृत्यचः । 'रषाभ्यां नो णः' इत्यनुवर्तते । 'उपसर्गादनोत्परः' इत्यत उपसर्गादिति च । उपसर्गस्थादिति विवक्षितम् । 'कृती'त्यनन्तरं 'विद्यमानस्ये'ति शेषः । अच इति पञ्चमी । तदाह—उपसर्गस्थादिति । असमानपदत्वादप्राप्तौ वचनम् । 'अट्कुप्वाङ्नुम्व्यवायेऽपि' इत्यनुवर्तते । तदाह—प्रयाणीयमिति । निर्विण्णस्येति । नस्य ण इत्युपसंख्यानमित्यर्थः । अचः परत्वाभावादिति । विदेः क्तप्रत्यये 'रदाभ्याम्' इति दकारादुत्तरस्य तकारस्य पूर्वदस्य च नत्वे 'निर्विन् न' इति स्थिते नकारस्य अचः परत्वाभावात् 'कृत्यचः' इति अप्राप्ते णत्वे इदं णत्ववचनमित्यर्थः । नकारेण व्यवधानाच्च णत्वस्याऽप्राप्तिर्बोध्या । पूर्वस्येति । नस्य णत्वे ष्टुत्वेन णत्वमित्यर्थः । तथाच द्विणकारकं रूपम् । णेर्विभाषा । 'कृत्यचः' इत्यनुवर्तते । 'रषाभ्यां नो णः' इति च । 'णे'रिति कृतो विहितविशेषणम् । तदाह—उपसर्गस्थादित्यादिना । प्रयापणीयमिति । यावातोर्णौ पुकि यापि इत्यस्मात् ण्यन्तादनीयरि णेर्लोपे अनेन णत्वविकल्पः । यकेति । यापि इत्यस्मात् ण्यन्तात् कर्मणि लटः शानचि 'आने मुक्' इति मुगागमे यकि णिलोपे प्रयाप्यमाणशब्दे णत्वविकल्पः इष्यते । णेः परो यः कृत् तस्थस्य णत्वविकल्प इत्युक्तौ तु कृतः शानचो यका व्यवहितत्वेन णिचः परत्वाऽभावात् तस्थस्य नस्य णत्वविकल्पो न स्यात् । तदर्थं णेरिति विहितविशेषणमाश्रितमित्यर्थः । भाष्ये तु ण्यन्तात्परो यः कृत् इत्यंशेऽप्यट्कुप्वाङ्नुमित्याद्यनुवर्त्य यकारव्यवधानेऽपि णत्वविकल्पः समर्थितः । णत्वे दुर इति । 'दुरः षत्वणत्वयोरुपसर्गत्वप्रतिषेधो वक्तव्यः' इत्यनेनेति भावः । ततश्च दुर उपसर्गत्वाऽभावात् ततः परे कृत्स्थनकारे सूत्रद्वयमपि न प्रवर्तते इत्यभिप्रेत्य उदाहरति—दुर्यानं दुर्यापनमिति । यातेर्ण्यन्तात् ल्युटि णिलोपे दुर्यापनमिति रूपम् । हलश्चेजुपधात् । हलन्तादिति नार्थः, इजुपधस्य हलन्तत्वाऽव्यभिचारात् । किन्तु हलादेरिति विवक्षितम् । तदाह—हलादेरिजुपधादिति । 'परस्ये'-

यः कृत्तत्स्थस्यैव। प्रेङ्खणीयम्। इजादेः किम्। 'मगि सर्पणे'। प्रमङ्गनीयम्। नुम्-ग्रहाणमनुस्वरोपलक्षणार्थम्। 'अट्कुप्वाङ्'-(सू १६७) इति सूत्रेऽप्येवम्। तेनेह न। प्रेन्वनम्। इह तु स्यादेव। प्रोम्भणम्। **२८३६ वा निसनिक्तनिन्दाम् ८।४।३३॥** एषां नस्य णो वा स्यात्कृति परे। प्रणिंसितव्यम्। प्रनिंसितव्यम्। **२८४० न भाभूपूकमिगमिप्यायीवेपाम् ८।४।३४॥** एभ्यः कृन्नस्य णो न। प्रभानीयम्। प्रभवनीयम्। 'पूञ्' एवेह ग्रहणमिष्यते' (वा ५०११)। पूङस्तु प्रपवणीयः सोमः। 'प्यन्तभादीनामुपसंख्यानम्' (वा ५०१२)। प्रभापनीयम्। 'ह्याङः शस्य यो वा' (वा १५८४) इत्युक्तं णत्वप्रकरणोपरि तद्वोध्यम्। यत्वस्यासिद्धत्वेन शकारव्यवधानान्न णत्वम्। प्रख्यानीयम्। **२८४१ कृत्यल्युटो बहुलम् ३।३।११३॥** स्नान्त्यनेन स्नानीयं चूर्णम्। दीयतेऽस्मै दानीयो विप्रः। **२८४२ अचो यत् ३।१।९७॥** अजन्ताद्धातोर्यत्स्यात्। चेयम्। जेयम्। अज्ग्रहणं शक्यमकर्तुम्। योगविभागोऽप्येवम्। तव्यदादिष्वेव यतोऽपि सुपठत्वात्। २८४३

ति शेषः। प्रोहणीयमित्यादिप्रत्युदाहरणे तु 'कृत्यचः' इति नित्यमेव णत्वम्। इजादेः। 'णेर्विभाषा' इति निवृत्तम्। 'कृत्यच.' इत्यनुवर्तते, 'हलश्चेजुपधात्' इत्यतो हल इति च। प्रकृतिविशेषणत्वात् तदन्तविधिः। तथाच सनुमो हलन्तात् इजुपधात् परस्य कृन्नस्य णः स्यादिति लभ्यते। एवञ्च प्रेङ्खणीयमित्यादौ 'कृत्यचः' इत्येव सिद्धेरिदं नियमार्थमित्याह—सनुमश्चेदिति। कृत्स्थस्यैवेत्यनन्तरं 'णत्व'मिति शेषः। प्रेङ्खणीयमिति। इषधातुरिदित्वात्सनुम्। ननु 'हवि प्रीणने' इति धातोर्ण्युटि तस्याऽनादेशे प्रेन्वनमित्यत्रापि णत्वं स्यात्, सनुमोऽस्य इजादित्वाद्धलन्तत्वाच्चेत्यत आह—नुम् ग्रहणमित्यादि। अनुस्वारश्च सर्व एव गृह्यते, नतु नुंस्थानिक एव। अविशेषात्। तदाह—इहत्विति। प्रोम्भणमिति। इह उम्भधातुः स्वाभाविकानुस्वारवानेव, न तु नुमस्थानिकानुस्वारवानिति भावः। वा निम। 'कृत्यचः' इत्यतः कृतीत्यनुवृत्तम्। अच इति च निवृत्तम्। तदाह—एषां नस्येति। न भाभू। प्रभानीयमिति। इह 'कृत्यचः' इति प्राप्तं णत्वं नेति भावः। णत्वप्रकरणोपरीति। इदं 'चिण्ङः ख्याञ्' इति सूत्रे भाष्ये स्पष्टम्। प्रख्यानीयमिति। इह यत्वस्याऽसिद्धतया शकारेण व्यवधानात् 'कृत्यचः' इति णत्वं नेति भावः। कृत्यल्युटौ। याभ्यः प्रकृतिभ्यो येष्वर्थेषु विहिताः ततोऽन्यत्रापि स्युरित्यर्थः। स्नानीयमिति। करणे अनीयर्। दानीय इति। सम्प्रदाने अनीयर्। भाष्ये तु 'कृतो बहुलमिति वक्तव्यम्' इत्युक्त्वा पादाभ्यां हियते पादहारकः। कर्मणि ण्वुल्। श्वोऽग्नीनाधास्यमानेन। अनद्यतने भविष्यति लृटीत्युदाहृतम्। अचो यत्। शक्यमकर्तुमिति। 'ऋहलोर्ण्यत्' इति ऋहलन्तात् विशिष्य ण्यतो विहितत्वेन हलन्तेभ्यो यत्प्रत्ययस्याप्रवृत्तिरित्यर्थः। वासरूपविधिस्तु सरूपत्वान्न भवति। योगविभागोऽप्येवमिति। कर्तुमशक्य इत्यर्थः। कुत इत्यत आह—तव्यदादिष्वे-

ईद्यति ६।४।६५॥ यति परे आत ईत्स्यात् । गुणः । देयम् । श्लेयम् । 'तकिशसिचतियतिजनिभ्यो यद्वाच्यः' (वा १९२२) तक्यम् । शस्यम् । चत्यम् । यत्यम् । जन्यम् । जनेर्यद्विधिः स्वरार्थः । ण्यतापि रूपसिद्धेः । न च वृद्धिप्रसङ्गः । 'जनिवध्योश्च' (सू २५१२) इति निषेधात् । 'हनो वा यद्वधश्च वक्तव्यः' (वा १९२३) वध्यः । पक्षे वक्ष्यमाणो ण्यत् । घात्यः । २८४४ पोरदुपधात् ३।१।८६॥ पवर्गान्ताददुपधाद्यत्स्यात् । ण्यतोऽपवादः । शप्यम् । लभ्यम् । 'नानुबन्धकृतमसारूप्यम्' । अतो न ण्यत् । तव्यदादयस्तु स्युरेव । २८४५ आडो यि ७।१।६५॥ आङः परस्य लभेर्नुम्स्याद्यादौ प्रत्यये विवक्षिते । नुमि कृते अदुपधत्वाभा-

---

वेति । 'तव्यत्तव्यानीयर्यतः' इत्येकसूत्रत्वेनैव पठितुं शक्यत्वादित्यर्थः । ईद्यति । आतः इति । 'आतो लोप इटि च' इत्यतः तदनुवृत्तेरिति भावः । गुण इति । दाधातोः 'अचो यत्' इति यति आतः ईत्वे 'सार्वधातुकार्धधातुकयोः' इति गुण इति भावः । श्लेयमिति । 'श्लै हर्षक्षये' इति धातोर्यति 'आदेचः' इत्यात्वे ईत्वे गुण इति भावः । तकिशसीति । तकि, शसि, चति, यति जनि एषां पञ्चानां द्वन्द्वः । इका निर्देशः । 'ऋहलोर्ण्यत्' इत्यस्यापवादः । 'तक हसने, शसु हिंसायां, चते याचने, यती प्रयत्ने, जनी प्रादुर्भावे' इति धातवः । अत्र सर्वत्र अकर्मकेभ्यो भावे प्रत्ययः । सकर्मकेभ्यस्तु कर्मण्यपीति विवेकः । ननु 'अर्हे कृत्यतृचश्च' इत्यर्हेऽपि जनेर्ण्यतोऽपि जन्यमिति रूपसिद्धेः जनिग्रहणं व्यर्थमित्यत आह—स्वरार्थ इति । 'यतोऽनावः' इत्याद्युदात्तार्थं इत्यर्थः । ननु ण्यति उपधावृद्धिः स्यात् अतस्तदभावार्थमिह जनेर्यद्विधिरस्त्वित्याशङ्क्य निराकरोति—न च वृद्धिप्रसङ्ग इति । कुत इत्यत आह—जनिवध्योरिति । हनो वेति । हनधातोर्यद्वा स्यात् । प्रकृतेर्वधादेशश्चेत्यर्थः । पक्षे इति । यदभावपक्षे इत्यर्थः । घात्य इति । ण्यति 'हनस्तोऽचिण्णलोः' इति नस्य तः । कुत्वम् । उपधावृद्धिः । वधादेशस्तु श्लौ सन्नियोगशिष्टत्वान्नेति भावः । पोरदुपधात् । ननु शप्यं लभ्यमित्यत्र 'ऋहलोर्ण्यत्' इति कदाचित् ण्यदपि स्यात् । यण्यतोरसारूप्येण वाऽसरूप इत्यस्य प्रवृत्तेरित्यत आह-नानुबन्धकृतमसारूप्यमिति । वाऽसरूपसूत्रे भाष्ये स्थितमिदम् । अनुबन्धविनिर्मुक्तस्यैव असारूप्यं विवक्षितमित्यर्थः । प्रकृते च यण्यतोरनुबन्धरहितयोः सारूप्यात् वासरूपविधेरप्रवृत्तेः शप्यमित्यादौ ण्यदपवादो यदेवेति भावः । आङो यि । 'इदितो नुम् धातोः' इत्यतो नुमिति 'लभेश्च' इत्यतो लभेरिति चानुवर्तते । तदाह—आङः परस्येति । विवक्षिते इति । यीति विषयसप्तमीति भाष्ये स्पष्टम् । 'विवक्षिते' इत्यस्य प्रयोजनमाह—नुमि कृते इति । यत्प्रत्यये विवक्षिते तत्प्रवृत्तेः प्रागेव नुमि कृते अदुपधत्वाभावाद्यत्प्रत्ययस्याऽप्रवृत्तेर्ण्यदेवेत्यर्थः । यति परे नुमित्यर्थे तु अदुपधत्वात् यदेव स्यात् ननु ण्यदिति भावः ।

वात् ष्यदेव। आलम्भ्यो गौः। २८४६ उपात्प्रशंसायाम् ७।१।६६॥ उपलम्भ्यः साधुः। स्तुतौ किम्। उपलब्धुं शक्यः उपलभ्यः। २८४७ शकिसहोश्च ३।१।९९॥ शक्यम्। सह्यम्। २८४८ गदमदचरयमश्चानुपसर्गे ३।१।१००॥ गद्यम्। मद्यम्। चर्यम्। 'चरेराङि चागुरौ' (वा १९२५)। आचार्यो देशः। गन्तव्य इत्यर्थः। अगुरौ किम्। आचार्यो गुरुः। यमेर्नियमार्थम्। सोपसर्गान्माभूदिति। प्रयाम्यम्। निपूर्वात्स्यादेव। 'तेन तत्र न भवेद्विनियम्यम्' (वा १९३०) इति वार्तिकप्रयोगात्। एतेन 'अनियम्यस्य नायुक्तिः' 'त्वया नियम्या ननु दिव्यचक्षुषा' इत्यादि व्याख्यातम्। नियमे साधुरिति वा। २८४९ अवद्यपण्यवर्या-गर्ह्यपणितव्यानिरोधेषु ३।१।१०१॥ वदेर्नञ्युपपदे 'वदेः सुपि-' (सू २८५४) इति यत्क्यपोः प्राप्तयोर्यदेव, सोऽपि गर्हायामेवेत्युभयार्थं निपातनम्। अवद्यं पापम्। गर्ह्यं किम्। अनुद्यं गुरुनाम। तद्धि न गर्ह्यं वचनानर्हं च।

आलम्भ्यो गौरिति। यद्यपि यत्ण्यतोर्न रूपभेदः। तथापि ण्यति कृते 'तित्स्वरितम्'। यति तु 'यतोऽनावः' इत्याद्युदात्तत्वमिति स्वरभेदः फलम्। उपात्प्रशंसायाम्। उपात्परस्य लभेर्नुम् स्यात् यादौ प्रत्यये विवक्षिते प्रशंसायां गम्यमानायामित्यर्थः। उपलभ्यः साधुरिति। समीपे प्राप्य इत्यर्थः। साधुशब्दात् प्रशंसा गम्यते। इहापि नुमि कृते अदुपधत्वाऽभावात् ण्यदेव। स्वरे विशेषः पूर्ववत्। शकिसहोश्च। पञ्चम्यर्थे षष्ठी। आभ्यां यदित्यर्थः। ण्यतोऽपवादः। गदमद। गद, मद, चर, यम् एषां चतुर्णां द्वन्द्वः। अनुपसर्ग इति सप्तमी पञ्चम्यर्थे। एभ्योऽनुपसर्गेभ्यो यदित्यर्थः। ण्यतोऽपवादः। उपसर्गात् ण्यदेव। प्रगाद्यमित्यादि। चरेराङि चागुराविति। वार्तिकमिदम्। आङि उपसर्गे सत्यपि चरेर्यत्स्यादगुरौ इत्यर्थः। आचार्यो गुरुरिति। शुश्रूषणीय इत्यर्थः। ननु 'ओरदुपधात्' इत्येव सिद्धे यमेरिह ग्रहणं ण्यर्थमित्यत आह—यमेर्नियमार्थमिति। अनुपसर्गादेव यमेर्ण्यदिति नियमार्थमित्यर्थः। तत्फलमाह—सोपसर्गान्मा भूदिति। ननु 'अनियम्यस्य नायुक्तिः' इत्यत्र 'त्वया नियम्या ननु दिव्यचक्षुषा' इत्यादौ च निपूर्वाद्यमेः कथं यत्। अनुपसर्गादिति निषेधादित्यत आह—निपूर्वात्स्यादेवेति। 'य'दिति शेषः। कुत इत्यत आह—तेन तत्रेति। प्रकारान्तरेण समाधत्ते—नियमे साधुरिति वेति। 'यमः समुपनिविषु च' इति निपूर्वाद्यमेर्भावे अप्प्रत्यये नियमशब्दः। नियमे साधुरित्यर्थे 'तत्र साधुः' इति प्राग्दीव्यतीये यत्प्रत्यये नियम्यशब्दो व्युत्पाद्य इत्यर्थः। अवद्यपण्य अवद्य, पण्य, वर्य एषां द्वन्द्वात्प्रथमाबहुवचनम्। गर्ह्य, पणितव्य, अनिरोध एषां द्वन्द्वात्सप्तमीबहुवचनम्। अवद्यादयश्चयः क्रमात् गर्ह्यादिषु त्रिष्वर्थेषु निपात्यन्ते इत्यर्थः। ननु 'वदः सुपि' इत्येव सिद्धे अवद्यग्रहणं ण्यर्थमित्यत आह—नञ्युपपदे इति। यत्क्यपोः स्वरे विशेषः, सम्प्रसारणतदभावौ चेति भावः। अवद्यं पापमिति। गर्हितत्वादवाच्यमित्यर्थः। अनुद्य गुरुनामेति। अत्र नञि उपपदे 'वदः सुपि' इति

'आत्मनाम गुरोर्नाम नामातिकृपणस्य च ।
श्रेयस्कामो न गृह्णीयाज्ज्येष्ठापत्यकलत्रयोः ।' इति स्मृतेः ।

पण्या गौः । व्यवहर्तव्येत्यर्थः । पाण्यमन्यत् । स्तुत्यर्हमित्यर्थः । अनिरोधोऽप्रतिबन्धस्तस्मिन्विषये वृद्धो यत् । शतेन वर्या कन्या । वृत्याऽन्या । २८५० करणम् ३।१।१०२॥ वहन्त्यनेनेति वह्यं शकटम् । करणम् किम् । वाह्यम् । वोढव्यम् । २८५१ अर्यः स्वामिवैश्ययोः ३।१।१०३॥ 'ऋ गतौ' अस्माद्यत् । ण्यतोऽपवादः । अर्यः स्वामी वैश्यो वा । अनयोः किम् । आर्यो ब्राह्मणः । प्राप्तव्य इत्यर्थः । २८५२ उपसर्या काल्या प्रजने ३।१।१०४॥ गर्भग्रहणे प्राप्तकालाचेदित्यर्थः । उपसर्या गौः । गर्भाधानार्थं वृषमेणोपगन्तुं योग्येत्यर्थः । प्रजने काल्या इति किम् । उपसार्या काशी । प्राप्तव्येत्यर्थः । २८५३ अजर्यं संगतम् ३।१।१०५॥ नञ्पूर्वाज्जीर्यतेः कर्तरि यत्, संगतं चेद्विशेष्यम् । न जीर्यतीत्यजर्यम् ।

क्यपि 'वचिस्वपियजादीनां किति' इति सम्प्रसारणे रूपम् ॥ वचनाऽनर्हमित्यर्थः । अत्र गर्हायां अप्रतीतेः यदेवेति न नियम इति भावः । ननु गुरुनाम्नः अगर्ह्यत्वात् कथं वचनानर्हत्वमित्यत आह—तद्धि न गर्ह्यं वचनानर्हं चेति । कुत इत्यत आह—आत्मनामेति । पण्या गौरिति । पणधातोर्व्यवहारार्थकात् यन्निपात्यते इति भावः । यद्यपि 'पण व्यवहारे स्तुतौ च' इति धातोः अर्थद्वयमस्ति तथापि पण्यशब्दस्य प्रयोगवशेन व्यवहर्तव्य एव रूढत्वादिह व्यवहारार्थक एव गृह्यते । तदाह—व्यवहर्तव्येति । क्रेतव्येत्यर्थः—ण्यमन्यदिति । ण्यति उपधावृद्धिरिति भावः । व्यवहर्तव्यादन्यदित्यर्थः । तदाह—स्तुत्यर्हमिति । अप्रतिबन्ध इति । अनियम इत्यर्थः । वृद्धो यदिति । 'वृङ् सम्भक्तौ' इति क्र्यादिकस्यैवाऽत्र ग्रहणम् । ननु 'वृञ् वरणे' इत्यस्य, अनिरोधरूपार्थस्य सम्भक्तिवाचित्व एव सामञ्जस्यादिति भावः । शतेन वर्या कन्येति । पुरुषशतेन परिग्रहीतुमर्हा, अनेनैव वरणीयेति नियमो नास्तीत्यर्थः । वृत्या अन्येति । अनुरूपेण वरणीयेत्यर्थः । 'एतिस्तुशास्वृदृजुषः क्यप्' इति क्यपि तुक् । अत्र अनियमस्य अप्रतीतेर्न यत् । अत्र वर्याशब्दस्य स्त्रीलिङ्गस्य ग्रहणात्पुंसि 'वार्या ऋत्विजः' इति वृत्तिः । वह्यं करणम् । वहेः करणे यत् निपात्यते । ण्यतोऽपवादः । अर्यः स्वामिवैश्ययोः । अस्माद्यदिति । निपात्यत इति शेषः । ण्यतोऽपवाद इति । । 'ऋहलोः' इति प्राप्तस्य ण्यतोऽपवाद इत्यर्थः । यति ऋकारस्य गुणे ररत्वम् । तदाह—अर्यः स्वामीति । आर्यो ब्राह्मणः इति । ण्यति वृद्धौ ररत्वमिति भावः । उपसर्या । प्रजननं प्रजनः गर्भग्रहणम् । भावे घञ् । 'जनिवध्योश्च' इति वृद्धिनिषेधः । काल्यः प्राप्तोऽस्याः काल्या । 'तदस्य प्राप्तम्'इत्यनुवर्तमाने 'कालाद्यत्' इति यत् । चेदित्यध्याहार्यम् । तदाह—गर्भग्रहणे प्राप्तकाला चेदिति । गर्भग्रहणे प्राप्तकाला स्त्रीपशुरुपस्थितिः विवक्षिता चेत् उपसर्या इति निपात्य-

'तेन संगतमार्येण रामाजर्यं कुरु द्रुतम्' इति भट्टिः। 'मृगैरजर्यं जरसोपदिष्टमदेहबन्धाय पुनर्बबन्ध' इत्यत्र तु संगतमिति विशेष्यमध्याहार्यम्। संगतम् किम्। अजरिता कम्बलः। भावे तु संगतकर्तृकेऽपि ण्यदेव। अजार्यं संगतेन। **२८५४ वदः सुपि क्यप्च ३।१।१०६॥** उत्तरसूत्रादिह भाव इत्यपकृष्यते। वदेर्भावे क्यप्स्याच्चायदनुपसर्गे सुप्युपपदे। ब्रह्मोद्यम्। ब्रह्मवद्यम्। ब्रह्म वेदः तस्य वदनमित्यर्थः। कर्मणि प्रत्ययाविधेयके। उपसर्गे तु ण्यदेव। अनुवाद्यम्। अपवाद्यम्। **२८५५ भुवो भावे ३।१।१०७॥** क्यप्स्यात्। ब्रह्मणो भावो ब्रह्मभूयम्। सुपीत्येव। भव्यम्। अनुपसर्ग इत्येव। प्रभव्यम्। **२८५६ हनस्त च ३।१।१०८॥** अनुपसर्गे सुप्युपपदे हन्तेर्भावे क्यप्स्यातकारश्चान्तादेशः। ब्रह्मणो हननं ब्रह्महत्या स्त्रीत्वं लोकात्। **२८५७ एतिस्तुशास्वृदृजुषः क्यप् ३।१।१०९॥** एभ्यः क्यप्स्यात्। **२८५८ ह्रस्वस्य पिति कृति तुक् ६।१।७१॥** इत्यः। स्तुत्यः। 'शास इदङ्हलोः' (सू २४८६)। शिष्यः। वृ इति वृञो ग्रहणं न वृङः। वृत्यः।

ते। उपपूर्वात् सृधातोः यदिति फलितम्। ण्यतोऽपवादः। अजर्यम्। कर्तरि यदिति। 'कर्तरीति वक्तव्यम्' इति वार्तिकम्। निपातनात् कर्तरीति लभ्यत इति तदाशयः। सङ्गतमिति। सङ्गतं सङ्गमः। न जीर्यतीत्यजर्यजमिति। मित्रत्वमिति शेषः। जरितृ न भवतीत्यर्थः। अत्र भट्टिप्रयोगमाह—तेनेति। हे राम! तेन आर्येण अजर्यम् अनश्वरं सङ्गतं संगमं द्रुतं कुरु इत्यन्वयः। ननु 'मृगैरजर्यं जरसा' इत्यत्र संगतशब्दाऽभावात् कथं यदित्यत आह—मृगैरित्यादि। कालिदासकाव्यमिदम्। अजरितेति। तृजन्तम्। अत्र संगतशब्दाभावाच्च यदिति भावः। भावे स्विति। भावस्य संगतकर्तृकत्वेऽपि संगतस्य प्रत्ययवाच्यत्वाभावात् न यदित्यर्थः। वदः सुपि। उत्तरेति। 'भुवो भावे' इत्युत्तरसूत्रादावे इत्यपकृष्यते इत्यर्थः। भूधातोरकर्मकत्वेन उत्तरसूत्रे भावग्रहणस्य वैयर्थ्यादिति भावः। अनुपसर्गे इति। 'वदः सुप्यनुपसर्गग्रहणम्' इति भाष्यादिति भावः। ब्रह्मोद्यमिति। वदेः क्यपि 'वचिस्वपि' इति सम्प्रसारणम्। 'वस्तुतस्तु नेह भावग्रहणमपकृष्यते। तत्र भावग्रहणमुत्तरार्थमिति भाष्यादिति मतमनुसृत्य आह—कर्मणि प्रत्ययाविधेयके इति। क्यप्यतावित्यर्थः। भूवोभावे। ब्रह्मभूयमिति। कित्त्वाद्य गुणः। क्लीबत्वं लोकात्। भव्यमिति। भाव इत्यर्थः। अत्र सुबुत्पत्त्यङ्गभावात् यदेव, गुणः, 'वान्तो यि' इत्यवादेशः। प्रभव्यमिति। प्रभाव इत्यर्थः। हनस्त च। अन्तादेश इति। प्रकृतेरिति शेषः। भावे किम्? वात्यो वृषलः। अनुपसर्गे किम्? प्रघातः। निरुपपदे इत्येति तु असाध्वेव। एतिस्तु। एति स्तु, शास्, वृ, दृ, जुष्, एषां षण्णां समाहारद्वन्द्वात्पञ्चमी। सुप्यनुपसर्गे भाव इति निवृत्तम्। तदाह—एभ्यः क्यप्स्यादिति। ह्रस्वस्य। ह्रस्वमिति न व्याख्यातम्। इत्य इति। इण्यः क्यपि तुक्। उपेयमित्यत्र तु ईदो देवादिकाजत्।

वृङस्तु वार्या ऋत्विजः । आदृत्यः । जुष्यः । पुनः क्यबुक्तिः परस्यापि ण्यतो बाधनार्था । अवश्यस्तुत्यः । 'शंसिदुहिगुहिभ्यो वा' (वा १८३५) इति काशिका । शस्यम् । शंस्यम् । दुह्यम् । दोह्यम् । गुह्यम् । गोह्यम् । 'प्रशस्यस्य श्रः' (सू २००९) 'ईडवन्दवृशंसदुहां ण्यतः' (सू ३७०२) इति सूत्रद्वयबलाच्छंसेः सिद्धम् । इतरयोस्तु मूलं मृग्यम् । 'आङ्पूर्वादज्ञेः संज्ञायामुपसंख्यानम्' (वा १९२५) । 'अञ्जू' व्यक्तिम्रक्षणादिषु । बाहुलकात्करणे क्यप् । 'अनिदिताम्—' (सू ४१५) इति नलोपः । आज्यम् । २८५९ **ऋदुपधाच्चाक्लृपिचृतेः ३।१।११०॥** वृत् वृत्यम् । वृध् वृध्यम् । क्लृपिचृत्योस्तु, कल्प्यम् । चर्त्यम् । तपरकरणम् किम् । कृत् कीर्त्यम् । अनित्यण्यन्ताश्चुरादय इति णिजभावे ण्यत् । णिजन्तात्तु यदेव । २८६० **ई च खनः ३।१।१११॥** चात्क्यप् । आद्गुणः । खेयम् । ई च इति ह्रस्वः सुपठः । २८६१ **भृञोऽसंज्ञायाम् ३।१।११२॥**

वृङो ग्रहणमिति । वार्तिकमिदम् । न वृङः इति । 'वृङ् सम्भक्तौ' इति क्रितः क्र्यादिकस्य न ग्रहणमित्यर्थः । वार्या ऋत्विज इति । अवश्यं भजनीया इत्यर्थः । अत्र 'वृङ् सम्भक्तौ' इत्यस्मात् ण्यदित्यर्थः । 'अवद्यपण्यवर्या' इति निपातनसिद्धो यत्तु न, अत्र निरोधस्य नियमस्य विवक्षितत्वात् । ननु 'वदः सुपि' इत्यतः अनुवृत्त्यैव सिद्धे क्यबग्रहणमिह व्यर्थम् । नच चकारानुकृष्टयतोऽप्यनुवृत्तिनिवृत्तये क्यब्ग्रहणमिति वाच्यम्, चकारस्य अस्वरितत्वेन 'भुवो भावे' इत्याद्युत्तरसूत्रेष्वनुवृत्यभावादित्यत आह—क्यबुक्तिः परस्यापीति । 'ओरावश्यके' इति विहितस्येत्यर्थः । वेति काशिकेति । वा क्यप् । तद्भावे हलन्तत्वात् ण्यत् । भाष्ये त्वेतन्न दृश्यते इति भावः । शस्यम्, शंस्यमिति । क्यप्पक्षे 'अनिदिताम्' इति नलोपः । दुह्यमिति । क्यप्पक्षे किन्त्वान्न गुणः । अत्र 'शंसिदुहिगुहिभ्यो वा' इत्यस्य भाष्ये अदर्शनेऽपि शंसेर्ण्यत्क्यपौ प्रमाणिकावित्याह—प्रशस्यस्येति । 'प्रशस्यस्य श्रः' इति निर्देशबलात् शंसेः क्यप्सिद्धः । 'ईडवन्दवृशंसदुहां ण्यतः' इत्याद्युदात्तत्वविधौ शंसेर्ण्यदन्तत्वानुवादबलात् ण्यत्सिद्धः । ततश्च शस्यं शंस्यमिति रूपद्वयं सिद्धम् । इतरयोस्तु दुहिगुह्योः क्यडिचकल्पे मूलं नास्तीत्यर्थः । उपसर्गव्याख्यानमिति । क्यप इति शेषः । आज्यमिति । न चाङ्पूर्वकरणे पदपाठे अवग्रहः स्यादिति वाच्यम्, इष्टापत्तेः । पदकाराणामवग्रहाऽभावरूपप्रामाणिक एव । पदपाठस्याऽधुनिकत्वात् इति भाष्ये स्पष्टम् । एवञ्च 'अस्मद्रियगित्यस्मद्रियंगित्यवग्रहः अप्रामाणिक एव । अस्मद्रि अक् इत्येवाऽवग्रहो युक्तः, अस्मच्छब्दस्य टेरद्भावादेशविधानात् इत्याद्यूह्यम् । ऋदु धात्वाक्लृपिचृतेः . कल्प्यचर्त्यौ वर्जयित्वा ऋदुपधाद्धातोः क्यबित्यर्थः । ननु तपरकरणमिह व्यर्थमित्यत आह—अनित्यण्यन्ता इति । णिजन्तात्तु यदेवेति । 'अचो यत्' इत्यनेनेति भावः । ई च खनः । चात् क्यबिति । खने-

भृत्याः कर्मकराः। भर्तव्या इत्यर्थः। क्रियाशब्दोऽयं न तु संज्ञा। 'समश्च बहुलम्' (वा १९४०)। संभृत्याः-संभार्याः। असंज्ञायामेव विकल्पार्थमिदं वार्तिकम्। असंज्ञायाम् किम्। भार्या नाम क्षत्रियाः। अथ कथं भार्या वधूरिति। इह हि 'संज्ञायां समज-' (सू ३२७६) इति क्यपा भाव्यम्। संज्ञापर्युदासस्तु पुंसि चरितार्थः। सत्यम्। बिभर्तेर्भृ इति दीर्घान्तात्क्यादेर्वा ण्यत्। क्यप्तु भरतेरेव। 'तदनुबन्धकग्रहणे-' इति परिभाषया। **२८६२ मृजेर्विभाषा ३।१।११३॥** मृजेः क्यब्वा स्यात्। पक्षे ण्यत्। मृज्यः। **२८६३ चजोः कु घिण्ण्यतोः ७।३।५२॥** चस्य जस्य च कुत्वं स्याद्घिति ण्यति च प्रत्यये परे। 'निष्ठायामनिट इति वक्तव्यम्' (वा ४५५१)। तेनेह न। गर्ज्यम्। 'मृजेर्वृद्धिः' (सू २४७१)। मार्ग्यः। **२८६४ न्यङ्क्वादीनां च ७।३।५३॥** कुत्वं स्यात्। न्यङ्कुः। 'नावञ्चेः' (उ सू १७) इत्यप्रत्ययः। **२८६५ राजसूयसूर्यमृषोद्यरुच्यकुप्यकुष्टपच्याव्यथ्याः ३।१।११४॥** एते सप्त क्यबन्ता निपात्यन्ते। राज्ञा सोतव्योऽ-

---

क्यप् स्यात् प्रकृतेः ईकारोऽन्तादेशश्चेत्यर्थः। ह्रस्वः सुपठ इति। ह्रस्वस्य इकारस्य आद्गुणेन 'खेय'मिति सिद्धेः इति भावः। भृञोऽसञ्ज्ञायाम्। 'क्य'इति शेषः। भृत्याः कर्मकरा इति। भृत्यर्थं कर्म कुर्वाणा इत्यर्थः। 'कर्मणि भृतौ' इति कृञष्टः। भर्तव्या इति। वेतनदानेन परार्थं कर्मणि प्रेषयितव्या इत्यर्थः। ननु भृत्यशब्दस्य कर्मकरेषु रूढत्वात्सञ्ज्ञाशब्दत्वमेवेत्यत आह-'क्रियाशब्द इति। भार्या नाम क्षत्रिया इति। क्षत्रियविशेषेषु रूढः सञ्ज्ञाशब्दोऽयमिति भावः। अथ कथं भार्येति। क्यपा भवितव्यमित्याक्षेपः। ननु वध्वां भार्याशब्दस्य सञ्ज्ञाशब्दत्वात् 'भृञोऽसञ्ज्ञायाम्' इत्यस्याप्रवृत्तेरयमाक्षेपोऽनुपपन्न इत्यत आह-इह हीति। 'स्त्रियां क्तिन्' इत्यतः स्त्रियामित्यनुवृत्तौ 'व्रजयजोर्भावे क्यप्' 'सञ्ज्ञायां समजनिषद' इति सूत्रेण क्यप् स्यादित्यर्थः। ननु सञ्ज्ञायां भृञः क्यब्विधौ 'भृञोऽसञ्ज्ञायाम्' इत्यत्र असञ्ज्ञायामिति व्यर्थमित्यत आह-सञ्ज्ञापर्युदासस्त्विति। समाधत्ते-सत्यमिति। 'डुभृञ् धारणपोषणयोः' इति जुहोत्यादौ ह्रस्वान्तः डुवित् णिच्च। 'भृ भर्त्सने, भरणेऽपि' इति क्रयादौ दीर्घान्तः। आभ्याम् 'ऋहलोर्ण्यत्' इति ण्यदेवेत्यर्थः। क्यप् तु भरतेरेवेति। 'भृञ् भरणे' इति भ्वादौ ह्रस्वान्तो णित्। अस्यैव 'सञ्ज्ञायां समजनिषद' इत्यत्र 'भृञोऽसञ्ज्ञायाम्' इत्यत्र च भृञ्ग्रहणेन ग्रहणम्। ननु डुभृञो जौहोत्यादिकस्य। न च क्रैयादिकस्य निरनुबन्धकस्य दीर्घान्तस्येति भावः। कुत इत्यत आह—तदनुबन्धकेति। 'तदनुबन्धकग्रहणे नातदनुबन्धकस्य' इति परिभाषयेत्यर्थः। बिभर्तेः क्यबभावे बीजमिदम्। क्रैयादिकस्य दीर्घान्तत्वात् न क्यप् इति बोध्यम्। मृजेर्विभाषा। क्यप्पक्षे उदाहरति—मृज्य इति। किन्वात्र गुणः। चजोः कु घिण्ण्यतोः। 'कु' इत्यधि-

भिषवद्वारा निष्पादयितव्यः । यद्वा लतात्मकः सोमो राजा स सूयते कण्ड्यतेऽत्रेत्यधिकरणे क्यबन्निपातनाद्दीर्घः । राजसूयः । राजसूयम् । अर्धर्चादिः । सरत्याकाशे सूर्यः । कर्तरि क्यब्निपातनादुत्वम् । यद्वा 'षू प्रेरणे' तुदादिः । सुवति कर्मणि लोकं प्रेरयति क्यपो रुट् । मृषोपपदाद्वदेः कर्मणि नित्य क्यप् । मृषोद्यम् । विशेष्यनिघ्नोऽयम् । 'उच्छ्रायसौन्दर्यगुणा मृषोद्याः' । रोचतेः रुच्यः । गुपेरादेः कत्वं च संज्ञायाम् । सुवर्णरजतभिन्नं धनं कुप्यम् । गोप्यमन्यत् । कृष्टे स्वयमेव पच्यन्ते कृष्टपच्याः कर्मकर्तरि । शुद्धे तु कर्मणि कृष्टपाक्याः । न व्यथतेऽव्यथ्यः । २८६६ **भिद्योद्ध्यौ नदे ३।१।११५॥** भिदेरुज्झेश्च क्यप् । उज्झेर्धत्वं च । भिनत्ति कूलं भिद्यः । उज्झत्युदकमुद्ध्यः । नदे किम् । भेत्ता । उज्झिता । २८६७ **पुष्यसिध्यौ नक्षत्रे ३।१।११६॥** अधिकरणे क्यब्निपात्यते । पुष्यन्त्यस्मिन्नर्थाः पुष्यः । सिध्यन्त्यस्मिन्सिध्यः । २८६८ **विपूयविनियजित्या मुञ्जकल्कहलिषु ३।१।११७॥** पूङ्नीञ्जिभ्यः क्यप् । विपूयो मुञ्जः । रज्ज्वादिकरणाय शोधयि-

---

भक्तिको निर्देशः । चजोर्विण्ण्यतोश्च यथासंख्यं तु न, 'तेन रक्तं रागात्' इति घञि जस्य कुत्वनिर्देशात् । राजसूय । राज्ञेति । क्षत्रियेणेत्यर्थः । अभिषवेति । ग्रावभिः रसनिष्पत्त्यर्थं सोमलतानां कुट्टनमभिषवः, तत्प्रणादिकया निष्पादयितव्यो यज्ञविशेषः राजसूय इत्यन्वयः । यदूवेति । लताविशेषात्मकः सोमः राजशब्देन विवक्षितः, 'राजानं क्रीणाती'त्यादौ तथा प्रसिद्धेः । सः राजा सूयते अभिसूयते अत्र यज्ञविशेषे इति व्युत्पत्त्या राजसूय इत्यन्वयः । 'कर्तरि कृत्' इत्यधिकारात् कथमधिकरणव्युत्पत्तिरित्यत आह—अधिकरणे क्यबिति । कुत इत्यत आह—निपातनादिति । ननु षुसूधातोः क्यपि कथं दीर्घः । 'अकृत्सार्वधातुकयोः' इत्यस्य कृत्यप्रवृत्तेरित्यत आह—निपातनाद्दीर्घ इति । निपातनादित्युभयत्रान्वेति । उत्वमिति । तस्य रपरत्वे 'हलि च' इति दीर्घ इत्यपि बोध्यम् । मृषोद्यमिति । क्यपि 'वचिस्वपि' इति सम्प्रसारणम् । रोचतेरिति । रुचधातोः क्यपि 'रुच्य' इति रूपमित्यर्थः । गुपेरिति । गुप्धातोः क्यप् प्रकृतेरादिवर्णस्य ककारस्य संज्ञायां निपात्यते इत्यर्थः । सुवर्णरजतभिन्नं धनं कुप्यमिति ज्ञेयम् । तथाच 'हेमरूपे कृताऽकृते' इत्युक्त्वा अमरः आह 'ताभ्यां यदन्यत्तत्कुप्यम्' इति । कृष्ट इति । कृष्टप्रदेशे ये स्वयं पच्यन्ते फलन्ति ते कृष्टपच्या इत्यर्थः । कर्मकर्तरीति । अत्र कर्मकर्तरि क्यबित्यर्थः । निपातनादिति भावः । शुद्धे त्विति । मुख्यकर्मणि तु व्यति उपधावृद्धौ 'चजोः' इति कुत्वे 'कृष्टपाक्य' इति रूपमित्यर्थः । न व्यथते अव्यथ्य इति । अत्र निपातनात् कर्तरि क्यबिति भावः । भिद्योद्ध्यौ नदे । क्यबिति । 'नदविशेषे कर्तरि निपात्यते' इति शेषः । पुष्यसिध्यौ । 'निपात्येते' इति शेषः । नक्षत्रविशेषे गम्ये इत्यर्थः । विपूय । विपूय, विनीय, जित्य एते यथाक्रमं मुञ्जकल्कहलिषु क्यबन्ता निपात्यन्ते । तदाह-पूङित्यादिना । न्यादिसाहचर्यात् भौवादिकस्यैव

तव्य इत्यर्थः। विनीयः कल्कः। पिष्ट ओषधिविशेष इत्यर्थः। पापमिति वा। जित्यो हलिः। बलेन कृष्टव्य इत्यर्थः। कृष्टसमीकरणार्थं स्थूलकाष्ठं हलिः। अन्यत्तु विपव्यम्। विनेयम्। जेयम्। २८६६ **प्रत्यपिभ्यां ग्रहेः** ३।१।११८॥ 'छन्दसीति वक्तव्यम्' (वा १९४४)। प्रतिगृह्यम्। अपिगृह्यम्। लोके तु प्रतिग्राह्यम्। अपिग्राह्यम्। २८७० **पदाऽस्वैरिबाह्यापद्येषु च** ३।१।११९॥ अवगृह्यं, प्रगृह्यं वा पदम्। अस्वैरी परतन्त्रः। गृह्यकाः शुकाः। पञ्जरादिबन्धनेन परतन्त्रीकृता इत्यर्थः। बाह्यायां-ग्रामगृह्या सेना। ग्रामबहिर्भूतेत्यर्थः। स्त्रीलिङ्गनिर्देशात्पुंनपुंसकयोर्न। पक्षे भवः पद्यः। दिगादित्वाद्यत्। आर्यैर्गृह्यते आर्यगृह्यः। तत्पक्षाश्रित इत्यर्थः। २८७१ **विभाषा कृवृषोः** ३।१।१२०॥ क्यप्स्यात्। कृत्यम्। वृष्यम्। पक्षे—२८७२ **ऋहलोर्ण्यत्** ३।१।१२४॥ ऋवर्णान्ताद्धलन्ताच्च धातोर्ण्यत्स्यात्। कार्यम्। वर्ण्यम्। २८७३ **युग्यं च पत्रे** ३।१।१२५॥ पत्रं वाहनम्। युग्यो गौः। अत्र क्यप्कुत्वं च निपात्यते। २८७४ **अमावस्यदन्यतरस्याम्** ३।१।१२२॥ अमोपपदाद्वसेरधिकरणे ण्यत्। वृद्धौ सत्यां पाक्षिको ह्रस्वश्च निपात्यते। अमा सह वसतोऽस्यां चन्द्रार्कावमावास्या-अमावस्या। 'ऋहलोर्ण्यत्' (सू २८७२। 'चजोः-' (सू २८६३) इति कुत्वम्। पाक्यम्।

पूधातोर्ग्रहणमिति भावः। कल्कः शोधकद्रव्यम्। पापमिति वेति। **कल्कशब्दस्य शोधनीये पापेऽपि प्रसिद्धत्वादिति भावः। हलिशब्दस्य विवरणम्**—कृष्टसमीकरणार्थमिति। प्रत्यपिभ्यां ग्रहेः। छन्दसीति। **वार्तिकमिदम्। वृत्तिकृता तु सूत्रे प्रक्षिप्तम्। ननु छान्दसस्य किमर्थमिहोपन्यास इत्यत आह**—लोके त्विति। पदास्वैरिबाह्यापद्येषु च। **पद, अस्वैरि, बाह्या, पद्य एष्वर्थेषु ग्रहेः क्यबित्यर्थः।** अवगृह्यं प्रगृह्यं वा पदमिति। **समस्तपदस्य अवान्तरपदविच्छेदः अवग्रहः। 'अग्नावेयादिपदमितिशिरस्कं प्रग्रह्य' इति प्रातिशाख्ये प्रसिद्धम्। 'ईदूदेद्द्विवचनं प्रगृह्यम्' इति सूत्रोदाहरणं च प्रगृह्यम्।** विभाषा कृवृषोः। **पञ्चम्यर्थे षष्ठी। कृञः ऋदन्तत्वात् नित्यं ण्यति प्राप्ते, वृषेः ऋदुपधत्वात् नित्यं क्यपि प्राप्ते च, क्यञ्विकल्पोऽयम्।** पक्षे इति। **क्यबभावपक्षे विशेषो वक्ष्यते इत्यर्थः।** ऋहलोर्ण्यत्। **पञ्चम्यर्थे षष्ठी। तदाह**—ऋवर्णान्तादिति। युग्यं च पत्रे। **क्यबन्तं निपात्यते। ण्यतोऽपवादः।** युग्यो गौरिति। **शकटादिना योक्तव्य इत्यर्थः। क्यपि कुत्वं निपातनात्।** पत्त्रं वाहनमिति। **पतन्ति गच्छन्त्यनेनेत्यर्थे 'दांस्नीशस' इत्यादिना करणे ष्ट्रन्। ण्यति तु योग्यमिति स्यात्।** अमावस्यद। अधिकरणे इति। **निपातनलभ्यमिदम्। अमेत्यस्य विवरणम्**—महेति। **'ऋहलोर्ण्यत्' इत्य नुपदमेव प्राक् प्रसङ्गाद्व्याख्यातमपि सूत्रक्रमात् पुनरुपात्तम्।** कुत्वमिति। पचेर्ण्यति **'चजोः' इति कुत्वमिति भावः। ननु 'पाघ्रौ सृजेर्ण्य'इति व्यर्थम्, 'ऋहलो.' इत्येव**

'पाणौ सृजेर्ण्यद्वाच्यः' (वा १९४६) ऋदुपधलक्षणस्य क्यपोऽपवादः । पाणिभ्यां सृज्यते पाणिसर्ग्या रज्जुः । 'समवपूर्वाच्च' (वा १९४७) । समवसर्ग्या । **२८७५ न क्रादेः ७।३।५६॥** क्रादेर्धातोश्चजोः कुत्वं न । गर्ज्यम् । वार्तिककारस्तु 'चजोः-' (सू २८६३) इति सूत्रे 'निष्ठायामनिटः' इति पूरयित्वा 'न क्रादेः' इत्यादि प्रत्याचख्यौ । तेन अर्जितर्जिप्रभृतीनां न कुत्वम् । निष्ठायां सेट्त्वात् । ग्रुचुग्लुञ्चुप्रभृतीनां तु क्रादित्वेऽपि कुत्वं स्यादेव । सूत्रमते तु यद्यपि विपरीतं प्राप्तम् । तथापि 'यथोत्तरं मुनीनां प्रामाण्यम्' । **२८७६ अजिव्रज्योश्च ७।३।५७॥** न कुत्वम् । समाजः । परिव्राजः । **२८७७ भुजन्युब्जौ पाण्युपतापयोः ७।३।६१॥** एतयोरेतौ निपात्यौ । भुज्यते अनेनेति भुजः पाणिः । 'हलश्च' (सू ३३००) इति घञ् । न्युब्जन्त्यस्मिन्निति न्युब्जः । उपतापो रोगः । पाण्युपतापयोः किम् । भोगः । समुद्गः । **२८७८ प्रयाजानुयाजौ यज्ञाङ्गे ७।३।६३॥** एतौ निपात्यौ यज्ञाङ्गे । पञ्च प्रयाजाः । त्रयोऽनुयाजाः । यज्ञाङ्गे किम् । प्रयागः । अनुयागः । **२८७९ वञ्चेर्गतौ ७।३।६३॥** कुत्वं न । वञ्च्यम् । गतौ किम् । वङ्क्यं काष्ठम् । कुटिलीकृतमित्यर्थः । **२८८० ओक उचः के ७।३।६४॥** उचेर्गुणकुत्वे निपात्येते के परे । ओकः शकुन्तः शकौ । इगुपधलक्षणः कः । घञा सिद्धे अन्तोदात्तार्थमिदम् । **२८८१ एय आ-**

सिद्धेरित्यत आह—ऋदुपधलक्षणस्येति । 'ऋदुपधाच्चाऽकृपिचृतेः' इति ण्यदपवादस्य क्यपो बाधनार्थमित्यर्थः । पाणिसर्ग्या रज्जुरिति । ण्यति 'चजोः' इति कुत्वम् । समवपूर्वाच्चेति । वार्तिकमिदम् । सृजेर्ण्यदिति शेषः । न क्रादेः । कुः आदिर्यस्येति विग्रहः । 'चजोः कु' इत्यनुवर्तते । तदाह—क्रादेरिति । कवर्गादेरित्यर्थः । वार्तिककारस्त्विति । 'चजोः कु घिण्ण्यतोः' इति सूत्रे 'निष्ठायामनिटः' इति पूरितम् । तथा च निष्ठायां यः अनिट् तदारब्धयोर्यवयोः चजोः कु स्यात् क्विति ण्यति चेत्यर्थः फलति । तथा 'न क्रादेः' इति सूत्रं 'अजिव्रज्योश्च' इति सूत्रं 'यजयाचरुचप्रवचर्चश्च' इत्यत्र याचरुचग्रहणं च न कर्तव्यमिति प्रत्याचख्यावित्यर्थः । किं तत इत्यत आह—तेनेति । सूत्रमते अर्जितर्जिप्रभृतीनां ण्यति कुत्वं स्यात्, 'न क्रादेः' इति निषेधस्य तत्राऽप्रवृत्तेरिति भावः । तदेवं सूत्रमते अतिव्याप्तिमुक्त्वा अव्याप्तिमाह-ग्रुचुग्लुञ्चुप्रभृतीनामिति । तेषां कवर्गादित्वेपि ण्यति प्रोक्थमित्यादौ कुत्वमिष्टं स्यादेव, वार्तिकमते 'न क्रादेः' इति निषेधस्य प्रत्याख्यातत्वात् । सूत्रमते तु 'न क्रादेः' इति निषेधात् 'प्रोक्थ'मित्यादौ कुत्वमिष्टे न स्यादित्यव्याप्तिरिति भावः । नन्विदं वार्तिकं विपरीतफलमपि संभवत्वात् प्राह्यमेव । विरोधे विकल्पस्य वक्तु शक्यत्वादिति शङ्कते-सूत्रमते तु यद्यपीति । परिहरति-तथापीति । यथोत्तरमिति । अथ वैयाकरणसमयः । अजिव्रज्योश्च । इत्यादि स्पष्टम् । वञ्चेर्गतौ । कुत्वं नेति । शेषपूरणमिदम् । 'चजोः कु घिण्ण्यतोः'इत्यतः कुग्रहणस्य 'न क्रादेः' इत्य-

वश्यके ७।३।६५॥ कुत्वं न। अवश्यपाच्यम्। २८८२ यजयाचरुचप्रवचर्चश्च ७।३।६६॥ ण्ये कुत्वं न। याज्यम्। याच्यम्। रोच्यम्। प्रवाच्यं ग्रन्थविशेषः। 'ऋच्' अर्च्यम्। ऋदुपधत्वेऽप्यत एव ज्ञापकाण्ण्यत्। 'त्यजेश्च'। त्याज्यम्। 'त्यजिपूज्योश्च' इति काशिका। तत्र पूजेग्रहणं चिन्त्यम्। भाष्यानुक्तत्वात्। 'ण्यत्प्रकरणे त्यजेरुपसङ्ख्यानम्' इति हि भाष्यम्। २८८३ वचोऽशब्दसंज्ञायाम् ७।३।६७॥ वाच्यम्। शब्दाख्यायां तु वाक्यम्। २८८४ प्रयोज्यनियोज्यौ शक्यार्थे ७।३।६८॥ प्रयोक्तुं शक्यः प्रयोज्यः। नियोक्तुं शक्यो नियोज्यो भृत्यः। २८८५ भोज्यं भक्ष्ये ७।३।६९॥ भोग्यमन्यत्। 'ण्यत्प्रकरणे लपिदभिभ्यां चेति वक्तव्यम्'। लाप्यम्। दभिर्धातुष्वपठितोऽपि वार्तिकबलात्स्वीकार्यः। दाभ्यः। २८८६ ओरावश्यके ३।१।१२५॥ उवर्णान्ताद्धातोर्ण्यत्स्यादवश्यम्भावे गोत्ये। लाव्यम्। पाव्यम्। २८८७ आसुयुवपिरपिलपिचमश्च ३।१।१०६॥ 'षुञ्' आसाव्यम्। 'यु मिश्रणे' याव्यम्। वाप्यम्। राप्यम्। त्राप्यम्। आचाम्यम्। २८८८ आनाय्योऽनित्ये ३।१।१२७॥ आङ्पूर्वान्नयतेर्ण्यदायादेशश्च

तो नेत्यस्य चानुवृत्तेरिति भावः। ण्य आवश्यके। कुत्वं नेति। शेषपूरणमिदम्। आवश्यकेऽर्थे यो ण्यः तस्मिन् परे 'चजोः कु घिण्ण्यतोः' इति कुत्वं नेत्यर्थः। यजयाच। ण्ये कुत्वं नेति। शेषपूरणमिदम्। यज, याच, रुच, प्रवच, ऋच् एषां द्वन्द्वात् षष्ठी। एषां ण्ये परे 'चजोः कु घिण्ण्यतोः' इति कुत्वं नेत्यर्थः। ननु अर्च्यमित्यत्र कथं ण्यत्। 'ऋदुपधाच्चाक्लृपिचृतेः' इति ऋदुपधत्वलक्षणस्य क्यपो ण्यदपवादत्वादित्यत आह—ऋदुपधत्वेऽपीति। त्यजिपूज्योश्चेति। ण्ये कुत्वं नेति शेषः। वचोऽशब्दसञ्ज्ञायाम्। वचधातोर्ण्यं कुत्वं न शब्दसञ्ज्ञां वर्जयित्वेत्यर्थः। वाच्यमिति। 'वश्चे'ति शेषः। 'अशब्दसञ्ज्ञाया'मित्यस्य प्रयोजनमाह—शब्दाख्यायां तु वाक्यमिति। 'एकतिङ् वाक्यम्' इति सञ्ज्ञाशब्दोऽयमिति भावः। 'प्रवाच्य'मित्यत्र तु ग्रन्थविशेषसंज्ञात्वेऽपि नार्थं कुत्वनिषेधस्य निषेधः, 'यजयाच' इत्यत्र प्रवचेति विशिष्योपादानात्, असञ्ज्ञायामित्यस्य प्रपूर्वाद्वचेरन्यत्र चरितार्थत्वात्। एतदभिप्रायेणैव 'प्रवाच्यं ग्रन्थविशेषः' इत्युक्तं प्राक्। प्रयोज्यनियोज्यौ। शक्यार्थे ण्ये कुत्वाऽभावो निपात्यते। 'शकि लिङ् च' इति कृत्यानां शक्यार्थेऽपि विहितत्वात् ण्यदन्तस्य शक्यार्थकत्वमपि। भोज्यं भक्ष्ये। भक्ष्ये गम्ये ण्ये भुजेः कुत्वाऽभावो निपात्यते। इति प्रासङ्गिकम्। अथ प्रकृतम्। लपिदभिभ्यां चेति। वार्तिकमिदं 'ऋहलोर्ण्यत्' इति सूत्रस्थम्। 'ओरावश्यके' इति प्राप्तस्य ण्यदपवादस्य यतोऽपवादः। ओरावश्यके। लाव्यं पाव्यमिति। 'अचो ञ्णिति' इति वृद्धौ 'वान्तो यि' इत्यवादेशः। आसुयुवपि। आसु, यु, वपि, रपि, लपि, चम् एषां समाहारद्वन्द्वः। 'ण्य'इति शेषः। आसाव्यमिति। आङ्पूर्वस्य

निपात्यते। दक्षिणाग्निविशेष एवेदम्। स हि गार्हपत्यादानीयतेऽनित्यश्च सततम-प्रज्वलनात्। आनेयोऽन्यः घटादिः, वैश्यकुलादानीतो दक्षिणाग्निश्च ।। ३८९ प्रणाय्योऽसम्मतौ ३।१।१२८ ॥ संमतिः प्रीतिविषय भवनं कर्मव्यापारः। तथा भोगेष्वादरोऽपि संमतिः। प्रणाय्यश्चोरः। प्रीत्यनर्ह इत्यर्थः। प्रणाय्योऽन्तेवासी। विरक्त इत्यर्थः। प्रणेयोऽन्यः। ३९० पाय्यसान्नाय्यनिकाय्यधाय्या मान-हविर्निवाससामिधेनीषु ३।१।१२९॥ मीयतेऽनेन पाय्यं मानम्। ण्यत् धात्वादेः पत्वं च। 'आतो युक्-' (सू २७६१) इति युक्। सम्यङ् नीयते होमार्थमग्निं प्रतीति सान्नाय्यं हविर्विशेषः। ण्यदायादेशः समो दीर्घश्च निपात्यते। निचीयतेऽस्मिन्धान्यादिकं निकाय्यो निवासः। अधिकरणे ण्यत् आय् धात्वादेः कुत्वं च नि-

---

सुखो ग्रहणमिति भावः। आनाय्योऽनित्ये। 'अनित्ये' इति छेदः। दक्षिणाग्निविशेष एवेति। वार्तिकमिदम्। स हीति। दक्षिणाग्निर्हि अग्निहोत्रार्थमहरहः गार्हपत्यादेः प्रणीयत इत्यर्थः। एतेन क्रीङ्पूर्वकस्य नयतेरर्थं उक्तः। अनित्यश्चेति। गार्हपत्यवदित्यधारणाऽभावादिति भावः। तदाह—सततमप्रज्वलनादिति। सततं धारणाऽभावादित्यर्थः। प्रणीतस्य दक्षिणाऽग्नेस्तत्तत्कर्मणि समाप्ते लौकिकत्वमुक्तं कल्पसूत्रेषु 'अप्रवृत्ते कर्मणि लौकिकं सम्पद्यते' इति। ततश्च पुनः पुनः प्रणयनात् अनित्यत्वं दक्षिणाग्नेरिति वोध्यम्। यद्यप्याहवनीयस्यापि पुनः पुनः प्रणयनमस्ति, तथापि 'दक्षिणाग्निविशेष एवे'ति वार्तिकाच्चाहवनीयस्य ग्रहणमित्यर्थः। विशेषग्रहणान्नित्यधारणपक्षे दक्षिणाग्निरिह न गृह्यते इति सूचितम्, गतश्रियां दक्षिणाग्नेरपि नित्यधार्यत्वात्। 'गतश्रियो नित्यधार्या अग्नयः' इति वचनादित्यलं पल्लवितेन। वैश्यकुलादानीत इति। दक्षिणाग्निं प्रकृत्य हि श्रूयते-'अहरहरेवैनं वैश्यकुलादाहरन्' इति। तथाविधदक्षिणाग्नौ वाच्ये आनेयशब्द एवेति भावः। प्रणाय्योऽसम्मतौ। असम्मतौ गम्यायां 'प्रणाय्य' इति निपात्यते। तत्र असम्मतिशब्देकदेशं सम्मतिशब्दं विवृणोति-सम्मतिः प्रीतिविषयीभवनमिति। तच्च कर्मनिष्ठमित्याह—कर्मव्यापार इति। तथेति। भोगेषु सुखदुःखानुभवेषु आसक्तिरपि सम्मतिरित्यर्थः। एवंविधा सम्मतिर्न भवतीति असम्मतिरिति फलितम्। प्रणाय्यश्चोर इति। ण्यति वृद्धौ आयादेशः। पाय्यसान्नाय्य। पाय्य, सान्नाय्य, निकाय्य, धाय्य एषां द्वन्द्वात्प्रथमाबहुवचनम्। मान, हविः, निवास, सामिधेनी एषां द्वन्द्वात्सप्तमी। मानादिषु गम्येषु क्रमात् पाय्यादयो निपात्यन्ते। मीयते अनेनेति। माघातोः करणे ण्यत्, धात्वादेर्मकारस्य पत्वं च निपात्यते इत्यर्थः। आत इति। ण्यति 'मीनाति' इत्यात्वे कृते, आतो युगिति भावः। ण्यदिति। सम्पूर्वात् नीघातोः कर्मणि निपात्यत इत्यर्थः। आयादेश इति। सन्नी य इति स्थिते आयादेशः निपात्यते इत्यन्वयः। निवास इति। कुसूलादिरित्यर्थः। अधिकरणे इति। चिण्भावोऽधिकरणे ण्यञ्निपात्यते इत्यन्वयः। आय् इति। अचपरकत्वाऽभावात् आयादेशोऽ-

पात्यते । धीयतेऽनया समिदिति धाय्या ऋक् । २८९१ क्रतौ कुण्डपाय्यस-ञ्चाय्या ३।१।१३०॥ कुण्डेन पीयतेऽस्मिन्सोमः कुण्डपाय्यः क्रतुः । सञ्चीयतेऽत्रौ सञ्चाय्यः । २८९२ अग्नौ परिचाय्योपचाय्यसमूह्याः ३।१।१३१॥ अग्नि-धारणार्थे स्थलविशेषे एते साधवः । अन्यत्र तु परिचेयम्-उपचेयम्-संवाह्यम् । २८९३ चित्याग्निचित्ये च ३।१।१३२॥ चीयतेऽसौ चित्योऽग्निः । अग्नेश्चय-नमग्निचित्या । 'प्रैषातिसर्गप्राप्तकालेषु कृत्याश्च' (सू २८१७) । त्वया गन्तव्यम्, गमनीयम्-गम्यम् । इह लोटा बाधा मा भूदिति पुनः कृत्यविधिः 'स्त्र्यधिकारादूर्ध्वं

प्राप्तो निपात्यते इत्यन्वयः । धाय्या ऋगिति । धाधातोः करणे ण्यति आयादेशो निपात्यते इति भावः । सामिधेन्यो नाम समिदाधानार्था ऋग्विशेषाः । तत्र 'समि-ध्यमानो अध्वरे' इति ऋच उपरि प्रक्षेप्या 'पृथुपाजा अमर्त्यः' इत्याद्या ऋक्प्रसिद्धा । क्रतौ कुण्डपाय्य । क्रतुविशेषे गम्ये एतौ निपात्येते । कुण्डेनेति । अत्सरुकैः चमसैरि-त्यर्थः । सामान्येनैकवचनम् । 'यदत्सरुकैश्चमसैर्भक्षयन्ति तदेषां कुण्डम्' इति श्रुतिः । कुण्डपाय्य इति । सत्रविशेषात्मकः क्रतुः । कुण्डेनेति तृतीयान्ते उपपदे अधि-करणे ण्यत् । आतो युक् । संचाय्य इति । सम्पूर्वात् चिञः कर्मणि ण्यत्, आया-देशश्च निपात्यते इति भावः । सञ्चाय्यो नाम क्रतुविशेषः क्वचिच्छाखायामन्वेषणीयः। अग्नौ परिचाय्य । अग्नौ गम्ये परिचाय्य, उपचाय्य, समूह्य एते निपात्यन्ते । अग्नि-शब्द इष्टकारचितस्थण्डिलविशेषे वर्तते, 'इष्टकाभिरग्निं चिनोति' इति श्रुतेः । इष्ट-काकृतचयनेन अरण्याख्यं स्थण्डिलं निष्पादयेदित्यर्थः । ब्रह्मवादिनो वदन्ति यन्मृदा चाग्निश्चाग्निश्चीयतेऽथ कस्मादग्निरुच्यत इति यच्छन्दोभिश्चिनोत्यग्नयो वै छन्दांसि तस्मादग्निरुच्यतेऽथो इयं वा अग्निर्वैश्वानरो यन्मृदा चिनोति तस्मादग्निरुच्यते' इति वाक्यशेषाच्च । तदाह—अग्निधारणेति । तत्र परिपूर्वादुपपूर्वाच्च चिञः कर्मणि ण्यत्, आयादेशश्च निपात्यते । सम्पूर्वस्य वहेस्तु कर्मणि ण्यति सम्प्रसारणम्, दीर्घश्च नि-पात्यते । 'समूह्यं चिन्वीत पशुकामः, परिचाय्यं चिन्वीत ग्रामकामः' इति तैत्तिरीय-श्रुतौ परिचाय्यसमूह्यौ प्रसिद्धौ । उपचाय्यस्त्वग्निः । क्वचिच्छाखायामन्वेषणीयः । चित्याग्निचित्ये च । चित्यश्च अग्निचित्या चेति द्वन्द्वः । अग्नौ निपात्यते । चित्योऽग्नि-रिति । कर्मणि ण्यत्, तुक् च निपात्यते । अग्नेश्चयनमिति । अग्निशब्दे षष्ठ्यन्ते उपपदे चिणो ण्यत् तुक् च, स्त्रीत्वं लोकात् । 'प्रैषातिसर्ग' इति व्याख्यातमपि स्मार्यते । गम्यमिति । 'पोरदुपधात्' इति ण्यदपवादः क्यप् । ननु सामान्येन भावकर्मणोर्विहि-तानां कृत्यानां प्रैषादिषु तदभावे च सिद्धेः प्रैषादिषु कृत्यविधिर्व्यर्थ इत्यत आह—लोटा बाधा इति । इह प्रैषादिषु कृत्यविधेरभावे लोट् चेति प्रैषादिषु लोटा विशेषविहि-तेन कृत्यानां बाधः स्यात्, कृत्यानां प्रैषाद्यभावे भावकर्मणोश्रितार्थत्वात् । अतः प्रैषादिषु कृत्यानां लोटा बाधनिवृत्तये पुनः कृत्यविधिरित्यर्थः । ननु वासरूपविधिनैव

वासरूपविधिः क्वचिन्न' इति ज्ञापयति। तेन 'क्त्यु्ट्तुमुन्खलर्थेषु न—' इति सिद्धम्। 'अर्हे कृत्यतृचश्च' (सू २८२२)। स्तोतुमर्हः स्तुत्यः स्तुतिकर्म। स्तोता स्तुतिकर्ता। लिङा बाधा मा भूदिति कृत्यतृचोर्विधिः। **२८९४ भव्यगेयप्रवचनीयोपस्थानीयजन्याप्लाव्यापात्या वा ३।४।६८॥** एते कृत्यान्ताः कर्तरि वा निपात्यन्ते। पक्षे तयोरेवेति सकर्मकात्कर्मणि, अकर्मकात्तु भावे ज्ञेयाः। भवतीति भव्यः। भव्यमनेन वा। गायतीति गेयः साम्नामयम्। गेयं सामानेन वा इत्यादि।

लोटः प्रैषादिषु कृत्यानां बाधो न भविष्यतीत्यत आह—स्त्र्यधिकारादूर्ध्वमिति। **'स्त्रियां क्तिन्' इत्यत ऊर्ध्वमित्यर्थः। 'प्राक् स्त्रियाः वासरूपविधिः' इति भाष्यम्। ननु स्त्र्यधिकारादूर्ध्वं वासरूपविधेरप्रवृत्तौ 'स्त्रियां क्तिन्' इति सामान्यविहितस्य क्तिनः 'षिद्भिदादिभ्योऽङ्' इति विशेषविहितेन नित्यबाधः स्यात्, ततः क्षमा, क्षान्तिः, भिदा, भित्तिरित्यादि न स्यादित्यत आह—क्वचिन्नेति। 'क्वचि'दित्यस्याऽनिर्धारणाद्वाह—तेन क्त्यु्ट्तुमुन्खलर्थेषु नेति। सिद्धमिति। एषु वासरूपविधिर्नास्तीत्यर्थः। 'स्त्र्यधिकारात् प्राक् वासरूपविधिः, ननु तत ऊर्ध्वम्' इति भाष्यस्य 'क्त्यु्ट्तुमुन्खलर्थेषु वासरूपविधिर्नास्ती'त्यत्र सङ्कोच इति भावः। अत्र व्याख्यानमेव शरणम्। अर्हे कृत्यतृचश्चेति। प्राग्ग्रहणातेति विशेषविवक्षया स्मार्यते। 'लिङ्वदि' त्यतो लिङ्ग्रहणमर्थाश्रकार इत्युक्तं प्राक्। ननु अर्हे अनर्हे च सामान्यविधानादेव अर्हेऽपि कृत्यतृचोः सिद्धयोः पुनस्तद्विधिर्व्यर्थः इत्यत आह—लिङा बाधेति। 'अर्हे चे'त्येतावत्येव उक्ते चकारानुकृष्टस्य लिङ एवार्हे विधिः स्यात्। तथा च अर्हे कृत्यतृचोर्विधिर्न स्यात्, अर्हे विशेषविहितेन लिङा बाधात्, अनर्हे कृत्यतृचोऽरितार्थत्वात्। वासरूपविधिस्तु स्त्र्यधिकारादूर्ध्वं न प्रवर्तते इत्युक्तमेव। अतो लिङा बाधा मा भूदिति कृत्यतृचोर्विधिरित्यर्थः। भव्यगेय। कर्तरि वेति। 'कर्तरि कृत्' इत्यतः कर्तरीत्यनुवृत्तं वेत्यनेन सम्बध्यते। तथा च कर्तरि वा एते निपात्यन्ते। अन्यत्र नेति फलति। तत्र अन्यत्रेत्यस्याऽनिर्धारणादाह—पक्षे इति। अन्यत्रापि न सर्वत्र, किन्तु 'तयोरेव कृत्यक्तखलर्थाः' इति सूत्रेण सकर्मकात् कर्मणि, अकर्मकाद्भावे एते कृत्या ज्ञेया इत्यर्थः। 'तयोरेव कृत्य' इति सूत्रे 'कः कर्मणि च' इत्यस्मात्सकर्मकेभ्यः कर्मणि अकर्मकेभ्यः भावे इत्यनुवर्तते इति भावः। भवतीति भव्य इति। कर्तरि अचो यत्। भव्यमनेन वेति। भावे यत्। गेयः साम्नामयमिति। गाधातोः कर्तरि यत्। 'ईद्यति' इति प्रकृतेः ईत्वम्। गुणः। साङ्गां कर्मणामनभिहितत्वात् कृद्योगे षष्ठी। कर्तुरभिहितत्वात् प्रथमा। गेयं सामानेनेति। कर्मणि यत्, सकर्मकत्वात्। ननु भावे। कर्तुरनभिहितत्वात्तृतीया। कृद्योगषष्ठी तु कृत्ययोगे कर्तरि वैकल्पिकी, 'कृत्यानां कर्तरि वा' इत्युक्तेः। इत्यादीति। 'प्रवचनीयो गुरुर्वैदस्य'। प्रवक्तेत्यर्थः। कर्तरि अनीयर्। 'प्रवचनीया वेदो गुरुणे'ति वा। 'उपस्थानीयः शिष्यो गुरोः' 'उपस्थानीयो गुरुः शिष्येणे'ति वा।**

'शकि लिङ् च' (सू २८२३)। चात्कृत्याः। वोढुं शक्यो वोढव्यः। वहनीयो वाह्यः। लिङा बाधा मा भूदिति कृत्योक्तिः। लाघवादनेनैव ज्ञापनसम्भवे प्रैषादिसूत्रे 'कृत्याश्च' इति सुत्यजम्। अर्हे कृत्यतृचोर्ग्रहणं च। इति कृदन्ते कृत्यप्रकरणम्।

अथ कृदन्तप्रकरणम् ॥ २४ ॥

२८६५ ण्वुलतृचौ ३।१।१३३॥ धातोरेतौ स्तः। 'कर्तरि कृत्' (सू २८३२) इति कर्त्रर्थे। 'युवोरनाकौ' (सू १२४७)। कारकः। कर्ता। वोढुमर्हो वोढा। कारिका। कर्त्री। 'गाङ्कुटा—' (सू २४६१) इति ङित्त्वम्। कुटिता। अञ्णित्युक्तेर्न ङित्त्वम्। कोटकः। 'विज इट्' (सू २५३६)। विजिता। 'हनस्तोऽचिण्णलोः' (सू २५७४)। घातकः। 'आतो युक—' (सू २७६१)। दायकः। 'नोदात्तोपदेशस्य—' (सू २७६३) इति न वृद्धिः। शमकः। दमकः। अनिटस्तु नियामकः। 'जनिवध्योश्च' (सू २५१२)। जनकः। 'वध हिंसायाम्' वधकः। 'रधि-

---

'जन्योऽसौ'। जायते इत्यर्थः। 'जन्यमनेने'ति वा। आप्लवतेऽसौ 'आप्लाव्यः'। 'ओरावश्यके' इति कर्तरि ण्यत् 'आप्लाव्यमनेने'ति वा। आपतव्यसौ 'आपात्यः'। 'ऋहलो:' इति कर्तरि ण्यत्। 'आपात्यमनेन वा'। 'शकि लिङ् च' इत्यपि व्याख्यातं प्राक्। विशेषविवक्षया सूत्रक्रमादिहोद्यन्यस्तम्। नन्विह चकारानुकृष्टकृत्यविधिरर्थः। शक्तौ अशक्तौ च भावकर्मणोः सामान्यतः कृत्यविधित एव शक्तावपि सिद्धेरित्यत आह—लिङा बाधेति। 'शकि लिङ्' इत्येतावत्येवोक्ते शक्तौ विशेषविहितेन लिङा कृत्यानां बाधः स्यात्, अशक्तौ कृत्यानां चरितार्थत्वात् वासरूपविधिस्तु स्त्र्यधिकारादूर्ध्वं नेत्युक्तमेवेति भावः। लाघवादिति। इह चकारमात्रेण वासरूपविधेः स्त्र्यधिकारादूर्ध्वम् अनित्यताज्ञापनं सम्भवति। अतः 'प्रैषातिसर्ग' इति सूत्रे कृत्यग्रहणेन 'अर्हे कृत्यतृचश्च' इत्यत्र कृत्यतृग्रहणेन च तज्ज्ञापनाश्रयणे गौरवमिति भावः। इति श्रीवासुदेवदीक्षितविदुषा विरचितायां सिद्धान्तकौमुदीव्याख्यायां बालमनोरमाख्यायां कृदन्तकृत्यप्रकरणं समाप्तम्।

अथ कृदन्तप्रकरणम्। ण्वुलृचौ। अनयोर्वर्तमानकालादन्यत्र न प्रयोग इति भाष्यम्। वोढुमर्हः इति। 'अर्हे कृत्यतृचश्च' इत्युक्तेरिति भावः। वोढेति। वहेस्तृच्यजुदात्तत्वादिडभावे ढत्वधत्वष्टुत्वढलोपेषु 'सहिवहोः' इत्योत्वम्। कुटितेत्यत्र लघूपधगुणमाशङ्क्य आह—गाङिति। तर्हि ण्वुलि कोटक इत्यत्रापि गुणो न स्यादित्यत आह—अञ्णित्युक्तेरिति। विजितेत्यत्र लघूपधगुणमाशङ्क्य आह—विज इडिति। इति ङित्त्वमिति शेषः। विजितेति। ङित्त्वान्न गुणः। अनिटस्त्विति। तस्यानुदात्तोपदेशत्वादिति भावः। 'जनक' इत्यत्रोपधावृद्धिमाशङ्क्य वृद्धिनिषेधं स्मारयति—अनिवध्योश्चेति। वध हिंसायामिति। धात्वन्तरं भौवादिकम्, भ्वादेराकृतिगणत्वात्। नात्वयं

जभोरचि' (सू २३०२)। रन्धकः। जम्भकः। 'नेट्यलिटि रधेः' (सू २५१६) रधिता। रद्धा। 'मस्जिनशोः—' (सू २५१७) इति नुम्। मङ्क्ता। ष्टा। नशिता। 'रभेरशब्लिटोः' (सू २५८१) रम्भकः। रब्धा। 'लभेश्च' (सू २५८२)। लम्भकः। लब्धा। 'तीषसह—' (सू २३४०)। एषिता-एष्टा। सहिता-सोढा। दरिद्रातेरालोपः। दरिद्रिता। 'ण्वुलि न'। दरिद्रायकः। 'कृत्य ल्युटः—' (सू २८४१) इत्येव सूत्रमस्तु। यत्र विहितास्ततोऽन्यत्रापि स्युरित्यर्थात्। एवं च बहुलग्रहणं योगविभागेन कृन्मात्रस्यार्थव्यभिचारार्थम्। पादाभ्यां ह्रियते पादहारकः। कर्मणि ण्वुल्। 'क्रमेः कर्तर्यात्मनेपदविषयात्कृत इण्निषेधो वाच्यः' (वा ४४२२-४४२३)। प्रक्रन्ता। कर्तरि इति किम्। प्रक्रमितव्यम्।

हन्तेर्वधादेशः। तथा सति 'जनिवध्योश्च' इति वृद्धिनिषेधसूत्रे वधिग्रहणवैयर्थ्यात्, वधादेशस्याऽदन्ततया अल्लोपस्य स्थानिवत्त्वादेव वृद्ध्यभावसिद्धेः। वधक इति। 'जनिवध्योश्च' इति वृद्धिनिषेधः। रन्धकः। जम्भकः इत्यत्र इदित्त्वाऽभावादप्राप्ते नुमि तद्विधि स्मारयति—रधिजभोरचीति। रधितेत्यत्र 'रधिजभोः' इति नुममाशङ्क्य आह—नेट्यलिटि रधेरिति। रधिता रद्धेति। 'रधादिभ्यश्च' इति वेट्। मस्ज् तृ इति स्थिते आह—मस्जिनशोरिति। नुम्विधिरयम्। मङ्क्तेति। मस्ज् तृ इति स्थिते 'मस्जेरन्त्यात् पूर्वो नुम् वाच्यः' इति सकारादुपरि जकारात् प्राङ्नुम्। मस्नज् तृ इति स्थिते 'स्कोः' इति सलोपः, जस्य कुत्वेन गः, तस्य चर्त्वेन कः, अनुस्वारः, परसवर्णेन ङ इति भावः। नंक्ष्ट नशितेति। रधादित्वाट्टेट्। इडभावपक्षे 'मस्जिनशोः' इति नुमि ननक्ष् तृ इति स्थिते 'ग्रश्च' इति शस्य षः। नस्याऽनुस्वारः। ष्टुत्वम्। रभेरशब्लिटोरिति। नुम्विधिरयम्। लम्भेति। 'झषस्तथोः' इति तस्य धः, जश्त्वेन भस्य बः। तीषसहेति। इड्विकल्पोऽयम्। सोढेति। ढत्वधत्वष्टुत्वढलोपाः। 'सहिवहोः' इत्योत्वम्। दरिद्रातेरालोप इति। 'दरिद्रातेरालोपो वक्तव्यः' इत्यनेनेति भावः। ण्वुलि नेति। 'दरिद्रातेर्ण्वुलि आलोपो नेत्यर्थः। 'न दरिद्रायके लोपः' इति वार्तिकादिति भावः। दरिद्रायक इति। 'आतो युक्' इति भावः। पादाभ्यां ह्रियते पादहारकः इत्यत्र कर्मणि ण्वुलं साधयितुमाह—कृत्यल्युट इत्येवेति। 'कृत्यल्युटः' इत्येतावतैव पुनर्वचनबलात् येष्वर्थेषु ते कृत्यल्युटः विहिताः, ततोऽन्येष्वप्यर्थेषु भवन्तीत्यर्थलाभात् बहुलग्रहणं योगविभागार्थम्-कृत्प्रत्यया येष्वर्थेषु विहिताः ततोऽन्यत्रापि क्वचित् भवन्तीति। एवञ्च कर्मण्यपि ण्वुल् सिध्यतीत्यर्थः। 'कृतो बहुलम्' इति वार्तिकं तु एतद्योगविभागसिद्धकथनपरमिति भावः। क्रमेरिति। आत्मनेपदविषयात् क्रमेः परस्य कर्तरि कृतो नेडित्यर्थः। 'क्नुक्रमोः' इति सूत्रस्थमिदं वार्तिकम्। प्रक्रन्तेति। 'प्रोपाभ्यां समर्थाभ्याम्' इत्यात्मनेपदविषयोऽयम्। नन्वेवं सति क्रमितेत्यत्र कथमिडित्यत

आत्मनेपद—इति किम्। संक्रमिता। अनन्यभावे विषयशब्दः। तेन 'अनुपसर्गाद्वा' (सू २७१६) इति विकल्पार्हस्य न निषेधः। क्रमिता। तदर्हत्वमेव तद्विषयत्वम्। तेन क्रन्तेत्यपीति केचित्; 'गमेरिट्–' (सू २४०१) इत्यत्र परस्मैपदग्रहणं तद्ज्ञानयोरभावं लक्षयति। संजिगमिषिता। एवं 'न वृद्भ्यश्चतुर्भ्यः' (सू २३४८)। विवृत्सिता। यङन्ताण्ण्वुल्। अल्लोपस्य स्थानिवत्त्वान्न वृद्धिः। पापचकः। यङ्लुगन्तात्तु पापाचकः। २८६६ **नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः** ३।१।१३४॥ नन्द्यादेर्ल्युग्ब्रह्मादेर्णिनिः पचादेरच्स्यात्। नन्दयतीति नन्दनः। जनमर्दयतीति जनार्दनः। मधुं सूदयतीति मधुसूदनः। विशेषेण भीषयते इति विभीषणः। लवणः। नन्द्यादिगणे निपातनाण्णत्वम्। ग्राही। स्थायी।

आह—अनन्यभावे विषयशब्द इति। 'वर्तते इति शेषः। आत्मनेपदाऽविनाभाव इति यावत्। क्रमेः कर्तर्यात्मनेपदिन इत्येतावतैव सिद्धे विषयपदोपादानादयमर्थो लभ्यते इति भावः। तथा च नित्यमात्मनेपदिन इति फलितम्। तेनेति। 'क्रमितेत्यत्र क्रमेः 'अनुपसर्गाद्वा' इत्यात्मनेपदविकल्पविधानात् नित्यमात्मनेपदित्वाभावाद् ण्विनिषेधो नेत्यर्थः। मतान्तरमाह—तदर्हत्वमेवेति। आत्मनेपदार्हत्वमेवात्मनेपदविषयत्वम्। ततश्च आत्मनेपदपक्षे ण्विनिषेधे सति क्रन्तेति रूपम्। आत्मनेपदाभावपक्षे तु क्रम इटि क्रमितेति रूपमिति केचिद् दुरित्यर्थः। अत्र पक्षे विषयपदस्य न प्रयोजनमित्यस्वरसः। ननु 'संजिगमिषिते' त्यत्र सनः कथमिट्, गमेरनिट्त्वे पाठात् सनः परस्मैपदपरत्वाभावेन 'गमेरिट् परस्मैपदेषु' इत्यस्याऽप्रवृत्तेरित्यत आह—गमेरिडित्यत्रेति। एवमाह। 'न वृद्भ्यश्चतुर्भ्यः' इत्यत्रापि परस्मैपदग्रहणमनुवृत्तं तद्ज्ञानयोरभावं लक्षयतीत्यर्थः। विवृत्सितेति। सुतेः सनि रूपम्। 'हलन्ताच्च' इति कित्त्वान्न गुणः। यङन्तादिति। पचिधातोर्यङन्तात् पापच्येत्यस्मात् ण्वुलित्यर्थः। तस्य अकादेशे 'यस्य हल.' इति यकारलोपे अतो लोपे पापच् अक इति स्थिते उपधावृद्धिमाशङ्क्य आह—स्थानिवत्त्वान्न वृद्धिरिति। यङ्लुगन्तात्त्विति। । यङः संघातस्य लुकः अजादेशत्वाऽभावेन स्थानिवत्त्वाऽसम्भवादुपधावृद्धिर्निर्बाधा। 'न धातुलोप' इति निषेधस्तु न, यङ्लुकः अनैमित्तिकत्वात् उपधावृद्धेरिव लुप्तत्वाऽभावाच्च। नन्दिग्रहि। नन्दि, ग्रहि, पच एषां द्वन्द्वः। नन्दिग्रहिपचाः आदिर्येषामिति विग्रहः। आदिशब्दस्य प्रत्येकमन्वयः फलति। ल्यु, णिनि, अच् एषां द्वन्द्वात्प्रथमा। यथासंख्यमन्वयः। तदाह—नन्द्यादेरित्यादि। नन्दि इति ण्यन्तग्रहणम्। तदाह—नन्दयतीति नन्दन इति। ल्युरनादेशः, 'णेरनिटि' इति णिलोपः। मधुं सूदयतीति। मधुरसुरविशेषः, तं सूदयति हन्तीति मधुसूदनः। ल्युः, अनादेशः, णिलोपः। 'साप्पदाद्योः' इति न षत्वम्। नन्द्यादयो वृत्तौ पठिताः। तत्र केचित् ण्यन्ताः केचिदण्यन्ताः। सूत्रे 'ग्रह उपादाने' इत्यस्य ग्रहीति इका निर्देशः। सौत्रत्वात् 'ग्रहिज्या' इति सम्प्रसारणं न। ग्राहीति। ग्रहधातोरुप-

मन्त्री । विशयी । वृद्ध्यभावो निपातनात् । विषयी । इह षत्वमपि । परिभावी । परिभवी । पाक्षिको वृद्ध्यभावो निपात्यते । पचादिराकृतिगणः । 'शिवशमरिष्टस्य करे' (सू ३४८६) 'कर्मणि घटोऽठच्' (सू १८३६) इति सूत्रयोः करोतेर्घटेश्चाच्प्रयोगात् । अच्प्रत्यये परे यङ्लुग्विधानाच्च । केषांचित्पाठस्त्वनुबन्धासञ्जनार्थः । केषांचित्प्रपञ्चार्थः । केषांचिद्बाधकबाधनार्थः । पचतीति पचः । नदट् चोरट् देवट् इत्यादयष्टितः । नदी । चोरः । देवी । दीव्यतेः 'इगुपध–' (सू २८९७) इति कः प्राप्तः । जारभरा । श्वपचा । अनयोः 'कर्मण्यण्' (सू २९१३) प्राप्तः । न्यङ्क्वादिषु पाठाच्छ्वपाकोऽपि 'यङोऽचि च' (२६५०) इति लुक् । 'न धातुलोपे'—(सू २६५६) इति गुणवृद्धिनिषेधः । चेक्रियः । नेन्यः । लोलुवः । पोपुवः । मरीमृजः । 'चरिचलिपतिवदीनां वा द्वित्वमच्याक्चाभ्या-

---

ञ्णिनिः । नकारादिकार उच्चारणार्थः । उपधावृद्धिः । विशयीति । विपूर्वात् 'ञीङ् स्वप्ने' इति धातोर्णिनिः । गुणाऽयादेशौ । 'अचोऽञ्णिति' इति वृद्धिमाशङ्क्य आह–वृद्ध्यभाव इति । विषयीति । 'षिञ् बन्धने' अस्माकृतषत्वाण्णिनिः । गुणाऽयादेशौ । नन्विह कथं न वृद्धिः, कथं च षत्वं, पदादित्वादित्यत आह—षत्वमपीति । निपातनाद् वृद्ध्यभावः षत्वं चेत्यर्थः । परिभावी, परिभवी इत्यत्र णित्वाच्चित्यवृद्धिमाशङ्क्य आह—पाक्षिक इति । ब्रह्मादयो वृत्तौ पठिताः । पचादिराकृतिगण इति । पच वप इत्यादिकतिपयधातून् पठित्वा आकृतिगण इति गणपाठे वचनादिति भावः । गणपाठे आकृतिगणत्ववचनाऽभावेऽप्याह–शिवशमिति । सूत्रे करशब्दस्य पचादिगणेऽपठितस्य कृञः अचप्रत्ययान्तस्य 'कर्मणि घटः' इति सूत्रे घटेरचि घटशब्दस्य च प्रयोगदर्शनादित्यर्थः । अच्प्रत्यय इति । यङन्तादच्प्रत्यये परे 'यङोऽचि च' इति यङो लुग्विधीयत । नहि पचादिगणे यङन्तं पठितमस्ति । अतोऽपि पचादेराकृतिगणत्वं विज्ञायते इत्यर्थः । पचादेराकृतिगणत्वे नदट् चोरट् इत्यादीनां तत्र पाठो व्यर्थ इत्यत आह—केषांचिदिति । टकारानुबन्धासञ्जनार्थ इत्यर्थः । नन्वेवमपि वद वच इत्यादीनाम् अनुबन्धरहितानां तत्र किमर्थः पाठः इत्यत आह—केषांचित्प्रपञ्चार्थ इति । बाधकेति । 'जारभर' 'श्वपच' इत्यादौ पचाद्यजपवादस्य कर्मण्यणो बाधनार्थं भरपवादीनां पाठ इति भाष्यम् । देवः सेवः इत्यादौ 'इगुपधज्ञाप्रीकिरः कः' इति विशिष्य विहितस्य कस्य बाधनार्थं च । तदेतदुपपादयति—नदट्इत्यादि । ननु पचादिगणे श्वपचशब्दस्य बाधकबाधनार्थत्वे श्वपाक इति कथमित्यत आह—न्यङ्क्वादिषु पाठाच्छ्वपाकोऽपीति । कदाचिदण्प्रत्ययः, कुत्वं चेत्यर्थः । चेक्रियः, मरीमृजः इत्यादौ प्रक्रियां दर्शयति—यङोऽचि चेति । क्रीजादिधातोरचि यङो लुगित्यर्थः । द्वित्वादौ चेक्री अ इत्यादिस्थितौ आह —न धातुलोप इति । चेक्रिय इति । गुणाऽभावे संयोगपूर्वत्वान्न यण् । नेन्य इति । 'पूरणेकाचः' इति यण् । लोलुव इति । उवङ् । यण्तु न,

सस्येति वक्तव्यम्' (वा ३४३०)। आगागमस्य दीर्घत्वसामर्थ्यादभ्यास-ह्रस्वो 'हलादिः शेषः' (सू २१७९) च न। चराचरः। चलाचलः। पतापतः। वदावदः। 'हन्तेर्घत्वं च' (वा ३४३१)। घत्वमभ्यासस्य, उत्तरस्य तु 'अभ्यासाच्च' (सू २४३०) इति कुत्वम्। घनाघनः। 'पाटेर्णिलुक्चोक्त्व दीर्घश्चाभ्यासस्य'। पाटूपटः। पक्षे चरः। चलः। पतः। वदः। हनः। पाटः। 'रात्रेः कृति—' (सू १००४) इति वा मुम्। रात्रिञ्चरः। रात्रिचरः। २८९७ **इगुपधज्ञाप्रीकिरः कः ३।१ १३५** ॥ एभ्यः कः स्यात्। क्षिपः। लिखः। बुधः। कृशः। ज्ञः। प्रीणातीति प्रियः। किरतीति किरः। वासरूपविधिना ण्वुल्तृचावपि। क्षेपकः। क्षेप्ता। २८९८ **आतश्चोपसर्गे ३।१।१३६**॥ कः स्यात्। 'श्यादव्यध—' (सू २९०३) इति णस्यापवादः। सुग्लः। प्रज्ञः। २८९९ **पाघ्राध्माधेट्दृशः शः ३।१।१३७** ॥ पिबतीति पिबः। जिघ्रः। धमः। धयः।

'ओः सुपि' इत्युक्तेः। मरीमृज इति। अत्र 'न धातुलोपे' इति निषेधात् न मृजेर्वृद्धिः। चरिचलीति। एषाम् अच्प्रत्यये परे द्वित्वम्, अभ्यासस्य आगागमश्चेत्यर्थः। ननु 'चराचर' इत्यत्राऽभ्यासे रेफादाकारस्य ह्रस्वः स्यात्, हलादिशेषेण तत्र रेफस्यापि निवृत्तिः स्यादित्यत आह—आगागमस्येति। ह्रस्वत्वे सत्यागागमे दीर्घोच्चारणं व्यर्थम्, अगागमस्यैव विधातुं शक्यत्वात्। तथा हलादिशेषेण रेफस्य निवृत्तौ ह्रस्वत्वेऽपि सवर्णदीर्घेण 'चाचर' इति सिद्धेः दीर्घोच्चारणं हलादिशेषाभावं गमयतीत्यर्थः। हन्तेरिति। वार्तिकमिदम्। हनधातोरचि 'घत्वं आक्' चेत्यर्थः। ननु उत्तरखण्डे 'अभ्यासाच्च' इति कुत्वसिद्धेः किमर्थमिह घत्वविधानमित्यत आह—घत्वमभ्यासस्येति। इह विधीयते इति शेषः। पाटेरिति। वार्तिकमिदम्। पाटेर्णौ पाटि इत्यस्मात् अचि णेलुंक्, द्वित्वम्। अभ्यासस्य ऊगागमः। अभ्यासस्य आकारस्य ह्रस्वे तस्य दीर्घश्चेत्यर्थः। वृद्धिनिवृत्तये णेलुंग्विधिः। आगागमे दीर्घोच्चारणात् हलादिशेषेण टकारस्य न निवृत्तिः, हलादिशेषे तु आदृगुणे पोपट इति रूपस्य उगागमेऽपि सिद्धेः। इगुपधज्ञा। 'कॄ विक्षेपे' इत्यस्य ह्रस्वे रपरत्वे च किर् इति रेफान्तम्। इगुपध, ज्ञा, प्री, किर एषां द्वन्द्वात्पञ्चमी। किरत्वं गुणनिषेधार्थम्। क इति। आतो लोपः। प्रिय इति। प्रीञ् के इयङ्। किर इति। कॄधातोः के ह्रस्वे रपरत्वम्। आतश्चोपसर्गे। कः स्यादिति। शेषपूरणम्। उपसर्गे उपपदे आदन्ताद्धातोः कः स्यादिति फलति। णस्यापवाद इति। तस्य उपसर्गेऽनुपसर्गे च आदन्तसामान्यविहितत्वात् इति भावः। सुग्ल इति। ग्लैधातोः 'आदेचः' इत्यात्त्वे कृते कप्रत्यये आतो लोप इति भावः। प्रज्ञ इति। ज्ञाधातोरातो लोपः। पाघ्रा। अत्र 'लुग्विकरणाल्लुग्विकरणयोर्लुग्विकरणस्य ग्रहणम्' इति मत्वा आह—पिबतीति पिब इति। पाधातोः शप्रत्यये तस्य कित्त्वेन सार्वधातुकत्वात् 'पाघ्राध्मा' इति पिबादेशः। स चाऽडदित इत्युक्तम्।

धया कन्या। धेटष्टित्त्वात् 'स्तनन्धयी' इति खशीव ङीप्प्राप्तः। 'खशोऽन्यत्र नेष्यते' इति हरदत्त.। पश्यतीति पश्यः। 'घ्रः संज्ञायां न' (वा १९६७)। '–व्याघ्रादिभि.–' (सू ७३५) इति निर्देशात्। २९०० **अनुपसर्गाल्लिम्प-विन्दधारिपारिवेद्युदेजिचेतिसातिसाहिभ्यश्च ३।१।१३८** ॥ शः स्यात्। लिम्पः। विन्दः। धारयः। पारयः। वेदय। उदेजयः। चेतयः। सातिः सुखार्थः। सौत्रो हेतुमण्ण्यन्तः। सातय। वाऽसरूपन्यायेन क्विपि सात्परमात्मा। सात्वन्तो भक्ता.। 'षह मर्षणे' चुरादिः। हेतुमण्ण्यन्तो वा। साहयः। अनुप-

---

शप् पररूपम्। जिघ्र इति। 'पाघ्रा' इति घ्राधातोर्जिघ्रादेशः। धम इति। धमाधातोर्धमादेशः। धय इति। धेटः शः, शप्, अयादेशः, पररूपमिति भावः। धया कन्येति। अत्र धेट्धातुष्टित्। स अदन्तो न भवति। यस्त्वदन्तो धयशब्दः, स न टित्। अतोऽत्र 'टिड्ढाणञ्' इति न ङीबिति भावः। धेटष्टित्त्वादित्यारभ्य हरदतमतम्। स्तनन्धयीतीति। स्तनशब्दे उपपदे धेट्धातोः 'नासिकास्तनयोः' इति खशि कृते 'खित्यनव्ययस्य' इति मुमि स्तनन्धयशब्दः। तत्र खशि कृते धेटष्टित्त्वमाश्रित्य यथा 'टिड्ढाणञ्' इति ङीप्, तथा धया कन्येत्यत्रापि ङीप् प्राप्तः। स ङीप् खशोऽन्यत्र नेष्यते इति हरदत्त आहेत्यर्थः। वस्तुतस्तु 'टिड्ढाणञ्' इति सूत्रे टिदाद्यवयवाकारस्यैव ग्रहणमिति भाष्यविरोधादिदं चिन्त्यम्। नच टित्त्वसामर्थ्यादेव स्तनन्धयीशब्दात् ङीबिति वाच्यम्, धया कन्येत्यत्रापि ङीप्प्रसङ्गात् खशोऽन्यत्र नेष्यते इत्यत्र प्रमाणाभावात्। तस्मात् स्तनन्धयीत्यप्रामाणिकमेव। तस्य प्रामाणिकत्वे गौरादित्वं कल्प्यम्, ङीष्यप्युदात्तनिवृत्तिस्वरप्राप्त्या स्वरे विशेषाऽभावात् इति शब्देन्दुशेखरे स्थितम्। इह उदाहरति—पश्य इति। 'पाघ्रा' इति पश्यादेशः। घ्रः सञ्ज्ञायां नेति। घ्राधातोः सञ्ज्ञायां शो नेत्यर्थः। कुत इत्यत आह—व्याघ्रादिभिरिति। अन्यथा 'व्याजिघ्रादिभि'रिति निर्दिशेदिति भावः। अनुपसर्गात्। शः स्यादिति। शेषपूरणम्। लिम्पः, विन्द इति। 'लिप उपदेहे' 'विदॢ लाभे' इति तुदादौ, ताभ्यां शः, 'शे मुचादीनाम्' इति नुम्। सूत्रे कृतनुमौ लिम्पविन्दौ निर्दिष्टौ। अतस्तौदादिकयोरेव ग्रहणम्। धारय इति। 'धृङ् धारणे' 'धृङ् अवस्थाने' आभ्यां हेतुमण्ण्यन्ताभ्यां शः, शप्, गुणाऽयादेशौ। पारय इति। पॄधातोः ण्यन्ताच्छः, शप्, गुणाऽयादेशौ। विद वेदनाख्यादिषु। चुरादिण्यन्ताच्छः, शप् गुणाऽयादेशौ। उदेजय इति। उत्पूर्वादेजधातोः ण्यन्ताच्छः शप्, गुणाऽयादेशौ। चेतय इति। 'चिती सञ्ज्ञाने' ण्यन्ताच्छः, शप्, गुणाऽयादेशौ। एवं सातयः। सादिति रूपं साधयितुमाह—वाऽसरूपन्यायेन क्विबिति। सातयति सुखयतीत्यर्थे क्विप्, णिलोपः। यद्यपि क्विप् सामान्यविहितः सातेः शप्रत्ययस्तु तदपवादः। तथापि वाऽसरूपविधिना क्विबपि भवतीत्यर्थः। सात्परमात्मेति। 'एष ह्येवानन्दयति' इति श्रुतेः। तस्य सुखयितृ-

सर्गात् किम् । प्रलिपः । 'नौ लिम्पेर्वाच्यः' (वा १९६८)। निलिम्पा देवाः । 'गवादिषु विन्देः संज्ञायाम्' (वा १९६९)। गोविन्दः । अरविन्दः । २६०१ **ददातिदधात्योर्विभाषा** ३।१।१३६॥ शः स्यात् । ददः । दधः । पक्षे वक्ष्यमाणो णः । अनुपसर्गादित्येव । प्रदः । प्रधः । २६०२ **ज्वलितिकसन्तेभ्यो णः** ३।१।१४०॥ इतिशब्द आद्यर्थः । ज्वलादिभ्यः कसन्तेभ्यो वा णः स्यात् । पक्षेऽच । ज्वालः । ज्वलः । चालः । चलः । अनुपसर्गादित्येव । उज्ज्वलः । तनोतेरुपसंख्यानम्' (वा १९७०)। इहाऽनुपसर्गादिति, विभाषेति च न सम्बध्यते । अवतनोतीत्यवतानः । २६०३ **श्याद्व्यधाभ्रुसंस्रंसध्वंसध्रुवंसध्वंसध्वसश्च** ३।१।१४१॥ श्यैङ्प्रभृतिभ्यो नित्यं णः स्यात् । श्यैङोऽवस्यतेश्चाऽऽदन्तत्वात्सिद्धे पृथग्ग्रहणमुपसर्गे कं बाधितुम् । अवश्यायः । प्रतिश्यायः । आत् ।

स्वावगमादिति भावः । सात्वन्त इति । **सात् परमात्मा भजनीयः एषामित्यर्थे मतुप्** । **'मादुपधायाः' इति मस्य वः । 'तसौ मत्वर्थे' इति भत्वात् पदत्वाभावाच्च जश्त्वम्** । साद्य इति । **साहेः शः । शप्** । गुणाऽयादेशौ । प्रलिप इति । **इगुपधलक्षणः कः** । नौ लिम्पेरिति । **वार्तिकमिदम् । 'नि' इत्युपसर्गे उपपदे लिम्पेः शो वाच्य इत्यर्थः । 'अनुपसर्गा'दित्युक्तेः पूर्वेणाप्राप्तौ वचनम्** । गवादिष्विति । **वार्तिकमिदम् । गवादिषु उपपदेषु विन्देः शो वाच्य इत्यर्थः । 'संज्ञायामेवे'ति नियमार्थमिदम्** । गोविन्द इति । **गाः उपनिषद्वाचः प्रमाणतया विन्दतीत्यर्थः** । अरविन्दमिति । **चक्रे नाभिनेम्योरन्तरालप्रोतानि काष्ठानि—अराणि, तत्सदृशानि दलानि विन्दतीत्यर्थः । कर्मण्यण्योऽपवादः शः** । ददातिदधात्योर्विभाषा । **दाञ्, धाञ्, आभ्यां शो वा स्यात्** । ददः दत्त । **शः, शप्, श्लुः, 'श्लौ' इति द्वित्वम्, आतो लोपः** । वक्ष्यमाण इति । **'श्याद्व्यध' इत्यनेनेति भावः** । प्रदः प्रध इति । **'आतश्चोपसर्गे' इति कः** । ज्वलिति । आद्यर्थ इति । **तथा च ज्वल् इति आदिः येषां ते ज्वलितयः, ते च ते कसन्ताश्चेति ज्वलितिकसन्ताः, तेभ्य इति विग्रहः । तदाह**—ज्वलादिभ्य इति । **'ज्वल दीप्तौ' इत्यारभ्य 'कस गतौ' इत्येवमन्तेभ्य इत्यर्थः** । वा णः स्यादिति । **विभाषेत्यनुवर्तते इति भावः** । पक्षेऽजिति । **'इगुपधेभ्यः कः' इत्यपि बोध्यम्** । उपसंख्यानमिति । **'णस्ये'ति शेषः** । न सम्बध्यते इति । **'अवतानः' इत्येव भाष्ये उदाहरणादिति भावः** । श्याद्व्यधाभ्रु । **श्यै, आत्, व्यध, आभ्रु, संस्रु, अतीण्, अवसा, अवह्, लिह्, श्लिष्, श्वस्** एषामेकादशानां समाहारद्वन्द्वात्पञ्चमी । **अनुपसर्गादिति निवृत्तम्, उत्तरसूत्रेऽनुपसर्गग्रहणात् । एवञ्च तत्सम्बद्धं विभाषाग्रहणं च नानुवर्तते । तदाह**—नित्यमिति । श्यैङ इति । **श्यैङ्धातोः अवपूर्वकस्य षोधातोश्च कृतात्वयोः सूत्रे निर्देशः । तयोरादन्तत्वादेव सिद्धे पुनर्ग्रहणम् 'आतश्चोपसर्गे' इति कप्रत्ययबाधनार्थमित्यर्थः** । अवश्यायः प्रतिश्याय इति । **श्यैङः आत्वे कृते णः, आतो युक्** । आदिति । **आदन्त-**

दायः । धायः । व्याधः । 'सृ गतौ' आङ्पूर्वः संपूर्वश्च । आस्रावः । संस्रावः । अत्यायः । अवसायः । अवहारः । लेहः । श्लेषः । श्वासः । **२६०४ दुन्योरनुपसर्गे ३।१।१४२॥** णः स्यात् । दुनोतीति दावः । नीसाहचर्यात्सानुबन्धकाद्दुनोतेरेव णः । दवतेस्तु पचाद्यच् दवः । नयतीति नायः । उपसर्गे तु प्रदवः । प्रणयः । **२६०५ विभाषा ग्रहः ३।१।१४३॥** णो वा । पक्षेऽच् । व्यवस्थितविभाषेयम् । तेन जलचरे ग्राहः । ज्योतिषि ग्रहः । 'भवतेश्च' इति काशिका । भवो देवः संसारश्च । भावाः पदार्थाः । भाष्यमते तु प्राप्त्यर्थाच्चुरादिण्यन्तादच् । भावः । **२६०६ गेहे कः ३।१।१४४॥** गेहे कर्तरि ग्रहेः कः स्यात् । गृह्णाति धान्यादिकमिति गृहम् । तात्स्थ्यात् गृहा दाराः । **२६०७ शिल्पिनि ष्वुन् ३।१।१४५॥** क्रियाकौशलं शिल्पं, तद्वत्कर्तरि ष्वुन्स्यात् । 'नृतिखनिरञ्जिभ्य एव' (वा १६७१) नर्तकः । नर्तकी । खनकः । खनकी । 'असि अके अने च रञ्जेर्नलोपो

स्योदाहरणसूचनम् । दायः धाय इति । णे आतो युक् । व्याध इति । व्यधेर्यौ उपधावृद्धिः । आस्रावः, संस्राव इति । णे 'अचोऽञ्णिति' इति वृद्धिः, आवादेशः । अत्याय इति । अतिपूर्वादिण्घातोर्यौ वृद्ध्यायादेशौ । अवसाय इति । अवपूर्वात् 'घोऽन्तकर्मणि' इत्यस्मात् णे आतो युक् । लेहः श्लेष इति । णे घञपधगुणः । श्वास इति । णे उपधावृद्धिः । दुन्योरनुपसर्गे । दुनोतेः नयतेश्चेत्यर्थः । 'दव'शब्दं साधयितुमाह—नीसाहचर्यादिति । नीरुपातुः सानुबन्धकः । तत्साहचर्यात् 'टु दु उपतापे इति स्वादिगणस्थादेव णप्रत्यय इत्यर्थः । देवतेस्त्विति । 'दु द्रु गतौ' इति भौवादिकात् निरनुबन्धकात्पचाद्यजित्यर्थः । विभाषा ग्रहः । व्यवस्थितविभाषेयमिति । इदं 'शाच्छोः' इति सूत्रे भाष्ये स्पष्टम् । तेनेति । जलचरे मत्स्यादौ वाच्ये णप्रत्यये उपधावृद्धौ 'ग्राह' इत्येव भवति । ज्योतिषि सूर्यचन्द्रादौ वाच्ये अचप्रत्यये 'ग्रह' इत्येव भवतीत्यर्थः । भवतेश्चेति । 'णो वे'ति शेषः । पक्षे अच् । काशिकेति । भाष्ये तु न दृश्यते इति भावः । इयमपि व्यवस्थितविभाषैव । तदाह—भवो देव इति । महादेव इत्यर्थः । अत्र अजेवेति भावः । भावाः पदार्था इति । अत्र ण एवेति भावः । ननु 'भवतेश्चे'ति णविकल्पस्य भाष्ये अदर्शनात् कथं भाष्यमते भावशब्द इत्यत आह—भाष्यमते त्विति । भावयति प्रापयति स्वकार्यमित्यर्थे 'भू प्राप्तौ' इति चुरादिण्यन्तात् 'भावि' इत्यस्मात् अचप्रत्यये णिलोपे भावशब्द इत्यर्थः । गेहे कः । 'विभाषा ग्रहः' इत्यस्यापवादः । गृह्णमिति । 'ग्रहिज्या' इति सम्प्रसारणं पूर्वरूपं च । ननु 'गृहा दारा' इति कथम् । गेहे कर्तर्येव वाच्ये कप्रत्ययविधानादित्यत आह—तात्स्थ्यादिति । गृहशब्दो गेहस्थे लाक्षणिक इति भावः । गृहा दारा इति । 'दारेष्वपि गृहाः' इत्यमरः । शिल्पिनि ष्वुन् । नृतिखनिरञ्जिभ्य एवेति । वार्तिकमिदम् । नर्तकीति । स्त्रियां ङीषिति भावः । 'दंशसञ्जस्वञां शपि' इति सूत्रे 'रञ्जेश्चेति वक्तव्यम्' इति वार्तिकम् । तत् अर्थतः संगृह्णाति—असि अके अने

वाच्यः' (वा ४०६७)। रजकः। रजकी। भाष्यमते तु नृतिखनिभ्यामेव ष्वुन्। रञ्जेस्तु 'क्वुन्शिल्पिसंज्ञयोः' (उ सू १९०) इति क्वुन्। टाप्। रजिका। पुंयोगे तु रजकी। २६०८ **गस्थकन् ३।१।१४६॥** गायतेस्यकन्स्यात्, शिल्पिनि कर्तरि। गायकः। २६०९ **ण्युट् च ३।१।१४७॥** गायनः। टित्त्वाद्गायनी। २६१० **हश्च व्रीहिकालयोः ३।१।१४८॥** हाको हाङश्च ण्युट् स्यात् व्रीहौ काले च कर्तरि। जहात्युदकमिति हायनो व्रीहिः। जहाति भावानिति हायनो वर्षम्। जिहीते, प्राप्नोतीति वा। २६११ **प्रसृत्वः समभिहारे वुन् ३।१।१४९॥** समभिहारग्रहणेन साधुकारित्वं लक्ष्यते। प्रवकः। सरकः। लवकः। २६१२ **आशिषि च ३।१।१५०॥** आशीर्विषयार्थवृत्तेर्वुन्स्यात्कर्तरि। जीवतात्–जीवकः। नन्दतात्–नन्दकः। आशीः प्रयोक्तुर्धर्मः। आशासितुः पित्रादेरियमुक्तिः।

इति तृतीयाध्यायस्य प्रथमः पादः॥

२६१३ **कर्मण्यण् ३।२।१॥** कर्मण्युपपदे धातोरण्प्रत्ययः स्यात्। उपपदस-

---

चेति। रजक इति। **रञ्जेः शिल्पिनि ष्वुनि अकादेशे नलोपः।** रजकीति। **स्त्रियाम् ङीष्।** 'नृतिखनिरञ्जिभ्य एवे'ति परिगणनात् 'वेञ् तन्तुसन्ताने' इत्यस्मात् कृतात्वात् 'ण्यासश्रन्थ' इति णप्रत्यये आतो युकि 'वाय' इति सिध्यति। भाष्यमते तु नृतिखनिभ्यामेवेति। **इदञ्च 'दंशसञ्जस्वञ्जां शपि' इति सूत्रे भाष्ये स्पष्टम्।** ननु भाष्यमते क्वुनि रजकीति कथमित्यत आह—पुंयोगे तु रजकीति। **गस्थकन्।** 'गः थक्'इति च्छेदः। गैधातोः कृतात्वस्य 'गः' इति पञ्चम्यन्तम्। तदाह—गायतेरिति। ण्युट् च। चकार इक्कः समुच्चये। गायतेण्र्युट् थकन् च शिल्पिनि कर्तरि। गायन इति। आस्थे युक्। 'आदेचः' इत्यात्वस्य अनैमित्तिकत्वेन वृद्ध्यपेक्षया अन्तरङ्गत्वात्। यद्यपि 'गस्थकन् ण्युट् च' इत्येकमेव सूत्रमुचितम्। तथापि ण्युट एवोत्तरसूत्रे अनुवृत्त्यर्थो योगविभागः। **हश्च।** 'ओ हाक् त्यागे' इत्यस्य 'ओ हाङ् गतौ' इत्यस्य च 'हः' इति पञ्चम्यन्तम्। तदाह—हाको हाङश्चेति। प्रसृत्वः। लक्ष्यते इति। **एतच्च भाष्ये स्पष्टम्।** प्रु, स्र, लु एषां समाहारद्वन्द्वात्पञ्चमी। **आशिषि च।** जीवक इति। **आशास्यमानजीवनक्रियाश्रय इत्यर्थः।** एवं नन्दकः। आशीरिति। **आशासनम् अयमित्थं भूयादिति प्रार्थनं शब्दप्रयोक्तृकर्तृकमिति यावत्।** तत आशासितुः पित्रादेरियमुक्तिः। इत्थं नन्दकशब्दप्रयोगः। औचित्यादिति भावः। इति तृतीयाध्यायस्य प्रथमः पादः।

अथ तृतीयाध्यायस्य द्वितीयः पादः। कर्मण्यण्। कर्मण्युपपदे इति। 'तत्रोपपदं सप्तमीस्थम्'इत्यत्र 'तत्रेत्यनेनेदं लभ्यत इति तत्रोक्तम्। प्रत्ययस्तु कर्तर्येव। उपपदस-

मासः । कुम्भं करोतीति कुम्भकारः । आदित्यं पश्यतीत्यादावनभिधानान्न । 'शीलिकामिभक्ष्याचरिभ्यो णः' (वा १९८०) । अणोऽपवादार्थं वार्तिकम् । मांसशीला । मांसकामा । मांसभक्षा । कल्याणाचारा । 'ईक्षिक्षमिभ्यां च' (वा १९८१) सुखप्रतीक्षा । बहुक्षामा । कथं तर्हि गङ्गाधरभूधरादयः । कर्मणः शेषत्वविवक्षायां भविष्यन्ति । २९१४ ह्वावामश्च ३।२२॥ एभ्यः अण् स्यात् । कापवादः । स्वर्गंह्वायः । तन्तुवायः । धान्यमायः । २९१५ आतोऽनुपसर्गे कः ३।२।३॥ अदन्ताद्धातोरनुपसर्गात्कर्मण्युपपदे कः स्यान्नाण् । 'आतो लोपः' । गोदः । पार्ष्णिग्रम् । अनुपसर्गे किम् । गोसन्दायः । 'कविधौ सर्वत्र सम्प्रसारणिभ्यो डः'

मास इति । 'उपपदमतिङ्' इत्यनेनेति भावः । कुम्भं । करोतीति । अस्वपदो लौकिकविग्रहोऽयम् । कुम्भ अस् कार इत्यलौकिकविग्रहवाक्ये सुबुत्पत्तेः प्रागेव कारशब्देन कृदन्तेन कुम्भ अस् इति षष्ठ्यन्तस्य समास इति प्रागेवोक्तम् । ननु आदित्यं पश्यतीत्यादित्यदर्शः, हिमवन्तं शृणोतीति हिमवच्छ्रावः, ग्रामं गच्छतीति ग्रामगामः इत्यादि स्यादित्यत आह—आदित्यं पश्यतीत्यादावनभिधानान्नेति । एतच्च भाष्ये स्पष्टम् । शीलीति । शीलि, कामि, भक्षि, आचरि एभ्यो णप्रत्ययो वाच्य इत्यर्थः । ननु 'कर्मण्यण्' इत्यणैव सिद्धे किमर्थमिदमित्यत आह—अणोऽपवादार्थमिति । अणन्तत्वे तु ङीप् स्यात् । तन्निवृत्त्यर्थं ण्विधानमिति भावः । तदाह—मांसशीलेति । 'शील समाधौ' इति भ्वादिः । इह तु स्वभावतः सेवने वर्तते । मांसं स्वभावतः सेवमानेत्यर्थः । मांसकामेति । मांसं कामयते इति विग्रहः । मांसभक्षेति । मांसं भक्षयते इति विग्रहः । कल्याणाचारेति । कल्याणमाचरतीति विग्रहः । सर्वत्र टाप् । ईक्षिक्षमिभ्यामिति । वार्तिकमिदम् । 'ण' इति शेषः । कर्मणीति । कर्मण्यणि गङ्गाधारः इत्यादि स्यादित्याशेपः । कर्मणः शेषत्वेति । तथाच कर्मोपपदाभावान्नाणिति भावः । ह्वावामश्च । 'ह्वेञ् स्पर्धायाम्' 'वेञ् तन्तुसन्ताने' अनयोः कृतात्वयोर्निर्देशः, 'माङ् माने' एषां द्वन्द्वात्पञ्चम्येकवचनम् । एभ्य इति । कर्मण्युपपदे एभ्यः अण् स्यादित्यर्थः । ननु 'कर्मण्यण्' इत्येव सिद्धे किमर्थमिदमित्यत आह—कापवाद इति । 'आतोऽनुपसर्गे कः' इत्यस्याऽपवादस्य वक्ष्यमाणस्य बाधनार्थमित्यर्थः । माङ्मेकोरिह ग्रहणम्, ननु 'मा माने' इत्यस्य, अकर्मकत्वात् । स्वर्गंह्वाय इति । यद्यपि पराभिभवेच्छायां स्पर्धायां पराभिभवस्य कर्मणो वाच्यत्वेनोपसंग्रहादकर्मक इत्युक्तम् । तथापि इहाऽभिभवेच्छा वाच्यार्थः । स्वर्गमभिभवितुं वाञ्छतीत्यर्थः । अन्तरङ्गत्वादात्वे कृते आतो युक् । एवमग्रेऽपि । आतोऽनुपसर्गे कः । पार्ष्णिग्रमिति । पार्ष्णिः पादमूलभागः । तं गृह्यते इति विग्रहः । 'ग्रैङ् पालने' आत्वे कृते कः । गोसन्दाय इति । अण्यातो युक् । कविधौ सर्वत्रेति । वार्तिकमिदम् । सर्वत्र कप्रत्ययविधौ सम्प्रसारणार्हेभ्यः कापवादो डप्रत्ययो वाच्य इत्यर्थः ।

(वा १६८४) ब्रह्म जिनाति ब्रह्मज्यः । सर्वत्र ग्रहणादातश्चोपसर्गे । आह्वः । ग्रह्वः ।

२६१६ सुपि स्थः ३।२।४॥ सुपीति योगो विभज्यते । सुप्युपपदे आदन्तात्कः स्यात् । द्वाभ्यां पिबतीति द्विपः । समस्थः । विषमस्थः । ततः 'स्थः' । सुपि तिष्ठतेः कः स्यात् । आरम्भसामर्थ्याद्भावे । आखूनामुत्थानमाखूत्थः । **२६१७ प्रष्ठोऽग्रगामिनि ८।३।६२॥** प्रतिष्ठत इति प्रष्ठो गौः । अग्रतो गच्छतीत्यर्थः । अग्र—इति किम् । प्रस्थः । **२६१८ अम्बाम्बगोभूमिसव्याऽपद्वित्रिकुशेकुशङ्कङ्कमञ्जिपुञ्जिपरमेबर्हिदिव्यग्निभ्यः स्थः ८।३।६७॥** स्थः इति कप्रत्ययान्तस्यानुकरणम् । षष्ठ्यर्थे प्रथमा । एभ्यः स्थस्य सस्य षः स्यात् । द्विष्ठः ।

वाच्य इत्यर्थः । ब्रह्मज्य इति । 'ज्या वयोहानौ' अस्माद्डः । 'क्ङिति च सामर्थ्यादभस्यापि टेर्लोपः' । अत्र कप्रत्यये सति कित्त्वात् 'ग्रहिज्या' इति सम्प्रसारणं प्रसक्तम् । अतो ड एव, नतु कः । सर्वत्रेति । डपसर्गे डपपदे आतोऽपि ड एव । नतु 'आतश्चोपसर्गे' इति कः । 'सर्वत्र'ग्रहणादित्यन्वयः । अन्यथा 'अनन्तरस्य विधिरिति न्यायात् 'आतोऽनुपसर्गे कः' इत्येव वाच्येत, नतु 'आतश्चोपसर्गे' इति कप्रत्यय इति भावः । आह्वः ग्रह्व इति । अत्र 'आतश्चोपसर्ग' इति कं बाधित्वा ड एव । तस्य ककित्त्वाद्यजादिलक्षणं सम्प्रसारणं न । सुपि स्थः । योगो विभज्यते इति । इदं भाष्ये स्पष्टम् । तत्र सुपीत्यंशं व्याचष्टे—सुप्युपपदे इति । इदं केवलोपसर्गे व्यर्थम्, 'आतश्चोपसर्गे' इत्येव सिद्धेः । कर्मण्युपपदेऽप्येतद्व्यर्थमेव, 'आतोऽनुपसर्गे कः' इत्यारम्भादिति मत्वोदाहरति—द्वाभ्यामिति । तत इति । 'सुपीत्यंशस्य व्याख्यानानन्तरं 'स्थ' इत्यंशो व्याख्यायत इत्यर्थः । ननु 'सुपि' इत्यंशेनैव सिद्धे किमर्थमिदमित्यत आह—आरम्भसामर्थ्यादिति । कर्तरि 'सुपि' इति पूर्वेण सिद्धेरिह 'कर्तरि कृत्' इति नानुवर्तते । अनिर्दिष्टार्थत्वात् 'गुप्तिज्किद्भ्यः सन्' इत्यादिवत् स्वार्थिकोऽयम् । स्वार्थश्च भाव एवेति भाष्ये स्पष्टम् । नच एवं सति 'धनर्थं कविधानम्' इत्येव सिद्धमिति वाच्यम्, नित्योपपदसमासार्थत्वात् । अत एव ल्युडन्तेन अस्वपदविग्रहं दर्शयन्नाह—आखूनामुत्थानम् आखूत्थ इति । प्रष्ठोऽग्रगामिनि । प्रपूर्वात् स्थाधातोः 'आतश्चोपसर्गे' इति कप्रत्यये आतो लोपे प्रस्थशब्दः । सः अग्रगामिनि वाच्ये कृतषत्वः निपात्यते । इण्कवर्गाभ्यां परत्वाऽभावात् षत्वस्य न प्राप्तिः । प्रतिष्ठत इति अग्रे गच्छतीत्यर्थः, डपसर्गवशात् । प्रष्ठो गौरिति । अग्रगामीत्यर्थः । एवं प्रष्ठोऽश्वः इत्यादि । अम्बाम्ब । अम्ब, आम्ब, गो, भूमि, सव्ये, (सव्य) अप, द्वि, त्रि, कुशे, कु, शङ्कु, अङ्क, मञ्जि, पुञ्जि, परमे, बर्हिस्, दिवि, अग्नि-एषामष्टादशानां द्वन्द्वः । अम्बष्ठः, आम्बष्ठः, गोष्ठः, भूमिष्ठः । सव्येष्ठः निपातनादङ्गुक् । 'इलदन्तात्सप्तम्याः' इति वा । अपष्ठः । एषु कतिपयेषु इण्कवर्गाभ्यां परत्वाऽभावात् षत्वस्य न प्राप्तिः । कतिपयेषु सात्पदाद्योः इति निषेधः प्राप्तः । एवमग्रेऽपि । द्विष्ठ इति । द्वाभ्यां तिष्ठतीति विग्रहः । एवं त्रिष्ठः, कुशेष्ठः, कुष्ठः, शङ्कुष्ठः,

श्रिष्टः । इत ऊर्ध्वं कर्मणि सुपीति द्वयमप्यनुवर्तते । तत्राऽकर्मकेषु सुपीत्यस्य सम्बन्धः । २६१६ **तुन्दशोकयोः परिमृजापनुदोः ३।२।५॥** तुन्दशोकयोः कर्मणोरुपपदयोराभ्यां कः स्यात् । 'आलस्यसुखाहरणयोरिति वक्तव्यम्' (वा १९८८) तुन्दं परिमार्ष्टीति तुन्दपरिमृजोऽलसः । शोकापनुदः सुखस्याहर्ता । अलसादन्यत्र तुन्दपरिमार्ज एव । यश्च संसाराऽसारत्वोपदेशेन शोकमपनुदति स शोकापनोदः । 'कप्रकरणे मूलविभुजादिभ्य उपसंख्यानम्' (वा १९८९) मूलानि विभुजति मूलविभुजो रथः । आकृतिगणोऽयम् । महीध्रः । कुध्रः । गिलतीति गिलः । २६२० **प्रे दाज्ञः ३।२।६॥** दारूपाजानातेश्च प्रोपसृष्टात्कर्मण्युपपदे कः स्यात् । अणोऽपवादः । सर्वप्रदः । पथिप्रज्ञः । अनुपसर्ग इत्युक्तेः प्रादन्यस्मिन्सुपि न कः । गोसम्प्रदायः । २६२१ **समि ख्यः ३।२।७॥** गोसंख्यः । २६२२ **गापोष्टक् ३।२।८॥** अनुपसृष्टाभ्यामाभ्यां टक्स्यात्कर्मण्युपपदे । सामगः । सामगी । उपसर्गे तु सामसज्ञायः । 'पिबतेः सुराशीध्वोरिति वाच्यम्' (वा १९६०) सुरापी । शीधुपी । अन्यत्र क्षीरपा ब्राह्मणी । सुरां पाति रक्षतीति सुरापा । २६२३ **हरतेरनुद्यमने-**

अङ्गुष्ठः, मञ्जिष्ठः, पुञ्जिष्ठः । परमेष्ठः, निपातनादङ्गुक् 'इलदन्तात्' इति वा । बर्हिष्ठः । दिविष्ठः, पूर्ववदलुक् । अग्नि ः । कप्रत्ययान्तस्येति किम् । भूमिस्थितम् । इत ऊर्ध्वमिति । 'तुन्दशोकयोः' इत्यारभ्येत्यर्थः । सुपीत्यस्येति । ननु कर्मणीत्यस्य, असम्भवादिति भावः । तुन्दशोकयोः । **तुन्दशोकयोरिति सप्तमी । परिमृज, अपनुद, अनयोर्द्वन्द्वात्पञ्चम्यर्थे षष्ठी । तदाह**—उपपदयोराभ्यामिति । तुन्दपरिमृज इति । **तुन्दम् उदरम् ।** अत्र 'मृजेरजादौ' इति पाक्षिकवृद्धिर्न भवति, व्यवस्थितविभाषाश्रयणादित्याहुः । मूलानि विभुजतीति । **विभर्दयतीत्यर्थः ।** 'भुजो कौटिल्ये' तुदादिः । इहोपसर्गबलान्मर्दने वृत्तिः । महीध्र इति । **महीं धरतीति विग्रहः ।** किरवाह गुणः । ऋकारस्य यण् रेफः । अणि तु 'महीधार' इति स्यात् । कुध्र इति । **कुः पृथ्वी, तां धरतीति विग्रहः ।** गिल इति । 'गॄ निगरणे' अस्मात् कः, किरवाह गुणः, इत्वं परत्वम् । 'अचि विभाषा' इति ह्रस्वम् । प्रे दाज्ञः । 'प्रे' इति सप्तमी पञ्चम्यर्थे । दा, ज्ञा अनयोर्द्वन्द्वात् पञ्चम्येकवचनम् । प्रोपसृष्टादिति । प्रेत्युपसर्गपूर्वकादित्यर्थः । सोपसर्गार्थम् आरम्भः । समिख्यः । 'समी'ति पञ्चम्यर्थे सप्तमी । गोसंख्य इति । **गाः सङ्घ्ट इति विग्रहः ।** सम्पूर्वात् चक्षिङः ख्याञि रूपम् । 'ख्या प्रकथने' इत्यस्य तु सम्पूर्वस्य प्रयोगाऽभावात्, सार्वधातुकमात्रविषयत्वाच्च नेह सम्बध्यते । गापोष्टक् । 'गै शब्दे' 'पा पाने' इत्यनयोः टक् स्यात् कर्मण्युपपदे । सामग इति । टकि आतो लोपः । सामगीति । टित्वान्ङीषिति भावः । सामसज्ञाय इति । **सोपसर्गात् गैधातोः कर्मण्यणि आतो युकि रूपम् ।** पिबतेरिति । वार्तिकमिदम् । पाधातोः सुराशीध्वोरुपपदयोः टक्

ऽच् ३।२।९॥ अंशहरः । अनुद्यमने किम् । भारहारः । शक्तिलाङ्गलाङ्कुशतोमर-यष्टिघटघटीधनुःषु ग्रहेरुपसंख्यानम्' (वा १९९२) शक्तिग्रहः । लाङ्गलग्रहः । 'सूत्रे च धार्येऽर्थे' (वा १९९३) सूत्रग्रहः । यस्तु सूत्रं केवलमुपादत्ते न तु धारयति तत्राऽणेव, सूत्रग्राहः । २९२४ **वयसि च** ३।२।१०॥ उद्यमनार्थं सूत्रम् । कक्षहरः कुमारः । २९२५ **आक्रि ताच्छील्ये** ३।२।११ ॥ पुष्पाण्याहरति तच्छीलः पुष्पाहरः । ताच्छील्ये किम् । भाराहारः । २९२६ **अर्हः** ३।२।१२॥ अर्हतेरच्स्यात्कर्मण्युपपदे । अणोऽपवादः । पूजार्हा ब्राह्मणी । २९२७ **स्तम्बकर्णयो रमिजपोः** ३।२।१३॥ 'हस्तिसूचकयोरिति वक्तव्यम्' (वा १९९४) स्तम्बे रमते स्तम्बेरमो हस्ती । 'तत्पुरुषे कृति-' (सू ९७२) इति 'हलदन्तात्—' (सू ९६६) इति वा ङेरलुक् । कर्णेजपः सूचकः । २९२८ **शमि धातोः संज्ञायाम्** ३।२।१४॥ शम्भवः । शंवदः । पुनर्धातुग्रहणं बाधकविषयेऽपि प्रवृत्त्यर्थम् ।

स्यादित्यर्थः । क्षीरपेति । क्षीरं पिबतीत्यर्थे सुराशीध्वोरन्यतरत्वाभावात् 'आतोऽनुपसर्गे कः' इति कप्रत्यये टाप् पाति रक्षतीति । 'पा रक्षणे' इति क्षुन्धिकरणस्य पिबतिग्रहणेन अग्रहणमिति भावः । हरतेरनुद्यमनेऽच् । अनुद्यमने विद्यमानात्कर्मण्युपपदे अजित्यर्थः । उद्यमनम् उद्ग्रहणम् । अंशहर इति । अंशस्य स्वीकर्तेत्यर्थः । भाराहार इति । भारम् उद्गृह्णातीत्यर्थः । ग्रहेरुपसङ्ख्यानमिति । 'अच्प्रत्ययस्ये'ति शेषः । 'ग्रह उपादाने' अनुपपदः । क्वचिद् 'गृहे'रिति तु कृतसम्प्रसारणस्य हका निर्देशः । शक्तिग्रह इति । अकित्त्वान्न सम्प्रसारणम् । लाङ्गलग्रह इति । अङ्कुशग्रह इत्याद्यप्युदाहार्थम् । सूत्रे चेति । वार्तिकमिदम् । सूत्रे कर्मण्युपपदे धारणार्थकात् ग्रहधातोरजित्यर्थः । वयसि च । कर्मण्युपपदे वयसि गम्ये हरतेरजित्यर्थः । ननु 'हरतेरनुद्यमनेऽच्' इत्येव सिद्धे किमर्थमिदमित्यत आह—उद्यमनार्थमिति । आक्रि ताच्छील्ये । आक्पूर्वाद्धरतेः कर्मण्युपपदे अच् स्यात्ताच्छील्ये गम्ये । ताच्छील्यं तत्स्वभावता । पुष्पाहर इति । पुष्पाहरणे फलानपेक्षमेव स्वाभाविकी प्रवृत्तिरस्येत्यर्थः । अर्हः । अणोऽपवाद इति । यद्यपि अणि अचि च पूजार्हरूपे न विशेषः, अनुपधत्वाभावेन वृद्धेरप्रसक्तेः । तथापि स्त्रियामण्णन्तत्वे ङीप्स्यात् । तन्निवृत्तये अज्विधिः । तदाह-पूजार्हेति । स्तम्बकर्णयोः । रम जप अनयोरकर्मकत्वात् कर्मणीति न सम्बध्यते । जपेः शब्दोच्चारणार्थकस्य धात्वर्थोपसंग्रहादकर्मकत्वं बोध्यम् । दर्भादितृणनिचयः स्तम्बः । सूचकः-पिशुनः । हस्तिसूचकयोः किम् । स्तम्बे रमता गौः । कर्णे जपिता गुरुः, मशको वा । शमि धातोः । 'शमि' इति सप्तम्यन्तम् । 'श'मिति सुखार्थकमव्ययम् । तस्मिन्नुपपदे धातोरच् स्यात्संज्ञायाम् । ननु धातुग्रहणं व्यर्थम् । नच रमिजपोरनुद्यमेऽर्थे तदिति वाच्यम् । अस्वरितत्वादेव तदनुवृत्तिसिद्धेरित्यत आह—धातुग्रहणमिति । 'कृत्यो

कृञो हेत्वादिषु टो मा भूत् । शङ्करा नाम परिव्राजिका तच्छीला । २६२६ **अधिकरणे शेतेः ३।२।१५॥** खे शेते खशयः । 'पार्श्वादिषूपसंख्यानम्' (वा १६९६) पार्श्वाभ्यां शेते पार्श्वशयः । पृष्ठशयः । उदरेण शेते उदरशयः । 'उत्तानादिषु कर्तृषु' (वा १९९८) । उत्तानः शेते उत्तानशयः । अवमूर्धशयः । अवनतो मूर्धा यस्य सोऽवमूर्धा । अधोमुखः शेत इत्यर्थः । 'गिरौ डश्छन्दसि' (वा १६९६) गिरौ शेते गिरिशः । लोके गिरिशयः । कथं तर्हि 'गिरिशमुपचचार प्रत्यहं सा सुकेशी' इति । गिरिरस्यास्तीति विग्रहे लोमादित्वाच्छः । २६३० **चरेष्टः ३।२।१६॥** अधिकरणे उपपदे । कुरुचरः । कुरुचरी । २६३१ **भिक्षासेनादायेषु च ३।२।१७॥** भिक्षां चरतीति भिक्षाचरः । सेनाचरः । आदायेति ल्यबन्तम् । आदायचरः । कथम् 'प्रेक्ष्य स्थितां सहचरीम्' इति । पचादिषु चरडिति पाठात् । २६३२ **पुरोऽग्रतोऽग्रेषु सर्तेः ३।२।१८॥** पुरःसरः । अग्रतःसरः । अग्रमग्रेणाग्रे वा सरतीत्यग्रेसरः । सूत्रेऽग्र इत्येदन्तत्वमपि निपात्यते । कथं तर्हि 'यूथं तदग्रस-

---

हेतुताच्छील्यानुलोम्येषु' इति टप्रत्ययःअच्प्रत्ययबाधको वचयते, तद्बाधनार्थमित्यर्थः। अधिकरणे । सुबन्तेऽधिकरणवाचिन्युपपदे शीङ्धातोरच् स्यादित्यर्थः । पार्श्वादिष्विति । अत्राऽधिकरणवाचिनीति न सम्बध्यते । तत् ध्वनयन्नुदाहरति—पार्श्वाभ्यामिति । उत्तानादिषु कर्तृष्विति । वार्तिकमिदम् । उत्तानादिशब्देषु कर्तृवाचिषूपपदेषु शीङोऽजित्यर्थः। गिरावि ति । वार्तिकमिदम् । गिरावुपपदे शीङो डप्रत्यय इत्यर्थः । 'अधिकरणे शेतेः' इत्यचोऽपवादः । "नमो गिरिशाय च शिपिविष्टाय च" इति । शीङोड प्रत्यये दिरुक्तसामर्थ्यादभस्यापि टेर्लोपः । यद्यपि वैदिकप्रक्रियायामेवेदं व्याख्येयम् । तथापि लोके डप्रत्ययस्य न प्रवृत्तिः किं त्वजेवेति प्रदर्शनार्थमिह तद्व्याख्यानमित्यभिप्रेत्य लोके अचप्रत्ययमुदाहरति—गिरिशय इति । कथमिति । लोके डप्रत्ययाऽसम्भवादिति भावः । समाधत्ते—गिरिरस्यास्तीत्यादि । चरेष्टः । ट इति च्छेदः । 'अधिकरणे उपपदे' इति शेषः। 'अधिकरणे शेते'रित्यतः तदनुवृत्तेरिति भावः । कुरुचर इति । कुरुषु चरतीति विग्रहः । न च 'अकर्मकधातुभिर्योगे' इति कर्मत्वं शङ्क्यम्; तस्य वैकल्पिकताया: तत्रैव प्रपञ्चितत्वात् । तत्र अत्रत्यमपि भाष्यं प्रमाणम् । भिक्षासेना । भिक्षा, सेना, आदाय एषु चोपपदेषु चरेष्टः स्यादित्यर्थः । भिक्षां चरतीति । चरतिश्च चरणपूर्वके आर्जने वर्तते । चरणेन भिक्षामार्जयतीत्यर्थः । सेनाचर इति । सेनां प्रापयतीत्यर्थः । ल्यबन्तमिति । अत्र व्याख्यानमेव शरणम् । आदाय चरतीति । लब्धं द्रव्यं गृहीत्वा चरतीत्यर्थः । कथमिति । अधिकरणे भिक्षासेनाऽऽदायेषु उपपदेषु च विहितस्य टप्रत्ययस्य सहपूर्वाच्चरेरसम्भवादिति भावः । समाधत्ते—पचाद्यचि रूपसिद्धिः, तथापि नित्योपपदसमासार्थमज्विधानमित्याहुः । पुरोग्रतः । पुरस्, अग्रतस्, अग्रे एषूपपदेषु सर्तेः टः स्यादित्यर्थः । अग्रेसर इति । ननु समासाऽवयवत्वात्सुपो लुकि

रगर्वितकृष्णसारम्' इति। बाहुलकादिति हरदत्तः। २६३३ पूर्वे कर्तरि ३।२।११॥ कर्तृवाचिनि पूर्वशब्द उपपदे सर्तेष्टः स्यात्। पूर्वः सरतीति पूर्वसरः। कर्तरि किम्। पूर्वं देशं सरतीति पूर्वसारः। २६३४ कृञो हेतुताच्छील्यानुलोम्येषु ३।२।२०॥ एषु द्योत्येषु करोतेष्टः स्यात्। 'अतः कृकमि'- (सू १६०) इति सः। यशस्करी विद्या। श्राद्धकरः। वचनकरः। २६३५ दिवाविभानिशाप्रभाभास्कारान्तानन्तादिबहुनान्दीकिंलिपिलिबिबलिभक्तिकर्तृचित्रक्षेत्रसंख्याजङ्घाबाह्वहर्यत्तद्धनुरुष्णिष् ३।२।२१॥ एषु कृञष्टः स्यादहेत्वादावपि। दिवाकरः। विभाकरः। निशाकरः। कस्कादित्वात्सः। भास्करः। बहुकरः। बहुशब्दस्य वैपुल्यार्थं संख्यापेक्षया पृथग्ग्रहणम्। लिपिलिबिशब्दौ पर्यायौ। संख्या—एककरः। द्विकरः। कस्कादित्वादहस्करः। 'नित्यं समासेऽनुत्तरपद-

---

अग्रसर इति स्यात् इत्यत आह—सूत्र इति। कथमिति। एदन्तत्वनिपातनात् कथमग्रसरशब्द इत्यर्थः। समाधत्ते-बाहुलकादिति। पूर्वे कर्तरि। कर्तृशब्दः कर्तृवाचिनि गौण्याः। तदाह—कर्तृवाचिनीति। कृञो हेतु। हेतुः कारणम्। आनुलोम्यम्-आराध्यचित्तानुवर्तनम्। द्योत्येष्विति। कर्तुरेव प्रत्ययवाच्यत्वादिति भावः। हेत्वादिषूपपदेष्विति तु नार्थः, व्याख्यानात्। कर्मण्युपपदे इत्यपि द्रष्टव्यम्। 'कुप्वोः' इति जिह्वामूलीयमाशङ्क्य आह—अतः कृकमिति। हेतावुदाहरति—यशस्करी विद्येति। विद्या यशोहेतुः। श्राद्धकर इति। श्राद्धक्रियाशास्त्र इत्यर्थः। वचनकर इति। गुर्वादिवचनानुवर्तीत्यर्थः। दिवाविभा। दिवा, विभा, निशा, प्रभा, भास्, कार, अन्त, अनन्त, आदि, बहु, नान्दी, किम्, लिपि, लिबि, बलि, भक्ति, कर्तृ, चित्र, क्षेत्र, संख्या, जङ्घा, बाहु, अहर्, यद्, तद्, धनुस्, अरुस्-एषां सप्तविंशतेर्द्वन्द्वात्सप्तमी॥ एष्विति। 'उपपदेष्वि'ति शेषः। अहेत्वादिष्वपीति। 'हेतुताच्छील्यानुलोम्येषु' अगम्येष्वपीत्यर्थः। हेत्वादिग्रहणस्य अनन्तवृत्तेरिति भावः। एतेन अहेत्वाद्यर्थमिदं सूत्रमुक्तं भवति। अत्र कर्मणीति सुपीति चानुवृत्तं यथायोगमन्वेति। दिवाकर इति। दिवेत्यकारान्तमव्ययमह्नीत्यर्थे। तस्याऽधिकरणशक्तिप्रधानस्यापि वृत्तिविषये कर्मत्वं वोध्यम्। दिवा-अहनि अर्थात् प्राणिनश्चेष्टायुक्तान् करोतीति वा विग्रहः। विभाकर इति। विभां करोतीति विग्रहः। निशाकर इति। निशां करोतीति विग्रहः। एवं प्रभाकरः। भासः करोति इति विग्रहे 'अतः कृकमि' इत्यत्राऽत इति तपरकरणात्सस्वरयाऽप्राप्तेः 'कुप्वोः' इति जिह्वामूलीयविसर्गावाशङ्क्य आह-कस्कादित्वादिति। कारकरः, अन्तकरः, अनन्तकरः, आदिकरः इति सिद्धवत्कृत्य आह-बहुकर इति। ननु संख्याग्रहणेनैव सिद्धे बहुग्रहणं व्यर्थमित्यत आह-बहुशब्दस्येति। वैपुल्यवाचिनस्तस्य न संख्याशब्दत्वमिति 'बहुगणवतुडति संख्या' इत्यत्रोक्तम्। नान्दीकरः किङ्करः इति सिद्धवत्कृत्य आह-लिपिलिबिशब्दाविति। तथा च लिपिकरः, लिबिकरः, क्षेत्रकर इत्यन्तं सिद्धवत्कृत्य आह-संख्येति। 'उदाहियते' इति शेषः। अङ्ग-

स्थस्य' (सू १५९) इति षत्वम् । धनुष्करः । अरुष्करः । 'किंयत्तद्बहुषु कृञो-ऽज्विधानम् ।' (वा २००२) इति वार्तिकम् । किंकरा । यत्करा । तत्करा । हेत्वादौ टं बाधित्वा परत्वादच् पुंयोगे ङीष् । किंकरी । २६३६ **कर्मणि भृतौ ३।२।२२॥** कर्मशब्दे उपपदे करोतेष्टः स्याद्भृतौ । कर्मकरो भृतकः । कर्मकारोऽन्यः । २६३७ **न शब्दश्लोककलहगाथावैरचाटुसूत्रमन्त्रपदेषु ३।२।२३॥** एषु कृञष्टो न । हेत्वादिषु प्राप्तः प्रतिषिध्यते । शब्दकार इत्यादि । २६३८ **स्तम्बशकृतोरिन् ३।२।२४॥** 'व्रीहिवत्सयोरिति वक्तव्यम्' (वा २००३) । स्तम्बकरिर्व्रीहिः । शकृत्करिर्वत्सः । व्रीहिवत्सयोः किम् । स्तम्बकारः । शकृत्कारः । २६३९ **हरतेर्दृतिनाथयोः पशौ ३।२।२५॥** दृतिनाथयोरुपपदयोर्हृञ इन्स्यात् पशौ कर्तरि । दृतिं हरतीति दृतिहरिः । नाथं नासारज्जुं हरतीति नाथहरिः । पशौ किम् । दृतिहरः । नाथहरः २६४० **फलेग्रहिरात्मम्भरिश्च ३।२।२६॥** फलानि गृह्णाति फलेग्रहिः । उपपदस्य एदन्तत्वं ग्रहेरिन्प्रत्ययश्च निपात्यते । आत्मानं बिभर्तीति आत्मम्भरिः । आत्मनो मुमागमः । भृञ इन् । चात्कुक्षिम्भरिः । चान्द्रास्तु आत्मो-

---

करः बाहुकर, इति सिद्धवत्कृत्य अहस्करशब्दे 'कुप्वोः' इति जिह्वामूलीयविसर्गाबाधकृत्य आह-करकादित्वादिति । नन्वि जहातेरुपपन्ने अहन्शब्दे हन्शब्दस्योत्तरपदतया तद्विसर्गस्य उत्तरपदस्थत्वात् 'अतः कृकमि' इत्यस्य न प्राप्तिरिति भावः । धनुष्करशब्दे आह-नित्यं समास इति । प्रत्ययावयवत्वात् 'इदुदुपधस्य च' इत्यस्य न प्राप्तिरिति भावः । कृञोऽज्विधानमिति । टस्याऽपवादः । किंकरेति । टप्रत्यये तु टित्वात् ङीप्स्यादिति भावः । हेत्वादिषु पूर्वविप्रतिषेधमाश्रित्य 'कृञो हेतु' इति किङ्करादिषु ट एव । 'किङ्करी'ति न्यासकारमतं दूषयितुमाह—हेत्वादाविति । पूर्वविप्रतिषेधाश्रयणस्य निर्मूलत्वादिति भावः । तर्हि किङ्करीति कथमित्यत आह—पुंयोगे ङीषिति । कर्मणि भृतौ । कर्मणीत्यनुवृत्तौ पुनः कर्मग्रहणं तु कर्मशब्दस्वरूपग्रहणार्थम् । कर्मकरो भृतक इति । वेतनं गृहीत्वा यः परार्थं कर्म करोति स भृतक इत्युच्यते । न शब्दश्लोक । शब्द, श्लोक, कलह, गाथा, वैर, चाटु, सूत्र, मन्त्र, पद, एषां नवानां द्वन्द्वः । हेत्वादिष्विति । 'कृञो हेतुताच्छील्यानुलोम्येषु' इति प्राप्तः टप्रत्ययोऽनेन प्रतिषिध्यते इत्यर्थः । स्तम्बशकृतोरिन् । स्तम्बे शकृति च कर्मण्युपपदे कृञ इन् स्यात् । नकार इत् । व्रीहिवत्सयोरिति । व्रीहौ वत्से च कर्तरीत्यर्थः । स्तम्बशकृतोर्यथासङ्ख्यमन्वयः । स्तम्बकरिर्व्रीहिरिति । स्तम्बं तृणनिचयं करोतीति विग्रहः । हरतेर्दृतिनाथयोः । दृतिः चर्ममस्त्रिका । दृतिहरिः श्वा इति वृत्तिः । नाथशब्दस्य विवरणम्—नासारज्जुमिति । नासिकाप्रोतरज्जुमित्यर्थः । नाथहरिरिति । नासिकाप्रोतरज्जुके पशुविशेषे रूढोऽयम् । फलेग्रहिः । ग्रहेरिन्निति । ननु 'गृहू ग्रहणे' इति ऋदुपधादित्यर्थः । मुमागम इति । आत्मनूशब्दस्य

दरकुक्षिञ्विति पेठुः। 'ज्योत्स्नाकरम्भमुदरम्भरयश्चकोराः' इति मुरारिः। २६४१ **एजेः खश्** ३।२।२८॥ ण्यन्तादेजेः खश् स्यात्। २६४२ **अरुर्द्विषदजन्तस्य मुम्** ६।३।६७॥ अरुषो द्विषतोऽजन्तस्य च मुमागमः स्यात्खिदन्ते उत्तरपदे, न त्वव्ययस्य। शित्त्वाच्छबादिः। जनमेजयतीति जनमेजयः। 'वातशुनोतिलशर्धेष्वज-धेट्तुदजहातिभ्यः खशः उपसंख्यानम्' (वा २००५) वातमजा मृगाः। २६४३ **खित्यनव्ययस्य** ६।३।६६॥ खिदन्ते परे पूर्वपदस्य ह्रस्वः स्यात्। ततो मुम्। शुनिन्धयः। तिलन्तुदः। शर्धंजहा माषाः। शर्धोऽपानशब्दस्तं जहातीति विग्रहः। जहातिरन्तर्भावितण्यर्थः। २६४४ **नासिकास्तनयोर्धमाधेटोः** ३।२।२६॥ अत्र वार्तिकम्-'स्तने धेटो नासिकायां धमश्चेति वाच्यम्' (वा २००६-७)। स्तनं धयतीति स्तनन्धयः। धेटष्टित्त्वात्स्तनन्धयी। नासिकन्धमः। नासिकन्धयः।

नलोपे कृते अकारादुपरि मुमित्यर्थः। चकारोऽनुक्तसमुच्चयार्थ इति मत्वा आह—चात्कुक्षिम्भरिरिति। भाष्ये तु 'भृञः कुक्षावात्मनोर्मुम् चेति वक्तव्यम्' इति स्थितम्। 'स्याद्वनक्ष्यः फलेग्रहिः' इति वृक्षपर्याये अमरः। 'उभावात्मम्भरिः कुक्षिम्भरिः स्वोदरपूरके' इति विशेष्यनिघ्नवर्गे। उदरम्भरिशब्दं समर्थयितुमाह—चान्द्रास्त्विति। एजेः खश्। एजेरिति ण्यन्तस्य एजृधातोर्ग्रहणम्। न त्विका निर्देशः, व्याख्यानादिति भावः। खकारशकारावितौ। कर्मण्युपपदे इत्यपि ज्ञेयम्। अरुर्द्विषत्। अरुष्, द्विषत्, अजन्त एषां समाहारद्वन्द्वात् षष्ठी। 'अलुगुत्तरपदे' इत्यधिकारात् उत्तरपदे इति लभ्यते। 'खित्यनव्ययस्य' इत्यतः खितीत्यनुवृत्तम्। खितः प्रत्ययत्वात्तदन्तविधिः। तदाह—खिदन्ते उत्तरपदे इति। जनमेजय इति। जनान् एजयतीति विग्रहः। खशः शित्त्वात्सार्वधातुकत्वं। शप्, गुणायादेशौ, पररूपम्, सुपो लुकि, मुम्। वातशुनीति। वार्तिकमिदम्। वात, शुनी, तिल. शर्धं एषां द्वन्द्वात्सप्तमी। अज, धेट्, तुद, जहाति एषां द्वन्द्वात्पञ्चमी। यथासङ्ख्यमन्वयः। वातमजा इति। वातमजन्तीति विग्रहः। सुपो लुकि मुम्। अथ शुनीं धयतीति विग्रहे शुनिशब्दे उपपदे धेटः खशि शपि अयादेशे पररूपे शुनीधय इति स्थिते आह—खित्यनव्ययस्य। ह्रस्वः स्यादिति। 'इको ह्रस्वोऽङ्यो गालवस्य' इत्यतः तदनुवृत्तेरिति भावः। अत्र ह्रस्वश्रुत्या अच इत्युपस्थितं द्रष्टव्यम्। ततो मुमिति। पूर्वं ह्रस्वे कृते ततो मुमित्यर्थः। पूर्वं मुमि कृते तु अजन्तत्वाऽभावाद्ध्रस्वो न स्यादिति भावः। शर्धंजहा माषा इति। भाष्ये तु 'मृगा' इति पाठः। शर्धः अपानद्वारे स्थितः शब्द इति माधवादयः। अन्तर्भावितेति। तथाच शर्धं हापयन्तीति विग्रहः फलितः। भाष्ये तु 'वातशुनी' इति वार्तिके गर्धेष्विति पठितम्। नासिका। नासिका, स्तन अनयोः द्वन्द्वात्सप्तमी। धमा, धेट् अनयोः द्वन्द्वात्पञ्चम्यर्थे षष्ठी। 'ख'शिति शेषः। यथासङ्ख्यमन्वये प्राप्ते आह—अत्र वार्तिकमिति। धेटष्टित्त्वादिति। यद्यपि 'टिड्ढ' इत्यत्र टिदाद्यन्तं यदवयवं प्रातिपदिकमिति व्याख्या-

२६४५ **नाडीमुष्टयोश्च** ३।२।३०॥ एतयोरुपपदयोः कर्मणोर्ध्माधेटोः खश् स्यात्। 'यथासंख्यं नेष्यते'। नाडिन्धमः। नाडिन्धयः। मुष्टिन्धमः। मुष्टिन्धयः। 'घटीखारीखरीपूपसंख्यानम्' (वा २००८) । घटिन्धमः। घटिन्धय इत्यादि। खारी परिमाणविशेषः। खरी गर्दभी। २६४६ **उदिकूले रुजिवहोः** ३।२।३१ ॥ उत्पूर्वाभ्यां रुजिवहिभ्यां कूले कर्मण्युपपदे खश् स्यात्। कूलमुद्रुजतीति कूलमुद्रुजः, कूलमुद्वहः। २६४७ **वहाभ्रे लिहः** ३।२।३२॥ वहः स्कन्धस्तं लेढीति वहंलिहो गौः। अदादित्वाच्छपो लुक्। खशो ङित्त्वान्न गुणः। अभ्रंलिहो वायुः। २६४८ **परिमाणे पचः** ३।२।३३॥ प्रस्थम्पचा स्थाली। खारिम्पचः कटाहः। २६४९ **मितनखे च** ३।२।३४॥ मितम्पचा ब्राह्मणी। नखम्पचा यवागूः। पचिरत्र तापवाची। २६५० **विध्वरुषोस्तुदः** ३।२।३५॥ विधुन्तुदः। मुमि कृते संयोगान्तस्य लोपः। अरुन्तुदः। २६५१ **असूर्यललाटयोर्दृशितपोः** ३।२।३६ ॥ असूर्यमित्यसमर्थसमासः। दृशिना नञः संबन्धात्। सूर्यं न पश्यन्तीत्यसूर्यम्पश्या राजदाराः। ललाटन्तपः सूर्यः। २६५२ **उग्रम्पश्येरम्मदपाणिन्धमाश्च** ३।२।३७ ॥ एते निपा-

---

तम्, तथापि टित्त्वस्यावयवे अचरितार्थत्वात् ङीबिति हरदत्तः। अत्र यद्वृत्तव्यं तत् 'पाघ्राध्माधेट्दृशः शः' इत्यत्रोक्तम्। नासिकन्धम इति। हल्बे कृते मुम्। नासिकायाः ध्मरचेति चकाराद्धेटश्चेति लभ्यते। तस्योदाहरति—नासिकन्धय इति। नाडीमुष्टयोश्च। यथासंख्यं नेष्यते इति। इदं तु भाष्ये स्पष्टम्। घटीखारीति। इत्यादि स्पष्टम्। उदि कूले। उदीति दिग्योगपञ्चम्यर्थे सप्तमी। रुजिवहोरिति पञ्चम्यर्थे षष्ठी। 'रुजोभङ्गे' तुदादिः। अत्र रुजेः सकर्मकत्वात् कर्मण्युपपदे इति लब्धम्। तेन कूलं विशेष्यते। ननु उच्छब्दः, तस्य असत्ववाचित्वात्। तदाह—उत्पूर्वाभ्यामित्यादि। कूलमुद्रुज इति। सुपो लुकि मुमिति भावः। वहाभ्रे लिहः। वहे अभ्रे च कर्मण्युपपदे लिहः खशित्यर्थः। वहशब्दस्य विवरणम्-स्कन्ध इति। शपो लुगिति। खशः शित्त्वेन सार्वधातुकत्वात् कृतस्य शपो लुगित्यर्थः। परिमाणे पचः। परिमाणं प्रस्थादि। तस्मिन् कर्मण्युपपदे पचेः खशित्यर्थः। खारिम्पच इति। 'क्षित्यनव्ययस्य' इति ह्रस्वः। मुम्। मितनखे च। मिते नखे च कर्मण्युपपदे पचेः खशित्यर्थः। नखानां विकिलत्यसम्भवादाह—पचिरत्रेति। विध्वरुषोस्तुदः। विधु, अरुस्, अनयोः कर्मणोरुपपदयोः तुदः खशित्यर्थः। विधुन्तुद इति। विधुरचन्द्रः तं तुदतीति विग्रहः। राहुरित्यर्थः। अरुसशब्दे उकारादुपरि मुमि कृते सकारस्य संयोगान्तलोप इत्यर्थः। अरुन्तुद इति। अरुर्मर्म, तत्तुदतीति विग्रहः। असूर्यललाट। दृशितपोरिति पञ्चम्यर्थे षष्ठी। असूर्यं ललाटे च कर्मण्युपपदे दृशेस्तपेश्च खशित्यर्थः। असूर्यमिति। असूर्यम्पश्या इत्युदाहरणे असूर्यमित्यसमर्थसमासः सौत्र इत्यर्थः। कुतोऽसामर्थ्यमित्यत आह—दृशिनेति। सूर्यं न पश्यन्तीत्यर्थे नञो दृशिनाऽन्वि-

त्यन्ते। उग्रमिति क्रियाविशेषणं तस्मिन्नुपपदे दृशेः खश्। उग्रं पश्यतीत्युग्रम्प-श्यः। इरोदकं तेन मायति दीप्यतेऽस्मिन्निति इरम्मदो मेघज्योतिः। इह निपातनाच्छयङ्। पाणयो ध्मायन्तेऽस्मिन्निति पाणिन्धमोऽग्निः। अन्धकाराद्यावृत इत्यर्थः। तत्र हि सर्पाद्यपनोदनाय पाणयः शब्द्यन्ते। **२६५३ प्रियवशे वदः खच् ३।२।३८॥** प्रियंवदः। वशंवदः। 'गमेः सुपि वाच्यः' (वा २००९)। असंज्ञार्थमिदम्। मितङ्गमो हस्ती। 'विहायसो विह इति वाच्यम्' (वा २०१०)। 'खच् डिद्वा वाच्यः' (वा २०११)। विहङ्गः। विहङ्गमः। भुजङ्गः। भुजङ्गमः। **२६५४ द्विषत्परयोस्तापेः ३।२।३९॥** खच्स्यात्। **२६५५ खचि ह्रस्वः ६।४।९४॥** खच्परे णौ उपधाया ह्रस्वः स्यात्। द्विषन्तं परं वा तापयतीति द्विषन्तपः, परन्तपः। घटवटीग्रहणाल्लिङ्गविशिष्टपरिभाषा अनित्या। तेनेह न। द्विषतीं तापय-

---

तत्त्वेन सूर्यशब्देनाऽन्वयाभावादित्यर्थः। ललाटन्तपः सूर्य इति। ललाटं तपतीति विग्रहः। सूर्यं पश्यतो ललाटस्य अवश्यं तापादिति भावः। उग्रम्पश्य। उग्रम्पश्य, इरम्मद, पाणिन्धम पूषां दुग्धुः। उग्रम्पश्य इति। खशि शप्, पश्यादेशः। इराशब्दस्य विवरणम्—उदकमिति। इरम्मद इति। 'खित्यनव्ययस्य' इति ह्रस्वः। मदेर्दैवादिकत्वात् श्यनमाशङ्क्य आह—निपातनाच्छयन्नेति। पाणिन्धम इति। शपि 'पाघ्रा' इति धमादेशः। प्रियवशे। प्रिये वशे च कर्मण्युपपदे वदधातोः खजित्यर्थः। खशि प्रकृते खच्विधेरुत्तरसूत्रे प्रयोजनं वक्ष्यते। गमेः सुपि वाच्य इति। 'खजिति शेषः। ननु संज्ञायामित्यनुवृत्तौ 'गमश्च' इति वक्ष्यमाणसूत्रेणैव सिद्धे किमर्थमिदं वार्तिकमित्यत आह—असंज्ञार्थमिदमिति। विहायस इति। विहायशब्दः आकाशे वर्तते। तस्मिन्नुपपदे गमेः खच्। 'गमश्च' इति वक्ष्यमाणसूत्रेण पूर्ववार्तिकेन वा सिद्धः 'खच्' इत्यनुवते। प्रकृतेर्विहायशब्दस्य विहादेशो वाच्यः, सच खच् डिद्वा वाच्य इत्यर्थः। विहङ्ग इति। डित्त्वपक्षे तस्सामर्थ्यादभस्यापि टेर्लोपः। विहङ्गम इति। विहायसा गच्छतीति विग्रहः। भुजङ्गम इति। भुजैर्गच्छतीति विग्रहः। द्विषत्परयोः। 'तप दाहे' चुरादिः, 'तप सन्तापे' भ्वादिः। द्वयोरपि एयन्तयोस्तापेरिति निर्देशः। खच् स्यादिति। द्विषत्, पर अनयोः कर्मणोरुपपदयोः तापेः खजित्यर्थः। द्विषत् तापि अ इति स्थिते आह—खचि ह्रस्वः। 'दोषो णौ' इत्यतो णाविति 'ऊदुपधायाः' इत्यत उपधाया इति चानुवर्तते। तदाह—खच्परे णाविति। खशि प्रकृते खचो विधिरिह ह्रस्वार्थः णिलोपार्थश्च। खशि तु तदुभयं न स्यात्, खशः शित्त्वेन सार्वधातुकतया णिलोपाऽसम्भवात्। न च इहैव सूत्रे खज्विधीयतां, पूर्वसूत्रे खशोऽनुवर्ततामिति वाच्यम्, अन्यतोऽपि विधानार्थत्वात्। एवंच 'गमेः सुपि' इति वार्तिकम् एतल्लक्ष्यार्थकथनपरमेवेत्याहुः। द्विषन्तप इति। 'अ कर्तरि द्विषत्' इति तकारात्प्राक् मुम्। परन्तप इति। परः शत्रुः। ननु लिङ्गविशिष्टपरिभाषया द्विषतीशब्देऽप्युपपदे तापेः खचि 'द्विषतीतप' इति स्यात्। 'द्विषतीताप' इत्य-

तीति द्विषती तापः । १९५६ **वाचि यमो व्रते ३।२।४०॥** वाक्छब्दे उपपदे यमेः खच्स्याद् व्रते गम्ये । १९५७ **वाचंयमपुरन्दरौ च ६।३।६९॥** वाक्पुरोरमन्तत्वं निपात्यते । वाचंयमो मौनव्रती । व्रते किम् । अशक्त्यादिना वाचं यच्छतीति वाग्यामः । १९५८ **पूः सर्वयोर्दारिसहोः ३।२।४१॥** पुरं दारयतीति पुरन्दरः । सर्वंसहः । सहिग्रहणमसंज्ञार्थम् । 'भगे च दारेः' (वा २०१३) इति काशिका । बाहुलकेन लब्धमिदमित्याहुः । भगं दारयतीति भगन्दरः । १९५९ **सर्वकूलाभ्रकरीषेषु कषः ३।२।४२॥** सर्वङ्कषः खलः । कूलङ्कषा नदी । अभ्रङ्कषो वायुः । करीषङ्कषा वात्या । १९६० **मेघर्तिभयेषु कृञः ३।२।४३॥** मेघङ्करः । ऋतिङ्करः । भयङ्करः । भयशब्देन तदन्तविधिः । अभयङ्करः । १९६१ **क्षेमप्रियमद्रेऽण च ३।२।४४॥** एषु कृञोऽण्स्यात् । चात्खच् । क्षेमङ्करः । क्षेमकारः । प्रियङ्करः । प्रियकारः । मद्रङ्करः । मद्रकारः । वेति वाच्येऽण्ग्रहणं हेत्वादिषु टो मा भूदिति । कथं तर्हि 'अल्पारम्भः क्षेमकरः' इति । कर्मणः शेषत्वविवक्षायां पचाद्यच् । १९६२ **आशिते भुवः करणभावयोः ३।२।४५॥** आशितशब्द उपपदे भवतेः खच् ।

खलम्तं न स्यादित्यत आह—घटघटीति । 'शक्तिलाङ्गलाङ्कुशयष्टितोमरघटघटीधनुष्षु प्रहेरुपसङ्ख्यानम्'इत्यत्र घटग्रहणेनैव लिङ्गविशिष्टपरिभाषया घटीशब्दस्यापि सिद्धे पुनर्घटीग्रहणाद् लिङ्गविशिष्टपरिभाषा अनित्येति विज्ञायते इत्यर्थः । 'उपपदविधौ लिङ्गविशिष्टपरिभाषा ने'ति ङ्याप्सूत्रे भाष्याच्चेत्यपि द्रष्टव्यम् । वाचि यमो व्रते । इत्यादि वक्तव्यम् । वाचंयमपुरन्दरौ च । वाक्पुरोरिति । वाचं यच्छतीति, पुरं दारयतीति च विग्रहे यमेर्दारेश्च खच् । सुपो लुकि वाच् यम, पुर् दार, इति स्थिते वाक्पुरोरमन्तत्वं निपात्यते इत्यर्थः । 'अरुर्द्विषदजन्तस्य' इति मुमस्तु न प्रसक्तिः । पूःसर्वयोर्दारिसहोः । दारिसहोरिति पञ्चम्यर्थे षष्ठी । पुर् शब्दे सर्वंशब्दे च कर्मण्युपपदे दारेः सहेश्च खजित्यर्थः । यथासङ्ख्यमन्वयः । 'दारी'ति ण्यन्तस्य ग्रहणम् । पुरन्दर इति । पुरं दारयतीति विग्रहे दारेः खचि णिलोपे 'खचि ह्रस्वः' इत्युपधाह्रस्वे सुपो लुकि 'वाचंयमपुरन्दरौ च' इति निपातनादमन्तत्वम् । ननु 'संज्ञायां भृतृवृजिधारिसहितपिदमः' इत्येव सिद्धे सहधातोरिह ग्रहणं व्यर्थमित्यत आह—असंज्ञार्थमिति । भगे चेति । इत्यादि स्पष्टम् । ऋतिङ्कर इति । ऋतिगंमनम् । अभयङ्करशब्दं साधयितुमाह—भयशब्देन तदन्तविधिरिति । इदं च 'येन विधिः' इत्यत्र भाष्ये स्पष्टम् । क्षेमप्रिय । ननु 'क्षेमप्रियमद्रे वा' इति खचो विकल्पविधौ खजभावे 'कर्मण्यण्' इत्यस्य सिद्धत्वादण्ग्रहणं व्यर्थमित्यत आह—वेति वाच्ये इति । हेत्वादिष्विति । 'कृञो हेतुताच्छील्यानुलोम्येषु' इति विहितः इत्यर्थः । कथं तर्हीति । 'कृञो हेतु' इत्यस्य अणा बाधात् क्षेमकार इति भवितव्यम् । खचि तु मुम् स्यादित्याशेपः, समाधत्ते—कर्मणः शेषत्वेति । तथाच कर्मोपप-

आशितो भवत्यनेनाशितम्भव ओदनः। आशितस्य भवनमाशितम्भवः। २९६३ **संज्ञायां भृतृवृजिधारिसहितपिदमः ३।२।४६॥** विश्वं बिभर्तीति विश्वम्भरः। विश्वम्भरा। रथन्तरं साम। इह रथेन तरतीति व्युत्पत्तिमात्रं, न त्ववयवार्थानुगमः। पतिंवरा कन्या। शत्रुञ्जयो हस्ती। युगन्धरः पर्वतः। शत्रुंसहः। शत्रुन्तपः। अरिन्दमः। दमिः शमनायाम्, तेन सकर्मक इत्युक्तम्। मतान्तरे तु अन्तर्भावितण्यर्थोऽत्र दमिः। २९६४ **गमश्च ३।२।४७॥** सुतङ्गमः। २९६५ **अन्तात्यन्ताध्वदूरपारसर्वानन्तेषु डः ३।२।४८॥** संज्ञायामिति निवृत्तम्। एषु गमेर्डः स्यात्। डित्त्वसामर्थ्यादभस्यापि टेर्लोपः। अन्तं गच्छतीत्यन्तगः इत्यादि। 'सर्वप्रपन्नयोरुपसंख्यानम्' (वा २०१४)। सर्वत्रगः। पन्नं पतितं गच्छतीति पन्नगः। पन्नमिति पश्यतेः क्तान्तं क्रियाविशेषणम्। 'उरसो लोपश्च' (वा २०१५) उरसा गच्छतीत्युरगः। 'सुदुरोरधिकरणे' (वा २०१६)। सुखेन गच्छत्यत्र सुगः। दुर्गः। 'अन्यत्रापि दृश्यत इति वक्तव्यम्' (वा २०१८)। ग्रामगः। 'डे च विहायसो विहादेशो वक्तव्यः' (वा २०१२)। विहगः। २९६६ **आशि-**

दाऽभावात् अणभावे चाऽजिति भावः। क्षेमङ्करीति तु गौरादित्वात् ङीषित्याहुः। आशिते। करणे उदाहरति—आशितो भवत्यनेनेति। भावे उदाहरति—आशितस्य भवनमिति। संज्ञायाम्। खजिति शेषः। भृ, तृ, वृ, जि, धारि, सहि, तपि, दमि एषामष्टानां समाहारद्वन्द्वात्पञ्चमी। विश्वम्भर इति। विष्णोरियं संज्ञा। विश्वम्भरेति। पृथिव्याः संज्ञा इयम्। रथन्तरमिति। तॄधातोः खच्। रथेन तरितृत्वस्य सामविशेषे असम्भवादाह—इहेति। वृधातोरुदाहरति—पतिंवरेति। शत्रुञ्जय इति। जिधातोः खच्। 'धारी'ति ण्यन्तग्रहणं, तस्योदाहरति—युगन्धर इति। युगं धारयतीति विग्रहः। 'खचि ह्रस्वः' इत्युपधाह्रस्वः, णिलोपः। शत्रुंसह इति। शत्रून् सहते इति विग्रहः। ह्रस्वादि पूर्ववत्। एवमग्रेऽपि। शत्रुन्तप इति। शत्रून् तपतीति विग्रहः। अरिन्दम इति। अरिषु निग्रहविषये शाम्यतीत्यर्थः। दमिः शमनायामिति। 'दमु उपशमे' इति धातुपाठे उपशमशब्दे शमेर्ण्यन्तात् घञ्। तथाच दाम्यतीत्यस्य उपशमयतीत्यर्थाश्रयणात् सकर्मकत्वमिति माधवादिमते सकर्मकोऽयमित्यर्थः। मतान्तरे त्विति। 'दमु उपशमे' इत्युपशमार्थस्य दमेरकर्मकत्वमिति हरदत्तादिमिरुक्तमित्यर्थः। गमश्च। 'संज्ञायां खजिति' शेषः। अन्तात्यन्त। इत्यादि व्यक्तम्। सर्वप्रपन्नयोरिति। सर्वत्रशब्दे, पन्नशब्दे चोपपदे गमेर्डस्योपसंख्यानमित्यर्थः। उरस इति। उरसि उपपदे गमेर्डः उरश्शब्दान्तस्य लोपश्चेति वक्तव्यमित्यर्थः। सुदुरोरिति। सु, दुर् अनयोरुपपदयोर्गमेर्डः स्यात् अधिकरणे वाच्ये इत्यर्थः। अन्यत्रापि दृश्यत इति। अन्येष्वप्युपपदेषु अन्येभ्योऽपि धातुभ्यः डो दृश्यते इत्यर्थः। अनेनैव सिद्धे 'सर्वप्रपन्नयोः' इत्यादि प्रपञ्चार्थमेव।

षि हनः ३।२।४६॥ शत्रुं वध्याच्छत्रुहः । आशिषि किम् । शत्रुघातः । 'दारावाहनोऽण्नन्तस्य च टः संज्ञायाम्' (वा २०१९) । दारुशब्दे उपपदे आङ्पूर्वाद्धन्तेरण् टकारश्चान्तादेशो वक्तव्य इत्यर्थः । दार्वाघाटः । 'चारौ वा' (वा २०२०) चार्वाघाटः । चार्वाघातः । 'कर्मणि समि च' (वा २०२१) । कर्मण्युपपदे संपूर्वाद्धन्तेरुक्तं वेत्यर्थः । वर्णान्संहन्तीति वर्णसंघाटः । पदसंघाटः । वर्णसंघातः । पदसंघातः । २६६७ **अपे क्लेशतमसोः** ३।२।५०॥ अपपूर्वाद्धन्तेर्डः स्यात् । अनाशीरर्थमिदम् । क्लेशापहः पुत्रः । तमोऽपहः सूर्यः । २६६८ **कुमारशीर्षयोर्णिनिः** ३।२।५१॥ कुमारघाती । शिरसः शीर्षभावो निपात्यते । शीर्षघाती । २६६९ **लक्षणे जायापत्योष्टक्** ३।२।५२॥ हन्तेष्टक्स्याल्लक्षणवति कर्तरि । जायाघ्नो ना । पतिघ्नी स्त्री । २६७० **अमनुष्यकर्तृके च** ३।२।५३॥ जायाघ्नस्तिलकालकः । पतिघ्नी पाणिरेखा । पित्तघ्नं घृतम् । अमनुष्य-इति किम् । आखुघातः शूद्रः । अथ कथं बलभद्रः प्रलम्बघ्नः, शत्रुघ्नः, कृतघ्नः इत्यादि लूविभुजादित्वात्सिद्धम् । चोरघातो नगरघातो हस्तीति तु बाहुलकादणि । २६७१

एवं च 'सप्तम्यां जनेर्डः' इत्यत्रापि 'अन्येष्वपि दृश्यते' इति प्रपञ्चार्थमेव । डे चेति । 'विहायसो विह' इत्युक्तस्य खश्विषयत्वादिदं वचनम् । विहग इति । खचि तु मुमि विहङ्गम इति रूपम् । आशिषि हनः । कर्मण्युपपदे हन्तेर्डः स्यात् आशिषि गम्यायामित्यर्थः । शत्रुघात इति । आशीरभावाड्डाऽभावे अण् । 'हनस्त' इति तत्वम् । दारावाहन इति । वार्तिकमिदम् । दारौ, आहनः, अण्, अन्तस्येति च्छेदः । अण्संनियोगेन टत्वविधानार्थमिदम् । चारौ वेति । वार्तिकमिदम् । चारुशब्दे उपपदे आङ्पूर्वाद्धन्तेः अण्, अन्तस्य टः वा स्यादित्यर्थः । कर्मणि समि चेति । वार्तिकमिदम् । उक्तं वेति । अण्, अन्तस्य टः इत्यर्थः । चारावित्यस्यानुवृत्तिनिवृत्तये कर्मणीत्युक्तिः । अपे क्लेशतमसोः । 'आशिषि हनः' इत्येव सिद्धे किमर्थमिदमित्यत आह—अनाशीरर्थमिति । कुमारशीर्षयोर्णिनिः । अनयोरुपपदयोः हन्तेर्णिनिः स्यादित्यर्थः । णकारादिकार उच्चारणार्थः । लक्षणे । लक्षणवतीति । सूत्रे लक्षणशब्दः अर्शआद्यजन्त इति भावः । जायाघ्नो नेति । जायाहननसूचकलक्षणवान् पुरुष इत्यर्थः । 'गमहन' इत्युपधालोपः । पतिघ्नी स्त्रीति । पतिहननसूचकलक्षणवतीत्यर्थः । ङित्त्वात् ङीप् । अमनुष्य । अमनुष्यकर्तृके भात्वर्थे वर्तमानाद्धन्तेः कर्मण्युपपदे टगित्यर्थः । जायाघ्नस्तिलकालक इति । तिलाकृतिकृष्णबिन्दुरित्यर्थः । पूर्वसूत्रस्य लक्षणवति कर्तरि प्रवृत्तिरिति भावः । अथ कथमिति । प्रलम्बवधादौ हन्तेर्मनुष्यकर्तृकतया टकोऽसम्भवादित्याक्षेपः । समाधत्ते—मूलविभुजादित्वादिति । कप्रत्ययेनेति भावः । नन्वेवं 'चोरघातो हस्ती' त्यादि कथम्, अमनुष्यकर्तृकत्वेन हन्तेष्टको दुर्वारत्वादित्यत आह—चोरघात इत्यादीति । बाहुलकाद-

शक्तौ हस्तिकवाटयोः ३।२।५४॥ हन्तेष्टक्स्याच्छक्तौ द्योत्यायाम्। मनुष्यकर्तृकार्थमिदम्। हस्तिघ्नो नागः। कवाटघ्नश्चोरः। कपाटेति पाठान्तरम्। **२६७२ पाणिघताडघौ शिल्पिनि ३।२।५५॥** हन्तेष्टक्टिलोपो घत्वं च निपात्यते पाणिताडयोरुपपदयोः। पाणिघः। ताडघः। शिल्पिनि किम्। पाणिघातः। ताडघातः। 'राजघ उपसंख्यानम्' (वा २०२२)। राजानं हन्ति राजघः। **२६७३ आढ्यसुभगस्थूलपलितनग्नान्धप्रियेषु च्व्यर्थेष्वच्वौ कृञः करणे ख्युन् ३।२।५६॥** एषु च्व्यर्थेष्वच्व्यन्तेषु कर्मसूपपदेषु कृञः ख्युन्स्यात्। अनाढ्यमाढ्यं कुर्वन्त्यनेन आढ्यंकरणम्। अच्वौ किम्। आढ्यीकुर्वन्त्यनेन। इह प्रतिषेधसामर्थ्याल्ल्युडपि नेति काशिका। भाष्यमते तु ल्युट् स्यादेव। अच्वावित्युत्तरार्थम्। **२६७४ कर्तरि भुवः खिष्णुच्खुकञौ ३।२।५७॥** आढ्यादिषु च्व्यर्थेष्वच्व्यन्तेषु भवतेरेतौ स्तः। अनाढ्यः आढ्यो भवतीति आढ्यम्भविष्णुः। आढ्यम्भावुकः।

णीति। 'कृत्यल्युटो बहुलम्' इति बहुलग्रहणादत्रि समाधेयमिति भावः। शक्तौ हस्तिकवाटयोः। हस्तिघ्न इति। हस्तिनं हन्तुं शक्त इत्यर्थः। पूर्वं कवाटघ्नः। पाणिघताडघौ। पाणिना हन्तीति पाणिघः। ताडः ताडनं, तेन हन्तीति ताडघः। मन्त्रादिः। राजघ उपख्यानमिति। राजघशब्दे उक्तनिपातनस्य उपसंख्यानमित्यर्थः। आढ्यसुभग। आढ्य, सुभग, स्थूल, पलित, नग्न, अन्ध, प्रिय एषां सप्तानां द्वन्द्वात्सप्तमी। ख्युन् स्यादिति। 'करणे वाच्ये' इति शेषः। 'करणाऽधिकरणयोश्च' इति ल्युडपवादोऽयम्। 'कर्तरी'ति तु अत्र न सम्बध्यते। आढ्यङ्करणमिति। 'राजाद्यनुवर्तन'मिति शेषः। कृञः ख्युन् अनादेशः, 'अरुर्द्विषदजन्तस्य' इति मुम्। 'सुभगङ्करण'मित्यात्वप्युदाहार्थम्। आढ्यीकुर्वन्त्यनेनेति। अत्र क्विप्रत्ययसत्त्वात् न ख्युञिति भावः। ननु ख्युडपवादभूतख्युनभावपक्षे उत्सर्गभूतो ल्युट् कुतो नेत्यत आह—इहेति। यदि ख्युडपवादख्युनभावे उत्सर्गभूतो ल्युट् स्यात्, तदा ख्युन्विधिरनर्थकः स्यात्। च्व्यन्ते उपपदे ख्युन्ल्युटोः रूपे विशेषाऽभावात्। नच ख्युनि मुम्, ल्युटि तदभावः इत्यस्ति विशेष इति वाच्यम्, क्विप्रत्ययान्तस्याव्ययत्वेन ख्युनि सत्यपि मुमभावात् 'अरुर्द्विषदजन्तस्य' इत्यत्राऽजव्ययस्येत्यनुवृत्तेः। एवञ्च 'अच्वौ' इति च्व्यन्ते उपपदे ख्युनः प्रतिषेधसामर्थ्यात् ख्युनभावे ल्युडपि नेति विज्ञायत इति काशिकामतमित्यर्थः। एवञ्च 'अच्वौ' इति च्व्यन्ते उपपदे ख्युन्प्रतिषेधः ख्युनभावपक्षे ल्युडभावार्थ इति स्थितम्। भाष्यमते त्विति। भाष्ये 'ख्युनि क्विप्रतिषेधानर्थक्यम्। ल्युट्ख्युनोरविशेषात्। मुमर्थमिति चेन्न, अव्ययत्वात्' इत्यादिसन्दर्भेण आढ्यग्रहणं ख्युन्विधौ प्रत्याख्याय 'अच्वौ' इत्युत्तरा 'मित्युक्तम्। तन्मते तु च्व्यन्ते उपपदे ख्युना मुक्ते ल्युट् स्यादेवेत्यर्थः। कर्तरि भुवः। खिष्णुचि खचाविती। खुकञि खजाविती। आढ्यम्भविष्णुरिति। अनाढ्यः आढ्यो भवतीति विग्रहः। आढ्यम्भावुक इति। मित्त्वादूधिः। करणग्रहणाऽनुवृत्तिनि-

'स्पृशोऽनुदके क्विन्' (सू ४३२)। घृतस्पृक्। कर्मणीति निवृत्तम्। मन्त्रेण स्पृशतीति मन्त्रस्पृक्। 'ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चां च' (सू ३७३) व्याख्यातम्। 'त्यदादिषु दृशोऽनालोचने कञ्च' (सू ४२९)। 'समानान्ययोश्चेति वाच्यम्' (वा २०२९) सदृक्। सदृशः। अन्यादृक्। अन्यादृशः। 'क्सोऽपि वाच्यः' (वा २०३०)। तादृक्षः। सदृक्षः। अन्यादृक्षः। **२९७५ सत्सूद्विष-दुहदुहयुजविदभिदच्छिदजिनीराजामुपसर्गेऽपि क्विप् ३।२।६१।** एभ्यः क्विप्स्यादुपसर्गे सत्यसति च सुप्युपपदे। द्युसत्। उपनिषत्। अण्डसूः। प्रसूः। मित्रद्रुट्। प्रद्रुट्। मित्रध्रुक्। प्रध्रुक्। गोधुक्। प्रधुक्। अश्वयुक्। प्रयुक्। वेदवित्। निविदित्यादि। 'अग्रग्रामाभ्यां नयतेर्णो वाच्यः' (वा ५०६४)। अग्रणीः। ग्रामणीः। **२९७६ भजो ण्विः ३।२।६२॥** सुप्युपसर्गे चोपपदे भजेर्ण्विः स्यात्। अंशभाक्। प्रभाक्। **२९७७ अदोऽनन्ने ३।२।६८॥** विट् स्यात्। आममत्ति आमात्। सस्यात्। अनन्ने किम्। अन्नादः **२९७८ क्रव्ये**

वृत्तये कर्तृग्रहणम्। क्विप्णुचि इकारस्तु व्यर्थं एव, इटा सिद्धेः। अश्वौ किम्। आढ्यीभविता। स्पृशोऽनुदके क्विन्निति। व्याख्यातं हलन्ताधिकारे। निवृत्तमिति। अत्र व्याख्यानमेव शरणम्। समानान्ययोश्चेति। अनयोरुपपदयोः दृशः क्विन्कञावित्यर्थः। सदृक् सदृश इति। समानो दृश्यते इति न विग्रहः, कर्तर्येव क्विन्विधानात्। किन्तु कर्मकर्तरि क्विन्कञौ। समानः पश्यतीति विग्रहः। समानत्वेन ज्ञानविषयो भवतीत्यर्थं इति भाष्ये स्पष्टम्। 'इदृशत्वतुष' इति समानस्य सभावविकल्पः। तत्र 'विभाषोदरे' इत्यतः विभाषानुवृत्तेः 'समानदृक् सदृक् समानदृशः सदृशः' इति भाष्याच्च। अन्यादृगिति। 'आ सर्वनाम्नः' इत्यात्वम्। क्सोऽपीति। त्यदादिषु समानान्ययोश्च दृशेः क्सोऽपि वाच्य इत्यर्थः। सत्सूद्विष। सद्, सू, द्विष, दुह दुह, युज, विद, भिद, छिद, जि, नी, राज् एषां द्वन्द्वात्प्रञ्चम्यर्थे षष्ठी। 'अनुपसर्गे' इत्यस्य निवृत्त्यैव सिद्धे 'उपसर्गेऽपी'ति वचनम् अन्यत्र सुब्ग्रहणे उपसर्गग्रहणं नेति ज्ञापनार्थम्। तेन 'वदः सुपि क्यप् च' इति विधिरुपसर्गे न भवतीति भाष्ये स्पष्टम्। द्युसदिति। दिवि सीदतीति विग्रहः। 'सात्पदाद्योः' इति न षत्वम्। 'पूर्वपदात्' इति षत्वं तु न भवति, तस्य छान्दसत्वात् 'आदितेया दिविषदः' इत्यत्र सुषामादित्वात् षत्वमित्याहुः। उपनिषदिति। 'सदिरप्रतेः' इति षत्वम्। इत्यादीति। काष्ठभित्, रज्जुच्छित्, शत्रुजित्, अत्र 'हस्वस्य पिति' इति तुक्। सेनानीः, विराट्। अग्रग्रामाभ्यामिति। असमानपदत्वाद्प्राप्ते णत्वे वचनम्। भजो ण्विः। सुपि उपसर्गे चोपपदे भजेर्ण्विरित्यर्थः। अंशमागिति। णिश्चादुपधावृद्धिः। अदोऽनन्ने। विट् स्यादिति। शेषपूरणमिदम्। अन्नशब्दभिन्ने सुप्युपपदे अदेर्विट् स्यादिति फलितम्। 'जनसनखनक्रमगमो विट्' इति छान्दसत्वादिहानुवर्तते। सस्यादिति। सस्यमत्तीति विग्रहः।

च ३।२।६६॥ अदेर्क्विट्। पूर्वेण सिद्धे वचनमण्बाधनार्थम्। क्रव्यात्। आममांसभक्षकः। कथं तर्हि 'क्रव्यादोऽस्य आशरः' इति। पक्वमांसशब्दे उपपदेऽण्। उपपदस्य क्रव्यादेशः, पृषोदरादित्वात्। २९७९ **दुहः कब्घश्च ३।२।७०॥** कामदुघा। २९८० **अन्येभ्योऽपि दृश्यन्ते ३।२।७५॥** छन्दसीति निवृत्तम्। मनिन्, क्वनिप्, वनिप्, विच् एते प्रत्ययाः धातोः स्युः। २९८१ **नेड्वशि कृति ७।२।८॥** वशादेः कृत इन्न स्यात्। शृ, सुशर्मा। प्रातरित्वा। २९८२ **विड्वनोरनुनासिकस्यात्ऽऽत् ६।४।४१॥** अनुनासिकस्य आत्स्यात्। विजायत इति विजावा। ओणृ, अवावा। विच्, रोट्। रेट्। सुगण्। २९८३ **क्विप्च ३।२।७६॥** अयमपि दृश्यते। 'सत्सूद्विष—' (सू २९७५) इति त्वस्यैव प्रपञ्चः। उखास्रत्। पर्णध्वत्। वाहभ्रट्। २९८४ **अन्तः ८।४।२०॥** पदान्त-

---

अन्नाद इति। कर्मण्यण्। क्रव्ये च। अदेर्विडिति। शेषपूरणमिदम्। अण्बाधनार्थमिति। क्रव्ये अदेर्विडेव न त्वनित्यर्थलाभादिति भावः। कथं तर्हीति। 'क्रव्ये उपपदे अदेर्विडे-वे'ति नियमादणोऽसम्भवादित्याक्षेपः। समाधत्ते—पक्वमांसशब्द इति। तर्हि 'पक्व-मांसाद' इत्यादित्यत आह—उपपदस्य क्रव्यादेश इति। कुत इत्यत आह—पृषो-दरादित्वादिति। दुहः कब्घश्च। सुष्युपपदे दुहेः कप्रत्यात्, प्रकृतेर्घश्चान्तादेश इत्यर्थः। कामदुघेति। 'धेनुरि'ति शेषः। काममपेक्षित दुग्धे इति विग्रहः। अन्येभ्योऽपि दृश्यन्ते। 'विजुपे छन्दसि' 'आतो मनिन्क्वनिब्वनिपश्च' इत्यधिकारे इदं सूत्रम्। निवृत्तमिति। व्याख्यानादिति भावः। मनिनि अन्त्यो नकार इत्, इकार उच्चारणार्थः। क्वनिपि वनिपि च पकार इत्, इकार उच्चारणार्थः। विचि चकार इत् इकार उच्चारणार्थः। नेड्वशि कृति। षष्ठ्यर्थे सप्तम्यौ। वशा कृद्विशेष्यते। तदादिविधिः। तदाह—वशादे-रिति। सुशर्मेति। शृधातोर्मनिन्। प्रातरित्वेति। हृञ्धातोः क्वनिप्। विड्वनोरनुनासि-कस्याऽऽत्। विड्वनोरिति सप्तमी। अनुनासिकस्य-आदिति छेदः। विजावेति। जनेर्ढनिप्। जनेर्नकारस्य आकारः। सवर्णदीर्घः। भवावेति। ओणेर्वनिप्। णकारस्य आकारः अवादेशः। विजिति। 'उदाहियते' इति शेषः। रोट् रेडिति। 'रुष, रिष हिंसायाम्' विच्। 'वेरपृक्तस्य' इति वलोपः। सुगण्णिति। गणेर्विच्। क्विप् च। अय-मपीति। सर्वधातुभ्यः सोपपदेभ्यः निरुपपदेभ्यश्च छन्दसि लोके च क्विप् दृश्यते इ-त्यर्थः। मन्क्वनेनैव सिद्धे 'सत्सूद्विष' इति सूत्रं व्यर्थमित्यत आह—सत्सूद्विषेति। 'स-त्सूद्विष' इति सूत्रं तु 'क्विप् च' इत्यस्यैव प्रपञ्च इत्यर्थः। उखास्रदिति। उखाया: स्रंसत इति विग्रहः। स्रंसेः क्विप्, 'अनिदिताम्' इति नलोपः, 'वसुस्रंसु' इति दत्वम्। एवं पर्णध्वत्। पर्णात् ध्वंसत इति विग्रहः। वाहभ्रडिति। वाहात् भ्रश्यति इति विग्रहः। अन्यादिना षः। अन्तः। 'अनितेः' इति सूत्रमनुवर्तते, 'एषाम्भ्यां नो

स्यानितेर्नस्य णत्वं स्यादुपसर्गस्थान्निमित्तात्परश्चेत्। हे प्राण्। 'शास इत्—' (सू २४८६) इतीत्वम्। मित्राणि शास्ति मित्रशीः। 'आशासः कौ उपधाया इत्वं वाच्यम्' (वा ४०७०)। आशीः। इत्वोत्वे। गीः। पूः। २६८५ **इस्मन्त्रन्क्विषु च** ६।४।९७॥ एषु छादेर्ह्रस्वः स्यात्। तनुच्छत्। 'अनुनासिकस्य क्वि—' (२६६६) इति दीर्घः। 'मो नो धातोः' (सू ३४१)। प्रतान्। प्रशान्। 'च्छ्वोः—' (सू २५६१) इत्यूठ्। अक्षद्यूः। 'ज्वरत्वर—' (सू २६५४) इत्यूठ्। जूः। जूरौ। जूरः। तूः। स्तूः। ऊठ्, वृद्धिः, जनानवतीति जनौः। जनावौ। जनावः। मूः। मुवौ। मुवः। सुमूः। सुम्वौ। सुम्वः। 'राल्लोपः' (सू २६५५)। मुर्छा। मूः। मुरौ। मुरः। धुर्वी, धूः।

ग्याः' इति च। अन्तः इति षष्ठ्यर्थे प्रथमा। पदस्याऽन्तो विवक्षितः। 'उपसर्गादसमासेऽपि' इत्यतः उपसर्गादित्यनुवर्तते। तदाह—पदान्तस्येत्यादिना। हे प्राणिति। प्रपूर्वादनेः क्विबन्तात् सम्बोधनैकवचनस्य हल्ङ्यादिलोपः, नस्य ग्याः। नलोपस्तु न, 'न क्विसम्बुद्धयोः' इति निषेधात्। मित्रशीरिति। मित्राणि शास्तीति विग्रहः। शासेः क्विप् 'शास इदङ्हलोः' इत्युपधाया इत्वम्, 'वोरुपधायाः' इति दीर्घः। मित्रशिवादित्वादौ अपदान्तत्वाच्च दीर्घः। आशासः काविति। 'आङः शासु इच्छायाम्' इत्यात्मनेपदी। तस्य 'शास इदङ्हलोः' इति इत्वं तु न भवति, तत्र परस्मैपदिन एव शासेर्ग्रहणात्। अन्यथा आशास्ते इत्यादावपि इत्वापत्तेः। अत आशासः काविति विधिः। इत्वोत्वे इति। गधातोः क्विपि, ऋत इत्वे, रपरत्वे, सोर्लोपे, 'वोरुपधायाः' इति दीर्घे गीरिति रूपम्। पूधातोः क्विपि, 'उदोष्ठ्यपूर्वस्य' इति ऋतः उत्वे, रपरत्वे, सुलोपे, उपधादीर्घे पूः इति रूपमित्यर्थः। इस्मन्त्रन्। इस्, मन्, त्रन्, क्वि एषां चतुर्णां द्वन्द्वः। 'छादेर्घेऽद्व्युपसर्गस्य' इत्यतः छादेरिति 'खचि ह्रस्वः' इत्यतः ह्रस्व इति चानुवर्तते। तदाह—एषु छादेरिति। अर्थादाकारस्येति गम्यते, अलोन्त्यपरिभाषामाश्रित्य इकारस्य ह्रस्वविधौ प्रयोजनाऽभावात्। एवञ्च 'ऊदुपधायाः' इत्यतः उपधाया इति नानुवर्तनीयम्, णयन्तस्य छादेर्णकारोपधत्वात्। इस् छदिः, मन् छद्म, त्रन् छत्रम्। कौ उदाहरति—तनुच्छदिति। तनुं छादयतीति विग्रहः। अत्र तनेः शमेश्च क्विपि विशेषमाह—अनुनासिकस्येति। 'अक्षद्यू'रित्यत्र आह—च्छ्वोरिति। अक्षैर्दीव्यतीति विग्रहे दिवुधातोः क्विपि वकारस्य ऊठि इकारस्य यणिति भावः। ज्वरेति। ज्वरधातोः क्विपि अकारवकारयोरेकस्मिन् ऊठि जूरिति रूपम्। एवं त्वरेः तूरिति रूपम्। स्रिवेः क्विपि इकारवकारयोरूठि सूरिति रूपम्। अवधातोः क्विपि अकारवकारयोरूठि ऊरिति रूपम्। वृद्धिरिति। जनानवतीति विग्रहे, अवेः क्विपि, अकारवकारयोरूठि, जन ऊ इति स्थिते, आद्गुणं बाधित्वा 'एरेधाय्यूङ्सु' इति वृद्धिरौकारादेश इत्यर्थः। मूरिति। अवेः क्विपि, अकारवकारयोरूङ्। सुम्वो

२९८६ गमः क्वौ ६।४।४०॥ अनुनासिकलोपः स्यात्। अङ्गगत्। 'गमादीनामिति वक्तव्यम्' (वा ४०७६)। पुरीतत्। संयत्। सुनत्। 'ऊङ्च गमादीनामिति वक्तव्यम्'। 'लोपश्च' (वा ४०७३-७४) अग्रेगूः। अग्रेभूः। २९८७ स्थः क च ३।२।७७॥ चात्क्विप्। शंस्थः। शंस्थाः। 'शमि धातोः-' (सू २९२८) इत्यत्रं बाधितुं सूत्रम्। २९८८ सुप्यजातौ णिनिस्ताच्छील्ये ३।२।७८॥ अजात्यर्थे सुपि धातोर्णिनि. स्यात्ताच्छील्ये गोत्ये। उष्णभोजी। शीतभोजी। अजातौ किम्। ब्राह्मणानामन्त्रयिता। ताच्छील्ये किम्। उष्णं भुङ्क्ते कदाचित्। इह वृत्तिकारे-

सुम्वः इति। अनेकाक्त्वात् गतिपूर्वत्वाच्च षणिति भावः। रादिति। मुर्छाधातोः क्विपि 'राल्लोपः' इति छकारस्य लोपे सुलोपे 'वोः' इति दीर्घं मूरिति रूपम्। मुरौ मुर इति। अपदान्तत्वान्नोपधादीर्घः। धुर्वीति। धुर्वीधातोः क्विपि 'राल्लोपः' इति वकारस्य लोपे सुलोपे 'वोः' इति दीर्घं धूरिति रूपमिति भावः। गमः क्वौ। अनुनासिकलोपः स्यादिति। शेषपूरणमिदम्। 'अनुदात्तोपदेश'। इत्यतस्तदनुवृत्तेरिति भावः। झलादिप्रत्ययपरकत्वाऽभावात् अनुदात्तोपदेशेत्यप्राप्तौ वचनम्। अङ्गगदिति। अङ्गाख्यं देशं गच्छतीति विग्रहः। क्विपि मकारलोपे तुक्। एवं वङ्गगत् कलिङ्गगदित्यादि। गमादीनामिति। 'क्वावनुनासिकलोप' इति शेषः पुरीतदिति। पुरिः हृदयाख्यः मांसखण्डविशेषः। तं तनोति आच्छादयतीति विग्रहः। हृदयकमलाच्छादको मेदोविशेषः। 'पुरीतता हि हृदयमाच्छाद्यते' इति श्रुतिरिति कर्किभाष्यम्। तनेः क्विपि नकारलोपे तुक्, 'नहिवृतिवृषि' इति पूर्वपदस्य दीर्घः। संयदिति। यमेः क्विप्। मलोपे तुक्। सुनदिति। नमेः क्विपि मलोपे तुक्। ऊ चेति। गमादीनामुपधायाः ऊभावश्चेति वक्तव्यमित्यर्थः। लोपश्चेति। चकारादनुनासिकलोपः समुच्चीयते इति भावः। अग्रेगूरिति। अग्रे गच्छतीति विग्रहः। गमेरकारस्य ऊभावः मलोपश्च 'तत्पुरुषे कृति बहुलम्' इत्यलुक्। अगेभूरिति। भ्रमेरकारस्य ऊभावः, मलोपश्च। स्थः क च। 'के'त्यधिकृत्य कम्। स्थ इति पञ्चम्यन्तम्। चात् किंविति। उपसर्गे अनुपसर्गे च सुबन्ते उपपदे स्थाधातोः कप्रत्ययः स्यात् क्विप् चेति फलितम्। शंस्थ इति। शमित्यव्ययं सुखे। तत्पूर्वात् स्थाधातोः कप्रत्यये आतो लोपः। शंस्था इति। क्विपि रूपम्। सुखं स्थापयतीत्यर्थः। तिष्ठतिरन्तर्भावितण्यर्थः। 'शंस्था' इति भाष्यप्रयोगात् पृषोदरादित्वाच्च 'घुमास्था' इति ईत्वं न। केचित्तु 'के'ति चकारात् विजेवानुकृष्यते इत्याहुः। ननु 'सुपि स्थः' इति कप्रत्यये 'क्विप् च' इति क्विपि च सिद्धे किमर्थमिदमित्यत आह—शमिधातोरित्यादिमिति। अन्यथा धातुग्रहणसामर्थ्यात् कृञो हेत्वादिषु टप्रत्ययमिव शम्पूर्वात् स्थाधातोः कं क्विपं च अव्ययस्यबो बाधेतेति भावः। सुप्यजातौ णिनिस्ताच्छील्ये। 'सुपि स्थः' इत्यतः सुपीत्यनुवृत्तौ पुनः सुग्रहणमुपसर्गेऽपि विधानार्थम्। अन्यथा 'आतोऽनुपसर्गे' इत्यतः अनुपसर्गं

णोपसर्गभिन्न एव सुपि णिनिरिति व्याख्याय 'उत्प्रतिभ्यामाङि सर्तेरुपसंख्यानम्' इति पठितम् । हरदत्तमाधवादिभिश्च तदेवानुसृतम् । एतच्च भाष्यविरोधादुपेक्ष्यम् । प्रसिद्धश्चोपसर्गेऽपि णिनिः । 'स बभूवोपजीविनाम्' 'अनुयायिवर्गः', 'पतत्यधो धाम विसारि', 'न वञ्चनीयाः प्रभवोऽनुजीविभिः' इत्यादौ । 'साधुकारिण्युपसंख्यानम्' (वा २०३८) 'ब्रह्मणि वदः' (वा २०३९) अताच्छील्यार्थे वार्तिकद्वयम् । साधुकारी, साधुदायी । ब्रह्मवादी । २९८९ **कर्तर्युपमाने ३।२।७९॥** णिनिः स्यात् । उपपदार्थः कर्ता प्रत्ययार्थस्य कर्तुरुपमानम् । उष्ट्र इव क्रोशति उष्ट्रक्रोशी । ध्वाङ्क्षरावी । अताच्छील्यार्थं, जात्यर्थं च सूत्रम् । कर्तरि किम् । अपूपानिव भक्षयति माषान् । उपमाने किम् । उष्ट्रः क्रोशति । २९९० **व्रते ३।२।८०॥** णिनिः स्यात् । स्थण्डिलशायी । २९९१ **बहुलमाभीक्ष्ण्ये ३।२।८१॥** पौनःपुन्ये द्योत्ये सुप्युपपदे णिनिः स्यात् । क्षीरपायिणः उशीनराः । २९९२ **मनः ३।२।८२॥** सुपि मन्यते-

---

इत्यनुवर्तते । तदुदाहरणमनुदाहरति—उष्णभोजीति । उष्णभोजनशील इत्यर्थः । उपसर्गाभिन्न एवेति । अनुपसर्गं इत्यनुवर्तते । सुब्ग्रहणं तु 'सप्तम्यां जनेर्डः' इति सूत्रात् उपसर्गेऽपीत्यनुवृत्तिनिवृत्तये इति भावः । उत्प्रतिभ्यामिति । उत्प्रतिभ्यां परे आङि प्रयुज्यमाने सति तत्पूर्वात्सर्तेर्णिनेरुपसङ्ख्यानमिति तदर्थः । उदासारिणी प्रत्यासारिणीत्युदाहरणम् । भाष्यविरोधादिति । सुब्ग्रहणमुपसर्गग्रहणानुवृत्तिनिवृत्त्यर्थम्, उपसर्गे अनुपसर्गे च सुबन्ते उपपदे धातोर्णिनिरित्येव भाष्ये उदाहृतत्वादिति भावः । तथाच 'उत्प्रतिभ्यामाङि सर्तेः' इति वचनं नादर्तव्यम् । भाष्ये तत्पाठस्तु प्रक्षिप्त एवेति भावः । अत एव 'अनुगादिनष्ठक्' इति सूत्रप्रयोगश्च सङ्गच्छते इति ज्ञेयम् । 'उपसर्गेभिन्न एव सुपि णिनि'रिति मतं शिष्टप्रयोगविरुद्धं चेत्याह-प्रसिद्धश्चोपसर्गेऽपि णिनिरिति । 'इत्यादा'वित्यन्वयः । साधुकारिणीति । कृग्रहणं सर्वधातूपलक्षणम् । साधुकारीत्यादिशब्दविषये तत्सिद्ध्यर्थं णिनेरुपसङ्ख्यानमित्यर्थः । साधुशब्दे उपपदे धातोर्णिनिरिति यावत्, भाष्ये 'साधुकारी साधुदायी'त्युदाहरणात् । ब्रह्मणि वद इति । 'णिनेरुपसङ्ख्यान'मिति शेषः । ननु 'सुप्यजातौ' इत्येव सिद्धे किमर्थमिदं वार्तिकमित्यत आह—अताच्छील्यार्थमिति । साधुदायीति । आतो युक् । ब्रह्मवादीति । ब्रह्म वेदः । कर्तर्युपमाने । कर्तुरुपमानमिति । 'चे'रित्यध्याहार्यम् । ननु 'सुप्यजातौ' इति सिद्धे किमर्थमिदमित्यत आह—अताच्छील्यार्थमिति । व्रते । णिनिः स्यादिति । सुप्युपपदे णिनिः स्यात् व्रते गम्ये इति यावत् । स्थण्डिलशायीति । 'तत्पुरुषे कृति बहुलम्' इत्यलुक् । बहुलमाभीक्ष्ण्ये । जातावप्युपपदे प्राप्त्यर्थमिदम् । तत् व्याख्यानमुदाहरति—क्षीरपायिण इति । मनः । दैवादिकस्यैव मनेर्ग्रहणं न तु तानादिकस्य, बहुलग्रहणादनुवृत्तेः । तदाह-सुपि मन्यतेरिति । मनुतेर्ग्रहणे तु बाधकमुत्तरसूत्रे वक्ष्यते ।

णिनिः स्यात्। दर्शनीयमानी। २९९३ आत्ममाने खश्च ३।२।८३॥ स्वकर्मके मनने वर्तमानान्मन्यतेः सुपि खश् स्यात्। चाणिनिः। पण्डितमात्मानं मन्यते पण्डितम्मन्यः। 'पण्डितमानी। खित्यनव्ययस्य' (सू २९४३)। कालिम्मन्या। अनव्ययस्य किम्। दिवामन्या। २९९४ इच एकाचोऽम्प्रत्ययवच्च ६।३।६८॥ इजन्तादेकाचोऽम्स्यात्स च स्वाद्यम्वत्खिदन्ते परे। 'औतोऽम्शसोः' (सू २८५)। गाम्मन्यः। 'वाऽम्शसोः' (सू ३०२)। स्त्रियम्मन्यः। स्त्रीम्मन्यः। नृ, नरम्मन्यः। भुवम्मन्यः। श्रियमात्मानं मन्यते श्रिमन्यं कुलम्। भाष्यकारवचना-

---

आत्ममाने खश्च। आत्मनः स्वस्य मानः मननम् आत्ममानः। तदाह—स्वकर्मके मनने इति। पण्डितम्मन्य इति। खशः शित्त्वेन सार्वधातुकत्वात् श्यन्। खित्त्वात् 'अदर्द्धिषत्' इति मुम्। तानादिकस्य मनेर्ग्रहणे तु उविकरणः स्यात्। कालीमात्मानं मन्यते इत्यर्थे खशि श्यनि कृते आह—खित्यनव्ययस्येति। 'स्त्रियाः पुंवत्' इति पुंवत्वं बाधित्वा परत्वादम्भ्रस्वः इत्यर्थः। दिवामन्येति। अधिकरणशक्तिप्रधानस्यापि दिवाशब्दस्य वृत्तिविषये कर्मत्वं बोध्यम्। इच एकाचः। एकाचः अमिति छेदः। अम् च अम् चेत्येकशेषः। एकं विधेयसमर्पकम्। 'इच एकाचोऽमि'ति प्रथमं वाक्यम्। इच इत्येकाच इति च पञ्चमी। 'अङ्गयुत्तरपदे' इत्युत्तरपदाधिकारात् आक्षिप्तं पूर्वपदम् इचा विशेष्यते। तदन्तविधिः। तदाह—इजन्तादेकाचोऽम् स्यादिति। मुमोऽपवादः। द्वितीयम् अम्पदं प्रत्ययवदित्येकदेशेन प्रत्ययेन समानाधिकरणं सम्बध्यते। असामर्थ्येऽपि वतिप्रत्ययवार्षः। 'अम्प्रत्ययव'दिति द्वितीयं वाक्यं सम्बध्यते। स्वादिप्रत्ययेषु यत् द्वितीयैकवचनं तदेवाऽत्र अमिति विवक्ष्यते, व्याख्यानात्। तदाह—स च स्वाद्यम्वदिति। एतत्सर्वं भाष्ये स्पष्टम्। खिदन्ते पर इति। खिदन्ते उत्तरपदे परत इत्यर्थः। 'खित्यनव्ययस्य' इत्यतः खितीत्यनुवर्त्तते इति भावः। 'अम्प्रत्ययव' दित्यतिदेशस्य प्रयोजनमाह—औतोम्शसोरिति। गाम्मन्य इति। गामात्मानं मन्यते इत्यर्थे मनेः खशि श्यन्, सुपो लुक्, गोशब्दादम्, 'अम्प्रत्ययव'दित्यतिदेशात् मकारस्य 'न विभक्तौ' इति नेत्वम्। 'औतोऽम्शसोः' इत्योकारस्य आकार इति भावः। 'अम्प्रत्ययव' दित्यस्य प्रयोजनान्तरमाह—वाऽम्शसोरिति। स्त्रियम्मन्य इति। स्त्रियमात्मानं मन्यते इत्यर्थे मनेः खशि श्यन्। सुपो लुक्। स्त्रीशब्दात् 'वाऽम्शसोः' इति इयङ्विकल्पः। अत्र यकारादकारश्रवणार्थम् अमुविधिः। मुमि तु अकारो न श्रूयेत। स्त्रीम्मन्य इति। इयङभावपक्षे 'अमि पूर्वः'। अम्प्रत्ययवदित्यस्य प्रयोजनान्तरमाह—नृ नरम्मन्य इति। 'नृ' इत्यविभक्तिकम् उदाहरणे नृशब्दस्य समावेशसूचनार्थम्। नरमात्मानं मन्यते इत्यर्थे मनेः खश्, श्यन्, सुपो लुक्, नृशब्दादम्। 'अम्प्रत्ययव'दित्यतिदेशात् 'ऋतोऽङि' इति गुणः। अत्राऽपि रेफादकारश्रवणार्थः अमुविधिः। मुमि त्वकारो न श्रूयेत। 'अम्प्रत्ययव' दित्यस्य प्रयोजनान्तरमाह—भुवम्मन्य इति। भुवमात्मानं मन्यते इत्यर्थे मनेः खश्,

च्छ्रीशब्दस्य ह्रस्वो मुममोरभावश्च । २१९५ भूते ३।२।८४॥ अधिकारोऽयम् । 'वर्तमाने लट्' (सू २१५१) इति यावत् । २१९६ करणे यजः ३।२।८५॥ करणे उपपदे भूतार्थाद्यजेर्णिनिः स्यात्कर्तरि । सोमेनेष्टवान् सोमयाजी । अग्निष्टोमयाजी । २१९७ कर्मणि हनः ३।२।८६॥ पितृव्यघाती । कर्मण्यित्येतत् 'सहे च' (सू ३००६) इति यावदधिक्रियते । २१९८ ब्रह्मभ्रूणवृत्रेषु क्विप् ३।२।८७॥

श्यन्, सुपो लुक् । भूशब्दादम्, 'अम्प्रत्ययवदि'त्यतिदेशात् 'अचि श्नुधातु' इत्युक् । अतिदेशाऽभावे तु उवङ् न स्यात्, तस्याऽजादिप्रत्यये विधानात् । श्रिमन्यमिति । मनेः खश् श्यन् । अत्र मननक्रियां प्रति कुलत्वेन रूपेण कुलं कर्तृ, तस्यैव कुलस्य अध्यारोपितश्रीत्वेन रूपेण कर्मत्वं चेति स्थितिः । एवञ्च श्रीशब्दस्य नित्यस्त्रीलिङ्गस्यापि कुले लक्षणया वृत्तेर्नपुंसकत्वम् । यत्र हि प्रातिपदिकस्यैव लक्षणा प्रसिद्धा तत्र पूर्वलिङ्गत्यागः । यथा प्रकृते श्रीशब्दः । यत्र तु पदस्य लक्षणा, न तत्र पूर्वलिङ्गत्यागः यथा 'गङ्गायां घोष' इत्यादौ इति 'पुंयोगादाख्यायाम्' इति सूत्रे, प्रकृतसूत्रे च भाष्यकैयटयोर्मर्यादा स्थिता । एवञ्च 'कालिम्मन्यं कुल' मित्यत्र कालीशब्दस्य न स्त्रीलिङ्गपरित्यागः, प्रयोगानुसारेण तत्र पदलक्षणाया एवाभ्युपगमात् । 'श्रिमन्यं कुल'मित्यत्र तु प्रयोगाऽनुसारात् श्रीशब्दस्य प्रातिपदिकस्यैव लक्षणेति पूर्वलिङ्गपरित्यागात् नपुंसकलिङ्गत्वमेवाश्रीयते । ततश्च श्रीशब्दस्याऽत्र नपुंसकत्वात् 'स्त्रियतन्त्र्ययस्य' इति बहिरङ्गं बाधित्वा 'ह्रस्वो नपुंसके प्रातिपदिकस्य' इति ह्रस्व एव न्याय्यः । सुमपवादे 'इच एकाचः' इति अमि कृते तस्य 'स्वमोर्नपुंसकात्' इति लुक् । तथाच 'श्रिमन्यं कुल'मिति सिद्धम् । न च गात्रमन्य इत्यादावपि 'सुपो धातुप्रातिपदिकयोः' इति लुक् स्यादिति वाच्यम्, 'इच एकाचः' इत्यमः 'सुपो धातुः' इति लुगपवादत्वात् । 'स्वमोर्नपुंसकात्' इति लुकस्तु नायमभिविधिर्बाधकः, मध्येऽपवादन्यायात् इति प्रकृतसूत्रे भाष्यकैयटयोः स्पष्टम् । तदाह—भाष्यकारवचनाच्छ्रीशब्दस्य ह्रस्व इति । 'ह्रस्वो नपुंसके' इत्यनेनेति शेषः । सुममोरभावश्चेति । सुमपवादस्य अमः 'स्वमोर्नपुंसकात्' इति लुकि सति तयोः प्रयोगाऽभावः फलतीत्यर्थः । भूते । अधिकारोऽयमिति । धातोरित्यधिकृतम् । ततश्च भूतार्थवृत्तेर्धातोरित्युत्तरत्राऽनुवर्तते इति फलति । वर्तमाने इति । 'वर्तमाने लट्' इत्यतः प्राग्इत्यर्थः । अत्र व्याख्यानमेव शरणम् । करणे यजः । सोमेनेति । सोमाख्यकताविशेषरूपेण यागं कृतवानित्यर्थः । सोमलतारसद्रव्यकेन यागेन अपूर्वमुत्पादितवानिति मीमांसकाः । एतच्च द्वितीयस्य द्वितीये 'द्रव्यसंयोगाच्चोदना पशुसोमयोः' इत्यधिकरणे अध्वरमीमांसाकुतूहलवृत्तौ प्रपञ्चितमस्माभिः । अग्निष्टोमयाजीति । अग्निष्टोमाख्ययागेन अपूर्वं भावितवानित्यर्थः । कर्मणि हनः । कर्मण्युपपदे भूतार्थात् हनेर्णिनिः स्यात् । पितृव्यघातीति । पितृव्यं हतवानित्यर्थः । 'हनस्तः' इति तः, 'हो हन्तेः' इति हस्य घः । ब्रह्मभ्रूणवृत्रेषु क्विप् । पूर्वसूत्रात्कर्मग्रहणाऽनुवृत्तेराह—

एषु कर्मसूपपदेषु हन्तेर्भूते क्विप् स्यात्। ब्रह्महा। भ्रूणहा। वृत्रहा। 'क्विप् च' (सू-२९८३) इत्येव सिद्धे नियमार्थमिदम्। ब्रह्मादिष्वेव, हन्तेरेव, भूत एव, क्विबेवेति चतुर्विधोऽत्र नियम इति काशिका। ब्रह्मादिष्वेव क्विबेवेति द्विविधो नियम इति भाष्यम्। २९९९ **सुकर्मपापमन्त्रपुण्येषु कृञः** ३।२।८९॥ सौकर्मादिषु च कृञः क्विप्स्यात्। त्रिविधोऽत्र नियम इति काशिका। सुकृत्। कर्मकृत्। पापकृत्। मन्त्रकृत्। पुण्यकृत्। क्विबेवेति नियमात्कर्म कृतवानित्यश्राण् न। कृञ एवेति नियमान्मन्त्रमधीतवान् मन्त्राध्यायः। अत्र न क्विप्। भूत एवेति नियमान्मन्त्रं करोति, करिष्यतीति विवक्षायां न क्विप्। 'स्वादिष्वेवे'ति नियमाऽभावादन्यस्मिन्नप्युपपदे क्विप्। शास्त्रकृत्। भाष्यकृत्। ३००० **सोमे सुञः** ३।२।९०॥ सोमसुत्। 'चतुर्विधोऽत्र नियम' इति काशिका। एवमुत्तरसूत्रेऽपि। ३००१ **अग्नौ चेः** ३।२।९१॥ अग्निचित्। ३००२ **कर्मण्यग्न्याख्यायाम्** ३।२।९२॥ कर्मण्युपपदे कर्मण्येव कारके चिनोतेः क्विप् स्यात् अग्न्याधारस्थलविशेषस्याख्यायाम्। श्येन इव चितः श्येनचित्। ३००३ **कर्मणीनि विक्रियः**

कर्मस्विति। हन्तेर्भूते इति। **भूतार्थधातुरित्यर्थः**। चतुर्विध इति। **पुनर्विधानलब्धस्य एवकारस्य विनिगमनाविरहाच्चतुर्ष्वपि निवेशः** इति भावः। **तत्र 'ब्रह्मादिष्वेव हन्तेरिति नियमात् पुरुषं हतवानित्यत्र न क्विप्। ब्रह्मादिषु हन्तेरेवेति नियमात् ब्रह्म अधीतवानित्यत्र न क्विप्। 'ब्रह्मादिषु हन्तेर्भूतकाले एवेति नियमात् ब्रह्म हन्ति हनिष्यति वेत्यत्र न क्विप्। 'क्विबेवेति नियमात् ब्रह्म हतवानित्यत्र अण् न भवति, किन्तु 'ब्रह्मभ्रूण' इति क्विबेव। निष्ठा तु भवत्येव, सोपपदप्रत्ययस्यैव नियमेन व्यावृत्तेः**। द्विविध इति। **'उभयतो नियमोऽयम्' 'ब्रह्मादिष्वेव' क्विबेवेति च भाष्यमित्यर्थः। एवञ्च 'हन्तेरेव' 'भूत एवेति' नियमद्वयमुपेक्ष्यमिति भावः**। सुकर्म। **सु, कर्म, पाप, मन्त्र, पुण्य एषां पञ्चानां द्वन्द्वः**। त्रिविध इति। **'सुकर्मादिषु भूते कृञः क्विबेवे'ति, 'सुकर्मादिषु भूते कृञ एव क्विबिति, 'सुकर्मादिषु भूत एव कृञ' इति त्रिविध इत्यर्थः**। अण् नेति। **ऋवतुस्तु भवत्येव, सोपपदप्रत्ययस्यैव नियमेन व्यावृत्तेरिति भावः। स्वादिष्वेवेति। सुकर्मादिषु पञ्चस्वित्यर्थः**। सोमे सुञः। **सोमे कर्मण्युपपदे भूते सुनोतेः क्विबित्यर्थः**। चतुर्विध इति। **पूर्ववदुव्याख्येयम्**। एवमिति। **'अग्नौ चेः' इत्युत्तरसूत्रेऽपि चतुर्विधो नियम इत्यर्थः**। अग्नौ चेः। **अग्नौ कर्मण्युपपदे भूतार्थधातुरित्यनुवर्तते चिनोतेः क्विप् स्यादित्यर्थः**। अग्निचिदिति। **अग्न्याख्यं स्थण्डिलविशेषमिष्टकाभिश्चितवानित्यर्थः**। कर्मण्यग्न्याख्यायाम्। **कर्मणीत्यनुवृत्तमुपपदसमर्पकम्। अग्न्यं तु कर्मणीत्येतत्प्रत्ययार्थसमर्पकम्। तथा चाऽत्र कर्तरीति न सम्बध्यते। तदाह**—कर्मण्युपपदे इत्यादि। चिनोतेरिति। **भूतार्थादित्यपि बोध्यम्**। श्येन इवेति। **श्येनशब्दः श्येनसदृशे लाक्षणिक**

३।२।६३॥ कर्मण्युपपदे विपूर्वात्क्रीणातेरिनिः स्यात्। 'कुत्सितग्रहणं कर्तव्यम्' (वा २०४७)। सोमविक्रयी। घृतविक्रयी। ३००४ **दृशेः क्वनिप्** ३।२।६४ कर्मणि भूत इत्येव। पारं दृष्टवान् पारदृश्वा। ३००५ **राजनि युधिकृञ्भ्यः** ३।२।६५॥ क्वनिप् स्यात्। युधिरन्तर्भावितण्यर्थः। राजानं योधितवान् राजयुध्वा। सहकृत्वा। ३००६ **सहे च** ३।२।६६॥ कर्मणीति निवृत्तम्। सहयुध्वा। सहकृत्वा ३००७ **सप्तम्यां जनेर्डः** ३।२।६७॥ सरसिजम्। मन्दुरायां जातो मन्दुरजः। 'ड्यापोः—(सू १००१) इति ह्रस्वः। ३००८ **पञ्चम्यामजातौ** ३।२।६८॥ जातिशब्दवर्जिते पञ्चम्यन्ते उपपदे जनेर्डः स्यात्। संस्कारजः। अदृष्टजः। ३००९ **उपसर्गे च संज्ञायाम्** ३।२।६९॥ 'प्रजा स्यात्सन्ततौ जने'। ३०१० **अन्नौ कर्मणि** ३।२।७०॥ अनुपूर्वाज्जनेः कर्मण्युपपदे डः स्यात्। पुमांसमनुरुध्य जाता पुमनुजा। ३०११ **अन्येष्वपि दृश्यते** ३।२।७१॥ अन्येष्वप्युपपदेषु जनेर्डः स्यात्। अजः। द्विजः ब्राह्मणः (ब्राह्मणजः)। अपिशब्दः

इति भावः। श्येनाकृतिक इति यावत्। कर्मणीति विक्रयः। **'इनि' इत्यविभक्तिकम्।** विपूर्वस्य क्रीञ्धातोर्विक्रिय इति पञ्चम्यन्तम्। कुत्सितेति। **कुत्सिते कर्मण्युपपदे उक्तविधिर्भवतीत्यर्थः।** सोमविक्रयीति। **सोमद्रव्यं च विक्रीयमाणं विक्रेतुः कुत्सामावहति, तद्विक्रयस्य निषिद्धत्वादिति भावः।** दृशेः क्वनिप्। **"आतो मनिन्क्वनिब्वनिपश्च" 'अन्येभ्योऽपि दृश्यन्ते' इत्येव क्वनिपि सिद्धे तत्सहचरितमनिनादिव्याहृत्यर्थमिदं, सोपपदाऽण्वादिबाधनार्थं च। निष्ठा तु भवत्येव, सोपपदप्रत्ययस्यैवाऽत्र पुनः क्विब्ग्रहणेन निषेधः।** पारं दृष्टवान्। राजनि युधिकृञ्भ्यः। **युधि, कृञ् अनयोः समाहारद्वन्द्वात्सप्तमी।** क्वनिप् स्यादिति। **राजनि कर्मण्युपपदे भूतार्थयुधेः कृञश्च क्वनिविधेर्थं।** ननु युधेरकर्मकत्वात् तत्र कर्मण्युपपदे इत्यस्य कथमन्वय इत्यत आह—युधिरन्तर्भावितेति। राजकृतेति। **राजानं कृतवानित्यर्थः।** सहे च। **सहशब्दे उपपदे युधिकृञ्भ्यां क्वनिविधेर्थः।** सप्तम्यां जनेर्डः। **सप्तम्यन्ते उपपदे जनेः भूतार्थाड्ड इत्यर्थः।** सरसिजमिति। **डित्त्वसामर्थ्यादभस्यापि टेर्लोपः।** 'ह्रस्वनद्यात्' इति 'तत्पुरुषे कृति' इति वा अलुक्। मन्दुरज इति। 'वाजिशाला तु मन्दुरा' इत्यमरः। पञ्चम्यामजातौ। जनेरिति। 'भूताद्यै'रिति शेषः। संस्कारजमिति। **संस्काराज्जातमित्यर्थः।** उपसर्गे च। **'जनेर्ड' इति शेषः।** संज्ञायामिति समुदायोपाधिः। अन्नौ कर्मणि। ननु जनेरकर्मकत्वात्तत्र कर्मण्युपपदे इत्यर्थस्य कथमन्वय इत्यत आह—पुमांसमनुरुध्येति। **अनुरुध्य जननं जात्वर्थं इति भावः।** पुमनुजेति। **पुंस् इति पूर्वपदे संयोगान्तलोप इति भावः।** अन्येष्वपि दृश्यते। अज इति। **न जात इत्यर्थः।** द्विजो ब्राह्मण इति। **द्विर्जातः इत्यर्थः। 'मातुर्यदग्रे जायन्ते द्वितीयं मौञ्जिबन्धनात्' इत्यादिस्मृतेरिति भावः।**

सर्वोपाधिव्यभिचारार्थः। तेन धात्वन्तरादपि कारकान्तरेष्वपि क्वचित्। परितः खाता परिखा ३०१२ **क्तक्तवतू निष्ठा** १।१।२६॥ एतौ निष्ठासंज्ञौ स्तः। ३०१३ **निष्ठा** ३।२।१०२॥ भूतार्थवृत्तेर्धातोर्निष्ठा स्यात्। तत्र 'तयोरेव–'(सू २८३३) इति भावकर्मणोः क्तः। 'कर्तरि कृत्' (सू २८३२) इति कर्तरि क्तवतुः। उकाविति। स्नातं मया। स्तुतस्त्वया विष्णुः। विष्णुर्विश्वं कृतवान्। ३०१४ **निष्ठायामण्यदर्थे** ६।४।६०॥ ण्यदर्थो भावकर्मणी, ततोऽन्यत्र निष्ठायां क्षियो दीर्घः स्यात्। ३०१५ **क्षियो दीर्घात्** ८।२।४६॥ दीर्घात्क्षियो निष्ठातस्य नः स्यात्। क्षीणवान्। भावकर्मणोस्तु क्षितः कामो मया। 'श्रयुकः किति' (सू २३८१) श्रितः। श्रितवान्। भूतः। भूतवान्। द्रुतः। 'ऊर्णोतेर्नुवद्भावो वाच्यः (वा १७५१) तेन एकाच्त्वाज्नेट्। ऊर्णुतः। नुतः। वृतः। ३०१६ **रदाभ्यां निष्ठातो नः पूर्वस्य च दः** ८।२।४२॥

अपिशब्द इति। **'सप्तम्यां जनेर्डः'** इत्यादिसूत्रेषु डबिञिषु यानि विशेषणान्युपात्तानि प्रकृतिविशेषणरूपाणि भूते कर्तरीति प्रत्ययार्थविशेषणं च तदतिरिक्तमार्थं इत्यर्थः। क्तक्तवतू निष्ठा। **क्त, क्तवतु** अनयोर्द्वन्द्वः। क्षिष्ठेति प्रत्येकाभिप्रायमेकवचनम्। निष्ठा। **भूते इति धातोरिति चाधिकृतम्। तदाह**—भूतार्थेत्यादि। भावकर्मणोः क्त इति। **तथा च क्तप्रत्ययविषये कर्तरीति न सम्बध्यते इति भावः।** कर्तरि क्तवतुरिति। **कृत्यक्तखलर्थानामेव भावकर्मणोर्विधानादिति भावः। 'तयोरेव कृत्यक्त' इत्यत्र 'लः कर्मणि' इत्यस्मात् सकर्मकेभ्यः कर्मणि कर्तरि च अकर्मकेभ्यो भावे कर्तरि चेत्यनुवर्तते। ततश्च अकर्मकेभ्यो भावे क्तः, सकर्मकेभ्यस्तु कर्मणीति व्यवस्था लभ्यते इति मत्वा उदाहरति-स्नातं मयेति। अकर्मकत्वात् भावे क्तः।** स्तुतस्त्वया विष्णुरिति। **सकर्मकत्वात् कर्मणि क्तः। कर्तरि क्तवतुमुदाहरति-विष्णुर्विश्वं कृतवानिति।** निष्ठायामण्यदर्थे। ण्यदर्थो भावकर्मणी इति। **'ऋहलोः'** इति ण्यतः कृत्यसंज्ञकस्य **'तयोरेव'**ति भावकर्मणोरेव प्रवृत्तेरिति भावः। ततोऽन्यत्रेति। **कर्तरीत्यर्थः। क्तवताविति फलितम्।** क्षियो दीर्घः स्यादिति। **क्षिय इति पूर्वसूत्रमनुवर्तते, 'युष्मच्छब्देर्घश्छन्दसि'** इत्यतः **दीर्घ इति चेति भावः।** क्षियो दीर्घात्। **दीर्घादिति क्षियो विशेषणम्। तदाह**—दीर्घात क्षिय इति। **दीर्घान्तादित्यर्थः।** निष्ठातस्य न इति। **'रदाभ्याम्'** इत्यतस्तदनुवृत्तमिति भावः। क्षीणवानिति। **क्षीणातोः कर्तरि क्तवतुः, 'निष्ठायामण्यर्थे'** इति दीर्घः, तकारस्य नत्वम्, षात्परत्वाज्णः। क्षितः कामो मयेति। **क्षपित इत्यर्थः। 'क्षि क्षये'** इत्यस्मात् **अन्तर्भावितण्यर्थात्कर्मणि क्तः। भावे तु क्षितं कामेनेत्युदाहार्यम्।** अत्र ण्यदर्थयोर्भावकर्मणोर्विहिते क्ते दीर्घो न भवति, **अण्यदर्थं इत्युक्तेः। दीर्घान्तत्वाऽभावात् 'क्षियो दीर्घात्' इति नत्वं न।** श्रयुकः किति। **'श्रित' इत्यादौ इण्निषेधस्मारकमिदम्।** द्रुत इति। **'टु द्रु क्षु शब्दे'** अस्मात् क्तः। ननु ऊर्णुत इति कथम्। **अनेकाचत्वेन श्रयुकः इति निषेधस्याप्रवृत्ते.**

रेफदकाराभ्यां परस्य निष्ठातस्य नः स्यात्। निष्ठापेक्षया पूर्वस्य धातोर्दकारस्य च। शॄ, 'ऋत इत्-' (सू २३९०) रपरः, णत्वम्। शीर्णः। बहिरङ्गत्वेन वृद्धेरसिद्धत्वान्नेह-कृतस्यापत्यं कार्तिः। छिन्नः। भिन्नः। ३०१७ **संयोगादेरातो धातोर्यण्वतः** ८।२।४३॥ निष्ठातस्य नः स्यात्। द्राणः। स्यानः। ग्लानः। ३०१८ **क्त्वादिभ्यः** ८।२।४४॥ एकविंशतेर्लूआदिभ्यः प्राग्वत्। लूनः। ज्या, ग्रहिज्या (२४१२)। जीनः। 'दुग्वोर्दीर्घश्च (वा ४८३२) 'दु गतौ' दूनः। 'टु दु उपतापे' इत्ययं तु न गृह्यते सानुबन्धकत्वात्। 'मृदुतया दुतया' इति माधः। गूनः। 'पूञो विनाशे' (वा ४८३३)। पूना यवाः। विनष्टा इत्यर्थः। पूतमन्यत्। 'सिनोतेर्ग्रासकर्मक-र्तृकस्य' (वा ४८३४)। सिनो ग्रासः। ग्रास इति किम्। सिता पाशेन सूकरी। कर्मकर्तृकस्य इति किम्। सितो ग्रासो देवदत्तेन। ३०१९ **ओदितश्च** ८।२।४५॥

रित्यत आह-ऊर्णोतेर्नुवदिति। वार्तिकमिदम्। रदाभ्याम्। रदाभ्यामित्यकारानुच्चार-णार्थो तदाह—रेफदकाराभ्यामिति। निष्ठायाः त् निष्ठात्, तस्य निष्ठात इति विग्र-हः। तदाह—निष्ठातस्येति। निष्ठातकारस्येत्यर्थः। नः स्यादिति। नकारः स्यादित्यर्थः। सूत्रे 'न' इति प्रथमान्तम्। अकार उच्चारणार्थः। दकारस्य चेति। 'नकार' इत्यनुष-ज्यते। सूत्रे 'द्' इति षष्ठ्यन्तमिति भावः। चरितम्, उदितम् इत्यत्र तु नत्वं न, नि-ष्ठातकारस्य इटा व्यवहितत्वेन रदाभ्यां परत्वाऽभावात्। रेफात्परस्योदाहरति—शॄ इति। शृधातोः क्तप्रत्ययसूचनमिदम्। ननु कृतस्यापत्यं कार्तिः। अत इञ्, आदि-वृद्धिः, रपरत्वम्। अत्र निष्ठातकारस्य रेफात् परस्य नत्वं स्यादित्यत आह—बहिर-ङ्गत्वेनेति। दात्परस्योदाहरति-छिन्नः भिन्न इति। अत्र निष्ठातकारस्य धात्वन्तदकारस्य च नत्वमिति भावः। संयोगादेः। निष्ठातस्य नः स्यादिति। शेषपूरणमिदम्। द्राण इति। 'द्रा कुत्सायां गतौ' अस्मात् क्तः, नत्वम्, णत्वम्। ग्लान इति। 'ग्लै हर्षक्षये' 'आदेचः' इत्यात्वे नत्वम्। क्त्वादिभ्यः। एकविंशतेरिति। क्र्यादिषु क्त्वादयो द्वाविंशतिः, तेषु आद्यं पूञ् विहाय क्त्वादिभ्यः एकविंशतेरित्यर्थः। ज्येति। धातुसूचनम्। ग्रहिज्येति। सम्प्र-सारणसूचनम्। जीन इति। ज्या त इति स्थिते 'संयोगादेः' इति निष्ठानत्वस्याऽसि-द्धत्वात् ततः प्रागेव सम्प्रसारणे पूर्वरूपे च कृते आतः परत्वाभावात् 'संयोगादेरातः' इति नत्वस्याप्राप्तावनेन नत्वम्। दुग्वोर्दीर्घश्चेति। वार्तिकमिदम्। दु गु आभ्यां परस्य निष्ठातस्य नत्वं प्रकृतेर्दीर्घश्च इत्यर्थः। 'मृदुतया दुतया' इति माधकाव्ये दुतशब्दं सा-धयितुमाह-टु दु उपतापे इत्यादि। गून इति। गुधातोः क्ते दीर्घः। पूञो विनाशे इति। वा-र्तिकमिदम्। विनाशार्थात् पूञः परस्य निष्ठातस्य नत्वमित्यर्थः। सिनोतेरिति। वार्ति-कमिदम्। कर्मैव कर्ता कर्मकर्ता, ग्रासः कर्मकर्ता यस्य सः ग्रासकर्मकर्तृकः, तस्मात् 'षिञ् बन्धने' इत्यस्मात्परस्य निष्ठातस्य नत्वमित्यर्थः। ओदितश्च। ओकारेतो

भुजो, भुग्नः । टु ओ श्वि, उच्छूनः । ओहाक्, प्रहीणः । 'स्वादय ओदितः' इत्युक्तम् । सूनः । सूनवान् । दूनः । दूनवान् । ओदिन्मध्ये डीङः पाठसामर्थ्यान्नेट्, उड्डीनः । ३०२० द्रवमूर्तिस्पर्शयोः श्यः ६।१।२४॥ द्रवस्य मूर्तौ काठिन्ये स्पर्शे चार्थे श्यैङः सम्प्रसारणं स्यान्निष्ठायाम् । ३०२१ श्योऽस्पर्शे ८।२।४७॥ श्यैङो निष्ठातस्य नः स्यादस्पर्शेऽर्थे । 'हलः' (सू २५५९) इति दीर्घः । शीनं घृतम् । अस्पर्शे किम् । शीतं जलम् । द्रवमूर्तिस्पर्शयोः किम् । संश्यानो वृश्चिकः । शीतात्संकुचित इत्यर्थः । ३०२२ प्रतेश्च ६।१।२५॥ प्रतिपूर्वस्य श्यः सम्प्रसारणं स्यान्निष्ठायाम् । प्रतिशीनः । ३०२३ विभाषाऽभ्यव-

---

धातोः परस्य निष्ठातस्य नत्वमित्यर्थः । मुग्न इति । नत्वस्याऽसिद्धत्वात् जस्य पूर्वं कुत्वम् । ततो नत्वम् । उच्छून इति । उत्पूर्वात् 'टु ओ श्वि' इति धातोः क्तः, वजादित्वात्सम्प्रसारणम्, पूर्वरूपम्, 'ओदितः' इति नेट्, 'हलः' इति दीर्घः, निष्ठानत्वम् । प्रहीण इति । 'ओहाक् त्यागे' इत्यस्य 'घुमास्था' इति ईत्वं, नत्वं, 'कृत्यचः' इति णत्वम् । स्वादय इति । 'षूङ् प्राणिप्रसवे' इत्यस्या नव धातवः ओदित इति द्विवादिगणे उक्तमित्यर्थः । सून इति । षूङः क्तः, नत्वं 'अयुक्तः क्ङिति' इति इण्निषेधः । दून इति । 'दूङ् परितापे' अस्मात् क्तः, स्वादित्वेन ओदित्त्वान्नत्वम् । ननु 'डीङ् विहायसा गतौ' इत्यस्य उड्डीन इति कथं रूपं, सेट्कत्वात् उगन्तत्वाभावेन 'अयुक्तः क्ङिति' इति निषेधस्याऽप्रवृत्तेरित्यत आह—ओदिन्मध्ये डीङः पाठसामर्थ्यान्नेडिति । इटि सति निष्ठातस्य ओदितः डीङः परत्वाऽभावान्नत्वाप्रसक्तेस्तस्य ओदित्सु पाठो व्यर्थः स्यादित्यर्थः । द्रवमूर्ति । श्यैङ् गतौ' इत्यस्य कृताद्वस्य 'श्य' इति षष्ठी । द्रवमूर्तश्च, स्पर्शश्चेति विग्रहः । मूर्तावित्यस्य विवरणम्—काठिन्ये इति । सम्प्रसारणं स्यादिति । 'व्यङः सम्प्रसारणम्' इत्यतस्तदनुवृत्तेरिति भावः । तथाच श्यैङः क्ते आत्वे सम्प्रसारणे पूर्वरूपे शि त इति स्थिते—श्योऽस्पर्शे । श्यः अस्पर्शे इति छेदः । दीर्घ इति । नत्वात्प्रागेव 'हलः' इति दीर्घं इत्युचितम्, नत्वस्य त्रैपादिकत्वात् । शीनं घृतमिति । घनीभूतमित्यर्थः । धातूनामनेकार्थत्वात् । यद्यपि घृतेऽप्यनुष्णस्पर्शोऽस्त्येव । तथापि शीतास्यस्पर्शविशेष एव विवक्षित इति भावः । अस्पर्शेकिमिति । श्यैङो निष्ठातस्य नत्वं स्यादित्येतावदेवास्त्वित्यर्थः । शीतं जलमिति । शीतस्पर्शवदित्यर्थः । अत्र 'द्रवमूर्ति' इति सम्प्रसारणमेव, नतु निष्ठानत्वमित्यर्थः । एवं च 'द्रवमूर्तिस्पर्शयोः' इत्यस्य स्पर्श इदमुदाहरणम् । 'श्योऽस्पर्शे' इत्यस्य तु प्रत्युदाहरणमिति बोध्यम् । सूत्रयोः स्पर्शशब्दः प्रधानभूते गुणभूते च वर्तते । तत्र गुणभूते विशेष्यनिघ्नः । शीताः आपः, शीतं जलमित्यादि । यदा तु स्पर्शविशेषो गुणः प्राधान्येन विवक्षितः, तदा क्लीबत्वमेव । 'शीतं गुणे' इत्यमरः । सम्प्रसारणविधौ पृच्छति—द्रवमूर्तिस्पर्शयोः किमिति । संश्यान इति । अत्र स्पर्शस्याऽप्रतीतेः न सम्प्रसारणम् । नत्वं तु भवत्येवेति भावः । प्रतेश्च । द्रवमूर्तिस्पर्शाभ्या-

पूर्वस्य ६।१।२६॥ श्यः सम्प्रसारणं वा स्यात्। अभिश्यानम्-अभिशीनं घृतम्। अवश्यानः-अवशीनो वृश्चिकः। व्यवस्थितविभाषेयम्। तेनेह न। समवश्यानः। ३०२४ **अश्नोऽनपादाने** ८।२।४८॥ अश्नो निष्ठातस्य नः स्यान्नत्वपादाने। ३०२५ **यस्य विभाषा** ७।२।१५॥ यस्य क्वचिद्विभाषयेड्विहितस्ततो निष्ठाया इण्न स्यात्। 'उदितो वा' (सू ३३२८) इति क्त्वायां वेट्त्वादिह नेट्। समक्नः। अनपादाने किम्। उदक्तमुदकं कूपात्। नत्वस्याऽसिद्धत्वात् 'व्रश्च—' (सू २९४) इति षत्वे प्राप्ते, 'निष्ठादेशः षत्वस्वरप्रत्ययेड्विधिषु सिद्धो वाच्यः' (वा ४७७३)। वृक्णः। वृक्णवान्। ३०२६ **परिस्कन्दः प्राच्यभरतेषु** ८।३।७५॥ पूर्वेण मूर्धन्ये प्राप्ते तदभावो निपात्यते। परिस्कन्दः। प्राच्य-इति किम्। परिष्कन्दः। परिस्कन्दः। 'परेश्च' (सू २३९९) इति षत्वविकल्पः। 'स्तन्भेः' (सू २२७२) इति षत्वे प्राप्ते-३०२७ **प्रतिस्तब्धनिस्तब्धौ च** ८।३।११४॥ अत्र

मन्यत्रापि सम्प्रसारणप्राप्त्यर्थमिदम्। प्रतिशीन इति। **प्रतिगत इत्यर्थः**। अत्र **'श्योऽस्पर्शे'** इति नत्वम्। विभाषा। **'श्यैङ'** इति शेषः। सम्प्रसारणं वा स्यादिति। शेषपूरणमिदम्। द्रवमूर्तिस्पर्शयोर्नित्यं सम्प्रसारणे प्राप्ते ततोऽन्यत्राप्राप्ते विभाषेयम्। अभिश्यानं घृतमिति। अत्र द्रवमूर्तौ सम्प्रसारणविकल्पः। अवश्यानः-अवशीनः वृश्चिक इति। अत्र द्रवमूर्तिस्पर्शाऽभावेऽपि सम्प्रसारणविकल्पः। **समवश्यान इत्यत्रापि** सम्प्रसारणविकल्पमाशङ्क्य आह—व्यवस्थितेति। अश्नोऽनपादाने। न त्वपादाने इति। **अपादानसमभिव्याहारे असतीत्यर्थः**। यस्य विभाषा। यस्येति। **यस्मादित्यर्थः**। निष्ठाया इण्न स्यादिति। **'श्वीदितः'** इत्यतो निष्ठायामिति **'नेड्वशि'** इत्यतो नेडिति चानुवर्तत इति भावः। नन्वञ्चेर्नित्यं सेटकत्वात् कथं तस्य क्वचिद्वेट्कत्वमित्यत आह—उदितो वेति। समक्त इति। **सङ्कुत इत्यर्थः**। सम्पूर्वात् अञ्चुधातोः क्तः 'आर्धधातुकस्येड्' इति प्राप्तस्य इटो निषेधः। 'अनिदिताम्' इति नलोपः। चस्य कुत्वम्। उदक्तमुदकं कूपादिति। **उद्धृतमित्यर्थः**। अत्राऽपादानसमभिव्याहारसत्त्वात् नत्वं नेति भावः। 'ओ व्रश्चू छेदने' अस्य श्चुत्वेन निर्देशः, अस्मात्क्तः, 'व्रश्चभ्रस्ज' इति सम्प्रसारणम्, ऊदित्त्वेन वेट्कत्वादिह 'यस्य विभाषा' इति नेट्, चस्य कुत्वेन कः, 'ओदितश्च' इति निष्ठानत्वं, तस्याऽसिद्धत्वेन झलपरत्वात् 'स्कोः' इति सलोपः, षत्वम्, वृक्ण इति रूपमिति स्थितिः। तत्र नत्वस्याऽसिद्धत्वेन झलपरत्वात् 'व्रश्च' इति षत्वं स्यादित्यत आह—निष्ठादेशः षत्वेति। तथा च 'व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः' इति षत्वे कर्तव्ये नत्वस्याऽसिद्धत्वाऽभावेन झलपरकत्वाऽभावान्न षत्वमित्यर्थः। स्वरप्रत्ययेड्विधिषूदाहरणानि भाष्ये स्पष्टानि। परिस्कन्दः प्राच्यभरतेषु। **'अपदान्तस्य मूर्धन्यः'** इत्यधिकारे इदं सूत्रम्। पूर्वेणेति। **'परेश्च'** इति पूर्वसूत्रम्। परेः परस्य स्कन्देः सस्य षो वा स्यादिति तदर्थः। तेन षत्वविकल्पे प्राप्ते प्राच्यभरतेषु

त्वं न स्यात्। ३०२८ **दिवोऽविजिगीषायाम्** ८।२।४६॥ दिवो निष्ठातस्य नः स्यादविजिगीषायाम्। द्यूनः। विजिगीषायां तु द्यूतम्। ३०२९ **निर्वाणोऽवाते** ८।२।५०॥ अवाते इतिच्छेदः। निःपूर्वाद्वातेर्निष्ठातस्य नत्वं स्याद्वातश्चेत्कर्ता न। निर्वाणोऽग्निर्मुनिर्वा। वाते तु निर्वातो वातः। ३०३० **शुषः कः** ८।२।५१॥ निष्ठात इत्येव। शुष्कः। ३०३१ **पचो वः** ८।२।५२॥ पक्वः ३०३२ **क्षायो मः** ८।२।५३॥ क्षामः। ३०३३ **स्त्यः प्रपूर्वस्य** ६।१।२३॥ प्रात् स्त्यः संप्रसारणं स्यान्निष्ठायाम्। ३०३४ **प्रस्त्योऽन्यतरस्याम्** ८।२।५४॥ निष्ठातस्य मो वा स्यात्। प्रस्तीमः। प्रस्तीतः। प्रात् किम्। स्त्यानः। ३०३५ **अनुपसर्गात्फुल्लक्षीबकृशोल्लाघाः** ८।२।५५॥ जि फला, फुल्लः निष्ठातस्य लत्वं निपात्यते। क्तवत्वेकदेशस्याऽपीदं

त्वाऽभावो निपात्यत इत्यर्थः। परिस्कन्द इति। परिपूर्वात् स्कन्देर्निष्ठायास्तकारलोपः। दिवो। 'अविजिगीषायामिति छेदः। द्यून इति। स्तुत इत्यर्थः। 'च्छ्वोः' इत्यूठ्। विजिगीषायां तु द्यूतमिति। द्यूतस्य विजिगीषया प्रवृत्तेरिति भावः। निर्वाणोऽवाते। कर्ता नेति। निरिग्युपसर्गपूर्वो वाधातुर्विनाशे वर्तते, उपरमे च। तस्मिन् धात्वर्थे यदि वायुः कर्ता तदा नत्वं नेत्यर्थः। निर्वाणोऽग्निर्मुनिर्वेति। नष्टः, उपरत इति क्रमेणार्थः। 'गत्यर्थाकर्मक' इत्यादिना कर्तरि क्तः। निर्वातो वात इति। अत्र वातस्य कर्तृत्वान्नत्वं नेति भावः। 'निर्वाणो दीपो वातेन' इत्यत्र तु वातस्य करणत्वेन विवक्षितत्वात्कर्तृत्वाऽभावात् नत्वं निर्बाधम्। भावे तु निर्वातं वातेन। शुषः कः। निष्ठात इति। शुषः परस्य निष्ठातस्य कः स्यादिति फलितम्। पचो वः। पचेः परस्य निष्ठातस्य वः स्यादित्यर्थः। पक्व इति। वत्वस्याऽसिद्धत्वात् कुत्वम्। क्षायो मः। 'क्षै क्षये' इत्यस्मात् परस्य निष्ठातस्य मः स्यादित्यर्थः। क्षाम इति। 'आदेचः' इत्यात्वम्। 'गत्यर्थाकर्मक' इति कर्तरि क्तः। क्षीण इत्यर्थः। अन्तर्भावितण्यर्थत्वे क्षपित इत्यर्थः। स्त्यः प्रपूर्वस्य। 'स्त्यै' इत्यस्य कृताऽऽत्वस्य 'स्त्य' इति षष्ठ्यन्तम्। 'व्यञः सम्प्रसारणम्' इत्यतः सम्प्रसारणमिति 'ष्ठ्यायः ष्ठ्यी' इत्यतो निष्ठायामिति चानुवर्तते। तदाह—प्रादिस्त्यादि। सम्प्रसारणे पूर्वरूपे 'इग्यणः' इति दीर्घे प्रस्ती त इति स्थिते—प्रस्त्योऽन्यतरस्याम्। प्रस्त्य इति पञ्चमी। प्रपूर्वात्स्त्यैधातोरित्यर्थः। 'निष्ठातस्य म' इति शेषः। प्रस्तीम इति। सङ्घीभूत इत्यर्थः। अनुपसर्गात्। एते निपात्यन्ते उपसर्गात् परा न चेदित्यर्थः। लत्वमिति। 'आदितश्च' इति इडभावः, 'ति च' इत्युरं च सिद्धमिति भावः। 'फल निष्पत्तौ' इत्यस्य तु नात्र ग्रहणम्, इडभावस्याऽपि निपात्यत्वापत्तेः। ननु क्तवतुप्रत्यये फुल्लवानिति कथम्। क्तवतुप्रत्यये फल्वाऽनर्थकत्वेन फुल्लशब्देनाऽग्रहणादित्यत आह—

निपातनमिष्यते । फुल्लवान् । क्षीबादिषु तु क्तप्रत्ययस्यैव तलोपः । तस्यासिद्धत्वात्प्राप्तस्येटोऽभावश्च निपात्यते । क्षीबो मत्तः । कृशस्तनुः । उल्लाघो नीरोगः । अनुपसर्गात् किम् ? ३०३६ **आदितश्च** ७।२।१६॥ आकारेतो निष्ठाया इण्न स्यात् । ३०३७ **ति च** ७।४।८१॥ चरफलोरत उत्स्यात्तादौ किति । प्रफुल्तः । प्रक्षीबितः । प्रकृशितः । प्रोल्लाघितः । कथं तर्हि 'लोध्रद्रुमं सानुमतः प्रफुल्लम्' इति । 'फुल्ल विकसने' पचाद्यच् । सूत्रं तु फुल्लादिनिवृत्त्यर्थम् । 'उत्फुल्लसंफुल्लयोरुपसंख्यानम्' (वा ४८४३) । ३०३८ **नुदविदोन्दत्राघ्राह्रीभ्योऽन्यतरस्याम्** ८।२।५६॥ एभ्यो निष्ठातस्य नो वा । नुन्नः । नुत्तः । विद विचारणे, रौधादिक एव गृह्यते । उन्दिना परेण साहचर्यात् । विन्नः । वित्तः । वेत्तेस्तु विदितः । विद्यतेर्विन्नः । उन्दी । ३०३९ **श्वीदितो निष्ठायाम्** ७।२।१४॥ श्वयतेरीदितश्च निष्ठाया इण्न । उन्नः । उत्तः । घ्राणः । घ्रातः । घ्राणः । घ्रातः । ह्रीणः । ह्रीतः । ३०४० **न ध्याख्यापॄमूर्च्छिमदाम्** ८।२।५७॥ एभ्यो निष्ठातस्य नत्वं न । ध्यातः ।

क्तवतोरेकदेशस्यापीति । क्षीबादिष्विति । **क्षीबकृशोल्लाघेष्वित्यर्थः** । क्तप्रत्ययस्यैवेति । **नतु क्तवतोरेकदेशस्यापीत्यर्थः । अनर्थकत्वादिति भावः** । तस्येति । **तलोपस्येत्यर्थः** । क्षीबो मत्त इति । **क्षीबेः क्तः, तलोपः, इडभावश्च** । कृशस्तनुरिति । **कृशेः क्तः, इडभावश्च** । उल्लाघो नीरोग इति । **लाघेः क्तः, तलोपः, इडभावश्च । अत्र मत्तादिरेवार्थः निपातनबलात्** । अनुपसर्गात्किमिति । **अत्र 'प्रफुल्त' इति प्रत्युदाहरणं विवक्षन् तत्र विशेषमाह**—आदितश्च । निष्ठाया इण्न स्यादिति । **'श्वीदितः' इत्यतो निष्ठायामिति 'नेड्वशि' इत्यतो नेडिति चानुवर्तते इति भावः** । ति च । **'चरफलोश्च' इति सूत्रानुवृत्तिं मत्वा आह**—चरफलोरिति । अत उत्स्यादिति । **'उत्परस्यातः' इत्यतस्तदनुवृत्तेरिति भावः** । किताति । **'दीर्घं इणः किति' इत्यतः मण्डूकप्लुत्या तदनुवर्तते इति भावः । वस्तुतस्तु कितीत्यनुवृत्तिर्निर्मूला, निष्फला च । तयोः सेट्कत्वेन निष्ठां विना तकारादिप्रत्ययाऽभावात्** । कथं तर्हीति । **प्रफुल्लमित्यस्य सोपसर्गत्वेन निष्ठातस्य क्तस्यासम्भवादिति भावः । समाधत्ते**—फुल्लेति । **ननु फुल्लेः पचाद्यचैव फुल्ल इत्यस्य सिद्धेः फुल्ल इत्यस्य निपातनं व्यर्थमित्यत आह**—सूत्रं त्विति । उत्फुल्लसम्फुल्लयोरिति । **'निष्ठातस्य क्तवनिपातन'मिति शेषः । सोपसर्गार्थं वचनम् । नुदविदोन्द । ह्रीभ्यो रप्राप्ते, इतरेभ्यो नित्यं प्राप्ते नत्वविकल्पोऽयम्** । रौधादिक इति । **'विद विचारणे' इत्यय-मित्यर्थः** । वेत्तेस्त्विति । **'विद ज्ञाने' इत्यस्येत्यर्थः । अयं सेट्, अनिट्केष्वनन्तर्भावात् । तदाह**—विदित इति । **अत्र निष्ठातस्य इटा व्यवहितत्वाच्चत्वं नेति भावः** । विद्यतेर्विन्न इति । **'विद सत्तायाम्' इत्ययमनिट् 'रदाभ्याम्' इति नित्यं नत्वमिति भावः** । उन्दीति । **उदाहरणसूचनम्** । श्वीदितो निष्ठायाम् । **श्वि, ईदित् अनयोः समाहारद्वन्द्वात्पञ्चमी । 'नेड्वशि' इत्यतो नेडित्यनुवर्तते तदाह**—श्वयतेरिति । न ध्याख्या । **पञ्च-**

ख्यातः। पूर्तः। 'राल्लोपः'। मूर्तः। मत्तः। ३०४१ **वित्तो भोगप्रत्यययोः** ४।२।५८॥ विन्दतेर्निष्ठान्तस्य निपातोऽयं भोग्ये प्रतीते चार्थे। वित्तं धनम्। वित्तः पुरुषः। अनयोः किम्-विन्नः। 'विभाषा गमहन-' (सू ३०६६)। इति क्त्वौ वेट्कत्वादिह नेट्। ३०४२ **भित्तं शकलम्** ८।२।५६॥ भिन्नमन्यत्। ३०४३ **ऋणमाधमर्ण्ये** ८।२।६०॥ ऋधातोः क्ते तकारस्य नत्वं निपात्यते आधमर्ण्यव्यवहारे। ऋतमन्यत्। ३०४४ **स्फायः स्फी निष्ठायाम्** ६।१।२२॥ स्फीतः। ३०४५ **इण्निष्ठायाम्** ७।२।४७॥ निरः कुषो निष्ठाया इट् स्यात्। 'यस्य विभाषा'

र्थे षष्ठी। तदाह—एषस्य इति। ख्यात इति। ख्येधातोः क्तः 'आदेचः' इत्यात्वम्। अत्र 'संयोगादेरातः' इति प्राप्तं नत्वं न। ख्यात इति। ख्याआदेशपक्षे यण्वत्त्वात् 'संयोगादेरातः' इति प्राप्तं नत्वं न। ख्यादेशस्य आस्य यत्वे तु यस्य यत्वप्रकरणगतस्याऽसिद्धत्वाद्यण्वत्त्वाऽभावात् 'संयोगादेरातः' इति नत्वस्य न प्रसक्तिः। स्वतः सिद्धख्याधातोस्तु आर्धधातुके प्रयोगो नास्त्येवेति ख्याग्रहणं व्यर्थमेव। पूर्त इति। पृधातोः क्तः 'श्रयुकः किति' इति नेट् 'उदोष्ठ्यपूर्वस्य' इति उत्त्वं, रपरत्वम्, इह 'रदाभ्याम्' इति प्राप्तं नत्वं न। मुर्छाधातोः क्ते आह—राल्लोप इति। छस्य लोप इति भावः। मूर्त इति। 'आदितश्च' इति नेट्। छलोपे 'रदाभ्याम्' इति प्राप्तं नत्वं न। 'हलि च' इति दीर्घः। मत्त इति। 'मदी हर्षग्लेपनयोः' अस्मात् क्तः 'श्वीदितः' इति नेट्। अत्र 'रदाभ्याम्' इति प्राप्तं नत्वं न। वित्तो भोग। भुज्यत इति भोगः भोग्यम्। प्रतीयते इति प्रत्ययः प्रख्यातः। अत्र विन्दतेरेव ग्रहणमिति भाष्ये स्पष्टम्। तदाह—विन्दतेरिति। निपातोऽयमिति। 'नुदविदोन्द' इति प्राप्तस्य पाक्षिकनत्वस्य अभावनिपातनमित्यर्थः। तस्य भोगप्रत्यययोः कदाऽपि नत्वं नेत्यर्थः। प्रतीते इति। प्रख्याते इत्यर्थः। वित्तः पुरुष इति। प्रख्यात इत्यर्थः। विन्न इति। लब्धश्चोरादिरित्यर्थः। अत्र 'यस्य विभाषा' इति इण्निषेधमुपपादयति—विभाषा गमेति। 'एकाच' इति निषेधाच्चेत्यपि बोध्यम्। भित्तं शकलम्। शकले वाच्ये भिदेः क्तस्य नत्वाऽभावो निपात्यते। शकलत्वजातिविशिष्टे अवयवार्थमनपेक्ष्य रूढोऽयम्। ततश्च भिन्नशकलयोः पर्यायत्वान्न सहप्रयोगः। भिदिक्रियाविवक्षायां तु 'भित्तं भिन्न' मिति भवतीति भाष्ये स्पष्टम्। ऋणमाधमर्ण्ये। अधमर्णस्य कर्म आधमर्ण्यम्। आधमर्ण्यव्यवहारे इति। स च अन्यदीयं द्रव्यं गृहीतमियता कालेन इयत्या वृद्ध्या प्रतिदीयते इति संविद्रूपः, तस्मिन्विषये इत्यर्थः। ऋतमन्यदिति। सत्यमित्यर्थः। स्फायः स्फी। 'स्फायीवृद्धौ' अस्य स्फीभावः स्यात् निष्ठायां परत इत्यर्थः। इण्निष्ठायाम्। 'निरः कुषः' इति सूत्रमनुवर्तते। तदाह—निर इति। नन्वेतत् 'आर्धधातुकस्येड्' इत्येव सिद्धे किमर्थमिदं सूत्रमित्यत आह—यस्येति। कुषधातोः तृजादौ 'निरः कुषः' इति पूर्वसूत्रेण वेट्कत्वात् 'यस्य विभाषा' इति प्राप्तस्येण्निषेधस्य बाधनार्थं पुनरिह विधानमित्यर्थः।

(सू ३०२५) इति निषेधे प्राप्ते पुनर्विधिः । निष्कुषितः । **३०४६ वसतिक्षुधोरिट् ७।२।५२॥** आभ्यां क्त्वानिष्ठयोर्नित्यमिट् स्यात् । उषितः । क्षुधितः । **३०४७ अञ्चेः पूजायाम् ७।२।५३॥** पूजार्थादञ्चेः क्त्वानिष्ठयोरिट् स्यात् । अञ्चितः । गतौ तु अक्तः । **३०४८ लुभो विमोहने ७।३।५४॥** लुभः क्त्वानिष्ठयोर्नित्यमिट् स्यान्न तु गार्ध्ये । लुभितः । गार्ध्ये तु, लुब्धः । **३०४९ क्लिशः क्त्वानिष्ठयोः ७।२।५०॥** इड्वा स्यात् 'क्लिश उपतापे' अस्य नित्यं प्राप्ते 'क्लिशू विबाधने' अस्य क्त्वायां विकल्पे सिद्धेऽपि निष्ठायां निषेधे प्राप्ते विकल्पः । क्लिशितः । क्लिष्टः । **३०५० पूङश्च ७।२।५१॥** पूङः क्त्वानिष्ठयोरिड्वा स्यात् । **३०५१ पूङः क्त्वा च १।२।२२॥** पूङः क्त्वा निष्ठा च सेट् किन्न स्यात् । पवितः । पूतः । क्त्वाग्रहणमुत्तरार्थम् । 'नोपधात्—' (सू ३३२४) इत्यत्र हि

इडित्यनुवर्तमाने पुनरिड्ग्रहणं तु 'स्वरतिसूति' इत्यतो वाग्रहणानुवृत्तिनिवृत्तये । वसतिक्षुधोरिट् । पञ्चम्यर्थे षष्ठी । क्त्वानिष्ठयोरिति । **'क्लिशः क्त्वानिष्ठयोः' इत्यतः तदनुवृत्तेरिति भावः ।** नित्यमिति । **इडित्यनुवर्तमाने पुनरिड्ग्रहणस्य 'स्वरतिसूति' इत्यतो वाग्रहणानुवृत्तिनिवृत्त्यर्थत्वादिति भावः । 'एकाच उपदेश' इति इण्निषेधबाधनार्थमिदं सूत्रम् ।** ङावत इति । **यजादित्वात् सम्प्रसारणम्, 'शासिवसिघसीनां च' इति षः ।** अञ्चेः पूजायाम् । **'उदितो वा' इति क्त्वायां विकल्पे प्राप्ते निष्ठायां तु 'यस्य विभाषा' इति निषेधे प्राप्ते वचनम् ।** अञ्चित इति । **'नाञ्चेः पूजायाम्' इति नलोपनिषेधः ।** लुभो विमोहने । **'लुभ' इति पञ्चमी । 'लुभ विमोहने' तुदादिः । 'विमोहनं व्याकुलीकरण'मिति वृत्तिः । 'लुभ गार्ध्ये' दिवादिः । अत्र तौदादिकस्यैव ग्रहणम्, तस्यैव विमोहनार्थकत्वात् । ननु दैवादिकस्य, तस्य गार्ध्यार्थकत्वात् । तदाह**—न तु गार्ध्ये इति । **'तीषसह' इति क्त्वायां विकल्पे प्राप्ते निष्ठायां तु 'यस्य विभाषा' इति निषेधे प्राप्ते वचनम् ।** लुभित इति । **विमोहित इत्यर्थः ।** गार्ध्ये तु लुब्ध इति । **अभिकाङ्क्षावानित्यर्थः । 'मतिबुद्धिपूजार्थेभ्यश्च' इति कर्तरि क्तः ।** क्लिशः क्त्वानिष्ठयोः । **'इड्वा स्या'दिति शेषः । 'स्वरतिसूति' इत्यतो वेत्यनुवृत्तेरिति भावः ।** नित्यं प्राप्ते इति । **'आर्धधातुकस्येड्वलादेः' इत्यनेनेति भावः ।** विकल्पे सिद्ध इति । **ऊदिदित्वादिति भावः ।** निष्ठायां निषेधे प्राप्ते इति । **'यस्य विभाषा' इत्यनेनेति भावः ।** पूङश्च । क्त्वानिष्ठयोरिति । **'क्लिशः क्त्वानिष्ठयोः' इत्यतस्तदनुवृत्तेरिति भावः ।** इड्वेति । **'स्वरतिसूति' इत्यतः वाग्रहणस्य 'इण्निष्ठायाम्' इत्यतः इट् इत्यस्य चाऽनुवृत्तेरिति भावः । 'श्रयुकः' इति निषेधे प्राप्ते विकल्पोऽयम् ।** पूङः क्त्वा च । **'न क्त्वा सेट्' इत्यतो न सेट् इत्यनुवर्तते । 'असंयोगात्' इत्यतः किदिति 'निष्ठा शीङ्' इत्यतो निष्ठेति च । तदाह—पूङः क्त्वा निष्ठा चेत्यादि । ननु 'न क्त्वा सेट्' इत्येव सिद्धे किमर्थमिह क्त्वाग्रहणमित्यत आह—क्त्वाग्रहणमुत्तरार्थमिति । तदेवोपपादय-**

क्त्वैव सम्बध्यते। ३०५२ निष्ठा शीङ्स्विदिमिदिघ्विदिधृषः १।२।१६॥ एभ्यः सेण्निष्ठा किन्न स्यात्। शयितः। शयितवान्। अनुबन्धनिर्देशो यङ्लुङ्निवृत्त्यर्थः। शेश्यितः। शेश्यितवान्। 'आदिकर्मणि निष्ठा वक्तव्या' (वा २०५१) ३०५३ आदिकर्मणि क्तः कर्तरि च ३।४।७१॥ आदिकर्मणि यः क्तः स कर्तरि स्यात्। चाद्भावकर्मणोः। ३०५४ विभाषा भावादिकर्मणोः ७।२।१७॥ भावे आदिकर्मणि च आदितो निष्ठाया इड्वा स्यात्। प्रस्वेदितश्चैत्रः। प्रस्वेदितं तेन। 'ञि ष्विदा' इति भ्वादिरत्र गृह्यते, श्नीद्भिः साहचर्यात्। स्विद्यतेस्तु स्विदितः इत्येव। 'ञि मिदा' 'ञि ष्विदा' दिवादी भ्वादी च। प्रमेदितः। प्रमेदितवान्। प्रष्वेदितः। प्रष्वेदितवान्। प्रधर्षितः। प्रधर्षितवान्। धर्षितं तेन। सेट् किम्। प्रस्विन्नः। प्रस्विन्नं तेनेत्यादि। ३०५५ मृषस्तितिक्षायाम् १।२।२०॥ सेण्निष्ठा किन्न स्यात्। मर्षितः। मर्षितवान्। तितिक्षायां किम्।

र्थति—नोपधादित्यत्रेति। तत्र हि क्त्वाप्रत्ययस्यैवानुवृत्तिरिहा 'पूङश्च' इत्येवौ तु 'निष्ठा शीङ्' इत्यतो निष्ठाग्रहणमेवाऽनुवर्तेतेति। भावः। निष्ठा शीङ्। 'न क्त्वा सेट्' इत्यतः न सेडित्यनुवर्तते। 'असंयोगात्' इत्यतः किदिति च। तदाह—एभ्य. सेडिति। शीङिति ङकारस्य पञ्चमाह—अनुबन्धेति। यङ्लुकि 'शितपा रूपा' इति निषेधार्थं इत्यर्थः। शेश्यितवानिति। अत्र कित्त्वनिषेधाऽभावात् किन्वाच्च गुण इति भावः। आदिकर्मणि निष्ठा वक्तव्येति। दीर्घकालव्याप्तायाः कटादिनिष्पादनक्रियायाः आरम्भकालविशिष्टोऽयः आदिकर्म। तत्र विद्यमानाद्धातोर्निष्ठा वक्तव्येत्यर्थः। तत्र आदेषु त्रिषाक्षणेषु भूतेष्वपि क्रियाया भूतत्वाऽभावात् भूते विहिता निष्ठा न प्राप्ते रित्यारम्भः। आदिकर्मणि क्तः कर्तरि च। चाद्भावकर्मणोरिति। 'तयोरेव कृत्य' इत्यतस्तदनुवृत्तेरिति भावः। 'प्रकृतः कट देवदत्तः, प्रकृतवान् कटं देवदत्तः' इति भाष्ये उदाहृतम्। आरभ्यमाणकरणक्रियेति बोधः। विभाषाभावादिकर्मणोः। आदितो निष्ठाया इड्वेति। आदितश्च' इत्यतः आदित इति 'श्वीदितः' इत्यतः निष्ठाग्रहणं 'नेड्वशि' इत्यतो नेति चानुवर्तते इति भावः। निषेधस्य वैकल्पिकत्वात्पक्षे इडभ्यनुज्ञायते। प्रस्वेदितश्चैत्र इति। चैत्रकर्तृका आरभ्यमाणप्रस्वेदनक्रियेत्यर्थः। श्नीद्भिरिति। ञिः इत् येषां ते श्नीतः, तैर्मिदप्रभृतिभिरिति तदर्थः, स विषयः किन्त्वप्रतिषेधस्येति बोध्यम्। स्विद्यतेस्त्विति। 'ञि ष्विदा गात्रप्रक्षरणे' इति देवादिकस्यैव किन्त्वनिषेधविधौ ग्रहणमित्यर्थः। स्विद्यतः इति। 'विभाषा भाव' इति पक्षे इट्। किन्त्वनिषेधविधौ स्विद्यतेर्ग्रहणाऽभावात् किन्वाच्च गुणः। अत्र स्विदादीनाम् 'आदितश्च' इति इट् प्रतिषिध्यते। भावादिकर्मणोस्तु पक्षे इट्। मृषास्तितिक्षायाम्। तितिक्षा क्षमा। सेण्निष्ठा किन्नेति। शेषपूरणमिदम्। 'निष्ठा शीङ्' इत्यतो निष्टेति 'न क्त्वा सेट्' इत्यतः सेण्नेति, 'असंयोगात्' इत्यतः

अपमृषितं वाक्यम् । अविस्पष्टमित्यर्थः । **३०५६ उदुपधाद्भावादिकर्मणोरन्यतरस्याम् १।२।२१॥** उदुपधात्परा भावादिकर्मणोः सेण्निष्ठा वा किन्न स्यात् । द्युतितम्-द्योतितम् । मुदितं-मोदितं साधुना । प्रद्युतितः-प्रद्योतितः साधुश्च । प्रमुदितः-प्रमोदितः साधुः । उदुपधात् किम् । विदितम् । भाव-इत्यादि किम् । रुचितं कार्षापणम् । सेट् किम् । क्रुष्टम् । 'शब्विकरणेभ्य एवेष्यते' (वा ६२६) । नेह । गुध्यतेर्गुधितम् । **३०५७ निष्ठायां सेटि । ६।४।५२॥** णेर्लोपः स्यात् । भावितः । भावितवान् । 'श्वीदितः-' (सू ३०३९) इति नेट् । सम्प्रसारणम् । शूनः । दंसः । गुहू, गूढः । वनु, वतः । तनु, ततः । पतेः सनि वेट्कत्वादिडभावे प्राप्ते 'द्वितीया श्रित-' (सू ६८६) इति सूत्रे निपातनादिट् । पतितः । 'सेऽसिचि' (सू २५०६) इति वेट्कत्वात्सिद्धे कृन्तत्यादीनामीदित्त्वेनानित्य-

---

क्तिदिति चानुवर्तत इति भावः । उदुपधाद्भावादिकर्मणोः । भावे उदाहरति—मुदितमित्यादि । आदिकर्मण्युदाहरति—प्रद्युतितः प्रद्योतितः साधुरिति । आदिकर्मणि कर्तरि क्तः । उदुपधात्किम् । विदितमिति । 'विद ज्ञाने' इति वेत्तेः रूपम् । गुध्यतेर्गुधितमिति । 'गुध परिवेष्टने' दिवादिः सेट्कः । निष्ठायां सेटि । णेर्लोपः । स्यादिति । शेषपूरणमिदम् । 'णेरनिटि' इत्यतो णेरिति 'आतो लोपः' इत्यस्मादाल्लोप इति चानुवर्तते इति भावः । 'अनिटी'ति निषेधादप्राप्ते आरम्भः । 'टु ओ श्वि गतिवृद्धयोः' । अस्मात् क्त इत्याह—श्वीदित इति नेडिति । सम्प्रसारणमिति । यजादित्वादिति भावः । सम्प्रसारणे सति पूर्वरूपे 'हलः' इति दीर्घे 'ओदितश्च' इति निष्ठानत्वे रूपमाह—शून इति । यद्यपि मूले 'ओदितश्च' इत्यत्र उच्छून इत्युदाहृतमेव, तथापि विशेषविवक्षया पुनरिहोपन्यासः । अत्र अश्विघिरित्येऽपि 'हल' इत्यारभ्यसामर्थ्यादेव पूर्वरूपस्य सम्प्रसारणस्यम् । न च नित्यत्वात्सम्प्रसारणपूर्वरूपयोः 'श्नुयुकः किति' इत्येव निषेधसिद्धेः । शिवग्रहणं व्यर्थमिति वाच्यम् । 'श्नुयुकः किति' इत्यत्र 'एकाच उपदेशे' इत्यतः उपदेशे इत्यनुवृत्तेः । तथाच उपदेशे उगन्तत्वाऽभावात् निषेधाऽप्राप्तौ शिवग्रहणम् । अत एव 'स्तीर्त्व' इत्यादौ उपदेशे उगन्तत्वमादाय इण्निषेधसिद्धिरित्यलम् । ईदित उदाहरति—दीन इति । 'दीपी दीप्तौ' दिवादिः । ईदित्त्वान्नेट् । गूढ इति । ऊदित्त्वेन वेट्कत्वात् 'वस्य विभाषा' इति नेट् । ढत्वधत्वष्टुत्वढलोपदीर्घाः । वनु वतः । तनु ततः इति । 'ऊदितो वा' इति क्त्वायां वेट्कत्वात् 'वस्य विभाषा' इति नेट् । 'अनुदात्तोपदेश' इति नकारलोपः । पतेः सनीति । 'पत्लृ गतौ' अस्य 'तनिपतिदरिद्रातामुपसङ्ख्यानम्' इति सनि वेट्कत्वात् 'वस्य विभाषा' इति निष्ठायामिण्निषेधे प्राप्ते इत्यर्थः । 'पतित'शब्दे इटं साधयितुं युक्त्यन्तरमाह—सेऽसिचीति । 'कृती छेदने' 'वृती हिंसाग्रन्थनयोः' 'नृती गात्रविक्षेपे' एषामीदित्त्वं 'श्वीदितः' इति

त्वज्ञापनाद्वा । तेन 'धावितमिभराजधिया' इत्यादि । 'यस्य विभाषा' (सू ३०२५) इत्यत्रैकाच इत्येव । दरिद्रितः । **३०५८ क्षुब्धस्वान्तध्वान्तलग्नम्लिष्टविरिब्धफाण्टबाढानि मन्थमनस्तमःसक्ताविस्पष्टस्वरानायासभृशेषु ७।२।१८॥** क्षुब्धादीन्यष्टावनिटकानि निपात्यन्ते समुदायेन मन्थादिषु वाच्येषु । द्रवद्रव्यसम्पृक्तः सक्तवो मन्थः, मन्थनदण्डश्च । क्षुब्धो मन्थश्चेत् । स्वान्तं मनः । ध्वान्तं तमः । लग्नं सक्तम् । निष्ठानत्वमपि निपातनात् । म्लिष्टमविस्पष्टम् । विरिब्धः स्वरः । म्लेच्छ, रेभृ अनयोरुपधाया इत्वमपि निपात्यते । फाण्टम् अनायाससाध्यः कषायविशेषः । माधवस्तु नवनीत-

---

इण्निषेधार्थमिति वक्तव्यम् । तत्तु न सम्भवति । एषां 'सेऽसिचि कृतचृतछृदतृदनृतः' इति सकारादौ वेट्कृतया 'यस्य विभाषा' इत्येव निष्ठायां नित्यमिण्निषेधसिद्धेः । ततश्च एषामीदित्करणात् 'यस्य विभाषा' इति इण्निषेधस्य अनित्यत्वं विज्ञायते । एवञ्च कृतादीनां 'यस्य विभाषा' इति इण्निषेधस्य अभावसम्भावनायां 'श्वीदितः' इण्निषेधार्थमीदित्त्वमर्थवत् । तथा च पतितशब्दे 'यस्य विभाषा' इत्यनित्यत्वाच्च भवतीत्यर्थः । तेनेति । 'यस्य विभाषा' इत्यस्याऽनित्यत्वज्ञापनेनेत्यर्थः । धावितमिति । 'स्वरतिसूति' इति धूञो वेट्कत्वेऽपि 'यस्य विभाषा' इति इण्निषेधो नेति भावः । नन्वु दरिद्राधातोः 'तनिपतिदरिद्राणामुपसङ्ख्यानम्' इति सनि वेट्कत्वात् 'यस्य विभाषा' इति निष्ठायामिण्निषेधः स्यादित्यत आह—यस्य विभाषेत्यत्रेति । क्षुब्धस्वान्त । क्षुब्ध, स्वान्त, ध्वान्त, लग्न, म्लिष्ट, विरिब्ध, फाण्ट, बाढ एषामष्टानां द्वन्द्वात्प्रथमाबहुवचनम् । मन्थ, मनः, तमः, सक्त, अविस्पष्ट, स्वर, अनायास, भृश एषामष्टानां द्वन्द्वात्सप्तमी । यथासङ्ख्यमन्वयः । समुदायेनेति । मन्थादिष्वेते रूढाः । अवयवार्थाऽभिनिवेशो न कर्तव्य इत्याह—द्रवद्रव्येति । अत्र याज्ञिकप्रसिद्धिरेव शरणीकर्तव्या । मन्थनदण्डश्चेति । 'वैशाखमन्थमन्थानमन्थानो मन्थदण्डके' इत्यमरः । क्षुब्ध इति । 'क्षुभ सञ्चलने' अस्मात् क्तः, इडभावो निपात्यते । 'झषस्तथोः' इति धः, जश्त्वम् । स्वान्तमिति । स्वनधातोः क्तः । 'अनुनासिकस्य क्वि' इति दीर्घः, निपातनान्नेट् । 'स्वान्तं हृन्मानसं मनः' इत्यमरः । ध्वान्तं तम इति । ध्वनेः क्तः । 'अनुनासिकस्य क्वि' इति दीर्घः । 'अन्धकारोऽस्त्रियां ध्वान्तं तमिस्रं तिमिरं तमः' इत्यमरः । लग्नं सक्तमिति । सम्बद्धमित्यर्थः । लगेः क्तः, इडभावः । तत्र रदाभ्यां परत्वाऽभावात् कथं निष्ठानत्वमित्यत आह—निष्ठानत्वमपि निपातनादिति । म्लिष्टमविस्पष्टमिति । इडभावे 'व्रश्च' इति षः । तकारस्य ष्टुत्वेन टः । 'अथ म्लिष्टमविस्पष्टम्' इत्यमरः । विरिब्धः स्वर इति । स्वरविशेष इत्यर्थः । 'रेभृ शब्दे' अस्मात् क्तः, इडभावे 'झषस्तथोर्धोऽध' इति धः । उभयत्र धातुस्वरूपं प्रदर्शयन् आह—म्लेच्छ रेभृ अनयोरिति । इत्वमपीति । इडभावश्चेत्यर्थः । फाण्टमिति । फणेः क्तः, इडभावः, निष्ठातस्य टत्वं च निपात्यते ।

भावात्प्रागवस्थापन्नं द्रव्यं फाण्टमिति वेदभाष्ये आह । बाढं भृशम् । अन्यत्र तु क्षुभितम् । 'क्षुब्धो राजा' इति त्वागमशास्त्रस्यानित्यत्वात् । स्वनितम् । ध्वनितम् । लगितम् । म्लेच्छितम् । विरेभितम् । फणितम् । बाहितम् ।

३०५९ **धृषिशसी वैयात्ये** ७।२।१६॥ एतौ निष्ठायामविनय एवानिटौ स्तः । धृष्टः । विशस्तः । अन्यत्र धर्षितः । विशसितः । भावादिकर्मणोस्तु वैयात्ये धृषिर्नास्ति । अत एव 'नियमार्थमिदं सूत्र'मिति वृत्तिः । धृषेरादित्वे फलं चिन्त्यमिति हरदत्तः । माधवस्तु भावाऽऽदिकर्मणोरवैयात्ये विकल्पमाह । धृष्टम्-धर्षितम् । प्रधृष्टः-प्रधर्षितः । ३०६० **दृढः स्थूलबलयोः** ७।२।२०॥ स्थूले बलवति च

तस्याऽसिद्धत्वात् 'अनुनासिकस्य' इति दीर्घः । 'अनायासकृतं फाण्टम्' इत्यमरः । वृत्तिकृन्मतमाह—कषायविशेष इति । 'यदश्नतमपिष्टं च कषायमुदकसंसर्गमात्राद्विभक्तरसमीषदुष्णं तत्फाण्टमित्युच्यते' इति वृत्तौ स्थितम् । वेदभाष्ये आहेति । 'तद्वै नवनीतं भवति । घृतं वै देवानां फाण्टं 'मनुष्याणाम्' इति शतपथब्राह्मणव्याख्यावसरे आहेत्यर्थः । बाढं भृशमिति । 'बाह प्रयत्ने' अस्मात् क्तः, हूडभावः, ढत्वधत्वष्टुत्वढलोपाः । अन्यत्र क्षिति । मन्थादेर्वाक्यस्वाऽभाव इत्यर्थः । धृषिशसी । वियातः अविनीतः, तस्य भावः वैयात्यम् । तत्र 'नि ध्वा प्रागल्भ्ये' इत्यस्य आदित्वादेत्वेणिनिषेधः सिद्धः । 'शसु हिंसायाम्' इत्यस्य तु 'उदितो वा' इति कत्वायां वेट्कत्वात् 'यस्य विभाषा' इति इण्निषेधः सिद्धः । अतो नियमार्थमित्याह—अविनय एवेति । धृष्टः विशस्त इति । अविनीत इत्यर्थः । अन्यत्रेति । वैयात्याऽभावे इत्यर्थः । धर्षित इति । बलात्कृत इत्यर्थः । विशसित इति । हिंसित इत्यर्थः । अत्र वैयात्याऽभावादिण्निषेधो नेति भावः । ननु धृषेरादित्वात् 'विभाषा भावादिकर्मणोः' इति भावे आदिकर्मणि च इडविकल्पे प्राप्ते तदंशे नित्यार्थोऽत्र विधिरस्तु । ततश्च भावादिकर्मभ्यामन्यत्र वैयात्याऽभावेऽपि 'आदितश्च' इति इण्निषेध एव स्यादित्यत आह—भावादिकर्मणोरिति । नास्तीति । अनभिधानादिति भावः । तत्र वृद्धसम्मतिमाह—अत एवेति । भावकर्मणोर्धृषेरनभिधानादेवेत्यर्थः । अन्यथा धृषेरादित्वात् 'विभाषा भावादिकर्मणोः' इति भावे आदिकर्मणि च इडविकल्पे प्राप्ते तदंशे नित्यार्थतया विधानार्थत्वापत्तेरिति भावः । चिन्त्यमिति । धृषेरादित्वं हि न वैयात्ये आदित्वलक्षणेण्निषेधार्थम्, 'धृषिशसी वैयात्ये' इत्येव सिद्धेः । नापि वैयात्यादन्यत्र आदित्वलक्षणेण्निषेधार्थम्, धृषेर्वैयात्य एव इण्निषेधनियमेन ततोऽन्यत्र आदित्वलक्षणनिषेधाऽभावात् । नापि धृषेर्वैयात्ये भावादिकर्मणोर्विषये 'विभाषा भावादिकर्मणोः' इति इडविकल्पार्थम्, भावादिकर्मणोर्वैयात्ये धृषेरनभिधानात् । तस्मादृधृषेरादित्वं व्यर्थमिति हरदत्त आहेत्यर्थः । माधवस्त्विति । अवैयात्ये भावादिकर्मणोरनभिधाने प्रमाणाऽभावादिति भावः । तत्र अवैयात्ये भावे उदाहरति-धृष्टम् धर्षितमिति । आदिकर्मण्यु-

निपात्यते। 'दृह दृहि वृद्धौ'। क्तस्येडभावः, तस्य ढत्वम्, हस्य लोपः, इदितो नलोपश्च। दृढितः। दृंहितीऽन्यः। **३०६१ प्रभौ परिवृढः ७।२।२१॥** 'बृह बृद्धि वृद्धौ'। निपातनं प्राग्वत्। परिबृढितः। परिबृंहितोऽन्यः। **३०६२ कृच्छ्रगहनयोः कषः ७।२।२२॥** कषो निष्ठाया इग्न स्यादेतयोरर्थयोः। कष्टं दुःखं तत्कारणं च। 'स्यात्कष्टं कृच्छ्रमाभीलम्'। कष्टो मोहः। कष्टं शास्त्रम्। दुरवगाहमित्यर्थः। कषितमन्यत्। **३०६३ घुषिरविशब्दने ७।२।२३॥** घुषिर्निष्ठायामनिट् स्यात्। घुष्टा रज्जुः। अविशब्दने किम्। घुषितं वाक्यम्। शब्देन प्रकटीकृताऽभिप्रायमित्यर्थः। **३०६४ अर्देः संनिविभ्यः ७।२।२४॥** एतत्पूर्वादर्देर्निष्ठाया इग्न स्यात्। समर्णः। न्यर्णः। व्यर्णः। अर्दितोऽन्यः। **३०६५ अभेश्चाविदूर्ये ७।२।२५॥** अभ्यर्णम्। नाऽतिदूरमासन्नं वा। अभ्यर्दितमन्यत्। **३०६६ णेरध्ययने वृत्तम् ७।२।२६॥** ण्यन्ताद्वृतेः क्तस्येडभावो णिलुक्चाधीयमानेऽर्थे। वृत्तं छन्दः, छात्रेण संपादितम्, अधीतमिति यावत्। अन्यत्र तु वर्तिता रज्जुः। **३०६७ श्रुतं पाके ६।१।२७॥** श्रातिश्रपयत्योः क्ते श्रृभावो

दाहरति—प्रधृष्टः प्रघर्षित इति। दृढः स्थूलबलयोः। बलशब्दः अर्शआद्यजन्तः बलवत्परः। तदाह—बलवति चेति। तस्येति। निष्ठातकारस्य ढत्वं निपात्यते इत्यर्थः। हस्य लोप इति। 'निपात्यते' इति शेषः। इदित इति। अनिदितस्तु नलोपः सिद्ध एवेति भावः। ननु हस्य ढत्वे कृते 'झषस्तथोर्धोऽधः' इति तकारस्य धत्वे तस्य ष्टुत्वेन 'ष्टुना ष्टुः' इति ढलोपे ढढ इति सिद्धम्। ततश्च इदभाव एव निपात्यताम्, न तु हकारलोपो ढत्वं चेति चेत्? मैवम्। तथाहि सति दृढीयानित्यादौ ढलोपस्याऽसिद्धत्वेन ऋकारस्य संयोगपरतया लघुत्वाऽभावात् 'रऋतो हलादेर्लघोः' इति रभावो न स्यात्। अत्र हकारलोपस्य ढत्वस्य च निपातने तु ऋकारस्य न संयोगपरकत्वम्। अस्य हलोपस्य साङ्गमिकत्वेन असिद्धत्वाऽभावादिति भाष्ये स्पष्टम्। प्रभौ परिवृढः। प्राग्वदिति। तकारढत्वस्य हलोपस्य चेत्यर्थः। कृच्छ्रगहनयोः। कृच्छ्रशब्दो दुःखे तत्कारणे च वर्तते। कष्टं दुःखं तत्कारणं चेति। 'स्यात् कष्टं कृच्छ्रमाभीलम्' इत्यमरकोशवाक्यम्। दुःखकारणे उदाहरति—कष्टो मोह इति। गहने उदाहरति—कष्टं शास्त्रमिति। गहनशब्दं विवृणोति—दुरवगाहमिति। घुषिरविशब्दने। घुष्टा रज्जुरिति। उत्पादितेत्यर्थः। आयामितेति वा। शब्देन अभिप्रायप्रकाशनं विशब्दनम्। तदाह—शब्देनेति। अर्देः सन्निविभ्यः। समर्ण इति। सम् अर्द् त इति स्थिते 'रदाभ्याम्' इति निष्ठातस्य पूर्वदकारस्य च नत्वम्, णत्वम्। अभेश्चाविदूर्ये। अविदूरस्य भावः आविदूर्यम्। तस्मिन् गम्ये अभेः परः अर्दिरिनिट्क इत्यर्थः। सामीप्य इत्येव तु नोक्तम्। अनतिदूरस्य असङ्ग्रहापत्तेः। तत्सूचयन्नाह—नातिदूरमिति। णेरध्ययने। णिलुक् चेति। णि-

निपात्यते क्षीरहविषोः पाके। श्रृतं क्षीरं, स्वयमेव विक्लिन्नं पक्वं वेत्यर्थः। क्षीरहविर्भ्यामन्यत्तु श्राणं। श्रपितं वा। ३०६८ वा दान्तशान्तपूर्णदस्तस्पष्टच्छन्नज्ञप्ताः ७।२।२७॥ एते णिचि निष्ठान्ता वा निपात्यन्ते। पक्षे, दमितः। शमितः। पूरितः। दासितः। स्पाशितः। छादितः। ज्ञापितः। ३०६९ रुष्यमत्वरसंघुषास्वनाम् ७।२।२८॥ एभ्यो निष्ठाया इड्वा स्यात्। रुष्टः। रुषितः। आन्तः। अमितः। तूर्णः। त्वरितः। अस्याऽऽदित्वे फलं

लोपे तु लघूपधगुणः स्यादिति भावः। अधीयमान इति। सूत्रे अध्ययनशब्दः कर्मणि ल्युडन्त इति भावः। श्रृतं पाके। 'श्रा पाके' घटादिः। तस्माद्धेतुमण्णिचि पुकि मित्त्वाद्ध्रस्वे श्रपि इति भवतीति स्थितिः। श्रातिश्रपयत्योरिति। अण्यन्तस्य ण्यन्तस्य च श्राधातोरित्यर्थः। क्षीरहविषोरिति। एतच्च वार्तिकाभ्यां लभ्यते। अण्यन्तं व्याचष्टे—स्वयमेव विक्लिन्नमिति। श्राधातुरण्यन्तः पाके वर्तते। पाकश्चाऽत्र विक्लित्तिरेव विवक्षिता। न तु तदनुकूलव्यापारोऽपि। तथाच श्राधातोर्विक्लित्तावकर्मकत्वात् 'गत्यर्थाकर्मक' इति कर्तरि क्तः। तथाच क्षीरं विक्लित्त्याश्रय इति फलितम्। ततो णिचि विक्लित्त्यनुकूलव्यापारार्थकपचिना समानार्थकात् 'श्रपि' इत्यस्मात् कर्मणि क्तप्रत्यये फलितमाह—पक्वमिति। एतच्च भाष्यकैयटयोः स्पष्टम्। 'क्षीराज्यहविषां श्रृतम्' इत्यमरस्य तु प्रमाद एव, 'क्षीरहविषोः' इति वार्तिकविरोधात्। वा दान्तशान्तपूर्णदस्तस्पष्टच्छन्नज्ञप्ताः। 'णेरध्ययने वृत्तम्' इत्यतो णेरित्यनुवर्तते। 'दमु शमु उपशमे' ण्यन्ताभ्यामिडभावो निपात्यते। 'अनुनासिकस्य' इति दीर्घः। णिलोपस्तु न स्यान्निवत्, निपातनाद्दीर्घविधौ तन्निषेधाच्च। दान्तः। शान्तः। 'पूरी आप्यायने' ण्यन्तात् क्तः, इडभावो निपात्यते, णिलोपः रात्परस्वाच्च्त्वम्, णत्वम्, पूर्णः। एतेन 'न ध्याख्यापृमूर्छि' इत्येव सिद्धे पूर्णग्रहणं व्यर्थमित्यपास्तम्, पूरीधातोर्ण्यन्तात् पूर्णरूपार्थत्वात्। 'दसु उपक्षये' ण्यन्तात् इडभावो निपात्यते, उपधावृद्ध्यभावश्च, णिलोपः। 'स्पश बाधने' ण्यन्तात् क्तः, इडभावो निपात्यते उपधावृद्ध्यभावश्च णिलोपः, स्पष्टम्। 'छद अपवारणे' ण्यन्तात् क्तः। इडभावो वृद्ध्यभावश्च निपात्यते। णिलोपः' 'रदाभ्याम्' इति नत्वम्, छन्नः। 'ज्ञप मिच्च' इति चुरादिण्यन्तात् क्तः। इडभावो णिलोपः इति कैयटः। ज्ञप्तः। पक्ष इति। निपातनाऽभावपक्ष इत्यर्थः। दमितः शमित इति। अमन्तत्वेन मित्त्वाद्ध्रस्वः। ज्ञापित इति। अचौरादिकस्य रूपम्। चौरादिकस्य तु ज्ञपित इत्येव। रुष्यमत्वर। रुषि, अम, त्वर, सङ्घुष्, आस्वन् एषां द्वन्द्वः। णेरिति निवृत्तम्। पञ्चम्यर्थे षष्ठी। तदाह—एभ्य इति। वा स्यादिति। 'वा दान्त' इत्यतस्तदनुवृत्तेरिति भावः। रुष्टः रुषितः इति। 'तीषसह' इति रुषो वेट्कत्वात् 'यस्य विभाषा' इति निषेधे प्राप्ते विकल्पोऽयम्। आन्तः अमित इति। 'अम गत्यादिषु' क्तः। इडभावपक्षे 'अनुनासिकस्य' इति दीर्घः। तूर्णः त्वरित इति। 'ञि

मन्दम्। संघुष्टः। संघुषितः। आस्वान्तः। आस्वनितः। ३०७० हृषेर्लोमसु ७।२।२६॥ हृषेर्निष्ठाया इड्वा स्यात् लोमसु विषये। हृष्टं-हृषितं लोम। 'विस्मित-प्रतिघातयोश्च' (वा ४४१७)। हृष्टो-हृषितो मैत्रः। विस्मितः प्रतिहतो वेत्यर्थः। अन्यत्र तु, 'हृषु अलीके' उदित्त्वान्निष्ठायां नेट्। 'हृष तुष्टौ' इट्। ३०७१ अपचितश्च ७।२।३०॥ चायेर्निपातोऽयं वा। अपचितः। अपचायितः। ३०७२ प्यायः पी ६।१।२८॥ पी वा स्यान्निष्ठायाम्। व्यवस्थितविभाषेयम्। तेन स्वाङ्गे नित्यम्। पीनं मुखम्। अन्यत्र प्यानः-पीनः स्वेदः। 'सोपसर्गस्य न' (वा ५०६५) प्रप्यानः। 'आङ्पूर्वस्याऽन्धूधसोः स्यादेव' (वा ३४६१)। आपीनोऽन्धुः। आपीनमूधः। ३०७३ ह्लादो निष्ठायाम् ६।४।६५॥ ह्रस्वः

स्वरा सम्भ्रमे' क्तः, इडभावपक्षे 'उवरत्वर' इत्यूठ्। 'रदाभ्याम्' इति नत्वम्, णत्वम् 'आदितश्च' इति नित्यमिण्निषेधे प्राप्ते विकल्पोऽयम्। आदित्वस्य तु फलमात्मनेपदमात्रम्। तदाह—अस्य आदित्वे फलं मन्दमिति। तथाच 'एध वृद्धौ' इत्यादिवत् इस्वानुबन्धत्वमेव न्याय्यमिति भावः। सङ्घुष्टः सङ्घुषित इति। 'घुषिरविशब्दने इति घुषेः सम्पूर्वस्य नित्यमिण्निषेधे प्राप्ते विकल्पोऽयम्। आस्वान्तः आस्वनितः इति। आङ्पूर्वस्वनेः क्तः। इडभावपक्षे 'अनुनासिकस्य' इति दीर्घः। 'श्रुदक्षस्वान्त' इति निपातनं तु आङ्पूर्वस्य स्वनेर्न भवति, परत्वादस्यैव विकल्पस्य प्राप्तेरित्याहुः। 'न वा' इति सूत्रभाष्ये तु सङ्घुषाऽऽस्वनोर्विषये उभयत्र विभाषेत्युक्तम्। हृषेर्लोमसु। लोमसु कर्तृष्विति वोध्यम्। इदञ्च 'अजर्यम्' इति सूत्रे भाष्ये स्पष्टम्। हृष्टं हृषितं लोमेति। 'गत्यर्थाऽकर्मक' इति कर्तरि क्तः। रोमाञ्चितभूतमित्यर्थः। विस्मितप्रतिघातयोश्चेति। वार्तिकमिदम्। 'हृषेर्निष्ठाया इड्वा' इति शेषः। उदित्त्वादिति। 'उदितो वा' इति क्त्वायां वेट्कत्वात् 'यस्य विभाषा' इति निष्ठायां नेडित्यर्थः। तथा अलीकेऽर्थे हृष इत्येव। मृषोक्तवानित्यर्थः। इंडति। 'हृष तुष्टौ' इति धातोः क्ते इडेव भवतीत्यर्थः। हृषितः, तुष्ट इत्यर्थः। विस्मितप्रतिघातयोस्तु धातूनामनेकार्थत्वादवृत्तिः। तत्र लोमसु विस्मितप्रतिघातयोश्च 'हृषु अलीके' इत्यस्मात् 'यस्य विभाषा' इति नित्यमिण्निषेधे प्राप्ते विभाषेयम्, 'हृष तुष्टौ' इत्यस्मात्तु नित्यमिट्प्राप्तौ विभाषा इति विवेकः। अपचितश्च। 'अपपूर्वस्याचिरो व्यक्तस्य निष्ठायां चिभावो निपात्यते' इति भाष्यम्। तदाह—चायेर्निपातोऽयमिति। प्यायः पी। वा स्यान्निष्ठायामिति। शेषपूरणमिदम्। 'विभाषाऽभ्यवपूर्वस्य' इत्यतो विभाषेति 'रुकायः रुफी' इत्यतो निष्ठायामिति चानुवर्तते इति भावः। व्यवस्थितविभाषेति। अत्र व्याख्यानमेव शरण्यम्। 'सोपसर्गस्य न' इत्यादि भाष्ये स्पष्टम्। ह्लादो निष्ठायाम्। ह्रस्वः स्यादिति। शेषपूरणमिदम्। 'क्ङिति ह्रस्वः' इत्यतस्तदनु-

स्यात्। प्रहन्नः ३०७४ यतिस्यतिमास्थामित्ति किति ७।४।४०॥ एषामिकारोऽन्तादेशः स्यात्तादौ किति। ईत्वदद्भावयोरपवादः। दितः। सितः। मा, माङ्, मेङ्, मितः। स्थितः। ३०७५ शाच्छोरन्यतरस्याम् ७।४।४१॥ शितः-शातः। छितः। छातः। व्यवस्थितविभाषात्वाद्व्रतविषये श्यतेर्नित्यम्। संशितं व्रतम्। सम्यक्सम्पादितमित्यर्थः। संशितो ब्राह्मणः। व्रतविषयकयत्नवानित्यर्थः। ३०७६ दधातेर्हिः ७।४।४२॥ तादौ किति। अभिहितम्। निहितम्। ३०७७ दो दद्धोः ७।४।४६॥ घुसंज्ञकस्य दा इत्यस्य दथ् स्यात्तादौ किति। चर्त्वम्। दत्तः। घोः किम्। दातः। तान्तो वायमादेशः। न चैवं विदत्तमित्यादावुपसर्गस्य 'दस्ति' (सू २०७९) इति दीर्घापत्तिः। तकारादौ तद्विधानात्। दान्तो वा। धान्तो वा। न च दान्तत्वे निष्ठानत्वं, धान्तत्वे 'झषस्तथोः-' (सू २२८०) इति धत्वं शङ्क्यम्। सन्निपातपरिभाषाविरोधात्।

वृत्तेरिति भावः। प्रहन्न इति। 'हृादी सुखे' रूः। 'श्वीदितः' इति नेट् 'रदाभ्याम्' इति नत्वम्। यतिस्यति। एषां चतुर्णां द्वन्द्वात्षष्ठी। 'दो अवखण्डने' इत्यस्य यतीति निर्देशः। 'षो अन्तकर्मणि' इत्यस्य तु स्यतीति निर्देशः। इत इति कितीति च्छेदः। ईत्वेति। 'घुमास्था' इति ईत्वस्य 'दो दद्धोः' इति दद्भावस्य च यथासम्भवमपवाद इत्यर्थः। दोधातोरुदाहरति—दित इति। मा माङ् मेङिति। 'गामादाग्रहणेष्वविशेषः' इति वचनादिति भावः। शाच्छोः। 'शोत नूकरणे' 'छो छेदने' अनयोः कृतात्ययोर्निर्देशः। अनयोरिकारोऽन्तादेशो वा स्यात् तादौ कितीत्यर्थः। व्यवस्थितेति। एतच्च भाष्ये स्पष्टम्। दधातेर्हिः। तादौ कितीति। शेषपूरणमिदम्। 'यतिस्यति' इत्यतस्तदनुवृत्तेरिति भावः। दो दद्धोः। 'दा' इति षष्ठ्यन्तम्। तदाह—दा इत्यस्येति। 'दथ्' इति च्छेदः। तदाह—दथ् स्यादिति। तवर्गाद्वितीयान्तोऽयमादेशः। तादौ कितीति। 'ति कितीत्यनुवृत्तेरिति भावः। चर्त्वमिति। 'खरि च' इति थकारस्य तकार इत्यर्थः। दात इति। दापदैपो रूपम्। 'अदाप्' इत्युक्तेः घुत्वाऽभावान्न दद्भावः। तान्तो वेति। तवर्गप्रथमान्त इत्यर्थः। नन्वेवं सति 'विदत्त'मित्यादौ 'दस्ती'त्युपसर्गस्य दीर्घत्वापत्तिः। तत्र हि 'दा' इति षष्ठी सप्तम्यर्थे। इगन्तोपसर्गस्य दीर्घः स्यात् तकाराम्ते ददातौ परत इत्यर्थं इत्याशङ्क्य निराकरोति—न चैवमिति। आदेशस्य तवर्गप्रथमान्तत्वे सतीत्यर्थः। तकारादाविति। 'दस्ति' इत्यत्र द इति षष्ठी तीःयत्रान्वेति। तथाच इगन्तोपसर्गस्य दीर्घः स्यात् दादेशतकारादावुत्तरपदे इत्यर्थः। उत्तरपदाधिकारात्। ततश्च उत्तरपदस्याऽत्र तकारादित्वाऽभावात् न दीर्घ इति भावः। दान्तो वा धान्तो वेति। तवर्गतृतीयान्तो वा, चतुर्थान्तो वा अयमादेश इत्यर्थः। न चेति। दान्तत्वे निष्ठानत्वम्, धान्तत्वे 'झषस्तथोः' इति धत्वं च न शङ्क्यमित्यन्वयः। सन्निपातेति। दान्तादेशस्य, धान्तादेश-

३०७८ अच उपसर्गात्तः ८।४।४७॥ अजन्तादुपसर्गात्परस्य दा इत्यस्य धोरचस्तः स्यात्तादौ किति। चर्त्वम्। प्रत्तः। अवत्तः।

'अवदत्तं विदत्तं च प्रदत्तं चादिकर्मणि। सुदत्तमनुदत्तं च निदत्तमिति चेष्यते॥'

चशब्दाद्यथाप्राप्तम्। ३०७९ दस्ति ६।३।१२४॥ इगन्तोपसर्गस्य दीर्घः स्याद्दादेशो यस्तकारस्तदादावुत्तरपदे। 'खरि च' (सू १२१) इति चर्त्वमाश्रयात्सिद्धम्। नीत्तम्। सूत्तम्। 'घुमास्था-' (सू २४६२) इतीत्वम्। धेट्। धीतम्। गीतम्। पीतम्। 'जनसन-' (सू २५०४) इत्यात्वम्। जातम्। सातम्। खातम्। ३०८० अदो जग्धिर्ल्यप्ति किति २।४।३६। ल्यबिति लुप्तसप्तमीकम्। अदो जग्धिः स्याल्ल्यपि तादौ किति च। इकार उच्चारणार्थः। धत्वम्। 'झरो

स्य च तकारादिप्रत्ययोपजीव्यतया तद्विघातकनत्वधत्वे प्रति निमित्तत्वाऽसम्भवादिति भावः। अच उपसर्गात्तः। त इत्यत्राकार उच्चारणार्थः। अच इत्यावर्तते, एकमुपसर्गविशेषणम्। द्वितीयं तु स्थानिसमर्पकम्। तदाह—अजन्तादिति। धोरिति। धोरवयवस्येत्यर्थः। तः स्यादिति। तकारः स्यादित्यर्थः। ददादेशापवादः। चर्त्वमिति। प्र दा त इति स्थिते दकारादाकारस्य तकारादेशे दकारस्य चर्त्वेन तकार इत्यर्थः।

अवदत्तं विदत्तं चेति। भाष्यस्थश्लोकोऽयम्। अत्र आदिकर्मणीत्येतत् प्रदत्तमित्यत्रैव सम्बध्यते। नायम् 'अच उपसर्गात्तः' इत्यस्य अपवाद इति भ्रमितव्यमित्याह—चशब्दाद्यथाप्राप्तमिति। तथा चाऽवदत्तादिशब्देषु ददादेशोऽपि कदाचिल्लभ्यते इत्यर्थः। अत एव प्रकृतसूत्रभाष्ये 'अच उपसर्गात्तः' इत्यस्यावकाशः प्रत्तमवत्तम् इति सङ्गच्छते इति भावः। दस्ति। 'इकः काशे' इत्यतः इक इति 'उपसर्गस्य घञ्यमनुष्ये' इत्यतः उपसर्गस्येति 'ह्रलोपे' इत्यतो दीर्घ इति चानुवर्तते। उत्तरपदे इत्यधिकृतं तीत्यनेन विशेष्यते। तदादिविधिः। द इति षष्ठी ति इत्यत्राम्रेडितम्। तथाच दाधातोरादेशः यस्तकारः तदादौ उत्तरपदे इति लभ्यते। तदाह—इगन्तेत्यादि। ननु नि दा त इति स्थिते 'अच उपसर्गात्तः' इति दकारादाकारस्य तकारे दकारस्य 'खरि च' इति चर्त्वं प्रकृतसूत्रेण उपसर्गस्य दीर्घं नीत्तमिति रूपं वक्ष्यति। तदयुक्तम्। दीर्घे कर्तव्ये चर्त्वस्याऽसिद्धत्वे दादेशे तकारार्थत्वापदत्वाभावादित्यत आह—खरि चेति, चर्त्वमाश्रयात् सिद्धमिति। दादेशतकारमाश्रित्य विधीयमाने दीर्घे चर्त्वं नासिद्धम्, चर्त्वसिद्धं तकारमाश्रित्य विधिवत्त्वादित्यर्थः। सूत्तमिति तु चिन्त्यम्, 'गतिश्च' इति सूत्रभाष्यवार्तिकयोः सुदत्तमित्यत्र 'अच उपसर्गात्तः' इति तत्वे कर्तव्ये सोपसर्गत्वं नेति प्रपञ्चितत्वात्। अथ धेट्पापाघ्राद्मस्थाम्नादाण्दृश्यर्त्तिसर्तिशदसदां पिबजिघ्रधमतिष्ठमनयच्छपश्यर्च्छधौशीयसीदाः' इति सूत्रेण धेट्स्थाने पादेशे कृते आह—घुमास्थेति। धीतमिति। 'दधातेर्हिः' इत्यत्र रक्षणविकरणग्रहणात् हिभावः। अदो जग्धिः। घत्वमिति। जग्ध् त इति स्थिते 'झषस्तथोः' इति तकारस्य धकार इत्यर्थः। झरो झरि

करि–' (सू ७१)। जग्धः। आदिकर्मणि क्तः कर्तरि च' (सू ३०५३)। प्रकृतः कटं सः। प्रकृतः कटस्तेन। 'निष्ठायामण्यदर्थे' (सू ३०१४) इति दीर्घः। 'क्षियो दीर्घात्' (सू ३०१५ इति नत्वम्। प्रक्षीणः सः। ३०८१ **वाऽऽक्रोश-दैन्ययोः ६।४।६१॥** क्षियो निष्ठायां दीर्घो वा स्यादाक्रोशे दैन्ये च। क्षीणायुर्भव। क्षितायुर्वा। क्षीणोऽयं तपस्वी, क्षितो वा। ३०८२ **निनदीभ्यां स्नातेः कौशले ८।३।८६॥** आभ्यां स्नातेः सस्य षः स्यात्कौशले गम्ये। निष्णातः शास्त्रेषु। नद्यां स्नातीति नदीष्णः। 'सुपि–' (सू २६१६) इति कः। ३०८३ **सूत्रं प्रतिष्णातम् ८।३।६०॥** प्रतेः स्नातेः षत्वम्। प्रतिष्णातं सूत्रम्। शुद्धमित्यर्थः। अन्यत्र प्रतिस्नातम्। ३०८४ **कपिष्ठलो गोत्रे ८।३।६१॥** कपिष्ठलो नाम यस्य, कापिष्ठलिः पुत्रः। गोत्रे किम्। कपीनां स्थलं कपिस्थलम्। ३०८५ **विकुशमिपरिभ्यः स्थलम् ८।३।६६॥** एभ्यः स्थलस्य सस्य षः स्यात्। विष्ठलम्। कुष्ठलम्। शमिष्ठलम्। परिष्ठलम्। ३०८६ **गत्यर्थाकर्मकश्लिषशीङ्स्थासवसजनरुहजीर्यतिभ्यश्च ३।४।७२॥** एभ्यः कर्तरि क्तः स्याद्भावकर्मणोश्च। गङ्गां गतः। गङ्गां प्राप्तः। म्लानः सः। लक्ष्मीमाश्लिष्टो हरिः। शेषमधिश-

---

इति। अनेन पाक्षिको धकारलोप इत्यर्थः। आदिकर्मणि क्त इति। व्याख्यातं प्राक्। उदाहरणान्तरविवक्षया पुनरुपन्यासः। प्रकृतः कटं स इति। कर्तुमारब्धवानित्यर्थः। कटस्य कर्मणः अनभिहितत्वात् द्वितीया। कर्तुरभिहितत्वात् तच्छब्दात्प्रथमा। चकाराद्भावे कर्मणि चेत्युक्तम्। तत्र कर्मण्युदाहरति—प्रकृतः कटस्तेनेति। प्रक्षीणः स इति। आदिकर्मणि क्तः। वाऽऽक्रोशदैन्ययोः। अण्यदर्थं इत्यनुवर्तते। 'ण्यदर्थो भावकर्मणी' इत्युक्तम्। आक्रोशे उदाहरति—क्षीणायुर्भवेति। 'गत्यर्थाकर्मक' इति कर्तरि क्तः। दैन्ये उदाहरति—क्षीणोऽयं तपस्वीति। कृत्या इत्यर्थः। निनदीभ्याम्। सस्य षः स्यादिति। 'सहेः साडः सः' इत्यतः स इति षष्ठ्यन्तमनुवर्तते, 'अपदान्तस्य मूर्धन्यः' इत्यस्यभिकृतमिति भावः। निष्णात इति। कुशल इत्यर्थः। नदीष्ण इति। नद्यां कुशलं स्नातीति विग्रहः। सुपीति क इति। 'सुपि स्थः' इत्यत्र 'सुपी'ति योगविभागात् क इत्यर्थः। गत्यर्थ। गत्यर्थ, अकर्मक, श्लिष, शीङ्, स्था, आस, वस, जन, रुह, जीर्यति एषां दशानां द्वन्द्वः। 'लः कर्मणि च भावे च' इत्यतः भावे कर्मणीति 'आदिकर्मणि क्तः कर्तरि च' इत्यतः कर्तरि इति चानुवर्तते। तदाह–एभ्य इत्यादिना। कर्तरीत्येवानुवृत्तौ भावकर्मणोर्न स्यादिति तयोरप्यनुवृत्तिः। गङ्गां गत इति। कर्तरि क्तः। गङ्गां प्राप्त इति। 'आप्ल्व्यालौ' उपसर्गवशादत्रौ वर्तते। अकर्मकादुदाहरति—म्लान इति। क्षीण इत्यर्थः। 'संयोगादेः' इति निष्ठानत्वम्। आश्लिष्ट इति। आलिङ्गितवानित्यर्थः। ननु अकर्मकत्वादेव सिद्धे शीङादीनां पुनर्ग्रहणं व्यर्थमित्यत आह—

यितः। वैकुण्ठमधिष्ठितः। शिवमुपासितः। हरिदिनमुपोषितः। राममनुजातः। गरुडमारूढः। विश्वमनुजीर्णः। पक्षे प्राप्ता गङ्गा तेनेत्यादि। ३०८७ क्तोऽधिकरणे च ध्रौव्यगतिप्रत्यवसानार्थेभ्यः ३।४।७६॥ एभ्योऽधिकरणे क्तः स्यात्। चायथाप्राप्तम्। ध्रौव्यं स्थैर्यम्।

"मुकुन्दस्याऽऽसितमिदमिदं यातं रमापतेः। भुक्तमेतदनन्तस्येत्यूचुर्गोप्यो दिदृक्षवः॥"

पक्षे आसेरकर्मकत्वात्कर्तरि भावे च। आसितो मुकुन्दः। आसितं तेन। गत्यर्थेभ्यः कर्तरि कर्मणि च। रमापतिरिदं यातः। तेनेदं यातम्। भुजेः कर्मणि। अनन्तेनेदं भुक्तम्। कथं 'भुक्ता ब्राह्मणाः' इति। भुक्तमस्ति एषामिति मत्वर्थी-

---

शेषमधिशयित इति। शेषे शयितवानित्यर्थः। 'अधिशीङ्स्थासाम्' इति शेषः कर्म। अतो नाऽकर्मकत्वादिह प्राप्तिरिति भावः। वैकुण्ठमधिष्ठित इति। वैकुण्ठे स्थितवानित्यर्थः। 'अधिशीङ्स्थासाम्' इति वैकुण्ठः कर्म। अतो नाऽकर्मकत्वादिह प्राप्तिः। शिवमुपासित इति। शिवं परिचरितवानित्यर्थः। उपवेशनार्थकत्वे अकर्मकत्वेऽपि इह उपसर्गवशेनार्थान्तरे सकर्मकत्वादकर्मकेत्यनेन न प्राप्तिरिति भावः। हरिदिनमुपोषित इति। 'वसतिक्षुधोः' इति इट्। यजादित्वात्सम्प्रसारणम्। 'शासि' इति षः। हरिदिने न भुक्तवानित्यर्थः। 'उपान्वध्याङ्वसः' इति हरिदिनं कर्म। ततश्चाकर्मकत्वाऽभावादप्राप्तिः। राममनुजात इति। अनुकृतवानित्यर्थः। अनुसृत्य जातवानिति वा। ततश्चाऽकर्मकत्वाऽभावादप्राप्तिः। गरुडमारूढ इति। उपर्याक्रान्तवानित्यर्थः। विश्वमनुजीर्ण इति। हतवानित्यर्थः। व्याप्तवानिति वा। अकर्मकत्वाऽभावादप्राप्तिः। जूधातोः कर्तरि क्तः। 'ऋत' इति इत्वं रपरत्वं 'हलि च' इति दीर्घः। 'रदाभ्याम्' इति नत्वं, णत्वम्। पक्षे इति। कर्तरि प्रत्ययाऽभावपक्षे इत्यर्थः।

क्तोऽधिकरणे च। ध्रौव्यं गतिः, प्रत्यवसानं च अर्थो येषामिति विग्रहः। ध्रौव्यार्थेभ्यः, गत्यर्थेभ्यः, प्रत्यवसानार्थेभ्यश्चेति यावत्। चायथाप्राप्तमिति। कर्मकर्तृभावेऽपि यथासम्भवमित्यर्थः। ध्रौव्यमित्यस्य विवरणम्—स्थैर्यमिति। स्थिरीभवनम्, उपवेशनशयनादिक्रियेति यावत्। मुकुन्दस्यासितमिदमिति। श्लोकोऽयम्। आस्यते अस्मिन्नित्यासितम्, आसनमित्यर्थः। ध्रौव्यार्थस्योदाहरणमिदम्। इदं यातं रमापतेरिति। गत्यर्थस्योदाहरणम्। यायते गम्यते अस्मिन्निति यातं, मार्ग इत्यर्थः। भुक्तमेतदनन्तस्येति। भुज्यते अस्मिन्निति भुक्तम्। भोजनस्थानमित्यर्थः। 'अधिकरणवाचिनश्च' इति त्रिष्वपि कर्तरि षष्ठी। पक्षे इति। अधिकरणे प्रत्ययाभावपक्षे इत्यर्थः। आसेरकर्मकत्वादिति। ततश्च न कर्मणि क्त इत्यर्थः। आसितो मुकुन्द इति। आसितवानित्यर्थः। आसितं तेनेति। भावे उदाहरणम्। गत्यर्थेभ्य इति। तेषां सकर्मकतया कर्तरि कर्मणि च क्तः, न तु भावे इत्यर्थः, 'क्तः कर्मणि च' इत्यनाऽनुशासनादिति भावः। भुजेः कर्मणीति। अनुपसर्गाकर्मणि क्तः, न तु भावे, सकर्मकेभ्यो भावे प्रत्ययस्य 'क्तः कर्म-

योऽच्। वर्तमाने इत्यधिकृत्य-३०८८ **अीतः क्तः** ३।२।१८७॥ 'अि ङिवदा' ङिवण्णः। 'अि इन्धी' इद्धः। ३०८९ **मतिबुद्धिपूजार्थेभ्यश्च** ३।२।१८८॥ मतिरिहेच्छा। बुद्धेः पृथगुपादानात्। राज्ञां मतः इष्टः। तैरिष्यमाण इत्यर्थः। बुद्धः। विदितः। पूजितः। अर्चितः। चकारोऽनुक्तसमुच्चयार्थः। 'शीलितो रक्षितः क्षान्त आक्रुष्टो जुष्ट इत्यपि' इत्यादि। ३०९० **नपुंसके भावे क्तः** ३।३।१४४॥ क्लीबत्वविशिष्टे भावे कालसामान्ये क्तः स्यात्। जल्पितम्। शयितम्। हसितम्। ३०९१ **सुयजोर्ङ्वनिप्** ३।२।१०३॥ सुनोतेर्यजेश्च ङ्वनिप्स्याद्भूते। सुत्वा। सुत्वानौ। यज्वा। यज्वानौ। ३०९२ **जीर्यतेरतृन्** ३।२।१०४॥ भूते इत्येव। जरन्। जरन्तौ। जरन्तः। वासरूपन्यायेन निष्ठाऽपि। जीर्णः। जीर्णवान्। ३०९३ **छन्दसि लिट्** ३।२।१०५॥ ३०९४ **लिटः**

णि' इत्यन्नाऽदर्शनात्। नापि प्रत्ययसामान्यार्थस्यः कर्तरि, अनभिधानादित्यर्थः। कथमिति। भुजेः कर्तरि क्ताऽभावस्योक्तत्वादिति भावः। समाधत्ते—भुक्तमस्येषामिति। अत्र गत्यर्थेभ्यो भावेऽपि क्तप्रत्ययोऽस्त्येव, अविशेषात्, 'अजर्यं सङ्गतम्' इति सूत्रे 'अनेकमन्यपदार्थे' इति सूत्रे च भाष्ये गत्यर्थेभ्यो भावे क्तप्रत्ययस्य अभ्युपगमाच्चेति शब्देन्दुशेखरे विस्तरः। इत्यधिकृत्येति। 'वर्तमाने लट्' इत्यतो मण्डूकप्लुत्या अनुवर्तमान इत्यर्थः, चानशादीनां सर्वकालतायाः 'भूते' इति सूत्रे भाष्ये उक्तत्वादित्याहुः। अीतः क्तः। अि इत् यस्य तस्माद्वर्तमानक्रियावृत्तेः क इत्यर्थः। 'तयोरेव कृत्यक्तः' इति भावकर्मणोरेव भूते विहितः क्तः वर्तमाने न प्राप्नोतीत्यारम्भः। ङिवण्ण इति। 'आदितश्च' इति नेट्। इद्ध इति। 'श्वीदितः' इति नेट्। मतिबुद्धि। मति, बुद्धि पूजा, अर्थं एषामिति विग्रहः। 'वर्तमाने क्त' इति शेषः। 'तयोरेव' इति भावकर्मणोरेव। मतः इष्ट इति। इच्छार्थकान्मनेरिषेश्च क्तः। 'तीषसह' इति वेट्कत्वात् 'यस्य विभाषा' इति नेट्। शीलितो रक्षित इति। भाष्यस्थश्लोकोऽयम्। इत्यादीति। आदिना 'रुष्टश्च रुषितश्चोभावभिव्याहृत इत्यपि। हृष्टतुष्टौ तथाक्रान्तस्तथोभौ संयतोद्यतौ। कष्टं भविष्यतीत्याहुरमृतः पूर्ववत्स्मृतः।' इति संग्रहः। कष्टशब्दो भविष्यति, अमृतशब्दो वर्तमाने इत्यर्थः। नपुंसके भावे क्तः। कालसामान्ये इति। अस्य वर्तमानाद्यधिकारानन्तर्भावादिति भावः। अकर्मकेभ्य एव नपुंसके भावे क्तः, नतु सकर्मकात् इति 'णेरध्ययने वृत्तम्' इति सूत्रे भाष्यकैयटयोः स्पष्टम्। तदूध्वमयत्नकर्मकेभ्य एवोदाहरति—जल्पितमित्यादि। गतं भुक्तमित्यादौ तु अविवक्षितकर्मकत्वात् अकर्मकत्वं बोध्यम्। अत एव गतं हंसस्य, भुक्तमोदनस्येत्यादौ शेषत्वविवक्षया षष्ठीति दिक्। सुयजोर्ङ्वनिप्। पञ्चम्यर्थे षष्ठी। सुनोतेर्यजेश्च ङ्वनिविधेयौ। भूते इति। अस्य भूताधिकारस्यत्वादिति भावः। सुत्वा सुत्वानाविति। ङ्वनिपि ङपावितौ, इकार उच्चारणार्थौ। क्विस्वाङ्ग गुणः। जीयतेरतृन्। भूते इत्येवेति। भूतार्थवृत्तेर्जॄ धातोरतृन् स्यादि-

कानज्वा ३।२।१०६॥ ३०९५ क्वसुश्च ३।२।१०७॥ इह भूतसामान्ये छन्दसि लिट्। तस्य विधीयमानौ क्वसुकानचावपि छान्दसाविति त्रिमुनिमतम्। क्वयस्तु बहुलं प्रयुञ्जते। 'तं तस्थिवांसं नगरोपकण्ठे' 'श्रेयांसि सर्वाण्यधिजग्मुषस्ते' इत्यादि। ३०९६ वस्वेकाजाद्धसाम् ७।२।६७॥ कृतद्विर्वचनानामेकाचामादन्तानां घसेश्च वसोरिट्, नान्येषाम्। एकाच्, आदिवान्। आरिवान्। आत्, ददिवान्। जक्षिवान्। एषाम् किम्? बभूवान्। ३०९७ भाषायां सदवसश्रुवः

त्यर्थः। ऋकारनकारावितौ। अप्रत्ययः क्ष्नियते। जरान्निति। डगित्त्वान्नुम्। जीर्णं इति। 'ऋत इत्' रपरत्वम्, 'हलि च' इति दीर्घः, निष्ठानत्वम्। छन्दसि लिट्। लिटः कानज्वा। क्वसुश्च। त्रीण्यमूनि सूत्राणि। अत्र प्रथमसूत्रे भूत इत्यनुवृत्तिमभिप्रेत्य व्याचष्टे—भूतसामान्ये छन्दसि लिडिति। अनद्यतनपरोक्षत्वं छन्दसि न विवक्षितमिति भावः। 'लिटः कानज्वा' इति द्वितीयं सूत्रम्। तत्र छन्दसीत्यनुवर्तते, भूते इति च। छन्दसि भूते लिटः कानज्वादेशः स्यादित्यर्थः। लिड्ग्रहणं क्ष्नियुमान्नस्य ग्रहणार्थम्। तेन 'परोक्षे लिट्' इति यो लिट्विहितः तस्यापि ग्रहणार्थः। अन्यथा 'अनन्तरस्य' इति न्यायेन प्रकृतस्यैव लिटो ग्रहणं स्यादिति वृत्तौ स्पष्टम्। वाग्रहणं तु पक्षे लिटः अवयार्थं, वाऽसकर्षविधिर्लादेशेषु नेति ज्ञापनार्थं वा। तत्प्रयोजनं तु 'भाषायां सदवस' इत्यत्र अनुपदमेव वक्ष्यते। 'क्वसुश्च' इति तृतीयं सूत्रम्। छन्दसि भूते लिटः क्वसुआदेशः स्यादित्यर्थः। योगविभागस्तु उत्तरसूत्रे क्वसोरेवानुवृत्त्यर्थः। इमौ कानक्वसू आदेशौ छान्दसाविति अत्रैव भाष्यकैयटयोः स्पष्टम्। तदाह—तस्येत्यादि त्रिमुनिमतमित्यन्तम्। 'विभाषा पृवाहणाऽपराहण' इति सूत्रभाष्ये तु पपुष आगतं पपिवद्भ्यामिति प्रयुक्तम्। तेन लोकेऽपि क्वचित् क्वसोः साधुत्वं सूचितम्। तदाह—क्वयस्त्वति। तस्थिवांसमिति। स्थाधातोः लिटः क्वसुः। द्वितीयैकवचने 'आत्वसन्तस्य' इति दीर्घः। डगित्त्वान्नुम्। अधिजग्मुष इति। अधिपूर्वाद्गमेर्लिटः क्वसुः 'गमहन' इत्युपधालोपः, शसि वसोः सम्प्रसारणं, पूर्वरूपम्, षत्वम्। वस्वे। 'वसु' इत्यवयवसंज्ञको निर्देशः। तथाच व्याख्यास्यति—वसोरिति। नित्यत्वात् द्वित्वे कृते एकाच्त्वमेव नेति कथमिट् स्यादित्यत आह—कृतद्विर्वचनानामेकाचामिति। कृतेऽपि द्वित्वे एकाच एव ये अवशिष्यन्ते तेषामित्यर्थः। 'नेड्वशि कृति' इति निषेधं बाधित्वा क्रादिनियमात् सर्वत्र प्राप्तस्य इटो नियमोऽयमित्याह—नान्येषामिति। आदिवानिति। अद भक्षणे। द्वित्वहलादिशेषाऽभ्यासदीर्घसवर्णदीर्घेषु कृतेषु कृतद्वित्वोऽप्ययमेकाजेवेति इट्। आरिवानिति। 'ऋ गतौ' 'ऋच्छ्यृताम्' इति गुणे कृते द्वित्वादिषु पूर्ववत् कृतेषु अयमेकाच्। ददिवानिति। डु दाञ् दाने। कृते द्वित्वे नाऽयमेकाच्। इण्निमित्ताऽऽतो लोपो नाऽसति तस्मिन् भवतीति अनेकाजर्थमादुग्रहणम्। जक्षिवानिति। 'लिट्यन्यतरस्याम्' इत्यदेर्घसादेशः। द्वित्वे कृते नाऽयमेकाजिति

३।२।१०८॥ सदादिभ्यो भूतसामान्ये भाषायां लिड्वा स्यात्, तस्य च नित्यं क्वसुः । 'निषेदुषीमासनबन्धधीरः' । 'अध्यूषुषस्तामभवज्जनस्य' । शुश्रुवान् । ३०८ **उपेयिवाननाश्वाननूचानश्च ३।२।१०९॥** एते निपात्यन्ते । उपपूर्वादिणो भाषायामपि भूतमात्रे लिड्वा, तस्य नित्यं क्वसुः । इट् । उपेयिवान् । 'उपेयुषः स्वामपि मूर्तिमग्र्याम्' । उपेयुषी । 'उपे'त्यविवक्षितम् । ईयिवान् । समीयिवान् । नञ्पूर्वादश्नातेः क्वसुरिडभावश्च । 'भृतजयभृतेरनाशुषः' इति भारविः । अनुपूर्वाद्वचेः कर्तरि कानच् । वेदस्यानुवचनं कृतवाननूचानः । ३०९९ **विभाषा गमहनविदविशाम् ७।२।६८॥** एभ्यो वसोरिड्वा । जग्मिवान् । जगन्वान् । जघ्निवान् । जघन्वान् । विविदिवान् । विविद्वान् । विविशिवान् ।

घसिग्रहणम् । भाषायाम् । सद्, वस, श्रु एषां द्वन्द्वात्पञ्चमी । पुंस्त्वमेकवचनं चार्षम् । तस्य च नित्यं क्वसुरिति । वाग्रहणं लिटैव सम्बध्यते । तस्य क्वसुस्तु नित्यः इति भाष्ये स्पष्टम् । पक्षे लुङ्, तस्य भूतसामान्ये विहितत्वात् । वाग्रहणाननुवृत्तौ तु भूतसामान्ये लिडयं नित्यं लुङपवादः स्यात्, सरूपत्वात् । अस्य च भूतसामान्ये लिटः न तिङ्, अस्य क्वसोस्तदपवादत्वात् । वासरूपविधिस्तु लादेशेषु नेति 'लिटः कानज्वा' इत्यत्र उक्तमिति शब्देन्दुशेखरे विस्तरः । निषेदुषीमिति । निपूर्वात्सदेर्लिटः क्वसुः, द्वित्वम् 'अत एकहल्मध्ये' इत्येत्त्वाभ्यासलोपौ, वसोः सम्प्रसारणं, पूर्वरूपं, षत्वम् । अध्यूषुष इति । अधिपूर्वाद्वसधातोर्लिटः क्वसुः, यजादित्वाद्धातावंस्य सम्प्रसारणम् । पूर्वरूपम्, उस् इत्यस्य द्वित्वं, हलादिशेषः, सवर्णदीर्घः । शसि वसोः सम्प्रसारणं, पूर्वरूपम् । शुश्रुवानिति । श्रुधातोर्लिटः क्वसुः द्वित्वम् । उपेयिवान् । इडिति । उपपूर्वादिण्धातोः लिटः क्वसुः नित्यत्वाद्द्वित्वम् । वलादिलक्षण इट् 'नेड्वशि कृति' इति प्रतिषिद्धः, स तावत् क्वादिनियमात्पुनरुत्थितः । पुनरत्र 'वस्वेकाजाद्घसाम्' इति सूत्रेण 'एकाचश्च आदन्ताच्च घसेश्च परस्य वसोरिट् स्यात् नान्येभ्य' इत्यर्थकेन द्वित्वानन्तरमनेकाच्त्वात् प्रतिषिद्धः, सोऽयमिट् अनेन निपातनेन प्रतिप्रसूयते इति भाष्ये स्पष्टम् । इटि कृते उत्तरखण्डस्य इकारस्य यण् । अभ्यासस्य दीर्घस्तु न निपात्यते । नन्वत्र अपूर्व एव इट् निपात्यतामित्यत आह—उपेयुषीति । उगित्त्वान्नोपि वसोः सम्प्रसारणम् । प्रतिप्रसूतो वलादिलक्षण इट् तु न । तन्निमित्तस्य वकारस्य सम्प्रसारणेन विनाशेऽप्युक्त्वात् । अत्र अपूर्वस्य इटो निपातने तु अत्रापि इट् स्यादिति भावः । उपेत्यविवक्षितमिति । अत्र व्याख्यानमेव शरणम् । अश्नातेरिति । 'अश भोजने' श्नाविकरणः, क्र्यादिः, लिटः क्वसुः, द्वित्वम् 'अत आदेः' इति दीर्घः, सवर्णदीर्घः, द्विहल्त्वाऽभावाच्च जुट् । 'अश्नोतेश्च' इत्यपि न जुट्, श्नुविकरणस्यैव तत्र ग्रहणात् । नञ उपपदसमासः । 'नलोपो नञः' 'तस्मान्नुडचि' इति भावः । वचेः कर्तरीति । नन्वत्र भावकर्मणोरिति भावः । कानचि यजादित्वात्सम्प्रसारणं पूर्वरूपं

विविश्वान्। विशिना साहचर्याद्विन्दतेर्ग्रहणम्। वेत्तेस्तु विविद्वान्। 'नेड्वशि कृति' (सू २९८१) इतीण्निषेधः। 'दृशेश्च' (वा ४४५२)। ददृशिवान्-ददृश्वान्। **३१०० लटः शतृशानचावप्रथमासमानाधिकरणे ३।२।१२४॥** अप्रथमान्तेन सामानाधिकरण्ये सतीत्यर्थः। शवादि। पचन्तं चैत्रं पश्य। **३१०१ आने मुक् ७।२।८२॥** अदन्तस्याऽङ्गस्य मुगागमः स्यादाने परे। पचमानं चैत्रं पश्य। 'लडि'त्यनुवर्तमाने पुनर्लड्ग्रहणमधिकविधानार्थम्। तेन प्रथमासामानाधिकरण्येऽपि क्वचित्। सन् ब्राह्मणः। 'माङ्याक्रोशे इति वाच्यम्'। (वा २१०९)। 'मा जीवन्यः परावज्ञादुःखदग्धोऽपि जीवति'। 'माङि लुङ्' (सू २२१९) इति प्राप्ते एतद्वचनसामर्थ्याल्लट्। **३१०२ सम्बोधने च ३।२।१२५॥** हे पचन्। हे पचमान। **३१०३ लक्षणहेत्वोः क्रियायाः ३।२।१२६॥** क्रियायाः परिचायके, हेतौ चार्थे वर्तमानाद्धातोर्लटः शतृशानचौ स्तः। शयाना भुञ्जते यवनाः। अर्जयन्वसति। हरिं पश्यन्मुच्यते। हेतुः फलं कारणं च। 'कृत्यचः (सू २८३५)।

सवर्णदीर्घः। विभाषा गम। 'विभाषा गमहन' इत्यादि स्पष्टम्। लटः शतृशानचौ। 'वर्तमाने लट्' इति पूर्वसूत्रविहितस्यैव एतौ शतृशानचौ। अनन्तरस्येति न्यायादिति 'वर्तमानसामीप्ये' इत्यादिभाष्ये स्पष्टम्। शतृप्रत्यये शकारऋकारावितौ। पचन्तमिति। पाकानुकूलव्यापाराश्रयमित्यर्थः 'क्रियाप्रधानमाख्यातम्, सत्त्वप्रधानानि नामानि' इति सिद्धान्तात्। शतुः शित्त्वेन सार्वधातुकत्वात् शपि 'अतो गुणे' इति पररूपम्। शानचि शचावितौ। आने मुक्। 'अङ्गस्य' इत्यधिकृतम् 'अतो येषाम्' इति पूर्वसूत्रादनुवृत्तेन षष्ठ्या विपरिणतेन अता विशेष्यते। तदन्तविधिः। तदाह—अदन्तस्येति। मुकि ककार इत्, उकार उच्चारणार्थः। किरच्चादन्तावयवः। अनुवर्तमाने इति। 'वर्तमाने लट्', इति पूर्वसूत्रादनुवृत्तस्य लडित्यस्य षष्ठ्या विपरिणामेन उकार्थत्वाभे सतीत्यर्थः। अधिकेति। सूत्राच्चाऽनाङ्ग्रहस्यापि अर्थस्य लाभार्थमित्यर्थः। सन् ब्राह्मण इति। 'अस भुवि' शतृप्रत्यये शपो लुक्, श्नसोरल्लोपः। माङीति। माङि प्रयुज्यमाने आक्रोशे गम्ये लटः शतृशानचाविति वक्तव्यमित्यर्थः। मा जीवन्निति। न जीवत्ययम्। अनुपकारित्वात् मृतप्राय इत्यर्थः। 'मा पचमान' इत्यप्युदाहार्यम्। 'लटः शतृशानचौ' इत्येव सिद्धेः किमर्थमिदमित्यत आह—माङि लुङीति। सम्बोधने च। 'लटः शतृशानचा'विति शेषः। प्रथमासमानाधिकरणार्थं आरम्भः। पूर्वसूत्रस्थपुनर्लड्ग्रहणस्य अधिकविधानार्थत्वादेव सिद्धे प्रपञ्चार्थमिदम्। लक्षणहेत्वोः। लक्ष्यते ज्ञाप्यतेऽनेनेति लक्षणम्, ज्ञापकम्। तदाह-क्रियायाः परिचायके इति। ज्ञात्वर्थस्य लक्षणत्वे हेतुत्वे च द्योत्ये इति यावत्। कर्तरि प्रत्ययार्थः। शयाना भुञ्जते यवना इति। अत्र भोजनकालीनं शयनं भोक्तुर्यवनत्वसूचकम्। हेतावुदाहरति—अर्जयन्वसतीति।

प्रपीयमाणः सोमः । ३१०४ ईदासः ७।२।८३॥ आसः परस्याऽनस्य ईत्स्यात् । 'आदेः परस्य' (सू ४४) । आसीनः । ३१०५ विदेः शतुर्वसुः ७।१।३६॥ वेत्तेः परस्य शतुर्वसुरादेशो वा स्यात् । विद्वान् । विदन् । विदुषी । ३१०६ तौ सत् ३।२।१२७॥ तौ शतृशानचौ सत्संज्ञौ स्तः । ३१०७ लटः सद्वा ३।३।१४॥ व्यवस्थितविभाषेयम् । तेनाप्रथमासामानाधिकरण्ये प्रत्ययोत्तरपदयोः सम्बोधने लक्षणहेत्वोश्च नित्यम् । करिष्यन्तं करिष्यमाणं पश्य । करिष्यतोऽपत्यं कारिष्यतः । करिष्यद्भक्तिः । हे करिष्यन् । अर्जयिष्यन् वसति । प्रथमासामानाधिकरण्येऽपि क्वचित् । करिष्यतीति करिष्यन् । ३१०८ पूङ्यजोः शानन् ३।२।१२८॥ वर्तमाने । पवमानः । यजमानः । ३१०९ ताच्छील्यवयोवचनशक्तिषु चा-

---

र्जनाय वसतीत्यर्थः । हेतावुदाहरणान्तरमाह—हरिं पश्यन्निति । हरिदर्शनेन ससारदुःखान्मुच्यते इत्यर्थः । ननु धनाद्यर्जनस्य वाससाध्यतया कथं तस्य वासहेतुत्वमित्यत आह—हेतुः फलं कारणं चेति । इष्टसाधनताज्ञानस्य वासप्रवृत्तौ हेतुतया इष्टस्यार्जनस्यापि वासहेतुत्वमिति भावः । प्रपीयमाण इति । अत्र भिन्नपदस्थत्वात् कथं खात्वमित्यत आह—कृत्यच इति । ईदासः । आस इति पञ्चमी । आनस्येति । 'आने मुक्' इत्यतस्तदनुवृत्तेरिति भावः । विदेः शतुर्वसुः । वेत्तेरिति । 'विद ज्ञाने' इति लुप्तिकरणस्यैव ग्रहणम्, 'शतुः' परस्मैपदस्यात् विदेर्तेवन्तेश्चात्मनेपदिनात् । यद्यपि विन्दतिरभयपदी, तथापि तस्य न ग्रहणम्, 'निरनुबन्धकग्रहणे न सानुबन्धकस्य' इत्युक्तेरिति भावः । वा स्यादिति । 'तुह्योस्तातङ्' इत्यतस्तदनुवृत्तेरिति भावः । विदुषीति । ङिच्चान्ङीप्, वसोः सम्प्रसारणं, पूर्वरूपम्, षत्वम् । तौ सत् । 'लटः शतृशानचौ' इति सूत्रोपात्तौ शातृशानचौ तच्छब्दः परामृशति । तदाह—तौ शतृशानचाविति । लटः सद्वा । लटः शतृशानचौ वा स्त इत्यर्थः । व्यवस्थितेति । व्याख्यानादिति भावः । नित्यमिति । तेन तिङां निवृत्तिः । अप्रथमासामानाधिकरण्ये उदाहरति—करिष्यन्तमिति । प्रथमे परतः उदाहरति—करिष्यतोऽपत्यं कारिष्यत इति । उत्तरपदे उदाहरति—करिष्यद्भक्तिरिति । करिष्यन्तो भक्तिरिति कर्मधारयः । सम्बोधने उदाहरति—हे करिष्यन्निति । शयिष्यमाणा भोक्ष्यन्ते यवना इति लक्षणे उदाहार्यम् । हेतावुदाहरति—अर्जयिष्यन्वसतीति । प्रथमासामानाधिकरण्येऽपि क्वचिदित्यर्थः । कदाचिदित्यपि द्रष्टव्यम् । इदं च 'लृट् शेषे च' इति भविष्यदाधिकारविहिते लटयेव प्रवर्तते इति 'अनवक्लृप्त्यमर्ष' इत्यत्र भाष्ये स्पष्टम् । पूङ्यजो शानन् । षष्ठ्यर्थे षष्ठी । वर्तमाने इति । शेषपूरणमिदम् । 'वर्तमाने लट्' इत्यतस्तदनुवृत्तेरिति भावः । लृङ्ग्रहणं तु निवृत्तम् । ततश्च ण्वुलादिवत्स्वतन्त्रोऽयम्, ननु शात्रादिवच्छानादेशः । तथा च कर्तर्येवायम्, ननु भावकर्मणोः । नच शानादेशत्वाऽभावे 'सोमं पचमान' इत्यत्र कर्मणि षष्ठी स्यादिति वाच्यम्, 'न लोक' इति सूत्रे

नश् ३।२।१२६॥ एषु द्योत्येषु कर्तरि चानश्। भोगं भुञ्जानः। कवचं बिभ्राणः। शत्रुं निघ्नानः। **३११० इङ्धार्योः शत्रकृच्छ्रिणि** ३।२।१३०॥ आभ्यां शतृस्यादकृच्छ्रिणि कर्तरि। अधीयन्। धारयन्। अकृच्छ्रिणि किम्। कृच्छ्रेण अधीते धारयति। **३१११ द्विषोऽमित्रे** ३।२।१३१॥ द्विषञ्छत्रुः। **३११२ सुञो यज्ञसंयोगे** ३।२।१३२॥ सर्वे सुन्वन्तः, सर्वे यजमानाः सत्रिणः। **३११३ अर्हः प्रशंसायाम्** ३।२।१३३॥ अर्हन्। **३११४ आ क्वेस्तच्छीलतद्धर्मतत्साधुकारिषु** ३।२।१३४॥ क्विपमभिव्याप्य वक्ष्यमाणाः प्रत्ययास्तच्छीलतद्धर्मतत्साधुकारिषु कर्तृषु बोध्याः। **३११५ तृन्** ३।२।१३५॥ कर्ता कटम्। **३११६ अलंकृञ्**-

---

'तृन्' इति प्रत्याहार इयुक्तत्वात्। ताच्छील्य। चानशि शचाविती। भोगं भुञ्जान इति। भोगशील इत्यर्थः। कवचं बिभ्राण इति। यौवनबलादिति भावः। शत्रुं निघ्नान इति। निहन्तुं शक्त इत्यर्थः। अतः परत्वाऽभावाच्च मुक्। चानशः लादेशत्वाभावात् अनाःमनेपदत्वात् परस्मैपदिभ्योऽपि प्रवृत्तिः। इङ्धार्योः। शतृ-अकृच्छ्रिणीति छेदः। अकृच्छ्रम्-अदुःखम्, तदस्यास्तीति अकृच्छ्री। इङ्, धारि अनयोः द्वन्द्वात् पञ्चम्यर्थे षष्ठी। अधीयन्निति। सुखमध्येतेत्यर्थः। धारयन्निति। सुखेन धारयितेत्यर्थः। द्विषोऽमित्रे। द्विषः शतृप्रत्ययः स्यात् अमित्रे कर्तरीत्यर्थः। सुञो यज्ञ। यज्ञसंयुक्तेऽभिषवे वर्तमानात् सुनोतेः शतृप्रत्ययः इत्यर्थः। संयोगग्रहणं यज्ञस्वामिपरिग्रहार्थम्। तेन याजकेषु न भवति। तत्र सुन्वन्निति एकवचनान्तं दर्शपूर्णमासज्योतिष्टोमादिविषयम्, एककर्तृकत्वात्। बहुवचनान्तं तु सत्रविषयमेव, तत्र ऋत्विजामपि यजमानत्वादिति मत्वा आह—सर्वे सुन्वन्त इति। अर्हः प्रशंसायाम्। अर्हं इति पञ्चमी। 'शतृप्रत्यय' इति शेषः। अर्हन्निति। पूजां प्राप्तुं योग्य इत्यर्थः। अत्र प्रशस्तस्यैव पूजायोग्यत्वात् प्रशंसा गम्यते। आ क्वेस्तच्छीलतद्धर्मतत्साधुकारिषु। आङभिविधौ। तदाह—क्विपमभिव्याप्येति। 'भ्राजभासधुर्विद्युतोर्जिपृजुग्रावस्तुवः क्विप्' इति सूत्रमभिव्याप्येति यावत्। तत्र ताच्छीलिकाः प्रत्ययाः प्रायेण सोपसर्गेभ्यो नेति 'आदृगमहन' इति सूत्रे भाष्ये स्पष्टम्। तच्छीलः तत्स्वभावः, फलमनपेक्ष्य स्वभावादेव प्रवर्तमान इति यावत्। सः धर्मः यस्य सः तद्धर्मा। स्वधर्मोऽयमिति प्रवर्तमानः। तस्य धात्वर्थस्य साधुकर्ता तत्साधुकारी। तृन्। धातोस्तृन्प्रत्ययः स्यात् तच्छीलादिषु कर्तृषु। तच्छीले उदाहरति—कर्ता कटमिति। कटकरणक्रियाशील इत्यर्थः। 'न लोक' इति षष्ठीनिषेधः, 'न लोक' इति सूत्रे 'तृ'ज्ग्रहणेन 'लटः शतृ' इत्यारभ्य पुतस्सूत्रस्थनकारेण प्रत्याहाराश्रयणात्। तद्धर्मणि यथा—'मुण्डयितारः श्राविष्ठायना भवन्ति ऊढां वधूम्'। श्राविष्ठायना नाम देशविशेषीयाः वधूमुण्डनं स्वधर्मं इत्यनुष्ठातार इत्यर्थः। तत्साधुकारिणि 'कर्ता कट'मित्येवोदाहरणम्। कटं साधु करोतीत्यर्थः। अलंकृञ्। अलंकृञ्, निराकृञ्, प्रजन, उत्पच, उत्पत, उन्मद, रुचि अपत्रप, हृतु, वृधु, सह, चर एषां

निराकृञ्प्रजनात्पचोत्पतोन्मदरुच्यपत्रपवृतुवृधुसहचर इष्णुच् ३।२। १३६॥ अलङ्करिष्णुरित्यादि । निराकरिष्णुः । प्रजनिष्णुः । उत्पचिष्णुः । उत्पतिष्णुः । उन्मदिष्णुः । रोचिष्णुः । अपत्रपिष्णुः । वर्तिष्णुः । वर्द्धिष्णुः । सहिष्णुः । चरिष्णुः । **३११७ शेश्छन्दसि ३।२।१३७॥** 'वीरुधः पारयिष्णवः' । **३११८ भुवश्च ३।२।१३८ ॥** छन्दसीत्येव । भविष्णुः । कथं तर्हि 'जगत्प्रभोरप्रभविष्णु वैष्णवम्' इति । निरङ्कुशाः कवयः । चकारोऽनुक्तसमुच्चयार्थः । भ्राजिष्णुरिति वृत्तिः । एवं क्षयिष्णुः । नैतद्भाष्ये दृष्टम् । **३११९ ग्लाजिस्थश्च क्स्नुः ३।२।१३९॥** छन्दसीति निवृत्तम् । गिदयं न तु कित्, तेन स्थ ईत्वं न । ग्लास्नुः । गित्त्वान्न गुणः । जिष्णुः । स्थास्नुः । चाद्भुवः । श्र्युकः किति' (सू २३८१) इत्यत्र ककारप्रश्लेषान्नेट् । भूष्णुः । 'दंशेश्छन्दस्युपसंख्यानम्' (वा २१२९) । 'दङ्क्ष्णवः पशवः' । **३१२० असिगृधिधृषिक्षिपेः क्नुः ३।२।१४०॥** अस्नुः । गृध्नुः । धृष्णुः । क्षिप्नुः । **३१२१ शमित्यष्टाभ्यो घिनुण् ३।२।१४१ ॥** उकार उच्चारणार्थ इति काशिका । अनुबन्ध इति भाष्यम् । तेन शमिनितरा–शमिनीतरा इत्यत्र 'उगितश्च' (सू ९८७) इति ङीप्रतिषेधः । न चैवं शमी शमिनावित्यादौ नुम्प्रसङ्गः । झलग्रहणमपकृष्य

द्वादशानां द्वन्द्वात्पञ्चमी । एभ्यः तच्छीलादिषु कर्तृषु इष्णुच् स्यात् । इत्यादीति । निराकरिष्णुः, प्रजनिष्णुः, उत्पचिष्णुः, उत्पतिष्णुः, उन्मदिष्णुः, रोचिष्णुः, अपत्रपिष्णुः, वर्तिष्णुः, वर्धिष्णुः, सहिष्णुः, चरिष्णुः । णेश्छन्दसि । ण्यन्ताद्धातोरिष्णुच् स्यात् छन्दसीत्यर्थः । पारयिष्णव इति । पृभ्वातोर्ण्यन्ताद्दिष्णुचि णेर्लोपं बाधित्वा 'अयामन्ताल्वाय्न्य' इत्यय् । इदं सूत्रं वैदिकप्रक्रियायामेव व्याख्यातुमुचितम् । भुवश्च । छन्दसीत्येवेति । भूभ्वातोरिष्णुच् स्यात् तच्छीलादिषु छन्दसीत्यर्थः । अण्यन्तार्थं आरम्भः । ग्लाजिस्थश्च । निवृत्तमिति । व्याख्यानादिति भावः । क्नात् भुव इत्यनुकृष्यते । ग्ला, जि, स्था एषां द्वन्द्वात्पञ्चमी । ग्ला, जि, स्था, भू इत्येभ्यः क्स्नुः स्यात् तच्छीलादिष्वित्यर्थः । ककार इत् । 'स्थास्नु' इत्यत्र किस्वलक्षणं 'घुमास्था' 'इतीत्वमाशङ्क्य आह—गिदयमिति । सूत्रे चत्वेन ककारनिर्देश इति भावः । गित्त्वान्न गुण इति । 'क्कृकिति च' इत्यत्र गस्य चत्वेन ककारान्तःप्रश्लेषादिति भावः । ननु भूष्णुरित्यत्र इट् स्यात्, 'अयुक्तः किकिति' इति कित एव इण्निषेधात् । अस्य च गित्त्वादित्यत आह—अयुक इति । प्रश्लेषादिति । चत्वेनेति भावः । अभिगृधि । 'तच्छीलादिषु कर्तृष्वि'ति शेषः । अस्नुरिति । 'नेड्वशी'ति नेट् । गृध्नुः धृष्णुरित्यत्र कित्त्वान्न गुणः । शमित्यष्टाभ्यः । इतिशब्दः आदिपर्यायः । शमादयः दिवादौ स्थिताः । तेभ्यः अष्टाभ्यो घिनुण् स्यात् तच्छीलादिष्वित्यर्थः । विश्वमुत्तरसूत्रार्थम् । 'अकर्मकेभ्य एव विनुण्'

झलन्तानामेव तद्विधानात्। 'नोदात्तोपदेशस्य-' (सू २७६३) इति वृद्धिनिषेधः। शमी। तमी। दमी। श्रमी। भ्रमी। क्षमी। क्लमी। प्रमादी। उत्पूर्वान्मदेः अलंकृञादिसूत्रेणेष्णुञुक्तः, वासरूपविधिना घिनुणपि। उन्मादी। 'ताच्छीलिकेषु वासरूपविधिर्नास्ति' इति तु प्रायिकम्। **३।२।२ सम्पृचानुरुधाङ्यमाङ्यसपरिसृसंसृजपरिदेविसञ्ज्वरपरिक्षिपपरिरटपरिवदपरिदहपरिमुहदुषद्विषदुहदुहयुजाक्रीडविविचत्यजरजभजातिचरापचरामुषाभ्याहनश्च** ३।२।१४२॥ घिनुण्स्यात्। संपर्की। अनुरोधी। आयामी। आयासी। परिसारी। संसर्गी। परिदेवी। संज्वारी। परिक्षेपी। परिराटी। परिवादी। परिदाही। परिमोही। दोषी। द्वेषी। द्रोही। दोही। योगी। आक्रीडी। विवेकी। त्यागी। रागी। भागी। अतिचारी। अपचारी। आमोषी। अभ्याघाती। **३।२।३ वौ कषलसकत्थस्नभः** ३।२।१४३॥ विकाषी। विलासी। विकत्थी। विस्नभी। **३।२।४ अपे च लषः** ३।२।१४४॥ चाद्वौ। अपलाषी। विलाषी। **३।२।५ प्रे**

इति भाष्यम्। शमिनितरां शमिनीतरीति। शमिनशब्दात् स्त्रियां नान्तलक्षणङीबन्तात् तरबन्ताट्टाप्। ह्रस्वविकल्पः इति। भाष्यमते उगित्त्वादूह्रस्वः। काशिकामते तु उगित्त्वाऽभावान्न ह्रस्वः। नच ह्रस्वाभावे 'तसिलादिषु' इति पुंवत्त्वं शङ्क्यम्, 'संज्ञापूरण्योश्च' इति निषेधात्। ननु भाष्यरीत्या उगित्त्वाभ्युपगमे 'शमी शमिनौ' इत्यादौ 'उगिदचाम्' इति नुम् स्यादित्याशङ्क्य निराकरोति—न चैवमिति। झलग्रहणमपकृष्येति। 'नपुंसकस्य झलचः' इति उत्तरसूत्रादिति भावः। एतच्च प्रकृतसूत्रे 'युवोरनाकौ' इति सूत्रे च भाष्ये स्पष्टम्। शमादिभ्यो घिनुणि उपधावृद्धिमाशङ्क्य आह—नोदात्तेति। प्रमादीति। मान्तत्वाऽभावान्न वृद्धिनिषेधः। ननु उत्पूर्वान्मदेरुन्मादीति कथं घिनुण्। अलंकृञादिसूत्रे उत्पूर्वान्मदोऽशिष्य इष्णुचो विधानादित्यत आह—उत्पूर्वादित्यादिना। ननु कथमत्र ताच्छीलिके घिनुणि वाऽसरूपविधिप्रवृत्तिः। 'ताच्छीलिकेषु वासरूपविधिर्नास्तो'ति निषेधादित्यत आह—ताच्छीलिकेष्वति। इयं परिभाषा 'निन्दहिंस' इत्यादिवक्ष्यमाणसूत्रे ज्ञापितेति भाष्ये स्पष्टम्। प्रायिकमिति। एतच्च 'सूददीपदीक्षश्च' इति दीपग्रहणादिति 'जुचङ्क्रम्यदन्द्रम्य' इति सूत्रे भाष्ये स्पष्टम्। सम्पृचानुरुधाङ्यमाङ्यस। संपृच, अनुरुध, आङ्यम, आङ्यस, परिसृ, संसृज, परिदेवि, संज्वर, परिक्षिप, परिरट, परिवद, परिदह, परिमुह, दुष, द्विष, द्रुह, दुह, युज, आक्रीड, विविच, त्यज, रज, भज, अतिचर, अपचर, आमुष, अभ्याहन, एषां सप्तविंशतेः द्वन्द्वात्पञ्चमी। संपर्कीति। 'चजोः' इति कुत्वम्। अनुरोधीत्यादौ लघूपधगुणः। अदुपधेषु उपधावृद्धिः। परिदेवीति। 'देवृ देवने' भ्वादिः। दीव्यतस्तु एवन्तस्य न ग्रहणम्, लाक्षणिकत्वात्, अप्यन्तैः साहचर्याच्च। अभ्याघातीति। 'हनस्तोऽचिण्णलोः' इति तत्वम्। 'हो हन्तेः' इति कुत्वम्। वौ कषलस। कष, लस,

लपसद्रुमथवदवसः ३।२।१४५॥ प्रलापी। प्रसारी। प्रद्रावी। प्रमाथी। प्रवादी। प्रवासी। ३१२६ निन्दहिंसक्लिशखादविनाशपरिक्षिपपरिरट-परिवादिव्याभाषाऽसूयो वुञ् ३।२।१४६॥ पञ्चम्यर्थे प्रथमा। एभ्यो वुञ्स्यात्। निन्दकः। हिंसकः इत्यादि। ण्वुला सिद्धे वुञ्वचनं ज्ञापकं 'तच्छीलादिषु वासरूपन्यायेन तृजादयो ने'ति। ३१२७ देविक्रुशोश्चोपसर्गे ३।२।१४७॥ आदेवकः। आक्रोशकः। उपसर्गे किम्। देवयिता क्रोष्टा। ३१२८ चलनशब्दार्थादकर्मकाच्च ३।२।१४८॥ चलनार्थाच्छब्दार्थाच्च अकर्मकात् वुच् स्यात्। चलनः। चोपनः। कम्पनः। शब्दनः। रवणः। अकर्मकात् किम्। पठिता विद्याम्। ३१२९ अनुदात्तेतश्च हलादेः ३।२।१४९॥

कत्थ, स्तम्भ् एषां द्वन्द्वात्पञ्चमी। एभ्यो घिनुण् स्यात् ताच्छील्यादिष्वित्यर्थः। अपे च लषः। चाद्धाविति। वौ उपपदेऽपीत्यर्थः। अपे वौ च उपपदे लषेः घिनुण् इत्यर्थः। ताच्छील्यादिष्वेव। प्रे लप। लप, सृ, द्रु, मथ, वद, वस् एषां षण्णां द्वन्द्वात्पञ्चमी। प्रे उपपदे एभ्यः घिनुण् स्यात् ताच्छील्यादिष्वित्यर्थः। निन्दहिंस। निन्द, हिंस, क्लिश, खाद, विनाश, परिक्षिप, परिरट, परिवादि, व्याभाष, असूय एषां दशानां द्वन्द्वः। पञ्चम्यर्थे प्रथमेति। सौत्रं पुंस्त्वमेकवचनं वेति भावः। विनाशेति विपूर्वस्य नशेर्ण्यन्तस्य भाविना णिलोपेन निर्देशः। शकारादकार उच्चारणार्थः। केचित्तु 'विनाशी'ति ण्यन्तमेव पठन्ति। परिवादीति तु ण्यन्तमेव। असूयेति कण्ड्वादियगन्तः। इत्यादीति। क्लेशकः, खादकः, विनाशकः, परिक्षेपकः, परिराटकः, परिवादकः, व्याभाषकः, असूयकः। ननु 'असूयो वुञ्' इति असूयतेरेव वुञ्विधीयतां, न तु निन्दादिभ्योऽपि, तेषां ण्वुलैव सिद्धेः। लिस्वरलित्स्वरयोस्तु नास्ति विशेषः, उभयथाप्याद्युदात्तत्वात्। असूयतेस्तु ण्वुलि 'लिति' इति प्रत्ययात् पूर्वं उकार उदात्तः। वुञि तु 'ञ्नित्यादिर्नित्यम्' इति धातोरकार उदात्त इति विशेषः। तस्मादसूयतेरेव वुञ्विधिरिति युक्तमित्यत आह—ण्वुला सिद्धे इति। तृजादयो नेतीति। तच्छीलादिषु वासरूपविधिसत्त्वे हि तद्विषये ण्वुलः सरूपतया वुञा नित्यं बाधेऽपि तृजादयः स्युः। अत्र वासरूपविध्यप्रवृत्तौ तु 'तृन्' इति सूत्रेण तच्छीलादिषु तृनि प्राप्ते वुञ्विधिरर्थवान्। अतस्तच्छीलादिषु वासरूपविधिर्न प्रवर्तत इति भावः। इदं च प्रायिकम्। तत्फलं तु उत्पूर्वान्मदेरलंकृञादिसूत्रेण ष्णुञुक्तः, वासरूपविधिना घिनुणपीति मूल एवानुपदमुक्तम्। देविक्रुशोः। देवीति चुरादिण्यन्तस्य 'दिव् क्रीडा' इत्यस्य च ग्रहणम्। उपसर्गे उपपदे देवयतेः क्रुशेश्च तच्छीलादिषु वुञ् स्यादित्यर्थः। चलन। शब्द इति। 'शब्द शब्दने' चुरादिः। शब्दनं शब्दोच्चारणम्। धात्वर्थोपसंग्रहादकर्मकः। अनुदात्तेतश्च। आदिग्रहणाऽभावे हलन्तादित्यर्थः स्यात्। ततश्च जुगुप्सनः इति न स्यात्। सन्नन्तस्य हलन्तत्वाऽभावात्। अस्ति चानुदात्तेत्त्वं सन्नन्तस्य, 'गुप' इत्यनुदात्तेत्त्वस्य केव-

अकर्मकाद्युच्स्यात्। वर्तनः। वर्धनः। अनुदात्तेतः किम्। भविता। हलादेः किम्। एधिता। अकर्मकात् किम्। वसिता वस्त्रम्। **३१३० जुचङ्क्रम्यदन्द्रम्यस्गृधिज्वलशुचलषपतपदः ३।२।१५०॥** 'जु' इति सौत्रो धातुर्गतौ वेगे च। जवनः। चङ्क्रमणः। दन्द्रमणः। सरणः। पूर्वेण सिद्धे पदग्रहणं 'लषपतपद—' (सू ३१३४) इत्युकञा बाधा मा भूदिति। तेन 'ताच्छीलिकेषु परस्परं वासरूपविधिर्नास्ती'ति। तेनाऽत्रंकृत्रस्तृन्न। **३१३१ क्रुधमण्डार्थेभ्यश्च ३।२।१५१॥** क्रोधनः। रोषणः। मण्डनः। भूषणः। **३१३२ न यः ३।२।१५२॥** यकारान्ताद्युज्न स्यात्। कनूयिता। क्ष्मायिता। **३१३३ सूददीपदीक्षश्च ३।२।१५३॥** युज्न स्यात्। सूदिता। दीपिता। दीक्षिता। 'नमिकम्पि—' (सू ३१४७) इति रेण युचो बाधे सिद्धे दीपेर्ग्रहणं ज्ञापयति 'ताच्छीलिकेषु वासरूपविधिर्नास्ति' इति प्रायिकमिति। तेन कम्रा कमना युवतिः। कम्प्रा

ले प्रयोजनाऽभावेन सन्नन्तार्थत्वात्। जुचङ्क्रम्यदन्द्रम्य। जु, चङ्क्रम्य, दन्द्रम्य, स, गृधि, ज्वल, शुच, लष, पत, पद एषां दशानां द्वन्द्वात्पञ्चमी। एभ्यः तच्छीलादिषु युच् स्यादित्यर्थः। धातुपाठे जुधातोरदर्शनादाह—जु इति सौत्र इति। चङ्क्रमण इति। यञन्ताद्युच्। 'यस्य हलः' इति यकारलोपः, अतो लोपः एवं दन्द्रमणः, सरणः, गर्धनः, ज्वलनः, शोचनः, लषणः, पतनः, पदनः, इत्यप्युदाहार्यम्। पूर्वेणेति। 'अनुदात्तेतश्च हलादेः' इत्यनेनेत्यर्थः। तेनेति। उकञ् ह्ययं तच्छीलाधिकारस्थः। तत्र वाऽसरूपविधिनैव उकञा 'अनुदात्तेतश्च' हलादेः' इति विहितस्य पदेर्युचः बाधो न भविष्यतीति 'जुचङ्क्रम्य' इति युञ्विधिरनर्थकः स्यात्। अतस्ताच्छीलिकेषु परस्परं वासरूपविधिर्नास्ति इति विज्ञायते इत्यर्थः। 'निन्दहिंस' इति सूत्रे 'तच्छीलादिषु वासरूपविधिना तृजादयो ने'ति ज्ञापितम्। इह तु 'ताच्छीलिकेषु परस्परं वासरूपविधिर्नास्ती'ति ज्ञाप्यते इति न पौनरुक्त्यम्। तृन्नेति। अलंपूर्वात् कृञः अलंकृञिति सूत्रविहितेन तच्छीलाधिकारस्थेन ष्ण्वुचा 'तृन्' इति सामान्यविहितः तच्छीलाधिकारस्थो बाध्यते इत्यर्थः। क्रुधमण्डार्थेभ्यश्च। 'क्रुध कोपे' 'मडि भूषायाम्' एतदर्थेभ्यः धातुभ्यो युच् स्यात् तच्छीलादिष्वित्यर्थः। न यः। 'य' इति पञ्चम्यन्तं धातुविशेषणम्। तदन्तविधिः। तदाह—यकारान्तादिति। कनूयिता। क्ष्मायितेति। 'कनूयी शब्दे उन्दने च' 'क्ष्मायी विधूनने' 'अनुदात्तेतश्च हलादेः' इति युच् निष्पद्यते। तृनेव भवति। सूददीप। सूद, दीप, दीक्ष, एषां द्वन्द्वात्पञ्चमी। युञ्नेति। शेषपूरणमिदम्। 'अनुदात्तेतश्च' इति प्राप्तो युच् प्रतिषिध्यते। नन्विह दीपग्रहणं व्यर्थम्, 'नमिकम्पिस्म्यजसकमहिंसदीपो रः' इति विशेषविहितेन रप्रत्ययेन युचो बाधसिद्धेः। नच वाऽसरूपविधिना तद्बाधः वाच्यः, ताच्छीलिकेषु वासरूपविधेः प्रतिषेधादित्यत

कम्पना शाखा । यदि सूदैर्युज्न, कथं मधुसूदनः । नन्यादिः । ३१३४ **लषपत-पदस्थाभूवृषहनकमगमशृभ्यः उकञ्** ३।२।१५४॥ लाषुकः । पातुकः इत्यादि ३१३५ **जल्पभिक्षकुट्टलुण्टवृङः षाकन्** ३।२।१५५॥ जल्पाकः । भिक्षाकः । कुट्टाकः । लुण्टाकः । वराकः । वराकी । ३१३६ **प्रजोरिनिः** ३।२।१५६॥ प्रजवी । प्रजविनौ । प्रजविनः । ३१३७ **जिदृक्षिविश्रीण्वमाव्यथाभ्यमपरिभूप्रसूभ्यश्च** ३।२।१५७॥ जयी । दरी । क्षयी । विश्रयी । अत्ययी । वमी । अव्यथी । अभ्यमी । परिभवी । प्रसवी । ३१३८ **स्पृहिगृहिपतिदयिनिद्रातन्द्राश्रद्धाभ्य आलुच्** ३।२।१५८॥ आषाल्लयश्चुरादावदन्ताः । स्पृहयालुः । गृहयालुः । पतयालुः । दयालुः । निद्रालुः । तत्पूर्वो द्रा, तदो नान्तत्वं निपात्यते । तन्द्रालुः । श्रद्धालुः । 'शीङो

आह—नमिकम्पीति रेणेति । **रप्रत्ययेनेत्यर्थः** । प्रायिकमिति । **तथा चाऽत्र वासरूपविधिना तच्छीलिकेनापि रप्रत्ययेन युचो बाधासम्भवात् इह दीपेर्युचो निषेधोऽर्थवानिति भावः** । तेनेति । **तच्छीलिकेऽपि क्वचिद्वासरूपविधेः सत्त्वादित्यर्थः** । कम्रा कमनेति । **इच्छाशीलेत्यर्थः** । **'अनुदात्तसङ'** इति युचः **'नमिकम्पि'** इति रेण पक्षे बाध इति भावः । कम्प्रा कम्पनेति । **चलनशीलेत्यर्थः** । अत्रापि **'नमिकम्पि'** इति रेण युचः पक्षे बाध इति भावः । आक्षिपति—यदीति । **यदि 'सूददीपदीक्ष्श्च'** इति सूदेर्युंप्रतिषिध्यते तदा **'मधुसूदन'** इति कथमित्यन्वयः । समाधत्ते—नन्वादिरिति । **'सूदि'रिति शेषः । तथाच 'नन्दिग्रहि'** इति ल्युप्रत्यय इति भावः । लषपत । **एभ्यो दशभ्यः उकञ् स्यात् तच्छीलादिष्वर्थेषु** । इत्यादीति । **पादुकः । आतो युक्, स्थायुकः । भावुकः । वर्षुकः । घातुकः 'हनस्तः'** इति तत्वम् । **'हो हन्तेः'** इति कुत्वम् । **कामुकः । गामुकः । शारुकः** । जल्पभिक्ष । **एभ्यः पञ्चभ्यः षाकन् स्यात् तच्छीलादिष्वित्यर्थः । घञावितौ । स्त्रियां विश्वानूङौ** । जल्पाक इत्यादि । प्रजोरिनिः । **जुः सौत्रो धातुः । प्रपूर्वादस्मात् इनिप्रत्ययः स्यात् तच्छीलादिष्वित्यर्थः । नकारादिकार उच्चारणार्थः** । जिदृक्षि । **जि, दृ, क्षि, विश्रि, इण्, वम्, अव्यय, अभ्यम, परिभू, प्रसू, एषां दशानां द्वन्द्वः । जि जये, दृ आदरे । क्षि क्षये, क्षि निवासगत्योः । श्रिञ् सेवायां विपूर्वः । इण् गतौ । वम्—उद्गिरणे । व्यथ भयसञ्चलनयोः नञ्पूर्वः । निपातनात् नञो धातुना समासे 'न लोपो नञः'** इति नकारलोपः । **अभ गत्यादिषु अभिपूर्वः । भू सत्तायाम् परिपूर्वः । पू प्रेरणे प्रपूर्वः । एभ्यः इनिः स्यात्तच्छीलादिष्वित्यर्थः । सूतिसूयत्योस्तु सानुबन्धकत्वात् नेह ग्रहणम् । स्पृहिगृहि । स्पृहि, गृहि, पति, दयि, निद्रा, तन्द्रा, श्रद्धा, एभ्यः सप्तभ्यः आलुच् स्यात्तच्छीलादिष्वित्यर्थः** । स्पृहयालुरिति । **स्पृहधातोरदन्तादालुच्** । **'अयामन्त'** इति णेरय् **णिलोपापवादः । अवर्णोपस्य स्थानिवत्त्वाच्च लघूपधगुणः । एवं गृहयालुः । पतयालुरि-**

वाच्यः' (वा २१४०) । शयालुः । ३१३९ दाधेट्सिशदसदो रुः ३।२।१५९॥ दारुः । धारुः । सेरुः । शद्रुः । सद्रुः । ३१४० सृघस्यदः कमरच् ३।२।१६०॥ सृमरः । घस्मरः । अद्मरः । ३१४१ भञ्जभासमिदो घुरच् ३।२।१६१॥ भङ्गुरः । भासुरः । मेदुरः । ३१४२ विदिभिदिच्छिदेः कुरच् ३।२।१६२॥ विदुरः । भिदुरम् । छिदुरम् । ३१४३ इण्नशजिसतिभ्यः क्रप् ३।२।१६३॥ इत्वरः । इत्वरी । नश्वरः । जित्वरः । सृत्वरः । ३१४४ गत्वरश्च ३।२।१६४॥ गमेरनुनासिकलोपोऽपि निपात्यते । गत्वरी । ३१४५ जागुरूकः । ३।२।१६५॥ जागर्तेरूकः स्यात् । जागरूकः । ३१४६ यजजपदशां यङः ३।२।१६६॥ एभ्यो यङन्तेभ्य ऊकः स्यात् । 'दशा'मिति भाविना नलोपेन निर्देशः । यायजूकः । जञ्जपूकः । दन्दशूकः । ३१४७ नमिकम्पिस्म्यजसकमहिंसदीपो रः ३।२।१६७॥ नम्रः । कम्प्रः । स्मेरः । जसिर्नञ्पूर्वः क्रियासात-

---

स्यत्र तु अलोपस्य स्थानिवत्त्वान्नोपधावृद्धिः । निद्रालुरिति । 'द्रा कुत्सायां गतौ' निपूर्वादालुच् । तत्पूर्वो द्रेति । तच्छब्दपूर्वा द्राधातुः तन्द्रेत्यनेन गृह्यत इत्य°ः । श्रद्धालुरिति । 'श्रा'दित्यङ्ययम् , तत्पूर्वात् धाधातोरालुच् । शीङो वाच्य इति । 'आलु'जिति शेषः । दाधेट् । दा, धेट्, सि, शद्, सद् एषां द्वन्द्वात्पञ्चमी । एभ्यो रुप्रत्ययः स्यात्तच्छीलादिष्वित्यर्थः । सृघस्यदः । सृ, घसि, अद् एषां द्वन्द्वात्पञ्चमी । घसिः प्रकृत्यन्तरम् । भञ्जभास । भञ्ज, भास, मिद् एषां द्वन्द्वात् पञ्चमी । एभ्यः घुरच् स्यात् तच्छीलादिष्वित्यर्थः । घचावितौ । भङ्गुर इति । 'चजोः' इति कुत्वम् । विदिभिदि । तच्छीलादिष्वित्येव । विदेर्ज्ञानार्थस्यैव ग्रहणम् , नतु लाभार्थस्य, व्याख्यानादित्याहुः । विदुर इत्यादौ कित्त्वान्न लघूपधगुणः । इण्नशजि । इण्, नश, जि, सृ एभ्यः क्रप् स्यात् तच्छीलादिष्वित्यर्थः । कित्त्वान्न गुणः । पित्त्वं तु तुगर्थम् । गत्वरश्च । गमेरिति । गमेः क्रप् अनुनासिकलोपश्च निपात्यते इत्यर्थः । झलादिप्रत्ययपरकत्वाऽभावादनुनासिकलोपस्याऽप्राप्तिः । पित्त्वात्तकू । गत्वरीति । 'टिड्ढ' इति ङीप् । जागुरूकः । 'जागृ' इत्यस्य जागुरिति पञ्चम्यन्तं पदम् । तदाह—जागर्तेरिति । तच्छीलादिष्वित्येव । जागरूक इति । ऋकारस्य गुणः, रपरत्वम् । सिद्धरूपं तु न निपातितम् , उत्तरसूत्रे ऊक इत्यनुवृत्तिप्रसङ्गात् । यजजपदशां यङः । यज, जप, दश एषां त्रयाणां द्वन्द्वः । पञ्चम्यर्थे षष्ठी । तदाह—एभ्य इति । तच्छीलादिष्वित्येव । ननु दंशेर्नोपधत्वात् कथं दशामिति निर्देश इत्यत आह—भाविनेति । ऊके कृते सति भविष्यतो नलोपस्याऽत्र निर्देश इति यावत् । यायजूक इति । 'यस्य हलः' इति यलोपः । 'अतो लोपः' 'दीर्घोऽकितः' इत्यभ्यासस्य दीर्घः । जञ्जपूक इति । 'जपजभदहदशभञ्जपशां च' इत्यभ्यासस्य लुक् । एवं दन्दशूकः । नमिकम्पि । नमि, कम्पि, स्मि, अजस, कम, हिंस, दीप् एषां द्वन्द्वात्पञ्चम्येकवचनम् । एभ्यः सप्तभ्यो रप्रत्ययः स्यात्

त्ये वर्तते । अजस्रम्, सन्ततमित्यर्थः । कम्रः । हिंस्रः । दीप्रः । **३१४८ सनाशंसभिक्ष उः ३।२।१६८॥** चिकीर्षुः । आशंसुः । भिक्षुः । **३१४९ विन्दुरिच्छुः । ३।२।१६९॥** वेत्तेर्नुम् इषेश्छत्वं च निपात्यते । वेत्ति तच्छीलो विन्दुः । इच्छति इच्छुः । **३१५० क्याच्छन्दसि ३।२।१७०॥** 'देवाञ्जिगाति सुम्नयुः' । **३१५१ आदृगमहनजनः किकिनौ लिट् च ३।२।१७१॥** आदन्ताद्दन्ताद्गमादिभ्यश्च किकिनौ स्तश्छन्दसि तौ च लिङ्वत् । पपिः सोमम् । ददिर्गाः । बभ्रिर्वज्रम् । जग्मिर्युवा । 'जघ्निर्वृत्रममित्रियम्' । जघ्निः । 'भाषायां धाञ्कृसृगमिजनिनमिभ्यः' (वा ७२२) । दधिः । चक्रिः । सस्रिः । जग्मिः । जघ्निः । नेमिः । 'सासहिवावहिचाचलिपापतीनामुपसंख्यानम्' (वा ७२३) । यङन्तेभ्यः सह-

---

तच्छीलादिष्वित्यर्थः । अजसधातोः धातुपाठे अदर्शनादाह—जसिर्नन्पूर्व इति । **'जसु मोक्षणे'** अयं नन्पूर्वः शक्तिस्वभावात् क्रियासातत्ये वर्तते इत्यर्थः । निपातनाद्धातुना नञः समासे 'नलोपो नञः' इति नलोपः । सनाशंस । सन्, आशंस, भिक्ष एषां त्रयाणां द्वन्द्वात्पञ्चम्येकवचनम् । **'स'**निति सन्प्रत्ययान्तं गृह्यते । **'षणु दाने, 'षण सम्भक्तौ'** इत्यनयोस्तु न ग्रहणम् । गर्गादिषु विजिगीषुशब्दपाठाच्छिक्षात् । एभ्यः उप्रत्ययः स्यात् तच्छीलादिष्वित्यर्थः । आशंसुरिति । **'आङः शसि इच्छायाम्'** इत्यस्मादुः । विन्दुरिच्छुः । वेत्तेरिति । **'विद ज्ञाने'** इत्यस्मादुप्रत्यये प्रकृतेर्नुमागमः । **'इषु इच्छायाम्'** इत्यस्मादुप्रत्यये षकारस्य छत्वं च निपात्यते इत्यर्थः । वेत्तीति । धातुप्रदर्शनम् । तच्छील इति । वेदनशील इत्यर्थः । इच्छतीति । **'इषु इच्छायाम्'** इति धातुप्रदर्शनम् । इच्छुरिति । एषणशील इत्यर्थः । क्याच्छन्दसि । क्यप्रत्ययान्तादुप्रत्ययः स्यात् तच्छीलादिषु छन्दसीत्यर्थः । सुम्नयुरिति । सुम्नं सुखम् । तदात्मन इच्छतीत्यर्थे सुम्नशब्दात् क्यच् । **'न छन्दस्यपुत्रस्य'** इति निषेधात् **'क्यचि च'** इति ईत्वम् **'अकृत्सार्वं'** इति दीर्घश्च न । **'सुम्नय'** इति क्यजन्तादुप्रत्ययः अतो लोपः । आदृगम । आत्, ऋ, गम, हन, जन् एषां द्वन्द्वात्पञ्चमी । किं किन् अनयोर्द्वन्द्वः । लिट् चेति व्याचष्टे—नौ च लिङ्वदिति । तच्छीलादिष्वित्येव । पपिरिति । पाधातोः किः । द्वित्वादि, आत्त्वोपः । ददिरिति । दाधातोः किः द्वित्वादि । बभ्रिर्वज्रमिति । भृञः किः, द्वित्वादि । जघ्निरिति । हनः किः, द्वित्वादि । **'गमहन'** इत्युपधालोपः । **'हो हन्तेः'** इति कुत्वम् । जघ्निरिति । जनेः किः, द्वित्वादि । एवं किन्यपि बोध्यम् । स्वरे विशेषः । छान्दसमप्येतत्सूत्रद्वयं भाषायामित्यादिवक्ष्यमाणवार्तिकविवेचनाय इहोपन्यस्तम् । भाषायामिति । वार्तिकमिदम् । धाञ्, कृ, सृ, गमि, जनि, नमि एभ्यः षड्भ्यः किकिनौ, तौ च लिङ्वदिति वक्तव्यमित्यर्थः । दधिरित्यादि । किकिनोः कृतयोः द्वित्वादि यथासम्भवं ज्ञेयम् । नेमिरिति । नमेः किः । द्वित्वम्, एत्वाभ्यासलोपौ । सासहीति । सहेर्वौ द्वित्वादौ **'दीर्घोऽकितः'** इति दीर्घे, किकिनोः कृतयोः **'यस्य हलः'** इति यकार-

स्यादिभ्यः किकिनौ, पतेर्नीगभावश्च निपात्यते। ६१५२ स्वपितृषोर्नजिङ् ३।२।१७२॥ स्वप्नक्। तृष्णक्। तृष्णजौ। तृष्णजः। 'धृषेश्चेति वाच्यम्' इति काशिकादौ। धृष्णक्। ३१५३ शृवन्द्योरारुः ३।२।१७३॥ शरारुः। वन्दारुः। ३१५४ भियः क्रुक्लुकनौ ३।२।१७४॥ भीरुः। भीलुकः। 'क्रुकन्नपि वाच्यः' (वा २१४५) भीरुकः। ३१५५ स्थेशभासपिसकसो वरच् ३।२।१७५॥ स्थावरः। ईश्वरः। भास्वरः। पेस्वरः। कस्वरः। ३१५६ यश्च यङः ३।२।१७६॥ यातेर्यङन्ताद्वरच् स्यात्। 'अतो लोपः' (सू २३८०) तस्य 'अचः परस्मिन्—' (सू ५०) इति स्थानिवद्भावे प्राप्ते 'न पदान्त' (सू ५१) इति सूत्रेण यलोपं प्रति स्थानिवद्भावनिषेधात् 'लोपो व्योः—' (सू ८७३) इति यकारलोपः। अल्लोपस्य स्थानिवत्त्वमाश्रित्य आतो लोपे प्राप्ते 'वरे लुप्तं न स्था-

---

लोपे कृते लोपे 'सासही'ति निर्देशः। एव वहेः चलेः पतेश्च यङन्तस्य किकिन्नन्तस्य च निर्देशः। एषां निपातनस्य उपसंख्यानमित्यर्थः। तदाह-यङन्तेभ्यः सहेरित्यादिभ्य इति। नीगभाव इति। 'नीग्वञ्चु' इति प्राप्तस्य नीगागमस्याऽभाव इत्यर्थः। स्वपितृषोर्नजिङ्। पञ्चम्यर्थे षष्ठी। स्वपेः तृषेश्च नजिङ् स्यात् तच्छीलादिष्वित्यर्थः। जकारादिकार उच्चारणार्थः। ङकार इत्। स्वप्नगिति। स्वपनशील इत्यर्थः। स्वप्नजौ। स्वप्नजः। एवं तृष्णक्, तर्षणशील इत्यर्थः। धृषेश्चेति। 'नजि'ङिति शेषः। काशिकादाविति। भाष्ये तु न दृश्यते इति भावः। शृवन्द्योरारुः। पञ्चम्यर्थे षष्ठी। 'शॄ हिंसायाम्' 'वदि अभिवादनस्तुत्योः' आभ्याम् आरुप्रत्ययः स्यात्तच्छीलादिष्वित्यर्थः। भियः। भीधातोः क्रु वलुकन् एतौ स्तः तच्छीलादिष्वित्यर्थः। कित्त्वाद्व गुणः। स्थेश। 'ष्ठा' गतिनिवृत्तौ, ईश ऐश्वर्ये, भासृ दीप्तौ, पिसृ पेसृ गतौ, कस गतौ, एभ्यः वरच् स्यात्तच्छीलादिष्वित्यर्थः। ईश्वरीति तु पुंयोगे ङीष्। यश्च यङः। 'या प्रापणे' इत्यस्य धातोरनुकरणस्य या इत्यस्य 'यः' इति षष्ठ्यन्तम्। तदाह-यातेरिति। याधातोर्यङ्, द्वित्वादि। 'दीर्घोऽकितः' इत्यभ्यासस्य दीर्घः, यायाय इति यङन्ताद्वरचि विशेषमाह-अतो लोप इति। हलः परत्वाऽभावात् 'यस्य हलः' इति यकारलोपो न। यायाय वर इति स्थिते आह-लोपो व्योरिति, यकारलोप इति। ननु अतो लोपस्य 'अचः परस्मिन्' इति स्थानिवत्त्वात् अकारेण व्यवधानात् वलपरत्वाभावात् कथमिह यलोप इत्यत आह-अस्येति। तस्य अल्लोपस्य यलोपे कर्तव्ये 'न पदान्त' इति स्थानिवत्त्वनिषेधादित्यर्थः। एवञ्च यङोऽकारस्य यकारस्य च लोपे यायावर इत्यत्र 'आतो लोप इटि च' इत्याल्लोपमाशङ्क्य निराकरोति-अल्लोपस्येति। यङकारलोपस्य 'अचः परस्मिन्' इति स्थानिवत्त्वमाश्रित्य तदकारात्मकार्द्धधातुकपरत्वात् आकारस्य 'आतो लोप इटि च' इत्याल्लोपे प्राप्ते सति परिहार उच्यते इत्यर्थः। परिहारमेवाह-वरे लुप्तं न स्थानिवदिति। 'लुप्त'मिति भावे क्तः। 'न पदान्त' इति सूत्रे 'वरे' इत्यनेन वरेपरे विहितं न स्थानिवदिति लभ्यते। अल्लोपोऽयमाद्ध-

निवत्' यायावरः । ३१५७ **भ्राजभासधुर्विद्युतोर्जिपृजुग्रावस्तुवः क्विप्** ३।२।१७७॥ विभ्राट् । भाः । भासौ । धूः । धुरौ । विद्युत् । ऊर्क् । पूः । पुरौ । दृशिग्रहणस्याप्यपकर्षाज्जवतेर्दीर्घः । जूः । जुवौ । जुवः । ग्रावशब्दस्य धातुना समासः सूत्रे निपात्यते । ततः क्विप् । ग्रावस्तुत् । ३१५८ **अन्येभ्योऽपि दृश्यते** ३।२।१७८॥ क्विप् । क्षित् । भिद् । दृशिग्रहणं विध्यन्तरोपसंग्रहार्थम् । क्वचिद्दीर्घः, क्वचिद्संप्रसारणं, क्वचिद्वे, क्वचिद्ध्रस्वः । तथा च वार्तिकम्–'क्विब्वचिप्रच्छ्यायतस्तुकटप्रुजुश्रीणां दीर्घोऽसम्प्रसारणं च' (वा २१४७-४८)। 'क्विब्वची'त्यादिनोणादिसूत्रेण केषाञ्चित् सिद्धे तच्छीलादौ तृना बाधा मा भूदिति वार्तिके ग्रहणम् । वक्तीति वाक् । पृच्छतीति प्राट् । आयतं स्तौति आयतस्तूः । कटं प्रवते कटप्रूः । जुरुक्तः । श्रयति हरिं श्रीः । 'द्युतिगमिजुहोतीनां द्वे च' (वा २१४१)। दृशिग्रहणादभ्यासंज्ञा । दिद्युत् । जगत् । 'जुहोतेर्दीर्घश्च' (वा २१४६)। जुहूः ।

धातुके वरे परे विहितः । अतः तस्य स्थानिवत्त्वाऽभावान्न यलोऽकारमाश्रित्य 'आतो लोप इटि च' इत्यस्य प्रवृत्तिरित्यर्थः । एवञ्च 'न पदान्त' इति सूत्रे 'वरे' इत्यंशस्य, 'यलोपे' इत्यंशस्य च यायावर इत्युदाहरणमिति बोध्यम् । भ्राजभासधुर्विद्युतोर्जिपृजुग्रावस्तुवः । भ्राज, भास, धुर्वि, द्युत, ऊर्जि, पृ, जु, ग्रावस्तु, एभ्योऽष्टभ्यः क्विप्स्यात् तच्छीलादिषु कर्तृष्वित्यर्थः । विभ्राडिति । 'भ्राज' इति षः । भा इति । भासेः क्विपि सकारान्तस्य रुत्वविसर्गौ । धूरिति । धुर्वीधातोः क्विप् । 'राल्लोपः' इति वकारस्य लोपः । धुर् इति रेफान्तम् । सुलोपः । 'वोरुपधायाः' इति दीर्घः । पूरिति । पृधातोः क्विप् । 'उदोष्ठ्य' इत्युत्वम् , रपरत्वम् । पुर् इति रेफान्तम्, सुलोपे 'वोः' इति दीर्घः । जुधातोः क्विपि दीर्घं साधयितुमाह—दृशिग्रहणस्याप्यपकर्षादिति । उत्तरसूत्रादिति भावः । अत्र व्याख्यानमेव शरणम् । ननु 'ग्रावस्तु' इति कथं समस्तनिर्देशः सुबन्तस्य ग्रावशब्दस्य धातुना समासाऽसम्भवादित्यत आह—ग्रावशब्देति । ग्रावस्तुदिति । पित्त्वात्तुक् । अन्येभ्योऽपि । क्विबिति । शेषपूरणमिदम् । भ्राजभास इत्यादिसूत्रोपात्तापेक्षया अन्येभ्योऽपि धातुभ्यः तच्छीलादिषु कर्तृषु क्विप् दृश्यते इत्यर्थः । विध्यन्तरेति । विधीयते इति विधिः कार्यम् । कार्यान्तरोपसङ्ग्रहार्थमित्यर्थः । तदेव दर्शयति—क्वचिद्दीर्घ इत्यादि । क्विब्वचीत्यादिनेति । 'क्विब्वचिप्रच्छ्यायतस्तुकटप्रुजुश्रीणां दीर्घोऽसम्प्रसारणं च' इत्यौणादिकसूत्रेणेत्यर्थः । तृना बाधा मा भूदिति । वासरूपविधिस्तु तावच्छीलिकेषु नेति भावः । वागिति । वचधातोः क्विप्, वचनात् उपधाया दीर्घः, 'वचिस्वपि' इति सम्प्रसारणाऽभावश्च । एवं कटप्रूरित्यत्र दीर्घः । प्राडिति । वचनाच्च सम्प्रसारणम् । जुरुक्त इति । 'भ्राजभास' इत्यत्रेति शेषः । अतोऽत्र तदग्रहणं मास्त्विति भावः । श्रीरिति । श्रिञः क्विपि दीर्घः । द्युतीति । 'द्युतिगमिजुहो-

'द् भये अस्य ह्रस्वश्च'। दीर्यति। दद्दत्। 'ध्यायतेः सम्प्रसारणं च' (वा २१५१)। धीः। ३१५९ **भुवः संज्ञान्तरयोः** ३।२।१७९॥ मित्रभूर्नाम कश्चित्। धनिकाऽधमर्णयोरन्तरे यस्तिष्ठति विश्वासार्थं स प्रतिभूः। ३१६० **विप्रसम्भ्यो ङ्वसंज्ञायाम्** ३।२।१८०॥ एभ्यो भुवो ङुः स्यान्न तु संज्ञायाम्। विभुर्व्यापकः। प्रभुः स्वामी। संभुर्जनिता। संज्ञायां तु विभूर्नाम कश्चित्। 'मितद्ववादिभ्य उपसंख्यानम्' (वा २१५२)। मितं द्रवतीति मितद्रुः। शतद्रुः। शम्भुः। अन्तर्भावितण्यर्थोऽत्र भवतिः। ३१६१ **धः कर्मणि ष्ट्रन्** ३।२।१८१॥ धेटो धात्रश्च कर्मण्यर्थे ष्ट्रन्स्यात्। षो ढीषर्थः। 'धात्री जनन्यामलकीवसुमत्युपमातृषु।' ३१६२ **दाम्नीशसयुयुजस्तुतुदसिसिचमिहपतदशनहः करणे** ३।२।१८२॥ दावादेः ष्ट्रन्स्यात्करणेऽर्थे। दान्त्यनेन दात्रम्। नेत्रम्। ३१६३ **तितुत्रतथसिसुसरकसेषु च** ७।२।९॥ एषां दशानां कृत्प्रत्ययानामिण्न स्यात्। शस्त्रम्। योत्रम्। योक्त्रम्। स्तोत्रम्। तोत्रम्। सेत्रम्। सेक्त्रम्।

त्यादीनां द्वित्वं क्ङिच्च' इति वाच्यमित्यर्थः। 'पूर्वोऽभ्यासः' इत्यत्र षाष्ठद्विर्वचनस्य एव पूर्वखण्डस्याऽभ्यासस्य सञ्ज्ञाबचनादाह—दृशिग्रहणादिति। 'अन्येभ्योऽपि दृश्यते' इत्यत्र इत्यर्थः। ततश्चाऽभ्यासकार्यं हलादिशेषादीति भावः। दिद्युदिति। 'द्युतिस्वाप्योः' इति सम्प्रसारणम्। जगदिति। गमेः क्विप् 'गमः क्वौ' इति मलोपे तुक्। जुहोतेर्दीर्घश्चेति। वार्तिकमिदम्। चात् क्विप्त्वे। ह्रस्वश्चेति। वार्तिकमिदम्। ददृदिति। ह्रस्वे कृते तुक्। ध्यायतेरिति। वार्तिकमिदम्। चात् क्विप्। धीरिति। ध्यैधातोः क्विपि सम्प्रसारणं, पूर्वरूपे 'हलः' इति दीर्घ इति भावः। अत्र 'ध्यायतेः सम्प्रसारणं च' ह्रस्वगुणादिषु पठित्वादिदं वार्तिकं मास्त्वित्याहुः। वस्तुतस्तु उणादिसूत्राणि न पाणिनीयानि किन्तु ऋष्यन्तरप्रणीतानीति वक्ष्यते अतो न पौनरुक्त्यशङ्का। भुवः सञ्ज्ञान्तरयोः। 'क्ङि'इति शेषः। 'सञ्ज्ञान्तरयोरेवे'ति नियमार्थं सूत्रम्। सञ्ज्ञायामुदाहरति—मित्रभूर्नामेति। अन्तरे उदाहरति—धनिकेत्यादि। यावद्द्रव्यभाविन्यः सञ्ज्ञाः। प्रतिभूशब्दस्तु सत्येव पुरुषे कदाचिन्न भवति, ऋणे प्रतिदत्ते सति प्रातिभाव्यस्य निवृत्तेः। विप्रसम्भ्यः। 'डु भृञ् सञ्ज्ञायां'मिति छेदः। विभुरिति। डित्त्वसामर्थ्याद्भस्यापि टेर्लोपः। सम्भुरिति। सम्भवति उत्पादयतीति सम्भुः। तदाह—जनितेति। मितद्ववादिभ्यः इति। मितद्ववादिसिद्ध्यर्थं डुप्रत्ययस्य उपसङ्ख्यानमित्यर्थः। शम्भुरिति। शं सुखं भवति उत्पादयतीत्यर्थः। तदेवोपपादयति—अन्तर्भावितेति। धः कर्मणि ष्ट्रन्। धेटः कृतात्वस्य धात्रस्य ध इति पञ्चम्यन्तम्। तदाह—धेट इत्यादि। धकारात् तकारस्य ष्टुत्वसम्पन्नटकारेण निर्देशः, चस्य ह्रस्वसञ्ज्ञायां लोपे सति ष्टुत्वसम्पन्नस्य टस्य निवृत्तिः। तदाह—धात्रीत्यादि। दाम्नी। दाप्, नी, शस, यु, युज, स्तु,

मेढ्रम्। पत्रम्। दंष्ट्रा। नद्भ्री। **३१६४ हलसूकरयोः पुवः ३।२।१८३॥** पूङ्-पूञोः करणे ष्ट्रन्स्यात्, तच्चेत्करणं हलसूकरयोरवयवः। हलस्य सूकरस्य वा पोत्रम्। मुखमित्यर्थः। **३१६५ अर्तिलूधूसूखनसहचर इत्रः ३।२।१८४॥** अरित्रम्। लवित्रम्। धवित्रम्। सवित्रम्। खनित्रम्। सहित्रम्। चरित्रम्। **३१६६ पुवः संज्ञायाम् ३।२।१८५॥** पवित्रम्। येनाज्यमुत्पूयते, यच्चाऽनामिकावेष्टनम्। **३१६७ कर्तरि चर्षिदेवतयोः ३।२।१८६॥** पुवः इत्रः स्यात् ऋषौ करणे, देवतायां कर्तरि। ऋषिर्वेदमन्त्रः। तदुक्तमृषिणेति दर्शनात्। पूयतेऽनेनेति पवित्रम्। देवतायां तु 'अग्निः पवित्रं स मा पुनातु'।

॥ इति पूर्वकृदन्तप्रकरम् ॥

तुद, सि, सिच, मिह, पत, दश, नह, एषां त्रयोदशानां द्वन्द्वः। 'दाप् लवने' इत्यस्य पकारस्य स्थाने 'यरोऽनु' इति कृतमकारस्य निर्देशः। अत्र शसेः पतेश्च त्रप्रत्यये इट-माशङ्क्य आह—तितुत्रत। ति, तु, त्र, त, थ, सि, सु, सर, क, स एषां दशानां द्वन्द्वः। अत्र 'सरेरित्येकम्। ति, तन्तिः, 'स्त्रियाम्' इति क्तिन्। तु, सक्तुः 'तनिगमि' इत्यादिना तुप्रत्ययः। त्र, शस्त्रम्, पत्रम्। 'दाम्नी' इति त्रप्रत्ययः। त, हस्तः। औणादिकः तप्रत्ययः। क्तप्रत्यये तु हसितमित्येव। थ, कुष्ठम्। औणादिकः थप्रत्ययः। सि कुक्षिः। कुषेरौणादिकः क्सिप्रत्ययः। सु, इक्षुः, इषेरौणादिकः क्सुप्रत्ययः। सर, अक्षरम्, अशेः सरन्। क, शल्कः, शलेः कः। स, वासः, 'वदेः सः'। मेढ्रमिति। 'मिह सेचने' त्रः। ढत्वधत्वष्टुत्वढलोपाः। दंष्टेति। दंशधातोः त्रः। किङ्प्रत्ययाभावान्नलोपो न। सूत्रे दशेति तपा निर्देशात् 'दंशसञ्ज' इति नलोपः। केचित्तु दशेत्यकार उच्चारणार्थः। नलोपनिर्देशात् क्वचिदन्यस्मिन्नपि प्रत्यये अकृङित्यपि नलोप इति 'दशना दन्तः' इत्याहुः। नद्भ्रीति। नह्यते अनयेति विग्रहः। चर्मरज्जुः। 'नह बन्धने' त्रः। 'नहो धः' 'झषस्तथोः' इति तस्य धः। षित्त्वान्ङीष्। हलसूकरयोः पुवः। पोत्रमिति। 'तितुत्रतथसिसुसर' इति नेट्। अर्तिलूधू। अर्ति, लू, धू, सू, खन, सह, चर एषां सप्तानां द्वन्द्वात्पञ्चमी। पुवः सञ्ज्ञायाम्। 'इत्र' इति शेषः। करणे इत्येव। पवित्रमिति। पूयते अनेनाऽऽज्यमिति विग्रहः। तदाह—येनाज्यमिति। पूयते आचमनोदकादिकमनेनेति विग्रहं मत्वा आह—यच्चानामिकेति। अनामिका उपकनिष्ठिकाङ्गुलिः। कर्तरि च। पवित्रमिति। पावमान्यादिसूत्रम्। अग्निः पवित्रमिति। पुनातीत्यर्थः। सामान्याभिप्रायमेकवचनं नपुंसकत्वं च।

इति श्रीवासुदेवदीक्षितविदुषा विरचितायां सिद्धान्तकौमुदीव्याख्यायां बालमनोरमाख्यायां तृतीयाध्यायस्य द्वितीयपादे पूर्वकृदन्तप्रकरणं समाप्तम्।

अथोणादयः ॥ २५ ॥

१ कृवापाजिमिस्वदिसाध्यशूभ्य उण् । करोतीति कारुः, शिल्पी कारकश्च । 'आतो युक्—' (सू २७६१) वातीति वायुः । पायुर्गुदस्थानम् । जयत्यभिभवति रोगान् जायुः औषधम् । मिनोति प्रक्षिपति देहे ऊष्मागमिति मायुः पित्तम् । स्वादुः । साध्नोति परकार्यं साधुः । अश्नुते आशु शीघ्रम् । 'आशुर्व्रीहिः पाटलः स्यात् ।' **२ छन्दसोणः** । 'मान आयौ' । **३ दृसनिजनिचरिचटिभ्यो ञुण्** । दार्यत इति दारु । 'स्नुः प्रस्थः सानुरस्त्रियाम्' । जानु । जानुनी । इह 'जनिवध्योश्च' (सू २५१२) इति न निषेधः । अनुबन्धद्वयसामर्थ्यात् ।

अथ कृवापाजीत्यादीन्युणादिसूत्राणि मूले प्रौढमनोरमायां च स्फुटं व्याख्यातानि । अथाप्यस्माभिरपि अनतिविस्तरेण व्याख्यायन्ते । तानि चेमानि सूत्राणि शाकटायनमुनिप्रणीतानि नतु पाणिनिना प्रणीतानीति, 'उणादयो बहुल'मिति सूत्रे भाष्ये 'नाम च धातुजमाह निरुक्ते व्याकरणे शकटस्य च तोकम्' इति वार्तिकव्याख्यावसरेऽभिहितम् । उणादीनां शास्त्रान्तरपठितानां साधुत्वाभ्यनुज्ञानार्थं बहुलग्रहणमिति कैयटः । नन्वेषां पाणिनीयत्वे शास्त्रान्तरशब्दे युज्यते । उणादिप्रत्ययान्ताः शब्दाः पाणिनिमतेऽव्युत्पन्ना एव । अत एव 'आयनेयी' इति सूत्रे 'प्रातिपदिकविज्ञानाच्च भगवतः पाणिनेः सिद्धम्, उणादयो ह्यव्युत्पन्नानि प्रातिपदिकानी'ति भाष्ये उक्तम् । अत एव च 'आदेशप्रत्यययोः' इति सूत्रभाष्ये 'उणादयो ह्यव्युत्पन्नानि प्रातिपदिकानी'त्युक्त्वा 'तर्हि सर्पिषा यजुषेत्यादौ अप्रत्ययत्वात् षत्वाभावमाशङ्क्य, बहुलग्रहणात् प्रत्ययसंज्ञामवलम्ब्य षत्वं साधितम्, व्युत्पत्तिपक्षश्च निराकृतः । अतोऽप्युणादिसूत्राणां न पाणिनीयत्वम् । अत एव 'अजेर्व्यघञपोः' इति सूत्रभाष्ये अजधातोर्युप्रत्यये प्रकृतेर्वीभावे वायुशब्दो व्युत्पादितः । उणादिसूत्राणां पाणिनीयत्वे हि 'कृवापाजी'त्युणादिसूत्रेणोप्रत्ययमाश्रित्यैव व्युत्पाद्येत । एवञ्च क्वचिद्भाष्ये उणादीनां व्युत्पन्नत्वाश्रयणं शास्त्रान्तरमूलकमेवेति शब्देन्दुशेखरे प्रपञ्चितम् । तथा च 'क्विबची'त्युणादिसूत्राणां, तथाविधवार्तिकानां च न पौनरुक्त्यशङ्का । अथोणादयः । कृवापाजि । डु कृञ् करणे, वा गतिगन्धनयोः, पा पाने, जि अभिभवे, डु मिञ् प्रक्षेपणे, स्वद आस्वादने, साध संसिद्धौ, अशू व्याप्तौ, एषां द्वन्द्वात् पञ्चमी । एभ्य उण्प्रत्ययः स्यात्कर्त्रर्थे इत्यर्थः । कारुरिति । कर्तरि उणि 'अचो ञ्णिति' इत्यनेन वृद्धौ च रूपम् । 'विश्वकर्मणि ना कारुस्त्रिषु कारकशिल्पिनोः' इति मेदिनी । बाधातोरुणप्रत्यये युग्विधिं स्मारयति—आतो युगिति । पायुर्गुदस्थानमिति । उणि 'आतो युक्' इति भावः । 'गुदं स्वपानं पायुर्ना' इत्यमरः । 'पा रक्षणे' इत्यस्मादुणि तु रक्षकोऽप्यभिधीयते । जायुरिति । उणि वृद्धौ आयादेशे रूपम् । 'अगदो जायुः' इत्यमरकोशः । डु मिञ् प्रक्षेपणे इत्यस्मादुणि वृद्धिं बाधित्वा 'मीनातिमिनोतिदीङां ल्यपि च' इत्यादिना आत्वे 'आतो युक्चिण्कृतोः' इति युकि रूपम् । 'मायुः पित्तं कफः

चारु रम्यम्। 'चाटु प्रियं वाक्यम्'। मृगय्वादित्वात्कुप्रत्यये 'चटु' इत्यपि। ४ किञ्जरयोः श्रिणः। किं शृणातीति किंशारुः सस्यशूकं, बाणश्च। जरामेति जरायुः गर्भाशयः। 'गर्भाशयो जरायुः स्यात्'। ५ त्रो रश्च लः। तरन्त्यनेन वर्णा इति तालुः। ६ कृके वचः कश्च। कृकेन गलेन वक्तीति कृकवाकुः। 'कृकवाकुर्मयूरे च सरटे चरणायुधे' इति विश्वः। भृमृशीतृचरित्सरितनिधनिमिमस्जिभ्य उः। भरति बिभर्ति वा भरुः, स्वामी हरश्च। म्रियन्तेऽस्मिन्

श्लेष्मा' इत्यमरः। स्वादुरिति। स्वदते रोचते इति स्वादुः पटः। विशेष्यनिघ्नोऽयम्। स्वादु फलमित्यादि बोध्यम्। साध्नोति परकार्यमित्यर्थे कर्तरि उण्। आशु शीघ्रमिति। विलम्बाऽभावमात्रपरत्वे क्लीबम्। तद्विशिष्टद्रव्यपरत्वे तु त्रिलिङ्गमिति बोध्यम्। 'उणादयो बहुलम्' इति बहुलवचनान्नुचयानुसारेण व्यवस्था। रहेस्त्यागे इत्यस्मादुणि उपधावृद्धौ राहुरिति भवति। एवं वस निवास इत्यस्मादुण्। वसत्यस्मिन्सर्वमिति वासुः। वासुश्चासौ देवश्च वासुदेवः। यद्यपि वसुदेवस्यापत्यमित्यर्थे 'ऋष्यन्धकवृष्णिकुरुभ्यश्च' इत्यणि वासुदेव इति रूपं सिद्धम्, तथापि तदुत्पत्त्यनन्तरमिति भावः। छन्दसीणः। उणित्यनुवर्तते। इण् गताविति धातोः छन्दसि उण् भवतीत्यर्थः। एति गच्छतीत्यायुः। पुंलिङ्गोऽयम्। दृसनिजनि। दृ विदारणे, षणु दाने, जन जनने, चर गतौ, चट भेदने, एषां द्वन्द्वात्पञ्चमी। दार्विति। 'काष्ठं दार्विन्धनं स्वेधः' इत्यमरः। 'अचोञ्णिति' इति वृद्धिः। सानुः प्रस्थः। अस्मिन्नर्थे कोशं प्रमाणयति—स्नुः प्रस्थः सानुरित्यमिति। जनधातोर्णुणि रूपमाह—जानु इति। 'अत उपधायाः' इत्यनेनोपधावृद्धिरिति भावः। ननु यदुक्तम् अत उपधाया वृद्धौ जानु इति रूपमिति तदसङ्गतम् 'जनिवध्योश्चे'त्यनेनानयोरुपधाया वृद्धिर्न स्यात् चिणि ञ्णिति कृति चेत्यर्थकेन वृद्धिनिषेधादित्याशङ्क्याह—अनुबन्धद्वयसामर्थ्यादिति। एके नैवानुबन्धेनाऽन्यत्र वृद्धौ अत्र निषेधे च सिद्धे द्वयनुबन्धकरणम् अत्रापि वृद्धिर्भवतीत्येति ज्ञापनार्थमिति बोध्यम्। चरधातोर्णुणि उपधावृद्धौ चारु इति रूपम्। नपुंसकलिङ्गोऽयम्। चाटु इति। ननु उपधावृद्धेर्नित्यत्वात् चाटु इत्येव भाव्यम्, ननु चटु इति, प्रदुष्यते तु कवयः कथमित्याशङ्क्यायामाह—मृगय्वादिष्वादिति। किंजरयोः श्रिणः। किं जर एतयोः धृ इण् आभ्यां णुण् स्यात्। यथासंख्यमन्वयः। किमि शृधातोर्णुण्युदाहरति—किंशारुरिति। सस्यशूकमिति। 'किंशारुर्ना सस्यशूके विशिखे कङ्कपक्षिणि' इति मेदनी। त्रो रश्च लः। त्रः रः इति छेदः। तृ प्लवनतरणयोरित्यस्मात् णुण् स्यात् रेफस्य च लकारो भवतीत्यर्थः। तरन्त्यनेनेति तालुः। वृद्धौ रेफस्य लकार इत्यर्थः। कृके वचः कश्च। कृके उपपदे वचधातोः णुण् स्यात्। चकारस्य च ककार इत्यर्थः। 'चजोः कु घिण्यतोः' इत्यनेनाऽप्राप्तौ कविधिरयम्। कृकवाकुरिति। वचधातोर्णुणि उपधावृद्धौ चस्य कत्वे रूपम्। कृकवाकुशब्दार्थं विशेषयन् कोशमाह—कृक

भूतानि मरुर्निर्जलदेशः। शेते शयुः अजगरः। तरुर्वृक्षः। चरन्ति भक्षयन्ति देवता इममिति चरुः। त्सरुः खड्गादिमुष्टिः। तनुः स्वल्पम्। तन्यते कर्मपाशोऽनया इति तनुः, शरीरं च। 'स्त्रियां मूर्तिस्तनुस्तनूः। धनुः शस्त्रविशेषः। 'धनुषा च धनुर्विदुः।' धनुरिवाऽञ्जनि वक्रः' इति श्रीहर्षः। मयुः किन्नरः। 'मद्गुः पानीयकाकिका' इति रभसः। न्यङ्कादित्वात्कुत्वं, जश्त्वेन सस्य दः। ८ **अण**श्च। 'लवलेशकणाऽणवः।' चात्कटिवटिभ्याम्। कटति रसनां कटुः। वटति वदतीति वटुः। ९ **धान्ये नित्**। धान्ये वाच्येऽण उप्रत्ययः स्यात्, स च नित्। नित्त्वादाद्युदात्तः। 'प्रियङ्गवश्च मेऽणवश्च मे।' 'व्रीहिभेदस्त्वणुः पुमान्।' निद्ग्रहणं 'फलिपाटि–' इत्यादिसूत्रमभिव्याप्य संबध्यते। १० **शृस्वृस्निहित्रप्यसिवसिहनिक्लिदिवन्धिमनिभ्यश्च**। शृणातीति शरुः। शरुरायुधकोपयोः। स्वरुर्वज्रम्। स्नेहुर्व्याधिः। चन्द्र इत्यन्ये। त्रपु सीसम्। 'पुंसि भूम्न्यसवः प्राणाः'। 'वसुर्हदेऽग्नौ योक्त्रेऽशौ वसु तोये धने मणौ'। हनुर्वक्त्रैकदेशः। क्लेदुश्चन्द्रः। बन्धुः। मनुः। चात् 'बिदि अवयवे' बिन्दुः। ११ **स्यन्देः सम्प्रसारणं धश्च**। 'देशे नदविशेषेऽब्धौ सिन्धुर्ना सरिति स्त्रियाम्' इत्यमरः। १२ **उन्देरिच्चादेः**। उनत्ति इन्दुः। १३ **ईषेः किच्च**। ईषेरुः स्यात्, स च कित्, आदेरिकारादेशश्च।

वाकुर्मयुर चेत्यादिना। भृमृशीङ् । भृम्, भरणे, मृङ् प्राणत्यागे, शीङ् स्वप्ने, तॄ प्लवनतरणयोः, चर गतौ, त्सर छद्मगतौ, तनु विस्तारे, धन धान्ये, डु मिम् प्रक्षेपणे, डु मस्जो शुद्धौ एषां द्वन्द्वात्पञ्चमी। एभ्यः उः प्रत्ययः स्यात्। उणि प्रकृते इविधानं वृद्धयभावार्थम्। भृञ्धातोरुप्रत्यये उदाहरति—भरुरिति। स्वामी हरश्चेति। 'भरुः स्वर्णे हरे पुंसि' इति कोशादिति भावः। शयुरिति। 'अजगरे शयु'रित्यमरादाह—शयुरजगर इति। अणश्च। 'अण् शब्दे' इत्यस्मादुप्रत्ययः स्यात्। अणुः। चकारप्रयोजनमाह—चादिति। कटे वर्षावरणे, वटे वेष्टने, आभ्यामपि उप्रत्ययो भवतीत्यर्थः। वटुरिति। 'वटुर्द्विजसुतः स्मृतः' इति मेदिनी। धान्ये नित्। अण् इत्यनुवर्तते, उरिति च। अणुधातोर्धान्यरूपेऽर्थे उप्रत्ययः, स च नित् भवतीत्यर्थः। निरवप्रयोजनमाह—अनुदात्त इति। अभिव्याप्येति। तस्मिन्नपि सूत्रेऽनुवर्तत इत्यर्थः। शृस्वृस्निहि। शृ हिंसायां, स्वृ शब्दोपतापयोः, स्निह उपतापे, त्रपूष् लज्जायां, असु क्षेपणे, वस निवासे, हन हिंसागत्योः, क्लिदू आर्द्रीभावे, बन्ध बन्धने, मन ज्ञाने, एषां द्वन्द्वात्पञ्चमी। उरित्यनुवर्तते। त्रपु मोसामात। तद्धि अग्निं दृष्ट्वा त्रपते लज्जत इव। स्यन्देः। 'स्यन्दू प्रस्रवण' इत्यस्मात् उप्रत्ययः स्यात्, सम्प्रसारणं यकारस्य भवति, दकारस्य धकारश्च भवति। उन्देरिच्चादेः। उनत्ति क्लेदयति विरहिण इति इन्दुः। उप्रत्ययो भवति आदेश्चकारस्य इकारश्च भवति। ईषेः किच्च। ईष्धातोरुप्रत्ययः स्यात्, स च

ईषते हिनस्ति इषुः, शरः। 'इषुद्रुग्योः'। १४ स्कन्देः सलोपश्च। कन्दुः। १५ सृजेरसुम् च। चात्सलोपः उप्रत्ययश्च। रज्जुः। १६ कृतेराद्यन्तविपर्ययश्च। ककारतकारयोर्विपर्ययः। तर्कुः ऽअत्रवेष्टकम्। १७ नावञ्चेः। न्यङ्क्वादित्वात्कुत्वम्। नियतमञ्चति न्यङ्कुर्मृगः। १८ फलिपाटिनमिमनिजनां गुक्पटिनाकिधतश्च। फलेर्गुक् फल्गुः। पाटेः पटिः। पाटयतीति पटुः। नम्यतेऽनेन नाकुर्वल्मीकम्। मन्यत इति मधु। जायत इति जतु। १९ वलेर्गुक्च। 'वल संवरणे' वल्गुः। २० शृः कित्सन्वच्च। श्यतेरुः स्यात्, स च कित् सन्वच्च। शिशुर्बालः। २१ यो द्वे च। ययुरश्वोऽश्वमेधीयः। सन्वदिति प्रकृते द्वेग्रहण-

---

कित्, आदेरीकारस्य इकारादेशश्च। इषुः। स्कन्देः सलोपश्च। स्कन्दिर् गतिशोषणयोरित्यस्मात् धातोरुप्रत्ययः स्यात्, सकारस्य लोपश्च। कन्दुः। स्कन्द्यतेऽस्मिन् जनताप इति कन्दुः। सृजेरसुम् च। सृज विसर्गे इत्यस्मात् उप्रत्ययः स्यात्, तत्सन्नियोगेनासुम्, आदेः सकारस्य लोपश्चेत्यर्थः। असुमो मित्त्वादन्त्यादचः परो भवति। सृ असृज् इति स्थिते ऋकारस्य यणि, सस्य श्चुत्वेन शः, जश्त्वेन जः, आदेः सकारस्य लोपः, उप्रत्यये रज्जुरिति भवति। कृतेराद्यन्तविपर्ययश्च। कृती छेदने इत्यस्मात् उप्रत्ययो भवति। आदेः ककारस्यान्ते निवेशः। अन्त्यस्य तकारस्यादौ निवेशः। उप्रत्यये परतो गुणः। तर्कुरिति रूपम्। सच यन्त्रविशेषः। नावञ्चेः। अञ्चु गतावित्यस्मात् नावुपसर्गे उप्रत्ययः स्यात्। कुत्वविधिं स्मारयति—न्यङ्क्वादित्वादिति। न्यङ्कुर्मृग इति। 'न्यङ्कुर्मुनौ मृगे पुंसि' इति मेदिनी। फलिपाटिनमिमनिजनाम्। फल निष्पत्तौ, पट गतौ, एयन्तस्याऽऽत्र पाटीति ग्रहणम्, णम प्रह्वत्वे शब्दे, मन ज्ञाने, जनी प्रादुर्भावे, एषां द्वन्द्वात्षष्ठी। एभ्य उप्रत्ययो भवति। जनामिति षष्ठी उत्तरत्र विधीयमानगुणाश्रयेण। गुणित्यागमः कित्त्वालिङ्गात्। इतरे आदेशाः। अत्र 'एकापि षष्ठी विषयभेदाद्भिद्यते' इति गुणापेक्षया अवयवषष्ठी, इतरादेशान्प्रति तु स्थानषष्ठीति बोध्यम्। वस्तुतस्तु 'अनागमानां सागमका आदेशा' इति पक्षस्यापि परिभाषेन्दुशेखरादौ दर्शनात् स्थानषष्ठ्यपि सम्यगेव। फलधातोरुप्रत्यये गुणागमेऽन्तावयवे कृते फल्गु इति रूपम्। पाटेरुप्रत्यये प्रकृतिभूतपाटेः पाट आदेशः। इकारः 'इक्ष्तिपौ धातुनिर्देशे' इत्युक्तरीत्या बोध्यः। पटुरिति रूपम्। नाकुर्वल्मीकमिति। नमधातोर्नाकिरादेशः। 'वामलूरश्च नाकुश्च वल्मीकं पुंनपुंसकम्' इत्यमरः। मन्विति। मनधातोरुप्रत्यये धकारेऽन्तादेशे रूपम्। जन्विति। जनधातोरुप्रत्यये नकारस्य तकारोऽन्तादेशः। वलेर्गुक् च। वल संवरण इत्यस्माद्धातोः उप्रत्ययो भवति, तत्सन्नियोगेन प्रकृतेर्गुणागमश्च। वल्गु इति रूपम्। अत्र केचित् वल्गु इति पठन्ति, तत् 'तद्वल्गुना युगपदुन्मिषतेन तावत्' इत्यादिलक्ष्यविरोधादुपेक्ष्यम्। शः कित्सन्वच्च। शो तनूकरणे इत्यस्मादुप्रत्ययः, स च कित्, सन्वच्च भवति। शिशुरिति। शो इत्यस्मादुप्रत्यये तस्य

मित्वनिवृत्त्यर्थम्। २२ **कुर्भ्रश्च**। बभ्रुः। 'बभ्रुर्मुन्यन्तरे विष्णौ बभ्रू नकुलपिङ्गलौ।' चादन्यतोऽपि। चक्रुः कर्ता। जघ्नुर्हन्ता। पपुः पालकः। २३ **पृभिदिव्यधिगृधिधृषिभ्यः**। कुः स्यात्। पुरुः। भिनत्ति भिदुर्वज्रम्। 'ग्रहिज्या–' (सू २४१२) इति सम्प्रसारणम्। विरहिणं विध्यति विधुः। 'विधुः शशाङ्के कर्पूरे हृषीकेशे च राक्षसे।' गृधुः कामः। धृषुर्दक्षः। २४ **कृञोरुच्च**। करोतीति कुरुः। गृणातीति गुरुः। २५ **अपदुःसुषु स्थः**। 'सुषामादिषु च' (सू १०२२) इति षत्वम्। अपष्टु प्रतिकूलम्। दुष्टु। सुष्टु। २६ **रपेरिच्चोपधायाः**। अनिष्टं रपतीति रिपुः। २७ **अर्जिदृशिकम्यमिपशिबाधामृजिपशितुग्भ्यो दीर्घहकाराश्च**। अर्जयति गुणानृजुः। सर्वानविशेषेण पश्यतीति पशुः। कन्तुः कन्दर्पः। अन्धुः कूपः। 'पांशुर्ना न द्वयो रजः।' 'तालव्या अपि दन्त्याश्च

किस्वात् 'आदेच' इत्यात्वे तस्य द्वित्वे 'सन्यतः' इत्यभ्यासस्येत्वे 'आतो लोप इटि च' इत्याकारलोपः। तस्माजादाबार्धधातुकञ्छिति विधानात्। तथा च शिशुरिति रूपम्। यो द्वे च। या प्रापण इत्यस्य य इति षष्ठ्यन्तम्। या प्रापण इत्यस्मादुप्रत्ययो भवति, प्रकृतेर्द्वित्वं च भवतीत्यर्थः। सम्बत्त्वे तु 'सन्यतः' इतीत्वं स्यात्। तस्मात्स न विहितः। तदेवाह—सन्वदितीत्यादिना। कुर्भ्रश्च। चकारात् द्वे इत्यनुवर्तते। भृञ् भरण इत्यस्मात्कुप्रत्ययो भवति, प्रकृतेर्द्वित्वं चेत्यर्थः। भरतीति बभ्रुः। कोशमाह—बभ्रुर्मुन्यन्तरे विष्णौ बभ्रू नकुलपिङ्गलौ इति। धरणिकोशोऽयम्। ननु चक्रुरित्यादि कथमित्याशङ्क्यायामाह—चादन्यतोऽपीति। अन्येभ्योऽपि धातुभ्यः कुप्रत्ययः, प्रकृतिद्वित्वं च भवतीत्यर्थः। जघ्नुरिति। 'गमहन' इत्युपधालोपः। पृभिदिव्यधिगृधिधृषिभ्यः। पॄ पालनपूरणयोः, भिदिर् विदारणे, व्यध ताडने, गृधु अभिकाङ्क्षायां, धृषा प्रागल्भ्ये, एषां द्वन्द्वात्पञ्चमी। एभ्यः कुः स्यात्। पुरुरिति। कुप्रत्यये परतः 'उदोष्ठ्यपूर्वस्य' इत्युत्वम्। रपरत्वम्। विधुरित्यत्र प्रक्रियामाह—ग्रहिज्येति सम्प्रसारणमिति। व्यध धातोस्ताडनार्थत्वादाह—विरहिणमिति। कोशं प्रमाणयति—विधुः शशाङ्क इत्यादिना। विधुकोशोऽयम्। कृञोरुच्च। डु कृञ् करणे, गॄ निगरणे इत्याभ्यां कुः स्यात्। उकारः अन्तादेशश्च रपरः। कुरुः, गुरुरिति रूपम्। अपदुःसुषु स्थः। अप, दुस्, सु एषु उपपदेषु स्थाधातोः कुप्रत्ययः स्यात्। आतो लोपे अपष्टु दुष्टु सुष्टु इत्यादि रूपम्। रपेरिच्चोपधायाः। रपधातोः कुप्रत्ययः स्यात्, उपधाया इकारादेशश्च। अर्जिदृशि। अर्ज अर्जने, इशिर् प्रेक्षणे, कमु कान्तौ, अम गत्यादिषु, पशि नाशने सौत्रोऽयं धातुः, बाध लोडने, एषां षण्णां द्वन्द्वात षष्ठी। एभ्यः कुप्रत्ययः स्यात् तत्सन्नियोगेन प्रकृतिभूतानां षण्णामर्त्यादीनां मध्ये अर्जिदृशोः ऋज पश एतौ सर्वादेशौ, कमेस्तुगागमः पक्षिरादित्। इदित्त्वान्नुम्। दीर्घोऽनेन विधीयते। बाधधातोरन्त्यस्य इकारादेशः। एकापि षष्ठी विषयभेदाद्भिद्यत इत्युक्तत्वात्। षष्ठ्या आदेशागमयोरन्वयः। कन्तुः

सम्बसूकरपांसवः ।' बाधते इति बाहुः । 'बाहुः स्त्रीपुंसयोर्भुजः ।' २८ **प्रथिभ्रदिभ्रस्जां सम्प्रसारणं सलोपश्च ।** त्रयाणां कुः सम्प्रसारणं, भ्रस्जेः सलोपश्च । पृथुः । मृदुः । न्यङ्क्वादित्वात्कुत्वम् । भृजति तपसा भृगुः । २९ **लङ्घिबंह्योर्नलोपश्च ।** लघुः । 'वालमूललघ्वलमङ्गुलीनां वा लो रत्वमापद्यते' (वा ४७९८) । रघुर्नृपभेदः । बहुः । ३० **ऊर्णोतेर्नुलोपश्च ।** ऊरु सक्थिः । ३१ **महति ह्रस्वश्च ।** उरु महत् । ३२ **श्लिषेः कश्च ।** श्लिष्यतीति श्लिकुर्भृत्यः, उद्यतो ज्योतिश्च । ३३ **आङ्परयोः खनिशृभ्यां डिच्च ।** आ खनतीत्याखुः । परं शृणातीति परशुः । पृषोदरादित्वादकारलोपात्पर्शुरपि । ३४ **हरिमितयोर्द्रुवः ।** 'द्रु गतौ' अस्मात् हरिमितयोरुपपदयोः कुः, स च डित् । हरिभिर्द्रूयते हरिद्रुर्वृक्षः । मितं द्रवति मितद्रुः समुद्रः । ३५ **शते च ।** शतधा द्रवति शतद्रुः । बाहुलकात्केवलादपि । द्रवत्यूर्ध्वमिति द्रुर्वृक्षः, शाखा च । तद्वान्द्रुमः । ३६ **खरुशङ्कुपायुनीलङ्गुलिगु ।** पञ्चैते कुप्रत्ययान्ता निपात्यन्ते । खनते रेफ-

---

मश्नुतः । पथिभ्रदिभ्रस्जाम् । प्रथ प्रख्याने, भ्रद, मर्दने, भ्रस्ज पाके, एभ्यः कुप्रत्ययः स्यात् सम्प्रसारणं च । भ्रस्जधातवयवसकारस्य लोपश्चेत्यर्थः । सलोप इत्यभ्राऽसम्भवात् भ्रस्जधातावेवान्वेति । प्रथधातोः कुप्रत्यये सम्प्रसारणे पृथुरिति रूपम् । भृगुरित्यत्र कुत्वं समर्थयते—न्यङ्क्वादित्वादिति । लङ्घिबंह्योर्नलोपश्च । लघि गतौ, बहि वृद्धौ, आभ्यां कुप्रत्ययः स्यात् , नकारलोपश्च । लघु बहु इति रूपम् । लघु इत्यत्र विशेषमाह—वालमूललघ्वलमङ्गुलीनां वा लो रत्वमापद्यते । 'ल' इति षष्ठ्यन्तम् । एतदवयवस्य लकारस्य रत्वं वा आपद्यत इत्यर्थः । एवं च रघुः इति रूपम् । ऊर्णोतेर्नुलोपश्च । ऊर्णुञ्धातोः कुप्रत्ययः स्यात्, तत्संनियोगेन नुकारस्य लोपश्च । ऊरु इति रूपम् । महति ह्रस्वश्च । महति विशेष्ये ह्रस्वश्च भवति । उरु इति रूपम् । श्लिषेः कश्च । श्लिष आलिङ्गन इत्यस्मात् कुप्रत्ययः,कश्चान्तादेशः । श्लिकुरित्यस्यार्थान्तरमाह—उद्यतो ज्योतिश्चेति । आङ्परयोः । आङ्पराभ्यां खनु अवदारणे, शृ हिंसायां, आभ्यां कुप्रत्ययः, स च डिच्च भवति । डित्त्वाट्टिलोपः । आखुरिति । आखनतीति । 'भूमि'मिति शेषः । परं शृणातीति । शार्शृं हिनस्तीत्यर्थः । पर्शुरित्यत्र व्युत्पत्तिमाह—पृषोदरादित्वादिति । हरिमितयोर्द्रुवः । द्रु गतावित्यस्माद्धातोर्हरिमितयोरुपपदयोः कुप्रत्ययः स्यात्, स च डिच्च भवति । हरिद्रुरिति । कुप्रत्ययः, डित्त्वात् टिलोपः । मितद्रुरिति चेत्यमेव रूपम् । शते च । शतशब्दे चोपपदे द्रु गतावित्यस्माद्धातोः कुप्रत्ययो भवति, स च डिदिति सूत्रार्थः । टिलोपः । द्रुरित्यत्र कथं कुप्रत्ययः केवलात्कुप्रत्ययविधेः कुत्राप्यदृष्टत्वादित्यत आह—बाहुलकादिति । तद्वानिति । 'द्रुद्रुभ्यां मः' इति मत्वर्थीयो मप्रत्ययः । खरुशङ्कुपायुनीलङ्गुलिगु । खनु अवदारणे, शकि शङ्कायां,

श्चान्तादेशः। खरुः कामः क्रूरो मूर्खोऽश्वश्च। 'शङ्कुर्ना कीलशल्ययोः।' पिबतेरीत्वं युगागमश्च। पीयुर्वायसः कालः सुवर्णं च। निपूर्वाल्लगि गतावस्मात्कुर्नेर्दीर्घश्च। नीलङ्गुः कृमिविशेषः शृगालश्च। 'नीलाङ्गुः' इति पाठान्तरम्। तत्र धातोरपि दीर्घः। लगे सङ्गे, अस्य अत इत्वं च। लगतीति लिगु चित्तम्। लिगुर्मूर्खः। **३७ मृगय्वादयश्च**। एते कुप्रत्ययान्ता निपात्यन्ते। मृगं यातीति मृगयुर्व्याधः। देवयुर्धार्मिकः। मित्रयुर्लौकयात्राभिज्ञः। आकृतिगणोऽयम्। **३८ मन्दिवाशिमथिचतिचङ्क्यङ्क्विभ्य उरच्**। मन्दुरा वाजिशाला। वाशुरा रात्रिः। मथुरा। चतुरः। चङ्कुरो रथः। अङ्कुरः। खर्जूरादित्वादङ्कूरोऽपि। **३९ व्यथेः सम्प्रसारणं किच्च**। 'विथुरश्चोररक्षसोः'। **४० मुकुरदर्दुरौ**। मुकुरो दर्पणः। बाहुलकान्मकुरोऽपि। 'दृ विदारणे' धातोर्द्विर्वचनमभ्यासस्य रुक्टिलोपश्च। 'ददुरस्तोयदे भेके

पा पाने, निपूर्वः लगि गतौ, लगे सङ्गे, इत्येतेभ्यः पञ्चभ्यो धातुभ्यः कुप्रत्यये एते निपात्यन्ते। निपातनमेवाह—खनते रेफश्चान्तादेश इति। नकारस्य रेफे आदेशे खरुरिति रूपम्। खरुरित्यस्यार्थं विवृणोति—काम इत्यादिना। 'खरुः पतिवरा कन्येत्यपि बोध्यम्। शङ्कुशब्दं कोशपूर्वकं विवृणोति-शङ्कुर्नेति। 'शङ्कुः सीसे गरे शस्त्रे सङ्ख्यापादपभेदयोः। यादोभेदे च पापे च स्थाणावपि च दृश्यते॥' इति विश्वः। पीयुरिति। ईत्त्वं युगागमश्च निपात्यते। नीलङ्गुरिति। 'नीलङ्गुः स्यात् कृमौ पुंसि भग्नभरालयां तु योषिति' इति मेदिनी। मृगय्वादयश्च। मृगयुः इत्यादयः शब्दाः कुप्रत्ययान्ता निपात्यन्ते। मृगयुः देवयुः इत्यादयः उदाहरणम्। आकृतिगण इति। तेन पीलुपाण्डुरित्यादिसिद्धिः। मन्दिवाशि। मदि स्तुत्यादौ, वाशृ शब्दे, मन्थ विलोडने, चते याचने, चङ्क इति सौत्रो धातुः, अकि लक्षणे, एभ्य उरच् स्यात्। मन्दुरा। 'वाजिशाला तु मन्दुरा' इत्यमरः। वाशुरेति। 'वाशुरा वाशितारात्र्याः' इति मेदिनी। चङ्कुर इति। 'चङ्कुरः स्यन्दने दक्षे' इति मेदिनी। नन्वङ्कुर इति कथम्, अनेनोरप्रत्यये अङ्कुरशब्दस्यैव साधुत्वादित्याशङ्क्यायाह—खर्जूरादित्वादिति। तेन ऊरप्रत्यये अङ्कूरशब्दोऽपि साधुरेवेति भावः। व्यथेः सम्प्रसारणं किच्च। व्यथ भयसञ्चलनयोरित्यस्मादातोऽरच् स्यात्। स च कित्। धातोः सम्प्रसारणं चेत्यर्थः। 'विथुर' इत्युदाहरणम्। न चाऽत्र उरचः किरवविधानेनैव 'ग्रहिज्ये'ति धातोः सम्प्रसारणे सिद्धे पृथक् सम्प्रसारणविधानं व्यथेमिति वाच्यम्, ग्रहिज्येति सूत्रे तवर्गचतुर्थान्तव्यधधातो ग्रहणात्, अस्य च तवर्गद्वितीयान्तत्वेन तेनाऽप्राप्तेः। मुकुरदर्दुरौ। मकि मण्डने, दृ विदारणे, इत्यनयोः मुकुर दर्दुर इति निपात्यते इत्यर्थः। आद्ये उरच्, धातोरुपधाया उकारश्च निपात्यते। नन्वेवं कथं मकुर इति, अनेन निपातितस्य उपधाया उरवस्य नित्यत्वादित्यत आह—बाहुलकादिति। बाहुलकात् उपधाया उत्त्वाबकल्प इति भावः। दृधातोर्निपातनमाह—धातोर्द्विर्वचनमित्यादिना। दृधातोर्द्वित्वे गुणे

वाद्यभाण्डाऽद्रिभेदयोः ।' 'दर्दुरा चाण्डिकायां स्याद्ग्रामजाले च दर्दुरम् ।' इति विश्वः । ४१ **मद्गुरादयश्च** । उरजन्ता निपात्यन्ते । माद्यतेर्गुक् । मद्गुरो मत्स्यभेदः । 'कबृ वर्णे' रुमागमः । कर्बुरं श्वेतरक्तसोः ।' बध्नातेः खर्जूरादित्वादुरोऽपि । 'बन्धूरबन्धुरौ स्यातां नम्रसुन्दरयोस्त्रिषु' इति रन्तिदेवः । 'कोकतेर्वा कुक् च' (ग १९५) कुक्कुरः—कुकुरः । ४२ **असेरुरन्** । असुरः । प्रज्ञाद्यण् , आसुरः । ४३ **मसेश्च** । पञ्चमे पादे 'मसेरूरन्' इति वक्ष्यते । 'मसूरा मसुरा व्रीहिप्रभेदे पण्ययोषिति' 'मसूरा मसुरा वा ना वेश्याव्रीहिप्रभेदयोः' । मसूरी पादरोगे स्यादुपधाने पुनः पुमान्' 'मसूरमसुरौ च द्वौ' इति विश्वः । ४४ **शावशेरात्तौ** । 'शु' इत्याश्वर्थे । श्वशुरः । 'पतिपत्न्योः प्रसूः श्वश्रूः श्वशुरस्तु पिता तयोः' इत्यमरः । ४५ **अविमह्योष्टिषच्** । अविषः । महिषः । ४६ **अमेर्दीर्घश्च** । 'आमिषं त्वस्त्रियां मांसे तथा स्याद्भोग्यवस्तुनि ।' ४७ **रुहेर्बृद्धिश्च** । 'रङ्कशम्बररौहिषाः' । 'रौहिषो मृगभेदे स्याद्रौहिषं च तृणं मतम्' इति संसारावर्तः । ४८ **तवेर्णिद्वा** । 'तव' इति सौत्रो धातुः । 'तविष–ताविषावन्धौ स्वर्गे च' । स्त्रियां तविषी–ताविषी नदी देवकन्या भूमिश्च । 'तविषी बलम्' इति वेदभाष्यम् । ४९

अभ्यासस्योरदत्वे हलादिशेषे अभ्यासस्य रुक् टिलोपेन अरित्यस्यापहारे उरचि दर्दुर इति रूपमिति भावः । दर्दुरशब्दार्थं विवृण्वन् कोशमाह—दर्दुरस्तोयदे भेक इत्यादिना । केचित्तु दृधातोर्गुणो दुगागमश्च उरचप्रत्ययसन्नियोगेन निपात्यत इत्याहुः—मद्गुरादयश्च । मदी हर्षे, बन्ध बन्धने, कबृ वर्णे, इत्यादयः, उरजन्ता निपात्यन्त इत्यर्थः । मदी हर्षे इत्यस्मादुरच् । तत्सन्नियोगेन गुणागमश्च निपात्यते । कबृ वर्ण इत्यस्मादुरच् , तत्सन्नियोगेन रुमागमो विधीयते । मित्त्वादन्त्यादचः परो भवति । बन्धुर इति । ननु बन्धूर इति कथमित्यत आह—खर्जूरादीति । कोकतेर्वा कुक् । कुकुरः कुक्कुर इति रूपद्वयम् । वाग्रहणात्कुको वैकल्पिकत्वात् । असेरुरन् । असुर इति । उरचि प्रकृते उरन् विधानात् स्वरे भेदः । आसुर इत्यत्र प्रक्रियामाह—प्रज्ञाद्यणिति । स्वार्थिकोऽणिति भावः । मसेश्च । मसी परिणामे । 'उरन्निति वेषः । मसुरा इति रूपम् । मसूरा इति शब्दं साधयति—मसेरूरन्निति वक्ष्यत इति । शावशेरात्तौ । शु इति कृताकारलोप आशुशब्दः तस्मिन्नुपपदे अशू व्याप्तावित्यस्मात् उरन् आत्तौ गम्यमानायामित्यर्थः । श्वशुर इति रूपम् । अमरकोशमाह—पतिपत्न्योरिति । अविमह्योष्टिषच् । अव रक्षणे, मह पूजायामाभ्यां टिषच् प्रत्ययो भवति । टचाविसौ । टित्त्वं ङीषर्थम् । अविषः अविषी । महिषः महिषी । अमेर्दीर्घश्च । अमधातोष्टिषच् भवति, प्रकृतेरकारस्य दीर्घश्च भवति । आमिषमिति रूपम् । रुहेर्बृद्धिश्च । रुह बीजजन्मनि इत्यस्मात् टिषच् भवति प्रकृतेर्बृद्धिश्च । रौहि-

नञि व्यथेः। 'अव्यथिषोऽब्धिसूर्ययोः'। अव्यथिषी धरारात्र्योः। ५० **किलेर्बुक्च**। किल्बिषम्। ५१ **इषिमदिमुदिखिदिछिदिभिदिमन्दिचन्दितिमिमिहिमुहिमुचिरुचिरुधिबन्धिशुषिभ्यः किरच्**। इषिरोऽग्निः। मदिरा सुरा। 'मुदिरः कामुकाऽभ्रयोः' इति विश्वमेदिन्यौ। खिदिरश्चन्द्रः। 'छिदिरोऽसिकुठारयोः'। भिदिरं वज्रम्। मन्दिरं गृहम्। स्त्रियामपि। 'मन्दिरं मन्दिरापि स्यात्' इति विश्वः। 'चन्दिरौ चन्द्रहस्तिनौ'। तिमिरं तमोऽक्षिरोगश्च। मिहिरः सूर्यः। 'मुहिरः काम्यसभ्ययोः'। मुचिरो दाता। रुचिरम्। रुधिरम्। वधिरः। शुष शोषणे। शुषिरं छिद्रम्। शुष्कमित्यन्ये। ५२ **अशेर्णित्**। 'आशिरो वह्निरक्षसोः'। ५३ **अजिरशिशिरशिथिलस्थिरस्फिरस्थविरखदिराः**। अजेर्वीभावाऽभावः। अजिरमङ्गणम्। शशेरुपधाया इत्वम्। 'शिशिरः स्याद्तोर्भेदे तुषारे शीतलेऽन्यवत्' । अथ मोचने, उपधाया इत्वं रेफलोपः। प्रत्ययरेफस्य लत्वम्। शिथिलम्। ष्ठास्फाय्योष्टिलोपः। स्थिरं निश्चलम्। स्फिरं प्रभूतम्। तिष्ठतेर्बुक् ह्रस्वत्वं च। स्थविरः। खदिरः। बाहुलकाच्छीङो बुक् ह्रस्वत्वं च। शिबिरम्।

षमिति रूपम्। तवेर्णिदा। **तवेति सौत्रो धातुः, अस्माद्विच्, स च णित् विकल्पेन भवतीत्यर्थः। णिरभावपक्षे उपधावृद्धिः। तदभावे वृद्ध्यभावः।** नञि व्यथेः। **नञि उपपदे व्यथधातोः टिषच् भवति। अव्यथिषः। टित्वात् स्त्रियां ङीप्। अव्यथिषी।** किलेर्बुक् च। **किलधातोः टिषच् प्रकृतिभूतधातोर्बुगागमश्च किल्बिषमिति रूपम्।** इषिमदि। **इषु इच्छायां, मदी हर्षे, मुद हर्षे, खिद दैन्ये, छिदिर् द्वैधीकरणे, भिदिर् विदारणे, मदि स्तुत्यादौ, चदि आह्लादे, तिमि आर्द्रीभावे, मिह सेचने, मुह वैचित्ये, मुचॢ मोक्षणे, रुच दीप्तौ, रुधिर् आवरणे, बन्ध बन्धने, शुष शोषणे, एषां द्वन्द्वात्पञ्चमी। एभ्यः किरच् स्यात्।** इषिर इति। **किरत्वान्न लघूपधगुणः।** अशेर्णित्। **अश भोजन इत्यस्मात्किरच् स्यात्, स च णित् भवति। णित्त्वादुपधावृद्धिः।** आशिर इति रूपम्। अजिरशिशिर। **अज गतिक्षेपणयोः, शश प्लुतगतौ, अथ मोचने, ष्ठा गतिनिवृत्तौ, स्फायी वृद्धौ, ष्ठा गतिनिवृत्तौ, खद हिंसायां, एभ्यः किरचि कृते निपातनम्। प्रथमतः अज गतिक्षेपणयोरित्यस्मात् किरचि प्रकृतेर्वीभावाऽभावो निपात्यते। शिशिरमित्यत्राह—**शशेरुपधाया इति। **शश प्लुतगतावित्यस्मात् किरचि उपधाभूतस्याऽकारस्य स्थाने इत्वं निपात्यते। शिशिर इति रूपम्। शिथिलशब्दे आह—अथधातोः किरचि उपधाया इत्वमित्यादिना। प्रत्ययस्थस्य रेफस्य लत्वम् शिथिलमिति रूपम्। स्थिरस्फिरशब्दयोराह—**ष्ठास्फाय्योरिति। **स्थविरशब्दे आह—**तिष्ठतेरिति। **तिष्ठतेः किरचि तस्य नियोगेन धातोर्बुक्, आकारस्य ह्रस्वश्च निपात्यत इत्यर्थः। खदिरो वृक्षभेदः। शिबिरशब्दं साधयति—**शीङ इति। **शीङ् स्वप्ने इत्यस्मात् किरचि प्रकृतेर्बुक्, ईत्वा-**

५४ सलिकल्यनिमहिभडिभण्डिशण्डिपिण्डितुण्डिकुकिभूभ्य इलच्। सलति गच्छति निम्नमिति सलिलम्। कलिलम्। अनिलः। महिला। पृषोदरादित्वान्महेलाऽपि। भड इति सौत्रो धातुः। 'भडिलौ शूरसेवकौ'। भण्डिलो दृतः कल्याणं च। शिण्डिलो मुनिः। पिण्डिलो गणकः। तुण्डिलो मुखरः। कोकिलः। भविलो भव्यः। बाहुलकात्कुटिलः। **५५ कमेः पश्च।** कपिलः। **५६ गुपादिभ्यः कित्।** गुपिलो राजा। तिजिलो निशाकरः। गुहिलं वनम्। **५७ मथिलादयश्च।** मथ्यन्तेऽत्र रिपवो मिथिला नगरी। पथिलः-पथिकः। **५८ पतिकठिकुठिगडिगुडिदंशिभ्यः एरक्।** पतेरः पक्षी गन्ता च। कठेरः कृच्छ्रजीवी। कुठेरः पर्णाशः। बाहुलकान्नुम्न। गडेरो मेघः। गुडेरो गुडकः। दंशेरो हिंस्रः। **५९ कुम्बेर्नलोपश्च।** कुबेरः। **६० शदेस्त च।** शतेरः शत्रुः। **६१**

रस्य ह्रस्वत्वं च निपात्यते। शिबिरमिति रूपम्। सलिकल्यनिमहि। षल गतौ, कल संख्याने, अन प्राणने, मह पूजायां, भडि परिभाषणे, भडि कल्याणे, शडि रुजायां, पिडि सङ्घाते, तुडि तोडने, कुक आदाने, भू सत्तायाम्। सलिलमिति। सलतीति सलिलमिति। निम्नप्रदेशमिति शेषः। जलस्य निम्नगात्वादिति भावः। 'सलिलं कमलं जलम्' इत्यमरः। कलिलमिति। 'कलिलं गहनं समे' इत्यमरः। अनिलो वायुः। महिलेति। पूज्येत्यर्थः। ननु कथं महेलेति, इलचि महिला इत्यस्य साधनादित्यत आह—पृषोदरादित्वादिति। इकारस्य गुण इति भावः। तथाच श्रीहर्षः'परमहेलारतोऽप्यपारदारिकः' इति प्रायुङ्क्त। परस्य महेला स्त्री तस्यां रतोऽपि अपारदारिक इति विरोधाभासाऽलङ्कारः। परमा उत्कृष्टा हेला क्रीडा तस्यां रत इति विरोधपरिहारः। कुट कौटिल्ये इत्यस्यानुपादानमाह—बाहुलकादिति। कमेः पश्च। कमु कान्तावित्यस्मात् इलच् स्यात्, तस्सन्नियोगेन धातोः पकारः अन्तादेशो भवति। कपिल इति रूपम्। 'कपिला रेणुकायां च शिशपागोविशेषयोः। पुण्डरीककरिण्यां स्त्री वर्णभेदे त्रिलिङ्गकम्। नाऽनले वासुदेवे च मुनिभेदे च कुक्कुरे।'इति मेदिनी। गुपादिभ्यः कित्। गुपू रक्षणे, तिज निशाने, गुहू संवरणे, एभ्यः इलच्, स च कित्। किरवाच्च लघूपधगुणः। गुपिलः। तिजिलः। गुहिलः। मिथिलादयश्च। मिथिलादय इलचप्रत्ययान्ता निपात्यन्ते। मिथिला इत्यत्र मन्थ विलोडने इत्यस्मात् इलचि तस्य किरवात्। अनुनासिकलोपोऽकारस्य इकारो निपात्यते। पथे गतावित्यस्मात्पथिल इति रूपम्। पतिकठिकुठि। पत्लृ गतौ, कठ कृच्छ्रजीवने, कुठि कृच्छ्रजीवने, गड सेचने गुड रक्षायां, दंश दशने, एषां द्वन्द्वात् पञ्चमी। एभ्यः एरक् स्यात्। पतेरः, कठेरः, कुठेरः। ननु कुठिधातोरिदित्वात् 'इदितो नुम्धातोः'इति नुम् स्यादत आह-बाहुलकादिति कुम्बेर्नलोपश्च। कुबि आच्छादने इत्यस्मात् एरक्। कुबेर इति रूपम्। शदेरत च। शदॢ शातन इत्यस्मात् एरक् स्यात्,

मूलेरादयः। एरगन्ता निपात्यन्ते। मूलेरो जटा। गुधेरो गोप्ता। गुहेरो लोहघातकः। मुहेरो मूर्खः। ६२ **कवेरोतच्च पश्च**। कपोतः पक्षी। ६३ **भातेर्डवतुः**। भातीति भवान्। ६४ **कठिचकिभ्यामोरन्**। कठोरः। चकोरः। ६५ **किशोरादयश्च**। किंपूर्वस्य शृणातेष्टिलोपः किमोऽन्त्यलोपः। किशोरोऽश्वशावः। सहोरः साधुः। ६६ **कपिगडिगण्डिकटिपटिभ्यः कोलच्**। कपीति निर्देशाज्जलोपः। कपोलः। गडोलगण्डोलौ गुडकपर्यायौ। कटोलः कटुः। पटोलः। ६७ **मीनातेरूरन्**। मयूरः। ६८ **स्यन्देः सम्प्रसारणं च**। सिन्दूरम्। ६९ **सितनिगमिमसिसच्यविधाञ्क्रुशिभ्यस्तुन्**। सिनोतीति सेतुः। 'तितुत्र–' (सू ३१६३) इति नेट्। तन्तुः। गन्तुः। मस्तु दधिमण्डम्। सच्यत इति सक्तुः। अर्धर्चादिः। 'ज्वरत्वर–' (सू २६५४) इत्यूठ्। तत्र क्ङितीत्यनुवर्तत इति मते तु बाहुलकात्।

तकारश्चान्तादेशः। शतेर इति रूपम्। मूलेरादयः। एरगन्ता निपात्यन्ते। मूलेर इति। मूल प्रतिष्ठायामित्यस्मादेरक्। गुधेर इति। गुध परिवेष्टने। गुहेर इति। गुहू संवरणे। मुहेर इति। मुह वैचित्ये। कवेरोतच्। पश्च। कवेरोतच् पश्चेति च्छेदः। कवृ वर्णे इत्यस्मात् ओतच् स्यात् पकारश्चान्तादेशः। कपोतः पक्षिविशेषः। 'कपोतः स्यात्त्रिग्रकण्ठे पारावतविहङ्गयोः' इति मेदिनी। भातेर्डवतुः। भातेरिति भा दीप्तावित्यस्य श्तिपा निर्देशः। भवानिति। सर्वनामशब्दोऽयम्। कठिचकिभ्यामोरन्। कठ कृच्छ्रजीवने, चक तृप्तौ, आभ्यामोरन् प्रत्ययः स्यात्। कठोरः चकोर इति रूपम्। किशोरादयश्च। एते ओरन्प्रत्ययान्ता निपात्यन्ते। किंपूर्वस्येति। किंपूर्वस्य शृ हिंसायामिति धातोरोरन् तस्मिन्परे शृणातेः टिलोपः किंशब्दान्तस्य मकारस्य लोपश्च निपात्यत इत्यर्थः। सहोर इति। षह मर्षणे इत्यस्मान्निपातनम्। कपिगडि। कपि चलने, गड सेचने, गडि वदनैकदेशे, कटे वर्षावरणयोः, पट गतौ, एषां द्वन्द्वात् पञ्चमी। एभ्यः कोलच्प्रत्ययो भवति। कपोलः। गडोलः। गण्डोलः। कटोलः। पटोलः। ननु कपि चलन इत्यस्य इदित्त्वान्नुम्स्यादित्यत आह–कपीति। निर्देशादिति। कम्पीति निर्देशे कर्तव्ये नलोपकरणपूर्वकं निर्देशः नलोपविवक्षार्थं भवतीति भावः। मीनातेरूरन्। गुणे अयादेशे मयूर इति रूपम्। स्यन्देः सम्प्रसारणं च। स्यन्दू प्रस्रवण इत्यस्मात् ऊरन्प्रत्ययो भवति, प्रकृतिभूतस्य स्यन्दू इत्यस्य सम्प्रसारणं च भवति। सिन्दूरमिति रूपम्। सिन्दूरस्तबभेदे स्यात् सिन्दूरं रक्तचूर्णके' इति मेदिनी। सितनिगमि। षिञ बन्धने, तनु विस्तारे, गमॢ गतौ, मसी परिणामे, सच समवाये, अव रक्षणे, डु धाञ् धारणपोषणयोः, क्रुश आक्रोशे एषां द्वन्द्वात् पञ्चमी। एभ्यस्तुन्प्रत्ययो भवतीत्यर्थः। सेतुः। ननु इडागमः स्यादित्यत आह—तितुत्रेति। नेडिति। अव रक्षण इत्यस्मात्तनि आह–ज्वरत्वरेत्यूठिति। अव तु इति स्थिते वकारस्य सम्प्रसारणे उकारे गुणे ओतुरिति रूपम्। मतान्तरे आह—बाहुलकादिति। क्रोष्टुशब्दात्सुप्रत्यये 'तृज्वत्क्रोष्टुः' इत्यस्य प्रवृ-

श्रोतुर्बिडालः । धातुः । क्रोष्टा । ७० पः किच्च । पिबतीति पितुः । 'पितुर्वह्नौ दिवाकरे' ७१ अर्तेश्च तुः । अर्तेस्तुः स्यात् स च कित् । 'ऋतुः स्त्रीपुष्पकालयोः'।७२ कमिमनिजनिगाभायाहिभ्यश्च । एभ्यस्तुः स्यात् । 'कन्तुः कन्दर्पचित्तयोः' । मन्तुरपराधः । जन्तुः प्राणी । 'गातुः पुंस्कोकिले भृङ्गे गन्धर्वे गायनेऽपि च' । भातुरादित्यः । 'यातुरध्वगकालयोः' । रक्षसि क्लीबम् । हेतुः कारणम् । ७३ चायः किः । 'केतुर्ग्रहपताकयोः' । ७४ आप्नोतेर्ह्रस्वश्च । अप्तुः शरीरम् । ७५ वसेस्तुन् । वस्तु । ७६ अगारे णिच्च । 'वेश्मभूर्वास्तु रस्त्रियाम्' । ७७ कृञः कतुः । क्रतुर्यज्ञः । ७८ एधिवह्योश्चतुः । एधतुः पुरुषः । वहतुरनड्वान् । ७९ जीवेरातुः । 'जीवातुरस्त्रियां भक्ते जीविते जीवनौषधे' । ८० आतृकन्वृद्धिश्च । जीवेरित्येव । 'जैवातृकस्त्विन्दुभिषग्यायुष्मत्सु कृषीवले' । ८१ कृषिचमितनिधनिसर्जिखर्जिभ्य ऊः । 'कर्षूः पुंसि करीषाग्नौ कर्षूर्नेषां स्त्रियां मता' । चमूः । तनूः । धनूः शस्त्रम् । सर्ज सर्जने, सर्जयतीणिक् । खर्ज व्यथने, खर्जूः पामा । ८२ मृजेर्गुणश्च । मर्जूः शुद्धिकृत् । ८३ वहो धश्च । 'वधूर्जायास्नुषास्त्रीषु' ।

त्तेराह—क्रोष्टेति । पः किच्च । पितुरिति । तुनः किरवादित्त्वम् । अर्तेश्च तुः । ऋ गतौ । तुनि प्रकृते तुविधानं स्वरार्थम् । कमिमनिजनि । कमु कान्तौ, मन ज्ञाने, जनी प्रादुर्भावे, गै शब्दे, भा दीप्तौ, या प्रापणे, हि गतौ एषां द्वन्द्वात्पञ्चमी । एभ्यस्तुप्रत्ययः स्यात् । तन्तुः, मन्तुः, जन्तुः, गातुः, भातुः, यातुः, हेतुरिति । कन्तुरिति पूर्वोक्त 'अर्जिदृशि' इत्यादिसूत्रेण कुप्रत्ययतुकोर्निपातनात् सिद्धे पुनरुक्तिर्व्युत्पत्तिवैचित्र्याय । चाय किः । 'चाय् पूजानिशामनयो'रित्यस्मात् तुप्रत्ययः, प्रकृतेः किरादेशश्च । गुणे केतुरिति रूपम् । आप्नोतेर्ह्रस्वश्च । आप्लृ व्याप्तावित्यस्मात् तुप्रत्ययः, प्रकृतेर्ह्रस्वश्च भवति । अप्तुः शरीरमिति । आप्नोतीति विग्रहः । वसेस्तुन् । वस निवास इत्यस्मात्तुन् स्यात् । वस्तु । अगारे णिच्च । अगारे वाच्ये वसधातोर्जायमानस्तुन् प्रत्ययो णिच्चवतीत्यर्थः । णित्त्वादुपधावृद्धिः । कृञः कतुः । डु कृञ् करणे इति धातोः कतुप्रत्ययो भवति । तस्य किरवादुगुणाऽभावे यणादेशे च क्रतुरिति रूपम् । एधिवह्योश्चतुः । एध वृद्धौ, वह प्रापणे आभ्यां चतुः स्यात् । एधतुः । वहतुः । जीवेरातुः । जीव प्राणने, अस्मादातुप्रत्ययः । जीवातुः । आतृकन्वृद्धिश्च । जीवेरित्यनुवर्तते । जीव प्राणने इत्यस्मादातृकन्प्रत्ययो भवति, प्रकृतेरिको वृद्धिश्च भवति । जैवातृक इति रूपम् । कृषिचमितनि । कृष विलेखने, चमु अदने, तनु विस्तारे, धन धान्ये, सृज विसर्ग इत्यस्य न ग्रहणं तस्य इका निर्देशेऽपि इकः किरवादुगुणाऽभावे सृजीत्येव निर्देष्टव्यत्वात्, किन्तु सर्ज सर्जने इत्यस्य ग्रहणं, खर्ज व्यथने, एषां द्वन्द्वात्पञ्चमी । रभसकोशमाह—कर्षूः पुंसि करीषाग्नौ कर्षूर्नेषां स्त्रियां मतेति । 'कर्षूः पुमान्करीषाग्नौ'

८४ **कषेश्छश्च**। कच्छूः पामा। ८५ **णित्कसिपद्यर्तेः**। कासूः शक्तिः। 'पादश्चरणधारिणी'। आरूः पिङ्गलः। ८६ **अणो डश्च**। आडूर्जलप्लवद्रव्यम्। ८७ **नञिलम्बेर्नलोपश्च**। 'तुम्ब्यलाबूरुभे समे' इत्यमरः। ८८ **के श्र एरङ् चाऽस्य**। कशब्दे उपपदे शृणातेरूः स्यात् एरङादेशः। 'कशेरूस्तृणकन्दे स्त्री'। बाहुलकादुप्रत्यये कशेरुः। क्लीबे पुंसि च। ८९ **त्रो दुट् च**। तरतेरूः स्यात्तस्य दुट्। 'तर्दूः स्याद्दारुहस्तकः'। ९० **दरिद्रातेर्यालोपश्च**। इश्च आश्च यौ तयोर्लोपः। दर्द्रूः कुष्ठप्रभेदः। ९१ **नृतिशृध्योः कूः**। नृतूर्नर्तकः। शृधूरपानम्।

इति मेदनी। चमूः सेना। तनूरिति। 'स्त्रियां मूर्तिस्तनुस्तनूः' इत्यमरः। मृजेर्गुणश्च। 'मृजेर्वृद्धिः' इति वृद्ध्यभावः, ऊप्रत्ययसन्नियोगेन गुणो विधीयते। मर्जूरिति रूपम्। वहो धश्च। वह प्रापणे इत्यस्मादूप्रत्ययः। तत्संनियोगेन धातोर्धकारः अन्तादेशश्च। वधूरिति। 'वधूः स्नुषा नवोढा स्त्री भार्यापृक्काङ्गनासु च' इति विश्वः। कषेश्छश्च। कष हिंसायां, अस्मादूप्रत्ययो भवति, तत्सन्नियोगेन छकारश्चान्तादेशः। कच्छूरिति रूपम्। 'कच्छ्वां तु पाम पामा विचर्चिका' इत्यमरः। णित्कसिपद्यर्तेः। कस गतौ, पद गतौ, ऋ गतौ, एषां समाहारद्वन्द्वात्पञ्चमी। एभ्यः ऊप्रत्ययः स्यात्, स च णित् भवति। णित्कार्यं प्रवर्तयतीत्यर्थः। कासूः शक्तिरिति। 'कासूर्विकलवाचि स्यात्' इति मेदिनीकारः। अणो डश्च। अण शब्दे अस्मादूः स्यात्, स च णित् प्रकृतेर्डकारश्चान्तादेशो भवतीत्यर्थः। आडूरिति रूपम्। नञि लम्बेर्नलोपश्च। अवस्रंसनार्थकात् लबिधातोः नञि उपपदे ऊप्रत्ययो भवति, स च णित्, धातोरिदित्त्वात् लम्बस्य नकारस्य लोपश्च भवतीत्यर्थः। न लम्बते नावस्रंसते जले इत्यर्थेऽनेन ऊप्रत्ययेऽनुनासिकलोपे च 'अत उपधायाः' इत्यनेनोपधावृद्धौ अलाबूरिति रूपम्। के श्र एरङ् चास्य। 'शॄ हिंसायां'मित्यस्य श्र इति पञ्चम्यन्तम्। शेषं स्पष्टम्। ननु कशेरुरिति कथं, ऊप्रत्ययस्यैवानुशासनादित्यत आह—बाहुलकादिति। त्रो दुट् च। 'तॄ प्लवनतरणयो'रित्यस्मात् ऊप्रत्ययः, दुडागमश्च। अयं चागमः प्रत्ययस्य। नन्वेवं प्रत्ययस्य वलादित्वात् आर्द्धधातुकत्वाच्च इडागमो दुर्वार इति वाच्यम्, 'नेड्वशि कृति' इति निषेधात्। केचित्तु 'त्रो दुक्चे'ति पठित्वा ऊप्रत्ययसन्नियोगेन प्रकृतेर्दुगागममाहुः। तेषां यद्यपि इडागमाऽभावः सिद्धः, तथापि इगन्तत्वाऽभावादङ्गस्य गुणो न स्यात्। नच 'पुगन्त' इति गुणो भविष्यतीति वाच्यम्, तॄधातोः ऋकारान्तत्वेन लघूपधत्वाऽभावात्। यदि कथंचिदेतन्मते आग्रहस्तर्हि दुक् चेत्यत्र चकारः दुगागमात्पूर्वं वस्कार्यं भवितव्यं तदपि भवतीति बोधनार्थमिति विलष्टकल्पनं शरणम्। दरिद्रातेर्यालोपश्च। दरिद्रादुर्गंतावित्यस्मादूप्रत्ययः, यालोपश्च भवतीत्यर्थः। यालोप इत्येतद्विवृणोति—इश्च आश्चेति। या औ इत्यत्र वृद्धौ यौ, तयोर्लोप इत्यर्थः। नृतिशृध्योः कूः। नृती गात्रविक्षेपे, शृधु हिंसायां आभ्यां कूप्रत्ययः स्यात्।

९२ **ऋतेरम् च**। ऋतिः सौत्रो धातुः। ततः कूरमागमश्च। रन्तूर्देवनदी सत्यवाक् च। ९९ **अन्दूदृम्भूजम्बूकफेलुकर्कन्धूदिधिषुः**। एते कूप्रत्ययान्ता निपात्यन्ते। अन्दूर्बन्धनम्। दृभि ग्रन्थे, निपातनान्नुम्। दृम्भूः। अनुस्वाराऽभावोऽपि निपातनादित्येके। दृन्भूः। जनेर्बुक्। जम्बूः। जमु अदने, इत्यस्येत्येके। बाहुलकाद्ध्रस्वोऽपि। जम्बुः। कफं लाति कफेलूः श्लेष्मातकः। निपातनादेत्वम्। कर्कं दधाति कर्कन्धूर्बदरी। निपातनान्नुम्। दिधिं धैर्यं स्यति त्यजतीति दिधिषूः पुनर्भूः। केचित्तु 'अन्दूदृम्फूजम्बूकम्बू' इति पठन्ति। 'दृम्फ उत्क्लेशे' दृम्फूः सर्पजातिः। 'कमेर्बुक्'। कम्बूः परद्रव्यापहारी। ९४ **मृग्रोरुतिः**। मरुत्। गरुत्पक्षः। ९५ **ग्रो मुट् च**। गिरतेरुतिस्तस्य च मुट्। गर्मुत्सुवर्णं लताविशेषश्च। ९६ **हृषेरुलच्**। 'हर्षुलो मृगकामिनोः'। बाहुलकाच्चटतेः। चटुलं शोभनम्। ९७ **हृसृरुहियुषिभ्य इतिः**। 'हरित्ककुभि वर्णे च तृणवाजि-

---

ऋतेरम् च। ऋतिः सौत्रो धातुः तस्मात्कूप्रत्ययः स्यात्, प्रकृतेरागमश्चेत्यर्थः। ऋत् इति स्थिते अमागमे ऋकारात्परे सति ऋकारस्य णौ च रन्तूरिति रूपम्। अन्दूदृम्भूजम्बू। अदि बन्धने, दृभी ग्रन्थे ईदित, जन जनने, ला आदाने ककपूर्वः, डुधाञ् धारणपोषणयोः कर्कपूर्वः, षोऽन्तकर्मणि दिधिपूर्वः षूर्वा समाहारद्वन्द्वात्प्रथमा। एते कूप्रत्ययान्ता निपात्यन्ते। अदिधातोरिदित्त्वान्नुम्। दृभीधातोरीदित्त्वात् कथं नुमित्यत्राह—निपातनान्नुमिति। केचित् दृन्भूरिति पठन्ति, तन्मतेऽनुस्वाराभावोऽपि निपातसाध्य इत्याह—अनुस्वाराभाव इति। जनधातोरित्यत्राह—जनेर्बुगिति। बुगागमोऽपि कूप्रत्ययसन्नियोगेन विधीयत इत्यर्थः। ततश्चानुस्वारे परसवर्णे मकारे जम्बूरिति रूपम्। ननु कथं जम्बुशब्द इत्यत्राह—बाहुलकादिति। मृग्रोरुतिः। मृङ् प्राणत्यागे, गॄ निगरणे, आभ्यां उतिप्रत्ययः स्यात्। मरुत्। मरुतशब्दोऽप्यस्ति। तथाच विक्रमादित्यकोशः 'मरुतः स्पर्शनः प्राणः समीरो मारुतो मरुत्' इति। एतेन 'कोऽयं वाति स दाक्षिण्यात्यमरुतः' इति कविराजश्लोके मरुत इत्यनुपपन्नमिति मत्वा दाक्षिण्यात्यपवन इति पठन्तः प्रत्युक्ताः। 'गरुत्मा'नित्यत्र 'मादुपधायाः' इत्यनेन वत्वाऽभावस्तु अस्य यवादित्वात् सिद्धः, अयवादिभ्य इति निषेधात्। ग्रो मुट् च। गॄ निगरणे इत्यस्मात् उतिः स्यात् तत्सन्नियोगेन मुडागमश्च। गर्मुदिति रूपम्। 'गर्मुत् स्त्री स्वर्णलतयोः' इति कोशादाह—स्वर्णं लताविशेष इचेति। हृषेरुलच्। हृष हृष्टौ, अस्मात् उलच्प्रत्ययः स्यात्। हर्षुल इति। लघूपध गुणः। चटुल इति रूपं साधयितुमाह—बाहुलकादिति। चटतेरिति। चटे वर्षावरणयोरित्यस्मादित्यर्थः। हसृरुहियुषिभ्य इति। हस् हरणे, सृ गतौ, रुह बीजजन्मनि, युषि, एषां द्वन्द्वात्पञ्चमी। एभ्यः इतिप्रत्यय इत्यर्थः। इकारस्तकारस्येत्संज्ञातः परिग्रा-

विशेषयोः'। सरिन्नदी। 'रोहित् मृगविशेषस्य स्त्री'। युष इति सौत्रो धातुः। 'ऋश्यस्य रोहित् पुरुषस्य योषित्' इति भाष्यम्। ९८ **ताडेर्णिलुक् च**। ताड्यतीति तडित्। ९९ **शमेर्ढः**। बाहुलकादित्संज्ञा एयादेशः इट् च न। 'शण्ढः स्यात्पुंसि गोपतौ'। शण्ढः क्लीवः। १०० **कमेरठः**। कमठः। 'कमठः कच्छपे पुंसि भाण्डभेदे नपुंसकम्' इति मेदिनी। बाहुलकाज्जरठः। १०१ **रमेर्वृद्धिश्च**। रामठं हिङ्गु। १०२ **शमेः खः**। शङ्खः। १०३ **कणेष्टः**। कण्ठः। १०४ **कलस्तृपश्च**। तृपतेः कलप्रत्ययः, चात्तृफतेः। तृपला लता। 'त्रिफला तु फलत्रिके'। १०५ **शपेर्बश्च**। शवलः। १०६ **वृषादिभ्योऽत्**। वृषलः। पललम्। बाहु-

---

णार्थः। हरिच्छन्दार्थं विवरिषुः विश्वकोशमाह—हरिरिति। 'हरिद्दिशि स्त्रियां पुंसि हयवर्णविशेषयोः' इति मेदिनीकारः। सरिन्नदीति सुप्रसिद्धम्। रोहिच्छन्दार्थमाह—मृगविशेषस्य स्त्रीति। 'रोहिन्मृग्यां लतामेदे' इति मेदिन्याम्। नन्वु युषधातुर्धातुपाठे नोपलभ्यत इत्यत आह—युषधातुः सौत्र इति। ताडेर्णिलुक् च। तड ताडने चुरादिः। अस्माद्धातोः इति प्रत्ययः स्यात् णिलुक् चेति सूत्रार्थः। तडिदिति। 'तडिस्सौदामनी विद्युत्' इत्यमरः। 'णेरनिटि' इति सूत्रेणैव लोपे सिद्धेऽनेन लुग्विधानं उपधावृद्ध्यभावार्थम्। लोपे हि प्रत्ययलक्षणेन उपधावृद्धिर्भवेदेव। अत एव च भाष्यत इत्यादौ णिलोपेऽपि वृद्धिर्भवति। ननु ण्यन्तस्य केवलस्य वा तडधातोः सेट्कत्वादिडागमेनैव रूपं सिध्यति, इडाद्यार्धधातुकत्वेन णेर्लोपाऽभावेऽपि अनेन लुग्विधानात्। ततश्च तिप्रत्यय एव विधीयतामिति वाच्यम्, तिप्रत्ययमात्रविधाने 'तितुत्रेति' इण्निषेधप्रसङ्गात्। तस्माद्यथोक्तमेव रमणीयम्। शमेर्ढः। ननु ढप्रत्यये 'चुटू' इत्यनेन इत्संज्ञा ढकारस्य दुर्वारा। किं च 'आयनेयी'ति सूत्रेण एयादेशश्च दुर्वारः। किंच बलाद्यार्द्धधातुकत्वादिडागमश्च दुर्वारः। न च ढप्रत्ययस्य वशादिकृत्वात् 'नेड्वशिकृति' इति निषेधो भविष्यतीति वाच्यम्। तस्मिन्सूत्रे 'नेड्वरमनादा'वितिपरिगणितत्वात्। एवञ्च शण्ढ इति रूपमसाध्वेवेति शङ्कायामाह—बाहुलकादिति। कमेरठः। कमु कान्तौ, अस्मात् अठप्रत्ययः स्यात्। कमठ इति रूपम्। जरठशब्दायाह—बाहुलकादिति। जॄ वयोहानावित्यस्मादठप्रत्ययः। 'जरठः कठिने पाण्डौ कर्कशेऽप्यभिधेयवत्' इति मेदिनी। रमेर्वृद्धिः। रमु क्रीडायामित्यस्मादठप्रत्ययः वृद्धिश्चेत्यर्थः। रामठमिति रूपम्। शमेः खः। शम उपशमे इत्यस्माद्धातोः खप्रत्ययः। बाहुलकादीनादेशाऽभावः। 'शङ्खो निधौ ललाटास्थिन' इत्यमरः। कणेष्टः। कण निमीलने इत्यस्मात् ठप्रत्ययो भवति। कण्ठः। 'कण्ठो गले संनिधाने ध्वनौ मदनपादपे' इति मेदिनी'। कलस्तृपश्च। तृप प्रीणन इत्यस्माद् धातोः कलप्रत्ययः। तृपलेति रूपम्। तृफलेति रूपं साधयति—चादिति। चकारः तृफधातोः समुच्चायक इति भावः। शपेर्बश्च। शप आक्रोशे इत्यस्मात् कलप्रत्ययो

लकाद्गुणः । सरलः । तरलः । 'कमेर्बुक् च' (गण १९६) कम्बलः । मुस खण्डने, मुसलम् । 'लङ्गेर्वृद्धिश्च' (गण १९७) लाङ्गलम् । 'कुटिकशिकौतिभ्यः प्रत्ययस्य मुट् च' (गण १९८) कुटमलः । कुडेरपि । कुड्मलः । कशमलम् । बाहुलकाद्गुणः । कोलम् । १०७ **मृजेष्टिलोपश्च** । मलम् । १०८ **चुपेरच्चोपधायाः** । चपलम् । १०९ **शकिशम्योर्नित्** । शकलम् । शमलम् । ११० **छो गुग्ह्रस्वश्च** । छगलः । प्रज्ञादित्वाच्छागलः । १११ **अमन्ताड्डः** । दण्डः । रण्डा । खण्डः । मण्डः । वण्डः छिन्नहस्तः । अण्डः । बाहुलकात्सत्वाऽभावः । षण्डः संघातः । तालव्यादिरित्यपरे । शण्डः । पण्डः । चण्डः । पण्डः क्लीबः ।

भवति । धातोः पकारस्य बकारश्चान्तादेश इत्यर्थः । शबल इति रूपम् । वृषादिभ्यश्चित् । वृष सेचने, पल गतौ, इत्यादिभ्यः कलप्रत्ययः । स च चिद्भवति । चित्त्वं स्वरार्थम् । नन्वेवमपि सरल इत्यादौ कथं गुणः, प्रत्ययस्य कित्त्वादित्यत आह—बाहुलकादिति । कम्बल इत्यत्र प्रक्रियामाह—बुगिति । लङ्गेर्वृद्धिश्च । लगि गतौ इत्यस्मात्कलप्रत्ययो भवति, प्रकृतेर्वृद्धिश्च । लाङ्गलमिति रूपम् । कुटिकशिकौतिभ्यः प्रत्ययस्य मुट् । कुट कौटिल्ये, कश गतिशासनयोः, कु शब्दे, एषां द्वन्द्वात्पञ्चमी । एभ्यः कलप्रत्ययो भवति, तस्य मुडागमश्च भवतीत्यर्थः । कुटमलमित्येव रूपम् । कुड्मलशब्दस्तर्हि असाधुरित्याशङ्क्यायामाह—कुडेरपीति । बाहुलकादिति भावः । ननु कोमलमिति कथं, कलप्रत्ययस्य कित्त्वेन गुणाऽसम्भवादित्यत आह—बाहुलकादिति । एवमन्येऽपि कोसलादयः शब्दा बोध्याः । मृजेष्टिलोपश्च । कलप्रत्ययस्तत्संनियोगेन टेः ऋज् इत्यस्य लोपः । मलमिति रूपम् । 'मलोऽस्त्री पापविट् किट्टे कूपणे स्वभिधेयवत्' इति मेदिनी । चुपेरच्चोपधायाः । 'चुप मन्दायां गतौ' अस्माद्धातोः कलप्रत्यये उपधाया उकारस्य अकारे चपल इति रूपम् । शकिशम्योर्नित् । शक्लृ शक्तौ, शम उपशमे, आभ्यां कलप्रत्ययः नित्त्व भवति । शकलं शमलमिति रूपम् । छो गुक् ह्रस्वश्च । छो छेदने, अस्मात्कलप्रत्ययः गुगागमः प्रकृतेरवयवस्याकारस्य ह्रस्वश्च भवतीत्यर्थः । ननु कथं छागल इति, अनेन ह्रस्वस्य दुर्निवारत्वादित्यत आह—प्रज्ञादित्वादिति । 'प्रज्ञादिभ्यश्च' इत्यणि छागल इति भवतीत्यर्थः । स्वार्थिकोऽयं तद्धितप्रत्ययः । अमन्ताड्डः । अम् प्रत्याहारः । अमन्तात् धातोर्डप्रत्ययः स्यात् । दण्ड इति । दमु उपशमे अस्माद्दण्डप्रत्ययः । 'नेड्वशि कृति' इति निषेधादिडागमो न । बाहुलकात् 'चुटू' इतीत्संज्ञा न । 'दण्डोऽस्त्री लगुडेऽपि स्यात्' इत्यमरः । रण्डेति । रमु क्रीडायाम् इत्यस्माद्दण्डप्रत्ययः । 'रण्डा मूषकपर्ण्यां च विधवायां च योषिति' इति मेदिनी । खण्ड इति । खनु अवदारणे । 'खण्डोऽस्त्री शकले चेक्षुविकारभिदोर्भेदयोः' इति कोशः । मण्ड इति । मन ज्ञान इत्यस्माद्दण्डप्रत्ययः । 'मण्डः पञ्चाङ्गुले शाकभेदे कलीबं तु मस्तुनि' इति मेदिनी । वण्ड इति । वन सम्भक्तावित्य-

पण्डा बुद्धिः। **११२ क्वादिभ्यः कित्**। कवर्गादिभ्यो डः कित्स्यात्। कुण्डम्। काण्डम्। गुड् गुडः। घुण भ्रमणे, घुण्डो भ्रमरः। **११३ स्थाचतिमृजेरालज्वालआलीयचः**। तिष्ठतेरालच्। स्थालम्-स्थाली। चतेर्वालञ्। चात्वालः। मृजेरालीयच्। मार्जालीयो बिडालः। **११४ पतिचण्डिभ्यामालञ्**। पातालम्। चण्डालः। प्रज्ञादित्वादणि चाण्डालोऽपीत्येके। **११५ तमिविशिबिडिमृणिकुलिकपिपलिपश्चिभ्यः कालन्**। तमालः। विशालः। बिडालः। मृणालम्। कुलालः। कपालम्। पलालम्। पश्चालाः। **११६ पतेरङ्कुच्पक्षिणि**। पतङ्गः।

स्मात् डप्रत्ययः। अण्ड इति। अम गत्यादिषु। षण्ड इति। षणु दाने इत्यस्माड्डप्रत्ययः। 'धात्वादेः षः सः' इति सत्वमाशङ्क्याह—बाहुलकादिति। गण्ड इति। गडॢ गतौ। चण्ड इति। चण दाने। पण्ड इति। पण व्यवहारे स्तुतौ च। एवं फाण्ड इत्यादिरूह्यः। कादिभ्यः कित्। कुः कवर्गः, तदादिभ्यो धातुभ्यः जायमानः डप्रत्ययः किस्यात्। कुण्डमिति। कुण शब्दोपकरणयोः डप्रत्ययस्य कित्त्वान्नगुणः। 'अनुनासिकस्य क्विझलोः क्ङिति' इति दीर्घस्तु न भवति, संज्ञापूर्वकविधेरनित्यत्वादिति भावः। काण्डमिति। कमु कान्तावित्यस्मात् डप्रत्यये 'अनुनासिकस्य की' ति दीर्घः। अनित्यत्वाच्चयं तु लक्ष्यानुरोधादिति भावः। 'काण्डोऽस्त्री दण्डबाणार्ववर्गावसरवारिषु' इत्यमरः। गुङ्धातोर्डप्रत्यये गुड इति रूपम्। 'गुडो गोलेक्षुपाकयोः' इत्यमरः। घुण्डइति। कित्त्वादगुणाभावः। स्थाचतिमृजेरालज्वालआलीयचः। ष्ठा गतिनिवृत्तौ, चते याचने, मृजू शुद्धौ, एभ्यः क्रमात् आलच्, वालञ्, आलीयच् एते प्रत्ययाः स्युः। स्थालम्, चात्वालः, मार्जालीय इति रूपम्। अत्र लचा सिद्धे आलचि आकारोच्चारणं निष्फलमेव। स्थालमिति। 'स्थालं भाजनभेदेऽपि स्थाली स्यात्पादलेखयोः' इति मेदिनी। चात्वाल इति। 'चात्वालो यज्ञकुण्डे स्यात्' इति मेदिनी। मार्जालीय इति। 'मार्जालीयः स्मृतः शूद्रे बिडाले कायशोधने' इति मेदिनी। पतिचण्डिभ्यामालञ्। पल्ल गतौ, चडि कोपे, आभ्यामालञ्प्रत्ययः स्यात्। आलञो ञित्त्वादुपधावृद्धिः। पातालः। पतन्त्यस्मिन्निति पातालः। चण्डालः। इदित्वान्नुमि अदुपधत्वाऽभावान्न वृद्धिः। चाण्डाल इति तु प्रज्ञादित्वात् बोध्य इति उज्ज्वलदत्तादयो वदन्ति। तदाह—एक इति। अन्त्याऽस्वरसबीजं तु 'कुलालवरुडनिषादचण्डालाऽमित्रेभ्य' इति वार्तिकतद्भाष्यविरोध एव। तत्र ह्येतेभ्यः स्वार्थेऽन्वाहितः। तमिर्विशि। तमु काङ्क्षायां, विश प्रवेशने, बिड आक्रोशे, मृण हिंसायां, कुल संस्त्याने, कपि चलने, पल गतौ, पचि विस्तारे, एतेषां द्वन्द्वात्पञ्चमीबहुवचनम्। तमाल इति 'तमालस्तिलके खड्गे तापिच्छे वरुणद्रुमे' इति मेदिनी। विशालः। बिडालः। 'आखुर्बिडालो मार्जारः' इत्यमरः। मृणालः। कुलालः। 'कुलालः कटुभे कुम्भकारे' इति मेदिनी। पतेरङ्कुच् पक्षिणि। पल्ल गतौ इत्यस्मादङ्कुच् प्रत्ययः पक्षिण्यभिधेये इत्यर्थः। पतङ्ग इति। 'पतङ्गः शलभे

११७ **तरत्यादिभ्यश्च**। तरङ्गः। लवङ्गम्। ११८ **बिडादिभ्यः कित्**। बिडङ्गः। मृदङ्गः। कुरङ्गः। बाहुलकादुत्वं च। ११९ **सृवृञोर्वृद्धिश्च**। सारङ्गः। वारङ्गः खड्गादिमुष्टिः। १२० **गन्गम्यद्योः**। गङ्गा। अद्रः पुरोडाशः। १२१ **छापूखडिभ्यः कित्**। छागः। पूगः। खड्गः। बाहुलकात् 'षिट अनादरे' गन्सत्वाऽभावश्च। षिड्गस्तरलः। 'षिड्गैरगद्यत ससम्भ्रममेवमेका' इति माघः। १२२ **भृञः किन्नुट् च**। भृञो गन्कित्स्यात्तस्य नुट् च। 'भृङ्गाः षिड्गालिधूम्याटाः'। १२३ **शृणातेर्ह्रस्वश्च**। शृङ्गम्। १२४ **गणशकुनौ**। नुट् चेत्यनुवर्तते। शार्ङ्गः। १२५ **मदिग्रोर्गग्गौ**। मुद्गः। गर्गः। १२६ **अण्डन्कृसृभृ-**

शालिप्रभेदे पक्षिसूर्ययोः' इति मेदिनी। तरत्यादिभ्यः। अङ्गच् इत्यनुवर्तते। तरत्यादिभ्यो धातुभ्यः अङ्गच्प्रत्ययः स्यादित्यर्थः। तरतीति। तॄ प्लवनतरणयोरित्यस्य ऋितपा निर्देशः। लवङ्गमिति। लूञ् छेदने इत्यस्मादङ्गच्। आकृतिगणोऽयम्। बिडादिभ्यः कित्। बिड आक्रोशे इत्यादिभ्यो धातुभ्यः जायमानः अङ्गच्प्रत्ययः किद्भवतीत्यर्थः। बिडङ्ग इति। कित्त्वाद्न गुणः। 'बिडङ्गश्चित्रबभिङ्गे स्यात्कृमिघ्ने पुंनपुंसकम्' इति मेदिनीकारः। मृदङ्ग इति। मृद क्षोदे इत्यस्मात्प्रत्ययः। तस्य कित्त्वान्न गुणः। कुरङ्ग इति। प्रत्यये परत उत्वं साधयति—बाहुलकादिति। कुर शब्दे इत्यस्मात्प्रत्यये तु महल्लाघवम्। सृवृञोर्वृद्धिश्च। सृ गतौ, वृञ् वरणे, आभ्यामङ्गच् प्रत्ययः प्रकृतेर्धातोर्वृद्धिश्चेत्यर्थः। सारङ्ग इति। 'सारङ्गः पुंसि हरिणे चातके शबले त्रिषु' इति मेदिनी। गन् गम्यर्थः। गम्लृ गतौ, अद भक्षणे, आभ्यां गन्प्रत्ययः स्यात्। गङ्गा। अद्रः। बाहुलकादङ्गादयोपि। अमधातोर्गन्प्रत्ययः। छापूखडिभ्यः कित्। छो छेदने, पूङ् पवने, खड भेदने, आहस्य त्रिभ्यो धातुभ्यः गन्प्रत्ययो भवति। स च कित्स्यात्। छागःपूग इति। कित्त्वादुगुणाभावः छायते छिद्यते यज्ञार्थमिति छागः, पूयते मुखमनेनेति पूगः। 'पूगः क्रमुकवृन्दयोः' इत्यमरः। खड्ग इति। 'खड्गो गण्डकशृङ्गाऽसिबुद्धभेदेषु गण्डके' इति मेदिनी। भृञः किन्नुट् च। भृञ् भरणे, अस्मात् जायमानः गन्प्रत्ययः किद्भवति नुडागमश्च भवतीत्यर्थः। 'छापूखडिभ्यः कित्' इति पूर्वसूत्रात्किदित्यनुवर्तमाने पुनरिह किद्ग्रहणं विस्पष्टार्थम्। 'भृङ्गो धूम्याटषिद्गयोः' इति मेदिनी। शृणातेर्ह्रस्वश्च। शॄ हिंसायामस्मात्धातोर्गन्प्रत्ययो भवति। धातोर्ह्रस्वश्च भवति। प्रत्ययस्य च कित्त्वं नुट् चेत्यर्थः। शृङ्गमिति रूपम्। शृङ्गं प्रभुत्वे शिखरे चिह्ने क्रीडाम्बुयन्त्रके। विषाणोत्कर्षयोश्चाथ शृङ्गः स्यात्कूर्चशीर्षके। स्त्री विषायां स्वर्णमीनभेदयोरृषभौषधौ' इति मेदिनी। गण् शकुनौ। शृणातेरित्यनुवर्तते। शकुनौ वाच्ये शृणातेर्गन्प्रत्ययः नुडागमश्च। शार्ङ्ग इति। णित्त्वात् 'अचो ञ्णिति' इति वृद्धिः, नुटः अनुस्वारपरसवर्णौ। शार्ङ्गः पक्षी। शार्ङ्गं धनुरिति तु शृङ्गस्य विकार इत्यर्थं बोध्यम्। मुदिग्रोर्गग्गौ। मुद हर्षे, गॄ निगरणे आभ्यां यथासंख्यं गक् ग एतौ प्र-

वृञः । करण्डः । सरण्डः पक्षी । भरण्डः स्वामी । वरण्डो मुखरोगः । १२७ शृदृभसोऽदिः । शरत् । 'दरद्धृदयकूलयोः' । भसजघनम् । १२८ दृणातेः षुग्रस्वश्च । दृषत् । १२९ त्यजितनियजिभ्यो डित् । त्यद् । तद् । यद् । सर्वादयः । १३० एतेस्तुट् च । एतद् । १३१ सर्तेरटिः । 'सरट् स्याद्वातमेघयोः' । वेदभाष्ये तु 'याभिः कृशानुम्' इति मन्त्रे सरड्भ्यो मधुमक्षिकाभ्यः' इति व्याख्यातम् । १३२ लङ्घेर्नलोपश्च । लघट् वायुः । १३३ पारयतेरजिः । पारक् सुवर्णम् । १३४ प्रथेः कित्सम्प्रसारणं च । पृथक् । स्वरादिपाठादव्ययत्वम् । १३५ भियः षुग्रस्वश्च । भिषक् । १३६ युष्यसिभ्यां मदिक् । युष् , सौत्रो धातुः । युष्मद् । अस्मद् । त्वम् । अहम् । १३७ अर्तिस्तुसुहुसृधृक्षिक्षुभायावापदियक्षिनीभ्यो मन् । एभ्यश्चतुर्दश-

---

स्ययौ स्तः । मुद्गः सस्यविशेषः । द्राविडभाषायां 'पयरु' इति प्रसिद्धः । गकः किरवाक्षोपधागुणः । गर्ग इति मुनिविशेषः । गपत्यये गुणः । एतदर्थमेव गक् ग इति पृथक् विहितौ । अण्डन् कुसुभृवृभ्यः । डु कृञ् करणे, सु गतौ, भृञ् भरणे, वृञ् वरणे, एषां समाहारद्वन्द्वात्पञ्चमी । एभ्यः अण्डन्प्रत्ययः स्यात् । करण्ड इति । प्रत्यये परतो गुणः । शृदृभसोऽदिः । शृ हिंसायां, दृ विदारणे, भस भर्त्सनदीप्त्योः, एभ्यः अदिप्रत्ययः । इकार उच्चारणार्थः । शरदिति । प्रत्यये परतो गुणः । 'शरस्त्री वत्सरेऽप्यृतौ' । 'दरोत्स्वर्या प्रपाते च भयपर्वतयोरपि' 'भसस्त्री भास्वरे योनौ' इति मेदिनी । दृणातेः षुक् ह्रस्वश्च । दृ विदारणे इत्यस्मात् अदिप्रत्ययः, प्रकृतेः षुगागमो ह्रस्वश्च भवतीति सूत्रार्थः । ह्रषदिति रूपम् । त्यजितनियजिभ्यो डित् । त्यज हानौ, तनु विस्तारे, यज देवपूजादौ, एभ्यो जायमानः अदिप्रत्ययः डित् भवति । त्यदिति । अदिप्रत्ययस्य डित्त्वाट्टिलोपः । एतेस्तुट् च । इण् गतावित्यस्मात् अदिप्रत्ययः, तस्य तुडागमश्च भवतीत्यर्थः । एतदिति रूपम् । सर्तेरटिः । सृ गतावित्यस्मादटिप्रत्ययः । सरट्शब्दार्थं विवृण्वन् कोशमाह—सरट् स्याद्वातमेघयोरिति । लङ्घेर्नलोपश्च लघि शोषणे, अस्मादटिप्रत्ययः नकारस्य लोपश्च । पारयतेरजिः । पारधातुश्चुरादिण्यन्तः । अस्मात् अजिप्रत्ययः स्यादित्यर्थः । पारगिति । अजिप्रत्यये 'णेरनिटि'त्यनेन णिलोपः । तस्य प्रत्ययलक्षणेन उपधावृद्धिभवत्येव । कुत्वे रूपम् । प्रथेः कित्सम्प्रसारणं च । प्रथ प्रख्याने, अस्मादजिप्रत्ययः । स च कित् भवति, धातोः सम्प्रसारणम् । पृथक् । स्वरादिपाठादिति । पृथक् विनार्थ इति पाठादिति भावः । भियः षुक् ह्रस्वश्च । 'भि भी' भये इत्यस्मादजिप्रत्ययः, प्रकृतेः षुगागमश्च भवतीत्यर्थः । भिषगिति रूपम् । युष्यसिभ्यां मदिक् । धातुपाठे युषधातोरदर्शनादाह—युष् सौत्रो धातुरिति । असु क्षेपणे दिवादिः । आभ्यां मदिकप्रत्ययः । युष्मदिति रूपम् । अस्मदिति रूपम् । त्व अहमिति । 'त्वाहौ सौ' इति त्वाहादेशाविति भावः । अर्तिस्तुसुहु । ऋ गतौ, ष्टुञ् स्तुतौ, षुञ् अभिषवे, हु दानादनयोः, सृ गतौ,

भ्यो मन् । अर्मश्चक्षूरोगः । स्तोमः संघातः । सोमः । होमः । सर्मो गमनम् । धर्मः । क्षेमं कुशलम् । क्षोमम् । प्रज्ञाद्यर्णि क्षौमं च । भामः आदित्यः । यामः । 'वामः शोभनदुष्टयोः' । पद्मम् । यक्ष पूजायाम्, यक्ष्मो रोगराजः । नेमः । १ः८ **जहातेः सन्वदालोपश्च ।** 'जिह्मः कुटिलमन्दयोः' । १३९ **अवतेष्टिलोपश्च ।** मन्प्रत्ययस्यायं टिलोपो न प्रकृतेः । अन्यथा डिदित्येव ब्रूयात् । 'ज्वरत्वर—' (सू २६५४) इति ऊठौ । तयोर्दीर्घे कृते गुणः । चादिपाठादव्ययत्वमित्युज्ज्वलदत्तः, तन्न । तेषामसत्त्वार्थत्वात् । वस्तुतस्तु स्वरादिपाठादव्ययत्वम् । अवतीति ओम् । १४० **ग्रसेरा च ।** ग्रामः । १४१ **अविसिविसिशुषिभ्यः कित् ।** ऊमं नगरम् । स्यूमो रश्मिः । सिमः सर्वः । 'शुष्ममग्निसमीरयोः' । १४२ **इषियुधीन्धिदसिश्यामूषूभ्यो मक् ।** 'इष्मः कामवसन्तयोः' । ईषीति पाठे दीर्घादिः । युष्मः शरो योद्धा च । इध्मः समित् । दस्मो यजमानः । श्यामः । धूमः ।

धृञ् धारणे, षि क्षिये, टु क्षु शब्दे, भा दीप्तौ, या प्रापणे, वा गतिगन्धनयोः, पद गतौ, यक्ष पूजायां चुरादिः, णीञ् प्रापणे, एषां द्वन्द्वात्पञ्चमी । एभ्यः मन्प्रत्ययो भवति । अर्म इति । मन्प्रत्यये गुणे च रूपम् । स्तोम इति । संघात इत्यर्थः । सोम इति । 'सोमस्तुहिनदीधितौ' । क्षौमशब्दं साधयितुमाह—प्रज्ञाद्यर्णीति । जहातेः सन्वदालोपश्च । ओ हाक् त्यागे, अस्मान्मनूप्रत्ययः, स च सन्वद्भवति । आकारलोपश्च । जिह्म इति रूपम् । अवतेष्टिलोपश्च । अव रक्षणादौ, अस्मात् मन्प्रत्ययः, मनूप्रत्ययस्य टेर्लोपश्चेत्यर्थः । ननु टिलोपश्चेत्यत्र अस्मिन्नेव सूत्रे विधेयभूतस्य मन्प्रत्ययस्योद्देश्यत्वं न स्यात्, अतः टिलोप इत्यत्र प्रकृतेरेवोद्देश्यत्वं स्यादित्यत आह—अन्यथेति । प्रकृतेः टिलोपाङ्गीकार इत्यर्थः । डिदित्येवेति । 'टे'रिति टिलोपसम्भवादित्यर्थः । ज्वरत्वरेत्यूठाविति । वकारस्य उपधायाश्च स्थाने इत्यर्थः । तयोरिति । अकारवकारस्थानिकयोरूठोरित्यर्थः । प्रत्येकमूठ् इति पक्षाभिप्रायेणेदम् । उपधावकारयोः स्थाने एक एवोठिति मते न कापि विप्रतिपत्तिः । अस्याऽव्ययत्वे साधकमाह—चादिपाठादिति । तन्नेति । तन्मतं खण्डयति—तेषामसत्त्वार्थत्वादिति । ग्रसेरा च । ग्रसु अदने, अस्मात् मन्प्रत्ययः धातोराकारश्चान्तादेशः । ग्राम इति रूपम् । अविसिवि । अव रक्षणादौ, षिवु तन्तुसन्ताने, षिञ् बन्धने' शुष शोषणे, एभ्यो मनू स्यात्स च कित् । ऊठादिकं पूर्ववत् । ऊर्मामिति । अवधातोर्मन्प्रत्यये ज्वरत्वरेत्यूठि सवर्णदीर्घे रूपम् । स्यूम इति । षिवुधातोर्मन्प्रत्यये ष्ठ्वोरिति वस्य ऊठि, यणि रूपं बोध्यम् । सिम इति । षिञ्धातोः रूपम् । सर्वादिगणे पठितोऽयम् । इषयुधीन्धि । इष गतिर्हिंसादानेषु, युध सम्प्रहारे, ञि इन्धी दीप्तौ, दसु उपक्षये श्यैङ् गतौ, धूञ् कम्पने, षूङ् प्राणिगर्भविमोचने, एषां द्वन्द्वात्पञ्चमी । युष्म इति । 'युष्मो धनुषि संयोगे' इति मेदिनी । दस्म इति । दस्मस्तु यजमाने स्यादपि चौरे हुताशने' इति मेदिनी । श्याम इति । 'स्त्रियु श्यामो हरित्कृष्णो

सूमोऽन्तरिक्षम्। बाहुलकादीर्घे व्रणः। १४३ युजिरुचितिजां कुश्च। युग्मम्। रुक्मम्। तिग्मम्। १४४ हन्तेर्हिं च। हिमम्। १४५ भियः घुग्वा। भीमः। भीष्मः। १४६ घर्मः। घृधातोर्मग्गुणश्च निपात्यते। १४७ ग्रीष्मः। प्रसतेर्निपातोऽयम्। १४८ प्रथेः षिवन्सम्प्रसारणं च। पृथिवी। षवन्नित्येके। पृथवी। 'पृथवी पृथिवी पृथ्वी' इति शब्दार्णवः। १४९ अशूप्रुषिलटिकणिखटिविशिभ्यः क्वन्। अश्वः। प्रुष स्नेहनादौ। 'प्रुष्वः स्याटतुमूर्ययोः'। प्रुष्वा जलकणिका। लट्वा पक्षिभेदः फलं च। कण्वं पापम्। बाहुलकादित्वे किण्वमपि। खट्वा। विश्वम्। १५० इण्शीभ्यां वन्। एवा गन्ता। 'ये च एवा मरुतः'। असत्वे निपातोऽयम्। शेवं लाञ्छनं पुंसाम्। 'शेवं मित्राय वरुणाय'। १५१ सर्वनिघृष्वरिष्वलष्वशिवपद्वहेष्वा अतन्त्रे। अकर्तर्येते निपात्यन्ते।

श्यामा स्याच्छारिवा निशा' इत्यमरः। युजिरुचितिजाम्। युजिर् योगे, रुच दीप्तौ, तिज निशाने, एषां द्वन्द्वात्षष्ठी। एभ्यो मक्प्रत्ययः स्यात् अन्त्यस्य च कुश्वम्। हन्तेर्हिं च। हन हिंसागत्योः अस्माद्धातोर्मक् धातोर्हिरादेशश्च। भियः घुग्वा। भि भी भये। अस्मात् धातोर्मक् स्यात्। धातोः घुगागमश्च वा स्यात्। भीम इति। घुगभावे रूपम्। भीष्म इति। घुकि रूपम्। घर्मः। मकि घर्म इति निपात्यत इत्यर्थः। प्रकृतिप्रत्ययविभागेन दर्शयति—घृधातोर्मगिति। घृ क्षरणदीप्त्योरित्यस्मादिति भावः। मकः कित्त्वेन किद्वति चेति निषेधादाह—गुणश्चेति। ग्रीष्मः। प्रसु अदने, अस्मात् मकि निपातोऽयम्। रपधाया इत्त्व निपात्यत इति भावः। प्रथेः षिवन् सम्प्रसारणं च। प्रथ प्रख्याने, अस्माद्धातोः षिवन्प्रत्ययः। धातोः सम्प्रसारणं चेत्यर्थः। षिवनः षित्त्वात् ङीष्। षवन्नित्येक इति। प्रथधातोः षवन्प्रत्यय इत्यर्थः। तथात्वे तु पृथवी इति रूपम्। 'पृथिवी पृथवी पृथ्वी' इत्यमरः। अशूप्रुषिलटि। अशू व्याप्तौ, प्रुष स्नेहनादौ, लट बाल्ये, कण निमीलने, खटि काङ्क्षायां, विश प्रवेशने, एषां द्वन्द्वात् पञ्चमी। एभ्यः क्वन्स्यात्। अश्व इति। 'घोटके वीतितुरगतुरङ्गाश्ववनुरङ्गमाः' इत्यमरः। प्रुष्व इति। प्रुषधातोः रूपम्। लट्वेति। 'झल्लरी चर्चरी पारी होरा लट्वा च सिध्मला' इत्यमरः। 'लट्वा करञ्जभेदे स्यात् फले वाद्ये खगान्तरे' इति विश्वः। कण्वमिति। 'कण्वं पापे मुनौ पुंसि' इति मेदिनी। खट्वेति। 'शयनं मञ्चपर्यङ्कपल्यङ्काः खट्वया समाः' इत्यमरः। विश्वमिति। 'आदित्यविश्ववसवः' इत्यमरः। 'विश्वा द्यौर्विषायां स्त्री जगति स्यान्नपुंसकम्' इति मेदिनी। इण्शीभ्यां वन्। इण् गतौ, शीङ् स्वप्ने, आभ्यां वन्प्रत्ययः स्यात्। एव इति। इण्धातोः रूपम्। शेव इति। शीङ्धातोः रूपम्। सर्वनिघृष्वरिष्व। सृ गतौ, घृषु संघर्षे, रिष हिंसायां, लष हिंसायां, शीङ् स्वप्ने, पद गतौ, ह्वेञ् स्पर्धायां शब्दे च, ईष गत्यादिषु। अत्र तन्त्रशब्दः कर्तृवाचकः अतन्त्रेऽकर्तरीत्यर्थः। निपात्यन्त इति। 'वनूपत्ययान्ततये'ति शेषः। वन्प्रत्यये गुणे च सर्वमिति रूपम्।

सृतमनेन विश्वमिति सर्वम् । निपूर्वाद्घृषेर्गुणाऽभावोऽपि । निघृष्यते अनेन निघृष्वः खुरः । रिष्वो हिंस्रः । लष्वो नर्तकः । लिष्व इत्यन्ये । तत्रोपधाया इत्वमपि । शेतेऽस्मिन् सर्वमिति शिवः शम्भुः । शीङो ह्रस्वत्वम् । पद्यो रथो भूलोकश्च । प्रह्वयते इति प्रह्वः । ह्वेञ आकारवकारलोपः । जहातेरालोपो वा । ईषेर्वन् । ईष्वः आचार्यः । इष्वः इत्यन्ये । अतन्त्रे किम् । सर्ता । सारकः । बाहुलकाद्ध्रसतेः । ह्रस्वः । १५२ शेवयह्वजिह्वाग्रीवाऽऽप्वामीवाः । शेव इत्यन्तोदात्तार्थम् । यान्त्यनेन यह्वः । ह्रस्वो हुगागमश्च । लिहन्त्यनया जिह्वा । लकारस्य जः गुणाऽभावश्च । गिरन्त्यनया ग्रीवा । ईडागमश्च । आप्नोतीत्याप्वा वायुः । मीवा उदरकृमिः । वायुरित्यन्ये । १५३ कृगृशृदृभ्यो वः । कर्वः कामः आखुश्च । गर्वः । शर्वः । दर्वो राक्षसः । १५४ कनिन्युवृषितक्षि-राजिधन्विद्युप्रतिदिवः । यौतीति युवा । वृषा इन्द्रः । तक्षा । राजा ।

निघृष्व इति । निपूर्वात् घृषधातोर्वन्प्रत्यये गुणाभावोऽपि निपात्यत इत्यर्थः । रिष्वो हिंस्र इति । अत्रापि गुणाऽभावो निपातनात् । लिष्व इत्यत्र व्युत्पत्तिमाह—उपधाया इत्वमिति । शिव इति । 'शम्भुः शर्वः शिवः स्थाणुः' इत्यमरः । प्रह्व इत्यत्र वन्प्रत्यये रूपमाह—ह्वेञ् इति । वनो वकारस्य लोपः, धातोराकारस्य लोपश्च निपात्यत इत्यर्थः । धात्वन्तरं प्रकृतिं दर्शयति—जहातेरिति । ओ हाक् त्यागे इत्यस्मादित्यर्थः । वन्प्रत्यये आकारस्य लोपो निपात्यत इत्यर्थः । शेवयह्वजिह्वा । एते वन्प्रत्ययान्ता निपात्यन्त इत्यर्थः । ननु 'इण्शीभ्यामिति सूत्रेणैव शेव इति रूपे सिद्धे किमर्थमिदमित्यत आह—अन्तोदात्तार्थमिति । शीङ् स्वप्ने इत्यस्मात् वन्प्रत्यये रूपम् । या प्रापणे इत्यस्मात् वन्प्रत्यये तत्संनियोगेन प्रकृतेर्हुगागमे ह्रस्वे च यह्व इति रूपम् । यद्वा यजधातोर्वन्प्रत्यये जकारस्य हकारश्च निपात्यते । जिह्वेति शब्दं साधयति—लिहन्त्यनयेति । लिह आस्वादने इत्यस्मात् वनूप्रत्यये लकारस्य जकारः गुणाऽभावश्च निपात्यत इत्यर्थः । यद्वा, जि जये इत्यस्मात् वनूप्रत्ययः हुगागमश्च निपात्यत इति व्याख्येयम् । गिरन्त्यनयेति । गॄ निगरणे इत्यस्मात् वन्प्रत्यये ईडागमो निपात्यत इत्यर्थः । यणादेश इति भावः । आप्लृ व्याप्तौ इत्यस्मादूनूप्रत्यये आप्वेति रूपम् । मीवेति । मीञ् हिंसायामित्यस्मादूनि रूपम् । कृ गृ शृ दृभ्यो वः । कॄ विक्षेपे, गॄ निगरणे, शॄ हिंसायां, दॄ विदारणे, एषां द्वन्द्वात्पञ्चमी । कर्व इति । कृधातोः रूपम् । गर्व इति । 'गर्वोऽभिमानोऽहङ्कारः' इत्यमरः । शर्व इति । 'ईश्वरः शर्व ईशानः' इत्यमरः । दर्व इति । दॄ धातोः रूपम् । कनिन् युवृषि । यु मिश्रणे, वृषु सेचने, तक्षू तनूकरणे, राजृ दीप्तौ, धन्वि गतौ, द्यु अभिगमने, 'द्यु क्रीडादौ एषां समाहारद्वन्द्वात्पञ्चमी । एभ्यः कनिन्प्रत्ययः । युवेति । 'बालस्तु स्यान्माणवको वयःस्थस्तरुणो युवा' इत्यमरः । 'युवा स्यात्तरुणे श्रेष्ठे सिसर्गबलशालिनि इति मेदिनी ।

धन्वा मरुः । धन्व शरासनम् । द्युवा सूर्यः । प्रतिदीव्यन्त्यस्मिन्प्रतिदिवा दिवसः । १५५ सप्यशूभ्यां तुट् च । सप्त । अष्ट । १५६ नञि जहातेः । अहः । १५७ श्वन्नुक्षन्पूषन्प्लीहन्क्लेदन्स्नेहन्मूर्धन्मज्जन्नर्यमन्विश्वप्सन्परिज्मन्मातरिश्वन्मघवन्निति । एते त्रयोदश कनिप्रत्ययान्ता निपात्यन्ते । श्वयतीति श्वा । उक्षा । पूषा । प्लिह गतौ । इकारस्य दीर्घत्वम् । प्लेहतीति प्लीहा कुक्षिव्याधिः । क्लिद् आर्द्रीभावे । क्लिद्यति क्लेदा चन्द्रः । स्निह्यतेर्गुणः । स्निह्यतीति स्नेहा सुहृच्चन्द्रश्च । मुह्यन्त्यस्मिन्नाहते मूर्धा । मुहेरुपधाया दीर्घो धोऽन्तादेशो रमागमश्च । मज्जत्यस्थिषु मज्जा अस्थिसारः । अर्यपूर्वो माङ् । अर्यमा । विश्वं प्साति विश्वप्सा अग्निः । परिज्जायते परिज्मा चन्द्रोऽग्निश्च । जनेरुपधालोपो मश्चान्तादेशः । मातर्यन्तरिक्षे श्वयतीति मातरिश्वा । धातोरिकारलोपः । मह पूजायाम् । हस्य घो वुगागमश्च । मघवा इन्द्रः ।

इत्युणादिषु प्रथमः पादः ।

वृषेति । वृषधातोः कनिन्प्रत्ययः । 'चित्रोपचित्रा न्यग्रोधी द्रवन्ती शम्बरी वृषा' इत्यमरः । तक्षेति । तक्षू तनूकरणे इत्यस्मात् कनिन्प्रत्ययः । 'तक्षा तु वर्धकिस्त्वष्टा रथकारस्तु काष्ठतट्' इत्यमरः । राजेति । 'राजा प्रभौ नृपे चन्द्रे यज्ञे क्षत्रियशक्रयोः' । धन्वेति । 'समानौ मरुधन्वानौ' इत्यमरः । सप्यशूभ्यां तुट् च । षप समवाये, अशू व्याप्तौ आभ्यां कनिन्प्रत्ययः तुडागमश्च । सप्त अष्टेति रूपम् । नञि जहातेः । नञि उपपदे ओ हाक् त्यागे इत्यस्मात् कनिन्प्रत्ययः । कनिन्यातो लोपः । श्वन्नुक्षन्पूषन्प्लीहन् । टु ओ श्वि गतिवृद्ध्योः, उक्ष सेचने, पूष वृद्धौ, प्लिह गतौ, क्लिदू आर्द्रीभावे, ष्णिह प्रीतौ, मुह वैचित्त्ये, टु मस्जो शुद्धौ, माङ् माने अर्यपूर्वः, प्सा भक्षणे विश्वपूर्वः, जनी प्रादुर्भावे परिपूर्वः, टु ओ श्वि गतिवृद्ध्योः, मह पूजायां एते कनिप्रत्ययान्ता निपात्यन्ते इत्यर्थः । श्वेति । इकारलोपो निपात्यते । 'शुनको भषकः श्वा स्यात्' इत्यमरः । उक्षेति । 'उक्षा भद्रो बलीवर्दः' इत्यमरः । पूषेति । 'सौ चेत्युपधादीर्घः । पूषणावित्यादौ तु ह्रस्व इति नियमात् न दीर्घः । 'विकर्तनार्कमार्तण्डमिहिरारुणपूषणाः' इत्यमरः । प्लिह गताविति । अस्मात् कनिप्रत्यये उपधाया इकारस्य दीर्घ इत्यर्थः । 'अभ्रं पुरीतद्गुहमस्तु प्लीहा पुंस्यथ वरुणसा' इत्यमरः । मूर्धेति । 'मूर्धा ना मस्तकोऽस्त्रियाम्' इत्यमरः । मज्जेति । मज्जन्शब्दस्य नकारान्तत्वेऽपि स्त्रीत्वविवक्षायां टाबप्यभ्युपेयते । सारो मज्जा नरि त्वक् स्त्री' इत्यमरः । अर्यमेति । 'अर्यमा तु पुमान्सूर्ये पितृदेवान्तरेऽपि च' इति मेदिनी । 'सूरसूर्यार्यमादित्यद्वादशात्मदिवाकराः' इत्यमरः । परिज्मेत्यत्र प्रक्रियामाह—जनेरुपधालोप इत्यादि । मातरिश्वेति । सप्तम्या अलुक् निपातनात् । 'श्वसनः स्पर्शनो वायुर्मातरिश्वा सदागतिः' इत्यमरः । मघवन्शब्दे प्रक्रियामाह—इत्य घ इति । 'इन्द्रो मरुत्वान्मघवा विडौजाः पाकशासनः' इत्यमरः । इत्युणादिषु प्रथमः पादः समाप्तः ।

अथ उणादिषु द्वितीयः पादः ।

१५८ कृहृभ्यामेणुः । करेणुः । हरेणुः गन्धद्रव्यम् । १५९ हनिकुषिनीरमिकाशिभ्यः क्थन् । हथो विषण्णः । कुष्ठः । नीथो नेता । रथः । काष्ठम् । १६० अवे भृञः । अवभृथः । १६१ उषिकुषिगतिभ्यस्थन् । ओष्ठः । कोष्ठम् । गाथा । अर्थः । बाहुलकाच्छोथः । १६२ सर्तेर्णित् । सार्थः समूहः । १६३ जृवृभ्यामूथन् । जरूथं मांसम् । 'वरूथो रथगुप्तौ ना' । १६४ पातृतुदिवचिरिचिसिचिभ्यस्थक् । पीथो रविः । घृतं पीथम् । 'तीर्थं शास्त्राऽध्व-

---

अथ द्वितीयः पादः । कृहृभ्यामेणुः । डु कृञ् करणे, हृञ् हरणे, आभ्यामेणुप्रत्ययः । तस्मिन्प्रत्यये परे धातोर्गुण इति भावः । 'करेणुरिभ्यां स्त्री नेभे' इत्यमरः । करेणुर्गजयोषायां स्त्रियां पुंसि मतङ्गजे' इति मेदिनी । हरेणुरिति । 'हरेणुः खण्डिके चास्मिन्' इत्यमरः । 'हरेणुर्नां सतीने स्त्री रेणुकाकुलयोषितोः' इति मेदिनी । हनिकुषिनी । हन हिंसागत्योः, कुष निष्कर्षे, णीञ् प्रापणे, रमु क्रीडायां, काशृ दीप्तौ, एषां द्वन्द्वात् पञ्चमी । एभ्यः क्थन्प्रत्ययः स्यात् । हथ इति । 'अनुदात्तोपदेशवनतितनोत्यादीनाम्' इत्यनुनासिकलोपः । कुष्ठ इति । 'व्याधिः कुष्ठं पारिभाष्यम्' इत्यमरः । 'कोठो मण्डलकं कुष्ठश्वित्रे दुर्नामकाशंसी' इत्यमरः । 'कुष्ठ मुण्डं शीधु बुस्तम्' इत्यमरः । 'कुष्ठं रोगे पुष्करेऽस्त्री' इति मेदिनीकोशश्च । रथ इति । 'रथाभ्रपुष्पविदुर' इत्यमरः । 'रथः पुमानवयवे स्यन्दने वेतसेऽपि च' इति मेदिनी । काष्ठमिति । 'काष्ठं दार्विन्धनं त्रेधः' इत्यमरः । अवे भृञः । डु भृञ् धारणपोषणयोः, अस्मादवे उपपदे क्थन्प्रत्ययः स्यात् । अवभृथ इति । 'दीक्षान्तोऽवभृथे यज्ञे तत्कर्माहं तु यज्ञियम्' इत्यमरः । उषिकुषिगतिभ्यस्थन् । उष दाहे, कुष निष्कर्षे, गै शब्दे, ऋ गतौ, एषां द्वन्द्वात्पञ्चमी । ओष्ठ इति । 'ओष्ठाधरौ तु रदनच्छदौ दशनवाससी' इत्यमरः । कोष्ठमिति । 'पुंसि कोष्ठेऽन्तर्जठरं कुसूलोऽन्तर्गृहं तथा' इत्यमरः 'कोष्ठं कुक्षिकुसूलयोः' इत्यमरः । गाथेति । 'गाथा श्लोके संस्कृतान्यभाषायां शेषवृत्तयोः' इति मेदिनी । अर्थ इति । 'अर्थैर्विभवा अपि' इत्यमरः । बाहुलकात् शोथ इति । 'शोफस्तु श्वथथुः शोथः' इत्यमरः । शु गतावित्यस्मात्थन्प्रत्ययः । सर्तेरिति । सृ गतावित्यस्मात् थनूप्रत्ययः । स च णित् भवतीत्यर्थः । सार्थ इति रूपम् । 'सार्थो वणिक्समूहे स्यादपि सङ्घातमात्रके' इति मेदिनी । जृवृभ्यामूथन् । जृव्यहानौ, वृषु धातुश्च गृह्यते, वृञ् वरणे, आभ्यामूथन् स्यात् । जरूथ इति । जृधातोः रूपम् । तस्यार्थमाह—मांसमिति । वरूथ इति । 'रथगुप्तिर्वरूथो ना कूबरस्तु युगन्धरः' इत्यमरः । पातृतुदिवचि । पा पाने, तॄ प्लवनतरणयोः, तुद व्यथने, वच परिभाषणे, रिचिर् विरेचने, षिचिर् क्षरणे, एषां द्वन्द्वात्पञ्चमी । एभ्यस्थकप्रत्ययः स्यात् । पीथ इति । घुमास्थेतीत्त्वमिति भावः । तीर्थमिति । ऋत इत्वे ष्टरावे दीर्घ इति भावः । 'अङ्गुल्यग्रे तीर्थं दैवं स्वल्पाङ्गुल्योर्मूले कायम्' इत्यमरः ।

रक्षेत्रोपायोपाध्यायमन्त्रिषु । अवतारर्षिजुष्टाम्भःस्त्रीरजःसु च विश्रुतम् ।' इति विश्वः । तुत्थोऽग्निः । उक्थं सामभेदः । रिक्थम् । वाहुलकादृचेरपि । 'रिक्थमृक्थं धनं वसु' । सिक्थम् । १६५ **अर्तेर्निरि** । निर्ऋथं साम । १६६ **निशीथगोपीथाऽवगथाः** । निशीथोऽर्धरात्रो रात्रिमात्रं च । गोपीथं तीर्थम् । अवगथः प्रातःस्नातः । १६७ **गश्चोदि** । उद्गोथः साम्नो भागविशेषः । १६८ **समीणः** । समिथो वह्निः, संग्रामश्च । १६९ **तिथपृष्ठगूथयूथप्रोथाः** । तिजेर्जलोपः । तिथोऽनलः कामश्च । पृष्ठम् । गूथं विष्ठा । यूथं समूहः । 'प्रोथमस्त्री तुरङ्गास्ये प्रोथः प्रस्थित उच्यते' । १७० **स्फायितञ्चिवञ्चिशकिलिपिक्ष्विदि-**

'निपातागमयोस्तीर्थमृषिजुष्टे जले गुरौ' इत्यमरः । विश्वकोशमाह—तीर्थं शास्त्राध्वरेत्यादि । तुत्थ इति । 'रङ्गनी श्रीफली तुत्था द्रोणा दोला च नीलिनी । सूक्ष्मोपकुञ्चिका तुत्था कोरङ्गी त्रिपुटा त्रुटिः' इत्यमरः । उक्थमिति । सामभेदः । रिक्थमिति । 'द्रव्यं वित्तं स्वापतेयं रिक्थमृक्थं धनं वसु' इत्यमरः । सिक्थमिति । 'सिक्थो भक्तपुलाके ना मधूच्छिष्टे नपुंसकम्' इति मेदिनी । 'मधु क्षौद्रं माक्षिकादि मधूच्छिष्टं तु सिक्थकम्' इत्यमरः । अर्तेर्निरि । ऋ गतौ, अस्मात् थगिति शेषः । निर्ऋथं साम । निशीथगोपीथावगथाः । शीङ् स्वप्ने निपूर्वः, पा पाने गोपूर्वः, गाङ् गतौ अवपूर्वः, एतेभ्यः थक्प्रत्ययः स्यात् । निशीथ इति । कित्त्वान्न गुणः । 'अर्धरात्रनिशीथौ द्वौ द्वौ यामप्रहरौ समौ' इत्यमरः । 'निशीथस्तु पुमानर्धरात्रे स्यादात्रिमात्रके' इति मेदिनी । गोपीथः-सोमपानम् । तीर्थमिति तु वृत्तिः । घुमास्थेतीत्वम् । अवगथ इति । थकि धातोराकारस्य ह्रस्वत्वं निपात्यते । गश्चोदि । गै शब्दे इत्यस्य कृताश्वानुकरणस्य ग इति षष्ठ्यन्तम् । 'आतो धातोः' इत्याकारलोपः । उदि उपपदे गैधातोः थक्प्रत्यय इत्यर्थः । 'इतिसीमान्तहरितो रोमन्थोद्गीथबुद्बुदाः' इत्यमरः । समीणः । समि उपपदे इण्धातोः थगित्यर्थः । समिथ इति । वेदभाष्ये त्वस्य संग्रामपरत्वमुक्तम् । तिथपृष्ठगूथयूथप्रोथाः । तिज निशाने, पृषु सेचने, गु पुरीषोत्सर्गे, यु मिश्रणे, प्रथ् गतौ, एते थक्प्रत्ययान्ता निपात्यन्त इत्यर्थः । तिज निशाने इत्यस्मात् थकि आह—तिजेर्जलोप इति । तत्र्याऽर्थमाह—काम इति । पृष्ठमिति । 'पृष्ठं तु चरमं तनोः' इत्यमरः । 'पृष्ठं चरममात्रेऽपि देहस्यावयवान्तरे' इति मेदिनी । गूथमिति । धातोर्दीर्घत्वं च निपात्यते । विष्ठेति । 'पुरीषगूथे वर्चस्कमस्त्री विष्ठाविषौ स्त्रियाम्' इत्यमरः । यूथमिति । अत्रापि निपातनाद्दीर्घः । समूह इति । 'सजातीयैः कुलं यूथं तिरश्चां पुनपुंसकम्' इत्यमरः । प्रोथमिति । प्रथातोः रूपम् । ननु थकः कित्त्वेन कथं गुण इत्यत आह—निपातनादिति । क्वचिदिदं वाक्यं मूलपुस्तकेषु नोपलभ्यते । 'गतयोऽमूः पञ्चधाराः घोणा तु प्रोथमस्त्रियाम्' इत्यमरः । 'प्रोथोऽस्त्री हयघोणायाम्' इति मेदिनी । स्फायितञ्चिवञ्चि । स्फायी वृद्धौ, तञ्चु सङ्कोचने, वञ्चु प्रलम्भने, शक्लृ शक्तौ, क्षिप प्रेरणे, क्ष्वु-

सृपितृपिदृपिवन्द्युन्दिश्वितिवृत्यजिनीपदिमदिमुदिखिदिछिदिभिदिमन्दि-चन्ददहिदसिदम्भिवसिवाशिशोऽहसिसिधिशुभिभ्यो रक् । द्वात्रिंशतो रक्स्यात् । वलि यलोपः, स्फारम् । न्यङ्क्वादित्वात्कुत्वम्, तक्रम् । वक्रम् । शक्रः । क्षिप्रम् । क्षुद्रः । सुप्रश्चन्द्रः । तृप्रः पुरोडाशः । दृप्रो बलवान् । वन्द्रः पूजकः । उन्दी, उन्द्रो जलचरः । श्वित्रं कुष्ठम् । 'वृत्रो रिपौ ध्वनौ ध्वान्ते शैले चक्रे च दानवे' । अजेर्वी वीरः । नीरम् । पद्रो ग्रामः । मद्रो हर्षो देशभेदश्च । 'मुद्रा प्रत्ययकारिणी' । 'खिद्रो रोगो दरिद्रश्च' । छिद्रम् । भिद्रं वज्रम् । मन्द्रः । चन्द्रः । पचाद्यचि चन्दोऽपि । 'हिमांशुश्चन्द्रमाश्चन्द्रः शशी चन्दो हिमद्युतिः' । दहोऽग्निः । दस्रः स्वर्वैद्यः । दभ्रः समुद्रः, स्वल्पं च । वसेः सम्प्रसारणे-३१६८ **न रपरसृपिसृजिस्पृशिस्पृहिसवनादीनाम्** ८।३।११० । रेफपरस्य सकारस्य सृप्यादीनां सवनादीनां च मूर्धन्यो न स्यात् । 'पूर्वपदात्' (सू ३६४३) इति प्राप्तः प्रतिषिध्यत इति वृत्तिर्भूयोऽभिप्राया । तेन 'शासिवसि-' (सू २४१०) इति प्राप्तमपि न । उस्रो रश्मिः । उस्रा गौः । वाश्रो दिवसः । वाश्रं मन्दिरम् । शीरोऽ-

---

दिर् सम्पेषणे, सृप्ल् गतौ, तृप प्रीणने, दृप हर्षमोचनयोः, वदि अभिवादनस्तुत्योः, उन्दी क्लेदने, विवता वर्णौ, वृतु वर्तने, अज गतिक्षेपणयोः, यीष् प्रापणे, पद गतौ, मदी हर्षे, मुद हर्षे, खिद दैन्ये, छिदिर् द्वैधीकरणे, भिदिर् विदारणे, मदि स्तुतौ, चदि आह्लादने, दह भस्मीकरणे, दसु उपक्षये दम्भु दम्भने, वस निवासे, वाश्ृ शब्दे, शीङ् स्वप्ने, हसे हसने, षिध गत्यां, शुभ दीप्तौ, एषां द्वन्द्वात्पञ्चमी । एभ्यो धातुभ्यः रक्प्रत्यय इत्यर्थः । यकारलोपमाह—वलि यलोप इति । स्फारमिति । 'नेड्वशि कृती'ति निषेधादिडागमो न भवति । 'स्फारं भूयश्च भूरि च' इत्यमरः । 'स्फारः स्यात्पुंसि विकटे करकादेश्च बुद्बुदे' इति मेदिनी । तच्चुधातोः रक्प्रत्यये कुत्वविधिं स्मारयति—न्यङ्क्वादित्वादिति । तक्रमिति । 'तक्रं ह्युदश्वित्तमथितम्' इत्यमरः । वक्र इति । वञ्चिधातोः रूपम् । कित्त्वान्नलोपः न्यङ्क्वादित्वात्कुत्वम् । 'आविद्धं कुटिलं भुग्नं वेञ्चितं वक्रमित्यपि' इत्यमरः । शक्र इति । शक्लृधातोः रूपम् । 'जिष्णुर्लेखर्षभः शक्रः' इति 'जयोऽथ कुटजः शक्रः' इति चामरः । 'शक्रः पुमान् देवराजे कुटजाऽर्जुनभूरुहोः' इत्यपि मेदिनी । क्षिप्रमिति । 'क्षिप्रक्षुद्राभीप्सितपृथुपीवरबहुप्रकर्षार्थाः' इत्यमरः । क्षुद्र इति । 'कदर्यं कृपणक्षुद्रकिम्पचानमितम्पचाः' इत्यमरः । 'क्षुद्रः स्यादधमक्रूरकृपाणाऽल्पेषु' इति मेदिनी । इत्यादि स्पष्टम् । न रपरसृपिसृजि । रपर इति बहुव्रीहिः । 'अपदान्तस्य मूर्धन्यः' इत्यधिकृतम् । सृप्ल् गतौ, सृज विसर्गे, स्पृश संस्पर्शने, स्पृह ईप्सायां चुरादिः, सवनादि, एतेषां द्वन्द्वात्षष्ठी । अवयवावयविभावः षष्ठ्यर्थः । तथा चैतदवयवस्य सकारस्य षत्वं न स्यादित्यर्थः । उस्र इति । वसधातोः

जगरः । हस्रो मूर्खः। सिध्रः साधुः । शुभ्रम् । बाहुलकात् मुसे रक् । मुस्रम् उदश्रु । १७१ चकिरम्योरुच्चोपधायाः । चुक्रमम्लद्रव्यम् । रुभ्रोऽरुणः । १७२ वौ कसेः । विकुस्रक्षन्द्रः । १७३ अमितम्योर्दीर्घश्च । आम्रम् । ताम्रम् । १७४ निन्देर्नलोपश्च । निद्रा । १७५ अर्देर्दीर्घश्च । आर्द्रम् । १७६ शुचेर्दश्च । शूद्रः । १७७ दुराणो लोपश्च । दुःखेनेयते प्राप्यत इति दूरम् । १७८ कृतेश्छः क्रू च । कृच्छ्रम् । क्रूरः । १७९ रोदेर्णिलुक् च । रोदयतीति रुद्रः । १८० बहुलमन्यत्रापि संज्ञाछन्दसोः । णिलुगित्येव । 'वान्ति पर्णशुषो वाता-

---

रकि तस्य किरित्वात्सम्प्रसारणेऽनेन षत्वनिषेधे च रूपम् । नन्वत्रानेन षत्वाभावकथनमसङ्गतम्, अस्य सूत्रस्य 'पूर्वपदात्संज्ञायामगः' इति प्राप्तस्य षत्वस्य निषेधकतायां वृषादिषु उक्तत्वात् । अत्र तु न तेन षत्वप्राप्तिः । अपि तु 'शासिवसी'त्यनेनेत्येतदाशङ्क्यायामाह—भूयोऽभिप्रायेति । तस्मात् वृत्तिग्रन्थः एतन्निषेधकत्वस्यापि बोधक एवेति भावः । उस्रो रश्मिरिति । 'किरणोऽस्रमयूखांशु' इत्यमरादिति भावः । 'उस्रो वृषे च किरणे' इति मेदिनी । उस्रेति । 'माहेयी सौरभेयी गौरुस्रा माता च श्रुक्रिणी' इत्यमरः । वास्र इति । वास्थातोः रूपम् । मुस्रमिति । मुस्र खण्डने, इत्यस्मादूपम् । चकिरम्योरुच्चोपधायाः । चक तृप्तौ, रमु क्रीडायां, आभ्यां रक्प्रत्ययः उपधाया उकारश्चेत्यर्थः । चुक इति । 'सहस्रवेधी चुक्रोऽम्लवेतसः' इत्यमरः । वौ कसेः । कस गतौ विपूर्वादस्मात् रक् स्यादुवं चोपधायाः । विकुस्र इति रूपम् । अमितम्योर्दीर्घश्च । अम गत्यादिषु, तमु काङ्क्षायां, आभ्यां रक्प्रत्ययः, प्रकृतेरचो दीर्घश्चेत्यर्थः । आम्रमिति । 'आम्रश्चूतो रसालोऽसौ' इत्यमरः ताम्रमिति । तमुधातो रूपम् । निन्देर्नलोपश्च । णिदि कुत्सायामस्माद्धातोः रक्प्रत्ययः, तत्सन्नियोगेन धातोर्नकारस्य लोपश्चेत्यर्थः । निद्रेति । इदिरवान्नुमि तस्य लोप इत्यर्थः । 'स्यान्निद्रा शयनं स्वापः' इत्यमरः । अर्देर्दीर्घश्च । अर्द गतौ याचने च, अस्मात् रक्प्रत्ययः धातोर्दीर्घश्चेत्यर्थः । आर्द्रमिति रूपम् । 'आर्द्रं स्यात् क्लिन्नं तिमितम्' इत्यमरः । शुचेर्दश्च । शुच शोके, अस्मात् रक्, धातोर्दकारश्चान्तादेशः, उपधाया दीर्घश्चेत्यर्थः । शूद्राश्चाऽवरवर्णाश्च वृषलाश्च जघन्यजाः' इत्यमरः । दुराणो लोपश्च । इण् गतावित्यस्मात् दुर्युपपदे रक् स्यात्, धातोर्लोपश्चेत्यर्थः । रकि रोरीति रेफस्य लोपे ढ्रलोप इति दीर्घ इति भावः । कृतेश्छः क्रू च । कृती छेदने इत्यस्मात् रक् स्यात् प्रकृतेरन्त्यस्य तकारस्य छकारादेशः । 'क्रू' इति अनेकाल्त्वात्सर्वादेशश्च स्यादित्यर्थः । 'स्यात्कष्टं कृच्छ्रमाभीलं त्रिष्वेषां भेद्यगामि यत्' । देवभूयादिकं तद्धेतुं कृच्छ्रं साम्तपनादिकम्' । 'नृशंसो धातुकः क्रूरः प्रायो धूर्तस्तु वञ्चकः' इत्यमरः । रोदेर्णिलुक्च । रुदिर् अश्रुविमोचने एयन्तादस्मात् रक्प्रत्ययः णेर्लुक्च स्यात् । णेरनिटीति लोपे सिद्धे लुग्वचनं प्रत्ययलक्षणेन गुणाभावार्थम् । रोदयतीति रुद्र इति । रकि रूपम् । बहुलमन्यत्रापि संज्ञाच्छन्दसोः । संज्ञाच्छन्दसोरन्यत्रापि धात्वन्तरात् प्रत्ययान्तरेऽपि बहुलं

स्ततः पर्णमुचोऽपरे । ततः पर्णरुहो वान्ति ततो देवः प्रवर्षति' । १८१ **जोरी च** जोरोऽणुः । ज्यश्चेत्येके । १८२ **सुसूधागृधिभ्यः क्रन्** । सुरः । सूरः । धीरः । गृध्रः । १८३ **शुसिचिमीनां दीर्घश्च** । शुः सौत्रः । शूरः । सीरम् । चीरम् । मीरः समुद्रः । १८४ **वाविन्धेः** । वीध्रं विमलम् । १८५ **वृधिवपिभ्यां रन्** । वर्ध्रचर्म । वप्रः प्राकारः । १८६ **ऋज्रेन्द्राग्रवज्रविप्रकुब्रचुवक्षुरखुरभद्रोग्रमेरभेलशुकशुक्लगौरवन्त्रेरामालाः** । रन्नन्ता एकोनविंशतिः । निपातनाद्गु-

---

णेर्लुक् वक्तव्य इत्यर्थः । संज्ञायामुदाहरणं बृंहयति वर्धयति प्रजा इति ब्रह्मा । णेर्लुक् । छन्दास तु 'वर्धन्तु त्वा सुष्टुतयः' । वर्धयन्त्वित्यर्थः । बाहुलकात्संज्ञाछन्दसोरभावेऽपि क्वचित् भवतीत्याह—वान्ति पर्णशुष इति । प्रथमतः पर्णशुषः वाता वान्ति । पर्णं शोषयन्तीत्यर्थः । पर्णशोषणानन्तरं पर्णमुचो वाताः वान्ति । पर्णं मोचयन्तीति पर्णमुचः । पर्णमोचनानन्तरं पर्णरुहः वाता वान्ति । पर्णं रोहयन्तीति पर्णरुहः । ततो देवः वृष्टिं करोतीत्यर्थः । अत्र संज्ञाछन्दसोरभावेऽपि णेर्लुक् । जोरी च । जु इति सौत्रो धातुः अस्मात् रक् स्यात् । ईकारश्चान्तादेश इत्यर्थः । जीर इति । 'जीरस्तु जरणे खड्गे' इति मेदिनी । ज्यश्चेत्येक इति । ज्या वयोहानौ, अस्मात् रकि 'ग्रहिज्ये'ति सम्प्रसारणं, पूर्वरूपं, 'हल' इति दीर्घं च, जीर इति रूपमित्यर्थः । इदमेव च सम्यक् । अत एव भाष्ये 'न धातुलोप'सूत्रे 'जीवेरदानुः'इति वार्तिकस्य प्रत्याख्यानार्थं 'नैतत् जीवेः रूपम् , अपितु ज्याधातोः रकि' इति उक्तम् । सुसूधागृधिभ्यः क्रन् । षुञ् अभिषवे, षूङ् प्राणिगर्भविमोचने, डु धाञ् धारणपोषणयोः, गृधु अभिकाङ्क्षायां, एषां द्वन्द्वात् पञ्चमी । एभ्यः क्रन्प्रत्ययः स्यादित्यर्थः। सुरेति । कित्त्वान्न गुणः। रका सिद्धे क्नविधिर्नित्स्वरार्थः। 'सुरा हलिप्रिया हाला' इत्यमरः । सूर इति । 'सूरसूर्यार्यमादित्यद्वादशात्मदिवाकराः' इत्यमरः । धीर इति । धुमास्थेतीत्वम् । 'धीरो मनीषी ज्ञः प्राज्ञः' इत्यमरः । शुसिचिमीनां दीर्घश्च । शु गतौ, षिञ् बन्धने, षिञ् चयने, डु मिञ् प्रक्षेपणे, एभ्यः क्रन्प्रत्ययः स्यात् , प्रकृतिभूतानामेषां दीर्घश्च । शु गतावित्यस्य धातुपाठेऽदर्शनादाह—शुः सौत्र इति । चीरमिति । 'माणिक्यभाष्यसिन्दूरचीरचीवरपिञ्जरम्' इत्यमरः । मीर इति । मिञ्धातोः रूपम् । वाविन्धेः । वावुपदे इग्धी दाक्षाविरित्यस्मात्क्रन्स्यादित्यर्थः । वीध्रमिति । 'अनिदिता'मिति नलोपः । 'वीध्रं तु विमलात्मकम्' इत्यमरः । वृधिवपिभ्यां रन् । वृधु वृद्धौ, डुवप् बीजसन्ताने, आभ्यां रन्प्रत्ययः स्यात् । वर्ध्रमिति । रनि उपधागुणः । 'नध्रो वर्ध्री वरत्रा स्यात्' इत्यमरः । वप्र इति । 'वप्रस्तापे पुमानस्त्री वेणुक्षेत्रक्रचये तटे' इत्यमरः । ऋजेन्द्राग्र । ऋज गतिस्थानादिषु, इदि परमैश्वर्य, अगि गतौ, वज गतौ, डु वप् बीजसन्ताने, कुबि आच्छादने, चुबि वक्त्रसंयोगे, क्षुर विलेखने, खुर छेदने, भदि कल्याणे, उच समवाये, लि भी भये, शुच शोके, गुङ् अव्यक्ते शब्दे, वन सम्भक्तौ,

णाऽभावः। ऋज्रा नायकः। इदि इन्द्रः। अङ्गेर्नलोपः। अग्रम्। 'वज्रोऽस्त्रीहीरके पवौ'। डु वप्, उपधाया इत्वम्। विप्रः। कुम्बिचुम्ब्योर्नलोपः। कुम्रमरण्यम्। चुम्रं मुखम्। 'लुर विलेखने' रेफलोपः। अगुणः। लुरः। 'खुर छेदने' रलोपो गुणाऽभावश्च। खुरः। भन्देर्नलोपः भद्रम्। 'उच समवाये' चस्य गः। उग्रः। त्रि भी, भेरी। पत्ले लः। भेलो जलतरणद्रव्यम्। शुचेश्चस्य कः, शुक्रः। पत्ले लः, शुक्लः। गुद्। वृद्धिः। 'गौरोऽरुणे सिते पीते'। 'वन संभक्तौ' वन्रो विभागी। इणो गुणाभावः। 'इरा मद्ये च वारिणि'। 'मा माने' माला। **१८७ समि कस उकन्**। 'कस गतौ' सम्यक् कसन्ति पलायन्ते जनाः अस्मादिति संकसुकः, दुर्जनः, अस्थिरश्च। **१८८ पचिनशोर्णुकन्कनुमौ च**। पचेः कः। पाकुकः सूपकारः। नशेर्नुम्। नंशुकः। **१८९ भियः क्रुकन्**। भीरुकः। **१९० क्वुन्शिलिपसंज्ञयोरपूर्वस्यापि**। रजकः। इक्षुकुट्टकः। चरकः। 'चष भक्षणे'। चषकः। शुनकः। भषकः। **१९१ रमे रश्च लो वा**। रमको विलासी। लमकः। **१९२ जहातेर्ढे च**। जहकस्त्यागी कालश्च। **१९३ धमो धम च**। धम-

---

हृग् गतौ, मा माने, एते रत्नन्ता निपात्यन्ते। ऋज् इत्यत्र उपधागुणमाशङ्क्याह—निपातनादिति। अगिधातोरिगित्त्वादाह—अङ्गेर्नलोप इति। शेषं स्पष्टम्। समि कस उकन्। कस गतौ, अस्मात्समि उपपदे उकन्प्रत्यय इत्यर्थः। सङ्कसुक इति रूपम्। पचिनशोर्णुकन्कनुमौ च। डु पचष् पाके, णश अदर्शने, आभ्यां णुकन्प्रत्ययः स्यात्। अनयोः क्रमेण कादेशनुमागमौ च भवत इत्यर्थः। णुकनो णित्त्वाद्वृद्धिः। पाकुकः नंशुक इति रूपम्। भियः क्रुकन्। त्रि भी भये इत्यस्मात् क्रुकन्प्रत्यय इत्यर्थः। भीरुक इति रूपम्। 'भीरुकः कारुकः स्रस्तो भीरुभीरुकभीलुकाः' इत्यमरः। क्वुन्शिलिपि। शिलिपन्यभिधेये संज्ञायां च गम्यमानायां क्वुन्स्यात्। अपूर्वस्य निरुपपदस्येत्यर्थः। पञ्चम्यर्थे षष्ठी। अपिशब्दात्सोपपदादपि। शिलिपन्युदाहरति—रजक इति। रज रागे इत्यस्मात् क्वुनि नलोपे अकादेशे च रूपम्। 'निर्णेजकः स्याद्रजकः शौण्डिको मण्डहारकः' इत्यमरः। सोपपदादुदाहरति—इक्षुकुट्टक इति। कुट्ट छेदने, इक्षून् कुट्टयतीति इक्षुकुट्टकः। संज्ञायामुदाहरति—चरक इति। 'पातकोद्योगचरकतमालामलकानडः' इत्यमरः। चषक इति। 'चषकोऽस्त्री पानपात्रं सरकोऽप्यनुतर्षणम्' इत्यमरः। शुनक इति। शुन गताविस्यस्मात्क्वुनि रूपम्। भषक इति। भष भर्त्सने इत्यस्माद्रूपम्। 'शुनको भषकः श्वा स्यादलर्कस्तु स योगितः' इत्यमरः। रमे रश्च लो वा। रमु क्रीडायामित्यस्मात् क्वुन्स्यात्, धातोः रेफस्य लकारश्च वेत्यर्थः। रमकः लमक इति रूपम्। जहातेर्ढे च। ओ हाक् त्यागे, अस्मात् क्वुन्स्यात्, धातोर्द्वित्वं च स्यादित्यर्थः। जहक इति रूपम्। धमो धम च। धमा शब्दाग्निसंयोगयोः, अस्मात्क्वुन्स्याद्-

कः कर्मकारः। १९४ हनो वध च। वधकः। १९५ बहुलमन्यत्रापि। 'कुह विस्मापने'। कुहकः। कृतकम्। १९६ कृषेर्वृद्धिश्चोदीचाम्। कार्षकः कृषकः। १९७ उदकं च। प्रपञ्चार्थम्। १९८ वृश्चिकृष्योः किकन्। वृश्चिकः। कृषिकः। १९९ प्राड्डि पणिकषः। प्रापणिकः पण्यविक्रयी। प्राकर्षिकः। परदारोपजीवी। २०० मुषेर्दीर्घश्च। मूषिकः आखुः। २०१ स्यमेः संप्रसारणं च। चादीर्घः। सीमिकः वृक्षभेदः। २०२ क्रिय इकन्। क्रयिकः क्रेता। २०३ आङि पणिपनिपतिखनिभ्यः। आपणिकः। आपनिकः इन्द्रनीलः, किरातश्च। आपतिकः श्येनो दैवायत्तश्च। आखनिको मूषिको वराहश्च। २०४ श्यास्त्याहृञविभ्य इनच्। श्येनः। स्त्येनः। हरिणः। अविनोऽध्वर्युः। २०५ वृजेः किच्च। वृजिनम्। २०६ अजेरज च। वीभाववाधनार्थम्।

धातोर्धमादेशश्चेत्यर्थः। धमक इति रूपम्। हनो वध च। वधक इति। हन हिंसागत्योः, क्वुनि धातोर्वधादेशे च रूपम्। बहुलमन्यत्रापि। अन्यधातोरपि क्वुन्स्यात्। कुहधातोः क्वुनि कुहक इति रूपम्। कृतकमिति। कृती छेदने। कृषेर्वृद्धिश्चोदीचाम्। कृष विलेखने, अस्मात्क्वुन्, उदीचां मते वृद्धिश्चेत्यर्थः। उदीचांग्रहणाद्विकल्पोऽयं वृद्धिविधिः। कार्षकः कृषक इति रूपम्। उदकं च। उन्दी क्लेदने, अस्मात् क्वुन्। ननु क्वुन्शिल्पिसंज्ञयोरित्यादिना संज्ञात्वात्सिद्धमित्यत आह—प्रपञ्चार्थमिति। वृश्चिकृष्योः किकन्। ओ व्रश्चू छेदने, कृष विलेखने आभ्यां किकन्स्यात्, वृश्चिक इति रूपम्। 'किष्कुर्हस्ते वितस्तौ च शूककीटे च वृश्चिके' इत्यमरः। कृषिक इति। 'क्षेत्राजीवः कर्षकश्च कृषिकश्च कृषीवलः' इत्यमरः। प्राड्डि पणिकषः। प्राड्डि उपपदे पण व्यवहारे स्तुतौ च, कष हिंसायामिति धातुभ्यां किकन्स्यादित्यर्थः। प्रापणिक इति। प्र आङ्पूर्वकपणधातोः रूपम्। प्राकर्षिक इति। कषधातोः रूपम्। मुषेर्दीर्घश्च। मुष स्तेये इत्यस्मात्किकन् स्यात् धातोर्दीर्घश्चेत्यर्थः। मूषिक इति रूपम्। 'उन्दुरुर्मूषिकोऽप्याखुः' इत्यमरः। स्यमेः सम्प्रसारणं च। स्यमु शब्दे, अस्मात् किकन्, धातोः सम्प्रसारणं, दीर्घश्चेत्यर्थः। सीमिक इति रूपम्। क्रिय इकन्। डुक्रीञ् द्रव्यविनिमये इत्यस्मादिकन्प्रत्ययः इत्यर्थः। क्रयिक इति। गुणे अयादेशे च रूपम्। आङि पणिपनि। पण व्यवहारे स्तुतौ च, पन च, पल्ल गतौ, खनु अवदारणे एषां इन्द्वात् पञ्चमी। आङि उपपदे एतेभ्यः इकन्प्रत्ययः स्यात्। आङि उपपदेऽनेन इकना रूपसिद्धेः 'प्राङि पणिकष' इत्यत्र पणिग्रहणं प्रपञ्चार्थम्। उपसर्गान्तरनिवृत्त्यर्थं वा तत्। श्यास्त्याहृञविभ्य इनच्। श्यैङ् गतौ, ष्ट्यै शब्दसङ्घातयोः, हृञ् हरणे, अव रक्षणादौ एभ्य इनच् स्यात्। श्येन इति। 'पत्री श्येन उलूकस्तु वायसारातिपेचकौ' इत्यमरः। स्त्येनश्चोरः। हरिण इति। 'मृगे कुरङ्गवातायुहरिणाजिनयोनयः' इत्यमरः। वृजेः किच्च। वृजी वर्जने, अस्मात् इनच् स्यात्, स च किन्नवतीत्यर्थः। वृजिनमिति।

अजिनम् । २०७ **बहुलमन्यत्रापि** । कठिनम् । नलिनम् । मलिनम् । कुण्डिनम् । २०७ **द्यतेः** 'यत्पुरुषि दिनम्' । दिवसोऽपि दिनम् । २०८ **द्रुदक्षिभ्यामिनन्** । द्रविणम् । दक्षिणः । दक्षिणा । २०९ **अर्तेः किदिच्च** । इरिणं शून्यम् । २१० **वेपितुह्योर्ह्रस्वश्च** । विपिनम् । तुहिनम् । २११ **तलिपुलिभ्यां च** । 'तलिनं विरले स्तोके स्वच्छेऽपि तलिनं त्रिषु' । पुलिनम् । २१२ **गर्वेरत उच्च** । गौरादित्वान्ङीष् । गुर्विणी गर्भिणी । २१३ **रुहेश्च** । रोहिणः । २१४ **महेरिनण्च** । चादिनन् । माहिनम्-महिनम् राज्यम् । २१५ **क्विब्वचिप्रच्छिश्रिस्रुद्रुप्रुज्वां दीर्घोऽसंप्रसारणं च** । वाक् । प्राट् । श्रीः । स्रवत्यतो घृतादिकमिति स्रूः, य-

---

'कल्मषं वृजिनंनोघमंहो दुरितदुष्कृतम्' इत्यमरः । 'वृजिनं कल्मषे क्लीबम्' इति मेदिनी । अजेरज च । अज गतिक्षेपणयोः, अस्मादिनच् अजेरजादेशश्चेत्यर्थः । न चाजेरजादेशविधानं व्यर्थमिति वाच्यम्, वीभावबाधनार्थं तदावश्यकत्वात् । 'अजिनं चर्म कृत्तिः स्त्री' इत्यमरः । बहुलमन्यत्रापि । अन्येभ्योऽपि धातुभ्यः इनच् वक्तव्य इत्यर्थः । कठिनमिति । कठ कृच्छ्रजीवने इत्यस्मादूपम् । नलिनमिति । णल गहने इत्यस्मादूपम् । मलिनमिति । मल धारणे इत्यस्मादूपम् । कुण्डिनमिति । कुडि दाहे इत्यस्मादूपम् । अतेरिति । दो अवखण्डने इत्यस्मादिनच् स्यादित्यर्थः । दिनमिति रूपम् । द्रुदक्षिभ्यामिनन् । द्रु गतौ, दक्ष वृद्धौ, आभ्यामिनन् स्यादित्यर्थः । द्रविणमिति । 'हिरण्यं द्रविणं द्युम्नम्' इत्यमरः । दक्षिण इति । 'दक्षिणे सरलोदारौ सुकलो दातृभोक्तरि' इत्यमरः । अर्तेः किदिच्च । ऋ गतौ, अस्मादिनन् । स च कित् । धातोरित्वं चादेशः । रपरत्वम् । इरिणमिति । 'इरिणं शून्यमूषरम्' इत्यमरः । वेपितुह्योर्ह्रस्वश्च । टु वेपृ वेपने, तुहिर् अदने, आभ्यामिनन् धातोर्ह्रस्वश्चेत्यर्थः । एकारस्य ह्रस्व इकारः । 'अटव्यरण्यं विपिनम्' इत्यमरः । तुहिनमिति । लघूपधगुणे ह्रस्वः । तालपुलिभ्यां च । तल प्रतिष्ठायां, पुल महत्त्वे, आभ्यामिनन्प्रत्ययः । तलिनशब्दार्थं विवृण्वन्नाह—तलिनं विरले स्तोक इति । पुलिनमिति । 'तोयोत्थितं तत्पुलिनं सैकतं सिकतामयम्' इत्यमरः । गर्वेरत उच्च । गर्व मोचने, अस्मादिनन्, अकारस्य उकार आदेशश्चेत्यर्थः । स्त्रीत्वविवक्षायामाह—गौरादित्वादिति । गुर्विणीति । 'आपन्नसत्त्वा स्यादूगुर्विण्यन्तर्वत्नी च गर्भिणी' इत्यमरः । रुहेश्च । रुह बीजजन्मनि प्रादुर्भावे च, अस्मादिनन् प्रत्यय इत्यर्थः । रोहिण इति । उपधागुणे रूपम् । गौरादित्वात् रोहिणी । 'अर्जुन्यां रोहिणी स्यात्' इति वैश्यवर्गे अमरः । महेरिनण् च । मह पूजायां अस्मादिनण् स्यात् । चकारादिनन्नपि । माहिनमिति । इनणो णित्त्वादुपधावृद्धिः । महिनमिति । इनन्नि रूपम् । क्विब्वचिप्रच्छि । वच परिभाषणे, प्रच्छ ज्ञीप्सायां, श्रिञ् सेवायां, स्रु गतौ, द्रुङ् गतौ, प्रुङ् गतौ, जु गतौ सौत्रः एषां द्वन्द्वात् षष्ठी । एभ्यः क्विप् स्यात्, दीर्घः कित्त्वात्प्राप्तसम्प्रसारणाऽभावश्च स्यादित्यर्थः । वागिति । क्विपः सर्व-

क्षोपकरणम् । द्रूर्हिरण्यम् । कटप्रः कामरूपी कीटश्च । 'जूराकाशे सरस्वत्यां पिशाच्यां जवने स्त्रियाम्' । २१६ आप्नोतेर्ह्रस्वश्च । आपः । अपः । अद्भिः । अद्भ्यः । २१७ परौ व्रजेः षः पदान्ते । व्रजेः क्विब्दीर्घौ स्तः पदान्ते तु षश्च । परिव्राट् । परिव्राजौ । २१८ हुवः श्लुवच्च । जुहूः २१९ स्रुवः कः । स्रुवः । २२० चिक्च । इकार उच्चारणार्थः । क इत्, कुत्वम् । स्रुक् । 'ध्रुवं च स्रुचश्च संमृड्ढि' । २२१ तनोतेरनश्च वः । तनोतेश्चिक्प्रत्ययः, अनो वशब्दादेशश्च । त्वक् । २२२ ग्लानुदिभ्यां डौः । ग्लौः । नौः । २२३ च्विरव्ययम् । डौरित्येव । ग्लौकरोति । 'कृन्मेजन्तः' (सू ४४६) इति सिद्धे नियमार्थमिदम् ।

क्षोपितया कृत्वे दीर्घे 'वाचिस्वपियजादीना'मिति प्राप्तसम्प्रसारणाभावे च रूपम् । प्राट् इति । प्रच्छधातोः क्विपि 'ग्रहिज्ये'ति सम्प्रसारणाभावे दीर्घे छस्य 'छ्वोः शूडनुनासिके च' इति शकारे व्रश्चेति षत्वे जश्त्वे चर्त्वे च रूपम् । श्रीरिति । दीर्घे रूपम् । 'कृदिकारा'दिति ङीष् तु न शङ्क्यः । कृतः य इकार इति व्याख्यानात्, अत्र इकारस्य कृदवयवत्वं नास्ति, कृत्प्रत्ययस्तु सर्वसुप्तः । स्रूरिति । स्रुधातोर्दीर्घे रूपम् । द्रूरिति । द्रुधातोः रूपम् । जूशब्दार्थं विष्णुपत्नीमेदिनीकोशमाह—जूराकाशे सरस्वत्यामिति । आप्नोतेर्ह्रस्वश्च । आप्लृ व्याप्तौ, अस्मात्क्विप् स्यात्, प्रकृतेर्ह्रस्वश्चेत्यर्थः । आप इति । अप्तृन्निति दीर्घः । ह्रस्वश्रवणायाह—अप इति अद्भिरिति । 'अपो भि' इति तकारादेशः, जश्त्वम् । परौ व्रजेः षः पदान्ते । परावुपपदे व्रज गतावित्यस्मात् क्विप् दीर्घश्च भवतः । पदान्तस्य तु जकारस्य षकारश्चेत्यर्थः । पदान्तविषये षत्वे कृते उदाहरति—परिव्राडिति । जश्त्वचर्त्वं इति भावः । परिव्राजाविति । पदान्तत्वाऽभावाच्च षत्वम् । हुवः श्लुवच्च । हु दानादनयोः, अस्मात्क्विप्, धातोर्दीर्घः, श्लुवत्वं च भवतीत्यर्थः । जुहूरिति । श्लुवद्भावादूद्विर्वचने अभ्यासह्रस्वे च रूपम् । स्रुवः कः । स्रु गतावित्यस्मात् कप्रत्यय इति भावः । स्रुव इति । किरत्वादूगुणाऽभावे उवङि च रूपम् । 'ध्रुवोऽपभृज्जुहूर्ना तुस्रुवो भेदाः स्रुचः स्त्रियः' इत्यमरः । अयं स्रुवोऽभिजिहर्ति होमानिति मूल एव जुहोत्यादिव्याख्याप्रकरणे उक्तम् । चिक् च । स्रुव इत्यनुवर्तते । स्रु गतावित्यस्मात् चिक्प्रत्ययो भवतीत्यर्थः । किरत्वं गुणनिषेधार्थम् । इकार उच्चारणार्थः । चस्य कुत्वे च स्रुक् इति रूपम् । तनोतेरनश्च वः । चिगित्यनुवर्तते । तनु विस्तारे इत्यस्मात् चिक्प्रत्ययः । तनूधात्ववयवस्य अन् इति संघातस्य व इत्यकारविशिष्टः संघातो भवतीत्यर्थः । चस्य कुत्वे च रूपमाह—त्वगिति । 'स्त्रियां तु त्वगसृग्धरा' इत्यमरः । ग्लानुदिभ्यां डौः । ग्लै हर्षक्षये, णुद प्रेरणे, आभ्यां डौप्रत्यय इति भावः । ग्लौरिति । टेरिति टिलोपः । 'ग्लौर्मृगाङ्कः कलानिधिः' इत्यमरः । नौरिति । टिलोपे रूपम् । 'स्त्रियां नौस्तरणिस्तरिः' इत्यमरः । च्विरव्ययम् । डौरित्यनुवर्तते । प्रत्ययग्रहणपरिभाषया तदन्तपरम् । डौप्रत्ययान्तं शब्दस्वरूपं चेदव्ययसंज्ञकं स्या-

उणादिप्रत्ययान्तश्च्यन्त एवेति। २२४ **रातेर्डैः**। राः। रायौ। रायः। २२५ **गमेर्डोः**। 'गौर्नादित्ये बलीवर्दे किरणक्रतुभेदयोः। स्त्री तु स्यादिशि भारत्यां भूमौ च सुरभावपि। नृस्त्रियोः स्वर्गवज्राम्बुरश्मिदृग्वाणलोमसु'। बाहुलकाद्द्युतेरपि डोः। 'द्यौः स्त्री स्वर्गान्तरिक्षयोः' इति कोषः। २२६ **भ्रमेश्च ड्डूः**। भ्रूः। चाद्गमेः। अग्रेगूः। २२७ **दमेर्डोसिः**। दोः। दोषौ। २२८ **पणेरिज्यादेश्च वः**। वणिक्। स्वार्थेऽण्। 'नैगमो वाणिजो वणिक्'। २२९ **वशेः कृत्**। 'उशिगग्नौ घृतेऽपि च'। २३० **भृञ ऊच्च**। भूरिक् भूमिः। २३१ **जसिसहोरुरिन्**। जसुर्विज्रम्भ। सहुरिरादित्यः पृथिवी च। २३२ **सुयुरुवृञो युच्**। सवनश्चन्द्रमाः। यवनः। रवणः कोकिलः। वरणः। २३३ **अशे रश च**। अश्नो-

---

दित्यर्थः। ग्लौकरोतीति। **अग्लौः ग्लौः सम्पद्यते तथा करोतीत्यर्थः। अव्ययात्स्वप्योजनं तु सुपो लुक्**। **अस्य नियमार्थत्वमाह**—कृन्मेजन्त इत्यादिना। **नियमाकारमाह**—उणादिप्रत्ययान्त इत्यादिना। च्व्यन्त एवेति। **तेन नौरर्ल्लोरित्यादौ नाव्ययत्वम्**। रातेर्डैः। **रा दाने इत्यस्मात् डैप्रत्ययो भवतीत्यर्थः**। राः इति। **'रायो हलीत्यात्वम्**। **अर्थैर्विभवा अपि' इत्यमरः**। गमेर्डोः। **गम्लृ गताविति धातोरस्मात् डोप्रत्यय इत्यर्थः**। गौरिति। टिलोपे **'गोतो णि'दिति णिद्भावे लुप्ते च रूपम्**। **गोशब्दार्थं विष्णुवन् केशवोक्तमाह**—गौर्नादित्ये इत्यादिना। **'गौरिला कुम्भिनी क्षमा' 'अनड्वान् सौरभेयी गौः' माहेयी सौरभेयी गौः' इति चामरः**। **गौरिति रूपमाह**—बाहुलकादिति। **द्युत दीप्ताविति धातोरस्मात्प्रत्यये टिलोपे च रूपम्**। **'द्योदिवौ द्वे स्त्रियामभ्रम्' इत्यमरः**। भ्रमेश्च ड्डूः। **भ्रमु अनवस्थाने, धातोरस्मात् ड्डूप्रत्ययः स्यादित्यर्थः**। डित्त्वाट्टिलोपः। भूरिति। 'ऊर्ध्वं द्वयोर्भ्रुवौ स्त्रियाम्' इत्यमरः। अग्रेगूरिति। **सेवक इत्यर्थः**। दमेर्डोसिः। **दमु उपशमे, अस्माड्डोसिप्रत्यय इत्यर्थः**। डित्त्वाट्टिलोपः। 'भुजबाहू प्रवेष्टो दोः' इत्यमरः। पणेरिज्यादेश्च वः। **पण व्यवहारे स्तुतौ च, अस्मात् इजिप्रत्ययः। आदेः पकारस्य वकारश्चेत्यर्थः**। **वणिक् इति कृत्वे चत्वे च रूपम्**। **अमरकोशस्थवाणिज इत्यस्योपपत्तिमाह**—स्वार्थेऽणिति। वशेः कित्। **वश कान्ताविति धातोरस्मात् इजिः, स च कित्स्यात् कित्त्वात्सम्प्रसारणम्, कुत्वचत्वं**। भृञ ऊच्च। **'भृञ् भरणे' इत्यस्मादिजिः कित्स्यात्, धातोरूकारः अन्तादेशश्च**। भूरिति। **ऊर्ध्वं रपरत्वम्**। जसिसहोरुरिन्। जसु मोक्षणे, षह मर्षणे, आभ्यामुरिन्प्रत्यय इत्यर्थः। सुयुरुवृञो युच्। **षुञ् अभिषवे, यु मिश्रणे, रु शब्दे, वृञ् वरणे, एभ्यो युच्प्रत्यय इत्यर्थः**। **'युवोरनाकौ' इति अनादेशः**। गुणे अवादेशे च सवनमिति रूपम्। **'अभिषवः सवनं च सा' इत्यमरः**। **'यवनं स्वधरे स्नाने सीमनिर्दलनेऽपि च' इति मेदिनी। यवनो म्लेच्छविशेषः**। रवण इति। **'रवाभ्याम्' इति णत्वम्**। **'रवणः शब्दनो नान्दी' इत्यमरः**। वरण इति। **गुणः रपरत्वं णत्वम्**। **'सेतौ च**

तेर्युच्स्यात् रशादेशश्च । रशना काञ्ची । जिह्वावाची तु दन्त्यसकारवान् । २३४ **उन्देर्नलोपश्च** । ओदनः । २३५ **गमेर्गश्च** । गमेर्युच्स्याद्गश्चादेशः । गगनम् । २३६ **बहुलमन्यत्रापि** । युच्स्यात् । स्यन्दनः । रोचना । २३७ **रञ्जेः क्युन्** । रजनम् । २३८ **भूसूधूभ्रस्जिभ्यश्छन्दसि** । भुवनम् । सुवनः आदित्यः । धुवनो वह्निः । निधुवनं सुरतम् । भृजनमम्बरीषम् । २३९ **कृपॄवृजिमन्दिनिधाञ्यः क्युः** । किरणः । पुरणः समुद्रः । वृजनमन्तरिक्षम् । मन्दनं स्तोत्रम् । निधनम् । २४० **धृषेर्धिष् च संज्ञायाम्** । धिषणो गुरुः । धिषणा धीः । २४१ **वर्तमाने पृषद्बृहन्महज्जगच्छतृवच्च** । अतिप्रत्ययान्ताः । 'पृषु सेचने' गुणाभावः । पृषन्तो । बृहत् । महान् । गमेर्जगादेशः । जगत् । २४२

वरणे वेणी नदीभेदकचोच्चये' इत्यमरः । 'प्राकारो वरणः साल' इति च । अशे रश च । अशू व्याप्तौ इत्यस्मात् युच् स्यात् प्रकृते रशादेशश्चेत्यर्थः । नायमादेशः शित्, सर्वादेशत्वं त्वनेकाल्त्वात् । रशनेति । 'स्त्री कट्यां मेखला काञ्ची सप्तकी रशना तथा' इत्यमरः । जिह्वावाची त्विति । 'रसज्ञा रसना जिह्वा' इति प्रसिद्ध इति भावः । दन्त्यसकारेति । रस आस्वादने चौरादिकः । ततो नन्द्यादित्वात् ल्युप्रत्यये अनादेशे रूपमिति भावः । उन्देर्नलोपश्च । उन्दी क्लेदने, अस्मात् युच्, धातोर्नकारस्य लोपश्चेत्यर्थः । उपधागुणः । ओदन इति । 'ओदनोऽस्त्री सदीदिविः' इत्यमरः । गमेर्गश्च । गम्लृ गतावित्यस्माद्युच्प्रत्ययः गश्चान्तादेश इत्यर्थः । 'नभोऽन्तरिक्षं गगनम्' इत्यमरः । बहुलमन्यत्रापि । स्यन्दन इति । स्यन्दू प्रस्रवण इत्यस्मात् युजिति भावः । रोचनेति । रुच दीप्तावित्यस्मात्प्रत्ययः । रञ्जेः क्युन् । रञ्ज रागे अस्मात्क्युन्स्यात् । रजनमिति । कित्त्वान्नलोप इति भावः । ल्युटि तु रञ्जनमिति भावः । 'रञ्जनं रक्तचन्दनम्' इत्यमरः । भूसूधू । भू सत्तायां, पूङ् प्राणिप्रसवे, धूञ् कम्पने, भ्रस्ज पाके, एभ्यः क्युन्स्यात् । भुवनमिति । कित्त्वान्न गुणः । उवङिति भावः । 'विष्टपं भुवनं जगत्' इत्यमरः । एवं सुवन इत्यपि । निधुवनमिति । 'मैथुनं निधुवनं रतम्' इत्यमरः । भृजनमिति । क्युनः किरवात् 'ग्रहिज्येति'ति सम्प्रसारणम् । सस्य जश्त्वेन दः । दस्य श्चुत्वेन जः । कृपॄवृजि । कृ विक्षेपे, पॄ पालनपूरणयोः, वृजी वर्जने, 'मदि स्तुतिमोदमदस्वप्नकान्तिगतिषु, निपूर्वकडुभाञ्धारणपोषणयोः' एभ्यः क्युप्रत्यय इत्यर्थः । किरण इति । इरवं रपरत्वम् णत्वम् । पुरण इति । 'डदोष्ठ्यपूर्वस्य' इत्युत्वम् । निधनमिति । 'आतो लोप इटि च' इत्यालोपः । निधनं कुबेरनाशयोः' इत्यमरः । धृषेर्धिष् च सञ्ज्ञायाम् । ञि धृषा प्रागल्भ्ये, अस्मात्क्युः, धातोर्धिषादेशश्च । धिषण इति । 'गीष्पतिर्धिषणो गुरुः' इत्यमरः । धिषणेति । 'बुद्धिर्मनीषा धिषणा' इत्यमरः । वर्तमाने । पृषु सेचने, बृह वृद्धौ, मह पूजायां, गम्लृ गतौ, एभ्यः अतिप्रत्यय इत्यर्थः । शतृवच्चेति । तेन ङगिरवान्नुमिति भावः । अतिप्रत्यये क्यूप-

संश्चत्तृपद्वेहत्। एते निपात्यन्ते। पृथक्करणं शतृवद्भावनिवृत्त्यर्थम्। सश्चिनोतेः सुट्। इकारलोपः। संश्चत् कुहकः। तृपत् छत्रम्। विपूर्वात् हन्तेष्टिलोपः, इत ए च। 'वेहद्भोपघातिनी'। **२४३ छन्दस्यसानच्शुजभ्याम्।** शवसानः पन्थाः। जरसानः पुरुषः। **२४४ ऋञ्जिवृधिमन्दिसहिभ्यः कित्।** ऋञ्जसानो मेघः। वृधसानः पुरुषः। मन्दसानोऽग्निर्जीवश्च। सहसानो यज्ञो मयूरश्च। **२४५ अर्तेर्गुणः शुट् च।** अर्शसानोऽग्निः। **२४६ सम्यानच्स्तुवः।** संस्तवानो वाग्मी। **२४७ युधिबुधिदृशिभ्यः किच्च।** युधानः। बुधानः। दृशानो लोकपालकः। **२४८ हुर्छेः सनो लुक् छलोपश्च।** जुहुराणश्चन्द्रमाः। **२४९ श्वितेर्दश्च।** शिश्विदानः पुण्यकर्मा। **२५० तृन्तृचौ शंसिक्षदादिभ्यः संज्ञायां चाऽनिटौ।** शंसेः क्षदादिभ्यश्च क्रमात्तृन्तृचौ स्तः तौ चाऽनिटौ। शंस्ता स्तोता। शंस्तरौ। शंस्तरः। क्षदिः सौत्रो धातुः, शकलीकरणे भक्षणे च।

धगुणमाशङ्क्याह—गुणाभाव इति। निपात्यत इति शेषः। शतृवत्त्वातिदेशस्य फलप्रदर्शनायाह—पृषन्तीति। गमधातोरतिप्रत्यये जगादेशे च जगदिति रूपम्। लटः शतरि तु महतीत्याद्यौ शपि 'आच्छीनद्योः' इति नुम् स्यात्। अतिप्रत्यये तु तस्यार्द्धधातुकतया न शप्। संश्चत्तृपद्वेहत्। चिञ् चयने, तृप प्रीणने, हन हिंसागत्योः, एते अतिप्रत्ययान्ता निपात्यन्त इत्यर्थः। ननु पूर्वसूत्र एव पठितव्ये पृथक् पठनं व्यर्थमित्यत आह—पृथक्करणमिति। संश्चदित्यत्राह—इकारलोप इति। वेहदित्यत्राह—इत ए इति। विशब्दसम्बन्धिन इकारस्येत्यर्थः। ह्रस्वस्य। शु गतौ, जॄष् वयोहानौ आभ्यामसानच्प्रत्यय इत्यर्थः। ऋञ्जिवृधि। ऋजि गतौ, वृधु वृद्धौ, मदी हर्षे, षह मर्षणे, एभ्यः असानच्प्रत्ययः कित्स्यादित्यर्थः। अर्तेर्गुणः। ऋ गतौ, अस्मात् असानच्प्रत्ययः, धातोर्गुणः, प्रत्ययस्य सुडागमश्चेत्यर्थः। सम्यानच् स्तुवः। समि उपपदे ष्टुञ् स्तुतावित्यस्मात् आनच्प्रत्यय इत्यर्थः। गुणेऽवादेशः। युधिबुधि। युध सम्प्रहारे, बुधिर् अवबोधने, दृशिर् प्रेक्षणे, एभ्यः आनच् कित्स्यादित्यर्थः। युधान इति। हुर्छेः सनो। हुर्छा कौटिल्ये, अस्मात्सन्नन्तात् आनच् स्यात्, सनो लुक्, छलोपश्च। जुहुराण इति। प्रत्ययलक्षणेन सनमाश्रित्य द्वित्वम्। नच 'न लुमता' इति निषेधः। लुप्तप्रत्यये परतः तन्निमित्ताङ्गसञ्ज्ञकस्य कार्यं नेति तदर्थात्। द्वित्वं तु न सनि परतः तन्निमित्ताङ्गसञ्ज्ञस्य विधीयते, अपि तु तदन्तस्य। श्वितेर्दश्च। श्वितवर्णो, अस्मात् सन्नन्तादानच् सनो लुक्; तकारस्य दकारश्च। शिश्विदान इति। पूर्ववद्द्वित्वम्। 'शिश्विदानः पुण्यकर्मा चपलश्चिकुरः समौ' इत्यमरः। शिश्विदानोऽकृष्णकर्मेति क्वचित्पाठः। तस्याप्येष एवार्थः। तृन्तृचौ शंसि। शंसु स्तुतौ, क्षदधातुः सौत्रः, आभ्यां तृन्तृचौ क्रमात्स्तः। तौ चाऽनिटावित्यर्थः। शस्तेति। तृन्।

अनुदात्तेत्। 'दृक्ये चक्षदानम्' इति मन्त्रात्। 'उक्षाणं वा वेहतं वा क्षदन्ते' इति ब्राह्मणाच्च। 'क्षत्ता स्यात्सारथौ द्वास्थे वैश्यायामपि शूद्रजे'। **२५१ बहुलमन्यत्रापि।** मन्-मन्ता। हन्-हन्ता। इत्यादि। **२५२ नप्तृनेष्टृत्वष्टृहोतृपोतृभ्रातृजामातृमातृपितृदुहितृ।** न पतन्त्यनेन पितरो नरके इति नप्ता पौत्रो दौहित्रश्च। नयतेः षुग्गुणश्च, नेष्टा। त्विषेरितोऽत्वम्, त्वष्टा। होता। पोता, ऋत्विग्भेदः। भ्राजतेर्जलोपः भ्राता। जायां माति जामाता। 'मान पूजायाम्' न लोपः। माता। पातेराकारस्येत्वम्। पिता। दुहेस्तृच्, इट् गुणाऽभावश्च। दुहिता। **२५३ सुज्यसेर्ऋन्।** स्वसा। **२५४ यतेर्वृद्धिश्च।** याता। 'भार्यास्तु भ्रातृवर्गस्य यातरः स्युः परस्परम्'। **२५५ नञि च नन्देः।** न नन्दति ननान्दा। इह वृद्धिर्नानुवर्तते इत्येके। 'ननान्दा तु स्वसा पत्युर्नन्दा नन्दिनी च सा' इति शब्दार्णवः। **२५६ दिवेर्ऋः।** देवा। देवरः। 'स्वामिनो देवृदेवरौ' इत्यमरः। **२५७ नयतेर्डिच्च।** ना। नरौ। नरः। **२५८ सव्ये स्थश्छन्दसि।** 'अम्बा-

---

र्शस्तरावति। नप्तृन्निति सूत्रे नप्त्रादिग्रहणं नियमार्थं 'औणादिकतृन्तृजन्तानां यद्यपधादीर्घस्तर्हि नप्त्रादीनामेवेति। तस्मादत्र न दीर्घं इति भावः। प्रशास्तारावित्यादौ तु आदिग्रहणात्तृचि दीर्घा भवत्येव, नप्त्रादिषु पाठात्। क्षत्तेति। 'नियन्ता प्राजिता यन्ता सूतः क्षत्ता च सारथिः' इत्यमरः। नप्तृनेष्टृत्वष्टृ। एते तृन्तृजन्ता निपात्यन्ते। नप्तृशब्दस्य व्युत्पत्तिमाह—न पतन्त्यनेनेति। नञि उपपदे पल्ल गतावित्यस्मात्तनि नञः प्रकृतिभावः। अच्छन्दस्कोपश्च निपात्यते। नेष्टेत्यत्राह—नयतेरिति। णीञ् प्रापणे इत्यस्मात्प्रत्ययः। त्वष्टेत्यत्राह—त्विषेरितोऽत्वमिति। त्विष दीप्तावित्यस्मात प्रत्यये इकारस्य अकार इत्यर्थः। होतेति। 'हु दानादनयोरित्यस्मात् प्रत्ययः गुण इति भावः। पोतेति। पूञ् पवने इत्यस्मात् प्रत्ययः। भ्रातेत्यत्राह—भ्राजतेरिति। भ्राजृ दीप्तावित्यस्मात् प्रत्ययः। सुज्यसेर्ऋन्। सावुपपदे असु क्षेपणे इत्यस्मात् ऋन्प्रत्यय इत्यर्थः। स्वसेति। यणादेशः अप्तृन्निति दीर्घः। यतेर्वृद्धिश्च। यती प्रयत्ने, अस्मात् ऋन् वृद्धिश्चेत्यर्थः। यातेत्यस्यार्थमाह—भार्यास्त्विति। अमरकोशोऽयम्। नञि न नन्देः। टु नदि समृद्धौ, अस्मान्नञ्युपपदे ऋन्। न नन्दतीति। 'सेवायां कृतायामपीति शेषः। ऋनि वृद्धिरप्यनेनैव पूर्वसूत्रादनुवृत्तेः। मतान्तरमाह—देवेति। अत्र मानमाह—ननान्दा तु स्वसा पत्युरिति। दिवेर्ऋः। दिवु क्रीडादिषु, अस्मात ऋप्रत्ययो भवतीत्यर्थः। ऋनि प्रकृते ऋविधिः नित्स्वराऽभावार्थम्। 'स्वामिनो देवृदेवरौ' इत्यमरः। नयतेर्डिच्च। णीञ् प्रापणे, अस्मात् ऋप्रत्ययः, स च डिच्च भवतीत्यर्थः। डित्त्व टिलोपार्थम्। 'स्युः पुमांसः पञ्चजनाः पुरुषाः पूरुषा नराः' इत्यमरः। सव्ये स्थश्छन्दसि। ष्ठा गतिनिवृत्तौ, अस्मात् सव्यशब्दे उपपदे ऋप्रत्ययः, स

म्ब–' (सू २९१८) इत्यत्र 'स्थास्थिन्स्थूणामुपसंख्यानम्' (वा ४९६१)। सव्येष्ठा सारथिः। सव्येष्ठरौ। सव्येष्ठरः। २५६ **अर्तिसृधृधम्यश्यवित्-म्योऽनिः**। अष्टभ्योऽनिप्रत्ययः स्यात्। अरणिरग्नेर्योनिः। सरणिः। धरणिः। धमनिः। अमनिर्गतिः। अशनिः। अवनिः। तरणिः। बाहुलकाद्रजनिः। २६० **आङि शुषेः सनश्छन्दसि**। आशुशुक्षणिरग्निर्वातश्च। २६१ **कृषेरादेश्च चः**। चर्षणिर्जनः। २६२ **अदेर्मुट् च**। अग्नयिः अग्निः। २६३ **वृतेश्च**। वर्तनिः। गोवर्धनस्तु चकारान्मुट् वर्त्मनिरित्याह। २६४ **क्षिपेः किच्च**। क्षिपणिरायुधम्। २६५ **अर्चिशुचिहुसृपिछादिछर्दिभ्य इसिः**। अर्चिर्ज्वाला। इदन्तोऽप्ययम्। 'अग्नेर्भ्राजन्ते अर्चयः। शोचिर्दीप्तिः। हविः। सर्पिः। 'इस्मन्–' (सू २९८५) इति ह्रस्वः। छदिः पटलम्। छर्दिर्वमनव्याधिः। इदन्तोऽपि। 'छर्यतीसारशूलवान्'। २६६ **वृंहेर्नलोपश्च**। 'बर्हिर्नो कुशशुष्मणोः'। २६७ **द्युतेरिसिन्नादेश्च जः**। ज्योतिः। २६८ **वसो रुचेः संज्ञायाम्**।

च डिदित्यर्थः। सव्येष्ठ इति स्थले षत्वार्थमाह—अम्बाम्बेत्यत्रेति। तत्पुरुषे कृतीत्यलुक्। 'नियन्ता प्राजिता यन्ता सूतः क्षत्ता च सारथिः। सव्येष्ठदक्षिणस्थो च' इत्यमरः। अर्तिसृधृ। ऋ गतौ, सृ गतौ, धृञ् धारणे, धमिधातुः सौत्रः, अम गतौ, अश भोजने, अव रक्षणे, तॄ प्लवनतरणयोः, एभ्यः अनिप्रत्यय इत्यर्थः। अरणिरिति। 'निर्मन्थदारुणि त्वरणिर्द्वयोः, इत्यमरः। आङि शुषेः। आङि उपपदे शुष शोषणे इत्यस्मात्सन्नन्तादनिप्रत्यय इत्यर्थः। आशुशुक्षणिरिति। शुशुक्षेति सन्नन्तम्। 'रोहितास्वो वायुसखः शिखावानाशुशुक्षणिः' इत्यमरः। कृषेरादेश्च चः। 'कृष विलेखने' अस्मादनिप्रत्यय इत्यर्थः। ककारस्य चकारश्च। चर्षणिरिति। 'पुगन्तलघूपधस्य च' इति गुणः। अदेर्मुट् च। अद भक्षणे, अस्मादनिप्रत्ययः, मुडागमश्च प्रत्ययस्य भवतीत्यर्थः। वृतेश्च। वृतु वर्तने, अस्मादनिप्रत्यय इत्यर्थः। 'सरणिः पद्धतिः पद्या वर्त्मन्येकपदीति च' इत्यमरः। वर्तनीत्यत्र 'कृदिकारादि'ति ङीष्। क्षिपेः किच्च। क्षिप प्रेरणे, अस्मादनिप्रत्ययः, स च किद्भवतीत्यर्थः। किरवान्न गुणः, क्षिपणिः। अर्चिशुचि। अर्च पूजायां, शुच शोके, हु दानादनयोः, सृप्ल गतौ, छद अपवारणे एभ्यन्तः, छर्द वमने, एभ्यः इसिप्रत्यय इत्यर्थः। अर्चिरिति। सान्तोऽयम्। 'ज्वालाभासोर्नपुंस्यचिः' इत्यमरः। इदन्तोऽप्ययमिति। एभ्यन्तादर्चेः अच इरिति इप्रत्यये साधुरिति भावः। छादि इति एभ्यन्तादिसि सिलोपे उपधाह्रस्वार्थमाह—इस्मन्निति। छर्दतीसारेति। छर्दिश्चातिसारश्च शूलं च यस्य सन्तीति विग्रहः। वृंहेर्नलोपश्च। बृहि वृद्धौ, अस्मादिसिः, नकारस्य लोपश्चेत्यर्थः। बर्हिरिति। उपधागुणे रूपम्। द्युतेरिसिन्नादेश्च जः। द्युत दीप्तौ, अस्मादिसिन्प्रत्ययः। आदेर्दकारस्य जकारश्चेत्यर्थः। वसो रुचेः

वसुरोचिर्यज्ञः । २६६ **भुवः कित्** । भुविः समुद्रः । २७० **सहो धश्च** । सधिरनड्वान् । २७१ **पिबतेस्थुक्** । 'पाथिश्चत्तुःसमुद्रयोः' । २७२ **जनेरुसिः** । जनुर्जननम् । २७३ **मनेर्धश्छन्दसि** । मधुः । २७४ **अर्तिपॄवपियजितनिधनितपिभ्यो नित्** । अरुः । परश्वग्रन्थिः । वपुः । यजुः । तनुः । तनुषी । तनुषि । धनुरस्त्रियाम् । 'धनुर्वंशविशुद्धोऽपि निर्गुणः किं करिष्यति' । सान्तस्योदन्तस्य वा रूपम् । 'तपुः सूर्याऽग्निशत्रुषु । २७५ **एतेर्णिच्च** । आयुः । आयुषी । २७६ **चक्षेः शिच्च** । शित्त्वात् स'र्वधातुकत्वेन ख्याञ्बाधः । चक्षुः । २७७ **मुहेः किच्च** । मुहुरव्ययम् । २७८ **बहुलमन्यत्रापि** । आचक्षुः । परिचक्षुः । २७९ **कृगृशॄवृञ्चतिभ्यः क्वरच्** । 'कर्वरो व्याघ्रकक्षसोः' । गर्वरोऽहङ्कारी । शर्वरी रात्रिः । 'वर्वरः प्राकृतो जनः' । चत्वरम् । २८० **नौ सदेः** । 'निषद्वरस्तु जम्बालः' । निषद्वरी रात्रिः । इत्युणादिषु द्वितीयः पादः ॥

अथ उणादिषु तृतीयः पादः ।

२८१ **छित्वरच्छत्वरधीवरपीवरमोवरच्चीवरतीवरनीवरगह्वरकट्व-**

रूढ्यायाम् । **वसुशब्दे उपपदे रुच दीप्तावित्यस्मादिसिन् प्रत्ययः स्यात्सञ्ज्ञायामित्यर्थः** । वसुरोचिरिति । भुवः कित् । 'भू' सत्तायामित्यस्मात् इसिन्प्रत्ययः, स च कित् भवतीत्यर्थः । कित्त्वान्न गुणः । सहो धश्च । **षह मर्षणे** इत्यस्मात् इसिन्प्रत्ययः, अन्त्यस्य धकारश्चेत्यर्थः । पिबतेस्थुक् । **पा पाने**, अस्मादिसिन् , धातोश्च थुगागम इत्यर्थः । पाथिरिति रूपम् । जनेरुसिः । **जनी प्रादुर्भावे** अस्मादुसिप्रत्यय इत्यर्थः । मनेर्धश्छन्दसि । **मनु अवबोधने**, अस्मादुसिप्रत्ययः धातोरन्तादेशश्च धकार इत्यर्थः । अर्तिपॄवपि । **ऋ गतौ, पॄ पालनपूरणयोः, डु वप् बीजसन्ताने, यज देवपूजनादौ, तनु विस्तारे, धन धान्ये, तप सन्तापे, एभ्य** इसिप्रत्ययः स्यात् । स च नित् भवतीत्यर्थः । नित्त्वं स्वरार्थम् । एतेर्णिच्च । **इण् गतावित्यस्मादुसिप्रत्ययः**, स च णिच्च भवतीत्यर्थः । णित्त्वाद्वृद्धिः । आयुरिति । चक्षेः शिच्च । **चक्षिङ् व्यक्तायां वाचि** अस्मादुसिः । स च शिच्च भवतीत्यर्थः । शित्त्वफलमाह—सार्वधातुकत्वेनेति । चक्षते रूपादिकमनुभवत्यनेनेति चक्षुः । मुहेः किच्च । **मुह वैचित्त्ये**, अस्मादुसिः, स च कित्यर्थः, कित्त्वान्न गुणः । 'मुहुः पुनः पुनः शश्वत्' इत्यमरः । कृगृश । **कृ विक्षेपे, गॄ निगरणे, शॄ हिंसायां, वृञ् वरणे, चते याचने**, एभ्यः क्वरच् स्यादित्यर्थः । नित्त्वं ङीषर्थम् । नौ सदेः । **नावुपपदे षदॢ विशरणगत्यवसादनेष्वित्यस्मात् क्वरच् स्यादित्यर्थः । नित्त्वफलं दर्शयन्नुदाहरति**—निषद्वरी रात्रिरिति । इत्युणादिषु द्वितीयः पादः ।

अथ तृतीयः पादः छित्वरच्छत्वरधीवर । एते क्वरचप्रत्ययान्ता निपात्यन्त इत्यर्थः ।

रसंयद्वराः । एकादश ष्वरच्प्रत्ययान्ता निपात्यन्ते । छिदिर् छद अनयोस्तकारोऽन्तादेशः, छिदेर्गुणाभावश्च । छित्वरो धूर्तः । 'छित्वरो गृहकुञ्जयोः' । धीवरः कैवर्तः । पीवरः स्थूलः । मीवरो हिंसकः । चिनोतेर्दीर्घश्च । चीवरं भिक्षुकप्रावरणम् । तीवरो जातिविशेषः । नीवरः परिव्राट् । गाहतेर्ह्रस्वत्वम् । गह्वरम् । कटे वर्षादौ । कट्वरं व्यञ्जनम् । यमेर्दकारः संयद्वरो नृपः । पदेः सम्पद्वर इत्येके । **२८२ इण्सञ्जिदीङ्ष्यविभ्यो नक्** । 'इनः सूर्ये नृपे पत्यौ' । सिनः काणः । जिनः अर्हन् । दीनः । उष्णः । ऊनः । **२८३ फेनमीनौ** । एतौ निपात्येते । स्फायतेः फेनः । मीनः । **२८४ कृषेर्वर्णे** । कृष्णः । **२८५ बन्धेर्ब्राधिबुधौ च** । ब्रध्नः ।

निपातनमेवाह—अनयोस्तकार इति । छिदिर् द्वैधीकरणे, छद अपवारणे, आभ्यां ष्वरच्प्रत्ययः, तत्सन्नियोगेन धातोस्तकारोऽन्तादेशः गुणाऽभावश्च निपात्यत इत्यर्थः । 'छित्वरश्छेदने द्रव्ये धूर्ते वैरिणि च त्रिषु' इति मेदिनी । धीवर इति । डुधाञ् धारणपोषणयोः, अस्मात् ष्वरचि धातोरन्त्यस्य ईत्त्वं निपात्यत इत्यर्थः । एवं पा पाने, मा माने, आभ्यां ष्वरचि ईत्त्वं निपात्यत इति बोध्यम् । 'कैवर्तं दाशधीवरौ' 'पीवनी तु स्थूलपीवरे' इत्यमरः । मीवर इति । डु मीञ् हिंसायामित्यस्मादपि ष्वरचि साधुः । चीवरमिति । चिञ् चयने इत्यस्मात् श्नुविकरणात् ष्वरचि दीर्घो निपात्यत इत्यर्थः । तीवर इति । 'ताय् पूजानिशामनयोः' इत्यस्मात् ष्वरचि, 'लोपो व्योः' इति यलोपे, ईत्त्वं निपात्यते । यद्वा, तीवधातोः प्रत्यये 'लोपो व्योः' इति वलोपे रूपम् । नीवर इति । णीञ् प्रापणे इत्यस्मात् ष्वरचि रूपम् । गह्वरेत्यत्राह—गाहतेरिति । गाहू विलोडने इत्यस्मादिति भावः । 'गह्वरं गण्डशैलास्तु' इत्यमरः । षित्त्वान्ङीषि गह्वरीति रूपम् । 'विपुला गह्वरी धात्री' इत्यमरः । कट्वरेति । कटे वर्षादौ, अस्मात्प्रत्ययः । संयद्वर इत्यत्राह—यमेर्दकार इति । इण्भ्यः । 'इण् गतौ, षिञ् बन्धने, जि जये, दीङ् क्षये, उष दाहे, अव रक्षणे, एभ्यः नक्प्रत्यय इत्यर्थः । कित्त्वान्न गुणः । इन इति । 'इनो भगो धामनिधश्चांशुमालयब्जिनीपतिः' । 'इनः सूर्ये प्रभौ राजा' इत्यमरः । जिन इति । 'मारजिल्लोकजिज्जिनः इत्यमरः । दीन इति । 'निःस्वस्तु दुर्विधो दीनो दरिद्रो दुर्गतोऽपि सः' इत्यमरः । ऊन इति । अवधातोरूपम् । नकः कित्त्वात् 'उवरत्वा' इत्यूठ् । फेनमीनौ । स्फायी वृद्धौ, मीञ् हिंसायाम्, आभ्यां नकि एनौ निपात्येते इत्यर्थः । आद्ये स्फाय् इत्येतस्य फे इत्यादेशः । 'झिण्डीरोऽब्धिकफः फेनः' इत्यमरः । कृषेर्वर्णे । 'कृष विलेखने' अस्मात् वर्णेऽभिधेये नक् स्यादित्यर्थः । 'कृष्णे नीलाऽसितश्यामकालश्यामलमेचकाः' इत्यमरः । बन्धेर्ब्राधिबुधौ च । बन्ध बन्धने, अस्माद्रक् स्यात्, प्रकृतेर्बुधि ब्रधि इत्यादेशौ च भवत इत्यर्थः । ब्रध्न इति । 'भास्क-

बुध्नः । २८६ **धापृवस्यज्यतिभ्यो नः** । 'धाना भृष्टयवे स्त्रियः' । पर्ण पत्रम् । पर्णः, किंशुकः । 'वस्नो मूल्ये वेतने च' । अजेर्वी । वेनः । अत्नः आदित्यः । बाहुलकाच्छृणोतेः । श्रोणः पङ्गुः । २८७ **लक्षेरट् च** । लक्षेश्चुरादिण्यन्तान्नः स्यात्तस्याऽऽगमश्च । चान्मुडित्येके । 'लक्ष्मणं नाभि चिह्ने च' । लक्षणो लक्ष्मणश्च रामभ्राता । 'लक्षणा हंसयोषायां सारसस्य च लक्ष्मणा' । २८८ **वनेरिच्चोपधायाः** । वेन्ना नदी । २८९ **सिवेष्टेर्यू च** । दीर्घोच्चारणसामर्थ्यान्न गुणः । स्यून आदित्यः । बाहुलकात्केवलो नः । ऊठ् । अन्तरङ्गत्वाद्यण् । गुणः । स्योनः । २९० **कृवृजसिद्रुपन्यनिस्वपिभ्यो नित्** । कर्णः । वर्णः । 'जर्णश्चन्द्रे च वृत्ते च' । सेना । द्रोणः । पन्नो नीचैर्गतिः । अन्नमोदनः । स्वप्नो निद्रा । २९१ **धेट इच्च** । 'धेनः सिन्धुर्नदी धेना । २९२ **तृषिशुषिरसिभ्यः कित्** ।

रोऽहस्करो ब्रध्नः' इत्यमरः । बुध्न इति । 'शिरोऽग्रं शिखरं वा ना मूलं बुध्नोऽङ्घ्रिनामक' इत्यमरः । धापृवस्यज्यतिभ्यो नः । डु धाञ् धारणपोषणयोः, पॄ पालनपूरणयोः, वस निवासे, अज गतौ, अत सातत्यगमने, एभ्यो न प्रत्यय इत्यर्थः । नकि प्रकृते नप्रत्ययविधानं वेन इत्यादौ गुणार्थं, वस्न इत्यत्र सम्प्रसारणाऽभावार्थं च । धाना इत्यत्र अमरकोशमाह—धाना भृष्टयवे स्त्रिय इति । वस्न इति । 'मूल्यं वस्नोऽप्यवक्रयः' इत्यमरः । वेन इति । अजेर्वी आदेशः । श्रोण इति । 'पृथिनरलपतनौ श्रोणः पङ्गौ मुण्डस्तु मुण्डिते' इत्यमरः । लक्षेरट् च । लक्ष दर्शनाङ्कनयोः, लक्ष आलोचने, आभ्यां चुरादिण्यन्ताभ्यां नप्रत्ययः स्यादित्यर्थः, अडागमश्च प्रकृतेः । लक्ष्मण इति रूपसिद्ध्यर्थमाह—चान्मुडिति । वनेरिच्चोपधायाः । वन षण सम्भक्तौ, अस्माद्नप्रत्ययः, उपधाया इत्वं चेत्यर्थः । वेन्नेति । उपधाया इत्वे गुणः । सिवेष्टेर्यू च । षिवु तन्तुसन्ताने, अस्मान्नप्रत्ययः टेरिव् इत्यस्य स्थाने यू आदेशश्चेत्यर्थः । स्यून इत्यत्र यू आदेशे कृते 'सार्वधातुकार्धधातुकयोः' इति गुणमाशङ्क्याह—दीर्घोच्चारणसामर्थ्यादिति । यदि गुण इष्टस्तर्हि यु इति ह्रस्वमेव विदधीत, गुणे कृते विशेषाऽभावात् । एवं सति दीर्घोच्चारणं गुणाऽभावार्थं विज्ञायेतेति भावः । ननु तर्हि कथं स्योन इति अत्राह—बाहुलकात् केवलो न इति । 'यू' आदेशरहित इत्यर्थः । एवञ्च, नप्रत्यये ष्टुत्वोरिति वस्य ऊठि गुणात्पूर्वमन्तरङ्गत्वात् यणि गुणे च रूपमिति भावः । कृवृजसिद्र । कृ विक्षेपे, वृञ् वरणे, वृ इति पाठे तु वृ वरणे, जॄष् वयोहानौ, षिञ् बन्धने, द्रु गतौ एन स्त्रौ, ऊन प्राणने, ञि ष्वप् शये, एभ्यो नप्रत्ययः स्यात्, स च नित्स्यादित्यर्थः । नित्त्वं स्वरार्थम् । वर्ण इति । 'रषाभ्याम्' इति णत्वम् । धेट इच्च । धेट् पाने, अस्मान्नप्रत्ययः स्यात्, इकारश्चान्तादेश इत्यर्थः । धेन इति । इकारस्य गुणे रूपम् । इत्थाऽऽविधाने तु आदेच इत्यात्वं स्यादिति भावः । तृषिशुषिरसिभ्यः । ञि तृषा विपाकायां, शुष शोषणे, रस शब्दे, एभ्यो नप्रत्ययः स्यात्, स च कित्

तृष्णा। शुष्णः सूर्यो वह्निश्च। रत्नं द्रव्यम्। २९३ **सुञो दीर्घश्च**। सूना वधस्थानम्। २९४ **रमेस्त च**। रमयतीति रत्नम्। २९५ **रास्नासास्नास्थूणावीणाः**। रास्ना गन्धद्रव्यम्। सास्ना गोगलकम्बलः। स्थूणा गृहस्तम्भः। वीणा वल्लकी। २९६ **गादाभ्यामिष्णुच्**। गेष्णुर्गायनः। देष्णुर्दाता। २९७ **कृत्यशूभ्यां क्स्नः**। कृत्स्नम्। अकृत्स्नमखण्डम्। २९८ **तिजेर्दीर्घश्च**। तीक्ष्णम्। २९९ **श्लिषेरच्चोपधायाः**। श्लक्ष्णम्। ३०० **यजिमनिशुन्धिदसिजनिभ्यो युच**। यज्युरृग्वर्युः। 'मन्युर्दैन्ये क्रतौ कुधि'। शुन्ध्युरग्निः। दस्युस्तस्करः। जन्तुः शरीरी। ३०१ **भुजिमृङ्भ्यां युक्त्युकौ**। भुज्युर्भोजनम्। मृत्युः। ३०२ **सर्तेरयुः**। सरयुर्नदी। अयूरिति पाठान्तरम्। सरयूः। ३०३ **पानीवि-**

त्यर्थः। तृष्णेति। कित्त्वान्न गुणः। सुञा दीर्घश्च। पुन् अभिषवे, अस्मान्नप्रत्ययः स्यात् धातोर्दीर्घश्चेत्यर्थः। सूनेति। धातोर्दीर्घविधिसामर्थ्यान्न गुणः, किदित्यनुवर्तनाद्वा। 'सूनाऽधोजिह्विकापि च' इत्यमरः। रमेस्त च। 'रमु क्रीडायामस्माण्ण्यन्तात् नप्रत्ययः स्यात्, तकारोऽन्तादेशश्चेत्यर्थः। रमेरिति ण्यन्तस्य निर्देशः। मित्त्वादुपधाह्रस्वः। रास्नासास्ना। रस आस्वादने, षस स्वप्ने, ष्ठा गतिनिवृत्तौ, वी गतिव्याप्तिप्रजनादिषु, एभ्यः नप्रत्यये इत्थं निपात्यन्त इत्यर्थः। रास्नेति। रस धातोः नप्रत्यये उपधादीर्घ इति भावः। 'नाकुली सरसा रास्ना' इत्यमरः। सास्नेति। उपधादीर्घो निपात्यते। 'सास्ना तु गलकम्बले' इत्यमरः। स्थूणेति। 'ष्ठा गतिनिवृत्ता'वित्यस्य रूपम्। प्रत्ययसन्नियोगेन धातोरूत्वं, प्रत्ययस्य णत्वं च निपात्यते। 'स्थूणा स्तम्भे च वेश्मनः' इत्यमरः। वीणेति। वीधातोः रूपम्। णत्वं निपात्यते। गादाभ्यामिष्णुच्। 'गै शब्दे, डु दाञ् दाने' आभ्यां इष्णुच्प्रत्यय इत्यर्थः। गेष्णुरिति। आदृगुणे रूपम्। कृत्यशूभ्यां क्स्नः। कृती छेदने, अशू व्याप्तौ' आभ्यां क्स्नप्रत्यय इत्यर्थः। कृत्स्नमिति। कित्त्वान्नोपधागुणः। अकृत्स्नमिति। न्नश्चेति पत्वे, ढ्रलोपे इति दीर्घे, कवर्गात्परत्वात्षत्वे, षकाभ्यामिति णत्वे च रूपम्। तिजेर्दीर्घश्च। तिज निशाने, अस्मात् क्स्नप्रत्ययः, धातोर्दीर्घश्चेत्यर्थः। श्लिषेरच्चोपधायाः। 'श्लिष आलिङ्गने' अस्मात् क्स्नप्रत्ययः धातोरुपधाया आकारश्चेत्यर्थः। यजिमनि। 'यज देवपूजनादौ, मन ज्ञाने, शुन्ध शुद्धौ, दसु उपक्षये, जनी प्रादुर्भावे' एभ्यः युचप्रत्यय इत्यर्थः। यज्युरिति। 'युवोरनाकौ' इत्यानादेशस्तु न, तत्र युइति उकारेत्संज्ञकयोरेव ग्रहणात्। मन्युरिति। 'मन्युशोकौ तु शुक् स्त्रियाम्' इत्यमरः। भुजिमृङ्भ्याम्। 'भुज पालनाभ्यवहारयोः' 'मृङ् प्राणत्यागे, आभ्यां क्रमात् युक्त्युकौ प्रत्ययौ स्तः। भुज्युरिति। युकः कित्त्वान्न गुणः। एवं मृत्युरित्यपि। सर्तेरयुः। सृ गतौ, अस्मात् अयुप्रत्यय इत्यर्थः। सरयुरिति। अयुप्रत्यये गुण इति

षिभ्यः पः । पाति रक्षत्यस्मादात्मानमिति पापम् । तथागात्पापः । नेपः पुरोहितः । बाहुलकाद्गुणाभावे नीपो वृक्षविशेषः । वेष्पः पानीयम् । ३०४ **च्युवः किच्च** । च्युपो वक्त्रम् । ३०५ **स्तुवो दीर्घश्च** । स्तूपः समुच्छ्रायः । ३०६ **सुशृभ्यां निच्च** । चात्कित् । सूपः । बाहुलकादुत्वम् , शूर्पम् । ३०७ **कुयुभ्यां च** । कुवन्ति मण्डूका अस्मिन्कूपः । युवन्ति बध्नन्त्यस्मिन्पशुमिति यूपो यज्ञस्तम्भः । ३०८ **खष्पशिल्पशष्पबाष्परूपपर्पतल्पाः** । सप्तैते पप्रत्यान्ता निपात्यन्ते । खनतेर्नकारस्य षत्वम् । 'खष्पौ क्रोधबलात्कारौ' । शीलतेर्ह्रस्वश्च । शिल्पं कौशलम् । शसु हिंसायाम् । निपातनात्षत्वम् । शष्पं बालतृणं प्रतिभाक्षयश्च । बाधतेः षः । 'बाष्पो नेत्रजलोष्मणोः' । वाष्पं च । रौतेर्दीर्घः । 'रूपं स्वभावे सौदर्ये' । पॄ पर्व गृहं बालतृणं पङ्क्तिपीठं च । 'तल प्रतिष्ठाकरणे' चुरादिणिचो लुक् । 'तल्पं शय्याऽट्टदारेषु' । ३०९ **स्तनिहृषिपुषिगदिमदिभ्यो णेरित्नुच्** । अयामन्त—' (सू० २३११) इति णेरयादेशः । स्तनयित्नुः । हर्षयित्नुः । पोषयित्नुः । गदयित्नुः वावदूकः । मदयित्नुः मदिरा । ३१० **कृहनिभ्यां क्त्नुः** । कृत्नुः शिल्पी । हत्नुर्व्या-

---

भावः । पानीविभ्यः पः । पा पाने, णीञ् प्रापणे, विष्लृ व्याप्तौ, एभ्यः पप्रत्यय इत्यर्थः । नीप इति सिद्धयर्थमाह—बाहुलकादिति । 'तूलं च नीपप्रियककदम्बास्तु हलिप्रिये' इत्यमरः । च्युवः किच्च । च्युङ् गतौ, अस्मात् पः स्यात्स च कित्स्यात् । कित्त्वाच्च गुणः । स्तुवो दीर्घश्च । ष्टुञ् स्तुतौ, अस्मात्पः स्यात् , धातोर्दीर्घश्चेत्यर्थः । 'फेनस्तूपौ सयूपकौ' इत्यमरः । शुशृभ्यां निच्च । 'षुञ् अभिषवे, शॄ हिंसायाम्' आभ्यां पः स्यात् , स च नित् भवति, चाद्दीर्घश्चेत्यर्थः । सूप इति । धातोर्दीर्घविधिसामर्थ्यान्न गुणः । शूर्पमित्यत्राह—बाहुलकादुत्वमिति । रपरत्वं दीर्घत्वं चेति भावः । कुयुभ्यां च । 'कु शब्दे, यु मिश्रणे' आभ्यां पः, स च नित् धातोर्दीर्घश्च चेत्यर्थः । 'तूदस्तु यूपः क्रमुकः' इत्यमरः । खष्पशिल्प । खनु अवदारणे, शील समाधौ, शसु हिंसायां, बाधृ लोडने, रु शब्दे, पॄ पालनपूरणयोः, तल प्रतिष्ठाकरणे चुरादिण्यन्ताः, एते पप्रत्ययान्ता इत्थं निपात्यन्त इत्यर्थः । निपातनमेवाह—खनतेर्नकारस्येति । 'खष्पः क्रोधे बलात्कारे' इति विश्वकोशादाह—खष्पौ क्रोधबलात्कारावितिं । शिल्पमित्यत्राह—शीलतेर्ह्रस्व इति । ह्रस्वनिपातनसामर्थ्यात् किदित्यनुवर्तनाद्वा गुणाऽभावः । शष्पमित्यत्राह—निपातनात्षत्वमिति । 'शष्पं बालतृणं घासः' इत्यमरः । बाष्प इत्यत्राह—बाधतेरिति । 'बाष्पमूष्माश्रु कशिपु' इत्यमरः । शेषं स्पष्टम् । स्तनिहृषिपुषि । 'स्तन देवशब्दे, हृष तुष्टौ, पुष पुष्टौ, मदी हर्षग्लेपनयोः, गदी देवशब्दे, एभ्यो णेरयादेशे इत्नुच् स्यात् । इत्नुचि कृते णेरयादेशविधि स्मारयति—अयामन्तेति । णेरयादेश इति । 'स्तनयित्नुर्वलाहकः' इत्यमरः । कृहनुभ्यां क्त्नुः । डु कृञ् करणे, हन हिंसागत्योः, आभ्यां क्त्नुप्रत्यय इत्यर्थः । कृत्नुरिति । कित्त्वाच्च गुणः । कर्तव्यर्थः । हत्नुरिति । 'अनुदात्तोपदे-

धिः शस्त्रं च। ३११ गमेः सन्वच्च। जिगत्नुः। ३१२ दाभाभ्यां नुः। दानुर्दाता। भानुः। ३१३ वचेर्गश्च। वग्नुः। ३१४ धेट इच्च। धयति तामिति धेनुः। ३१५ सुवः कित्। 'सूनुः पुत्रेऽनुजे रवौ'। ३१६ जहातेर्द्वेऽन्तलोपश्च। जह्नुः। ३१७ स्थो णुः। 'स्थाणुः कीले स्थिरे हरे'। ३१८ अजिवृरीभ्यो निच्च। अजेर्वी, वेणुः। वर्णुर्नददेशभेदयोः। 'रेणुर्द्वयोः स्त्रियां धूलिः'। ३१९ विषेः किच्च। विष्णुः। ३२० कृदाधारार्चिकलिभ्यः कः। बाहुलकान्न कस्येत्सञ्ज्ञा। 'कर्को धवलबोटकः'। दाको दाता। धाकोऽनड्वानाधारश्च। राका पौर्णमासी। अर्कः। 'कल्कः पापाशये पापे दम्भे

शवनती'त्यादिना अनुनासिकलोपः। गमेः सन्वच्च। गम्लृ गतौ' अस्मात् क्तनुप्रत्ययः, स च सन्वद्भवतीत्यर्थः। जिगत्नुरिति। 'अनुदात्तोपदेश'त्यादिना अनुनासिकलोपः। सन्वत्त्वात् द्वित्वम्, अभ्यासाऽऽकारस्य ह्रस्वादिकार्यम्। दाभाभ्यां नुः। 'डुदाञ् दाने, भा दीप्तौ,' आभ्यां नुप्रत्यय इत्यर्थः। 'भानुर्हंसः सहस्रांशुः' इत्यमरः। वचेर्गश्च। वच परिभाषणे, अस्मात् नुप्रत्ययः, गकारश्चान्तादेश इत्यर्थः। धेट इच्च। धेट् पाने, अस्मान्नुप्रत्ययः स्यात्, इकारश्चान्तादेशः। आदेच' इत्यात्वे प्रसक्ते तदपवादोऽयम्। 'धेनुः स्याद्वसूतिका' इत्यमरः। सुवः कित्। षूङ् प्राणिप्रसवे, अस्मात् नुप्रत्ययः स्यात्, स च कित्त्वद्भवतीत्यर्थः। सूनुरिति। कित्त्वाच्च गुणः। जहातेर्द्वेऽन्तलोपश्च। 'ओ हाक् त्यागे' अस्मान्नुप्रत्ययः, धातोर्द्वित्वं, अन्तस्याऽऽकारस्य लोपश्चेत्यर्थः। नुप्रत्ययस्य कित्त्वेऽप्यनजादित्वात् 'आतो लोप इटि च' इत्याकारलोपाऽप्राप्तेरयमारम्भः। जह्नुरिति। धातोर्द्वित्वे आलोपे च रूपम्। स्थो णुः। ष्ठा गतिनिवृत्तौ, अस्मात् णुः स्यादित्यर्थः। क्वचित्तु स्थाणुरित्येव पाठः। तस्मिन्पाठे यद्यपि अत्र स्थाधातोर्नुप्रत्यये णत्वं निपात्यत इति वक्तुं शक्यते, तथापि उत्तरत्रानुवृत्त्यर्थं णुप्रत्ययविधानमेव वरम्। अजिवृरी। 'अज गतिक्षेपणयोः, वृङ् सम्भक्तौ, री गतिरेषणयोः' एभ्यो नुर्निंत्स्यादित्यर्थः। निरवं स्वरार्थम्। अजधातोर्णुप्रत्यये आह—अजेर्वी इति। वेणुरिति। 'वेणुमल्कतेजनाः' इत्यमरः। विषेः किच्च। विष्लृ व्याप्तौ, अस्मात् णुः स्यात्, स च कित्, चकारात् निच्च। विष्णुरिति। किरवाच्च गुणः, निरवं स्वरार्थम्। 'विष्णुर्नारायणः कृष्णः' इत्यमरः। कृदाधारार्चिकलिभ्यः। 'डु कृञ् करणे, डु दाञ् दाने, डु धाञ् धारणपोषणयोः, रा दाने, अर्च पूजायां, कल शब्दसंख्यानयोः' एभ्यः कप्रत्ययः स्यादित्यर्थः। ननु कप्रत्ययाव्ययवककारस्य 'लशकतद्धिते' इतीत्संज्ञा प्राप्नोतीत्यत आह—बाहुलकादिति। 'पृषद्वः स्थौरी सितः कर्कः' इत्यमरः। दाको दातेति। कर्तरि प्रत्ययादिति भावः। राकेति। 'पूर्ण राका निशाकरे' इत्यमरः। दाक धाक राक इत्यत्र यद्यपि 'केऽणः' इत्यनेन ह्रस्वः

Land revenue and cesses in 1903–4 amounted to 1·4 lakhs. From the north-east, lines of rocky bare hills gradually sink west and south into a plain, at first thinly wooded and poorly tilled, then with deeper soil, finer trees, and better tillage, till in the extreme west along the banks of the Sābarmatī the surface is broken by ravines and ridges. In the east the staple crop is maize, and in the west millet. Garden cultivation is neglected. Water is abundant. The *tāluka* is the healthiest and coolest part of the District. The rainfall is more certain than elsewhere, but the residents are extremely poor.

Parāntij Town (*Parāntej*).—Head-quarters of the *tāluka* of the same name in Ahmadābād District, Bombay, with a station on the Ahmadābād-Parāntij Railway, situated in 23° 26′ N. and 72° 51′ E., 33 miles north-east of Ahmadābād city. Population (1901), 8,175. Parāntij is a prosperous town, and has been a municipality since 1855. The income during the decade ending 1901 averaged Rs. 7,000, and in 1903–4 amounted to Rs. 7,700. The chief exports are *ghī*, grain, and leather. Formerly there was a considerable local soap industry, but this has now greatly decreased. The town contains 6 schools, 5 for boys and one for girls, attended by 644 male and 109 female pupils. These include an English middle school with 19 pupils, and a mission orphanage with an industrial class attached to it. There is also a dispensary.

Parasgad.—South-easternmost *tāluka* of Belgaum District, Bombay, lying between 15° 36′ and 16° 9′ N. and 74° 49′ and 75° 19′ E., with an area (including the Murgod *mahāl* or petty subdivision) of 640 square miles. It contains one town, SAUNDATTI (population, 9,525), the head-quarters; and 124 villages, including MANOLI (5,308) and MURGOD (5,655). The population in 1901 was 108,311, compared with 110,584 in 1891. The density, 169 persons per square mile, is below the average for the District. The demand for land revenue in 1903–4 was 2·37 lakhs, and for cesses Rs. 19,000. A low range of sandstone hills running north-west and south-east divides Parasgad into two nearly equal parts. South-west of the hills, whose southern face is steep and rugged, lies a plain of fine black soil with many rich villages and hamlets, which suffered severely in the famine of 1876–7. The north-east, which is broken by low hills, is a high waving plateau overgrown with bush and prickly pear, the soil being mostly poor and sandy. In the extreme north, the sandstone gives place to trap, and the soil is generally shallow and poor. The Malprabha, which flows north-east through the middle of the *tāluka*, forms with its feeders the chief water-supply. Before the close of the hot season almost all the small streams dry up and stagnate, and the well and pond water becomes unwholesome. In the north and east the rainfall is scanty and uncertain; but in the south and west, and in the immediate

neighbourhood of the Western Ghats, it is plentiful. The annual fall at the *tāluka* head-quarters averages 23 inches.

Parasnāth.—Hill and place of Jain pilgrimage in the east of the Gīrīdīh subdivision of Hazāribāgh District, Bengal, and adjoining Mānbhūm, situated in 23° 58′ N. and 86° 8′ E. The mountain consists of a central narrow ridge, with rocky peaks, rising abruptly to 4,480 feet above sea-level from the plains on the south-west, and throwing out long spurs which extend towards the Barākar river on the north. A spur to the south-east forms the boundary between Hazāribāgh and Mānbhūm, and eventually subsides into an extended belt of high land with peaked hills in the latter District. The hill is now easily approached by the East Indian Railway to Gīrīdīh station, and thence by a short journey of about 18 miles along a metalled road. In 1858 Parasnāth was selected as a convalescent dépôt for European troops; but on account of the confined area of the plateau at the summit and the solitude, it was found unsuitable for the purpose and was abandoned in 1868. The building formerly used as the officers' quarters is now utilized as a *dāk*-bungalow. Pilgrims to the number of 10,000 flock annually from distant parts of India to this remote spot—the scene of Nirvāna or 'beatific annihilation' of no less than ten of the twenty-four deified saints who are the objects of Jain adoration. From the last of these, Pārsva or Pārsvanātha, the hill, originally called Samet Sikhar, has taken its better known name. Pilgrimage to Parasnāth is still as popular as ever among the Jains; and new shrines, a single one of which in white marble cost Rs. 80,000, are from time to time erected. The temples lie well apart from the plateau, and the improved means of communication hold out a possibility of the latter being again utilized as a small sanitarium.

[Sir W. W. Hunter, *Statistical Account of Bengal*, vol. xvi, pp. 216, 217.]

Paratwāda.—Civil station of Ellichpur town, Amraotī District, Berār, from which it is distant 2 miles. The population in 1901, when the town was garrisoned by a regiment of native infantry and a battery of the late Hyderābād Contingent artillery, was 10,410; but the troops were removed in 1905. The town is situated on the Sāpan and Bichan rivers. The municipality was created in 1894. The receipts and expenditure from that year till 1901 averaged Rs. 12,000. In 1903–4 the income was Rs. 16,437, chiefly derived from taxes and cesses; and the expenditure was Rs. 17,725, chiefly on conservancy and public works.

Paravūr.—Town in Travancore State, Madras. *See* PARŪR.

Pārbati.—A tributary of the Chambal, draining part of Central India and Rājputāna. Rising in the Vindhyas, in 22° 52′ N. and 76° 39′ E., at the village of Makgardha, it flows in a northerly direction

षिभ्यः पः । पाति रक्षत्यस्मादात्मानमिति पापम् । तथागात्पापः । नेपः पुरोहितः । बाहुलकाद्गुणाभावे नीपो वृक्षविशेषः । वेष्पः पानीयम् । ३०४ च्युवः किच्च । च्युपो वक्त्रम् । ३०५ स्तुवो दीर्घश्च । स्तूपः समुच्छ्रायः । ३०६ सुशृभ्यां निच्च । चात्कित् । सूपः । बाहुलकादुत्वम् , शूर्पम् । ३०७ कुयुभ्यां च । कुवन्ति मण्डूका अस्मिन्कूपः । युवन्ति बध्नन्त्यस्मिन्पशुमिति यूपो यज्ञस्तम्भः । ३०८ खष्पशिल्पशष्पबाष्परूपपर्पतल्पाः । सप्तैते पप्रत्यान्ता निपात्यन्ते । खनतेर्नकारस्य षत्वम् । 'खष्पौ क्रोधबलात्कारौ' । शीलतेर्ह्रस्वश्च । शिल्पं कौशलम् । शसु हिंसायाम् । निपातनात्षत्वम् । शष्पं बालतृणं प्रतिभाक्षयश्च । बाधतेः षः । 'बाष्पो नेत्रजलोष्मणोः' । वाष्पं च । रौतेर्दीर्घः । 'रूपं स्वभावे सौदर्ये' । पॄ पर्व गृहं बालतृणं पङ्क्तुपीठं च । 'तल प्रतिष्ठाकरणे' चुरादिणिचो लुक् । 'तल्पं शय्याऽऽदारेषु' । ३०९ स्तनिहृषिपुषिगदिमदिभ्यो णेरित्नुच् । अयामन्त—' (सू० २३११) इति णेरयादेशः । स्तनयित्नुः । हर्षयित्नुः । पोषयित्नुः । गदयित्नुः वावदूकः । मदयित्नुः मदिरा । ३१० कृहनिभ्यां क्त्नुः । कृत्नुः शिल्पी । हत्नुर्व्या-

---

भावः । पानीविषिभ्यः पः । पा पाने, णीञ् प्रापणे, विष्लृ व्याप्तौ, एभ्यः पप्रत्यय इत्यर्थः । नीप इति सिद्धयर्थमाह—बाहुलकादिति । 'तूलं च नीपप्रियककदम्बास्तु हलिप्रिये' इत्यमरः । च्युवः किच्च । च्युङ् गतौ, अस्मात् पः स्यात्स च कित्स्यात् । कित्त्वाच्च गुणः । स्तुवो दीर्घश्च । ष्टुञ् स्तुतौ, अस्मात्पः स्यात् , धातोर्दीर्घश्चेत्यर्थः । 'फेनस्तूपौ सयूपकौ' इत्यमरः । शुशृभ्यां निच्च । 'षुञ् अभिषवे, शॄ हिंसायाम्' आभ्यां पः स्यात् , स च नित् भवति, चाहीर्घश्चेत्यर्थः । सूप इति । धातोर्दीर्घविधिसामर्थ्याच्च गुणः । शूर्पमित्यत्राह—बाहुलकादुत्वमिति । रपरत्वं दीर्घत्वं चेति भावः । कुयुभ्यां च । 'कु शब्दे, यु मिश्रणे' आभ्यां पः, स च नित् धातोर्दीर्घश्च चेत्यर्थः । 'तूदस्तु यूपः क्रमुकः' इत्यमरः । खष्पशिल्प । खनु अवदारणे, शील समाधौ, शसु हिंसायां, बाधृ लोडने, रु शब्दे, पॄ पालनपूरणयोः, तल प्रतिष्ठाकरणे चुरादिण्यन्ताः, एते पप्रत्ययान्ता इत्थं निपात्यन्त इत्यर्थः । निपातनमेवाह—खनतेर्नकारस्येति । 'खष्पः क्रोधे बलात्कारे' इति विश्वकोशादाह—खष्पौ क्रोधबलात्काराविति । शिल्पमित्यत्राह—शीलतेर्ह्रस्व इति । ह्रस्वनिपातनसामर्थ्यात् किदित्यनुवर्तनाद्वा गुणाऽभावः । शष्पमित्यत्राह—निपातनात्षत्वमिति । 'शष्पं बालतृणं घासः' इत्यमरः । बाष्प इत्यत्राह—बाधनेरिति । 'बाष्पमूष्माश्रु कशिपु' इत्यमरः । शेषं स्पष्टम् । स्तनिहृषिपुषि । 'स्तन देवशब्दे, हृष तुष्टौ, पुष पुष्टौ, मदी हर्षग्लेपनयोः, गदी देवशब्दे, एभ्यो व्यतेभ्य इत्नुच् स्यात् । इत्नुचि कृते णेरयादेशविधि स्मारयति—अयामन्तेति । णेरयादेश इति । 'स्तनयित्नुर्मेघाहकः' इत्यमरः । कृहनुभ्यां क्त्नुः । हु कृञ् करणे, हन हिंसागत्योः, आभ्यां क्त्नुप्रत्यय इत्यर्थः । कृत्नुरिति । कित्त्वाच्च गुणः । कर्तेत्यर्थः । हत्नुरिति । 'अनुदात्तोपदे-

धिः शस्त्रं च। ३११ गमेः सन्वच्च। जिगत्नुः। ३१२ दाभाभ्यां नुः। दानुर्दाता। भानुः। ३१३ वचेर्गश्च। वग्नुः। ३१४ धेट इच्च। धयति तामिति धेनुः। ३१५ सुवः कित्। 'सूनुः पुत्रेऽनुजे रवौ'। ३१६ जहातेर्ढेऽन्तलोपश्च। जह्नुः। ३१७ स्थो णुः। 'स्थाणुः कीले स्थिरे हरे'। ३१८ अजिवृरीभ्यो निच्च। अजेर्वी, वेणुः। वर्णुर्नददेशभेदयोः। 'रेणुर्द्वयोः स्त्रियां धूलिः'। ३१९ विषेः किच्च। विष्णुः। ३२० कृदाधारार्चिकलिभ्यः कः। बाहुलकात्र कस्येत्सञ्ज्ञा। 'कर्को धवलघोटकः'। दाको दाता। धाकोऽनड्वानाधारश्च। राका पौर्णमासी। अर्कः। 'कल्कः पापाशये पापे दम्भे

शवतीत्यादिना अनुनासिकलोपः। गमेः सन्वच्च। गम्लृ गतौ' अस्मात् क्त्नुप्रत्ययः, स च सन्वद्भवतीत्यर्थः। जिगत्नुरिति। 'अनुदात्तोपदेश'त्यादिना अनुनासिकलोपः। सन्वत्त्वात् द्वित्वम्, अभ्यासाऽऽकारस्य ह्रस्वादिकार्यम्। दाभाभ्यां नुः। 'डुदाञ् दाने, भा दीप्तौ,' आभ्यां नुप्रत्यय इत्यर्थः। 'भानुर्हंसः सहस्रांशुः' इत्यमरः। वचेर्गश्च। वच परिभाषणे, अस्मात् नुप्रत्ययः, गकारश्चान्तादेश इत्यर्थः। धेट इच्च। धेट् पाने, अस्मान्नुप्रत्ययः स्यात्, इकारश्चान्तादेशः। आदेच' इत्यात्वे प्रसक्ते तदपवादोऽयम्। 'धेनुः स्याद्वडवासूतिका' इत्यमरः। सुवः कित्। षूङ् प्राणिप्रसवे, अस्मात् नुप्रत्ययः स्यात्, स च कित्त्ववतीत्यर्थः। सूनुरिति। कित्त्वाच्च गुणः। जहातेर्ढेऽन्तलोपश्च। 'ओ हाक् त्यागे' अस्मान्नुप्रत्ययः, धातोर्द्वित्वं, अन्तस्याऽऽकारस्य लोपश्चेत्यर्थः। नुप्रत्ययस्य कित्त्वेऽप्यनजादित्वात् 'आतो लोप इटि च' इत्याकारलोपाऽऽप्राप्तेरयमारम्भः। जह्नुरिति। धातोर्द्वित्वे आलोपे च रूपम्। स्थो णुः। ष्ठा गतिनिवृत्तौ, अस्मात् णुः स्यादित्यर्थः। क्वचित्तु स्थाणुरित्येव पाठः। तस्मिन्पाठे यद्यपि अत्र स्थाधातोर्नुप्रत्यये णत्वं निपात्यत इति वक्तुं शक्यते, तथापि उत्तरत्राऽनुवृत्त्यर्थं णुप्रत्ययविधानमेव वरम्। अजिवृरी। 'अज गतिक्षेपणयोः, वृङ् सम्भक्तौ, री गतिरेषणयोः' एभ्यो इन्निस्त्यादित्यर्थः। निस्त्वं स्वरार्थम्। अजधातोर्णुप्रत्यये आह—अजेर्वी इति। वेणुरिति। 'वेणुमस्करतेजनाः' इत्यमरः। विषेः किच्च। विष्लृ व्याप्तौ, अस्मात् णुः स्यात्, स च कित्, चकारात् निच्च। विष्णुरिति। कित्त्वाच्च गुणः, निस्त्वं स्वरार्थम्। 'विष्णुर्नारायणः कृष्णः' इत्यमरः। कृदाधारार्चिकलिभ्यः। 'डु कृञ् करणे, डु दाञ् दाने, डु धाञ् धारणपोषणयोः, रा दाने, अर्च पूजायां, कक शब्दसंख्यानयोः' एभ्यः कप्रत्ययः स्यादित्यर्थः। ननु कप्रत्ययावयवककारस्य 'लशकतद्धिते' इतीत्संज्ञा प्राप्नोतीत्यत आह—बाहुलकादिति। 'पृष्ठयः स्थौरी सितः कर्कः' इत्यमरः। दाको दातेति। कर्तरि प्रत्ययादिति भावः। राकेति। 'पूर्ण राका निशाकरे' इत्यमरः। दाक धाक राक इत्यत्र यद्यपि 'केऽणः' इत्यनेन ह्रस्वः

विट्किट्योरपि'। ३२१ सृवृभूशुषिमुषिभ्यः कक्। 'सृक उत्पलवातयोः'। 'वृकः श्वापदकाकयोः'। भूकं छिद्रम्। शुष्कः। मुष्कोऽण्डम्। ३२२ शुकवल्कोल्काः। शुमेरन्त्यलोपः। शुकः। 'वल्कं वल्कलमस्त्रियाम्'। 'उष दाहे'। षस्य लः। उल्का। ३२३ इण्भीकापाशल्यतिमर्चिभ्यः कन्। 'एके मुख्यान्यकेवलाः', 'भेको मण्डूकमेषयोः' इति विश्वमेदिन्यौ। काकः। पाकः शिशुः। शल्कं शकलम्। अत्कः पथिकः शरीरावयवश्च। मर्कः शरीरवायुः। ३२४ नौ हः। जहातेः कन्स्यान्नौ। निहाका गोधिका। ३२५ नौ सदेर्डिच्च। 'निष्कोऽस्त्री हेम्नि तत्पले'। ३२६ स्यमेरीट् च। स्यमीको वल्मीकः वृक्षभेदश्च। इट् ह्रस्व इति केचित्। स्यमिकः। ३२७ अजियुधूनीभ्यो दीर्घश्च। 'वीकः स्याद्वातपक्षिणोः'। यूका। धूको वायुः। नीको वृक्षविशेषः। ३२८ ह्रियो रश्च लो वा। 'ह्रीका ह्रीका त्रपा मता'। ३२९ शुकेरुनोन्तोन्त्युनयः। उन, उन्त, उन्ति, उनि एते चत्वारः स्युः। शकुनः। शकुन्तः। शकुन्तिः। शकुनिः। ३३० भुवो भिच्।

प्राप्नोति, तथापि बाहुलकान्न भवति। सृवृभूशुषिमुषिभ्यः कक्। 'सृ गतौ, वृञ् वरणे, भू सत्तायां, शुष शोषणे, मुष स्तेये' एभ्यः ककप्रत्यय इत्यर्थः। किस्वं गुणाऽभावार्थम्। सृक इति। शुकवल्कोल्काः। 'शुभ शुम्भ भाषणे, वल्ल वल्ल संवरणे, उष दाहे' एते ककप्रत्ययान्ता निपात्यन्त इत्यर्थः। निपातनमेवाह—शुमेरन्त्यलोप इति। भलोप इत्यर्थः। किस्वान्न गुणः। 'अन्थिपर्णं शुकं बर्हपुष्पं स्थौणेयकुक्कुरे' इत्यमरः। वल्कमिति। 'वल्कं वल्कलमस्त्रियाम्' इत्यमरः। उल्केति। 'प्राचिकोल्का पिपीलिका' इत्यमरः। इण्भीकापा। 'इण् गतौ, भि भी भये, कै शब्दे, पा पाने, शल गतौ, अत सातत्यगमने, मर्च शब्दे चुरादिः' एभ्यः कन्प्रत्ययः स्यात्। निस्वं स्वरार्थम्। नौ हः। नावुपपदे ओ हाक् त्यागे इत्यस्मात् कन् स्यादित्यर्थः। 'निहाका गोधिका समे' इत्यमरः। नौ सदेर्डिच्च। नावुपपदे षदॢ धातोः कन्स्यात्, स च डिच्चवतीत्यर्थः। डित्वाट्टिलोपः, षत्वं 'सदिरप्रतेः' इत्यनेन। निष्कमिति रूपम्। स्यमु शब्दे अस्मात्कन्स्यात्, तस्य चेडागमः। स्यमीक इति रूपम्। अजियुधूनीभ्यो। अज गतिक्षेपणयोः, यु मिश्रणेऽमिश्रणे च, धूञ् कम्पने, णीञ् प्रापणे, एभ्यः कन्स्यादेषां दीर्घश्चेत्यर्थः। वीक इति। अजधातोः कनि प्रकृतेर्वीभावे, तस्य दीर्घत्वे दीर्घविधानसामर्थ्याद्गुणाभावः। यूकेति। कनि धातोर्दीर्घः। ह्रियो रश्च लो वा। 'ह्री लज्जायाम्, अस्मात्कन्, धातोर्दीर्घत्वं, रेफस्य लकारश्च वेत्यर्थः। होकेति। दीर्घविधानसामर्थ्याद्गुणाभावः। ह्रीकेति। रेफस्य लकारे रूपम्। शकेरुनोन्तोन्त्युनयः। शकॢ शक्तौ, अस्मात् उन उन्त उन्ति उनि एते चत्वारः प्रत्ययाः स्युः। शकुन्तिपक्षिशकुनिशकुन्तशकुनद्विजाः' इत्यमरः। भुवो भिच्। 'भू सत्तायां'अस्मात् भिच् स्यात् 'भोऽन्तः' इत्य-

भवन्तिर्वर्तमानकालः । बाहुलकादवेश्च । अवन्तिः । वदैर्वदन्तिः । किंवदन्ती जनश्रुतिः' । ३३१ कन्युञ्चिक्षिपेश्च । चाद्भुवः । 'क्षिपण्युर्वसन्तः' इत्युज्ज्वलदत्तः । 'भुवन्युः स्वामिसूर्ययोः' । ३३२ अनुङ् नदेश्च । चात्क्षिपेः । नदनुर्मेघः । क्षिपणुर्वातः । ३३३ कृवृदारिभ्य उनन् । 'करुणो वृक्षभेदः स्यात्करुणा च कृपा मता' । वरुणः । दारुणम् । ३३४ त्रो रश्च लो वा । 'तरुणस्तलुनो युवा' ।

३३५ क्षुधिपिशिमिथिभ्यः कित् । क्षुधुनो म्लेच्छजातिः । पिशुनः । मिथुनम् । ३३६ फलेर्गुक्च । फल्गुनः पार्थः । प्रज्ञाद्यण् । फाल्गुनः । ३३७ अशेर्लशश्च । लशुनम् । ३३८ अर्जेर्णिलुक्च । अर्जुनः । ३३९ तृणाख्यायां

न्तादेशः । भवन्तिरिति । अन्तादेशे गुणेऽवादेशे च रूपम् । 'अस्तिर्भवन्तिपरोऽप्यप्रयुज्यमानोऽस्ती'ति भाष्यम् । अवन्तिरित्यादिसिद्ध्यर्थमाह—बाहुलकादिति । कन्युच् क्षिपेश्च । 'क्षिप प्रेरणे' चकारात् भवतेरपि कन्युच्प्रत्ययः इत्यर्थः । क्षिपण्युरिति । 'अट्कुप्वाङ्' इति णत्वम् । भुवन्युरिति । कन्युचः कित्त्वाद्गुणाऽभावे उवङादेशे च रूपम् । अनुङ् नदेश्च । नद अव्यक्ते शब्दे । चकारात्क्षिपेरनुङ्स्यात् । क्षिपणुरिति ।

अनुङो कित्त्वाद्गुणाऽभावः । कृवृदारिभ्य उनन् । कृ विक्षेपे, वृञ् वरणे, दृ विदारणे एभ्यः, एभ्यः उननुप्रत्यय इत्यर्थः । त्रो रश्च लो वा । तृ प्लवनतरणयोः, अस्मात् उनन् स्यात्, रेफस्य लकारो वेत्यर्थः । तरुण इति । उननि धातोर्गुणः । 'वयस्यस्तरुणो युवा' इत्यमरः । क्षुधिपिशिमिथिभ्यः कित् । क्षुध बुभुक्षायां, पिश अवयवे, मिथः सौत्रः, एभ्यः उनन् कित्स्यादित्यर्थः । क्षुधुन इति । कित्त्वाच्च गुणः । फलेर्गुक् च । फल निष्पत्तौ, अस्मादुनन्स्यात् धातोर्गुणागमश्चेत्यर्थः । फल्गुन इति । अर्जेर्ण इत्यर्थः । ननु कथं फाल्गुन इत्यत आह—प्रज्ञाद्यणिति । अशेर्लशश्च । अश भोजने, अस्मादुनन् धातोर्लशादेशश्चेत्यर्थः । लशुनमिति । 'लशुनं गृञ्जनाऽरिष्टमहाकन्दरसोनकाः' इत्यमरः । अर्जेर्णिलुक्च । 'ऋज गतिस्थानार्जनोपार्जनेषु' अस्मादुननुप्रत्ययः तत्सन्नियोगेन णेर्लुक्चेत्यर्थः । अर्जुन इति । जकारेण व्यवधानान्न णत्वम् । 'वलक्षो धवलोऽर्जुनः' इत्यमरः । अत्र णेरनिटीत्यनेनैव णेर्लोपे सिद्धे णिलुक् चेति लुग्विधानं चिन्त्यप्रयोजनमेव । न च प्रत्ययलक्षणेन प्राप्तं लघूपधगुणं वारयितुं लुग्विधानमावश्यकम्, लुकि तु 'न लुमताङ्गस्ये'ति निषेधान्न प्राप्तिरिति वाच्यम्, लुग्विधानेऽपि उननमाश्रित्य लघूपधगुणस्य दुर्वारत्वात् । अथ यदि यथाकथञ्चित् एतद्ग्रन्थसमर्थने आग्रहः, एवं वक्तव्यम् । अस्मिन्सूत्रे किदित्यनुवर्तते, ततश्च उननः कित्त्वेन गुणो न भवति, लोपे तु स्यादेव गुण इति वैपरीत्ये पर्यवस्यतीति । एवं सति अर्जुन इति रूपमेव न सिध्येत्, तस्मात् किदिति नानुवर्तनीयमेव, लुग्विधानं च व्यर्थम् । तृणाख्यायाम् । तृणस्याख्या तृणाख्या तस्यां सत्यां ऋजेर्जायमानः

चित्। चित्त्वादन्तोदात्तः। अर्जुनं तृणम्। ३४० अर्तेश्च। अरुणः। ३४१ अजियमिशीङभ्यश्च। 'वयुनं देवमन्दिरम्'। यमुना। शयुनः अजगरः। ३४२ वृतवदिहनिकमिकषिभ्यः सः। वर्सम्। तर्सम् (वर्षम्)। 'तर्सः (तर्षम्) प्लवसमुद्रयोः'। वत्सः। वत्सम्। वक्षः। हंसः। 'कंसोऽस्त्री पानभाजनम्'। कक्षम् अरण्यम्। ३४३ प्लुषेरच्चोपधायाः। प्लक्षः। ३४४ मनेर्दीर्घश्च। मांसम्। ३४५ अशेर्वने। अक्षः। ३४६ स्नुव्रश्चिकृत्यृषिभ्यः कित्। स्नुषा। वृक्षः। कृत्समुदकम्। ऋक्षं नक्षत्रम्। ३४७ ऋषेर्जातौ। 'ऋक्षोऽद्रिभेदे भल्लूके शोणके कृतवेधने। ऋक्षमुक्तं च नक्षत्रे' इति विश्वः। ३४८ उन्दिगुधिकुषिभ्यश्च। 'उत्सः प्रस्रवणम्'। गुत्सः स्तबकः। कुक्षौ जठरम्। ३४९ गृधिपण्योर्दकौ च। गृत्सः कामदेवः। पक्षः। ३५० अशेः सरः।

उनन् चित्स्यादित्यर्थः। चित्त्वफलमाह—चित्त्वादन्तोदात्त इति। अर्तेश्च॥ ऋ गतौ, अस्मादुनन्स्यात्, स च चित्स्यादित्यर्थः। अरुण इति। 'रषाभ्यामिति' णत्वम्। 'अरुणो भास्करेऽपि स्यात् वर्णभेदेऽपि च त्रिषु'इत्यमरः। अजियमिशीङभ्यश्च। 'अज गतिक्षेपणयोः, यमु उपरमे,शीङ् स्वप्ने' एभ्य उनन् स्यात्, स च चिदित्यर्थः। वयुनमिति। अजेर्वीभावः गुणः अयादेशः। यमुनेति। 'यमुनाशमनस्वसा' इत्यमरः। वृतृवदि। 'वृ वरणे, तृ प्लवनतरणयोः, वद व्यक्तायां वाचि, हन हिंसागत्योः, कमु कान्तौ, कष हिंसायां, एभ्यः सप्रत्ययः इत्यर्थः। वर्षमिति। प्रत्ययावयवत्वात्षत्वम् (एतद्भाष्याद्यसम्मतम्)। तर्षमिति। 'तर्षो जरिघस्तु भोजनम्' इत्यमरः। अत्रापि गुणे कृते षत्वम्। कक्षमिति। षढोरिति कत्वम्। प्लुषेरच्चोपधायाः। 'प्लुष दाहे, अस्मात्सः स्यात्, उपधाया अकारश्चेत्यर्थः। 'प्लक्षश्च तिन्तिडी चिञ्चा' इत्यमरः। मनेर्दीर्घश्च। मन ज्ञाने, अस्मात्सप्रत्ययः धातोर्दीर्घश्चेत्यर्थः। मांसमिति। 'नश्चापदान्तस्य' इत्यनुस्वारः। अशेर्देवने। अशू व्याप्तौ, अस्मात्सप्रत्ययः देवने वाच्ये इत्यर्थः। अत्र इति। व्रश्चेति षत्वं, कत्वं, षत्वमिति भावः। स्नुव्रश्चि। 'स्नु प्रस्रवणे' ओ व्रश्चू छेदने, कृती छेदने, ऋषी गतौ एभ्यः सप्रत्ययः स्यात्, स च कित्स्यादित्यर्थः। स्नुषेति। कित्त्वाच्च गुणः। वृक्ष इति। व्रश्चधातोः सनि तस्य कित्त्वात् ग्रहिज्येति सम्प्रसारणे, रुकोरिति सलोपः, चोः कुरिति कुत्वं, सस्य षत्वे च रूपम्। ऋषेर्जातौ। 'ऋषी गताविति अस्मात् जातौ सप्रत्ययः स्यात्, स च कित्स्यादित्यर्थः। पूर्वसूत्रेणैव सिद्धे इदं सूत्रं नियमार्थम्—ऋषेर्जातावेव सप्रत्ययः इति। तेन यौगिके न भवति। अन्येभ्यस्तु उभयत्रापि भवति। उन्दिगुधिकुषिभ्यश्च। उन्दी क्लेदने, गुध रोषे, कुष निष्कर्षे, एभ्यः सः कित्स्यादिति भावः। उत्स इति। 'अनिदिता'मिति नलोपः। 'उत्सः प्रस्रवणं वारि' इत्यमरः। गुत्स इति। स्तरि चेति चत्वम्। कुक्ष इति। 'षढोरिति कः। गृधिपण्योर्दकौ च। गृधु अभिकाङ्क्षायां, पण व्यवहारे स्तुतौ च, आभ्यां

अक्षरम्। ३५१ वसेश्च। वत्सरः। ३५२ संपूर्वाच्चित्। संवत्सरः। ३५३ कृधूमदिभ्यः कित्। बाहुलकान्न षत्वम् 'कृसरः स्यात्तिलौदनम्'। धूसरः। मत्सरः। 'मत्सरा पक्षिका ज्ञेया भम्भराली च सा मता'। ३५४ पते रश्च लः। पत्सलः पन्थः। ३५५ तन्यृषिभ्यां कसरन्। 'तसरः सूत्रवेष्टनम्'। ऋक्षरः ऋत्विक्। ३५६ प्रीयुक्वणिभ्यां कालन्ह्रस्वः सम्प्रसारणं च। प्रीयुः सौत्रः। प्रियालो वृक्षभेदः। कुणालो देशभेदः। ३५७ कटिकुषिभ्यां काकुः। कटाकुः पक्षी। कुषाकुरिभिः सूर्यश्च। ३५८ सर्तेर्दुक्च। 'सृदाकुर्वातसरितोः'।

सप्रत्ययः, धातोरन्त्यस्य क्रमेण दकारककारौ चादेशौ स्त इत्यर्थः। गृस्स इति। किद्वि-स्यनुवर्तनान्न गुणः। धकारस्य दकार आदेश इति भावः। ननु धकारस्य खरि चेति चर्त्वेन तकारे गृत्स इति रूपसिद्धौ किमर्थमेवं दकारविधिप्रयास इति चेद्? अत्राहुः—'खरि च' इति चर्त्वस्याऽसिद्धत्वात् 'एकाचो बशो भष्' इति भष्भावः प्रसज्येत तदर्थं दकारविधिरिति। प्रक्रियालाघवाय तकार एव तु न विहितः, 'चयो द्वितीयाः' इति पक्षे थ-कारप्रसङ्गात्। दकारविधाने तु चर्त्वस्याऽसिद्धत्वान्न भवति। पच इति। पणधातोः रूपम् कात्परत्वात्षत्वम्। अशेः सरः। अशू व्याप्तौ, अस्मात्सरप्रत्यय इत्यर्थः। अक्षरमिति। अक्षेत्यादिना षत्वं, षढोरिति कत्वम्, सस्य षत्वम्। वसेश्च। वस निवासे, अस्मात् सर-प्रत्यय इत्यर्थः। वत्सर इति। 'सः स्यार्धधातुके' इति तत्वम्। सम्पूर्वाच्चित्। समित्युपस-र्गपूर्वकाद्चेञ्जायमानः सरप्रत्ययः चिद्दित्यर्थः। चित्वप्रयोजनं तु अन्तोदात्तस्वरः। अत्र सपूर्वाच्चिदितिस्वारसिकः पाठः। समितरपूर्वादपि सरप्रत्ययदर्शनात्। 'संवत्सरोऽसि प-रिवत्सरोऽसि इडावत्सरोऽसि इद्वत्सरोऽसि' इत्यादौ यथा। कृधूमदिभ्यः कित्। 'डु कृञ् करणे, धूञ् कम्पने, मदी हर्षे', एभ्यः सरप्रत्ययः स च कित्स्यादित्यर्थः। ननु कृसर इत्यत्र ऋणः परत्वात् प्रत्ययावयवत्वाच्च षत्वं कुतो नेत्यत आह—बाहुलकादिति। कृसर-शब्दार्थं विवृण्वन् अमरकोशमाह—कृसरः स्यादिति। धूसर इति। कित्त्वान्न गुणः। 'ईषत्पाण्डुस्तु धूसरः'। मत्सर इति। 'मत्सरोऽन्यशुभद्वेषे। तद्वत्कृपणयोश्चिषु' इत्यमरः। पते रश्च लः। पत्लृ गतौ, अस्मात् सरः स्यात्, रेफस्य लश्चेत्यर्थः। पत्सल इति रूपम्। तन्यृषिभ्यां कसरन्। तनु विस्तारे, ऋषी गतौ, आभ्यां कसर-न्प्रत्यय इत्यर्थः। तसर इति। प्रत्ययस्य कित्त्वादनुदात्तोपदेशेत्यादिनाऽनुनासिक-लोपः। ऋषधातोः ऋक्षर इति रूपम्। कित्त्वान्न गुणः। कत्वं षत्वम्। प्रीयुक्वणिभ्याम्। प्रीयुधातोर्धातुपाठे अदर्शनादाह—सौत्र इति। क्वण शब्दे। आभ्यां कालन्प्रत्ययः, क्रमेण प्रीयुधातु[ऋ]क्वणधातोः सम्प्रसारणं चेत्यर्थः। प्रियाल इति। ह्रस्वे रूपम्। कुणाल इति। सम्प्रसारणे वकारस्योकारे पूर्वरूपे च रूपम्, 'राजादनं प्रियालः स्यात्सञ्जकद्रुर्धन्वनः पटः' इति वनौषधिवर्गे अमरः। कटिकुषिभ्यां काकुः। कटे वर्षावरणयोः, कुष निष्कर्षे, आभ्यां काकुप्रत्ययः। कटाकुः। कुषाकुरिति रूपम्।

३५९ वृतेर्वृद्धिश्च । वार्ताकुः । बाहुलकादुकारस्य अत्वम् । वार्ताकम् । ३६० पर्देर्नित्सम्प्रसारणमल्लोपश्च । 'पृदाकुर्वृश्चिके व्याघ्रे चित्रके च सरीसृपे' । ३६१ सृयुवचिभ्योऽन्युजागूजक्नुचः । अन्युच्, आगूच्, अक्नुच्, एते क्रमात्स्युः । 'सरण्युर्मेघवातयोः' । यवागूः । 'वचक्नुर्विप्रवाग्मिनोः' । ३६२ आनकः शीङ्भियोः । शयानकोऽजगरः । भयानकः । ३६३ आणको लूधूशिङ्धाङ्भ्यः । लवाणकं दात्रम् । धवाणको वातः । शिङ्घाणकः श्लेष्मा । पृषोदरादित्वात्पत्वे कलोपः । 'शिङ्घाणं नासिकामले' । 'धाणको दीनारभागः' । ३६४ उल्मुकदविहोमिनः । उप दाहे । षस्य लः मुकप्रत्ययश्च । उल्मुकं ज्वलदङ्गारम् । दृणातेर्विः दर्विः । जुहोतेर्मिनिः । होमी । ३६५ ह्रियः कुप्रश्च लो वा । ह्रीकुः ह्लीकुः लज्जावान् । ३६६ हसिमृग्रिण्वाऽमिदमिलूपूधूर्विभ्यस्तन् । दशभ्यस्तन् स्यात् । 'तितुत्र-' (सू ३१६३) इति नेट् । हस्तः । मर्तः । गर्तः । एतः

सर्तेदुक् च । सृ गतौ, अस्मात्काकुप्रत्ययः स्यात्, धातोर्दुगागमश्चेत्यर्थः । सृदाकुरिति । प्रत्ययस्य कित्त्वान्न गुणः । वृतेर्वृद्धिश्च । वृतु वर्तने, अस्मात्काकुः स्यात्, धातोर्वृद्धिश्चेत्यर्थः । वार्ताकुरिति । वार्ताकशब्दं साधयति—बाहुलकादिति । पर्देर्नित्सम्प्रसारणमल्लोपश्च । पर्द कुत्सिते शब्दे, अस्मात्काकुः स्यात्, स च नित्, धातोः रेफस्य सम्प्रसारणं ऋकारो भवति, पकारोत्तराऽकारस्य लोपश्चेत्यर्थः । 'सर्पः पृदाकुर्भुजगः भुजङ्गोऽहिर्भुजङ्गमः' इत्यमरः । सृयुवचिभ्यो । सृ गतौ, यु मिश्रणे, वच परिभाषणे, एभ्यो धातुभ्यः क्रमात् अन्युच्, आगूच्, अक्नुच् इति प्रत्ययाः स्युः । सरण्युरिति । अन्युचि कृते धातोर्गुणे च रूपम् । यवागूरिति । गुणे अवादेशे च रूपम् । 'यवागूरुष्णिका याग्वा' इत्यमरः, 'वचक्नुस्तु पुमान्विप्रे' इति मेदिनीकारः । आनकः शीङ्भियोः । शीङ् स्वप्ने, णिभी भये आभ्यां आनकि इत्यर्थः । शयानको भयानक इति । गुणे अयादेशे च रूपम् । आणको । लूञ् छेदने, धूञ् कम्पने, शिवि आघ्राणे, डुधाञ् धारणपोषणयोः एभ्यः आणकप्रत्यय इत्यर्थः । शिङ्घाणकमिति । ह्रियः कुप्रश्च लो वा । उल्मुकदविहोमिनः । उल्मुक, दर्वि, होमी इति त्रयः निपात्यन्त इत्यर्थः । निपातनमेवाह—उप दाह इति । ननु तर्हि वकारोऽपि श्रूयेत इत्यत आह—षस्य ल इति । प्रत्ययमाह—मुकप्रत्ययश्चेति । निपात्यत इति शेषः । 'अङ्गारोऽलातमुल्मुकम्' इत्यमरः । दर्विरित्यत्राह—दृणातेरिति । 'दर्विः कम्बिः खजाका च' इत्यमरः । होमीत्यत्राह—जुहोतेरिति । ह्रियः कुक् रश्च लो वा । ह्री लज्जायामस्मात्कुप्रत्ययः स्यात्, धातुसम्बन्धिरेफस्य लकारस्य वेत्यर्थः । ह्लीकुरिति । किस्वादुगुणनिषेधः । हसिमृग्रिण्वामि । हसे हसने, मृङ् प्राणत्यागे, गॄ निगरणे, इण् गतौ, वा गतिगन्धनयोः, अम गत्यादिषु, दमु उपशमे, लूञ् छेदने, पूञ् पवने, धुर्वी हिंसायां, एभ्यो धातुभ्यस्तन्प्रत्ययः । हस्त इत्यादौ वलादिलक्षणेटमाशङ्क्याह—तितुत्रेति । नेडिति । तनः

कर्बुरः। वातः। अन्तः। दन्तः। 'लोतः स्यादश्रुचिह्नयोः'। 'पोतो बालवहित्रयोः'। धूर्तः। बाहुलकात्तुसेर्दीर्घश्च। तूस्तं पापं, धूलिर्जटा च। ३६७ **नञ्याप इट् च**। नापितः। ३६८ **तनिमृङ्भ्यां किच्च**। ततम्। मृतम्। ३६९ **अञ्जिघृसिभ्यः क्तः**। अक्तम्। घृतम्। सितम्। ३७० **दुतनिभ्यां दीर्घश्च**। दूतः। तातः। ३७१ **जेर्मृट् चोदात्तः**। जीमूतः। ३७२ **लोष्टपलितौ**। लुनातेः क्तः तस्य सुट्, धातोर्गुणः, लोष्टम्। पलितम्। ३७३ **हृश्याभ्यामितन्**। हरितश्येतौ वर्णभेदौ। ३७४ **रुहे रश्च लो वा**। 'रोहितो मृगमत्स्ययोः'। लोहितं रक्तम्। ३७५ **पिशेः किच्च**। पिशितं मांसम्। ३७६ **श्रुदक्षिस्पृहिगृहिभ्य आय्यः**। श्रवाय्यो यज्ञपशुः। दक्षाय्यो गरुडो गृध्रश्च। स्पृहयाय्यः।

कित्त्वाऽभावाद्दन्त इत्यादौ 'अनुनासिकस्य क्विझलोः' इति दीर्घो न। मर्त इति। **भूलोक इत्यर्थः**। **तत्र भवो मर्त्यः**। **दिगादित्वाद्यत्**। **धूर्त इति**। **तनि कृते 'लोपो व्योर्वलि' इति वलोपः**, । **इञि चेति दीर्घः**। **नञ्याप इट्**। **नञि उपपदे आप्ल व्याप्तावित्यस्मात् तन्प्रत्ययः, इडागमश्चेत्यर्थः**। नापित इति। **बाहुलकान्नलोपाऽभावः**। **'क्षुरी मुण्डी दिवाकीर्तिनापिताऽन्तावसायिनः' इत्यमरः**। तनिमृङ्भ्यां किच्च। **तनु विस्तारे, मृङ् प्राणत्यागे, आभ्यां तन्स्यात्, स च किदित्यर्थः**। ततमिति। **कित्त्वादनुनासिकलोपः**। **'ततं वीणादिकं वाद्यम्' इत्यमरः**। **अञ्जिघृसिभ्यः क्तः**। **'अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु, घृ क्षरणदीप्त्योः, षिञ बन्धने' एभ्यः क्तः स्यात्**। अक्त इति। **नलोपे कृत्वे च रूपम्**। दुतनिभ्यां दीर्घश्च। **'दु गतौ, तनु विस्तारे' आभ्यां क्तः स्यात् धातोर्दीर्घश्च**। तात इति। **क्तस्य कित्त्वान्नलोपे दीर्घं च रूपम्**। **जेर्मृट् चोदात्तः**। **जि जये, अस्मात्क्तप्रत्ययः स्यात्, तस्य चोदात्तः मुडागमः धातोर्दीर्घश्च स्यात्**। **जीमूत इति रूपम्**। लोष्टपलितौ। **एतौ निपात्येते**। **निपातनप्रकारमेवाह—लुनातेरिति**। **लूञ् छेदने इत्यस्मात्क्तप्रत्ययः, सुडागमः, धातोर्गुणश्च निपात्यत इत्यर्थः**। **'लोष्टानि लोष्टवः पुंसि' इत्यमरः**। **'पलितं जरसा शौक्लयम्' इति च**। हृश्याभ्यामितन्। **हृञ् हरणे, श्यैङ् गतौ, आभ्यामितन्प्रत्यय इत्यर्थः**। श्येत इति। **इतनि आदृगुधाः**। वर्णभेदाविति। **'पालाशो हरितो हरित्' 'शुकशुभ्रशुचिश्वेत' इति चामरः**। रुहे रश्च लो वा। **रुह बीजजन्मनि, अस्मादितन् स्यात् धातुसम्बन्धिरेफस्य लकारो वेत्यर्थः**। रोहित इति। **'रोहितोऽमरो मृगः' 'रोहितो मद्गुरः शालः' 'लोहितो रोहितो रक्तः' इति चाऽमरः**। पिशेः किच्च। **पिश अवयवे, अस्मादितन् स्यात्, स च किदित्यर्थः**। पिशितमिति। **कित्त्वान्न लघूपधगुणः**। **श्रुदक्षिस्पृहिगृहिभ्य आय्यः**। **श्रु श्रवणे, दक्ष वृद्धौ, स्पृह हिंसायां, गृहू ग्रहणे, एभ्य आय्यप्रत्ययः स्यात्**। **अत्र 'स्पृहिगृहि' इति पञ्चम्यौ**। **ताभ्यामाय्यप्रत्यये 'अयामन्ते'ति णेरया-**

गृह्यार्य्यो गृहस्वामी। ३७७ दिधिषार्य्यः। दधातेर्द्वित्वमित्त्वं धुक्च। 'मित्र इव यो दिधिषार्य्यः'। ३७८ वृञ एण्यः। वरेण्यः। ३७९ स्तुवः क्सेय्यश्छन्दसि। 'स्तुषेय्यं पुरुवर्चसम्'। ३८० राजेरन्यः। राजन्यो वह्निः। ३८१ शूरसोश्च। शूरण्यम्। रमण्यम्। ३८२ अर्तेर्निच्च। अरण्यम्। ३८३ पर्जन्यः। 'पृषु सेचने' षस्य जः। 'पर्जन्यः शक्रमेघयोः'। ३८४ वदेरान्यः। 'वदान्यस्त्यागिवाग्मिनोः'। ३८५ अमिनक्षियजिवधिपतिभ्योऽत्रन्। अमत्रं भाजनम्। नक्षत्रम्। यजत्रः। वधत्रमायुधम्। 'पतत्रं तनूरुहम्'। ३८६ गडेरादेश्च कः। कडत्रम्। डलयोरेकत्वस्मरणात्कलत्रम्। ३८७ वृञश्चित्। वरत्रा चर्ममयीरज्जुः। ३८८ सुविदेः कत्रः। 'सुविदत्रं कुटुम्बकम्'। ३८९ कृतेर्नुम्च। कृन्तत्रं लाङ्गलम्।

देश इति भावेनोदाहरति—स्पृहयाय्य इति। दिधिषार्य्यः। इत्थं निपात्यत इत्यर्थः। निपातनप्रकारमेवाह—दधातेरिति। 'दु धाञ् धारणपोषणयो'रित्यस्माद्दाय्यप्रत्ययः द्वित्वमाकारस्येत्वं धुक् च निपात्यत इत्यर्थः। दिधिषार्य्य इति प्रयोगस्थलमाह—मित्र इवेति। वृञ एण्यः। वृञ् वरणे, अस्मात् एण्यप्रत्ययः। गुणे वरेण्य इति रूपम्। 'मुख्यवर्यवरेण्याश्च' इत्यमरकोशः। स्तुवः क्सेय्यश्छन्दसि। 'ष्टुञ् स्तुतौ', अस्मात् छन्दसि क्सेय्यप्रत्यय इत्यर्थः। स्तुषेय्यमिति। किरवान्न गुणः, प्रत्ययावयवत्वात्षत्वम्। राजेरन्यः। राज दीप्तौ, अस्मादन्यप्रत्ययः। राजन्यो वह्निरिति। 'मूर्धाभिषिक्तो राजन्यः' इति क्षत्रियवाची तु 'राजश्वशुराद्यत्' इति यत्प्रत्यये बोध्यः। शूरसोश्च। शृ हिंसायां, रमु क्रीडायां, आभ्यामन्यप्रत्ययः स्यात्। शूरण्यं रमण्यमिति। 'रषाभ्या'मिति णत्वम्। अर्तेर्निच्च। ऋ गतौ, अस्मादन्यप्रत्ययः, स च निदित्यर्थः। निस्वं स्वरार्थम्। अरण्यमिति। अन्यप्रत्यये गुण इति भावः। 'अटव्यरण्यं विपिनम्' इत्यमरः। पर्जन्यः। इत्थं निपात्यत इत्यर्थः। निपातनमेवाह—पृषु सेचन इति। अस्मादन्यप्रत्ययः, षकारस्य जकारः लघूपधगुण इति भावः। जकारेण व्यवधानान्न णत्वम्। वदेरान्यः। वद व्यक्तायां वाचि, अस्मादान्यप्रत्यय इत्यर्थः। वदान्य इति। 'स्युर्वदान्यस्थूललक्ष्यदानशौण्डा बहुप्रदे' इत्यमरः। अमिनक्षियजिवधिपतिभ्योऽत्रन्। अम गत्यादिषु, नक्ष गतौ, यज देवपूजादौ, वध हिंसायां, पत्लृ गतौ, एभ्यः अत्रन्प्रत्यय इत्यर्थः। यद्यपि तत्पुरुषप्रकरणे 'नक्षत्राण्नपात्' इति सूत्रेण नक्षत्रमिति साधितम्, तथापि तदव्युत्पन्नान्तरमिति बोध्यम्। गडेरादेश्च कः। गड सेचने, अस्मादत्रन् स्यात्, आदेर्गकारस्य ककारश्चेत्यर्थः। कडत्रमिति। गकारस्य ककारे रूपम्। ननु कथं कलत्रमिति प्रयुज्यत इत्याशङ्क्याह—डलयोरिति 'कलत्रं श्रोणिभार्ययोः'। वृञश्चित्। वृञ् वरणे, अस्मादत्रन् चित्स्वादित्यर्थः। चित्त्वं स्वरार्थम्। वरत्रेति। अत्रनि धातोर्गुणः। 'नक्षत्री वक्षत्रा च' इत्यमरः। सुविदेः कत्रन्। सावुपपदे विद ज्ञाने इत्यस्मात् कत्रन्नित्यर्थः। सुविदत्रमिति। किरवान्न लघूपधगुणः। कृतेर्नुम् च। कृती छेदने, अस्मात्

३९० **भृमृदृशियजिपर्विपच्यमितमिनमिह्यर्यभ्योऽतच्** । दशभ्योऽतच्स्यात्। भरतः। मरतो-मृत्युः। 'दर्शतः सोमसूर्ययोः'। यजतः ऋत्विक्। पर्वतः। पचतोऽग्निः। अमतो रोगः। तमतस्तृष्णापरः। नमतः प्रह्वः। हर्यतोऽश्वः। ३९१ **पृषिरञ्जिभ्यां कित्**। पृषतो मृगो बिन्दुश्च। रजतम्। ३९२ **खलतिः**। स्खलतेः सलोपः अतच्प्रत्ययान्तस्येत्वं च। खलतिर्निष्केशशिराः। ३९३ **शोङ्शपिरुगमिवञ्चिजोविप्राणिभ्योऽथः**। सप्तभ्योऽथः स्यात्। शयथोऽजगरः। शपथः। रवथः कोकिलः। नमथः पथिकः पन्थाश्च। वञ्चथो धूर्तः। वन्दीति पाठे कर्मणि कर्तरि वा प्रत्ययः। वन्दते वन्द्यते वा वन्दथः स्तोता स्तुत्यश्च। जीवथः आयुष्मान्। प्राणथो बलवान्। बाहुलकाच्छमिदमिभ्याम्। 'शमथस्तु शमः शान्तिर्दान्तिस्तु दमथो दमः'। ३९४ **भृञश्चित्**। भरथो लोकपालः। ३९५ **रुदिविदिभ्यां ङित्**। रोदितीति रुदथः शिशुः। वेत्तीति विदथः। ३९६ **उपसर्गे वसेः**। आवसथो गृहम्, संवसथो ग्रामः ३९७ **अत्यविचमितमिनमिरभिलभिनभितपिपतिपनिपणिमहिभ्योऽसच्**। त्रयोदशभ्योऽसच्स्यात्। अततीत्यतसो वायुरात्मा च। अवतीत्यवसो राजा भानुश्च। चमन्त्यस्मिंश्चमसः सोमपानपात्रम्। ताम्यत्यस्मिन्निति तमसोऽन्धकारः। नमसोऽनु-

---

कत्रन् स्यात्, धातोर्नुमागमश्च। कुन्तत्रमिति। नुमि रूपम्। भृमृदृशियजि। भृञ् भरणे, मृङ् प्राणत्यागे, इकिर् प्रेक्षणे, यज देवपूजादौ, पर्व पूरणे, डु पचष् पाके, अम गत्यादिषु, तमु काङ्क्षायां, णम प्रह्वत्वे शब्दे च, हर्य गतिकान्त्योः एभ्योऽतच् प्रत्यय इत्यर्थः। पृषिरञ्जिभ्यां कित्। पृषु सेचने, रञ्ज रागे, आभ्यामतच् कित्स्यात्। 'पृषन्ति बिन्दु पताः' इत्यमरः। खलतिः। इत्थं निपात्यत इत्यर्थः। निपातनप्रकारमाह—स्खलतेरिति। स्खल सञ्चलन इत्यस्मादिति भावः। अस्मादतच्प्रत्यये ऽन्त्यस्याकारस्येत्वं च निपात्यत इत्यर्थः। शोङ्शपिरुगमि। शोङ् स्वप्ने, शप आक्रोशे, रु शब्दे, गम्लृ गतौ, वञ्चु गतौ, जीव प्राणधारणे, प्रपूर्वः अन प्राणने, एभ्योऽथप्रत्ययः स्यादित्यर्थः। शयथ इति। गुणेऽयादेशः। प्राणथ इति। 'अनितेरिति णत्वम्। भृञश्चित्। डु भृञ् धारणपोषणयोरस्मादथप्रत्ययः, स च चित्। चित्त्वं स्वरविशेषार्थम्। रुदिविदिभ्यो ङित्। रुदिर् अश्रुविमोचने, विद ज्ञाने, आभ्यामथप्रत्ययो ङित्स्यात्। रुदथ इति। ङित्त्वाद् गुणः। उपसर्गे वसेः। उपसर्गे उपपदे वस निवासे अस्मादथः स्यात्। आवसथ इति। आङि उपपदे वसेः प्रत्ययः। अत्यविचमितमि। अत सातत्यगमने, अत रक्षणादौ, चमु अदने, तमु काङ्क्षायां, णम प्रह्वत्वे शब्दे च, रभ राभस्ये, डु लभष् प्राप्तौ, णम हिंसायां, तप सन्तापे, पत्लृ गतौ, पन व्यवहारे स्तुतौ च, मह पूजायां, एभ्योऽसच्प्रत्यय इत्यर्थः। अतस इति। 'अतसो ऽत्यादुमा ऽस्रमा' इत्यमरः। गौरादित्वा-

कूलः । 'रभसो वेगहर्षयोः' । लभसो धनं याचकश्च । नभते नभ्यति वा नभस आकाशः । तपसः पक्षी चन्द्रश्च । पतसः पक्षी । 'पनसः कण्टकिफलः' । पणसः पण्यद्रव्यम् । महसं ज्ञानम् । ३९८ **वेअस्तुट् च** । बाहुलकादारत्वाभावः । वेतसः । ३९९ **वहियुभ्यां णित्** । वाहसोऽजगरः । यावसस्तृणसङ्घातः । ४०० **वयश्च** । वय गतौ, वायसः काकः । ४०१ **दिवः कित्** । दिवसम् । दिवसः । ४०२ **कृशृशलिकलिगदिभ्योऽभच्** । करभः । शरभः । शलभः । कलभः । गर्दभः । ४०३ **ऋषिवृषिभ्यां कित्** । ऋषभः । वृषभः । ४०४ **रुषेर्नित्नुष् च** । रुष हिंसायाम्' अस्मादभच् नित्किदित्स्यात्, लुषादेशश्च । 'लुषभो मत्तदन्ति-नि' । ४०५ **रासिवल्लिभ्यां च** । रासभः । वल्लभः । ४०६ **जृविशिभ्यां झच्** । जरन्तो महिषः । वेशन्तः पल्वलम् । ४०७ **रुहिनन्दिजीविप्राणिभ्यः षिदाशिषि** । रोहन्तो वृक्षभेदः । नन्दन्तः पुत्रः । जीवन्त औषधम् । प्राणन्तो वायुः । षित्त्वान्ङीष् रोहन्ती । ४०८ **तृभूवहिवसिभासिसाह्लीष्** । शेषं स्पष्टम् । वेअस्तुट् च । **वेञ् तन्तुसन्ताने, अस्मादसच् स्यात्, प्रत्ययस्य तुडागमश्चेत्यर्थः । ननु वेतस इति वक्ष्यमाणमसङ्गतम्, आदेच इत्यात्त्वस्य दुर्वारत्वादित्यत आह—बाहुलकादिति । वहियुभ्यां णित् । वह प्रापणे, यु मिश्रणे, आभ्यामसच् प्रत्ययः, स च णिदित्यर्थः । वाहस इति । णित्त्वादुपधावृद्धिः । 'शयुर्वाहस इत्युभौ' इत्यमरः । यावस इति । णित्त्वादृवृद्धिः । वयश्च । वय गतौ, अस्मात् असच्, स च णिदित्यर्थः । वायस इति । 'बलिभुग्वायसा अपि' इत्यमरः । दिवः कित् । दिवु क्रीडादौ, अस्मादसच् कित्स्यात् । दिवस इति । कित्त्वान्न लघूपधगुणः । 'क्लीबे दिवसवासरौ' इत्यमरः । कृशृशलि । कृ विक्षेपे, शृ हिंसायां, शल गतौ, कल शब्दे, गर्द शब्दे, एभ्यः अभच्प्रत्यय इत्यर्थः । 'मणिबन्धादाकनिष्ठं करस्य करभो बहिः' इत्यमरः । ऋषिवृषिभ्यां कित् । ऋषी गतौ, वृषु सेचने, आभ्यामभच् स्यात्, स च कित् । ऋषभ इति । कित्त्वान्न लघूपधगुणः । रुषेर्नित्नुष् च । रुष हिंसायामस्मादभच्, नित्किदित्स्यात्, प्रकृतेर्लुषादेशश्च । रासिवल्लिभ्यां च । रासृ शब्दे, वल्ल संवरणे, आभ्यामभच्प्रत्ययः, स च निदित्यर्थः । जृविशिभ्यां झच् । जृ वयोहानौ, विश प्रवेशने आभ्यां झच्प्रत्यय इत्यर्थः । जरन्त इति । 'झोऽन्त' इति झकारस्याऽन्तादेशः । गुण इति भावः । एवं वेशन्तः इत्यपि । 'वेशन्तः पल्वलं चाल्पसरो, वापी तु दीर्घिका' इत्यमरः । रुहिनन्दिजीवि । रुह बीजजन्मनि, टु नदि समृद्धौ, जीव प्राणधारणे, प्रपूर्वः अन प्राणने, एभ्यः आशिषि झच्, स च कित्स्यात् । रोहन्त इति । झस्याऽन्तादेशे उपधागुणे रूपम् । षित्त्वफलं दर्शयन् 'षित्त्वौरादिक्यश्च' इति ङीषि उदाहरणमाह—रोहन्तीति । तृभूवहिवसि । तृ प्लवनतरणयोः, भू सत्तायां, वह प्रापणे, वस निवासे, भास दीप्तौ, साच संसिद्धौ, मह सेचने, महि भूषायां, जि जये, टु नदि समृद्धौ, एभ्यः झच्

धिगडिमण्डिजिनन्दिभ्यश्च । दशभ्यो झच्स्यात् । स च षित् । तरन्तः समुद्रः । तरन्ती नौका । भवन्तः कालः । वहन्तो वायुः । वसन्तः ऋतुः । भासन्तः सूर्यः । साधन्तो भिक्षुः । गडेर्घटादित्वान्मित्त्वं ह्रस्वः । 'अयामन्त—' (सू २३११) इति णेरयः । गण्डयन्तो जलदः । मण्डयन्तो भूषणम् । जयन्तः शक्रपुत्रः । नन्दयन्तो नन्दकः । ४०६ **हन्तेर्मुट् हि च** । हेमन्तः । ४१० **भन्देर्नलोपश्च** । भदन्तः प्रव्रजितः । ४११ **ऋच्छेररः** । ऋच्छरा वेश्या । बाहुलकाज्जर्जरझर्झराद्यः । ४१२ **अर्तिकमिभ्रमिचमिदेविवासिभ्यश्चित्** । षड्भ्योऽरश्चित्स्यात् । अररं कपाटम् । कमरः कामुकः । भ्रमरः । चमरः । देवरः । वासरः । ४१३ **कुवः क्करन्** । कुररः पक्षिभेदः । ४१४ **अङ्किमदिमन्दिभ्य आरन्** । अङ्गारः । मदारो वराहः । 'मन्दारः—पारिजातकः' । ४१५ **गडेः कड च** । कडारः । ४१६ **शृङ्गारभृङ्गारौ** । शृभृञ्भ्यामारन्नुम्गुहस्वश्च । शृङ्गारो रसः । 'भृङ्गारः कनकालुका' ४१७ **कञ्जिमृजिभ्यां चित्** । कञ्जिः सौम्रः ।

स्यात्, स च चिदित्यर्थः । तदन्त इति । झस्याऽन्तादेशः चित्त्वफलं दर्शयितुमाह—तरन्ती नौकेति । गण्डयन्त इति । गडि सेचने, अस्मात् ण्यन्तात् प्रत्ययः । ननु तर्हि णिचि उपधावृद्धिः कथं न श्रूयत इत्यत आह—घटादय इति । मित्त्वे प्रकृते किमायातमित्यत आह—ह्रस्व इति । 'मितां ह्रस्वः' इत्यनेनेत्यादिः । ननु 'णेरनिटि' इति णेर्लोपः स्यादित्यत आह—अयामन्तेति । एवं मण्डयन्त इत्यपि । हन्तेर्मुट् हि च । हन हिंसागत्योः, अस्माच्झच्प्रत्ययः स्यात्, तस्य नुडागमः धातोर्हिशब्दादेशश्च । हेमन्त इति । धातोर्हि आदेशे गुणः । भन्देर्नलोपश्च । भदि कल्याणे, अस्माज्झच् स्यात् । धातोरिदित्त्वान्नुडचनकारस्य लोपश्चेत्यर्थः । भदन्त इति । नलोपे झस्याऽन्तादेशे च रूपम् । ऋच्छेररः । ऋच्छ गतौ, अस्मादरप्रत्यय इत्यर्थः । जर्जरझर्झरादिशब्दानामपि लोके प्रयोगदर्शनादाह—बाहुलकादिति । अर्तिकमिभ्रमि । ऋ गतौ, कमु कान्तौ, भ्रमु अनवस्थाने, चमु अदने, दिवु क्रीडादौ, वस निवासे, एभ्यः अरप्रत्ययः स्यात् स च चिदित्यर्थः चित्त्वं स्वरार्थम् । अररमिति । ऋधातोर्गुणे रूपम् । 'कवाटमररं तुल्ये' भ्रातर इत्यनुवृत्तौ 'स्वामिनो देवृदेवरौ' इति चामरः । कुवः क्करन् । कु शब्दे, अस्मात्क्करन्प्रत्ययः । ककारनकारावितौ । कुरर इति । कित्त्वाद्व गुणः । 'उरक्रोशकुररौ समौ' इत्यमरः । अङ्किमदि । अगिमगि इति दण्डकपठितः गत्यर्थः अगिः, मदि स्तुतिमोदादौ, मदी हर्षे, एभ्यः आरन्स्यात् । अङ्गार इत्यादि । गडेः कड च । गड सेचने, अस्मादारन्प्रत्ययः स्यात्, कडादेशश्चेत्यर्थः । 'कडारः कपिलः पिङ्गपिशङ्गौ कद्रुपिङ्गलौ' इत्यमरः । शृङ्गारभृङ्गारौ । एते निपात्यन्ते । निपातनप्रकारमेवाह—शृभृञ्भ्यामिति । शृ हिंसायां, डु भृञ् धारणपोषणयोः, आभ्यामारन्प्रत्ययः, धातोर्नुम्, ह्रस्वः, गुणागमश्च निपात्यत इत्यर्थः । शृङ्गारो रस इति । 'शृङ्गारः शुचिरुज्ज्वलः' इत्यमरः' । 'भृ-

कज्जारो मयूरः । मार्जारः । ४१८ कमेः किदुच्चोपधायाः । ञिदित्यनुवृत्तेरन्तोदात्तः । कुमारः । ४१९ तुषारादयश्च । तुषारः । कासारः । सहार आम्रभेदः । ४२० दीङो नट् च । दीनारः सुवर्णाभरणम् । ४२१ सर्तेरपः षुक्च । सर्षपः । ४२२ उषिकुटिदलिकचिखजिभ्यः कपन् । 'उषपो वह्निसूर्ययोः' । कुटपो मानभाण्डम् । दलपः प्रहरणम् । कचपं शाकपत्रम् । खजपं घृतम् । ४२३ कृणेः सम्प्रसारणं च । कुणपम् । ४२४ कपश्चाक्रवर्मणस्य । कुणपम् । स्वरे भेदः । ४२५ विटपपिष्टपविशिपोलपाः । चत्वारोऽमी कपन्प्रत्ययान्ताः । विट शब्दे, विटपः । विशतेरादेः पः । प्रत्ययस्य तुट् , षत्वं 'पिष्टपम् भुवनम्' । विशतेः प्रत्ययादेरित्त्वम् । विशिपं मन्दिरम् । वलतेः सम्प्रसारणम् ।

ङ्गारः कनकाङ्गुका' इति च । कञ्जिमृजिभ्यां चित् । कञ्जधातोर्धातुपाठेऽदर्शनादाह—सौत्र इति । मृजू शुद्धौ आभ्यामारन्प्रत्ययः, स च चिदित्यर्थः । मार्जार इति । मृजेर्वृद्धिः । 'ओतुर्बिडालो मार्जारः' इत्यमरः । कमेः किदुच्चोपधायाः । कमु कान्तौ, अस्मादारन्प्रत्ययः, स च कित्, उपधाया अकारस्य उकारश्चेत्यर्थः । कुमार इति । कित्त्वाद्गुणाः । तुषारादयश्च । एते निपात्यन्ते । तुषार इति । तुष तुष्टौ, अस्मादारन् कित्, कित्त्वाद्गुणाः । कासार इति । कासृ शब्दकुत्सायाम् । भ्वादिः, अस्मादारनि रूपम् । 'कासारः सरसी सरः' इत्यमरः । सहार इति । षह मर्षणे । दीङो नुट् च । दीङ् क्षये, अस्मादारन् , तस्य नुडागमश्च । किदित्यनुवर्तत एव । तस्माद्गुणः । दीनार इति । 'दीनारेऽपि च निष्कोऽस्त्री' इत्यमरः । सर्तेरपः षुक् च । सृ गतौ, अस्मादपप्रत्ययः षुक् च धातोरागमः । सर्षप इति । अपप्रत्यये धातोर्गुणः । 'वनमुद्गे सर्षपे तु' इत्यमरः । उषिकुटिदलि । उष दाहे, कुट कौटिल्ये, दल विदारणे, कच बन्धने, खज मन्थे, एभ्यः कपन्प्रत्ययः स्यात् । कनाविति । उषप इति । कित्त्वाद्गुणाः । निरवं स्वरार्थम् । शेषं स्पष्टम् । कृणेः सम्प्रसारणं च । कृण शब्दे अस्मात्कपन् , धातुवकारस्य सम्प्रसारणं चेत्यर्थः । कुणपमिति । वकारस्य सम्प्रसारणे उकारे सम्प्रसारणाच्चेत्युकाराकारयोः पूर्वरूपे रूपम् । 'कुणपः शवमस्त्रियाम् इत्यमरः । कपश्चाक्रवर्मणस्य । 'कृणेः सम्प्रसारण'मित्यनुवर्तते । चाक्रवर्मणस्य मते कृणधातोः कपप्रत्ययः, सम्प्रसारणं चेत्यर्थः । अत्रापि कुणपमित्येव रूपम् । ननु रूपे विशेषाभावात्किमर्थमयमित्यत आह—स्वरे भेद इति । कपनि निस्स्वरः । अत्र नेति भेद इति भावः । विटपपिष्टप । एते निपात्यन्त इत्यर्थः । निपातनप्रकारमेवाह—विट शब्द इति । 'अस्मात्कपन्प्रत्यय' इति शेषः । कित्त्वाद्गुणः । पिष्टपे आह—विशतेरिति । 'विश प्रवेशने' इत्यस्मात् कपन्प्रत्ययः । कित्त्वाद्गुणः, आदेर्वकारस्य पकारः, प्रत्ययस्य तुडागमश्च निपात्यते इत्यर्थः । अश्चेति षत्वे ष्टुत्वे च रूपं सिध्यति । विशिपमित्यत्राह—विशतेरिति । वलतेरिति । 'वल संवरणे' इत्यस्मादित्यर्थः । सम्प्रसारणमिति । 'आदेर्वका-

'उलपं कोमलं तृणम्'। ४२६ वृतेस्तिकन्। वर्तिका। वर्तिका। ४२७ कृतिभिदिलतिभ्यः कित। कृत्तिका भित्तिका। भित्तिः। लत्तिका गोधा। ४२८ इष्यशिभ्यां तकन्। इष्टका। अष्टका। ४२९ इणस्तशन्तशसुनौ। एतशो ब्राह्मणः। स एव एतशाः। ४३० वीपतिभ्यां तनन्। वी गत्यादौ। वेतनम्। पत्तनम्। ४३१ दृदलिभ्यां भः। दर्भः। 'दल्भः स्याद्दृषिचक्रयोः'। ४३२ अर्तिगृभ्यां भन्। अर्भः। गर्भः। ४३३ इणः कित्। इभः। ४३४ असिसञ्जिभ्यां कथन्। अस्थि। सस्थि। ४३५ प्लुषिकुषिशुषिभ्यः किसः। प्लुक्षिर्वह्निः। कुक्षिः। शुक्षिर्वातः। ४३६ अशेर्नित्। अक्षि। ४३७ इषेः क्सुः। इक्षुः। ४३८ अर्वितस्तृतन्त्रिभ्य ईः। 'अवीनारी रजस्वला'। तरीनीः। स्त-

---

रस्ये'त्यादिः। 'विष्टपं भुवनं जगत्' इत्यमरे विष्टपशब्दः वकारादिरेव पठ्यते, सूत्रं स्वन्यमतानुसारेण। 'गुलिमन्युलप इत्यपि' इत्यमरः। वृतेस्तिकन्। वृतु वर्तने, अस्मात् तिकन्नित्यर्थः। वर्त्तिकेति। लघूपधगुणः। वर्तिकेति। 'झरो झरि',इति झरस्तकारस्य लोपविकल्पः। कृतिभिदिलतिभ्यः। कृती छेदने, भिदिर् विदारणे, लतिः सौत्रः, एभ्यस्तिकन्प्रत्ययः स्यात्, स च किदित्यर्थः। कृत्तिकेति। किरवान्न लघूपधगुणः। इष्यशिभ्यां तकन्। इष इच्छायां, अशू व्याप्तौ, आभ्यां तकन्प्रत्ययः, स च किदित्यर्थः। इष्टकेति। किरवान्न गुणः। प्रत्ययस्थादिति इत्त्वं तु 'इष्टकेषीकामालानां चितत्तूलभारिषु' इति निर्देशान्न भवति। अष्टकेति। व्रश्चादिना षत्वं ष्टुत्वम्। 'अष्टक पितृदेवत्ये' इत्युक्तत्वाच्छेत्त्वम्। इणस्तशन्तशसुनौ। इण् गतावित्यस्मात् तशन् तशसुन् इति प्रत्ययौ स्त इत्यर्थः। एतश इति। गुणः नकार इत्। एतशा इति। तशसुन्प्रत्यये उकारनकारयोरित्संज्ञकत्वात् सान्तोऽयं शब्दः। 'अत्वसन्तस्ये'ति दीर्घः। तशसुनि उकार उच्चारणार्थः। नकारो नित्स्वरार्थः। वीपतिभ्यां तनन्। 'वी गतिव्याप्तिप्रजनकान्त्यसनखादनेषु,' 'पत्लृ गतौ,' आभ्यां तनन्प्रत्यय इत्यर्थः वेतनमिति। गुणः। 'भृत्याभृतयो भर्म वेतनम्', 'पत्तनं पुटभेदनम्' इति चामरः। दृदलिभ्यां भः। दृ विदारणे, दल विकसने, आभ्यां भप्रत्यय इत्यर्थः। दर्भ इति। काकासुरस्थाक्षि इणातीति दर्भः। कर्तरि भप्रत्ययः गुणः। अर्तिगृभ्यां भन्। ऋ गतौ जुहोत्यादिः, गृ निगरणे, आभ्यां भन्नित्यर्थः। अर्भ इति। गुणः। अर्भक इति तु संज्ञायां कन् बोध्यम्। इणः कित्। इण् गतौ, अस्माद्भन् कित्स्यात्। इभ इति। किरवान्न गुणः। 'इभः स्तम्बेरमः पद्मी' इत्यमरः। असिसञ्जिभ्यां कथन्। असु क्षेपणे, षञ्ज सङ्गे, आभ्यां कथन्स्यात्। सक्थि इति। किरवाल्लोपः कुत्वम्। प्लुषिकुषिशुषिभ्यः किसः। प्लुष दाहे, कुष निष्कर्षे, शुष शोषणे एभ्यः किसः स्यात्। प्लुक्षिरित्यादौ किरवाद्गुणाभावे 'षढोः' इति कः। अशेर्नित्। अशू व्याप्तौ, अस्माक्सिन् नित्स्यात्। अक्षीति। अक्षेचेति षः, कत्वं षत्वम्। इषेः क्सुः। इष इच्छायां, अस्मात्क्सुः स्यादित्यर्थः। अवि-

रीधूमः । तन्त्रीवीणादेर्गुणः । ४३९ यापोः किद्वद्वे च । ययीरश्वः । 'पपीः स्यात्सोमसूर्ययोः' । ४४० लक्षेर्मुट् च । लक्ष्मीः । इत्युणादिषु तृतीयः पादः ।

अथ उणादिषु चतुर्थः पादः ।

४४१ वातप्रमीः । वातशब्द उपपदे माधातोरीप्रत्ययः, स च कित् । वातप्रमीः । अयं स्त्रीपुंसयोः । ४४२ ऋतन्यञ्जिवन्यञ्ज्यर्पिमद्यत्यङ्किकुयुकृशिभ्यः कलिञ्यतुजलिजिष्टुजिष्ठजिसन्स्यनिथिनुत्यसासानुकः । द्वादशभ्यः क्रमात्स्युः । अर्तेः कलिञ् , यण । 'बद्धमुष्टिः करो रलिः सोऽरत्निः प्रसृताङ्गुलिः । तनोतेर्यतुच् । तन्यतुर्वायू रात्रिश्च । अञ्जेरलिच् । अञ्जलिः । वनेरिष्णुच् । वनिष्णुः स्थविरान्त्रम् । अञ्जेरिष्ठच् । अञ्जिष्ठो भानुः । अर्पयतेरिसन् । अर्पिसोऽप्रमांसम् । मदेः स्यन् , मत्स्यः । अतेरिथिन् , अतिथिः । अङ्गेरुलिः, अङ्गुलिः । कौतेरसः । कवसः । अच इत्येके । कवचम् । यौतेरासः । यवासो दुरालभा । कृशेरानुक् । कृशानुः । ४४३ अः करन् । उत्तरसूत्रे किद्ग्रहणादिह ककारस्य

तृस्तृ । 'अव रक्षणादौ, तृ प्लवनतरणयोः, स्तृञ् आच्छादने, तन्त्रि कुटुम्बधारणे, एभ्य ईप्रत्यय इत्यर्थः । अवीरिति । रजस्वलेत्यर्थः । यापोः किद्वद्वे च । या प्रापणे, पा पाने, आभ्यां ईप्रत्ययः कित्स्यात् धातोर्द्वित्वं च । ययीरिति । किरवात् 'आतो लोप इटि च' इत्यालोपः । लक्षेर्मुट् च । लक्ष दर्शनाङ्कनयोः, अस्मदीप्रत्ययः स्यात्, स च कित्, तस्य मुडागमश्च । अयं धातुश्चुरादिण्यन्तः अस्मादीप्रत्यये णिलोपः । 'लक्ष्मीः पद्माऽलया पद्मा' इत्यमरः । इत्युणादिषु तृतीयः पादः ।

अथ चतुर्थः पादः । वातप्रमीः । इत्थं निपात्यत इत्यर्थः । निपातनमेवाह—वातशब्दे उपपदे इति । माङ्धातोरिति । मा माने इत्यस्मादिति भावः । स च किदिति । किरवात् 'आतो लोप' इत्यालोपः । 'वातप्रमीर्वातमृगः' इत्यमरः । अयमिति । वातप्रमीशब्द इत्यर्थः । ऋतन्यञ्जिवन्यञ्जि । ऋ गतौ, तनु विस्तारे, अन्जू व्यक्त्यादौ, वनु याचने, अञ्जू व्यक्त्यादौ, ऋ गतौ ण्यन्तः । मदी हर्षे, अत सातत्यगमने । अगिवगिमगीति दण्डकपठितः अगिर्गत्यर्थः, कृ शब्दे, युमिश्रणे, कृश तनूकरणे, एषां द्वन्द्वात्पञ्चमी । कलिञ्, यतुच्, अलिञ्, इष्टच्, इष्णुच्, इसन्, स्यन्, इथिन्, उलि, अस, आस, आनुक्, एषां द्वन्द्वात्प्रथमाबहुवचनम् । पूर्वोक्तेभ्यो द्वादशभ्यो धातुभ्यः एते द्वादश प्रत्ययाः क्रमात्स्युः । अर्तेः कलिञिति । ककारचकारावितौ । किरवाद्न गुणः किंतु यणादेशो रलिरिति रूपम् । रलिशब्दार्थमाह—बद्धमुष्टिः करो रलिरिति । हस्तो मुष्ट्या तु बद्धया, 'स रलिः स्यादरलिस्तु' इत्यमरः । अरलिरिति । न रलिः अरलिरिति नञ्समासे साधुः । शेषं स्पष्टम् । अः करन् । डुकृञ् हिंसायामस्मात्करन्प्रत्यय इत्यर्थः । शकरेति । करलि

नेत्वम् । शर्करा ४४४ पुषः कित् । पुष्करम् । ४४५ कलंश्च । पुष्कलम् । ४४६ गमेरिनिः । गमिष्यतीति गमी । ४४७ आङि णित् । आगामी । ४४८ भुवश्च । भावी । ४४९ प्रे स्थः । प्रस्थायी । ४५० परमे कित् । परमेष्ठी । ४५१ मन्थः । मन्थतेरिनिः कित्स्यात् । कित्त्वान्नकारलोपः, मन्थाः । मन्थानौ । मन्थानः । ४५२ पतस्थ च । पन्थाः । पन्थानौ । ४५३ खजेराकः । खजाकः पक्षी । ४५४ बलाकादयश्च । बलाका । शलाका । पताका । ४५५ पिनाकादयश्च । पातेरित्वं नुम् च । 'क्लीवपुंसोः पिनाकः स्याच्छूल-

---

गुणे रूपम् । नन्वेतदयुक्तं करनः ककारस्य 'लशकतद्धिते' इतीत्संज्ञा दुर्वारा । न चोच्चारणसामर्थ्यात्काम्यजादाविव न लोपः, लोपाऽभावे च फलाऽभावादित्संज्ञापि नेति वाच्यम्, क्ङिति चेति निषेधसत्त्वेन गुणनिषेधसम्पादकत्वेन साफल्यसम्भवात् । तस्मात् इत्संज्ञा दुर्वारैवेत्याह—उत्तरसूत्र इति । उत्तरत्र 'पुषः कि'दिति पठ्यते । तत्र करन्नेवानुवर्तते । करनः किरवं विधीयते । यद्यस्य ककारस्येत्वं स्यात्, तर्हि किरवे स्वतः सिद्धे किमनेन किरवविधानेन । एवं चाऽत्रेत्संज्ञा न भवतीत्यर्थः । पुषः कित् । पुष्करमिति । किरवात्र लघूपधगुणः । कलंश्च । पुषः किदित्यनुवर्तते । कलन्प्रत्ययः कित्स्यात् । गमेरिनिः । गम्लृ गताविरयस्मादिनिप्रत्ययः । कस्मिन्नर्थे इत्याकाङ्क्षायामाह—गमिष्यतीति । उत्तरकृदन्ते 'भविष्यति गम्यादय' इति सूत्रं व्याख्यास्यते मूलकृता । अस्माभिश्चोण्यादिनिरूपणात्प्रागेव निरूपितम् । तेन सूत्रेण भविष्यतीति नियमनादत्र भविष्यतीति लब्धम् । आङि णित् । आङि ऽपपदे गमेर्भविष्यति जायमानः इनिप्रत्ययः णिदित्यर्थः । णिरवाद्वृपधावृद्धिः । भुवश्च । भू सत्तायां अस्मादिनिप्रत्ययः, स च णिरित्यादित्यर्थः । भावीति । णित्त्वात् 'अचो ञ्णिति' इति वृद्धिः । अयमपि भविष्यदर्थे एव, गम्यादय इत्युक्तत्वात् । प्रे स्थः । प्रपूर्वात् ष्ठा गतिनिवृत्तावित्यस्मादिनिप्रत्ययः, स च णित् । प्रस्थायीति । इनेर्णित्त्वात् 'आतो युक्चिण्कृतोः' इति युक् । युकः कित्त्वेऽपि अजादित्वाऽभावान्नाऽऽकारलोपः । परमे कित् । परमशब्दे उपपदे ष्ठाधातोरिनिप्रत्ययः, स च कित् । परमेष्ठीति । इनेः कित्त्वादातो लोपः, 'हलदन्तात्सप्तम्याः' इति परमे इत्यत्र सप्तम्या अलुक् । मन्थः । मन्थ विलोडने, अस्मादिनिप्रत्ययः किदित्यर्थः । किरवाद्धातुनकारस्य लोपः । मथिन्शब्दः । मन्था इति । 'पथिमथि' इत्यात्त्वम् । 'इतोऽत्सर्वनामस्थाने' इतीकारस्याऽत्वम् । 'थो न्थः' न्थादेशः । पतस्थ च । पत्लृ गतौ इत्यस्मादिनिः थकारश्चान्तादेश इत्यर्थः । पन्था इति । पथिन्शब्दः पूर्ववत्प्रक्रिया । खजेराकः । खज मन्थे, अस्मादाकप्रत्यय इत्यर्थः । 'दर्विः कम्बः खजाका च' इत्यमरः । बलाकादयश्च । एते आकप्रत्ययान्ता निपात्यन्ते । अनेनैव सिद्धे 'खजेराक' इति पूर्वसूत्रं प्रपञ्चार्थम् । बलाकेति । बल प्राणने । शलाकेति । शल गतौ । पिनाकादयश्च । एते आकप्रत्ययान्ता इत्यर्थः ।

शङ्करधन्वनोः'। तड आघाते, तडाकः। ४५६ **कषिदूषिभ्यामीकन्।** कषीका पट्टिजातिः। दूषीका। 'दूषिका नेत्रयोर्मलम्'। ४५७ **अनिहृषिभ्यां किच्च।** अनीकम्। हृषीकम्। ४५८ **चङ्कणः कङ्कणश्च।** 'कण शब्दे' अस्माद्यङ्लुगन्तादीकन्, धातोः कङ्कणादेशश्च। 'घण्टिकायां कङ्कणीका सैव प्रतिसराऽपि च'। ४५९ **शृदृवृभ्यां द्वे रुक्चाभ्यासस्य।** शर्शरीको हिंस्रः। 'पर्परीको दिवाकरः'। वर्वरीकः कुटिलकेशः। ४६० **फर्फरीकादयश्च।** स्फुर स्फुरणे अस्मादीकन्, धातोः फर्फरादेशः। फर्फरीकं किसलयम्। दर्दरीकं वादित्रम्। झर्झरीकं शरीरम्। तित्तिडीको वृक्षभेदः। 'चरेर्नुम्' च (गण १९९) चञ्चरीको भ्रमरः। मर्मरीको हीनजनः। 'कर्करीका गलन्तिका'। पुणतेः, पुण्डरीकं वादित्रम्। पुण्डरीको व्याघ्रोऽग्निर्दिग्गजश्च। ४६१ **ईषेः किदूध्रस्वश्च।** इषीका

निपातनप्रकारमाह—पातेरिति। **पा रक्षणे** इत्यस्मादाप्रत्ययः, धात्वन्तस्य ह्रस्वं नुमागमश्च धातोर्निपात्यत इत्यर्थः। अमरकोशमाह—क्लीबपुंसोः पिनाकः स्यादिति। कषिदूषिभ्यामीकन्। कष हिंसायां, दुष वैचित्ये आभ्यामीकन्। दूषीकेति। ण्यन्तात्प्रत्ययः। 'दोषो णौ' इत्यूकारः उपधायाः। अमरकोशस्थमाह—दूषिकेति। 'आः कीटगन्निमुनिलोचनदूषिकायाम्' इति मुरारिः। अनिहृषिभ्यां किच्च। अन प्राणने, हृष तुष्टौ, आभ्यामीकन्स्यात्स च किदित्यर्थः। हृषीकमिति। कित्त्वान्न गुणः। 'हृषीकं विषयीन्द्रियम्' इत्यमरः। चङ्कणः कङ्कणश्च। चङ्कण इति षष्ठी। कण निमीलने यङ्लुकि प्रत्ययलक्षणमाश्रित्य 'सन्यङोः' इति द्वित्वे, 'कुहोश्चुः' इत्यभ्यासककारस्य चकारे नुगतोऽनुनासिकान्तस्य' 'इति नुकि अनुस्वारे परसवर्णे च चङ्कण् इति धातुः। तस्येत्यर्थः अस्मादीकन्प्रत्ययः,धातोः कङ्कणादेशश्चेत्यर्थः। कङ्कणीकेति। शृदृवृभ्यां द्वे। शृ हिंसायां, पॄ पालनपूरणयोः, वृञ् वरणे, एभ्य ईकन्प्रत्ययः, धातोर्द्वित्वं तदभ्यासस्य रुगागमश्च। शर्शरीक इति। शॄ इत्यस्य द्वित्वे अरदस्वे रपरत्वे हलादिशेषेण रेफनिवृत्तौ अनेन रुकि रूपम्। एवं पर्परीक इति। फर्फरीकादयश्च। निपातनमेवाह—स्फुर स्फुरण इति। अस्मादीकनित्यर्थः। दर्दरीकमिति। दृ विदारणे, अस्मादीकन् धातोर्दंदरादेशः। यद्वा, धातोर्द्वित्वं रुक् चाभ्यासस्य निपात्यते। झर्झरीकमिति। झृष् वयोहानौ, अस्मादीकन् धातोर्झंझरादेशः। यद्वाऽत्रापि धातोर्द्वित्वं रुक् चाभ्यासस्य निपात्यत इति व्याख्येयम्। तित्तिडीकमिति। तिमधातोरीकनि धातोरन्त्यस्य डकारादेशे द्वित्वे अभ्यासस्य तुक् च निपात्यते। चञ्चरीक इति। चर गतिभक्षणयोः, अस्मात् ईकरीनि धातोर्द्वित्वं, अभ्यासस्य नुगागमश्च निपात्यते। मर्मरीक इति। मृङ् प्राणत्यागे, अस्मादीकनि धातोर्द्वित्वमभ्यासस्य रुक् च निपात्यते इत्यर्थः। एवं कर्करीकेति डु कृञ् करणे इत्यस्मात् बोध्यः। पुणतेरिति। 'पुण कर्मणि शुभे,' अस्मादीकन्,

शलाका। ४६२ **ऋजेश्च**। ऋजीक उपहतः। ४६३ **सर्तेर्नुम् च**। सृणीका लाला। ४६४ **मृडः कीकच्कङ्कणौ**। मृडीको मृगः। मृडङ्कणः शिशुः। ४६५ **अलीकादयश्च**। कीकन्नन्ता निपात्यन्ते। 'अल भूषणादौ'। अलीकं मिथ्या। विपूर्वाव्यलीकं विप्रियं खेदश्च। 'वलीकनीध्रे पटलप्रान्ते' इत्यादि। ४६६ **कृञ्भ्यामीषन्**। 'करीषोऽस्त्री शुष्कगोमये'। तरीषः तरिता। ४६७ **शृपॄभ्यां किच्च**। शिरीषः। पुरीषम्। ४६८ **अर्जेर्ऋज च**। 'ऋजीषं पिष्टपचनम्'। ४६९ **अम्बरीषः**। अयं निपात्यते। अबि शब्दे। 'अम्बरीषः पुमान्भ्राष्ट्रम्'। अमरस्तु 'क्लीबेऽम्बरीषं भ्राष्ट्रो ना'। ४७० **कृशॄपुकटिपटिशौटिभ्य ईरन्**। करीरो वंशाङ्कुरः। शरीरम्। परीरं फलम्। कटीरः कन्दरो जघनप्रदेशश्च। पटीरश्चन्दनः कण्टकः काकश्च। 'शौटीरस्त्यागिवीरयोः'। ब्राह्मणादित्वात् ष्यञ्। शौटीर्यम्। ४७१ **वशेः कित्**। उशीरम्। ४७२ **कशेर्मुट् च**। कश्मीरो

तस्य रुगागमः, धातोर्हगागमश्च निपात्यत इत्यर्थः। ईषेः किद्ध्रस्वश्च। ईष गतौ, अस्मादीकन्, ह्रस्वश्च धातोः, प्रत्ययस्य कित्वं च। इषीकेति। कित्त्वाद्गुणाभावः। अत्र यद्यपि धातोर्ह्रस्वविधानसामर्थ्यादेव गुणाऽभावोऽपि सिध्यति, गुणे ईकारस्य इकारस्य चाऽविशेषात्, तथाप्युत्तरार्थमावश्यकमेव। ऋजेश्च। ऋज गतावित्यस्मादीकन्, स च किदित्यर्थः। ऋजीक इति। कित्त्वाद्गुणाऽभावः। सर्तेर्नुम् च। सृ गतौ अस्मादीकन् कित्स्याद्धातोर्नुमागमश्च। सृणीकेति। नुमि णत्वं, कित्त्वान्न गुणः। मृडः कीकच्कङ्कणौ। मृड सेचने, अस्मादीकन्, धातोः कीकच् कङ्कण इत्यादेशौ च पर्यायेण स्त इत्यर्थः, मृडेः कीकीनः कङ्कणीन इति च रूपमिति केचिद्वदन्ति, तदसङ्गतमेव। किं त्वेतौ द्वावपि प्रत्ययौ। मृडीनः मृडङ्कण इति रूपम्। अलीकादयश्च। एते कीकन्नन्ता निपात्यन्ते इत्यर्थः। वलीकमिति। वल संवरणे इत्यस्मात् प्रत्ययः। कृञ्भ्यामीषन्। 'कॄ विक्षेपे' तॄ प्लवनतरणयोः प्रसिद्धः, आभ्यामीषन्प्रत्यय इत्यर्थः। करीष इति। 'तत्तु शुष्कं करीषोऽस्त्री' इत्यमरः। शृपॄभ्यां किच्च। 'शॄ हिंसायां, पॄ पालनपूरणयोः' आभ्यामिषन् प्रत्ययः, स च किदित्यर्थः। शिरीषमिति। 'ऋत इद्धातोः' इति इत्त्वम्। पुरीषमिति 'उदोष्ठ्यपूर्वस्य' इत्युत्त्वम्। अर्जेर्ऋज च। अर्ज आर्जने, अस्मादीषन्, स च कित्, धातोः ऋजादेशश्च। ऋजीषमिति। 'ऋजीषं पिष्टपचनं कंसोऽस्त्री पानभाजनम्' इत्यमरः। अम्बरीषः। निपातनप्रकारमेवाह—अबि शब्दे इति। इदित्त्वान्नुमि अम्ब, अस्मात् ईषनि अरुडागमो निपात्यत इत्यर्थः। अमरकोशमाह—क्लीबेऽम्बरीषमिति। कृशॄपुकटिपटिशौटिभ्य ईरन्। 'कॄ विक्षेपे, शॄ हिंसायां, पॄ पालनपूरणयोः, कटे वर्षावरणयोः, पट भाषार्थः, शौट गर्वे' एषां द्वन्द्वात्पञ्चमी एभ्य ईरन्प्रत्ययः स्यात्। करीर इति। 'वंशाङ्कुरे करीरोऽस्त्री तरुभेदे घटे च ना' इत्यमरः। पटीर इति। प्रज्ञाद्यणि पाटीरोऽपि। वशेः कित्। वश कान्तौ, अस्मादीरन् कित्स्यात्। उशीरमिति।

देशः । ४७३ कृञ उच्च । कुरीरं मैथुनम् । ४७४ घसेः किच्च । क्षीरम् । ४७५ गभीरगम्भीरौ । गमेर्भः । पत्ते नुम् च । ४७६ विषा विहा । स्यतेर्जहातेश्च विपूर्वाभ्यामाप्रत्ययः । विषा बुद्धिः, विहा स्वर्गः, अव्यये इमे । ४७७ पच पलिमच् । 'पचेलिमो वह्निरव्योः' । ४७८ शीङो धुक्लकलच्वालनः । चत्वारः प्रत्ययाः स्युः । शीधु मद्यम् । शीलं स्वभावः । शैवलः । शेवालम् । बाहुलकात् वस्य पोऽपि । 'शेवालं शैवलो न स्त्री शेपालो जलनीलिका' । ४७९ मृकणिभ्यामूकोकणौ । मरूको मृगः । काणूकः काकः । ४८० वलेरूकः । वलूकः पक्षी उत्पलमूलं च । ४८१ उलूकादयश्च । वलेः सम्प्रसारणमूकश्च । उलूकाविन्द्रपेचकौ । वावदूको वक्ता । भल्लूकः । 'शमेर्बुक् च' (गण २००) । शम्बूको जलशुक्तिः । ४८२ शलिमण्डिभ्यामूकण् । 'शालूकं कन्दविशेषः । मण्डूकः ।

किरवात्सम्प्रसारणम् । कशेर्मुट् च । कशधातुः सौत्रः, तस्मादीरन् स्यात् तस्य मुडागमश्च । कृञ उच्च । डु कृञ् करणे, अस्मादीरन्स्यात् धातोरन्त्यस्य उकार आदेशश्च रपरो भवतीत्यर्थः । कुरीरमिति । उत्त्वं रपरत्वम् । घसेः किच्च । घस्लृ अदने, अस्मादीरन्स्यात्, स च कित् । क्षीरमिति । गमहनेत्युपधालोपे खरि चेति चर्त्वं षत्वम् । गभीरगम्भीरौ । एतौ निपात्येते । निपातनमाह—गमेरिति । गम्लृ गत्यादित्यस्मादीरन्प्रत्ययः भकारश्चान्तादेशः नुमागमविकल्पश्च निपात्यत इत्यर्थः । 'निम्नं गभीरं गम्भीरम्' इत्यमरः । विषा विहः । इमे निपात्येते । तदेवाह—स्यतेरिति । 'बोऽन्तकर्मणि' ओहाक् त्यागे,' आभ्यामित्यर्थः । विषा बुद्धभेदेऽपि 'विषा विषा प्रतिविषा' इत्यमरः । पच पलिमच् । 'डु पचष् पाके' अस्मादेलिमजित्यर्थः । कृत्यप्रक्रियायां तु 'केलिमर उपसङ्ख्यानम्' इत्युक्तम् । शीङो धुक् । शीङ् स्वप्ने, अस्मादुक्, लक्, वलम्, वालन्, एते चत्वारः प्रत्ययाः स्युः । शीधु इति । धुकः कित्त्वाद्गुणाऽभावः । 'मैरेयमासवः शीधुः' इत्यमरः । शीलमिति । लकः कित्त्वाद्गुणाऽभावः । शैवलमिति । ञित्त्वात् 'अचो ञ्णिति' इति वृद्धिः । शैवालमिति । वालनि गुणः । 'जलनीली तु शेवालं शैवले तु कुमुद्वती' इत्यमरः । मृकणिभ्यामूकोकणौ । 'मृङ् प्राणत्यागे, कण निमीलने' आभ्यामूकऊकणप्रत्ययौ क्रमादेतौ इत्यर्थः । मरूक इति । ऊके गुणः । काणूक इति । ऊकणो णित्त्वादुपधावृद्धिः । वलेरूकः । वल संवरणे, अस्मादूकप्रत्यय इत्यर्थः । वलूकादयश्च । निपात्यन्त इत्यर्थः । निपातनमेवाह—वलेरिति । सम्प्रसारणमिति । वकारस्येत्यर्थः । 'उलूके करिणः पुञ्जमूलोपान्ते च पेचके' इत्यमरः । वावदूक इति । वदेर्यङ्लुगन्तादूकः । 'वावदूकश्च वक्तरि' इत्यमरः । भल्लूक इति । भल भल्ल परिभाषणहिंसादानेष्विति पठितभल्लधातोः कपम् । 'ऋक्षाऽऽक्षभल्लभल्लूकाः' इत्यमरः । शमेर्बुक् च । 'शम उपशमे' अस्मादूकः धातोर्बुगागमश्च । 'शम्बूका जलशुक्तयः' इत्यमरः । शलिमण्डिभ्यामूकण् । 'शल गतौ, मडि भूषायां' आभ्यामूकणप्रत्यय

४८३ **निञो मिः**। नेमिः। ४८४ **अर्तेरूच्च**। ऊर्मिः। ४८५ **भुवः कित्**। भूमिः। ४८६ **अश्नोते रश्च**। रश्मिः किरणो रज्जुश्च। ४८७ **दलिमिः**। दल विशरणे। दल्मिरिन्द्रायुधम्। ४८८ **वीज्याज्वरिभ्यो निः**। बाहुलकाण्णत्वम्। 'वेणिः स्यात्केशविन्यासः प्रवेणी च स्त्रियामुभे'। ज्यानिः। जूर्णिः। ४८९ **सृवृषिभ्यां कित्**। सृणिरङ्कुशः। 'वृष्णिः क्षत्रियमेषयोः'। ४९० **अङ्गेर्नलोपश्च**। अग्निः। ४९१ **वहिश्रिस्रुयु ग्लाहात्वरिभ्यो नित्**। वह्निः। श्रेणिः। श्रोणिः। योनिः। द्रोणिः। ग्लानिः। ह्लानिः। तूर्णिः। बाहुलकान्म्लानिः। ४९२ **घृणिपृश्निपार्ष्णिचूर्णिभूर्णि**। एते पञ्च निपात्यन्ते। घृणिः किरणः। स्पृशतेः सलो-

---

इत्यर्थः। शालूक इति। ऊकणो णित्त्वादुपधावृद्धिः। 'शालूकमेषां कन्दः स्यात्' इत्यमरः मण्डूक इति। प्रत्ययस्य णित्त्वेऽपि अकारस्योपधात्वाभावान्न वृद्धिः। निञो मिः। णीञ् प्रापणे, अस्य निञ इति पञ्चम्यन्तम्। अस्मान्मिप्रत्यय इत्यर्थः। नेमिरिति। 'चक्रं रथाङ्गे तस्यान्ते नेमिः स्त्री स्यात्प्रधिः पुमान्' इत्यमरः। अर्तेरूच्च। मिरित्यनुवर्तते। ऋ गतावित्यस्मान्मिप्रत्ययः धातोरूकारश्चादेश इत्यर्थः। ऊर्मिरिति। धातोरूत्वे रपरत्वम्। भुवः कित्। भू सत्तायामित्यस्मात् मिप्रत्ययः, स च कित्त्वार्थः। भूमिरिति। कित्त्वान्न गुणः। अत्र 'अर्तिभुवोरूच'इत्येव सूत्रं कर्तुं शक्यम्, भुवः किदिति च त्यक्तुं शक्यम्। न च भूमिरित्यत्र गुणप्रसङ्गः, ऊकारस्य ऊकारविधानसामर्थ्येन गुणाऽभावस्य सिद्धत्वात्। अश्नोते रश्च। अशू व्याप्तौ, अस्मात् मिः, धातो रशादेशश्च। रश्मिरिति। 'किरणप्रग्रहौ रश्मी' इत्यमरः। दलिमः। इत्थं निपात्यत इत्यर्थः। धातुं प्रदर्शयति—दल विशरणे इति। वीज्याज्वरिभ्यो निः। वी गतिव्याप्त्यादौ, ज्या वयोहानौ, ज्वर रोगे' एभ्यो निप्रत्यय इत्यर्थः। ननु वेणिरित्यत्र कथं णत्वं रषाभ्यां परत्वाऽभावादित्यत्राह—बाहुलकादिति। अमरकोशमाह—वेणिः स्यात्केशविन्यास इति। ज्यानिरिति। हानिरित्यर्थः। जूर्णिरिति। ज्वरधातोर्निप्रत्यये ज्वरत्वरेत्यूठ्। सृवृषिभ्यां कित्। 'सृ गतौ, वृषु सेचने' आभ्यां निः कित्स्यात्। सृणिरिति। ऋकारात्परत्वाण्णत्वम्। कित्त्वान्न गुणः। 'अङ्कुशोऽस्त्री सृणिः स्त्रियाम्' इत्यमरः। वृष्णिरिति। रषाभ्यामिति णत्वम्। अङ्गेर्नलोपश्च। अगिर्गत्यर्थः। अस्मान्निः स्यात्, धातोरिदित्त्वान्नुम्धनकारस्य लोपश्चेत्यर्थः। किदित्यनुवर्त्य नेः कित्त्वविधानेऽपि धातोरिदित्त्वात् 'अनिदिताम्' इति लोपो न स्यादिति नकारलोपविधानं कृतम्। वहिश्रिस्रुयु। 'वह प्रापणे, श्रिञ् सेवायां, स्रु श्रवणे, द्रु मिश्रणे, ह्लै हर्षक्षये, म्लै हर्षक्षये, म्लै हर्षक्षये, म

पः । पृश्निरल्पशरीरः । पृषेर्बृद्धिश्च । पार्ष्णिः पादतलम् । चरेरुपधाया उत्वम् । चूर्णिः कपर्दकशतम् । बिभर्तेरुत्वम् । भूर्णिर्धरणी । **४९३ वृदृभ्यां विन्** । वर्विर्घस्मरः । दर्विः । **४९४ जृशृस्तृजागृभ्यः क्किन्** । जोर्विः पशुः । शीर्विर्हिंस्रः । स्तीर्विरध्वर्युः । जागृर्विर्नृपः । **४९५ दिवो द्वे दीर्घश्चाभ्यासस्य** । 'दीदिविः स्वर्गमोक्षयोः' । **४९६ कृविघृष्विछविस्थविकिकीदिवि** । कृविस्तन्तुवायद्रव्यम् । घृष्विर्वराहः । छास्थोर्ह्रस्वत्वं च । छविर्दीप्तिः । स्थविस्तन्तुवायः । दीव्यतेः किकिपूर्वात् किकीदिविश्चाषः । बाहुलकाद्ध्रस्वदीर्घयोर्विनिमयः । 'चाषेण किकिदीविना' । **४९७ पातेर्डतिः** । पतिः । **४९८ शकेर्ऋतिन्** । शकृत् । **४९९ अमेरतिः** ।

इत्यस्मात्प्रत्यये सकारलोपः गुणाऽभावश्च निपात्यते । पार्ष्णिरिति । पृषु सेचने, अस्मान्निप्रत्यये धातोर्बृद्धिर्निपात्यते । ऋकारस्य आर् बृद्धिः, रषाभ्यामिति णत्वम् । चूर्णिरिति । 'चर गता' वित्यस्मान्निप्रत्यये रषाभ्यामिति णत्वम् उपधाया ऊत्वं निपात्यत इत्यर्थः । भूर्णिरिति । 'डु भृञ् धारणपोषणयोः' अस्मान्निप्रत्यये धातोरन्त्यस्य ऊत्वं निपात्यते, रपरत्वं, रषाभ्यामिति णत्वम् । वृदृभ्यां विन् । वृञ् वरणे, दृङ् आदरे, आभ्यां विन्निप्रत्ययौ । वर्विरिति । धातोर्गुणः । जृशृस्तृजागृभ्यः क्किन् । जॄ वयोहानौ, शॄ हिंसायां, स्तृञ् आच्छादने, जागृ निद्राक्षये' एभ्यः क्किन् स्यात्, कनावितौ । जोर्विरिति । क्किन्वादिगुणाऽभावे 'ऋत इद्धातोः' इति इत्वे 'हलि च' इति दीर्घे रूपम् । 'वेरपृक्तस्य' इति लोपस्तु न, अपृक्तस्येत्युक्तेः । दिवो द्वे । 'दिवु क्रीडाविजिगीषादिषु' अस्मात्किन्, धातोर्द्वित्वम्, अभ्यासस्य दीर्घश्च स्यात् । दीदिविरिति । पुनर्ह्रस्व इति अभ्यासह्रस्वस्तु न शङ्क्यः 'लक्ष्ये लक्षणस्येति' न्यायात् । न चाभ्यासदीर्घात्पूर्वम् इकारस्य ह्रस्वविधाने फलाऽभावाद् ह्रस्वो न प्रवर्तते । एवं च न 'लक्ष्ये लक्षणमि'ति न्यायविरोध इति वाच्यम्, फलाऽभावेऽपि पर्जन्यवच्छास्त्रप्रवृत्त्या दीर्घात्पूर्वं ह्रस्वप्रवृत्तेर्दुर्वारत्वात् । 'ओदनोऽस्त्री स दीदिविः' इत्यमरः । कृविघृष्विछवि । 'डु कृञ् करणे, घृषु सेचने, छो छेदने, ष्ठा गतिनिवृत्तौ, दिवु क्रीडादौ किकिपूर्वः' एते क्किन्नन्ता निपात्यन्ते इत्यर्थः । तत्र कृविरित्यत्र किरवान्न गुणः । एवं घृष्विरित्यत्रापि । छविरिति । 'छो छेदने' इत्यस्मात् प्रत्यये 'आदेच' इत्यात्वे ह्रस्वोऽनेन निपात्यते । एवं स्थविरित्यपि । किकीदिविरिति । दिवुधातोः किकिपूर्वात् क्किनि ककित्त्वात् लघूपधगुणाऽभावे 'लोपो व्योर्वलि' इति धातुवकारस्य लोपे किकिशब्दावयवस्यान्त्यस्य इकारस्य दीर्घो निपात्यते । 'अथ चाषः किकीदिविः' इत्यमरः । विनिमय इति । दिवृशब्देकारस्य दीर्घः 'किकिशब्दावयवस्य ह्रस्व इत्यपि निपात्यते । लोके उभयोरपि दर्शनादिति भावः । तदेवाह—चाषेण किकिदीविनेति । पातेर्डतिः । पा रक्षणे, अस्माद्डुतिप्रत्यय इत्यर्थः । पतिरिति । डित्त्वाट्टिलोपः । शकेः ऋतिन् । 'शकल शक्तौ' अस्माद्दतिन्निप्रत्ययौ । 'शकलं शकृत्' इत्यमरः । अमेरतिः ।

अमतिः कालः। ५०० **वहिवस्यर्तिभ्यश्चित्।** वहतिः पवनः। 'वसतिर्गृहयामिन्योः'। अरतिः क्रोधः। ५०१ **अञ्चेः को वा।** अङ्कतिः, अञ्चतिर्वातः। ५०२ **हन्तेरंह च।** हन्तेरतिः स्यादंहादेशश्च धातोः। हन्ति दुरितमनया अंहतिर्दानम्। 'प्रादेशनं निर्वपणमपवर्जनमंहतिः'। ५०३ **रमेर्नित्।** 'रमतिः कालकामयोः'। ५०४ **सूङः क्रिः।** सूरिः। ५०५ **अदिशदिभूशुभिभ्यः क्विन्।** अद्रिः। शद्रिः शर्करा। भूरि प्रचुरम्। शुभ्रिर्ब्रह्मा। ५०६ **वङ्क्रयादयश्च।** क्विन्नन्ता निपात्यन्ते। वङ्क्रिर्वाद्यभेदो गृहदारु पार्श्वास्थि च। वप्रिः क्षेत्रम्। 'अंहिरङ्घ्रिश्च चरणः'। तदिः सौत्रो धातुः। तन्द्रिर्मोहः। बाहुलकाद्गुणः। भेरिः। ५०७ **राशदिभ्यां त्रिप्।** रात्रिः। शत्रिः कुञ्जरः। ५०८ **अदेस्त्रिनिश्च।** चात्रिप्। अत्त्री। अत्त्रिणौ। अत्त्रिणः। अत्त्रिः। अत्त्री। अत्त्रयः। ५०९ **पतेरत्रिन्।** पतत्रिः पक्षी। ५१० **मृकणिभ्यामीचिः।** मरीचिः। कणीचिः पल्लवो निनादश्च। ५११ **श्वयतेश्चित्।** श्वयीचिर्व्याधिः। ५१२ **वेञो**

'अम गत्यादौ' अस्मादतिप्रत्यय इत्यर्थः। वहिवस्यर्तिभ्यश्चित्। 'वह प्रापणे, वस निवासे, ऋ गतौ' एभ्यः अतिप्रत्ययः स्यात्, स च चित्। वसतिरिति। 'वसती रात्रिवेश्मनोः' इत्यमरः। अञ्चेः को वा। 'अञ्चु गतौ' अस्मादतिः स्यात् ककारश्चान्तादेशो विकल्पेन। हन्तेरंह च। 'हन हिंसागत्योः' अस्मादतिप्रत्ययः धातोरंहादेशश्चेत्यर्थः। अंहतिरित्यस्यार्थं विवृण्वन्नमरोक्तिमाह—प्रादेशनं निर्वपणमिति। रमेर्नित्। 'रमु क्रीडादौ' अस्मादतिप्रत्ययः, स च नित्स्यात्, नित्वं स्वरार्थम्। सूङः क्रिः। 'षूङ् प्राणिप्रसवे,' अस्मात् क्रिः प्रत्यय इत्यर्थः। सूरिरिति। कित्त्वाद्गुणाऽभावः। 'धीमान्सूरिः कृती कृष्टिः' इत्यमरः। अदिशदि। 'अद् भक्षणे, शदॢ शातने, भू सत्तायां, शुभ शोभार्थे' एभ्यः क्रिन्नित्यर्थः। कनाविती, नित्त्वमाद्युदात्तार्थम्। वङ्क्रयादयश्च। एते निपात्यन्ते। प्रत्ययमाह—क्विन्नन्ता इति। वङ्क्रिरिति। वकि कौटिल्ये, अस्माक्विन् धातोरिदित्त्वान्नुम्, अनुस्वारपरसवर्णौ। वप्रिरिति। डु वप् बीजसन्ताने' इत्यस्माद्रूपम्। प्रत्ययस्य कित्त्वेऽपि निपातनात्सम्प्रसारणाऽभावः। अहिर्भाषार्थः, 'अधि वधि मधि गत्याक्षेपे', इति पठितोऽधिः, ताभ्यां क्विनि, 'अंहिः अङ्घ्रिरिति' रूपे। उभयत्रापि धातोरिदित्त्वान्नलोपो न। राशदिभ्यां त्रिप्। 'रा दाने, शदॢ शातने' आभ्यां त्रिप् स्यात्। अदेस्त्रिनिश्च। 'अद भक्षणे' अस्मात् त्रिनिः चकारात्त्रिप् च स्याताम्। त्रिन्याह—अत्त्री अत्त्रिणाविति। नकारान्तत्वप्रदर्शनायोक्तम्। अत्त्रिरिति। त्रिपि रूपम्। पतेरत्रिन्। 'पत्लृ गतौ' अस्मादत्रिन्प्रत्यय इत्यर्थः। पतत्रिरिति। नित्त्वादाद्युदात्तः। 'पतत्रिपत्त्रिपतगपत्तत्पत्तरथाण्डजाः' इत्यमरः। मृकणिभ्यामीचिः। 'मृङ् प्राणत्यागे' कण शब्दार्थः, आ-

डिच्च । वीचिस्तरङ्गः । नञ्समासे अवीचिर्नरकभेदः । ५१३ ऋहनिभ्यामूषन् । अरूषः सूर्यः । हनूषो राक्षसः । ५१४ पुरः कुषन् । 'पुर अग्रगमने' पुरुषः । 'अन्येषामपि—' (सू ३५३६) इति दीर्घः । पूरुषः । ५१५ पूनहिकलिभ्य उषच् । पुरुषम् । नहुषः । कलुषम् । ५१६ पीयेरूषन् । पीय इति सौत्रो धातुः । पीयूषम् । बाहुलकाद्गुणे 'पेयूषोऽभिनवं पयः' । ५१७ मस्जेर्नुम् च । 'मस्जेरन्त्यात्पूर्वो नुम् वाच्यः' । मञ्जूषा । ५१८ गडेश्च । गण्डूषः । गण्डूषा । ५१९ अर्तेररुः । अररुः शत्रुः । अररू । अरराः । ५२० कुटः किच्च । कुटरवस्त्रगृहम् । कित्त्वमिह चिन्त्यम् । ५२१ शकादिभ्योऽटन् । 'शकटोऽस्त्रियाम्' । ककिर्गत्यर्थः । कङ्कटः संनाहः । देवटः शिल्पी । करट इत्यादि । ५२२ कृकदिकडिकटिभ्योऽम्बच् । करम्बं व्यामिश्रम् । कदिकडी सौत्रौ ।

म्यामीचिप्रत्यय इत्यर्थः । श्वयतेश्चित् । 'टु ओ श्वि गतिवृद्ध्योः' अस्मादीचिप्रत्ययः स्यात्, स च चिदित्यर्थः । चित्त्वमन्तोदात्तत्वार्थम् । वेञो डिच्च । 'वेञ् तन्तुसन्ताने' अस्मादीचिर्डिदस्यात् । वीचिरिति । डित्वाट्टिलोपः । अन्यथा अयादेशे श्वयीचिवत वयीचिरिति स्यात् । ऋहनिभ्यामूषन् । ऋ गतौ, हन हिंसागत्योः, आभ्यामूषन्स्यात् । अरूष इति । ऊषनि गुणः । पुरः कुषन् । पुर अग्रगमने, अस्मात्कुषन्स्यात् । पुरुष इति । कुषनः कित्त्वादगुणाभावः । ननु कथं ताह पूरुष इत्यत्राह—अन्येषामपीति । पूनहिकलिभ्य उषच् । 'पू पालनपूरणयोः, णह बन्धने, कल शब्दसङ्ख्यानयोः' एभ्य उषच् स्यात् । पीयेरूषन् । पीयधातोर्धातुपाठेऽदर्शनादाह—सौत्र इति । मस्जेर्नुम् च । 'टु मस्जो शुद्धौ', अस्मादूषन् नुम् च वाच्य इत्यर्थः । मञ्जूषेति । ननु नुमो मित्त्वात् 'मिदचोऽन्त्यात्परः' इति मकारोत्तराकारात्स्यात् सकारश्च भूवेतेरत आह—मस्जेरन्त्यात्पूर्व इति । तथाच सकारात्परत्र नुमि 'स्कोः' इति सलोपे च रूपमिति भावः । गडेश्च । 'गडि वदनैकदेशे', अस्मादूषनस्यात् । गण्डूष इति । इदित्वान्नुम्यनुस्वारपरसवर्णौ । अर्तेररुः । 'ऋ गतौ', अस्मादरुप्रत्यय इत्यर्थः । अररुरिति । धातोर्गुणाः । प्रत्ययस्य सकारान्तत्वभ्रमवारणायाऽऽह—अरू इति । कुटः किच्च । 'कुट कौटिल्ये', अस्मादरुः स्यात्, स च कित् । कुटरुरिति । कित्त्वान्न लघूपधगुणः । नन्वत्र कित्त्वं व्यर्थं 'गाङ्कुटादिभ्य' इति प्रत्ययस्य ङित्त्वेनैव गुणाऽभावसिद्धेरित्यत आह—कित्त्वमिहेति । शकादिभ्योऽटन् । अटनि नकार आद्यदात्तार्थः । शक्ट इति । शक्लृ शक्तावित्यस्मादूपम् । ककिर्गत्यर्थ इति । अस्मादटन्निति शेषः । 'अररुदः कङ्कटकः' इत्यमरः । देवट इति । 'दिवु क्रीडाविजिगीषादिषु' अस्मादटनि 'पुगन्ते'ति गुणः । कृकदिकडिकटिभ्योऽम्बच् । 'डु कृञ् करणे, कदिकडी सौत्रौ, कटे वर्षादौ' एभ्यः अम्बच् इत्यर्थः । करम्बमिति । धातोर्गुणाः । 'कलम्बश्च

कदम्बो वृक्षभेदः। कटम्बोऽप्रभागः। कडम्बो वादित्रम्। ५२३ कदेर्णित्पक्षिणि। कादम्बः कलहंसः। ५२४ कलिकर्द्वोरमः। कलमः। कर्दमः। ५२५ कुणिपुल्योः किन्दच्च। 'कुण शब्दोपकरणयोः'। कुणिन्दः शब्दः। पुलिन्दो जातिविशेषः। ५२६ कुपेर्वा वश्च। कुपिन्दकुविन्दौ तन्तुवाये। ५२७ नौ षञ्जेर्घथिन्। निषङ्गथिरालिङ्गकः। ५२८ उद्यतेश्चित्। उदरथिः समुद्रः। ५२९ सर्तेर्णिच्च। सारथिः। ५३० खर्जिपिञ्जादिभ्य ऊरोलचौ। खर्जूरः। कर्पूरः। वल्लूरं शुष्कमांसम्। पिञ्जूलं कुशवर्तिः। 'लङ्गेर्वृद्धिश्च' (गण २०१) लाङ्गूलम्। कुसूलः। 'तमेर्बुग्वृद्धिश्च' (गण२०२)। ताम्बूलम्। 'शृणातेर्दुग्वृद्धिश्च' (गण २०३)। शार्दूलः। 'दुक्रोः कुक्च' (गण २०४)। दुकूलम्। कुकूलम्।

कदम्बश्च वेसवार उपस्करः' इत्यमरः। कदेर्णित्पक्षिणि। सौत्रात्कदधातोर्जायमानः अम्बच्प्रत्ययः पक्षिण्यभिधेये णिदित्यर्थः। कादम्ब इति। णिश्वादुपधावृद्धिः। कलिकर्द्वोरमः। कल सङ्ख्याने, कर्द कुत्सिते शब्दे, आभ्यामम: स्यात्। कलम इति। 'शालयः कलमाद्याश्च' इत्यमरः। कुणिपुल्योः किन्दच्। 'कुण शब्दोपकरणयोः, पुल महत्त्वे' आभ्यां किन्दच् स्यात्, कचाविती। पुलिन्द इति। किश्वान्न लघूपधगुणः। 'किरातशबरपुलिन्दा म्लेच्छजातयः' इत्यमरः। कुपेर्वा वश्च। 'कुप क्रोधे' अस्मात् किन्वच्, धातोर्वकारः अन्तादेशश्च वेत्यर्थः। कुविन्द इति। 'तन्तुवायः कुविन्दः स्यात्' इत्यमरः। नौ षञ्जेर्घथिन्। नावुपपदे षञ्ज सङ्गे इत्यस्मात् घथिन् स्यादित्यर्थः। निषङ्गथिरिति। 'उपसर्गात्सुनोतीति' षत्वम्। घथिनो धित्वात् 'चजोः कु घिण्ण्यतोः' इति कुत्वम्। उद्यतेश्चित। उदि उपपदे ऋ गतावित्यस्मात् घथिन्प्रत्ययः, स च चिदित्यर्थः। उदरथिरिति। घथिनि कृते धातोर्गुणः। सर्तेर्णिच्च। 'सृ गतावित्यस्मात् घथिन् स्यात्, स च णिदित्यर्थः। सारथिरिति। णिश्वादुवृद्धिः। 'नियन्ता प्राजिता यन्ता सूतः क्षत्ता च सारथिः' इत्यमरः। खर्जिपिञ्जादिभ्य ऊरोलचौ। 'खर्ज पूजने च, पिञ्ज हिंसाया'मित्यादिभ्यः ऊर, ऊलच् इति प्रत्ययौ क्रमात्स्याताम्। खर्जादिभ्य ऊरः 'पिञ्जादिभ्य ऊलजित्यर्थः। कर्पूर इति। 'कृपू सामर्थ्ये' चेत्यस्माद्रूपम्। बाहुलकात् 'कृपो रो ल' इति लत्वाऽभावः। वल्लूरमिति। 'वल वल्ल संवरणे' इत्यत्र पठितादूपम्। लङ्गेर्वृद्धिश्च। 'अगिवगिमगि' इति दण्डकपठितो लगिर्गत्यर्थः। अस्मात्पिञ्जादेरूलच् सिद्धः। वृद्धिरपि भवतीत्यर्थः। कुसूलमिति। पिञ्जादित्वादूलच्। 'कुस श्लेषणे' धातुः। तमेर्बुग्वृद्धिश्च। 'तमु ग्लानौ,' अस्मात् ऊलच्सन्नियोगेन बुगागमः, धातोर्वृद्धिश्च स्यात्। ताम्बूलमिति। शृणातेर्दुक् वृद्धिश्च। 'शॄ हिंसायाम्' अस्मात् ऊलच्सन्नियोगेन दुगागमः वृद्धिश्च स्यातामित्यर्थः। दुक्रोः कुक् च। 'दु गतौ, कु शब्दे आभ्यामूलच्सन्नियोगेन कुक् च निपात्यत इत्यर्थः।

५३१कुवश्चट् दीर्घश्च । कूची चित्रलेखनिका । ५३२ समीणः । समीचः समुद्रः । समीची हरिणी । ५३३ सिवेष्टेरू च । सूची दर्भाङ्कुरः । सूची । ५३४ शमेर्बन् । शम्बो मुसलम् । ५३५ उल्बादयश्च । वन्नन्ता निपात्यन्ते । 'उच समवाये' । चस्य लत्वं गुणाऽभावश्च । उल्बो गर्भाशयः । शुल्बं ताम्रम् । बिल्वम् । निम्बः । बिम्बम् । ५३६ स्थः स्तोऽम्बजबकौ । तिष्ठतेरम्बच् अबक एतौ स्तः, स्तादेशश्च । 'स्तम्बो गुच्छस्तृणादिनः' । स्तबकः पुष्पगुच्छः । ५३७ शाशपिभ्यां ददनौ । 'शादो जम्बालशष्पयोः' । शद्दः । ५३८ अब्दादयश्च । अवतीत्यब्दः । 'कौतेर्नुम् (च)' (ग २०५) कुन्दः । ५३९ वलिमलितनिभ्यः कयन् । वलयम् । मलयः । तनयः । ५४० वृहोः षुग्दुकौ च । वृषयः आश्रयः । हृदयम् । ५४१ मिपिभ्यां रुः । मेरुः । पेरुः सूर्यः । बाहुलकात्-पिवतेरपि । 'संवत्सरवपुः

कुवश्चट् दीर्घश्च । कु शब्दे, अस्माच्चट्प्रत्ययः, दीर्घश्च धातोरित्यर्थः । कूचः कुचपर्यायः । 'कुचकूचौ स्तनौ मतौ' इति कोशात् । प्रत्ययस्य टित्त्वे फलमाह—कूचीति । समीणः । सम्युपपदे इण् गतावित्यस्मात् चट् स्यात्, दीर्घश्च धातोः । समीच इति । धातोर्दीर्घे रूपम् । टित्त्वफलं दर्शयन्नुदाहरति—समीचीति । सिवेष्टेरू च । 'षिवु तन्तुसन्ताने' अस्माच्चटप्रत्ययः स्यात्, धातोष्टेरूत्वं चेत्यर्थः । शमेर्बन् । शम उपशमे, अस्माद्बन् स्यात् । शम्ब इति रूपम् । उल्बादयश्च । एते बन्नन्ता निपात्यन्त इत्यर्थः । धातुं दर्शयति—उच समवाय इति । अस्माद्बनि चकारस्य लत्वं धातोर्गुणाभावश्च निपात्यत इत्यर्थः । 'गर्भाशयो जरायुः स्यात् उल्बं तु कललोऽस्त्रियाम्' इत्यमरः । शुल्बमिति । शुच शोके, अस्मात् बनि चकारस्य लत्वं गुणाऽभावश्च निपात्यते । 'शुल्बं वराटकं स्त्री तु' इत्यमरः । बिल्वमिति । बिल भेदने, अस्माद्बन् । बबयोरभेदाद्बिल्वमित्यपि । स्थः स्तोऽम्बजबकौ । ष्ठा गतिनिवृत्तौ, अस्मात् अम्बच्, अबक इति प्रत्ययौ स्तः । तत्सन्नियोगेन धातोः स्तादेशश्च । स्तादेशस्यानेकाल्त्वात् सर्वादेशः । स्तम्ब इति । अमरकोशमाह—स्तम्बो गुच्छस्तृणादिन इति । शाशपिभ्यां ददनौ । शो तनूकरणे, शप आक्रोशे, आभ्यां ददन्प्रत्ययौ यथाक्रमं स्याताम् । अमरकोशस्यमाह—शादो जम्बालशष्पयोरिति । शद्द इति । 'झलां जश् झशि' इति जश्त्वम् । अब्दादयश्च । एते बन्नन्ता निपात्यन्ते । अवतीत्यब्द इति । वकारस्य बकारो निपात्यते । कौतेर्नुम् । कु शब्दे, अस्मादुबन् प्रत्ययः नुमागमश्चेत्यर्थः । 'माद्यं कुन्दं रक्तकस्तु' इति वनौषधिवर्गेऽमरः । वलिमलितनिभ्यः कयन् । 'वल संवरणे, मल धारणे, तनु विस्तारे, एभ्यः कयन्प्रत्ययः स्यात् । कयनः कित्त्वमुत्तरार्थम् । वलयमिति । वृहोः षुग्दुकौ च । 'वृञ् वरणे, हृञ् हरणे' आभ्यां कयन्स्यात्, यथासङ्ख्यं षुक् दुक् चागमौ स्तः । वृषय इति । कयनः कित्त्वान्नेह गुणः । हृदयमिति । हियते विषयैरिति हृदयम् । मिपिभ्यां रुः । 'डु मिञ् प्रक्षेपणे, रि पि गता' वित्यत्र

पारुः पेरुर्वासीर्दिनप्रणीः'। ५४२ **जत्वादयश्च**। जत्रु। जत्रुणी। अश्रु। अश्रुणी। ५४३ **रुशातिभ्यां क्नु**। रुरुर्मृगभेदः। शातयतीति शत्रुः। प्रज्ञादौ पाठाद्ध्रस्वत्वम्। ५४४ **जनिदाच्युसृवृमदिषमिनमिभृञ्भ्य इत्वन्त्वन्त्वनिक्नञ्शक्स्यढडटाऽटच्चः**। जनित्वौ मातापितरौ। दात्वो दाता। च्यौत्नो गन्ता अण्डजः क्षीणपुण्यश्च। सृणिरङ्कुशश्चन्द्रः सूर्यो वायुश्च। वृश आर्द्रकं मूलकं च। मत्स्यः। षण्ढः। डित्वाट्टिलोपः। नमतीति नटः शैलूषः। बिभर्ति भरटः कुलालो भृतकश्च। ५४५ **अन्येभ्योऽपि दृश्यन्ते**। पेत्वमभृतम्। भृशम्। ५४६ **कुसेरुम्भोमेदेताः**। कुसुम्भम्। कुसुमम्। कुसीदम्। कुसितो जनपदः। ५४७ **सानसिवर्णसिपर्णसितण्डुलाङ्कुशचषालेल्वलपल्वलधिष्ण्यशल्याः**। सनोतेरसिप्रत्यये उपधावृद्धिश्च। सानसिर्हिरण्यम्। वृञो नुक्च। वर्णसिर्जलम्। पॄ, पर्णसिर्जलगृहम्। तडि आघाते, तण्डुलाः। अकि लक्षणे, उशच्, अङ्कुशः। चषेरालः 'चषालो यूपकटकः'।

पठितः पिधातुर्गत्यर्थकः, आभ्यां रुप्रत्ययः स्यात्। मेरुरिति। रुप्रत्यये गुणः। 'मेरुः सुमेरुर्हेमाद्रिः' इत्यमरः। जत्वादयश्च। एते रुप्रत्ययान्ता निपात्यन्ते। जत्रु इति। जनी प्रादुर्भावे इत्यस्मात् रौ नकारस्य तकारो निपात्यते। अश्रु इति। अशू व्याप्तौ, अस्मात् रुप्रत्ययः। रुशातिभ्यां क्नु। रु गतौ, शदॢ शातने ण्यन्तः। 'शदेरगतौ तः' इति तकारे शातीति निर्देशः। रुरुरिति। 'कृष्णसाररुरुन्यङ्कु' इत्यमरः। ननु शत्रुरित्यत्र कथं ह्रस्वत्वमित्याशङ्क्यायामाह—प्रज्ञादाविति। जनिदाच्युसृवृमदि। 'जनी प्रादुर्भावे, डुदाञ् दाने, च्युङ् गतौ, सृ गतौ, वृञ् वरणे, मदी हर्षे, षम अवैकल्ये, णम प्रह्वत्वे शब्देच, डुभृञ् धारणपोषणयोः, एभ्यः इत्वन्, त्वन्, त्नण्, क्विनन्, शक्, स्य, ढ, डट, अटच् इति प्रत्ययाः स्युः। च्यौत्न इति। त्नणो णित्त्वादूवृद्धिः। सृणिरिति। क्विननः कित्त्वाद्न गुणः। वृश इति। कित्त्वाद्न गुणः। मत्स्य इति। स्ये खरि चेति चर्त्वम्। षण्ढ इति। बाहुलकात् धात्वादेरिति सो न। नट इति। डित्त्वाट्टिलोपः। टित्त्वाद्भटी। अन्येभ्योऽपि। अन्येभ्योऽपि धातुभ्य इत्वन्नादयो भवन्तीत्यर्थः पेत्वमिति। 'पा पाने' इत्यस्मात् इत्वनि आदुगुणः। भृशमिति। भृञः शक्। कित्त्वाद्न गुणः। कुसेरम्भोमेदेताः। कुस श्लेषणे, अस्मादुम्भ, उम, ईद, इत, एते प्रत्ययाः स्युः। कुसुम्भमिति। बाहुलकाद्न लघूपधगुणः। 'स्याद्महारजते क्लीबं कुसुम्भं करके पुमान्' इत्यमरः। सानसिवर्णसि। 'षणु अदाने' इत्यादिभ्य इत्थं निपात्यन्त इत्यर्थः। सानसिरित्यत्राह—सनोतेरिति। उपधावृद्धिश्चेति। धातोरकारस्येत्यर्थः। वृञो नुक् चेति। वृञ् वरणे, अस्मादसिः, धातोर्नुगमश्चेत्यर्थः। धातोर्गुणे 'रषाभ्या'मिति णत्वे च वर्णसिरिति रूपम्। पर्णसिरिति। 'पॄ पालनपूरणयोः' अस्मादसिप्रत्ययो नुक् च निपात्यते। धातोर्गुणे 'रषाभ्या'मिति णत्वे रूपम्। तण्डुला इत्यत्राह—तडि आघाते इति। अस्मादुलच् प्रत्ययः नुम् च निपात्यते। इदित्त्वाद्वा नुम् सिद्धः।

इल्वलो दैत्यभेदः । पल्वलम् । अि धृषा, ण्यः । ऋकारस्येकारः, धिष्ण्यम् । शलेर्यः, शल्यम् । 'वा पुंसि शल्यं शल्कुर्ना' । ५४८ **मूशक्यबिभ्यः क्लः** । मूलम् । 'शक्लः प्रियंवदे' । अम्ब्लो रसः । बाहुलकादमेः । अम्लः । ५४९ **माच्छासस्सिभ्यो यः** । माया । छाया । सस्यम् । बाहुलकात्सुनोतेः । 'सव्यं दक्षिणवामयोः' । ५५० **जनेर्यक्** । 'ये विभाषा' (सू २३१६) जन्यं युद्धम् । जाया भार्या । ५५१ **अघ्न्यादयश्च** । यगन्ता निपात्यन्ते । हन्तेर्यक् अडागम उपधालोपश्च । अघ्न्या माहेयी । अघ्न्यः प्रजापतिः । कनो दीर्घौ । कन्या । बवयोरैक्यम् । वन्ध्या । ५५२ **स्नामदिपद्यतिपृशकिभ्यो वनिप्** । स्नावा रसिकः । मद्वा शिवः । पद्वा पन्थाः । अर्वा तुरङ्गगर्दभयोः । पर्व ग्रन्थिः प्रस्तावश्च । शक्वा हस्ती । ढीब्रौ । शक्वरी अङ्गुलिः । ५५३ **शीङ्कृशिरुहिजिदिसृधृभ्यः कनिप्** । शीवा अजगरः । कृश्वा शृगालः । रुह्वा वृक्षः । जित्वा जेता । क्षित्वा वायुः। सृत्वा प्रजापतिः । धृत्वा

अनुस्वारपरसवर्णौ । अहकुश इत्यत्राह—अकि लक्षण इति । इदित्त्वान्नुमनुस्वारपरसवर्णौ । चषाल इत्यत्राह—चषेरिति । चष भक्षणे इत्यस्मादित्यर्थः । 'चषालो यूपकटकः' इत्यमरः । इल्वल इति । इलधातुः सौत्रः, तस्माद्वलच् गुणाऽभावश्च निपात्यते । पल्वलेति । पा पाने इत्यस्माद्वलच्, लगागमो निपात्यते, ह्रस्वत्वं च । पिबत्यस्मिन्नित्यधिकरणे प्रत्ययः । धिष्ण्यमिति । अि धृषा प्रागल्भ्ये, अस्मात् ण्यप्रत्ययः, धातोरुपधाया ऋकारस्य इकारः, रपरत्वाऽभावः, गुणाऽभावश्च निपात्यते । 'धिष्ण्यं स्थाने गृहे भेऽग्नौ भाव्यं कर्म शुभाऽशुभम्' इत्यमरः । शल्यमित्यत्राह—शलेरिति । 'शल गताविति'त्यस्मादित्यर्थः । मूशक्यबिभ्यः क्लः । मूल बन्धने, शक्लृ शक्तौ, अबि शब्दे, एभ्यः कलप्रत्यय इत्यर्थः । मूलमिति । किरवान्न गुणः । शक्ल इति । 'दुर्मुखो मुखराबद्धमुखो शक्लः प्रियंवदे' इत्यमरः । माच्छासस्सिभ्यो यः । 'मा माने, छो छेदने' षस स्वप्ने' एभ्यो यप्रत्यय इत्यर्थः । स्पष्टम् । जनेर्यक् । 'जन जनने' अस्माद्यक् इत्यर्थः । यकः किरवमुत्तरार्थम् । आद्यं स्मारयति—ये विभाषेति । अघ्न्यादयश्च । यगन्ता निपात्यन्ते । निपातनमेवाह—हन्तेरिति । यक् अडागमश्च निपात्यते । उपधालोपस्तु गमहनजनखनेत्येव सिद्धः । उपधालोपे 'हो हन्ते'रिति कुत्वम् । अघ्न्येति । स्त्रियां टाप् । 'अर्जुन्यघन्या रोहिणी स्यात्' इत्यमरः । कन्येति । यकि कुत्वम् । 'बन्ध बन्धने' अस्माद्यकि बन्ध्येयेव स्यात्, न तु बन्ध्येतीत्यत आह—बवयोरिति । स्नामदिपद्यर्तिं । 'ष्णा शौचे, मदी हर्षे, पद गतौ, ऋ गतौ, पृ पालनपूरणयोः, शक्लृ शक्तौ' एभ्यो वनिप् स्यात् । स्नावेति । उपधादीर्घनलोपादि । अर्वेति । ऋधातोर्वनिपि गुणः । 'वाजिवाहार्वगन्धर्वहयसैन्धवसप्तयः' इत्यमरः । ढीब्राविति । 'वनो र चे'त्यनेनेत्वादिः । शीङ्कृशिरुहि । 'शीङ् स्वप्ने, कृश आह्वाने, रुह बीजजन्मनि, जि जये, क्षि

विष्णुः । ५५४ ध्याप्योः सम्प्रसारणं च । धीवा कर्मकरः। पीवा स्थूलः। ५५५ अदेर्घ च । अध्वा । ५५६ प्र ईरशदोस्तुट् च । प्रेर्त्वा प्रशस्त्वा च सागरः । प्रेर्त्वरी प्रशस्त्वरी च नदी । ५५७ सर्वधातुभ्य इन् । पचिरग्निः । तुडिः । तुण्डिः । वलिः । वटिः । यजिः । देवयजिः । काशत इति काशिः । यतिः । मल्लिः । मल्ली । केलिः । मसी परिणामे। मसिः । बाहुलकाद्गुणः । कोटिः । हेलिः । हलिः । बोधिः । नन्दि । कलिः । ५५८ हृपिषिरुहिवृतिविदिछिदिकीर्तिभ्यश्च । 'हरिर्विष्णावहाविन्द्रे भेके सिंहे हये रवौ । चन्द्रे कीले प्लवङ्गे च यमे वाते च कीर्तितः । पेषिर्वज्रम् । रोहिर्वृक्षः । वर्तिः । वेदिः । छेदिश्छेत्ता । कीर्तिः । ५५९ इगुपधात्कित् । कृषिः । ऋषिः । शुचिः । लिपिः । बाहुलकाद्बत्वे लिबिः । तूल निष्कर्षे । तूलिः । तूली कूर्चिका । ५६० भ्रमेः सम्प्रसारणं च । भृमिर्वातः । बाहुलकाद्भ्रमिः । ५६१ क्रमितमिशतिस्तम्भामत इच्च । क्रिमिः । सम्प्रसार-

---

निवासगत्योः, सु गतौ, धृ धारणे एभ्यः क्नसिप् स्यात् जित्वेति । क्नसिपः पित्त्वात् 'ह्रस्वस्य पिति कृती'ति तुक् । एवं क्षित्वा सुत्वेत्यादि । ध्याप्योः सम्प्रसारणं च । ध्यै चिन्तायां, प्यैङ् वृद्धौ, आभ्यां क्नसिप् स्यात्, सम्प्रसारणं चेत्यर्थः । धीवेति । सम्प्रसारणे इकारे 'इल' इति दीर्घः । अदेर्घ च । 'अद भक्षणे' अस्मात्क्नसिप् धकारश्चान्तादेश इत्यर्थः । प्र ईरशदोस्तुट् च । ईर गतौ, शदॢ शातने, आभ्यां प्रे उपपदे क्नसिप् स्यात् तस्य तुडागमश्च । प्रेर्त्वेति । प्र ईर्त्वेति स्थिते आदृगुणः । प्रेर्त्वरीति । 'वनो र चे'ति ङीप्, रश्चान्तादेशः । एवं प्रशस्त्वरीति । सर्वधातुभ्य इन् । सर्वेभ्योऽपि धातुभ्य इन्प्रत्यय इत्यर्थः । पचिरिति । 'डुपचष् पाके, अस्मादिन्प्रत्ययः । नन्वु कोटिरित्यत्र 'गाङ्कुटादिभ्यः' इतीन्प्रत्ययस्य ङित्त्वात्कथं गुण इत्यत्राह-बाहुलकादिति । हृपिषिरुहिवृति । 'हृञ् हरणे, पिष्लृ संचूर्णने, रुह बीजजन्मनि, वृतु वर्तने, विद ज्ञाने, छिदिर् द्वैधीकरणे, कृत संशब्दने' एभ्य इन्प्रत्यय इत्यर्थः । पूर्वसूत्रेणैव सिद्धे इदं वचनम्, 'अच इः' 'इगुपधादि'ति कप्रत्ययः, एतदुभयबाधनार्थम् । हरिरिति । इनि गुणः । 'यमानिलेन्द्रचन्द्रार्कविष्णुसिंहांशुवाजिषु शुकाहिकपिभेकेषु हरिर्ना कपिले त्रिषु' । इत्यमरः । अत्र 'अच इः' प्राप्तः । पेषिरिति । इगुपधात्कः प्राप्तः । इगुपधात्कित् । इञित्यनुवर्तते । अन्येभ्योऽपि इगुपधेभ्यो धातुभ्य इन्प्रत्ययः स्यात्, स च किदित्यर्थः । पूर्वसूत्रे पिषादीनां ग्रहणं कित्त्वाऽभावार्थम् । अत एव पेषिरिति गुणः सिध्यति । कृषिरिति । कित्त्वान्न गुणः । कृष विलेखने धातुः । भ्रमेः सम्प्रसारणं च । 'भ्रमु अनवस्थाने' अस्मादिन् स्यात्, स च कित् सम्प्रसारणं चेत्यर्थः । भृमिरिति । कित्त्वान्न गुणः । नन्वु कथं भ्रमिरित्यत आह—बाहुलकादिति । क्रमितमिशतिस्तम्भामत इच्च । क्रमु पादविक्षेपे, तमु काङ्क्षायां, शतिः स्तम्भश्च सौत्रः, एभ्य इन्स्यात्स च कित् । एषामकारस्य

णानुवृत्तेः कृमिरपि । तिमिर्मत्स्यभेदः । 'शितिर्मेचकशुक्लयोः' । स्तिम्भिः समुद्रः । **५६२ मनेरुच्च** । मुनिः । **५६३ वर्णेर्बलिश्चाऽहिरण्ये** । वर्णिः सौत्रः । अस्य बलिरादेशः । 'करोपहारयोः पुंसि बलिः प्राण्यङ्गके स्त्रियाम् ।' ववयोरैक्यात् वलिः । हिरण्ये तु वर्णिः सुवर्णम् । **५६४ वसिवपियजिराजिव्रजिसविह्निवाशिवादिवारिभ्य इञ्** । 'वासिश्छेदनवस्तुनि' । वापिः । वापी । याजिर्यष्टा । राजिः । राजी । व्राजिर्वीतालिः । सादिः सारथिः । 'निघातिर्लोहघातिनी' । वाशिरग्निः । वादिर्विद्वान् । वारिर्गजबन्धनी । जले तु क्लीबम् । वाहुलकाद्'हारिः पथिकसंहतौ' । **५६५ नहो भश्च** । नाभिः स्यात्क्षत्रिये पुंसि । प्राण्यङ्गे तु स्त्रियाम् । पुंस्यपीति केचित् । **५६६ कृषेर्वृद्धिश्छन्दसि** । कार्षिः । **५६७ श्रः शकुनौ** । शारिः, शारिका । **५६८ कृञ उदीचां कारुषु** । कारिः शिल्पी । **५६९ जनिघसिभ्यामिण्** । जनिर्जननम् । घासिर्भक्ष्यमग्निश्च । **५७० अज्यतिभ्यां च** । आजिः संग्रामः । आतिः पक्षी । **५७१ पादे च** । पदाजिः । पदातिः । **५७२ अशिपणाय्यो रुडायलुकौ च** । अशेरुट् । राशिः पुञ्जः । पणायतेरायलुक् । पाणिः

इकारादेशश्च । कृमिरिति । अत इत्त्वे रूपम् । कृमिरित्यर्थमाह—सम्प्रसारणमित्यनुवृत्तेरिति । सम्प्रसारणेरत्वे च पर्यायेण भवतः, सम्प्रसारणपक्षे इत्त्वस्य फलाऽभावात्, सम्प्रसारणाच्चेति पूर्वरूपे विशेषाऽभावात् । मनेरुच्च । मन ज्ञाने, अस्मादिन्प्रत्ययः, अकारस्य उकारश्चेत्यर्थः । मुनिरिति । किरवान्न गुणः । 'वाचंयमो मुनिः' इत्यमरः । वर्णेर्बलिश्चाऽहिरण्ये । वर्णधातोर्धातुपाठेऽदर्शनादाह—वर्णिः सौत्र इति । अस्मादिन् स्यात् अहिरण्येऽभिधेये, बलिरादेशश्चेत्यर्थः । वसिवपियजिराजि । वस निवासे, डु वप् बीजसन्ताने, यज देवपूजादौ, राज् दीप्तौ, व्रज गतौ, षद्लृ विशरणादौ, हन हिंसागत्योः, वाश्च शब्दे, वह व्यक्तायां वाचि एयन्तः, डु वृ वरणे एभ्य इञ्प्रत्यय इत्यर्थः । वाशिरिति । इञो णित्त्वादुपधावृद्धिः । शेषं स्पष्टम् । नहो भश्च । णह बन्धने, अस्मादिन् स्यात्, हकारस्य भकारश्च । नाभिरिति रूपम् । कृषेर्वृद्धिश्छन्दसि । 'कृष विलेखने' इत्यस्मादिञ् वृद्धिश्चेत्यर्थः । कार्षिरिति । ऋकारस्य आर् वृद्धिः । लोके तु इगुपधात्किदित्यनेन इनि कृषिरित्येव । श्रः शकुनौ । 'शॄ हिंसायां'अस्माच्छकुनौ वाच्ये इञ् स्यात् । शारिरिति । इञो णित्त्वादृवृद्धिः । कृञ उदीचां कारुषु । 'डु कृञ् करणे' अस्मात्कारुषु शिल्पिषु वाच्येषु इञ् स्यात् । कारिः । जनिघसिभ्यामिण् । 'जनी प्रादुर्भावे, घस्लृ भक्षणे' आभ्यामिण् स्यात् । जनिरिति । 'जनिवध्योश्चे'ति निषेधः । अज्यतिभ्यां च । 'अज गतिक्षेपणयोः, अत सातत्यगमने' आभ्यामिण् स्यात् । आजिरिति । इण्युपधावृद्धिः । वीभावस्तु बाहुलकात् । 'समेऽर्यांऽहो रणेऽप्याजिः' इत्यमरः । पादे च । पादशब्दे उपपदे अज अत आभ्यां इण् स्यादित्यर्थः । पदाजिरिति । 'पादस्य

करः। ५७३ **वातेर्डिच्च**। विः पक्षी। स्त्रियां वीत्यपि। ५७४ **प्रे हरतेः कूपे**। प्रहिः कूपः। ५७५ **नौ व्यो यलोपः पूर्वस्य च दीर्घः**। व्येञ इण् स्यात् यलोपश्च नेर्दीर्घः। नीविः। नीवी। वस्त्रग्रन्थौ मूलधने च। ५७६ **समाने ख्यः स चोदात्तः**। समानशब्दे उपपदे ख्या इत्येतस्मादिण् स्यात्, स च डिच्च यलोपश्च। समानस्य तूदात्तः स इत्यादेशश्च। समानं ख्यायते **जनैरिति** सखा। ५७७ **आङि श्रिहनिभ्यां ह्रस्वश्च**। इण् स्यात्स च डित् आङो ह्रस्वश्च। श्रियः पाल्यश्रिकोटयः। 'सर्वे वृत्रासुरेऽप्यहिः'। ५७८ **अच इः**। रविः। पविः। तरिः। कविः। अरिः। अलिः। ५७९ **खनिकष्यजिसर्वसि-वनिसनिध्वनिग्रन्थिचलिभ्यश्च**। खनिः। कषिर्हिंस्रः। अजिः। असिः। वसिर्वस्त्रम्। वनिरग्निः। सनिर्भक्तिर्दानं च। ध्वनिः। ग्रन्थिः। चलिः पशुः। ५८० **वृतेश्छन्दसि**। वर्तिः। ५८१ **भुजेः किच्च**। भुजिः। पृ८२ **कृगृशृप-**

पदाज्यातिगोपहतेषु' इति पदादेशः। अशिपणाभ्यां। अशू व्याप्तौ, पण व्यवहारे आयप्रत्ययान्तः, अशिश्च पणाशिश्च तयोरिति विग्रहः। आभ्यामिण् स्यात्। अनयोर्यथाक्रमं रुडागमः आयप्रत्ययलुक् एतौ स्याताम्। राशिरिति। रुडागमे उपधावृद्धौ च रूपम्। पाणिरिति। इणि आयप्रत्ययस्य लुकि अत उपधाया वृद्धौ रूपम्। वातेर्डिच्च। 'वा गतिगन्धनयोः' अस्मादिण् स्यात् स च डित्, डित्त्वाट्टिलोपः। तदाह—विरिति। 'नगौकोवाजिविकिरविविष्किरपतत्रयः' इत्यमरः। स्त्रियामिति। 'कृदिकारादक्तिन' इति ङीष्। प्रे हरतेः कूपे। प्रपूर्वात् 'हृञ् हरणे' इत्यस्मादिण् स्यात्, स च डिदित्यर्थः। तदाह—प्रहिरिति। डित्त्वाट्टिलोपः। 'पुंस्येषाऽन्धुः प्रहिः कूपः, इत्यमरः। नौ व्यो यलोपः। नावुपपदे व्येञ् संवरणे इत्यस्मादिण् स्यात्, स च डित्, धातुयकारस्य लोपः, उपसर्गेकारस्य दीर्घश्चेत्यर्थः। नीविरिति। व्येञ्धातोरिणि डित्त्वाट्टिलोपे धातुयकारस्य लोपे नेर्दीर्घे च रूपम्। 'स्त्रीकटीवस्त्रबन्धेऽपि नीवी परिपणेऽपि च' इत्यमरः। परिपणं मूलधनम् तदाह—वस्त्रग्रन्थौ मूलधने चेति। समाने ख्यः। समानशब्दे उपपदे 'ख्या प्रकथन' इत्यस्मात् इण् स्यात्। 'स चोदात्त' इत्यत्र 'सः' च उदात्त' इतिच्छेदः। एवं च स च इण् डिदित्यादियलोपश्च। समानस्य तूदात्तः 'स' इत्यादेशश्चेत्यर्थः। समानशब्दस्य सादेशे सख्येति रूपम्। आङि श्रिहनिभ्यां ह्रस्वश्च। आङि उपपदे श्रिञ् सेवायां, हन हिंसागत्योः, आभ्यामिण् स्यात्, स च डित्, आङो ह्रस्वश्चेत्यर्थः। अश्रिः। अहिः। अत्राऽमरोक्तिमाह—स्त्रिय इत्यादिना। अच इः। धातोरित्यस्य विशेषणात्तदन्तविधिः। अजन्ताद्धातोरिप्रत्यय इत्यर्थः। रविरिति। च शब्दे अस्मादिप्रत्ययः। डिदित्यनुवर्तनात् न टिलोपः। पविरिति। पूञ् पवने। खनिकष्यजिसर्वसि। 'खनु अवदारणे, कष हिंसायां, अज गतिक्षेपणयोः, असु क्षेपणे, वस आच्छादने, वन च सम्भक्तौ, ध्वन शब्दे, ग्रन्थ बन्धने, चल कम्पने, एभ्य इप्रत्ययः स्यात्। 'खनिः स्त्रिया-

कुटिभिदिछिदिभ्यश्च । इः कित्स्यात् । किरिर्वराहः । गिरिर्गोत्राऽक्षिरोगयोः । गिरिणा काणः गिरिकाणः । शिरिः शलभो हन्ता च । पुरिर्नगरं राजा नदी च । कुटिः शाला शरीरं च । भिदिर्वज्रम् । छिदिः परशुः । ५८३ **कुडिकम्प्योर्नलोपश्च** । कुडि दाहे, कुडिर्देहः । कपिः । ५८४ **सर्वधातुभ्यो मनिन्** । क्रियत इति कर्म । चर्म । भस्म । जन्म । शर्म । स्थाम बलम् । 'इस्मन्' इति ह्रस्वः । छद्म । सुत्रामा । ५८५ **बृंहेर्नोऽच्च** । नकारस्याऽकारः । 'ब्रह्म तत्त्वं तपो वेदो ब्रह्मा विप्रः प्रजापतिः' । ५८६ **अशिशकिभ्यां छन्दसि** । अश्मा । शक्मा । ५८७ **हृभृधृसृस्तृशृभ्य इमनिच्** । हरिमा कालः । भरिमा कुटुम्बम् । धरिमा रूपम् । सरिमा वायुः । स्तरिमा तल्पम् । शरिमा प्रसवः । ५८८ **जनिमृङ्भ्यामिमनिन्** । जनिमा जन्म । मरिमा मृत्युः । ५८९ **वेञः सर्वत्र** । छन्दसि भाषायां चेत्यर्थः । वेमा तन्तुवायदण्डः । अर्घर्चादिः । सामनी वेमनी इति वृत्तिः ।

माकरः स्यात्' इत्यमरः । अजिरिति । बाहुलकाद्ग्रीभावाऽभावः । वृतेश्छन्दसि । 'वृतु वर्तने' अस्मादिः स्यात् । वर्तिरिति । लघूपधगुणः । भुजेः किच्च । 'भुज पालनाभ्यवहरणयोः' अस्मादिः कित् स्यात् छन्दसि । क्वचिल्लोकेऽपि प्रयुज्यते । कृगृशृपकुटि । 'कृ विक्षेपे, गृ निगरणे, शृ हिंसायां, पृ पालनपूरणयोः, कुट कौटिल्ये, भिदिर् विदारणे, छिदिर् द्वैधीकरणे, एभ्य इप्रत्ययः स्यात्, स च किदित्यर्थः । किरिरिति । 'ऋत इदि'ति इत्वं, रपरत्वम् । 'वराहः सूकरो गृष्टिः कोलः पोत्री किरिः किटिः' इत्यमरः । गिरिरिति । 'अद्रिगोत्रगिरिप्रावा' इत्यमरः । पुरिरिति । 'उदोष्ठ्यपूर्वस्य' इत्युरत्वम् । कुडिकम्प्योर्नलोपश्च । 'कुडि दाहे, कपि चलने', आभ्याम् इः कित्स्यात् । धातोर्नलोपश्चेत्यर्थः । प्रत्ययस्य किरत्वेऽवीदिरित्वान्न नलोपप्राप्तिः अतस्तद्विधानम् । कुडिरिति । किरत्वान्न लघूपधगुणः । कपिरिति । 'कपिप्लवङ्कप्लवगशाखामृगवली-मुखाः' इत्यमरः । सर्वधातुभ्यो मनिन् । सर्वेभ्योऽपि धातुभ्यो मनिन्स्यात् । कर्मेति । डु कृञ् करणे, अस्मान्मनिनि गुणः । चर्मेति । चर गतौ । सुत्रामेति । 'त्रैङ् पालने' सुष्ठु त्रायत इति सुत्रामा । बृंहेर्नोऽच्च । बृंहेः नः अत् इति छेदः । 'बृहि वृद्धौ' अस्माद्मनिन्, नुमा निष्पन्नस्य नकारस्याऽकारश्चेत्यर्थः । ब्रह्मेति । नकारस्याकारे ऋकारस्य यणादेशः । अमरकोशमाह-ब्रह्म तत्त्वं तपो वेद इति । अशिशकिभ्यां छन्दसि । 'अशू व्याप्तौ, शक्लृ शक्तौ' आभ्यां मनिन्स्यादित्यर्थः । अश्मेति । 'पाषाणप्रस्तर-ग्रावोपलाश्मानः शिला दृषत्' इत्यमरः । हृभृधृसृ । 'हृञ् हरणे, डु भृञ् धारणपोषणयोः, धृ धारणे, सृ गतौ, स्तृञ् आच्छादने, शृ हिंसायां' एभ्य इमनिचप्रत्यय इत्यर्थः । हरिमेति । इमनिचि इत्वाविती, धातोर्गुणः । जनिमृङ्भ्यामिमनिन् । 'जन जनने, मृङ् प्राणत्यागे' आभ्यामिमनिन्स्यात्, नित्स्वरो विशेषः । वेञः सर्वत्र । 'वेञ्

५६० **नामन्सीमन्व्योमन्रोमनलोमन्पाप्मन्धामन्**। सर्वे सप्त अमी निपात्यन्ते। म्नायतेऽनेनेति नाम। सिनोतेर्दीर्घः। सीमा। सीमानौ। सीमानः। पक्षे ङाप्। सीमे। सीमाः। व्येऽोऽन्त्यस्योत्वं गुणः। व्योम। रौतेः रोम। लोम। पाप्मा पापम्। धाम परिमाणं तेजश्च। ५६१ **मिथुने मनिः**। उपसर्गक्रियासम्बन्धो मिथुनम्। न तु स्त्रीपुंसौ। स्वरार्थमिदम्। सुशर्मा। ५६२ **सातिभ्यां मनिन्मनिणौ**। स्यतीति साम। सामनी। आत्मा। ५६३ **हनिमशिभ्यां सिकन्**। हंसिका हंसयोषिति। मक्षिका। ५६४ **कोरन्**। कवरः। ५६५ **गिर उडच्**। गरुडः। ५६६ **इन्देः कमिर्नलोपश्च**। इदम्। ५६७ **कायतेर्डिमिः**। किम्। ५६८ **सर्वधातुभ्यः ष्ट्रन्**। वस्त्रम्। अस्त्रम्। शस्त्रम्। 'इस्मन्नि'ति ह्रस्वत्वम्। छादनाच्छस्त्रम्। ५६९ **भ्रस्जिगमिनमिहनिविश्यशां**

तन्तुसन्ताने' अस्मादिमनिन्प्रत्ययः छन्दसि लोके च भवतीत्यर्थः। वेमेति। **'पुंसि वेमा वायदण्डः' इत्यमरः**। नामन्सोमन् व्योमन्। निपात्यन्त इति। **'मनिन्क्वनिप्' इति** शेषः। **निपातनप्रकारमेवाह**—म्नायत इति। **'म्ना अभ्यास' इत्यस्मान्मनिनि धातोर्नामावो निपात्यते। अथवा आदेर्मकारस्य लोपो निपात्यत इत्यर्थः**। सिनोतेरिति। **षिञ् बन्धने, अस्मान्मनिनि धातोर्दीर्घो निपात्यत इत्यर्थः**। पक्षे ङाबिति। **'ङाबुभाभ्यामन्यतरस्या'मित्यनेन**। व्येञ इति। **'व्येञ् 'वरणे' अस्मान्मनिनि एकारस्योत्वं निपातनात्। 'व्योम पुष्करमम्बरम्' इत्यमरः**। रौतेरिति। **रु** शब्दे। लोमेति। **लूञ् छेदने**। पाप्मेति। **'पा पाने' अस्मान्मनिनि पुगागमो निपात्यते**। मिथुने मनिः। **मिथुनशब्दार्थं व्याचष्टे**—उपसर्गक्रियासम्बन्ध इति। **स एवेह विवक्षित इति भावः। एवञ्च सोपसर्गाद्धातोर्मनिप्रत्यय इत्यर्थः। ननु सर्वधातुभ्यो मनिन्सिद्धेति मनिनैव सिद्धे किमर्थं मनिप्रत्ययविधिक्लेश इत्यत आह**—स्वरार्थमिति। **निरुदात्तः मध्योदात्तः स्यादिति भावः**। सातिभ्यां मनिन्मनिणौ। **षो अन्तकर्मणि, अत सातत्यगमने, आभ्यां यथाक्रमं मनिन् मनिण् एतौ स्त इत्यर्थः**। सामेति। **मनिनि 'आदेचः' इत्यात्वम्**। आत्मेति। **मनिणो णित्त्वादुपधावृद्धिः**। हनिमशिभ्यां सिकन्। **'हन हिंसागत्योः, मश शब्दे' आभ्यां सिकनित्यर्थः**। हंसिकेति। मक्षिकेति। **शस्य** छत्वेति षत्वे, **षढोरिति** कत्वम्, **षत्वं च**। कोरन्। **कु** शब्दे अस्मादरन्प्रत्यय इत्यर्थः। कवर इति। **गुण अवादेशः**। गिर उडच्। **गॄ निगरणे, अस्मादुडच् स्यात्। 'गरुत्मान्गरुडस्ताक्ष्यः' इत्यमरः**। इन्देः कमिर्नलोपश्च। **'इदि परमैश्वर्ये' अस्मात्कमिः स्यान्नकारलोपश्चेत्यर्थः**। इदमिति। **सर्वनामशब्दोऽयम्**। कायतेर्डिमिः। **कै** शब्दे, **अस्माड्डिमिप्रत्यय इत्यर्थः। डित्त्वाट्टिलोपः**। अयमपि सर्वादिरेव। सर्वधातुभ्यः ष्ट्रन्। **सर्वेभ्योऽपि धातुभ्यः ष्ट्रन्प्रत्यय इत्यर्थः**। वस्त्रमिति। **वस आच्छादने**। छादनादिति। **'छद अपवारणे' ण्यन्तः**। भ्रस्जिगमिनमि। **'भ्रस्ज पाके, गम्लृ गतौ, णम प्रह्वत्वे शब्दे**

वृद्धिश्च। भ्राष्ट्रः। गान्त्रं शकटम्। नान्त्रं स्तोत्रम्। हान्त्रं मरणम्। वैष्ट्रं पिष्टपम्। आष्ट्रमाकाशम्। ६०० **दिवेर्द्युच्च**। द्यौत्रं ज्योतिः। ६०१ **उषिखनिभ्यां कित्**। उष्ट्रः। खात्रं खनित्रं जलाधारश्च। ६०२ **सिविमुच्योष्टेरू च**। सूत्रम्। मूत्रम्। ६०३ **अमिचिमिदिशसिभ्यः क्त्रः**। आन्त्रम्। चित्रम्। मित्रम्। दित्रम्। शस्त्रम्। ६०४ **पुवो ह्रस्वश्च**। पुत्रः। ६०५ **स्त्यायतेर्ड्रट्**। स्त्री। ६०६ **गुधृवीपचिवचियमिसदिक्षदिभ्यस्त्रः**। 'गोत्रं स्यान्नामवंशयोः'। गोत्रा पृथिवी। धर्त्रं गृहम्। वेत्रम्। पक्त्रम्। वक्त्रम्। यन्त्रम्। सत्त्रम्। क्षत्त्रम्। ६०७ **हुयामाश्रुभसिभ्यस्त्रन्**। होत्रम्। यात्रा। मात्रा। श्रोत्रम्। भस्त्रा। ६०८ **गमेरा च**। गात्रम्। ६०९ **दाद्दिभ्यश्छन्दसि**। दात्रम्। पात्रम्। ६१० **भूवादिगृभ्यो णित्रन्**। भावित्रम्। वादि-

---

च, हन हिंसागत्योः, विश प्रवेशने, अशू व्याप्तौ एभ्यः ष्ट्रन् स्यात्, एषां वृद्धिश्च। भ्राष्ट्र इति। अरुर्द्विषदित्यत्वम्, वृद्धिः। 'क्लीबेऽभ्रवरीषं भ्राष्ट्रो ना' इत्यमरः। दिवेर्द्युच्च। दिवु क्रीडादा, अस्मात्ष्ट्रन् स्यात्, धातोर्द्युदादेशो वृद्धिश्च। द्यौत्रमिति रूपम्। उषिखनिभ्यां कित्। उष दाहे, खनु अवदारणे, आभ्यां ष्ट्रन् कित्स्यात्। उष्ट्र इति। 'उष्ट्रे क्रमेलकमयमहाङ्गाः' इत्यमरः। खात्रमिति। 'अनसनखनां सञ्झलोः' इत्यात्त्वम्। सिविमुच्योष्टेरू च। 'षिवु तन्तुसन्ताने, मुच्लृ मोक्षणे' आभ्यां ष्ट्रन् कित्स्यात्। सूत्रमिति। सिव्धातोः ष्ट्रनि षच्छ्वोरिति वस्य ऊठि, उपधाया ऊकारे, सवर्णदीर्घे रूपम्। ष्ट्रनिति ष्टुत्वसम्पन्नस्य निर्देशः। षस्येत्वे त्रन्निति शिष्यते। मूत्रमिति। टेरूत्वे रूपम्। अमिचिमिदि। 'अम गत्यादिषु, चिञ् चयने, ञि मिदा स्नेहने, शसु हिंसायां,' एभ्यः क्त्रप्रत्यय इत्यर्थः। आन्त्रमिति। 'अनुनासिकस्य क्वी'ति दीर्घः। शेषं स्पष्टम्। पुवो ह्रस्वश्च। पूञ् पवने अस्मात्क्त्रः स्यात्, धातोर्हस्वत्वं च। पुत्र इति। किरवान्न गुणः। स्त्यायतेर्ड्रट्। स्त्यै ष्ट्यै शब्दसङ्घातयोः। अस्माद्ड्रट्। स्त्रीति। डित्त्वाट्टिलोपः। 'लोपो व्योः' इति यलोपः। टित्त्वान्ङीप्। 'स्त्री योषिद्वला योषा नारी सीमन्तिनी वधूः' इत्यमरः। गुधृवीपचि। 'गुङ् अव्यक्ते शब्दे, धृञ् धारणे, वी गतिप्रजननादौ, डु पचष् पाके, वच परिभाषणे, यम उपरमे, षदॢ विशरणादौ, 'क्षदिः सौत्रः' एभ्यस्त्रप्रत्यय इत्यर्थः। गोत्रमिति। त्रे गुणः। 'अद्रिगोत्रगिरिप्रावा' 'सन्ततिर्गोत्रजनन' इति चामरः। सत्त्रमिति। 'सत्त्रमाच्छादने यज्ञे सदादाने धनेऽपि च' इत्यमरः। हुयामा। 'हु दानादनयोः, या प्रापणे, मा माने, श्रु श्रवणे, भस भर्त्सनदीप्त्योः एभ्यस्त्रन्प्रत्यय इत्यर्थः। 'भस्त्रा चर्मप्रसेविका' इत्यमरः। गमेरा च। 'गम्लृ गतौ अस्मात्त्रन्स्यात्, धातोरन्त्यस्य मकारस्य आकारश्चेत्यर्थः। गात्रमिति। दादिभ्यश्छन्दसि। दापृ लवने इत्यादिभ्यस्त्रन्स्यात् छन्दसि। दात्रमिति। 'दात्रं लवित्रमाबन्धः' इत्यमरः। पात्रमिति। 'योग्यभाजनयोः पात्रम्' इत्यमरः। भूवादिगृभ्यो।

त्रम्। गारित्रमोदनम्। ६११ **चरेर्वृत्ते**। चारित्रम्। ६१२ **अशित्रादिभ्य इत्रोत्रौ**। अशित्रम्। वहित्रम्। धरित्री मही। त्रैङ् एवमादिभ्य उत्रः। त्रोत्रं प्रहरणम्। वृञ्, वरुत्रं प्रावरणम्। ६१३ **अमेर्द्विषति चित्**। अमित्रः शत्रुः। ६१४ **आः समिणनिकषिभ्याम्**। सम्पूर्वादिणो निपूर्वात्कषेश्च आः स्यात्। स्वरादित्वादव्ययत्वम्। समया। निकषा। ६१५ **चितेः कणः कश्च**। बाहुलकाद्गुणः। 'चिक्कणं मसृणं स्निग्धम्'। ६१६ **सूचेः स्मन्**। सूक्ष्मम्। ६१७ **पातेर्डुम्सुन्**। पुमान्। ६१८ **रुचिभुजिभ्यां किष्यन्**। रुचिष्यमिष्टम्। भुजिष्यो दासः। ६१९ **वसेस्तिः**। 'वस्तिर्नाभेरधो द्वयोः'। 'वस्तयः स्युर्दशासूत्रे'। बाहुलकात् शासः। शास्तिः राजदण्डः। विन्ध्याख्यमगमस्यतीत्यगस्तिः।

'भू सत्तायां, वद व्यक्तायां वाचि पठ्यन्तः, गृ निगरणे' पठ्यो णित्रन् स्यात्। भावित्रमिति। णित्त्वादृवृद्धिः। वादित्रमिति। 'चतुर्विधमिदं वाद्यं वादित्रातोद्यनामकम्' इत्यमरः। चरेर्वृत्ते। 'चर गता'वस्माण्णित्रन् स्यात् वृत्ते गम्ये। चारित्रमिति। णित्त्वादुपधावृद्धिः। अशित्रादिभ्य इत्रोत्रौ। अशिश्च त्रश्च अशित्रौ, तौ आदी येषामिति विग्रहः। द्वन्द्वान्ते श्रूयमाणस्याऽऽदिशब्दस्य प्रत्येकं योगः। अशित्रादि त्रादि एभ्यः क्रमात् इत्र उत्र इत्येतौ प्रत्ययौ स्तः। अशित्रमिति। 'अशू व्याप्तौ' अस्मादित्रः। वहित्रमिति। 'वह प्रापणे'। धरित्रीति। 'धृञ् धारणे' गौरादित्वान्ङीष्। त्रोत्रमिति। 'त्रैङ् पालने' आत्वे आदुगुणः। अमेर्द्विषति चित्। 'अम गत्यादौ' अस्मात् इत्रः स्यात्, स च चित् शत्रौ वाच्ये। 'द्विड् विपक्षाहितामित्रदस्युशात्रवशत्रवः' इत्यमरः। आः समिण्। सम्पूर्वकः इण् गतौ, निपूर्वकस्तु हिंसार्थकः, आभ्यामाः स्यात्। समयेति। गुणेऽयादेशे रूपम्। 'समयान्तिकमध्ययोः' इत्यमरः। चितेः कणः क च। 'चिती संज्ञाने' अस्मात् कणप्रत्ययः, धातोरन्त्यस्य च ककारादेश इत्यर्थः। अमरकोशमाह—चिक्कणमिति। सूचेः स्मन्। 'सूच पैशुन्ये' चुरादिण्यन्तः, अस्मात्स्मनि णिलोपे कुत्वे चत्वे च सूक्ष्ममिति रूपम्। पातेर्डुम्सुन्। 'पा रक्षणे' अस्माड्डुमसुन्प्रत्ययः। पुमानिति। डुम्सुनो डित्त्वाट्टिलोपः। उकार उच्चारणार्थ इति केचित्। तेषामपीत्संज्ञामन्तरा लोपाऽसम्भवात् उगित्कार्यसिद्धिः, उच्चारणार्थानामपि वर्णानामित्संज्ञालोपाभ्यामेव निवृत्त्यङ्गीकारात्। एतच्च 'दिवऔत्' सूत्रे शेखरे स्पष्टम्। तत्फलं तु सुपुंसीत्यादौ 'उगितश्चेति ङीप्। भाष्ये तु सूतेः सप् प्रसवे पुमानिति व्युत्पादितम्। तत्रेत्थं व्युत्पत्तिः। पूङ् प्राणिगर्भविमोचने अस्मान्मन्प्रत्ययः, धातुसकारस्य षकारः, ऊकारस्य ह्रस्वश्चेत्यर्थः। एतच्च शेखरे हलन्तपुंल्लिङ्गे 'पुंसोऽसुङ्' इति सूत्रव्याख्यावसरे स्पष्टम्। रुचिभुजिभ्यां किष्यन्। 'रुच दीप्तौ, भुज पालनादौ, आभ्यां किष्यञ्प्रत्ययः। रुचिष्यमिति। किस्त्वाच्च लघूपधगुणः। वसेस्तिः। 'वस निवासे' अस्मात् तिप्रत्यय इत्यर्थः। वस्तिरिति। शास्तिरित्यर्थमाह—बाहुलकादिति। 'शासु अनुशिष्टौ'इत्यस्मात् तिप्रत्ययः। अगमिति। पर्वतमित्यर्थः।

शकन्ध्वादिः । ६२० **सावसेः** । स्वस्ति । स्वरादिपाठादव्ययत्वम् । ६२१ **वौ तसेः** । वितस्तिः । ६२२ **पदिप्रथिभ्यां नित्** । पत्तिः । प्रथितिः । 'तितुत्रेष्वग्रहादीनाम्' (वा ४३१३) इतीट् । ६२३ **दृणातेर्ह्रस्वश्च** । दृतिः । ६२४ **कृतॄकृपिभ्यः कीटन्** । किरीटं शिरोवेष्टनम् । तिरीटं सुवर्णम् । कृपीटं कुक्षिवारिणोः । ६२५ **रुचिवचिकुचिभ्यः कितच्** । रुचितमिष्टम् । उचितम् । कुचितं परिमितम् । कुटितं कुटिलम् । ६२६ **कुडिकुषिभ्यां कमलन्** । कुड्मलम् । कुष्मलम् । ६२७ **कुषेर्लश्च** । कुल्मलं पापम् । ६२८ **सर्वधातुभ्योऽसुन्** । चेतः । सरः । पयः । सदः सभा । ६२९ **रपेरत पच्च** । रेपोऽवद्यम् । ६३० **अशेर्देवने युट् च** । देवने स्तुतौ । यशः । ६३१ **उब्जेर्बले बलोपश्च** । ओजः । ६३२ **श्वेः सम्प्रसारणं च** । शवः । शवसी । बलपर्यायोऽयम् । ६३३ **श्रयतेः स्वाङ्गे शिरः किच्च** । श्रयतेः शिर आदेशोऽसुन्

नन्वु कथं तर्हि सवणंदीर्घोऽभाव इत्यत आह—शकन्ध्वादिरिति। **शकन्ध्वादिपररूपस्य सवर्णदीर्घबाधकत्वादिति भावः** । सावसेः । **सावुपपदे 'अस भुवी'त्यस्मात् तिप्रत्यय इत्यर्थः** । **'स्वस्त्याशीः क्षेमपुण्यादौ' इत्यमरः** । **ननु कथं तर्हि सुपोऽश्रवणमित्यत्राह**—स्वरादिपाठादिति । **वौ तसेः** । **वावुपपदे तसु उपक्षये अस्मात्तिः स्यात्** । **'अङ्गुष्ठे सकनिष्ठे स्याद्वितस्तिर्द्वादशाङ्गुलः' इत्यमरः** । पदिप्रथिभ्यां नित् । **पद गतौ, प्रथ प्रख्याने, आभ्यां तिप्रत्ययो नित्स्यादित्यर्थः** । पत्तिरिति । **'पदातिपत्तिपदगपादातिकपदातयः' इत्यमरः** । प्रथितिरिति । **ख्यातिरित्यर्थः** । **ननु 'प्रथिति' रित्यत्र कथमिट्, वलादीट-'इतितुत्रेति' निषेधादित्यत आह**—अग्रहादीति । **अस्य प्रथधातोर्ग्रहादित्वादिति भावः** । दृणातेर्ह्रस्वश्च । **दृ 'विदारणे' अस्मात्तिः स्यात्, धातोर्ह्रस्वत्वं च** । दृतिरिति । **'इतिसीमन्तहरित' इत्यमरः** । कृतॄकृपिभ्यः कीटन् । **'कृ विक्षेपे, तॄ प्लवनतरणयोः, कृपू सामर्थ्ये' एभ्यः कीटन् स्यात्** । किरीटमिति । **किस्वाच्च धातोर्गुणः, किन्तु 'ऋत इद्धातोः' इति इत्त्वम्** । **'किरीटस्तिलवमार्जनौ' इत्यमरः** । रुचिवचिकुचिभ्यः । **'रुच दीप्तावभिप्रीतौ च, वच परिभाषणे, कुच शब्दे,' एभ्यः कितच् स्यात्** । रुचितमिति । **किस्वाच्च गुणः** । उचितमिति । **किस्वात्सम्प्रसारणम्** । **वार्डलकादाह**—कुटितमिति । **क्वचित्तु सूत्र एव पाठः** । कुडिकुषिभ्यां कमलन् । **कुडि दाहे, कुष निष्कर्षे, आभ्यां कमलन्नित्यर्थः** । कुषेर्लश्च । **पूर्वोक्ताद्धातोर्लकारश्चान्तादेश इत्यर्थः** । कुल्मलमिति । **योगविभागाऽज्ञापकं नित्यः । तेन कुष्मलमिति पूर्वोक्तमपि** । सर्वधातुभ्योऽसुन् । चेत इति । **चिती संज्ञाने अस्मादसुनि रूपम्** । **सु गतौ, पीङ् पाने, षदॢ विशरणादौ** । रपेरत पच्च । **रप व्यक्तायां वाचि अस्मादसुन्स्यात्, अकारस्य एकारश्चेत्यर्थः** । अशेर्देवने युट् च । **अशू व्याप्तौ अस्मादसुन् स्याद्धातोर्युडागमश्च** । **देवनं स्तुतिः** । उब्जेर्बले । बलोपश्च । **उब्ज आर्जवे,**

किच्च । शिरः । शिरसी । ६३४ **अर्तेरुच्च** । उरः । ६३५ **व्याधौ शुट् च** । अर्शो गुदव्याधिः । ६३६ **उदके नुट् च** । अर्तेरसुन्स्यात्तस्य च नुट् । अर्णः । अर्णसी । ६३७ **इण आर्गसि** । एनः । एनसी । ६३८ **रिचेर्धने घिच्च** । चात्प्रत्ययस्य नुट् । घित्वात्कुत्वम् । रेक्णः सुवर्णम् । ६३९ **चायतेरन्ने ह्रस्वश्च** । चनो भक्तम् । ६४० **वृङ्शीङ्भ्यां रूपस्वाङ्गयोः पुट् च** । वर्पो रूपम् । शेपो गुह्यम् । ६४१ **स्रुरीभ्यां तुट् च** । स्रोतः । रेतः । ६४२ **पातेर्बले जुट् च** । पाजः । पाजसी । ६४३ **उदके थुट्** । पाथः । ६४४ **अन्ने च** । पाथो भक्तम् । ६४५ **अदेर्नुग्धौ च** । अदेर्भक्ते वाच्येऽसुन्नुमागमो धादेशश्च । अन्धोऽन्नम् । ६४६ **स्कन्देश्च स्वाङ्गे** । स्कन्धः । स्कन्धसी । ६४७ **आपः कर्माख्यायाम्** । कर्माख्यायां ह्रस्वो नुट् च वा । अप्नः । अपः । बाहुलकात् आपः । आपसी । ६४८ **रूपे जुट् च** । अब्जो रूपम् । ६४९ **उदके नुग्भौ च** ।

अस्माद्वलेऽभिधेयेऽसुन् स्यात्, वकारस्य लोपश्चेत्यर्थः । श्वेः सम्प्रसारणं च । 'टु ओ श्वि' गतिवृद्ध्योः । अस्मादसुन्, धातोः सम्प्रसारणं चेत्यर्थः । शव इति रूपम् । श्रयतेः स्वाङ्गे । श्रिञ् सेवाया'मस्मात्स्वाङ्गेऽभिधेयेऽसुन्, धातोः शिर आदेशः, प्रत्ययश्च कित्स्यादित्यर्थः । अर्तेरुच्च । 'ऋ गतौ' अस्मादसुन् कित्स्यात् धातोरुत्वं च । उर इति । रपरत्वम् । व्याधौ शुट् च । अर्तेर्व्याधावभिधेयेऽसुन्स्यात् शुडागमश्चेत्यर्थः । अर्श इति । 'अर्शो रोगयुतोऽर्शसः' इत्यमरः । उदके नुट् च । अर्तेरित्येव । अर्तेरुदके वाच्येऽसुन् स्यात् पापे वाच्ये, तस्य नुडागमश्चेत्यर्थः । रिचेर्धने घिच्च । 'रिचिर् विरेचने' अस्माद्धने वाच्ये असुन्, स च कित्, तस्य नुडागमश्च । रेक्ण इति । 'चजो'रिति कुत्वम्, 'अट्कुप्वा'ङिति णत्वम् । चायतेरन्ने ह्रस्वश्च । 'चायृ पूजानिशामनयोः, अस्मादन्ने वाच्ये असुन्स्यात्, तस्य नुट् धातोर्ह्रस्वत्वं च । चन इति । 'लोपो व्यो'रिति यलोपः । वृङ्शीङ्भ्यां रूपस्वाङ्गयोः । 'वृङ् सम्भक्तौ, शीङ् स्वप्ने' आभ्यां क्रमेण रूपे स्वाङ्गे च वाच्येऽसुन्स्यात्, तस्य पुडागमश्च । शेप इति । असुनि पुकि गुणः । स्रुरीभ्यां तुट् च । स्रु गतौ, रीङ् श्लेषणे, आभ्यामसुन्, तस्य तुडागमश्चेत्यर्थः । पातेर्बले जुट् च । 'पा रक्षणे' अस्माद्बले वाच्येऽसुन् स्यात् तस्य जुडागमश्च बले वाच्ये । उदके थुट् च । पातेरुदके वाच्येऽसुन्स्यात् तस्य थुडागमश्चेत्यर्थः । अन्ने च । अन्ने वाच्येऽपि पातेरसुन् थुडागमश्चेत्यर्थः । अदेर्नुग्धौ च । 'अद भक्षणे' अस्मादसुन् स्यात् । अन्ध इति । 'भिस्सा स्त्री भक्तमन्धोऽन्नम्' इत्यमरः । स्कन्देश्च स्वाङ्गे । 'स्कन्दिर् गतिशोषणयोः' अस्मात्स्वाङ्गवाच्येऽसुन्, धातोश्चान्तादेशः धः । स्कन्धः । आपः कर्माख्यायाम् । आप्लृ व्याप्तौ अस्मात्कर्माख्यायामसुन् धातोर्ह्रस्वश्च । प्रत्ययस्य नुगागमस्तु न भवतीत्यर्थः । बाहुलकादिति । धातोर्ह्रस्वो नेत्यर्थः । रूपे जुट् च । रूपे वाच्ये आप्नो-

अम्भः । ६५० नहेर्दिवि भश्च । नभः । ६५१ इण आगोऽपराधे च । 'आगः पापाऽपराधयोः' । ६५२ अमेर्हुक्च । अंहः । ६५३ रमेश्च । रंहः । ६५४ देशे ह च । रमन्तेऽस्मिन् रहः । ६५५ अञ्च्यञ्जियुजिभृजिभ्यः कुश्च । एभ्योऽसुन्कवर्गश्चान्तादेशः । 'अङ्कश्चिह्नशरीरयोः' अङ्गः पक्षी । योगः समाधिः । भर्गस्तेजः । ६५६ भूरञ्जिभ्यां कित् । भुवः । रजः । ६५७ वसेर्णित् । वासो वस्त्रम् । ६५८ चन्देरादेश्च छः । छन्दः । ६५९ पचिवचिभ्यां सुट् च । 'पक्षसी तु स्मृतौ पक्षौ' । वक्षो हृदयम् । ६६० वहिहाधाभ्यश्छन्दसि । वक्षाः अनड्वान् । हासाश्चन्द्रः । धासाः पवत इति प्राचः । वस्तुतस्तु णिदित्यनुवर्तते, न तु सुट् । तेन वहेरुपधावृद्धिः । इतरयोः 'आतो युक्—' (सू २७६१) इति युक् । 'शोणा धृष्णू नृवाहसा' । 'श्रोता हवं गृणतः स्तोमवाहाः' । 'विश्वो विहायाः' । 'वाजम्भरो विहायाः' । 'देवो नयः पृथिवीं विश्वधायाः' ।

तेरसुन्, धातोर्ह्रस्वः, प्रत्ययस्य जुडागमश्चेत्यर्थः । अञ्ज इति । 'झलां जश् झशी'ति ककारः । उदके नुम् भौ च । उदके वाच्ये आप्लृधातोरसुन्, नुमागमो ह्रस्वत्वं भकाररश्चान्तादेश इत्यर्थः । नहेर्दिवि भश्च । 'णह बन्धने' अस्मादुगगने वाच्येऽसुन्, भकाररश्चान्तादेशः । नभ इति । हकारस्य भकारः । इण आगोऽपराधे च । 'इण् गता'वित्यस्मादसुन् स्यात् अपराधे वाच्ये धातोरागादेशश्च । 'पापापराधयोरागः' इत्यमरः । अमेर्हुक्च । 'अम गत्यादिषु' अस्मादसुन् हुगागमश्च धातोः स्यात् । 'अंहो दुरितदुष्कृतम्' इत्यमरः । रमेश्च । 'रमु क्रीडादौ' अस्मादसुम्प्रत्ययो, हुगागमश्चेत्यर्थः । देशे ह च । रमेरित्येव । रमतेर्देशे वाच्येऽसुन् हकाररश्चान्तादेश इत्यर्थः । अञ्च्यञ्जियुजि । 'अञ्चु गतिपूजनयोः, अञ्जु व्यक्तिम्रक्षणकान्तिगतिषु, युजिर् योगे, भृजि भर्जने, एभ्योऽसुन्स्यात्कवर्गश्चान्तादेश इत्यर्थः । भूरञ्जिभ्यां कित् । भू सत्तायां, रज रागे, आभ्यामसुन्कित्स्यात् । भुव इति । किस्वाच्च गुणः, उवङ् । रज इति । 'अनिदिता'मिति नलोपः । वसेर्णित् । 'वस आच्छादने' अस्मादसुन् णित्स्यात् । वास इति । णित्त्वादुपधावृद्धिः । 'वस्त्रमाच्छादनं वासः' इत्यमरः । चन्देरादेश्च छः । 'चदि आह्लादने' अस्मादसुन् प्रत्ययश्छकारादेशश्च । पचिवचिभ्यां सुट् च । 'डु पचष् पाके' 'वच परिभाषणे' आभ्यामसुन्स्यात्तस्य सुडागमश्च । पक्ष इति । चस्य कुत्वे सस्य षत्वम् । वहिहाधाभ्यश्छन्दसि । 'वह प्रापणे, ओ हाक् त्यागे, डु धाञ् धारणादौ' एभ्य असुन्स्यात् । वक्षा इति । अत्वसन्तस्येति दीर्घः । सुडागमे ह्रस्य ढत्वे ढोरिति कत्वे षत्वमिति भावः । इति प्राच इति । प्राच्ह्यस्वरसद्योतनाय । तथाहि उक्तोदाहरणानि हि लोके न दृश्यन्ते, छन्दस्येव एतत्सूत्रप्रवर्तनात्, वेदे तु मदुक्तरीत्यैव दृश्यते इत्याह—वस्तुतस्त्विति । णिदित्यनुवर्तत इति । 'वसेर्णि'दित्यतः । उपधावृद्धिरिति । असुनो णित्त्वादिति

'अधारयत्पृथिवीं विश्वधायसम्'। 'धर्णसं भूरिधायसम्' इत्यादि। ६६१ इण आसिः। अयाः वह्निः। स्वरादिपाठादव्ययत्वम्। ६६२ **मिथुनेऽसिः पूर्ववच्च सर्वम्**। उपसर्गविशिष्टो धातुर्मिथुनं, तत्रासुनोऽपवादोऽसिः स्वरार्थः। यस्य धातोर्यत्कार्यम् असुन्प्रत्यये उक्तं तदत्रापि भवतीत्यर्थः। अशेर्देवने युट् चेत्यादि। सुयशाः। ६६३ **नञि हन एह च**। अनेहाः। अनेहसौ। ६६४ **विधाञो वेध च**। विदधातीति। वेधाः। ६६५ **नुवो धुट् च**। नोधाः ऋषिः। ६६६ **गतिकारकोपपदयोः पूर्वपदप्रकृतिस्वरत्वं च**। असिः स्यात्। सुतपाः। जातवेदाः। 'गतिकारकोपपदात्कृत्' (सू० ३८७३) इत्युत्तरपदप्रकृतिस्वरत्वे सति शेषस्यानुदात्तत्वे प्राप्ते तदपवादार्थमिदम्। ६६७ **चन्द्रे मो डित्**। चन्द्रोपपदान्माङोऽसिः स्यात्, स च डित्। चन्द्रमाः। ६६८ **वयसि धाञः**। वयोधास्तरुणः। ६६९ **पयसि च**। पयोधाः समुद्रो मेघश्च। ६७० **पुरसि च**। पुरोधाः। ६७१ **पुरूरवाः**। पुरुशब्दस्य दीर्घो रौतेरसिश्च निपात्यते। ६७२ **चक्षेर्बहुलं**

भावः। युक्तिं रूपमाह—विश्वो विहाया इति। इण आसिः। **इण् गतावस्मादासिः स्यात्**। अया इति। गुणे **अयादेश इति भावः**। मिथुनेऽसिः। **मिथुनशब्दार्थमाह**—उपसर्गविशिष्टो धातुर्मिथुनमिति। **तथाच सोपसर्गादसुधातोः असिप्रत्यय इत्यर्थः**। पूर्ववदिति। **अशेर्देवने स्तुतौ युडित्यर्थः**। सुयशा इति। **असुनोऽपवादोऽसिः**। नञि हन एह च। **नञ्युपपदे हन हिंसागत्योरित्यस्मादसिप्रत्ययः धातोरेहादेशश्चेत्यर्थः**। विधाञो वेध च। **विपूर्वात् डु धाञ् धारणपोषणयोः इत्यस्मात् असिः स्यात् वेधादेशश्चेत्यर्थः**। **अयमादेशः सोपसर्गधातोः**। वेधा इति। **'विष्णौ च वेधास्त्वी स्वाशीः' इत्यमरः**। नुवो धुट् च। णु स्तुतौ **अस्मादसिः स्यात्, तस्य नुडागमश्च**। नोधा इति। **धातोर्गुणः**। गतिकारकोपपदयोः पूर्वपदप्रकृतिस्वरत्वं च। **गतौ कारके चोपपदे धातोरसिः स्यात्**। सुतपा इति। **साधुपपदे तप सन्तापे इत्यस्मादसिः**। जातवेदा इति। **जातशब्दे कर्मकारके उपपदे विद ज्ञाने इत्यस्मादसिः। पूर्वपदप्रकृतिस्वरविधानस्य कृत्यमाह**—गतिकारकोपपदादिति। चन्द्रे मो डित्। **चन्द्रशब्दे उपपदे माङ् माने इत्यस्मादसिः स्यात्स च डिदित्यर्थः**। डित्त्वफलं तु चन्द्रमसावित्यादौ टिलोपः। वयसि धाञः। **वयशब्दे उपपदेऽपि 'डु धाञ् धारणपोषणयो'रित्यस्मादसिप्रत्ययः**। वयोधा इति। स्तोत्वादि। पयसि। **पयशब्दे उपपदेऽपि धाञोऽसिप्रत्ययः, स च डिदित्यर्थः**। पुरसि च। **पुरशब्दे उपपदेऽपि धाञः असिप्रत्ययः, स च डिदित्यर्थः**। **'पुरोधास्तु पुरोहितः' इत्यमरः**। पुरूरवाः। **इत्थं निपात्यत इत्यर्थः**। निपातनमेवाह—पुरुशब्दस्येति। पुरून् रौतीति विग्रहः। रु शब्दे **अस्मादसिः, गुणावादेशौ, पूर्वपदस्य दीर्घश्चेत्यर्थः**। **'अलोऽन्त्यस्ये'ति भावः**। **'पुरूरवा बुधसुतो राजर्षिश्च पुरूरवाः' इत्यमरः**। चक्षेर्बहुलं

शिच्च । नृचक्षाः । ६७३ उषः कित् । उषः । ६७४ दमेरुनसिः । 'सप्तार्चि-र्दमुनाः'। ६७५ अङ्गतेरसिरिरुडागमश्च । अङ्गिराः। ६७६ सर्तेरप्पूर्वादसिः। अप्सराः । प्रायेणायं भूम्नि । अप्सरसः । ६७७ विदिभुजिभ्यां विश्वे । विश्व-वेदाः । विश्वभोजाः । ६७८ वशेः कनसिः । सम्प्रसारणम् । उशनाः ।

इत्युणादिषु चतुर्थः पादः ॥

अथ उणादिषु पञ्चमः पादः ॥

६७९ अदि भुवो डुतच् । अद्भुतम् । ६८० गुधेरूमः । गोधूमः । ६८१ मसेरूरन् । मसूरः । प्रथमे पादे असेरुन्, 'मसेश्च' इत्यत्र व्याख्यातः । ६८२ स्थः किच्च । स्थूरो मनुष्यः । ६८३ पातेरतिः । पातिः स्वामी । सम्पातिः पक्षिराजः । ६८४ वातेर्नित् । 'वातिरादित्यसोमयोः'। ६८५ अर्तेश्च । अरति-र्द्वेगः । ६८६ तृहेः क्नो हलोपश्च । तृणम् । ६८७ वृञ्लुटितनिताडिभ्य

शिच्च । 'चक्षिङ् व्यक्तायां वाचि' अस्मादसिः स्यात्, स च बहुलं शिदित्यर्थः । नृच-क्षा इति । नृशब्दे उपपदे चक्षिङ्धातोरसिः । तस्य च शिरत्वेन सार्वधातुकत्वात् चक्षि-ङः ख्याञिति ख्याञादेशो न । उषः कित् । 'उष दाहे' अस्मादसिः स्यात्, स च कित् । उष इति । कित्त्वान्न लघूपधगुणः । 'प्रत्यूषोऽहर्मुखं कल्यमुषः प्रत्युषसी अपि' इत्यमरः । दमेरुनसिः । दम उपशमे अस्मादुनसिप्रत्यय इत्यर्थः। 'सप्तार्चिर्दमुनाः शुक्रः' इत्यमरः। अङ्गतेरसिरिरुडागमश्च। अगिधातोरसिप्रत्ययः, इरुडागमश्चेत्यर्थः। अङ्गिरा ऋ-षिभेदः । सर्तेरप्पूर्वादसिः । 'सृ गतौ' अस्मादप्पूर्वात् असिप्रत्यय इत्यर्थः । अप्सरा इति । असिप्रत्यये धातोर्गुणः । विदिभुजिभ्यां विश्वे । 'विद ज्ञाने, भुज पालनाभ्यवहरणयोः' आभ्यां विश्वशब्दे उपपदेऽसिः स्यात् । सूत्रे विश्वे इति शब्दस्वरूपपरत्वेन सर्वार्थवा-चकत्वाऽभावान्न ङिमन्नादेशः । विश्वं वेत्तीति विश्ववेदाः । वशेः कनसि । 'वश कान्तौ' अस्मात्कनसिप्रत्यय इत्यर्थः । सम्प्रसारणमिति । कित्त्वादिति भावः । 'उश-ना भार्गवः कविः' इत्यमरः । इत्युणादिषु चतुर्थः पादः ।

अथ पञ्चमः पादः । अदि भुवो डुतच् । भू सत्तायामस्मादाकल्मिकार्थे 'अदू' इत्यव्यये उपपदे डुतच्प्रत्यय इत्यर्थः । डित्त्वाट्टिलोपः । अदूभुतम् । गुधेरूमः । 'गुध परिवेष्टने' अस्मादूमप्रत्ययः । गोधूम इति । ह्रस्वपूधगुणः । मसेरूरन् । 'मसी परिणामे' अस्मादूरन्प्रत्यय इत्यर्थः । 'मङ्कयको मसूरोऽथ मङ्कष्टकमयुष्टकौ' इत्य-मरः । स्थः किच्च । 'ष्ठा गतिनिवृत्तौ' अस्मादूरन् कित्स्यात् । स्थूर इति । कित्त्वादातो लोपः । पातेरतिः । 'पा रक्षणे' अस्मादतिः स्यात् । वातेर्नित् । 'वा गतिगन्धनयो'रस्मादतिः स्यात्, स च नित् । अर्तेश्च । 'ऋ गतौ' अस्मादतिः स्यात्, स च नित् । तृहेः क्नो हलोपश्च । 'तृह हिंसाया'मस्मात्क्नः स्यात्, हकारस्य लोपश्च । तृणमिति ।

उचच् तण्डश्च। ब्रियन्ते लुठ्यन्ते तन्यन्ते ताड्यन्त इति वा तण्डुलाः। ६८८ **दंसेष्टनौ न आ च।** 'दासः सेवकशूद्रयोः'। ६८९ **दंशेश्च।** दाशो धीवरः। ६९० **उदि चेर्डैसिः।** स्वरादिपाठादव्ययत्वम्। उच्चैः। ६९१ **नौ दीर्घश्च।** नीचैः। ६९२ **सौ रमेः क्तौ दमे पूर्वपदस्य च दीर्घः।** रमेः सुपूर्वाद्दमे वाच्ये क्तः स्यात्। कित्त्वादनुनासिकलोपः। सूरत उपशान्तो दयालुश्च। ६९३ **पूञो यण्णुग्घ्रस्वश्च।** यत्प्रत्ययः। पुण्यम्। ६९४ **स्रंसेः शिः कुट् किच्च।** स्रंसतेः शिरादेशो यत्प्रत्ययः कित्तस्य कुडागमश्च। शिक्यम्। ६९५ **अर्तेः क्युरुच्च।** उरणो मेषः। ६९६ **हिंसेरीरन्नीरचौ।** 'हिंसीरो व्याघ्रदुष्टयोः'। ६९७ **उदि दृणातेरजलौ पूर्वपदान्त्यलोपश्च।** उदरम्। ६९८ **डित्खनेर्मुट् स चोदात्तः।** अजलं च डित् स्याद्धातोर्मुट्, स चोदात्तः। मुखम्। ६९९ **अमेः सन्।** अंसः। ७०० **मुहेः खो मूर्च।** मूर्खः। ७०१ **नहेर्हलोपश्च।** नखः। ७०२

क्तस्य कित्त्वादगुणाऽभावः। वृल्लुठितनिताडिभ्यः। 'वृञ् वरणे, लुठ विलोडने, तनु विस्तारे, तड् आघाते' एभ्य उलच् स्यात्, धातोस्तण्डादेशश्चेत्यर्थः। दंसेष्टनौ न आ च। दंसि सेवने, अस्मात् टनौ स्याताम्, धातोर्नकारस्याकारश्चेत्यर्थः। दंशेश्च। 'दंश दशने' अस्मादपि टनौ स्यातां, नकारस्याऽऽकारश्च। दाश इति। 'कैवर्ते दाशधीवरौ' इत्यमरः। पूर्वसूत्रेऽस्मिन्सूत्रे च टनो विधिरादुदात्तत्वाय। उदि चेर्डैसिः। उदि उपपदे, चिञ् चयने, इत्यस्माद्डैसिरित्यर्थः। उच्चैरिति। डित्त्वाट्टिलोपः। नौ दीर्घश्च। नावुपपदे चिञो डैसिः उपसर्गस्थस्येकारस्य दीर्घश्चेत्यर्थः। नीचैरिति। डित्त्वाट्टिलोपः। सौ रमेः क्तौ दमे। सावुपपदे रमु क्रीडायामित्यस्माद्दमे वाच्ये क्तः स्यात्पूर्वपदस्य सोरन्त्यस्य दीर्घश्चेत्यर्थः। कित्त्वादिति। 'अनुदात्तोपदेशवनती'त्यादिना। पूञो यण्णुक्। 'पूञ् पवने' अस्माद्यत्प्रत्ययः णुगागमो ह्रस्वश्च। पुण्यमिति। 'स्याद्धर्मशक्तिपुण्यम्' इत्यमरः। स्रंसेः शिः कुट् किच्च। 'स्रंसु ध्वंसु अधःपतने' अस्माद्यत्प्रत्ययः, स च कित्, तस्य कुडागमः, धातोः शिः सर्वादेशश्च। शिक्यमिति। 'भारयष्टिस्तदाख्यिं शिक्यं काचोऽथ पादुका' इत्यमरः। अर्तेः क्युरुच्च। 'ऋ गतौ' अस्मात्क्युप्रत्ययः, धातोरकारादेशश्चेत्यर्थः। उरण इति। उरवं रपरत्वम्। 'युवोरनाकावित्यनादेशे 'रषाभ्या'मिति णत्वम्। 'अट्कुप्वाङिति' तु एतत्सूत्रस्थैव प्रवृत्युपपादकम्। हिंसेरीरन्नीरचौ। 'हिंसि हिंसाया'मस्मात् ईरन् ईरच् इति प्रत्ययौ स्तः, स्वरे भेदः। उदि दृणातेरजलौ। ऊदि उपपदे द विदारणे इत्यस्मादच् अल् इति प्रत्ययौ स्तः, उदो दकारस्य लोपश्चेत्यर्थः। उदरमिति। अजलोः स्वरे भेदः। धातोर्गुणः। डित् खनेर्मुट्। अजलावित्यनुवर्तते। 'खनु अवदारणे' अस्मादच् अल् इति प्रत्ययौ स्तः, तौ च डितौ, धातोर्मुडागमश्चेत्यर्थः। मुखमिति। डित्त्वाट्टिलोपः।

शोङो ह्रस्वश्च। शिखा। ७०३ **माङ ऊखो मय् च**। मयूखः। ७०४ **कलिगलिभ्यां फगस्योच्च**। कुल्फः शरीरावयवो रोगश्च। गुल्फः पादग्रन्थिः। ७०५ **स्पृशेः श्वण्शुनौ पृ च**। श्वण्शुनौ प्रत्ययौ। पृ इत्यादेशः। पार्श्वम्। 'पार्श्वोऽस्त्री कक्षयोरधः'। पर्शुरायुधम्। ७०६ **श्मनि श्रयतेर्डुन्**। श्मञ्छब्दो मुखवाची। मुखमाश्रयत इति श्मश्रुः। ७०७ **अश्रुवादयश्च**। अश्रु नयनजलम्। ७०८ **जनेष्ट्रन्लोपश्च**। जटा। ७०९ **अन्तस्य जङ्घ च**। तस्य जनेर्जङ्घादेशः स्यादच। जङ्घा। ७१० **हन्तेः शरीरावयवे द्वे च**। जघनम्। 'पश्चान्नितम्बः स्त्रीकटयाः क्लीबे तु जघनं पुरः'। ७११ **क्लिशेरन् लो लोपश्च**। लकारस्य लोपः। केशः। ७१२ **फलेरितजादेश्च पः**। पलितम्। ७१३ **कृञादिभ्यः संज्ञायां वुन्**। करकः। करका। कटकः। नरकम्। करकम्। नरकः। 'नरको नारकोऽपि च'

अमेः सन्। अम गत्यादिषु अस्मात्सन्प्रत्यय इत्यर्थः। अंस इति। 'स्कन्धो भुजशिरोंऽसोऽस्त्री' इत्यमरः। मुहेः खो मूर्च। मुह वैचित्त्ये अस्मात्खप्रत्ययः धातोर्मूरादेशश्च। नहेर्हलोपश्च। 'णह बन्धने' अस्मात्खप्रत्ययः, हकारस्य लोपश्चेत्यर्थः। शीङो ह्रस्वश्च। शीङ् स्वप्ने अस्मात्खप्रत्ययः धातोर्ह्रस्वश्चेत्यर्थः,। शिखेति। ह्रस्वविधानसामर्थ्यान्न गुणः। माङ ऊखो। 'माङ् माने' अस्मादूखप्रत्ययः, धातोर्मयादेशश्चेत्यर्थः। मयूख इति। 'मयूखस्त्विट्करज्वालास्त्वलिबाणौ शिखीमुखौ' इत्यमरः। कलिगलिभ्यां फगस्योच्च। कल शब्दसंख्यानयोः, गल अदने, आभ्यां फक् स्यात्, अकारस्योकारश्चेत्यर्थः। गुल्फ इति। 'तद्ग्रन्थौ घुटिके गुल्फौ' इत्यमरः। स्पृशेः श्वण्शुनौ पृ च। 'स्पृश संस्पर्शे' अस्मात् श्वण् शुन् स्यातां, धातोः पृ आदेशश्च। पार्श्वमिति। श्वणो णित्त्वादृवृद्धिः। श्मनि श्रयतेर्डुन्। 'श्रिञ् सेवाया'मस्मात् मुखवाचिनि श्मन्शब्दे उपपदे डुन्प्रत्ययः। श्मश्रु इति। श्मनो नस्य लोपः, डित्त्वात् श्रिञ इकारस्य लोपः। 'तद्वृद्धौ श्मश्रु पुंमुखे' इत्यमरः। अश्रुवादयश्च। निपात्यन्त इति शेषः। अश्रु इति। 'अशू व्याप्तौ' अस्मात् रुप्रत्ययः। जनेष्ट्रन् लोपश्च। 'जनी प्रादुर्भावे' अस्माट्टन्प्रत्ययः स्यात्, धातोरन्त्यनकारस्य लोपश्च। अच् तस्य जङ्घ च। तस्येत्यर्थमाह—जनेरिति। जनेः अच्प्रत्ययः धातोर्जङ्घा-शरश्चेत्यर्थः। 'अजाद्यतष्टाप्'। हन्तेः शरीरावयवे। शरीरावयवे वाच्ये हन्तेरप्रत्ययः धातोर्द्वित्वं चेत्यर्थः। जघनमिति। 'हो हन्ते'रिति कुत्वम्, 'अभ्यासाच्चे'ति वा। अमरोक्तिमाह—पश्चान्नितम्ब इति। क्लिशेरन् लो लोपश्च। 'क्लिशू विबाधने' अस्मादन् स्यात्, शकारस्य लोपश्चेत्यर्थः। फलेरितजादेश्च पः। फल निष्पत्तौ अस्मादितप्रत्ययः आदेः फकारस्य पकारादेशश्चेत्यर्थः। पलितमिति। 'पलितं जरसा शौक्ल्यम्' इत्यमरः। कृञादिभ्यः संज्ञायां वुन्। 'डु कृञ् करणे' इत्यादिभ्यः संज्ञायां वुन्स्यात्। करक इति।

इति द्विरूपकोशः। सरकं गगनम्। कोरकः। कोरकं च। ७१४ **चीकयतेराद्यन्तविपर्ययश्च**। कीचको वंशभेदः। ७१५ **पचिमच्योरिच्चोपधायाः**। पेचकः। मेचकः। ७१६ **जनेररष्ठ च**। जठरम्। ७१७ **वचिमनिभ्यां चिच्च**। वठरो मूर्खः। 'मठरो मुनिशौण्डयोः'। विदादित्वान्माठरः। गर्गादित्वान्माठर्यः। ७१८ **ऊर्जि दृणातेरलचौ पूर्वपदान्तलोपश्च**। 'ऊर्दरः शूररक्षसोः'। ७१९ **कृदरादयश्च**। कृदरः कुसूलः। सुदरं विलसत्। सुदरः सर्पः। ७२० **हन्तेर्युन्नाद्यन्तयोर्घत्वतत्वे**। घातनो मारकः। ७२१ **क्रमिगमिक्तमिभ्यस्तुन्वृद्धिश्च**। क्रान्तुः पक्षी। गान्तुः पथिकः। क्षान्तुर्मशकः। ७२२ **हर्यतेः कन्यन्हिरच्**। कन्यन्प्रत्ययः। हिरण्यम्। ७२३ **कृञः पासः**। कर्पासः। बिल्वादित्वात्कार्पासं वस्त्रम्। ७२४ **जनेस्तु रश्च**। जन्तुर्हस्ती योनिश्च। ७२५ **ऊर्णोतेर्डः**। ऊर्णा। ७२६ **दधातेर्यन् नुट् च**। धान्यम्। ७२७

'युवोरनाकौ'वित्यकादेशः 'कमण्डलौ च करकः' इत्यमरः। कटक इति। कटे वर्षावरणयोः अस्मादूवुन्। 'भूभृन्नितम्बवलयचक्रेषु कटकोऽस्त्रियाम्' इत्यमरः। चीकयतेराद्यन्तविपर्ययश्च। **'चीक आमन्त्रणे'** अस्मात्संज्ञायां वुन् स्यात्, धातोराद्यन्तवर्ण्योः विपर्ययचेत्यर्थः। **'कीचका वेणवस्ते स्युर्ये स्वनन्त्यनिलोद्धताः'** इत्यमरः। दैर्घ्यभेदे च। पचिमच्योरिच्चोपधायाः। **डु पचष् पाके, मच कल्कने** आभ्यां वुन्स्यात्, उपधाया इकारादेशश्च। पेचक इति। उपधाया इकारे लघूपधगुणे च रूपम्। **'उलूके करिणः पुच्छमूलोपान्ते च पेचकः'** इत्यमरः। जनेरष्ठ च। **'जनी प्रादुर्भावे'** अस्मादरप्रत्ययः, धातोष्ठकारश्चान्तादेशः। **'जठरः कठिनेऽपि स्यात्'** इत्यमरः। वचिमनिभ्यां चिच्च। वच परिभाषणे, मन ज्ञाने, आभ्यामरप्रत्ययः स्यात्, स च चित्, ठकारश्चान्तादेशः। ऊर्जिदृणातेरलचौ पूर्वपदान्त्यलोपश्च। **ऊर्क् शब्दे, दृ विदारणे'** इत्यस्मादलचौ प्रत्ययौ स्तः, पूर्वपदान्त्यवर्णस्य लोपश्च। ऊर्दर इति। पूर्वपदान्त्यस्य लोपे धातोर्गुणे च रूपम्। कृदरादयश्च। एते निपात्यन्ते। कृदर इति। कृ इत्यस्मात्पूर्वकृदधातोरालप्रत्यये रूपम्। एवं सुपूर्वकात्सुदर इति। हन्तेर्युन्नाद्यन्तयोर्घत्वतत्वे। **'हन हिंसागत्योः'** अस्माद्युन् स्यात्, आद्यन्तयोर्हकारनकारयोर्यथासंख्यं घकारतकारौ स्तः। क्रमिगमिक्तमि। **'क्रमु पादविक्षेपे, गम्लृ गतौ, क्षमूष् सहने'** एभ्यः तुन्स्यात्, वृद्धिश्च। हर्यतेः कन्यन् हिरच्। **'हर्य गतिकान्त्योः** अस्मात्कन्यन्प्रत्ययः, प्रकृतेर्हिरजित्यर्थः। हिरचि चकार इत्संज्ञकः, अकार उच्चारणार्थः। हिरण्यमिति। क्विस्वाच्च लघूपधगुणः। कृञः पासः। डु कृञ् करणे अस्मात्पासप्रत्यय इत्यर्थः। कर्पास इति। धातोर्गुणः। जनेस्तु रश्च। **'जन जनने'** अस्मात्तप्रत्ययः रेफश्चान्तादेश इत्यर्थः। जन्तुरिति। नकारस्य रेफादेशः। ऊर्णोतेर्डः। **'ऊर्णुञ् आच्छादने'** अस्माद्डप्रत्यय इत्यर्थः।

जीर्यतेः किन् रश्च वः। 'जिन्निः स्यात्कलपक्षिणोः'। बाहुलकात् 'हलि च' (सू० ३५४) इति दीर्घो न। **७२८ मन्यतेर्यलोपो मश्चाऽपतुट् चालः**। मन्यतेरालप्रत्ययः स्यात्तस्यापतुडागमो धातोर्यलोपो मकारश्चान्त्यस्य। ममापताले विषये। **७२९ ऋजेः कीकन्**। ऋजीक इन्द्रो धूमश्च। **७३० तनोतेर्डउः सन्वच्च**। 'तितउः पुंसि क्लीबे च'। **७३१ अर्भकपृथुकपाका वयसि**। 'ऋधु वृद्धौ'। अतो वुन्। भकारश्चान्तादेशः। प्रथेः कुकन्सम्प्रसारणं च। पिबतेः कन्। **७३२ अवद्याऽवमाऽधमाऽर्वरेफाः कुत्सिते**। वदेर्नञि यत्। अवद्यम्। अवतेरमः। वस्य पक्षे धः। अवमः। अधमः। अर्तेर्वन्। अर्वा। रिफतेरौणादिकात् अः। रेफः। **७३३ लीरीडोर्ह्रस्वः पुट् च तरौ श्लेषणकुत्सनयोः**। तरौ प्रत्ययौ क्रमात्स्तो, धातोर्ह्रस्वः, प्रत्ययस्य पुट्। लिसं श्लिष्टम्। रिप्रं कुत्सितम्। **७३४ क्लिशेरीच्चोपधायाः कन्लोपश्च लो नाम् च**।

डित्त्वाट्टिलोपः। 'ऊर्णा मेषादिलोम्नि स्यादावर्तः पान्तरा भ्रुवोः' इत्यमरः। दधातेर्यन्नुट् च। **'डु धाञ् धारणपोषणयोः'** अस्माद्यत्प्रत्ययः तस्य नुडागमश्च। जीर्यतेः क्रिन् रश्च वः। **'जॄ वयोहानौ,** अस्मात्क्रिन् स्यात्, धातोः रेफस्य वकारादेशश्चेत्यर्थः। जिन्निरिति। क्रिनि **'ऋत इद्धातोः'** इति इत्वे रपरत्वे रेफस्य वत्वे च रूपम्। मन्वत्र **'हलि चे'**ति दीर्घो दुर्वार इत्यत आह—बाहुलकादिति। मन्यतेर्यलोपो। **'मन्थ बन्धने'** अस्मादलप्रत्ययः स्यात्, तस्यापतुडागमः, धातोर्यलोपः, परिशिष्टान्त्यस्य वकारस्य मकारश्चेत्यर्थः। ममापताल इति। ऋजेः कीकन्। **'ऋज गतौ'** अस्मात्कीकन्स्यात्। ऋजीक इति। **किन्वाच्च गुणः**। तनोतेर्डउः सन्वच्च। **'तनु विस्तारे'** अस्माद्डुउप्रत्ययः, स सन्वच्च भवति। तितउरिति। डउप्रत्ययस्य सन्वत्त्वाद्द्वित्वमभ्यासेत्त्वम् डित्त्वाट्टिलोपः। डउरिति पृथगुच्चारणसामर्थ्याच्च गुणः 'प्रस्फोटनं शूर्पमस्त्री चालनी तितउः पुमान्, इत्यमरकोशः। अर्भकपृथुकपाका वयसि। एते निपात्यन्ते। निपातनप्रकारमेवाह—ऋधु वृद्धाविति। अस्मादूवुन्, अकादेशः, धकारस्य भकारः, लघूपधगुणः। पृथुक इत्यत्राह—प्रथेरिति। **'प्रथ प्रख्याने'** अस्मात्कुकन्, धातोः सम्प्रसारणेन रेफस्य ऋकारः। किन्वाच्च लघूपधगुणः। पिबतेरिति। **'पा पाने'** इत्यस्मादित्यर्थः। **'पोतः पाकोऽर्भको डिम्भः, पृथुको चिपिटार्भकौ'** इति चामरः। अवद्यावमाधमार्वरेफाः। एते निपात्यन्ते। निपातनमेवाह—वदेरिति। **'वद व्यक्तायां वाचि'** अस्मान्नञि उपपदे यत्प्रत्यय इत्यर्थः। अवतेरिति। **अव रक्षणादौ**। अधम इत्यत्राह—वस्य पक्षे ध इति। अर्तेरिति। **ऋ गतौ**। रिफतेरिति। **'रिफ कत्थनादिषु'** अस्मात् अप्रत्यय इत्यर्थः। **'निकृष्टप्रतिकृष्टाऽवर्रेफाऽप्यावमाऽधमाः'** इत्यमरः। लीरीडोर्ह्रस्वः। **लीङ् श्लेषणे, रीङ् श्रवणे, आभ्यां** तप्रत्ययरप्रत्ययौ क्रमात्स्तः, तस्य पुडागमः, धातोर्ह्रस्वश्चेत्यर्थः, प्रकृतिप्रत्ययसमुदायेन क्रमाच्छ्लेषणे कुत्सने च वाच्ये। क्लिशेरीच्चोपधायाः। **क्लिशू विबाधने,**

क्लिशेः कन्स्यादुपधाया ईत्वं, लस्य लोपो, नामागमश्च। कीनाशो यमः। कित्त्व-फलं चिन्त्यम्। ७३५ **अश्नोतेराशुकर्मणि वरट् च।** चकारादुपधाया ईत्त्वम्। ईश्वरः। ७३६ **चतेरुरन्।** चत्वारः। ७३७ **प्राऽ (प्रेऽ) ततेररन्।** प्रातः। ७३८ **अमेस्तुट् च।** अन्तर्मध्यम्। ७३९ **दहेर्गो लोपो दश्च नः।** गप्रत्ययो धातोरन्त्यस्य लोपो दकारस्य नकारः। नगः। ७४० **सिचेः सञ्ज्ञायां हनुमौ कश्च।** सिध्यतेः कप्रत्ययो हकारादेशो, नुम्च स्यात्। सिंहः। ७४१ **व्याङि घ्रातेश्च जातौ।** कप्रत्ययः स्यात्। व्याघ्रः। ७४२ **हन्तेरच् घुर च।** घोरम्। ७४३ **क्षमेरुपधालोपश्च।** चादच्। क्षमा। ७४४ **तरतेर्ड्रिः।** त्रयः। त्रीन्। ७४५ **ग्रहेरनिः।** ग्रहणिः। ङीष्। ग्रहणी व्याधिभेदः। ७४६ **प्रथेरमच्।** प्रथमः। ७४७ **चरेश्च।** चरमः। ७४८ **मङ्गेरलच्।** मङ्गलम्।

इत्युणादिषु पञ्चमः पादः॥

अस्मात्कन्स्यात् धातोरुपधाया ईत्त्वं, लकारस्य लोपो नामागमश्च। कीनाश इति। 'कृतान्ते पुंसि कीनाशः' इत्यमरः। चिन्त्यमिति। उपधाया ईत्त्वविधिसामर्थ्यादेव गुणो न भविष्यतीति भावः। अश्नोतेराशुकर्मणि। 'अशू व्याप्तौ' अस्माद्वरट् स्यात्, उपधाया ईत्त्वं च आशुकर्मणि वाच्ये। ईश्वर इति। ईश्वरो हि प्रार्थितः सन्वरादिकं शीघ्रं दातुं शक्तो भवति। चतेरुरन्। 'चते याचने' अस्मादुरन्स्यात्, उरनि अकार उच्चारणार्थः नकार इत्। चत्वार इति। 'चतुरनडुहो'रित्यम्। प्रातरिति। 'प्रपूर्वादत सातत्यगमने' इत्यस्मादरन्प्रत्ययः, अकार उच्चारणार्थः। प्रातरिति। 'स्वरादिपाठाद्व्ययत्वम्। अमेस्तुट् च। 'अम गत्यादिषु' अस्मादरन् स्यात्, तस्य तुडागमश्च। दहेर्गो लोपो दश्च नः। 'दह भस्मीकरणे' अस्मात् गप्रत्ययः, धातोरन्त्यस्य लोपः, दकारस्य नकारश्चेत्यर्थः। सिचेः सञ्ज्ञायाम्। 'षिच क्षरणे' अस्मात्कप्रत्ययः धातोरन्त्यस्य हकारादेशः नुम् स्यात्। व्याङि घ्रातेश्च जातौ। वि आङित्युपसर्गे उपपदे घ्रा गन्धोपादान इत्यस्मात् कप्रत्ययः स्यात् जातौ वाच्यायाम्। व्याघ्र इति। कित्त्वादातो लोप इटि चेत्यालोपः। हन्तेरच् घुर च। 'हन हिंसागत्योः'अस्मादच्प्रत्ययः, धातोर्घुरादेशश्च। घोरमिति। लघूपधगुणः। क्षमेरुपधालोपश्च। 'क्षमूष् सहने' अस्मादच्प्रत्ययः धातोरुपधाया लोपश्चेत्यर्थः। 'क्ष्माऽवनिर्मेदिनी मही' इत्यमरः। तरतेर्ड्रिः। 'तॄ प्लवनतरणयोः' अस्मात् ड्रिः स्यात्। त्रिरिति। डित्त्वाट्टिलोपः। तस्य नित्यं बहुवचनान्तत्वादाह–त्रय इति। ग्रहेरनिः। 'ग्रह उपादाने' अस्मादनिप्रत्ययः। ग्रहणिरिति। 'अट्कुप्वा'ङिति णत्वम्। ङीषिति। 'कृदिकारादक्तिन' इत्यनेन। 'ग्रहणी रुक् प्रवाहिका'। इत्यमरः। प्रथेरमच्। 'प्रथ प्रख्याने' अस्मादमच् स्यात्। प्रथम इति रूपम्। चरेश्च। 'चर गतिभक्षणयो'रस्मादमच्स्यात्। 'प्रथिचरिभ्या'मित्येकयोग एव कर्तुं शक्यः। मङ्गेरलच्। मङ्गि-

अथ उत्तरकृदन्तप्रकरणम् ॥ २६ ॥

३१६९ उणादयो बहुलम् ३।३।१ ॥ एते वर्तमाने सञ्ज्ञायां च बहुलं स्युः । केचिदविहिताश्च्यूह्याः । 'सञ्ज्ञासु धातुरूपाणि प्रत्ययाश्च ततः परे । कार्याद्विद्यादनूबन्धमेतच्छास्त्रमुणादिषु' (भाष्यम्) । **३१७० भूतेऽपि दृश्यन्ते ३।३।२ ॥** **३१७१ भविष्यति गम्यादयः ३।३।३ ॥** **३१७२ दाशगोघ्नौ सम्प्रदाने ३।४।७३॥** एतौ सम्प्रदाने कारके निपात्येते । दाशन्ति तस्मै दाशः । गां हन्ति तस्मै गोघ्नोऽतिथिः । **३१७३ भीमादयोऽपादाने ३।४।७४॥** भीमः । भीष्मः । प्रस्कन्दनः । प्ररक्षः । मूर्खः खलतिः । **३१७४ ताभ्यामन्यत्रोणादयः ३।४।७५॥** सम्प्रदानापादानपरामर्शार्थं ताभ्यामिति । ततोऽसौ भवति तन्तुः । तृ तदिति वर्त्म । चरितं तदिति चर्म । **३१७५ तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम् ३।३।१०॥** क्रियार्थायां क्रियायामुपपदे भविष्यत्यर्थे धातोरेतौ स्तः । मान्त-

---

र्गत्यर्थः । अस्मादलच्प्रत्यय इत्यर्थः । मङ्गलमिति । धातोरिदित्त्वान्नुम् , 'श्वश्रेयसं शिवं भद्रं कल्याणं मङ्गलं शुभम्' इत्यमरः । इति बालमनोरमायां उणादिषु पञ्चमः पादः ।

अथ उत्तरकृदन्तप्रक्रियाः निरूप्यन्ते—उणादयो बहुलम् । तृतीयेऽध्याये तृतीयपादस्येदमादिमं सूत्रम् । वर्तमाने सञ्ज्ञायां चेति । **'वर्तमाने लट्' इत्यतः पुवस्सञ्ज्ञायाम्' इत्यतश्च तदनुवृत्तेरिति भावः । अत एव 'नञि हन एह च' नञ्पूर्वाद्धन्तेरसिप्रत्यये प्रकृतेः एहादेशे व्युत्पन्नः अनेहस्शब्दो वर्तमानकाल एवेत्युक्तं भाष्ये । संज्ञाशब्दश्चाऽत्र रूढशब्दपरः । वैदिकानामपि शब्दानामुपलक्षणम् । अत एव 'नैगमरूढिभवं हि सुसाधु' इति वार्तिकम् । 'वैदिका रूढशब्दाश्चौणादिका' इति भाष्यं च सङ्गच्छते । रूढाश्चैते उणादिप्रत्ययान्ता अवयवार्थशून्या असन्तमप्यवयवार्थमाश्रित्य प्रायः कर्तरि व्युत्पाद्याः । 'उणादयो बहुलम्' इत्यनुक्त्वा बहुलग्रहणस्य प्रयोजनमाह—केचिदविहिता इति । तदेवाह—संज्ञास्वित्यादि । भाष्यस्थोऽयं श्लोकः । डित्थो डिबित्थ इत्यादौ धातुरूपाणि प्रत्ययाश्च यथासम्भवमूह्याः । गुणनिषेधादिकार्यवशात् अनुबन्धं विद्यात् । अनूबन्धमित्यत्र 'उपसर्गस्य घञ्यमनुष्ये' इति दीर्घः । एतत् उणादिषु शास्त्रं शासितव्यम् । 'कृवापाजि' इत्यादि सूत्राणि तु शाकटायनप्रणीतानि, अस्यैव बहुलग्रहणस्य प्रपञ्च इत्यर्थः । भूतेऽपि दृश्यन्ते । 'उणादय' इति शेषः । वर्तमानाधिकारादिदं भूतग्रहणम् । दृशिः प्रयोगानुसारार्थः । इदं सूत्रं बहुलग्रहणप्रपञ्चार्थम् । भविष्यति गम्यादयः । भविष्यति काले गम्यादयः शब्दाः इनिप्रत्ययान्ता निपात्यन्त इत्यर्थः । ग्रामङ्गमीति निपातनान्नात्र णिच्त्वम् । गमिष्यन्नित्यर्थः । प्रस्थायी प्रस्थास्यमान इत्यर्थः । तुमुन्ण्वुलौ । क्रियार्थायामिति । क्रियोद्दे-

त्वादव्ययत्वम् । कृष्णं द्रष्टुं याति । कृष्णं दर्शको याति । अत्र वाऽसरूपेण तृजादयो न । पुनर्ण्वुलुक्तेः । **३१७६ समानकर्तृकेषु तुमुन् ३।३।१५८॥** अक्रियार्थोपपदार्थमेतत् । इच्छार्थेष्वेककर्तृकेषूपपदेषु धातोस्तुमुन्स्यात् । इच्छति भोक्तुम् । वष्टि वाञ्छति वा । **३१७७ शकधृषज्ञाग्लाघटरभलभक्रमसहार्हास्त्यर्थेषु तुमुन् ३।४।६५॥** एषूपपदेषु धातोस्तुमुन्स्यात् । शक्नोति भोक्तुम् । एवं धृष्णोतीत्यादौ । अर्थग्रहणमस्तिनैव सम्बध्यते । अनन्तरत्वात् । अस्ति भवति विद्यते वा भोक्तुम् । **३१७८ पर्याप्तिवचनेष्वलमर्थेषु ३।४।६६॥** पर्याप्तिः पूर्णता । तद्वाचिषु सामर्थ्यवचनेषूपपदेषु तुमुन्स्यात् । पर्याप्तो भोक्तुं, प्रवीणः

श्यभूतक्रियावृत्तिधातौ उपपदे इत्यर्थः । भविष्यतीत्यनुवर्तते । तुमुनि नकार इत्, मकारादुकार उच्चारणार्थः । ण्वुलि णलाविती वोरकादेशः । मान्तत्वादिति । तुमुनो मान्तकृत्त्वात् 'कृन्मेजन्तः' इत्यव्ययत्वमित्यर्थः । ततश्च 'अव्ययकृतो भावे' इति वचनाद्भावे तुमुन् । ण्वुल् तु कर्तर्येव । कृष्णं द्रष्टुमिति । 'न लोकाव्यय' इति न षष्ठी । कृष्णकर्मभविष्यद्दर्शनार्थं यानमित्यर्थः । अत्र यातीत्युपपदम् । अत्र तुमुन्प्रत्ययप्रकृत्यर्थस्य दर्शनस्य यानार्थत्वं तुमुना द्योत्यं, वाच्यं वा । कृष्णं दर्शको यातीति । कृष्णं द्रक्ष्यन् तदर्थं यातीत्यर्थः । 'अकेनोर्भविष्यदाधमर्ण्ययोः' इति न षष्ठी । ननु तुमुनो भावार्थकत्वे तद्विषये कर्तरि विहितानां तृजादीनामप्रवृत्तावपि ण्वुल्विषये कर्तरि तृजादयः कुतो न स्युः । न च विशेषविहितेनाऽनेन ण्वुला तृजादयो बाध्यन्ते इति वाच्यम् । वासरूपविधिना तद्बाधस्य पाक्षिकत्वादित्यत आह—अत्रेति । क्रियार्थक्रियोपपदे विषये वाऽसरूपविधिना पक्षे प्राप्ताः ये तृजादयस्ते न भवन्तीत्यर्थः । आदिना 'नन्दिग्रहिपचादिभ्यो ल्युण्यिण्यचः' इत्यादिसङ्ग्रहः । कुतोऽत्र तृजादयो नेत्यत आह—पुनर्ण्वुलुक्तेरिति । 'ण्वुल्तृचौ' इति कालसामान्ये कर्तरि विहितो ण्वुल् क्रियार्थक्रियोपपदे विषये भवतीति पुनरिह ण्वुल्विधानात् तदितरतृजादयो न भवन्तीति विज्ञायत इति भावः । समानकर्तृकेषु । 'तुमुण्ण्वुलौ क्रियायाम्' इत्येव सिद्धे किमर्थमिदमित्यत आह—अक्रियार्थेति । इच्छार्थेष्विति । 'इच्छार्थेषु लिङ्लोटौ' इत्यतस्तदनुवृत्तेरिति भावः । इच्छति भोक्तुमिति । अत्र इच्छतीत्युपपदार्थस्य इच्छाया भोजनोद्देश्यत्वाभावेऽपि तुमुन् । 'इच्छार्थेष्विवे'त्यर्थग्रहणस्य प्रयोजनमाह—वष्टि वाञ्छति वेति । यद्यपि वशेः छान्दसेषु परिगणनं धातुपाठे । तथापि 'वष्टि भागुरि'इति वार्तिकप्रयोगात् लोकेऽपि प्रयोग इति भावः । शकधृषः । शकधृषज्ञा' इति सूत्रमव्यक्रियोपपदार्थम् । शक्नोति भोक्तुमिति । अत्र शक्तेर्भोजनोद्देश्यत्वाऽभावेऽपि तुमुन् । पर्याप्तिमिति । धृष्णोति जानाति ज्ञापयति घटते आरभते क्षमते क्रमते उत्सहते अर्हति वा भोक्तुमित्युदाहार्यम् । अस्तिनैवेति । न तु शक्तादिनेत्यर्थः । कुत इत्यत आह—अनन्तरत्वादिति । सन्निहितत्वादित्यर्थः । पर्याप्तिवचने । 'पर्याप्ति' इत्यस्य विवरणम्—

कुशलः पटुरित्यादि । पर्याप्तिवचनेषु किम् । अलं भुक्त्वा । अलमर्थेषु किम् । पर्याप्तं भुङ्क्ते । प्रभूततेह गम्यते न तु भोक्तुः सामर्थ्यम् । **३१७८ कालसमयवेलासु तुमुन्** ३।३।१६७॥ पर्यायोपादानमर्थोपलक्षणार्थम् । कालार्थैषूपपदेषु तुमुन्स्यात् । कालः समयो वेला अनेहा वा भोक्तुम् । प्रैषादिग्रहणमिहानुवर्तते । तेनेह न । 'भूतानि कालः पचतीति वार्ता' । **३१८० भाववचनाश्च** ३।३।११॥ भाव इत्यधिकृत्य वक्ष्यमाणा घञादयः क्रियार्थायां क्रियायां भविष्यति स्युः । यागाय याति । 'तुमर्थात्' (सू ५८२) इति चतुर्थी । **३१८१ अण्कर्मणि च** ३।३।१२॥ कर्मण्युपपदे क्रियार्थायां क्रियायां चाण्स्यात् । ण्वुलोऽपवादः । काण्डलावो व्रजति । परत्वादयं कादीन्बाधते । कम्बलदायो

पूर्णेति । 'अलमर्थेष्वि'त्यस्य विवरणम्—सामर्थ्यवचनेष्विति । पर्याप्तो भोक्तुमिति । अन्यूनसामर्थ्यवानित्यर्थः । वचनग्रहणस्य फलमाह—प्रवीण इत्यादि । अलं भुक्त्वेति । अत्र अलमिति प्रतिषेधार्थम् । ननु पर्याप्त्यर्थकमिति भावः । पर्याप्तं भुङ्क्ते इति । बहुलमन्नं भुङ्क्ते इत्यर्थः । प्रभूततेति । 'अन्नस्ये'ति शेषः । कालसमयवेलासु अक्रियोपपदेऽपि प्रकृत्यर्थमिदम् । ननु कालपर्यायाणां कतिपयानां ग्रहणात्तदितरस्मिन् अनेहादिशब्दे उपपदे न स्यादित्यत आह—पर्यायोपादानमर्थोपलक्षणार्थमिति । अनुवर्तते इति । प्रैषातिसर्गसूत्रादिति भावः । भूतानीति । पृथिव्यादिपञ्चभूतानि, कालः पचति उपर्यधःपच्यादिविकारं प्रापयति इति वार्ता लोकवृत्तान्त इत्यर्थः । भाववचनाश्च । 'क्रियार्थायां क्रियायामि'ति भाविष्यतीति चानुवर्तते । 'भावे चेत्येव सिद्धे वचनग्रहणस्य प्रयोजनमाह—भाव इत्यधिकृत्येति । भावे इत्यधिकृत्य घञादयो विधास्यन्ते, ये सामान्यतः ते क्रियार्थायां क्रियायां उपपदे भविष्यति काले विशेषविहितेनाऽपि तुमुना समुच्चिता भवन्तीत्यर्थः । न च वाऽसरूपविधिना सिद्धमेतदिति शङ्क्यम् । 'तुमर्थाच्च भावे वाऽसरूपविधिर्नास्ति' इत्युक्तेरिति भावः । ननु 'यागाय याती'त्यत्र यागस्य सम्प्रदानत्वाभावात् कथं चतुर्थी, नापि तादर्थ्यचतुर्थी, तादर्थ्यस्य प्रत्ययेनैव लाभादित्यत आह—तुमर्थादिति । अण् कर्मणि च । चकारेण क्रियार्थायां क्रियायामिति समुच्चीयते तदाह—क्रियार्थायां क्रियायां चेति । तथा च क्रियार्थायां क्रियायां कर्मणि चेत्युपपदद्वये सत्येवास्य प्रवृत्तिः नान्यतरस्मिन्निति भाष्ये स्पष्टम् । कर्मण्यण्कोऽयम् 'कर्तरि कृदि'त्यधिकारात् । अत्र 'ण्वुलृतृचौ' इति बाधित्वा 'कर्मण्यण्' इति सामान्यविधिना अण् प्राप्तः तं तावत्क्रियार्थायां क्रियायामुपपदे विशेषविहितस्तुमुन्ण्वुलाविति ण्वुल् बाधित्तुमुद्यच्छते, पुनर्ण्वुलविधिसामर्थ्येन वाऽसरूपविधेरप्रवृत्तेरुक्तत्वात् । तस्मिन्ण्वुलं बाधितुमयमण्विधिः । तदाह—ण्वुलोऽपवाद इति । 'तुमुन्ण्वुलौ' इति विहितस्य ण्वुलोऽपवाद इत्यर्थः । एवं च ण्वुला बाधितस्य 'कर्मण्यण्' इत्यस्य अयमण्बाधः प्रतिप्रसवार्थ इति स्थितम् । ननु ण्वुला बाधित-

व्रजति। ३।८८२ **पदरुजविशस्पृशो घञ् ३।३।१६** ॥ भविष्यतीति निवृत्तम्। पद्यतेऽसौ पादः। रुजतीति रोगः। विशतीति वेशः। स्पृशतीति स्पर्शः। ३।८८३ **सृ स्थिरे ३।३।१७॥** 'सृ' इति लुप्तविभक्तिकम्। स्थिरे कर्तरि सर्तेः घञ्स्यात्। सरति कालान्तरमिति सारः। 'व्याधिमत्स्यबलेषु चेति वाच्यम्' (वा २१७४)। अतीसारो व्याधिः। 'उपसर्गस्य' इति दीर्घः अन्यभावितण्यर्थोऽत्र सरतिः। रुधिरादिकमतिशयेन सारयतीत्यर्थः। विसारो मत्स्यः। 'सारो बले दृढांशे च'। ३।८८४ **भावे ३।३।१८॥** सिद्धावस्थापन्ने धात्वर्थे वाच्ये धातोर्घञ्स्यात्। पाकः पाकौ। ३।८८५ **स्फुरतिस्फुलत्योर्घञि ६।१।४७॥** अनयोरेच आत्वं स्याद्घञि। स्फारः। स्फालः। 'उपसर्गस्य घञि-' (सू० १०४४) इति दीर्घः। परी-

---

स्याऽण्। प्रतिप्रसवेऽपि 'आतोऽनुपसर्गे' इति कप्रत्ययः कम्बलदायो व्रजतीत्यत्र दुर्निवारः। कप्रत्ययस्य कर्मण्यणपवादत्वात् सरूपत्वेन च वाऽपरूपविधयवृत्तेः। न चायं वैशेषिकोऽण्विधिः कप्रत्ययस्याण्यपवाद इति शङ्क्यम्। न ह्यपमर्दोऽण्विधि। किन्तु लाघवात् 'कर्मण्यण्' इत्यणेवाऽत्र प्रतिप्रसूयते। सच 'कर्मण्यण्' इत्यण् सामान्यविहितः 'आतोऽनुपसर्गे कः' इति वैशेषिकस्य नाऽपवादः, प्रत्युत कप्रत्यय एव तदपवादः। अतः 'कम्बलदायो व्रजती'त्यत्र कर्मण्यणपवादं 'तुमुण्वुलो'वितिण्वुलं बाधित्वा कप्रत्ययः स्यादित्यत आह-परत्वादयं कादीन् बाधते इति। आदिना 'सामगो गुरुकुलं व्रजती'त्यादौ 'गापोष्टक्' इत्यादिसङ्ग्रहः। 'अण्कर्मणि चे'ति ह्यावर्तते। प्रतिप्रसवविधिरपूर्वविधिश्च। तत्र प्रतिप्रसवविधिना ण्वुला अणो बाधनिवृत्तिः। अपूर्वविधिर्विहितस्य त्वणः तृतीयपादीयस्य द्वितीयपादस्थकप्रत्ययापेक्षया परत्वात् कादिप्रत्यया अणा अनेन बाध्यन्त इत्यर्थः। एतच्च भाष्ये स्पष्टम्। इत ऊर्ध्वम् 'लुट् शेषे च' इत्यादिसूत्रेषु क्रियार्थार्था क्रियायामिति निवृत्तम्। भविष्यतोत्येवानुवर्तते इति बोध्यम्। पदरुज। कर्तरीत्येव। पद्यतेऽसाविति। करणस्याऽप्यत्र विवक्षातः कर्तृत्वम्। 'परच्' इत्यतः प्राक् घञाधक्रियते। सृ स्थिरे। लुप्तविभक्तिकमिति। लुप्तषष्ठ्यन्तमीकमित्यर्थः। स्थिरे कर्तरीति। 'स्थिरे' इति कर्तृविशेषणम्। न तूपपदमिति भावः। सर्तेरिति। भ्वादेर्जुहोत्यादेश्च ग्रहणम्, न तु जुहोत्यादेरेव, व्याख्यानात्। तदाह—सरति कालान्तरमिति सार इति। अर्धर्चादिपाठात् पुंस्त्वं, क्लीबत्वं च। अत एव च स्थिर इति नोपपदम्। व्याधीति। वार्तिकमस्थिरार्थम्। सारो बल इति। भाष्ये तु बले खदिरसार इत्युदाहृतम्। भावे। 'भावो भावना क्रिया, सा च धातुत्वेन सकलधातुवाच्येत्यादिभूलव्याख्यावसरे, सर्वधातुवाच्यं क्रियासामान्यं, तद्विशेषः पाकादिश्च धातुविशेषवाच्यः, तत्र क्रियासामान्यं भावशब्दार्थः, तिङ्वाच्यं लिङ्सङ्ख्यान्वयाऽयोग्यं साध्यावस्थापन्नं, कृद्वाच्यं तु लिङ्सङ्ख्यान्वययोग्यं सिद्धावस्थापन्नम्, कृदभिहितो भावो द्रव्यवत्प्रकाशते' इति भाष्यादिति प्रपञ्चितम्। तदाह—सिद्धाव-

हारः। 'इकः काशे' (सू १०४५)। काशे उत्तरपदे इगन्तस्यैव प्रादेर्दीर्घः स्यात्। नीकाशः। अनूकाशः। इकः किम्। प्रकाशः। 'नोदात्तोपदेश-' (सू २७६३) इति न वृद्धिः। शमः। आचमादेस्तु आचामः। कामः। वामः। विश्राम इति त्वपाणिनीयम्। **३१८६ अकर्तरि च कारके संज्ञायाम् ३।३।१९॥** कर्तृभिन्ने कारके घञ् स्यात्। **३१८७ घञि च भावकरणयोः ६।४।२७॥** रञ्जेर्नलोपः स्यात्। रागः। अनयोः किम्। रज्यत्यस्मिन्रङ्गः। प्रास्यत इति प्रासः। सञ्ज्ञायाम् इति प्रायिकम्। को भवता लाभो लब्धः। इत उत्तरं 'भावे' 'अकर्तरि कारके' इति 'कृत्यल्युटो बहुलम्' (सू २८४१) इति यावद्द्रव्यमप्यनुवर्तते। **३१८८ स्यदो जवे ६।४।२८॥** स्यन्देर्घञि नलोपो वृद्ध्यभावश्च निपात्यते। स्यदो वेगः। अन्यत्र स्यन्दः। **३१८९ अवोदैधौद्मप्रश्रथहिमश्रथाः ६।४।२९॥** अवोदः अवक्लेदनम्। एध इन्धनम्। ओघ उन्दनम्। श्रन्थेर्नलोपो

स्यापन्न इत्यादिना। घञीति। **'पङ्कज' इत्यतस्तदनुवृत्तेरिति भावः।** इकः काशे। उत्तरपदे इति। **'अनुगुत्तरपदे' इत्यतस्तदनुवृत्तेरिति भावः। 'ढ्रलोपे पूर्वस्य' इत्यतो दीर्घं इत्यनुवर्तते। 'उपसर्गस्य घञ्यमनुष्ये' इत्यतो घञीति। तेनैव सिद्धे नियमार्थमिदम्।** तदाह—इगन्तस्येति। दीर्घः स्यादिति। **'घञोऽति शेषः।** आचाम इति। **'अनाचमेऽदिति पर्युदासाच्च वृद्धिनिषेधः इति भावः।** अपाणिनीयमिति। **'नोदात्तोपदेशस्य' इति वृद्धिनिषेधादिति भावः।** अकर्तरि। कारक इति प्रत्ययार्थनिर्देशः। न तूपपदम्, व्याख्यानात्। संज्ञाशब्देन रूढिर्विवक्षिता। तेन राग इति वक्ष्यमाणमुदाहरणं सङ्गच्छते। घञि। **'अनिदिताम्' इति नलोपप्रकरणे 'रञ्जेश्च' इत्युत्तरमिदं सूत्रम्।** तदाह—रञ्जेर्नलोपः स्यादिति। **सूत्रे शेषपूरणमिदम्।** राग इति। **'चजोः कुः घिण्ण्यतोः' इति जस्य गः। नलोपे कृते उपधावृद्धिः। रञ्जनक्रियेत्यर्थः। रञ्जनद्रव्यं वा।** प्रास्यत इति। **प्रपूर्वात् 'असु क्षेपणे' इत्यस्मात् 'अकर्तरि च' इति करणे घञि प्रास इति रूपमित्यर्थः।** प्रास्यन्ते क्षिप्यन्ते शत्रवोऽनेनेति प्रासः आयुधविशेषः। प्रायिकमिति। स्पष्टमिदं भाष्ये। ततश्च असंज्ञायामपि क्वचिदयं घञ् भवतीति भावः। तदाह—को भवतेति। लाभ इति। भावे घञ्। कः लाभः हिरण्यादिप्राप्तिरूपः लब्धः सम्पन्न इत्यर्थः। भवतेत्यस्य लब्ध इत्यन्वयात् 'न लोक' इति षष्ठीनिषेधः। अनुवर्तत इति। अत्र व्याख्यानमेव शरणम्। **'स्यन्दू प्रस्रवणे' इत्यस्मात् 'अकर्तरि च' इति घञि किदभावात् 'अनिदिताम्' इति नलोपो न प्राप्तः। तत्र स्यन्देश्चेत्युक्तौ यद्यपि नलोपः सिध्यति। तथापि कृते नलोपे उपधावृद्धिः स्यात्। तत्र नलोपमुपधावृद्ध्यभावं च ज्ञापयितुमाह—स्यदो जवे।** स्यदो वेग इति। **वेगे कृतोऽयम्। अन्यत्रेति। प्रस्रवणे इत्यर्थः। अवोदैधौद्म। अवोद, एध, ओघ, प्रश्रथ, हिमश्रथ, एषां द्वन्द्वः।** अवोद इति। **घञि नलोपो निपात्यते। कृते नलोपे आदृगुपधः। कघूपधगुणस्तु न भवति। 'न धातु-**

दृढ्यभावश्च। प्रश्रथः। हिमश्रथः। ३१९० परिमाणाख्यायां सर्वेभ्यः ३।३।२०॥ घञ्। अजपोर्बाधनार्थमिदम्। एकस्तण्डुलनिचायः। तण्डुलानां निचायः राशिः परिच्छिद्यते। द्वौ शूर्पनिष्पावौ। शूर्पेण निष्पावौ। द्वौ कारौ (अत्र विक्षिप्यमाणो धान्यादिःपरिच्छिद्यते)। 'दारजारौ कर्तरि णिलुक्च' (वा २१८२)। दारयन्तीति दाराः। जरयतीति जारः। (उपपतिः)। ३१९१ इङश्च ३।३।२१॥ घञ्। अचोऽपवादः।

क्तोपे' इति निषेधात्। एध इति। 'मि इन्धी दीप्तौ' इत्यस्मात् घञि नलोपः। 'न धातुलोप' इति निषेधं बाधित्वा गुणश्च निपात्यते। ओघ इति। उन्देरौणादिके मनूप्रत्यये नलोपो गुणश्च निपात्यते। अन्येरिति। 'प्रपूर्वस्य हिमपूर्वस्य च घञी'ति शेषः। परिमाणाख्यायाम्। घञिति। शेषपूरणम्। सर्वेभ्यो धातुभ्यः अकर्तरि कारके वाच्ये घञ् स्यात् प्रत्ययार्थस्य परिच्छेदे गम्ये इत्यर्थः। नन्वकर्तरि कारके' इत्येव सिद्धे किमर्थमिदमित्यत आह—अजपोरिति। 'एरच्' 'ऋदोरप्' इति वक्ष्यमाणयोर्बाधनार्थमित्यर्थः। 'अकर्तरि च' इति घञ् तु ताभ्यां विशेषविहिताभ्यां बाध्यते, सरूपत्वेन वाऽसरूपविधेरप्रवृत्तेरिति भावः। एकस्तण्डुलनिचाय इति। निश्चित्य चीयते सङ्घीक्रियते इति निचायः। कर्मकारके वाच्ये 'एरच्' इत्यस्यापवादो घञ्। तण्डुलनिचायशब्दे विग्रहं दर्शयति—तण्डुलानामिति। निचयशब्दस्य विवरणम्—राशिरिति। परिच्छिद्यतेरिति। तण्डुलावयवकसङ्घातात्मकः राशिरेकत्वेन परिच्छिद्यते इत्यर्थः। द्वौ शूर्पनिष्पावाविति। निष्पूयते तुषापनयनेन शोध्यते इति निष्पावः तण्डुलादिराशिः। कर्मणि घञ्। अपपवादः। शूर्पेण निष्पावःशूर्पनिष्पावः। 'कर्तृकरणे कृता बहुलम्' इति समासः। द्विधं तु शूर्पद्वारा निष्पावेऽन्येति। अतः शूर्पद्वित्वमार्थिकम् न तु शाब्दमित्येकवचनं निर्बाधम्। द्वौ काराविति। क्रीयते विक्षिप्यते इति कारः। धान्यादिराशिः। कर्मणि घञ्, अपपवादः। तदाह—अत्र विक्षिप्यमाण इति। न च धातोरित्यधिकारादेव धातुमात्रासिद्धे सर्वग्रहणं व्यर्थमिति शङ्क्यम्। प्रकृत्याश्रय एवापवादो बाध्यते; नरवर्थाश्रय इत्येतदर्थत्वात्। तेनेह न। एकातिक्लोच्छ्रितिः। उच्छ्रयते ऊर्ध्वीक्रियते इत्युच्छ्रितिः, ऊर्ध्वं कृतो राशिः। कर्मणि स्त्रियां क्तिन्। स च अर्थाश्रयत्वात् प्रकृत्याश्रयत्वाऽभावात् नानेन घञा बाध्यते। किन्तु 'एरच्' 'ऋदोरप्' इति प्रकृत्याश्रयावेव अजपौ बाध्येते इति भाष्ये स्पष्टम्। दारजारावितिः। वार्तिकम्। इ विदारणे, जॄ वयोहानौ आभ्यां ण्यन्ताभ्यां कर्तरि घञ् णिलोपं बाधित्वा णिलुक् चेत्यर्थः। दारयन्ति चित्तं, विदारयन्तीति दाराः भार्या। 'दाराः पुंसि च भूम्न्येव' इत्यमरः। घञि णिलुक्। ण्याश्रयवृद्धौ निवृत्तायां घञाश्रया वृद्धिः। तदाह—दारयन्तीति दारा इति। जरयति नाशयति कुलमिति जारः। जॄषातोर्ण्यन्तात् घञ् णिलुक्। णिलोपे सति तु तस्य परनिमित्तकत्वेन 'अचः परस्मिन्' इति स्थानिवत्त्वात् घञाश्रया वृद्धिः स्यात्। न च णिनिमित्तैव वृद्धिरस्तीति वाच्यम्। 'जनीजॄष्कनसुरञोऽमन्ताश्च' इति मित्त्वे 'मितां ह्रस्वः' इति णिनिमित्तकह्रस्वापत्तेः।

उपेत्यास्मादधीयते उपाऽध्यायः। 'अपादाने स्त्रियामुपसङ्ख्यानं तदन्ताच्च वा ङीष्' (वा २१८४) उपाध्याया। उपाध्यायी। 'शॄ वायुवर्णनिवृत्तेषु' (वा २१८५)। 'शॄ' इत्यविभक्तिको निर्देशः। शारो वायुः। करणे घञ्। शारो वर्णः। चित्रीकरणमिह धात्वर्थः। निव्रियते आव्रियतेऽनेनेति निवृतमावरणम्। बाहुलकात्करणे क्तः। 'गौरिवाऽकृतनीशारः प्रायेण शिशिरे कृशः'। अकृतप्रावरण इत्यर्थः। 'प्रदक्षिणप्रस-व्यगामिनां शाराणाम्' इति वार्तिककारप्रयोगादन्येष्वपि शार इति भवति। ३१९२ **उपसर्गे रुवः** ३।३।२२॥ घञ्। संरावः। उपसर्गे किम्। रवः। ३१९३ **अभिनिसः स्तनः शब्दसंज्ञायाम्** ८।३।८६॥ अस्मात्स्तनः सस्य मूर्धन्यः। अभिनिष्टानो वर्णः। शब्दसञ्ज्ञायां किम्। अभिनिःस्तनति मृदङ्गः। ३१९४ **समि युद्रुद्रुवः** ३।३।२३॥ संयूयते मिश्रीक्रियते गुडादिभिरिति संयावः पिष्टविकारोऽपूपविशेषः। सन्द्रावः। सन्दावः। ३१९५ **श्रिणीभुवोऽनुपसर्गे** ३।३।२४॥

णिलुकि तु तस्य परनिमित्तकत्वाऽभावेन स्थानिवत्त्वाऽभावान्न ह्रस्वप्रसङ्गः। तदाह—जरयतीति जार इति। उपपतिरिति। 'जारस्तूपपतिः समौ' इत्यमरः। इङश्च। घञिति। शेषपूरणम्। इङ् अध्ययने, नित्यमधिपूर्वः। अस्मादकर्तरि कारके घञित्यर्थः। अकर्तरि चेति सिद्धेराह—अचोऽपवाद इति। 'एरच्' इत्यस्यापवाद इत्यर्थः। उपेत्येति। समीपं प्राप्य यस्मादधीयते स उपाध्यायः इत्यर्थः। अपादाने घञिति भावः। 'आख्यातोपयोगे' इत्यपादानत्वम्। अपादाने इति। अपादानकारके वाच्ये स्त्रीत्वे गम्ये इङो घञ उपसंख्यानमित्यर्थः। तदन्ताच्च वा ङीषिति। वार्तिकम्। 'अपादाने स्त्रियाम्' इति विहितघञन्तात् इत्यर्थः। अत्र पठितमेव वार्तिकं स्त्रीप्रत्ययाधिकारे 'या तु स्वयमेव अध्यापिका तत्र वा ङीषित्युपन्यस्तं' मूले। ननु 'अकर्तरि च' इत्येव सिद्धे किमर्थं घञो विधानमिति चेन्न। 'घञनुकमण्यमजपोर्विषये' इति 'एरच्' 'ऋदोरप्' इत्यजपोरेव विषये 'अकर्तरि च' इति घञ्विधिरिति भाष्यवचनात् स्त्रीत्वे गम्ये 'स्त्रियां क्तिन्' इति क्तिन्विषये घञि अप्राप्ते 'अपादाने स्त्रियाम्' इति घञ्वचनात्। उपाध्यायेति। उपेत्य अस्याः सकाशादधीयते इत्यर्थः। शॄवायिति। वार्तिकम्। अविभक्तिक इति। शॄप्रपञ्चमीक इत्यर्थः। वायौ वर्णे निवृत्ते च कर्तरि शॄधातोर्घञित्यर्थः। अचोऽपवादः। शारो वायुरिति। शीर्यन्ते पर्णफलादीनि यैरिति विग्रहः। तदाह—करणे घञिति। चित्रीकरणमिति। शीर्यन्ते चित्रीक्रियन्ते पटादयः अनेनेति भावः। गौरिवेति। भाष्यस्थं श्लोकार्धम्। 'नीशारः' इत्यत्र 'उपसर्गस्य घञि' इति दीर्घः। अस्मै शारशब्दं साधयति—प्रदक्षिणेति। वार्तिककारप्रयोगादिति। पञ्चमस्य द्वितीये 'अनुपदसर्वान्नायानयम्' इति सूत्रभाष्ये स्थितमिदम्। उपसर्गे रुवः। 'घञिति शेषः। उपसर्गे उपपदे रुधातोर्घञित्यर्थः। अचपवादः। समि युद्रुद्रुवः। समित्युपसर्गे उपपदे, युद्रुद्रुप्रभ्यो घञित्यर्थः। अचपवादः। श्रिणी। उपसर्गं अस्ति, श्रि, नी, भू, एभ्यो

श्रायः। नायः। भावः। अनुपसर्गे किम्। प्रश्रयः। प्रणयः। प्रभवः। कथम् 'प्रभावो राज्ञः' इति। प्रकृष्टो भाव इति प्रादिसमासः। कथम् 'राज्ञो नयः' इति। बाहुलकात्। ३१९६ **वौ क्षुश्रुवः** ३।३।२५॥ विक्षावः। विश्रावः। वौ किम्। क्षवः। श्रवः। ३१९७ **अवोदोर्नियः** ३।३।२६॥ अवनायोऽधोनयनम्। उन्नायः ऊर्ध्वनयनम्। कथम् 'उन्नयः उत्प्रेक्षा' इति बाहुलकात्। ३१९८ **प्रे द्रुस्तुस्रुवः** ३।३।२७॥ प्रद्रावः। प्रस्तावः। प्रस्रावः। प्रे इति किम्। द्रवः। स्तवः। स्रवः। ३१९९ **निरभ्योः पूल्वोः** ३।३।२८॥ निष्पूयते शूर्पादिभिरिति निष्पावो धान्यविशेषः। अभिलावः। निरभ्योः किम्। पवः। लवः। ३२०० **उन्योर्ग्रः** ३।३।२९॥ उद्गारः। निगारः। उन्योः किम्। गरः। ३२०१ **कृ धान्ये** ३।३।३०॥ 'कृ' इत्यस्माद्धान्यविषयकादुन्योर्घञ्स्यात्। उत्कारो निकारो धान्यस्य विक्षेप इत्यर्थः। धान्ये किम्। भिक्षोत्करः। पुष्पनिकरः। ३२०२ **यज्ञे समि स्तुवः** ३।३।३१॥ समेत्य स्तुवन्ति यस्मिन्देशे छन्दोगाः, स देशः संस्तावः। यज्ञे किम्। संस्तवः परिचयः। ३२०३ **प्रे स्त्रोऽयज्ञे** ३।३।३२॥ अयज्ञे इति च्छेदः। 'यज्ञे' इति प्रकृतत्वात्। प्रस्तारः। अयज्ञे किम्। बर्हिषः प्रस्तरो मुष्टिविशेषः। ३२०४ **प्रथने वावशब्दे** ३।३।३३॥ विपूर्वात्स्तृणातेर्घञ्स्यादशब्दविषये प्रथने। पटस्य विस्तारः। प्रथने किम्। तृणविस्तरः। अशब्दे किम्। ग्रन्थविस्तरः। ३२०५ **छन्दोनाम्नि च** ३।३।३४॥ 'स्त्र' इत्यनुवर्तते। विष्टारः पङ्क्तिश्छन्दः। विस्तीर्यन्तेऽस्मिन्नक्षराणीत्यधिकरणे घञ्। ततः कर्मधारयः।

घञित्यर्थः। अजपोरपवादः। बाहुलकादिति। 'कृत्यल्युटो बहुलम्' इति बहुलग्रहणादित्यर्थः। वौ क्षुश्रुवः। वि इत्युपसर्गे उपदेशे क्षु, श्रु धात्वोर्घञित्यर्थः। अवपवादः। अवोदोनियः। अव, उत्, अनयोरुपपदयोः नीधातोर्घञित्यर्थः अजपवादः। उन्नय इत्यस्य विवरणम्—उत्प्रेक्षेति। प्रेद्रुस्तुस्रुवः। प्रद्रुत्युपपदे, द्रु, स्तु, स्रु, एभ्यः घञित्यर्थः। अवपवादः। निरभ्योः। निर्, अभि, अनयोरुपपदयोर्घञित्यर्थः। अवपवादः। उन्योर्ग्रः। उत्, नि, इत्युपपदयोर्घञित्यर्थः, अवपवादः। कृ धान्ये। कृ इति लुप्तपञ्चमीकम्। तदाह—कृ इत्यस्मादिति। यज्ञे समिस्तुवः। समित्युपपदे स्तृधातोर्घञ् स्यात् यज्ञविषये प्रयोग इत्यर्थः। अधिकरणे ल्युटोऽपवादः। संस्तव इत्यस्य विवरणम्—परिचय इति। प्रे स्रोऽयज्ञे। प्रकृतत्वादिति। यज्ञे इति तु च्छेदो न भवति। पूर्वसूत्रायज्ञग्रहणानुवृत्त्यैव सिद्धरित्यर्थः। प्रहृत्युपपदे स्तृधातोर्घञित्यर्थः। प्रस्तार इति। इष्टकासंनिवेशविशेष इति याज्ञिकाः। प्रथने वावशब्दे। वौ अशब्दे इति च्छेदः। तदाह—विपूर्वादिति। छन्दोनाम्नि च। विपूर्वात् स्तृधातोरञ् स्यात्। अक्षरेयत्तात्मकच्छन्दसः संज्ञायामित्यर्थः। शब्दविषयत्वात् पूर्वेणाऽप्राप्ते वचनम्। कर्मधारय इति। विष्टरश्चासौ पङ्क्ति-

३२०६ **छन्दोनाम्नि च** ८।३।९४॥ विपूर्वस्य स्तृणातेर्घञन्तस्य सस्य षत्वं स्याच्छन्दोनाम्नि । इति षत्वम् । ३२०७ **उदि ग्रहः** ३।३।३५॥ उद्ग्राहः । ३२०८ **समि मुष्टौ** ३।३।३६॥ मल्लस्य सङ्ग्राहः । मुष्टौ किम् । द्रव्यस्य सङ्ग्रहः । ३२०९ **परिन्योर्नीणोर्द्यूताभ्रेषयोः** ३।३ ३७॥ परिपूर्वान्नयतेर्निपूर्वादिणश्च घञ्स्यात्क्रमेण द्यूते अभ्रेषे च विषये । परिणायेन शारान्हन्ति । समन्तान्नयनेनेत्यर्थः । एषोऽत्र न्यायः । उचितमित्यर्थः । द्यूताऽभ्रेषयोः किम् । परिणयो विवाहः । न्ययो नाशः । ३२१० **परावनुपात्यय इणः** ३।३।३८॥ क्रमप्राप्तस्यानतिपातोऽनुपात्ययः । तव पर्यायः । अनुपात्यये किम् । कालस्य पर्ययः, अतिपात इत्यर्थः । ३२११ **व्युपयोः शेतेः पर्याये** ३।३।३९॥ तव विशायः । तव राजोपशायः । पर्याये किम् । विशयः । संशयः । उपशयः समीपशयनम् । ३२१२ **हस्तादाने चेरस्तेये** ३।३।४०॥ (चिनोतेर्घञ् हस्तादाने गम्ये)। हस्तादान इत्यनेन प्रत्यासत्तिरादेयस्य लक्ष्यते । पुष्पप्रचायः । हस्तादाने किम् । वृक्षाग्रस्थानां फलानां यष्ट्या प्रचयं करोति । अस्तेये किम् । पुष्पप्रचयः चौर्येण । ३२१३ **निवासचितिशरीरोपसमाधानेष्वादेश्च कः** ३।३।४१॥ एषु चिनोतेर्घञ् स्यात् । आदेश्च ककारः । उपसमाधानं राशीकरणम् , तच्च धात्वर्थः । अन्ये प्रत्ययार्थस्य कारकस्योपाधिभूताः । निवासे-काशीनिकायः । चितौ-आकायमग्नि

स्किरचेति विग्रह इति भावः। ननु 'सात्पदाद्योः'इति निषेधादादेशसकारोऽभावात्कथमिह षत्वमित्यत आह—छन्दोनाम्नीति । वृत्तासनयो'र्विष्टरः' इत्युत्तरं सूत्रम् । वेदप्रसिद्धसंज्ञायां विष्टरशब्दः निपात्यते इत्यर्थः । उदि ग्रहः । उदित्युपपदे ग्रहधातोः घञित्यर्थः 'ग्रहिवृदृनिश्चिगमश्च' इत्यप्रत्ययस्य वक्ष्यमाणस्याऽपवादः समि मुष्टौ । समित्युपपदे ग्रहधातोर्घञ् स्यात् मुष्टिविषये धात्वर्थे गम्ये इत्यर्थः । मल्लस्य संग्राह इति । दृढग्रहणं मुष्टेरित्यर्थः । परिन्योः । द्यूते अभ्रेषे चेति । द्यूतविषये नयने अभ्रेषविषये गमने च विद्यमानादित्यर्थः । अचोऽपवादः । शारान् । अक्षान् । एषोऽत्र न्याय इति । अभ्रेषेण वर्तनमित्यर्थः । उचितस्यार्थस्य अनपचारः अभ्रेषः । तदाह-उचितमिति । परावनुपात्यय इणः । परौ उपपदे इण्धातोर्घञ् अनुपात्यये गम्ये इत्यर्थः । तव पर्याय इति । अनतिक्रमणमित्यर्थः । कालस्य पर्यय इति । अतिक्रम इत्यर्थः । तदाह—अतिपात इति । व्युपयोः शेतेः । वि, उप, इत्युपपदयोः शीङ् धातोः घञ् स्यात् पर्याये गम्ये इत्यर्थः । अजपवादः। पर्यायः प्राप्तोऽवसरः । हस्तादाने । हस्तादाने गम्ये चिञ्धातोर्घञ् न तु स्तेये इत्यर्थः। ननु वृक्षशिखरमात्रमारुह्य पुष्पावचयं करोतीत्यत्राऽतिव्याप्तिमाशङ्क्य आह—प्रत्यासत्तिरिति । आदेयस्य पुष्पादिद्रव्यस्य भूमिस्थितपुरुषीयहस्तग्रहणयोग्यावस्थितिरित्यर्थः । पुष्पप्रचयं चौर्येणेति । 'करोती'ति शेषः । निवास । 'अकर्तरि च कारके' इति 'भावे' इति चानुवर्तत एव । अन्ये इति । निवासचितिशरीरात्मका अर्था इत्यर्थः । उपा-

चिन्वीत। शरीरे–चीयतेऽस्मिन्नस्थ्यादिकमिति कायः। समूहे–गोमयनिकायः। एषु किम्। चयः। 'चः कः' इति वक्तव्ये आदेरित्युक्तिर्यङ्लुक्यादेरेव यथा स्यादिति। गोमयानां निकेचायः। पुनःपुना राशीकरणमित्यर्थः। **३२१४ सङ्घे चानौत्तराधर्ये ३।३।४२॥** चेर्घञ्, आदेश्च कः। भिक्षुनिकायः। प्राणिनां समूहः सङ्घः। अनौत्तराधर्ये किम्। सूकरनिचयः। स्तन्यपानादौ उत्तराधरभावेन शेरते। सङ्घे किम्। ज्ञानकर्मसमुच्चयः। **३२१५ कर्मव्यतिहारे णच्स्त्रियाम् ३।३।४३॥** स्त्रीलिङ्गे भावे णच्। **३२१६ णचः स्त्रियामञ् ५।४।१४॥** (णजन्तात्स्त्रियामञ्)। **३२१७ न कर्मव्यतिहारे ७।३।६॥** अत्र ऐज्न स्यात्। व्यावक्रोशी। व्यावहासी। **३२१८ अभिविधौ भाव इनुण् ३।३।४४॥ ३२१९ अणिनुणः ५।४।१५॥** (इनुणन्तादण् स्यात्स्वार्थे)। आदिवृद्धिः। 'इनण्यनपत्ये' (सू १२४५)। (अनपत्यार्थेऽणि परे इन् प्रकृत्या स्यात्)। स्वभावतः पुंलिङ्गे सांराविणं वर्तते। **३२२० आक्रोशेऽवन्योर्ग्रहः ३।३।४५॥** अव, नि, एतयो-

---

धिभूता इति। विशेषणभूता इत्यर्थः। अजपवादः। काशी निकाय इति। निचियते मोक्षोऽत्रेत्यधिकरणे घञ्। काशी मोक्षाजनस्य निवास इत्यर्थः। 'चजोः कु घिण्ण्यतोः' इत्यस्य अण्यवहितयोरेव चजोः प्रवृत्तेरिह कत्ववचनम्। आकायमिति। आचीयते इति कर्मणि घञ्। शरीरे इति। उदाहरणसूचनमिदम्। समूहे इति। उपसमाधानस्योदाहरणसूचनम्। निचीयते राशीक्रियते इति भावे घञ्। ननु 'निवासचितिशरीरोपसमाधानेषु चः कः' इत्येवास्तु। चकारस्य ककार इत्यर्थलाभादित्यत आह—चः क इति वक्तव्य इति। पुनःपुना राशीति। अत्र 'रो रि' इति लोपे 'ढ्रलोप' इति दीर्घः। संघे चानौत्तराधर्ये। चेर्घञिति। शेषपूरणमिदम्। चेर्घञ् स्यात् सङ्घे चाप्ये न चौत्तराधर्ये इत्यर्थः। उत्तराधरयोर्भावः औत्तराधर्यम्। प्राणिनां समूहः सङ्घ इति। व्याकरणमेवात्र शरणम्। कर्मव्यतिहारे। कर्मव्यतिहारः क्रियाविनिमयः परस्परकरणम्, तस्मिन्विषये धातोर्णच् स्यात् स्त्रीत्वे गम्ये इत्यर्थः। अत्र 'अकर्तरि च कारके' इति तु नानुवर्तते, व्याख्यानादिति बोध्यम्। व्यावक्रोशीति। परस्परं निन्दक इत्यर्थः। व्यावहासीति। परस्परं हासक इत्यर्थः। उभयत्रापि 'णचः स्त्रियामञ्' इति स्वार्थिकोऽञ् तद्धितः। 'टिड्ढ' इति ङीप्। अभिविधौ। कात्स्न्येन संबन्धः अभिविधिः तस्मिन् गम्ये इनुण् स्यात् भावेऽर्थे इत्यर्थः। 'अणिनुण' इत्यनेन सूत्रेण इनुणन्तात् अण् तद्धितः स्वार्थिक इत्यर्थः। आदिवृद्धिरिति। 'तद्धितेष्वचामादेरि'त्यनेनेति शेषः। सांराविन् अ इति स्थिते 'नस्तद्धिते' इति टिलोपमाशङ्क्य प्रकृतिभावं स्मारयति–इनण्यनपत्य इति। स्वभावत इति। लोकाव्यवत्वाद्विशेषेति भावः। आक्रोशेऽवन्योर्ग्रहः। एतयोरिति। उपपदयोरिति शेषः। 'ग्रहवृदृनिश्चिगमश्च' इति वचनमाणस्य अप्रत्ययस्यापवादः। 'अवग्रह' इत्यस्य विब-

ग्रहेर्घञ्स्यात् शापे । अवग्राहस्ते भूयात् । अभिभव इत्यर्थः । निग्राहस्ते भूयात् । बाध इत्यर्थः । आक्रोशे किम् । अवग्रहः पदस्य । (छेदः पदस्येत्यर्थः) । निग्रहश्चोरस्य । (निरोधश्चोरस्येत्यर्थः) । **३२२१ प्रे लिप्सायाम् ३।३।४६ ॥** पात्रप्रग्राहेण चरति भिक्षुः । अन्यत्र पात्रप्रग्रहः । **३२२२ परौ यज्ञे ३।३।४७॥** उत्तरः परिग्राहः । स्फ्येन वेदेः स्वीकरणम् । **३२२३ नौ वृ धान्ये ३।३।४८॥** वृ इति लुप्तपञ्चमीकम् । नीवाराः । धान्ये किम् । निवरा कन्या । क्तिन्विषयेऽपि बाहुलकादप् । प्रवरा सेना, प्रवरा गौरितिवत् । एवं च स्त्रीलिङ्गोऽपि । **३२२४ उदि श्रयतियौतिपूद्रुवः ३।३।४९ ॥** उच्छ्रायः । उद्यावः । उत्पावः । उद्द्रावः । कथं 'पतनान्ताः समुच्छ्रयाः' इति । बाहुलकात् । **३२२५ विभाषाऽङि रुप्लुवोः ३।३।५०॥** आरावः । आरवः । आप्लावः । आप्लवः । **३२२६ अवे ग्रहो वर्षप्रतिबन्धे ३।३।५१॥** विभाषेति वर्तते । देवस्य अवग्रहः । अवग्राहः । देवकर्तृकमवर्षणमित्यर्थः । वर्षप्रतिबन्धे किम् । अवग्रहः पदस्य । **३२२७ प्रे**

रणम्-छेदः पदस्येति । **पुरोहितमित्यादिसमस्तपदस्य पुरः हितमित्यादि विभज्य पठनमवग्रह इत्यर्थः । अत्र शापानवगमाद्** घञ् । **'निग्रह' इत्यस्य विवरणम्**—निरोधश्चोरस्येति । **प्रे लिप्सायाम् । प्र इत्युपपदे ग्रहधातोर्घञ् स्यात् लिप्सायामित्यर्थः । 'ग्रहवृदृनिश्चिगमश्च' इत्यपोऽपवादः ।** पात्रप्रग्राहेण चरति भिक्षुरिति । **'भिक्षालाभाये'ति गम्यते ।** अन्यत्रेति । **लिप्सायामगम्यायामित्यर्थः ।** परौ यज्ञे । **परि इत्युपपदे ग्रहधातोर्घञ् स्यात् यज्ञे प्रयुज्यमाने इत्यर्थः । 'ग्रहवृदृ' इत्यपोऽपवादः ।** उत्तरः परिग्राह इति । **'वसवस्त्वा' इत्यादिमन्त्रैः पूर्वं परिग्राहो वेदेरुक्तः । तदपेक्षया द्वितीय इत्यर्थः ।** स्फ्येनेति । **स्फ्यः खड्गाकृतिः दारुमयः पात्रविशेषः । तेन समन्तात्रेखया वेदिदेशस्य स्वीकरणं परिग्राह इत्यर्थः ।** नौ वृ धान्ये । **नि इत्युपपदे वृधातोर्घञित्यर्थः । 'ग्रहवृदृ' इत्यपोऽपवादः ।** नीवारा इति । **'उपसर्गस्य घञ्यमनुष्ये' इति दीर्घः ।** निवरा कन्येति । **नितरां वरणीयेत्यर्थः ।** 'ग्रहवृदृ' इत्यप् । **ननु 'प्रवरा कन्ये'त्यत्र कथमप्, स्त्रियां क्तिनः प्रसङ्गात्, नञ्यत्र वाऽसरूपविधिः प्रवर्तते । अजन्त्यां स्त्रीखलनाः विप्रतिषेधेन' इत्युक्तेरित्यत आह**—क्तिन्विषयेऽपीति । **तत्र वृद्धप्रयोगं प्रमाणयति**—प्रवरा सेना, प्रवरा गौरितिवदिति । **ननु 'घञजबन्ताः पुंसि' इत्यबन्तस्य पुंस्त्वात् स्त्रीत्वं दुर्लभमित्यत आह**—एवं चेति । **उक्तवृद्धप्रयोगादित्यर्थः । लोकाश्रयत्वाच्चेत्येव भावः ।** उदि श्रयति । **उत् इत्युपपदे श्रि, यु, पू, द्रु एभ्यः घञित्यर्थः ।** अजपोरपवादः । **विभाषाङि रुप्लुवोः । पञ्चम्यर्थे षष्ठी । आङि उपपदे रु, प्लु, आङ्पूर्वात् घञित्यर्थः ।** अपोऽपवादः । **अवे ग्रहो वर्ष । अव इत्युपपदे ग्रहधातोर्घञ् वा स्यात् वर्षप्रतिबन्धे इत्यर्थः । पक्षे 'ग्रहवृदृ' इत्यप् ।** देवस्येति । **पर्जन्यस्येत्यर्थः ।** कर्तरि षष्ठी । **तदाह**—देवकर्तृकमिति ।

वणिजाम् ३।३।५२॥ प्रे प्रहेर्घञ्वा वणिजां सम्बन्धी चेत्प्रत्ययार्थः। तुलासूत्रमिति यावत्। तुलाप्रग्राहेण चरति। तुलाग्रग्रहेण। **३२२८ रश्मौ च ३।३।५३॥** प्रग्रहः। प्रग्राहः। **३२२९ वृणोतेराच्छादने ३।३।५४॥** विभाषा प्र इत्येव। प्रावारः। प्रवरः। **३२३० परौ भुवोऽवज्ञाने ३।३।५५॥** परिभावः। परिभवः। अवज्ञाने किम्। सर्वतो भवनं परिभवः। **३२३१ एरच् ३।३।५६॥** चयः। जयः। 'भयादीनामुपसङ्ख्यानं नपुंसके क्त्वादिनिवृत्त्यर्थम्' (वा २१९७-९८)। भयम्। वर्षम्। **३२३२ ऋदोरप् ३।३।५७॥** ऋवर्णान्तादुवर्णान्तादप्। करः। गरः। शरः। यवः। लवः। स्तवः। पवः। **३२३३ वृत्तासनयोर्विष्टरः ८।३।९३॥** अनयोर्विपूर्वस्य सः षत्वं निपात्यते। विष्टरो वृक्ष आसनं च। वृक्ष—इति किम्। वाक्यस्य विस्तरः। **३२३४ ग्रहवृदृनिश्चिगमश्च ३।३।५८॥** अप्स्यात्। घञ्चोरपवादः। ग्रहः। वरः। दरः। निश्चयः। गमः। 'वशिरण्योरुपसङ्ख्यानम्' (वा २२०३)। वशः। रणः। 'घञर्थे कविधानम्' (वा २२०४) प्रस्थः। विघ्नः। 'द्वित्वप्रकरणे के कृत्रादीनामिति वक्तव्यम्' (वा ३४२९)।

अवग्रहः पदस्येति। **समस्तस्य पदद्वयस्य विच्छिद्य पाठ इत्यर्थः।** प्रे वणिजाम्। **'ग्रह वृह' इत्यपोऽपवादः।** तुलासूत्रमिति। **व्याख्यानादिति यावत्।** तुला घटा। रश्मौ च। **प्रे उपपदे, ग्रहधातोर्घञ् रश्मावपि वाच्ये इत्यर्थः।** चशब्दः उक्तसमुच्चये। वृणोतेराच्छादने। **प्रे उपपदे वृधातोर्घञ्वा स्यादाच्छादने इत्यर्थः।** पक्षे **'ग्रहवृह' इत्यप्।** प्रावार इति। पट इत्यर्थः। **'उपसर्गस्य घञि' इति दीर्घः।** परौ भुवोऽवज्ञाने। **परि इत्युपपदे अवहेलनवृत्तेर्भूधातोर्घञ् स्यादित्यर्थः।** एरच्। **इवर्णान्ताद्धातोः अच् स्यात् भावे अकर्तरि च कारके इत्यर्थः।** घञपवादः। भयादीनामिति। **भयादीनां सिद्धये भीप्रभृतिधातुभ्यः अच्प्रत्ययस्योपसङ्ख्यानमित्यर्थः।** ननु 'एरच्' इत्येव सिद्धे भयग्रहणं व्यर्थमित्यत आह—नपुंसके क्त्वादिनिवृत्त्यर्थमिति। आदिना ल्युडादिसंग्रहः। अन्यथा परत्वात् क्त्वादयः स्युः। वाऽसरूपविधिस्तु नात्र भवति। अपवादत्वाऽभावादिति भावः। वर्षमिति। अत्र नपुंसके क्त्वल्युडादि बाधित्वा अच् अपूर्वो विधीयते। ऋदोरप्। पञ्चम्यर्थे षष्ठी। ऋत, उ, अनयोः समाहारे सौत्रं पुंस्त्वम्। ऋदन्तादुवर्णान्ताच्च अप् स्याद्भावे अकर्तरि च कारके इत्यर्थः। घञपवादः। ग्रहवृदृ। ग्रह, वृ, दृ, निश्चि, गम, एषां द्वन्द्वः। 'अप् स्या'दिति शेषः। घञचोरिति। निष्पूर्वाच्चिञः अजपवादः, इतरेभ्यस्तु घञपवाद इति विवेकः। वशिरण्योरिति। वार्तिकम्। घञपवादः अप्। वश इति। वश कान्तौ, भावे अप्। इच्छेत्यर्थः। यद्यपि वशधातुः छान्दसः। तथापि 'वष्टि भागुरिरित्यादिप्रयोगात् लोकेऽपि प्रयुज्यते इति भावः। रण इति। रणन्ति शब्दायन्ते अस्मिन्निति रण्यः संग्रामः। घञर्थे कविधानमिति। वार्तिकमिदम्। 'स्थाघ्वोरिच्चे'त्यधिकारेऽयं निपातनार्थम्।

चक्रम्। चिक्लिदम्। चङ्क्रमः। (चक्नसः)। ३२३५ **उपसर्गेऽदः ३।३।५६॥** अप्स्यात्। ३२३६ **घञपोश्च २।४।३८॥** अदेर्घस्तृ स्याद्घञ्यपि च। प्रघसः। विघसः। उपसर्गे किम्। घासः। ३२३७ **नौ ण च ३।३।६०॥** नौ उपपदे अदेर्णः स्यादप् च। न्यादः। निघसः। ३२३८ **व्यधजपोरनुपसर्गे ३।३।६१॥** अप्स्यात्। व्यधः। जपः। उपसर्गे तु, आव्याधः। उपजापः मन्त्रभेदः। ३२३९ **स्वनहसोर्वा ३।३।६२॥** अप्। पक्षे घञ्। स्वनः। स्वानः। हसः। हासः। अनुपसर्ग इत्येव। प्रस्वानः। प्रहासः। ३२४० **यमः समुपनिविषु च ३।३।६३॥** एष्वनुपसर्गे च यमेरब्वा। संयमः। संयामः। उपयमः। उपयामः। नियमः। नियामः। वियमः। वियामः। यमः। यामः। ३२४१ **नौ गदनदपठस्वनः ३।३।६४॥** अब्वा स्यात्। निगदः। निगादः। ननदः। निनादः। निपठः। निपाठः। निस्वनः। निस्वानः। ३२४२ **क्वणो वीणायां च ३।३।६५॥** नावनुपसर्गे च वीणाविषयाच्च क्वणतेरब्वा स्यात्। वीणाग्रहणं प्राय-

---

इति वार्तिकशेषो भाष्ये पठितः। प्रस्थ इति। प्रतिष्ठन्तेऽस्मिन् धान्यानीति प्रस्थः। 'आतो लोप इटि च' इत्यालोपः। प्रस्नान्त्यस्मिन्निति प्रस्नः। प्रपिबन्त्यस्या मिति प्रपा। आविध्यन्त्यस्मिन्नित्याविधम्। 'ग्रहिज्यावयिव्यधि' इति सम्प्रसारणम्। इति सिद्धवत्कृत्य आह—विघ्न इति। विहन्त्यस्मिन्मनांसीति विघ्नः। 'गमहन' इत्युपधालोपः 'हो हन्तेः' इति कुत्वम्। आयुध्यतेऽनेनेत्यायुधमित्यप्युदाहार्यम्। द्वित्वप्रकरणे इति। 'एकाचो द्वे प्रथमस्य' इति द्वित्वप्रकरणे इत्यर्थः। के कृञादीनामिति। कप्रत्यये परे कृञादीनां एकाचः प्रथमस्य द्वे स्त इत्यर्थः। चक्रमिति। 'स्थास्ना' इत्यस्य उपलक्षणत्वात् कृञः कः। क्रियते शत्रुवधः अनेनेति विग्रहः। किरवाच्च गुणः। द्वित्वम् अभ्यासकार्यम्। चिक्लिदमिति। कः द्वित्वादि। चङ्क्रम इति। पूर्ववत्। उपसर्गेऽदः। 'अद' इति छेदः। 'अप् स्या'दिति शेषः उपसर्गे उपपदे अदधातोः अप् स्यादित्यर्थः। घञोऽपवादः। घञ्वोश्च। 'अदो जग्धिः' इत्यतः अद इति 'ल्युट्सनोर्घञ्ल्यु' इत्यतः घञ्ल इति चानुवर्तते। तदाह—अदेरिति। अपि चेति। अप्प्रत्यये चेत्यर्थः। विघस इति। अतिथिशिष्टमन्नमुच्यते। घास इति। 'शष्पं बालतृणं घासः' इत्यमरः। नौ ण च। णेति लुप्तप्रथमाकम्। निघस इति। 'घञपोश्च' इति घञ्लभावः। व्यधजपोः। पञ्चम्यर्थे षष्ठी। 'अप् स्या'दिति शेषः। व्यध, जप्, आभ्यां अप् स्यात्, न तूपसर्गे इत्यर्थः। उपजापो मन्त्रभेद इति। पैशुन्यमित्यर्थः। स्वनहसोर्वा। पञ्चम्यर्थे षष्ठी। अबिति शेषः। स्वन, हस, आभ्यामब्वेत्यर्थः। यमः समुप। सम्, उप, नि, वि, एषां द्वन्द्वः। चकरादनुपसर्गे इति समुच्चीयते। तदाह—एष्वनुपसर्गे चेति। नौ गदनद। गद, नद, पठ, स्वन, एषां द्वन्द्वः। अब्वेति। शेषपूरणमिदम्। क्वणो वीणायां च। नाविति। नौ उपपदे च तदितरस्मिन्नुपसर्गे असति च वीणाविषयाच्चेत्यर्थः। ननु क्वणश्चेत्ये-

र्णम् । निक्कणः । निक्काणः । क्कणः । क्वाणः । वीणायां तु-प्रक्वणः । प्रक्वाणः । **३२४३ नित्यं पणः परिमाणे** ३।३।६६॥ अप् स्यात् । मूलकपणः । शाकपणः । व्यवहारार्थं मूलकादीनां परिमितो मुष्टिर्बध्यते सोऽस्य विषयः । परिमाणे किम् । पाणः । **३२४४ मदोऽनुपसर्गे** ३।३।६७॥ धनमदः । उपसर्गे तु, उन्मादः । **३२४५ प्रमदसंमदौ हर्षे** ३।३।६८॥ हर्षे किम् । प्रमादः । संमादः । **३२४६ समुदोरजः पशुषु** ३।३।६९॥ सम्पूर्वोऽजिः समुदाये, उत्पूर्वश्च प्रेरणे तस्मात्पशुविषयकादप्स्यात् । 'अघञपोः' इत्युक्तेर्वीभावो न । समजः पशूनां संघः । उदजः पशूनां प्रेरणम् । पशुषु किम् । समाजो ब्राह्मणानाम् । उदाजः क्षत्रियाणाम् । **३२४७ अक्षेषु ग्लहः** ३।३।७०॥ अक्षशब्देन देवनं लक्ष्यते, तत्र यत्पणरूपेण ग्राह्यं तत्र 'ग्लहः' इति निपात्यते । अक्षस्य ग्लहः । 'व्यात्युक्षीमभिसरणग्लहामदीव्यन् । अक्षेषु किम् । पादस्य ग्रहः । **३२४८ प्रजने सर्तेः**

तावता नौ उपसर्गे च क्कण्यः अन्वेत्यर्थलाभात् वीणाविषयादपि क्कणः सिद्धेःवीणायामिति व्यर्थमित्यत आह-वीणाग्रहणं प्राधान्यार्थमिति । **सोपसर्गार्थमित्यर्थः** । नित्यं पणः 'अबि'ति शेषः । 'पण व्यवहारे' इत्यस्मान्नित्यमप् स्यात् परिमाणविशेषे गम्ये इत्यर्थः । नित्यग्रहणाद्वाग्रहणं निवृत्तम् । व्यवहारार्थमिति । विक्रयार्थमित्यर्थः । पण्यते विक्रयार्थं बध्यते मुष्टिमात्रमिति कर्मण्यण् । मूलकानां पण इति विग्रहः । मदोऽनुपसर्गे । अनुपसर्गे उपपदे मदेरित्यर्थः । प्रमदसम्मदौ । प्रमद्, संमद्, एतावन्तौ निपात्येते हर्षे गम्ये इत्यर्थः । कन्यानां प्रमदः। कोकिलानां सम्मदःइत्युदाहरणम्। 'प्रसमोर्मदो हर्षे'इत्येव सिद्धे निपातनं रूढिपरिग्रहार्थम् । समुदोरजः । **समुदोः अजः**इति च्छेदः । सम्, उत्, अनयोः उपपदयोरित्यर्थः । अक्षेषु ग्लहः । अक्षशब्दे उपपदे इत्यर्थे अक्षेष्विति बहुवचनानुपपत्तिरित्यत आह-अक्षशब्देनेति । लक्ष्यते इति । **प्रायेण देवनस्य अक्षसाध्यत्वादिति भावः** । तत्रेति । देवने इत्यर्थः । पणरूपेणेति । देवने जितवते पराजितेन देयं द्रव्यं, पणं तेन रूपेण ग्राह्यं यद्द्रव्यं तस्मिन् कर्मणि 'ग्रह उपादाने' इति धातोः 'ग्रहवृह' इत्यप्प्रत्ययान्तः कृतलत्वो ग्लहशब्दो निपात्यते इत्यर्थः । 'गृहू ग्रहणे' इत्यत्र तु 'ग्लह च' इति पठितम् । तत्र ग्लहेरप्प्रत्ययो निपात्यते । घञपवादः । अक्षस्य ग्लह इति । **अक्षक्रीडायां पणत्वेन ग्राह्यमित्यर्थः** । 'पणोऽक्षेषु ग्लहः' इत्यमरः । अत्र देवनत्वरूपेण देवनसाधकत्वरूप लक्षणम्, न त्वक्षदेवनत्वेनेत्यभिप्रेत्योदाहरति—व्यात्युक्षीमिति । माधवकाण्वस्यमिदम् । 'दिवस्तदर्थस्य' इति करणस्य कर्मत्वात् द्वितीया । अभिसरणग्लहाम् । अभिसरणं चौर्यसुरतार्थमभिगमनम् । तदेव ग्लहः पणरूपेण ग्राह्यं द्रव्यं यस्याः तथाविधां व्यात्युक्षीम् । 'उक्ष सेचने' परस्परं उक्षसेचनं व्यात्युक्षी तयेत्यर्थः । कर्मण्यतिहारे णच् स्त्रियाम्' इति णच् । व्यात्युक्षशब्दात् 'णचः स्त्रियामम्' इति स्वार्थे अम् तद्धितः ।

३।३।७१॥ प्रजनं प्रथमगर्भग्रहणम्। गवामुपसरः। कथम् अवसरः प्रसर इति। अधिकरणे 'पुंसि संज्ञायाम्—' (सू ३२९६) इति घः। ३२५९ ह्वः सम्प्रसारणं च न्यभ्युपविषु ३।३।७२॥ निह्वः। अभिह्वः। उपह्वः। विह्वः। एषु किम्। प्रह्वायः। ३२५० आङि युद्धे ३।३।७३॥ आह्वयन्तेऽस्मिन्नित्याहवः। युद्धे किम्। आह्वायः। ३२५१ निपानमाहावः ३।३।७४॥ आङ्पूर्वस्य ह्वयतेः सम्प्रसारणमब्वृद्धिश्चोदकाधारश्चेद्वाच्यः। 'आहावस्तु निपानं स्यादुपकूपजलाशये'। ३२५२ भावेऽनुपसर्गस्य ३।३।७५॥ अनुपसर्गस्य ह्वयतेः सम्प्रसारणमप् च स्याद्भावे। हवः। ३२५३ हनश्च वधः ३।३।७६॥ अनुपसर्गाद्धन्तेर्भावे अप्स्यात्। वधादेशश्चान्तोदात्तः। 'वधेन दस्युम्'। चादूघञ्। घातः। ३२५४ मूर्तौ घनः ३।३।७७॥ मूर्तिः काठिन्यं, तस्मिन्नभिधेये हन्तेरप्स्यात्, घनश्चादेशः। अभ्रघनः। कथम् 'सैन्धवघनमानय' इति। धर्मशब्देन धर्मी ल-

---

आदिवृद्धिः। 'टिड्ढ' इति ङीप्। क्रीडायां जितवते पुंसे अभिसरणमेव पणत्वेन समबबन्धं कृत्वा प्रवृत्तेन परस्परजलसेचनेन अक्रीडिषि यावत्। अत्र जलक्रीडायामभिसरणात्मकपणस्य अक्षसाधनकत्वाऽभावेपि रलहेरप् भवत्येव। सूत्रे अक्षशब्देन देवनसामान्यस्य विवक्षितत्वात्। अक्षक्रीडाया एव विवक्षितत्वे त्विह रलहेरप् न स्यादिति भावः। अक्षेषु किमिति। देवने किमित्यर्थः। पादस्य ग्रह इति। वन्दनार्थमिति भावः। अत्र ग्रहधातोः 'ग्रहवृद' इत्यप्। न तु कत्वम्। रलहेस्तु घञि पादस्य ग्लाह इत्येव। प्रजने सर्तेः। प्रजनं प्रथमगर्भग्रहणमिति। प्रशब्द आद्यर्थकः। प्रथमं जायते इति भावे घञ्। 'जनिवध्योश्च' इति नोपधावृद्धिरिति भावः। प्रजनाऽर्थकात् सृधातोरप् स्यादिति फलितम्। कथमिति। उपसरणं प्रसरणमित्यर्थं प्रजनाऽप्रतीतेरवभावात् घञि उपधावृद्धिः स्यादित्याक्षेपः। समाधत्ते—अधिकरण इति। उपसरत्यस्मिन्निति, प्रसरत्यस्मिन्निति च अधिकरणकारके कालेऽर्थे 'पुंसि संज्ञायां घः प्रायेण' इति घप्रत्यय इत्यर्थः। ह्वः सम्प्रसारणं च। नि, अभि, उप, वि एषु चतुर्पूपपःषु ह्वयतेरप् सम्प्रसारणं च। घञोऽपवादः। निह्व इति। अप्। वस्य सम्प्रसारणमुकारः, पूर्वरूपं, तस्य गुणाऽवादेशौ। प्रह्वाय इति। घञि वृद्धयायादेशौ। आङ युद्धे। आङ उपपदे ह्वयतेरप्, सम्प्रसारणं च युद्धे वाच्ये इत्यर्थः। निपानमाहावः। आहाव इति निपात्यते निपानं चेद्वाच्यमित्यर्थः। फलितमाह—आङ्पूर्वस्येति। हनश्च वधः। चकारो व्युत्क्रमः। तदाह—वधादेशश्चेति। अन्तोदात्त इति। सूत्रे वध इत्यन्तोदात्तस्योच्चारणादि त भावः। यद्यपि स्वतन्त्रवधेरेव 'घञर्थे कविधानम्' इत्येव सिध्यति। तथाप्यनुपसर्गादिति विशेषं वक्तुमिदम्। वस्तुतो वधिः स्वतन्त्रो नास्त्येवेति शब्देन्दुशेखरे। वधेन दस्युमिति। ऋग्वेदस्थोऽयं मन्त्रः स्वरप्रदर्शनाय पठितः। घात इति। 'हनस्तोऽचिण्णलोः' इति तत्वम्। 'चजोः' इति कुत्वम्। मूर्तौ घनः। अभ्र-

च्यते। ३२५५ **अन्तर्घनो देशे ३।३।७८॥** वाहीकग्रामविशेषस्य संज्ञेयम्। अन्तर्घणः इति पाठान्तरम्। ३२५६ **अगारैकदेशे प्रघणः प्रघाणश्च ३।३।७९॥** द्वारैकदेशे द्वौ प्रकोष्ठावलिन्दौ आभ्यन्तरो बाह्यश्च। तत्र बाह्ये प्रकोष्ठे निपातनमिदम्। प्रविशद्भिर्जनैः पादैः प्रकर्षेण हन्यते इति प्रघणः। प्रघाणः। कर्मण्यप्। पक्षे वृद्धिः। ३२५७ **उद्धनोऽत्याधानम् ३।३।८०॥** अत्याधानमुपरि स्थापनम्। यस्मिन्काष्ठेऽन्यानि काष्ठानि स्थापयित्वा तक्ष्यन्ते तदुद्धनः। अधिकरणेऽप्। ३२५८ **अपघनोऽङ्गम् ३।३।८१॥** अङ्गं शरीरावयवः। स चेह न सर्वः, किं तु पाणिः पादश्चेत्याहुः। करणेऽप्। अपघातोऽन्यः। ३२५९ **करणेऽयोविद्रुषु ३।३।८२॥** एषु हन्तेः करणेऽप्स्याद्घनादेशश्च। अयो हन्यतेऽनेनेत्ययोघनः। विघनः। द्रुघनः। द्रुघण इत्येके। 'पूर्वपदात्संज्ञायाम्-' (सू ८५७) इति णत्वम्। संज्ञैषा कुठारस्य। दुर्वृक्षः। ३२६० **स्तम्बे क च ३।३।८३॥** स्तम्बे उपपदे हन्तेः करणे कः स्यादप्च, पक्षे घनादेशश्च। स्तम्बघ्नः। स्तम्बघनः। करण इत्येव। स्तम्बघातः। ३२६१ **परौ घः ३।३।८४॥** परौ हन्तेरप्स्यात्करणे घशब्दश्चादेशः। परिहन्यतेऽनेनेति परिघः। ३२६२ **परेश्च घाङ्कयोः ८।२।२२॥** परेः रेफस्य लो वा स्याद्घशब्देऽङ्कशब्दे च। पलिघः। परि-

---

घन इति। अभ्रस्य काठिन्यमित्यर्थः, भाव इत्यनुवृत्तेः। कथमिति। सैन्धवकाठिन्यस्यानयनाम्बयासम्भवादिति भावः। समाधत्ते-धर्मशब्देनेति। अन्तर्घनो देशे। देशविशेषे वाच्ये अन्तरित्युपपदे हन्तेरप् प्रकृतेर्घनादेशश्चेत्यर्थः। निपातनात् 'पूर्वपदात्संज्ञायाम्' इति णत्वाऽभावः। अगारैकदेशे। अगारैकदेशशब्देन अगारैकदेशविशेषो विवक्षितः, व्याख्यानात्। तदाह—द्वारैकदेश इत्यादि। प्रकोष्ठौ दीर्घचतुरश्रिण्यौ, तौ अलिन्दनामानौ प्रवेशयोरग्यौ। उद्धनोऽत्याधानम्। अत्याधानं वाच्यं चेत् हपूर्वात् हन्तेरप्। हस्य घत्वे च 'उद्धन' इति निपात्यते इत्यर्थः। अपघनोऽङ्गम्। अङ्गं वाच्यं चेत् अपपूर्वाद्धन्तेरप्। हस्य घत्वे चाऽपघन इति निपात्यत इत्यर्थः। पाणिपादश्चेति। अत्र व्याख्यानमेव शरणम्। करणे इति। अपहन्यतेऽनेनेति करणव्युत्पत्तेरिति भावः। करणेऽयोविद्रुषु।अयस्, वि, द्रु, एषां द्वन्द्वः। द्रुघन इति। असंज्ञात्वात् 'पूर्वपदात्संज्ञायाम्' इति न णत्वमिति भावः,संज्ञात्वमते आह—द्रुघण इति। स्तम्बे क च। केति लुप्तप्रथमाकम्। अप् च पक्षे इति। अप्सम्बद्धस्यैव घनादेशस्यानुवृत्तेरिति भावः। स्तम्बघ्न इति। कप्रत्यये सति 'गमहन' इत्युपधालोपः। स्तम्बघात इति। घञि 'चजोः' इति कुत्वम्। परौ घः। 'करणे हन' इति, अभिति चानुवर्तते। तदाह—परौ हन्तेरिति। परेश्च घाङ्कयोः। रेफस्य लो वेति। 'कृपो रो लः' इत्यतो 'रो ल' इति 'अचि विभाषा' इत्यतो विभाषेति चानुवर्तत इति भावः। ननु 'कृत्रिमाऽकृत्रिमयोः कृत्रिमे कार्यसम्प्रत्ययः'

घः । पर्यङ्कः । पल्यङ्कः । इह 'तरप्तमपौ घः' (सू २००३) इति कृञ्भिन्नस्य न ग्रहणं, व्याख्यानात् । **३२६३ उपघ्न आश्रये ३।३।८५॥** उपपूर्वाद्धन्तेरप्स्यादुपधालोपश्च । आश्रयशब्देन सामीप्यं लक्ष्यते । पर्वतेनोपहन्यते सामीप्येन गम्यत इति पर्वतोपघ्नः । **३२६४ संघोद्धौ गणप्रशंसयोः ३।३।८६॥** संहननं संघः । भावेऽप् । उद्धन्यते उत्कृष्टो ज्ञायत उद्युद्धः । कर्मण्यप् । गत्यर्थानां बुद्ध्यर्थत्वाद्धन्तिर्ज्ञाने । **३२६५ निघो निमितम् ३।३।८७॥** समन्तान्मितं निमितम् । निर्विशेषं हन्यन्ते ज्ञायन्ते इति निघाः वृक्षाः । समारोहपरिणाहाः इत्यर्थः । **३२६६ ड्वितः क्त्रिः ३।३।८८॥** अयं भाव एव स्वभावात् । 'क्त्रेर्मम्नित्यम्' (सू १५७०) क्त्रिप्रत्ययान्तान्मप् निवृत्तेऽर्थे । नित्यग्रहणात्क्त्रेर्मब्विषयः ।

इति न्यायादिह घसंज्ञकयोः तरप्तमपोरेव ग्रहणं स्यात्, नतु घशब्दस्य, 'स्वं रूपं शब्दस्य' इत्यत्र अशब्दसंज्ञेति पर्युदासाच्चेत्यत आह—इहेति । उपघ्न आश्रये । आश्रये गम्ये उपघ्न इति निपात्यते इत्यर्थः । फलितमाह—उपपूर्वादिति । लक्ष्यते इति । व्याख्यानादिति भावः । सङ्घोद्धौ । यथासङ्ख्यमन्वयः । गणे सङ्घ इति, प्रशंसायामुद्घ इति निपात्यते इत्यर्थः । सम्, उत्, अनयोरुपपदयोः हन्तेरपप्रत्ययः टिलोपः घत्वं च निपात्यते इति यावत् । संहननमिति । मेऽनमित्यर्थः, उपसर्गवशात् । गत्यर्थानामिति । 'सर्वे गत्यर्थाः ज्ञानार्थाः' इति न्यायादिति भावः । निघो । निमितं वाच्यं चेत् निघ इति निपात्यते इत्यर्थः । इहाप्यप् टिलोपः घत्वं च निपात्यते इत्यर्थः । निमितशब्दं व्याचष्टे—समन्तान्मितं निमितमिति । निः समन्तादित्यर्थं । अव्ययानामनेकार्थत्वादिति भावः । निर्विशेषमिति । इह 'नि' इत्यव्ययं निर्विशेषे, हन्तिर्ज्ञानार्थ इति भावः । समेति । समौ आरोहपरिणाहौ औन्नत्यस्थौल्ये येषामिति विग्रहः । ड्वितः क्त्रिः । ड्वः इत् यस्य सः ड्वित्तस्मात् क्त्रिप्रत्ययः स्यादित्यर्थः । ककार इत् । अयं भाव एवेति । अत्र भावे इत्येवानुवर्तते, न तु 'अकर्तरि च कारके' इत्यपीति भावः । स्वभावादिति । पाकादिना निवृत्तमित्यर्थे पक्त्रिममित्यादौ क्त्रिप्रत्ययान्तानां पाकादिष्वेव लोके प्रयोगदर्शनादिति भावः । क्त्रेर्मम्नित्यम् । चतुर्थस्य चतुर्थपादे इदं सूत्रम् । मप् नित्यमितिच्छेदः । निवृत्ते इति । 'निवृत्तेऽक्षद्यूतादिभ्यः' इत्यतस्तदनुवृत्तेरिति भावः । तद्धितप्रकरणे व्याख्यातमप्येतत् इह स्मरणाय पुनर्व्याख्यातम् । ननु इह नित्यग्रहणं व्यर्थम् । न च 'समर्थानां प्रथमाद्वा' इति महाविभाषानिवृत्त्यर्थं तदिति वाच्यम् । अत्र हि निवृत्तग्रहणमनुवर्तते । तथा च निवृत्तार्थविवक्षायां क्त्रिप्रत्ययात् मप्प्रत्ययस्य नित्यतया पक्त्र्यादिना निवृत्तमिति वाक्यनिवृत्तावपि पाकोऽस्तीत्यादिवत् 'पक्त्रिरस्ति, भविष्यती'त्यादयपि प्रसज्येत । तच्चाऽनिष्टम् । क्त्रिप्रत्ययान्तस्य निवृत्तार्थाऽविवक्षायामपि सर्वदा मप्प्रत्ययश्चिरस्कतया एवेष्टत्वादित्यत आह—नित्यग्रहणादिति । न हि महाविभाषानिवृत्त्यर्थं नित्यग्रहणम् । 'निवृत्तेऽक्षद्यू-

अत एव क्त्यन्तेन न विग्रहः। डु पचष्, पाकेन निर्वृत्तं पक्त्रिमम्। डु वप्। उप्त्रिमम्। ३२६७ ट्वितोऽथुच् ३।३।८६ ॥ अयमपि स्वभावाद्भाव एव। टु वेपृ, वेपथुः। श्वयथुः। ३२६८ यजयाचयतविच्छप्रच्छरक्षो नङ् ३।३। ९० ॥ यज्ञः। याच्ञा। यत्नः। विश्नः। प्रश्नः। 'प्रश्ने चासन्न' (सू २७७७) इति ज्ञापकान्न सम्प्रसारणम्। क्ङित्वं तु विश्न इत्यत्र गुणनिषेधाय। रक्ष्णः। ३२६९ स्वपो नन् ३।३।९१॥ स्वप्नः। ३२७० उपसर्गे घोः किः ३।३। ९२॥ प्रधिः। अन्तर्धिः। उपाधीयतेऽनेनेत्युपाधिः। ३२७१ कर्मण्यधिकरणे च ३।३।९३॥ कर्मण्युपपदे घोः किः स्यादधिकरणेऽर्थे। जलानि धीयन्तेऽस्मिन्निति जलधिः। ३२७२ स्त्रियां क्तिन् ३।३।९४॥ स्त्रीलिङ्गे भावादौ क्तिन्स्यात्। घञोऽपवादः। अजपौ तु परत्वाद्बाधते। कृतिः। चितिः। स्तुतिः। स्फायी-

---

तादिभ्यः क्त्रेस्तु मप्' इत्येकसूत्रत्वेनैव सिद्धे पृथग्योगकरणादेव महाविभाषानिवृत्तिसिद्धेः। तथा च नित्यग्रहणसामर्थ्यान्नित्यमिति योगान्तरं विज्ञायते। तथा च निर्वृत्ते इति निर्वृत्तम्। तथा च 'क्त्रिप्रत्ययान्तः निर्वृत्तार्थयोगे तदयोगे च सर्वदा मप्प्रत्ययान्त एव स्या'दिति लभ्यते। एवञ्च क्त्रिप्रत्ययो मप्प्रत्ययं विना केवलः क्वापि न प्रयुज्यते इति लभ्यत इत्यर्थः। एतच्च भाष्ये स्पष्टम्। अत एवेति। क्त्रिप्रत्ययस्य मप्प्रत्ययं विना प्रयोगाऽभावात् 'पक्त्र्या निर्वृत्त'मिति स्वपदविग्रहो नास्ति। किन्तु पाकेन निर्वृत्तमित्यस्वपदविग्रह इत्यर्थः। उप्त्रिममिति। क्त्रिस्वात् 'क्वचित्स्वपि' इति सम्प्रसारणमिति भावः। ट्वितोऽथुच्। अथुजिति छेदः। टुः इत् यस्येति विग्रहः। श्वयथुरिति। 'टु ओ श्वि गतिवृद्धयोः'। इत्यस्य रूपम्। यजयाच। 'अकर्तरि च कारके' इति भाव इति चानुवर्तते। याच्ञेति। नस्य श्चुत्वेन ञः। विश्न इति। विच्छेर्नङ्। 'च्छ्वोः' इति शः। एवं प्रच्छेर्नङि रूपम्। 'ग्रहिज्या' इति सम्प्रसारणमाशङ्क्य आह—प्रश्ने चेति। ननु सम्प्रसारणाऽभावे क्ङित्वं व्यर्थमित्यत आह—क्ङित्वं रिति। स्वपो नन्। नकारो निरनुबन्धार्थः। उपसर्गे घोः किः। भावे अकर्तरि च कारके। क्ङित्वमातो लोपार्थम्। प्रधिरिति। धाञो रूपम्। उपाधीयते इति। स्वनिष्ठधर्मः अन्यत्राऽऽसज्यते इत्यर्थः। कर्मण्यधिकरणे च। इह कर्म उपपदं, अधिकरणमर्थः व्याख्यानात्। तदाह—कर्मण्युपपद इत्यादि। स्त्रियां क्तिन्। 'कृत्यल्युटो बहुलम्' इत्यतः प्राक् स्त्रियामित्यधिक्रियते। स्त्रीलिङ्ग इति। स्त्रीत्वविशिष्टे भावे अकर्तरि च कारके इत्यर्थः। धातुमात्रादयं क्तिन्। घञोऽपवाद इति। 'हलश्च' इति वक्ष्यमाणघञोऽपवाद इत्यर्थः। एवञ्च स्त्रीत्वविशिष्टे भावादौ क्तिनेव। घञ् तु पुंस्त्वविशिष्टभावादाविति लभ्यते। वाऽसरूपविधिनात्र प्रवर्तते, 'अस्त्रिया'मित्युक्तेः। ननु तर्हि इकारान्तात्, ऋकारान्तात्, ऊकारान्ताच्च स्त्रीत्वविशिष्टे भावादौ 'परत्व' इति 'ऋदोरप्' इति च अजपावेव क्तिनं बाधित्वा स्याताम्, विशेषविहितत्वात्।

स्फातिः । 'स्फीतिकामः' इति तु प्रामादिकम् । क्तान्ताद्धात्वर्थे णिचि 'अच इः' इति वा समाधेयम् । 'श्रयजीषिस्तुभ्यः करणे' (वा २२११)। श्रूयतेऽनया श्रुतिः । यजेरिषेश्च इष्टिः । स्तुतिः । 'ऋल्वादिभ्यः क्तिन्निष्ठावद्वाच्यः (वा ४८२६) । तेन न्नत्वम् । कीर्णिः । गीर्णिः । लूनिः । धूनिः । पूनिः । 'ह्लादः' (सू ३०७३) इति योगविभागात्क्तिनि ह्रस्वः । प्रह्लन्निः । 'ति च' (सू ३०३७) । चूर्तिः । फुल्तिः । 'चायतेः क्तिनि चिभावो वाच्यः' (वा ४४१८) । अपचितिः । 'सम्पदादिभ्यः क्विप्' (वा २२३३) सम्पत् । विपत् । 'क्तिन्नपीष्यते' । सम्पत्तिः । विपत्तिः । ३२७३ स्थागापापचो भावे ३।३।९५॥ क्तिन्स्यादङोऽपवादः ।

स्त्रियां वाऽसरूपविध्यभावाच्चेत्यत आह—अजपौ स्विति । तौ तु पुंस्त्वविशिष्टे भावादौ सावकाशाविति भावः । स्फीतिरिति । 'लोपो व्योः' इति यलोपः । 'तितुत्र' इति नेट् । प्रामादिकमिति । 'स्फायः स्फी निष्ठायाम्' इति स्फीभावस्य निष्ठायामेव प्रवृत्तेरिति भावः । कथञ्चित्समाधत्ते—क्तान्तादिति । स्फायेः क्तप्रत्यये स्फीभावे स्फीतशब्दः । स्फीतस्याख्यानं क्रिया वा स्फीतिः । 'तत्करोति तदाचष्टे' इति णिच्, अलोपः । 'अच इः' इति भावे इप्रत्ययः । स्फीतिं कामयते इति स्फीतिकाम इति वा कथञ्चित्समाधेयमिति भावः । श्रयजीषिस्तुभ्यः करणे । वार्तिकम् । एभ्यश्च तुर्म्यः करणे स्त्रियां क्तिन्नित्यर्थः । श्रुधातोः, स्तुधातोश्च 'परच्' इति 'ओरप्' इति च प्राप्ते, यजीष्योस्तु 'हलश्च' इति घञि च प्राप्ते वचनम्, भावे, कर्तृव्यतिरिक्तकारके च सर्वत्र प्राप्ते करणग्रहणम् । इष्टिरिति । यजेः 'वचिस्वपि' इति सम्प्रसारणम् । वश्चादिना षत्वम् । ऋल्वादिभ्य इति । ऋकारान्तात्लुवादिभ्यश्च पर इत्यर्थः । तेनेति । निष्ठावद्वचनेनेत्यर्थः । नत्वमिति । 'रदाभ्यां निष्ठातः' इति नत्वस्य प्रकृतत्वादिति भावः । कीर्णिरिति । कृधातोः क्तिनि इत्वे रपरत्वे 'हलि च' इति दीर्घः । तकारस्य नत्वम्, णत्वम् । एवं गृधातोः गीर्णिः । लवादिभ्यः उदाहरति-लूनिरित्यादि । अथ 'प्रह्लन्नि'रित्यत्र उपधाह्रस्वं साधयति ह्लाद इति । 'ह्लादो निष्ठायाम्' इत्युपधाह्रस्वविधौ 'ह्लाद्'इति योगविभागात् अनिष्ठायामपि क्वचिद्ह्रस्व इति भावः । भाष्ये तु नैतदूद्दृष्टम् । अथ चरेः फलेश्च क्तिनि अकारस्य उत्वं स्मारयति–ति चेति । 'चरफलोश्च' 'उत्परस्यातः' इत्युत्तरमिदं सूत्रम् । तादौ प्रत्यये परे चरफलोरत उकारः स्यादिति व्याख्यातं यङ्लुक्प्रकरणे । चूर्तिरिति । चरेः क्तिनि अकारस्य उत्वे 'हलि च' इति दीर्घः । फुल्तिरिति । फलेः क्तिनि उत्वे रूपम् । रेफवान्तत्वाऽभावाच्च दीर्घः । उभयत्रापि 'ग्रितुट' इति नेट् । सम्पदादिभ्यः क्विप् । वार्तिकम् । 'भावे अकर्तरि च कारके स्त्रियाम्'इति शेषः । ननु अस्त्रियामिति निषेधेन वाऽसरूपविधेरभावात् क्विपाऽनेन क्तिनो बाधात् सरूपाक्तिरित्यादि कथमित्यत आह—क्तिन्नपीष्यते इति । 'कृत्यल्युटो बहुलम्' इति बहुलग्रहणेन सिद्धमित्याहुः । भाष्ये तु नैतदूद्दृश्यते । स्थागापा । क्तिन् स्यादिति । क्विप् तु अस्वरि-

प्रस्थितिः। उपस्थितिः। सङ्गीतिः। सम्पीतिः। पक्तिः। कथम् अवस्था संस्था इति। 'व्यवस्थायाम्' इति ज्ञापकात्। ३२७४ **ऊतियूतिजूतिसातिहेतिकीर्तयश्च ३।३।९७॥** अवतेः 'ज्वरत्वर' (सू २६५४) इत्यूठ्। ऊतिः। स्वरार्थं वचनम्। उदात्त इति हि वर्तते। यूतिः। जूतिः। अनयोर्दीर्घत्वं च निपात्यते। स्यतेः सातिः। 'यतिस्यति' (सू ३०७४) इतीत्वे प्राप्ते इह इत्वाऽभावो निपात्यते। सनोतेर्वा 'जनसन' (सू २५०४) इत्यात्वे कृते स्वरार्थं निपातनम्। हन्तेर्हिनोतेर्वा हेतिः। कीर्तिः। ३२७५ **व्रजयजोर्भावे क्यप ३।३।९८॥** व्रज्या। इज्या। ३२७६ **संज्ञायां समजनिषदनिपतमनविदषुञ्शीङ्भृञ्भिणः**

तत्वान्नानुवर्तत इति भावः। अक इति। स्यादिभ्यस्त्रिभ्यः 'आतश्चोपसर्गे' इति वक्ष्यमाणस्य, पचेस्तु 'विन्निदादिभ्यः' इति विहितस्याङ्प्रत्ययस्यापवाद इत्यर्थः। प्रस्थितिरित्यादि। 'यतिस्यातिमास्थाम्' इति इत्वम् 'घुमास्थागापा' इति च ईत्वम्। कथमिति। 'स्थागापा' इति क्तिना 'आतश्चोपसर्गे' इति वक्ष्यमाणस्य अङो बाधादिति भावः। समाधत्ते—व्यवस्थायामिति। ज्ञापकादिति। ऊतियूति। एते स्त्रियां क्तिन्नन्ता निपात्यन्त इत्यर्थः। ऊठिति। अकारवकारयोरित्यर्थः। नन्वेवं 'स्त्रियां क्तिन्' इत्येव सिद्धे किमर्थमिदमूतिग्रहणमित्यत आह—स्वरार्थमिति। कः स्वर इत्यत आह—उदात्त इतीति। 'मन्त्रे वृषेषपचमनविदभूवीरा उदात्तः' इति पूर्वसूत्रस्थमुदात्तग्रहणमेकवचनान्ततया विपरिणतमिहानुवर्तत इत्यर्थः। तथा च क्तिन उदात्तत्वं लभ्यते। अन्यथा 'ञ्नित्यादिर्नित्यम्' इति प्रकृतेरुदात्तत्वं स्यादित्यर्थः। अनयोरिति। युधातोर्जुधातोश्चेत्यर्थः। स्यतेरिति। 'थोऽन्तकर्मणि' इत्यस्मात् क्तिनि सातिरिति रूपमित्यर्थः। 'आदेः चः' इत्यात्वम्। तत्र 'यतिस्यतिमास्थामित्ति किति' इति इत्वमाशङ्क्य आह—इह इत्वाभाव इति। सनधातोर्वा सातीति निपातनमित्याह—सनोतेर्वेति। सनेर्वा क्तिनि 'जनसन' इत्यात्वे कृते सातीति निपातनमित्यर्थः। अत्र 'यतिस्यति' इतीत्वस्याऽप्रसक्तेस्तदभावो न निपात्यते इति लाघवमिति भावः। नन्वेवं सनोतेः स्त्रियां क्तिनि सातीति रूपसिद्धेः किमर्थमिह सातीति निपातनमित्यत आह—स्वरार्थमिति। 'मन्त्रे वृष' इति पूर्वसूत्रात् उदात्तग्रहणाऽनुवृत्तेः क्तिन उदात्तत्वं सिध्यति। अन्यथा प्रकृतेरुदात्तत्वं स्यादित्यर्थः। हन्तेरिति। हनः क्तिनि नकारस्य निपातनादित्वे आदेर्गुणे हेतिरिति रूपम्। हिनोतेरिति। हिधातोः क्तिनि तु 'क्तिति च' इति निषेधं बाधित्वा निपातनात् गुणे रूपमित्यर्थः। कीर्तिरिति। कृत संशब्दने। स्वार्थिकण्यन्तात् 'न्यासश्रन्थो युच्' इति युचं बाधित्वा क्तिन्निपात्यते। उदात्तश्च सः। व्रजयजोः। पञ्चम्यर्थे षष्ठी। स्त्रियामित्येव। व्रज्येति। 'व्रज गतौ' क्यप्। 'वृजयजोः' इति पाठे 'वृजी वर्जने' इत्यस्मात् क्यप्, वृष्यो। इज्येति। 'वचिस्वपि' इति सम्प्रसारणम्। संज्ञायां समजनिषद। समज, निषद, निपत, मन, विद, घुस्, शीङ्, भृञ्, इण्, नवानां समाहारद्वन्द्वात्पञ्चमी। 'अजे-

३।३।९९॥ समजादिभ्यः स्त्रियां भावादौ क्यप् स्यात्स चोदात्तः संज्ञायाम्। 'अजेः क्यपि वीभावो नेति वाच्यम्' (वा १५९६) समजन्त्यस्यामिति समज्या सभा। निषीदन्त्यस्यामिति निषद्या आपणः। निपतन्त्यस्यामिति निपत्या पिच्छिला भूमिः। मन्यतेऽनयेति मन्या गलपार्श्वशिरा। विदन्त्यनया विद्या। सुत्या अभिषवः। शय्या। भृत्या। ईयतेऽनया इत्या शिबिका। **३२७७ कृञः श च ३।३।१००॥** कृञः इति योगविभागः। कृञः क्यप्स्यात्। कृत्या। 'श च'। चात्क्तिन्। क्रिया। कृतिः। **३२७८ इच्छा ३।३।१०१॥** इषेर्भावे शो यगभावश्च निपात्यते। इच्छा। 'परिचर्यापरिसर्यामृगयाटाट्यानामुपसङ्ख्यानम्' (वा २२१५)। शो यक्च निपात्यते। परिचर्या पूजा। परिसर्या परिसरणम्। अत्र गुणोऽपि। मृग अन्वेषणे चुरादावदन्तः। अतो लोपाऽभावोऽपि। शे यकि णिलोपः। मृगया। अटतेः शे यकि ट्यशब्दस्य द्वित्वम्। पूर्वभागे यकारनिवृत्तिर्दीर्घश्च। अटाट्या। 'जागर्तेरकारो वा' (वा २२१६)। पक्षे शः। जागरा जागर्या। **३२७९ अ**

क्यबजपोः' इति प्राप्ते आह—अजेः क्यपीति। समजन्तीति। **सङ्घीभवन्तीत्यर्थः**। समज्या सभेति। **सम्पूर्वादजेः क्य**। **'समज्या तु सभा गोष्ठी' इत्यमरः**। निषद्येति। **निपूर्वात्सदेः क्यप्**। **'सदिरप्रतेः' इति षत्वम्**। **'आपणस्तु निषद्यायाम् इत्यमरः**। निपत्येति। **निपूर्वात्पतेः क्यप्**। पिच्छिलेति। **निम्नोन्नता भूमिरित्यर्थः**। गलेति। **'पश्चादग्रीवा शिरा मन्या' इत्यमरः**। विद्येति। **वेदशास्त्रादिरित्यर्थः**। सुत्येति। **सोमेज्या**। **षुञः क्यप्**। **तुक्**। इत्या शिबिकेति। **कोशो मृग्यः**। कृञः श च। **चात् क्यप् 'शेतिं' लुप्तप्रथमाकम्**। **कृञः शः स्यात् क्यप् चेति प्रतीयमानार्थः**। **एवं सति कृतिरिति क्तिन्न स्यात्, स्त्रियां वाऽसरूपविधेरभावात्**। **तदाह**—कृञ इति। योगविभाग इति। **तत्र क्यबित्यनुवृत्तिं मत्वा आह**—कृञः क्यप् स्यादिति। कृत्येति। **कृञः क्यपि तुक्**। **'श चे'ति द्वितीयखण्डोऽयम्**। चात्क्तिन्निति। **क्यपः पूर्वमेव खण्डेन सिद्धत्वादिति भावः**। क्रियेति। **कृञः शः 'रिङ्शयग्लिङ्क्षु' इति रिङ्**। **शित्त्वेन सार्वधातुकतया ङित्त्वान्न गुणः**। **इयङिति भावः**। इच्छा। भावे श इति। **न त्वकर्तरि कारके चेत्यर्थः, निपातनसामर्थ्यादिति भावः**। यगभावश्चेति। **अन्यथा शित्त्वेन सार्वधातुकत्वात् यक् स्यादिति भावः**। परिचर्येति। **परिपूर्वाच्चरेः भावे शः यक् च**। परिसर्येति। **परिपूर्वात्सृधातोः शः, यक् च**। **अत्र शप्रत्ययस्य शित्त्वेन सार्वधातुकतया ङित्त्वात् गुणनिषेधमाशङ्क्य आह**—अत्र गुणोऽपीति। **परिसर्याशब्दे गुणोऽपि निपातित इत्यर्थः**। द्वित्वमिति। **'निपात्यते' इति शेषः**। यकारनिवृत्तिरिति। **'निपात्यत' इति शेषः**। **इलादिशेषस्तु नाऽत्र प्रवर्तते**। **तस्य धात्वद्वित्वविषयत्वादित्याहुः**। **यङन्तात्तु 'अ प्रत्ययात्' इति वक्ष्यमाणः अकारप्रत्ययः**। **तत्र अतो लोपे यङोपे च अटाटेति बोध्यम्**। जाग-

प्रत्ययात् ३।३।१०२ ॥ प्रत्ययान्तेभ्यो धातुभ्यः स्त्रियामकारप्रत्ययः स्यात्। चिकीर्षा। पुत्रकाम्या। ३२८० **गुरोश्च हलः** ३।३।१०३॥ गुरुमतो हलन्तात् स्त्रियामकारः स्यात्। ईहा। ऊहा। गुरोः किम्। भक्तिः। हलः किम्। नीतिः। 'निष्ठायां सेट इति वक्तव्यम्' (वा २२०८)। नेह। आप्तिः। 'तितुत्र—' (सू ३१६३) इति नेट्। दीप्तिः। 'तितुत्रेष्वग्रहादीनामिति वाच्यम्' (४३९३)। निगृहीतिः। निपठितिः। ३२८१ **षिद्भिदादिभ्योऽङ्** ३।३।१०४॥ षिद्भ्यो भिदादिभ्यश्च स्त्रियामङ्। जृष्—जरा। त्रपूष्-त्रपा। भिदा-विदारण एवायम्। भित्तिरन्या ('छिदा द्वैधीकरणे'। अन्यत्र छित्तिः छिद्रम्। गुहा गिर्योषध्योः। अत्र गिरेरेकदेशो गिरिशब्देन विवक्षितः। अन्यत्र गूढिः। आरा हारा कारा तारा धारा अत्र दीर्घत्वं निपात्यते। आरा शस्त्र्यामिति वक्तव्यम्। आर्तिरन्या।

र्तेरकारो वेति। **'भावे वक्तव्य' इति शेषः। अकारप्रत्यये उदाहरति**—जागरेति। **आर्धधातुकलक्षणो गुणः। शप्रत्यये उदाहरति**—जागर्येति। **शित्त्वेन सार्वधातुकत्वात् यक्। 'जाग्रोऽविचिण्णल्ङित्सु' इति च गुणः। अ प्रत्ययात्। 'अ' इति लुप्तप्रथमाकम्। भावे, अकर्तरि च कारके इत्येव।** गुरोश्च हलः। **ज्ञातोरित्यनुवृत्तं हला विशेष्यते। तदन्तविधिः। हलन्तधातोर्गुरुत्वाऽसम्भवाद्गुरुमान् लभ्यते। तदाह**—गुरुमत इति। **भावे अकर्तरि च कारके इत्येव।** निष्ठायामिति। **निष्ठायां परतो यः सेट्, तस्मादेव गुरुमतो हलन्तादकारप्रत्यय इत्यर्थः।** आप्तिरिति। **आप्ज्ञातोर्निष्ठायां सेट्त्वाभावात् नात्रमकारप्रत्ययः, किन्तु क्तिनेवेति भावः।** दीप्तिरित्यत्र **इटमाशङ्क्य आह**—तितुत्रेति। तितुत्रेष्विति। **'तितुत्रतथसिसु' इति सूत्रे अग्रहादीनामिति वाच्यमित्यर्थः।** निगृहीतिरिति। **इटि 'ग्रहोऽलिटि' इति दीर्घः। 'ग्रहिज्या' इति सम्प्रसारणम्। निगृहीतिः, उपस्निहितिः, निकुपितिः, निपठितिः इति ग्रहादयो भाष्ये स्थिताः।** षिद्भिदादिभ्योऽङ्। **भावे अकर्तरि च कारके इत्येव।** जरेति। **क्ङिति च गुणनिषेधं बाधित्वा 'ऋदृशोऽङि' इति गुणः।** विदारण इति। **वार्तिकम्। विदारणम् ऊर्ध्वंविदलनम्। तस्मिन्नेवार्थे भिदेरप्यङन्तमित्यर्थः।** छित्त्वा द्वैधिकरण इति। **इदमपि वार्तिकम्। यथाकथंचित्तिर्यगतिर्यग्वा द्वैधीभावे एव छिदेरप्यङन्तमित्यर्थः।** छित्तिरित्यस्य **विवरणम्**-छित्तिश्छिद्रमिति। **भिदिर् विदारणे, छिदिर् द्वैधीकरणे, विद ज्ञाने, क्षिप प्रेरणे, गुह संवरणे, डु धाञ् धारणपोषणयोः, मिथृ मेथृ हिंसासेचनयोः, ऋ गतौ, हृञ् हरणे, क्षि क्षये, क्षि निवासगत्योः, तॄ प्लवनतरणयोः, धृञ् धारणे, लिख अक्षरविन्यासे, क्षुद प्रेरणे, पीड अवगाहने, डु वप् बीजसन्ताने, कॄ विक्षेपे, वस निवासे, मृजू शुद्धौ, कृप कृपायाम्, इति भिदादिगणः।** गुहा गिर्योषध्योरिति। **वार्तिकम्।** गूढिरिति। **क्तिनि ढत्वधत्वष्टुत्वढलोपदीर्घाः।** आरा हारा कारा तारा धारा। अत्रेति। **ऋ, ह, कॄ, तॄ, धृञ्, एभ्यः अङि 'ऋदृशोऽङि गुणः'**

आङोऽर्तेश्च क्तिन्। रेखा लेखा। अत्र गुणः। चूडा। धारा प्रपात इति वक्तव्यम्। धृतिरन्या) मृजा। 'क्रपेः सम्प्रसारणं च (गण ३२) कृपा। ३२८२ चिन्ति-पूजिकथिकुम्बिवर्चश्च ३।३।१०५॥ अङ् स्यात्। युचोऽपवादः। चिन्ता। पूजा। कथा। कुम्बा। चर्चा। (चात्तुला)। ३२८३ आतश्चोपसर्गे ३।३। १०६॥ अङ् स्यात्। क्तिनोऽपवादः। प्रदा। उपदा। 'श्रदन्तरोरुपसर्ग-वद्वृत्तिः' (वा ११३१—११४७)। श्रद्धा। अन्तर्धा। 'उपसर्गे घोः किः' (सू ३२७०) इत्यनेन किः। अन्तर्धिः। ३२८४ ण्यासश्रन्थो युच् ३।३।१०७॥ अकारस्याऽपवादः। कारणा। हारणा। आसना। श्रन्थना। 'घट्टिवन्दिविदिभ्यश्चेति वाच्यम्' (वा २२२२)। घट्टना। वन्दना। वेदना। 'इषेरनिच्छार्थस्य' (वा २२२३)। अन्वेषणा। 'परेर्वा' (वा २२२४)।

इति गुणे उपधाया दीर्घत्वं चेत्यर्थः। आरा शस्त्र्यामिति। वार्तिकम्। शस्त्री प्रतोदः, तस्यामेव आरेत्यङन्तमित्यर्थः। ननु ऋधातोः क्तिनि ऋतिरित्येवोचितम्, न त्वार्तिरित्यत आह—आङोऽर्तेश्चेति। आङ्पूर्वात् ऋधातोः क्तिनि 'उपसर्गादति धातौ' इति वृद्धिरेकादेश इत्यर्थः। रेखा लेखेति। गणसूत्रम्। गुण इति। लिखेरङि उपधा-गुणः ककारस्य रेफश्चेत्यर्थः। चूडेति। गणसूत्रम्। धारा प्रपात इति। वार्तिकम्। द्रवद्रव्यप्रपातने इत्यर्थः। क्रपेः सम्प्रसारणं चेति। गणसूत्रम्। क्रपधातुर्घटादौ अकार-मध्यः। अत्र भाष्ये दृष्टानां गणसूत्रत्वं विज्ञेयम्। चिन्तिपूजि। एते चुरादयः। तेभ्यो 'ण्यासश्रन्थो युच्' इति प्राप्ते अङ्विधिः। तदाह—युचोऽपवाद इति। चिन्तेरयादौ अङि णिलोपः। चकारोऽनुक्तसमुच्चयार्थः। अतस्तोलयतेरपि सङ्ग्रहः। तदाह—चात्तु-लेति। आतश्चोपसर्गे। अङ् स्यादिति। उपसर्गे उपपदे आदन्ताद्धातोरङ् स्यात् भावे अकर्तरि च कारके इत्यर्थः। प्रदेति। प्रपूर्वाद्दाधातोरङ्। 'आतो लोप इटि च' इत्या-लोपः। एवमुपदा। ननु अदिति अन्तरिति च अव्ययपूर्वाद्धाञः कथमङ्, तयोरुपस-र्गत्वाऽभावादित्यत आह—अदन्तरोरुपसर्गवद्वृत्तिरिति। 'अच्छदन्तस्य अङ्विधौ उप सर्गत्वं वाच्यम्' इति 'अन्तरशब्दस्याङ्विधिणत्वेषूपसर्गत्वं वाच्यम्' इति च वार्तिकाभ्यामुपसर्गत्वात्पूर्वकादन्ताद्धातोरङ्प्रत्ययात्मककृत्प्रत्ययरूपा वृत्तिरि-त्यर्थः। वृत्तिरिति। व्याप्यस्याप्युपलक्षणम्। तेन अन्तर्धा अन्तर्धिः अन्तर्धायतीत्या-दीति दिक्। ण्यास। णि, आस, श्रन्थ, एभ्यः स्त्रियां भावादिषु युच् स्यादित्यर्थः। अकारस्येति। 'अ प्रत्ययात्' इति विहितस्येत्यर्थः। घट्टिवन्दीति। अण्यन्तत्वाद्युचो विधिः। वेदनेति। लाभार्थाद्विदेर्युच्। व्याख्यानात्। 'विद ज्ञाने' इत्यस्य तु वित्तिः। 'विद वेदनाज्ञाननिवासेषु' इति चुरादेस्तु 'ण्यासश्रन्थ' इति युचि वेदनेत्यपि। इषेर-निच्छार्थस्येति। 'युज्वक्तव्य' इति शेषः। अन्वेषणेति। मार्गणे इत्यर्थः। इच्छायां तु

पर्येषणा । परीष्टिः । ३२८५ रोगाख्यायां ण्वुल्बहुलम् ३।३।१०८॥ प्रच्छर्दिका-वमिः । प्रवाहिका-प्रहणी । विचर्चिका-पामा । क्वचिन्न । अर्द, शिरोऽर्त्तिः । 'धात्वर्थनिर्देशे ण्वुल्वक्तव्यः' (वा २२२५) । आसिका । शायिका । 'इक्षितपौ धातुनिर्देशे' (वा २२२६) । पचिः । पचतिः । 'वर्णात्कारः' (२२२७) ' निर्देश इत्येव । अकारः । ककारः । 'रादिफः' (वा २२२८) । रेफः । 'मत्वर्थाच्छः' (वा २२२९) । बहुलवचनादकारलोपः । मत्वर्थीयः ।

अन्विष्टिः । परेर्वेति । परिपूर्वकादिषेर्युञ्वेत्यर्थः । परोष्टिरिति । 'व्रश्च' इति षः । रोगाख्यायाम् । स्त्रियामित्येव । प्रच्छर्दिकेत्यस्य विवरणम्—वमिरिति । वमनमित्यर्थः । प्रवाहिकेत्यस्य विवरणम्—प्रहणीति । अतिसारविशेषः । विचर्चिकेत्यस्य विवरणम्—पामेति । क्वचिन्नेति । ण्वुलिति शेषः । बहुलग्रहणादिति भावः । अर्देति । अर्तिशब्दस्य 'अर्द हिंसायाम्' इति प्रकृतिदर्शनमिदम् । शिरोऽर्त्तिरिति । शिरःपीडेत्यर्थः । अर्देः क्तिन् । 'तितुत्र' इति नेट् । धात्वर्थनिर्देश इति । धात्वर्थे निर्देष्टव्ये धातोः स्वार्थे ण्वुल् । बहुलमित्यर्थः । स्त्रियामित्येव । आसिका शायिकेति । आसनं शयनमित्यर्थः । इक्षितपाविति । धातुस्वरूपे निर्देष्टव्ये इक्षितपौ वक्तव्यावित्यर्थः । धातुस्वरूपमेव वाच्यमिति फलितम् । पचिः पचतिरिति । पचधातुरित्यर्थः । शित्त्वेन सार्वधातुकत्वाच्छप् । अकर्तृकवाचकत्वेऽपि 'उपसर्गात्सुनोतिसुवति' इति निर्देशात् शबादिविकरणाः । शित्त्वसामर्थ्यादिति तु प्राञ्चः । तन्न, पिबतिः गायतिरित्यादौ पिबाद्यादेशप्रवृत्त्या, आत्वनिवृत्त्या च शित्त्वस्य चरितार्थत्वादित्यलम् । अत्र स्त्रियामिति न सम्बध्यते । व्याख्यानात् । वर्णात्कार इति । वार्तिकम् । निर्देश इत्येवेति । अ, इ, उ, इत्यादिवर्णनिर्देशे कर्तव्ये वर्णानुकरणात् , अ, इ, उ, इत्यादिप्रातिपदिकात्स्वार्थ कारप्रत्ययः स्यादित्यर्थः । अकार इति । अवर्ण इत्यर्थः । इह कारप्रत्ययस्य धातोरविहितत्वेऽपि अधिकारबलात् कृत्संज्ञा । अतः प्रातिपदिकत्वात् सुबुत्पत्तिः । ककारस्य नेरसंज्ञा, प्रयोजनाऽभावात् । अनार्द्धधातुकतया 'आकार' इत्यादौ आतो लोपाऽप्रसक्तेः । अनार्द्धधातुकत्वादेव नेट् । बहुलग्रहणानुवृत्तेः क्वचिन्न । 'अस्य चौ' इत्यादौ । ककार इति । क्वर्ण इत्यर्थः । प्रकृतावकार उच्चारणार्थः । 'न पुनरन्तरेणाचं व्यञ्जनस्योच्चारणं भवति' इति 'उच्चैरुदात्तः' इति सूत्रभाष्यात् । क्वचित्सकृद्धातादपि कारप्रत्ययः यथा 'एवकार' इत्यादौ, 'वषट्कारः' इति सूत्रनिर्देशात्, 'सर्वे चकाराः प्रत्याख्यायन्त' इति भाष्याच्च । रादिफ इति । 'वाच्य' इति शेषः । वाऽसरूपविधिना कारप्रत्ययोऽपि । अत्र स्त्रियामित्यस्य अनुवृत्तेरनभ्युपगमेन अस्त्रियामिति निषेधाऽभावात् । मत्वर्थाच्छ इति । मत्वर्थशब्दात् स्वार्थे छप्रत्ययो वाच्य इत्यर्थः । ननु 'मत्वर्थीय' इत्यत्र कथं 'यस्येति च' इत्यकारलोपः अतद्धितपरत्वात् अभत्वाच्चेत्यत आह—बहुलवचनादकारलोप इति । मत्वर्थीय इति । मतोरर्थो यस्य प्रत्ययस्य स मत्वर्थः । स एव मत्वर्थीयः ।

'इणजादिभ्यः' (वा २२३०) । आजिः । आतिः । 'इञ्वपादिभ्यः' (वा २२३१) । वापिः । वासिः । स्वरे भेदः । 'इक्कृष्यादिभ्यः' (वा २२३२) । कृषिः । गिरिः । ३२८६ संज्ञायाम् ३।३।१०६॥ अत्र धातोर्ण्वुल् । उद्दालक-पुष्पभञ्जिका । (वरणपुष्पप्रवाहिका । अभ्यूषखादिका । अभ्यूषः पूरिका अपूप-विशेषः) । ३२८७ विभाषाख्यानपरिप्रश्नयोरिञ्च ३।३।११०॥ परिप्रश्ने आख्याने च गम्ये इञ् स्यात् । चात् ण्वुल् । विभाषोक्तेर्यथाप्राप्तमन्येऽपि । कां त्वं कारिं-कारिकां-क्रियां-कृत्यां-कृतिं वा अकार्षीः । सर्वां कारिं-कारिकां-क्रियां-कृत्यां-कृतिं वा अकार्षम् । एवं गणिं—गणिकां-गणनाम् । पाचिं—पा-

'तसौ मत्वर्थे' इत्यत्र तु बहुलग्रहणात् । 'शेषिकाभ्मतुवर्थीयात्' इत्यत्र भवार्थे गहा-दिभ्यात् छो बोध्यः । इणजादिभ्य इति । वाच्य इति शेषः । स्त्रियामित्येव । आजि-रित्यत्र अजेर्वीभावमाशङ्क्य आह—बहुलमिति । इञ्वपादिभ्य इति । 'वाच्य' इति शेषः । स्त्रियामित्येव । ननु इण्णोऽनुवृत्यैव सिद्धे इञ्ग्रहणमनर्थकम् इत्यत आह—स्वरे भेद इति । 'ञ्नित्यादिर्नित्यम्' इति स्वरविशेष इञ्विधेः फलमित्यर्थः । इक्कृष्यादिभ्य इति । वाच्य' इति शेषः । कृषिरिति । किरत्यत्र कृघृपचगुणः । गिरिरिति । गृधातोरिक् । किरत्यत्र गुणः । 'ऋत इद्धातोः' इति इत्त्वे रपरत्वम् । संज्ञायाम् । वरणेति । वरणः वृक्षविशेषः । 'वार-णान्यहोमार्थानी'त्यादौ याज्ञिकानां प्रसिद्धः । अभ्यूष इत्यस्य विवरणम्-पूरिकेति । तस्या अपि विवरणम्—अपूपविशेष इति । 'समितावेसने जीरहिङ्गुमारीचयोजिते । घृतावृते जलसंयुक्ते पीठस्योपरि वेल्लिते । घृतेन वाऽपि तैलेन भर्जिता पूरिका मता ।' इति भोजनकौतूहले तल्लक्षणात् । विभाषाख्यान । स्त्रियामित्येव । पूर्वं परिप्रश्नः पश्चादु-क्तकथनमाख्यानम् । अल्पाच्तरत्वादाख्यानशब्दस्य पूर्वनिपातः । तदाह—परिप्रश्न इति । वाऽसरूपविधिना सिद्धे विभाषाग्रहणं व्यर्थमित्यत आह—विभाषोक्तेरिति । स्त्रियां वाऽसरूपविधेरप्रवृत्त्या विभाषाग्रहणाऽभावे इञ्ण्वुलावेव स्याताम् । न तु प्रत्ययान्तरमित्यर्थः । परिप्रश्ने उदाहरति—कां त्वमिति । कां त्वं कारिमकार्षीरित्य-न्वयः । इञि रूपम् । एवं कारिकामित्यादावपि कां त्वमित्यस्य कार्षीरित्यस्य चा-न्वयो बोध्यः । कारिकामिति । ण्वुलि रूपम् । क्रियामित्यत्र 'कृञः श च' इति शः । कृत्यामित्यत्र 'कृञः श च' इति चकारात् क्यपि तुक् । कृतिमित्यत्र क्तिन् 'कृञः श च' इति चकारादित्युक्तम् । आख्याने उदाहरति—सर्वां कारिमित्यादि । अत्रापि 'सर्वां कारि'मित्यादिपञ्चसु 'सर्वां'मित्यस्य 'अकार्षं'मित्यस्य चान्वयः । एवं गणिमि-ति । अत्रापि 'कामकार्षीः' 'सर्वामकार्षं'मिति प्रश्नप्रतिवचनानि योज्यानि । गण-धातोरदन्तात् चुरादिणिजन्तादित्यादि । अङ्गोपस्य स्थानिवत्त्वान्न वृद्धिः । गणना-मिति । 'व्यासश्रन्थः' इति युच् । अत्र क्तिन् तु न, युचा बाधात् । पचामित्यत्र 'वि-क्षिबादिभ्यः' इति विस्वादक् । इज्यामित्यत्र 'व्रजयजोर्भावे' इति क्यप् । 'वक्ति-

चिकां-पचां-पक्तिम्। इज्यां-इष्टिम्। **३२८८ पर्यायाऽर्हणोत्पत्तिषु णवुच्** ३।३।१११॥ पर्यायः परिपाटी क्रमः। अर्हणमर्हः योग्यता। पर्यायादिषु द्योत्येषु ण्वुज्वा स्यात्। भवत आसिका। शायिका। अग्रगामिका। भवानिन्द्रभक्षिकामर्हति। ऋणे-इन्द्रभक्षिकां मे धारयसि। उत्पत्तौ—इन्द्रभक्षिका उदपादि। **३२८९ आक्रोशे नञ्यनिः** ३।३।११२॥ विभाषेति निवृत्तम्। नञ्युपपदेऽनिः स्यादाक्रोशे। अजीवनिस्ते शठ भूयात्। अप्रयाणिः। 'कृत्यल्युटो बहुलम्' (सू २८४१)। भावेऽकर्तरि च कारके संज्ञायामिति च निवृत्तम्। राज्ञा भुज्यन्ते राजभोजनाः शालयः। 'नपुंसके भावे क्तः' (सू ३०९०)। **३२९० ल्युट् च** ३।३।११५॥ हसितम्। हसनम्। योगविभाग उत्तरार्थः। **३२९१ कर्मणि च येन संस्पर्शात्कर्तुः शरीरसुखम्** ३।३।११६॥ येन कर्मणा संस्पृश्यमानस्य कर्तुः शरीरस्य सुखमुत्पद्यते तस्मिन्कर्मण्युपपदे ल्युट् स्यात्। पूर्वेण सिद्धे नित्यसमा-

---

स्वपि' इति सम्प्रसारणम्। इष्टिरित्यत्र यजेः क्तिन्, व्रश्चेति षः। पर्यायार्ह। पर्यायशब्दस्य विवरणम्—परिपाटीति। तस्यापि विवरणम्—क्रम इति। परिपूर्वात्पटेः क्रमार्थादिणिजादिभ्य इति स्त्रियां भावे इण्। 'कृदिकारादक्तिनः' इति ङीष्। अर्हणमर्हं इति। भावे घञिति भावः। द्योत्येष्विति। भाव एवार्थे प्रत्यय इति भावः। क्रमे उदाहरति—भवत आसिकेति। आदौ आसनं, ततः शयनं, ततोऽग्रगमनमित्यर्थः। अर्ह उदाहरति—भवानिति। 'ऋणे' इत्युदाहरणसूचनम्। इन्द्रभक्षणमृणत्वेन धारयसीत्यर्थः। 'उत्पत्तौ' इत्युदाहरणसूचनम्। उदपादीति। उत्पन्नेत्यर्थः। उत्पूर्वात्पदेः कर्तरि लुडि 'चिण् ते पदः' इति चिण्। आक्रोशे नञ्यनिः। निवृत्तमिति। व्याख्यानादिति भावः। अजीवनिरिति। अजीवनमित्यर्थः। अप्रयाणिरिति। अप्रयाणमित्यर्थः। क्तिन् तु न भवति। अनिना बाधात्। स्त्रियां ङीऽसरूपविधेरभावात्। विभाषाऽनुवृत्तौ क्वचित्क्तिन् स्यादिति भावः। इति स्त्र्यधिकारः। कृत्यल्युटो बहुलम्। कृत्यसञ्ज्ञकाः प्रत्ययाः 'तयोरेव कृत्यक्तखलर्थाः' इति भावे कर्मणि च विहिताः। करणे अधिकरणे भावे च ल्युडविहितः। ततोऽन्यत्रापि कृत्यल्युटः स्युरित्यर्थः। स्नानीयं चूर्णम्। 'करणे अनीयर्' इति सिद्धवत्कृत्य ल्युटि उदाहरति-राज्ञेति। कर्मणि ल्युडिति भावः। नपुंसके भावे क्तः। इदं सूत्रं 'निष्ठा' इति सूत्रप्रस्तावे प्रागेव प्रसङ्गादुव्याख्यातं मूले। इह तु क्रमप्राप्तत्वात् पुनरुपन्यस्तम्। ल्युट् च। चात् क्तः। नपुंसके भावे इत्येव। ननु नपुंसके भावे क्तल्युटौ' इत्येव सिद्धे योगविभागो व्यर्थ इत्यत आह-योगेति। 'कर्मणि च येने'त्युत्तरसूत्रे ल्युट एवानुवृत्त्यर्थ इत्यर्थः। कर्मणि च येन। संस्पर्शशब्दः कृदन्तः, कृत्योगे कर्तुरिति कर्मणि षष्ठी। येनेति कर्तरि तृतीया। 'उभयप्राप्तौ कर्मणि' इति नियमात्। येन कर्मणेति। कर्तुः शरीरस्येति। शरीरावच्छिन्नस्येत्यर्थः। अर्धर्चादित्वाच्छरीरशब्दः पुंल्लिङ्गोऽपि। तेन 'कर्तृण' इत्येव भाव्यमिति निरस्तम्। ल्युट् स्यादिति। 'भावे

सार्थं वचनम्। पयःपानं सुखम्। (ओदनभोजनं सुखम्। नन्वत्र पानादेव सुखम्। चन्दनानुलेपनं सुखमितिवत्। सत्यम्। यत्र संस्पर्शं विना सुखाभावस्तदर्थकत्वात्। यत्र साक्षात्परम्परया वा सुखं तत्रेति यावत्)। कर्तुरिति किम्। गुरोः स्नापनं सुखम्, नेह गुरुः कर्ता, किन्तु कर्म। (कर्मणीति किम्। तूलिकाया उत्थानं सुखम्। अग्निकुण्डस्य सेवनं सुखम्। प्रत्युदाहरणेष्वसमासः)। **३२९२ वा यौ २।४।५७॥** अजेर्वी वा स्याद्यौ। प्रवयणम्। प्राजनम्। **३२९३ करणाधिकरणयोश्च ३।३।११७॥** ल्युट् स्यात्। इध्मप्रव्रश्चनः कुठारः। गोदोहनी स्थाली। खलः प्राक्करणाधिकरणयोरित्यधिकारः। **३२९४ अन्तरदेशे ८।४।२४॥** अन्तःशब्दाद्धन्तेर्नस्य णः स्यात्। अन्तर्हणनम्। देशे तु अन्तर्हननो देशः। अत्पूर्वस्येत्येव। अन्तर्घ्नन्ति। तपरः किम्। अन्तरद्यानि। **३२९५ अयनं च ८।४।२५॥** अयनस्य णोऽन्तःशब्दात्परस्य। अन्तरयणम्। अदेश इत्येव। अन्तरयनो देशः। **३२९६ पुंसि संज्ञायां घः प्रायेण ३।३।११८॥** **३२९७ छादेर्घेऽद्व्युपसर्गस्य ६।४।९६॥** द्विप्रभृत्युपसर्गहीनस्य छादेर्ह्रस्वः स्याद्घे परे।

नपुंसके' इति शेषः। पूर्वेणेति ('ल्युट् च' इति पूर्वसूत्रेणेत्यर्थः। नित्येति। **उपपदसमासार्थमित्यर्थः। तस्य नित्यत्वात्।** पयःपानं सुखमिति। **पयसा स्पृश्यमानशरीरावच्छिन्नस्य सुखजनकमित्यर्थः। उदाहरणान्तरमाह**—ओदनभोजनं सुखमिति। **शङ्कते**—अत्र पानादिति। **पानादेव सुखम्, न तु संस्पर्शनेनेत्यर्थः। भोजनादित्यपि द्रष्टव्यम्। तत्र दृष्टान्तमाह**—चन्दनानुलेपनं सुखमितिवदिति। **तथा च पयसा ओदनेन च स्वरूपतस्तावद्देवदत्तसुखाऽभावात् कथमिदमुदाहरणमिति भावः। समाधत्ते**—सत्यमिति। यत्र संस्पर्शमिति। **यत्र विषये संस्पर्शं विना स्वरूपसतैव सुखं नोत्पद्यते तादृशविषयोपलक्षणं संस्पर्शग्रहणमित्यर्थः। फलितमाह**—यत्रेति। **स्पर्शनेन यत्र सुखं, यथा चन्दनानुलेपनं सुखमिति, यत्र संस्पर्शपूर्वकपानादेर्वा सुखम् यथा 'पयः पानं सुख'मित्यादौ तत्र सर्वत्राऽस्य प्रवृत्तिरित्यर्थः।** तूलिकाया उत्थानं सुखमिति। **अत्र न कर्मोपपदमिति भावः।** अग्निकुण्डस्येति। **'शीतकाले' इति शेषः। अत्राग्निकुण्डेन संस्पर्शो नास्ति, दाहप्रसङ्गादिति भावः।** ननु **'तूलिकाया उत्थानम्' इत्यादिप्रत्युदाहरणेषु पूर्वसूत्रेण ल्युट् स्यादेवेति 'कर्मणी'त्यादि व्यर्थमित्यत आह**—प्रत्युदाहरणेष्विति। असमास इति। **नित्यस्योपपदसमासस्याऽभावे इत्यर्थः।** करणाधिकरणयोश्च। **अर्थनिर्देशोऽयं, न तूपपदं, व्याख्यानात्। अजपौ परत्वादयं बाधते। तदुक्तं 'अजकर्म्या स्त्रीखलनाः स्त्रियाः खलपौ विप्रतिषेधेन' इति।** इध्मप्रव्रश्चन इति। **प्रवश्च्यतेऽनेनेत्यर्थे ल्युट्। 'इध्मस्य प्रव्रश्चन' इति विग्रहः।** गोदोहनीति। **दुह्यतेऽस्यामित्यर्थे ल्युट्। गोर्दोहनीति विग्रहः।** खलः प्रागिति। **व्याख्यानादिति भावः।** पुंसि। **करणाधिकरणयोरि-**

दन्ताश्छाद्यन्तेऽनेन दन्तच्छदः। प्रच्छदः। अद्वीति किम्। समुपच्छादः। आकुर्वन्त्यस्मिन्नाकरः। ३२९८ **गोचरसञ्चरवहव्रजव्यजापणनिगमाश्च ३।३।११९॥** घान्ता निपात्यन्ते। 'हलश्च' (सू ३३००) इति वक्ष्यमाणस्य घञोऽपवादः। गावश्चरन्त्यस्मिन्निति गोचरो देशः। सञ्चरन्त्यनेन सञ्चरो मार्गः। वहन्त्यनेन वहः स्कन्धः। व्रजः। व्यजस्तालवृन्तम्। निपातनाद्वीभावो न। आपणः पण्यस्थानम्। निगच्छन्त्यनेन निगमः छन्दः। चात्कषः। निकषः। ३२९९ **अवे तॄस्रोर्घञ् ३।३।१२०॥** अवतारः कूपादेः। अवस्तारो जवनिका। ३३०० **हलश्च ३।३।१२१॥** हलन्ताद्धञ्स्यात्। घापवादः। रमन्ते योगिनोऽस्मिन्निति रामः। अपमृज्यतेऽनेन व्याध्यादिरित्यपामार्गः। विमार्गः समूहनी। ३३०१ **अध्यायन्यायोद्यावसंहाराश्च ३।३।१२२॥** अधीयतेऽस्मिन्नध्यायः। नियन्त्युद्युवन्ति संहरन्त्यनेनेति विग्रहः। 'अवहाराधारावायानामुपसंख्यानम्' (वा २२३६)। ३३०२ **उदङ्कोऽनुदके ३।३।१२३॥** उत्पूर्वादञ्चतेर्घञ्स्यात् न तूदके। घृतमुद्च्यते उद्ध्रियतेऽस्मिन्निति घृतोदङ्कश्चर्ममयं भाण्डम्। अनुदके किम्। उदकोदञ्चनः। ३३०३ **जालमानायः ३।३।१२४॥** आनीयन्ते मत्स्यादयोऽनेनेत्यानायः। जालम् इति किम्। आनयः। ३३०४ **खनो घ च ३।३।१२५॥** चाद्धञ्। आखनः। आखानः। घित्करणमन्यतोऽप्ययमिति ज्ञापनार्थम्। तेन भजेः भगः पदम्। करणे घः। खल सञ्चये। अधिकरणे घः। खल इत्यादि।

स्येव। पूर्वसूत्रापवादः। छादेर्घे। 'अद्व्युपसर्गस्य' इति छेदः। ह्रस्वः स्यादिति। 'खचि ह्रस्वः' इत्यतस्तदनुवृत्तेरिति भावः। 'णिश्रिद्रुस्रुभ्यः कर्तरि चङ्' इत्यतश्चङ्ग्रहणं 'छादेर्घे द्व्युपधायाः' इत्यतस्तदनुवृत्तेः। एतेन णेरेव ह्रस्वः तत्सामर्थ्यात्तस्य लोपो नेति परास्तम्। गोचर। नन्वत्र 'पुंसि संज्ञायां घः' इत्येव सिद्धे किमर्थमिदमित्यत आह—हलश्चेति। वक्ष्यमाणस्येति। चात्कषः इति। व्याख्यानादिति भावः। अवे तॄस्रोर्घञ्। अवे त्युपसर्गे उपपदे तॄ स्तृ भ्रृभ्यां घञ् स्यात्, पुंसि सञ्ज्ञायां प्रायेणेत्यर्थः। घापवाद इति। 'पुंसि संज्ञायाम्' इति विहितस्य घस्यापवाद इत्यर्थः। हलश्च। स्पष्टम्। अध्याय। अधिपूर्वक इङ्, निपूर्वक इण्, उत्पूर्वकः युधातुः, सम्पूर्वको हृञ्, एते घञन्ता निपात्यन्ते। 'पुंसि सञ्ज्ञायाम्' इति घापवादः। अवहारेति। अवहारः, आधारः, आवायः, एषां घञन्तानां निपातनस्योपसङ्ख्यानमित्यर्थः। उदङ्कोऽनुदके। घस्यापवादः। घृतोदङ्क इति। 'चजोः कु घिण्ण्यतोः' इति कुत्वम्। जालमानायः। जालं वाऽयं चेत् आनाय इति घञन्तमित्यर्थः। खनो घ च। 'घ' इति लुप्तप्रथमाकम्। खनो घञ् स्यात् घश्चेत्यर्थः। नन्वत्र घित्करणं व्यर्थम्, चजोरभावेन कुत्वस्याऽप्रसक्तेरित्याशङ्क्य आह—घित्करणमिति। भजेर्भग इति। भज्यते इति कर्मणि घः। पदमिति। पद्यते ग-

'खनेर्डडरेकेकवका वाच्याः' (वा २२३८) आखः । आखरः । आखनिकः । आखनिकवकः । एते खनिश्रवचनाः । ३३०५ **ईषद्दुःसुषु कृच्छ्राऽकृच्छ्रार्थेषु खल्** ३।३।१२६॥ करणाधिकरणयोरिति निवृत्तम् । एषु दुःखसुखार्थेषूपपदेषु खल् स्यात् । 'तयोरेव—' (सू २८३६) इति भावे कर्मणि च । कृच्छ्रे-दुष्करः कटो भवता । अकृच्छ्रे-भवता ईषत्करः । सुकरः । 'निमिमीलियां खलचोरात्वं नेति वाच्यम्' (वा ३४८७) ईषन्निमयः । दुष्प्रमयः । सुविलयः । निमयः । मयः । लयः । ३३०६ **उपसर्गात्खल्घञोः** ७।१।६७॥ उपसर्गादेव लभेर्नुम् स्यात् । ईषत्प्रलम्भः । दुष्प्रलम्भः । सुप्रलम्भः । उपालम्भः । उपसर्गात् किम् । ईषल्लाभः । लामः । ३३०७ **न सुदुर्भ्यां केवलाभ्याम्** ७।१।६८॥ उपसर्गान्तररहिताभ्यां सुदुर्भ्यां लभेर्नुम्न स्यात्खल्घञोः । सुलभम् । दुर्लभम् । केवलाभ्याम् किम् । सुप्रलम्भः । अतिदुर्लम्भः । कथं तर्हि अतिसुलभमतिदुर्लभमिति । यदा स्वती कर्मप्रवचनीयौ तदा भविष्यति । ३३०८ **कर्तृकर्मणोश्च भूकृञोः** ३।३।१२९॥ कर्तृकर्मणोरीषदादिषु चोपपदेषु भूकृञोः खल्स्यात् । 'यथासंख्यं नेष्यते' । कर्तृकर्मणी

म्यतेऽनेनेति विग्रहः खनेरिति । ड, डर, इक, इकवक, एषां चतुर्णां द्वन्द्वः । आख इति । डे रूपम् । आखर इति । डरे रूपम् । उभयत्रापि डित्त्वसामर्थ्याद्टिलोपः । इके उदाहरति—आखनिक इति । इकवके उदाहरति—आखनिकवक इति । ईषद्दुःसुषु । निवृत्तमिति । व्याख्यानादिति भावः । तर्हि 'कर्तरि कृत्' इति कर्तरि स्यादित्यत आह—तयोरेवेति । इह दुरिति कृच्छ्रार्थं एवान्वेति अकृच्छ्रार्थं तु ईषदिति सु इति चान्वेति । योग्यताबलात् । तदेतदाह—कृच्छ्रे दुष्कर इत्यादिना । भवतेति । 'न लोक' इति षष्ठीनिषेधात् कर्तरि तृतीया । कृच्छ्रेत्यादि किम् । ईषत्कार्यम् । अल्पमित्यर्थः । निमीति । निपूर्वो मिञ्, मीनातिः, लीङ्, एषामित्यर्थः । 'मीनातिमिनोतिदीङां ल्यपि च' 'विभाषा लीयतेः' इति प्राप्तमात्वं खलचोर्निषिध्यते । खलि उदाहरति—ईषन्निमय इत्यादि । 'एरच्' इत्यचि उदाहरति—निमय इत्यादि । उपसर्गात्खल्घञोः । । लभेर्नुमिति । 'लभेश्च' इत्यतः 'इदितो नुम्' इत्यतश्च तदनुवृत्तेरिति भावः । न सुदुर्भ्याम् । 'केवलाभ्यां किमेतद्व्याचष्टे—उपसर्गान्तरेति । सुप्रलम्भः अतिदुर्लम्भ इति । अत्र सुदुरोरुपसर्गान्तरसहितत्वात् पूर्वसूत्रप्राप्तस्य न निषेधः । कथं तर्हीति । सुदुरोरुपसर्गान्तरसहितत्वेन नुमोऽनिषेधादिति भावः । समाधत्ते—यदेति । 'स्वती पूजायाम्' । यदा पूजार्थकाविमौ कर्मप्रवचनीयौ तदा उपसर्गत्वाऽभावात् न सुदुरोरुपसर्गसहितत्वम् । अतो निषेधो भविष्यतीति भावः । सोः पूजार्थतया उपसर्गत्वाऽभावात् पूर्वसूत्राप्राप्त तत्र प्राप्तिरित्यपि बोध्यम् । कर्तृकर्मणोश्च । कर्तृकर्मणोरिति सप्तमी । उपपदयोरिति लभ्यते, व्याख्यानात् । चकारादीषदुःसुष्विति समु-

च धातोरव्यवधानेन प्रयोज्ये। ईषदादयस्तु ततः प्राक्। 'कर्तृकर्मणोश्च्व्यर्थयोरिति वाच्यम्' (वा २२४१)। खित्वान्मुम्। अनाढ्येन आढ्येन दुःखेन भूयते दुराढ्यम्भवम्। ईषदाढ्यम्भवम्। स्वाढ्यम्भवम्। ईषदाढ्यङ्करः। दुराढ्यङ्करः। स्वाढ्यङ्करः। च्व्यर्थयोः किम्। आढ्येन सुभूयते। ३३०६ **आतो युच्** ३।३।१२८॥ खलोऽपवादः। ईषत्पानः सोमो भवता। दुष्पानः। सुपानः। 'भाषायां शासियुजिदृशिधृषिमृषिभ्यो युज्वाच्यः' (वा २२४३)। दुःशासनः। दुर्योधन इत्यादि। ३३१० **षात्पदान्तात्** ८।४।३५। नस्य णो न। निष्पानम्। सर्पिष्पानम्। षात् किम्। निर्णयः। पदान्तात् किम्। पुष्णाति। पदे अन्तः पदान्तः इति सप्तमीसमासोऽयम्। तेनेह न। सुसर्पिष्केण। ३३११ **आवश्यकाऽऽधमर्ण्ययोर्णिनिः** ३।३।१७०॥ अवश्यङ्कारी। शतंदायी। ३३१२ **कृत्याश्च** ३।३।१७१॥ आवश्यकाऽऽधमर्ण्ययोरित्येव। अवश्यं हरि सेव्यः। शतं देयम्। ३३१३ **क्तिक्तौ च संज्ञायाम्** ३।३।१७४॥ धातोः क्तिच्क्तौ च स्यादाशिषि संज्ञायाम्। 'तितुत्र—' (सू ३१६३) इति नेट्। भवताद् भूतिः। ३३१४ **न क्तिचि दीर्घ-**

च्वीयते। भूकृञोरिति पञ्चम्यर्थे षष्ठी। तदाह—कर्तृकर्मणोरीषदादिषु चोपपदेष्विति। अत्र कर्तृकर्मणोरन्यतरस्मिन् ईषदादुः-सुनामन्यतमे च इत्युभयस्मिन् समुच्चिते उपपदे इत्यर्थो विवक्षितः। न तु प्रत्येकमुपपदत्वम्, व्याख्यानात्। भाष्ये तथैवोदाहरणाच्च। नेष्यत इति। भूकृञोः, कर्तृकर्मणोरित्यस्य च न यथासङ्ख्यमित्यर्थः। ननु कर्तृकर्मणोरन्यतरस्य ईषदादीनामन्यतमस्य च उपपदस्य प्रयोगसन्निपाते कथं पौर्वापर्यमित्यत आह—कर्तृकर्मणि चेत्यादि। भाष्ये तथैवोदाहरणादिति भावः। च्व्यर्थयोरिति। अभूततद्भाव इत्यर्थः। भूयत इति। भावे लट्। दुराढ्यम्भवमिति। भावे खल्। अत्राढ्यस्य दुष्पपदस्य भुवातोः प्रागव्यवधानेन प्रयोगः। दुरस्तु ततः प्राक्। दुराढ्यङ्कर इति। अनाढ्यः आढ्यः दुःखेन क्रियते इत्यर्थः। अत्र आढ्यः कर्म उपपदम्। ईषदाढ्यम्भवमित्यादावप्युदाहार्यम्। अत्र ईषदुःसुनां व्यवहितत्वात् पूर्वसूत्रेणाप्राप्तावित्यारभ्यमिति बोध्यम्। आतो युच्। कर्तृकर्मणोरिति नानुवर्तते, अस्वरितत्वात्। ईषदादिषु कृच्छ्राकृच्छ्राऽर्थेषूपपदेषु आदन्ताद्धातोर्युच्स्यादित्यर्थः। तयोरेवेति भावे कर्मणि च। खलोऽपवाद इति। वाऽसरूपविधिस्तु न भवति 'क्त्वायुट्तुमुन्खलर्थेषु वाऽसरूपविधिर्न' इत्युक्तेः। दुष्पान इति। 'इदुदुपध' इति षः। भाषायामिति। 'छन्दसि गत्यर्थेभ्यः' 'अन्येभ्योऽपि दृश्यन्ते' इत्युत्तरमिदं वार्तिकम्। ईषदुःसुष्वित्येव खलोऽपवादः। इति खलर्थाः प्रत्ययाः। आवश्यकाधमर्ण्ययोर्णिनिः। कर्तरि कृदित्येव। अवश्यंकारीति। अवश्यमित्यव्ययम्। शतन्दायीति। 'अकेनोर्भविष्यदाधमर्ण्ययोः' इति षष्ठी न। कृत्याश्चेत्यादि। स्पष्टम्। क्तिच्क्तौ च। आशिषीति। 'आशिषि लिङ्लोटौ' इत्य-

श्च ६।४।३६॥ अनिटां वनतितनोत्यादीनां च दीर्घानुनासिकलोपौ न स्तः क्तिचि परे। यन्तिः। रन्तिः। वन्तिः। तन्तिः। **३३१५ सनः क्तिचि लोपश्चास्यान्यतरस्याम्** ६।४।४५॥ सनोतेः क्तिच्यात्वं वा स्याल्लोपश्च वा। सनुतात्। सातिः। सतिः। सन्तिः। देवा एनं देयासुः देवदत्तः। **३३१६ अलंखल्वोः प्रतिषेधयोः प्राचां क्त्वा** ३।४।१८॥ प्रतिषेधार्थयोरलंखल्वोरुपपदयोः क्त्वा स्यात्। प्राचां ग्रहणं पूजार्थम्। 'अमैवाव्ययेन' (सू ७८३) इति नियमान्नोपपदसमासः। 'दो दद्घोः' (सू ३०७७)। अलं दत्त्वा। 'घुमास्था—' (सू २४६२)। पीत्वा खलु। अलंखल्वोः किम्। मा कार्षीद्। प्रतिषेधयोः किम्। अलङ्कारः। **३३१७ उदीचां माङो व्यतीहारे** ३।४।१९॥ व्यतीहारेऽर्थे माङः क्त्वा स्यात्। अपूर्वकालार्थमिदम्। **३३१८ मयतेरिदन्यतरस्याम्** ६।४।७०॥ मेङ इकारोऽन्तादेशः स्याद्वा ल्यपि। अपमित्य याचते। अपमाय। उदीचां ग्रहणाद्यथा-

---

तस्तदनुवृत्तेरिति भावः। भवतादिति। आशिषि लोट्। भूतिरित्यस्य विवरणमिदम्। कर्तरि क्तिच्। न क्तिचि दीर्घश्च। अनिटामिति। 'अनुदात्तोपदेश' इति सूत्रमिहानुवर्तते इति भावः। रन्तिरिति। अत्र 'अयुकः क्तिति' इत्यस्याऽप्रवृत्तेः 'तितुत्र' इत्येव नेट्। भूतिरित्यत्र तु परत्वात् 'अयुकः क्तिति' इत्येवोचितम्। सनः आत्वमिति। 'विड्वनोरनुनासिकस्यात्'इत्यतस्तदनुवृत्तेरिति भावः। लोपश्चेति। 'अन्त्यस्य नकारस्येति शेषः। क्ते उदाहरिष्यन्नाह-देवा एनं देयासुरिति। आशीर्लिङ्। देवदत्त इति। 'तयोरेवे'ति कर्मणि क्तः। क्तिचा बाधा मा भूदिति क्तविधिः। अन्यथा अपवादेन क्तिचा क्तो बाध्येत। वाऽसरूपविधिस्तु 'स्त्रियां क्तिन्' इत्यतः प्रागेवेति 'प्रैषातिसर्ग' इति सूत्रे भाष्ये स्पष्टम्। अलंखल्वोः। क्त्वा स्यादिति। भावार्थकोऽयम्। 'अव्ययकृतो भावे' इति वचनात्। एतच्च 'तुमर्थे सेसेन इति सूत्रे भाष्ये स्पष्टम्। ननु 'उदीचां माङो व्यतीहारे' इत्युत्तरसूत्रे उदीचांग्रहणादस्य नित्यत्वावश्यकत्वात् प्राचांग्रहणं व्यर्थमित्यत आह—प्राचां ग्रहणं पूजार्थमिति। न च वाऽसरूपविधिराशङ्क्यः। तस्य 'स्त्रियां क्तिन्' इत्यतः प्रागेव प्रवृत्तेरुक्तत्वात्। 'अलं रोदनेने'त्यादि तु बहुलग्रहणात्समाधेयमित्यलम्। उपपदसमासे ल्यपमाशङ्क्य आह—अमैवाव्ययेनेति। अलं दत्त्वेति। दानेन किञ्चिदपि साध्यं नास्तीत्यर्थः। ईत्वं स्मारयति—घुमास्थेति। पीत्वा खलिति। पानेन साध्यं नास्तीत्यर्थः। उदीचां माङो। व्यतीहारो विनिमयः 'समानकर्तृकयोः पूर्वकाले' इत्यनेन सिद्धिमाशङ्क्य आह—अपूर्वकालार्थमिति। मयतेरिदन्यतरस्याम्। 'वाऽन्यस्य संयोगादेः' इत्यतो वेति 'न ल्यपि' इत्यतो ल्यपीति चानुवर्तते इति भावः। अपमित्य याचत इति। त्वया गौर्दत्ता चेत् मया महिषो दीयते इत्येवं विनिमयं कर्तुं गां याचते इत्यर्थः। इह विनिमयस्य पूर्वकालिकत्वाऽभावात् 'समानकर्तृकयो'रित्यस्य न प्राप्तिः। प्रत्युत या-

प्राप्तमपि। याचित्वा अपमयते। **३३१९ परावरयोगे च ३।४।२०॥** परेण पूर्वस्याऽपरेण परस्य योगे गम्ये धातोः क्त्वा स्यात्। अप्राप्य नदीं पर्वतः। परनदीयोगोऽत्र पर्वतस्य। अतिक्रम्य पर्वतं स्थिता नदी। अवरपर्वतयोगोऽत्र नद्याः। **३३२० समानकर्तृकयोः पूर्वकाले ३।४।२१॥** समानकर्तृकयोर्धात्वर्थयोः पूर्वकाले विद्यमानाद्धातोः क्त्वा स्यात्। भुक्त्वा व्रजति। द्विरवगतन्त्रम्। स्नात्वा

चनाया एव पूर्वकालिकत्वात् याचेः क्त्वाप्राप्तिः। गतिसमासे क्त्वो ल्यप्, हृस्वं। तुक्। अप्रमायेति। हृस्वाऽभावे रूपम्। 'ईयति' इति ईत्वं तु न, 'न ल्यपि' इति निषेधात्। उदीचां ग्रहणादिति। तेन मेङः क्त्वाप्रत्ययस्य विकल्पलाभात् तदभावे याचेः पूर्वकालक्रियावृत्तित्वात् समानकर्तृकयोरिति क्त्वेति भावः। परावरयोगे च। **परावरयोर्योगे** इति विग्रहः। योगशब्दस्य प्रत्येकमन्वयः। परयोगे अवरयोगे च क्त्वेति लभ्यते। परेण कस्य योग इत्याकाङ्क्षायाम् अवरस्येति लभ्यते। अवरेण कस्य योग इत्याकाङ्क्षायां परस्येति लभ्यते। तदाह—परेण पूर्वस्येति। अवरस्येत्यर्थः। पराऽवरशब्दौ हि क्रमात् व्यवहिताऽव्यवहितदेशवृत्तिवाचिनौ। क्त्वा स्यादिति। 'अव्ययकृतो भावे' इति वचनादयमपि भावार्थक एव। अवरस्य परयोगे उदाहरति—अप्राप्य नदीं पर्वत इति। विन्ध्यपर्वताद्दक्षिणदेशे निवसतः विन्ध्यं गङ्गां च नदीमधिकृत्य प्रवृत्तमिदं वाक्यम्। विन्ध्यस्योत्तरत एव हि गङ्गा। तथा च दक्षिणदेशस्थानां गङ्गोत्तरणेन विना विन्ध्यपर्वतः प्राप्यत्वेन स्थित इत्यर्थः, विन्ध्यस्य दक्षिणतो गङ्गाया अभावादिति भावः। तथा च दक्षिणदेशस्थानां विन्ध्यव्यवहिता गङ्गा। दक्षिणदेशीयापेक्षया अव्यवहितस्य विन्ध्यस्य दाक्षिणात्यापेक्षया व्यवहितया गङ्गया योगो गम्यते। तदाह—परनदीयोगोऽत्र पर्वतस्येति। अथाऽपरेण परस्य योगे उदाहरति—अतिक्रम्य पर्वतं स्थिता नदीति। दाक्षिणात्यानाम् अव्यवहितविन्ध्यपर्वतातिक्रमेणैव व्यवहिता गङ्गा प्राप्यत्वेन स्थितेत्यर्थः। अत्र अव्यवहितेन विन्ध्येन दाक्षिणात्यापेक्षया व्यवहिताया गङ्गाया योगो गम्यते। तदाह—अपरपर्वतयोगोऽत्र नद्या इति। इह अप्राप्तेरतिक्रमणस्य च विन्ध्यस्थितिपूर्वकालकृत्वाऽभावात् 'समानकर्तृकयोः पूर्व' इत्यस्य न प्राप्तिः। समानकर्तृकयोः। 'समानकर्तृकयो'रिति निर्धारणे षष्ठी। पूर्वकाल इत्यस्य पूर्वकालके भाक्तार्थे इत्यर्थः। 'विद्यमाना'दिति शेषः। क्त्वा स्यादिति। अव्ययकृत्वाद्भावार्थकोऽयम्। भुक्त्वा व्रजतीति। पूर्वकालिकाद्भोजनात् उत्तरकालिकं व्रजनमित्यर्थः। द्विरवमिति। समानकर्तृकयोरिति द्विरवमविवक्षितमिति भावः। स्नात्वेति। स्नानभोजनपानोत्तरकालिकं व्रजनमित्यर्थः। अत्र व्रजनापेक्षया स्नानादीनां बहूनां पूर्वकालिकत्वेऽपि क्त्वेति भावः। एतच्च भाष्ये स्पष्टम्। 'पूर्वं भुङ्क्ते ततो व्रजती'त्यत्र तु पूर्वशब्देनैव पूर्वावस्थाबोधात् 'उक्तार्थानामप्रयोगः' इति न्यायात् न क्त्वा। 'पूर्वं भुक्त्वा ततो व्रजती'त्यत्र तु न क्रिययोः पौर्वापर्यम्, किन्तु क-

भुक्त्वा पीत्वा व्रजति । 'अनुदात्त—' (सू २४२८) इत्यनुनासिकलोपः । विष्णुं नत्वा स्तौति । स्वरत्यादेः 'श्रयुकः किति' (सू २३८१) इति नित्यमिडभावः पूर्वविप्रतिषेधेन । स्तृत्वा । सूत्वा । धूत्वा । **३३२१ क्त्वि स्कन्दिस्यन्दोः ६।४।३१॥** एतयोर्नलोपो न स्यात्क्त्वि परे । स्कन्त्वा । उदित्त्वादिड्वा । स्यन्त्वा—स्यन्दित्वा । **३३२२ न क्त्वा सेट् १।२।१८॥** सेट् क्त्वा किन्न स्यात् । शयित्वा । सेट् किम् । कृत्वा । **३३२३ मृडमृदगुधकुषक्लिशवदवसः क्त्वा १।२।७॥** एभ्यः सेट् क्त्वा कित् । मृडित्वा । 'क्लिशः क्त्वा-' (सू ३०४९) इति वेट् । क्लिशित्वा क्लिष्ट्वा । उदित्वा । उषित्वा । 'रुदविद-' (सू २६०६) इति कित्त्वम् । रुदित्वा । विदित्वा । मुषित्वा । गृहीत्वा । **३३२४ नोपधात्थफान्ताद्वा १।२।२३॥** सेट् क्त्वा कित्स्याद्वा । श्रथित्वा श्रन्थित्वा । गुम्फित्वा । गुफित्वा । नोपधात् किम् । कोथित्वा । रेफित्वा । **३३२५ वञ्चिलुञ्च्यृतश्च १।२।२४॥** सेट्

र्नीरेव । अन्येभ्यो भोक्तृभ्यः पूर्वं भुक्त्वा पश्चाद्व्रजत्यन्येभ्यो भोक्तृभ्य इत्यर्थः । 'आस्यते भोक्तु'मित्यत्र तु वाक्यरूपविधिना लट् इति भाष्यादौ विस्तरः । 'नम' धातोः' क्त्वाप्रत्यये आह—नमुदात्तेति । स्वरतिसूतिसूयतिधूञ्भ्यः क्त्वाप्रत्ययस्य 'श्रयुकः किति' इति निषेधं बाधित्वा 'स्वरतिसूतिसूयति' इति इड्विकल्पमाशङ्क्य आह—स्वरत्यादेरिति । 'आर्धधातुकस्येट्' इत्यादेरिड्विधिकाण्डात् प्राक् 'नेड्वशि कृति' इत्यादेरिण्निषेधकाण्डस्यारम्भसामर्थ्यात् इह पूर्वविप्रतिषेधमाश्रित्य 'श्रयुकः किति' इति इण्निषेध एव प्रवर्तते इति भावः । क्त्वि स्कन्दिस्यन्दोः । नलोपो नेति । 'रनाभ्यो नलोपः' इत्यतो नलोप इति 'नाञ्चेः पूजायाम्' इत्यतो नेति चानुवर्तते इति भावः । क्त्वेति । क्त्वाशब्दस्य सप्तम्येकवचनम् । 'आत' इति योगविभागादाल्लोपः । स्कन्त्वेति । स्कन्दिर् धातोः रूपम् । अनुदात्तोपदेशत्वान्नेट् । स्यन्दूधातोः क्त्वाप्रत्यये आह—ऋदित्वादिड्वेति । न क्त्वा सेट् । किन्नेति । 'असंयोगाल्लिट् कित्' इत्यतः किदित्यनुवृत्तेरिति भावः । शयित्वेति । कित्त्वाऽभावात् न गुणनिषेधः । मृडमृद । 'न क्त्वा सेट्' इति निषेधस्यापवादः । मृडित्वेति । कित्त्वान्न लघूपधगुणः । मृदित्वेत्यत्राप्युदाहार्यम् । क्लिश इति । 'क्लिशू विबाधने' दिवादौ । ततः क्त्वाप्रत्ययस्य 'क्ष्विदिश्रदिमृडिक्लिशामुपसर्गादात्' इति वेडित्यर्थः । 'क्लिशू विबाधने' इत्यस्य तु ऊदित्त्वाद्वेट् । उदित्वेति । वद्धातोः क्त्वाप्रत्ययः । 'वचिस्वपि' इति सम्प्रसारणम् । उक्तित्वेति । वस धातोः क्त्वा 'वसतिक्षुधोः' इति इट्, सम्प्रसारणम् । 'शासिवसि' इति षः । रुदविद इति कित्त्वमिति । 'न क्त्वा सेट्' इति निषेधस्यापवाद इति भावः । नोपधात्थफान्ताद्वा । थश्च फश्च अन्तौ यस्येति विग्रहः । 'न क्त्वा सेट्' इति नित्यनिषेधे प्राप्ते विकल्पोऽयम् । कित्त्वे सति नलोपः । तदभावे तु नेति मत्वा आह—श्रथित्वेत्यादि । कोथित्वा रेफित्वेति । कुथ पूतीभावे, रिफ कत्थनयुद्धहिंसाश्लेषेषु । इह 'रलो

क्त्वा किद्वा। वचित्वा वक्षित्वा। लुचित्वा लुक्षित्वा। ऋतित्वा अर्तित्वा। ३३२६ **तृषिमृषिकृषेः काश्यपस्य १।२।२५॥** एभ्यः सेट् क्त्वा किद्वा। तृषित्वा। तर्षित्वा। मृषित्वा मर्षित्वा। कृषित्वा कर्षित्वा। 'रलो व्युपधात्—' (सू २६१७) इति वा कित्त्वम्। द्युतित्वा द्योतित्वा। लिखित्वा लेखित्वा। रलः किम्। सेवित्वा। व्युपधात् किम्। वर्तित्वा। हलादेः किम्। एषित्वा। सेट् किम्। भुक्त्वा। 'वसतिक्षुधोरिट्' (सू ३०४६)। उषित्वा। क्षुधित्वा क्षोधित्वा। 'अञ्चेः पूजायाम्' (सू ३०४७)। इति नित्यमिट्। अक्षित्वा। गतौ तु अक्त्वेत्यपि। लुभित्वा। लोभित्वा। 'लुभो विमोहने' (सू ३०४८) इतीट्। अविमोहने तु लुब्ध्वा। ३३२७ **जृव्रश्च्योः क्त्वि ७।२।५५॥** आभ्यां परस्य क्त्व इट् स्यात्। जरीत्वा। जरित्वा। व्रश्चित्वा। ३३२८ **उदितो वा ७।२।५६॥** उदितः परस्य क्त्व इड्वा। शमित्वा। 'अनु-

व्युपधात्' इति विकल्पोऽपि न भवति, नोपधग्रहणसामर्थ्यात्। वञ्चिलुञ्च्यृतश्च। 'न क्त्वा सेट्' इत्यस्यापवादः। कित्त्वविकल्पाल्लोपविकल्पः। ऋतेरुदाहरति—ऋतित्वा अर्तित्वेति। कित्त्वविकल्पाल्लघूपधगुणनिषेधविकल्पः। ऋतिः सौत्रो धातुः गृणायाम्। तस्यार्द्धधातुकविषये 'ऋतेरीयङ्' इत्ययस्य विकल्पनात्। तदभावे कित्त्वमिह विकल्प्यते। तृषिमृषि। 'न क्त्वा सेट्' इत्यस्यापवादः। रल इति। उकारोपधात् इकारोपधाच्च रलन्तात् हलादेः परः सन् क्त्वा च सेटो वा कितावित्ति व्याख्यातं प्राक्। रल् प्रत्याहारः। वर्तित्वेति। 'वृतु वर्तने' इत्ययस्य रूपम्। एषित्वेति। इषधातोः रूपम्। इह हलादित्वाऽभावान्न कित्त्वविकल्पः। किन्तु 'न क्त्वा सेट्' इति नित्यमेव कित्त्वाऽभावान्न गुणनिषेधः। वसधातोः क्षुधधातोश्च अनुदात्तोपदेशत्वात् इनिषेधे प्राप्ते तदपवादं स्मारयति—वसतिक्षुधोरिडिति। उषित्वेति। 'मृडमृद' इति कित्त्वात् 'वचिस्वपि' इति सम्प्रसारणम्। 'शासिवसि' इति षः। अञ्चधातोः क्त्वाप्रत्ययस्य 'उदितो वा' इति इड्विकल्पे प्राप्ते आह—अञ्चेः पूजायामिति। गतौ त्विति। तत्र 'उदितो वा' इति वेट्कत्वात्। लुभित्वा लोभित्वेति। व्याकुलीकृत्येत्यर्थः। 'लुभ विमोहने' तुदादिः। 'विमोहनं व्याकुलीकरणमिति धातुवृत्तिः। 'रलो व्युपधात्' इति कित्त्वविकल्पः। तत्र 'तोषसह' इति इड्विकल्पे आह—लुभो विमोहने इतीडिति। नित्यमिति शेषः। विमोहनार्थाल्लुभः क्त्वानिष्ठयोरिट् स्यात्, न तु गार्ध्ये इति व्याख्यातं प्राक्। अविमोहने त्विति। गार्ध्ये तु 'तोषसह' इति इड्विकल्पे लुभित्वेत्यपि भवति। अभिकाङ्क्षेत्यर्थः। विमोहने तु लुब्ध्वेत्यपपाठः। जृव्रश्च्योः क्त्वि। जरीत्वा जरित्वेति। 'श्र्युकः किति' इति निषेधे प्राप्ते विधिः। 'वृतो वा' इति इटो दीर्घविकल्पः। व्रश्चित्वेति। अत्र ऊदित्त्वादिड्विकल्पे प्राप्ते नित्यमिट्। 'न क्त्वा सेट्' इति कित्त्वनिषेधान्न सम्प्रसारणम्। उदितो वा। क्त्व इति। जृ-

नासिकस्य क्ङि—' (सू २६६६) इति दीर्घः । शान्त्वा । धून्वा देवित्वा । **३३२६ क्रमश्च क्त्वि ६।४।१८॥** क्रम उपधाया वा दीर्घः स्यात् झलादौ क्त्वि परे । क्रान्त्वा क्रन्त्वा । झलि किम् । क्रमित्वा । 'पूङश्च' (सू ३०५०) इति वेट् । पवित्वा पूत्वा । **३३३० जान्तनशां विभाषा ६।४।३२॥** जान्तानां नशेश्च नलोपो वा स्यात् क्त्वि परे । भक्त्वा । भङ्क्त्वा । रक्त्वा । रङ्क्त्वा । 'मस्जिनशोः—' (सू २५१७) इति नुम् । तस्य पक्षे लोपः । नष्ट्वा । नंष्ट्वा । 'रधादिभ्यश्च' (सू २५१५) इतीट्पक्षे नशित्वा । 'झलादाविति वाच्यम्' (वा ५०६६) । नेह । अञ्जित्वा । उदित्त्वाद्वेट् । पक्षे अक्त्वा, अङ्क्त्वा । 'जनसन—' (सू २५०४) इत्यात्त्वम् । खात्वा, खनित्वा । 'द्युतिस्वति' (सू ३०७४) इतोत्त्वम् । दित्वा । सित्वा । मित्वा । स्थित्वा । 'दधातेर्हिः' (सू ३०७६) । हित्वा । **३३३१ जहातेश्च क्त्वि ७।४।४३॥** हित्वा । हाङ्क्त्वा हात्वा । 'अदो

अश्च्योः' इति पूर्वसूत्रात्तदनुवृत्तेरिति भावः । अप्राप्तविभाषेयम् । शमुधातोरिट्पक्षे उदाहरति—शमित्वेति । इडभावे त्वाह—अनुनासिकस्येति । धून्वा देवित्वेति । दिवुधातोरुदित्त्वात् क्त्वायामिड्विकल्पः । इडभावपक्षे 'च्छ्वोः' इति वस्य ऊठि इकारस्य यणि द्यूत्वेति रूपम् । इट्पक्षे तु 'न क्त्वा सेट्' इति किस्वनिषेधात् उपधागुण इति भावः । क्रमश्च क्त्वि । 'नोपधायाः' इत्यतः उपधाया इति 'तनोतेर्विभाषा' इत्यतः विभाषेति 'ढ्रलोपे पूर्वस्य' इत्यतः दीर्घ इति 'अनुनासिकस्य क्ङि' इत्यतः झलग्रहणं चानुवर्तते । तदाह—क्रम उपधाया इत्यादि । 'अनुनासिकस्य क्ङि' इति नित्ये प्राप्ते विकल्पोऽयम् । क्रान्त्वेति । क्रमुधातोरुदित्त्वादिड्विकल्पः । दीर्घपक्षे रूपम् । जान्तनशाम् । 'श्नाभ्यस्तयोः' इत्यतो नलोप इति 'क्त्वि स्कन्दिस्यन्दोः' इत्यतः क्त्वीति चानुवर्तते । तदाह—जान्तानामित्यादि । भक्त्वा भङ्क्त्वेति । 'भञ्जो आमर्दने' इत्यस्य रूपम् । रक्त्वा रङ्क्त्वेति । 'रञ्ज रागे' इत्यस्य रूपम् । नष्ट्वा नंष्ट्वेत्यत्राह—मस्जि इति । तस्येति । नशो नकारस्य 'जान्तनशाम्' इत्यनेन पाक्षिको लोप इत्यर्थः । झलादाविति । 'जान्तनशां विभाषा' इति नलोपविकल्पः झलादावित्यर्थः । अञ्जित्वेति । इटि झलादित्वाऽभावात् 'जान्तनशाम्' इति नलोपो नेति भावः । पक्ष इति । इडभावपक्षे झलादित्वात् नलोपविकल्प इति भावः । आत्त्वमिति । 'खनु अवदारणे' उदित्त्वाद्वेट् । इडभावपक्षे झलादित्वात् 'जनसनखनाम्' इत्यात्त्वमित्यर्थः । दित्वेति । 'दो अवखण्डने' इत्यस्य रूपम् । सित्वेति । 'षोऽन्तकर्मणि' इत्यस्य रूपम् । मित्वेति । माधातोः रूपम् । स्थित्वेति । स्थाधातोः रूपम् । धाधातोः क्त्वाप्रत्यये आह—दधातेर्हिरिति । 'ओ हाक् त्यागे' इत्यस्य क्त्वायां हिभावं दर्शयति—जहातेश्च क्त्वि । हित्वेति । त्यक्त्वेत्यर्थः । हाङ्स्तिथेति । 'जहातेश्च क्त्वि' इति हिभावविधौ 'जहातेर्हि'रिति निर्देशात् 'ओ हाक् त्यागे' इत्यस्य

जग्धिः-' (सू ३०८०)। जग्ध्वा। ३३३२ **समासेऽनञ्पूर्वे क्त्वो ल्यप** ७।१।३७॥ अव्ययपूर्वपदेऽनञ्समासे क्त्वो ल्यबादेशः स्यात्। तुक्। अकृत्य। अनञ् किम्। अकृत्वा। पर्युदासाश्रयणान्नेह। परमकृत्वा ३३३३ **षत्वतुकोरसिद्धः** ६।१।८६॥ षत्वे तुकि च कर्तव्ये एकादेशशास्त्रमसिद्धं स्यात्। कोऽसिचत्, इह षत्वं न। अधीत्य। प्रेत्य। 'ह्रस्वस्य—' (सू २८५८) इति तुक्। ३३३४ **वा ल्यपि** ६।४।३८॥ अनुदात्तोपदेशानां वनतितनोत्यादिनाममनुनासिकलोपो वा स्याल्ल्यपि। व्यवस्थितविभाषेयम्। तेन मान्तानिटां वा, नान्तानिटां वनादीनां च नित्यम्। आगत्य आगम्य। प्रणत्य प्रणम्य। प्रहत्य। प्रमत्य।

ग्रहणम्, न तु 'ओ हाङ् गतौ' इत्यस्य। तस्य 'भृञामित्' इति इत्त्वे 'जिहाते'रिति निर्देशापत्तेः। जग्ध्वेति। जग्ध् क्त्वा इति स्थिते 'झषस्तथोर्धोऽधः' इति धः। 'झरो झरि' इति प्रकृतिधकारस्य पाक्षिको लोपः। समासे। **'अनञ्पूर्वं'इति पर्युदासाद् अव्ययपूर्वपद इति लभ्यते इति मत्वा आह**—अव्ययेत्यादि। तुगिति। **'ह्रस्वस्य पिति'इत्यनेनेति** भावः। प्रकृत्येति। प्रशब्दः प्रकर्षे। तस्य 'कुगति' इति क्त्वान्तेन नित्यसमासः। परमकृत्वेति। **अव्ययपूर्वपदत्वाऽभावान्न ल्यबिति** भावः। षत्वतुकोरसिद्धः। **'एकः पूर्वपरयोः' इत्येकादेशप्रकरणे उक्तमिदं सूत्रम्। ततश्च 'असिद्ध' इत्यस्य 'एकादेश' इति शेषः।** फलितं त्वाह एकादेशशास्त्रमिति। **कार्याऽसिद्धत्वं निराकृत्य शास्त्राऽसिद्धत्वस्यैव भाष्ये सिद्धान्ततत्वादिति भावः।** कोऽसिचदिति। **'एङः पदान्तादति' इति पूर्वरूपमिहैकादेशः। तस्य 'अन्तादिवच्च' इति परादिरत्रे ओसिचदिति पदम्। तस्य सकारस्य अपदादितया 'सात्पदाद्योः'इति निषेधाऽभावात् 'आदेशप्रत्यययोः' इति षत्वं प्राप्तम्** एकादेशस्याऽसिद्धत्वान्न भवति, **एकादेशस्याऽसिद्धत्वेन को असिचदिति स्थिते** सकारस्य अकारेण व्यवधानात् इणः परत्वाऽभावात्। तदाह—इह षत्वं नेति। **षत्वे एकादेशस्याऽसिद्धत्वे प्रासङ्गिकमुदाहृत्य प्रकृते ल्यपि तुग्विधावसिद्धमुदाहरति**—अधीत्येति। **'इङ् अध्ययने' नित्यमधिपूर्वः तस्मात् क्त्वो ल्यप्।** प्रेत्येति। **प्रपूर्वादिण्धातोः क्त्वो ल्यप्। इहोभयत्र सवर्णदीर्घस्य आद्गुणस्य चाऽसिद्धत्वात् 'ह्रस्वस्य पिति' इति तुक्।** एकादेशस्याऽसिद्धत्वाऽभावे तु ह्रस्वाऽभावात्तुक् न स्यात्। तदाह—ह्रस्वस्येति तुगिति। वा ल्यपि। **'अनुदात्तोपदेशवनतितनोत्यादिनाममनुनासिकलोपः' इत्युत्तरमिदं सूत्रम्।** तदाह—'अनुदात्तेत्यादि। **अनुदात्तोपदेशानां, वनतितनोत्यादीनां च अनुदात्तोपदेशेत्वृकृो नलोपो ल्यपि वा स्यादित्यर्थः।** व्यवस्थितविभाषेति। व्याख्यानादिति भावः। मान्तानिटं वेति। **गम्नम्नरम्नयमां पाक्षिको मलोप इत्यर्थः।** नान्तेति। **नान्तेषु मन्यहनावनिटौ, तयोः वनादीनां च 'अनुदात्तोपदेश' इत्यनेन नलोपो नित्यं स्यादित्यर्थः।** नान्ताऽनिटाभिति बहुवचनं तु प्रयोगबहुत्वाभिप्रायम्। मान्तानामुदाहरति—आगत्येति। **गमेरनुनासिकलोपे तुक्।** प्रणत्येति। **नमेरनुनासिकलोपपक्षे तुक्। विरम्य विर-**

प्रवत्य । वितत्य । 'अदो जग्धिः—' (सू २०८०) । 'अन्तरङ्गानपि विधीन्बहिरङ्गो ल्यब्बाधते' । जग्धिविधौ ल्यब्ग्रहणात् । तेन हित्वदत्वात्त्वेत्वदीर्घत्वशूठिटो ल्यपि न । विधाय । अदाय । प्रखन्य । प्रस्थाय । प्रक्रम्य । आपृच्छ्य । प्रदीव्य । ३३६५ न ल्यपि ६।४।६९॥ ल्यपि परे घुमास्थादेरीत्वं न । धेट् । प्रधाय । प्रमाय । प्रगाय । प्रणाय । प्रहाय । प्रसाय । 'मीनातिमिनोति–' (सू २५०८) इत्यात्वम् । प्रमाय । निमाय । उपदाय । 'विभाषा लीयतेः' (सू २५०९) । विलाय विलीय । णिलोपः । उत्तार्य । विचार्य । ३३३६ ल्यपि ल-

---

त्य, प्रयत्य प्रयत्य, इत्यप्युदाहार्यम् । मान्तयोरुदाहरति–प्रहत्य प्रमत्यति । हनो मन्यतेश्च नित्यं नलोपः । प्रवत्येति । वनेर्नित्यं नलोपः, तुक् । वितत्येति । तनोतेर्नित्यं नलोपः, तुक् । भाष्ये तु 'वा ल्यपि' इति सूत्रं न दृश्यते । 'अनुदात्त' इति सूत्रे 'अनुदात्तोपदेशेऽनुनासिकलोपो ल्यपि च' इति वा मः' इति च वार्तिकं पठितम्, ल्यपि च 'अनुदात्तोपदेश' इति नलोपो भवति । मकारान्तानां तु वेत्यर्थः । अथ प्रजग्ध्वेत्युदाहरणं मनसि निधाय तत्र अद धातोः क्त्वो ल्यपि 'अदो जग्धिर्ल्यसि किति' इति जग्ध्यादेशविधिं स्मारयति—अदो जग्धिरिति । आदेशे इकार उच्चारणार्थः । ननु विधायेत्यत्र 'दधातेर्हिः' इति हिभावः प्राप्नोति । न च तस्य तादौ किति विधानात् ल्यपि कृते कथं तत्प्राप्तिः । अलाश्रयविधौ स्थानिवत्त्वाभावादिति वाच्यम् । परस्मादपि ल्यपः प्रागेवाऽन्तरङ्गत्वात् हिभावप्रवृत्तेर्दुर्निवारत्वात् । तथा प्रदायेत्यत्र तादौ किति विहितमित्वं ल्यपः प्रागेवाऽन्तरङ्गत्वात् प्राप्नोति । तथा प्रखन्येत्यत्र 'जनसनखनां सञ्झलोः' इति झलादिलक्षणमात्वं ल्यपः प्रागेव प्राप्नोति । तथा 'ष्ठितिस्यतिमास्थामित्ति किति' इति इत्वं ल्यपः प्रागेव प्राप्नोति । तथा प्रक्रम्येत्यत्र 'क्रमश्च क्त्वि' इति झलादौ क्त्वि विहितमुपधादीर्घत्वं ल्यपः प्रागेव प्राप्नोति । तथा आपृच्छ्य प्रदीव्येत्यत्र 'वच्विवोः' इति शूठौ झलादित्वलक्षणौ ल्यपः प्रागेव स्याताम् । तथा प्रदीव्येत्यत्र वलादिलक्षणः इट् ल्यपः प्रागेव प्राप्नोतीत्याशङ्क्य आह—अन्तरङ्गानपीति । कुत एतदित्यत आह—जग्धिविधाविति । 'अदो जग्धिर्ल्यसि किति' इत्येतावतैव प्रजग्ध्य इत्यत्रापि ल्यपः प्रागेवाऽन्तरङ्गत्वात् जग्ध्यादेशः सिद्धः । अतो ल्यब्ग्रहणं 'अन्तरङ्गानपि विधीन् बहिरङ्गो ल्यब्बाधते' इति ज्ञापयति । एवं च अन्तरङ्गजग्ध्यादेशापेक्षया प्राबल्याल्ल्यपि कृते सति तकारादित्वलक्षणजग्धिभावस्याऽप्रसक्तेः जग्धिविधौ ल्यब्ग्रहणमर्थवदिति भावः । तेनेति । हित्वं, दत्वं, आत्त्वम्, इत्त्वं, दीर्घत्वं, शूठौ, इट् च ल्यपि नेत्यर्थः । न ल्यपि । 'घुमास्थागापाजहातिसाम्' इत्यनुवर्तते । 'ईयति' इत्यतः ईत् इति च । तदाह–ल्यपि परे इत्यादि । धेडिति । प्रकृतिप्रदर्शनम् । प्रधायेति । 'आदेचः' इत्यात्त्वम् । प्रपायेति । निपीयेति तु पाङ् पाने इत्यस्य रूपम् । प्रसायेति । 'षोऽन्तकर्मणि' इत्यस्य रूपम् । क्षीरः क्त्वो ल्यपि आत्त्वविकल्पं स्मारयति—विभाषा लीयतेरिति । णिलोप इति ।

घुपूर्वात् ६।४।५६॥ लघुपूर्वात्परस्य णेरयादेशः स्याल्ल्यपि। विगणय्य। प्रणमय्य। प्रबेभिदय्य। लघुपूर्वात् किम्। सम्प्रधार्य। ३३३७ विभाषाऽऽपः ६।४।५७॥ आप्नोतेर्णेरयादेशो वा स्याल्ल्यपि। प्रापय्य। प्राप्य। ३३३८ क्षियः ६।४।५९॥ क्षियो ल्यपि दीर्घः स्यात्। प्रक्षीय। ३३३९ ल्यपि च ६।१।४१॥ वेञो ल्यपि सम्प्रसारणं न स्यात्। प्रवाय। ३३४० व्यश्च ६।१।४२॥ प्रव्यय। ३३४१ व्यश्च ६।१।४३॥ उपव्यय। ३३४२ विभाषा परेः ६।१।४४॥ परेर्व्येञो वा सम्प्रसारणं स्याल्ल्यपि। तुकं बाधित्वा परत्वात् 'हलः' (सू २५५९) इति दीर्घः। परिवीय। परिव्याय। कथम् 'मुखं व्यादाय स्वपिति' 'नेत्रे निमील्य हसति' इति। व्यादाननिमीलनोत्तरकालेऽपि स्वापहासयोर-

डःपूर्वात् तृधातोर्णिचि वृद्धौ रपरत्वे उत्तरि इति रूपम्। विपूर्वाच्चरधातोर्णिचि उपधावृद्धौ विचारीति रूपम्, ताभ्यां क्त्वो ल्यपि णिलोप इत्यर्थः। ल्यपि लघुपूर्वात्। 'णेरनिटि' इत्यतो णेरिति 'अयामन्ताल्वाय्य' इत्यतः अय् इति चानुवर्तते। तदाह—लघुपूर्वादिति। लघुः पूर्वो यस्मादुर्णादिति विग्रहः,। णिलोपापवादः। विगणय्येति। 'गण सङ्ख्याने' चुरादिः। कथादिरदन्तः। तस्मात्णिच्। अतो लोपः। क्त्वो ल्यपि णेरयादेशः। प्रबेभिदय्येति। भिदधातोर्यङि द्वित्वम्। 'गुणो यङ्लुकोः' इत्यभ्यासस्य गुणः, जश्त्वं, 'यस्य हलः' इति यकारलोपः, अतो लोपः, क्त्वो ल्यपि णेरयादेशः। विभाषाऽऽपः। लघुपूर्वत्वाऽभावात् पूर्वेण अप्राप्ते विभाषेयम्। क्षियः। 'ल्यपि लघुपूर्वात्' इत्यतो ल्यपीति 'युप्लुवोर्दीर्घछन्दसि' इत्यतो दीर्घं इति चानुवर्तते। तदाह—क्षियो ल्यपीति। ल्यपि च। 'वेञः' इति सूत्रमनुवर्तते। 'न सम्प्रसारणे सम्प्रसारणम्' इत्यतः न सम्प्रसारणमिति च। तदाह—वेञो ल्यपीत्यादि। प्रवायेति। 'वेञ तन्तुसन्ताने' क्त्वो ल्यप्। 'आदेच उपदेशे' इत्यात्वम्। इह 'प्रहिज्यावयिव्यधिवष्टिविचति' इति सम्प्रसारणं न। व्यश्च। व्यधातोर्ल्यपि सम्प्रसारणं न स्यादित्यर्थः। प्रव्यायेति। इह 'ग्रहिज्यावयि' इति सम्प्रसारणं न। व्यश्च। व्येञो ल्यपि सम्प्रसारणं नेत्यर्थः। उपव्यायेति। व्येञ संवरणे' क्त्वो ल्यपि 'आदेचः' इत्यात्वम्। 'ग्रहिज्यावयि' इति सम्प्रसारणं न। विभाषा परेः। 'व्यः' इति ल्यपीति, सम्प्रसारणमिति चानुवर्तते। तदाह—परेर्व्येञ इति। परिपूर्वाद् व्येञः क्त्वो ल्यपि यकारस्य सम्प्रसारणे पूर्वरूपे च कृते परि वि इय इति स्थिते, आह—तुकमिति। कथमिति। स्वापकाल एव मुखव्यादानं हासकाल एव नेत्रनिमीलनम्। एवं च व्यादाननेत्रनिमीलनयोः स्वापहासपूर्वकालकत्वाऽभावात् कथं क्त्वाप्रत्यय इत्याक्षेपः। समाधत्ते—व्यादानेति। यद्यपि स्वापहसनोत्पत्युत्तरकालके व्यादाननिमीलने, न तु तत्पूर्वकालके। तथापि व्यादानोत्पत्युत्तरकालके निमीलनोत्पत्युत्तरकालेऽपि स्वापहासौ अनुवर्तेते। तत्र स्वापोत्पत्तिकालीनव्यादानस्य हासोत्पत्तिकालीननिमी-

नुवृत्तेस्तदंशविवक्षया भविष्यति । **३३४३ आभीक्ष्ण्ये णमुल्च ३।४।२२॥** पौनःपुन्ये द्योत्ये पूर्वविषये णमुल्स्यात् क्त्वा च । द्वित्वम् । स्मारं स्मारं नमति शिवम् । स्मृत्वा स्मृत्वा । पायं पायम् । भोजं भोजम् । श्रावं श्रावम् । 'चिण्णमुलोः–' (सू २७६२) इति णमुल्परे णौ वा दीर्घः । गामं गामम् । गमं गमम् । 'विभाषा चिण्णमुलोः' (२७६५) इति नुम्वा । लम्भं लाम्भम् । लाभं लाभम् । व्यवस्थितविभाषयोपसृष्टस्य नित्यं नुम् । प्रलम्भं प्रलम्भम् । 'जाग्रोऽविचिण्णल्–' (सू २४८०) इति गुणः । जागरं जागरम् । ण्यन्तस्याप्येवम् । **३३४४ न यद्यनाकाङ्क्षे ३।४।२३॥** यक्छब्द उपपदे पूर्वकाले यत्प्राप्तं तन्न, यत्र पूर्वोत्तरे क्रिये तद्वाक्यमपरं नाकाङ्क्षति चेत् । यदयं भुङ्क्ते ततः पठति । इह क्त्वाणमुलौ न । अनाकाङ्क्षे किम् । यदयं भुक्त्वा व्रजति ततोऽधीते । **३३४५ विभाषा-**

लनस्य च तत्कालीनत्वापहासपूर्वकालकत्वाऽभावेऽपि तदुत्तरकालानुवृत्तत्वापहासापेक्षया पूर्वकालकत्वसत्त्वात् क्त्वाप्रत्यय इत्यर्थः । 'मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते' इत्यादौ तु समानकर्तृकताऽविघाताय 'स्थितस्येत्याद्यध्याहार्यम् । आभीक्ष्ण्ये णमुल् च । 'समानकर्तृकयोः पूर्वकाले' इत्युत्तरमिदं सूत्रम् । तदाह—पूर्वविषये इति । यद्यपि वाऽसरूपविधिना क्त्वा सिद्धः । स्त्र्यधिकारात्प्रागेव वाऽसरूपविधिपक्षेऽपि क्त्वाविधौ वाऽसरूपवचनस्य वाऽसरूपसूत्रभाष्ये प्रपञ्चितत्वात् । तथापि 'दिग्भाषाग्रेप्रथम' इति सूत्रे इमयोर्विधानाय चकारः । तत्र हि 'अग्रे भोजं व्रजति देवदत्तः' 'अग्रे भुक्त्वा' इत्यादौ देवदत्तकर्तृकभोजने यज्ञदत्तादिकर्तृकभोजनापेक्षया पूर्वकालत्वमग्रादिशब्देन बोध्यते, न तु व्रजनादिक्रियापेक्षया पूर्वकालत्वम् । ततश्च 'समानकर्तृकयोः' इति क्त्वाप्रत्ययस्य तत्र न प्रसक्तिः । नापि 'विभाषाग्रे' इत्यनेन आभीक्ष्ण्ये तत्राऽप्राप्तविधिरिति युज्यते । आभीक्ष्ण्ये पूर्वविप्रतिषेधेन 'आभीक्ष्ण्ये णमुल् च' इत्यस्यैव प्रवृत्तेरिष्टत्वादिति शब्देन्दुशेखरे विस्तरः । द्वित्वमिति । 'नित्यवीप्सयोः' इत्यनेनेति शेषः । स्मृत्वास्मृत्वेति । 'नमति शिवम्' इत्यनुषज्यते पायंपायमिति । 'आतो युक् चिण्कृतोः' इति युक् । वा दीर्घ इति । गमेर्ण्यन्ताण्णमुलि मितां ह्रस्वः' इति ह्रस्वे कृते 'चिण्णमुलोः' इति दीर्घविकल्प इत्यर्थः । व्यवस्थितेति । व्याख्यानादिति भावः । उपसृष्टस्येति । उपसर्गापूर्वस्येत्यर्थः । जागृधातोर्णमुलि वृद्धिमाशङ्क्य आह—जाग्र इति । ण्यन्तस्याप्येवमिति । जागृधातोर्णौ वृद्धि बाधित्वा 'जाग्रोऽविचिण्णल्ङित्सु' इति गुणे णिलोपे 'जागर'मित्येव रूपमिति भावः । न यद्यनाकाङ्क्षे । यदप्राप्तमिति । क्त्वा णमुल् चेत्यर्थः । यत्रेति । यस्मिन्वाक्ये पूर्वोत्तरकालिकक्रियापदे स्तः, तद्वाक्यं वाक्यान्तरं नाकाङ्क्षति चेदित्यर्थः । पूर्वोत्तरकालिकक्रियापदद्वययुक्तं वाक्यान्तरं नाकाङ्क्षति चेत् इति यावत् । यदयमिति । 'य'दित्यव्ययम् । यदायं भुङ्क्ते ततः परं पठतीत्यर्थः । इदमेकं वाक्यं भुजिपठिक्रियापदद्वययुक्तं न वाक्यान्तरमाकाङ्क्षतीति भावः ।

ऽग्रेप्रथमपूर्वेषु ३।४।२४॥ आभीक्ष्ण्य इति नानुवर्तते। एषूपपदेषु समानकर्तृकयोः पूर्वकाले क्त्वाणमुलौ वा स्तः। अग्रे भोजं व्रजति। अग्रे भुक्त्वा। प्रथमं भोजम्। प्रथमं भुक्त्वा। पूर्वं भोजम्। पूर्वं भुक्त्वा। पक्षे लडादयः। अग्रे भुङ्क्ते ततो व्रजति। अभीक्ष्ण्ये तु पूर्वविप्रतिषेधेन नित्यमेव विधिः। अग्रे भोजं-भोजं-व्रजति। भुक्त्वा-भुक्त्वा। **३३४६ कर्मण्याक्रोशे कृञः खमुञ् ३।४।२५॥** कर्मण्युपपदे आक्रोशे गम्ये कृञः खमुञ् स्यात्। चौरङ्कारमाक्रोशति। करोतिरुच्चारणे। चौरशब्दमुच्चार्येत्यर्थः। **३३४७ स्वादुमि णमुल् ३।४।२६॥** स्वाद्वर्थेषु कृञो णमुल्स्यादेककर्तृकयोः पूर्वकाले। स्वादुशब्दस्य मान्तत्वं निपात्यते। अस्वाद्वीं स्वाद्वीं कृत्वा भुङ्क्ते। स्वादुंकारं भुङ्क्ते। सम्पन्नंकारम्। लवणं-

---

यदयं भुक्त्वा व्रजतीति। भुजिव्रजिक्रियापदयुक्तमिदं वाक्यम्। ततः 'अधीत' इति वाक्यान्तरमाकाङ्क्षति। नात्रायं निषेध इति भावः। विभाषाग्रे। अग्रे, प्रथम, पूर्वं, एषां द्वन्द्वः। अग्र इत्यव्ययम्। एदन्तं वा निपातनात्। नानुवर्तते इति। एतच्च भाष्ये स्पष्टम्। प्रथमं भोजमिति। 'प्रथम'मिति क्रियाविशेषणम्। पूर्वं भोजमिति। 'पूर्व'मिति क्रियाविशेषणम्। पक्षे इति। क्त्वाणमुलौ तावदव्ययकृत्वाद्यावार्थकौ। यदा तु कर्तृविवक्षा तदा लडादय इत्यर्थः। ननु अग्रेप्रथमपूर्वपदेषूपपदेषु क्त्वाणमुलौ परत्वादाभीक्ष्ण्येऽपि स्यातामित्यत आह—आभीक्ष्ण्ये तु पूर्वविप्रतिषेधेनेति। व्यालम्बनादिति भावः। कर्मण्याक्रोशे। कर्मणीत्युपपदनिर्देशः। आक्रोश इति द्योत्यार्थ इति मत्वा व्याचष्टे—कर्मण्युपपदे आक्रोशे गम्ये कृञः खमुञिति। स्पष्टत्वात् न व्याख्येयमिति भावः। चौरङ्कारमिति। उपपदसमासे 'अरुर्द्विषदजन्तस्य' इति मुम्। स्वादुमि णमुल्। स्वादुमीत्यर्थग्रहणम्। व्याख्यानात्। तथा च स्वादुपर्याये उपपद इति लभ्यते। 'कर्मण्याक्रोशे' इति पूर्वसूत्रात् कृञ इत्यनुवर्तते ननु खमुञ् अस्वरितत्वात्। ततश्च 'आभीक्ष्ण्ये णमुल् च' इत्यतः णमुलित्यनुवर्तते, 'समानकर्तृकयोः पूर्वकाले' इति सूत्रं च। तदाह—स्वाद्वर्थेष्वित्यादिना। ननु स्वादुशब्दस्य स्वादावित्येव निर्देश उचित इत्यत आह—स्वादुशब्दस्येति। नन्वत्र खमुञेवानुवर्तताम्। एवं च स्वादुमि मान्तत्वनिपातनमपि न कर्तव्यमित्याशङ्क्य स्त्रियां ङीप्यन्तमुदाहरति—अस्वाद्वीमिति। यवागूमपूपिकामित्यादि विशेष्यम्। अत्र णमुलि विहिते मान्तत्वे निपातिते उदन्तत्वाऽभावात् 'द्योतो गुणवचनात्' इति न ङीष्। खमुञि कृते 'अरुर्द्विषत्' इति मुमि तु स्वादुङ्कारमित्येव प्रसज्येत। किञ्च ङीप्यन्तस्याऽव्ययत्वात् 'अरुर्द्विषद्' इति मुम् दुर्लभः, तत्र मुम्विधौ 'अनव्ययस्ये'त्यनुवृत्तेः। ततश्च अस्वादुं स्वादुं कृत्वा भुङ्क्ते स्वादुङ्कारं भुङ्क्ते इत्यत्रापि मुम् न स्यात्, खमुञः खित्त्वस्य चौरङ्कारमित्यत्र सावकाशत्वात्। किञ्च 'च्वौ' इति दीर्घापत्तिः। अतो णमुलि स्वादुशब्दे मान्तत्वनिपातनमिति भावः। स्वादुमित्यर्थग्रहणस्य प्र-

कारम्। सम्पन्नलवणशब्दौ स्वादुपर्यायौ। वाऽसरूपेण क्त्वापि। स्वादुं कृत्वा भुङ्क्ते। **३३४८ अन्यथैवंकथमित्थंसु सिद्धाप्रयोगश्चेत्** ३।४।२७॥ एषु कृञो णमुल्स्यात् सिद्धोऽप्रयोगोऽस्यैवंभूतश्चेत्कृञ्। व्यर्थत्वात्प्रयोगानर्ह इत्यर्थः। अन्यथाकारम्। एवङ्कारम्। कथङ्कारम्। इत्थङ्कारम् भुङ्क्ते। इत्थं भुक्त इत्यर्थः। सिद्ध-इति किम्। शिरोऽन्यथा कृत्वा भुङ्क्ते। **३३४९ यथातथयोरसूयाप्रतिवचने** ३।४।२८॥ कृञः सिद्धाऽप्रयोग इत्येव, असूयया प्रतिवचने। यथाकारमहं भोक्ष्ये, तथाकारं भोक्ष्ये, किं तवानेन। **३३५० कर्मणि दृशिविदोः साकल्ये** २।४।२९॥ कर्मण्युपपदे णमुल्स्यात्। कन्यादर्शं वरयति। सर्वाः कन्या इत्यर्थः। ब्राह्मणवेदं भोजयति। यं यं ब्राह्मणं जानाति लभते विचारयति वा तं

भोजनमाह—सम्पन्नकारामिति। अत्र 'अस्य च्वौ' इति ईत्त्वाऽभावोऽपि मान्तत्वनिपातनस्य फलं बोध्यम्। स्वादुपर्यायाविति। वृत्त्यादिग्रन्थेषु तथा दर्शनादिति भावः। वाऽसरूपेण क्त्वापीति। यद्यपि 'स्त्रियां क्तिन्' इत्यतः प्रागेव वाऽसरूपविधिरिति भाष्ये स्थितम्। तथापि तत्रैव भाष्ये 'क्त्वायां वा वचनम्' इति क्त्वाप्रत्ययविषये वाऽसरूपविधिप्रवृत्तेर्विशिष्य वचनादिह क्त्वापि भवतीत्यर्थः। 'वाऽसरूपविधिः स्त्रियामित्यधिकारात् प्रागूर्ध्वं च भवती'ति पश्चान्तरमपि तत्रैव भाष्ये स्थितम्। तत्पक्षे क्त्वायां वाऽसरूपप्रवृत्तिर्नाशंक्येत्यास्तां तावत्। अन्यथैवम्। अन्यथा, एवम्, कथम्, इत्थम्, एषामव्ययानां द्वन्द्वात्सप्तमीबहुवचनम्। सिद्धः अप्रयोगः प्रयोगाभावः यस्य कृञः स सिद्धाऽप्रयोग इति विग्रहः। तदाह—एषु कृञ इत्यादि। ननु कृञः अप्रयोगे कथं तदर्थावगतिः। अर्थाऽवगत्यभावे तत्प्रयोगो वा किमर्थं इत्यत आह—व्यर्थत्वादिति। निष्फलत्वादिति भावः। अर्थस्याऽविवक्षितत्वेऽपि णमुलप्रत्ययसाधुत्वार्थं तत्प्रयोग इति भावः। तदेव दर्शयति—इत्थं भुङ्क्ते इत्यर्थ इति। 'समानकर्तृकयोः पूर्वकाले' इत्यसम्भवान्नानुवर्तते इति भावः। सिद्धेति किमिति। सिद्धाऽप्रयोगश्चेदिति किमर्थमित्यर्थः। भाष्ये 'अन्यथा कृत्वा चोदित'मिति प्रयोगात् समानकर्तृकत्वाऽभावेऽपि क्त्वाप्रत्ययो बोध्यः। यथातथयोः। इत्येवेति। यथा तथा अनयोरुपपदयोः कृञः णमुल् स्यात्सिद्धाऽप्रयोगश्चेत् कृञिति फलितम्। असूयया प्रतिवचनमिति विग्रहः। 'कर्तृकरणे कृता बहुलम्' इति समासः। तदाह—असूययेति। कर्मणि दृशिविदोः। कर्मणीति नाऽर्थनिर्देश इत्याह—कर्मण्युपपदे इति। कर्मण्युपपदे तदर्थस्य ज्ञात्वर्थं प्रति कर्मभूतस्य साकल्ये गम्ये दृशिविदिभ्यां णमुल् इति फलितम्। 'समानकर्तृकयोः पूर्वकाले' इत्यनुवर्तत एव। वरयतीति। 'वर ईप्सायाम्' चुरादौ कथादिरदन्तः। अल्लोपस्य स्थानिवत्त्वाद्धोपधावृद्धिः। विदि विवृणोति—जानाति लभते विचारयति वेति। "सत्तायां विद्यते ज्ञाने वेत्ति विन्त विचारणे। विन्दते वि-

सर्वं भोजयतीत्यर्थः। **३३५१ यावति विन्दजीवोः ३।४।३०॥** यावद्वेदं भुङ्क्ते। यावल्लभते तावदित्यर्थः। यावज्जीवमधीयते। **३३५२ चर्मोदरयोः पूरेः ३।४।३१॥** कर्मणीत्येव। चर्मपूरं स्तृणाति। उदरपूरं भुङ्क्ते। **३३५३ वर्षप्रमाणे ऊलोपश्चास्यान्यतरस्याम् ३।४।३२॥** कर्मण्युपपदे पूरेर्णमुल्स्यादूकारलोपश्च वा, समुदायेन वर्षप्रमाणे गम्ये। गोष्पदपूरं वृष्टो देवः। गोष्पदपूं वृष्टो देवः। अस्य इति किम्। उपपदस्य मा भूत्। मूषिकाविलप्रम्। **३३५४ चेले क्नोपेः ३।४।३३॥** चेलार्थेषु कर्मसूपपदेषु क्नोपेर्णमुल्स्याद्वर्षप्रमाणे। चेलक्नोपं (शब्दाययन्) वृष्टो देवः। वस्त्रक्नोपम्। वसनक्नोपम्। (यथा वर्षणे वस्त्रम् शब्दायते तथाऽवर्षदित्यर्थः)। **३३५५ निमूलसमूलयोः कषः ३।४।३४॥** कर्मणीत्येव। कषादिष्वनुप्रयोगं वक्ष्यति। अत्र प्रकरणे पूर्वकाले इति न सम्बध्यते। निमूलकाषं कषति। समूलकाष कषति। निमूलं समूलं कषतीत्यर्थः। एकस्यापि धात्वर्थस्य निमूलादिविशेषणसम्बन्धाद्भेदः। तेन सामान्यविशेषभावेन विशेषणविशेष्यभावः। **३३५६ शुष्कचूर्णरूक्षेषु पिषः ३।४।३५॥** एषु कर्मसु पिषेर्णमुल्। शुष्कपेषं पिनष्टि। शुष्कं पिनष्टीत्यर्थः। चूर्णपेषम्। रूक्षपेषम्। **३३५७ समूलाऽकृत-**

न्दति प्राहो श्यनलुक्श्नमशेच्विदं क्रमात्" इति प्रागुक्तम्। तत्र सत्तार्थकस्य विदेरिह न ग्रहणम् अकर्मकत्वादिति भावः। यावति विन्दजीवोः। यावच्छब्दे उपपदे विन्दतेः जीवतेश्च णमुलित्यर्थः। इह पूर्वकाल इति न सम्बध्यते, अयोग्यत्वात् अप्रतीतेश्च। एवमन्यत्रापि। यावज्जीवमधीते। यावन्तं कालं जीवति तावन्तं कालमधीते इत्यर्थः। 'अकर्मकधातुभिर्योगे' इति कर्मत्वात् यावच्छब्दाद्द्वितीया। चर्मोदरयोः पूरेः। चर्मणि उदरे च कर्मण्युपपदे पूरयतेर्णमुलित्यर्थः। चर्मपूरं स्तृणातीति। चर्म पूरयन् छादयतीत्यर्थः। गोष्पदप्रमिति। पूरेर्णमुलि णिलोपे ऊलोपपक्षे च रूपम्। अत्र वृष्टेर्गोष्पदपूरणक्षमत्वादल्पत्वं गम्यते। अस्येति किमिति। पूरेरित्यर्थकम् 'अस्येति' किमर्थमित्यर्थः। मूषिकाविलप्रमिति। 'अस्येत्यनुक्तौ उपपदेऽपि ऊकारस्य लोपः स्यादिति भावः। चेले क्नोपेः। चेल इत्यर्थग्रहणम्, व्याख्यानादिति भावः। 'क्नूयी शब्दे' इति भ्वादौ। तदाह—चेलक्नोपमिति। क्नोपशब्दार्थं स्फोरयति—शब्दाययन्निति। वर्षप्रमाणं स्फोरयितुमाह—यथा वर्षण इति। निमूलसमूलयोः कषः। निमूले समूले च कर्मण्युपपदे कषेर्णमुलित्यर्थः। वक्ष्यतीति। 'कषादिषु यथाविध्यनुप्रयोगः' इति णमुल्प्रकृतेरनुप्रयोगं वक्ष्यतीत्यर्थः। न सम्बध्यते इति। अयोग्यत्वादप्रतीतेश्च इति भावः। णमुल्प्रकृतेरनुप्रयुज्यमानधातोश्च पौनरुक्त्यं परिहरति—एकस्यापीति। निमूलसमूलकषणापेक्षया केवलकषणमन्यत्। यथा इन्द्रो महेन्द्र इति भावः। तेन सामान्येति। निमूलसमूलकषणात्मकं कषणमिति बोधः। यथा महादेवो देव इत्या-

जीवेषु हनकृञ्ग्रहः ३।४।३६ ॥ कर्मणीत्येव । समूलघातं हन्ति । अकृतकारं करोति । जीवग्राहं गृह्णाति । जीवतीति जीवः । इगुपधलक्षणः कः । जीवन्तं गृह्णातीत्यर्थः । **३३५८ करणे हनः ३।४।३७**॥ पादघातं हन्ति । पादेन हन्तीत्यर्थः । यथाविध्यनुप्रयोगार्थः सन्नित्यसमासार्थोऽयं योगः । भिन्नधातुसम्बन्धे तु 'हिंसार्थानां च—' (सू ३३६९) इति वक्ष्यते । **३३५९ स्नेहने पिषः ३।४।३८** ॥ स्निह्यते येन तस्मिन्करणे पिषेर्णमुल् । उदपेषं पिनष्टि । उदकेन पिनष्टीत्यर्थः । **३३६० हस्ते वर्तिग्रहोः ३।४।३९**॥ हस्तार्थे करणे । हस्तवर्तं वर्तयति । करवर्तम् । हस्तेन गुलिकां करोतीत्यर्थः । हस्तग्राहं गृह्णाति । करग्राहम् । पाणिग्राहम् । **३३६१ स्वे पुषः ३।४।४०**॥ करण इत्येव । स्व इत्यर्थग्रहणम् । तेन स्वरूपे पर्याये विशेषे च णमुल । स्वपोषं पुष्णाति ।

दाविति भावः । शुष्कचूर्णरूक्षेषु पिषः । कर्मस्विति । 'उपपदेष्विं'ति शेषः । अत्र पिषधातोरनुप्रयोगः । समूलाकृत । **समूल, अकृत,जीव एषां द्वन्द्वः । कर्मणीत्येव । समूलादिषु कर्मसूपपदेषु हन् कृञ् ग्रह् एभ्यो णमुलित्यर्थः । यथासङ्ख्यमत्रेष्यते । जीवशब्दस्य भावघञन्तत्वे प्राणधारणं गृह्णातीत्याश्रयणे हन्तीत्यर्थः स्यात्, न तु जीवन्तं गृह्णातीत्यर्थः स्यादित्यत आह**—जीवतीति । जीव इति । **ननु 'अकर्तरि च कारके' इति पर्युदासात् कथं कर्तरि घञित्यत आह**—इगुपधेति । करणे हनः । **ननु 'हिंसार्थानां च समानकर्मकाणाम्' इत्यनुपदं वक्ष्यमाणसूत्रेणैव सिद्धे किमर्थमिदमित्यत आह**—यथाविधीत्यादि । **कषादिषु यथाविध्यनुप्रयोगसिद्ध्यर्थः सन् 'उपपदमतिङ्' इति नित्यसमासार्थोऽयमारभ्य इत्यर्थः । अनुप्रयोगार्थो, नित्यसमासार्थश्चेति यावत् । 'हिंसार्थानां चे'ति सूत्रं च कषादिबहिर्भूतं, तस्यात्र प्रवृत्तौ तु अनुप्रयोगो न स्यात् । किञ्च 'हिंसार्थानां च' इति सूत्रम् 'उपदंशस्तृतीयायाम्' इत्युत्तरं पठितम् । तस्याऽत्र प्रवृत्तौ 'तृतीयाप्रभृतीन्यन्यतरस्याम्' इति वैकल्पिक उपपदसमासः स्यादिति भावः । भाष्ये तु अहिंसार्थं. नित्यसमासार्थं चेति स्थितम् । तर्हि 'हिंसार्थानां चे'त्यस्य को विषय इत्यत आह**—भिन्नेति । णमुलप्रकृतिभूतहनधातुभिन्नधातुव्यपेक्षया धात्वन्तरयोगे तु 'दण्डोपघातं गाः कालयति दण्डेनोपघातमित्यत्र 'हिंसार्थानां च' इत्यस्य प्रवृत्तिर्वक्ष्यते इत्यर्थः । स्नेहने पिषः । उदपेषमिति । 'पेषंवासवाहनधिषु च' इति उदकशब्दस्य उदादेशः । हस्ते वर्तिग्रहोः । पञ्चम्यर्थे षष्ठी । हस्त इत्यर्थग्रहणम्, व्याख्यानात् । तथाच हस्तार्थक इति लभ्यते, करण इत्यनुवर्तते, तदाह**—हस्तार्थे करणे इति । **करणकारकीभूतहस्तपर्यायेऽप्युपपदे व्यन्तवृतुघातोर्ग्रहधातोश्च णमुलित्यर्थः । स्वे पुषः । अर्थग्रहणमिति । व्याख्यानादिति भावः । तेनेति । स्वरूपे स्वशब्दे, स्वपर्याये धनादिशब्दे, विशेषेषु स्वविशेषवाचिगवादिशब्देषु चोपपदेषु णमुलित्यर्थः । एतच्च 'स्वं रूपम्' इति सूत्रे भाष्ये स्पष्टम् । तत्र स्वशब्दे उपपदे उदाहरति**—स्वपोषमिति । **ध**

धनपोषम्। गोपोषम्। ३३६२ **अधिकरणे बन्धः** ३।४।४१॥ चक्रबन्धं बध्नाति। चक्रे बध्नातीत्यर्थः। ३३६३ **संज्ञायाम्** ३।४।४२॥ बध्नातेर्णमुल्स-ञ्ज्ञायाम्। क्रौञ्चबन्धं बद्धः। मयूरिकाबन्धम्। अट्टालिकाबन्धम्। बन्धविशे-षाणां सञ्ज्ञा एताः। ३३६४ **कर्त्रोर्जीवपुरुषयोर्नशिवहोः** ३।४।४३॥ जीव-नाशं नश्यति। जीवो नश्यतीत्यर्थः। पुरुषवाहं वहति। पुरुषो वह्यत इत्यर्थः। ३३६५ **ऊर्ध्वे शुषिपूरोः** ३।४।४४॥ ऊर्ध्वे कर्तरि। ऊर्ध्वशोषं शुष्य-ति। वृक्षादिरूर्ध्व एव तिष्ठन्शुष्यतीत्यर्थः। ऊर्ध्वपूरं पूर्यते। ऊर्ध्वमुख एव घटा-दिर्वर्षोदकादिना पूर्णो भवतीत्यर्थः। ३३६६ **उपमाने कर्मणि च** ३।४।४५॥ चात्कर्तरि। घृतनिधायं निहितं जलम्। घृतमिव सुरक्षितमित्यर्थः। अजक-नाशं नष्टः। अजक इव नष्ट इत्यर्थः। ३३६७ **कषादिषु यथाविध्यनुप्र-योगः** ३।४।४६॥ यस्माण्णमुलुक्तः स एवानुप्रयोक्तव्य इत्यर्थः। तथैवोदाहृतम् ३३६८ **उपदंशस्तृतीयायाम्** ३।४।४७॥ इतः प्रभृति पूर्वकाल इति सम्ब-ध्यते। 'तृतीयाप्रभृतीन्यन्यतरस्याम्' (सू ७८४) इति वा समासः। मूलकोप-दंशं भुङ्क्ते। मूलकेनोपदंशम्। दश्यमानस्य मूलकस्य भुजिं प्रति करणत्वात्तृती-या। यद्यप्युपदंशिना सह न शाब्दः सम्बन्धस्तथाप्यार्थोऽस्त्येव, कर्मत्वात्। एता-

---

नेन पुष्णातीत्यर्थः। पर्याय उपपदे उदाहरति—धनपोषमिति। स्वविशेष उपपदे उदाहरति—गोपोषमिति। अधिकरणे। अधिकरणे उपपदे बन्धधातोर्णमुलित्यर्थः। संज्ञायाम्। अनधिकरणार्थं आरम्भः। कर्त्रोः। 'नशिवहोः' इति पञ्चम्यर्थे षष्ठी। कर्तरि जीवे उपपदे नशेः, कर्तरि पुरुषे उपपदे वहधातोर्णमुलित्यर्थः। ऊर्ध्वे शुषि। ऊर्ध्वे कर्तरीति। उपपदे शुषेः पूरेश्च णमुलिति शेषः। उपमाने। चात्कर्तरीति। कर्मणि कर्तरि च उपमाने उपपदे धातोर्णमुलित्यर्थः। कषादिषु। यस्मादिति। धातो-रिति शेषः। णमुलुक्त इति। 'निमूलसमूलयोः कषः' इत्यारभ्य 'उपमाने कर्मणि च' इत्यन्तैः सूत्रैरिति शेषः। तथैवोदाहृतमिति। 'निमूलकाषं कषतीत्यादी'ति शेषः। पूर्वं च पृथगिह नोदाहर्तव्यमिति भावः। उपदंशस्तृतीयायाम्। सम्बध्यते इति। 'मण्डूक-प्लुत्ये'ति शेषः। तृतीयाऽन्ते उपपदे उपपूर्वाद्दंशधातोर्णमुल् समानकर्तृकयोः पूर्व-काले इत्यर्थः। नित्यमुपपदसमासमाशङ्क्य आह—तृतीयाप्रभृतीनीति। ननु 'मूलकेनो-पदंशं भुङ्क्ते' इत्यत्र मूलकस्य उपदंशनं प्रति कर्मत्वात् कथं मूलकात् तृतीया, कथं वा उपदंशात् णमुल् इत्यत आह—दश्यमानस्येत्यादि। प्रधानक्रियानुरोधात् परत्वा-च्चेति भावः। ननु मूलकस्य भुजिक्रियां प्रति करणत्वे उपदंशनेन असामर्थ्यात्स-मासानुपपत्तिरिति शङ्कते—यद्यपीति। उपदंशिना सह मूलकस्य कर्मत्वेनान्वयः शब्द-गम्यो न भवति। तस्य भुजिक्रियां प्रति करणत्वेनान्वयस्योक्तत्वादित्याक्षेपः। समा-

चतैव सामर्थ्येन प्रत्ययः समासश्च । 'तृतीयाया'मिति वचनसामर्थ्यात् । (ततश्चायमर्थः । मूलकेन भुङ्क्ते इति शाब्दान्वये किं कृत्वेत्याकाङ्क्षया उपदर्श्येति तदेव कर्मत्वेनान्वेति)। **३३६६ हिंसार्थानां च समानकर्मकाणाम् ३।४।४८॥** तृतीयान्त उपपदेऽनुप्रयोगधातुना समानकर्मकाद्धिंसार्थात् णमुल्स्यात् । दण्डोपघातं गाः कालयति दण्डेनोपघातम् । दण्डताडम् । समानकर्मकाणाम् इति किम् । दण्डेन चोरमाहत्य गाः कालयति । **३३७० सप्तम्यां चोपपीडरुधकर्षः ३।४।४९॥** उपपूर्वेभ्यः पीडादिभ्यः सप्तम्यन्ते तृतीयान्ते चोपपदे णमुल्स्यात् । पार्श्वोपपीडं शेते, पार्श्वयोरुपपीडम् , पार्श्वाभ्यामुपपीडम् । व्रजोपरोधं गाः स्थापयति । व्रजेन व्रजे उपरोधं वा । पाण्युपकर्षं धानाः सङ्गृह्णाति । पाणावुपकर्षम् । पाणिनोपकर्षम् । **३३७१ समासत्तौ ३।४।५०॥** तृतीयासप्तम्योर्धातोर्णमुल्स्यात्सन्निकर्षे गम्यमाने । केशाग्राहं युध्यन्ते (युद्धसंरम्भात्)। केशेषु गृहीत्वा । हस्ताग्राहम् । हस्तेन

धत्ते—तथापीति । भुजिक्रियां प्रति शाब्दमर्यादया करणत्वेनान्वितस्यापि मूलकस्योपदंशनं प्रति आर्थिकः कर्मत्वान्वयोऽस्त्येव । मूलकस्योपदंशनं प्रति वस्तुतः कर्मत्वस्य सत्त्वादित्यर्थः । नन्वार्थिककर्मत्वान्वयमादाय कथं तृतीया, कथं वा णमुल्, कथं वा समास इत्यत आह—एतावतैवेति । कुत एतदित्यत आह—तृतीयायामिति । वचनसामर्थ्यादिति । यदि तृतीयान्ते शाब्दान्वय एवात्र विवक्ष्यते, तदा करणे हनः' इतिवदिति भावः । मूलकस्य भुजिक्रियां प्रति करणत्वान्वयः शाब्दः । उपदंशे कर्मत्वान्वयः आर्थिकः इत्येतदुपपादयति—ततश्चायमर्थ इति । 'मूलकेन भुङ्क्ते' इत्यन्वयः शाब्दः । प्रधानक्रियानुरोधात्परत्वाच्च तृतीयाविभक्तेः प्रवृत्तेरिति भावः । किं कृत्वेति । किं कृत्वा मूलकेन भुङ्क्ते इत्याकाङ्क्षायां उपदर्श्येत्यन्वेतीत्यर्थः । तदेवेति । किमुपदर्श्येत्याकाङ्क्षायां तदेव मूलकमर्थात् कर्मत्वेनान्वेतीत्यर्थः । हिंसार्थानां च । दण्डोपघातं गाः कालयतीति । 'कल विक्षेपे' चुरादिः । तत्रानुप्रयुज्यमानकालयतेरुपहन्तेश्च गावः कर्म । अतः समानकर्मकत्वमुपहन्तेरिति भावः । दण्डेनोपघातमिति । 'तृतीयाप्रभृतीन्यन्यतरस्या'मिति उपपदसमासविकल्प इति भावः । दण्डताडमिति । 'तड आघाते' चुरादिः । सप्तम्यां चोपपीड । चात्तृतीयायामिति समुच्चीयते । 'कृष विलेखने' इति धातोः शपि कृतलघूपधगुणस्य कर्षेति निर्देशः । अतस्तौदादिकस्य निरासः । पीड, रुध, कर्ष, एषां समाहारद्वन्द्वात्पञ्चम्यर्थे प्रथमा । पुंस्त्वं चार्षम् । उपपूर्वः पीडरुधकर्षः इति मध्यमपदलोपिसमासः । तदाह—उपपूर्वेभ्य इति । 'तृतीयाप्रभृतीन्यन्यतरस्याम्' इति उपपदसमासविकल्पं मत्वा आह—पार्श्वयोरुपपीडमिति । तौदादिकात्तु कृषेः कारकप्रत्यय एव न तु णमुल् । क्षेत्रे उपकृष्य बीजान्यावपति । हलेनोपकृष्येति । यद्यपि तौदादिकोऽपि विलेखनार्थक एव । तथापि क्षेत्रविषयविलेखन एव तस्य प्रवृत्तेरित्याहुः । समासत्तौ । 'समासत्तिपदं' विवृणोति-

गृहीत्वा । **३३७२ प्रमाणे च ३।४।५१॥** तृतीयासप्तम्योरित्येव । द्रव्यङ्गुलोत्कर्षे खण्डिकां छिनत्ति । द्रव्यङ्गुलेन द्रव्यङ्गुले वोत्कर्षम् । **३३७३ अपादाने परीप्सायाम् ३।४।५२॥** परीप्सा त्वरा । शय्योत्थायं धावति । एवं नाम त्वरते यदवश्यकर्तव्यमपि नापेक्षते । शय्योत्थानमाश्रमपेक्षते । **३३७४ द्वितीयायां च ३।४।५३॥** परीप्सायामित्येव । यष्टिग्राहं युध्यन्ते । लोष्टग्राहम् । **३३७५ अपगुरो णमुलि ६।१।५३॥** 'गुरी उद्यमने' इत्यस्यैचो वा आत्स्यार्णमुलि । अस्यपगारं युध्यन्ते । अस्यपगोरम् । **३३७६ स्वाङ्गेऽध्रुवे ३।४।५४॥** द्वितीयायामित्येव । अध्रुवे स्वाङ्गे द्वितीयान्ते धातोर्णमुल् । भ्रूविक्षेपं कथयति । भ्रुवं विक्षेपं । अध्रुवे किम् । शिर उत्क्षिप्य । येनाङ्गेन विना न जीवनं तद्ध्रुवम् । **३३७७ परिक्लिश्यमाने च ३।४।५५॥** सर्वतो विबाध्यमाने स्वाङ्गे द्वितीयान्ते णमुल्स्यात् । उरःप्रतिपेषं युध्यन्ते । कृत्स्नमुरः पीडयन्त इत्यर्थः । 'उरोविदारं प्रतिचस्करे नखैः' । ध्रुवार्थमिदम् । **३३७८ विशिपतिपदिस्कन्दां व्याप्यमानासेव्यमानयोः ३।४।५६॥** द्वितीयायामित्येव । द्वितीयान्ते उपपदे विश्यादिभ्यो णमुल्स्याद्व्याप्यमाने, आसेव्यमाने चार्थे गम्ये । गेहादिद्रव्याणां विश्यादिक्रियाभिः साकल्येन सम्बन्धो व्याप्तिः । क्रियायाः पौनःपुन्यमासेवा । 'नित्यवीप्सयोः' (सू

सन्निकर्षे गम्यमाने इति । **संनिकर्षोऽव्यवधानेन संयोगः** । केशग्राहमिति । **सन्निकर्षपरमेतत्** । **अत्यन्तं संनिहिता युध्यन्ते इत्यर्थः । तदाह**—यद्धसंरम्भादिति । **युद्धातिशयवशाद्योद्धारः परस्परं अत्यन्तं संनिहिता भवन्तीत्यर्थः** । प्रमाणे च । इत्येवेति । **तृतीयान्ते सप्तम्यन्ते चोपपदे धातोर्णमुल् स्यात् प्रमाणे गम्ये इत्यर्थः** । **हस्तः खण्डः खण्डिका** । द्रव्यङ्गुलेनेति । **'तत्पुरुषस्याङ्गुलेः' इति टजिति भावः** । अपादाने । **अपादाने उपपदे धातोर्णमुल् स्यात् परीप्सायां गम्यमानायामित्यर्थः । त्वरां दर्शयितुमाह**—एवं नामेत्यादि । द्वितीयायां च । **द्वितीयान्ते उपपदे धातोर्णमुलित्यर्थः** । स्वाङ्गेऽध्रुवे । **'अध्रुवे' इति छेद इति मत्वा आह**—अध्रुव इति । **ननु 'शिर उत्क्षिप्ये'ति कथं प्रत्युदाहरणम् । शिरसोऽपि अध्रुवत्वादित्यत आह**—येनाङ्गेनेति । परिक्लिश्य । उरोविदारमिति । **कृत्स्नमुर इत्यर्थः** । प्रतिचस्कर इति । **'कृ विक्षेपे' प्रतिपूर्वात्कर्मणि लिट् । 'सुट्कात्पूर्वः' इति 'अडभ्यासव्यवायेऽपि' इति चानुवृत्तौ 'किरतौ लवने 'हिंसाया प्रतेश्च' इति सुट् । नखैः प्रतिचिक्षिपेरित्यर्थः । ननु 'उरःप्रतिपेष'मित्यादौ स्वाङ्गत्वादेव पूर्वसूत्रेणैव सिद्धमित्यत आह**—ध्रुवार्थमिति । **उरो विना जीवनाऽभावात् उरः ध्रुवमिति भावः** । विशिपति । गेहादिद्रव्याणामिति । **तथा च 'गेहानुप्रवेशमास्ते' इत्यत्र सर्वाणि गेहान्यनुप्रविश्येति पुनःपुनर्गेहमनुप्रविश्येति वा अर्थः । उभयथापि न द्वित्वमित्याह**—

२१४०) इति द्वित्वं तु न भवति । समासेनैव स्वभावतस्तयोरुक्तत्वात् । यद्य-प्याभीक्ष्ण्ये णमुलुक्त एव, तथापि असति ह्यासेवार्थकणमुलि आभीक्ष्ण्यणमुलः 'तृती-याप्रभृतीनि' इत्यत्र सद्ग्रहाभावात् उपपदसंज्ञार्थमासेवायामिह पुनर्विधिः । गेहा-नुप्रवेशमास्ते । गेहंगेहमनुप्रवेशम् । गेहमनुप्रवेशमनुप्रवेशम् । एवं गेहानुप्रपा-तम् । गेहानुप्रपादम् । गेहानुस्कन्दम् । असमासे तु गेहस्य णमुलन्तस्य च पर्या-येण द्वित्वम् । **३३७६ अस्यतितृषोः क्रियान्तरे कालेषु ३।४।५७॥** क्रिया-मन्तरयति व्यवधत्त इति क्रियाऽन्तरः । तस्मिन्धात्वर्थे वर्तमानादस्यतेस्तृष्यतेश्च कालवाचिषु द्वितीयान्तेषूपपदेषु णमुल्स्यात् । द्वयहात्यासं गाः पाययति । द्वयह-मत्यासम् । द्वयहतर्षम् । द्वयहं तर्षम् । अत्यसनेन तर्षणेन च गवां पानक्रिया व्यवधीयते । अथ पाययित्वा द्वयहमतिक्रम्य पुनः पाययतीत्यर्थः । **३३८० नाम्न्यादिशिग्रहोः ३।४।५८॥** द्वितीयायामित्येव । नामादेशमाचष्टे । नाम-ग्राहमाह्वयति । **३३८१ अव्ययेऽयथाभिप्रेताख्याने कृञः क्त्वाणमुलौ ३।४।५९॥** अयथाभिप्रेताख्यानं नाम अप्रियस्योच्चैः प्रियस्य च नीचैः कथनम् । उच्चैःकृत्य, उच्चैःकृत्वा, उच्चैःकारमप्रियमाचष्टे । नीचैःकृत्य, नीचैःकृत्वा, नीचैः-

---

नित्यवीप्सयोरिति द्वित्वं तु न भवतीति । कुत इत्यत आह—समासेनैवेति । **नन्वु समासेन कथमिह कथनं व्याप्त्यासेवयोरित्यत आह**—स्वभावत इति । **नन्वु 'आभीक्ष्ण्ये णमुल् च' इत्यनेनैव सिद्धत्वात् इह आसेवाग्रहणं व्यर्थम् । न च कृत्वानिवृत्तिः फलमिति शङ्क्यम् । कृत्वाप्रत्ययस्यापि पक्षे इष्टत्वादिति शङ्कते**—यद्यपीति । **समाधत्ते**—तथापीति । **द्वितीयान्तस्योपपदसंज्ञार्थमित्यर्थः । नन्विह आसेवाग्रहणाऽभावे 'तत्रोपपद'मिति उपपदसंज्ञा कुतो नेत्यत आह**—असति हीति । **यद्यप्यासेवायां णमुल्विध्यभावेऽपि 'आभीक्ष्ण्ये णमुल् च' इति णमुल् सिध्यति, तथापि 'आभीक्ष्ण्ये णमुल् च, इति सूत्रे द्वितीयान्तस्य सप्तम्या निर्देशेन ग्रहणाऽभावादुपपदसंज्ञा न स्यात् । ततश्च 'तृतीया-प्रभृतीन्यन्यतरस्याम्' इति उपपदसमासविकल्पो न स्यादिति भावः । असमासे त्विति । व्याप्तौ णमुलि गेहस्य व्याप्यमानत्वात् द्वित्वम् । आसेवायां णमुलि तु णमु-लन्तस्य द्वित्वम् । क्रियापौनःपुन्यस्यैव आसेवात्वादिति भावः । अस्यतितृषोः । द्वयहात्यासमिति । द्वयहमतिक्रम्येत्यर्थः । अतिपूर्वादस्यतेर्णमुल् । द्वयहतर्षमिति । द्वयहं तृष्णावतीः कृत्वेत्यर्थः । नाम्न्यादिशिग्रहोः । नाम्नि आदिशिग्रहोरिति च्छेदः । पञ्चम्यर्थे षष्ठी । द्वितीयान्ते नामनशब्दे उपपदे आङ्पूर्वकदिशेः ग्रहधातोश्च णमुल-त्वर्थः । अव्ययेऽयथाभि । अप्रियस्य नीचैः कथनं, प्रियस्योच्चैः कथनं च अभिप्रेतम् इष्टम्, तद्विपरीतम् अनभिप्रेतम् । तदाह—अयथाभिप्रेताख्यानं नामेत्यादि । 'तृतीया-**

कारं प्रियं ब्रूते । **३३८२ तिर्यच्यपवर्गे ३।४।६०॥** तिर्यक्छब्द उपपदे कृञः क्त्वाणमुलौ स्तः समाप्तौ गम्यायाम् । तिर्यक्कृत्य गतः । तिर्यक्कारम् । समाप्य गत इत्यर्थः । अपवर्गे किम् । तिर्यक्कृत्वा काष्ठं गतः । **३३८३ स्वाङ्गे तस्प्रत्यये कृभ्वोः ३।४।६१॥** मुखतःकृत्य गतः, मुखतः कृत्वा, मुखतःकारम् । मुखतो भूय, मुखतो भूत्वा, मुखतो भावम् । **३३८४ नाधार्थप्रत्यये च्व्यर्थे ३।४।६२॥** नाधार्थप्रत्ययान्ते च्व्यर्थविषये उपपदे कृभुवोः क्त्वाणमुस्तः । अनाना नाना कृत्वा नानाकृत्य, नानाकृत्वा, नानाकारम् । विनाकृत्य, विनाकृत्वा, विनाकारम् । नानाभूय, नानाभूत्वा, नानाभावम् । अनेकं द्रव्यमेकं भूत्वा एकधाभूय, एकधाभूत्वा, एकधाभावम् । एकधाकृत्य, एकधाकृत्वा, एकधाकारम् । प्रत्ययग्रहणं किम् । हिरुक्कृत्वा । पृथग्भूत्वा । **३३८५ तूष्णीमि भुवः ३।४।६३॥** तूष्णींशब्दे उपपदे भुवः क्त्वाणमुलौ स्तः । तूष्णींभूय । तूष्णींभूत्वा । तूष्णींभावम् । भूग्रहणं कृञो निवृत्त्यर्थम् । **३३८६ अन्वच्व्यानुलोम्ये ३।४।६४॥** अन्वक्छब्दे उपपदे भुवः क्त्वाणमुलौ स्त आनुकूल्ये गम्यमाने । अन्वग्भूय आस्ते । अन्वग्भूत्वा, अन्वग्भावम् । अग्रतः पार्श्वतः पृष्ठतो वाऽनुकूलो भूत्वा आस्त

प्रभृतीन्यन्यतरस्याम्' इति समासविकल्पं मत्वा आह–उच्चैःकृत्य उच्चैः कृत्वेति । **समासपक्षे ल्यबिति भावः ।** उच्चैःकारमिति । **अत्र समासतदभावयोर्नास्ति विशेषः । स्वरे तु विशेषः ।** तिर्यच्यपवर्गे । **'तिरश्चीति भवितव्यम् सौत्रो निर्देश' इति भाष्यम् । 'अपवर्ग' त्यस्य विवरणम्**—समाप्ताविति । **स्वाङ्गे तस्प्रत्यये । पञ्चम्यर्थे षष्ठीद्विवचनम् । तस् प्रत्ययो यस्मादिति बहुव्रीहिः । तस्प्रत्ययान्ते स्वाङ्गे उपपदे कृञो भुवश्च क्त्वाणमुलावित्यर्थः ।** इह न यथासङ्ख्यं व्याख्यानात् । नाधार्थ । **'विनञ्भ्यां नानाजौ नसह'इति सूत्रे असहत्वे विनञ्भ्यां नाप्रत्ययो विहितः । 'सङ्ख्याया विधार्थे धा' इति धाप्रत्ययो विहितः । तस्य अर्थ इव अर्थो यस्य सः धाऽर्थः । नाप्रत्ययो, धार्थकश्च प्रत्ययो यस्मादिति बहुव्रीहिः । तदाह**–नाधार्थप्रत्ययान्ते इति । **नाप्रत्ययान्ते धार्थप्रत्ययान्ते उपपदे इत्यर्थः । अर्थग्रहणं धाप्रत्ययमात्रेऽन्वेति । तेन धमुञोऽपि ग्रहणं लभ्यते । नाप्रत्यये त्वर्थग्रहणं नान्वेति, नाप्रत्ययान्ते धार्थप्रत्ययान्ते च्व्यन्तविषये उपपदे इत्यर्थः। अत एव भाष्ये अर्थग्रहणं किम् द्विधाकृत्य द्वेधाकृत्येत्येवोक्तम् ।** तूष्णीमि भुवः । **ननु 'स्वाङ्गे तस्प्रत्यये कृभ्वोः' इत्यतः अनुवृत्त्यैव सिद्धे भूग्रहणं व्यर्थमित्यत** आह–कृञो निवृत्त्यर्थमिति । अन्वच्व्यानुलोम्ये । **'अनूची'त्येव वक्तुमुचितं सौत्रोऽयं निर्देशः । तिर्यच्यपवर्गे इतिवत् । आनुलोम्यम् आनुकूल्यम् ।** पृष्ठतो भूत्वेति । **'अग्निप्रथमाः प्रतिपद्य-**

इत्यर्थः । आनुलोम्ये किम् । अन्वगभूत्वा तिष्ठति । पृष्ठतो भूत्वेत्यर्थः ।

इत्युत्तरकृदन्तप्रकरणम् ।

इत्थं लौकिकशब्दानां दिङ्मात्रमिह दर्शितम् ।
विस्तरस्तु यथाशास्त्रं दर्शितः शब्दकौस्तुभे ॥
भट्टोजिदीक्षितकृतिः सैषा सिद्धान्तकौमुदी ।
प्रीत्यै भूयाद्भगवतोर्भवानीविश्वनाथयोः ॥

इति श्रीभट्टोजिदीक्षितविरचितायां सिद्धान्तकौमुद्यामुत्तरार्धं समाप्तम् ॥

न्ते अन्वगध्वर्युः' इत्यादौ अन्वक्छब्दस्य पृष्ठभागे प्रसिद्धेरिति भावः ।

इत्युत्तरकृदन्तप्रकरणम् ।

इति श्रीमत्सन्ततसन्तन्यमानश्येनकूर्मषोडशाररथचक्राकारादिबहुगुणविराजमानप्रौढाऽपरिमितमहाध्वरस्य श्रीशाहजी शरभजी तुक्कोजी भोसल-चोलमहीमहेन्द्राऽऽमात्यधुरन्धरस्य श्रीमत आनन्दरायविद्वत्सार्वभौमस्याध्वर्युणा, पञ्चपुरुषीपोष्येण, बाल्य एव तदीयानिर्वर्तिताऽपरिमिताऽग्निविजम्भितवाजपेयसर्वपृष्ठास्तोर्यामप्रमुखमखसन्तर्पितशतमखप्रमुखबर्हिर्मुखेन, पदवाक्यप्रमाणपारावारपारीणाऽग्रजन्मविश्वेश्वरवाजपेययाजितो लब्धविद्यावैशद्येन अध्वरमीमांसाकुतूहलवृत्तिनिर्माणप्रकटितसर्वतन्त्रस्वातन्त्र्येण, बौधायनापस्तम्बसत्याषाढभारद्वाजकात्यायनाश्वलायनद्राह्यायणादिकल्पसूत्रतद्भाष्यपारीणमहादेववाजपेययाजिसुतेन अन्नपूर्णाम्बागर्भजातेन वासुदेवदीक्षितविदुषा विरचितायां सिद्धान्तकौमुदीव्याख्यायां बालमनोरमायाम् उत्तरार्धं सम्पूर्णम्

बालमनोरमा सम्पूर्णा ।

*

श्रीजयकृष्णकृत–सुबोधिनीव्याख्यासंवलिता

वैदिकी-प्रक्रिया ॥ २७ ॥

प्रथमोऽध्यायः ।

श्रीगणाधीशाय नमः ।

सिन्दूरेण विराजितं त्रिनयनं दिक्सङ्ख्यदोर्भिर्युतं
भक्तानुग्रहकारकं प्रमदयाऽऽश्लिष्टं सदानन्दनम् ।
अष्टाविंशतिवर्णकैश्च सततं यं चिन्तयन्ते जना-
स्तं देवं गणपं स्मरामि सततं चन्द्रार्धचूडं विभुम् ॥ १ ॥

यस्तर्कादिसमस्ततन्त्रकमलव्रातप्रसादेष्विव
प्रत्यक्षप्रमितः परः किरणवानन्वर्थगोवर्धनः ।
सोऽयं पण्डितमण्डलोन्नटरटद्वादीन्द्रघृन्दाग्रणीः
श्रीरामाऽङ्घ्रिनिषेवकः समजनि श्रीमौनिगोवर्द्धनः ॥ २ ॥

रघुनाथपदारविन्दसेवावशतस्तस्य बभूव नन्दनः ।
रघुनाथ इतीडयनामगम्यो रघुनाथाङ्घ्रिनिषेवकः सुधीः ॥ ३ ॥

बभूवुस्तस्य चत्वारस्तनयाः सुनया बुधाः ।
महादेवाभिधः श्रेष्ठो महाभाष्यसुभाषितः ॥ ४ ॥

रामकृष्णो द्वितीयोऽसौ रामकृष्णाऽङ्घ्रिसेवकः ।
तृतीयो जयकृष्णोऽस्मि श्रीकृष्णो नाम सूनवः ॥ ५ ॥

श्रीमत्सिद्धान्तकौमुद्याः स्वरवैदिकखण्डयोः ।
नत्वा मुनित्रय हृद्यां टीकां कुव सुबोधिनीम् ॥ ६ ॥

सुशब्दव्रातश्रीकुमुदवनविद्योतनकरी
सदा सद्व्युत्पत्ति प्रसरणपरानन्दनकरी ।
कुशब्दध्वान्तस्य प्रसभमभिविध्वंसनकरी
कृतिर्भूयादेषा बुधजनमन प्राङ्गणचरी ॥ ७ ॥

इयता प्रबन्धेन लौकिकेषु शब्देष्वन्वाख्यातेष्वपि वैदिकान्वाख्यानमवशिष्यते । न चेदमप्रयोजनम्।'रक्षोहागमलघ्वसन्देहाः प्रयोजनम्' इति वदता भाष्यकाण रेवेद-

३३८७ छन्दसि पुनर्नस्वोरेकवचनम् १।२।६१॥ द्वयोरेकवचनं वा स्यात्। पुनर्वसु नक्षत्रं, पुनर्वसू वा। लोके तु द्विवचनमेव। **३३८८ विशाखयोश्च १।२।६२॥** प्राग्वत्। विशाखा नक्षत्रम्। विशाखे वा। **३३८९ षष्ठीयुक्तश्छन्दसि वा १।४।९॥** षष्ठ्यन्तेन युक्तः पतिशब्दश्छन्दसि घिसंज्ञो वा स्यात्। क्षेत्रस्य पतिना वयम्। इह वेति योगं विभज्य छन्दसीत्यनुवर्तते। सर्वे विधयश्छन्दसि वैकल्पिकाः। तेन 'बहुलं छन्दसि' (सू०३४०१) इत्यादिरस्यैव प्रपञ्चः। 'यचि भम्' (२३१)। **नभोऽङ्गिरोमनुषां वत्युपसंख्यानम्** (वा० १०५८)। नभसा तुल्यं नभस्वत्। भत्वाद्रुत्वाभावः। अङ्गिरस्वदङ्गिरः। मनुष्यदग्ने। (उ०)

रक्षाया व्याकरणारम्भस्य प्रयोजनत्वेन मुख्यतयाऽभिधानात्। 'ब्राह्मणेन निष्कारणः-षडङ्गो वेदोऽध्येयो ज्ञेयश्चे'ति वेदार्थज्ञानोपायतया वेदाङ्गत्वेनैव व्याकरणाध्ययनविधानाच्च। नन्वेवमपि वैदिकशब्दानां लौकिकशब्दाऽभिन्नत्वात्तदनुशासनेनैव सिद्धे किमर्थन्तेषामनुशासनमिति चेन्न। लौकिकशब्देभ्यो भिन्ना अपि वैदिकशब्दाः सन्ति। तद्यथा 'त्मना देवेषु' 'मध्वा जभार' 'गृभ्णामि ते' इत्यादयो वेदे दृश्यन्ते। लोके तु 'आत्मना' 'जहार' 'गृह्णामी'त्यादयः। अत एव भाष्यकारो लौकिकेभ्यो वैदिकान्भेदेन व्यपदिशति-'अथ शब्दानुशासनं, केषां शब्दानां ? लौकिकनां वैदिकानां चेति' इति। तेषामन्वाख्यानमावश्यकमिति मनसि विभाव्याऽऽह-छन्दसीत्यादि। **पुनर्वसुशब्देनीदभूतावयवस्य ज्योतिःसमुदायस्याभिधानाद्द्वयोर्द्विवचने प्राप्ते एकवचनं विधीयते।** तदाह—द्वयोरित्यादि। वा स्यादिति। **द्वयोरेकवचनं वा स्यादिति 'जात्याख्यायाम्' इत्यतोऽन्यतरस्यामित्यनुवर्तनात्।** लोके त्विति। **'गां गताविव दिवः पुनर्वसू'इत्यादौ।** विशाखयोः। प्राग्वदिति। **द्वयोरेकवचनं वा स्यादित्यर्थः।** विशाखेति। **अमरस्तु 'राधा विशाखेति' प्रयुञ्जानो द्विवचननियमं नेच्छति।** सूत्रं तूदासीनम्। षष्ठीयुक्तश्छन्दसि वा। **'पतिः समास एव' इत्यतः पतिरिति वर्तते। 'पतिः समास एव' इति नियमादसमासे न प्राप्नोतीति वचनमारभ्यते**—पतिनेति। **घित्वात् 'आङो ना' इति नाभावः। षष्ठीति किम्। 'मया पत्या जरदष्टिर्यथासः'। छन्दसीति किम्। ग्रामस्य पत्ये।** योगं विभज्येति। **'षष्ठीयुक्तश्छन्दसि' इति उक्त एवार्थः। ततो 'वा छन्दसि' इत्यनुवर्तते। यावदिह शास्त्रे कार्यं, तच्छन्दसि वा भवति।** तदाह—नेत्यादिना। नभोऽङ्गिरसिति। **नभस् अङ्गिरस् मनुष् एषां वति परे भत्वं वक्तव्यमित्यर्थः।** नभस्वदिति। **'तेन तुल्यम्—' इति वतिः। भत्वफलमाह**—रुत्वाऽभाव इति। **'ससजुषोः—' इति प्राप्तस्य। तत्र हि पदस्येत्यनुवर्तते। अङ्गिरसा तुल्यमङ्गिरस्वत्। अत्रापि देहलीदीपकन्यायेन 'रुत्वाऽभाव' इति सम्बध्यते।** मनुष्यदिति। **मनुषा तुल्यम्। अत्र भत्वात् 'आदेशप्रत्यययोः' इति षः। पदसञ्ज्ञायां**

'जनेरुसिः' इति विहित उसिप्रत्ययो मनेरपि, बाहुलकात्। **वृषण्वस्वश्वयोः** (वा० १०५९)। वृषन् वर्षुकं वसु यस्य स वृषण्वसुः। वृषा अश्वो यस्यासौ वृषणश्वः। इहान्तर्वर्तिनीं विभक्तिमाश्रित्य पदत्वे सति नलोपः प्राप्तो भत्वाद्वार्यते। अत एव 'पदान्तस्य' (सू० १९८) इति णत्वनिषेधोऽपि न। 'अल्लोपोऽनः' (सू० २३४) इत्यल्लोपो न। अनङ्गत्वात्। **३३९० अयस्मयादीनि छन्दसि १।४।२०॥** एतानि छन्दसि साधूनि। भपदसंज्ञाधिकारावयथायोग्यं संज्ञाद्वयं बोध्यम्। तथा च वार्तिकम्-**उभयसंज्ञान्यपीति वक्तव्यमिति** (वा १०६०)। स सुष्टुभा स ऋक्वता गणेन। पदत्वात्कुत्वम्। भत्वाज्जश्त्वाभावः। जश्त्वविधानार्थायाः पदसंज्ञाया भत्वसामर्थ्येन बाधात्। नैनं हिन्वन्त्यपि वाजिनेषु। अत्र पदत्वाज्जश्त्वम्। भत्वात्कुत्वाऽभावः। 'ते प्राग्धातोः (सू० २२३०)। **३३९१ छन्दसि परेऽपि १।४।८१॥ ३३९२ व्यवहिताश्च १।४।८२॥** हरिभ्यां याह्योक आ। आ मन्द्रैरिन्द्र हरिभिर्याहि। **३३९३ इन्धिभवतिभ्यां च १।२।६॥** आभ्यां परोऽपि-

---

तु रुत्वं स्यात् न षत्वम्। अपदान्तस्येति वचनात्। बाहुलकादिति। **बहूनर्थान् लातीति बहुलम्। 'ला आदाने'** अस्मात् 'आतोऽनुपसर्गे' इति कः। **बहुलस्य भावो बाहुलकम्। मनोज्ञादित्वाद्वुञ्। वृषणित्येतद्वसु, अश्व, एतयोश्च परतो भं स्यात्। 'निपातनान्येतानि छन्दोविषयाणी'ति कैयटः।** वृषण्वसुरिति। **लोके वृषवसुः। वृषाश्वः।** नलोपः प्राप्त इति। **'नलोपः प्रातिपदिकान्तस्य'** इत्यनेन। अत एवेति। **भत्वादेवेत्यर्थः।** अनङ्गत्वादिति। **'अल्लोपोऽनः'** इत्यत्राऽङ्गस्येत्यधिकारात्। अयस्मयादीनि। **आनन्तर्याद्भसञ्ज्ञाद्वारेणैव निपातनं प्राप्तमित्याह**—संज्ञाद्वयमिति। **ननु 'अनन्तरस्य-' इति न्यायं बाधित्वोभयसञ्ज्ञाविधाने किं प्रमाणमित्याशङ्क्याह**—तथा च वार्तिकमिति। कुत्वमिति। **'चोः कुः'** इत्यनेन। जश्त्वाऽभाव इति। **'झलां जशोऽन्ते' इति प्राप्तस्य।** ऋक्वतेति **अयस्मयादिषु 'ऋक्वते'त्यादयः समुदाया एव बोध्याः। तेन जश्त्वमस्तु कुत्वं मा भूदिति वैपरीत्यं न प्रसज्येतेति। बोध्यम्।** नैनमिति। **वाचामिनाः प्रभवस्तेष्वप्येनं विद्वांसं न हिन्वन्ति। विवदितुं न गच्छन्तीत्यर्थः।** ते प्रागिति। **व्याख्यातम्। अस्यापवादमाह**—छन्दसीत्यादि। **गत्युपसर्गसञ्ज्ञकाश्छन्दसि परे प्रयोक्तव्याः। अपिशब्दात्पूर्वे।** व्यव—। **व्यवहिता अपि गत्युपसर्गसंज्ञकाः प्रयोक्तव्याः। सूत्रद्वयस्योदाहरणे आह**—इरिभ्यामित्यादि। **'आयाही'ति प्राप्तम्। 'ते प्राग्' इत्यत्र संज्ञानियमपक्षो भाष्ये उक्तः। ते इत्यनेन प्रादीनुपेत्येतत्पर्यन्तान्स्वरूपेण परामृश्य धातोः प्राक् प्रयुक्तानामेषां पूर्वसूत्रैकवाक्यतया संज्ञाविधानात्। अस्मिंश्च पक्षे 'छन्दसि परेऽपि' 'व्यवहिताश्च' इति सूत्रद्वयं च कर्तव्यम्।** इन्धि—।

ल्लिट् कित् स्यात्। समीधे दस्युहन्तमम्। पुत्र ईधे अथर्वणः। बभूव। इदं प्रत्याख्यातम्। **इन्धेश्छन्दोविषयत्वाद्भुवो वुको नित्यत्वात्ताभ्यां लिटः किद्वचनानर्थक्यमिति वा। इति प्रथमोऽध्यायः।**

द्वितीयोऽध्यायः।

३३९४ तृतीया च होश्छन्दसि २।३।३। जुहोतेः कर्मणि तृतीया स्याद्द्वितीया च। यवाग्वाऽग्निहोत्रं जुहोति। अग्निहोत्रशब्दोऽत्र हविषि वर्तते। 'यस्याग्निहोत्रमधिश्रितममेध्यमापद्येत' इत्यादिप्रयोगदर्शनात्। अग्नये हूयत इति व्युत्पत्तेश्च। यवाग्वाख्यं हविर्देवतोद्देशेन त्यक्त्वा प्रक्षिपतीत्यर्थः। **३३९५ द्वितीया ब्राह्मणे २।३। ६०॥** ब्राह्मणविषये प्रयोगे दिवस्तदर्थस्य कर्मणि द्वितीया स्यात्। षष्ठ्यपवादः। गामस्य तदहः सभायां दीव्येयुः। **३३९६ चतुर्थ्यर्थे**

इन्धीत्युच्चारणार्थेनेकारेण निर्देशः। 'सुट्तिथोः' इतिवत् न तु 'इक्श्तिपौ-'इति इका, नलोपापत्तेः। 'असंयोगात्-' इत्यतः लिट् किदित्यनुवर्तते। तदाह—लिट् किदिति। ञि इन्धी दीप्तौ, लिटः कित्त्वाद् 'अनिदिताम्-'इति नलोपः। संयोगात्परत्वात्पूर्वेणाऽप्राप्तौ वचनम्। बभूवेति। कित्त्वाद्गुणाभावे 'भुवो वुक्-' इति वुक्। अत्र पित्त्वात्पूर्वेणाऽप्राप्तौ वचनम्। इदमिति। 'इन्धी'ति सूत्रम्। छन्दोविषयत्वादिति। अयमभिप्रायः—इन्धेर्भाषायाम् 'इजादेश्च-' इत्यामा भाव्यम्। छन्दसि तु 'अमन्त्रे' इति प्रतिषेधाद् यद्यप्याम् नास्ति तथापि 'छन्दस्युभयथा' इति लिटः सार्वधातुकत्वे ङित्त्वात्समीधे इति नलोपः। श्नमभावस्त्वार्द्धधातुकत्वात्, छन्दसि दृष्टानुविधानात्। वुको नित्यत्वादिति। 'परनित्य-' इति परिभाषया पराश्नित्यस्य बलीयस्त्वात्। कृताऽकृतप्रसङ्गित्वेन नित्यत्वात्। इति वैदिकीप्रकरणे प्रथमोऽध्यायः।

तृतीया—। 'कर्मणि द्वितीय' इत्यतः कर्मणीति वर्तते। अत्र द्वितीयायां प्राप्तायां तृतीया विधीयते, चशब्दात्प्राप्ति भवति। तदाह—कर्मणीति। यवाग्वेति। अत्र यवागूशब्दात्तृतीया। अग्नीहोत्रशब्दाच्च द्वितीया। अग्निहोत्रशब्दो हविर्वाचकः। जुहोतिश्च प्रक्षेपणार्थः। यवाग्वभिन्नं हविरग्नौ प्रक्षिपतीत्यर्थः। तदाह—यवाग्वाख्यमित्यादि। भिन्नविभक्त्यवरुद्धत्वेऽपि भिन्नार्थकविभक्त्यनवरुद्धत्वान्नामार्थयोरभेदान्वयः। भाष्ये चैतत्सूत्रं प्रत्याख्यातम्। अग्निहोत्रशब्दो ह्यग्नावपि वर्तते। 'यस्याग्निहोत्रं प्रज्वलित'मिति दर्शनात्। हूयतेऽस्मिन्निति व्युत्पत्तेश्च। तद्यदा यवागूशब्दात्तृतीया तदाऽग्निहोत्रशब्दो ह्यग्नौ वर्तते, जुहोतिश्च प्रीणने। यवाग्वा अग्निं प्रीणयतीत्यर्थः। यदा यवागूशब्दात् द्वितीया तदाऽग्निहोत्रशब्दो हविषि वर्तते, जुहोतिश्च प्रक्षेपणे। यवाग्वाख्यं हविर्द्रव्यं प्रक्षिपतीत्यर्थः द्वितीया—।'दिवस्तदर्थस्य' इति वर्तते। तदाह—ब्राह्मणेत्यादि। सोपसर्गस्य च्छन्दसि 'विभाषोपसर्गे' इत्यनेन व्यवस्थितविभाषयाऽपि

बहुलं छन्दसि २।३।६२॥ षष्ठी स्यात्। पुरुषमृगश्चन्द्रमसः। गोधाकालकादार्वाघाटस्ते वनस्पतीनाम्। वनस्पतिभ्य इत्यर्थः। **षष्ठ्यर्थे चतुर्थीति** वाच्यम् (वा १५०९)। या खर्वेण पिबति तस्यै खर्वः। **३३९७ यजेश्च करणे २।३।६३॥** इह छन्दसि बहुलं षष्ठी। घृतस्य घृतेन वा यजते। **३३९८ बहुलं छन्दसि २।४।३९॥** अदो घस्लादेशः स्यात्। घस्तान्नूनम्। लुङि 'मन्त्रे घस' (सू०३४०२) इति च्लेर्लुक्। अडभावः। सग्धिश्च मे। **३३९९ हेमन्तशिशिरावहोरात्रे च छन्दसि २।४।२८॥** द्वन्द्वः पूर्ववल्लिङ्गः। हेमन्तश्च शिशिरश्च हेमन्तशिशिरौ। अहोरात्रे। 'अदिप्रभृतिभ्यः शपः' (सू० २४२३)। **३४०० बहुलं छन्दसि २।४।७३॥** वृत्रं हनति वृत्रहा। अहिः शयत उप पृक्पृथिव्याः। अत्र लुङ् न। अदादिभिन्नेऽपि क्वचिल्लुक्। आध्वं नो देवाः। 'जुहोत्यादिभ्यः श्लुः' (सू०२४८९)। **३४०१ बहुलं छन्दसि २।४।७६॥** दाति प्रियाणि चिद्वसु।

सिद्धे निरुपसर्गार्थम् आरम्भः। षष्ठ्यपवाद इति। 'दिवस्तदर्थस्य' इति प्राप्तायाः। चतुर्थ्यर्थे। बहुलग्रहणात् 'चन्द्रमसेरुदमी रात्र्यै' इत्यादौ षष्ठ्यभावः। यजेः—। यजेर्धातोः करणे कारके छन्दसि विषये बहुलं षष्ठी स्यात्। बहुलम्। 'अदो जग्धिः—' इत्यत अद इति, 'लुङ्सनोः—' इत्यतः घस्लृ इति च। अदो बहुलं घस्लादेशः स्याच्छन्दसि। घस्तामिति। अदेर्लुङि रूपम्। अडभाव इति। 'बहुलं छन्दसि' 'न माङ्योगे' इत्यनेन। नन्विदं 'लुङ्सनोः—' इत्यनेन सिद्धमित्याशङ्क्योदाहणान्तरमाह—सग्धिरिति। अदनं ग्धिः। अदेः क्तिनि घस्लादेशे 'घसिभसोर्हलि च' इत्युपधालोपे 'झलो झलि' इति सलोपः। 'झषस्तथोः' इति धत्वम्। धस्य जश्त्वम्। नच जश्त्वे कर्तव्येऽझोपस्य स्थानिवत्त्वम्। 'न पदान्त—' इति सूत्रेण जश्त्वे तन्निषेधात्। ततः समानशब्देन समासे कृते 'समानस्य छन्दस्यमूर्धप्रभृत्युदर्केषु' इति सूत्रेण समानस्य सः। हेमन्तशिशिरौ—। 'परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः' इति प्राप्तम्। अहोरात्रे इति। अहश्च रात्रिश्चेति द्वन्द्वे कृते 'अहःसर्वैकदेश—' इत्यनेन समासान्तोऽच्। 'यस्येति च' इतीकारलोपः। 'रात्राह्नाहाः पुंसि' इति प्राप्तं ह्रस्वमतन्त्रम्। 'अहोरात्राणि विदधत्'। छन्दसि किम्। हेमन्तशिशिरे। अहोरात्रौ। यद्यपि पाठक्रमेणेदं 'बहुलं छन्दसि' इति घस्लादेशविधायकसूत्रात्पूर्वं व्याख्यातुं युक्तम् तथापि 'व्यत्ययो बहुलम्' इति वक्ष्यमाणेन लिङ्व्यत्ययविधायकेन गतार्थमिति ध्वनयितुं तथा न व्याख्यातम्। बहुलं छन्दसि। बहुलं शपो लुक् स्यात्। 'अदिप्रभृतिभ्यः' इत्युक्तं ततो न भवति। तथैवोदाहरति—वृत्रं हनतीत्यादि। हन्ति शेते इति लोके। आध्वमिति। ध्रैङ् पालने 'आदेच उपदेशेऽशिति' इत्यात्वम्। 'आयध्वमिति लोके। दातीति।

अन्यत्रापि। पूर्णां विवष्टि। **३४०२ मन्त्रे घसह्वरणशवृदहादृवृच्कृगमिजनिभ्यो लेः २।४।८०॥** एभ्यो लेर्लुक् स्यान्मन्त्रे। अक्षन्नमीमदन्त हि। घस्लादेशस्य 'गमहन' (सू०२३६३)। इत्युपधालोपे 'शासिवसि' (२४१०)। इति षः। माह्वर्मित्रस्य। धूर्तिः प्रणङ्मर्त्यस्य। 'नशेर्वा' (सू४३१) इति कुत्वम्। सुरुचो वेन आवः। मा न आधक्। आदित्याकारान्तग्रहणम्। आ प्रा शावापृथिवी। परावर्भारभृत्यथा। अक्रन्नुषासः। त्वे रयिं जागृवांसो अनुग्मन्। मन्त्रग्रहणं ब्राह्मणस्याप्युपलक्षणम्। अज्ञत वा अस्य दन्ताः। विभाषानुवृत्तेर्नेह। न ता अगृभ्णन्नजनिष्ट हि षः।

इति द्वितीयोऽध्यायः।

'ददाती'ति लोके। अन्यत्रापीति। जुहोत्यादिभिन्नेऽपि 'श्लुर्भवती'ति शेषः। विवष्टीति। **'वश कान्तौ' अदादिः। 'श्लौ' इति द्वित्वम्। 'भृञामित्'। 'बहुलं छन्दसि' इति सूत्रेणाभ्यासस्येकारः। 'व्रश्च—' इति षत्वम्। ष्टुत्वम्।** मन्त्रे घस—। **घस अत्तेरादेशः। ह्वर। ह्वृ कौटिल्ये। अस्य कृतगुणानुकरणं ह्वरेति। अकारस्तूच्चारणार्थः। णश अदर्शने। वृञ् वरणे। वृङ् संभक्तौ। दह भस्मीकरणे। आत्। आकारान्ताः प्रापूरणे इत्यादयः। वृजी वर्जने। डुकृञ् करणे। गम्लृ गतौ। जनी प्रादुर्भावे।** अत्तन्निति। **अत्तेर्लुङि झिः।** घस्लादेशस्येति। **'लुङ्सनोः—' इति विहितस्य।** मा ह्वरिति। **मा**ङि उपपदे **ह्वरतेर्लुङि तिप्। 'इतश्च' इतीकारलोपः। च्लेर्लुकि कृते 'सार्वधातुके—' इति गुणे कृते रपरत्वे 'हल्ङ्याप्—' इति सलोपः।** प्रणङ्गिति। **प्रपूर्वान्नशेर्लुङ्। 'हल्ङ्याप्—' इति लोपः 'उपसर्गादसमासेऽपि—' इति णत्वम्।** मर्त्यस्येति। **मकारेऽनुनासिके परे 'यरोऽनुनासिके' इति ङः।** कुत्वमिति। **पक्षे 'व्रश्च' इति षत्वेन नडिति रूपं बोध्यम्।** आव इति। **वृञो रूपम्।** आधगिति। **माङ्पूर्वाद्धेर्लुङ्। 'दादेर्धातोः—' इति घः। 'एकाचो वश—' इति भष्भावः।** आप्रा इति। **आङ्पूर्वात्प्राधातोः सिप्। रुत्वे यत्वे च यलोपः।** परावर्गिति। **परापूर्वाद्भृञेस्तिप्। उपधागुणे 'चोः कुः' इति कुत्वम्।** अक्रन्निति। **झेर्ङित्त्वाद्गुणाऽभावे यण्।** अनुग्मन्निति। **अनुपूर्वाद्गच्छतेर्झिः। 'गमहन—' इत्युपधालोपः। ननु मन्त्रशब्दः संहितायां रूढ इति अज्ञतेत्यादौ ब्राह्मणप्रयोगे लुक् न प्राप्नोतीत्याशङ्क्याह**—मन्त्रग्रहणमित्यादि। अज्ञतेति। **'गमहन—' इत्युपधालोपः। ब्राह्मणप्रयोगोऽयम्। मन्त्रेति किम्। अघसत्। अह्वार्षीत्। अनशत्। अवारीत्। अधाक्षीत्। अप्रासीः। अवर्जात्। अकार्षीत्। अगमत्। अजनि। अजनिष्ट।**

इति वैदिकीप्रकरणे द्वितीयोऽध्यायः।

तृतीयोऽध्यायः

३४०३ अभ्युत्सादयां प्रजनयां चिकयां रमयामकः पावयांक्रियाद्विदामक्रन्निति च्छन्दसि ३।१।४२॥ आद्येषु चतुर्षु लुङि आम् अक इत्यनुप्रयोगश्च । अभ्युत्सादयामकः । अभ्युदसीषददिति लोके । प्रजनयामकः । प्राजीजनदित्यर्थः । चिकयामकः । अचैषीदित्यर्थे चिनोतेराम् द्विर्वचनं कुत्वं च । रमयामकः । अरीरमत् । पावयांक्रियात् । पाव्यादिति लोके । विदामक्रन् । अवेदिषुः ।

३४०४ गुपेश्छन्दसि ३।१।५०॥ च्लेश्चङ् वा । गृहानजूगुपतं युवम् । अगौप्सीदित्यर्थः । **३४०५ नोनयतिध्वनयत्येलयत्यर्दयतिभ्यः ३।१।५१॥** च्लेश्चङ् न । मा त्वायतो जरितुः कामनूनयीः । मा त्वाऽग्निर्ध्वनयीत् । **३४०६ कृमृद्ह-**

अभ्युत्सादयाम् । अभ्युत्सादयामित्यादयश्छन्दसि विषयेऽन्तरस्यां निपात्यन्ते । षदॢ विशरणगत्यवसादनेषु । जनी प्रादुर्भावे । रमु क्रीडायाम् । ण्यन्तेभ्य एभ्यो लुङि आम्प्रत्ययो निपात्यते । चिञ् चयने । शुद्धादस्मादाम्प्रत्यये द्विर्वचनं कुत्वं च । 'अक' इति प्रत्येकं सम्बध्यते, तदाह-आद्येष्विति । अक इति । कृञो लुङि तिपि च्लेः 'मन्त्रे घस' इत्यादिना लुक् । तिपो हल्ङ्यादिलोपः । अभ्युत्सादयामक इति । 'आमः' इति लुङो लुक् । अभ्युदसीषददिति । सदेर्ण्यन्ताल्लुङि चङि 'णौ चङ्युपधायाः' इति ह्रस्वः । 'चङि' इति द्विर्वचनम् । 'हलादिःशेषः' । 'सन्वल्लघुनि' इति सन्वद्भावे 'सन्यतः' इतीत्त्वम् । 'दीर्घो लघो'रिति दीर्घः । लोक इति । वेदेऽपि पाक्षिकमिदं बोध्यम् । 'विदाङ्कुर्वन्तु' इति सूत्रादन्यतरस्यांग्रहणानुवृत्तेः । पावयामिति । पवतेः पुनातेर्वा ण्यन्तादाशीर्लिङ्याम् । 'क्रिया'दित्यनुप्रयोगश्च । क्रियादिति । करोतेराशीर्लिङि रूपम् । 'लिङाशिषि' इत्यार्द्धधातुकत्वाद्विकरणाऽभावः । 'रिङ्शयग्' इति रिङ् । विदामक्रन्निति । विदेर्लुङि आम्, गुणाऽभावः लुङन्तकरोत्यनुप्रयोगश्च । गुपेः । आयप्रत्ययाऽभावस्थले एवेदं, सूत्रे केवलस्योच्चारणात् । अजूगुपतमिति । 'गुपू रक्षणे' । 'तस्थस्थमिपाम्' इति थसस्तम् । 'तुजादीनां दीर्घोऽभ्यासस्य' इत्यभ्यासस्य दीर्घः । अगौप्सामिति । ऊदित्त्वादिडभावे 'वदव्रज' इति वृद्धिः । 'झलो झलि' इति सिचो लोपः । इट्पक्षे अगोपिष्टम् । आयप्रत्यये अगोपायिष्टम् । इत्थं चत्वारि छन्दसि । लोके तु चङं वर्जयित्वा त्रीण्येवेति विवेकः । नोनयतीति । ऊन परिहाणे । ध्वन शब्दे । इल प्रेरणे । अर्द गतौ याचने च । एभ्यो ण्यन्तेभ्यश्च्लेः 'णिश्रि' इति प्राप्तश्चङादेशो नेत्यर्थः । तत्रोनयत्येलयती चुरादी ण्यन्तौ । ध्वनयतिरपि चुरादिरदन्तो घटादिर्नान्तश्च । अर्दयतिस्तु हेतुमण्ण्यन्तः । ऊनयीरिति । मध्यमपुरुषैकवचनम् । 'न माङ्योगे' इति आट्प्रतिषेधः । इदमिद्धं प्रति सव्यस्य ऋषेर्वचनम् । त्वायतस्त्वामिच्छतः जरितुः स्तोतुः मम,

रुहिभ्यश्छन्दसि ३।१।५६॥ च्लेरङ् वा । इदं तेभ्योऽकरं नमः । अमरत् । अदरत् । यसानोः सानुमारुहत् । ३,०७ छन्दसि निष्टर्क्यदेवहूयप्रणीयोन्नीयोच्छिष्यमर्यस्तर्याध्वर्यखन्यखान्यदेवयज्यापृच्छ्यप्रतिषीव्यब्रह्मवाद्यभाव्यस्ताव्योपचाय्यपृड्यानि ३।१।१२३॥ कृतन्तेर्निसूपूर्वात्क्यपि प्राप्ते ण्यत् । आद्यन्तयोर्विपर्यासो, निसः षत्वं च । निष्टर्क्यं चिन्वीत पशुकामः । देवशब्दे उपपदे ह्वयतेर्जुहोतेर्वा क्यप्, दीर्घश्च । स्पर्धन्ते वा उ देवहूये । प्र उत् आभ्यां नयतेः क्यप् । प्रणीयः । उन्नीयः । उत्पूर्वाच्छिषेः क्यप् । उच्छिष्यः । मृङ्स्तृञ्धृभ्यो यत् । मर्यः । स्तर्या । स्त्रियामेवायम् । ध्वर्यः । खनेर्यण्यतौ । खन्यः । खान्यः । यजेर्यः । शुन्धध्वं दैव्याय कर्मणे देवयज्यायै । आङ्पूर्वात्पृच्छेः क्यप् । आपृच्छ्यं धरुणं वाज्यर्षति । सीव्यतेः क्यप् षत्वं च । प्रतिषीव्यः । ब्रह्मणि वदेर्ण्यत् । ब्रह्मवाद्यम् । लोके तु 'वदः सुपि क्यप् च' (सू० २८५४) इति क्यब्ण्यतौ । भवतेः स्तौतेश्च ण्यत् । भाव्यः । स्ताव्यः । उपपूर्वाच्चिनोतेर्ण्यत्, आयादेशश्च पृडे उत्तरपदे । उपचाय्यपृडम् । हिरण्य इति वक्तव्यम् । (वा १९४५) उपचेयपृडमन्यत् । मृड सुखने पृड चेत्यस्मादिगुपधलक्षणः कः । ३४०८ छन्दसि वनसनरक्षिमथाम् ३।२।२७॥ एभ्यः कर्मण्युपपदे इन् स्यात् ।

काममभिलाषं, मा ऊनयीः । ऊनं मा कार्षीरित्यर्थः । औननदिति भाषायाम् । ध्वनयीदिति । तिप् । 'न माङ्योगे' इत्यट्प्रतिषेधः। भाषायां तु घटादेरदिध्वनत् । चुरादेरदिध्वनत् । ऐलयीत् । आर्दयीत् । आर्दिदत् । ऐलिलदिति लोके । कृमृदृ । 'च्लि लुङि' इत्यतः च्लिरिति 'अस्यतिवक्ति' इत्यतोऽङिति 'इरितो वा' इत्यतो वेत्यनुवर्तते । तदाह–च्लेरित्यादि । अकरमिति । डु कृञ्करणे मिप् । अङि कृते 'ऋदृशोऽङि' इति गुणः । अमरदिति । मृङ् प्राणत्यागे । व्यत्ययेन परस्मैपदम् । अदरदिति । दृ विदारणे । अरुहदिति । रुह बीजजन्मनि प्रादुर्भावे च । लोके तु अकार्षीत् । अमृत । अदारीत् । अरुक्षत् । छन्दसि । निष्टर्क्यादयः शब्दाश्छन्दसि निपात्यन्त इति सूत्रार्थः । क्यपि प्राप्त इति । 'ऋदुपधाच्च' इति सूत्रेण । आपृच्छ्यमिति । 'प्रच्छ ज्ञीप्सायाम्' 'ग्रहिज्या' इति सम्प्रसारणम् । प्रतिषीव्येति । षिवु तन्तुसन्ताने । 'हलि च' इति दीर्घः । उपचाय्यपृडमिति । उपचाय्यं च तत्पृडं चेति कर्मधारयः । हिरण्य इति । हिरण्येऽभिधेये इत्यर्थः । छन्दसि । एभ्य इति । 'वन षण सम्भक्तौ । रक्ष पालने मन्थ विलोडने । एभ्य इत्यर्थः । 'स्तम्बशकृतोरिन्' इत्यतः इन्निति वर्तते । तदाह–इन् स्यादिति ।

ब्रह्मवनिं त्वा क्षत्रवनिम्। उत नो गोषणिं धियम्। ये पथां पथिरक्षयः। चतुरक्षौ पथिरक्षी। हविर्मथीनामभि। **३४०६ छन्दसि सहः ३।२।६३॥** सुप्युपपदे सहेर्ण्विः स्यात्। पृतनाषाट्। **३४१० वहश्च ३।२ ६४॥** प्राग्वत्। दित्यवाट्। योगविभाग उत्तरार्थः। **३४११ कव्यपुरीषपुरीष्येषु ण्युट् ३ २।६५॥** एषु वहेर्ण्युट् स्याच्छन्दसि। कव्यवाहनः। पुरीषवाहनः। पुरीष्यवाहनः। **३४१२ हव्येऽनन्तःपादम् ३।२।६६॥** अग्निश्च हव्यवाहनः। पादमध्ये तु 'वहश्च' (सू ३४१०) इति ण्विरेव। हव्यवाळग्निरजरः पिता नः। **३४१३ जनसनखनक्रमगमो विट् ३।२।६७॥** 'विड्वनोः' (सू २९८२) इत्यात्वम्। अब्जाः। गोजाः। गोषा इन्दो नृषा असि। 'सनोतेरनः' (सू ३६४५)। इति षत्वम्। इयं शुष्मेभिर्विसखा इवारुजत्। आ दधिक्राः शवसा पञ्च कृष्टीः। अप्रेगाः। **३४१४ मन्त्रे श्वेतवहोक्थशस्पुरोडाशो ण्विन् ३।२।७१॥ श्वेतवहादीनां डस्पदस्येति वक्तव्यम्।** (वा २०३५-३६) यत्र पदत्वं भावि तत्र ण्विनोऽपवादो डस् वक्तव्य इत्यर्थः। श्वेतवाः। श्वेतवाहौ। श्वेतवाहः। उक्थानि उक्थैर्वा शंस-

---

'वन षण सम्भक्तावि'ति भ्वादिगणेन सह निर्दिष्टयोरेव ग्रहणं न तु वनु याचने, षणु दाने इति तानादिकयोः, सानुबन्धकत्वात्। ब्रह्मवनिमिति। **ब्रह्म वनति क्षत्रं वनति, गां सनतीति विवक्षायामिन्। तदन्ताद्द्वितीयैकवचनम्। सुषामादित्वात्षत्वम्।** पथिरक्षय इति। **पन्थानं रक्षयन्तीति विग्रहः।** पथिरक्षीति। **पन्थानं रक्षतीति विग्रहः। हविर्मन्थतीति विग्रहः।** छन्दसि। **'षह मर्षणे' 'भजो ण्विः' इति वर्तते। तदाह**-ण्विः स्यादिति। **ननु 'तुरासाहं पुरोधाय' इति लोकेऽपि प्रयोगा दृश्यन्ते तेषां का गतिरिति चेत्, णिजन्ताद्विच् बोध्यः।** पृतनाषाडिति। **'सहेः साडः सः' इति षत्वम्।** वहश्चेति प्राग्वदिति। **ण्विः स्यादित्यर्थः।** हव्ये। **अन्तः-शब्दो मध्यमवाची। हव्यशब्दे उपपदे वहेर्ण्युट् स्यात् पादमध्ये चेन्न। पदान्ते इति फलितोऽर्थः।** हव्यवाळग्निरिति। **अत्र डस्य ळः, 'द्व्योश्चास्य स्वरयोर्मध्यमेत्य सम्पद्यते स डकारो ळकारो' इति प्रातिशाख्ये विहितः।** जनसन। **जनादिभ्यो धातुभ्यश्छन्दसि विट् स्यात्।** अग्रेगा इति। **'हलदन्तात्' इति सप्तम्यलुक्।** मन्त्रे श्वेतवहो। **श्वेतादिपूर्वेभ्यो वहादिभ्यो ण्विन्स्यात्। अलाक्षणिककार्यार्थं निपातनम्। श्वेतशब्दे कर्तृवाचिन्युपपदे वहेः कर्मणि कारके ण्विन्प्रत्ययः। उक्थे कर्मणि करणे चोपपदे शंगतेः प्रत्ययः नलोपश्च। पुरःपूर्वस्य दाश्ट दाने इत्यादेर्डत्वं कर्मणि च प्रत्ययः। डस्पदस्येति प्रत्येकमभिसम्ब-**

ति उक्थशा यजमानः । उक्थशासौ । उक्थशासः । पुरो दाश्यते दीयते पुरोडाः । **३४१५ अवे यजः ३।२।७२॥** अवयाः । अवयाजौ । अवयाजः । **३४१६ अवयाः श्वेतवाः पुरोडाश्च ८।२।६७॥** एते सम्बुद्धौ कृतदीर्घा निपात्यन्ते । चादुक्थशाः । **३४१७ विजुपे छन्दसि ३।२।७३॥** उपे उपपदे यजेर्विच् । उपयट् । **३४१८ आतो मनिन्क्वनिब्वनिपश्च ३।२।७४॥** सुप्युपसर्गे चोपपदे आदन्तेभ्यो धातुभ्यश्छन्दसि विषये मनिनादयस्त्रयः प्रत्ययाः स्युः । चाद्विच् । सुदामा । सुधीवा । सुपीवा । भूरिदावा । घृतपावा । विच् । कीलालपाः । 'ब्रह्मभ्रूणवृत्रेषु क्विप्' (२९९८) । **३४१९ बहुलं छन्दसि ३।२।८८॥** उपपदान्तरेऽपि हन्तेर्बहुलं क्विप् स्यात् । मातृहा । पितृहा । 'छन्दसि लिट्' (सू ३०९३) । भूतसामान्ये । अहं द्यावापृथिवी आ ततान । 'लिटः कानज्वा' (सू (३०९४) । 'क्वसुश्च' (सू ३०९५) । छन्दसि लिटः कानच्क्वसू वा स्तः । चक्राणा वृष्णि । यो नो अग्ने अररिवाँ अघायुः । 'शेश्छन्दसि' (सू ३११७) । ण्यन्ताद्धातोश्छन्दसि इष्णुच् स्यात्तच्छीलादौ । वीरुधः पारयिष्णवः । 'भुवश्च' (सू

ध्यते । भाविपदत्वाश्रयणेन चेदमुच्यते तदाह–यत्र पदत्वं भावीति । **डसन्तस्येत्यर्थः ।** श्वेतवा इति । **श्वेता एनं वहन्ति श्वेतवाः इन्द्रः । 'अत्वसन्तस्य' इति दीर्घः ।** उक्थशासाविति । **नलोपे कृते 'अत उपधायाः' इति वृद्धिः ।** अव । **योगविभाग उत्तरार्थः । 'पुरोडाशावयजोर्ण्विन्' इत्येकयोगे श्वेतवहादीनामप्युत्तरत्राऽनुवृत्तिः स्यात् । ।यजेश्चाऽवपूर्वस्यैवानुवृत्तिः स्यात्केवलस्यैवेष्यत इति ।** अवयाः श्वेतवाः । **ननु 'मन्त्रे श्वेतवहे'त्यादिना डसि कृते सौ 'अत्वसन्तस्य' इति दीर्घे रुत्वे च श्वेतवा इत्यादि सिद्धे नार्थोऽनेन योगेनेत्याशङ्क्याह**—एते सम्बुद्धाविति । **सम्बुद्धौ हि 'अत्वसन्तस्य' इति न प्राप्नोति तत्राऽसम्बुद्धावित्यनुवर्तनात् ।** विजुपे—। **ननु छन्दसीति व्यर्थं ।'मन्त्रे'इत्यनुवृत्तेरेव भाषायां न भविष्यतीति चेत् । सत्यम् । ब्राह्मणसंग्रहार्थं छन्दोग्रहणम् । मन्त्रव्यतिरिक्तो वेदभागो ब्राह्मणम् । तदुक्तम्–'तच्चोदकेषु मन्त्राख्या, शेषे ब्राह्मणशब्दः' ।** सुधीवा । सुपीवेति । **'घुमास्था' इतीत्त्वम् ।** कीलालपा इति । **कीलालं जलम् । 'पयः कीलालममृतं जीवनं भुवनं वनम्' इत्यमरः ।** तत् पिवतीति । पा पाने विच् । उपपदान्तरेऽपीति । **ब्रह्मभ्रूणघृत्रभिन्नेष्वपीत्यर्थः ।** आततानेति । **'णलुत्तमो वा' इति णित्त्वपक्षे वृद्धिः ।** अररिवाँ इति । छन्दसीति । **रा दाने लिटः क्वसुः । 'वस्वेकाजाद्धसाम्' इत्यादन्तत्वादिट् । ततो नुम्समासः । 'दीर्घादटि—' इति वक्ष्यमाणेन नस्य रुत्वम् 'आतोऽटि नित्यम्' इति रोः पूर्वस्याऽऽतो नित्यमनुनासिकः । प्रसङ्गादघायुशब्दं व्युत्पादयितुमाह**—छन्दसीति । **'सुप आत्मनः—' इत्यत्र आत्मन इति**

३११८)। अस्मात् केवलात्प्रागूवत्। भविष्णुः। **छन्दसि परेच्छायां क्यच उपसंख्यानम्** (वा १६११)। 'क्याच्छन्दसि' (सू ३१५०)। उप्रत्ययः स्यात्। अघायुः। **परजधिकारे जवसवौ छन्दसि वाच्यौ।** (वा २२००)। जवे याभिर्यूनः। ऊर्वोर्मे जवः। देवस्य सवितुः सवे। **३४२० मन्त्रे वृषेषपचमनविदभूवीरा उदात्तः ३।३।९६।** वृषादिभ्यः क्तिन्स्यात्स चोदात्तः। वृष्टिं दिवः। सुम्नमिष्टये पचात्पक्तीरुत। इयं ते नव्यसी मतिः। वित्तिः। भूतिः। अग्न आ याहि वीतये। रातौ स्यामोभयासः। **३४२१ छन्दसि गत्यर्थेभ्यः ३।३।१२९॥** ईषदादिषूपपदेषु गत्यर्थेभ्यो धातुभ्यश्छन्दसि युच् स्यात्। खलोऽपवादः। सूपसदनोऽग्निः। **३४२२ अन्येभ्योऽपि दृश्यते३।३।१३०॥** गत्यर्थेभ्यो येऽन्ये धातवस्तेभ्योऽपि छन्दसि युच् स्यात्। सुवेदनामकृण्वोर्ब्रह्मणे गाम्। **३४२३ छन्दसि लुङ्लङ्लिटः ३।४।६॥** धात्वर्थानां सम्बन्धे सर्वकालेष्वेते वा स्युः। पक्षे यथास्वं प्रत्ययाः। देवो देवेभिरागमत्। लोडर्थे लुङ्। इदं तेभ्योकरं नमः। लङ्। अग्निमग्र होतारमवृणीतायं यजमानः। लिट्। अद्या ममार। अथ म्रियत इत्यर्थः। **३४२४ लिङर्थे लेट् ३।४।७॥** विध्यादौ हेतुहेतुमद्भावादौ च धातोर्लेट् स्याच्छन्दसि। **३४२५ सिब्बहुलं लेटि ३।४।३४॥ ३४२६ इतश्च लोपः परस्मै-**

विशेषणात्परेच्छायां न प्राप्नोतीति वचनम्। क्याच्छन्दसि। **'सनाशंसभिक्ष उः' इत्यत उरिति वर्तते क्यान्ताद्धातोरुः स्याच्छन्दसि।** अघायुरिति। **परस्याघमिच्छतीत्यर्थे क्यच्।** 'अश्वाघस्यात्' इति वक्ष्यमाणेनाऽऽकारादेशः। **तदन्तादुप्रत्ययः।** जवसाविति। **'जु' इति सौत्रो धातुः। पूङ् प्राणिगर्भविमोचने। षु प्रसवैश्वर्ययोरिति। आभ्यां 'ऋदोरप्' इति अपि प्राप्तेऽज्विधीयते। स्वरे भेदः।** मन्त्रे वृषेष–। **'स्त्रियां क्तिन्' इत्यतः क्तिन्निति वर्तते। वीरा इति पञ्चम्यर्थे प्रथमा। तदाह**–वृषादिभ्य इति। वृष्टिमिति। **वृषु सेचने।** इष्टये इति। **इषु इच्छायाम्। चतुर्थ्यर्थे कवचनम्।** मतिरिति। **'मन ज्ञाने' क्तिन्। 'अनुदात्तोपदेश–' इत्यनुनासिकलोपः।** वित्तिरिति। **विद सत्तायाम्। कित्त्वान्नलघूपधगुणः।** वीतये इति। **वी गतिव्याप्तिप्रजनकान्त्यसनखादनेषु।** राताविति। **रा दाने।** छन्दसि लुङ्लङ्लिटः। **उदाहरणेषु धातुसम्बन्धो मृग्यः।** आगमदिति। **गम्ऌ गतौ 'पुषादि–' इति ऌदित्त्वादङ्।** अकरमिति। **'कृमृदरुहिभ्यश्छन्दसि' इति च्लेरङ् 'ऋदृशोऽङि–' इति गुणः।** अवृणीतेति। **वृञ् वरणे। लङ्। 'क्र्यादिभ्यः श्ना' 'ई हल्यघोः' इतीत्वम्।** इतश्च। **'लेटोऽडाटौ' इत्यतः लेट**

पदेषु ३।४।९७॥ लेटस्तिङामितो लोपो वा स्यात्परस्मैपदेषु । ३४२७ **लेटोऽडाटौ** ३।४।९४॥ लेटः अट् आट् एतावागमौ स्तस्तौ च पितौ । **सिब्बहुलं णिद्वक्तव्यः** । (वा १७९४)। वृद्धिः । प्रण आयूंषि तारिषत् । सुपेशसस्करति जोषिषद्धि । आ सावितदर्शसानाय । सिप इलोपस्य चाऽभावे । पतति दियुत् । प्रियः सूर्ये प्रियो अग्ना भवति । ३४२८ **स उत्तमस्य** ३।४।९८॥ लेडुत्तमसकारस्य वा लोपः स्यात् । करवाव । करवावः । टेरेत्वम् । ३४२९ **आत ऐ** ३।४।९५॥ लेट आकारस्य ऐ स्यात् । सुतेभिः सुप्रयसा मादयैते । आतामित्याकारस्य ऐकारः । विधिसामर्थ्यादाट ऐत्वं न । अन्यथा हि ऐटमेव विदध्यात् । यो यजाति यजात इत् । ३४३० **वैतोऽन्यत्र** ३।४।९६॥ लेट एकारस्य ऐ स्याद्वा 'आत ऐ' (सू ३५२९) । इत्यस्य विषयं विना । पशूनामीशै । ग्रहा गृह्यान्तै । अन्यत्र किम् । सुप्रयसा मादयैते । ३४३१ **उपसंवादाऽऽशङ्कयोश्च** ३।४।८॥

इति 'वैतोऽन्यत्र' इत्यतो वेति चानुवर्तते । तदाह—लेट इत्यादि । लेटो—। आगमौ स्त इति । तौ च पर्यायेण, न तु यौगपद्येन अडविधिसामर्थ्यात् । अन्यथा सवर्णदीर्घे कृते विशेषाऽभावात् 'आडुत्तमस्य' इति सूत्रान्मण्डूकप्लुत्या पिच्चेत्यनुवर्तते इत्याशयेनाह—तौ च पितावितति । तत्फलं तु 'विकरन्दसी उर्वरासु व्रतैते' इत्यादिषु गुणः । वृद्धिरिति । 'अचोऽञ्णिति' इत्यनेन । तारिषदिति । तॄ प्लवनतरणयोः । तिप इकारलोपः । सिप् इट् । जोषिषदिति । जुषी प्रीतिसेवनयोः । अनुदात्तेत् । व्यत्ययेन परस्मैपदम् । आसाविषदिति । आङ्पूर्वात् सु प्रसवैश्वर्ययोरित्यस्मात्लेट् । पतातीति । पत्लृ पतने तिप् । आडागमः । करवावेति । कृञो लेटो वस् । 'तनादिकृञ्भ्यः' इति उः । गुणः रपरः । 'लेटोऽडाटौ' इत्याह । तस्य पित्त्वेनाऽडित्त्वाद्विकरणस्य गुणः । 'अत उत्सार्वधातुके' इत्युत्वाऽभावश्च । मदी हर्षे । णिच् । तदन्तात्लेट् । आतामि कृते आह—टेरेत्वमिति । 'टित आत्मनेपदानाम्' इत्यनेन । आकारस्येति । प्रथमस्येत्यर्थः । द्वितीयस्य 'टित आत्मनेपदानाम्' इत्यनेनैत्वमेव, नित्यत्वात् । न च शब्दान्तरप्राप्त्याऽनित्यत्वं, कृताऽकृतप्रसङ्गित्वमात्रेण क्वचिन्नित्यताश्रयणात् । उत्तरसूत्रेऽन्यत्रेति लिङ्गाच्च । आट एत्वं नेत्युक्तं, तस्य फलमाह—यजाति यजात इति । यज देवपूजादौ । लेट आडागमः । वैतो । अन्यत्वं किमपेक्षयेत्याकाङ्क्षायां पूर्वसूत्रविषयादिति लभ्यते, सन्निधानात् । तदाह—आत इत्यादि । ईशै इति । ईश ऐश्वर्ये । उत्तमैकवचनमिट् । 'इतश्च' इति लोपो नास्ति, 'परस्मैपदेषु' इत्युक्तेः । टेरेत्वे तस्य ऐः । गृह्यान्ता इति । ग्रहेः कर्मणि लेट् । झिः । तस्याऽऽडागमः । यक् 'ग्रहिज्या' इति सम्प्रसारणं टेरेत्वं पूर्ववदैत्वम् ।

पणबन्धे आशङ्कायां च लेट् स्यात्। अहमेव पशूनामीशे। नेजिह्मायन्त्यो नरकं पताम। 'हलः श्नः शानज्झौ' (२५५७)। ३४३२ छन्दसि शायजपि ३।१।८४॥ अपिशब्दाच्छानच्। 'दृग्रहोर्भश्छन्दसि' (वा ४८२३) इति हस्य भः। गृभाय चिह्वया मधु। बधान देव सवितः। 'अनिदिताम्' (सू ४१५) इति बध्ना-तेर्नलोपः। गृभ्णामि ते। मध्वा जभार। ३४३३ व्यत्ययो बहुलम् ३।१।८५॥ विकरणानां बहुलं व्यत्ययः स्यात् छन्दसि। आण्डा शुष्णस्य भेदति। भिनत्तीति प्राप्ते। जरसा मरते पतिः। म्रियत इति प्राप्ते। इन्दो वस्तेन नेषतु। नयतेर्लोट् शप्सिपौ द्वौ विकरणौ। इन्द्रेण युजा तरुषेम वृत्रम्। तरेमेत्यर्थः। तरतेर्विध्यादौ लिङ्। उः शप् सिप् चेति त्रयो विकरणाः।

सुप्तिङुपग्रहलिङ्गनराणां कालहलचूस्वरकर्तृयङां च।
व्यत्ययमिच्छति शास्त्रकृदेषां सोऽपि च सिध्यति बाहुलकेन ॥ १॥

पणबन्ध इति। 'यदि मे भवानिदं कुर्यात्तर्हीदमहं दास्यामी'ति समयकरणं पणबन्धः। आशङ्का सम्भावना। अहमेवेति। त्रिपुरविजये देवैः प्रार्थितस्य रुद्रस्येदं वचनम्। पशवः संसारिणः। नेदिति। इच्छब्द आशङ्कां द्योतयति जिह्माऽऽवरणेन नरकपातः, स माभूदित्यर्थः। पतामेति। 'स उत्तमस्ये'ति सलोपः। छन्दसि शायः—छन्दसि श्नः शायजप्यादेशः स्याद्धौ परे। गृभायेति। ग्रह उपादाने। लोटः सेर्हिः 'क्र्यादिभ्यः श्ना'। 'ग्रहिज्या' इति सम्प्रसारणम्। बधानेति। बन्ध बन्धने। 'अतो हेः' इति हेर्लुक्। प्रसङ्गात् 'हृग्रहोर्भश्छन्दसि' इत्यस्योदाहरणमाह—गृभ्णामि त इति। जभारेति। हृञ् हरणे। लिटो णलि वृद्धौ हस्य भः। गृह्णामि, जहारेत्यर्थः। भेदतीति। भिदिर् विदारणे रौधादिकः, श्नमि प्राप्ते शप्। म्रियत इति। मृङ् प्राणत्यागे। 'तुदादिभ्यः' इति शे कृते 'रिङ् शयग्लिङ्क्षु' इति रिङादेशः। इयङ्। नेषत्विति। नयत्वित्यर्थः। द्वौ विकरणाविति। तत्र शप् न्याय्यः, सिप् तु बाहुलकात्। एतेन 'सेमामविड्ढि' इत्यादि व्याख्यातम्। अव रक्षणे। अस्माल्लोटि शपि प्राप्ते बाहुलकात्सिप्। 'हुझल्भ्यो हेर्धिः' षत्वं ष्टुत्वम् जश्त्वम्। तरुषेमेति। तरुष् मसिति जाते यासुट्। 'लिङः सलोपोऽनन्त्यस्य'। 'नित्यं ङितः'। 'अतो येयः'। 'लोपो व्योर्वलि'। 'आद्गुणः'। अत्रोप्रत्ययान्तस्य सिपं प्रत्यङ्गत्वात् 'सार्वधातुके'इति गुणः प्राप्तः। सिबन्तस्य शपि लघूपधगुणश्च प्राप्तो बाहुलकान्न भवति। सुप्तिङिति। शास्त्रकृत्। पाणिनिराचार्यः। सुप्प्रभृतीनां व्यत्ययमिच्छति। सोऽपि। तथाविधो। बाहुलकेन सिध्यति। बहुलस्य भावो बाहुलकम्। मनोज्ञादित्वाद्वुञ्। तत्पुनर्बहुलशब्दस्य। प्रवृत्तिनिमित्तं बह्वर्था-

धुरि दक्षिणायाः । दक्षिणस्यामिति प्राप्ते । चषालं ये अश्वयूपाय तक्षति । तक्षन्तीति प्राप्ते । उपग्रहः परस्मैपदात्मने पदे । ब्रह्मचारिणमिच्छते । इच्छतीति प्राप्ते । प्रतीपमन्य ऊर्मिर्युध्यति । युध्यत इति प्राप्ते । मधोस्तृप्ता इवासते । मधुन इति प्राप्ते । नरः पुरुषः । अधा स वीरैर्दशभिर्वियूयाः । वियूयादिति प्राप्ते । कालः कालवाची प्रत्ययः । श्वोऽग्नीनाधास्यमानेन । लुटो विषये लृट् । तमसो मा अदुक्षत् । अधुक्षदिति प्राप्ते । मित्र वयं च सूरयः । मित्रा वयमिति प्राप्ते । स्वरव्यत्ययस्तु वक्ष्यते । कर्तृशब्दः कारकमात्रपरः । तथा च तद्वाचिनां कृत्तद्धितानां व्यत्ययः । अन्नादाय । अण्विषये अच् । अवग्रहे विशेषः । यङो यशब्दादारभ्य 'लिङ्याशिष्यङ्' (सू ३४३४) इति ङकारेण प्रत्याहारः । तेषां व्यत्ययो भेदतीत्यादिरुक्त एव । **३४३४ लिङ्याशिष्यङ् ३।१।८६॥** आशीर्लिङि परे धातोरङ् स्याच्छन्दसि । 'वच उम्' (सू २४५४) । मन्त्रं वोचेमाग्नये । **दृशेरग्वक्तव्यः** (वा १८७२) । पितरं च दृशेयं मातरं च । अङि तु 'ऋदृशोऽङि' (सू २४०६) इति गुणः स्यात् । **३४३५ छन्दस्युभयथा ३।४।११७॥** धात्वधिकारे उक्तः प्रत्ययः सार्वधातुकार्धधातुकोभयसंज्ञः स्यात् । वर्धन्तु त्वा सुष्टुतयः । वर्धयन्त्वित्यर्थः । आर्धधातुकत्वाण्णिलोपः । विशृण्विरे । सार्वधातुकत्वात् श्नुः शृभावश्च । 'हुश्नुवोः' (२३८७) इति यण् ।

दानत्वं, चशब्दो हेतौ । यस्मादेवमुक्तप्रकारो व्यत्ययो बहुलग्रहणेनैव सिध्यति तस्माद्बहुलग्रहणं कृतमित्यर्थः । वियूया इति । **यु मिश्रणे विपूर्वः । आशिषि लिङ् ।** आधास्यमानेनेति । **आङ्पूर्वाद्दधातेः 'लृटः सद्वा' इत्यनेन शानजादेशः । 'स्यतासी' इति स्यः । 'आने मुक्' इति मुक् ।** मित्र वयमिति । **दीर्घस्य ह्रस्वव्यत्ययः ।** स्वरव्यत्ययस्त्विति । **गवामिव श्रियसे इत्यत्र 'तुमर्थे' इत्यनेन क्सेनि कृते 'ञ्नित्यादि' इत्याद्युदात्ते प्राप्ते व्यत्ययेन मध्योदात्तता ।** कृत्तद्धितानामिति । **'तेन दीव्यति' इत्यादौ विधीयमानानां ठगादीनां देवनादिकर्तृत्वादेवमुक्तम् । न त्विह कारकवाचित्वेऽप्याग्रहः, कृत्तद्धितमात्रे तात्पर्यात् । तथा च किमो विहितोऽतिर्यच्छब्दादपि भवति । 'त्वं वेत्थ यति ते जातवेदः' । 'विश्वेदेवासो मरुतो यतिष्ठन' ।** अन्नादायेति । **अन्नमत्तीत्यन्नादस्तस्मै । अन्ने कर्मण्युपपदेऽदेः कर्मण्यणि प्राप्तेऽच् ।** अवग्रह इति । **अणि कृते अन्न आदायेति, अचि तु अन्न अदायेति भावः ।** वोचेमेति । **वचेराशीर्लिङो मस् । अङ् । 'वच उम्' यासुट् ।** छन्दस्युभयथेति । **लिङः सार्वधातुकसंज्ञाप्यस्ति, तेन यासुट इयादेशः ।**

इति निघातो न । **३५२५ आङोऽनुनासिकश्छन्दसि ६।१।१२६॥** आङोऽचि परेऽनुनासिकः स्यात् स च प्रकृत्या । अभ्र आँ अपः । गभीर आँ उग्रपुत्रे । **ईषाअक्षादीनां छन्दसि प्रकृतिभावो वक्तव्यः** (वा ३६८५) । ईषाअक्षो हिरण्ययः । ज्या इयम् । पूषा अविष्टु । **३५२६ स्यश्छन्दसि बहुलम् ६।१।१३३॥** स्य इत्यस्य सोर्लोपः स्याद्वलि । एष स्य भानुः । **३५२७ ह्रस्वाच्चन्द्रोत्तरपदे मन्त्रे ६।१।१५१॥** ह्रस्वात्परस्य चन्द्रशब्दस्योत्तरपदस्य सुडागमः स्यान्मन्त्रे । हरिश्चन्द्रो मरुद्गणः । सुश्चन्द्र दस्म । **३५२८ पितरामातरा च छन्दसि ६।३।३३॥** द्वन्द्वे निपातः । आ मा गन्तां पितरामातरा च । चाद्विपरीतमपि । न मातरापितरा नू चिदिष्टौ । 'समानस्य छन्दस्यमूर्धप्रभृत्युदर्केषु' (१०१२) समानस्य सः स्यान्मूर्धादिभिन्ने उत्तरपदे । सगर्भ्यः । **छन्दसि स्त्रियां बहुलम्** (वा ० ३९९४) । विष्वग्देवयोरद्रयादेशः । विश्वाची च घृता-

---

'ईषदर्थे क्रियायोगे मर्यादाभिविधौ च यः । एतमातं क्तिं विद्याद्वाक्यस्मरणयोरङित्' इत्यनेन ङचिताः । यद्यपि 'अभ्र आँ अप' इत्यत्र आकारो न ईषदर्थादिचतुष्टयवृत्तिः, सप्तम्यर्थद्योतकत्वात् । तथापि 'वाक्यस्मरणयोरङि'त्यत्रैव तात्पर्यम् । अन्यत्र सर्वत्राङ् ङिदुदितव्यः । एवं तावद्वाक्ये स्थितम् । अभ्र आँ अप इति । सप्तम्यर्थद्योतकोऽत्राऽऽङ् । 'उपदेशेऽजनुनासिकः' इतीत्संज्ञा तु न उपदेशग्रहणात् । स्यश्छन्दसि । स्य इति स्यदित्येतस्य प्रथमान्तस्यानुकरणम् । 'सुपां सुलुक्' इति ङसषष्ठीकम् । एष-स्येति । एतदस्यदश्च स्यदाद्यत्वं 'तदोः सः सौ' इति सः । एतदस्त्यदश्च परस्य सोः 'एतत्तदोः सुलोपः' इति 'स्यश्छन्दसि' इति च लोपः । ह्रस्वात् । चन्द्रशब्दे उत्तरपदे ह्रस्वात्परः सुडागमो भवति । स च भवन् चन्द्रशब्दस्यैव 'उभयनिर्देशे पञ्चमीनिर्देशो बलीया'नित्याशयेनाह—चन्द्रशब्दस्योत्तरपदस्येति । सुडागमः स्यादिति । 'सुट् कात्पूर्वः' इत्यतः सुडित्यनुवर्तनात् । पितरा । पूर्वपदस्याकारादेशो निपात्यते । उत्तरपदे तु 'सुपां सुलुक्' इत्यादिना विभक्तेराकारादेशः । 'ऋतो ङिसर्वनामस्थानयोः' इति गुणः । समानस्य । सः स्यादिति । 'सहस्य सः' इत्यतः स इत्यनुवर्तते । सगर्भ्य इति । समानो गर्भः सगर्भः । तत्र भवः सगर्भ्यः । 'सगर्भसयूथसनुताद्यत्' इति यत् प्रत्ययः । अमूर्धेत्यादि किम् । समानमूर्धा । समानप्रभृतयः । समानोदर्काः । छन्दसि स्त्रियाम् । 'विष्वग्देवयोः' इति सर्वनाम्नोऽप्युपलक्षणम् । बहुलग्रहणात्क्वचिन्न भवति । विश्वा-

ची च । देवद्रीचीं नयत देवयन्तः । कद्रीची । ३५२९ सध मादस्थयोश्छन्दसि ६।३।९६॥ सहस्य सधादेशः स्यात् । इन्द्र त्वास्मिन्सधमादे । सोमः सधस्थम् । ३५३० पथि च छन्दसि ६।३।१०८॥ पथिशब्दे उत्तरपदे कोः कवं कादेशश्च । कवपथः । कापथः । कुपथः । ३५३१ साढ्यै साढ्वा साढेति निगमे ६।३।११३॥ सहेः क्त्वाप्रत्यये आर्धधातुके ष्ढ्यै, तृनि तृतीयं निपात्यते । मरुद्भिरुग्रः । पृतनासु साळ्हा । अचोर्मध्यस्थस्य ङस्य ळः ढस्य ळ्हश्च प्रातिशाख्ये विहितः । आह हि—द्व्योश्चास्य स्वरयोर्मध्यमेत्य सम्पद्यते स ङकारो ळकारः ळ्हकारतामेति स एव चास्य ढकारः सन्नूष्मणा संप्रयुक्त इति । ३५३२ छन्दसि च ६।३।१२६॥ अष्टन आत्वं स्यादुत्तरपदे । अष्टापदी । ३५३३ मन्त्रे सोमाश्वेन्द्रियविश्वदेव्यस्य मतौ ६।३।१३१॥ दीर्घः स्यान्मन्त्रे । अश्वावतीं सोमावतीम् । इन्द्रियावान्मदिन्तमः । विश्वकर्मणा विश्वदेव्यावत ।। ३५३४ ओषधेश्च विभक्तावप्रथमायाम् ६।३।१३२॥

ची । देवद्रीचीति । विश्वमञ्चतीति देवानञ्चतीति क्विन् । 'उगितश्च' इति ङीप् । 'अचः' इत्यकारलोपः । 'चौ' इति दीर्घत्वम् । अत्र विश्वग्देवयोरयादेशः प्राग्वो बाहुलकात् । क्वचित्त भवतीत्याह—कद्रीचीति । कुत्सितमञ्चतीति कद्रीची । किंशब्दस्य टेरयादेशः ङीङ्लोपदीर्घाः पूर्ववत् । सध माद । 'सहस्य सध्रिः' इत्यतः सहस्येति वर्तते । मादस्थ इत्येतयोरुत्तरपदयोः सहस्य सध इत्ययमादेशः स्यात् । 'सधेऽत्यविभक्तिको निर्देशः । सधमादे इति । सह माद्यन्ति देवा अस्मिन्निति सधमादो यज्ञ इति । 'मदोऽनुपसर्गे' इत्यपि प्राप्ते 'अजबन्ध्यां लोखलनाः' इति तद्बाधके ल्युटि 'हलश्च' इति वन् । सूत्रे मादेत्यकार उच्चारणार्थः । तेन मादयतेः क्विबन्तस्य माडिति यद्रूपं तन्नापि भवति । 'आ त्वा बृहन्तो हरयो युज्यमाना अवोगिन्द्रः सधमादो वहन्तु' । सधस्थमिति । सह तिष्ठतीति सधस्थः । 'आतोऽनुपसर्गे' इति कः । साढ्यै । एते त्रयो निपात्यन्ते निगमे । सहेः क्त्वाप्रत्यय इति पक्षे क्त्वाप्रत्ययस्य ध्यै आदेशश्च निपात्यते । साढ्यै सहेः क्त्वाप्रत्ययस्य ध्यै 'हो ढः' ष्टुत्वं "ढोढे लोपः" । ढ्लोपे' इति दीर्घः । साढ्वा इति । ढ्वादि पूर्ववत् । तृनि तृतीयमिति । तृचि त्वन्तोदात्तं स्यात्तथा भूरि चक्रे'ति मन्त्रे साढ्येत्याद्युदात्तं पठ्यते तन्न सङ्गच्छेतेति भावः । सूत्रे इतिशब्दः प्रकारार्थः । तेन निष्ठायामपि निपातनं बोध्यम् । अषाळ्हो अग्ने वृषभः । द्व्योरिति । अस्य आचार्यस्य द्व्योः स्वरयोर्मध्यमेत्य ङकारो ळकारतां सम्प-

दीर्घः स्यान्मन्त्रे। यदोषधीभ्यः। अदधात्योषधीषुः। **३५३५ ऋचितुनुघमक्षु-तङ्कुत्रोरुष्याणाम् ६।३।१३३॥** दीर्घः स्यात्। आ तू न इन्द्र। नू मर्तः। उत वा घा स्यालात्। मक्षू गोमन्तमीमहे। भरता जातवेदसम्। तङ्कितीति थादेशस्य ङित्त्वपक्षे ग्रहणम्। तेनेह न। शृणोतं श्रावागः। कूमनाः। अत्रा ते भद्रा। यत्रा नश्चक्रा। उरुष्याणः। **३५३६ इकः सुञि ६।३।१३४॥** ऋचि दीर्घ इत्येव। अभीषु णः सखीनाम्। 'सुञः' (३६४४) इति षः। 'नश्च धातुस्थोरुषुभ्यः' (३६४९) इति णः। **३५३७ द्व्यचोऽतस्तिङः ६।३।१३५॥** मन्त्रे दीर्घः। विश्वा हि चक्राजरसम्। **३५३८ निपातस्य च ६।३।१३६॥** एवा हि ते। **३५३९ अन्येषामपि दृश्यते ६।३।१३७॥** अन्येषामपि पूर्वपदस्थानां दीर्घः स्यात्। पूरुषः। दण्डादण्डि। **३५४० छन्दस्युभयथा ६।४।५॥** नामि दीर्घो वा। धाता धातृणाम्। इति बहुत्रवाः। तैत्तिरायास्तु ह्रस्वमेव पठन्ति। **३५४१ वा षपूर्वस्य निगमे ६।४।६॥** षपूर्वस्याच उपधाया वा दीर्घोऽसम्बुद्धौ सर्वनामस्थाने परे। ऋभुक्षाणम्। ऋभुक्षणम्। निगमे किम्। तक्षा। तक्षाणौ। **३५४२ जनिता मन्त्रे**

यते ऊष्मणा सम्प्रयुक्तः डकारः ळ्हकारतामेतीत्यन्वयः। अष्टापदीति। अष्टौ पादा अस्या इति बहुव्रीहौ 'संख्यासुपूर्वस्य' इति पादस्य लोपे कृते 'पादोऽन्यतरस्याम्' इति ङीप्। मन्त्रे। सोम, अश्व, इन्द्रिय, विश्व, देव्य, एषां मनुष्यप्रत्यये परे दीर्घः स्यान्मन्त्रे। ओषधेश्च। न च 'कृदिकारादक्तिनः' इति ङीषा गतार्थता। अन्तोदात्तत्वापत्तेः। इष्यते त्वाद्युदात्तः 'लघावन्ते' इति फिट्सूत्रात्। ऋचि तुनु। घ इति स्वरूपग्रहणं न तरप्तमपोः, छन्दसि घसञ्ज्ञस्यैव दीर्घदर्शनात्। उत वेति। भार्याया भ्राता श्यालस्ततः पञ्चमी। भरतेति। लोपमध्यमपुरुषबहुवचनस्य थस्य 'लोटो लङ्वत्' इत्यतिदेशात्तस्य स्थाने तादेशः 'तस्थस्थमिपाम्-' इत्यनेन। शृणोतेति 'तप्तनप्तनथनाश्च' इति तबादेशः। अत्र पित्त्वान्ङित्त्वं नास्ति। उरुष्याण इति। उरुष्येति कण्ड्वादियगन्तो रक्षणार्थः। लोटः सेर्हिः 'अतो हेः' इति लुक्। न इत्यस्य 'नश्च धातुस्थोरुषुभ्यः' इति णत्वम्। इकः इगन्तस्य सुञ्च परतो दीर्घः स्यादृचि। द्व्यचः। द्व्यचस्तिङन्तस्याऽतो दीर्घः स्यादृचि। विश्वेति। 'विद् ज्ञाने' लुट्। 'विदो लटो वा' इति मसः स्थाने मः। चक्रेति लिटो मध्यमपुरुषबहुवचनम्।

६।४।५३॥ इडादौ तृचि णिलोपो निपात्यते । यो नः पिता जनिता । **३५४३ शमिता यज्ञे** ६।४।५४॥ शमयितेत्यर्थः । **३५४४ युप्लुवोर्दीर्घश्छन्दसि** ६।४।५८॥ ल्यपीत्यनुवर्तते । वियूय । विप्लूय । 'आडजादीनाम्' (सू २२५४) । **३५४५ छन्दस्यपि दृश्यते** ६।४।७३॥ अनजादीनामित्यर्थः । आनट् । आवः । 'न माङ्योगे' (सू २२२८) । **३५४६ बहुलं छन्दस्यमाङ्योगेऽपि** ६।४।७५॥ अडाटौ न स्तो, माङ्योगेऽपि स्तः । जनिष्ठा उग्रः सहसे तुराय । मा वः क्षेत्रे परबीजान्यवाप्सुः । **३५४७ इरयो रे** ६।४।७६॥ प्रथमं दध्र आपः । रेभावस्याऽऽभीयत्वेनाऽसिद्धत्वादालोपः । अत्र रेशब्दस्येटि कृते पुनरपि रेभावस्तदर्थं च सूत्रे द्विवचनान्तं निर्दिष्टमिरयोरिति । **३५४८ छन्दस्युभयथा** ६।४।८६॥ भूसुधियोर्यण् स्यादियङुवङौ च । वनेषु चित्रं विभ्वम् । विभुवं वा । सुध्यो३ हव्यमग्ने । सुधियो वा । **तन्वादीनां छन्दसि बहुलम्** (वा० ४११५) तन्वं पुषेम । तनुवं वा ।

निपातस्य च । दीर्घः स्यान्मन्त्रे । एवशब्दश्चादिषु पाठान्निपातः । छन्दस्यु । नामीति वर्तते । 'ब्लोपे-' इत्यतो 'दीर्घं' इति च । तदाह—नामीत्यादि । ऋभुक्षिनृशब्द ऋणादिषु निपातितः । 'इतोऽत्सर्वनामस्थाने' इतीकारस्याऽकारादेशः । जनितेति । जनयितेत्यर्थः । यमिता । निपातनं पूर्ववत् । आनडिति । नशेर्लुङि 'मन्त्रे घस-' इति लेर्लुक् 'नशेर्वा' इत्यस्याऽभावे 'व्रश्च-' इति षः । जश्त्वेन डः । तस्य चर्त्वेन टः । आवरिति । हृणो लुङि लेर्लुक् । गुणः । रेफस्य विसर्गः । बहुलं छन्दसि । माङ्योगेऽप्यमाङ्योगेऽपि बहुलमडाटौ भवतः । अमाङ्योगेऽपि न भवतः । माङ्योगेऽपि च भवतः । जनिष्ठा इति । जनेर्लुक्यास् अडागमाभावः । माङ्योगेऽप्यडागममुदाहरति—मा व इति । वो युष्माकं क्षेत्रे भार्यायां परबीजानि परेषां बीजानि वीर्याणि मा अवाप्सुः उप्तानि मा भूवम् । वपेः कर्मणि लुङ् । व्यत्ययेन परस्मैपदम् । 'च्लेः सिच्' 'वदव्रज-' इति वृद्धिः । इदं काशिकानुराधेनोदाहृतम् । अध्ययनं तु वाप्सुरित्येव दृश्यते । माङ्यटस्तूदाहरणान्तरमन्वेषणीयम् । इरयो । इर इत्येतस्य रे आदेशः स्याच्छन्दसि । दध्र इति । भाभो लिटि झस्य 'लिटस्तझयोः-' इतीरेचि कृते रेभावः । ननु चाऽत्र परत्वाद्रेभावे कृतेऽनजादित्वादालोपो न प्राप्त इत्यत आह—रेभावस्येति । नन्वेवमपि रेभावस्यैव क्रादिनियमादिडागमः प्राप्नोति । न च रेभावस्य वैयर्थ्यम् । कृसृभृप्रभृतिषु चरितार्थत्वादत आह-अत्रेति । कथं पुनर्लक्षणिकस्य रेशब्दस्य रेभावो भवति । तत्राह—तदर्थं चेति । द्विवचननिर्देशाल्लक्षणप्रतिपदोक्तपरिभाषा न प्रवर्तत इति भावः । तन्वादीनाम् । बहुलमियङुवङादेशाः स्याच्छन्दसि । तनुवमिति । अधातु-

त्र्यम्बकम्। त्रियम्बकम्। ३५४९ **तनिपत्योश्छन्दसि** ६।४।९९॥ एतयोरुपधालोपः कृञ्छिति प्रत्यये। वितंत्निरे कवयः। शकुना इव पप्तिम। भाषायां वितेनिरे। पेतिम। ३५५० **घसिभसोर्हलि च** ६।४।१००॥ सग्धिश्च मे। बब्धां ते हरी धानाः। 'हुझल्भ्यो हेर्धिः' (सू २४२५)। ३५५१ **श्रुशृणुपृकृवृभ्यश्छन्दसि** ६।४।१०२॥ श्रुधी हवम्। शृणुधी गिरः। रायस्पूर्धि। उरुणस्कृधि। ३५५२ **वा छन्दसि** ३।४।८८॥ हिरण्यिद्वा। ३५५३ **आडितश्च** ६।४।१०३॥ हेर्धिः स्यात्। रारन्धि। रमेर्व्यत्ययेन परस्मैपदम्। शपः श्लुरभ्यासदीर्घश्च। अस्मे प्रयन्धि। युयोधि जातवेदः। यमेः शपो लुक्। यौतेः शपः श्लुः। ३५५४ **मन्त्रेष्वाङ्यादेरात्मनः** ६।४।१४१॥ आत्मनशब्दस्याऽऽदेर्लोपः स्यादाङि। त्मना देवेषु। ३५५५ **विभाषर्जोश्छन्दसि** ६।४।१६२॥ ऋजुशब्दस्य ऋतः स्थाने रः स्याद्वा इष्टेमेयस्सु। त्वं

त्वादप्राप्त उवङ् विधीयते। तन्वमिति। 'वा छन्दसि' इत्यमि पूर्वत्वाऽभावे यण्। त्र्यम्बकमिति। त्रीणि अम्बकानि नेत्राणि यस्याऽसौ त्र्यम्बको रुद्रः। वितत्निरे इति। 'तनु विस्तारे' लिटः प्रथमपुरुषबहुवचनम्। अत्राऽङ्लोपस्याऽसिद्धत्वेऽपि 'अत एकहल्मध्ये' इति एत्वाऽभ्यासलोपौ न, लोपविधानसामर्थ्यात्। पप्तिमेति। पत्लृ पतने लिटो मसो मस्य इट्। वितेनिरे पेतिमेति भाषायाम्। घसिभसोः। अनयोरुपधालोपः स्याद्धलादावजादौ च किति। सग्धिरिति। अदेः क्तिन्। बहुलं छन्दसि' इति घस्लादेशे उपधालोपे च कृते 'झलो झलि' इति सलोपस्तकारस्य धत्वं, धस्य जश्त्वम्। ततः समाना सखिः सग्धिरिति समासे कृते 'समानस्य छन्दस्यमूर्ध्वप्रभृत्युदर्केषु' इति सूत्रेण समानस्य सः। बब्धामिति। भसेर्लोटि ताम् श्लुः। परं नित्यमप्युपधालोपं बाधित्वा बाहुलकात्प्रथमं 'श्लौ' इति द्वित्वम्। तत उपधालोपसलोपधत्वजश्त्वानि। श्रुशृणु। एभ्यो हेर्धिः स्यात्। श्रुधीति। 'बहुलं छन्दसि' इति शपो लुक्। 'अत्रेषामपि' इति दीर्घत्वम्। शृणुधीति। अवः शृभावश्च विधानसामर्थ्यात् 'उतश्च प्रत्ययात्' इति न हेर्लुक्। दीर्घः पूर्ववत्। पूर्धीति। पॄ पालने। शपो लुक् 'उदोऽन्यपूर्वस्य' इत्युत्वम्। 'हलि च' इति दीर्घः। उरुणस्कृधीति। 'नश्च धातुस्थोरुषुभ्यः' इति णत्वम्। 'कः करत्' इत्यादिना विसर्जनीयस्य सत्वम्। अपावृधीति। दीर्घः पूर्ववत्। अभ्यासस्य दीर्घश्चेति। तुजादित्वादिति भावः। रारन्धीत्यत्र 'अनुदात्तोपदेश—' इत्यादिना मलोपो न, हेर्ङित्त्वात्। यमेः शपो लुगिति। 'बहुलं छन्दसि' इत्यनेन। एवमुत्तरत्रापि। विभा-

रजिष्ठमनुनेषि । ऋजिष्ठं वा । **३५५६ ऋत्व्यवास्त्व्यवास्त्वमाध्वीहिरण्य-यानि छन्दसि ६।४।१७५॥** ऋतौ भवमृत्व्यम् । वास्तुनि भवं वास्त्व्यम् । वास्त्वं च । मधुशब्दस्याणि स्त्रियां यणादेशो निपात्यते । माध्वीर्नः सन्त्वोषधीः । हिरण्य-शब्दाद्धितस्य मयटो मशब्दस्य लोपो निपात्यते । हिरण्ययेन सविता रथेन ।

इति षष्ठोऽध्यायः ॥

सप्तमोऽध्यायः ।

'शीङो रुट्' (सू २४४२) । **३५५७ बहुलं छन्दसि ७।१।८।** रुडागमः स्यात् । 'लोपस्त आत्मनेपदेषु' (सू ३५६३) इति पक्षे तलोपः । धेनवो दुहे । लोपाभावे । घृतं दुहते । अदभ्रस्य । 'अतो भिस ऐस्' (२०३) । **३५५८ बहुलं छन्दसि ७।१।१०॥** अग्निर्देवेभिः । **३५५९ नेतराच्छन्दसि ७।१।२६॥** स्वमोरदूङ् न । वार्त्रघ्नमितरम् । छन्दसि किम् । इतरत्काष्ठम् । 'समासे-ऽनञ्पूर्वे क्त्वो ल्यप्' (सू ३३३२) । **३५६० क्त्वापि छन्दसि ७।१।३८॥** यजमानं परिधापयित्वा । **३५६१ सुपां सुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजालः ७।१।३९॥** ऋजवः सन्तु पन्थाः । पन्थान इति प्राप्ते सुः । परमे व्यो-

---

षजोः । 'रक्तो 'हलादेर्लघोः' इत्यतः र ऋत इति 'तुरिष्टेमेयःसु' इति च । तदाह—ऋतः स्थाने इत्यादि । ऋत्व्य । ऋतुशब्दाद्यति, वास्तुशब्दादपि यति च यणादेशो निपात्यते । मशब्दस्येति । तस्याऽसिद्धत्वात् 'यस्य' इति लोपो न । 'अकृत्सार्वं' इति दीर्घस्वकृत्तपरिभाषया वारणीयः । यद्वा मकारमात्रस्य लोपः । ततो 'यस्य' इति लोपे कृते प्रत्ययाऽकारस्य श्रवणम् । इति षष्ठोऽध्यायः ।

बहुलं छन्दसि । छन्दसि विषये बहुलं रुडागमः स्यात् । दुहे इति । दुहेर्लटि टेरेत्वे झस्या ऽदादेशे रुट् तलोप । लोपाऽभावे इति । 'लोपस्त आत्मनेपदेषु' इत्यस्य वैकल्पिकत्वादित्यर्थः । अदभ्रमिति । दृशिर् प्रेक्षणे । क्विप् व्यत्ययेन प्रथमपुरुषबहुवचनस्थाने उत्तमपुरुषैकवचनं मिप् । तस्य रुडागमः । नेतरा । इतरशब्दात्परयोः स्वमोरदूडादेशो न स्याच्छन्दसि । इतरमिति । 'अदूडतरादिभ्यः' इत्यदूडभावे 'अतोऽम्' इत्यम् । क्त्वो ल्यबिति । 'समासेऽनञ्पूर्वे क्त्वो ल्यप्' प्राप्ते छन्दसि क्त्वापि विधीयते । तदाह—क्त्वापि । अनञ्पूर्वे समासे क्त्वा इत्यस्य यमादेशः स्यात् । अपिशब्दाल्ल्यबपि । समासेऽसमासे च भवति । अप्राप्तविषये ल्यपः प्रापणार्थत्वादपिशब्दस्य । अन्यथा 'वा छन्दसि' इत्येव ब्रूयात् ।

मन्। व्योमनि इति प्राप्ते ङेर्लुक्। धीती मती सुष्टुतौ। धीत्या मत्या सुष्ठु-त्येति प्राप्ते पूर्वसवर्णदीर्घः। या सुरथा रथीतमोभा देवा दिविस्पृशा। अश्विना। यौ सुरथौ दिविस्पृशावित्यादौ प्राप्ते आ। नतादब्राह्मणम्। नतमिति प्राप्ते आत्। या देव विद्म ता त्वा। यमिति प्राप्ते। न युष्मे वाजबन्धवः। अस्मे इन्द्राबृहस्पती। युष्मासु अस्मभ्यमिति प्राप्ते 'शे'। उरुया। धृष्णुया। उरुणा। धृष्णुनेति प्राप्ते या। नाभा पृथिव्याः। नाभाविति प्राप्ते डा। ता अनुष्ठ्योच्यावयतात्। अनुष्ठानमनुष्ठा व्यवस्थावदङ्। आहो उषा। साधुया। साध्विति प्राप्ते याच्। वसन्ता यजेत। वसन्ते इति प्राप्ते आलू। **इयाडियाजीकाराणामुपसंख्यानम्।** (वा४३०८) उर्विया। दार्विया। उरुणा दारुणेति प्राप्ते इया। सुक्षेत्रिया। सुक्षेत्रिणेति प्राप्ते डियाच्। इति न शुष्कं सरसो शयानम्। ङेरीकार इत्याहुः। तत्रायुदात्ते पदे प्राप्ते व्यत्य-

---

तथा च छन्दोविधिमनुविदधानाः कल्पसूत्रकारा अपि प्रयुञ्जते। आज्येनाक्षिणी अभ्येति। परिधापयित्वेति। **णिजन्तात्परिपूर्वाद्धातोः क्त्वा, तस्य ल्यबादेशे प्राप्ते क्त्वादेशः।** सुपाम्। **सुपां स्थाने सुलुक्, पूर्वसवर्णः, आ, आत् शे या डा उषायाच्आल् एते आदेशाःस्युश्छन्दसि।** पन्था इति। **'व्यत्ययो बहुलम्' इत्येव सिद्धमिदम्। उक्तं हि तत्र 'सुसिङ्पग्रह' इत्यादि तस्यैवाऽयं प्रपञ्चः।** धीतीत्यादि। **धीती मतीसुष्टुतीशब्देभ्यस्तृतीयैकवचनस्य पूर्वसवर्णं ईकारः।** प्रमाणत आन्तर्यात्सवर्णदीर्घत्वम्। दिविस्पृशाविति प्राप्ते आ इति। **अनेनाऽऽदित्यत्राऽऽकारोऽपि प्रश्लिष्यत इति दर्शितम्।** नतादिति। **नतशब्दादम्। तस्याऽदादेशः। 'न विभक्तौ तुस्माः' इतीत्संज्ञाप्रतिषेधः।** या देवेत्यादि। **यत्तच्छब्दादम्।** न युष्मे इति। **युष्मदः सप्तमीबहुवचनस्य शे आदेशः। 'शेषे लोपः'।** अस्मे इन्द्रेति। **शे इति प्रगृह्यत्वादयमादेशोऽभावः।** नाभा इति। **डित्त्वाट्टिलोपः।** ता अनुष्ठ्येति। **'षड्विंशतिरस्य वङ्क्रय' इति प्रक्रम्य,इदमध्वर्युप्रेषे पठितं ताः वङ्क्रीः, अनुष्ठ्याः अनुष्ठानेन अनुक्रमेण गणनया गणयित्वा, उच्यावयतात् भवान् विशसनं करोतु। पृथक् करोतु भवानित्यर्थः।** अनुष्ठानमनुष्ठेति। **अनुपूर्वात्तिष्ठतेरङ् तृतीयैकवचनस्य ङ्यादेशे ङित्त्वाट्टिलोपः। नन्वनुपूर्वात्तिष्ठतेः 'आतश्चोपसर्गे' इत्यङं बाधित्वा 'स्थागापापचो भावे' इति क्तिना भाव्यमिति चेत्सत्यम् 'पूर्वपरावरदक्षिणोत्तरा' इति सूत्रे 'व्यवस्थाया'मिति निर्देशादङपि, सामान्यापेक्षज्ञापकाश्रयणात्। तदेतद् ध्वनयति-व्यवस्थावदिति।** साधु इति प्राप्त इति। **सोलुकि प्राप्त इत्यर्थः।** वसन्ते इति प्राप्ते आल् इति। **पूर्वसवर्णं तु 'अतो गुणे' इति स्यात्।** उर्वियेति। **उरुदारुशब्दात्तृतीयैकवचनस्येयादेशः।** सुक्षेत्रियेति। **सुक्षेत्रिन्शब्दात्तृतीयैकवचनस्य डियाजा-**

येनान्तोदात्तता । वस्तुतस्तु ङीषन्तात् ङेर्लुक् । ईकारादेशस्य तूदाहरणान्तरं मृग्यम् । **आङ्याजयारामुपसंख्यानम्** । (वा ४३०९) । प्र बाहवा सिसृतम् । बाहुनेति प्राप्ते आङादेशः । 'घेर्ङिति' (सू २४५) इति गुणः । स्वप्नया । स्वप्नेनेति प्राप्ते अयाच् । स नः सिन्धुमिव नावया । नावेति प्राप्ते अयार्, रित्स्वरः । **३५६२ अमो मश्** ७।१।४०॥ मिबादेशस्याऽमो मश् स्यात् । अकार उच्चारणार्थः । शित्त्वात्सर्वादेशः । 'अस्तिसिचः' (सू२२२५) इतीट् । वधीं वृत्रम् । अवधिषमिति प्राप्ते । **३५६३ लोपस्त आत्मनेपदेषु** ७।१।४१॥ छन्दसि । देवा अदुह । अदुहतेति प्राप्ते । दक्षिणतः शये । शेते इति प्राप्ते । आत्मने इति किम् । उत्सं दुहन्ति । **३५६४ ध्वमो ध्वात्** ७।१।४२॥ अन्तरेवोष्माणं वारयध्वात् । वारयध्वमिति प्राप्ते । **३५६५ यजध्वैनमिति च** ७।१।४३॥ एनमित्यस्मिन्परे ध्वमोऽन्तलोपो निपात्यते । यजध्वैनं प्रियमेधाः । वकारस्य यकारो निपात्यत इति

देशः । डित्त्वाट्टिलोपः । बाहुनेति प्राप्त इति । काशिकायां तु प्रबाहुनेति प्राप्त इत्युक्तं तत्समासभ्रमादित्यवधेयम् । प्रेति न समस्तं पृथक्स्वरदर्शनात् पदकारैर्विच्छिद्य पाठाच्च । अत आख्यातान्वयीति ध्येयम् । स्वप्नयेति । अयाचोऽकारः 'सुपि च' इति दीर्घनिवृत्त्यर्थः । 'अतो गुणे' इति पररूपम् । नावयेति । नौशब्दाट्टा इत्यस्याऽयार् । रित्स्वर इति । 'रिति' इति सूत्रेण । अमो । अम इति मिबादेशो गृह्यते, न द्वितीयैकवचनं, छन्दसि इष्टानुविधानात् । तदेतदाह—मिबादेशस्येति । शित्त्वात्सर्वादेश इति । शित्करणाऽभावे तु 'अलोऽन्त्यस्य' इति मकारस्य स्यात्, 'आदेः परस्य' इति तु न, पञ्चमीनिर्देशाऽभावात् । न च मकारस्य मकारवचने प्रयोजनाऽभावात् सर्वादेशो भविष्यतीति वाच्यम् । मकारस्य मकारवचनमनुस्वारनिवृत्त्यर्थं स्यात् 'मो राजि समः क्वौ' इत्यत्र यथा । वधीमिति । हन्तेर्लुङ् 'हनो वध लिङि' 'लुङि च' इति वधादेशः । 'च्लेः सिच्' इट् 'तस्थस्थ—' इति मिपोऽम्भावः । तस्य मश् 'अस्तिसिचः—' इति मस्याऽपृक्तस्येट् 'इट ईटि' इति सिचो लोपः । सवर्णदीर्घत्वम् । 'बहुलं छन्दसि' इत्यडभावः । लोपस्त । आत्मनेपदेषु यस्तकारस्तस्य च्छन्दसि विषये लोपः स्यात् । अदुहेति । दुहेर्लङ् । 'आत्मनेपदेष्वनतः' इति झस्याऽदादेशः । 'बहुलं छन्दसि' इति रुट् तकारस्य लोपे द्वयोरकारयोः 'अतो गुणे' इति पररूपम् । शये इति । 'शेते' इत्यत्र तलोपे कृतेऽयादेशः । ध्वमो । ध्वमो ध्वादित्यादेशः स्याच्छन्दसि । वारयध्वादिति । वृञो णिचि लोट् । यज । वृत्तिकारस्तु 'यजध्व न-

वृत्तिकारोक्तिः प्रामादिकी। ३५६६ तस्य तात् ७।१।४४॥ लोटो मध्यमपुरुषबहुवचनस्य स्थाने तात्स्यात्। गात्रमस्यानूनं कृणुतात्। कृणुतेति प्राप्ते। सूर्यं चक्षुर्गमयतात्। गमयतेति प्राप्ते। ३५६७ तप्तनप्तनथनाश्च ७।१।४५॥ तस्येत्येव। शृणोत प्रावाणः। शृणुतेति प्राप्ते तप्। सुनोतन पचत ब्रह्मवाहसे। दधातन द्रविणं चित्रमस्मे। तनप्। मरुतस्तज्जुजुष्टन। जुषध्वमिति प्राप्ते व्यत्ययेन परस्मैपदं श्लुश्च। विश्वेदेवासो मरुतो यतिष्टन। यत्संख्याकाः स्थेत्यर्थः। यच्छब्दाच्छान्दसो डतिः। अस्तेस्तस्य थनादेशः। ३५६८ इदन्तो मसि ७।१।४६॥ 'मसी'त्यविभक्तिको निर्देशः। इकार उच्चारणार्थः। मस् इत्ययमिकारविशिष्टचरमावयवविशिष्टः स्यात्। मस इगागमः स्यादिति यावत्। नमो भरन्त एमसि। त्वमस्माकं तव स्मसि। इमः, स्मः इति प्राप्ते। ३५६९ क्त्वो यक् ७।१।४७॥

मिति पाठं ज्ञात्वा वकारस्य यकारश्च निपात्यत इत्याह। तदू दूषयति—वकारस्येत्यादि। प्रामादिकीति। लक्ष्ये वकारपाठस्य निर्विवादत्वात्, वेदभाष्येऽपि प्रकृतसूत्रस्य मलोपमात्रपरतोक्तेश्चेति भावः। तस्य मध्यमपुरुषबहुवचनस्येति। प्रथमपुरुषैकवचनस्य तु न ग्रहणम्। छन्दसि दृष्टानुविधानात्, पूर्वोत्तराभ्यां बहुवचनाभ्यां साहचर्याच्च। कृणुतादिति। कृवि हिंसाकरणयोश्च। 'क्ष्विन्विकृण्व्योर च' इत्युप्रत्ययः वकारस्य चाऽऽकारः। अतो लोपः। गमयतादिति। गमेर्णिच्। 'जनीजृष्—' इति अमन्तत्वान्मित्संज्ञायां 'मितां ह्रस्वः' लोपमध्यमपुरुषबहुवचनस्य तादेशः। तप्तनप्त। तस्य स्थाने एते आदेशा स्युः। शृणोतेति। श्रु श्रवणे। 'श्रुवः शृ च' इति श्नुप्रत्ययः शृभावश्च। पित्त्वेनाऽङित्त्वाद्गुणः। सुनोतनेति। षुञ् अभिषवे 'स्वादिभ्यः श्नुः' त इत्यस्य तनप्। दधातनेति। अत्राऽप्यङित्त्वात् 'श्नाभ्यस्तयो-'रित्याकारलोपाभावः। इदन्तो। अन्तशब्दोऽवयववचनः। इत् अन्तो यस्य स इदन्तः। तपरकरणमसन्देहार्थम्। तथा चायमर्थः मस् इत्ययं शठ् इकारान्तो भवति। मसः सकारान्तस्य इगागमो भवति, स च तस्यान्तो भवतीत्यर्थस्तदेतदाह—मस् इत्ययमिति। तत्र यदि सकारोपमर्देन इकारान्तत्वमभिप्रेतं स्यात्तर्हि मस् इदिति वाच्यं स्यात्। तस्मादवस्थित एव सकारे इकार उपसर्जनीयः। अन्तग्रहणाच्च तदूग्रहणेन गृह्यते। ततश्च टित्त्वकित्त्वादेरागमस्यिद्वस्याऽभावेऽप्यर्थादागमोऽयं सम्पद्यते तदेतदूचनयन्नाह—मस इगागमः स्यादिति। एवं च 'मस इ'गिति वक्तव्यं प्रत्याहारसन्देहप्रसङ्गात्तथा नोक्तम्। एमसीति। इण् गतौ। मस्। तस्य इकारः अन्तावयवः। स्मसीति। अस्तेर्मस्। 'श्नसोरल्लोपः'। क्त्वो। क्त्वा इत्यस्य यगागमः स्याच्छन्दसि।

दिवं सुपर्णो गत्वाय। ३५७० **इष्ट्वीनमिति च** ७।१।४८॥ क्वाप्रत्ययस्य ईनम् अन्तादेशो निपात्यते। इष्ट्वीनं देवान्। इष्ट्वा इति प्राप्ते। ३५७१ **स्नात्व्यादयश्च** ७।१।४९॥ आदिशब्दः प्रकारार्थः। आकारस्य ईकारो निपात्यते। स्त्वनः स्नात्वी मलादिव। पीत्वी सोमस्य वावृधे। स्नात्वा पीत्वेति प्राप्ते। ३५७२ **आज्जसेरसुक्** ७।१।५०॥ अवर्णान्तादङ्गात्परस्य जसोऽसुक् स्यात्। देवासः। ब्राह्मणासः। ३५७३ **श्रीग्रामण्योश्छन्दसि** ७।१।५६॥ आमो नुट्। श्रीणामुदारो धरुणो रयीणाम्। सूतग्रामणीनाम्। ३५७४ **गोः पादान्ते** ७।१।५७॥ विद्मा हि त्वा गोपतिं शूर गोनाम्। पादान्ते किम्। गवां शता पृक्षयामेषु। पादान्तेऽपि क्वचित्न। छन्दसि सर्वेषां वैकल्पिकत्वात्। विराजं गोपतिं गवाम्। ३५७५ **छन्दस्यपि दृश्यते** ७।१।७६॥ अस्थ्यादीनामनङ्। इन्द्रो दधीचो अस्थभिः। ३५७६ **ई च द्विवचने** ७।१।७७॥ अस्थ्यादीनामित्येव। अक्षीभ्यां ते नासिकाभ्याम्। ३५७७ **दृक्स्ववस्स्वतवसां छन्दसि** ७।१।८३॥ एषां नुम् स्या-

---

गत्वायेति। गमेः क्त्वा। 'अनुदात्तोपदेश-' इत्यनुनासिकलोपः। क्त्वा इत्यस्य यगागमः। इष्ट्वीन। क्त्वाप्रत्ययस्येति। 'यजेः परस्ये'ति शेषः। इष्टवीनमिति। यजेः क्त्वा। 'वचिस्वपि-' इति सम्प्रसारणम्। 'व्रश्च' इति षत्वम्। ष्टुत्वम्। अकारस्येनमादेशः। पीत्वेति। पिबतेः क्त्वा। 'घुमास्था-' इतीत्वम्। आज्जसेः। जसेरिति पूर्वाचार्यानुरोधेन निर्देशः। देवास इति। असुकि कृते जसः सकारस्य श्रवणम्। असुकः सकारस्य विसर्गः। श्रीणामिति। अस्य 'वाऽऽमि' इति नदीत्वविकल्पान्नदीत्वाऽभावे इदाहरणमिदं बोध्यम्। नदीत्वपक्षे तु 'ह्रस्वनद्यापो नुट्' इत्यनेनैव सिद्धम्। सूतग्रामणीनामिति। सूताश्च ग्रामण्यश्चेतीतरेतरयोगः। गोः पा। गो इत्येतस्मादुत्तरस्याऽऽमो नुडागमः स्यात्पादान्ते। पादश्चेह ऋक्पादो गृह्यते छन्दसीत्यधिकारात्। छन्दस्य। 'छन्दसि च' इत्येव सिद्धे 'अपि दृश्यते' इत्येतत्सर्वापाधिव्यभिचारार्थम्। अन्यथा आरब्धसामर्थ्यात्कस्यचिदेव व्यभिचारः सम्भाव्येतेति। 'टादावचीत्युक्तं हलादावपि भवति। अस्थभिः। विभक्तावित्युक्तमविभक्तावपि भवति। 'अस्थन्वन्तं यदनस्था बिभर्ति'। अस्थन्वन्तमित्यत्राऽस्थिशब्दान्मतुप्। अनङि कृतेऽनो नुडिति मतुपो नुट्। अनङो नकारलोपः। दृक्। 'आच्छीनद्योर्नुम्' 'सावनडुहः' इत्यतो नुम् सावित्यनुवर्तते।

त्सौ। कीदृङ्किन्द्रः। स्ववान्। स्वतवान्। 'उदोष्ठ्यपूर्वस्य' (सू २४९४)। **३५७८ बहुलं छन्दसि ७।१।१०३॥** ततुरिः। जगुरिः परावैः। **३५७९ हु ह्वरेश्छन्दसि ७।२।३१॥** ह्वरेर्निष्ठायां हु आदेशः स्यात्। अहुतमसि हविर्धानम्। **३५८० अपरिह्वृताश्च ७।२।३२॥** पूर्वेण प्राप्तस्याऽऽदेशस्याऽभावो निपात्यते। अपरिह्वृताः सनुयाम वाजम्। **३५८१ सोमे ह्वरितः ७।२।३३॥** इड्गुणौ निपात्येते। मा नः सोमो ह्वरितः। **३५८२ ग्रसितस्कभितस्तभितोत्तभितचत्तविकस्ताविशस्तृशंस्तृशास्तृतरुतृतरूतृवरुतृवरूतृवरूत्रीरुज्ज्वलितिक्षरितिवमित्यमीति च ७।२।३४॥** अष्टादश निपात्यन्ते। तत्र ग्रसु स्कम्भु स्तम्भु एषामुदित्वान्निष्ठायामिट्प्रतिषेधे प्राप्ते इण्निपात्यते। युवं शचीभिर्ग्रसिताममुञ्चतम्। विष्कभिते अजरे। येन स्वः स्तभितम्। सत्येनोत्तभिता भूमिः। स्तभितेत्येव सिद्धे उत्पूर्वस्य पुनर्निपातनमन्योपसर्गपूर्वस्य मा भूदिति। चते याचने। कस गतौ। आभ्यां क्तस्येड-

---

तदाह—नुम् स्यादिति। कीदृङ्किन्द्र इति। किम्शब्दे उपपदे 'त्यदादिषु दृशोऽनालोचने कञ्च' इति दृशेः क्विन्। 'इदंकिमोरीश् की' इति किमः आदेशः नुम् 'संयोगान्तस्य लोपः' 'क्विन्प्रत्ययस्य' इति कुत्वेन नस्य ङः। 'ङमो ह्रस्वादचि' इति ङमुट्। स्ववानिति। अवतेरसुन्। सुष्ठु अवो यस्येति विग्रहः। स्वःशब्दान्नुमि कृते 'सान्तमहतः' इति दीर्घः संयोगान्तलोपः। तस्याऽसिद्धत्वान्नलोपो न। स्वतवानिति। तुधातुः सौत्रो वृद्ध्यर्थः। ततोऽसुन्। स्वं तवो वृद्धिर्यस्येति विग्रहः। ततुरिरिति। तरतेः 'आदृगम' इति किन्प्रत्ययः। डावन्तस्य 'द्विर्वचनेऽचि' इति स्थानिवद्भावात् हृस्वे तस्य द्विर्वचनम्। उरदत्त्वम्। हु ह्वरे। 'श्वीदितो निष्ठायाम्' इत्यतो निष्ठायामिति वर्तते। तदाह—निष्ठायामिति। अहुतमिति। न हुतमहुतम्। अपरिह्वृता। छन्दसि बहुवचनान्तस्यैव प्रयोगदर्शनादूबहुवचनान्तस्य निर्देशः। सोमे। इड्गुणाविति। 'हु' इत्यादेशस्याऽभावोऽपि बोध्यः। ग्रसित। ग्रसु अदने। 'कम्भु स्तम्भु' रोधनार्थौ सौत्रौ। चते याचने। कस गतौ। शासु हिंसायाम्। शंसु स्तुतौ। शासु अनुशिष्टौ। तॄ प्लवनतरणयोः। वृङ् सम्भक्तौ। वृञ् वरणे। ज्वल दीप्तौ। क्षर सञ्चलने। चमूङ् सहने। टुवम् उद्गिरणे। अम गत्यादिषु। अष्टादशेति। चमितेः पाठपक्षे तु एकोनविंशतिः। उदित्त्वान्निष्ठायामिट्प्रतिषेधे प्राप्त इति। 'उदितो वा' इति क्त्वायां वेट्त्वात् 'यस्य विभाषा' इति निषेधे प्राप्ते इत्यर्थः। विष्कभित। 'अनिदिताम्' इति नलो-

भावः । चत्तो इतश्चत्तामुतः । त्रिधा हृ श्यावमश्विना विकस्तम् । उत्तानाया हृदयं यद्विकस्तम् । निपातनं बहुत्वापेक्षं सूत्रे बहुवचनं 'विकस्ता' इति । तेनैकवचनान्तोऽपि प्रयोगः साधुरेव । शसु शंसु शासु एभ्यस्तृच इडभावः । एकस्त्वष्टुरश्वस्याविशस्ता । प्रावप्राभ उत शंस्ता । प्रशास्ता पोता । तरतेर्वृङ्वृञोश्च तृच उट् ऊट् एतावागमौ निपात्येते । तरुतारं रथानाम् । तरूतारम् । वरुतारं, वरूतारम् । वरूत्रीभिः सुशरणो नो अस्तु । अत्र ङीबन्तनिपातनं प्रपञ्चार्थम् । वरूत्रशब्दो हि निपातितः । ततो ङीपा गतार्थत्वात् । उज्ज्वलादिभ्यश्चतुर्भ्यः शप इकारादेशो निपात्यते । ज्वल दीप्तौ । क्षर सञ्चलने । टुवम् उद्गिरणे । अम गत्यादिषु । इह क्षरितीत्यस्यानन्तरं क्षमितीत्यपि केचित्पठन्ति । तत्र 'क्षमूष् सहने' इति धातुर्बोध्यः । भाषायां तु ग्रस्तस्कब्धस्तब्धोत्तब्धचतितविकसिताः । विशसिता । शंसिता । शसिता । तरीता । तरिता । वरीता । वरिता । उज्ज्वलति । क्षरति । पाठान्तरे, क्षमति । वमति । अमति । 'बभूथाऽऽततन्थजगृम्भववर्थेति निगमे' (सू २५२७) । विद्मा तमुत्सं यत आबभूथ । येनान्तरिक्षमुर्वाततन्थ । जगृम्भा ते दक्षिणमिन्द्रहस्तम् । त्वं ज्योतिषा वितमो ववर्थ । भाषायां तु बभूविथ । आतेनिथ । जगृहिम । ववरिथेति । **३५८३ सनिंससनिवांसम् ७।२।६९॥** सनिमित्येतत्पूर्वात्सनतेः सनोतेर्वा क्वसोरिट् एत्वाऽभ्यासलोपाऽभावश्च निपात्यते । (अञ्जित्वाऽऽने सनिंससनिवांसम्) । **पावकादीनां छन्दसि प्रत्ययस्थात्कादित्वं नेति वाच्यम्** (वा ४५२७) । हिरण्य-

---

पः । 'वेः स्कभ्नातेर्नित्यम्' इति षत्वम् । उत्तभितेति । 'उदः स्थास्तम्भोः' इति पूर्वसवर्णः । सकारस्य थकारः । तस्य 'झरो झरि सवर्णे' इति लोपः । अन्योपसर्गपूर्वस्य माभूदिति । यदि स्यात् उत्तभितग्रहणं व्यर्थं स्यात् । चत्ता इति । चशब्दाद्टापि उत्ता सह आदूगुणः । निपातेन सह एकीकृत्य छेदस्तु पदकाराणां सम्प्रदायसिद्धः 'भूथामो' इति मन्त्रे 'भूथामो' इति यथा । अश्वस्याविशस्तेति । 'अन्येषामपि' इति पूर्वपदस्य दीर्घः । निपातनम् बहुत्वापेक्षमिति तेन छान्दसः प्रयोग एकवचनान्तोऽप्युदाहृत इति भावः । ततो ङीपा इति । 'ऋन्नेभ्यः-' इति विहितेन । बभूथा । निगमो वेदः । पूर्वा वेद इडभावो निपात्यते । वृञः क्रादिसूत्रेणेडभावे सिद्धे 'निगम एवेति नियमार्थं निपातनम् । तदेतदाह-भाषायां तु ववरिथेति । सनिंस । सनिपूर्वात्सनतेः सनोतेर्व

वर्णाः शुचयः पावकाः। **३५८४ घोर्लोपो लेटि वा ७।३।७०** ॥ दधद्रत्नानि दाशुषे। सोमो ददद्गन्धर्वाय। यदग्निरग्नयेददात्। **३५८५ मीनातेर्निगमे ७।३।८१**॥ शिति ह्रस्वः। प्रमिणन्ति व्रतानि। लोके प्रमीणन्ति। 'अस्तिसिचोऽपृक्ते' (सू २२२५)। **३५८६ बहुलं छन्दसि ७।३।९७**॥ सर्वमा इदम्। आसीदिति प्राप्ते। (अस्तेर्लङ् तिप्। ईडभावः, अपृक्तत्वाद्धल्ङ्यादिलोपः। रुत्वविसर्गौ। संहितायां तु 'भोभगो—' (सू १६७) इति यत्वम्। 'लोपः शाकल्यस्य' (सू ६७) इति यलोपः। गोभिरक्षाः। सिच इडभावश्छान्दसः। अट्। शेषं पूर्ववत्) 'ह्रस्वस्य गुणः' (सू २४२)। 'जसि च' (सू २४१)। **जसादिषु छन्दसि वावचनं प्राङ् णौ चङ्युपधायाः** (वा ४५९६)। अधा शतक्रत्वो यूयम्। शतक्रतवः। पश्वे नृभ्यो यथा गवे। पशवे। 'नाभ्यस्तस्याचि' (सू २५०३) इति निषेधे **'बहुलं छन्दसी'ति वक्तव्यम्।** (वा० ४५८६)। अनुषग्जुजोषत्। **३५८७ नित्यं छन्दसि ७।४।८।** छन्दसि विषये चङ्युपधाया ऋवर्णस्य ऋन्नित्यम्। अवीवृधत्। **३५८८ न छन्दस्य-**

सनिससनिवांसमिति निपात्यते। कसोऽदिति। 'नेड्वशि कृति' इति निषेधे प्राप्ते निपातनम्। पावका इति। पुनन्ति पावयन्ति वा पावकाः। पुनातेः पावयतेर्वा ण्वुल्। टाप्। दधदिति। दधातेर्लेट् तिप् 'इलो' इति द्वित्वम्। दधाति इति स्थिते आकारलोपः। 'लेटोऽडाटौ' इत्यडागमः। 'इतश्च लोपः परस्मैपदेषु' इतीकारलोपः। दाशुषे यजमानाय रत्नानि दधद्। दधादित्यर्थः। दददिति। ददाते रूपम्। लोपाऽभावे उदाहरणमाह—ददादिति। मीनातेः। 'ष्वादीनां ह्रस्वः' इत्यतो ह्रस्व इति वर्तते। तदाह—शिति ह्रस्व इति। प्रमिणन्तीति। 'हिनुमीना इति णत्वम्। आ इदमिति। अस्तेर्लङ् तिप् 'आडजादीनाम्' इत्याट् सपो लुक्। 'अस्तिसिचः' इतीडभावे अपृक्तत्वाद्धल्ङ्यादिलोपः। रुत्वविसर्गौ। संहितायां तु 'भोभगो—' इति रोर्यत्वम्। 'लोपः शाकल्यस्य' इति यलोपः। जसादिष्विति। आदिशब्दः प्रकारे, तेन पूर्वयोगनिर्दिष्टानामपि ग्रहणम्। शतक्रतव इति। 'जसि च' इति गुणाऽभावपक्षे प्रथमयोः पूर्वसवर्णदीर्घोऽपि 'वा छन्दसि' इति वचनादत्र न भवतीति यणादेशः प्रवर्तते। पश्वे इति। 'घेर्ङिति' इत्यस्याऽभावे यण्। जुजोषदिति। जुषी प्रीतिसेवनयोः। लेट् व्यत्ययेन परस्मैपदम्। तिप्। 'इतश्च लोपः परस्मैपदेषु' 'लेटोऽडाटौ' इत्य व्यत्ययेन सपः श्लुः। द्विर्वचनम्। न छन्दसि। इह यद्यानन्तर्यादीत्वमात्रं प्रतिषिध्येत तर्हि 'अकृत्सार्व-

पुत्रस्य ७।४।३५॥ पुत्रभिन्नस्यादन्तस्य क्यचि ईत्वदीर्घौ न । मित्रयुः 'क्याच्छन्दसि' (सू ३१५०) इति उः । अपुत्रस्य किम् । पुत्रीयन्तः सुदानवः । **अपुत्रादीनामिति वाच्यम्** । वा ४६१६ । जनीयन्तोन्वग्रवः । जनमिच्छन्त इत्यर्थः । **३५८९ दुरस्युर्द्रविणस्युर्वृषण्यतिरिषण्यति ७।४।३६॥** एते क्यचि निपात्यन्ते । भाषायां तु उप्रत्ययाऽभावात् । दुष्टीयति । द्रविणीयति । वृषीयति । रिष्टीयति । **३५९० अश्वाघस्याऽऽत् ७।४।३७॥** अश्वाघ एतयोः क्यचि आत्स्याच्छन्दसि । अश्वायन्तो मघवन् । मात्वा वृका अघायवः । 'न च्छन्दसि (सू ३५८८) इति निषेधो नेत्वमात्रस्य किंतु दीर्घस्यापीति । अत्रेदमेव सूत्रं ज्ञापकम् । **३५९१ देवसुम्नयोर्यजुषि काठके ७।४।३८॥** अनयोः क्यचि आत्स्याद्यजुषि कठशाखायाम् । देवायन्तो यजमानाः । सुम्नायन्तो हवामहे । इह यजुःशब्दो न मन्त्रमात्रपरः किंतु वेदोपलक्षकः । तेन ऋगात्मकेऽपि मन्त्रे यजुर्वेदस्थे भवति । किं च ऋग्वेदेऽपि भवति । स चेन्मन्त्रो यजुषि कठशाखायां दृष्टः । यजुषीति किम् । देवाञ्जिगाति सुम्नयुः । बहवृचानामप्यस्ति कठशाखा, ततो भवति प्रत्युदाहरणमिति हरदत्तः । **३५९२ कव्यध्वरपृतनस्यर्चि लोपः ७।४।३९॥** एषामन्त्यस्य लोपः स्यात् क्यचि ऋग्विषये । सपूर्वया निविदा

इति दीर्घः स्यात् । अपवादे पुनरुत्सर्गस्थितेः । अत आह—ईत्वदीर्घौ नेति । 'क्यचि यदुक्तं तत्रे'ति व्याख्यानादिति भावः । अत्र च ज्ञापकमनुपदमेव वक्ष्यति । पुत्रीयन्त इति । पुत्रमिच्छतः पुत्रीयन्तः । जनमिच्छन्तो जनीयन्तः । लटः शत्रादेशः । 'उगिदाम्' इति नुम् । दुरस्युः । दुष्टशब्दस्य दुरस्भावो द्रविणशब्दस्य द्रविणस्भावः वृषस्य वृषण् भावः रिष्टस्य रिषण्भावश्च निपात्यते । दुष्टीयतीति । प्रकृतिमात्रे तात्पर्यम् । उप्रत्ययस्य समानार्थेन तृना दुष्टियितेत्यादि बोध्यम् । अश्वायन्त इति । अश्वशब्दात्क्यच् : 'लटः शत्रादेशः । अघायव इति । 'छन्दसि परेच्छायां' क्यच् । 'क्याच्छन्दसि' इत्युप्रत्ययः । इदमेव सूत्रं ज्ञापकमिति । अन्यथा दीर्घेणैव सिद्धत्वादात्ववचनमनर्थकं स्यात् । देवाञ्जिगातीति । नन्विदं प्रत्युदाहरणमप्रयोजकम् । यजुषि काठक इत्यंशस्यापि तत्राऽभावादित्याशङ्क्याह—बह्वृचानामप्यस्तीति । तत्रेदं दृष्टमिति भावः । काठक इति किम् । यजुर्वेदे शाखान्तरे माभूत् । अन्यत्र सुम्नयुरिदमस्ति । कव्यध्वर । कवि अध्वर पृतना एषामन्त्यस्य लोपः स्यात् क्यचि परे ऋचि विषये ।

कव्यतायोः। अध्वर्युं वा मधुपाणिम्। दमयन्तं पृतन्युम्। 'दधातेर्हिः' (सू ३०७६) 'जहातेश्च क्त्वि' (सू ३३३१)। **३५९३ विभाषा छन्दसि ७।४।४४॥** हित्वा शरीरम्। हीत्वा वा। **३५९४ सुधित वसुधित नेमधित धिष्व धिषीय च ७।४।४५॥** सु वसु नेम एतत्पूर्वस्य दधातेः क्तप्रत्यये इत्वं निपात्यते। गर्भं माता सुधितं वक्षणासु। वसुधितमग्नौ। नेमधिता न पौंस्या। क्त्विन्यपि दृश्यते। उत श्वेतं वसुधितिं निरेके। धिष्व वज्रं दक्षिण इन्द्र हस्ते। धत्स्वेति प्राप्ते। सुरेता रेतो धिषीय। आशीर्लिङ इट्। 'इटोऽत्' (सू २२५७) धासीयेति प्राप्ते। 'अपो भि' (सू ४४२)। **मासश्छन्दसीति वक्तव्यम्।** (वा ४६३३)। मान्द्भिः। शरद्भिः॥ **स्ववःस्वतवसोरुषसश्चेष्यते।** (वा० ४६३४)। स्ववद्भिः। अवतेरसुन्, शोभनमवो येषां ते स्ववसस्तैः। तु इति सौत्रो धातुस्तस्मादसुन्। स्वंतवो येषां तैः स्वतवद्भिः। समुषद्भिरजायथाः। मिथुनेऽसिः। वसेः किच्चेत्यसिप्रत्यय इति हरदत्तः। पञ्चपादीरीत्या तु 'उषः कि'दिति प्राग्व्याख्यातम्। 'न कवतेर्यङि' (सू २६४१)। **३५९५ कृषेश्छन्दसि ७।४।६४॥** यङि अभ्यासस्य चुत्वं न। करीकृष्यते। **३५९६ दाधर्ति दर्धर्ति दर्धर्षि बोभूतु तेतिक्तेऽलर्ष्याऽऽपनीफणत्संसनिष्यदत्करिक्रत्कनिक्रदद्भरिभ्रदविध्वतोदविद्युतत्तरित्रतः सरीसृपतं वरीवृजन्मर्मृज्याऽऽगनागन्तीति च ७।४।६५॥** एतेऽष्टादश निपात्यन्ते। आशास्त्रयो धृङो, धारयतेर्वा। भवतेर्यङ्लुगन्तस्य गुणाऽभावः।

मृगय्वादिगणेऽध्वर्युशब्दः पठ्यते, तदुत्पत्त्यन्तरं बोध्यम्। विभाषा। **जहातेरङ्गस्य विभाषा हि आदेशः स्यात्।** हीत्वेति। **हिआदेशाऽभावे 'घुमास्था—' इतीत्वम्। क्वचि** 'हात्वेति पाठस्तत्र छान्दसत्वात् 'घुमास्था—'इतीत्वाऽभावः। वसुधितमिति। **कर्मधारय इति हरदत्तः। वसूनां धातारं प्रदातारमित्यर्थं इति वेदभाष्यम्।** नेमधितमिति। **सामिपर्यायो नेमशब्दः।** अयं कर्मधारयः। धत्स्वेति। **'श्नाभ्यस्तयोरातः' इत्याकारलोपः। 'दधस्तथोश्च' इति भष्भावः।** धिषीयेति। **आशीर्लिङात्मनेपदोत्तमपुरुषैकवचने दधातेरित्वं निपात्यते तदाह**—आशीर्लिङीति। मान्द्भिरिति। **'पद्दन्नोमास्-' इति मासशब्दस्य मास्आदेशः।** न कवतेरिति। **अनुवृत्यर्थं उपन्यासः।** करीकृष्यत इति। **'शप्रिकौ च लुकि' इति रीगागमः। लोके तु 'चरीकृष्यते कृषीवलः'।** धृङ इति। **धृङ् अवस्थाने।** धारयतेर्वेति। **स एव ण्यन्तः। तत्र दाधर्तीत्यत्र धारयतेः** शपः **श्लौ णिलुक् अभ्यासस्य दीर्घत्वं च निपात्यते। धृङो वा शे प्राप्ते व्यायधेन**

तेन भाषायां गुणो लभ्यते। तिजेर्यङ्लुगन्तात्तङ्। इयर्तेर्लटि हलादिःशेषापवादो रेफस्य लत्वमित्वाभावश्च निपात्यते। अलर्षि युध्म खजकृत्पुरन्दरम्। सिपा निर्देशो न तन्त्रम्। अलर्ति दक्ष उत। फणतेराङ्पूर्वस्य यङ्लुगन्तस्य शतरि अभ्यासस्य नीगागमो निपात्यते। अन्वा पनीफणत्। स्यन्देः संपूर्वस्य यङ्लुकि शतरि अभ्यासस्य निक्। धातुसकारस्य षत्वम्। करोतेर्यङ्लुगन्तस्याऽभ्यासस्य चुत्वाऽभावः। क्रन्देर्लुङि च्लेरङ् द्विर्वचनमभ्यासस्य चुत्वाऽभावो निगागमश्च। कनिक्रदज्जनुषम्। अक्रन्दीदित्यर्थः। बिभर्तेरभ्यासस्य जश्त्वाऽभावः। वि यो भरिभ्रदोषधीषु। ध्वरतेर्यङ्लुगन्तस्य शतरि अभ्यासस्य विगागमो धातोर्ऋकारलोपश्च। दविध्वतो रश्मयः सूर्यस्य। द्युतेरभ्यासस्य सम्प्रसारणाऽभावोत्वं विगागमश्च। दविद्युतद्दीद्यच्छोशुचानः। तरतेः शतरि श्लौ अभ्यासस्य रिगागमः। सुहोर्जा तरित्रतः। सूपेः शतरि श्लौ, द्वितीयैकवचने रीगागमोऽभ्यासस्य। वृजेः शतरि श्लावभ्यासस्य रीक्। मृजेर्लिटि णल्। अभ्यासस्य रुक्। धातोश्च युक्। गमेराङ्पूर्वस्य लटि श्लावभ्यासस्य चुत्वाऽभावो नीगागमश्च। वक्ष्यन्ती वेदानीगन्ति कर्णम्। ३५६७

ङप्। तत्र श्लावभ्यासस्य दीर्घत्वं च। अत्र परस्मैपदमपि निपात्य तस्यैव यङ्लुक्यभ्यासस्य रुगाद्यपवादकं दीर्घत्वं निपात्यत इति। दर्धर्तीत्यत्र यङ्लुक् पक्षे दाधर्तीति निपातनेन प्राप्तस्य दीर्घस्याऽभावो निपात्यते। 'रुग्रिकौ च लुकि' 'ऋतश्च' इत्येव रुक् सिद्धः। श्लुपक्षे तु रुगपि निपात्यः। 'दर्धर्ती'त्यत्र यङ्लुक्पक्षे न किंचिन्निपातनं किं तु श्लावेव। भवतेर्यङ्लुगन्ताल्लोट् गुणाऽभाव इति। ननु 'भूसुवोस्तिङि' इत्येव गुणनिषेधे सिद्धे निपातनमनर्थकमिति चेत्सत्यम्। ज्ञापकार्थं तर्हि निपातनम्। एतज्ज्ञापयति 'अन्यत्र यङ्लुगन्तस्य गुणप्रतिषेधो न भवती'ति। तेन बोभवीतीत्यत्र भाषायां गुणः सिद्धः। तदेतदाह—तेन भाषायामिति। तिजेर्यङ्लुक्यात्मनेपदं निपात्यते। तदाह—तिजेरिति। ऋ गतौ लटि सिपि 'श्लौ' इति द्वित्वम्। अभ्यासस्य हलादिः शेषापवादो रेफस्य लत्वं निपात्यते। 'अर्तिपिपर्त्योश्च' इत्यभ्यासस्य प्राप्तस्येत्वस्याऽभावो निपात्यते। तदाह—इयर्तेरिति। करोतेर्यङ्लुगन्तस्य शतरि अभ्यासस्य चुत्वाऽभावो निपात्यते। 'ऋतश्च—' इति रिगागमः। तदाह—करोतेरिति। चुत्वाभाव इति। 'कुहोश्चुः' इति प्राप्तस्य बिभर्तेर्यङ्लुगन्तस्य शतरि अभ्यासस्य जश्त्वाऽभावो निपात्यते। तदाह—बिभर्तेरिति। जश्त्वाभाव इति। 'अभ्यासे चर्च' इति प्राप्तस्य। दविध्वत इति। ध्वरतेर्यङ्लुगन्तस्य

'आदृगमहनजनः किकिनौ लिट् च' (सू ३१५१)। आदन्ताद्वर्णान्तादृगमादेश्च किकिनौ स्तस्तौ च लिड्वत्। बभ्रिर्वज्रं पपिः सोमं ददिर्गाः। जग्मिर्युवा। जघ्निर्वृत्रमभिश्रियम्। जक्षिः। लिड्वद्भावादेव सिद्धे 'ऋच्छत्यृताम्' (सू० २३८३) इति गुणबाधनार्थं कित्त्वम्। बहुलं छन्दसि (सू ३५७८) इत्युत्वम्। ततुरिः। जगुरिः। ३४३६ तुमर्थे सेसेनसेअसेन्क्सेकसेनध्यैअध्यैन्कध्यैकध्यैन्शध्यैशध्यैन्तवैतवेङ्तवेनः ३।४।९॥ से। वक्षे रायः। सेन्। ता वामेषे। असे। शरदो जीवसे धाः। असेन्। नित्त्वादाद्युदात्तः। क्से। प्रेषे। कसेन्। गवामिव श्रियसे। अध्यै। अध्यैन्। जठरं पृणध्यै। पक्षे आद्युदात्तम्। कध्यै। कध्यैन्। आहुवध्यै। पक्षे नित्स्वरः। शध्यै। राधसः सह मादयध्यै। शध्यैन्। वायवे। पिबध्यै। तवै। दातवाउ। तवेङ्। सूतवे। तवेन्। कर्तवे। ३४३७ प्रयैरो-

---

वलि लोपः। आदृ। परार्थं प्रयुज्यमानाः शब्दा वतिमन्तरेणापि वत्यर्थं गमयन्ति 'गोवार्हीक' इतिवदित्याशयेनाह—लिड्वदिति। किकिनौ भवतः। लिट प्रत्ययस्य भवतात्ययमर्थस्तु न भवति। तथा हि सति लिट् किकिन इत्येव ब्रूयात्। बभ्रिरिति। 'भृञ' अस्मात् किः लिडवद्भावाद्द्वित्वम्। किकिनोः स्थाने तिबादयस्तु न। लिड्वदित्यतिदेशेन स्वरूपाबाधेनैव कार्यातिदेशात्। 'न लोकाव्यय-' इति षष्ठीनिषेधे वज्रशब्दादुद्वितीया। जग्मिरिति। 'गमहन-' इत्युपधालोपः। जघ्निरिति। 'हो हन्तेः-' इति कुत्वम्। जक्षिरिति। क्षुत्वम्। जग्धेर्झिः। ननु लिडवद्भावे सति 'असंयोगाल्लिट् कित्' इत्येव सिद्धे किरवकरणमनर्थकमित्याशयेनाह—लिड्वद्भावादिति। 'असंयोगाल्लिट् कित्' इति किरवं सिद्धमिति भावः। आदिति मुखसुखार्थो दकारो न तु तकारः। तेन तात्परत्वाऽभावाद्दीर्घस्यापि ऋकारस्य ग्रहणं। तदाह—ततुरिः। जगुरिरिति। तॄ प्लवनतरणयोः। गॄ निगरणे। आभ्यां किः। द्वित्वात्परत्वात् 'बहुलं छन्दसि' इत्युत्वे प्राप्ते 'द्विर्वचने-' इति निषेधादुत्वाऽभावे द्वित्वम्। उरदत्वम्। उत्तरस्योत्वम्। तुमर्थे। तुमुनोऽर्थस्तुमर्थो भावः। ननु 'कर्तरि कृत्' इति वचनात्कर्तरि तुमुनो विधानात्कथं भावोऽर्थ इति चेच्छृणु। 'अव्ययकृतो भावे' इति वचनात्तुमुनो भावे विधानात्। तुमर्थे पञ्चदश प्रत्यया भवन्ति। वक्षे इति। वचः से कुत्वे षत्वम्। कषसंयोगे क्षः। एषे इति, इणो गुणः। नकारो 'ञ्नित्यादिर्नित्यम्' इत्याद्युदात्तार्थः। प्रेषे इति। इणः से किरवादगुणे आदूगुणः। श्रियसे इति। इयङ्, नित्त्वादाद्युदात्तः। इह मन्त्रे मध्योदात्तः पठ्यते। तत्र बाहुलकात्प्रत्ययस्वरो बोध्यः। आहुवध्यै इति। जुहोतेर्डवङ्। मादयध्यै इति। मदी हर्षे ण्यन्ताच्छध्यैप्रत्ययः। तस्य भाववाचिसार्वधातुकत्वात्सा-

द्विष्यै अध्यथिष्यै ३।४।१०॥ एते तुमर्थे निपात्यन्ते। प्रयातुं रोदुमध्यथितुमित्यर्थः। ३४३८ **दृशे विख्ये च** ३।४।११॥ द्रष्टुं विख्यातुमित्यर्थः। ३४३९ **शकि णमुल्कमुलौ** ३।४।१२॥ शक्नोतावुपपदे तुमर्थे एतौ स्तः। विभाजं नाशकत्। अपलुपं नाशकत्। विभक्तुमपलोप्तुमित्यर्थः। ३४४० **ईश्वरे तोसुन्कसुनौ** ३।४।१३॥ ईश्वरो विचरितोः। ईश्वरो विलिखः। विचारितुं विलेखितुमित्यर्थः। ३४४१ **कृत्यार्थे तवैकेन्केन्यत्वनः** ३।४।१४॥ न म्लेच्छितवै। अवगाहे। दिदृक्षेण्यः। भूर्यस्पष्ट कर्त्वम्। ३४४२ **अवचक्षे च** ३।४।१५॥ रिपुणा नावचक्षे। अवख्यातव्यमित्यर्थः। ३४४३ **भावलक्षणे स्थेणकृञ्वदिचरिहुतमिजनिभ्यस्तोसुन्** ३।४।१६॥ आसंस्थातोः सीदन्ति। आसमाप्तेः

वंधातुके यकि प्राप्ते व्यत्ययेन शप् गुणाऽऽदेशौ। पिबध्यै इति। अत्रापि यक्प्रसङ्गे व्यत्ययेन शप्। 'पाघ्रा-' इति पिबादेशः। दातवा उ इति। ददातेस्तवै आयादेशे 'लोपः शाकल्यस्य' इति यलोपः। सूतवै इति। क्रियार्थात्र गुणः। कर्तवै इति। कृञो गुणः। क ँमित्यर्थः। प्रयै। प्रपूर्वाद्यातेः कैप्रत्ययः। रुहेरिध्यै। नञ्पूर्वाद्वयेश्च। वृत्ते। योगविभागश्चिन्त्यप्रयोजनः। दृशेः क्यातेश्च केप्रत्ययः। क्रियार्थादृशेर्न गुणः। ख्यातेराळोपश्च। विभाजमिति। विपूर्वाद्भजतेर्णमुलो णित्वात् 'अत उपधायाः' इति वृद्धिः। अपलुपमिति। लुप्लृ छेदने। क्रियार्थादगुणाऽभावः। ईश्वरे। ईश्वरशब्दे उपपदे धातोस्तोसुन्कसुनौ स्तश्छन्दसि। विचरितोरिति। चर गताविह्। विलिख इति। 'लिख विलेखने'। क्रियार्थात्र गुणः। 'कृत्वातोसुन्कसुनः' इत्यव्ययत्वात् 'अव्ययादाप्सुपः' इति विभक्तेर्लुक् 'न लुमता-' इति निषेधात् 'अव्ययस्य' इति दीर्घो न। कृत्यार्थे। कृत्यानामर्थो भावकर्मणी, तयोरेवेति कृत्यानां भावकर्मणोर्विधानात् तत्र एते प्रत्ययाः स्युः। यद्यपि कृत्यनामर्थो 'भव्यगेय-' इत्यादौ कर्ताऽपि, वह्यं स्नानीयमित्यादौ करणादिरपि, तथापि न तत्र कृत्यत्वेन कर्त्रादिषु विधानं, किं तर्हि स्वरूपेण। कृत्यतया विधानं तु भावकर्मणोरेवेति भावः। न म्लेच्छितवै इति। 'म्लेच्छ अव्यक्ते शब्दे'। न म्लेच्छितव्यमित्यर्थः। अवगाहे इति। गाहू विलोडने। दिदृक्षेण्य इति। दृशेः सन्नन्तात्केन्यः। अतो लोपः। कर्त्वमिति। कृञः त्वन्। कृत्यमित्यर्थः। यद्यपि 'तुमर्थे सेसेन्—' इत्यनेन तुमर्थे तवै विहितस्तथापि भावभिन्नेऽपि कर्मकारके तवै यथा स्यादित्येवमर्थम्। अवचक्षे। अवपूर्वाच्चक्षिङ् एष प्रत्ययो निपात्यते। क्रियार्थात्साधुधातुकत्वं तेन ख्याञादेशो न। भावलक्षणे। कृत्यार्थे इति निवृत्तम्। तुमर्थे इति वर्तते। प्रकृत्यर्थविशेषणं भावलक्षणग्रहणम्। भावो लक्ष्यते येन तस्मिन्नर्थे वर्तमानेभ्यः स्थादिभ्यो धातुभ्यस्तुमर्थे तोसुन् स्याच्छन्दसि। संस्थानादीनामवधिरूपेण लक्षणं भावः। आ समाप्तेरिति। सम्पूर्वो हि तिष्ठतिः समाप्तौ रूढः। 'सम्तिष्ठरे

सोदन्तीत्यर्थः । उदेतोः । अपकर्तोः । प्रवदितोः । प्रचरितोः । होतोः । आतमितोः । 'काममाविजनितोः सम्भवामः' इति श्रुतिः । **३४४४ सुपितृदोः कसुन् ३।१।१७॥** भावलक्षणे इत्येव । पुरा क्रूरस्य विसृपो विरप्शिन् । पुरा जत्रुभ्य आतृदः । **इति तृतीयोऽध्यायः ।**

चतुर्थोऽध्यायः ।

३४४५ रात्रेश्चाजसौ ४।१।३१॥ रात्रिशब्दान्ङीप्स्यात् अजस्विषये छन्दसि । रात्री व्यख्यदायती । लोके तु (ग.) कृदिकारादिति ङीष्यन्तोदात्तः । **३४४६ नित्यं छन्दसि ४।१।४६ ॥** वह्वादिभ्यश्छन्दसि विषये नित्यं ङीप् । वह्वीषु हि त्वा । नित्यग्रहणमुत्तरार्थम् । **३४४७ भुवश्च ४।१।४७॥** ङीष् स्यात् छन्दसि । विभ्वी । प्रभ्वी । 'विप्रसंभ्यः' (सू ३१६०) इति ड्वप्रत्ययान्तं सूत्रेऽनुक्रियते । उत इत्यनुवृत्तेः । उवङादेशस्तु सौत्रः । **मुद्गलाच्छन्दसि लिच्च ।** (वा २४९६) ङीषो लित्वमानुक् चागमः । लित्स्वरः । रथीरभून्मुद्गलानी । **३४४८ दीर्घजिह्वी च छन्दसि ४।१।५६ ॥** संयोगोपधत्वादप्राप्तो ङीष् विधी-

---

पिण्डपितृयज्ञ' इत्यादौ तथा दर्शनात् । आतमितोरिति । **तमु ग्लानौ** । सुपितृदोः । **सृप्ल्ट् गतौ** । **उतृदिर् हिंसाऽनादरयोः** । **भावकरणेऽर्थे वर्तमानयोः सुपितृदोस्तुमर्थे कसुन्** । विसृप इति । **गमनादित्यर्थः** । **इति तृतीयोऽध्यायः** ।

रात्रेश्चाऽजसौ । न जसिः अजसिस्तस्मिन् । इकार उच्चारणार्थः । 'आहौ प्रभूतादिभ्यः' इतिवत् । छन्दसीति । **ननु 'तिमिरपटैरवगुण्ठिता रात्र्यः' इति प्रयोगो न स्यात् । छन्दसीत्युच्यते । न चेदं छन्दः । अजसाविति निषेधाच्च** । किं च वेदेऽपि 'रात्र्य' इति प्रयोगो न स्यात् इत्याशङ्क्याह—लोके त्विति । **तुशब्दोऽनुक्तसमुच्चयार्थः** । लोके, जसि वेदे चेत्यर्थः । कृदिकारादिति । **'राशदिभ्यां त्रिरि'ति व्युत्पत्तिपक्षे कृदिकारान्तः । अव्युत्पत्तिपक्षे तु 'सर्वतोऽक्तिन्नर्थात्' इति ङीष् बोध्यः** । नित्यम् । **'वह्वादिभ्यश्च' इति वर्तते 'अन्यतो ङीष' इत्यतो ङीषिति च तदाह**—वह्वादिभ्य इति । **नन्वारम्भसामर्थ्यादेव नित्यत्वे सिद्धे नित्यग्रहणं व्यर्थमित्याशङ्क्याह**—नित्यग्रहणमुत्तरार्थमिति । भुवः । विभ्वीति । **'विप्रसम्भ्यो ड्वसंज्ञायाम्' इत्यतो ड्वप्रत्ययान्तात् ङीष्** । **ननु स्वयम्भूरत्रापि स्यादित्याशङ्क्याह**—ड्वप्रत्ययान्तमिति । **ननु ड्वप्रत्ययान्तानुकरणे किं प्रमाणमत आह**—उत इत्यनुवृत्तेरिति । **'वोतो गुणवचनात्' इति सूत्रात्** । **ननु तर्हि ड्वप्रत्ययान्तस्य 'घेर्ङिति' इति गुणे कृते भो इति निर्देशः प्राप्नोति** । तदाह—उवङादेशस्तु सौत्र इति । मुद्गला । **'इन्द्रवरुण' इति सूत्रस्थं वार्ति-**

यते । 'आसुरी वै दीर्घजिह्वी देवानां यज्ञवाट्' । ३४४६ **कद्रुकमण्डल्वोश्छन्दसि ४।१।७१॥** ऊङ् स्यात् । कद्रूश्च वै कमण्डलूः । **गुग्गुलुमधुजतुपतयालूनामिति वक्तव्यम् ।** (वा २५०४) गुग्गुलूः । मधूः । जतूः । पतयालूः । 'अव्ययात्यप्' (सू १३२६) । **आविष्ठ्यस्योपसंख्यानं छन्दसि ।** (वा २७८५) । आविष्ठ्यो वर्धते । **३४५० छन्दसि ठञ् ४।३।१६ ॥** वर्षाभ्यष्ठक्योऽपवादः । स्वरे भेदः । वार्षिकम् । **३४५१ वसन्ताच्च ४।३।२० ॥** ठञ् स्यात् छन्दसि । वासन्तिकम् । **३४५२ हेमन्ताच्च ४।३।२१॥** छन्दसि ठञ् । हैमन्तिकम् । योगविभाग उत्तरार्थः । 'शौनकादिभ्यश्छन्दसि' (१४८८) णिनिः प्रोक्तेऽर्थे । छाणोरपवादः । शौनकेन प्रोक्तमधीयते शौनकिनः । वाजसनेयिनः । छन्दसि किम् । शौनकीया शिक्षा । **३४५३ द्व्यचश्छन्दसि ४।३।१५०॥** विकारे मयट् स्यात् । शरमयं बर्हिः । यस्य पर्णमयी जुहूः । **३४५४ नित्वद्ग्रर्भबिल्वात् ४।३।१५१॥** उत्वान् उकारवान् । मौञ्जं शिक्यम् । वर्ध्रं चर्म, तस्य विकारो वार्ध्री रज्जुः । बैल्वो यूपः । 'सभाया यः' (सू १६५७) । **३४५५ ढश्छन्दसि ४।४।१०६॥** समेयो युवा । **३४५६ भवे छन्दसि ४।४।११०॥**

कमिदम् । लित्स्वर इति । द्वितीयानुनासिकारस्योदात्तत्वम् । दीर्घजिह्वी । दीर्घजिह्वीति निपात्यते छन्दसि । अप्राप्तो ङीपिति । 'स्वाङ्गाच्चोपसर्जनात्' इति न प्राप्नोति तत्र ह्रस्वसंयोगोपधादिति प्रतिषेधात् । कद्रु । 'ऊङुतः' इत्यत ऊङिति वर्तते । कद्रुशब्दात्कमण्डलुशब्दाच्च स्त्रियामूङ्स्याच्छन्दसि । गुग्गुलुमधु । एषां व्यत्ययेन छन्दसि ङीत्वम् । पतयालुशब्दः 'रुहिगृहि' इत्यादिना आलुजन्तः । अव्ययो । व्याख्यातमपि त्यबनुवृत्तिप्रदर्शनार्थं स्मारितम् । आविष्ठ्यस्येति । 'अव्ययात्यप्' इत्यत्र 'अमेहकतसित्रेभ्यः' इति नियमादप्राप्तः शैषिकस्त्यब् विधीयते । आविष्ठ्य इति । आविर्भूतमाविष्ठ्यम् । 'हस्वात्तादौ' इति पत्वं तकारस्य टुत्वम् । ठकोऽपवाद इति । 'वर्षाभ्यष्ठक्' इति प्राप्तस्य । ननु ठञ्ठञोः को विशेषस्तत्राह—स्वरे भेद इति । ठञि कृते 'ञ्नित्यादिर्नित्यम्' इत्याद्युदात्तत्वं, ठकि तु सति 'कितः' इत्यनेनाऽन्तोदात्तत्वं स्यादिति भावः । वार्षिकमिति । ठस्येकः । उत्तरार्थ इति । 'सर्वत्राण् च तलोपश्च' इत्येतदर्थः । तत्र ह्रस्यैवानुवृत्तिर्यथा स्यात्, वसन्तस्य माभूत् । शौनक । 'काश्यपकौशिकाभ्यामृषिभ्यां णिनिः' इति वर्तते । तदाह—णिनिरिति । प्रोक्ते इति । 'तेन प्रोक्तम्' इत्येतस्मिन्नर्थे । शौनकीयेति । 'वृद्धाच्छः' । द्व्यचः । 'मयड्वैतयोर्भाषायाम्' इत्युक्ते वेदेऽप्राप्तो विधीयते । नित्वत् । उकारवतः प्रातिपदिकाद्वर्ध्रबिल्वशब्दाभ्यां च मयण् स्यात् । 'द्व्यचश्छन्दसि' इति प्राप्तः प्रतिषिध्यते । मौञ्जमिति । मुञ्जशब्दादात्सर्गिकोऽण् । वार्ध्रीति । वर्ध्रशब्दादौत्सर्गिकोऽण् । 'टिड्ढाणञ्' इति ङीप् । ढश्छन्दसि । सप्तम्यन्ता-

सप्तम्यन्ताद्भवार्थे यत्। मेघ्याय च विद्युत्याय च। यथायथं शैषिकाणामणादीनां घादीनां चापवादोऽयं यत्। पक्षे तेऽपि भवन्ति। सर्वविधीनां छन्दसि वैकल्पिकत्वात्। तद्यथा। मुञ्जवान्नाम पर्वतः। तत्र भवो मौञ्जवतः। सोमस्येव मौञ्जवतस्य भक्षः। आ चतुर्थसमाप्तेश्छन्दोऽधिकारः। **३४५७ पाथोनदीभ्यां ड्यण्** ४।४।१११॥ तमुत्वा पाथ्यो वृषा। चनो दधीत नाद्यो गिरो मे। पाथसि भवः पाथ्यः। नद्यां भवो नाद्यः। **३४५८ वेशन्तहिमवद्भ्यामण्** ४।४।११२॥ भवे। वैशन्तीभ्यः स्वाहा। हैमवतीभ्यः स्वाहा। **३४५९ स्रोतसो विभाषा ड्यड्ड्यौ** ४।४।११३॥ पक्षे यत्। ड्यड्ड्ययोस्तु स्वरे भेदः। स्रोतसि भवः स्रोत्यः। स्रोतस्यः। **३४६० सगर्भसयूथसनुताद्यन्** ४।४।११४॥ अनुभ्राता सगर्भ्यः। अनुसखा सयूथ्यः। यो नः सनुत्य उत वा जिघत्नुः। नुतिर्नुम्। 'नपुंसके भावे क्तः' (सू० ३०९०)। सगर्भादयस्त्रयोऽपि कर्मधारयाः। 'समानस्य छन्दसि' (सू० १०१२) इति सः। ततो भवार्थे यन्। यतोऽपवादः। **३४६१ तुग्राद्धन्** ४।४।११५॥ भवेऽर्थे। पक्षे यदपि। आ वः शर्म वृषभं तुग्रियासु। इति बह्वृचाः। 'तुग्रियास्वि'ति शाखान्तरे। धनाकाशयज्ञवरिष्टेषु तुग्रशब्द इति वृत्तिः। **३४६२ अग्राद्यत्** ४।४।११६॥ **३४६३ यच्छौ च** ४।४।११७॥ चाद्यत्। अग्रे भवोऽग्र्यः। अग्रियः। अग्रीयः। **३४६४ समुद्राभ्राद्धः** ४।४।११८॥ समुद्रिया अप्सरसो मनीषिणम्। ना नंदतो अभ्रियस्येव घोषाः। **३४६५ बर्हिषि**

स्सभाशब्दात् ढः साधवर्थे। मणादीनां चेति। 'तत्र भवः' इति प्राप्तानाम्। पाथोनदीभ्याम्। सप्तम्यन्ताभ्यामाभ्यां भवार्थे ड्यण् स्यात्। पाथसीति। पाथो जलम्। 'कबन्धमुदकं पाथः' इत्यमरात्। पाथोऽन्तरिक्षम्' इति वृत्तिः। वैशन्तीभ्य इति। विशेर्झच्। वेशन्तः पल्वलम्। तत्र भवा आपः वैशन्त्यः। सगर्भसयूथस। 'अतिगृभ्यां भन्'। गिरति गीर्यते वा गर्भः। युता भवन्त्यस्मिन्निति यूथम्। 'तिथपृष्ठयूथगूथप्रोथाः' इति थक्प्रत्ययान्तो निपातितः। दीर्घोऽपि निपातनादेव। कर्मधारया इति। समानश्चासौ गर्भश्च। तत्र भवः सगर्भ्यं इति विग्रहः। यतोऽपवाद इति। 'भवे छन्दसि' इति प्राप्तस्य। अभ्राद्यत्। 'भवे छन्दसि' इत्येव सिद्धे घादिभिर्बाधा माभूदिति यद्विधीयते। समुद्रः। समुन्दतीति समुद्रः। 'स्फायितञ्चि' इति रक्। अपो बिभर्ति इत्यभ्रम्। मूञ्चिभुजादित्वात्कः। 'अभ्रसमुद्रादिति' वक्तव्ये 'समुद्राभ्रा'

दत्तम् ४।४।११६॥ 'प्राग्घिताद्यत्' (सू० १६२६) इत्येव। बर्हिष्येषु निधिषु प्रियेषु। ३४६६ दूतस्य भागकर्मणी ४।४।१२०॥ भागोऽशः। दूत्यम्। ३४६७ रक्षोयातूनां हननी ४।४।१२१॥ या ते अग्ने रक्षस्या तनूः। ३४६८ रेवतीजगतीहविष्याभ्यः प्रशस्ये ४।४।१२२॥ प्रशंसने यत्स्यात्। रेवत्यादीनां प्रशंसनं रेवत्यम्। जगत्यम्। हविष्यम्। ३४६९ असुरस्य स्वम् ४।४।१२३॥ असुर्यं देवेभिर्धायि विश्वम्। ३४७० मायायामणु ४।४।१२४॥ आसुरी माया। ३४७१ तद्वानासामुपधानो मन्त्र इतीष्टकासु लुक् च मतोः ४।४।१२५॥ वर्चस्वानुपधानो मन्त्र आसामिष्टकानां वर्चस्याः। ऋतव्याः।

दित्युक्तिः पूर्वनिपातस्याऽनित्यत्वज्ञापनार्था। बर्हिषि। तत्र भव इति निवृत्तम्। बर्हिः शब्दाद्दत्तमित्यर्थे यत्प्रत्ययो भवति। बर्हिष्येति। 'बृंहतेर्नक्षोपश्चे' तीस्प्रत्ययान्तो बर्हिस्तस्माद्यत्। दूतस्य। दूतशब्दात्षष्ठीसमर्थाद्भागे कर्मणि चाऽभिधेये यात्प्रत्ययः स्यात्। भागे 'तस्येदम्' इत्यणि प्राप्ते वचनम्। कर्मणि तु 'दूतवणिग्भ्यां च' इत्यौपसंख्यानिके. ये दूत्यमित्यादि। दूतस्य भागो दूत्यः, कर्म दूत्यम्। रक्षोयातूनाम्। षष्ठीबहुवचनान्ताभ्यां रक्षस्यातुशब्दाभ्यां हननीत्यस्मिन्नर्थे यत्स्यात्। रक्षेरसुनि रक्षः 'कमितनिमनी' इत्यादिना यातेस्तुन् यातुशब्दो रक्षःशब्दपर्यायः। न च 'विरूपाणामपि समानार्थानाम्' इत्येकशेषः स्यादिति वाच्यम्। बहुर्थाभिधायिस्वरूपवचनेन सूत्रस्थ भिन्नार्थत्वात्। रक्षस्येति। हन्यतेऽनया सा हननी, रक्षसाम्। एवं यातव्या। बहुवचनं स्तुतिवैशिष्ट्यज्ञापनाय। बहूनां रक्षसां हनने हि स्तुतिः प्रतीयते। रेवतीजगती। प्रशंसनं प्रशस्यम्। प्रपूर्वाच्छंसु स्तुतावित्यस्माद्भावे क्यप्। तदाह—प्रशंसने इति। रयिरस्यास्तीति रेवती। रयिशब्दान्मतुप् 'छन्दसीरः' इति वत्वम्, 'रयेर्मतौ बहुलम्' इति सम्प्रसारणम्। उगित्वान्ङीप् नक्षत्रे गौरादित्वान्ङीष्। जगच्छब्दात् 'वर्तमाने' इत्यनेन, शतृवद्भावात् 'अनितश्च' इति ङीप्। हविषे हिता हविष्या। उगवादित्वाद्यत्। तासां प्रशंसनं हविष्यं, 'यस्ये' ति लोपे कृते 'हलो यमां यमि' इति यलोपः। असुरस्य स्वम्। असुरशब्दात्षष्ठीसमर्थात्स्वमित्येतस्मिन्नर्थे यत्स्यात्। असुर्यमिति। न सुरोऽसुरः सुरप्रतिपक्षी। अथ वा असेरुच्। अस्यति अस्यते वा असुरः। तस्य स्वमसुर्यम्। मायायामणु। मीयतेऽनयेति माया असदर्थप्रकाशनशक्तिः। माङ औणादिको यः। तस्यां वाच्यायामसुरशब्दादण् स्यात्पूर्वसूत्रापवादः। आसुरीति। 'टिड्ढाणञ्-' इति ङीप्। तद्वानासा। मत्वन्तात्प्रथमासमर्थादासामिति षष्ठ्यर्थे यत्स्यात् यत्प्रथमासमर्थमुपधानो मन्त्रश्चेत्स भवति, यत्तदासामिति निर्दिष्टमिष्टकाश्चेत्ता भवन्ति। मतोश्च लुक्। वर्चस्वानिति। वर्चःशब्दो यस्मिन्मन्त्रेऽस्ति वर्चस्वान्। कुम्भेष्टकोपधानमन्त्रः 'भूतं

३४७२ अश्विमानण् ४।४।१२६॥ आश्विनीरुपदधाति। ३४७३ वयस्यासु मूर्ध्नो मतुप् ४।४।१२७॥ 'तद्वानासा'मिति सूत्रं सर्वमनुवर्तते। मतोरिति पदमावर्त्य पञ्चम्यन्तं बोध्यम्। मतुबन्तो यो मूर्धशब्दस्ततो मतुप्स्यात्प्रथमस्य मतोर्लुक्च वयःशब्दवन्मन्त्रोपधेयास्विष्टकासु। यस्मिन्मन्त्रे मूर्धवयःशब्दौ स्तस्तेनोपधेयासु। मूर्धन्वतीरुपदधातीति प्रयोगः। ३४७४

च स्थ भव्यं च स्थ देवस्य वः सवितुः प्रसवे' इत्यादिकः। उपधीयतेऽनेनेत्युपधानम्। चयनं रचनमित्यर्थः। ऋतव्या इति। ऋतुशब्दो यस्मिन्मन्त्रेऽस्ति स ऋतुमान्, स 'मधुश्च माधवश्चे'त्यादिकः। ऋतुमानुपधानो मन्त्र आसामिष्टकानामृतव्याः। तद्वानिति किम्। मन्त्रादेव समुदायान्माभूदिति काशिका। अत्र हरदत्तः—ननु तद्वानित्यस्मिन्नसति 'समर्थानां प्रथमाद्वा' इति वचनादासामिति प्रथमानिर्दिष्टत्वाच्छष्ठ्यन्तादिष्टकाऽभिधायिनः उपधानमन्त्रे प्रत्ययः स्यादिति वाक्यार्थः स्यात्। तथा च समुदायान्न प्राप्नोतीति चेत्सत्यम्। आसामिति प्रथमं न करिष्यत इति मत्वा प्रश्नप्रतिवचने, ततश्च 'उपधानो' मन्त्र आसामिष्टकासु 'लुक् च मतो'रिति योगः करिष्यते। तथा च तद्वानित्यस्याऽभावे 'भूतं च स्थ भव्यं च स्थे'त्ययमुपधानो मन्त्र आसामिष्टकाना'मिति वाक्यं स्यात्। तथा चेत्तिना परामृष्टान्मन्त्रसमुदायादेव प्रत्ययः प्राप्नोतीति भावः। उपधान इति किम्। वर्चस्वदभिमन्त्रणमासामित्यत्र माभूत्। 'शिवेन मा चक्षुषा' इत्यनुवाकः कुम्भेष्टकाभिमन्त्रणे विनियुक्तः। मन्त्र इति किम्। अङ्गुलिमानुपधानो हस्त आसामित्यत्र माभूत्। इष्टकास्विति किम्। वर्चस्वानुपधान आसां शर्कराणामित्यत्र माभूत्। 'इति' कारणं नियमार्थम्। अनेकपदसम्भवे केनचिदेव पदेन तद्वान्मन्त्रो गृह्यते न सर्वेण। मतुब्ग्रहणमुत्तरार्थम्। अश्विमानित्यत्र मतुप एव लुक् यथा स्यात् इनेर्माभूत्। इह तु मत्वन्ताःप्रत्ययविधानात्तस्यैव लुक भविष्यति। अश्विमान्। अश्विशब्दो यस्मिन्मन्त्रेऽस्ति सोऽश्विमान्मन्त्रः स च 'ध्रुवक्षिति'रित्यादिकः। प्रथमान्तादश्विमच्छब्दादासामिति षष्ठ्यर्थे अण् स्यात् यत्प्रथमानिर्दिष्टमुपधानो मन्त्रश्चेत्स भवति। यत्तदासामिति निर्दिष्टमिष्टकाश्चेत्ता भवन्ति मतोश्च लुक्। आश्विनीरुपदधातीति। अश्वशब्दात् 'अत इनिठनौ'इत्यस्त्यर्थे इनिः। तदन्ताम्मतुप्। अश्विमान् स उपधानो मन्त्र आसामिष्टकानामिति विगृह्याऽणि विहिते मतोश्च लुकि कृते 'इनण्यनपत्ये' इति प्रकृतिभावः। वयस्यासु। वयस्वानुपधानो मन्त्र आसामिष्टकानां ता वयस्यास्तासु वयस्वाभिधेयासु प्रथमासमर्थान्मद्वन्तमूर्धशब्दादासामिति षष्ठ्यर्थे मतुप्स्यात्। यत्प्रथमानिर्दिष्टमुपधानो मन्त्रश्चेत्स भवति, यदासामिति निर्दिष्टमिष्टकाश्चेत्ता भवन्ति। यस्मिन्मन्त्रे मूर्धशब्दो वयःशब्दश्च विद्यते स मूर्धवान् वयस्वान्, यथा 'मूर्धा वयः प्रजापतिश्छन्द' इति, तत्र वयस्वच्छन्दादिव मूर्धवच्छन्दादपि पूर्वेण यति प्राप्ते मतुब्विधीयेतेत्याशयेनाह—

मत्वर्थे मासतन्वोः ४।४।१२८॥ नभोऽभ्रम्। तदस्मिन्नस्तीति नभस्यो मासः। ओजस्या तनूः। **३४७५ मधोर्ञ च ४।४।१२९॥** माधवः। मधव्यः। **३४७६ ओजसोऽहनि यत्खौ ४।४।१३०॥** ओजस्यमहः। ओजसीनं वा। **३४७७ वेशोयशआदेर्भगाद्यल् ४।४।१३१॥** यथासंख्यं नेष्यते। वेशो बलं तदेव भगः। वेशोभग्यः। वेशोभगीनः। यशोभग्यः। यशोभगीनः। **३४७८ ख च ४।४।१३२॥** योगविभाग उत्तरार्थः क्रमनिरासार्थश्च। **३४७९ पूर्वैः कृतमिनयौ च ४।४।१३३॥** गम्भीरेभिः पथिभिः पूर्विणेभिः। ये ते पन्थाः सवितः पूर्व्यासः। **३४८० अद्भिः संस्कृतम् ४।४।१३४॥** यस्येदमप्यं हविः। **३४८१ सहस्रेण संमितो घः ४।४।१३५॥** सहस्रियासो अपां नोर्मयः। सहस्रेण तुल्या इत्यर्थः। **३४८२ मतौ च ४।४।१३६॥** सहस्रशब्दान्मत्वर्थे घः स्यात्। सहस्रमस्यास्तीति सहस्रियः। **३४८३ सोममर्हति यः ४।४।१३७॥** सोम्यो ब्राह्मणः। यज्ञार्ह इत्यर्थः। **३४८४ मये च ४।४।१३८॥** सोमशब्दाद्यः स्यान्मयडर्थे।

यस्मिन्मन्त्रे इति। मूर्धन्वतीरिति। **'अनो नुट्' इति नुडागमः। 'मूर्धवत'इति वक्तव्ये मात्रिमं मतुबन्तुकं चेतसि कृत्वा मूर्धं इत्युक्तम्।** मत्वर्थे। **यस्मिन्नर्थे मतुप्विहितस्तस्मिन्नर्थे प्रथमाम्ताद्यःस्यात् मासतन्वोरभिधेययोः। ननु प्रथमासमर्थमिति कस्मादागतमिति चेन्मत्वर्थंग्रहणादित्यवेहि। 'कृषिचमितनिधनिसजिवर्जिभ्य ऊः' इति ऊकारान्तस्तनूशब्दः सूत्रे निर्दिष्टः। ननु 'भृमृशीङ्तृचरिस्तरित्तनिवनिमिमस्जिभ्यः उः'इत्युकारान्तः। 'द्वन्द्वे घि' इति पूर्वनिपातप्रसङ्गात्।** ओजस्या इति। **ओजो यस्या यस्यां वा अस्तीत्योजस्या।** मधोः। **मधुशब्दान्मत्वर्थं अः स्याच्चाद्यत्।** मधव्या इति। **ओगुंणः। 'वान्तो यि-' इति अवादेशः।** ओजसोऽहनि। **ओजःशब्दान्मत्वर्थे यत्खौ स्तोऽहन्यभिधेये। ननु यद्ग्रहणं व्यर्थं खश्चेत्येवाशिष्यति चेन्मैवम्। खश्चेत्युच्यमानेऽनन्तरसूत्रविहितस्य अमात्रस्य समुच्चयो विज्ञायेत तस्माद्यदुग्रहणम्।** वेशोयश। **वेशश्च यशश्च वेशोयशसौ, ते आदौ यस्य तस्माद्वेशोयशआदेर्भगात्प्रातिपदिकाद्यखौ स्तो मत्वर्थे। ककारः स्वरार्थः।** पूर्विणेभिरिति। **पूर्वैः कृताः पूर्विणाः, तैः। एवं पूर्व्यासः पूर्विणाः।** अद्भिः। **तृतीयान्ताद्पूशब्दात्संस्कृतमित्यर्थे यत्स्यात्।** सहस्रेण। **तृतीयान्तात्सहस्रशब्दात्संमितमित्येतस्मिन्नर्थे घः स्यात्। संमितः सदृशस्तुल्य इत्यर्थः।** सहस्रिया इति। **सहस्रेण संमिताः सहस्रियाः। 'यस्येति च' इत्यकारलोपः। 'समिता' इति पाठान्तरम्।** मतौ। **'तपः सहस्राभ्यां विनीनी' इत्यस्यापवादः।** सोममर्हति। **द्वितीयान्तात्सोमशब्दादर्हतीत्यस्मिन्नर्थे यत्स्यात्।** सोम्य इति। **सोममर्हतीति सोम्यः।** मये च। **आगतविकारावयवप्रकृता मयडर्थाः। तत्रागते पञ्चमी समर्थः।**

सौम्यं मधु। सोममयमित्यर्थः। **३४८५ मधोः** ४।४।१३९ मधुशब्दान्मयडर्थे यत्स्यात्। मधव्यः। मधुमय इत्यर्थः। **३४८६ वसोः समूहे च** ४।४।१४०॥ वान्मयडर्थे यत्। वसव्यः। **अक्षरसमूहे छन्दस उपसंख्यानम्** (वा २९८०)। छन्दःशब्दादक्षरसमूहे वर्तमानात्स्वार्थे यदित्यर्थः। आश्रावयेति चतुरक्षरम्, अस्तु श्रौषडिति चतुरक्षरं, ये यजामह इति पञ्चाक्षरं, यजेति द्व्यक्षरं, व्यक्षरो वषट्कार एष वै सप्तदशाक्षरश्छन्दस्यः। **३४८७ नक्षत्राद्धः** ४।४।१४१॥ स्वार्थे। नक्षत्रियेभ्यः स्वाहा। **३४८८ सर्वदेवात्तातिल्** ४।४।१४२॥ स्वार्थे। सविता नः सुवतु सर्वतातिम्। प्रदक्षिणिद्देवतातिमुराणः। **३४८९ शिवशमरिष्टस्य करे** ४।४।१४३॥ करोतीति करः। पचाद्यच्। शिवं करोतीति शिवतातिः। याभिः शन्तातौ भवथो ददाशुषे। अथो अरिष्टतातये। **३४९० भावे च** ४।४।१४४॥ शिवादिभ्यो भावे तातिः स्याच्छन्दसि। शिवस्य भावः शिवतातिः। शन्तातिः। अरिष्टतातिः। **इति चतुर्थोऽध्यायः।**

पञ्चमोऽध्यायः।

३४९१ सप्तनोऽञ्छन्दसि ५।१।६०॥ 'तदस्य परिमाणम्' (सू १७२३) इति वर्ग इति च। सप्त साप्तानि असृजत्। **शन्शतोर्डिनिश्छन्दसि तदस्य परिमाणमित्यर्थे वाच्यः** (वा ३१३१)। पञ्चदशिनोऽर्धमासाः। त्रिंशिनो मासाः। **विंशतेश्चेति वाच्यम्** (वा ३१३२)। विंशिनोऽङ्गिरसः। **युष्मदस्मदोः**

विभक्तिः, विकारावयवयोः षष्ठी, प्रकृतवचने प्रथमा। मधोः। यत्स्यादिति। वृत्तिकारस्तु यतमेवानुवर्तयति न तु यम्। नक्षत्रात्। स्वार्थ इति। **समूह इति** नानुवर्तते। तेनाऽनिर्दिष्टार्थत्वात्स्वार्थे प्रत्यय उत्पद्यत इत्यर्थः। सर्वदेवात्। **सर्वशब्दादेवशब्दाच्च तातिल् स्यात्।** शिवशम्। **करशब्दसामानाधिकरण्यात् 'शिवशमरिष्टस्य' इति 'उभयप्राप्तौ कर्मणि' इति षष्ठी। इति वैदिकसुबोधिन्यां चतुर्थोऽध्यायः।**

सप्तनोऽञ्। **सप्तनूशब्दादञ् स्याच्छन्दसि।** साप्तानीति। **सप्तनूशब्दादञि 'नस्तद्धिते' इति टिलोपे तद्धितान्तत्वात्प्रातिपदिकसंज्ञायां जस्। 'जश्शसोः शिः'। 'नपुंसकस्य' इति नुम्। उपधादीर्घः। शन्शतोः। 'डित्करणं शदन्तस्य टिलोपा मम्।** पञ्चदशिन इति। **पञ्चदशाहानि परिमाणमेषामिति डिनिः टिलोपः। एतेन त्रिंशिनो व्याख्याताः।** विंशिनोऽङ्गिरस इति। **विंशतिर्गोत्राणि परिमाणमेषामिति विप्रहे डिनि कृते 'तिविंशतेर्डिति' इति तिशब्दलोपे कृते यस्येति लोपः। आङ्गिरसाऽपात्यगार्ग्य-**

सादृश्ये मतुब्वाच्यः (वा ३१३८)। त्वावतः पुरुवसो । न त्वावाँ अन्यः । यज्ञं विप्रस्य मावतः । **३४९२ छन्दसि च ५।१।६७॥** प्रातिपदिकमात्रात्तदर्हतीति यत् । सादन्यं विदथ्यम् । **३४९३ वत्सरान्ताच्छश्छन्दसि ५।१।९१॥** निर्वृत्तादिष्वर्थेषु । इद्वत्सरीयः । **३४९४ संपरिपूर्वात्ख च ५।१।९२॥** चाच्छः । संवत्सरीणः । संवत्सरीयः । परिवत्सरीणः । परिवत्सरीयः । **३४९५ छन्दसि घस ५।१।१०६॥** ऋतुशब्दात्तदस्य प्राप्तमित्यर्थे । भाव ऋत्वियः । **३४९६ उपसर्गाच्छन्दसि धात्वर्थे ५।१।११८॥** धात्वर्थविशिष्टे साधने वर्तमानात्स्वार्थे वतिः स्यात् । यदुद्वतो निवतः । उद्वतान्निर्गतादित्यर्थः । **३४९७ थट् च छन्दसि ५।२।५०॥** नान्तादसंख्यादेः परस्य डटस्थट् स्यान्मट् च । पञ्चथम् । पञ्चमम् । 'छन्दसि परिपन्थिपरिपरिणौ पर्यवस्थातरि'(सू १८८९)। पर्यवस्थाता शत्रुः । अपत्यं परिपन्थिनम् । मात्वा परिपरिणौ विदन् । **३४९८ बहुलं छन्दसि ५।२।**

गौतम इत्यादिप्रवरभेदभिन्नानि विंशतिरवान्तरगोत्राणि परिमाणमेषामित्यर्थः । 'वावत इति । त्वमिव त्वावान् तस्य त्वावतः । अहमिवेति मावान् तस्य मावतः । 'प्रत्ययोत्तरपदयोश्च' इति त्वमादेशौ । 'आ सर्वनाम्नः' इत्यात्वम् । सादन्यमिति । सदनं गृहमर्हतीति सादन्यः । 'अन्येषामपि'इति दीर्घः । विदथ्यमिति । विदथो यज्ञस्तमर्हतीत्यर्थः । इद्वत्सरीय इति । इद्वत्सरेण निर्वृत्तः इद्वत्सरमधीष्टो भृतो भूतो भावी वा इद्वत्सरीयः । इद्वत्सरेदावत्सरशब्दौ पञ्चवर्षे युगे द्वयोर्वर्षयोः संज्ञे । एवं संवत्सरपरिवत्सरशब्दावपि । सम्परिपूर्वात् । सम्परिपूर्वाद्वत्सरान्तात्प्रातिपदिकाच्छन्दसि विषये निर्वृत्तादिष्वर्थेषु खः स्याच्चाच्छः । छन्दसि घस् । 'समयस्तदस्य प्राप्तम्' इत्यतस्तदस्य प्राप्तमिति 'ऋतोरण्' इत्यतः ऋतोरिति चानुवर्तते । तदाह—ऋतुशब्दादित्यादि । ऋत्विय इति । 'सिति च' इति पदत्वेन भत्वे निरस्ते 'ओर्गुणः' इति गुणाऽभावे यण् । उपसर्गात् । इह धातुशब्देन धातुवाच्या क्रिया लक्ष्यते। सोऽर्थः प्रयोजनं यस्य साधनस्य तस्मिन् वर्तमानादित्यर्थस्तदाह—धात्वर्थविशिष्ट इति । उपसर्गाश्च पुनरेवमात्मकाः यदुते श्रुतायां क्रियायां तामेव विशिषन्ति । यथा आगच्छति । यत्र तु न श्रूयते तत्र क्रियाविशिष्टसाधनमाहुः । यथा निष्कौशाम्बिः । तथा च यत्र क्रियापदं न श्रूयते तत्रैव यथा स्यादित्येवमर्थं धात्वर्थं इत्युक्तम् । थट् च । 'तस्य पूरणे' इत्यतः डडिति 'नान्तादसंख्यादेः' इति च तदाह—नान्तादित्यादि । पञ्चथमिति । पञ्चानां पूरणमित्यस्मिन्नर्थे डटि कृते तस्य थडागमः । छन्दसि । परिपन्थिन् परिपरिन् एतौ निपात्येते छन्दसि पर्यवस्थातरि वाच्ये । पर्यवस्थाता प्रति-

१२२॥ मत्वर्थे विनिः स्यात् । **छन्दोविन्प्रकरणेऽष्ट्रामेखलाद्वयोभयरुजाहृदयानां दीर्घश्चेति वक्तव्यम्** । (वा० ३२११) । इति दीर्घः। मंहिष्ठमुभयाविनम् । शुनमष्ट्राव्यचरत् । **छन्दसीवनिपौ च वक्तव्यौ** । (वा० ३२०२) । ई । रथीरभूत् । सुमङ्गलीरियं वधूः । मघवानमीमहे । **३४९९ तयोर्दार्हिलौ च छन्दसि** ५।३।२०॥ इदन्तदोर्यथासंख्यं स्तः । इदा हि व उपस्तुतिम् । तर्हि । **३५०० था हेतौ च छन्दसि** ५।३।२६॥ किमस्था स्याद्धेतौ प्रकारे च । कथा ग्रामं न पृच्छसि । कथा दाशेम । **३५०१ पश्च पश्चा च छन्दसि** ५।३।३३॥ अवरस्य अस्तात्यर्थे निपातौ । पश्च हि सः । नो ते पश्चा । 'तुश्छन्दसि (सू २०७) तृजन्तात्तृन्नन्ताच्च इष्टन्नीयसुनौ स्तः । आसुतिं करिष्टः । दोहीयसी धेनुः । **३५०२ प्रतनपूर्वविश्वेमात्थाल्छन्दसि** ५।३।१११ ॥ इवार्थे । तं प्रतनथा

पक्षः, सपत्न इत्युच्यते । निपातनं चात्र पर्यवस्थातृशब्दात्स्वार्थं इनिप्रत्ययोऽवस्थातृशब्दस्य पन्थि परि एतावादेशौ च निपात्येते । बहुलम् । 'अस्मायामेधास्रजो विनिः' इति वर्तते । तदाह—विनिः स्यादिति । अष्ट्रावीति । अशेः ष्ट्रन् । अष्ट्रा । दंष्ट्रापर्यायोऽयम् । मेखलावी द्वयावी उभयावी । रुजावी हृदयावी । अत्र द्वयोभयहृदयान्येव दीर्घत्वं प्रयोजयन्ति । अन्येषां स्वत एव दीर्घत्वात् । छन्दसि । ईश्च वनिप् च ईवनिपौ । ई इति । ईप्रत्ययोदाहरणमुच्यते । रथीरिति । रथोऽस्यास्तीति रथीः । सुमङ्गलीरिति । सुष्ठु मङ्गलमिति 'सुः पूजायाम्' इति समासः ततोऽनेन मत्वर्थीय ईकारप्रत्ययः । मघवानिति । मघं धनं, तदस्यास्तीति वनिपि, मतुपि तु मघवच्छब्दः । तयोः । तच्छब्देन 'इदमोर्हिल्' 'तदो दा च' इति संनिहितावित्यदौ परामृश्येते । तदाह—इदन्तदोरिति । सूत्रे व्यत्ययेन पञ्चम्याः स्थाने षष्ठी । यथासंख्यं स्त इति । इदंशब्दाद्दा, तच्छब्दात् हिल् । इदा । इदमशब्दाद्दा 'इदम इशु' इत्यनेनेशादेशः । था हेतौ । 'प्रकारवचने थाल्' इत्यतः प्रकारवचन इति किमश्चेति तदाह—किमस्था स्यादित्यादि । कथा ग्रामं न पृच्छसीति । केन हेतुना पृच्छसीत्यर्थः । तस्य 'प्राग्दिशो विभक्तिः' इत्यधिकारादिभक्तिसंज्ञायां 'किमः कः' इति कादेशः । प्रकारवचने उदाहरणमाह—कथा दाशेमेति । केन प्रकारेणेत्यर्थः । पञ्चपश्चा । अवरस्य पञ्चभावः अकारोऽऽकारो च प्रत्ययौ निपात्येते । अस्तात्यर्थे इति । 'दिक्शब्देभ्यः सप्तमीपञ्चमीप्रथमाभ्यो दिग्देशकालेष्वस्तातिः' । करिष्ठ इति । कर्तृशब्दादिष्ठन् । 'तुरिष्ठेमेयःसु' इति तृलोपः । दोहीयसीति । अतिशयेन दोग्ध्रीत्यर्थः । लिङ्गविशिष्टपरिभाषया दोग्ध्रीशब्दात्प्रत्ययः । 'भस्याऽढे' इति पुंवद्भावेन ङीपो निवृत्तिः। ततः 'तुरिष्ठेमेयःसु' इति तृचि निवृत्ते निमित्ताऽभावाद्वय-

पूर्वथा विश्वथेमथो । ३५०३ **अमु च छन्दसि** ५।४।१२॥ किमेत्तिङव्ययघादित्येव । प्र तं नय प्रतरम् । ३५०४ **वृकज्येष्ठाभ्यां तिल्तातिलौ च छन्दसि** ५।४।४१॥ स्वार्थे । यो नो दुरेवो वृकतिः । ज्येष्ठतातिं बर्हिषदम् । ३५०५ **अनसन्तान्नपुंसकाच्छन्दसि** ५।४।१०३॥ तत्पुरुषाट्टच् स्यात्समासान्तः । ब्रह्मसामं भवति । देवच्छन्दसानि । ३५०६ **बहुप्रजाश्छन्दसि** ५।४।१२३॥ बहुप्रजा निर्ऋतिमाविवेश । ३५०७ **छन्दसि च** ५।४।१४२॥ दन्तस्य दतृशब्दः स्याद्बहुव्रीहौ । उभयतो दतः प्रतिगृह्णाति । ३५०८ **ऋतश्छन्दसि** ५।४।१५८॥ ऋदन्ताद्बहुव्रीहेर्न कप् । हता माता यस्य हतमाता । **इति पञ्चमोऽध्यायः ।**

षष्ठोऽध्यायः ।

'एकाचो द्वे प्रथमस्य' (सू २१७५) **छन्दसि वेति वक्तव्यम्** (वा ३४१४) । यो जागार । दाति प्रियाणि । ३५०९ **तुजादीनां दीर्घोऽभ्यासस्य** ६।१।७॥ तुजादिराकृतिगणः । प्रभरा तूतुजानः । सूर्ये मामहानम् । दाधार यः पृथिवीम् । स तूताव । ३५१० **बहुलं छन्दसि** ६।१।३४॥ ह्वः सम्प्रसारणं

कुत्वयोरपि निवृत्तिः । प्रत्नपूर्वं । प्रत्न पूर्वं विश्व इम एभ्यस्थाल् स्यात् । अमुच । 'किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे' वर्तमानादमुप्रत्ययो भवति । प्रतरमिति । प्रकर्षार्थस्य प्रकर्षे तरप् । प्रकृष्टतर इति वत् , तदन्तादमुः । स्वरादिषु अम् आम् इति पठ्यते, तेन तदन्तस्याऽव्ययत्वे सुपो लुक् । अत्रेदंकरणम् 'हच एकाचोऽम्प्रत्ययवच्च' इत्यत्रास्य ग्रहणं माभूत् । यदि स्यात्तर्हि अत्रापि यदुदृष्टं कार्यं तदप्यतिदिश्येत । तत्र को दोषः । इह स्त्रियं मन्यमानः । यस्येति लोपः प्राप्नोति । अनसन्तात् । अनसन्तस्योदाहरणमाह—ब्रह्मसामिति । असन्तस्याह—देवच्छन्दसानीति । बहुप्रजाः । 'बहुप्रजा' इति निपात्यते छन्दसि । बहुप्रजा इति । बह्व्यः प्रजा यस्येति बहुव्रीहिः, असिच् प्रत्ययः । 'यस्येति च' इत्यकारलोपः । 'अत्वसन्तस्य' इति दीर्घः । ऋत्वविसर्गौ । छन्दसि च । 'वयसि दन्तस्य दतृ' इत्यतो 'दन्तस्य दतृ' इत्यनुवर्तते । तदाह—दन्तस्य दतृ स्यादिति । उभयतोदत इति । उभयतो दन्ता यस्येति विग्रहः । हतमाता इति । 'जनृतश्च' इति नित्यं कप् प्राप्तः । इति सुबोधिन्यां पञ्चमोऽध्यायः ।

जागारेति । जागृ निद्राक्षये । किटि प्रथमपुरुषैकवचनम् । दातीति । 'डुदाञ् दाने' ट् ल्ला आपः श्लुः । 'श्लौ' इति नित्यं द्वित्वे प्राप्ते विकल्पः । तूतुजान इति । तुजेर्लिट् ।

स्यात्। इन्द्रमाहुव ऊतये। **ऋचि त्रेरुत्तरपदादिलोपश्च छन्दसि** (वा २४७२)। ऋचूशब्दे परे त्रेः सम्प्रसारणमुत्तरपदादेर्लोपश्चेति वक्तव्यम्। तृचं सूक्तम्। छन्दसि किम्। त्र्यृचानि। **रयेर्मतौ बहुलम्** (वा ३४७३) रेवान्। रयिमान्पुष्टिवर्धनः। **३५११ चायः की ६।१।३५॥** न्यून्यं चिक्युर्न निचिक्युरन्यम्। लिटि उसि रूपम्। बहुलग्रहणानुवृत्तेर्नेह। अग्निं ज्योतिर्निचाय्य। **३५१२ अपस्पृधेथामानृचुरानृहुश्चिच्युषेतित्याजश्रातास्रितमाशीराशीर्ताः ६।१।३६॥** एते छन्दसि निपात्यन्ते। इन्द्रश्च विष्णो यदपस्पृधेथाम्। स्पर्धेर्लङि आथाम्। अर्कमानृचुः। वसून्यानृहुः। अर्चेरर्हेश्च लिट्युसि। चिच्युषे। च्युङो लिटि थासि। यस्तित्याज। त्यजेर्णलि। श्रातास्त इन्द्र सोमाः। श्रिता नो ग्रहाः। श्रीञ् पाके निष्ठायाम्। आशिरं दुहे। मध्यत आशीर्तः। श्रीञ् एव क्विपि

तस्य कानजादेशः। मामहानमिति। **मह पूजायां** कानच्। तृतावेति। **तुः सौत्रो धातुः। तस्माच्छिट्। बहुलम् छन्दसि।** 'ह्वः सम्प्रसारणम्' इति वर्तते, तदाह-ह्वः सम्प्रसारणं स्यादिति। आहुवे इति। **आङ्पूर्वात् ह्वेञो लडात्मनेपदोत्तमैकवचनम्। 'बहुलं छन्दसि' इति** शपो लुकि कृते सम्प्रसारणमुवङादेशश्च। तृचं सूक्तमिति। **तिस्रः ऋचो यस्मिंस्तत्। तृचम्। 'ऋक्पूरब्धूःपथामानक्षे' इति समासान्तः अः। रयेर्मतौ। रयिशब्दस्य मतौ** परतः सम्प्रसारणं स्याच्छन्दसि। रेवानिति। **'छन्दसीरः' इति वत्वम्।** रयिमानिति। **बहुलग्रहणात्सम्प्रसारणवत्वयोरभावः।** चायः की। **चायतेर्बहुलं कीत्ययमादेशः स्याच्छन्दसि।** चिक्युरिति। **'कुहोश्चुः' इति चुः।** निचाय्येति। **'चायृ पूजानिशामनयोः' अस्मात्क्त्वा।** गतिसमासे **'समासेऽनञ्पूर्वे क्त्वो ल्यप्' इति ल्यबादेशः।** स्पर्धेर्लङ्याथामिति। द्विर्वचनं रेफस्य सम्प्रसारणमकारलोपश्च **निपातनात्।** अस्पर्धेथामिति भाषायाम्। अपरे तु अपपूर्वस्य स्पर्धेर्लङ्याथामि सम्प्रसारणमलोपश्च **निपातनात्। 'बहुलं छन्दस्यमाङ्योगेऽपि' इत्यडागमाऽभावः।** तथा मते प्रत्युदाहरणमपास्पधथामिति भाषायाम्। अर्चेरर्हेश्चेति। **सम्प्रसारणमलोपश्च निपातनात्।** ततो द्विर्वचनमुरदत्वम् **'अत आदेः' इति दीर्घत्वम्। 'तस्मान्नुड् द्विहलः' इति नुडागमः। आनर्चुरानर्हुरिति भाषायाम्।** च्युङो लिटीति। **अभ्यासस्य सम्प्रसारणमनिट्त्वं च निपातनात्। चुच्युविषे इति भाषायाम्।** त्यजेर्णलीति। **त्यज वयोहानौ। अभ्यासस्य सम्प्रसारणं निपात्यते। तत्याजेति भाषायाम्।** भ्राता इति। **श्रीञ् पाके इत्यस्य निष्ठायां आभावः।** श्रिता इति। **तस्यैव श्रीणातेर्हस्वत्वं च।** आशिरमिति। **आङ्पूर्वः**

निष्ठायां च । ३५१३ **खिदेश्छन्दसि** ६।१।५२॥ खिद दैन्ये । अस्यैच आद्वा स्यात् । चिखाद । चिखेदेत्यर्थः । ३५१४ **शीर्षश्छन्दसि** ६।१।६०॥ शिरःशब्दस्य शीर्षन् स्यात् । शीर्ष्णः शीर्ष्णो जगतः । ३५१५ **वा छन्दसि** ६।१।१०६॥ दीर्घाज्जसि इचि च पूर्वसवर्णदीर्घो वा स्यात् । वाराही । वाराह्यौ । मानुषीरीळते विशः । उत्तरसूत्रद्वयेऽपीदं वाक्यभेदेन सम्बध्यते । तेनामि पूर्वत्वं वा स्यात् । शमीं च शम्यं च । सुष्यै सुषिरामिव । 'सम्प्रसारणाच्च' (सू ३३०) इति पूर्वरूपमपि वा । इज्यमानः । यज्यमानः । ३५१६ **शेश्छन्दसि बहुलम्** ६।१।७०॥ लोपः स्यात् । या ते गात्राणाम् । ता ता पिण्डानाम् । **एमन्नादिषु छन्दसि पररूपम्** (वा ३६६५) । अपां त्वेमन् । अपां त्वोद्यम् । ३५१७ **भव्यप्रवय्ये च छन्दसि** ६।१।८३॥ बिभेत्यस्मादिति भव्यः । वेतेः-प्रवय्या इति स्त्रियामेव निपातनम् । प्रवेयमित्यन्यत्र । छन्दसि किम् । भेयम् । प्रवेयम् । **हृदय्या उपसंख्यानम्** (वा ३४४५) । हृदे भवा हृदय्या आपः । भवे छन्द-

---

स्य श्रीणातेः क्विप् धातोः शिर् आदेशः । तस्माद्द्वितीयैकवचनम् । आशीर्त इति । श्रीञः आङ्पूर्वस्य शिर् इत्यादेशः । निष्ठायाश्च नत्वाऽभावो निपातनात् । 'हलि च' इति दीर्घः । खिदेश्छन्दसि । 'आदेच उपदेशे-' इत्यतः आदिति एच् इति च वर्तते, 'विभाषा लीयतेः' इत्यतो विभाषेति च । तदाह-आद्वा स्यादिति । चिखादेति । व्यत्ययेन परस्मैपदम् । शीर्ष्ण इति । 'अल्लोपोऽनः' इत्यल्लोपः 'रपाभ्याम्' इति णत्वम् । 'पूर्वसमादपि विधौ स्थानिवद्भावः' इति पक्षे तु 'अट्कुप्वाङ्-' इत्यनेन । वा छन्दसि । 'नादिचि' 'दीर्घाज्जसि च' इति वर्तते । तदाह-दीर्घादित्यादि । वाराही इति । वराहस्य विकार इति । 'अवयवे च प्राण्योषधिवृक्षेभ्यः' इति 'प्राणिरजतादिभ्योऽञ्' ङीप् । द्विवचने पूर्वसवर्णदीर्घः । पूर्वसवर्णाऽभावे यणादेशः । मानुषीरिति । प्रथमाबहुवचनम् । 'मनोर्जातावञ्यतौ षुक् च' इति अञ् । मनोः षुगागमः । सूत्रद्वये इति । 'अमि पूर्वः' सम्प्रसारणाच्च' इत्यत्र । वाक्यभेदेनेति अकः अमि पूर्वरूपं वा स्याच्छन्दसि, तथा 'सम्प्रसारणाच्च' इति पूर्वरूपं वा स्याच्छन्दसि। तदाह-तेनेति । शम्यं चेति । विकल्पविधानसामर्थ्यात्पूर्वरूपत्वाऽभावे पूर्वसवर्णदीर्घोऽपि न भवति । तयोरत्र विशेषाऽभावादिति यणादेश एव भवति । यज्यमान इति । यजेर्लटः शानच् । 'सार्वधातुके—' इति यक् 'आने मुक्' इति मुक् । 'ग्रहिज्या-' इति सम्प्रसारणं पूर्ववैकल्पिकत्वाद्भावे यण् । याते इति । यानीत्यर्थः । षष्ठ्यादेशस्य शेर्लोपे कृते प्रत्ययलक्षणेन 'त्यदादीनाम्' इति अत्वे 'नपुंसकस्य झलचः' इति नुम् । 'सर्वनामस्थाने च' इति दीर्घः । नकोपः । ता ता इति । तानि तानीत्यर्थः पूर्ववत् । भव्यप्रवय्ये । बिभेतेः

सि यत् । ३५१८ **प्रकृत्यान्तःपादमव्यपरे** ६।१।१५॥ ऋक्पादमध्यस्थ एङ् प्रकृत्या स्यादति परे न तु वकारयकारपरेऽति । उपप्रयन्तो अध्वरम् । सुजाते अश्वसूनृते । अन्तःपादं किम् । एतास एतेऽर्चन्ति । अव्यपरे किम् । तेऽवदन् । ३५१९ **अव्यादवद्यादवक्रमुरव्रतायमवन्त्ववस्युषु च** ६।१।११६॥ एषु व्यपरेऽप्यति एङ् प्रकृत्या । वसुभिर्नो अव्यात् । मित्रमहो अवद्यात् । मा शिवासो अवक्रमुः । ते नो अव्रत । शतधारो अयं मणिः । ते नो अवन्तु । कुशिकासो अवस्यवः । यद्यपि बहुवृचैस्तेनोऽवन्तु रथतूः, सोऽयमागात्, तेऽरुणेभिरित्यादौ प्रकृतिभावो न क्रियते तथापि बाहुलकात्समाधेयम् । प्रातिशाख्ये तु वाचनिक एवायमर्थः । ३५२० **यजुष्युरः** ६।१।११७॥ उरःशब्द एङन्तोऽति प्रकृत्या यजुषि । उरो अन्तरिक्षम् । यजुषि पादाऽभावादनन्तःपादार्थं वचनम् । ३५२१

प्रपूर्वस्य 'वी' इत्येतस्य च यति प्रत्यये परतश्छन्दसि विषयेऽयादेशो निपात्यते । भव्य इति । 'कृत्यल्युटः–' इति अपादाने यत् । हृद्य्या इति । अकारस्याऽयादेशः । प्रकृत्या । पादस्य मध्ये इत्यन्तःपादमित्यव्ययीभावः । अन्तरित्यव्ययमधिकरणशक्तिप्रधानं मध्यमाचष्टे । पादश्चेह ऋक्पाद एव गृह्यते, न श्लोकस्य । 'वा छन्दसि' इत्यतो मण्डूकप्लुत्या छन्दसीति वर्तते । तेनाऽस्य वैदिकत्वं सम्पद्यत इत्याशयेनाह—ऋक्पादमध्यस्थ इति । 'एङः पदान्तात्–' इति सूत्रादेङः इति पञ्चम्यन्तमनुवृत्तं प्रथमया विपरिणम्यतेऽन्यस्य कार्यिणोऽसम्भवादित्यभिप्रेत्याह—एङ् प्रकृत्येति । सन्धिरूपं विकारं न यातीत्यर्थः । उपप्रयन्तो अध्वरमिति । 'एङः पदान्तादति' इति प्राप्तम् । अन्तःपादं किमिति । ऋचीत्येव किं नोक्तमित्यर्थः । एतेऽर्चन्तीति । 'कया मती कुत एतास एतेऽर्चन्ति शुष्मं वृषणो वसूया' इति । अत्र 'एते' इति षादस्यान्ते एङस्ति, अकश्च परस्य पादस्यादाविति तन्निमित्तनिमित्तयोः पादमध्यस्थत्वमिति सत्यपि ऋक्त्वे प्रकृतिभावः । अव्यात् । एषामनुकरणत्वात्सुबन्तेन समासः । अव रक्षणे । आशीर्लिङ् । अवद्यादिति पञ्चम्येकवचनान्तम् । अवक्रमुरिवेत्यवपूर्वस्य क्रमेर्लिट्युसि द्विर्वचनप्रकरणे 'छन्दसि वा वचनम्' इति द्विर्वचनाऽभावे रूपम् । केचित्तु 'अवचक्रमु'रिति सूत्रे कृतद्विर्वचनं ये पठन्ति तेषामुदाहरणं मृग्यम् । बहवृचास्तावदवक्रमुरित्यधीयते । अव्रतेति । वृङ्वृञोः मन्त्रे घस—' इति श्लेर्लुक् । 'आत्मनेपदेषु' इति झस्यादादेशः । अयमिति । इदमः सौ 'इदोऽय् सि' । अवतेर्लोट्—अवन्तु । अवस्यव इति । अवेरसुन् औणादिकः । ततः क्यच् 'क्याच्छन्दसि' इत्युः । यजुष्युरः । उरो अन्तरिक्षमिति । नन्वत्र 'प्रकृत्यान्तः पादम्' इत्यनेनैव सिद्धे व्यर्थोऽयं योग इत्या-

आपो जुषाणो वृष्णो वर्षिष्ठेऽम्बेऽम्बालेऽम्बिके पूर्वे ६।१।११८॥ यजुषि अति प्रकृत्या । आपो अस्मान्मातरः । जुषाणो अग्निराज्यस्य । वृष्णो अंशुभ्याम् । वर्षिष्ठे अधि नाके । अम्बे अम्बाले अम्बिके । अस्मादेव वचनात् 'अम्बार्थ' (सू २६७) इति ह्रस्वो न । **३५२२ अङ्ग इत्यादौ च ६।१।११९॥** अङ्गशब्दे य एङ् तदादौ च अकारे य एङ् पूर्वः सोऽति प्रकृत्या यजुषि । 'प्राणो अङ्गे अङ्गे अदीव्यत्' । **३५२३ अनुदात्ते च कुधपरे ६।१।१२०॥** कवर्गधकारपरे अनुदात्तेऽति परे एङ् प्रकृत्या यजुषि । अयं सो अग्निः । अयं सो अध्वरः । अनुदात्ते किम् । अथोऽग्रे रुद्रे । अग्रशब्द आद्युदात्तः । कुधपरे किम् । सोऽयमग्निमतः । **३५२४ अवपथासि च ६।१।१२१॥** अनुदात्ते अकारादौ अवपथाःशब्दे यजुषि एङ् प्रकृत्या । श्री रुद्रेभ्यो अवपथाः । वपेस्थासि लङि 'तिङ्ङतिङः' (सू ३९३५) इत्यनुदात्तत्वम् । अनुदात्ते किम् । यद्रुद्रेभ्योऽवपथाः । 'निपातैर्यद्यदि' (सू ३६३७)

शङ्क्याह—यजुषि पादाऽभावादित्यादि । आपो जुषाणो । 'आपो' इत्यादीनि पृथक्पदान्यनुकरणानि । विभक्तिस्तु अनुकार्यानुकरणयोर्भेदस्याऽविवक्षितत्वान्न भवति 'सुपां सुलुक्' इति विभक्तेर्लुग्वा । 'अम्बिके पूर्वे' इत्येतदप्यनुकरणमेव । तत्र प्रथमं जसन्तमनुकरणम् । द्वितीयं स्वन्तम् । तृतीयं शसन्तम् । चतुर्थं ङ्यन्तमितरे सम्बुध्यन्ते । 'आपो जुषाणो वृष्णो वर्षिष्ठे' इत्येते शब्दाः, अम्बिकेशब्दात्पूर्वौ यौ अम्बेअम्बालेशब्दौ तौ च, अति परतः प्रकृत्या स्युः । अङ्ग इत्यादौ च । अङ्गशब्दे य एङिति । 'प्रकृत्या भवती'ति वक्ष्यमाणेन सम्बन्धः । तदादौ अकारे य एङ्पूर्व इति । अत्रापि पूर्ववत्सम्बन्धः । अतिक्रान्तपरामर्शिना तच्छब्देन इतिशब्दार्थमाचष्टे । तस्याऽङ्गशब्दस्य आदिस्तदादिस्तदूपो यः अकारस्तस्मिन्परे पूर्वो य एङ् स इत्यर्थः । नन्वत्र चकारः किमर्थ इति चेच्छृणु—असति चकारेऽङ्गशब्दस्यैवैङ् तदादावति परतः प्रकृत्या भवतीत्यर्थः स्यात्तदाऽङ्गे अङ्गे इत्यत्रैव स्यात् । अङ्गे अदीव्यदित्यत्र न स्यात् । सति तु तस्मिन्नङ्गशब्दस्य य एङ् यत्र कुत्र चिदति प्रकृत्या भवति, तदादौ चाऽति परतो यः कश्चिदेस प्रकृत्या भवतीत्ययमर्थो भवति । तेन अङ्गे अङ्गे अदीव्यत् । प्राणो अङ्गे इत्युभयत्रापि भवति । अनुदात्ते च कुधपरे । कुधौ परौ यस्मात्स तथोक्तः । कवर्गधकारेति । धकारे अकार उच्चारणार्थः । अग्निरिति । अग्निशब्दो 'अङ्गेर्निनैलोपश्च' इति निप्रत्ययान्तोऽन्तोदात्तः । अध्वरशब्दः प्रातिपदिकस्वरेणान्तोदात्तः । आद्युदात्त इति । 'ऋज्रेन्द्र' इत्यादिना सूत्रेण निपातितः । आङो । आङिति ङिद्विशिष्ट आकारो गृह्यते । यः

ससूवेति निगमे ७।४।७४॥ सूतेर्लिटि परस्मैपदं वुगागमोऽभ्यासस्य चात्वं निपात्यते। गृष्टिः संसूव स्थविरम्। सुषुवे इति भाषायाम्। **३५९८ बहुलं छन्दसि ७।४।७८॥** अभ्यासस्य इकारः स्याच्छन्दसि। पूर्णा विवष्टि। वशेरेतद्रूपम्।

इति सप्तमोऽध्यायः।

अष्टमोऽध्यायः।

३५९९ प्रसमुपोदः पादपूरणे ८।१।६॥ एषां द्वे स्तः पादपूरणे। प्रप्रायमग्निः। संसमिद्युवसे। उपोप मे परामृश। किं नोदुदु हर्षसे। **३६०० छन्दसीरः ८।२।१५॥** इवर्णान्ताद्रेफान्ताच्च परस्य मतोर्मस्य वः स्यात्। हरिवते हर्यश्वाय। गीर्वान्। **३६०१ अनो नुट् ८।२।१६॥** अन्नन्तान्मतोर्नुट् स्यात्। अक्षण्वन्तः कर्णवन्तः। अस्थन्वतं यदनस्था। **३६०२ नाद्धस्य ८।२।१७॥** नान्तात्परस्य धस्य नुट्। सुपथिन्तरः। भूरिदावन्त्सुभ्वाख्यः। (वा

क्षतरि रूपम्। 'नाभ्यस्ताच्छतुः' इति नुम् प्रतिषेधः। द्युतेर्यङ्लुगन्तस्य क्षतरि अभ्यासस्य सम्प्रसारणाऽभावोऽत्वं च निपात्यते। तदाह—द्युतेरिति। सम्प्रसारणाऽभाव इति। 'व्यतिस्वाप्योः सम्प्रसारणम्' इति प्राप्तस्य। ससूवेति निगमे। दाधर्त्यादिष्वेतत्पठितव्यम्। विवष्टीति। वश कान्तौ। लटि तिपि शपः श्लौ द्वित्वम्। अभ्यासस्येत्वं 'व्रश्च' इति षत्वम् ष्टुत्वम्। इति सुबोधिन्यां सप्तमोऽध्यायः।

प्रसमुपोदः पादपूरणे। समाहारद्वन्द्वः। समासान्तविधेरनित्यात् 'द्वन्द्वाच्चुदषहान्तात्' इति न टच्। प्रप्रायमग्निरिति। नात्र द्विर्वचनस्य किंचिदर्थोऽयं केवलं पादपूरणमेव कार्यम्। नचैवंविधस्य भाषायां प्रयोगोऽस्तीति सामर्थ्याच्छन्दस्येवेदं विधानमित्याहुः। छन्दसीरः। हरिवते इति। हरयो विद्यन्ते यस्येति हरिवान् तस्मै। हरिशब्दान्मतुप् मकारस्य वकारः। गीर्वानिति। 'वोरुपधाया दीर्घ इकः' इति दीर्घः। अक्षण्वन्त इति। अक्षिशब्दान्मतुप् 'अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः' छन्दस्यपि दृश्यते इत्यनङ्। नुटोऽसिद्धत्वात्पूर्वं नलोपे भूतपूर्वगत्या नुट् णत्वम्। ननु यदि परादिर्नुट् क्रियते, तस्य मतुबग्रहणेन ग्रहणात् 'मादुपधाया' इति वत्वं मतुपस्तु न स्यात्, नुटा व्यवधानात्। यदि पूर्वान्तो नुट् क्रियते तर्हि णत्वं न स्यात्। 'पदान्तस्य' इति निषेधादिति चेत्सत्यम्। नुटोऽसिद्धत्वान्नोक्तदोषः। नन्वेमवग्रहे दोषः स्यात्। 'अच'णिति णान्तं ह्यवगृह्णन्ति 'अचे'त्यकारान्तमवग्रहीतुमुचितमिति चेत्सत्यम्, 'न लक्षणेन पदकारा अनुवर्त्याः, पदकारैर्नामलक्षणमनुवर्तनीयं तस्माद्यथालक्षणं पदं कर्तव्य'मिति महाभाष्ये स्थितम्। किंच ईयिवांसमित्यादौ पदत्वं विनापि अवग्रहः क्रि-

४७९६)। भूरिदावत्तरो जनः। * ईद्रथिनः (वा० ७४९५)। रथीतरः। रथीतमं रथीनाम्। ३६०३ नसत्तनिषत्तानुत्तप्रतूर्तसूर्तगूर्तानि छन्दसि ८।२।६१॥ सदेर्नञ्पूर्वान्निपूर्वाच्च निष्ठायां नत्वाऽभावो निपात्यते। नसत्तमञ्जसा। निषत्तमस्य चरतः। असन्नं निषण्णमिति प्राप्ते। उन्देर्नञ्पूर्वस्याऽनुत्तम्। प्रतूर्तमिति त्वरतेः तुर्वीत्यस्य वा। सूर्तमिति सृ इत्यस्य। गूर्तमिति गूरी इत्यस्य। ३६०४ अम्न-रूधरवरित्युभयथा छन्दसि ८।२।७०॥ रुर्वा, रेफो वा। अम्न एव। अम्न-रेव। ऊधएव। ऊधरेव। अवएव। अवरेव। ३६०५ भुवश्च महाव्याहृतेः ८।२।७१॥ भुवइति। भुवरिति। ३६०६ ओमभ्यादाने ८।२।८७॥ ओंशब्दस्य प्लुतः स्यादारम्भे। ओ३म् अग्निमीळे पुरोहितम्। अभ्यादाने किम्।

यते। पूर्वमिरग्निनेत्यादौ सत्यपि पदत्वे न क्रियते इति। घत्वेति। तरसमपोरित्यर्थः। 'तरसमपो घः' इति तरसमपोर्घसंज्ञाविधानात्। सुपथिन्तर इति। सुपथिनशब्दात् 'द्विवचनविभज्योपपदे' इति तरप् नलोपः। तरपो नुट् तस्याद्युदात्तः परसवर्णः। भूरिदाघ्न इति। भूरिदाघ्नः परस्य घस्य तुट् वाच्य इत्यर्थः। भूरिदावत्तर इति। 'आतो मनिन्' इत्यादिना दाधातोर्वनिप् तदन्तात्तरप् 'नलोपः प्रातिपदिकान्तस्य' इति नलोपः तुडागमः। ईद्रथिन इति। रथिन ईकारोऽन्तादेशो घे परे रथीतर इति। रथशब्दात् 'अत इनिठनौ' इति मत्वर्थीय इनिः। तदन्तात्तरप् नकारस्य लोपे कृते इकारस्य ईकारादेशः। यदि तु नकारलोपापवादो नकारस्थाने ईकारो विधीयते तदा तस्याऽसिद्धत्वादेकादेशो न स्यात्। रथीतममिति। इह पदकारा ह्रस्वान्तमवगृह्णन्ति। 'अन्येषामपि' इति संहितायां दीर्घ इति तदाशयः। नसत्त। एतानि छन्दसि विषये निपात्यन्ते। नत्वाऽभाव इति। 'रदाभ्याम्' इति प्राप्तस्य। निषत्तमिति। 'सदिरप्रतेः' इति षत्वम्। अनुत्तमिति। 'अनुन्न'मिति भाषायाम्। एतन्निपातनारम्भसामर्थ्यान्नाषायां 'नुदविदो-न्दत्रा' इति विकल्पो नेत्याहुः। प्रतूर्तमिति। यदा त्वरतेस्तदा 'उवरत्वर' इत्यादिना ऊठ्। यदा तुर्वी हिंसायामित्यस्य तदा 'राल्लोपः'। सृ इत्यस्येति। निपातनादुत्वम्। रपरत्वं तु 'उरण् रपरः' इत्येव सिद्धम्। कार्यकालपक्षाश्रयणेन परिभाषाणामसिद्धत्वप्रकरणेऽपि प्रवृत्तेः। गूर्तमिति। गूर्णमिति भाषायाम्। अम्न। ऊधयेति व्याचष्टे। रुर्वा रेफो वेति। ससजुषो रुः' इति नित्यं रुत्वे प्राप्ते पक्षे रेफादेशार्थमिदम्। अम्नस् शब्द ईषदर्थे। अम्नरस्तमितमिति यथा। अवो रक्षणम्। अम्न एवेति। यदा रुत्वं तदा 'भोभगो' इति रोर्यत्वं 'लोपः शाकल्यस्य' इति लोपः। भुवश्च। महाव्याहृतेर्भुवस् इत्येतस्य छन्दसि विषये रुर्वा रेफो वा। तिस्रो महाव्याहृतयः पृथिव्यन्तरिक्षस्वर्गाणां वाचिकाः। इह तु मध्यमाया ग्रहणम्। महाव्याहृतेरिति किम्।

ओमित्येकाक्षरम् । ३६०७ **ये यज्ञकर्मणि** ८।२।८८॥ येऽयजामहे । यज्ञेति किम् । ये यजामहे । ३६०८ **प्रणवष्टेः** ८।२।८९॥ यज्ञकर्मणि टेरोमित्यादेशः स्यात् । अपां रेतांसि जिन्वतोऽम् । टेः किम् । हलन्ते अन्त्यस्य माभूत् । ३६०९ **याज्यान्तः** ८।२।९०॥ ये याज्या मन्त्रास्तेषामन्त्यस्य टेः प्लुतो यज्ञकर्मणि । जिह्वामग्ने चकृषे हव्यवाहाऽम् । अन्तः किम् । याज्यानामृचां वाक्यसमुदायरूपाणां प्रतिवाक्यं टेः स्यात् । सर्वान्तस्य चेष्यते । ३६१० **ब्रूहिप्रेष्यश्रौषड्वौषडावहानामादेः** ८।२।९१॥ एषामादेः प्लुतो यज्ञकर्मणि । अग्नयेऽनुब्रूऽहि । अग्नये गोमयानि प्रेऽष्य । अस्तु श्रौऽषट् । सोमस्याग्ने वीही वौऽषट् । अग्निमाऽवह । ३६११ **अग्नीत्प्रेषणे परस्य च** ८।२।९२॥ अग्नीधः प्रेषणे आदेः प्लुतस्तस्मात्परस्य च । ओऽश्राऽवय । ३६१२ **विभाषा पृष्टप्रति-**

भुवो विश्वभुवनेषु । तिङन्तमेतद्भवतेः 'छन्दसि लुङ्लङ्लिटः' इति वर्तमाने लङ् । सिप्, शपि गुणाऽभावश्छान्दसः । 'बहुलं छन्दस्यमाङ्योगेऽपि' इत्यडभावः । लाक्षणिकत्वादेवास्याऽग्रहणे सिद्धे महाव्याहृतिग्रहणमस्याः परिभाषाया अनित्यत्वज्ञापनार्थं, तेन क्रापयतीत्यादौ युक् सिध्यति । भुव इति । 'भुव' इत्येतदव्ययमन्तरिक्षवाचि महाव्याहृतिः । ओम् । अश्यादानमारम्भः । तदाह—आरम्भे इति । अत्र प्लुतश्चाऽस्याऽचूपरिभाषोपस्थानादेव एव प्लुतः । मकारस्त्वर्धमात्रः इति 'समुदायोऽयमर्धतृतीयमात्रः सम्पद्यते । ये यज्ञ । 'ये' इत्येतस्य यज्ञकर्मणि प्लुतो भवति । प्रणवः । यज्ञकर्मण्णीति वर्तते । यज्ञकर्मणि टेः प्रणवादेशः स्यात् । तदाह—यज्ञकर्मण्णीत्यादि । जिन्वतोमिति । जिविः प्रीणनार्थः । लट् तिप् टेः प्रणवादेशः । टेः किमिति । 'वाक्यस्य टेः' इत्यतः टेरित्यनुवर्तमाने पुनष्टेर्ग्रहणं किमर्थमिति प्रश्नः । असति हि टिग्रहणे 'अलोऽन्त्यस्य' इति वचनाष्टेः योऽन्त्योऽल् तस्यौकारः स्यात् । तस्मात्सर्वादेशार्थं टिग्रहणमित्याह—हलन्तेऽन्त्यस्य माभूदिति । अजन्ते विशेषाभावाद्धलन्ते इत्युक्तम् । याज्यान्तः । ये याज्या मन्त्रा इति । याज्याकाण्डे पठ्यन्ते ये मन्त्राः—'याज्यानुवाक्याकाण्ड'मिति समाख्यायते प्रकरणे ये मन्त्रा इत्यर्थः । तेषामिति । मन्त्राणामित्यर्थः । तासामिति पाठे तासां याज्यानाम् । इहेदमन्तग्रहणं टेरित्यस्य निवर्तकं वा स्याद्विशेषणं वा । आद्येऽचान्ते विशेषिते अजन्ताया एव याज्यायाः प्लुतः स्यात् । पक्षान्तरे त्वन्तग्रहणमनर्थकं, टेरन्तत्वाऽव्यभिचारादित्यभिप्रायेणाह—अन्तः किमिति । इतरोऽपि विदितामिप्राय आह—याज्यानामृचामिति । याज्या नाम ऋचः काश्चिद्वाक्यसमुदायरूपाः, तत्र यावन्ति वाक्यानि तेषां सर्वेषां टेः प्लुतः प्राप्नोति, स चान्तस्यैवेष्यते तदर्थमन्तग्रहणमिति भावः । अग्नीत्प्रेषणे परस्य च । अग्नीधः प्रेषणमग्नीत्प्रेषणं तदाह—अग्नीधः प्रेषण इति । विभाषा पृष्टप्रतिवचने । विभाषा हेः प्लुतो

५१८ हुवः श्लुवच्च	५८७ हृभृधृसृस्तृभ्य	९६ हृषेरुच्	३६९ ह्रियःकुप्रश्नलोवा
५५८ हृपिषिरुहिसृति	३७३ हरयाभ्यामितन्	९७ हसुरुहियुषिभ्य	३२८ ह्रियो रश्च लो वा

फिटसूत्रसूची।

सूत्राङ्काः	सूत्राङ्काः	सूत्राङ्काः	सूत्राङ्काः
३९ अक्षरयादेवन	३८ ग्रामादीनां च	८० निपाता आद्युदा	४२ लघावन्ते द्व
१४ अङ्गुष्ठोदकबक	२१ घृतादीनां च	७४ न्यङ्स्वरौ स्वरि	३९ लुबन्तस्योपमे
५० अथ द्वितीयं	८४ चादयोऽनुदात्ताः	७५ न्यर्बुदव्यल्क	३३ वर्णानां तणति
२४ अथादिः प्राक्श	१० छन्दसि च	२८ ब्रः संख्यायाः	८३ वाचादीनामु
१६ अर्जुनस्य तृणा	९८ छन्दसि च	२ पाटलापालङ्का	१२ वा नामधेयस्य
३६ अर्धस्यासम	४७ जनपदशब्दा	५९ पान्तानां गुर्वादी	६१ शकटिशकटयो
१७ आर्यस्य स्वा	२२ ज्येष्ठकनिष्ठयो	७१ पारावतस्योपो	४४ शकुनीनां च
१८ आशाया अदि	७६ तिल्यशिक्यका	३७ पीतद्रव्यर्थानाम्	५४ शादीनां शाका
४९ इगन्तानां च	२७ तृणधान्यानां	१५ पृष्ठस्य च	६४ शिशुमारोदुम्ब
६६ ईषान्तस्य हया	९१ त्र्यचां प्राङ्मक	८६ प्रकारादिद्विरुक्तौ	१३ शुक्लगौरयोरा
३२ उनर्वञ्नन्तानाम्	७८ त्वस्वसमसिमे	३० प्राणिनां कुपूर्वम्	८७ शेषं सर्वमनुदा
८१ उपसर्गाश्चा	६३ थान्तस्यच	१ फिषोऽन्त उदात्तः	६५ सांकाश्यकाम्पि
६७ उशीरदाशेर	८ दक्षिणस्य साधौ	७ बंहिष्ठवस्सर	७६ सिमस्यार्थवंणे
८२ एवादीनामन्तः	४६ धान्यानां च	२३ बिल्वतिष्ययोः	६० सुगन्धितेजनस्य
७३ कपिकेशहरि	७२ धूम्रजानु	७७ बिल्वभक्ष्यवीर्या	४३ स्त्रीविषयवर्णा
५९ कर्दमादीनां च	५ ध्यपूर्वस्य स्त्रीवि	५७ मकरवरूढ	२१ स्वाङ्गशिटाम
११ कृष्णस्यामृगा	२० न कुपूर्वस्य	६८ महिष्याषाढयोः	९ स्वाङ्गाख्यायामा
६१ खय्युवर्णं कृत्रि	१९ नक्षत्राणामञ्विष	५३ मादीनां च	५२ स्वाङ्गानामकु
६ खान्तस्याश्मादेः	६१ नपः फलान्तानां	८५ यथेति पादान्ते	४८ हयादीनामसंयु
४ गुदस्य च	२६ नञ्विषयस्यानि	६२ यान्तस्यान्त्या	२५ ह्रस्वान्तस्य स्त्री
३ गेहार्थानामस्त्रि	४५ नर्तुप्राण्याख्या	५६ युतान्यण्यन्ता	३४ ह्रस्वान्तस्य ह
७० गोष्ठजस्य ब्राह्म	४० न वृक्षपर्वत	४१ राजविशेषस्यं	

२।६६॥ वाक्यस्य टेः प्लुतोऽभ्युपगमे, प्रतिज्ञाने, श्रवणाभिमुख्ये च । गां मे देहि भोः । हन्त ते ददामि ३ । नित्यः शब्दो भवितुमर्हति ३ । दत्त किमात्थ ३ । ३६१६ **अनुदात्तं प्रश्नान्ताभिपूजितयोः** ८।२।१००॥ अनुदात्तः प्लुतः स्यात् । दूरादूधूतादिषु सिद्धस्य प्लुतस्याऽनुदात्तत्वमात्रमनेन विधीयते । अग्निभूत ३ इ । पटा ३ उ । अग्निभूते पटो एतयोः प्रश्नान्ते टेरनुदात्तः प्लुतः । शोभनः खल्वसि माणवक ३ । ३६२० **चिदिति चोपमार्थे प्रयुज्यमाने** ८।२।१०१॥ वाक्यस्य टेरनुदात्तः प्लुतः । अग्निचिद्भाया ३ त् । अग्निरिव भायात् । उपमार्थे किम् । कथञ्चिदाहुः । प्रयुज्यमाने किम् । अग्निर्माणवको भायात् । ३६२१ **उपरिस्विदासीदिति च** ८।२।१०२॥ टेः प्लुतोऽनुदात्तः स्यात् । उपरिस्विदासी ३ त् । अधः स्विदासी ३ दित्यत्र तु 'विचार्यमाणानाम्' (सू ३६१६) इत्युदात्तः प्लुतः । ३६२२ **स्वरितमाम्रेडितेऽसूया-**

मैवं विज्ञायि 'पूर्वे भाषायामेवे'ति । उदाहरणे 'तु'शब्दो वितर्के । प्रतिश्रव । प्रतिश्रवणार्थमाह—अभ्युपगमे इत्यादि । अङ्गीकारे इत्यर्थः । प्रतिज्ञाने इति । अत्रोभयत्रापि गतिसमासः । अर्थद्वयेऽपि प्रतिपूर्वः शृणोतिः प्रसिद्धः । आभिमुख्ये चेति । अत्र 'लक्षणेनाभिप्रती आभिमुख्ये' इत्यव्ययीभावः । दत्त किमात्थ ३ इति । किं ब्रूषे इत्येव पृच्छ्यते । अत्र श्रवणाभिमुख्यं गम्यते । अनुदात्तं प्रश्नान्त । प्रश्नवाक्ये यच्चरमं प्रयुज्यते स प्रश्नान्तः । नानेन प्लुतो विधीयते, किन्तु दूरादूधूतादिषु विहितस्य प्लुतस्योदात्तत्वे प्राप्ते प्रश्नान्ताभिपूजितयोरनुदात्तत्वगुणमात्रं विधीयते । तदाह—दूरादूधूतादिष्विति । तत्रैषा वचनव्यक्तिः । प्रश्नान्ते अभिपूजिते च यः प्लुतः सोऽनुदात्तो भवतीति । तत्राभिपूजिते 'दूरादूधूते च' इति प्लुत इति । इतरत्र तु 'अनन्त्यस्यापि प्रश्नाख्यानयोः' इति । अग्निभूत ३ इति । पट ३ उ इति । 'अगमः पूर्वान् ग्रामान्' इत्येतद्वाक्यं 'अग्निभूते पटो' इत्यनन्तरेण समाप्तं तत्र अगम इत्येवमादीनाम् 'अनन्त्यस्यापि प्रश्नाख्यानयोः' इति स्वरितः प्लुतः । 'अग्निभूते, पटो' अनयोरनुदात्तः, अभिपूजिते उदाहरणाह—शोभनः खल्वसीत्यादि । चिदिति चोप । चिदित्येतन्निपाते उपमानेऽर्थे प्रयुज्यमाने वाक्यस्य टेरनुदात्तः प्लुतो भवतीत्यर्थः । प्लुतोऽयमाज्विधीयते न गुणमात्रम् । इतीति किम् ? अक्रियमाणे तस्मिन्नुपमानेऽर्थे कस्मिंश्चिच्छब्दे प्रयुज्यमाने चिच्छब्दः प्लुत इति विज्ञायते । इतिशब्दे तु सति प्रयुज्यमाने इत्येतच्चिच्छब्दस्य विशेषणं प्लुतस्तु 'वाक्यस्य टेः' इत्यधिकारात्तस्यैव भवतीति मनसि निधायोदाहरणमुखेनाह—अग्निचिदिव भायादिति । अत्र न चिच्छब्दस्य प्लुतः किं तु भायादित्यस्यैव । अक्रियमाणे तु इति शब्दे चिच्छब्दस्यैव प्लुतः स्यात् । अग्निचिद्भाया३दित्यत्र न स्यादिति भावः । कथंचिदिति । अत्र कष्टे चिच्छब्दः । अग्निर्माणवको भायादिति । अग्निरिव माणवको दीप्यत इत्यर्थः । अत्रोपमानार्थस्य वाक्यमा-

यासम्मतिकोपकुत्सनेषु ८।२।१०३॥ स्वरितः प्लुतः स्यादाम्रेडिते परेऽसूयादौ गम्ये। असूयायाम्। अभिरूपक ३ अभिरूपक रिक्तं ते **आभिरूप्यम्**। सम्मतौ। अभिरूपक ३ अभिरूपक शोभनोऽसि। कोपे। अविनीतक ३ अविनीतक इदानीं ज्ञास्यसि जाल्म। कुत्सने। शाक्तीक ३ शाक्तीक रिक्ता ते शक्तिः। **३६२३ क्रियाशीःप्रैषेषु तिङाकाङ्क्षम् ८।२।१०४॥** आकाङ्क्षस्य तिङन्तस्य टेः स्वरितः प्लुतः स्यादाचारभेदे। स्वयं ह रथेन याति ३। उपाध्यायं पदातिं गमयति। प्रार्थनायाम्। पुत्रांश्च लप्सीष्ट ३ धनं च तात। व्यापारणे। कटं कुरु ३ ग्रामं गच्छ। आकाङ्क्षं किम्। दीर्घायुरसि अग्नीदग्नीन्विहर। **३६२४ अनन्त्यस्यापि प्रश्नाख्यानयोः ८।२।१०५॥** अनन्त्यस्याऽन्त्यस्यापि पदस्य टेः स्वरितः प्लुत एतयोः। अगमः ३ पूर्वा ३ न् ग्रामा ३ न्। सर्वपदानामयम्। आख्याने। अगम ३ म् पूर्वा ३ न् ग्रामा ३ न्। **३६२५ प्लुतावैच इदुतौ ८।२।१०६॥** दूराद्धूतादिषु प्लुतो विहितस्तत्रैव ऐचः प्लुतप्रसङ्गे तदवयवाविदुतौ प्लवेते। ऐ ३ तिकायन। औ ३ पगव। चतुर्मात्रावत्र ऐचौ सम्पद्येते। **३६२६ एचोऽप्रगृह्यस्यादूराद्धूते पूर्वस्यार्धस्याऽऽदुत्तरस्येदुतौ ८।२।१०७॥** अप्रगृह्यस्य एचोऽदूराद्धूते प्लुतविषये पूर्वस्याऽर्धस्याऽकारः प्लुतः स्यादुत्तरस्य त्वर्धस्य इदुतौ स्तः। **प्रश्नान्ताभिपूजितविचार्यमाणप्रत्यभिवाद्याज्यान्तेष्वेव।** (वा ४८८८) प्रश्नान्ते। अगमः ३ पूर्वा ३ न्। अग्निभूत ३ इ। अभिपूजिते। भद्रं करोषि पट ३ उ। विचार्यमाणे। होतव्यं दीक्षितस्य गृह ३ इ।

नत्वादस्ति चिच्छब्दस्य प्रतीतिः। प्रयोगस्तु नास्ति। यद्यन्येषामप्युपमानार्थानामिवादीनामस्ति प्रतीतिस्तथापि चिच्छब्दस्यापि तावदस्तीति भावः। उपरिस्विदासीदिति। अत्रापि 'विचार्यमाणाना'मिति विहितस्य प्लुतस्य गुणमात्रं विधीयते। स्वरितमाम्रेडिते। उदाहरणे सर्वत्र 'वाक्यादेरामन्त्रितस्ये'ति द्विर्वचनम्। क्रियाशीः। क्रिया आचारोल्लङ्घनम्। इष्टाशंसनमाशीः। दीर्घायुरसि अग्नीदग्नीन्विहरेति। क्रियायां तु न प्रत्युदाहृतं, नित्यसाकाङ्क्षत्वात्। न हि 'स्वयं ह रथेन याती'त्युक्ते आचारभेदो गम्यते, किं तर्हि, 'उपाध्यायं पदातिं गमयती'त्युक्ते। प्लुतावै। उदाहरणे 'गुरोरनृतः' इति प्लुतः। चतुर्मात्राविति। 'एचौ समाहारवर्णौ, तत्र मात्रा अवर्णस्य मात्रेवर्णौवर्णयोः। तत्र ईदूतोः प्लुते कृते तयोस्तिस्रो मात्रा अवर्णस्य चैका मात्रेति समुदायश्चतुर्मात्र इत्यर्थः। नन्वत्राधमात्राऽवर्णस्याप्यर्धमात्रेवर्णोवर्णयोरिति मतेऽर्धचतुर्थमात्रावप्यैचौ प्राप्नुतः। सत्यम् 'चतुर्मात्रः प्लुत इष्यते' इति भाष्यात् समविभाग एवात्राश्रीयत इति भावः। परिगणनमाह—प्रश्नान्तेत्यादि। 'अनुदात्तं प्रश्नाम्ताभि-

न होतव्य ३ मिति। प्रत्यभिवादे। आयुष्मानेधि अग्निभूत ३ इ। याज्यान्ते। स्तोमैर्विधेमाग्नया ३ इ। परिगणनं किम्। विष्णुभूते घातयिष्यामि त्वाम्। अदूरादूधूत इति न वक्तव्यम्। पदान्तग्रहणं तु कर्तव्यम्। इह मा भूत्। भद्रं करोषि गौ ३ रिति। अप्रगृह्यस्य किम्। शोभने माले ३। **आमन्त्रिते छन्दसि प्लुतविकारोऽयं वक्तव्यः।** (वा ४८७९) अग्न ३ इ पत्नी वः। **३६२७ तयोर्य्वावचि संहितायाम् ८।२।१०८॥** इदुतोर्यकारवकारौ स्तोऽचि संहितायाम्। अग्न ३ याशा। पट ३ वाशा। अग्न ३ यिन्द्रम्। पट ३ वुदकम्। अचि किम्। आग्ना ३ इ वरुणौ। संहितायां किम्। अग्न ३ इ इन्द्रः। 'संहितायाः' मित्याध्यायसमाप्तेरधिकारः। इदुतोरसिद्धत्वादयमारम्भः। सवर्णदीर्घत्वस्य शाकल्यस्य च निवृ-

---

पूजितयोः' 'अनन्त्यस्यापि प्रश्नाख्यानयोः' इति चानुदात्तः स्वरितो वा प्लुतः। अभिपूजिते 'अनुदात्तं प्रश्नान्ताभिपूजितयोः' इति प्लुतः। विचार्यमाणे 'विचार्यमाणानाम्' इति प्लुतः। प्रत्यभिवादे 'प्रत्यभिवादेऽशूद्रे' इति प्लुतः। याज्यान्ते 'याज्यान्ते' इति प्लुतः। विष्णुभूते इति। नन्विदं परिगणनस्योदाहरणमयुक्तं यावता सूत्रे एवाऽदूरादूधूत इत्युच्यते अत आह—अदूरादूधूत इति न वक्तव्यमिति। अन्यार्थमवश्यं कर्तव्ये परिगणने तेनैव सिद्धत्वात् अदूरादूधूत इति न वक्तव्यम्। भद्रं करोषि गौ ३ रिति। अत्राऽसर्वनामस्थान इति प्रतिषेधात्सौ परतः पूर्वपदं न भवति। शोभने माले ३ इति। 'ईदूदेद्-' इति प्रगृह्यसंज्ञा। आमन्त्रिते इति। अप्राप्ते एव प्लुते वचनम्। अग्न ३ इ इति। अग्निशब्दस्य सम्बुद्धौ रूपं 'सामन्त्रितम्' इति आमन्त्रितसंज्ञा। तयोर्य्वा। नन्विदं व्यर्थम् 'इको यणचि' इत्यनेनैव सिद्धमत आह—इदुतोरसिद्धत्वादिति। ननु सिद्धः प्लुतः स्वरसन्धिषु कथं ज्ञायते। 'प्लुतप्रगृह्या अचि-' इति प्रकृतिभावविधानात्। यस्य हि विकारः प्राप्तस्तस्य प्रकृतिभावो विधेयः, प्लुतस्याऽसिद्धत्वे न तस्य स्वरसन्ध्याख्यो विकारः प्राप्नोति। अस्तु प्लुतः सिद्धः। किमायातमिदुतोः? उच्यते। प्लुतकरणे यत्कार्यं तत्स्वरसन्धिषु सिद्धमिति सामान्येन ज्ञापकमाश्रयिष्यते, ततश्चेदुतोरपि सिद्धत्वात्सिद्ध एव यणादेशोऽत आह—सवर्णदीर्घत्वस्येति। यदीदं नोच्यत अग्न ३ इ इन्द्रं, पट ३ उ उदकमित्यत्र षाष्ठिकं यणादेशं बाधित्वा सवर्णदीर्घः स्यात्। अग्न ३ याशेत्यादौ च 'इकोऽसवर्णे शाकल्यस्य—' इति प्रकृतिभावः स्यात्तद्बाधनार्थमिदं वक्तव्यमेव। ननु च तद्विवृत्तये यत्नान्तरमस्ति। किं पुनस्तत्प्लुतस्य यणादेशो वक्तव्यः सवर्णदीर्घनिवृत्त्यर्थः शाकलनिवृत्त्यर्थश्च। तत्रावश्यं वक्तव्यं व इक् प्लुतपूर्वः न च प्लुतविकारः भो इ इन्द्रं भो इ यिन्द्रं गायतीति भोशब्दस्य छान्दसः प्लुतः, ततः परस्येकारस्य निपातत्वात् प्रकृतिभावे प्राप्ते तं बाधित्वा यणादेशः। तदेवं तस्यावश्यं कर्तव्यत्वेनैव यणा सिद्धेऽत आह—

त्यर्थः । यवयोरसिद्धत्वात् 'उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य' (३६५७) इत्यस्य बाधनार्थो वा। ३६२८ **मतुवसो रु संबुद्धौ छन्दसि** ८।३।१॥ 'रु' इत्यविभक्तिको निर्देशः। मत्वन्तस्य वस्वन्तस्य च रुः स्यात्। 'अलोऽन्त्यस्य' (सू ४२) इति परिभाषया नकारस्य । इन्द्र मरुत्व इह पाहि सोमम् । हरिवो मेदिनं त्वा । 'छन्दसीरः' (सू ३६००) इति वत्वम्। ३६२९ **दाश्वान्साह्वान्मीढ्वांश्च** ६।१।१२॥ एते क्वस्वन्ता निपात्यन्ते। मीढ्वांस्तोकाय तनयाय । **वन उपसंख्यानम्**(वा० ४८९०) । क्वनिब्वनिपोः सामान्यग्रहणम् । अनुबन्धपरिभाषा तु नोपतिष्ठते । अनुबन्धस्येहानिर्देशात्। यस्त्वायन्तं वसुना प्रातरित्वः । इणः क्वनिप्। ३६३० **उभयथर्क्षु** ८।३।८ ॥ अम्परे छवि नकारस्य रुर्वा । पशूंस्तां-

---

यवयोरिति । तथाचोक्तं वृत्तिकृता—'किं तु यणा भवतीह न सिद्धं ग्वाविदुतोर्यदयं विदधाति । तौ च मम स्वरसन्धिषु सिद्धौ शाकलदीर्घविधी तु निवर्त्यौ। इक् च यदा भवति प्लुतपूर्वस्तस्य यणं विदधात्यपवादम् । तेन तयोश्च न शाकलदीर्घौ यणस्वरबाधनमेव तु हेतुः' । अयमर्थः । 'इको यणचि' इति यणादेशेन किं रूपं प्रसिध्यति यतोऽयमाचार्यः इदुतोरर्थं विदधाति तौ चेदुतौ स्वरसन्धिषु सिद्धौ । ममेति सूत्रकारेणैकीभूतस्य वचनम् । एवं चोदिते परिहरति—'शाकलदीर्घविधी तु निवर्त्यौ'विति । शाकलस्येदं शाकलं 'कण्वादिभ्यो गोत्रे' इत्यण । पुनश्चोदयति—'इक् च यदे'ति । वार्तिककारोऽपि इकः प्लुतपूर्वस्य यणं विदधाति । स च प्रकृतिभावस्येव शाकलदीर्घविधेरप्यपवादः । ततश्च तेनैव यणा एतयोरपि इदुतोः शाकलदीर्घौ न भविष्यत इति नार्थं एतेन । परिहरति—यणः स्वरेति। यणस्वरबाधनार्थत्वमेव हेतुः सूत्रारम्भस्येति । मतु। अनुबन्धपरित्यागेन सकारान्तस्य वस् इत्यस्य मतुपा सह द्वन्द्वः । अल्पाच्तरस्यापि सौत्रः परनिपातः । मरुत्व इति। मरुतो यस्य सन्तीति मतुप्। 'अयः' इति वत्वं 'वसौ मत्वर्थ' इति भत्वाज्जश्त्वं न। हरिवो मेदिनमिति । हरयो विद्यन्ते यस्येति मतुप्। हरिवच्छब्दात्सम्बुध्येकवचने 'हशिदचाम्—' इति चुम्। हलङ्यादिलोपे संयोगान्तलोपे च कृते नकारस्य रुः 'संयोगान्तलोपो रुत्वे सिद्धो वक्तव्यः' इति वचनात् 'हशि च' इत्युक्तम्। प्रसङ्गादाह—दाश्वानिति। क्वनिब्वनिपोः सामान्येन ग्रहणमिति । अनुबन्धनिर्देशात्तदनुबन्धकपरिभाषाया अनुपस्थानात् क्वनिपोऽपि ग्रहणम् । प्रातरित्व इति। प्रातरेतीति इणः 'अन्येभ्योऽपि दृश्यन्ते' इति क्वनिप्। 'हस्वस्य पिति कृति तुक्' तदाह—इणः क्वनिविति । उभयथा। 'नश्छव्यप्रशान्' इति वर्तते । तेनैव नित्ये प्राप्ते विकल्पार्थं वचनम् । पशूंस्तांश्चके इति। पशून् तानिति स्थिते नस्य रुः। पूर्वत्र 'अत्रानुनासिकः' इति वाऽनुनासिकः। उत्तरत्र तु

श्चक्रे। ३६३१ दीर्घादटि समानपादे ८।३।९॥ दीर्घाच्चकारस्य रुर्वा स्यादटि, तौ चेन्नाटौ एकपादस्थौ स्याताम्। देवाँ अच्छा सुमती। महाँ इन्द्रो य ओजसा। उभयथेत्यनुवृत्तेर्नेह। आदित्यान्याचिषामहे। ३६३२ आतोऽटि नित्यम् ८।३।३॥ अटि परतो रोः पूर्वस्याऽतः स्थाने नित्यमनुनासिकः। महाँ इन्द्रः। तैत्तिरीयास्तु अनुस्वारमधीयते। तत्र छान्दसो व्यत्यय इति प्राह्यः। एवं च सूत्रस्य फलं चिन्त्यम्। ३६३३ स्वतवान्पायो ८।३।११॥ रुर्वा। भुवस्तस्य स्वर्तवाँः पायुरग्ने। ३६३४ छन्दसि वाऽऽप्राम्रेडितयोः ८।३।४६॥ विसर्गस्य सो वा स्यात् कुप्वोः, प्रशब्दमाम्रेडितं च वर्जयित्वा। अग्ने त्रातर्ऋतस्कविः। गिरिर्न विश्वतस्पृथुः। नेह। वसुनः पूर्व्यस्पतिः। अप्रेत्यादि किम्। अग्निः प्र विद्वान्। परुषः परुषः। ३६३५ कःकरत्करतिकृधिकृतेष्वनदितेः ८।३।५०॥ विसर्गस्य सः स्यात्। प्रदिवो अपस्कः। यथा नो वस्यसस्करत्। सुपेशसस्करति। उरुणस्कृधि। सोम न चारुं मघवत्सु नस्कृतम्। अनदितेरिति किम्। यथा नो अदितिः करत्।
३६३६ पञ्चम्याः परावध्यर्थे ८।३।५१॥ पञ्चमीविसर्गस्य सः स्यादुपरिभवार्थे परिशब्दे परतः। दिवस्परि प्रथमं जज्ञे। अध्यर्थे किम्। दिवस्पृथिव्याः पर्योजः।

'आतोऽटि नित्यम्' इत्यनुनासिकः। रेफस्य विसर्गः। तस्य 'विसर्जनीयस्य' इति सः। दीर्घादटि समानपादे। एकपर्यायः समानशब्दस्तदाह—तौ चेन्नाटावेकपादस्थौ। नाटौ नकाराऽटौ। देवाँ अच्छा। महाँ इन्द्रो इति। देवान् अच्छा महानिति स्थिते रुः। 'आतोऽटि नित्यम्' इति नित्यमनुनासिकः। नेहेति। एतेन 'महान् ३ स' इति बह्वृचानां पाठोऽपि व्याख्यातः। आकरे तु 'महां ही'त्युदाहृतं तत्शाखान्तरे मन्वेषणीयम्। एवं चेति। विकल्पस्यैव व्यवस्थिततया प्रकृतसूत्रस्थेन महद्लाघवं सूत्रारम्भे तु व्यत्ययोऽपि शरणीकरणीय इति महान् क्लेश इति भावः। स्वतवान्। स्वतवानित्येतस्य नकारस्य रुर्वा पायुशब्दे परे। स्वतवा'रति। 'तु वृद्धौ' औत्रो धातुः ततोऽसुन्। स्वं तवो यस्यासौ स्वतवान्। 'इकस्वकस्वतवसां छन्दसि' इति नुम्। परुषः परुष इति। वीप्सायां द्विर्वचनम्। कः करत्। करिति कृञ्र लुङ् 'मन्त्रे घस' इत्यादिना च्लेर्लुक् तिपि गुणः। हलङ्यादिलोपः। 'बहुलं छन्दस्यमाङ्योगेऽपि' इत्यडभावः। करदिति कृञ एव लुङ्। 'कृमृदृरुहिभ्यश्छन्दसि' इति च्लेरङ्। 'ऋदृशोऽङि' इति गुणः। करतीति लट् व्यत्ययेन शप्। कृधीति लोट् सेर्हिः। 'श्रुशृणु-

३६३७ पातौ च बहुलम् ८।३।५२॥ पञ्चम्या इत्येव। सूर्यो नो दिवस्पातु। **३६३८ षष्ठ्याः पतिपुत्रपृष्ठपारपदपयस्पोषेषु ८।३।५३॥** वाचस्पतिं विश्वकर्माणम्। दिवस्पुत्राय सूर्याय। दिवस्पृष्ठं भन्दमानः। तमसस्पारमस्य। परिवीत इळस्पदे। दिवस्पयो दिधिषाणाः। रायस्पोषं यजमानेषु। **३६३९ इडाया वा ८।३।५४॥** पतिपुत्रादिषु परेषु। इळायास्पुत्रः। इळायाः पुत्रः। इळायास्पदे। इळायाः पदे। 'निसस्तपतावनासेवने' (सू०२४०३) निसः सकारस्य मूर्धन्यः स्यात्। निर्ष्टप्तं रक्षो निर्ष्टप्ता अरातयः। अनासेवने किम्। निस्तपति। पुनःपुनस्तपतीत्यर्थः। **३६४० युष्मत्तत्ततक्षुष्वन्तःपादम् ८।३।१०॥** पादमध्यस्थस्य सस्य मूर्धन्यः स्यात्तकारादिषु परेषु। युष्मदादेशाः त्वं त्वा ते तवाः। त्रिभिष्ट्वं देव सवितः। ते भिष्ट्वा। आभिष्टे। अप्स्वग्ने सधिष्टव। अग्निष्टद्विश्वम्। द्यावा पृथिवि निष्टतक्षुः। अन्तःपादं किम्। तदग्निस्तदर्यमा। यन्म आत्मनो मिन्दाभूदग्निस्तत्पुनरा हार्जातवेदा विचर्षणिः। अत्राग्निरिति पूर्वपादस्यान्तो न तु मध्यः **३६४१ यजुष्येकेषाम् ८।३।१०४॥** युष्मत्तत्ततक्षुषु परतः। सस्य मूर्धन्यो वा। अर्चिभिष्ट्वम्। अग्निष्टे अग्रम्। अर्चिभिष्टतक्षुः। पक्षे अर्चिभिस्त्वमित्यादि। **३६४२ स्तुतस्तोमयोश्छन्दसि ८।३।१०५॥** नृभिष्टुतस्य। नृभिः स्तुतस्य। गोष्टोमम् गोस्तोमम्। पूर्वपदादित्येव सिद्धे प्रपञ्चार्थमिदम्। **३६४३ पूर्वपदात् ८।३।१०६॥** पूर्वपदस्थान्निमित्तात्परस्य सस्य सो वा। यदिन्द्राग्नी दिविष्ठः। युवं हि स्थः स्वर्पती। **३६४४ सुञः ८।३।१०७॥** पूर्वपदस्थान्निमित्तात्परस्य सुञो

पृक्तवृन्यश्छन्दसि' इति हेाचरादेशः। कृत इति कृञ एव क्तः। पर्योज इति। अत्र परिः सर्वतो भावे। पातौ च। क्वचित्पठ्यते पताविति। धातुनिर्देश इति। अन्ये तूदाहरणपर्यालोचनया लोडन्तानुकरणं मन्यन्ते। षष्ठ्याः। वाचस्पतिमिति। 'तत्पुरुषे कृति बहुलम्' इति षष्ठ्यलुक्। निसस्तपता। आसेवनं पौनःपुन्यं ततोऽन्यस्मिन्नित्यर्थः। युष्मत्तत्ततक्षुष्विति। सकारान्तानुकरणात् परस्य सुप्सकारस्य 'नुम्विसर्जनीयशर्व्यवायेऽपि' इति षत्वम् 'ष्टुत्वात्तादौ' इत्यतः तादाविति वर्तते। तदाह—तकारादिष्विति। एतच्च युष्मद एव विशेषणं नेतरयोरभिचारात्। त्वं त्वा ते तवा इति। एतेषामेव सम्भव

निपातस्य सस्य षः । ऊर्ध्व ऊषु णंः । अभीषु णंः । ३६४५ सनोतेरनः ८।३।१०८॥ गोषा इन्दो नृषा असि । अनः किम् । गोसनिः । ३६४६ सहेः पृतनर्ताभ्यां च ८।३।१०९॥ पृतनाषाहम् । ऋताषाहम् । चात् ऋतीषाहम् । ३६४७ निव्यभिभ्योऽव्यवाये वा छन्दसि ८।३।११९॥ सस्य मूर्धन्यः । न्यषीदत् । न्यसीदत् । व्यषीदत् । व्यसीदत् । अभ्यष्टौत् । अभ्यस्तौत् । ३६४८ छन्दस्यृदवग्रहात् ८।४।२६॥ ऋकारान्तादवग्रहात्परस्य नस्य णः । नृमणाः । पितृयाणम् । ३६४९ नश्च धातुस्थोरुषुभ्यः ८।४।२७॥ धातुस्थात् । अग्ने रक्षा णः । शिक्षा णो अस्मिन् । उरु णस्कृधि । अभिषु णंः । मो षु णंः ।

इत्यष्टमोऽध्यायः । इति सिद्धान्तकौमुद्यां वैदिकी प्रक्रिया ॥

इत्यर्थः । स्तुतस्तोमयोः । एतयोः परतः सस्य षत्वं स्यात् । पूर्वपदादित्येव सिद्ध इति । पूर्वं पदं पूर्वपदमिति सामान्यत आश्रीयते न तु समासावयव एवेति वाक्येऽपि तेनैव सिद्धं षत्वमिति भावः । ततश्च स्तुतस्तोमग्रहणं प्रपञ्चार्थं छन्दोग्रहणं तूत्तरार्थं कर्तव्यमेव । ऊषु ण इत्यादि । 'इकः सुञि' इति पूर्वपदस्य दीर्घत्वं नस् इत्यादेशस्य 'नश्च धातुस्थोरुषुभ्यः' इति णत्वम् । सनोतेरनः । अन्तस्य सनोतेः सस्य षः स्यात् । गोषा इति । 'जनसनखनक्रमगमो विट्' । 'विड्वनो' इत्यात्वम् । गोसनिरिति । 'छन्दसि वनसनरक्षिमथाम्' इतीन्प्रत्ययः । निव्यभिभ्यो । 'न रपर' इत्यतो नेति वर्तते । तत्र निषेधविकल्पे विधिविकल्प एव फलतीत्याह—मूर्धन्यो वा स्यादिति । अभ्यष्टौदिति । 'उतो वृद्धिर्लुकि हलि' इति वृद्धिः । छन्दस्यृदव । अवगृह्यते विच्छिद्य पठ्यते इत्यवग्रहः । ऋच्चासाववग्रहश्च ऋदवग्रहस्तस्मात् । नृमणा इति । अत्र संहिताधिकारात्संहिताकाल एव एतेषां णत्वं पदकाले चावग्रहः क्रियते । तेनावग्रहयोग्यत्वादकारोऽवग्रह इत्युक्तः, न तु तदशाप्तः । अत्र हि 'नृमना' इति पदकालेऽवगृह्यते । नश्च । धातुस्था'ग्निमित्तादुत्तरस्य, उरुशब्दात्, षुशब्दाच्च परस्य नस् इत्येतस्य णः स्यात् । धातौ तिष्ठतीति धातुस्थो रेफः षकारश्च । उरु इति स्वरूपग्रहणम् । षु इति कृतषत्वस्य सुशब्दस्य ग्रहणं न सप्तमीबहुवचनस्य । तेन 'इन्दो यतां गृहेषु नः' इत्यादौ न । नसिति नासिति नासिकादेशस्य, नसादेशस्य च सामान्येन ग्रहणम् । रक्षाण इति । रक्षेति लोटो मध्यमपुरुषैकवचनान्तं 'व्यचोऽतस्तिङ' इति दीर्घः । उरुणस्कृधीति । कृञो लोट् सेर्हिः 'श्रुशृणुपृकृहृभ्यश्छन्दसि' इति हेर्धिः । 'कः करत्' इत्यादिना विसर्जनीयस्य सत्वम् । अभीषुण इति । 'इकः सुञि' इति दीर्घः । एवं मोषुण इत्यत्रापि । सर्वत्रोदाहरणे तस्मादादेशो नस् ।

इति श्रीमन्मौनिकुलतिलकायमानगोवर्धनभट्टात्मजरघुनाथभट्टात्मजेन जयकृष्णेन कृतायां सुबोधिन्याख्यायां सिद्धान्तकौमुदीव्याख्यायां वैदिकी प्रक्रिया समाप्तिमगमत् ।

स्वरप्रक्रिया ॥ २८ ॥

३६५० **अनुदात्तं पदमेकवर्जम्** ६।१।१५८॥ परिभाषेयं स्वरविधिविषया। यस्मिन्पदे यस्योदात्तः स्वरितो वा विधीयते तमेकमचं वर्जयित्वा शेषं तत्पदमनुदात्ताच्कं स्यात्। गोपायतं नः। अत्र 'सनाद्यन्ताः-' (सू २३०४) इति धातुत्वे धातुस्वरेण यकाराऽऽकार उदात्तः, शिष्टमनुदात्तम्। **सति शिष्टस्वरबलीयस्त्वमन्यत्र विकरणेभ्य इति वाच्यम्**। (वा० ३७३०)। तेनोक्तोदाहरणे गुपेर्धातुस्वर आयस्य प्रत्ययस्वरश्च न शिष्यते। अन्यत्रेति किम्। यज्ञं यज्ञमभित्रृधे गृणीतः। अत्र सति शिष्टेऽपि श्ना इत्यस्य स्वरो न शिष्यते, किं तु तस एव।

अनुदात्तं पदम्। परिभाषेयमिति। नाऽधिकारोऽस्वरितत्वात्। 'आद्युदात्तश्च' 'समानोदरे शयित ओ चोदात्तः' इत्यादीनामसंग्रहश्च स्यात्। परिभाषाया लिङ्गापेक्षायामाह—स्वरविधीति। सूत्रे अनुदात्तशब्दोऽर्शआद्यजन्तः 'पदसामानाधिकरण्यात्। अत्रानुदात्तस्य क्रियमाणत्वात् तद्भिन्न उदात्तः स्वरितो वा वर्ज्यत इत्याह—तमेकमिति। यत्तदोर्नित्यसम्बन्धाद्यस्योदात्तस्वरितविधानं तस्यैव वर्जनम्। एकग्रहणं विधीयमानस्योपलक्षणम्। तेन 'तवै चान्तश्च युगपत्, इति द्वयोर्वर्जनम्। इन्द्राबृहस्पती इत्यत्र 'देवताद्वन्द्वे च' इति सूत्रेण पदद्वयस्यापि प्रकृतिस्वरे विधेये त्रयाणां वर्जनम्। बृहस्पतिशब्दो हि वनस्पत्यादित्वादाद्युदात्त इति स्थितम्। गोपायतमिति। गुप इत्यस्य 'धातोः' इत्यन्त उदात्तः। ततः आयः प्रत्ययः 'आद्युदात्तश्च' इति प्रत्ययस्वरेणाद्युदात्तः। ततः 'सनाद्यन्ता धातवः' इति धातुसंज्ञायां 'धातोः' इति यकाराकार उदात्तः। स च प्रागुक्तयोरुदात्तयोः सतोः पश्चात्प्रवृत्तत्वात्सतिशिष्टः, अतो बलवान्। तस्य 'अनुदात्तौ सुप्पितौ' इत्यनेनाऽनुदात्तेन शबकारेण सह 'अतो गुणे' इति पररूपे कृते 'एकादेश उदात्तेनोदात्तः' इत्युदात्तः। थसस्तमादेशः। तस्य 'तास्यनुदात्तेन्ङिदुपदेशात्-

३६५१ अनुदात्तस्य च यत्रोदात्तलोपः ६।१।१६१॥ यस्मिन्ननुदात्ते परे उदात्तो लुप्यते तस्योदात्तः स्यात्। देवीं वाचम्। अत्र ङीबुदात्तः ३६५२ चो ६।१।२२॥ लुप्ताकारेऽचौ परे पूर्वस्यान्तोदात्तः स्यात्। उदात्तनिवृत्तिस्वरापवादः। देवव्रीचीं नयत देवयन्तः। अतद्धित इति वाच्यम् (वा० ३७८९)।

परिनिष्ठापयतीति दिक्। ननु यदि सतिशिष्टः स्वरो बलीयस्तर्हि सतिशिष्टत्वाद्विकरणस्वरोऽपि बलीयः स्यात्। तथा च 'गृणीत' इत्यादि मध्योदात्तं पदं स्यादत आह—अन्यत्रेति। सतिशिष्टोऽपि विकरणस्वरः प्रत्ययस्वरं न बाधत इत्यर्थः। अत्र च ज्ञापकं तासेः परस्य ऌसार्वधातुकस्य अनुदात्तविधानम्। तथाहि यद्यपि ऌवस्थायां तासिर्विधीयते तथापि ऌकारमात्रापेक्षत्वादन्तरङ्गेषु परेषु च ऌादेशेषु कृतेषु पश्चात्तासिरिति तत्स्वरस्य सतिशिष्टत्वात् शेषनिघातेनैव सिद्धेरनर्थकं तत्स्यात्। गृणीत इति। अन्तोदात्तं पदम्। अत्र 'तास्यनुदात्ते' दिति ऌसार्वधातुकनिघातो न, अदुपदेशेति तपरकरणात् श्नाप्रत्ययस्याऽङ्गस्तत्वाभावात्। 'तिङ्ङतिङः' इति निघातस्तु न भवति 'यदवृत्तान्नित्यम्' इति निषेधात्। स हि व्यवहितेऽपि प्रवर्तते। तस एवेति। तस 'आद्युदात्तश्च' इत्याद्युदात्तः स्वरः शिष्यत इत्यर्थः। अनुदात्तस्य। देवीमिति। देवशब्दोऽचप्रत्ययान्तत्वात् 'चितः' इत्यन्तोदात्तः। पचादिषु देवडिति पाठात् 'टिड्ढा' इति ङीप् तस्य 'अनुदात्तौ सुप्पितौ' इत्यनुदात्तत्वे 'यस्येति च' इत्यकारलोपः। नन्वनुदात्तस्येति व्यर्थं न ह्याद्युदात्ते स्वरिते वा परे उदात्तलोपोऽस्ति। न च प्रसज्यत इति प्रासङ्गः कर्मणि घञ् 'कर्षात्वतो घञोऽन्त उदात्तः' इत्यन्तोदात्तम्। 'उपसर्गस्य घञ्यमनुष्ये बहुलम्' इत्युपसर्गस्य दीर्घः। 'तं वहति' इति प्राग्विताद्यत्। तित्त्वात्स्वरितः, तस्मिन् परे 'यस्य' इति लोपः। अत्र स्वरिते परे उदात्तलोपोऽस्त्येवेति वाच्यम्। स्वरिते हि विधीयमाने परिशिष्टम् 'अनुदात्तं पदमेकवर्जम्' इत्यनुदात्तं तत्कृत उदात्तलोप इति चेत्सत्यम्। 'मा हि धुक्षाता' मित्यत्र दुहेर्लुङ्लास्मनेपदमातां 'झल इगुपधा' दिति क्सेः क्सः आताम्इत्यस्य 'तास्यनुदात्तेन्ङिददुपदेशात्' इति ऌसार्वधातुकमनुदात्तत्वम्। क्सः प्रत्ययस्वरेणोदात्तः 'क्यस्याचि' इत्यकारलोपः। अत्र 'कर्षात्वतो घञोऽन्त उदात्तः' इत्यत अन्त इत्यधिकारादन्त्यस्योदात्तत्वं स्यात्, सति त्वस्मिन्नादेर्भवति। ननु 'यस्योदात्तलोप' इत्युच्यमाने कथमन्त्यस्य प्रसङ्गः। न हि तदुदात्तलोपस्य निमित्तमिति चेत्तर्हि आदेरपि न प्राप्नोति। तस्याप्युदात्तलोपं प्रत्यनिमित्तत्वात्। 'क्सस्याऽचि' इत्यजादौ प्रत्यये विधानात्। तस्माद्यत्र प्रत्यये उदात्तलोपस्तत्सम्बन्धिनोऽनुदात्तस्योदात्तो भवतीति सूत्रार्थेनाऽन्ताधिकारान्त्यस्य प्रसङ्गः। यदि तु निमित्तत्वाऽनादरेण 'यस्यानुदात्ते परत उदात्तलोपस्तस्योदात्तो भवती'ति सूत्रार्थस्तदाऽनुदात्तस्येति न वक्तव्यम्। अन्त्यस्य प्रसङ्गाऽभावात्। न च 'मा हि

दाधीचः । माधूचः । प्रत्यस्वर एवात्र । ३६५४ आमन्त्रितस्य च ६।१।१९८॥ आमन्त्रितस्यादिरुदात्तः स्यात् । अग्न इन्द्र वरुण मित्र देवाः । ३६५४ आमन्त्रितस्य च ८।१।१९॥ पदात्परस्याऽऽपादादिस्थितस्यामन्त्रितस्य सर्वस्यानुदात्तः स्यात् । प्रागुक्तषाष्ठस्यापवादोऽयमाष्टमिकः । इमं मे गङ्गे यमुने सरस्वति । अपदादौ किम् । शतुद्रि स्तोमम् । 'आमन्त्रितं पूर्वमविद्यमानवत्' (सू ४१२) । अग्न इन्द्र । अत्रेन्द्रादीनां निघातो न । पूर्वस्याविद्यमानत्वेन पदात्परत्वाभावात् । 'नामन्त्रिते समानाधिकरणे सामान्यवचनम्' (सू ४१३) । समानाधिकरणे आमन्त्रिते परे विशेष्यं पूर्वमविद्यमानवन्न । अग्ने तेजस्विन् । अग्ने भ्रातः । सामान्यवचनं किम् । पर्यायेषु मा भूत् । अघ्न्ये देवि सरस्वति । ३६५५ (सामान्यवचनं) वि-

---

भुक्षाता'मित्यत्र 'तिङ्ङतिङः' इति निघातः स्यादिति वाच्यम् । 'हि च' इति निषेधात् । उदात्तनिवृत्तीति । कृदुत्तरपदप्रकृतिस्वरेणोदात्तस्याऽऽद्युदात्तस्य 'अच' इति लोपे सति 'अनुदात्तस्य च' इति सूत्रेणोदात्तः प्राप्तस्तस्याऽयमपवाद इत्यर्थः । देवद्रीचीमिति । देव अच इति स्थिते 'विष्वग्देवयोः' इति देवशब्दस्याऽद्रि-आदेशः । 'उगितश्च' इति ङीप् 'अचः' इत्यञ्चतेरकारलोपः । 'चौ' इति दीर्घत्वम् । द्रीतीकार उदात्तः । ततः परस्य 'उदात्तादनुदात्तस्य स्वरितः' इति स्वरितत्वम् । अतद्धित इति । चौ यः स्वरः स तद्धिते परतो न भवतीत्यर्थः । अन्यथा 'देवद्रीचीं'मित्यादौ यथोदात्तनिवृत्तिस्वरं बाधते तथा 'दाधीच' इत्यादौ प्रत्ययस्वरमपि सतिशिष्टस्वरो बाधेत । तस्मादतद्धित इति वक्तव्यम् । अस्मिँश्च सति उदात्तनिवृत्तिस्वरस्याऽयमपवाद इति फलितम् । दाधीच इति । दधि अच् अण् इति स्थिते ऽण्प्रत्यय उदात्तत्वे कृते 'अचः' इत्यकारलोपः । ततः सतिशिष्टत्वात् 'चौ' इति स्वरः प्राप्तो निषिध्यते । तथा चाऽण्प्रत्ययस्वरेणैव व्यवस्था । तदाह—प्रत्ययस्वर एवाऽत्रेति । अग्न इत्यादि । 'सामन्त्रितम्' इत्यनेनामन्त्रितत्वम् । प्रागुक्तषाष्ठस्येति । 'आमन्त्रितस्य चे'त्यस्य । इमं म इति । 'मे'शब्दात्परत्वमाश्रित्य गङ्गेप्रभृतीनां त्रयाणामनुदात्तः । स च पदपाठे स्पष्ट एव । संहितायां तु 'स्वरितात्संहितायामनुदात्तानाम्' इति वक्ष्यमाणा प्रचयाऽपरपर्याया एकश्रुतिः प्रवर्तते । शुतुद्रीति । षाष्ठेन 'आमन्त्रितस्य च' इत्यनेनाद्युदात्तः । आमन्त्रितं पूर्वम् । अग्न इन्द्रेति । सर्वाणि षाष्ठेनाऽऽद्युदात्तानि । निघातो नेति । आष्टमिकेनेति भावः। नामन्त्रिते । अत्रोत्तरसूत्रस्थं सामान्यवचनमत्र सम्बन्धनीयमिति भाष्यम् । तदुव्याचष्टे—विशेष्यमिति । विशेष्यसमर्पकमित्यर्थः । क्वचित्तु 'नामन्त्रिते समानाधिकरणे सामान्यवचनम्' इति पाठः, सदुत्पत्त्यनुरोधेनेति ज्ञेयम् । अग्ने तेजस्विन्नित्यादि । 'अग्ने' इत्यस्य विद्यमानत्वात्तेजस्विन्नित्यस्य, भ्रातरित्यस्य चाऽऽष्टमिकनिघातः । अघ्न्ये देवि सरस्वतीति । तैत्तिरीयके ब्राह्मणे

भाषितं विशेषवचने ८।१।७४॥ अत्र भाष्यकृता बहुवचनमिति पूरितम् । सामान्यवचनमिति च पूर्वसूत्रे योजितम् । आमन्त्रितान्ते विशेषणे परे पूर्वं बहुवचनान्तमविद्यमानवद्वा । देवीः षळुर्वीरुरु नः कृणोत । अत्र देवीनां विशेषणं षडिति । देवाः शरण्याः । इह द्वितीयस्य निघातो वैकल्पिकः । **३६५६ सुबामन्त्रिते पराङ्गवत्स्वरे २।१।२॥** सुबन्तमामन्त्रिते परे परस्याङ्गवत्स्वरे कर्तव्ये । द्रवत्पाणी शुभस्पती । शुभ इति शुभेः क्विबन्तात्षष्ठ्यन्तस्य, परशरीरानुप्रवेशे षाष्ठिकमामन्त्रितादुदात्तत्वम् । न चाष्टमिको निघातः शङ्क्यः । पूर्वामन्त्रितस्याऽविद्यमानत्वेन पादादित्वात् । यत्ते दिवो दुहितर्मर्त भोजनम् । इह दिवःशब्दस्याऽऽष्टमिको निघातः । परशुना वृक्षन् । **षष्ठ्यामन्त्रितकारकवचनम्** । (वा २२२३) षष्ठ्यन्तमामन्त्रितान्तं प्रति यत्कारकं तद्वाचकं चेति परिगणनं कर्तव्यमित्यर्थः । तेनेह न । अयमग्ने जरिता । एतेनाग्ने ब्रह्मणा । समर्थानुवृत्त्या वा सिद्धम् । **पूर्वाङ्गवच्चेति वक्तव्यम्** । (वा०१२२८) । आ ते पितर्मरुताम् । प्रति त्वा दुहितर्दिवः । **अव्ययानां न** (वा० १२२९) । उच्चैरधीयान । अव्ययी-

---

सहस्रमर्ती प्रकृत्य 'इडेरन्ते दिवे सरस्वति प्रिये प्रेयसि महि विश्रुति एतानि ते अदिनिये नामानि' । वृत्तौ तु 'इडे काम्ये विहव्ये' इति पाठः । स तु शाखान्तरे द्रष्टव्यः । समानाधिकरणग्रहणं पाणिनिमतेऽन्न इन्द्र वरुण इत्यादौ व्यधिकरणनिवृत्त्यर्थम् । भाष्यकृन्मते विस्पष्टार्थं सामान्यवचनापेक्षत्वात्त सामानाधिकरण्यस्याऽवश्यं स्थितत्वात् । सामान्य । 'बहुवचनमि'ति पूर्वनिषेधस्यास्य विकल्पस्य च विषयविभागार्थम् । देवीः षडिति । अत्र देवीरित्यामन्त्रितं नाऽविद्यमानवत् । तेन षडित्यस्य निघातः । शरण्या इति । शरणं रक्षितृत्वं, तत्र साधवः शरण्याः । 'तत्र साधुः' इति यत् । द्वितीयस्येति । षष्ठशब्दस्य, शरण्यशब्दस्य चेत्यर्थः । सुबामन्त्रिते । परस्याङ्गवदिति । तस्यैव परस्यामन्त्रितस्याऽङ्गवदेकदेशवद्भवति । तद्ग्रहणेन गृह्यत इत्यर्थः । षष्ठ्यामन्त्रित । अत्र षष्ठीशब्देन षष्ठ्यर्था विभक्तिरुच्यते । तेन 'गोषु स्वामि'न्नित्यत्रापि पराङ्गवद्भावः सिध्यति । परशुना वृश्चन्निति । 'आङ् परयोः क्षनिश्रुग्भ्याम्' इति कुप्रत्ययान्तोऽन्तोदात्तः । षष्ठ्यन्तमामन्त्रितान्तं प्रति यत्कारकमिति । यद्यप्यामन्त्रितस्य द्रव्यवचनत्वान्न कारकापेक्षा, तथापि आमन्त्रिततया धातुवाच्या या क्रिया तस्यास्तदपेक्षाऽस्तीति तत्कारकमित्यर्थः । पितर्मरुतामिति । अत्र 'मरुतामि'ति परं पदं पूर्वस्य पितरित्यस्याङ्गवद्भवति । पितरित्यामन्त्रितनिघातेनाऽनुदात्तं, ततः परं मरुतामित्येतदप्यनुदात्तमेव भवतीत्यर्थः । अव्ययानां नेति । तेनोच्चैरधीयानेत्यत्र 'आमन्त्रितस्य च' इत्याद्युदात्त-

भावस्य त्विष्यते। (वा १२३०) । उपाग्न्यधीयान । ३६५७ **उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य** ८।२।४॥ उदात्तस्थाने स्वरितस्थाने च यो यण् ततः परस्याऽनुदात्तस्य स्वरितः स्यात्। अभ्यभि हि। स्वरितस्य यणः। खल्प्व्याशा । अस्य स्वरितस्य त्रैपादिकत्वेनासिद्धत्वाच्छेषनिघातो न । ३६५८ **एकादेश उदात्तेनोदात्तः** ८।२।५॥ उदात्तेन सहैकादेश उदात्तः स्यात्। क्

त्वं न। न च निषेधवैयर्थ्यम्। 'निपाता आद्युदात्ताः' इत्याद्युदात्तत्वस्याऽनिवारणादिति वाच्यम्। स्वरादिष्वन्तोदात्तयोरुच्चैर्नीचैःशब्दयोः पाठात्। अव्ययीभावस्य त्विति। 'अव्ययीभावश्च' इति अव्ययीभावस्याव्ययसंज्ञासूत्रे 'लुङ्मुखस्वरोपचारा' इति परिगणनादव्ययसंज्ञाऽभावेन 'अव्ययानां न' इति निषेधो न प्रवर्तते इति भावः। उपाग्न्यधीयानेति। परादुक्तवद्भावेनामन्त्रितस्येत्याद्युदात्तत्वम्। अभ्यभीति। अभिशब्द 'उपसर्गाश्चाऽभिवर्जम्' इत्याद्युदात्तनिषेधात् फिट्स्वरेणाऽन्तोदात्तः। तस्य 'नित्यवीप्सयोः' इति द्वित्वम्। 'तस्य परमाम्रेडितम्' 'अनुदात्तं च' इति परस्यानुदात्तत्वं तस्मिन्नेव परे इकारस्योदात्तस्य यणि कृते उदात्तयणः परत्वाद्यकारोऽकारः स्वरितः। खल्पूशब्दः कृदुत्तरपदप्रकृतिस्वरेणान्तोदात्तः। तस्य 'ओः सुपि' इति यण् स उदात्तयण्। ततः परो ञिप्रत्ययः सुप्त्वादनुदात्तः। तस्याऽनेन स्वरितः। 'उदात्तयणो हल्पूर्वात्' इत्युदात्तत्वं तु न। 'नोङ्धात्वोः' इति निषेधात्। तस्य च स्वरितेकारस्य यणि ततः परस्य आशाशब्दाऽऽकारस्यानेनैव स्वरितः। आशाशब्दो हि 'आङ्याजयारुषामिच्छि च' इत्यन्तोदात्तत्वादनुदात्तादिः। अस्येति। आशाशब्दप्रथमाकारस्यानिकस्येत्यर्थः। शेषेति। आशाशब्दस्य निघातो नेत्यर्थः। ननु यणादेशं प्रति स्वरितस्याऽसिद्धत्वात्स्थानिन्येव यण प्रवृत्तः, यथा औजढदित्यत्र हतशब्दे द्वित्वं प्रवर्तते न तु ढशब्दे। न च स्वरितयणोः परस्येत्याश्रयणात्सिद्धत्वं शङ्क्यम्। तथा सति 'उदात्तादनुदात्तस्य स्वरितः' इत्यनेन यत्र स्वरितः क्रियते, तत्रापि ह्यसिद्धत्वं न स्यात्। न चेष्टापत्तिः, लक्ष्यविरोधात्। 'प्रत्यग्निरुषसामग्रमक्षयत्' इत्यादौ स्वरितोऽदर्शनात्। न च 'नोदात्तस्वरितोदय'मिति निषेधः शङ्क्यः। 'अनन्तरस्य' इति न्यायेन 'उदात्तादनुदात्तस्य' इति यत्र प्राप्तिस्तन्मात्रस्य निषेधात्। अन्यथा 'खल्पव्याशाऽभ्या अग्निर्ग्रीवा अस्मा'इत्यादावपि निषेधापत्तिरिति चेत्? अत्राहुर्भाष्यकाराः—'योगविभागः करिष्यते, उदात्तयणः परस्याऽनुदात्तस्य स्वरितो भवति। ततः 'स्वरितयणः' उदात्तयण इत्यनुवर्तते, उदात्तयण इत्येवं योऽभिनिर्वृत्तः स्वरितस्तयणः परस्याऽनुदात्तस्य स्वरितः स्यादित्यर्थः। एवं चास्येवाश्रयात्सिद्धत्वं नान्यस्य। एकादेश इति। उदात्तयोरेव स्थानित्वे आन्तरतम्यादेव सिद्धम्। अन्यतरस्याऽनुदात्तत्वे स्वरितत्वे वा आन्तरतम्यात् स्वरिते प्राप्ते विधिरयमिति ध्वनयन्नुदाहरणद्वयमाह—क ओऽश्वा इत्यादि। 'बहुवचनस्य वस्नसौ' इत्यत्र 'अनुदात्तं सर्वमपादौ' इत्य-

१ वोऽश्वाः । क्वावरं मरुतः । ३६५६ स्वरितो वाऽनुदात्ते पदादौ ८।२।६॥ अनुदात्ते पदादौ परे उदात्तेन सहैकादेशः स्वरितो वा स्यात् । पक्षे पूर्वसूत्रेणोदात्तः। वी१दं ज्योतिर्हृदये । अस्य श्लोको दिवीयते । व्यवस्थितविभाषात्वादिकारयोः स्वरितः । दीर्घप्रवेशे तूदात्तः । किंच 'एङः पदान्तात्' (सू ८६) इति पूर्वरूपे स्वरित एव। तेऽवदन्। सो ३ यमागात्। उक्तं च प्रातिशाख्ये । इकारयोश्च प्रश्लेषे क्षैप्राभिनिहतेषु चेति । ३६६० उदात्तादनुदात्तस्य स्वरितः ८।४।६६॥ उदात्तात्परस्यानुदात्तस्य स्वरितः स्यात् । अग्निमीळे । अस्याप्यसिद्धत्वाच्छेषनिघातो

धिकाराद्धस् अनुदात्तः । अशेः क्वनिति व्युत्पादनादश्वशब्द आद्युदात्तः । वसो रुत्वम् । 'एङः पदान्तादति' इति पूर्वरूपम् । क्वेति । 'किमोत्' 'क्वाति' इति किमः क्वादेशः 'तिस्वरितम्' । अवरशब्दः 'स्वाङ्गशिटामदन्तानाम्' इत्याद्युदात्तः । तयोर्दीर्घ उदात्तः । स्वरितो । वीदमित्यादि । विशब्दो निपातत्वादाद्युदात्तः । इदं-शब्दः फिट्स्वरेणान्तोदात्तः । तयोरेकादेशः स्वरितः । द्विविशब्दे, 'ऊडिदंपदात्' इति विभक्तिरुदात्ता । ईयते 'इङ् गतौ' दिवादिः । 'तिङ्ङतिङः' इति निहतम् । अत्रैकादेश उदात्तः । इकारयोः स्वरित इति । ह्रस्वैकारयोरेवेत्यर्थः । दीर्घप्रवेशे खिति । दिवीयत इत्यत्र । उदात्त इति । 'एकादेश उदात्त' इत्यनेन । इयं च बह्वृचानां व्यवस्थोक्ता । अन्येषामपि तदीयप्रातिशाख्यानुसारेण ज्ञेया । पूर्वरूपे इति । 'तेऽवद'न्नित्यादौ ते इति तच्छब्दः फिट्स्वरेणान्तोदात्तः । जसः सुप्त्वात् 'अनुदात्तौ सुप्पितौ' इत्यनुदात्तः । तयोरेकादेश उदात्तः । अवदन्निति । वदेर्लङि प्रथमपुरुषबहुवचनम् । ते इत्यतिबन्ताव्परस्य तस्य 'तिङ्ङतिङः' इति निघातः । सोऽयमिति । स इति तच्छब्दस्य प्रथमैकवचनम् । तच्छब्दः फिट्स्वरेणान्तोदात्तः । सुहति 'सुप्त्वादनुदात्तः' तस्य टेरुत्वे उत्वे गुणे च कृते एकादेशेनौकार उदात्तः । अयमितीदमः प्रथमैकवचनं फिट्स्वरेणान्तोदात्तम् । तयोः 'एङः पदान्तात्' इति पूर्वरूपे ओकारः स्वरितः । इकारयोश्च प्रश्लेष इति । ह्रस्वयोरिकारयोः सवर्णदीर्घे । ह्रस्वयोर्यत्र सवर्णदीर्घः स प्रश्लेष इत्युच्यते । उदात्तस्वरितस्थाने यो यण् स क्षैप्रः सन्धिः । यत्र 'एङः पदान्तात्—' इति, स अभिनिहतसन्धिरुच्यते । तेषु स्वरितः स्वीक्रियत इत्यर्थः । 'वीदं ज्योतिः' 'अभ्यभि हि,' 'तेऽवदन्' इति क्रमेणोदाहरणानि । उदात्तादनुदात्तस्य । यत्र 'तयोर्य्वावचि' इत्यतः संहितायामित्यनुवर्तते तेन पदकालेऽनुदात्तमेव । अग्निमीळे इति । अग्निशब्दः फिट्स्वरेण, प्रत्ययस्वरेण वाऽन्तोदात्तः । अम् सुप्त्वादनुदात्तः । 'अमि पूर्वः' इति एकादेश उदात्तः । ईळे इति तु ईड स्तुतौ' लटि उत्तमपुरुषैकवचनम् । 'द्व्योश्चाऽस्य स्वरयोर्मध्यमेत्य सम्पद्यते स ढकारो ळकारः' इति वक्ष्यमाणेन प्रति-

न। तमीशानासः। ३६६१ नोदात्तस्वरितोदयमगार्ग्यकाश्यपगालवानाम् ८।४।६७॥ उदात्तपरः स्वरितपरश्चानुदात्तः स्वरितो न स्यात्। गार्ग्यादिमते तु स्यादेव। अ य आरुः। वोश्वाः क्वा। भीशवः। ३६६२ एकश्रुति दूरात्संबुद्धौ १।२।३३॥ दूरात्संबोधने वाक्यमेकश्रुति स्यात्। त्रैस्वर्यापवादः। आगच्छ भो माणवक। ३६६३ यज्ञकर्मण्यजपन्यूङ्खसामसु १।२।३४॥ यज्ञक्रियायां मन्त्र

शाख्येन डस्य ळः। 'तिङ्ङतिङः' इति निहतम्। ईकारस्य स्वरितः। न च मकारेण व्यवधानम्। 'स्वरविधौ व्यञ्जनमविद्यमानवत्' इति परिभाषणात् एवं सर्वत्र ज्ञेयम् ननु 'तित्स्वरितम्' इत्यस्यानन्तरमिदं वक्तव्यम्। एवं स्वरितग्रहणं न कर्तव्यं भवतीत्याशङ्क्याह—अस्येति। यदि तत्र क्रियेत 'अनुदात्तं पदमेकवर्जम्' इत्येतत्प्रवर्तेत, इह प्रकरणे न प्रवर्तते, स्वरितस्याऽसिद्धत्वात्। तेन द्वयोरप्युदात्तस्वरितयोः श्रवणं सिद्धम्। तमीशानास इति। तमिति तच्छब्दस्य द्वितीयैकवचनमन्तोदात्तम्। ईशानशब्दाज्जसि 'आज्जसेरसुक्' इत्यसुगागमे कृते रूपम्। 'ईश ऐश्वर्ये' अस्माच्छानच्। चित्त्वादन्तोदात्तः। जसः सुत्त्वादनुदात्तत्वम्। ईकारस्य सकाराकारस्य च स्वरितत्वम्। नोदात्त। उदात्तस्वरितौ उदयौ यस्मादिति बहुव्रीहिः। 'उदय'शब्दः परशब्देन समानार्थः। डस्य प्रातिशाख्येषु प्रसिद्धः। लाघवार्थं परशब्दे प्रयोक्तव्ये मङ्गलार्थमुदयशब्दः प्रयुक्तः। तथा चोक्तं भाष्ये-'मङ्गलादीनि मङ्गलान्तानि शास्त्राणि प्रथन्ते वीरपुरुषाणि भवन्त्यायुष्मत्पुरुषाणि च'। इहादौ वृद्धिशब्दो, मध्ये शिवशब्दः 'शिवशमरिष्टस्य करे' इति, अन्ते चायमुदयशब्द इति पाणिनीये मङ्गलं कृतम्। प्र य आरुरिति। ये इति यच्छब्दस्य प्रथमाबहुवचनं फिट् स्वरेणान्तोदात्तम्। आरुरिति। अतर्लिटि प्रथमपुरुषबहुवचनं झिः। तस्य 'परस्मैपदानाम्—' इत्युस् प्रत्ययस्वरेणोदात्तः। न च 'तिङ्ङतिङः' इति निघातः शङ्क्यः। 'यदवृत्ता'दित्यम्' इति निषेधात्। आकारस्य 'उदात्तस्वरितपरस्य' इति वक्ष्यमाणेन सन्नतरादेशः। वोऽश्वाः क्वेति। अत्रापि श्वेत्याकारस्य सन्नतरः। क्वेति। 'किमोत्' 'तित्स्वरितम्'। एक श्रुतिः। सम्बोधनं सम्बुद्धिरित्यनेनाव्यर्थस्य सम्बुद्धिशब्दस्य ग्रहणं, न 'एकवचनं सम्बुद्धिः' इति पारिभाषिकस्य। सति तु तस्य ग्रहणे 'आगच्छत देवा ब्राह्मणा' इत्यत्र न स्यात्तदाह—दूरात्सम्बोधने इति। अन्वर्थग्रहणं च दूरादित्यनेन सम्बन्धाङ्गम्यते। न ह्यामन्त्रितविभक्तेः दूरत्वमदूरत्वं च सम्भवति। सम्बोधनस्य तु क्रियारूपत्वादपादानत्वादूदूरादिति विशेषणासम्भवः। दूरत्वं च न देशस्वरूपमाश्रीयते अनवस्थितत्वात् किं तर्हि सम्बोधनक्रियापेक्षया दूरत्वम्। यावति देशे प्रकृतिप्रयत्नोच्चारितं संबोध्यमानेन न श्रूयते किं त्वधिकं प्रयत्नमपेक्षते तत्सम्बुद्धौ दूरं भवति। एक श्रुतिरिति। उदात्तादीनां स्वराणामविभागेनाऽवस्थानमेकश्रुतिः। आगच्छेत्यादि। 'दूराद्धूते च' इति 'वाक्यस्य टेः

एकश्रुतिः स्याज्जपादीन्वर्जयित्वा । अग्निर्मूर्धा दिवः ककुत् । यज्ञेति किम् । स्वाध्यायकाले त्रैस्वर्यमेव । अजपेति किम् । ममाग्ने वर्चो विहवेष्वस्तु । जपो नाम उपांशुप्रयोगः । यथा जले निमग्नस्य । न्यूङ्खा नाम षोडश ओकाराः । गीतिषु सामाख्या । ३६६४ उच्चैस्तरां वा वषट्कारः १।२।३५॥ यज्ञकर्मणि वौषट्शब्द उच्चैस्तरां वा स्यादेकश्रुतिर्वा । ३६६५ विभाषा छन्दसि १।२।३६॥

प्लुत उदात्तः' । प्रत्युदाहरणे त्रैस्वर्यमेव भवति । तत्र आङ् 'उपसर्गाश्चाभिवर्जम्' इत्याद्युदात्तः । गच्छेति तिङन्तस्य निघातः । भोशब्दो 'निपाता आद्युदात्ताः' इत्याद्युदात्तः । शेषस्यामन्त्रितनिघातः । यज्ञः । त्रैस्वर्येण वेदे मन्त्राः पठ्यन्ते, तेषां यज्ञक्रियायामपि तथैव प्रयोगे प्राप्ते एकश्रुतिर्विधीयते । मन्त्र इति । एतच्चाऽजपेति पर्युदासाल्लभ्यते, तेनोहादिषु न । अत एव स्वाहेन्द्रशत्रुवर्धस्वेति समासान्तोदात्तत्वे कर्तव्ये आद्युदात्तं प्रयुक्तमिति प्रसिद्धिः । जपादीनीति । जपन्यूङ्खसामानीत्यर्थः । अग्निर्मूर्धेति । 'अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्या अयम् । अपां रेतांसि जिन्वतो ३ म्, 'अङ्गेर्निनैलोपश्च' इति अग्निशब्दः प्रत्ययस्वरेण फिट्स्वरेण वाऽन्तोदात्तः । 'मुर्वी बन्धने' 'कनिन् युवृषितक्षिराजिधन्वि' इत्यतः कनिनि वर्तमाने 'श्वन्नुक्षन्पूषन्' इत्यत्र मूर्धन्शब्दः कनिन्प्रत्ययान्तोऽन्तोदात्तो निपातितः । दिवशब्दात्परस्य षष्ठ्येकवचनस्य 'ऊडिदंपदात्' इत्युदात्तत्वम् । ककुच्छब्दः प्रातिपदिकस्वरेणान्तोदात्तः । पातेर्डतिः । पतिशब्दः प्रत्ययस्वरेणाद्युदात्तः । 'प्रथेः यिवन् सम्प्रसारणं च' पिस्वान्ङीष् । षष्ठ्येकवचनस्य 'उदात्तयणो हल्पूर्वात्' इत्युदात्तत्वम् । इदम्शब्दः प्रातिपदिकस्वरेणान्तोदात्तः । आप्नोतेः क्विप् हृस्वश्च । 'ऊडिदम्' इति विभक्तेरुदात्तत्वम् । 'रीङ्सृजिभ्यां तुङ्वेत्यसुन्प्रत्ययः नित्स्वरेणाद्युदात्तो रेतःशब्दः । जिन्वतीति । जिन्वतेः प्रीणनार्थस्य तिपि 'तिङ्ङतिङः' इति निघातः । 'प्रणवष्टेः' इति प्रयोगकाले प्रणवः । ममेत्यादि । 'युष्मदस्मदोर्ङसि' इत्याद्युदात्तत्वम् । अग्नेः शब्दस्यामन्त्रितनिघातः । वर्चःशब्दोऽसुन्प्रत्ययान्तः । विपूर्वात् ह्वयतेः 'ह्वः सम्प्रसारणं च' इत्यप्रत्ययः । गाथादिसूत्रेणान्तोदात्तत्वम् । उच्चैस्तराम् । वषट्शब्देनात्र वौषट्शब्दो लक्ष्यते समानार्थत्वात् । द्वावपि हि तौ देवतासम्प्रदानकस्य दानस्य द्योतकौ । नन्वेवं प्रतिपत्तिलाघवार्थं वौषट्शब्द एव कुतो नोक्त इति चेत्, विचित्रा हि सूत्रस्य कृतिः पाणिनेः, क्वचिदक्षरलाघवमाश्रीयते क्वचित्प्रतिपत्तिलाघवमिति । ननु वषट्कार इत्यत्र कारप्रत्ययो न स्यात् वर्णनिर्देशे हि स विहित इति चेत्सत्यम् । एतदेव ज्ञापयति 'समुदायादपि कारप्रत्ययो भवती'ति । तेन 'एवकार' इत्यादि सिद्धम् । उच्चैःशब्दोऽधिकरणप्रधानोऽपि तद्विशिष्टभवनक्रियायां वर्तते, तेन क्रियाप्रकर्षादाम्प्रत्ययः उदात्ततरो भवतीति फलितोऽर्थः । 'ह्वृहि प्रेष्य' इति सूत्रेण वौषट्शब्दस्याऽऽदेः

छन्दसि विभाषा एकश्रुतिः स्यात्। व्यवस्थितविभाषेयम्। संहितायां त्रैस्वर्यम्। ब्राह्मणे एकश्रुतिर्बह्वृचानाम्। अन्येषामपि यथासम्प्रदायं व्यवस्था। **३६६६ न सुब्रह्मण्यायां स्वरितस्य तूदात्तः** १।२।३७॥ सुब्रह्मण्याख्ये निगदे 'यज्ञकर्मणि' (सू ३६६३) इति 'विभाषा छन्दसि' (सू ३६६५) इति च प्राप्ता एकश्रुतिर्न स्यात्स्वरितस्योदात्तश्च स्यात्। सुब्रह्मण्योऽम्। [सुब्रह्मणि साधुरिति यत्। नच 'एकादेश उदात्तेनोदात्तः' (सू ३६५८) इति सिद्धे पुनरत्रेदमुदात्तविधानं व्यर्थमिति वाच्यम्। तत्रानुदात्त इत्यस्यानुवृत्तेः। **असावित्यन्तः।** (वा ६५१) तस्मिन्नेव निगदे प्रथमान्तस्यान्त उदात्तः स्यात्। गार्ग्यो यजते। ञित्वात्प्राप्त आद्युदात्तोऽनेन बाध्यते। **अमुष्येत्यन्तः।** (वा ६५२)। षष्ठ्यन्तस्यापि प्राग्वत्। दाक्षेः पिता यजते। **स्यान्तस्योपोत्तमं च।** (वा ६५३)। चादन्तस्तेन द्वावुदात्तौ। गार्ग्यस्य पिता यजते। **वा नामधेयस्य।** (वा ६५४)। स्यान्तस्य नामधेयस्य उपोत्तममुदात्तं वा स्यात्। देवदत्तस्य पिता यजते। **३६६७ देवब्रह्मणोरनुदात्तः**

प्लुत उदात्तो विहितः, तदपेक्षयाऽयमुदात्ततरोऽन्यस्य विधीयते। अन्ये तु स्वार्थिकस्तरबित्याहुः। विभाषा। वाग्रहणेऽनुवर्तमाने विभाषाग्रहणं अच्छन्दसीति पदच्छेदेन तन्नादिना भाषायामपि विधानार्थम्। अत एव 'श्वेतो धावति' 'अलम्बुसानां पातेति' द्वयर्थं वाक्यमिति पस्पशाह्निके भाष्यम्। तत्र श्वेतेति प्रातिपदिकस्वरेणान्तोदात्तम्। इत इति इदंशब्दात्तसिल्। 'ऊडिदम्-' इत्यनेन श्वेत इति 'वर्णानां तया-' इत्याद्युदात्ते प्राप्ते घृतादित्वादन्तोदात्तम्। अलंशब्दो निपातत्वादाद्युदात्तः। बुसशब्दः प्रातिपदिकस्वरेणान्तोदात्तः। अलम्बुसशब्दः फिट्स्वरेणान्तोदात्तः। तत्र भाषायां यद्येकश्रुतिर्न स्यात्तर्हि स्वरभेदे कथमेकवाक्यं द्वयर्थं स्यात्। न सु। सुब्रह्मण्याख्ये निगदे इति। अपादबन्धे गदिर्वर्तते। यथा गद्यमिति। निःशब्दः प्रकर्षे। उच्चैरपादबन्धं यजुरात्मकं यन्मन्त्रवाक्यं पठ्यते स निगदः। नितरां गद्यते इति कर्मणि 'नौ गदनद-' इत्यप्। तस्य च सुब्रह्मण्यशब्दोपलक्षकत्वात् सुब्रह्मण्याशब्दोऽपरित्यक्तलौकिक एव निगदविशेषस्य नाम। सुब्रह्मण्योमिति। 'तत्र साधुः' इति यत्। 'तित्स्वरितं' 'यतोऽनावः' इति तु न, तत्र 'दूरुयच' इत्यनुवृत्तेः, टापा सहैकादेशः। 'स्थानेऽन्तरतमः' इति स्वरितः। ततो निपातत्वादाद्युदात्तेन ओमशब्देन 'ओमाङोश्च' इत्युदात्तस्वरितयोरेकादेशः स्वरित एवेति हरदत्तादयः। असाविति प्रथमान्तस्योपलक्षणम्। तदाह—प्रथमान्तस्येति। गार्ग्य इति। 'गर्गादिभ्यो यञ्'। अमुष्येति। षष्ठ्यन्तस्योपलक्षणम्। दाक्षेरिति। दक्षशब्दादपत्येऽत इञ्। अत्रापि ञित्स्वरः प्राप्तः। स्यान्तस्येति। स्येति रूपं विवक्षितं, पूर्ववार्तिकारम्भात्। स्यशब्दान्तस्योपोत्तममन्त्यश्चोभयमुदात्तं भवति। देवब्रह्मणो। सुब्रह्मण्यायामेव 'देवा ब्रह्माण' इति पठ्यते। तत्र पूर्वेण स्वरितस्योदात्त

१।२।३८॥ अनयोः स्वरितस्याऽनुदात्तः स्यात्सुब्रह्मण्यायाम् । देवा ब्रह्माण आगच्छतः । ३६६८ **स्वरितात्संहितायामनुदात्तानाम्** १।२।३९॥ स्वरितात्परेषामनुदात्तानां संहितायामेकश्रुतिः स्यात् । इमं मे गङ्गे यमुने सरस्वति । ३६६९ **उदात्तस्वरितपरस्य सन्नतरः** १।२।४०॥ उदात्तस्वरितौ परौ यस्मात्तस्यानुदात्तस्यानुदात्ततरः स्यात् । सरस्वति शुतुद्रि । व्यचक्षयत्स्वः 'तस्य परमाम्रेडितम्' (सू ८३) । ३६७० **अनुदात्तं च** ८।१।३॥ द्विरुक्तस्य परं रूपमनुदात्तं स्यात् । दिवे दिवे । इति साधारणस्वराः ।

प्राप्तेऽनेनानुदात्तो विधीयते । देवा ब्रह्माण इति । देवब्रह्मणोर्वैयधिकरण्ये द्वयोरप्युदात्तत्वम् । ततः परस्यानुदात्तस्य स्वरितः । तस्यानेनानुदात्तः । आमन्त्रितनिघातस्तूत्तरस्य न । पूर्वामन्त्रिताऽविद्यमानत्वेन पदात्परत्वाऽभावात् । यदा तु सामानाधिकरण्यं तदा 'विभाषितं विशेषवचने' इति पूर्वस्य पक्षे विद्यमानत्वात् पदात्परत्वाद् ब्रह्माण इत्यस्य निघातोऽपि भवति । अस्मिन् पक्षे देवशब्दे वशब्दस्यैवानेनानुदात्तत्वं विधेयम् । ब्रह्मग्रहणं तु न कर्तव्यम् । स्वरिति । अनुदात्तानामिति । जातौ बहुवचनम् । तेनैकस्य द्वयोर्बहूनां च भवति । एकस्य पचति । द्वयोः अग्निमीळे पुरोहितम् । बहूनां तु मूल एव दर्शितम् । इमं मे इति । इदमशब्दः प्रातिपदिकस्वरेणान्तोदात्तः । विभक्तिरनुदात्ता । त्यदाद्यत्वे 'अमि पूर्वः' एकादेश उदात्तः । मे इत्यनुदात्तम् । 'अनुदात्तं सर्वमपादौ' इत्यधिकारात्तस्य 'उदात्तादनुदात्तस्य स्वरितः' । तस्मात्परेषां गङ्गेप्रभृतीनामुदात्तानामेकश्रुतिः । सर्व एते आमन्त्रितनिघाताऽनुदात्ताः । ननु मे इत्यस्य स्वरितस्य उदात्तविधायकं प्रति त्रिपादीस्थत्वादसिद्धत्वं स्यात् । न च स्वरितादित्याश्रयात्सिद्धम् । 'क्व वः सुम्ना' इत्यादौ चरितार्थत्वादिति चेन्मैवम्, 'तस्यादितः—' इत्यारभ्य नवसूत्र्याः स्वस्थानादुत्कृष्य शास्त्रान्ते भाष्यवार्तिकयोर्निवेशात् । 'न सुब्रह्मण्यायाम्' इति सूत्रे 'स्वरितस्य तूदात्त' इति वदता एव काण्डोत्कर्षस्य ज्ञापितत्वाच्च । न च सुब्रह्मण्योमिति सिद्धः स्वरिताऽस्तीति वाच्यम् । तत्र 'एकादेश उदात्तेन-' इति सूत्रप्रवृत्तेरावश्यकत्वात् । तत्र ह्युदात्तस्य ग्रहणं नानुवर्तते । उदात्त। सन्नशब्देन नीचैरर्थ उच्यते । तेन स्वनुदात्तत्वं लक्षयत इत्याह—अनुदात्ततर इति । प्रकर्षस्त्वन्यानुदात्तापेक्षः । सरस्वतीत्यादि । अत्र मेशब्दमाश्रित्य सरस्वतीत्यस्यामन्त्रितनिघातः । शुतुद्रिशब्दस्य तु न, पादादित्वात् । 'आमन्त्रितस्य' इति षाष्ठेन शुतुद्रीत्यस्योदात्तं प्रथममक्षरं तस्मिन्परे पूर्वस्य सरस्वतीकारस्य सन्नतरः । व्यचक्षयत्स्व इति । वीति उपसर्गत्वादाद्युदात्तः । ततः परस्याऽचक्षयदिति तिङन्तस्य 'तिङ्ङतिङः' इति निघातः । स्वरिति । 'न्यङ्क्वादीनां स्वरिता' इति स्वरितः, तस्मिन् परे यकारस्य सन्नतरः । साधारणस्वरा इति । एकस्मिन् पदे

अथ धातुस्वराः । २९ ।

३६७१ धातोः ६।१।१६२॥ अन्त उदात्तः स्यात् । गोपायतं नः । असि सत्यः । ३६७२ स्वपादिर्हिंसामच्यनिटि ६।१।१८८॥ स्वपादीनां, हिंसेरभ्यासोऽनिट्यजादौ लसार्वधातुके परे आदिरुदात्तो वा स्यात् । स्वपादिरदाद्यन्तर्गणः । स्वपन्ति । श्वसन्ति । हिंसन्ति । पक्षे प्रत्ययस्वरेण मध्योदात्तता । कृडित्येवेष्यते । नेह । स्वपानि । हिनसानि । ३६७३ अभ्यस्तानामादिः ६।१।१८९॥ अनिट्यजादौ लसार्वधातुके परे अभ्यस्तानामादिरुदात्तः । ये दर्दति प्रिया वसु । परत्वाच्चित्स्वरमयं बाधते । दधाना इन्द्रं । ३६७४ अनुदात्ते च ६।१।१९०॥

पदद्वयेऽपि च वर्तमानत्वात्साधारण्यम् । 'आद्युदात्तश्च' 'ञ्नित्यादिर्नित्यम्' इत्यादयस्तु एकस्मिन्नेव पदे वर्तमानत्वान्न साधारणाः । इति साधारणस्वराः ।

प्रकृतिर्द्विधा । धातुः प्रातिपदिकं च । तत्र धातुस्वरानाह—धातोरिति । 'कर्षात्वतः-' इत्यत अन्त उदात्त इत्यनुवर्तते । तदाह-अन्त उदात्त इति । गोपायेति । यकारोऽकारस्योदात्तत्वे तमित्यस्य 'तास्यनुदात्तेत्-' इत्यनुदात्तत्वे 'उदात्तादनुदात्तस्य—' इति स्वरितः । बहुवचनस्य वस्नसौ इति नसादेशस्य, 'स्वरितात्संहितायाम्—' इति प्रचयापरपर्याया एकश्रुतिः । असीति । अस्तेः सिप् । 'तासस्त्योः-' इति सलोपः । अकारस्योदात्तत्वम् । ततः परस्य स्वरितः । सत्यशब्दे सकारस्य 'उदात्तस्वरितपरस्य' इत्यनुदात्ततरादेशः । स्वपादि । 'तास्यनुदात्तेत्-' इत्यतः लसार्वधातुकमित्यनुवर्तते तदन्यनिटीति सम्बन्धादिदं सप्तम्यन्तं सम्पद्यते । तदाह—अनिट्यजादाविति । अदाद्यन्तर्गण इति । आ गणान्तादिति भावः । हिंसन्तीति । हिंसि हिंसायां रुधादिः । 'श्नाभ्यस्तयोरातः' 'श्नसोरल्लोपः' । ङित्त्वेवेष्यत इति । कृत्यनुरोधादेतदुक्तम् । भाष्ये तु प्रायेणेदं न दृश्यते । एवं च हिनसानीत्यत्रादूयुदात्तत्वमपि पक्षे भवति । यदि तु आदूयुदात्तत्वं पक्षे नेष्यते, तर्हि व्यवस्थितविभाषाश्रयणान्न । केचित्तु स्वपानीत्यत्रैतदभावे धातुस्वरेणाद्युदात्तत्वमेवेति विशेषाऽभावादयं विधिर्न प्रवर्तते, तत्साहचर्याद्धिनसानीत्यत्राप्ययं न प्रवर्तते इति वृत्तिकाराशयं कल्पयन्ति । हिनसानीति । अत्र श्नमः 'तन्मध्यपतितस्तद्ग्रहणेन गृह्यते' इति न्यायाद् धातुग्रहणे नकारोऽकार उदात्तः । ततः परस्य स्वरितत्वम् । आनटि किम् । स्वपितः । 'रुदादिभ्यः सार्वधातुके' इतीट् । अभ्यस्तानाम् । 'आदि सिचोऽन्यतरस्याम्' इत्यतः आदिरिति वर्तमाने पुनरादिग्रहणं नित्यार्थम् । अन्यथाऽऽदिग्रहणसम्बद्धमन्यतरस्यांग्रहणमनुवर्तेत । अचि किम् । दद्यात् । अनिटि किम् । जक्षिथ । ये ददतीति । डुदाञ् दाने लटि झिः । तस्य 'अदभ्यस्तात्' इत्यदादेशः । 'श्नाभ्यस्तयोः' इत्याकारो

अविद्यमानोदात्ते लसार्वधातुके परेऽभ्यस्तानामादिरुदात्तः । दधासि रत्नं द्रविणं च दाशुषे । ३६७५ भीह्रीभृहुमदजनधनदरिद्राजागरां प्रत्ययात्पूर्वं पिति ६।१।१९२॥ भीप्रभृतीनामभ्यस्तानां पिति लसार्वधातुके परे प्रत्ययात्पूर्वमुदात्तं स्यात् । योऽग्निहोत्रं जुहोति । ममत्तु नः परिज्मा । जजनत् । माता यद्वीरं दधनत् । जागर्षि त्वम् । ३६७६ लिति ६।१।१९३॥ प्रत्ययात्पूर्वमुदात्तम् । चिकीर्षकः । ३६७७ आदिर्ञमुण्यन्यतरस्याम् ६।१।१९४॥ अभ्यस्तानामा-

---

दिः । चित्स्वरमिति । 'चितः' इत्यनेन विहितमन्तोदात्तस्वरमित्यर्थः । दधानेति । लटः शानजादेशः । अनुदात्ते च । न विद्यते उदात्तो यस्मिन्निति बहुव्रीहिस्तदाह—अविद्यमानेत्यादि । अन्यथा हि शास्त्रीयेऽनुदात्ते गृह्यमाणे 'मा हि स्म दधादित्यत्र नित्यत्वादन्तरङ्गत्वाद्धा इकारलोपे कृते आद्युदात्तत्वं न स्यात् । बहुव्रीहौ विज्ञाते तु भवति । हिशब्दो 'हि च' इति निघातनिषेधार्थः । भीह्रो । आद्युदात्तस्यापवादोऽयम् । तत्र मदिदिवादिः । दरिद्राजाप्रावदादी । अन्ये तु जुहोत्यादयः । उदाहरणानि—बिभेति जिहेति बिभर्ति । 'भृञामित्' इत्यभ्यासस्येत्वम् । ममत्विति । मदेर्लोट् 'बहुलं छन्दसि' इति शपः श्लुः । जजनत, दधनदिति । जन जनने, धन धान्ये । आभ्यां लेट् तिप् 'इतश्च' इतीकारलोपः 'लेटोऽडाटौ' इत्यट् । दरिद्राति । जागर्ति । पिति किम् । दरिद्रति अत्र परत्वादाकारलोपे कृते इकारस्योदात्तत्वं मा भूत् । ननु पूर्वग्रहणं व्यर्थम्, प्रत्यये पितीत्येवोक्ते 'तस्मिन्निति निर्दिष्टे' इति पूर्वस्यैव भविष्यति । न च पितः पूर्वमेव कार्यमाश्रयेत्यथा स्यात् पिदन्तं मा भूदित्येवमर्थं तदिति वाच्यम् । कथं पुनः सप्तमीनिर्देशे तदन्तस्य प्रसङ्गः । एतदेव ज्ञापयति 'सौवर्यः सप्तम्यस्तदन्तसप्तम्य' इति । तेन 'उपोत्तमं रिति' रिप्रत्ययान्ते उपोत्तममुदात्तं भवति । 'चङ्यन्यतरस्यां' चङन्तस्येत्यर्थो, न तु रिति परतश्चङि परत इति । नन्वेवं 'चतुरः शसि' इत्यत्रापि शसन्तस्य प्राप्नोति शसग्रहणसामर्थ्यान्न भविष्यति । यदि हि 'चतुरः शसि' इत्यनेन शस उदात्तत्वमिष्टं स्यात्तत 'ऊडिदंपदाद्य' इत्यस्याऽनन्तरं चतुरश्चेत्येव ब्रूयात् । तत्राऽसर्वनामस्थानग्रहणानुवृत्त्या 'षट्त्रिभ्यर्थो हलादिः' इति हलादेरुदात्तविधानाच्च शस एव भविष्यति । लिति । पूर्वसूत्रात्प्रत्ययात्पूर्वमिति वर्तते । तदाह—प्रत्ययात्पूर्वमिति । तेन स्वरविधौ सप्तम्यास्तदन्तत्वज्ञापनात् लिदन्तस्य स्वरो न शङ्कनीयः । चिकीर्षक इति चिकीर्षेति सन्नन्ताण्वुल् तस्याऽकादेशः । सनोऽतो लोपः । ककारेकार उदात्तः । नचाऽलोपस्य स्थानिवत्त्वम् । स्वरविधौ तन्निषेधात् । क्वचित् स्तकेभौरिकिविधम् एषुकारिभक्तमिति दृश्यते । तत्र 'भौरिक्याद्येषुकार्यादिभ्यो विधल्भक्तलौ' इति विधल्भक्तलौ प्रत्ययौ 'तेन दीव्यति खनति जयति जितम्' इत्यस्मिन्नर्थे यथाक्रमं भौरिकिशब्दादेषुकारिशब्दाच्च विधलभक्तलौ ज्ञेयौ

दिरुदात्तो वा णमुलि परे । लोलूयं लोलूयम् । पक्षे लित्स्वरः । ३६७८ अचः कर्तृयकि ६।१।१६५॥ उपदेशेऽजन्तानां कर्तृयकि परे आदिरुदात्तो वा । लूयते केदारः स्वयमेव । ३६७९ चङ्यन्यतरस्याम् ६।१।२१८॥ चङन्ते धातावुपोत्तममुदात्तं वा । मा हि चीकरताम् । धात्वकार उदात्तः । पक्षान्तरे चङुदात्तः ।

इति धातुस्वराः ।

अथ प्रातिपदिकस्वराः । ३० ।

३६८० कर्षात्वतो घञोऽन्त उदात्तः ६।१।१५९॥ कर्षतेर्धातोराकारवतश्च घञन्तस्यान्त उदात्तः स्यात् । कर्षः । शपा निर्देशात्तुदादेरायुदात्त एव । कर्षः । पाकः । ३६८१ उञ्छादीनां च ६।१।१६०॥ अन्त उदात्तः स्यात् । उञ्छादिषु युगशब्दो घञन्तोऽगुणो निपात्यते कालविशेषे रथावयवे च । वैश्वानरः

आदिर्णमुलि । अभ्यस्तानामिति । यद्यपि लोलूयमिति प्रतीकमुपादाय एकाक्षु धातुषु, लित्स्वरस्याऽस्य च विशेषाऽभावादनेकाजुदाहृत इति हरदत्तप्रन्थादभ्यस्तेति निवृत्तमिति प्रतीयते, तथाप्यार्थिकार्थकथनपरतया नेयम् । णमुलि पर इति । यद्यपि 'सौवर्यः सप्तम्यस्तदन्तसप्तम्य' इति 'भीही—'इति सूत्रे व्यवस्थापितत्वात् णमुलन्तस्याऽदिरुदात्तो भवतीति सूत्रार्थेन भाव्यं, तथापि फले विशेषाऽभावादेवमुक्तमिति प्रतिभाति । लोलूयं लोलूयमिति । यङन्ताण्णमुल् । 'नित्यवीप्सयोः' इति द्वित्वम् । अत्र प्रथमो लोलूयशब्द आद्युदात्तः । लू इति स्वरितः । ततश्चत्वारः प्रचयाः । अचः । इह कीर्यंत इत्यादौ इत्वे रपरत्वे च सति अयं स्वर इष्टस्तन्निर्वाहार्थं 'तास्यनुदात्तेत्—' इति सूत्रे समासैकदेशोऽप्युपदेशशब्दः इहानुवर्तते सप्तम्या च विपरिणम्यते । तदाह उपदेशेऽजन्तानामिति । नन्वेवम् 'एकं द्वादशधा जज्ञे' इत्यादाविवाऽन्तभूतण्यन्तात्कर्मकर्तृविषयात् । जनेर्लटि 'जायते स्वयमेवेत्यत्रैष स्वरो न स्यात् । 'ये विभाषा' इत्यात्वे सति उत्तरकालमजन्तत्वेऽपि उपदेशेऽनजन्तत्वादिति चेन्मैवम् । ये इति विषयसप्तमीमाश्रित्य प्रत्ययोत्पत्तेः प्रागेवाऽऽत्वप्रवृत्तेरित्याहुः । कर्तृयकीति । कर्तृवाचिनि सार्वधातुके विहितो यो यक् तस्मिन् परे । लूयत इति । आदिमध्यौ पर्यायेणोदात्तौ 'तस्यानुदात्तेत्' इति ते इत्यस्याऽनुदात्तत्वम् । चङ्यन्यतरस्याम् । 'उपोत्तमं रिति' इत्यतः उपोत्तममिति वर्तते तदाह—उपोत्तममिति । व्यादीनामन्त्यमुत्तमं तस्य समीपमुपोत्तमम् । मा हि चीकरतामिति । अदुपदेशात्परत्वेन लसार्वधातुकानुदात्तत्वे कृते चङ एव स्वरे प्राप्ते पक्षे धात्वकार उदात्तः । उपोत्तमग्रहणाऽनुवृत्त्या द्वयोर्न । मा हि दधत् । अत्र 'विभाषाधेट्श्व्योः' इत्यप्यापवादः । इति चङ् । इति धातुस्वराः ।

कर्षाऽऽत्वतः । 'ञ्नित्यादिर्नित्यम्' इत्यस्यापवादः । आदस्यास्तीति आत्वान् । 'तसौ मत्वर्थे' इति भत्वाज्झत्वाभावः । कर्षश्चाऽऽत्वांश्चेति समाहारद्वन्द्वः । कर्ष

कुशिकेभिर्युगेयुगे। अन्यत्र। योगेयोगे तवस्तरम्। भक्षशब्दो घञन्तः। गावः सोमस्य प्रथमस्य भक्षः। उत्तमशश्वत्तमावपि। उदुत्तमं वरुण। शश्वत्तममीळते। **३६८२ चतुरः शसि ६।१।१६७॥** चतुरोऽन्त उदात्तः शसि परे। चतुरः कल्पयन्तः। 'अचि र' (सू २९९) इति रादेशस्य पूर्वविधौ स्थानिवत्त्वान्नेह। चतस्रः पश्य। चतेरुरन्। निस्वादाद्युदात्तता। **३६८३ झल्युपोत्तमम् ६।१।१८०॥** षट्त्रिचतुर्भ्यो या झलादिर्विभक्तिस्तदन्ते पदे उपोत्तममुदात्तं स्यात्। अध्वर्युभिः पञ्चभिः। नवभिर्वोजैर्नवती च। सप्तभ्यो जायमानः। आदशभिर्विवस्वतः। उपोत्तमं किम्। आ षड्भिर्हूयमानः। विश्वैर्देवैस्त्रिभिः। झलि किम्। नवानां नवतीनाम्। **३६८४ विभाषा भाषायाम् ६।१।१८१॥** उक्तविषये। **३६८५ सर्वस्य सुपि ६।१।१९१॥** सुपि परे सर्वशब्दस्याऽऽदिरुदात्तः स्यात्। सर्वे नन्दन्ति यशसा। **३६८६ ञ्नित्यादिर्नित्यम् ६।१।१९७॥** ञिदन्तस्य निदन्तस्य चा-

---

इति शबन्तस्यानुकरणं न घञन्तस्य। तदाह—शपो निर्देशादिति। पाक इति। पचेर्घञ्। 'चजोः' इति कुत्वम्। कालविशेष इति। कृतद्वापरादौ। भक्षशब्द इति। भक्ष अदने चुरादिः। 'अनित्यण्यन्ताश्चुरादयः' इति यदा णिच् नास्ति तदा घञ्, ण्यन्तात्तु 'एरच्' इत्यचि सिद्धम्। एरजण्यन्तानामिति तु नास्तीत्याहुः। उत्तमशश्वत्तमाविति। तमबन्तावेतौ। तेन द्रव्यप्रकर्षविवक्षायामाममावः। द्विरवानुदात्तत्वे प्राप्ते पाठः। चतुरः। 'चतेरुरन्' निस्वादाद्युदात्तत्वे प्राप्तेऽन्तोदात्तार्थमिदम्। ननु 'चतस्रः पश्येत्यत्र चतस् अस् इति स्थिते परत्वात् 'अचि र ऋतः' इति रेफादेशे तकारोऽकारस्योदात्तत्वं प्राप्नोति। अत आह—अचि र इति। स्थानिवत्त्वादिति। न च स्वरविधौ स्थानिवत्त्वनिषेधः। 'स्वरादौर्घयलोपेषु लोपाऽऽदेश एव न स्थानिवत्' इति नियमात्। झल्युपोत्तमम्। 'षट्त्रिचतुर्भ्यो हलादिः' इत्यस्यापवादः। पञ्चभिरित्यादि। पञ्चनवसप्तदशशब्दाः कनिनन्ताः। आषड्भिरिति। षटशब्दः फिट्स्वरेणाऽन्तोदात्तः। 'तनोतेर्ड्रिः' त्रिः। अयमपि फिट्स्वरेण प्रत्ययस्वरेण वाऽन्तोदात्तः। उभयत्रापि 'षट्त्रिचतुर्भ्यो हलादिः' इति विभक्तेरुदात्तत्वम्। नवानामिति। अत्रापि विभक्तिरुदात्ता। विभाषा। उक्तविषय इति। षट्त्रिचतुर्भ्यः परा या झलादिर्विभक्तिस्तदन्तस्योपोत्तमं भाषायामुदात्तं वा स्यात्। पञ्चभिः सप्तभिः तिसृभिः चतुर्भिः। पक्षे 'षट्त्रिचतुर्भ्यो हलादिः' इत्यन्तोदात्तानि। सर्वस्य। सर्वशब्द उञ्छादिष्वन्तोदात्तो निपातितः। सर्वस्य विकारः सार्वं इत्यत्र 'अनुदात्तादेरञ' इत्यनुदात्तलक्षणोऽञ् यथा

दिरुदात्तः स्यात्। यस्मिन्विरवानि पौंस्या। पुंसः कर्मणि ब्राह्मणादित्वात् ष्यञ्। सुते दधिष्व नश्चनः। चायतेरसुन् (उ० सू०) **'चायेरन्ने ह्रस्वश्च'** इति चकारादसुनो नुडागमश्च। **३६८७ पथिमथोः सर्वनामस्थाने ६।१।१९९॥** आदिरुदात्तः स्यात्। अयं पन्थाः। सर्वनामस्थाने किम्। ज्योतिष्मतः पथो रक्ष। उदात्तनिवृत्तिस्वरेणाऽन्तोदात्तं पदम्। **३६८८ अन्तश्च तवै युगपत् ६।१।२००॥** तवैप्रत्ययान्तस्याऽऽद्यन्तौ युगपदाद्युदात्तौ स्तः। हर्षस् दातवा उ। **३६८९ क्षयो निवासे ६।१।२०१॥** आद्युदात्तः स्यात्। स्वे क्षये शुचिव्रत। **३६९० जयः करणम् ६।१।२०२॥** करणवाची जयशब्द आद्युदात्तः स्यात्। जयत्यनेन जयोऽश्वः। **३६९१ वृषादीनां च ६।१।२०३॥** आदिरुदात्तः। आकृतिगणोऽयम्। वाजेभिर्वाजिनीवती। इन्द्रं वाणीः। **३६९२ संज्ञायामुपमानम् ६।१।२०४॥** उपमानशब्दः संज्ञायामाद्युदात्तः। चञ्चेव चञ्चा। कनोऽत्र लुप्। एतदेव ज्ञापयति 'क्वचित्स्वरविधौ प्रत्ययलक्षणं ने'ति। संज्ञायां किम्।

स्यात्। श्रवणं तु सर्वत्राऽनुदात्तस्यैव, प्रत्ययलक्षणेनाऽपि सर्वस्वरस्येष्यमाणत्वात्। ञ्नित्यादि। 'भीह्री' इति सूत्रे पूर्वग्रहणेन 'सौवर्यः सप्तम्यस्तदन्तसप्तम्य' इति ज्ञापितत्वात् तदन्तसप्तमीयमित्याह। अदन्तस्येति। पथिमथोः। गमेरिनिः। उषः कित्। मन्थः। 'पतेः स्थ च' इतीनिप्रत्ययान्तावेतावन्तोदात्तौ। मन्थः किरसादुपधालोपः। पन्था इति। 'पथिमथ्यृभुक्षामात्' 'थो न्थः'। पथ इति। अस्य टेर्लोपः। उदात्तनिवृत्तिस्वरेणेति। 'अनुदात्तस्य च यत्रोदात्तलोपः' इति विभक्तिरुदात्ता। दातवा उ इति। ददातेः 'कृत्यार्थे तवकेन्केन्यत्वनः' इति तवैप्रत्ययः। ऐकारस्याऽऽयादेशः। 'लोपः शाकल्यस्य' इति यलोपः। युगपद्ग्रहणं पर्यायनिवृत्त्यर्थम्। अन्यथा 'एकवर्जमि'ति वचनाद्यौगपद्यं न स्यात्। क्षयो। निवासेऽभिधेये क्षयशब्द आद्युदात्तः। स्वे क्षये इति। क्षि निवासगत्योः। क्षयन्ति निवसन्ति यस्मिन्नित्यधिकरणे 'पुंसि संज्ञायाम्-' इति घः। निवासे किम्। व्याधेः क्षयः। क्षि क्षये 'एरच्'। कर्तरि षष्ठी। जयः। जयोऽश्व इति। पुंसीति करणे घः। करणे किम्। जयो ब्राह्मणानाम्। भावे 'एरच्'। वृषादीनाम्। वृषु सेचने इगुपधलक्षणः कः। वाजेभिरिति। वजेर्घञ्। 'कर्षात्वतः-' इत्यन्तोदात्ते प्राप्ते वृषादेराकृतिगणत्वादाद्युदात्तः। संज्ञायाम्। चञ्चेति। उपमानशब्दोऽयमुपमेयस्य संज्ञा। कनो लुबिति। 'इवे प्रतिकृतौ' इति कनो 'लुम्मनुष्ये' इति लुप्। ननु प्रत्ययलक्षणेन नित्यत्वात् 'ञ्नित्यादिर्नित्यम्' इत्यनेन सिद्धमत आह—एतदेवेति।

अग्निर्माणवकः । उपमानं किम् । चैत्रः । **३६९३ निष्ठा च द्व्यजनात् ६।१।२०५॥** निष्ठान्तस्य द्व्यचः संज्ञायामादिरुदात्तो, न त्वाकारः । दत्तः । द्व्यच् किम् । चिन्तितः । अनात्किम् । त्रातः । संज्ञायामित्यनुवृत्तेर्नेह । कृतम् । हृतम् । **३६९४ शुष्कधृष्टौ ६।१।२०६॥** एतावाद्युदात्तौ स्तः । असंज्ञार्थमिदम् । अतसं न शुष्कम् । **३६९५ आशितः कर्ता ६।१।२०७॥** कर्तृवाची आशितशब्द आद्युदात्तः । कृष्णश्चित्फाल आशितम् । **३६९६ रिक्ते विभाषा ६।१।२०८॥** रिक्तशब्दे वाऽऽदिरुदात्तः । रिक्तः । संज्ञायां तु 'निष्ठा च द्व्यजनात्' (सू ३६९३) इति नित्यमाद्युदात्तत्वं पूर्वविप्रतिषेधेन । **३६९७ जुष्टार्पिते च छन्दसि ६।१।२०९॥** आद्युदात्ते वा स्तः । **३६९८ नित्यं मन्त्रे ६।१।२१०॥** एतत्सूत्रं शक्यमकर्तुम् । जुष्टो दमूनाः । षळर आहुरर्पितम् । इत्यादेः पूर्वेणैव सिद्धेः । छन्दसि पाठस्य व्यवस्थिततया विपरीताऽऽपादनाऽयोगात् । अर्पिताः षष्टिर्न चला चलासः । इत्यत्राऽन्तोदात्तदर्शनाच्च । **३६९९ युष्मदस्मदोर्ङसि ६।१।२११॥** आदिरुदात्तः स्यात् । नहिषस्तव नो मम । **३७०० ङयि च ६।**

निष्ठा । दत्त इति । ददातेः क्तः 'दो दद्घो'इति दतादेशः । चिन्तित इति । चिति स्मृत्याम् । चुरादिः । कृतं हृतमिति । प्रत्ययस्वरेणान्तोदात्तावेतौ । असंज्ञार्थमिति । संज्ञायां तु 'निष्ठा च द्व्यजनात्' इत्येव सिद्धम् । शुष्कमिति । शुषेः क्तः । तस्य 'शुषः कः' इति कादेशः । आशितः । कर्तृवाचीति । आङ्पूर्वादश भोजनेऽस्मात्कर्तरि क्तो निपात्यते । अपर आह । कर्तर्यनेन भूतपूर्वगत्या अर्थो कर्ता णौ कर्मीभूत एव विवक्षितः । तथा चाशेर्ण्यन्तस्य प्रयोज्यकर्तरि 'गतिबुद्धिप्रत्यवसानार्थ' इति कर्मसंज्ञके निष्ठायामाशित' इति रूपमिति । रिक्त इति । रिचिर् विरेचने । संज्ञायामित्यादि । 'निष्ठा च द्व्यजनात्' इत्यस्यावकाशः । गुप्तः । अस्य त्ववकाशः असंज्ञायां 'रिक्तो घटः' इति । संज्ञायामुभयप्रसङ्गे पूर्वविप्रतिषेधः रिक्तो नाम कश्चित् । जुष्टार्पिते । जुष्टः । अर्पितः इत्येते शब्दरूपे छन्दसि विषये आद्युदात्ते वा स्तः । जुषी प्रीतिसेवनयोः क्तः । 'श्वीदितो निष्ठायाम्' इतीण्निषेधः । जुष्टः । अर्तेर्णिच् । 'अर्ति—' इत्यादिना पुक् । अर्पितः । नित्यं । जुष्टार्पिते शब्दरूपे मन्त्रविषये नित्यमाद्युदात्ते स्तः । पूर्वेणैव सिद्धेरिति । ननु ऽषेऽन्तोदात्तत्वमपि प्राप्नोतीत्याशङ्क्याह—छन्दसीत्यादि । न केवलं गतार्थत्वमात्रं किं त्वारभ्यमाणे सूत्रे दोषोऽप्यस्तीत्याह—अर्पिताः षष्टिरित्यादिना । युष्मदस्मदोः । 'युष्मत्तत्समित्यां मदिक्' इति मदिक्प्रत्ययान्तोदात्तौ । ममेति । 'युष्मदस्मद्भ्यां ङसोऽश्' 'तवममौ ङसि' इति मपर्यन्तस्य ममादेशः । शेषे लोपः । 'अतो गुणे' इति पररूप-

१।२१२॥ तुभ्यं हिन्वानः । मह्यं वातः पक्ताम् । ३७०१ **यतोऽनावः ६।१।२१३॥** यत्प्रत्ययान्तस्य द्व्यच आदिरुदात्तो नावं विना । युज्यन्तेऽस्य काम्या । कर्मेण्डन्तादचो यत् । [अनावः किम् । नवतिं नाव्यानाम् ।] ३७०२ **ईडवन्दवृशंसदुहां ण्यतः ६।१।२१४॥** एषां ण्यदन्तानामादिरुदात्तः । ईड्यो नूतनैरुत । आजुह्वान ईड्यो वन्द्यश्च । श्रेष्ठं नो धेहि वार्यम् । उक्थमिन्द्राय शंस्यम् । ३७०३ **विभाषा वेण्विन्धानयोः ६।१।२१५॥** आदिरुदात्तो वा । इन्धानो अग्निम् । ३७०४ **त्यागरागहासकुहश्वठक्रथानाम् ६।१।२१६॥** आदिरुदात्तो वा । आद्यास्त्रयो घञन्ताः । त्रयः पचाद्यजन्ताः । ३७०५ **मतोः पूर्वमात्संज्ञायां स्त्रियाम् ६।१।२१९॥** मतोः पूर्वमाकार उदात्तः स्त्रीनाम्नि । उदुम्बरावती । शरावती । ३७०६ **अन्तोऽवत्याः ६।१।२२०॥** अवतीशब्दस्याऽन्त

त्वम् 'एकादेश उदात्तेनोदात्तः' इति विभक्तेरुदात्तत्वे प्राप्ते इदमुच्यते । ङयि च । योगविभागो यथासंख्यनिवृत्त्यर्थः । तुभ्यं मह्यमिति । 'ङे प्रथमयोरम्' । 'तुभ्यमह्यौ ङयि' । यतो 'तिस्वरितम्' इत्यस्यापवादः । 'निष्ठा च द्व्यजनात्' इत्यतो द्व्यजनुवर्तते । तदाह—द्व्यच इति । अत्र 'अनावः' इति निषेधो ज्ञापयति 'स्वरविधौ व्यञ्जनमविद्यमानवत्' इति । अन्यथा य आदिर्नकारो नासौ स्वरयोग्यः, यश्च स्वरयोग्य आकारो नासावादिरिति प्रतिषेधोऽनर्थकः स्यात् । अनावः किम् । नावा तार्यं नाव्यम् । 'नौवयोधर्म—' इति यत् । द्व्यच् किं, चिकीर्ष्यम् । उभयत्रापि तिस्वरः । ईडवन्द । ईड स्तुतौ, वदि अभिवादनस्तुत्योः, वृङ् सम्भक्तौ, शंसु स्तुतौ, दुह प्रपूरणे । ण्यतो द्व्यनुबन्धकत्वाद्यदुग्रहणेन ग्रहणं न प्राप्नोतीति वचनम् । ईड्य इत्यादि । 'ऋहलोः-इति ण्यत् । कार्यमिति । नन्वत्र 'एतिस्तुशास्वृ—' इत्यादिना विशेषविहितेन वयपा भाव्यमिति चेत्सत्यम् । क्यबूविधौ वृञ एव ग्रहणं नास्ये'ति मूल एव स्पष्टम् । विभाषा । वेणुशब्दो निःस्वरेणं नित्यमाद्युदात्तः प्राह्वः । 'स्थो णुः' इत्यनुवर्तमाने 'अजिशुरीभ्यो नित्च' इति व्युत्पादनात् । इन्धानशब्दो यदि चानशन्तस्तदा निस्वादन्तोदात्तः । यदा शानजन्तस्तदा ञसार्वधातुकानुदात्तत्वे कृते उदात्तनिवृत्तिस्वरेण मध्योदात्तः । 'श्नसोरल्लोपः' इति उदात्तस्य श्नसोऽकारस्य लोपात सर्वथाऽप्यप्राप्तमाद्युदात्तत्वं पक्षे विधीयते । त्यागराग । त्यज हानौ । 'चजोः—' इति कुत्वम् । रञ्ज रागे 'घञि च भाव-' इति नलोपः । हसे हसने एषां पक्षे 'कर्षात्वतो घञोऽन्त उदात्तः' इति भवति । त्रयः पचाद्यजन्ता इति । कुह विस्मापने, श्वठ असम्यग्भाषणे, चौरादिकावदन्तौ । क्रथ हिंसायाम् । अत्र प्रत्ययस्वरेणाऽन्तोदात्तत्वं पक्षे भवति । मतोः ।

उदात्तः । वेत्रवती । ङीपः पित्त्वादनुदात्तत्वं प्राप्तम् । ३७०७ ईवत्याः ६।१।२२१॥ ईवत्यन्तस्यापि प्राग्वत् । अहीवती । मुनीवती । इति प्रातिपदिकस्वराः ।

अथ फिट्सूत्राणि । ३१ ।

प्रथमपादः ।

१ फिषोऽन्त उदात्तः । प्रातिपदिकं फिट् । तस्यान्त उदात्तः स्यात् । उच्चैः ।

२ पाटलाऽपालङ्काम्बासागरार्थानाम् । एतदर्थानामन्त उदात्तः । पाटला, फलेरुहा, सुरूपा, पाकलेति पर्यायाः । 'लघावन्त' इति प्राप्ते । अपालङ्क, व्याधिघात, आरेवत, आरग्वधेति पर्यायाः । अम्बार्थः । माता । उमर्वन्नन्तानामित्यायुदात्तत्वे प्राप्ते । सागरः । समुद्रः ।

३ गोहार्थानामस्त्रियाम् । गेहम् । 'नब्विषयस्येति' प्राप्ते । अस्त्रियां किम् । शाला । आद्युदात्तोऽयम् । इहैव पर्युदासाज्ज्ञापकात् ।

४ गुदस्य च । अन्त उदात्तः स्यान्न तु स्त्रियाम् । गुदम् । अस्त्रियां किम् । आन्त्रेभ्यस्ते गुदाभ्यः । स्वाङ्गशिटामदन्तानामित्यन्तरङ्गमाद्युदात्तत्वम् । तत-

---

मतोः पूर्वमकार इति । अर्थव्याख्यानमेतत् । सूत्रे तु शब्दसरूपापेक्षया नपुंसकनिर्देशः । केचित्तु सूत्रे पूर्वशब्दं पुंस्त्वेनैव पठन्ति । शरावतीति । चातुरर्थिको 'नद्यां मतुप्'माद्युपधायाः इति वत्वम् । 'मतो बह्वचोऽनजिरादीनां' 'शरादीनां च' इति दीर्घत्वम् । वेत्रवतीति । मतुप् । वत्वम् । न चाऽत्र वत्वस्याऽसिद्धत्वाद्वतीशब्दोऽयं न भवतीति शङ्क्यम् । तस्याऽऽश्रयासिद्धत्वेनाऽसिद्धत्वाभावात् । अवत्या इति निदशादिह न भवति राजवतीति । स्वरविधौ व्यञ्जनस्याविद्यमानत्वान्नायं भवतीशब्दः । अहीवतीति । पूर्ववद्दीर्घः । संज्ञायामिति वत्वम् ॥ इति प्रातिपदिकस्वराः ॥

अथ फिट्सूत्राणि ॥ फिषोऽन्त उदात्तः । फिडिति पूर्वाचार्यप्रसिद्ध्या प्रातिपदिकमुच्यते । तदाह—प्रातिपदिकं फिडिति । ननु कथमपणिनीयानि सूत्राण्युपन्यस्यन्ते, पाणिनीयसूत्रैर्यैः स्वर आयाति स एव प्रमाणं, तथा च 'शताच्च ठन्यतावशते' इनिसूत्रे कैयटः—'नियतकालाश्च स्मृतयो व्यवस्थाहेतवः' इति मुनित्रयमतेनाऽऽद्यत्वे 'साध्वसाधुप्रविभागः' इति । नैतत् । अपाणिनीयान्यपि फिट् सूत्राति पाणिनीयैराश्रीयन्ते, भाष्यात् ज्ञापकात् । तथा च 'आद्युदात्तश्च' इति सूत्रे भाष्यं 'प्रातिपदिकस्य चान्त' इति प्रकृतेरन्तोदात्तत्वं शास्ति' इति । तथा । तस्मिन्नेव सूत्रे 'प्रत्ययाद्युदात्तत्वस्याऽवकाशः यत्रानुदात्ता प्रकृति 'सप्तत्वं सिमत्व'मिति । नहि 'फिषोऽन्त उदात्तः' 'त्वत्वसमसिमे' त्यादिफिट्सूत्राश्रयणं विना प्रकृतेरन्तोदात्तत्वं सर्वानुदात्तत्वं च सम्भवतीति दिक् । पाटः । पालत्यादय ओषधिविशेषस्य वाचकाः लघावन्त इति प्राप्त इति । इदं पूर्वेण परेण च सम्बध्यते । पर्याया इति । वृक्षविशेषस्य

ष्टाप्। ५ ध्यपूर्वस्य स्त्रीविषयस्य। धकारयकारपूर्वो योऽन्त्योऽचू स उदात्तः। अन्तर्धा। 'स्त्रीविषयवर्णनाम्नामि'ति प्राप्ते। छाया। माया। जाया। 'यान्तस्यान्त्यात्पूर्व'मित्याद्युदात्तत्वे प्राप्ते। स्त्रीति किम्। वाट्यम्। यञन्तत्वादाद्युदात्तत्वम्। विषयग्रहणं किम्। इभ्या क्षत्रिया। 'यतोऽनावः' (३७०१) इत्याद्युदात्त इभ्यशब्दः। क्षत्रियशब्दस्तु 'यान्तस्याऽन्त्यात्पूर्व'मिति मध्योदात्तः। ६ खान्तस्याऽश्मादेः। नखम्। उखा। सुखम्। दुःखम्। नखस्य 'स्वाङ्गशिटा'मित्याद्युदात्तत्वे प्राप्ते। उखा नाम भाण्डविशेषः। तस्य कृत्रिमत्वात्। 'खय्युवर्ण कृत्रिमाख्या चे'दित्युवर्णस्योदात्तत्वे प्राप्ते। सुखदुःखयोर्नञ्विषयस्येति प्राप्ते। अश्मादेः किम्। शिखा। मुखम्। मुखस्य 'स्वाङ्गशिटामि'ति, 'नञ्विषयस्ये'ति वा आद्युदात्तत्वम्। शिखायास्तु 'शीङः खो निद्घ्रस्वश्चे'ति उणादिषु नित्त्वोक्तेरन्तरङ्गत्वाट्टापः प्रागेव 'स्वाङ्गशिटा'मिति वा बोध्यम्। ७ हिष्ठवत्सरतिशत्थान्तानाम्। एषामन्त उदात्तः स्यात्। अतिशयेन बहुलो बंहिष्ठः। नित्त्वादाद्युदात्तत्वे प्राप्ते। बंहिष्ठैरश्वैः सुवृता रथेन। यद्बंहिष्ठं नातिविदे। इत्यादौ व्यत्ययादाद्युदात्तः। परिवत्सरः। अव्ययपूर्वपदप्रकृतिस्वरोऽत्र बाध्यते इत्याहुः। सप्ततिः। अशीतिः। लघावन्त इति प्राप्ते। चत्वारिंशत्। इहापि प्राग्वत्। अभ्यूर्णवाना प्रमृथस्यायोः। अव्ययपूर्वपदप्रकृतिस्वरोऽत्र बाध्यत इत्याहुः। थाथादिसूत्रेण गतार्थमेतत्।

वाचकाः' सागरसमुद्रयोः 'लघावन्ते-' इति प्राप्ते। गेहा। गेहार्थानामन्त उदात्तः स्यादित्यर्थो न। गृद। अगेहार्थमिदम्। 'ध्यपूर्व धकारस्ये'ति। 'नित्यस्त्रीलिङ्गस्ये'ति शेषः। प्राप्ते इति। आद्युदात्ते प्राप्ते इत्यर्थः। यञन्तत्वादिति। 'बहिषष्टिलोपो यञ्ञ' इति वचनात्। यतोऽनाव इति। इभमर्हतीति। दण्डादित्वाद्यत्। यान्तस्यान्त्यादिति। 'छत्रादे घः' इति प्रत्ययस्वरेणापीति वा बोध्यम्। खान्तस्य। श् च म् च श्मौ, तौ आदी यस्य स श्मादिर्न श्मादिरश्मादिः। तस्य शकारमकारादिभिन्नस्य खशब्दस्यान्तोदात्तः स्यात्। शीङः खोनिद्घ्रस्वश्चेत्यादि। नन्वु बहुपूणादिषु-'शीङो हस्वश्चे'त्येव पठ्यते। 'मुहेः खो मूर्च' इत्यतः खोऽनुवर्तते हस्वविधानसामार्थ्यादूगुणाऽभाव इति स्वयमप्युणादिष्वेवमेवोक्तम्। तस्मात्पूर्वाऽपरविरुद्धोऽयं ग्रन्थ इत्यन्वरसादाह—अन्तरङ्गत्वादित्यादि। ङिष्ठ ५षा मति। हिष्ठ वत्सर ति शत् थ एतदन्तानामित्यर्थः। बंहिठ इति। बहुलशब्दात् 'अतिशायने तमबिष्ठनौ' इतीष्ठन्। 'प्रियस्थिरस्फिर-' इत्यनेन बहुलस्य बंहिरादेशः। परिवत्सर इति। क्वचित्तु 'संवत्सर' इति पाठस्तत्र 'वसेश्च' 'सम्पूर्वाच्चित्' इति सरप्रत्ययस्य चित्त्वादपि सिद्धेः। सप्ततिरित्या-

८ **दक्षिणस्य साधौ।** अन्त उदात्तः स्यात्। साधुवाचित्वाऽभावे तु व्यवस्थायां सर्वनामतया 'स्वाङ्गशिटा'मित्याद्युदात्तः। अर्थान्तरे तु 'लघावन्त' इति गुरुरुदात्तः। 'दक्षिणः सरलोदारपरच्छन्दानुवर्तिषि'ति कोशः। ९ **स्वाङ्गाख्यायामादिर्वा।** इह दक्षिणस्याऽऽद्यन्तौ पर्यायेणोदात्तौ स्तः। दक्षिणो बाहुः। आख्याग्रहणं किम्। प्रत्यङ्मुखस्यासीनस्य वामपाणिर्दक्षिणो भवति। १० **छन्दसि च।** अस्वाङ्गार्थमिदम्। दक्षिणः। इह पर्यायेणाऽऽद्यन्तावुदात्तौ। ११ **कृष्णस्याऽमृगाख्या चेत्।** अन्त उदात्तः। 'वर्णानां तणे'त्याद्युदात्तत्वे प्राप्ते अन्तोदात्तो विधीयते। कृष्णानां व्रीहीणाम्। कृष्णो नो नाव वृषभः। मृगाख्यायां तु-कृष्णो राज्यै। १२ **वा नामधेयस्य।** कृष्णस्येत्येव। अयं वां कृष्णो अश्विना। कृष्णर्षिः। १३ **शुक्लगौरयोरादिः।** नित्यमुदात्तः स्यादित्येके। वेत्यनुवर्तत इति तु युक्तम्। सरो गौरो यथा पिब। इत्यत्रान्तोदात्तदर्शनात्। १४ **अङ्गुष्ठोदकबकवशानां छन्दस्यन्तः।** अङ्गुष्ठस्य 'स्वाङ्गानामकुर्वादीना'मिति द्वितीयस्योदात्तत्वे प्राप्तेऽन्तोदात्तार्थ आरम्भः। वशाग्रहणं नियमार्थं 'छन्दस्येवे'ति। तेन लोके आद्युदात्तेत्याहुः। १५ **पृष्ठस्य च।** छन्दस्यन्त उदात्तः स्याद्वा भाषायाम्। पृष्ठम्। १६ **अर्जुनस्य तृणाख्या चेत्।** 'उनर्वञ्चन्तानामि'त्याद्युदात्तस्यापवादः। १७ **अर्यस्य स्वाम्याख्या चेत्।** 'यान्तस्यान्त्यात्पूर्व'मिति 'यतो नावः' (सू ३७०) इति वाऽद्युदात्ते प्राप्ते वचनम्। १८ **आशाया अदिगाख्या चेत्।** दिगाख्याव्यावृत्त्यर्थमिदम्। अत एव ज्ञापकाद्विकपर्यायस्याद्युदात्तता। इन्द्र आशाभ्यस्परि। १९ **नक्षत्राणामा-**

दि। 'पंक्तिविंशतित्रिंशत्' इत्यत्र व्युत्पादिता एते। प्राग्वदिति। 'लघावन्ते' इति प्राप्त इत्यर्थः। दक्षिणस्य। अस्याऽन्त उदात्तः स्यात्प्रावीण्येऽर्थे। वीणायां दक्षिणः। प्रवीण इत्यर्थः। छन्दसि। दक्षिणस्याऽऽद्यन्तौ पर्यायेणोदात्तौ स्यातां वेदे। कृष्णस्य। अस्याऽन्त उदात्तश्छन्दसि, न तु मृगाख्यायाम्। एके इति। तन्मतेऽस्मिन्सूत्रे 'नामधेयस्ये'त्यनुवर्तते। वचनविपरिणामेनान्वयः। नामधेययोः शुक्लगौरयोरादिरुदात्त इत्यर्थः। तेन सरो गौरो यथा पिब' इत्यत्रान्तोदात्तत्वमेव, नामधेयत्वाऽभावात्। अङ्गुष्ठो। एषामन्तोदात्तश्छन्दसि। अङ्गुष्ठस्येति। उपलक्षणमिदम्। बकशठरेऽपि 'प्राणिनां कृपूर्वे'मित्याद्युदात्ते प्राप्ते इति बोध्यम्। वा भाषायाम्। पृष्ठमिति। पक्षे 'स्वाङ्गशिष्टाम्, इत्याद्युदात्तत्वम्। अर्जुनस्य। अन्त उदात्तः। तृणाख्यायाम्। तृणाख्यायां किम्? अर्जुनो वृक्षः। 'उनर्वञ्चन्तानां'मित्याद्युदात्तः। अर्यस्य। अन्त उदात्तः स्वाम्याख्यायां-

ब्विषयाणाम्। अन्त उदात्तः स्यात्। आश्लेषाऽनुराधादीनां 'लघावन्त' इति प्राप्ते। ज्येष्ठाश्रविष्ठाधनिष्ठानामिष्ठन्नन्तत्वेनाऽऽद्युदात्तत्वे प्राप्ते वचनम्। **२० न कुपूर्वस्य कृत्तिकाख्या चेत्**। अन्त उदात्तो न। कृत्तिका नक्षत्रम्। केचित्तु 'कुपूर्वो य आप् तद्विषयाणामि'ति व्याख्याय आर्यिका बहुलिका इत्यत्राप्यन्तोदात्तो नेत्याहुः। **२१ घृतादीनां च**। अन्त उदात्तः। घृतं मिमिक्षे। आकृतिगणोऽयम्। **२२ ज्येष्ठकनिष्ठयोर्वयसि**। अन्त उदात्तः स्यात्। ज्येष्ठ आह चमसा। कनिष्ठ आह चतुरः। वयसि किम्। ज्येष्ठः। श्रेष्ठः। कनिष्ठोऽल्पिकः। इह नित्त्वादाद्युदात्त एव। **२३ बिल्वतिष्ययोः स्वरितो वा**। अनयोरन्तः स्वरितो वा स्यात्। पक्षे उदात्तः। **इति फिट्सूत्रेषु प्रथमः पादः।**

द्वितीयः पादः।

२४ अथादिः प्राक् शकटेः। अधिकारोऽयम्। 'शकटिशकटयो'रिति यावत्। **२५ ह्रस्वान्तस्य स्त्रीविषयस्य**। आदिरुदात्तः स्यात्। बलिः। तनुः। **२६ नब्विषयस्याऽनिसन्तस्य**। वनं न वायः। इसन्तस्य तु सर्पिः। नपूंसकम्। **२७ तृणाधान्यानां च द्व्यषाम्**। द्व्यचामित्यर्थः। कुशाः। काशः। माषाः। तिलाः। बह्वचां तु गोधूमाः। **२८ नूः संख्यायाः**। पञ्च।

म्। 'अर्यः स्वामिवैश्ययोः' इति निपातितोऽयमर्यशब्दः। आशाया। अदिगाख्यायामाशाशब्द आद्युदात्तः स्यात्। ज्येष्ठेत्यादि। 'प्रशस्यस्य श्रः' 'ज्य च' इति प्रशस्यशब्दादिष्ठनि धनवती। ज्यादेशः। श्रवणं श्रवः सोऽस्यस्या सा श्रववती। धनं विद्यते यस्याः सा धनवती। अतिशयिता श्रववती श्रविष्ठा। धनिष्ठा। इष्ठनि 'विन्मतोर्लुक्' इति मतुपो लुक्। आद्युदात्ते प्राप्त इति। 'ह्रस्वस्यादिः' इत्यनेन। कृत्तिकेति। 'लघावन्ते' इति आद्युदात्तत्वम्। घृतमिति। 'नब्विषयस्ये'ति प्राप्ते। ज्येष्ठ इति। उदाहरणे बृढशब्दस्य 'बृढस्य च' इतीष्ठनि ज्यादेशः। 'युवाल्पयोः कनन्यतरस्याम्' इति युवन्शब्दस्य कनादेशः। प्रत्युदाहरणे 'प्रशस्यस्य श्रः' 'ज्य च' इति प्रशस्यशब्दस्य ज्यादेशः। अल्पस्य कन्। नित्त्वादिति। तथा च नित्स्वरापवादोऽयं योगः। पक्षे उदात्त इति। उदात्त इत्यनुवृत्तेः। इति प्रथमः पादः।

नब्विषयस्य। इसन्तवर्जितस्य नित्यनपुंसकस्यादिऽऽदात्तः स्यात्। सर्पिरिति। 'अर्चिशुचि' इत्यादिना इसिः। तृण। तृणवाचिनां धान्यवाचिनां च द्व्यचामादिरुदात्तः स्यात्। अचिति अचः प्राचां संज्ञा। तदाह—द्व्यचामित्यर्थ इति। गोधूमा इति। 'ल-

चत्वारः । चतुष्कपालः । २९ **स्वाङ्गशिटामदन्तानाम्** । शिट् सर्वनाम । कर्णाभ्यां चुबुकादधि । ओष्ठाविव मधु । विश्वो विहायाः । ३० **प्राणिनां कुपूर्वम्** । कवर्गात्पूर्वं आदिरुदात्तः । काकः । वृकः । शुकेषु मे । प्राणिनां किम् । क्षीरं सर्पिर्मधूदकम् । ३१ **खय्युवर्णं कृत्रिमाख्या चेत्** । खयि परे उवर्णमुदात्तं स्यात् । कन्दुकः । ३२ **उनर्वन्नन्तानाम्** । उन । वरुणं वो रिशादसम् । ऋ । स्वसारं त्वा कृणवै । वन् । पीवानं मेषम् । ३३ **वर्णानां तणतिनितान्तानाम्** । आदिरुदात्तः । एतः । हरिणः । शितिः । पृश्निः । इरित् । ३४ **ह्रस्वान्तस्य ह्रस्वमनृत्ताच्छील्ये** । ऋद्वर्ज्यं ह्रस्वान्तस्याऽऽदिभूतं ह्रस्वमुदात्तं स्यात् । मुनिः । ३५ **अक्षस्याऽदेवनस्य** । आदिरुदात्तः । तस्य नाक्षैः । देवने तु । अक्षैर्मा दीव्यः । ३६ **अर्धस्याऽसमद्योतने** । अर्धो ग्रामस्य । समेऽशके तु अर्धं पिप्पल्याः । ३७ **पीतद्रुप्रभृतीनाम्** । आदिरुदात्तः । पीतद्रुः । सरलः । ३८ **ग्रामादीनां च** । ग्रामः । सोमः । यामः । ३९ **लुबन्तस्योपमेयनामधेयस्य** । चञ्चेव चञ्चा । स्फिगन्तस्येति पाठान्तरम् । स्फिगिति लुपः प्राचां संज्ञा । ४० **न वृत्तपर्वतविशेषव्याघ्रसिंहमहिषाणाम्** । एषामुपमेयनाम्नामादिरुदात्तो न । ताल इव तालः । मेरुरिव मेरुः । व्याघ्रः । सिंहः । महिषः । ४१ **राजविशेषस्य यमन्वा चेत्** । यमन्वा वृद्धः । आङ्ग उदाहरणम् । अङ्गाः

धावन्ते' इति मध्योदात्तता । त्रः संख्या । नकाररेफान्तायाः संख्याया आदिरुदात्तः । चतुष्कपाल इति । 'चत्वारः' इत्यत्राऽऽम्स्वरेण भाव्यम्' 'चतुरः' इत्यत्र 'चतुरः शसि' इति चतुंभरित्यत्र 'झल्युपोत्तमम्' इति चतुर्णामित्यत्र 'षट्त्रिचतुर्भ्यः' इत्यनेनेति समासउदाहृतः । 'इगन्तकालकपालभगाल' इति पूर्वपदप्रकृतिस्वरेणाद्यदात्तोऽयम् । स्वाङ्गशिष्टाम् । स्वाङ्गवाचिनामदन्तानां सर्वनाम्नामादिरुदात्तः स्यात् । उदकमिति । छन्दसि 'अङ्गुष्ठोदकबकवशानाम्' इत्यन्तोदात्तः । भाषायां तु कर्दमादित्ववादादिर्द्वितीयं चोदात्तम् । उनर्वन् । उन ऋ वन् एतदन्तानामादिरुदात्तः स्यात् । ह्रस्वान्तस्य । अनृतिकम् । नृशंसः । अक्षस्य । अदेवनस्याऽक्षस्याऽऽदिरुदात्तः । अर्धस्य । असमद्योतनेऽर्धशब्दः स्याऽऽदिरुदात्तः । ग्रामादीनां च । आदिरुदात्तः । लुबन्तस्य । उपमेयवाचिनो लुबन्तस्यादिरुदात्तः । चञ्चेवेति । 'ड्वे प्रतिकृतौ' इति विहितस्य 'लुम्मनुष्ये' इति कनो लुप् । लुबन्तस्य किम् । अग्निर्माणवकः । न वृक्ष । पूर्वेण प्राप्तमाद्युदात्तत्वं निषिध्यते । अत्र वृक्षपर्वतविशेषग्रहणात् वृक्ष इवायं वृक्षः । पर्वतः । अत्र पूर्वेणाद्युदात्तत्वं

प्रत्युदाहरणम्। **४२ लघावन्ते द्वयोश्च बह्वषो गुरुः**। अन्ते लघौ, द्वयोश्च लघ्वोः सतोर्बह्वच्कस्य गुरुरुदात्तः। कल्याणः। कोलाहलः। **४३ स्त्रीविषयवर्णाक्षुपूर्वाणाम्**। एषां त्रयाणामाद्युदात्तः। स्त्रीविषये। मल्लिका। वर्णः श्येनी। हरिणी। अक्षुशब्दात्पूर्वोऽस्त्येषां ते अक्षुपूर्वाः। तरक्षुः। **४४ शकुनीनां च लघुपूर्वम्**। पूर्वं लघु उदात्तं स्यात्। कुक्कुटः। तित्तिरिः। खञ्जरीटः। **४५ नर्तुप्राण्याख्यायाम्**। यथालक्षणं प्राप्तमुदात्तत्वं न। वसन्तः। कृकलासः। **४६ धान्यानां च वृद्धक्षान्तानाम्**। आदिरुदात्तः। क्षान्तानाम्। श्यामाकः। षान्तानाम्। माषाः। **४७ जनपदशब्दानामषान्तानाम्**। आदिरुदात्तः। केकयः। **४८ हयादीनामसंयुक्तलान्तानामन्तः पूर्वं वा**। हयितिं हल्संज्ञा। पललम्। शललम्। हयादीनां किम्। एकलः। असंयुक्तेति किम्। मल्लः। **४९ इगन्तानां च द्वयषाम्**। आदिरुदात्तः। कृषिः।

इति फिट्सूत्रेषु द्वितीयः पादः।

भवत्येव। राजविशेषस्य। क्षुवन्तस्योपमेयनामधेयस्य राजविशेषस्याऽऽद्युदात्तः यमन्वा चेक्षामधेयं भवति। पूर्वेणैव सिद्धे नियमार्थमिदम्। राजविशेषस्य चेद्वृद्धस्यैवेत्याहुः। फिट्सूत्रा तु 'वृद्धस्य चेद्राजविशेषस्यैवे'ति नियमो दर्शितः। आङ्क इति। आङ्क इत्यायमाङ्कः। लघावन्ते। इह आदिरिति न सम्बध्यते तेनाऽनादेरपि गुरोरुदात्तः। अत एव वृषाकपिशब्दस्य गुरुरुदात्त इति 'वृषाकप्यग्नि' इति सूत्रे वृत्त्यादिग्रन्थेषु विभावितम्। न च गुरूणां मध्ये य आदिरित्यर्थोऽस्त्विति वाच्यम्। 'अन्यतो ङीष्' इति सूत्रे सारङ्गकलमाषशब्दौ 'लघावन्ते' इत्यादिना मध्योदात्ताविति हरदत्तग्रन्थविरोधादित्याहुः। कल्याण इति। पर्यायेणाऽऽदिमध्यावुदात्तौ। शकुनीनाम्। पक्षिवाचिनाम्। पूर्वमिति। अन्त्यात्पूर्वमित्यर्थः। अन्नाप्यादिरिति न सम्बध्यते पूर्वग्रहणात्। कुक्कुटेत्यादि। मध्योदात्तावेतौ। नर्तु। ऋतुवाचिनां प्राणिवाचिनां च यथालक्षणप्राप्तमुदात्तत्वं न। धान्यानाम्। धान्यवाचिनां वृद्धकशब्दान्तानां षशब्दान्तानां चादिरुदात्तः। श्यामाकाः। माषा इति। अन्नोशीनरेत्यनेन, तृणधान्यानामित्यनेन चादयुदात्तत्वस्य सिद्धत्वात् नैषादका राजमाषा इत्युदाहर्तव्यम्। फिट्सूत्रे तु सूत्रे षशब्दो न पठितः। वृत्तौ गुरुरुदात्त इति व्याख्यातं, न त्वादिरुदात्त इति। नैषादकाः कालाक्षा इत्युदाहर्तं च। यत्तु 'धान्यानामिति किं श्यामाकाः' इत्युदाहृतं, तत्र श्यामाके धान्यत्वाऽभावश्चिन्त्यः। जनपद। जनपदवाचिनामजन्तानामादिरुदात्तः स्यात्। केकय इति। अत्र परत्वाद्यान्तस्यान्त्यात्पूर्वमिति स्वरेण भाव्यमतः अङ्गा वङ्गा इत्युदाहर्तव्यमिति वदन्ति। हयादीनाम्। हयादीनामसंयोगपूर्वो यो लकारस्तदन्तानामादिरुदात्तः। अन्त्यात्पूर्वं वा। केचित्तु अत्र जनपदानामित्यनुव-

तृतीयः पादः ।

५० **अथ द्वितीयं प्रागीषात्** । 'ईषान्तस्य ह्यादे'रित्यतः प्राक् द्वितीयाधिकारः। ५१ **त्र्यचां प्राङ्मकरात्** । 'मकरवरूढेत्यतः' प्राक् त्र्यचामित्यधिकारः । ५२ **स्वाङ्गानामकुर्वादीनाम्** । कवर्गरेफवकारादीनि वर्जयित्वा त्र्यचां स्वाङ्गानां द्वितीयमुदात्तम् । ललाटम् । कुर्वादीनां तु । कपोलः । रसना । वदनम् । ५३ **मादीनां च** । मलयः । मकरः । ५४ **शादीनां शाकानाम्** । शीतन्या । शतपुष्पा । ५५ **पान्तानां गुर्वादीनाम्** । पादपः । आतपः । लघ्वादीनां तु अनूपम् । द्वयचां तु नीपम् । ५६ **युतान्यण्यन्तानाम्** । युते । अयुतम् । अनि । धमनिः । अणि । विपणिः । ५७ **मकरवरूढपारेवतवितस्तेक्ष्वार्जिद्राक्षाकलोमाकाष्ठापेष्ठाकाशीनामादिर्वा** । एषामादिर्द्वितीयो वोदात्तः । मकरः । वरूढ इत्यादि । ५८ **छन्दसि च** । अमकराद्यर्थ आरम्भः । लक्ष्यानुसारादादिर्द्वितीयं चोदात्तं ज्ञेयम् । ५९ **कर्दमादीनां च** । आदिर्द्वितीयं वोदात्तम् । ६० **सुगन्धितेजनस्य ते वा** । आदिर्द्वितीयं तेशब्दश्चेति त्रयः पर्यायेणोदात्ताः । सुगन्धितेजनाः । ६१ **नपः फलान्तानाम्** । आदिर्द्वितीयं वोदात्तम् । राजादनफलम् । ६२ **यान्तस्या-**

तंयन्ति । पञ्चालाः कोशला इत्युदाहृत्य पलालमिति प्रत्युदाहरन्ति च । इग । अत्रापि जनपदानामित्यनुवर्त्य कुरवश्चेदय इत्युदाहृतं कृषिरिति प्रत्युदाहृतम् । 'अचैमा दोग्ध्यः कृषिमित् कृषत्व' इत्यत्र कृषिशब्दस्यान्तोदात्तत्वात् । इति द्वितीयः पादः ।

कपोल इति । 'लघावन्ते-' इति मध्योदात्तम् । रसना वदनमिति । 'स्वाङ्गशिटाम्' इत्याद्युदात्तत्वम् । मादी । मलयः । मकर इति । अनयो'र्मकरवरूढे'ति 'यान्तस्यान्त्यात्पूर्व'मिति विशिष्य स्वरविधानान्मध्येन्द्र इत्युदाहर्तव्यम् । शादीनां । शकारादीनां शाकवाचिनां त्र्यचां द्वितीयमुदात्तं स्यात् । केचित्तु 'सादीना'मिति पठित्वा सर्षपा इत्युदाहरन्ति । पान्तानाम् । पशब्दान्तानां गुर्वादीनां त्र्यचां द्वितीयमुदात्तं स्यात् । अनूपे 'अनोरप्रधानकनीयसी'त्यनेनोदात्तत्वं, नीपे 'नेरनिधाने'इत्यनेनेत्याहुः । युता । युत अनि अणि एतदन्तानां त्र्यचां द्वितीयमुदात्तं स्यात् । इत्यादीति । आदिशब्देन पारेवत वितस्ता इक्षु आजि द्राक्षा कला उमा काष्ठा पेष्ठा काशीना 'काशीनाना'मिति वक्तव्ये नुडभाव आर्षः । छन्दसि । छन्दसि मकरादीनामन्येषां चादिर्द्वितीयं वोदात्तम् । काश्यपः । कर्दमः । कुलटा । उदकम् । गान्धारि । सुगन्धि । आदिरिति । सुगन्धितेजनशब्दस्य । नपः फलान्तानाम् । नपृ नपुंसकम् । नपः किम् । दासीफलो

न्त्यात्पूर्वम् । कुलायः । ६३ थान्तस्य च नालघुनी । नाशब्दो लघु च उदात्ते स्तः । सनाथा सभा । ६४ शिशुमारोदुम्बरबलीवर्दोष्ट्रारपुरूवसां च । अन्त्यात्पूर्वमुदात्तं द्वितीयं वा । ६५ सांकाश्यकाम्पिल्यनासिक्यदार्वाघाटानाम् । द्वितीयमुदात्तं वा । ६६ ईषान्तस्य हृयादेरादिर्वा । हलीषा । लाङ्गलीषा । ६७ उशीरदाशेरकपालपलालशैवालश्यामाकशारीरशरावहृदयहिरण्यारण्यापत्यदेवराणाम् । एषामादिरुदात्तः स्यात् । ६८ महिष्यषाढयोर्जायेष्टकाख्या चेत् । आदिरुदात्तः । महिषी जाया । अषाढा उपधाति । इति फिट्सूत्रेषु तृतीयः पादः ।

चतुर्थः पादः ।

६९ शकटिशकट्योरक्षरमक्षरं पर्यायेण । उदात्तम् । शकटिः । शकटी । ७० गोष्ठजस्य ब्राह्मणनामधेयस्य । अक्षरमक्षरं पर्यायेणोदात्तम् । गोष्ठजो ब्राह्मणः । अन्यत्र गोष्ठजः पशुः । कृदुत्तरपदप्रकृतिस्वरेणान्तोदात्तः । ७१ पारावतस्योपोत्तमवर्जम् । शेषं क्रमेणोदात्तम् । पारावतः । ७२ धूम्रजानुमुञ्जकेशकालवालस्थालीपाकानामधूजलस्थानाम् । एषां चतुर्णां धूम्रभृतींश्चतुरो वर्जयित्वा शिष्टानि क्रमेणोदात्तानि । धूम्रजानुः । मुञ्जकेशः । कालवालः । स्थालीपाकः । ७३ कपिकेशहरिकेशयोश्छन्दसि । कपिकेशः । हरिकेशः । ७४ न्यङ्स्वरौ स्वरितौ । स्पष्टम् । न्यङ्कुत्तानः । व्यचक्षर्यत्स्वः । ७५ न्यर्बुदव्यत्कशयोरादिः । स्वरितः स्यात् । ७६ तिल्यशिक्यकाश्मर्यधान्यकन्याराजमनुष्याणामन्तः । स्वरितः स्यात् । तिलानां भवनं क्षेत्रं

वृक्षः । यान्तस्य । यशब्दान्तस्यान्त्यात्पूर्वमुदात्तं स्यात् । थान्तस्य । केचित्तु 'आन्तस्य च नालघुनी' इति पठित्वा आकारान्तस्य नाशब्दस्य च लघुनी अन्त्यात्पूर्व उदात्तौ स्त इति व्याख्याय नाना दिवा सुधा इत्युदाजहुः । शिशुमारो । 'शिशुमार' इति पाठान्तरम् । उष्ट्रार । 'उष्टार' इति पाठान्तरम् । सांकाश्य । सांकाश्यकाम्पिल्यशब्दौ 'वुञ्छण्–' इति प्यान्तौ । दार्वाघाटशब्दो 'दारावाहनोऽण्नन्तस्य च टः संज्ञायाम्' इत्यण्प्रत्ययान्तः । ईषान्तस्य । ईषान्तस्य हलादेरादिरुदात्तो वा स्यात् । उशीर । अत्र श्यामाकग्रहणं चिन्त्यम् । 'धान्यानां च वृद्धक्षान्तानाम्' इत्यनेनैव सिद्धत्वात् । इदमेव ज्ञापयितुं मूले 'धान्याना'मित्यत्र श्यामाक इत्युदाहृतम् । देवरग्रहणमपि चिन्त्यम् । 'लवावन्त—' इत्यनेनैव सिद्धत्वात् । हृदयग्रहणं 'स्वाङ्गानामकुत्वादीनाम्' इति द्वितीयस्योदात्तत्वं बाधितुमन्येषां 'लवावन्ते' इति प्राप्ते

तित्यम्। 'यतो नावः' (सू ३७०१) इति प्राप्ते। ७७ **बिल्वभक्ष्यवीर्याणि छन्दसि।** अन्तस्वरितानि। ननो बिल्वस्य उदतिष्ठत्। ७८ **त्वत्त्वसमसिमेत्यनुच्चानि।** स्तरीरुत्वत्। उत त्वः पश्यन्। नभन्तामन्यके समे। सिमस्मै। ७९ **सिमस्याथर्वणेऽन्त उदात्तः।** अथर्वण इति प्रायिकम्। तत्र दृष्टस्येत्येवं परं वा। तेन वासस्तनुते सिमस्मै इत्यृग्वेदेऽपि भवत्येव। ८० **निपाता आद्युदात्ताः।** स्वाहा। ८१ **उपसर्गाश्चाभिवर्जम्।** ८२ **एवादीनामन्तः।** एवमादीनामिति पाठान्तरम्। एव। एवम्। नूनम्। सह ते पुत्र सूरिभिः। षष्ठस्य तृतीये 'सहस्य सः' (वा १००९) इति प्रकरणे सहशब्दः आद्युदात्त इति प्राञ्चः। तच्चिन्त्यम्। ८३ **वाचादीनामुभावुदात्तौ।** उभौग्रहणमनुदात्तं पदमेकवर्जमित्यस्य बाधाय। ८४ **चादयोऽनुदात्ताः।** स्पष्टम्। ८५ **यथेति पादान्ते।** तन्नेमिमृभवो यथा। पादान्ते किम्। यथा नो अदितिः करत्। ८६ **प्रकारादिद्विरुक्तौ परस्यान्त उदात्तः।** पटुपटुः। ८७ **शेषं सर्वमनुदात्तम्।** शेषं नित्यादिद्विरुक्तस्य परमित्यर्थः। प्रप्रायम्। दिवेदिवे। **इति शान्तनवाचार्यप्रणीतेषु फिट्सूत्रेषु तुरीयः पादः।**

अथ स्वरप्रकरणशेषः ३२।

३७०८ **आद्यदात्तश्च ३।१।३।** प्रत्यय आद्युदात्त एव स्यात्। अग्निः। कर्तव्यम्। ३७०९ **अनुदात्तौ सुप्पितौ ३।१।४॥** पूर्वस्यापवादः। यज्ञ-

---

वचनम्। महिष्य। एतयोरादिरुदात्तः स्यात् यथासंख्यं जायाख्यायामिष्टकाख्यायां च। इति तृतीयः पादः॥

स्तरीत्व। एतानि सर्वाण्युदात्तानि। सिमस्य। सिमशब्दस्याथर्वणे वेदेऽन्त उदात्तः। उपसर्गाश्चाभि। अभिशब्दं वर्जयित्वा उपसर्गा आद्युदात्ताः स्युः। यथेति। यथाशब्दः पादान्तेऽनुदात्तः स्यात्। प्रकारादि। 'प्रकारे गुणवचनस्य' इत्यादिद्वित्वे पदस्यान्तोदात्तः स्यात्। पटुपटुरिति। ननु 'कर्मधारयवदुत्तरेषु' इति कर्मधारयवद्भावादेव 'समासस्य' इत्यन्तोदात्तत्वे सिद्धे व्यर्थमिदमिति वाच्यम्। तस्य पाणिनीयापूर्वप्रवृत्तत्वेनाऽदोषात्। शेषं प्रकारादिद्वित्वादन्यस्मिन्द्वित्वे परं सर्वमनुदात्तं स्यात्। इति चतुर्थः पादः।

अग्निरिति। 'अकर्तर्यृदोपश्च' इति निप्रत्ययः। कर्तव्यमिति। तव्यप्रत्ययः। तव्यतस्तु

स्य। न यो युच्छति। शप्तिपोरनुदात्तत्वे स्वरितप्रचयौ। **३७१० चितः ६।१।१६३॥** अन्त उदात्तः स्यात्। **चितः सप्रकृतेर्बह्वकजर्थम्** (वा ३७९९)। चिति प्रत्यये सति प्रकृतिप्रत्ययसमुदायस्याऽन्त उदात्तो वाच्य इत्यर्थः। नभन्ता-मन्यूके समे। यूके सरस्वतीमनु। तूकत्सुते। **३७११ तद्धितस्य ६।१।१६४॥** चितस्तद्धितस्यान्त उदात्तः। पूर्वेण सिद्धे ञित्स्वरबाधनार्थमिदम्। कौञ्जा-यनाः। **३७१२ कितः ६।१।१६५॥** कितस्तद्धितस्यान्त उदात्तः। यदाग्नेयः। **३७१३ तिसृभ्यो जसः ६।१।१६६॥** अन्त उदात्तः। तिस्रो द्यावः सवितुः। **३७१४ सावेकाचस्तृतीयादिर्विभक्तिः ६।१।१६८॥** सावितीति सप्तमीबहुवच-नम्। तत्र य एकाच् ततः परा तृतीयादिर्विभक्तिरुदात्ता। वाचा विरूपः। सौ किम्। गौरित्यादौ एकाचोऽपि राजशब्दात्परस्य मा भूत्। राज्ञो नु ते। एकाचः

तित्स्वाःस्वरितो वक्ष्यते। नचं तव्यस्याप्यनुदात्तत्वे 'उदात्तादनुदात्तस्य'इति स्वरितो भवत्येवेति चेत्सत्यम्, किंत्वयमसिद्धः, तित्स्वरस्तु सिद्ध इति प्रबृत्यप्रवृत्तिभ्यां महान् फले विशेषः। तव्यतस्तित्स्वरमेव शेषनिघातपरिभाषाया यथोद्देशप्रवृत्तौ ज्ञापकमिति ध्ये-यम्। युच्छतीति। युच्छ प्रमादे। 'धातोः' इत्यन्तोदात्तः। ततः परः शप् 'उदात्तादनुदा-त्तस्य'इति स्वरितः। 'स्वरितात्संहितायामनुदात्तानाम्' इति तिपः प्रचयः। चितः। स-प्रकृतेरिति। नन्विदं कथं लभ्यमिति चेच्छृणु। चित इत्यवयवादेषा षष्ठी, न कार्यिणः। चिद्योऽवयवस्तस्य सम्बन्धी यः समुदायः स कार्यी। अथवा चिदस्यास्ति स चितः। अर्शआदेराकृतिगणत्वाद्मत् प्रत्ययः। षष्ठ्यर्थे प्रथमा। तेन चिद्वतः समुदायस्येत्यर्थः। अत्र च लिङ्गमकच्चश्चित्करणम्, अन्यथा तस्यैकाच्त्वादनर्थकं तात्स्यात्। अन्यके इति। 'अव्ययसर्वनाम्नाम्' इत्यकच्, ततः परा टिदुदात्ता। एवं यके तकदित्यत्रापि यत्तच्छब्दादकच्। बहुच उदाहरणं तु बहुपटव इत्यादि ज्ञेयम्। ञित्स्वरबाधनार्थमिति। वफलश्चकारो 'ब्रातष्फञोरञ्ञियाम्' इति विशेषणे चरितार्थः। ञकारो वृद्ध्यै। त-त्राऽसत्यस्मिन् परत्वात् ञित्स्वरः स्यात् इति भावः। कौञ्जायना इति। कुञ्जस्याऽप-त्यानि बहूनि। 'गोत्रे कुञ्जादिभ्यश्फञ्' 'ब्रातष्फञोरञ्ञियाम्' इति ञ्यः। 'ञ्याद-यस्तद्राजाः' 'तद्राजस्य बहुषु' इति लुक्। आग्नेय इति। अग्नेर्ढक्। तिसृ। अर्थगतं बहुत्वं शब्द आरोप्य बहुवचननिर्देशः। तिसृभ्यः परस्य जसोऽन्त उदात्तः स्यात्। तिस्र इति। अन्तोदात्तत्रिशब्दस्य स्थाने तिस्रादेशः स्थानिवद्भावादन्तोदात्तः। 'अनु दात्तौ सुप्पितौ' इति जसनुदात्तः। अत्र 'अचि र ऋतः' इति रेफादेशे कृते 'उदात्त-स्वरितयोर्यण्' इति जसः स्वरितत्वं प्राप्तमनेन बाध्यते। सप्तमीबहुवचनमिति। न प्र-

किम्। विधत्ते राजनि त्वे। तृतीयादि किम्। न ददर्श वाचम्। ३७१५ **अन्तोदात्तादुत्तरपदादन्यतरस्यामनित्यसमासे** ६।१।१६९॥ नित्याधिकारविहितसमासादन्यत्र यदुत्तरपदमन्तोदात्तमेकाच्, ततः परा तृतीयादिर्विभक्तिरुदात्ता वा स्यात्। परमवाचा। ३७१६ **अञ्चेश्छन्दस्यसर्वनामस्थानम्** ६।१।१७०॥ अञ्चेः परा विभक्तिरुदात्ता। इन्द्रो दधीचः। चावितिं पूर्वपदान्तोदात्तत्वं प्रातम्। तृतीयादिरित्यनुवर्तमाने असर्वनामस्थानग्रहणं शस्परिग्रहार्थम्। प्रतीचो बाहून्। ३७१७ **ऊडिदम्पदाद्यप्पुभ्र्यु्भ्यः** ६।१।१७६॥ एभ्योऽसर्वनामस्थानविभक्तिरुदात्ता। प्रष्ठौहः। प्रष्ठौहा। **ऊठ्यपधाग्रहणं कर्तव्यम्।** (वा ३७५७) इह मा भूत्। अक्षद्युवा। अक्षद्युवे। इदम्। एभिर्नृभिर्नृतमः। अ-

---

थमैकवचनम् व्याख्यानात्। राज्ञेति। सावित्येतस्मिन् सति एकाचः परा तृतीयादिर्विभक्तिरुदात्ता भवतीत्यर्थः, भवति चाऽयमल्लोपे कृते एकाच्। राज इति। राजशब्द आद्युदात्तः। 'कनिन्युवृषितक्षिराजिधन्विद्युप्रतिदिवः' इति कनिन्नतत्वात्। अन्तोदात्ता। एकाच इति वर्तते, तृतीयादिर्विभक्तिरिति च। नित्यशब्दः स्वर्यते तेन नित्याधिकारगतिर्भवतीत्याहुः। नित्याधिकारेत्यादि। अनित्यसमासे किम्। अग्निचित्। 'अग्नौ चेः' इति क्विप्प्रत्ययः। उपपदसमासः। 'गतिकारकोपपदात्कृत्' इति कृदुत्तरपदप्रकृतिस्वरेण चित्शब्द उदात्तः। अधिकारग्रहणं किम्। विग्रहाऽभावमात्रेण यो नित्यसमासस्तत्र पर्युदासो माभूत्। अवाचा ब्राह्मणेन। 'बहुव्रीहौ नञ्सुभ्याम्' इत्यन्तोदात्तत्वम्। अत्र विभक्तेर्वैकल्पिक उदात्तो भवत्येव। अन्तोदात्तात्किम्। अवाचा। नञ्समासोऽयं न तु बहुव्रीहिः। तेन 'नञ्सुभ्याम्' इत्यन्तोदात्तत्वं न भवति, किं स्वव्ययपूर्वपदप्रकृतिस्वर एव भवतीत्यर्थः। उत्तरपदग्रहणं तु एकाच्त्वेनोत्तरपदं विशेषयितुम्। अन्यथा समासविशेषणं स्यात्। तथा च शुनः ऊक्ं च श्वोक्ं इत्यादावेवायं विधिः स्यात्। एकाच् किम्। राजदृषदा। षष्ठीसमासात् टाप्। दधीच इति। दध्यञ्चतीति 'ऋत्विग्-' आदिना क्विन्। 'अनिदिताम्-' इति नलोपः। 'अचः' इत्यकारलोपः। 'चौ' इति दीर्घत्वम्। अत्र 'चौ' इति पूर्वपदान्तोदात्तत्वं प्राप्तम्। शस्परिग्रहार्थमिति। शसादिग्रहणं तु न कृतं नपुंसके शसि मा भूत्, सुटि च यथा स्यादिति। ऊडिदं। अत्रैकाच इति वर्तते अन्तोदात्तादिति च। एकाजन्तोदात्तेभ्यः परा सर्वनामस्थानविभक्तिरुदात्ता स्यात्। प्रष्ठौह इति। 'छन्दसि सहः'। 'वहश्च' इति ण्विः। 'वाह ऊठ्'। उपपदसमासे प्रष्ठवाह्शब्दो 'गतिकारकोपपदात्कृत्' इत्यन्तोदात्तः। अत्र प्रष्ठौह्शब्दस्यानेकाच्त्वेऽपि ऊठ् शब्दस्यैकाच्त्वमेव। ऊठ्यपधाग्रहणमिति। उपधाभूत ऊठ् गृह्यते न स्वरूप इत्यर्थः। पञ्च-

न्वादेशे न । अन्तोदात्तादित्यनुवृत्तेः । न च तत्राऽन्तोदात्तताप्यस्तीति वाच्यम् । 'इदमोऽन्वादेशेऽशनुदात्तस्तृतीयादौ' (सू ३५०) इति सूत्रेणानुदात्तस्य अशो विधानात् । प्र ते बभ्रू । माऽऽभ्यां गा अनु । 'पद्दन्नोमास्हृन्निश्' (सू २२८) । इति षट् पदादयः । पद्भ्यां भूमिः । दद्भिर्न जिह्वा । अहरहर्जायते मासिमासि । मनश्चिन्मे हृद आ । अप् । अपां फेनेन । पुम् । अभ्रातेव पुंसः । रै । राया वयम् । रायो धर्ता विवस्वतः । दिव् । उप त्वाग्ने दिवेदिवे । **३७१८ अष्टनो दीर्घात् ६।१।१७२॥** शसादिर्विभक्तिरुदात्ता । अष्टाभिर्दशभिः । **३७१९ शतुरनुमो नद्यजादी ६।१।१७३॥** अनुम् यः शतृप्रत्ययस्तदन्तादन्तोदात्तात्परा नदी अजादिश्च शसादिर्विभक्तिरुदात्ता स्यात् । अच्छा रवं प्रथमा जानती । कृण्वते ।

मीनिर्देशात्परस्यैव ग्रहणे प्राप्ते वचनम् । तेनाऽक्षणूरित्यादौ विभक्तेराद्युदात्तत्वं न । अत्र हि अक्षैर्दीव्यतीति क्विप् । अन्तरङ्गत्वादूठ् यण् उपपदसमासत्वात् कृत्स्वरेणा-न्तोदात्तोऽयम् । अन्वादेशे नेति । अत एव 'सावेकाचः-' इत्यपि स्वरो न । यदि स्यात्तदीहाऽन्तोदात्ताधिकारो व्यर्थः स्यात् । प्र ते बभ्रू इति । भिक्षा ऋक् अन्वादेशप्रदर्शनार्थं माभ्यामित्यत्रोक्ता । माभ्यामिति । अत्र पूर्वार्धेन बभ्रूशब्देनोक्तयोरिहेदमा परामर्शऽप्यन्वादेशोऽस्त्येव । 'अन्वादेशश्च कथिता-ऽनुकथितमात्रं न त्विदमा कथितस्येदमैवानुकथन'मिति माभ्योक्तेः । षट्पदा-दय इति । न तु ततः परे, एकाच इत्यनुवृत्तेः । अष्टनो । दीर्घान्तादष्टनः परा सर्वनाम-स्थानविभक्तिरुदात्ता । 'झल्युपोत्तमम्' इत्यस्यापवादः । अष्टन्शब्दो घृतादिरवाद-न्तोदात्तः । तेन उत्तरार्थमनुवर्तमानस्यान्तोदात्तादित्यस्येहाऽपि नान्वयः । दीर्घा-त्किम् । अष्टभिः । इह 'झल्युपोत्तमम्' इति स्वरः । ननु चाऽत्रापि 'अष्टन आ विभ-क्तौ' इत्यनेन भवितव्यं तद्विधौ विकल्पस्याऽभावादिति चेत्सत्यम् । इदमेव दीर्घग्र-हणमष्टन आत्वविकल्पं ज्ञापयति । नित्ये ह्यात्वे व्यावर्त्याऽभावाद्दीर्घग्रहणमनर्थकं स्यात् । कृतात्वस्य षट्संज्ञां च ज्ञापयति । अन्यथा ह्यात्वपक्षे सावकाशोऽष्टनः स्वरः परत्वादनात्वपक्षे षट्स्वरेण बाधिष्यत इति किं दीर्घग्रहणेन । जानतीति । 'ज्ञाजनोर्जा' इति जादेशः । 'श्नाभ्यस्तयोरातः' इति श्नाऽऽकारलोपः । अत्र प्रत्ययस्वरेण शत्रन्त-मन्तोदात्तम् । कृण्वत इति । 'घ्विन्विकृण्व्योर च' । तुदन्तीति । तुदादित्वाच्छुः । 'आ-च्छीनद्योः' इति नुम् । प्रत्युदाहरणे दुष्यङ्कविकलतां परिहरति—एकादेशोऽनोदात्त इति । 'तुदन्ती'त्यत्र शे कृते तस्मात्परस्य शतुरनुपदेशात्परत्वाद् 'तास्यनुदात्तेत्—'

अन्तोदात्तात्किम् । दधती । अभ्यस्तानामादिः (सू ३६७३) इत्यायुदात्तः । अनुमः किम् । तुदन्ती । एकादेशोऽत्र उदात्तः । अदुपदेशात्परत्वाच्छतुः 'लसार्वधातुके' (सू ३७३०) इति निघातः । **३७२० उदात्तयणो हल्पूर्वात् ६।१।१७४** उदात्तस्थाने यो यण् हलपूर्वस्तस्मात्परा नदी शसादिर्विभक्तिश्च उदात्ता स्यात् । चोदयित्री सूनृतानाम् । एषा नेत्री । ऋतं देवाय कृण्वते सवित्रे । **३७२१ नोङ्धात्वोः ६।१।१७५॥** अनयोर्यणः परे शसादय उदात्ता न स्युः । ब्रह्मबन्ध्वा । सेत्पृश्निः सुभ्वे । **३७२२ ह्रस्वनुड्भ्यां मतुप् ६।१।१७६॥** ह्रस्वान्तादन्तोदात्तानुटश्च परो मतुबुदात्तः । यो अब्दिमाँउदनिमाँ इयर्ति । नुटः । अक्षण्वन्तः कर्णवन्तः सखायः । अन्तोदात्तात्किम् । मा त्वा विददिधुमान् । 'स्वरविधौ व्यञ्जनमविद्यमानवदित्येतदत्र न । मरुत्वानिन्द्र । नियुत्वान्वायवा

इति निघाते 'एकादेश उदात्तेनोदात्तः' इत्युदात्तत्वम् । अस्मिन्कर्तव्ये तस्याऽसिद्धत्वं नास्ति, अनुम् इति प्रतिषेधाज्ज्ञापकात् । नह्येकादेशस्वरेण विना शत्रन्तं सनुमकमन्तोदात्तं भवति । उदात्तयणो । 'उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य' इति प्राप्ते वचनम् । चोदयित्री नेत्री सवित्रे इति तृजन्ता एते । 'चितः' इत्यन्तोदात्तः । हल्पूर्वादिति किम् । बहुतितवा ब्राह्मण्या । स्त्रीलिङ्गोपादानं नाभावनिवृत्त्यर्थम् । 'तनोतेर्ड उः सन्वच्च' इति डः । 'चाक्लृनी तितउः पुमान्' 'बहोर्नञ्बहुव्रीत्यदभूम्नि' इति बहुव्रीहिरन्तोदात्तः । तत्र 'उदात्तस्वरितयोः-' इति विभक्तेः स्वरितत्वम् । अस्मिन्सूत्रे नकारग्रहणं च कर्तव्यम् । उदात्तस्थाने यो नकारस्ततोऽपि परस्या नद्या उदात्तत्वं वक्तव्यमित्यर्थः । तेन वाचां पतिः वाक्पत्नीति सिद्धम् । अत्र हि 'पत्यावैश्वर्ये' इति पूर्वपदप्रकृतिस्वरस्य 'न भूवाक्चिदिधिषु' इति प्रतिषेधात्समासान्तोदात्तत्वे 'विभाषा सपूर्वस्य' इति नकारे नान्तत्वान्ङीप् अनेनोदात्तः । नोङ् । शसादय इति । यद्यपि पूर्वसूत्रे नद्यजादीत्यनुवर्तते, तथापि ऊङ्धात्वोर्यणः परा नदी न सम्भवतीति नानुवर्तिता । ब्रह्मबन्ध्वेति । ऊङ् प्रत्ययस्वरेणोदात्तः । तेन सह य एकादेशः सोऽप्युदात्तः । तस्मात्परस्योदात्तत्वे प्रतिषिद्धे 'उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य' इति विभक्तिः स्वरिता । सुभ्वे इति । क्विबन्तस्य कृदुत्तरपदप्रकृतिस्वरेणान्तोदात्तस्य 'ओः सुपि' इति यण् । अब्दिमानिति । आपो दीयन्तेऽस्मिन्निति 'कर्मण्यधिकरणे च' इति किः । उदनिशब्दोऽव्युत्पन्नः । अस्य घृतादित्वादन्तोदात्तत्वं बोध्यम् । अन्यथा 'युतोऽन्यपदान्तानाम्' इति द्वितीयस्योदात्तत्वं प्रसज्येत । 'मतुवसोरु सम्बुद्धौ छन्दसि' इति रुः । 'आतोऽटि नित्यम्' इत्यनुनासिकः । अक्षण्वन्त

गहि । रेशब्दाच्च । रेवाँइद्देवतः । ३७२३ नामन्यतरस्याम् ६।१।१७७॥ मतुपि यो ह्रस्वस्तदन्तादन्तोदात्तात्परो नामुदात्तो वा । चेर्तन्ती सुमतीनाम् । ३७२४ ङ्याश्छन्दसि बहुलम् ६।१।१७८॥ ङ्याः परो नामुदात्तो वा । देवसेनानामभिभञ्जतीनाम् । वेत्युक्तेर्नेह । जयन्तीनां मरुतो यन्तु । ३७२५ षट्त्रिचतुर्भ्यो हलादिः ६।१।१७९॥ एभ्यो हलादिर्विभक्तिरुदात्ता । आषड्भिर्हूयमानः । त्रिभिर्ह्येव । ३७२६ न गोश्वन्साववर्णराडङ्क्रुङ्कृद्भ्यः ६।१।१८२॥ एभ्यः प्रागुक्तं न । गवां शता । गोभ्यो गातुम् । शुनश्चिच्छेपम् । सौ प्रथमैकवचने अवर्णान्तात् । तेभ्यो द्युम्नम् । तेषां पाहि श्रुधी हवम् । ३७२७

इति । अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः' इति 'छन्दस्यपि दृश्यते' इत्यनङ् । 'अनो नुट्' इत्यस्यासिद्धत्वात्पूर्वं नलोपः । ततो भूतपूर्वंगत्वा मतुपो नुट् । 'मादुपधायाः-' इति वत्वम् । इषुरिति । 'भान्ये नित्' इत्यधिकारे 'इषेः किच्च' इति उप्रत्ययान्त आद्युदात्त इषुशब्दः तस्मात्परो मतुबनुदात्त एव । ननु मरुतोऽस्य सन्तीति मरुत्वान् । अत्र मतुबुदात्तत्वं प्राप्नोति । 'मृगेरुतिः' इत्युतिप्रत्यये प्रत्ययस्वरेण मरुच्छब्दस्यान्तोदात्तत्वात् । नच तकारेण व्यवधानं, स्वरविधौ व्यञ्जनस्याविद्यमानत्वात् । अत आह—स्वरविधाविति । नेष्यत इति । 'समासस्य' इति सूत्रे मरुत्वानित्यत्र 'ह्रस्वनुड्भ्यां मतुप्' इति स्वरः प्राप्नोतीति दोषमुद्भाव्य हलूस्वरप्राप्ताविति भाष्योक्तेरिति भावः । रेवानिति । रयिरस्यास्तीति मतुप् । 'रयेर्मतौ बहुलम्' इति सम्प्रसारणं पूर्वरूपत्वम् । 'आदृगुणः' ततो ह्रस्वाऽभावाद्वत्वनम् । नामन्य । ह्रस्वग्रहणमनुवर्तते मतुबग्रहणं च । तद्धि सप्तम्या विपरिणम्यते, तेन ह्रस्वो विशेष्यते । तदाह-मतुपि यो ह्रस्व इति । सुमतीनामिति । सुमति शब्दो बहुव्रीहिः । 'नञ्सुभ्याम्—' इत्यन्तोदात्तः । मतुपा ह्रस्वविशेषणं किम् । भूतपूर्वेऽपि ह्रस्वे यथा स्वरः स्यात् अरनीनामित्यादौ, अन्यथा परत्वान्नित्यत्वाच्च दीर्घत्वे कृते ह्रस्वऽभावान्न स्यात् । तिसृणामित्यत्र सामः प्रतिके ह्रस्वे स्यात् । साम्प्रतिकाऽभावे हि भूतपूर्वंगतिर्भवति, न तु सत्यपि तस्मिन् । नन्वेवं तिसृणामित्यत्र न स्यात् । मतुपि तिसृभावस्यैवाऽभावात् इष्टमेवैतत्संगृहीतम् । अत्र हि 'षट्त्रिचतुर्भ्यो हलादिः' इति नित्यमेव विभक्तेरुदात्तत्वमिष्यते । षट्त्रि । अन्तोदात्तादित्येतन्निवृत्तम् । यद्येतदनुवर्तेत पञ्चानां नवानां चतुर्णामित्यत्र न स्यात् । 'ऋः संख्यायाः' इत्याद्युदात्तत्वात् । क तर्हि स्यात् ? सप्तानामष्टानाम् । सप्ताऽष्टशब्दौ घृतादित्वादन्तोदात्तौ । हलादिः किम् । चतस्रः पश्य । यथैतदिह हलादिग्रहणस्य व्यावर्त्यं तथा 'चतुरः शसि' इत्यत्रैवाऽवोचाम । न गो ।

दिवो झल् ६।१।१८३॥ दिवः परा झलादिर्विभक्तिर्नोदात्ता। द्युभिरक्तुभिः। झलिति किम्। उप त्वाग्ने दिवेदिवे। ३७२८ नृचाऽन्यतरस्याम् ६।१।१८४॥ नुः परा झलादिर्विभक्तिर्वोदात्ता। नृभिर्यमानः। ३७२९ तित्स्वरितम् ६।१।१८५॥ निगदव्याख्यातम्। कं नूनम्। ३७३० तास्यनुदात्तेन्ङिददुपदे-

---

सावेति यदि सप्तमीबहुवचनग्रहणं स्यात्, तेभ्यः केभ्यः इत्यत्र न स्यात् तस्मिंश-ब्दयोः सप्तमीबहुवचने परतः त्यदादत्वे कृते 'बहुवचने झल्येत्' इत्येत्त्वविधानात्। तेषु केषु इत्यत्राऽवर्णान्तत्वाऽभावात्। ताभिर्याभिरित्यादावेव स्यात्, तासु यास्वित्यत्रा-वर्णान्तत्वात्। तस्मात्प्रथमैकवचनमित्याह-सौ प्रथमैकवचनमिति। अनन्तरप्रतिषेध-स्याऽसम्भवात् षाष्ठिकस्वरस्य प्रतिषेधो विज्ञायत इत्याह-प्रागुक्तं नेति। एवं च वीर-वत्तममित्यत्र 'ह्रस्वनुड्भ्यां मतुप्' इति न भवति। 'स्फायितञ्चि' इत्यादिना रकि अन्तोदात्तो वीरशब्दः। गोभ्य इति। 'सावेकाचः' इति प्राप्तम्। शुनश्चिच्छेपमिति। अत्र 'चि'दिति पदं संहितापाठे बाहुलकात् शुनःशेपशब्दस्य मध्ये प्रक्षिप्यते। पदकाले तु शुनःशेपं चिदिति पठ्यते। 'शेपपुच्छलाङ्गूलेषु शुनः' इत्यलुक्। वनस्पत्यादिषा-दुभयपदप्रकृतिस्वरः। श्वनूशब्दे तेभ्यः तेषामित्यत्र च 'सावेकाचः—' इति प्राप्तं प्रतिषिध्यते। राडिति क्विबन्तः। राजा। अडिति। अञ्चतिः क्विबन्तः। तस्य सन-कारस्य ग्रहणं विषयावधारणार्थम्। यत्र नलोपो नास्ति तत्रैव प्रतिषेधो यथा स्या-त्। प्राञ्चा। प्राङ्भ्याम्। 'नाञ्चेः पूजायाम्' इति प्रतिषिध्यते नलोपः। 'अञ्चेश्छ-न्दस्यसर्वनामस्थानम्' इति प्राप्तं निषिध्यते। गतौ तु विभक्त्युदात्तः स्यादेव। प्राचा प्राचे। क्रुङिति क्विबन्तः। क्रुञ्चा। क्रुञ्च कौटिल्याल्पीभावयोः। 'ऋत्विक्-' इत्यादिना क्विन्। तत्रैव सूत्रे क्रुञ्चेति निपातनाल्लोपाऽभावः। कृत् कीर्ति। कृन्त-तिर्वा क्विबन्तः। कृता कृते। दिवो। झलादिरिति। नन्वसति सप्तमीनिर्देशे कथं पुन-रत्र तदादिविधिः। केवलझलादिमकाया विभक्तेरभावादेव तदादिविधिः। ननु तर्हि तदन्तविधिरस्तु का पुनर्झलन्ता विभक्तिः। शसादिः सकारान्ता इति चेत्स-त्यम्। 'षट्त्रिचतुर्भ्यो हलादिः' इत्यतः आदिरिति वर्तते। दिवः परा विभक्तिर्नो-दात्ता भवति, कीदृशी, यस्याझलादिरिति। द्युभिरिति। 'सावेकाचः' इति वा 'ऊडि-दम्' इति वा प्राप्तः स्वरः प्रतिषिध्यते। दिवे दिवे इति। 'ऊडिदम्पदात्' इति विभ-क्तिरुदात्ता। तित्स्वरितम्। निगदव्याख्यातमिति। उच्चारणेनैव व्याख्यातमित्यर्थः। क्वेति। 'किमोत्' 'तित्स्वरितम्' 'क्वाति' इति किमः कादेशः। तास्यनु। तास्यादीनां समाहारद्वन्द्वः। उपदेशग्रहणं सम्भवद्व्यभिचाराभ्यां ङिदन्ताभ्यां सम्बध्यते, न तु तास्य-नुदात्तेङ्भ्याम्। ङिदिति कर्मधारयः। उपदिश्यत इत्युपदेशः। तस्याऽकारेण ङिता च

शाल्लसार्वधातुकमनुदात्तमन्ङिद्भोः ६।१।१८६॥ अस्मात्परं लसार्वधातुकमनुदात्तं स्यात्। तासि। कर्ता। कर्तारौ। कर्तारः। प्रत्ययस्वरापवादोऽयम्। अनुदात्तेत्। य आस्ते। ङितः। अभिचष्टे अनृतेभिः। अदुपदेशात्। पुरुभुजाचनस्यतम्। चित्स्वरोऽप्यनेन बाध्यते। वर्धमानं स्वे दमे। तास्यादिभ्यः किम्। अभि वृधे गृणीतः। उपदेशग्रहणान्नेह। हतो वृत्राण्यार्या। लग्रहणं किम्। कतीह पचमानाः। सार्वधातुकं किम्। शिश्ये। अन्ङिद्भोः किम्। हुते। यदधीते। **विन्दीन्धिखिदिभ्यो नेति वक्तव्यम्।** (वा० ३७४२) इन्धे राजा। एतच्च 'अनुदात्तस्य च यत्र' (सू ३६५१) इति सूत्रे भाष्ये स्थितम्। ३७३१ **आदिः सिचोऽन्यतरस्याम् ६।१।१८७॥** सिजन्तस्याऽऽदिरुदात्तो वा। याष्टिष्ट वृतिर-

---

विशेषणात्तदन्तविधिः। तथा च सूत्रार्थः। तासेरनुदात्तेतो ङिदुपदेशादकारान्तोपदेशाच्च परं लसार्वधातुकमनुदात्तं स्यात् न्ङिद्भौ वर्जयित्वा। कर्तेत्यादि। 'लुटः प्रथमस्य डारौरसः' एकवचने ङित्त्वाट्टिलोपः। इतरत्र 'रि च' इति सकोपः। आस्तइत्यत्रादादित्वाच्छपो लुक्। ङित इति। अस्याप्युपदेशविशेषणान्नेह। शृणुते जरितुर्हवम्। अत्र श्नुरतिदेशेन ङित्। चनस्यतमिति। चनोऽन्नन्तादात्मन इच्छन्तमित्यर्थः। क्यच्। लोट् थसस्तं शप् स चानुबन्धस्यानेकान्तत्वादुपदेशः। चित्स्वरोऽपीति। चित्स्वरस्यावकाशः। चलनः 'वलनशब्दार्थादकर्मकाद्युच्। अस्यावकाश आस्ते इत्यादौ। 'वर्धमानमित्यत्र स्वयं निघातश्चित्स्वरं बाधते, परत्वादिति भावः। वर्धमानमिति। वृधु वृद्धौ। लटःशानच्। शप्'आनेमुक्'इति मुक्। नचाऽत्र मुका व्यवधानम्। यद्यकारस्यागमो मुक् तदाकारोपदेशात् परं लसार्वधातुकमिति सिद्धो निघातः। स्वाव्ययवेन व्यवधानाऽभावात्। यद्यकारान्तस्याङ्गस्य भक्तो मुक्, तदाऽदुपदेशलसार्वधातुकमात्रापेक्षत्वादन्तरङ्गस्वरं प्रत्यकारान्तविशिष्टाङ्गप्रत्ययापेक्षत्वेन बहिरङ्गस्य मुकोऽसिद्धत्वात्सिद्धो निघातः। शत इति। 'अनुदात्तोपदेश' इत्यनुनासिकलोपे कृते सत्यकारान्तात्परं लसार्वधातुकं भवति। तथाप्युपदेशग्रहणाच्च भवति। न हि हन्तिरदन्त उपदिश्यते। कतीह पचमाना इति। 'ताच्छील्यवयोवचनशक्तिषु चानश्' क्वचित्तु 'कतीह निघ्नाना' इति दृश्यते तत्र निघ्नशब्दादाचारक्विबन्ताच्छान्दसो मुगागमाऽभावः। तत्तु तास्यादिभ्यः परत्वाऽभावान्नित्यम्। शिश्य इति। 'एरनेकाचः' इति यणादेशः 'लिट् च' इत्यार्धधातुकमेतत्। यदधीत इति। यच्छब्दप्रयोगो 'निपातैर्यद्यदिहन्त' इति निघातप्रतिषेधार्थः। अत्र प्रत्ययाद्युदात्तत्वमेव। विद विचारणे, णिइन्धी दीप्तौ, खिद दैन्ये, इति त्रयोऽनुदात्तेतः। तेभ्यः परस्य सार्वधातुकस्याऽनुदात्तत्वे प्राप्ते आह—विन्दी-

श्विना। **३७३२ थलि च सेटीडन्तो वा ६।१।१९६॥** सेटि थलन्ते पदे इडुदात्तः अन्तो वा आदिर्वा स्यात्। यदा नैते प्रयस्तदा 'लिति' (सू ३६७६) इति प्रत्ययात्पूर्वमुदात्तं स्यात्। लुलविथ। अत्र चत्वारोऽपि पर्यायेणोदात्ताः। **३७३३ उपोत्तमं रिति ६।१।१९७॥** रित्प्रत्ययान्तस्योपोत्तममुदात्तं स्यात्। यदाहवनीये। **इति प्रत्ययस्वराः।**

अथ समासस्वराः।

३७३४ समासस्य ६।१।२२३॥ अन्त उदात्तः स्यात्। यज्ञश्रियम्। **३७३५ बहुव्रीहौ प्रकृत्या पूर्वपदम् ६।२।१॥** उदात्तस्वरितयोगि पूर्वपदं प्रकृत्या स्यात्। सत्यश्रिन्नश्रवस्तमः। उदात्तेत्यादि किम्। सर्वानुदात्ते पूर्वपदे

त्यादि। एभ्यः परस्य लसार्वधातुकस्यानुदात्तत्वं नेति वक्तव्यमित्यर्थः। यासिष्टमिति। या प्रापणे। लुङ् थसस्तम्। 'च्लि लुङि' 'च्लेः सिच्' 'थमरमनमाताम्' इतीट्सकौ। 'बहुलं छन्दस्यमाङ्योगेऽपि' इत्यडभावः। इदमाद्युदात्तत्वाऽभावे उदाहरणम्। आद्युदात्तत्वे तूदाहरणान्तरं मृग्यम्। थलि। 'णमुल्यन्यतरस्याम्' इत्यतोऽन्यतरस्यामित्यनुवर्तमाने वाग्रहणं कार्यविकल्पार्थम्। अन्यतरस्यांग्रहणेन कार्यविकल्पस्य सिद्धत्वात्। तेनेडादयः पर्यायेण कार्यं प्रतिपद्यन्ते। ननु 'तवै चान्तश्च युगपत्'– इत्यादौ युगपद् ग्रहणादेवाऽन्यत्र पर्यायः सिद्धः। सत्यम्। आदेरपि प्राप्त्यर्थं वाग्रहणम्। अन्यथा श्रुतयोरिदन्तयोरेव कार्यित्वं विकल्प्येत। सेटीति किम्। यथा थलि स्वरः। नन्विड्ग्रहणात्सेडेव थल् ग्रहीष्यत इति चेत्सत्यम्। इड्ग्रहणं तु यदेडागमः क्रियते, तदा तस्योदात्तार्थं स्यात्। यथा 'कृतुः क्यङ् सलोपश्च' इत्यत्र सः। ततश्च यथा लुलविथेत्यादौ चतुर्णां पर्यायेणोदात्तविधाने 'यियेथे'त्यादौ चतुर्णामभावेऽपि पर्यायेणोदात्तत्रयं भवति, एवमिडभावेऽपि स्यादित्यर्थः। आहवनीय इति। बाहुलकादधिकरणेऽनीयर्। प्रीणनार्थात्कर्मणि वा। ततो गतिसमासे कृदुत्तरपदप्रकृतिस्वरः। इति प्रत्ययस्वराः।

समासस्य। यज्ञश्रियमिति। षष्ठीतत्पुरुषः। श्रीशब्दस्येकारस्योदात्तत्वे कृते आन्तरतम्यादियङुदात्तः। बहुव्रीहौ। इड्ग्रहोदात्तस्वरितग्रहणमनुवर्तमानं तद्वति वर्तते। पूर्वपदसामानाधिकरण्यात्सूत्रे प्रकृत्यैतावदुक्तेऽपि स्वरप्रकरणात्प्रकृतिस्वरेणैव प्रकृतिभावो विज्ञायते। पूर्वपदस्य प्रकृतिभावस्तत्थयोरुदात्तस्वरितयोः प्रकृतिभावद्वारेणेत्याशयेनाह—उदात्तस्वरितयोगीति। चित्रेति। श्रूयते इति श्रवः कीर्तिः। चित्रं श्रवो यस्य स चित्रश्रवाः। ततस्तमप्। चित्रशब्दः फिट्स्वरेणाऽन्तोदात्तः। ततः परस्य 'उदात्तादनुदात्तस्य–' इति स्वरितः। ततः परस्य 'स्वरितात्संहितायामनुदात्तानाम्' इति

समासाऽन्तोदात्तत्वमेव, यथा-समपादः । ३७३६ तत्पुरुषे तुल्यार्थतृतीयासप्तम्युपमानाऽव्ययद्वितीयाकृत्याः ६।२।२॥ सप्तैते पूर्वपदभूतास्तत्पुरुषे प्रकृत्या । तुल्यश्वेतः । 'कृत्यतुल्याख्या अजात्या' (सू ३४९) इति तत्पुरुषः । किरिणा काणः किरिकाणः । पतयन्मन्दयत्सखम् । मन्दयति मादके इन्द्रे । सखेति सप्तमीतत्पुरुषः । शङ्खीश्यामा । अव्यये नञ्कुनिपातानाम् (वा ३८०८) अयज्ञो वा एषः । परिगणनं किम् । स्नात्वाकालकः । मुहूर्तसुखम् । भोज्योष्णम् । ३७३७ वर्णो वर्णेष्वनेते ६।२।३॥ वर्णवाचिन्युत्तरपदे एतवर्जिते वर्णवाचि पूर्वपदं प्रकृत्या तत्पुरुषे । कृष्णसारङ्गः । लोहितकल्माषः । कृष्णशब्दो नक्प्रत्ययान्तः । लोहित-

---

प्रचयः । समपाद इति । 'स्वरसमसिमेत्यनुवानी'ति सर्वानुदात्तः समशब्दः पादशब्दो 'वृषादीनां च' इत्याद्युदात्तः । अत्र समासान्तोदात्तत्वमेव । तुल्यश्वेत इति । 'नौवयोधर्मविष—' इति यति 'यतोऽनावः' इत्याद्युदात्तस्तुल्यशब्दः । सदृक्श्वेतः सदृशश्वेतः' इति । 'समानान्मयोञ्' इति ञित्वान्तः सदृक्शब्दः 'गतिकारकोपपदात्कृत्' इति कृदुत्तरपदप्रकृतिस्वरेणान्तोदात्तः । एवं सदृशशब्दः कञन्तो मध्योदात्तः । किरिणेति । 'कृगृशकुठिमिदिच्छिदिभ्यश्च' इत्यौणादिक इः स च कित् । 'भुजेः किच्च' इत्यतः किदित्यनुवर्तनात् । तेन किरिगिरिशब्दौ प्रत्ययस्वरेणाऽन्तोदात्तौ । मन्दयत्सखमिति । मदि स्तुत्यादिषु । ण्यन्तात्लटः शत्रादेशः । तस्य 'छन्दस्युभयथा' इत्यार्धधातुकत्वेन शबभावात्-'तास्यनुदात्तेन्ङिददुपदेशात्' इति निघातो न । अतः प्रत्ययाद्युदात्तत्वमेव । 'णेरनिटि' इति णिलोपस्तु न । तं प्रति सार्वधातुकत्वाश्रयणात् । न च वैपरीत्यमापादनीयम् । छन्दसि इष्टानुविधानात् । इत्थं मन्दयच्छब्दोऽन्तोदात्तः । शङ्खीश्यामेति । 'उपमानानि सामान्यवचनैः' इति समासः । शङ्खीशब्दो गौरादिङीषन्तोऽन्तोदात्तः । अव्यये । निपातत्वादेव सिद्धे नञ्ग्रहणमकरणिरित्यादौ परस्यापि कृत्स्वरस्य बाधनार्थम् । अकरणिरित्यादौ 'आक्रोशे नञ्यनिः' इत्यनिः । किच 'तिस्र' इत्यत्र 'तिसृभ्यो जसः' इति सतिशिष्टोऽपि विभक्तिस्वरो नञ्स्वरेण बाध्यते । अपि च चत्वारः अनड्वाह इत्यत्र सतिशिष्टोऽप्याम्स्वरो बाध्यते । अव्ययीत्यत्र 'जिदृक्षि–' इत्यादिना धातुना समासं निपात्य इनिः क्रियते, तस्यापि स्वरस्य बाधनार्थं कुग्रहणं चादिषु पाठाऽभावात् । स्नात्वेति । मयूरव्यंसकादिरयम् । नन्वयं तत्रैवाऽन्तोदात्तो निपात्यतामिति चेन्न । सामिकृतं स्वयंकृतमित्यादिवारणाय परिगणनस्यावश्यकत्वात् । अन्यथा तत्रापि पूर्वपदप्रकृतिस्वरः स्यात् । इष्यते तु समासस्येत्यन्तोदात्तः । सामिकृतमित्यादौ 'सामि' 'स्वयं कृतेन' इति समासः । मुहूर्तसुखमिति । 'कालाध्वनोः' इति द्वितीया । 'अत्यन्तसंयोगे च' इति समासः । मुहूर्तशब्दः

शब्द इतन्तः । वर्णः किम् । परमकृष्णः । वर्णेषु किम् । कृष्णतिलाः । अनेते किम् । कृष्णैतः । **३७३८ गाधलवणयोः प्रमाणे ६।२।४॥** एतयोरुत्तरपदयोः प्रमाणवाचिनि तत्पुरुषे पूर्वपदं प्रकृत्या स्यात् । अरित्रगाधमुदकम् । तत्प्रमाणमित्यर्थः । गोलवणम् । यावद्गवे दीयते तावदित्यर्थः । अरित्रशब्द इत्राऽन्तो मध्योदात्तः । प्रमाणमियत्ता परिच्छेदमात्रं, न पुनरायाम एव । प्रमाणे किम् । परमगाधम् । **३७३९ दायाद्यं दायादे ६।२।५॥** तत्पुरुषे प्रकृत्या । धनदायादः । धनशब्दः क्युप्रत्ययान्तः प्रत्ययस्वरेणाद्युदात्तः । दायाद्यं किम् । परमदायादः । **३७४० प्रतिबन्धि चिरकृच्छ्रयोः ६।२।६॥** प्रतिबन्धवाचि पूर्वपदं प्रकृत्या एतयोः परतस्तत्पुरुषे । गमनचिरम् । व्याहरणकृच्छ्रम् । गमनं कार-

---

पृषोदरादिरन्तोदात्तः । भोज्योष्णमिति । 'कृत्यतुल्याख्या' इति समासः । भोज्यशब्दो ण्यदन्तः 'तिरस्वरितम्' इति स्वरितान्तः । वर्णो वर्ण । अत्र एत इति प्रतिषेधाद्बहुवचननिर्देशाच्च उत्तरपदे स्वरूपग्रहणं न, तत्साहचर्यात्पूर्वपदेऽपि स्वरूपग्रहणं न । तदाह—वर्णवाचिनीत्यादि । कृष्णशब्दो नक्प्रत्ययान्त इति । 'वृषेवर्ण्यं' इति विहितो यो नक् तदन्त इत्यर्थः । कृष्णशब्दः 'कृष्णस्याऽमृगाख्या चेत्' इत्यन्तोदात्तो वेदे । भाषायां तु 'वर्णानां तणतिनितान्तानाम्' इत्याद्युदात्तः । इतन्त इति । 'रहे रश्च लो वा' इति इतन्प्रत्ययान्तो निःस्वरेणाद्युदात्तः । कृष्णतिला इति । 'वर्णो वर्णेन' इति प्रतिपदोक्तः समास इह गृह्यते, तेनैव सिद्धे वर्णग्रहणं चिन्त्यप्रयोजनम् । गाध । अरित्रगाधमिति । अरित्रं नौकाष्ठं, तस्य गाधं स्पृश्यमानं तलम्, गाध्यत इति गाधः । गाधृ प्रतिष्ठायां कर्मणि घञ् । अर्धर्चादित्वात् वलीयस्त्वम् । गोलवणमिति । षष्ठीसमासः । गोशब्दो 'गमेर्डोः' इति डोप्रत्ययान्तोऽन्तोदात्तः । इत्रान्त इति । 'अतिलृधृसुखनसहचर इत्रः' इति विहितः । मध्योदात्त इति । प्रत्ययस्वरेण । इयत्ता परिच्छेदमात्रमिति । इयत्तायाः परिच्छित्तिरियत्तापरिच्छेदः । क्रियाशब्दोऽत्रप्रमाणशब्दो गृह्यते, न पुनरायाममात्र रूढ इत्यर्थः । दायाद्यम् । दातव्यो दायोंऽशः । दायमादत्ते, दायादः । मूलविभुजादित्वात्कः । दायादस्य भावो दायाद्यम् । दायस्य दानं तत्सम्बन्धनो वा । इह तु लक्षणया आदीयमाने दाये एव दायाद्यशब्दो वर्तते दायादशब्दे परे दायाद्यवाचि पूर्वपदं प्रकृतिस्वरं स्यात् । क्युप्रत्ययान्त इति । 'कृपवृजिमन्दिनिधाञः क्युः' इति विहितः । परमदायाद इति । अत्र समासान्तोदात्तत्वमेव । प्रतिबन्धि । कार्यसिद्धि प्रतिबध्नातीति प्रतिबन्धि । आवश्यके णिनिः । गमनचिरम् । व्याहरणकृच्छ्रमिति । गमनव्याहरणशब्दौ ल्युडन्तौ । तयोर्लिंस्वरः । अत्र विशेषणसमासः । ननु सामानाधिकरण्ये सति विशेषणसमासो भवति । न चेह तदस्ति । गमनशब्दस्य गतिवाचित्वाच्चिरशब्दस्य कालवाचित्वात् । नैष दोषः । चिरकालवाचिनि गमनेऽत्र चिरशब्दो वर्तते, गमनमत्र विशेष्यं तद्विशेषणे तु चिरकृच्छ्रे तत्र विशेष्यस्य

णविकलतया चिरकालभावि कृच्छ्रयोगि च प्रतिबन्धि जायते । प्रतिबन्धि किम् । मूत्रकृच्छ्रम् । **३७४१ पदेऽपदेशे ६।२।७॥** व्याजवाचिनि पदशब्द उत्तरपदे पूर्वपदं प्रकृत्या तत्पुरुषे । मूत्रपदेन प्रस्थितः । उच्चारपदेन । मूत्रशब्दो घञन्तः । उच्चारशब्दो घञन्तः । 'थाथ' (सू ३८७८) आदिस्वरेणान्तोदात्तः । अपदेशे किम् । विष्णुपदम् । **३७४२ निवाते वातत्राणे ६।२।८॥** निवातशब्दे परे वातत्राणवाचिनि तत्पुरुषे पूर्वपदं प्रकृत्या । कुटीनिवातम् । कुड्यनिवातम् । कुटीशब्दो गौरादिङीषन्तः । कुड्यशब्दो ऽयगन्तः । यगन्त इत्यन्ये । वातत्राणे किम् । राजनिवाते वसति । निवातशब्दोऽयं रूढः पार्श्वे । **३७४३ शारदेऽनार्तवे ६।२।९॥** ऋतौ भवमार्तवम् । तदन्यवाचिनि शारदशब्दे परे तत्पुरुषे पूर्वपदं प्रकृतिस्वरं स्यात् । रज्जुशारदमुदकम् । शारदशब्दो नूतनार्थः । तस्याऽऽद्युदात्तविग्रहः । रज्जोः सद्य उद्धृतम् । रज्जुशब्दः (ङ) **सृजेरसुम् च** इत्यायुदात्तो व्युत्पादितः । अनार्तवे किम् । उत्तमशारदम् । **३७४४ अध्वर्युकषाययोर्जातौ ६।२।१०॥** एतयोः परतो जातिवाचिनि तत्पुरुषे पूर्वपदं प्रकृतिस्वरम् । कठाध्वर्युः । दौवारिककषायम् । कठशब्दः पचाद्यजन्तः । तस्मात् वैश-

---

पूर्वनिपातनार्थं मयूरव्यंसकादिष्वमप्येष्टव्यम् । पूर्वपदस्य प्रतिबन्धिवाचित्वमुपपादयति । गमनमित्यादि । **कारणवैकल्याद्धि चिरकालभावि गमनं कार्यसिद्धेः प्रतिबन्धि जायते । कृच्छ्रयोगि वा, कृच्छ्रं दुःखं तद्योगि वा कार्यसिद्धेः प्रतिबन्धि जायते ।** मूत्रकृच्छ्रमिति । षष्ठीसमासः । पदेऽपदेशे । **अपदेशो व्याजः । 'व्याजोऽपदेशो लक्ष्यं च' इत्यमरात्तदाह—**व्याजवाचिनीति । उच्चारपदेनेति । **उच्चारः पुरीषक्रिया ।** विष्णुपदमिति । षष्ठीसमासः । निवाते । **निवातशब्दे परे वातत्राणवाचिनीति । वातत्राणार्थं निवातशब्दे परे इत्यर्थः । वातस्याऽभावो निवातमित्यव्ययीभावः । निरुद्धो वातोऽस्मिन्निति बहुव्रीहिर्वा । तत्र कुड्यादयो वर्तमानाः समानाधिकरणा निवातशब्देन समस्यन्ते । कुटी एव निवातं कुटीनिवातम् । कुड्य एव निवातं कुड्यनिवातम् । ऽयगन्त इति । कवतेऽयंक् डकारश्चेत्संज्ञा न भवति । गुणप्रतिषेधार्थात्ककारानुबन्धात् ।** यगन्त इत्यन्ये इति । **'ते तु कवतेऽयञ्जिति सूत्रमधीयते' ।** शारदे । **नूतनार्थ इति । ऋद्युत्पन्न इत्यर्थः ।** रज्जोः सद्य उद्धृतमिति । **रज्जुबद्धपात्राधारे रज्जुशब्दः । इदानीमेव कूपादुद्धृतं नूतनं जलमित्यर्थः ।** सृजेरसुम्चेति । **'स्कन्देः सलोपश्च' इत्यतः सलोप इति वर्तते 'भृमृशीङ्' इत्यतः ञरिति । 'आन्ये नित्' इत्यतो निदिति । सृजेरुः स्यात्स च नित् धातोरसुगागमः सलोपश्चेत्यर्थः । तत्र सृजेरन्त्यादचः परेऽसुमि सलोपयणादेशेऽसुम् सकारस्य जश्त्वे च रज्जुरिति भवति ।** आद्युदात्त इति । **प्रत्ययस्य नित्त्वाच्चित्स्वरेण ।** उत्तमशारदमिति । **शरदि ऋतौ भवं शारदम् ।** अध्व ।

म्यायनान्तेवासिभ्यश्च' (सू १४८४) इति णिनेः 'कठचरकाल्लुक्' (सू १४८७) इति लुक्। द्वारि नियुक्त इति ठक्यन्तोदात्तो दौवारिकशब्दः। जातौ किम्। परमाध्वर्युः। **३७४५ सदृशप्रतिरूपयोः सादृश्ये ६।२।११॥** अनयोः पूर्वं प्रकृत्या। पितृसदृशः। सादृश्ये किम्। परमसदृशः। समासार्थोऽत्र पूज्यमानता न सादृश्यम्। **३७४६ द्विगौ प्रमाणे ६।२।१२॥** द्विगावुत्तरपदे प्रमाणवाचिनि तत्पुरुषे पूर्वपदं प्रकृतिस्वरम्। प्राच्यसप्तसमः। सप्त समाः प्रमाणमस्य। **प्रमाणे लोर्द्विगोर्नित्यम्।** (वा० २१२८-२९) इति मात्रचो लुक्। प्राच्यशब्द आद्युदात्तः। प्राच्यश्चासौ सप्तसमश्च प्राच्यसप्तसमः। द्विगौ किम्। व्रीहिप्रस्थः। प्रमाणे किम्। परमसप्तसमम्। **३७४७ गन्तव्यपण्यं वाणिजे ६।२।१३॥** वाणिजशब्दे परे तत्पुरुषे गन्तव्यवाचि पण्यवाचि च पूर्वपदं प्रकृतिस्वरम्। मद्रवाणिजः। गोवाणिजः। सप्तमीसमासः। मद्रशब्दो रक्प्रत्ययान्तः। गन्तव्येति किम्। परमवाणिजः। **३७४८**

कठाध्वर्युरिति। अध्वरं यज्ञं यातीत्यध्वर्युः ऋत्विरविशेषः। कठेन प्रोक्तं छन्दोऽधीते कठः। कठशब्दादण्णन्तात् णिनिप्रत्ययः तस्य लुक्। अध्येत्रणस्तु 'प्रोक्ताल्लुक्' इति लुक्। विशेषणसमासोऽयम्। दौवारिकक्षायमिति। षष्ठीसमासः। सदृश। सादृश्यवाचिनि तत्पुरुषे पूर्वपदं प्रकृत्या एतयोरुत्तरपदयोः। पितृसदृश इति। पितृमातृशब्दावृणादितृजन्तौ चित्स्वरेणाऽन्तोदात्तौ। नन्वत्र 'पूर्वसदृशसमोनार्थ' इति तृतीयासमासे कृते 'तत्पुरुषे तुल्यार्थ' इत्येव सिद्धम्। न च तुल्यार्थयोगे षष्ठ्या अपि विहितत्वेन षष्ठीसमासार्थमिदमिति वाच्यम्। तत्राऽनभिधानात्षष्ठीसमासो नेत्यपि सुवचत्वादिति चेन्मैवम्। अलुक्समासानुरोधेन षष्ठीसमासस्वीकारस्यावश्यकत्वात्। तद्यथा। दास्याः सदृशो वृषल्याः सदृश इति। 'षष्ठ्या आक्रोशे' इत्यलुक्। दासीशब्दो 'दंसेष्टो न आ च' इति दंसेष्टप्रत्ययः नकारस्य चाऽऽकारः। प्रत्ययस्वरेण दासशब्द अन्त उदात्तः। टित्त्वान्ङीप्। 'यस्य' इति लोपः। 'अनुदात्तस्य च यत्र' इति लोप उदात्तत्वम्। वृषलशब्दाज्जातिलक्षणो ङीष्। उभयत्रापि 'उदात्तयणो हल्पूर्वात्' इति विभक्तिरुदात्ता। नन्वेवं तृतीयासमासविधायके 'पूर्वसदृश' इति सूत्रे सदृशग्रहणं मास्तु सर्वत्र षष्ठीसमासोऽस्तु इति चेन्मैवम्। यत्र षष्ठ्यर्थो नास्ति, तदर्थं सदृशग्रहणम्। विद्यया सदृशो विद्यासदृश इति। अन्यो देवदत्तादिरत्र प्रतियोगी। प्राच्यशब्द आद्युदात्त इति। 'उगवादायुदात्तः' इति यदन्तत्वात् 'यतोऽनावः' इत्याद्युदात्तः। परमसप्तसममिति। सप्तानां समानां समाहारः सप्तसमं। समाहारद्विगुः। पात्रादित्वात् स्त्रीत्वाभावः। गन्तव्यपण्यम्। वणिगेव वाणिजः प्रज्ञादित्वाद्यण्। मद्रवाणिज इति। मद्रेषु गत्वा व्यवहरतीत्यर्थः। गोवाणिज इति। गमेर्डो। अन्तोदात्तोऽयम्। सप्तमीसमास इति। सप्तमीति योगविभागात् मद्रवाणिजेत्यत्र

मात्रोपज्ञोपक्रमच्छाये नपुंसके ६।२।१४॥ मात्रादिषु परतो नपुंसकवाचिनि तत्पुरुषे तथा । भिक्षायास्तुल्यप्रमाणं भिक्षामात्रम् । भिक्षाशब्दो 'गुरोश्च हलः' (सू ३२८०) इत्यप्रत्ययान्तः । पाणिन्युपज्ञम् । पाणिनिशब्द आद्युदात्तः । नन्दोपक्रमम् । नन्दशब्दः पचाद्यजन्तः । इषुच्छायम् । इषुशब्द आद्युदात्तो निरत्वात् । नपुंसके किम् । कुड्यच्छाया । **३७४९ सुखप्रिययोर्हिते** ६।२।१५॥ एतयोः परयोर्हितवाचिनि तत्पुरुषे तथा । गमनप्रियम् । गमनसुखम् । गमनशब्दे लित्स्वरः । हिते किम् । परमसुखम् । **३७५० प्रीतौ च** ६।२।१६॥ प्रीतौ गम्यायां प्रागुक्तम् । ब्राह्मणसुखं पायसम् । छात्रप्रियोऽनध्यायः । ब्राह्मणच्छात्रशब्दौ प्रत्ययस्वरेणान्तोदात्तौ । प्रीतौ किम् । राजसुखम् । **३७५१ स्वं स्वामिनि** ६।२।१७॥ स्वामिशब्दे परे स्ववाचि पूर्वपदं तथा । गोस्वामी । स्वं किम् । परमस्वामी । **३७५२ पत्यावैश्यवर्म्ये** ६।२।१८॥ दमूना गृहपतिर्दमे । **३७५३ न भूवाक्चिद्दिधिषु** ६।२।१९॥ पतिशब्दे

षष्ठीसमासः । रक्प्रत्ययान्त इति । 'स्फायितञ्चि' इति विहितो रक् तदन्तादित्यर्थः । प्रत्ययस्वरेणान्तोदात्तोऽयम् । मात्रो । तयेति । पूर्वपदं प्रकृतिस्वरं स्यादित्यर्थः । भिक्षाशब्दोऽप्रत्ययान्तोऽन्तोदात्तः । मात्रशब्दस्तु तुल्यपर्यायो वृत्तिविषये तुल्यप्रमाणे वर्तते भिक्षायास्तुल्यप्रमाणमित्यस्यपदविग्रहः षष्ठीतत्पुरुषः । तदाह—भिक्षाया इति । पाणिन्युपज्ञमिति । उपज्ञायत इति उपज्ञा । 'आतश्चोपसर्गे' कर्मण्यङ् । पाणिनिशब्द इञन्तत्वादाद्युदात्तः । तस्य उपज्ञा इति षष्ठीसमासः । 'उपज्ञोपक्रमं तदाद्याचिख्यासायाम्' इति नपुंसकता । नन्दोपक्रममिति । षष्ठीसमासः । अत्रापि पूर्ववन्नपुंसकता । उपक्रम्यते इति कर्मणि घञ् । 'नोदात्तोपदेशस्य' इति वृद्धिप्रतिषेधः । इषुच्छायमिति । इषूणां छायेति तत्पुरुषः । 'छाया बाहुल्ये' इति नपुंसकता । 'इषेः किच्च' इत्युप्रत्ययान्त इषुः, तत्र निदधिकारादाद्युदात्तस्तदाह—इषुशब्द इति । गमनसुखमिति । समानाधिकरणसमासो मयूरव्यंसकादिर्वा । लित्स्वर इति । गमनशब्दो ल्युडन्तः 'लिति' इति सूत्रेणाऽऽद्युदात्तः । प्रागुक्तमिति । सुखप्रिययोः परयोस्तत्पुरुषे पूर्वपदं प्रकृतिस्वरं स्यादित्यर्थः । योगविभागो यथासंख्यनिवृत्त्यर्थः । ननु 'सुखप्रिययोः' इत्येतावत्पूर्वसूत्रं कृत्वा 'हिते च' इति वक्तव्यम् । तत्राऽऽद्ये सूत्रे सुखप्रिययोः प्रीत्यर्थयभिचारादेव प्रीतौ गम्यमानायां भविष्यतीति चेत् । सत्यम् । प्रीतिग्रहणं तदतिशयप्रतिपत्त्यर्थम् । ब्राह्मणच्छात्रशब्दाविति । ब्रह्मणोऽपत्यमित्यण् । 'ब्राह्मोऽजातौ' इति जातौ टिलोपाभावेऽञ्चिति प्रकृतिभावः । छात्रशब्दः 'छत्रादिभ्यो णः' इति णप्रत्ययान्तः । पत्या । ऐश्वर्यार्थं पतिशब्दे परे पूर्वपदं प्रकृतिस्वरं स्यात् तत्पुरुषे । गृहपतिरिति षष्ठीसमासः । 'गेहे कः' इति कप्रत्ययान्तो

परे ऐश्वर्यवाचिनि तत्पुरुषे नैतानि प्रकृत्या । भुवः पतिर्भूपतिः । वाक्पतिः । चित्पतिः । दिधिषूपतिः । **३७५४ वा भुवनम् ६।२।२०॥** उक्तविषये । भुवनपतिः । (उ० सू०) **'भूसूधूभ्रस्जिभ्यः'** इति क्युन्तो भुवनशब्दः । **३७५५ आशङ्काबाधनेदीयस्सु संभावने ६।२।२१॥** अस्तित्वाध्यवसायः संभावनम् । गमनाशङ्कमस्ति । गमनाबाधम् । गमननेदीयः । गमनमाशङ्क्यते, आबाध्यते, निकटतरमिति वा संभाव्यते । संभावने किम् । परमनेदीयः । **३७५६ पूर्वे भूतपूर्वे ६।२।२२॥** आढ्यो भूतपूर्वः आढ्यपूर्वः । पूर्वशब्दो वृत्तिविषये भूतपूर्वे वर्तते । भूतपूर्वे किम् । परमपूर्वः । **३७५७ सविधसनीडसमर्यादसवेशसदेशेषु सामीप्ये ६।२।२३॥** एषु पूर्वं प्रकृत्या । मद्रसविधम् । गान्धारसनीडम् । काश्मीरसमर्यादम् । मद्रसवेशम् । मद्रसदेशम् । सामीप्ये किम् । सह मर्यादया सम-

---

गृहशब्दः प्रत्ययस्वरेणान्तोदात्तः । न भू । भ्वादीनां समाहारद्वन्द्वे नपुंसकत्वम् । ह्रस्वत्वम् । एतानीति । भूशकूचिद्विधिषु एतानीत्यर्थः । न प्रकृतेति । पूर्वेण प्राप्तः प्रतिषिध्यते । भूपतिरित्यादि । षष्ठीसमासा एते । तत्र भ्वादयस्त्रयः किबन्ताः । दिधिषूशब्दः 'अन्दूहश्मूजम्बुकफेलूकर्कन्धूदिधिषू' इत्युरत्ययान्तो निपातितः । सर्वेऽप्यन्तोदात्ताः । वा भुवनं । उक्तविषये इति । ऐश्वर्यवाचिनि पतिशब्दे परे भुवनशब्दः पूर्वपदप्रकृतिस्वरः स्यात् । 'पत्यावैश्वर्ये' इति प्राप्ते विकल्पोऽयम् । भुवनपतिरिति । भुवनशब्दः क्युन्प्रत्ययान्तो नित्स्वरेणाद्युदात्तः । आशङ्काबाध । आशङ्काऽऽबाधनेदीयस्सूत्तरपदेषु सम्भावनवाचिनि तत्पुरुषे पूर्वपदं प्रकृतिस्वरं स्यात् । शकि शङ्कायाम् । बाधृ लोडने । आङ्पूर्वाभ्यां कर्मणि घञ् । अतिशयेनाऽन्तिकं नेदीयः । द्वयोरन्तिकयोर्मध्ये एकस्यातिशयविवक्षायामीयसुनि 'अन्तिकबाढयोः-' इति नेदादेशः । गमनाऽऽशङ्कादयो विशेषणसमासाः, मयूरव्यंसकादयो वा । अस्तित्वाध्यवसाय इति । अस्तित्वनिश्चयः । गमनाशङ्कमिति । पूर्वपदानि क्युडन्तानि । तत्र लिःस्वरः । गमनमाशङ्क्यत इत्यादि । 'संभाव्यत' इत्यस्य प्रत्येकमन्वयः । गमनमाशङ्क्यते इति संभाव्यते । गमनमाबाध्यत इति संभाव्यते । गमनं निकटतरमिति वा संभाव्यते । पूर्वे भूतपूर्वे । भूतपूर्वार्थे पूर्वशब्दे परे पूर्वपदं प्रकृतिस्वरं स्यात् । आढ्यो भूतपूर्व इति । यः पूर्वमाढ्य आसीत्स एवमुच्यते । आढ्यपूर्व इति । अत्र विशेषणसमासो मयूरव्यंसकादिर्वा । आढ्यशब्दः आङ्पूर्वाद्ध्यायतेः 'घञर्थे कविधानम्' इति कर्मणि कः । आतो लोपः । पृषोदरादित्वाद्धस्य ढः यथादिस्वरेणाऽन्तोदात्तः । परमपूर्व इति । परमश्चासौ पूर्वश्चेति योऽयं वाक्यार्थः पूज्यमानतालक्षणस्तस्मिन्निह प्रत्युदाहरणे समासः । परमश्चासौ भूतपूर्वश्चेति विग्रहे तूदाहरणमेव । सविध । सामीप्यार्थेषु । सविधादिषूत्तरपदेषु पूर्वपदं प्रकृत्या तत्पुरुषे । मद्रसविधमिति । सर्वत्रोदाहरणे

र्यादं क्षेत्रम् । चैत्रसमर्यादम् । **३७५८ विस्पष्टादीनि गुणवचनेषु ६।२।२४॥** विस्पष्टकटुकम् । विस्पष्टशब्दो 'गतिरनन्तरः' (सू३७८३) इत्याद्युदात्तः । विस्पष्टेति किम् । परमलवणम् । गुणेति किम् । विस्पष्टब्राह्मणः । विस्पष्ट । विचित्र । व्यक्त । सम्पन्न । पण्डित । कुशल । चपल । निपुण । **३७५९ अज्याऽवमकन्पापवत्सु भावे कर्मधारये ६।२।२५॥** अ ज्य कन् इत्यादेशवति, अवमशब्दे, पापशब्दवति चोत्तरपदे भाववाचि पूर्वपदं प्रकृत्या । गमनश्रेष्ठम् । गमनज्यायः । गमनाऽवमम् । गमनकनिष्ठम् । गमनपापिष्ठम् । श्रेत्यादि

षष्ठीसमासः । भद्रः रगन्तेर्नोऽदात्तः । गान्धारिः । 'कदंमादीनां च' इत्याद्युदात्तो वा । काश्मीरो 'हृघावन्ते-'इति मध्योदात्तः । सविधादीनां सह विधया इत्येवमादिका व्युत्पत्तिरेव केवलम् । समीपवाचिनश्चैते सहोदायाः । भद्रादीनां सविधं समीपमित्यर्थः । समर्यादमिति । 'वोपसर्जनस्य' इति सहस्य सादेशः । चैत्रसमर्यादमिति षष्ठीसमासः । सविधादिषु किम् । भद्रसमीपम् । विस्पष्टा गुणवचनेषु परेषु विस्पष्टादीनि प्रकृत्या स्युः । विस्पष्टकटुकमिति । 'स्पश बाधनस्पर्शनयो'रित्यस्य व्यन्तस्य निष्ठायां 'वा दान्तशान्त—'इति स्पष्टशब्दो निपातितः । तस्य विशेषशब्देन गतिसमासः । विस्पष्टं कटुकमिति विग्रहः । विस्पष्टादीनि शब्दप्रवृत्तिनिमित्तस्य विशेषणानि, न द्रव्यस्य कटुकादिशब्दैर्गुणवद्द्रव्यमभिधीयते इति सामानाधिकरण्याभावात्कर्मधारयाऽभावे सुसुप्तेति समासः । विचित्रेत्यादि । चित्र चित्रीकरणे चुरादिण्यन्तादेरच् । विशेषेण चित्रं विचित्रं प्रादिसमासः 'तत्पुरुषे तुल्यार्थ–' इत्यस्ययपूर्वपदप्रकृतिस्वरेणाद्युदात्तः । क्तौ संज्ञाने निष्ठा । विगतं चित्रमस्य इति विचित्रः । 'बहुव्रीहौ प्रकृत्या पूर्वपदम्' इत्याद्युदात्तः । अञ्जू व्यक्त्यादिषु । तस्य विपूर्वस्य निष्ठायां गतिस्वरे 'उदात्तस्वरितयोः—' इति स्वरितादिः । पदेः कर्तरि क्तः । थाथादिस्वरेणान्तोदात्तः । गतिस्वरस्तु न । कर्मणीति तत्र वर्तते । अयं कर्तरि क्तः । 'फलिपाटिनमिमनिजनां गुक्पटिनाकिधतक्ष'इत्युप्रत्ययान्तः पटुशब्दः । तत्र निदित्यधिकारादाद्युदात्तः । पडि गतौ । क्तः प्रत्ययस्वरः उणादिवृत्तौ तु पण व्यवहारे स्तुतौ च । अमन्ताडुः । पण्डा बुद्धिः सा सञ्जाताऽस्येति तारकादिरितच् । एवमुक्तम् । कुशान् लातीति कुशलः । 'आतोऽनुपसर्गे' इति कः कृस्वरेणान्तोदात्तः । चुप मन्दायां गतौ । अस्मात् 'चुपेरकोपधायाः' इति कलप्रत्ययः । तत्र 'वृषादिभ्यश्चित्' इत्यतश्चिदिति वर्तनादन्तोदात्तः । पुण्य कर्मणि शुभे । 'इगुपधज्ञाप्रीकिरः कः' । थाथादिस्वरेणान्तोदात्तः । अज्येत्या । अज्यकनामादेशानामुत्तरपदत्वासम्भवात्सामर्थ्यात्तद्वदुत्तरपदं गृह्यत इत्याह—इत्यादेशवतीति । इष्ठेयसुनोः 'प्रशस्यस्य श्रः' 'ज्य च' 'युवाल्पयोः कनन्यतरस्याम्' । गमनश्रेष्ठमित्यादि । मयूरव्यंसकादित्वाद्रात्रिजदन्तादित्वाद्वा विशेषणस्य परनिपातः । पापिष्ठमिति । विमन्तोर्डुंक् । उदाहरणे 'नपुंसके भावे क्तः' 'ष्युट् च' इति

किम्। गमनशोभनम्। भावे किम्। गम्यतेऽनेनेति गमनम्। गमनं श्रेयो गमनश्रेयः। केति किम्। षष्ठीसमासे मा भूत्। **३७६० कुमारश्च ६।२।२६॥** कर्मधारये। कुमारश्रमणा। कुमारशब्दोऽन्तोदात्तः। **३७६१ आदिः प्रत्येनसि ६।२।२७॥** कुमारस्यादिरुदात्तः प्रत्येनसि परे कर्मधारये। प्रतिगतमेनोऽस्य प्रत्येनाः। कुमारप्रत्येनाः। **३७६२ पूरोऽन्यतरस्याम् ६।२।२८॥** पूगा गणास्तेषूक्तं वा। कुमारचातकाः। कुमारजीमूताः। आद्युदात्तत्वाभावे 'कुमारश्च' (सू ३७६०) इत्येव भवति। **३७६३ इगन्तकालकपालभगालशरावेषु द्विगौ ६।२।२९॥** एषु परेषु पूर्वं प्रकृत्या। पञ्चारत्नयः प्रमाणमस्य पञ्चारत्निः। दश मासान् भूतो दशमास्यः। पञ्च मासान् भूतः पञ्चमास्यः। 'तमधीष्ट' (सू० १७४४) इत्यधिकारे द्विगोर्यप् (सू० १७४६)। पञ्चकपालः। पञ्चभगालः। पञ्चशरावः। (फि०) नृसंख्यायाः। इति पञ्चञ्शब्द आद्युदात्तः। इगन्तादिषु किम्। पञ्चाश्वः। द्विगौ किम्। परमाऽरत्निः। **३७६४ बह्वन्यतरस्याम् ६।२।३०॥** बहुशब्दस्तथा वा। बह्वरत्निः। बहुमास्यः। बहुकपालः। बहुशब्दोऽन्तोदात्तः। तस्य यणि सति 'उदात्तस्वरितयोः' (सू ३६५७) इति

भावे ल्युट्। तदन्तान्येतानि पूर्वपदानि स्वितस्वरेणाद्युदात्तानि। गम्यतेऽनेनेति। 'करणाधिकरणयोश्च' इति करणे ल्युट्। केति किमिति। कर्मधारय इति किमर्थमिदमर्थः। कुमारश्च। कुमारशब्दः पूर्वपदं प्रकृतिस्वरं स्यात्। कुमारश्रमणेति। कुमारी श्रमणा कुमारश्रमणा। 'कुमारः श्रमणादिभिः' इति सम्प्रसः। लिङ्गविशिष्टपरिभाषया कुमारीशब्दस्य समासे पुंवद्भावः। अन्तोदात्त इति। कुमार क्रीडायाम्। पचाद्यच्, चित्स्वरः। अत्र 'कुमारः श्रमणादिभिः' इत्यस्यैव ग्रहणं प्रतिपदोक्तत्वात्। केचित्तु सर्वस्यैव कर्मधारयस्य ग्रहणमिच्छन्ति। तथा च कुमारब्राह्मण इत्यत्र पूर्वपदप्रकृतिस्वरत्वं मतभेदेन भवति। आदिः। आदिरिति षष्ठ्यर्थे प्रथमा। पूर्वत्र कुमारशब्दस्य प्रकृतिभावेन यः स्वरः प्राप्तः सोऽत्रादेर्भवतीति सूत्रार्थः। एवं स्थिते फलितमाह—कुमारस्यादिरुदात्तः स्यादिति। पूगेषु। गणवाचिन्युत्तरपदे कर्मधारये कुमारस्याऽऽदिरुदात्तो वा स्यात्। कुमारचातका इति। चातकादयः पूगशब्दात्तेभ्यः 'पूगाञ्ञ्यो ग्रामणीपूर्वात्' इति ञ्यः। तस्य 'तद्राजस्य बहुषु—' इति लुक्। कुमारश्चेत्येव, भवतीति। तत्र प्रतिपदोक्तग्रहणपक्षे समासान्तोदात्तत्वम्। पञ्चारत्निरिति। पञ्चारत्नयः प्रमाणमस्येति तद्धितार्थे द्विगुः। 'प्रमाणे लो द्विगोर्नित्यम्' इति मात्रचो लुक्। पञ्चसु कपालेषु संस्कृतः, पञ्चसु भगालेषु संस्कृतः, पञ्चसु शरावेषु उदूढः पञ्चकपालः, पञ्चभगालः, पञ्चशरावः। तद्धितार्थे द्विगुः। 'द्विगोर्लुगनपत्ये' इत्यणो लुक्। पञ्चाश्व इति। पञ्चभिरश्वैः क्रीतः पञ्चाश्वः। आर्हीयष्ठक्। तस्य 'अव्यर्धं-' इति लुक्। बहु। बहुशब्दः पूर्वपदं प्रकृति-

भवति । ३७६५ **दिष्टिवितस्त्योश्च** ६।२।३१॥ एतयोः परतः पूर्वपदं प्रकृत्या वा द्विगौ । पञ्चदिष्टिः । पञ्चवितस्तिः । ३७६६ **सप्तमी सिद्धशुष्कपक्वबन्धेष्वकालात्** ६।२।३२॥ अकालवाचि सप्तम्यन्तं प्रकृत्या सिद्धादिषु । साङ्काश्यसिद्धः । साङ्काश्येति ण्यान्तः । आतपशुष्कः । भ्रा॒ पक्वः । भ्राष्ट्रेति ष्ट्रन्तः । चक्रबन्धः । चक्रशब्दोऽन्तोदात्तः । अकालात्किम् । पूर्वाह्णसिद्धः । कृत्स्वरेण बाधितः सप्तमीस्वरः प्रतिप्रसूयते । ३७६७ **परिप्रत्युपापा वर्ज्यमानाऽहोरात्रावयवेषु** ६।२।३३॥ एते प्रकृत्या वर्ज्यमानवाचिन्यहोरात्रावयववाचिनि चोत्तरपदे । परित्रिगर्तं वृष्टो देवः । प्रतिपूर्वाह्णम् । उपपूर्वाह्णम् । उपपूर्वरात्रम् । अपत्रिगर्तम् । उपसर्गा आद्युदात्ताः । बहुव्रीहितत्पुरुषयोः सिद्धत्वादव्ययीभावार्थमिदम् । अपपर्योरेव वर्ज्यमानमुत्तरपदम् । तयोरेव वर्ज्यमानार्थत्वात् । अहोरात्रा-

---

स्वरं वा द्विगन्तादिपूत्तरपदेषु द्विगौ । पूर्वेण नित्ये प्राप्ते विकल्पः । बहुव्रीहेऽन्तोदात्त इति । बंहि वृद्धौ अस्मात् 'लङ्बिबंहोर्नलोपश्च' इति कुप्रत्ययः प्रत्ययस्वरेणान्तोदात्तः । पक्षे समासान्तोदात्तत्वम् । पूर्ववद्विग्रहप्रत्ययलुक्प्रत्युदाहरणानि योजनीयानि । दिष्टि । दिष्टिवितस्ती प्रमाणे, तेनाऽत्र मात्रचो लुक् । अत्रापि पक्षेऽन्तोदात्तत्वं बोध्यम् । सप्तमी । ण्यान्त इति । वुञ्छ्णादिषु 'सङ्काशादिभ्यो ण्यः' । ष्ट्रन्त इति । 'मस्जिनशिनमिहनिविश्यशां वृद्धिश्च' इति ष्ट्रन् । संयोगादिलोपः 'ग्रश्च' इति षत्वं निरनुबन्धादाद्युदात्तः । अन्तोदात्त इति । 'कृञः को हे च' इति कप्रत्ययान्तः प्रत्ययस्वरेण । यथादिस्वरेण बाधितः सप्तमीस्वर इति । सिद्धशुष्कपक्वानां क्तान्तत्वात् बन्धस्य घञन्तत्वात् यथादिस्वरेण 'तत्पुरुषे तुल्यार्थै' इत्यादिना सप्तम्यन्तस्य यः प्रकृतिभावः स परत्वाद्बाधित्वातेन पुनर्विधीयते । क्वचित्तु कृत्स्वरेण बाधितः इति पाठः । तत्र कृदन्तस्य यः स्वरस्तथादिलक्षणस्तेनेत्यर्थः । परिप्रत्यु । परिप्रत्युप एते प्रकृत्या स्युः । परित्रिगर्तमिति । त्रिगर्तं वर्जयित्वेत्यर्थः । 'अपपरी वर्जने' इति कर्मप्रवचनीयसंज्ञा । 'पञ्चम्यपाङ्परिभिः' इति पञ्चमी । 'अपपरिबहिरञ्चवः पञ्चम्या' इत्यव्ययीभावः । प्रतिपूर्वाह्णमिति । अह्नः पूर्वो भागः पूर्वाह्णः । 'अह्नोऽह्न एतेभ्यः' इत्यह्नादेशः । 'अह्नोदन्तात्' इति णत्वम्, पूर्वाह्णं प्रति । 'लक्षणेनाभिप्रती आभिमुख्ये' इत्यव्ययीभावः । उपपूर्वाह्णमिति । पूर्वाह्णस्य समीपम् । 'अव्ययं विभक्ति' इत्यादिना सामीप्येऽव्ययीभावः । उपपूर्वरात्रमिति । रात्रेः पूर्वो भागः पूर्वरात्रः । 'अह्नःसर्वैकदेश' इत्यत्र 'रात्राह्नाहाः' इति पुंस्त्वम् । पूर्वरात्रस्य समीपमुपपूर्वरात्रम् । उपसर्गा । आद्युदात्तानि पूर्वपदानि । सिद्धत्वादिति । 'बहुव्रीहौ प्रकृत्या पूर्वपदम्,' 'तत्पुरुषे तुल्यार्थतृतीयासप्तम्युपमानाव्ययद्वितीयाकृत्याः' इत्यनेन । ननु किं पुनः कारणम् । अपपर्योरेव वर्ज्यमान उदाहृतो नेतरयोरतआह—अपपर्योरिति । तेन त्रिगर्तं वर्जयित्वेत्यर्थे उपत्रिगर्तं प्रतित्रिगर्तमिति न भवति । ननु पूर्वाह्णं पूर्वरात्रं वर्जयित्वेत्यर्थे अपपूर्वाह्णं परिपूर्वाह्णं

वयवा अपि वर्ज्यमाना एव तयोर्भवन्ति । वर्ज्येति किम् । अग्निं प्रति । प्रत्यग्नि ।
३७६८ राजन्यबहुवचनद्वन्द्वेऽन्धकवृष्णिषु ६।२।३४॥ राजन्यवाचिनां बहुवचनान्तानामन्धकवृष्णिषु वर्तमाने द्वन्द्वे पूर्वपदं प्रकृत्या । श्वाफल्कचैत्रकाः । शिनिवासुदेवाः । शिनिराद्युदात्तो लक्षणया तदपत्ये वर्तते । राजन्येति किम् । द्वैप्यभैमायनाः । द्वीपे भवा द्वैप्याः । भैमेरपत्यं युवा भैमायनः । अन्धकवृष्णय एते न तु राजन्याः । राजन्यग्रहणमिहाऽभिषिक्तवंश्यानां क्षत्रियाणां ग्रहणार्थम् । नैते तथा । बहुवचनं किम् । सङ्कर्षणवासुदेवौ । द्वन्द्वे किम् । वृष्णीनां कुमाराः वृष्णिकुमाराः । अन्धकवृष्णिषु किम् । कुरुपञ्चालाः । **३७६९ संख्या ६।२।३५॥** संख्यावाचि पूर्वपदं प्रकृत्या द्वन्द्वे । द्वादश । त्रयोदश । त्रेञ्त्रयसादेश आद्युदात्तो निपात्यते । **३७७० आचार्योपसर्जनश्चान्तेवासी ६।२।३६॥** आचार्योपसर्जनान्तेवासिनां द्वन्द्वे पूर्वपदं प्रकृत्या । पाणिनीयरौढीयाः । छस्वरेण मध्योदात्तावेतौ ।

अपपूर्वंरात्रं परिपूर्वंरात्रमिति अहोरात्राण्यवयवा अपपर्याः कस्मान्नोदाहियन्ते इत्याशङ्क्याह—अहोरात्रावयवा इति । वर्ज्यमाना इति । **वर्ज्यमानग्रहणेनैव सिद्धत्वान्न पृथगुदाहृता इत्यर्थः** । वर्ज्येति किमिति । **वर्ज्यमानाहोरात्रावयवेषु किम्** । अग्निं प्रतीति । **'लक्षणेनाभिप्रती' इत्यव्ययीभावः** । श्वाफल्कचैत्रका इति । **श्वाफल्कचैत्रकाभ्यामपत्येऽण्** । शिनिराद्युदात्त इति । **'बहिश्शिखयुदुश्लाहास्वरिभ्यो नित्'** इति सूत्रेण बाह्वलक्षीलोऽपि निः । तस्य नित्वं हस्वत्वं चेति । द्वैप्या इति । **'द्विपादनुष्यमुद्यञ्'** । भैमेरपत्यमिति । **भीमस्यापत्यम् 'अत इञ्'** तदन्तादुद्धाच्छः । ननु च **'राज्ञोऽपत्ये जातिग्रहण'**मिति वचनाद्राजन्यशब्दः क्षत्रियजातिवचनः । ततश्च द्वैप्यभैमायना इत्ययुक्तं प्रत्युदाहरणम् । तेषामपि क्षात्रियत्वादत आह—राजन्यग्रहणमित्यादि । **अन्धकवृष्णीनां क्षत्रियत्वाऽप्यभिचाराद्राजन्यग्रहणमुक्तविशेषपरिग्रहार्थमिति भावः** । एकादशेति । **'संख्याया अल्पीयस्याः—'** इत्येकशब्दस्य पूर्वनिपातः । **'आन्महतः—'** इत्यत्र आदिति योगविभागात्प्रागेकादशभ्य इति निर्देशाद्वा आत्वम् । **'इण्भीकापाशल्यतिमर्चिभ्यः कन्'** इति नित्त्वादेकशब्द आद्युदात्तः । द्वादशेति । **'द्वियष्टनः संख्यायाः—'** इत्यात्वम् । त्रयोदशेति । **'त्रेस्त्रयः—'** इति त्रय आदेशः । अन्तो दात्तो निपात्यत इति । इदं काशिकानुरोधेनोक्तम् । वस्तुतस्तु **'त्रयोदश च मे'** इति लक्ष्यानुरोधादाद्युदात्तो निपात्यत इति बोध्यम् । आचार्योपसर्जन । **आचार्य उपसर्जनं यस्य आचार्योपसर्जनः** । अन्तेवासीति । **अन्ते वसतीत्यन्तेवासी 'शय वासवासिष्वकालात्'** इति सप्तम्या अलुक् । सूत्रे षष्ठीबहुवचनस्य स्थाने प्रथमैकवचनम् । तदाह—आचार्योपसर्जनान्तेवासिनां द्वन्द्वे इति । पाणिनीयरौढीया इति । **वृद्धाच्छः** । **रौढिशब्दात् 'इतश्च' इत्यणो 'न द्व्यचः प्राच्य भरतेषु'** इति

आचार्योपसर्जनग्रहणं द्वन्द्वविशेषणम्। सकलो द्वन्द्व आचार्योपसर्जनो यथा विज्ञायेत। तेनेह न। पाणिनीयदेवदत्तौ। आचार्येति किम्। छान्दसवैयाकरणाः। अन्तेवासीति किम्। आपिशलपाणिनीये शास्त्रे। **३७७१ कार्तकौजपादयश्च ६।२।३७॥** एषां द्वन्द्वे पूर्वपदं प्रकृत्या। कार्तकौजपौ। कृतस्येदं कुजपस्येदमित्यण्णन्तावेतौ। सावर्णिमाण्डूकेयौ। **३७७२ महान्व्रीह्यपराह्णगृष्टीष्वासजाबालभारभारतहैलिहिलरौरवप्रवृद्धेषु ६।२।३८॥** महच्छब्दः प्रकृत्या व्रीह्यादिषु दशसु। महाव्रीहिः। महापराह्णः। महागृष्टिः। महेष्वासः। महाहैलिहिलः। महच्छब्दोऽन्तोदात्तः। 'सन्महत्' (सू ७४०) इति प्रतिपदोक्तसमास एवायं स्वरः। नेह। महतो व्रीहिर्महद्व्रीहिः। **३७७३ क्षुल्लकश्च वैश्वदेवे ६।२।३९॥** चान्महान्। क्षुल्लकवैश्वदेवम्। महावैश्वदेवम्। क्षुधं लालीति क्षुल्लः। तस्मादज्ञातादिषु केऽन्तोदात्तः। **३७७४ उष्ट्रः सादिवाम्योः ६।२।४०॥** उष्ट्रसादी। उष्ट्रवामी। उषेः ष्ट्रनि उष्ट्रशब्द आद्युदात्तः। **३७७५ गोः सादसादिसारथिषु ६।२।४१॥** गोसादः। गोसादिः। गोसारथिः। **३७७६ कुरुगार्हपत-**

निषेधात्। द्वन्द्वविशेषणार्थमिति। न त्वन्तेवासिविशेषणार्थं तस्य आचार्योपसर्जनत्वाव्यभिचारात्। किमर्थं पुनर्द्वन्द्वविशेषणं विज्ञायत इत्याह—सकलो द्वन्द्व इत्यादि। छान्दसेति। 'छन्दोऽधीते' इत्यण्। 'श्रोत्रियंश्छन्दोऽधीते' इति तु न, तत्र वाग्रहणानुवृत्तेः। आपिशलपाणिनीये इति। आपिशलस्यापत्यमापिशलिराचार्यः। तेन प्रोक्तमापिशलम्। 'इतश्च' इत्यण्। पाणिनिना प्रोक्तं पाणिनीयम्। वृद्धाच्छः। आपिशलं च पाणिनीयं च आपिशलपाणिनीये। कार्त। कुर्भूमिः। तत्र जाताः कुजाः तान् पातीति कुजपः। कृतकुजपाभ्यामपत्ये ऋष्यण्। सावर्णिरिञन्तः। माण्डूकेयशब्दो 'ढक् च मण्डूकात्' इति ढगन्तः। महाव्रीहिरिति। 'आम्महतः—' इत्यात्वम्। महेष्वास इति। अत्रैकारः 'स्वरितो वाऽनुदात्ते पदादौ' इति स्वरितो वा। आदिपदेन महाजाबालः, महाभारतः, महाहैलिहिलः, महारौरवः, महाप्रवृद्धः। महच्छब्दोऽन्तोदात्त इति। 'वर्तमाने पृषद्बृहन्-' इत्यत्र तथा निपातनात्। सन्महदिति। एतच्च लक्षणप्रतिपदोक्तपरिभाषया लभ्यते। नन्वेवं प्रवृद्धग्रहणमनर्थकं 'कर्मधारये निष्ठा' इति वक्ष्यमाणेनैव सिद्धत्वात् 'कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणम्' इति प्रवृद्धशब्दस्य क्तान्तत्वादिति चेन्न। 'कर्मधारये निष्ठा' इत्यत्रापि लक्षणप्रतिपदोक्तपरिभाषया क्तान्तेन प्रतिपदोक्तो यः समासः श्रेण्यादिस्तस्यैव ग्रहणमित्यर्थः। क्षुल्लक। क्षुल्लकमहच्छब्दौ पूर्वपदे प्रकृतिस्वरौ स्तः वैश्वदेवशब्दे परे। क्षुल्लकेति। 'आतोऽनुपसर्गे कः'। 'तोलि' इति परसवर्णः। उष्ट्रः। उष्ट्रः पूर्वपदं प्रकृतिस्वरं स्यात्सादिवाम्योः परतः। उषेः ष्ट्रनीति। उष दाहे अस्मात् ष्ट्रन्निति वर्तमाने 'उषिखनिभ्यां कित्' इति व्युत्पा-

रिक्तगुर्वसूतजरत्यश्लीलदृढरूपापारेवडवातैतिलकद्रूःपण्यकम्बलो दासीभाराणां च ६।२।४२॥ एषां सप्तानां समासानां दासीभारादेश्च पूर्वपदं प्रकृत्या । कुरूणां गार्हपतं कुरुगार्हपतम् । उप्रत्ययान्तः कुरुः । **वृजेरिति वाच्यम्** (वा० ३८११) । वृजिगार्हपतम् । वृजिराद्युदात्तः । रिक्तो गुरुः रिक्तगुरुः । 'रिक्ते विभाषा' (सू ३६६६) इति रिक्तशब्द आद्युदात्तः । असूता जरती असूतजरती । अश्लीला दृढरूपा अश्लीलदृढरूपा । अश्लीलशब्दो नञ्समासत्वादाद्युदात्तः । श्रीर्यस्यास्ति तत् श्लीलम् । सिध्मादित्वाल्लच् । कपिलकादित्वाल्लत्वम् । पारे वडवेव पारेवडवा । निपातनादिवार्थे समासो विभक्त्यलोपश्च । पारशब्दो घृतादित्वादन्तोदात्तः । तैतिलानां कद्रूः तैतिलकद्रूः । तितिलिनोऽपत्यं छात्रो वा इत्यण्णन्तः । पण्यशब्दो यदन्तत्वादाद्युदात्तः । **पण्यकम्बलः संज्ञायामिति वक्तव्यम्** (वा ३८२०) । अन्यत्र पणितव्ये कम्बले समासान्तोदात्तत्वमेव । प्रतिपदोक्तसमासे 'कृत्याः' (सू २८३१) इत्येष स्वरो विहितः । दास्या भारो दासी-

---

दितत्वात् । गौः साद । गोशब्दः पूर्वपदं प्रकृत्या सादादिपूत्तरपदेषु । गोसाद इत्यादि । सदेर्घञ् । तदन्तेन षष्ठीसमासः । अथ वा गां सादयति गोसादः । सदेर्ण्यन्तात्कर्मण्यण् । तस्मादेव णिनिः गोसादी । तत्र सादस्यादिनोः कृत्स्वरस्यापवाद इत्यर्थः । सारथौ समासस्वरस्य । कुरु । इह पण्यकम्बलान्ताः सप्त समासाः । तत्रादिनोर्द्वयोः षष्ठ्याः सौत्रो लुक्, इतरेषां पञ्चानां षष्ठ्याः स्थाने प्रथमैकवचनम् । तदाह-एषामिति । दासीभाराणामिति बहुवचननिर्देशादाद्यर्थोऽवगम्यते । तदाह-दासीभारादेरिति । उप्रत्ययान्त इति । 'कृग्रोरुच्च' इति व्युत्पादितस्वात्प्रत्ययस्वरेणान्तोदात्तोऽयम् । आद्युदात्त इति । वृजी वर्जने 'इगुपधात्कित्' इतीन्नन्तत्वात् । फिषस्तु 'इगन्तानां च ह्रयषाम्' इत्यादिद्वितीयो वोदात्तः। एवं कुरुरपि । रिक्तगुर्वादयस्त्रयः कर्मधारयाः । असूतजरती । अश्लीलदृढरूपेति । असूताऽश्लीलशब्दौ नञ्समासत्वादाद्युदात्तौ । श्रीर्यस्यास्तीति । श्रीशब्दो लावण्यवचनः । कपिलकादित्वाल्लत्वमिति । 'कृपो रो लः' इत्यत्र कपिलकादीनामुपसंख्यानाल्लत्वम् । लावण्यरहितापि कुत्सिताद्यर्थसंस्थानमात्रेण दृढेत्यर्थः । पारेवडवेति । 'पारेमध्ये-' इत्यव्ययीभावस्तु न । तथा सति सूत्रे दीर्घनिर्देशोऽयुक्तः स्याद् वडवायाः पारस्याऽसम्भवाच्च । तितिलिनोऽपत्यमिति । तिलाः सन्त्यस्मिन्निति तिली । तिलशब्दान्मत्वर्थीय इनिः टिलोपः । पृषोदरादित्वात्तिशब्दस्य द्वित्वम् । अत्र यदाऽपत्येऽण् तदा 'नस्तद्धिते' इति टिलोपः । यदा तु छात्रे तदानीम् 'इनण्यनपत्ये' इति प्रकृतिभावे प्राप्ते 'नान्तस्य टिलोपे सब्रह्मचारी'त्यनेन टिलोपः । पण्यशब्द इति । 'अवद्यपण्य-' इति यद्वृत्तो 'यतोऽनावः' इत्याद्युदात्तः । संज्ञायामिति । नियतप्रमाणकस्य नियतमूल्यस्य कम्बलस्यैषा संज्ञा । समासान्तोदात्तत्वमेवेति ।

भारः । देवहूतिः । यस्य तत्पुरुषस्य पूर्वपदप्रकृतिस्वरत्वमिष्यते न विशिष्यवचनं विहितं स सर्वोऽपि दासीभारादिषु द्रष्टव्यः । स राये स पुरंध्याम् । पुरं शरीरं धीयतेऽस्यामिति 'कर्मण्यधिकरणे च' (सू० ३२२१) इति किप्रत्ययः । अलुक् छान्दसः । (फि०) **'नञ्विषयस्य'** इत्यादुदात्तः पुरशब्दः । **३७७७ चतुर्थी तदर्थे ६।२।४३॥** चतुर्थ्यन्तार्थाय यत्तद्वाचिन्युत्तरपदे चतुर्थ्यन्तं प्रकृत्या । यूपाय दारु यूपदारु । **३७७८ अर्थे ६।२।४४॥** अर्थे परे चतुर्थ्यन्तं प्रकृत्या । देवार्थम् । **३७७९ क्ते च ६।२।४५ ॥** क्तान्ते परे चतुर्थ्यन्तं प्रकृत्या । गोहितम् । **३७८० कर्मधारयेऽनिष्ठा ६।२।४६ ॥** क्तान्ते परे पूर्वमनिष्टान्तं प्रकृत्या । श्रेणिकृताः । श्रेणिशब्द आद्युदात्तः । पूगकृताः । पूगशब्दोऽन्तोदात्तः । कर्मधारये किम् । श्रेण्या कृतं श्रेणिकृतम् । अनिष्ठा किम् । कृताऽऽकृतम् । **३७८१ अहीने द्वितीया ६।२।४७ ॥** अहीनवाचिनि समासे क्तान्ते परे द्वितीयान्तं प्रकृत्या । कष्टश्रितः । ग्रामगतः । कष्टशब्दोऽन्तोदात्तः । ग्रामशब्दो

ननु पण्यशब्दस्य 'कृत्यप्रत्ययान्तत्वात्' 'तत्पुरुषे तुल्यार्थ-' इत्यादिना पूर्वपदप्रकृतिस्वरेण भाव्यमत आह—प्रतिपदोक्त इति । 'कृत्यतुल्याख्या अजात्या' इति यः कृत्यसमासः प्रतिपदोक्तस्तत्रैव सः । अयं तु 'विशेषणं विशेष्येण-' इति सामान्यलक्षणविहितः कर्मधारयशब्दस्य जातिवचनत्वात् । न च 'कृत्यतुल्याख्या अजात्या' इत्यस्य वैयर्थ्यं शङ्क्यम् । तद्धि गुणक्रियावाचिनोरनियमेन पूर्वनिपातप्रसङ्गे कृत्यान्तस्य पूर्वनिपातार्थं वचनं, नतु जातिनिषेधार्थमजात्येति वचनं न्यायसिद्धार्थानुवाद एवेति स्थितम् । दासीभार इति । 'दंसेष्टो न आ च' इति टित्त्वान्ङीप् उदात्तनिवृत्तिस्वरेण दासीशब्दोऽन्तोदात्तः । देवहूतिरिति । देवः पचाद्यजन्तः । यस्य तत्पुरुषस्येत्यादि । एतेन दासीभारादेराकृतिगणत्वं दर्शितम् । चतुर्थी । तस्मै इदं तदर्थं तच्छब्देन चतुर्थ्यन्तस्यार्थ उच्यते । तदाह—चतुर्थ्यन्तार्थाय यदिति । यूपदारविति । निदिति दीर्घश्चेत्यनुवर्तमाने 'कुयुभ्यां च' इति पः । नित्त्वादाद्युदात्तो यूपशब्दः । देवार्थमिति । देवः पचाद्यजन्तः । गोहितमिति । 'चतुर्थी चाशिष्य' इत्यादिना चतुर्थी । आद्युदात्त इति । श्रिञ् सेवायाम् । 'वहिश्रियुद्रुस्रुहाहात्वरिभ्यो नित्' इति निप्रत्ययस्य नित्त्वादाद्युदात्तः । पूगशब्द इति । 'मुदिमोर्गंगौ' बाहुलकात्पूङोऽपि गक् । कृताकृतमिति । 'क्तेन नञ्विशिष्टेनानञ्' इति समासः । अनिष्ठेत्यनुवर्तमाने इहैव स्यात् । श्रेण्यादिसमासापेक्षया 'क्तेन नञ्विशिष्टेन' इति समासस्य प्रतिपदोक्तत्वादिति हरदत्तः । अहीने । हीनं त्यक्तं, न हीनमहीनम् । अहीनवाचिनि समास इति । पूर्वपदद्वारेण समासस्याऽहीनवाचित्वम् । कष्टश्रित इति । 'द्वितीयाश्रिता' इति समासः । कष्टशब्द इति । क्तान्तत्वात् । ग्रामशब्द इति । 'प्रसेरा च' इति मनूप्रत्ययान्त आद्युदात्तः । अनुपसर्ग

नित्स्वरेण। अहीने किम्। कान्तारातीतः। **अनुपसर्ग इति वक्तव्यम्।** (वा० ३८२१) नेह सुखप्राप्तः। 'थाथ' (सू ३८७८) इत्यस्यापवादोऽयम्। **३७८२ तृतीया कर्मणि ६।२।४८॥** कर्मवाचके क्तान्ते परे तृतीयान्तं प्रकृत्या। त्वोतासः। रुद्रहतः। महाराजहतः। रुद्रो रगन्तः। कर्मणि किम्। रथेन यातो रथयातः। **३७८३ गतिरनन्तरः ६।२।४९॥** कर्मार्थे क्तान्ते परेऽव्यवहितो गतिः प्रकृत्या। 'थाथ' (सू ३८७८) इत्यस्याऽपवादः। पुरोहितम्। अनन्तरः किम्। अभ्युद्धृतः। कारकपूर्वपदस्य तु सतिशिष्टस्थाथादिस्वर एव। दूरादागतः।

इति। वक्तव्यमिति। **सूत्रेऽहीनग्रहणमपनीयाऽनुपसर्गग्रहणं कर्तव्यं व्यापकत्वादित्यर्थः।** थाथेत्यस्यापवाद इति। **तथा च प्रत्युदाहरणे थाथादिस्वर इति भावः।** तृतीया। त्वोतास इति। स्वया ऊताः रक्षिताः स्वोतासः। 'प्रत्ययोत्तरपदयोश्च' इति सपर्यन्तस्य स्वादेश दकारलोपश्छान्दसः। अवतेः क्तः 'ज्वरस्वर' इत्यूठ्। 'एरेधत्यूठ्सु' इति वृद्धेरिडागमस्य चाभावश्छान्दसः। तदन्ताज्जसः 'आज्जसेरसुक्' इत्यसुगागमः। पूर्वपदप्रकृतिस्वरे कृते 'एकादेश उदात्तेनोदात्तः' ततः स्वरितप्रचयः। रगन्त इति। 'रोर्देणिलुक् च' इति विहितः। महाराजहत इति। 'राजाहःसखिभ्यष्टच्' इति टजन्तो महाराजशब्दोऽन्तोदात्तः। रथेन यात इति। गत्यर्थत्वात्कर्तरि क्तः। पुरोहितमिति। 'पूर्वाधरावराणामसिपुरधवश्चैषाम्' इत्यसिप्रत्ययान्तः प्रत्ययस्वरेणाऽन्तोदात्तः पुरःशब्दः। अत्र समासान्तोदात्तत्वम् अव्ययपूर्वपदप्रकृतिस्वरः, कृत्स्वरः, थाथादिस्वर इत्येतेषु प्राप्तेषु पूर्वपदप्रकृतिस्वरो भवति। अभ्युद्धृत इति। इह हृतशब्दस्योच्छब्देन समासे पुरोहितमित्यत्रेव गतिस्वरेणाद्युदात्त उद्धृतशब्दस्तस्य पुनरभिशब्देन समासः। तस्य 'कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणम्' इति परिभाषया उद्धृतशब्दः क्तान्त उत्तरपदम्। एवं समासान्तोदात्तत्वे प्राप्ते तदुबाधकाऽऽद्युदात्तपूर्वपदप्रकृतिस्वरत्वे, तदपवादे कृत्स्वरे, तदपवादस्थाथादिस्वरः प्राप्तस्तमपोह्याऽभेरयं स्वरः स्यात्सोऽनन्तरग्रहणेन वार्यते। नन्वन्तरग्रहणेनाप्यसौ दुर्वारः कृद्ग्रहणपरिभाषया उद्धृतशब्दस्य क्तान्तत्वेऽभेदस्तदानन्तर्यसत्वादिति चेन्मैवम्। अनन्तरग्रहणसामर्थ्याद्धि धातोरनन्तरागतिराश्रीयते। अभिश्च न तथा। नन्वेवं मा भूदभेः स्वरः, इष्टसिद्धिस्तु कथम्। अभ्युद्धृतशब्दे हि उच्छब्दस्य स्वर इष्यते 'संसृष्ट धनमुभयं समाकृतम्' इति मन्त्रे समाकृतशब्दे आङः स्वरदर्शनात्। न चासौ प्रकृतसूत्रेण सिध्यति। प्रथमसमासे तत्प्रवृत्तावपि द्वितीयसमासे थाथादिस्वरस्य प्राप्तेरुक्तत्वात्। न च तं बाधित्वा गतिस्वरः प्रवर्तत इति वाच्यम्। द्वितीयसमासे उदः पूर्वपदत्वाऽभावात्। अत्रोच्यते—धातोरनन्तर इति व्याख्यानादेव पूर्वपदत्वं विनापि स्वरोऽयं प्रवर्तते। न हि कृत्प्रकृतिभूतं धातुं प्रति पूर्वपदत्वं गतेः सम्भवति। तस्मादभ्युद्धृतं समाकृतमिति तावत्सुस्थम्। नन्वु दूरादागत इत्यादौ कारकपूर्वेऽपि गतिस्वरः स्यात्,

३७८४ तादौ च निति कृत्यतौ ६।२।५०॥ तकारादौ निति तुशब्दवर्जिते कृति परेऽनन्तरो गतिः प्रकृत्या । अग्ने रायो नृतमस्य प्रभूतौ । सङ्गति गोः । कृत्स्वरापवादः । तादौ किम् । प्रजल्पाकः । निति किम् । प्रकर्ता । तृजन्तः । अतौ किम् । आगन्तुः । ३७८५ तवै चान्तश्च युगपत् ६।२।५१॥ तवैप्रत्ययान्तस्यान्त उदात्तो गतिश्चाऽनन्तरः प्रकृत्या युगपच्चैतदुभयं स्यात् । अन्वेतवा उ । कृत्स्वरापवादः । ३७८६ अनिगन्तोऽञ्चतौ वप्रत्यये ६।२।५२॥ अनिगन्तो गतिर्वप्रत्ययान्तेऽञ्चतौ परे प्रकृत्या । ये पराञ्चस्तान् । अनिगन्त इति किम् । प्रत्यञ्चो यन्तु । कृत्स्वरात्परत्वादयमेव । जहि वृष्ण्यानि कृणुही पराचः । वप्रत्यये

इष्यते तु यथादिस्वरः । अत्र आह—कारकपूर्वेति । अयं भावः—अनन्तरशब्दोऽयमनन्तरमपेक्ष्य प्रवर्तते, तत्र चानन्तरो गतिरित्युक्ते अनन्तरोऽपि सन्निधानाद्गतिरेव प्रतीयते । ततश्चाऽपूर्वपदार्थमप्यनन्तरग्रहण गतिद्वयसमवधाने एवानन्तरस्य प्रकृतिस्वरत्वं प्रापयतीति दूरादागतादौ न दोष इति । अथ वा 'कारकादृत्तश्रुतयोः' इति सूत्रे कारकादिति योगो विभज्यते । कृग्रहणं गतिग्रहणं चानुवर्तते । कारकात्परं कृदन्तं सगतिकमुत्तरपदमन्तोदात्तं स्यादित्यर्थः । तत्र दूरादृत इत्यादौ यथादिसूत्रेणैव सिद्धत्वात् दूरादागत इत्यादौ 'गतिरनन्तरः'इत्यस्य बाधनार्थमेवेदं सूत्रमिति दिक् । दूरादागत इति । 'स्तोकान्तिक—'इति समासः । 'पञ्चम्याः स्तोकादिभ्यः' इत्यङ्कृ । प्रभूताविति । क्तिन्नयम् । प्रजल्पाक इति । 'जल्पभिक्षकुट्टलुण्टवृङः षाकन् । आगन्तुरिति । 'सितनिगमिमसक्सविधाञ्कुशिभ्यस्तुन्' । ननु कृतीति व्यर्थम् । तथा हि गतेरयं स्वरो विधीयते, गतिसंज्ञा च धातुमाक्षिपति, स च प्रत्ययविशिष्ट एव प्रयोगार्हः । धातोश्च द्वये प्रत्ययाः, तिङः कृतश्च । तत्र तिङन्ते पूर्वपदत्वाऽसम्भवाद् कृदन्त एव भविष्यतीति चेत्सत्यम् । कृदुग्रहणं कृत्संज्ञाप्रवृत्तिकालोपलक्षणार्थं, तेन कृदुपदेशे तादित्वलाभात्प्रलपितेत्यादि सिध्यति । स्वरप्रवृत्तिवेलायां तादित्वाऽभावेऽपि पूर्वं तत्सत्त्वात् । आदिग्रहणं शक्यमकर्तुं 'यस्मिन्विधिः-' इत्येव सिद्धेः । तवै च । अन्त उदात्त इति । कथं पुनरन्तरेणोदात्तग्रहणमुदात्तो भवतीत्यर्थमर्थो लभ्यते । शृणु । प्रकृत्येति वर्तते । तत्रैवमभिसम्बन्धः क्रियते । तवैप्रत्ययान्तस्य यः प्रकृत्याश्रयः स्वरः प्राप्तः सोऽन्तस्य भवतीति स चोदात्त एवेति, युगपद्ग्रहणं पर्यायनिवृत्यर्थम् । अन्वेतवा उ इति । 'उपसर्गाश्चाभिवर्जम्' इत्यनुरादयुदात्ताः । अनिगन्तेऽञ्चतौ । पराञ्च इति । 'ऋत्विक्' इत्यादिना किन् स च वकारमात्रं ककारादीनामनुबन्धत्वात् । 'उगिदचाम्' इति नुम् पराशब्दः आदयुदात्तः । प्रत्यञ्च इति । कृदुत्तरपद-

किम्। उदञ्चनम्। **३७८७ न्यधी च** ६।२।५३॥ वप्रत्ययान्तेऽञ्चताविगन्तावपि न्यधी प्रकृत्या। न्यङ्कुत्तानः। 'उदात्तस्वरितयोर्यण' इति अञ्चतेरकारः स्वरितः। अध्यङ्। **३७८८ ईषदन्यतरस्याम्** ६।२।५४॥ ईषत्कडारः। ईषदित्ययमन्तोदात्तः। ईषद्भेद इत्यादौ कृत्स्वर एव। **३७८९ हिरण्यपरिमाणं धने** ६।२।५५॥ सुवर्णपरिमाणवाचि पूर्वपदं वा प्रकृत्या धने। द्वे सुवर्णे परिमाणमस्येति द्विसुवर्णं तदेव धनं द्विसुवर्णधनम्। बहुव्रीहावपि परत्वाद्विकल्प एव। हिरण्यं किम्। प्रस्थधनम्। परिमाणं किम्। काञ्चनधनम्। धने किम्। निष्कमाला। **३७९० प्रथमोऽचिरोपसंपत्तौ** ६।२।५६॥ प्रथमशब्दो वा प्रकृत्याऽभिनवत्वे। प्रथमवैयाकरणः। सम्प्रति व्याकरणमध्येतुं प्रवृत्त इत्यर्थः। प्रथमशब्दः प्रथेरमजन्तः। अचिरेति किम्। पथमो वैयाकरणः। **३७९१ कतरकतमौ कर्मधारये** ६।२।५७॥ वा प्रकृत्या। कतरकठः। कर्मधारयग्रहणमुत्तरार्थम्। इह तु प्रतिपदोक्तत्वादेव सिद्धम्। **३७९२ आर्यो ब्राह्मणकुमारयोः** ६।२।५८॥ आर्यकुमारः। आर्यब्राह्मणः। आर्यो ण्यदन्तत्वादन्तस्वरितः। आर्यः किम्। परमब्राह्मणः।

प्रकृतिस्वरः। परत्वादिति। चुस्वरस्यावकाशः, दधाचा। यत्र गतिर्नास्ति। अनिगन्तस्वरस्यावकाशः पराञ्चः। पराच इत्यादावुभयप्रसङ्गे परत्वादनिगन्तस्वर एव भवति। न चायं युक्तो विप्रतिषेधः। चुस्वरः सतिशिष्टः भसंज्ञायामल्लोपे च कृते प्राप्तत्वात्। सत्यम्। नायं विप्रतिषेधः। कि तर्हि इष्टिरेव। चोः 'अनिगन्तेऽञ्चतावप्रत्यये इत्येव स्वर इष्यत' इति हरदत्तः। इहापि मूले परत्वादित्यस्येष्टत्वादित्यर्थः। न्यधी च। अत्रापि चुस्वरादयमेव। कृत्स्वरापवादौ योगौ। ईषदन्य। ईषच्छब्दः पूर्वपदं प्रकृतिस्वरं वा स्यात्। अन्तोदात्त इति। फिट्स्वरेण। एतदभावे समासान्तोदात्तत्वम्। ईषद्भेद इति। 'ईषदुःसुषु कृच्छ्राकृच्छ्रार्थेषु खलू'। कृत्स्वर एव भवतीति। परत्वात्। अथवा 'ईषदुःसुषु कृच्छ्राकृच्छ्रार्थेषु खलू' प्रतिपदोक्तसमासग्रहणादुपपदसमासेऽस्याऽप्रवृत्तिरिति। द्वे सुवर्णे इति। 'पञ्चकृष्णलको माषस्ते सुवर्णास्तु षोडश' पलं सुवर्णाश्चत्वारः' इति। द्विसुवर्णमिति। पक्षे समासस्वरः। बहुव्रीहावपीति। अत्र तत्पुरुषाधिकाराऽभावात्। प्रथमो। अचिरोपसम्पत्तिरचिरोपसंश्लेषः। अभिनवत्वमित्यर्थः। तदाह—अभिनवत्व इति। अचीति किमिति। अचिरोपसम्पत्ताविति किमर्थमित्यर्थः। प्रथमवैयाकरण इति। वैयाकरणानामाद्यः मुख्यो वा यः प्रथमवैयाकरणशब्दः स नित्यमन्तोदात्त एव। कतर। एतौ पूर्वपदभूतौ कर्मधारये प्रकृतिस्वरौ वा स्याताम्। कतरकतमौ कतरदतमयोश्चित्वादन्तोदात्तौ। इह चित्यादि। 'कतरकतमौ जातिपरिप्रश्ने' इति प्रतिपदोक्तो यः समासस्तस्यैव ग्रहणम्। स च कर्मधारय एव। तस्मान्नेहार्थः कर्मधारयग्रहणेनेति भावः। आर्यो ब्राह्मण। ब्राह्मणकुमारयोरुत्तरपद-

ब्राह्मणादीति किम्। आर्यक्षत्रियः। कर्मधारय इत्येव। **३७६३ राजा च ६।२।५६॥** ब्राह्मणकुमारयोः परतो वा प्रकृत्या कर्मधारये। राजब्राह्मणः। राजकुमारः। योगविभाग उत्तरार्थः। **३७६४ षष्ठी प्रत्येनसि ६।२।६०॥** षष्ठ्यन्तो राजा प्रत्येनसि परे वा प्रकृत्या। राजप्रत्येनाः। षष्ठी किम्। अन्यत्र न। **३७६५ क्ते नित्यार्थे ६।२।६१॥** क्तान्ते परे नित्यार्थे समासे पूर्वं वा प्रकृत्या। नित्यप्रहसितः। 'कालाः' (सू ६९०) इति द्वितीयासमासोऽयम्। नित्यशब्दस्त्यबन्त आद्युदात्तः। हसित इति थाथादिस्वरेणान्तोदात्तः। नित्यार्थे किम्। मुहूर्तप्रहसितः। **३७६६ ग्रामः शिल्पिनि ६।२।६२॥** वा प्रकृत्या। ग्रामनापितः। ग्रामशब्द आद्युदात्तः। ग्रामः किम्। परमनापितः। शिल्पिनि किम्। ग्रामरक्ष्या। **३७६७ राजाँ च प्रशंसायाम् ६।२।६३॥** शिल्पिवाचिनि परे प्रशंसार्थं राजपदं वा प्रकृत्या। राजनापितः। राजकुलालः। प्रशंसायां किम्। राजनापितः। शिल्पिनि किम्। राजहस्ती। **३७६८ आदिरुदात्तः ६।२।६४॥** अधिकारोऽयम्। **३७६९ सप्तमीहारिणौ धर्म्येऽहरणे ६।२।६५॥** सप्तम्यन्तं हारिवाचि च आद्युदात्तं धर्म्ये परे। देयं यः स्वीकरोति स 'हारी'त्युच्यते। धर्म्यमित्याचारनियतं देयम्। मुकुटेकार्षापणम्।

योरार्यः पूर्वपदं प्रकृतिस्वरं वा स्यात्कर्मधारये। अन्तस्वरित इति। 'तित्स्वरितम्' इत्यनेन। ब्राह्मणादीति किमिति। ब्राह्मणकुमारयोरिति किमर्थमित्यर्थः। राजब्राह्मण इति। राजशब्दो ब्राह्मणे तादृग्धर्मातुर्वंत इति सामानाधिकरण्यात्कर्मधारयः। राजशब्दः कनिन्प्रत्ययान्तत्वादादूयुदात्तः। उत्तरार्थ इति। उत्तरो विधिः राजशब्दस्यैव यथा स्यादायंशब्दस्य मा भूत्। यथासंख्याभावोऽपि पृथग्योगकरणस्य प्रयोजनं ज्ञेयम्। राजप्रत्येना इति। प्रतिगतमेनः पापं यस्य प्रत्येनाः। राज्ञः प्रत्येनाः। अन्यत्र नेति। राजा चासौ प्रत्येनाश्च राजप्रत्येना इत्यत्र। द्वितीयासमासोऽयमिति। द्वितीया पुनरत्यन्तसंयोगे। अथवा 'अकर्मकधातुभिर्योगे देशः कालो भावो गन्तव्योऽध्वा च कर्मसंज्ञक इति वाच्यम्'। त्यबन्त इति। 'त्यबनेर्ध्रुव' इति त्य_। मुहूर्तप्रहसित इति। थाथादिस्वरः। समासस्वरस्य द्वितीयापूर्वपदप्रकृतिस्वरो बाधकस्तस्य थाथादिस्वरः, तस्यापि पाक्षिकोऽपवादोऽयम्। ग्रामः। ग्राम इति स्वरूपग्रहणम्। शिल्पिनीत्यर्थग्रहणम्। ग्रामशब्दः पूर्वपदप्रकृतिस्वरो वा स्याच्छिल्पिवाचिन्युत्तरपदे। ग्रामनापित इति। षष्ठीसमासः। आद्युदात्त इति। 'प्रसेरा च' इति मनिन् निरुदादादूयुदात्तः। राजनापित इति। कर्मधारये राजगुणाऽध्यारोपेणोत्तरपदार्थस्य प्रशंसा। षष्ठीसमासे च राजयोग्यतया तस्य प्रशंसा। स हि कर्मणि प्रवीणत्वाद्राजानं प्रति योग्यो भवति। राजार्थमित्युक्ते प्रशंसा गम्यते। आदिरुदात्तः। पूर्वपदमित्यस्येहाऽर्थात्षष्ठ्या विपरिणामः। सर्वत्र चात्र प्रकरणे पूर्वपदविषये षष्ठ्यर्थे प्रथमा। सप्तमी। हारीत्याव-

हलद्विपदिका। 'संज्ञायाम्' (सू ७२१) इति सप्तमीसमासः। 'कारनाम्नि च' (सू ९६८) इत्यलुक्। याज्ञिकाश्वः। वैयाकरणहस्ती। क्वचिदयमाचारो मुकुटादिषु कार्षापणादि दातव्यं याज्ञिकादीनां त्वश्वादिरिति। धर्म्ये इति किम्। स्तम्बेरमः। कर्मकरवर्धितकः। अहरणे किम्। वाडवहरणम्। वडवाया अयं वाडवः। तस्य बीजनिषेकादुत्तरकालं शरीरपुष्ट्यर्थं यदीयते तद्धरणमित्युच्यते। परोऽपि कृत्स्वरो हारिस्वरेण बाध्यत इत्यहरण इति निषेधेन ज्ञाप्यते। तेन वाडवहार्यमिति हारिस्वरः सिध्यति। ३८०० **युक्ते च** ६।२।६६॥ युक्तवाचिनि समासे पूर्वमाद्युदात्तम्। गोबल्लवः। कर्तव्ये तत्परो युक्तः। ३८०१ **विभाषाऽध्यक्षे** ६।२।६७॥ गवाध्यक्षः। ३८०२ **पापं च शिल्पिनि** ६।२।६८॥ पापनापितः। 'पापाणके' (सू ७३३) इति प्रतिपदोक्तस्यैव ग्रहणात् षष्ठीसमासे न। ३८०३ **गोत्राऽन्तेवासिमाणवब्राह्मणेषु क्षेपे** ६।२।६९॥ भार्यासौश्रुतः। सुश्रुतापत्यस्य भार्याप्रधानतया क्षेपः। अन्तेवासी। कुमारीदाक्षाः। ओदनपाणिनीयाः। कुमार्यादिलाभकामा ये दाक्ष्यादिभिः प्रोक्तानि शास्त्राण्यधीयते ते एवं क्षिप्यन्ते।

श्यके णिनिः। जनपदे ग्रामे कुले वा परम्परयाऽऽयातः सदाचारो धर्मस्तस्मादनपेतं धर्म्यम्। 'धर्मपथ्यर्थ' इति यत्। तेन च प्राप्यमित्यर्थे 'नौवयोधर्म' इत्यादिना यत्। आचारवशादवश्यं कर्तव्यमित्यर्थः। हारिण्युदाहरणान्याह—याज्ञिकाश्वेति। षष्ठीसमासः। कर्मकरवर्धितक इति। वर्धितको नाम मूके स्थूलोऽग्रे सूक्ष्म ओदनपिण्डः स कर्मकराय दीयते। अन्यथा कर्म न कुर्यादिति। न स्वयं धर्म्यः। वाडवहरणमिति। क्वचिदयमाचारः। बीजनिषेकानन्तरं वाडवाय शरीरपुष्ट्यर्थं योग्यमशनादि दातव्यं यदीयते तद्वाडवहरणमित्युच्यते। अत्राऽस्मिन् स्वरे निषिद्धे कृत्स्वरे प्राप्ते 'अनोभावकर्मवचन' इत्युत्तरपदान्तोदात्तत्वम्। नन्वपरत्वादेवायं स्वरो भविष्यति किं प्रतिषेधेनेत्यत आह—परोऽपीति। युक्तवाचिनीति। युक्तः कर्तव्ये तत्परः तद्वाचिनीत्यर्थः। गोबल्लवः। बल्लवादयः शब्दा गवादीनां पालकवचनाः। विभाषा। अध्यक्षशब्दे परे पूर्वपदमाद्युदात्तं वा स्यात्। अध्यक्षशब्दोऽपि समासे युक्तवाच्येवेति पूर्वेण नित्ये प्राप्ते विकल्पः। पापं। पापमिति स्वरूपग्रहणं शिल्पिनीत्यर्थग्रहणं व्याकरणात्। शिल्पवाचिनि परे पापशब्दः पूर्वपदमाद्युदात्तं वा स्यात्। गोत्रान्तेवासि। गोत्रवाचिनि अन्तेवासिवाचिनि चोत्तरपदे माणवब्राह्मणयोश्च परतः क्षेपवाचिनि समासे पूर्वपदमाद्युदात्तं स्यात्। भार्यासौश्रुत इति। सुष्ठु शृणोतीति सुश्रुत्। तस्यापत्यं सौश्रुतः। भार्याप्रधानतयेति। भार्याप्रधानः सौश्रुत इति शाकपार्थिवादित्वादुत्तरपदलोपी समास इति दर्शयति। दक्षेण प्रोक्तं दाक्षं। तदधीते दाक्षः। कुमार्यादिलाभकाम इति। तत्प्रोक्ते ग्रन्थे अध्यायासत्यामपि कुमा-

भिक्षामाणवः । भिक्षां लप्स्येऽहमिति माणवः । भयब्राह्मणः । भयेन ब्राह्मणः सम्पद्यते । गोत्रादिषु किम् । दासीश्रोत्रियः । क्षेपे किम् । परमब्राह्मणः । **३८०४ अङ्गानि मैरेये ६।२।७०॥** मद्यविशेषो मैरेयः । मधुमैरेयः । मधुविकारस्य तस्य मध्वङ्गम् । अङ्गानि किम् । परममैरेयः । मैरेये किम् । पुष्पासवः । **३८०५ भक्ताख्यास्तदर्थेषु ६।२।७१॥** भक्तमन्नम् । भिक्षाकंसः । भाजीकंसः । भिक्षादयोऽन्नविशेषाः । भक्ताख्याः किम् । समाशशालयः । समशनं समाश इति क्रियामात्रमुच्यते । तदर्थेषु किम् । भिक्षाप्रियः । बहुव्रीहिरयम् । अत्र पूर्वपदमन्तोदात्तम् । **३८०६ गोबिडालसिंहसैन्धवेषूपमाने ६।२।७२॥** धान्यगवः । गोबिडालः । तृणसिंहः । सक्तुसैन्धवः । धान्य गौरिवेति विग्रहः । व्याघ्रादिः । गवाकृत्या सन्निवेशितं धान्यं धान्यगवशब्देनोच्यते । उपमाने किम् । परमसिंहः । **३८०७ अके जीविकार्थे ६।२।७३॥** दन्तलेखकः । यस्य दन्तलेखनेन जीविका । 'नित्यं क्रीडा' (सू ७११) इति समासः । अके किम् । रमणीयकर्ता । जीविकार्थे किम् । इक्षुभक्षिकां मे धारयसि । **३८०८ प्राचां क्रीडायाम् ६।२।७४॥** प्राग्देशवाचिनां या क्रीडा तद्वाचिनि समासे अकप्रत्ययान्ते परे पूर्वमा-

---

र्यादिलाभकामः संस्तत्र प्रवर्तते तत एवं क्विप्यते । पूर्ववत्समासः । भयब्राह्मण इति । 'तृतीये'ति योगविभागात्समासः । योऽब्राह्मणः सन् राजदण्डादिभयेन ब्राह्मणाचारं करोति स एवमुच्यते । अङ्गानि । अङ्गमारम्भकम् । बहुवचनं स्वरूपविधिनिरासार्थम् । मैरेयशब्दे उत्तरपदे तदर्थारम्भकवाचीनि पूर्वपदान्याद्युदात्तानि स्युः । मद्यविशेष इति । सुराव्यतिरिक्तं मद्यं मैरेयमित्यर्थः । भक्ताख्या । अन्नवाचि पूर्वपदमाद्युदात्तं स्यात्तदर्थेषूत्तरपदेषु । अत्र बहुवचननिर्देशादेव स्वरूपविधिनिरासे सिद्धे आख्याग्रहणं भक्ष्यविशेषवाचिनां भिक्षादीनां ग्रहणार्थम् । अन्यथा पर्यायाणामेवान्नादीनां ग्रहणं स्यात् । भिक्षाकंसादयः षष्ठीसमासाः । तादर्थ्यं चतुर्थीसमासस्तु न भवति प्रकृतिविकार एव तस्येष्टत्वात् । बहुव्रीहिरिति । तत्पुरुषश्चेदन्तोदात्तः । गोबिडाल । उपमानशब्दे प्रत्येकं सम्बन्धादेकवचनम् । गवादिपूपमानवाचिपूत्तरपदेषु पूर्वपदमाद्युदात्तं स्यात् । धान्यगव इति । अत्रोपमितसमासे 'गोरतद्धितलुकि' इति टच् । अत्र पूर्वपदाद्युदात्तविधानसामर्थ्यादृचश्चिस्वरो बाध्यते । उपमानार्थो यत्रोदाहरणे यथा सम्भवति स तथा योजयितव्यः । तत्र दिङ्मात्रं दर्शयति—गवाकृत्येत्यादि । आकृतिः संस्थानम् । सन्निवेशितं व्यवस्थापितम् । एवमन्यत्रापि यत्किंचित्साहश्यं योजयितव्यम् । अके । जीविकार्थवाचिनि समासे अकप्रत्ययान्ते उत्तरपदे पूर्वपदमाद्युदात्तं स्यात् । दन्तलेखक इति । 'ण्वुल्तृचौ' इति ण्वुल् । प्राचाम् । 'प्राचां क्रीडाया'मिति श्रुतयोरेवाऽन्वयसम्भवान्मतेनेत्यध्याहारो न युज्यते इति

युदात्तं स्यात्। उद्दालकपुष्पभञ्जिका। 'संज्ञायाम्' (सू ३२८६) इति ण्वुल्। प्राचां किम्। जीवपुत्रप्रचायिका। इयमुदीचां क्रीडा। क्रीडायां किम्। तव पुष्पप्रचायिका। पर्याये ण्वुल्। ३८०६ **अणि नियुक्ते** ६।२।७५॥ अण्नन्ते परे नियुक्तवाचिनि समासे पूर्वमाद्युदात्तम्। छत्रधारः। नियुक्तं किम्। काण्डलावः। ३८१० **शिल्पिनि चाऽकृञः** ६।२।७६॥ शिल्पिवाचिनि समासे अण्नन्ते परे पूर्वमाद्युदात्तं स चेदण् कृञः परो न भवति। तन्तुवायः। शिल्पिनि किम्। काण्डलावः। अकृञः किम्। कुम्भकारः। ३८११ **संज्ञायां च** ६।२।७७॥ अण्नन्ते परे। तन्तुवायो नाम कृमिः। अकृञ इत्येव। रथकारो नाम ब्राह्मणः। ३८१२ **गोतन्तियवं पाले** ६।२।७८॥ गोपालः। तन्तिपालः। यवपालः। अनियुक्तार्थो योगः। गो इति किम्। वत्सपालः। पाले इति किम्। गोरक्षः। ३८१३ **णिनि** ६।२।७९॥ पुष्पहारी। ३८१४ **उपमानं शब्दार्थप्रकृतावेव** ६।२।८०॥ उपमानवाचि पूर्वपदं णिन्यन्ते परे आद्युदात्तम्। उष्ट्रक्रोशी। ध्वाङ्क्षरावी। उपमानग्रहणमस्य पूर्वयोगस्य च विषयविभागार्थम्। शब्दार्थप्रकृतौ किम्। वृकवर्ची। प्रकृतिग्रहणं किम्। प्रकृतिरेव यत्रोपसर्गनिरपेक्षा शब्दार्था तत्रैव यथा

तत्राह—प्रान्देशवर्तिनां या क्रीडेति। अजीविकार्थमिदम्। उद्दालकपुष्पभञ्जिकेति। 'नित्यं क्रीडा' इति समासः। अणि नियुक्ते। युजिर् योगे इत्यस्य नियुक्त इति रूपम्। नियुक्तः अधिकृतः। स च कस्मिन्नित्कर्तव्ये तत्परो न भवतीति नियुक्त इत्यनेन सिध्यति। युक्त इति सूत्रे हि युज समाधौ दिवादिरात्मनेपदी गृह्यते। समाधिस्तत्परता। अत्र रौधादिकस्य स्वरितेतो ग्रहणं, योगः सम्बन्धमात्रम्। छत्रधार इति। कर्मण्यण्। शिल्पि। नियुक्ते चेत्येव सिद्धे कृञः प्रतिषेधार्थं वचनम्। तन्तुवाय इति। 'ह्वावामश्च' इत्यण्। 'आतो युक्' संज्ञायाम्। संज्ञायां विषयेऽण्नन्ते उत्तरपदे पूर्वपदमाद्युदात्तं स्यात्, स चेदण् कृञो न भवति। गोतन्ति। गोतन्तियवशब्दा आद्युदात्ताः स्युः पालशब्दे परे। गोपाल इति। गाः पालयतीति विग्रहः। तन्तिपाल इति। तनु विस्तारे क्तिन्। तन्तिर्वत्सानां बन्धनरज्जुः। णिनि। णिनन्ते उत्तरपदे पूर्वपदमाद्युदात्तम्। उपमानम्। उष्ट्रक्रोशीत्यादि। 'कर्तर्युपमाने' इति णिनिः। शब्दार्थप्रकृतौ किमिति। सूत्रं किमर्थमित्यर्थः। वृकवर्चसीति। कृत्स्वर एव भवति। प्रकृतेरेवेत्यादि असति प्रकृतिग्रहणे शब्दार्थात्परो यो णिनिस्तदन्ते उत्तरपदे इत्यर्थो विज्ञायेत। तथा च यत्रापि धातूपसर्गसमुदायाच्छब्दार्थात्परो णिनिस्तत्रापि स्यात्। 'कृत्रग्रहणे गतिकारकपूर्वस्यापि ग्रहणम्' इति परिभाषया णिनन्तोत्तरपदत्वोपपत्तेः। प्रकृतिग्रहणे तु न भवति। योऽत्र धातुर्नासौ शब्दार्थः। यत्र शब्दार्थो धातूपसर्गसमुदायो, न ततो णिनिर्विहित इति भा-

स्यात्। इह मा भूत्। गर्दभोचारी। ३८१५ **युक्तारोह्यादयश्च** ६।२।८१॥ आद्युदात्ताः। युक्तारोही। आगतयोधी। क्षीरहोता। ३८१६ **दीर्घकाशतुषभ्राष्ट्रवटं जे** ६।२।८२॥ कुटीजः। काशजः। तुषजः। भ्राष्ट्रजः। वटजः। ३८१७ **अन्त्यात्पूर्वं बह्वचः** ६।२।८३॥ बह्वचः पूर्वस्याऽन्त्यात्पूर्वपदमुदात्तं जे उत्तरपदे। उपसरजः। आमलकीजः। बह्वचः किम्। दग्धजानि तृणानि। ३८१८ **ग्रामेऽनिवसन्तः** ६।२।८४॥ ग्रामे परे पूर्वपदमुदात्तम्। तच्चेन्निवसन्ग्रामे न। मल्लग्रामः। ग्रामशब्दोऽत्र समूहवाची। देवग्रामः। देवस्वामिकः। अनिवसन्तः किम्। दाक्षिग्रामः। दाक्षिनिवासः। ३८१९ **घोषादिषु च** ६।२।८५॥ दाक्षिघोषः। दाक्षिकटः। दाक्षिहदः। ३८२० **छात्र्यादयः शालायाम्** ६।२।८६॥ छात्रिशाला। व्याडिशाला। यदपि शालान्तः समासो नपुंसकलिङ्गो भवति, तदपि 'तत्पुरुषे शालायां नपुंसके' (सू ३८५७) इत्येतस्मात्पूर्वविप्रतिषेधेनायमेव स्वरः। छात्रिशालम्। ३८२१ **प्रस्थेऽवृद्धमकर्क्यादीनाम्** ६।२।८७॥ प्रस्थशब्दे

वः। एवं किंशब्दार्थंप्रकृतौ उपमानमेवेत्येवं नियमो मा भूत्। युक्तारोह्या। **युक्तारोह्यादयः** समासा आद्युदात्ताः स्युः। युक्तारोहीत्यादि। अत्र णिनीत्येव सिद्धे पूर्वोत्तरपदनियमार्थं सूत्रम्। यत्र युक्तादीन्येव पूर्वपदानि आरोह्यादीन्येवोत्तरपदानि तत्रैव यथा स्यादित्यर्थः। क्षीरहोतेति। याजकादित्वात्षष्ठीसमासोऽयम्। समासस्वरापवादे कृत्स्वरे प्राप्ते, तदपवादे मनूक्तिन्निति प्राप्ते तदपवादोऽयम्। दीर्घकाश। **दीर्घकाशतुषभ्राष्ट्रवटं** पूर्वपदं, काशादीनि च पूर्वपदानि आद्युदात्तानि स्युर्जे उत्तरपदे। कुटीज इति। 'सप्तम्यां जनेर्डः'। उपसरज इति। स्त्रीगवादिषु पुंसां गर्भाधानाय प्रथममुपसरणमुपसरः। 'प्रजने सर्तेः' इत्यप्। तत्र जातः उपसरजः। आमलकीज इति। 'दीर्घकाश-' इति वा-धित्वा परत्वाद्यं स्वरः। ग्रामे। सूत्रे निवसत्यस्मिन्निति निपूर्वाद्वसेः 'नृवसिवहिभासिसाधिगडिमण्डिनिनन्दिभ्यश्च' इति क्रच्। मल्लग्राम इति। षष्ठीसमासः। दाक्षिग्राम इति। दाक्षयो निवसन्त्यस्मिन्स उच्यते। घोषा। **घोषादिषूत्तरपदेषु पूर्वपदमाद्युदात्तम्**। अत्र 'निवसन्त' इति केचिदनुवर्तयन्ति। अपरे नानुवर्तयन्ति। तथा च दाक्षीणां घोषो निवासस्थानमित्यर्थे दाक्षिघोषशब्दे आद्युदात्तत्वं न भवति। मतान्तरे भवति। **छात्र्यादयः** शालाशब्दे परे छात्र्यादय आद्युदात्ताः स्युः। यदाऽपि शालान्त इत्यादि। 'विभाषा सेनासुरा-' इत्यादिना शालान्तस्य तत्पुरुषस्य विभाषा नपुंसकत्वमुक्तं तत्रास्यावकाशो यो नपुंसकलिङ्गो न भवति। छात्रिशाला। 'तत्पुरुषे शालायामि'त्यस्यावकाशो यश्छात्र्यादिपूर्वो न भवति। प्रभुशालम्। क्षत्रियशालम्। यस्तु छात्र्यादिपूर्वपदो नपुंसकलिङ्गश्च तत्र एकदेशविकृतस्याऽनन्यत्वादयमपि प्राप्नोति,'तत्पुरुषे शालाया'मित्यर्थं च। तत्र पूर्वविप्रतिषेधादयमेव भवतीति वामनहरदत्तौ।

उत्तरपदे कर्क्यादिवर्जितमवृद्धं पूर्वपदमाद्युदात्तं स्यात् । इन्द्रप्रस्थः । अवृद्धं किम् । दाक्षिप्रस्थः । अकेति किम् । कर्कीप्रस्थः । मकरीप्रस्थः । **३८२२ मालादीनां च** ६।२।८८॥ वृद्धार्थमिदम् । मालाप्रस्थः । शोणाप्रस्थः । **३८२३ अमहन्नवन्नगरेऽनुदीचाम्** ६।२।८९॥ नगरे परे महन्नवन्वर्जितं पूर्वमाद्युदात्तं स्यात्, तच्चेदुदीचां न । ब्रह्मनगरम् । अमेति किम् । महानगरम् । नवनगरम् । अनुदीचां किम् । कार्तिकनगरम् । **३८२४ अर्मे चाऽवर्णं द्व्यच् त्र्यच्** ६।२।९०॥ अर्मे परे द्व्यच् त्र्यच् पूर्वमवर्णान्तमाद्युदात्तम् । गुप्तार्मम् । कुक्कुटार्मम् । अवर्णं किम् । बृहदर्मम् । द्व्यच् त्र्यच् किम् । कपिञ्जलार्मम् । अमहन्नवन्नित्येव । महार्मम् । नवार्मम । **३८२५ न भूताधिकसञ्जीवमद्राश्मकज्जलम्** ६ । २ । ९१ ॥ अर्मे परे नैतान्याद्युदात्तानि । भूतार्मम् । अधिकार्मम् । सञ्जीवार्मम् । मद्राश्मग्रहणं संघातविगृहीतार्थम् । मद्रार्मम् । अश्मार्मम् । मद्राश्मार्मम् । कज्जलार्मम् । **आद्युदात्तप्रकरणे दिवोदासादीनां छन्दस्युपसंख्यानम्** । (वा० ३८४०) दिवोदासाय दाशुषे । **३८२६ अन्तः** ६।२।९२॥ अधिकारोऽयम् । प्रागुत्तरपदादिग्रहणात् । **३८२७ सर्वं गुणकात्स्न्र्ये** ६।२।९३॥ सर्वशब्दः पूर्वपदमन्तोदात्तम् । सर्वश्वेतः । सर्व-

---

प्रस्थे । 'मालादीनां चे'ति वचनादवृद्धमिति च्छेदः । कर्क्यादिप्रतिषेधस्तु नामधेयार्थः स्यात् 'वा नामधेयस्य वृद्धसंज्ञा वक्तव्ये'ति । अकेति किमिति । अकर्क्यादीनां किमित्यर्थः । माला । प्रस्थे परे मालादीनामादिरुदात्तः स्यात् । शोणप्रस्थ इति । 'पृङ् प्राचां देशे' इति शोणशब्दस्य वृद्धत्वम् । अम । महन्नवन्वर्जितं पूर्वपदमिति । महद्वर्जितं नववर्जितं चेति प्रत्येकं सम्बन्धः । महानगरमिति । 'आन्महतः समानाधिकरण—' इति महत आत्वे कृतेऽवर्णान्तत्वादस्ति प्राप्तिः । नवार्ममिति । नवशब्दः प्रत्ययग्रहणोऽकारान्तः । सङ्घातविगृहीतार्थमिति । मद्रशब्दस्य केवलस्य, मद्राश्मशब्दस्य सङ्घातस्य च तस्य प्रतिषेधार्थः । मद्राश्मार्ममिति । 'अनोऽश्मायः सरसां जातिसंज्ञयोः' इति समासान्ते कृते अवर्णान्तमेतत् । तदेवं मद्रार्मम् । मद्राश्मार्ममिति द्वे एवोदाहरणे । प्रायेण अश्मार्ममिति तृतीयमप्युदाहरण पठ्यते तदवृत्त्यनुरोधादुक्तम् । अश्मशब्दस्याऽनकारान्तत्वम् । न च नलोपे कृतेऽवर्णान्तत्वम् । स्वरविधौ नलोपस्याऽसिद्धत्वात् । अपरे तु 'मद्राश्मग्रहणं सङ्घातविगृहीतार्थ'मित्यस्य भाष्येऽदर्शनादसङ्गतमेतदित्याहुः । दिवोदासायेति । 'दिवसश्च दासे' इति षष्ठ्या अलुक् । अन्तः । अत्रापि प्रकरणे पूर्वपदविषया प्रथमा षष्ठ्यर्थे वेदितव्या । सर्वं गुण । गुणकात्स्न्र्ये वर्तमानः सर्वः अन्तोदात्तः, यत्र गु-

महान् । सर्वं किम् । परमश्वेतः । आश्रयव्याप्त्या परमत्वं श्वेतस्येति गुणकात्स्न्यें वर्तते । गुणेति किम् । सर्वसौवर्णः । कात्स्न्यें किम् । सर्वेषां श्वेततरः सर्वश्वेतः ।

३८२८ संज्ञायां गिरिनिकाययोः ६।२।१४॥ एतयोः परतः पूर्वमन्तोदात्तम् । अञ्जनागिरिः । मौण्डिनिकायः । संज्ञायां किम् । परमगिरिः । ब्राह्मणनिकायः ।

३८२९ कुमार्यां वयसि ६।२।१५॥ पूर्वपदमन्तोदात्तम् । वृद्धकुमारी । कुमारीशब्दः पुंसा सहासम्प्रयोगमात्रं प्रवृत्तिनिमित्तमुपादाय प्रयुक्तो वृद्धादिभिः समानाधिकरणः । तच्च वय इह गृह्यते न कुमारत्वमेव । वयसि किम् । परमकुमारी ।

३८३० उदकेऽकेवले ६।२।१६॥ अकेवलं मिश्रं तद्वाचिनि समासे उदके परे पूर्वमन्तोदात्तम् । गुडोदकम् । स्वरे कृतेऽत्र एकादेशः । 'स्वरितो वानुदात्ते पदादौ' (सू ३६५९) इति पक्षे स्वरितः । अकेवले किम् । शीतोदकम् ।

३८३१ द्विगौ

णान्तरस्याऽभावस्तत्र गुणकात्स्न्यं भवति । सर्वश्वेत इति । 'पूर्वकालैक-' इत्यादिना कर्मधारयः । अत्र शौक्ल्येन गुणेन सर्वावयवानां व्याप्तिर्गम्यते । आश्रयव्याप्त्येति । मतूज्वल्लत्वेन । सर्वसौवर्ण इति । विकारविषयमात्रं कात्स्न्यंम् । सर्वश्वेत इति । 'गुणान्तरेण तरकोपश्च' इति समासः तरप्रत्ययलोपश्च । कात्स्न्यें किमिति । गुणवाचिन्युत्तरपदे सर्वशब्दस्तत्कात्स्न्यंन व्यभिचरतीति प्रश्नः। अयं नियमः कर्मधारये न षष्ठीसमास इत्याह—सर्वेषामिति । गुणिकात्स्न्यें वर्तमानो न गुणकात्स्न्यें । सर्वेषामिति गुणसम्बन्धे षष्ठी । 'पटस्य शौक्लस्य'मितिवद् गुणवाचिन एव प्रत्ययः । सर्वेषां पटानां द्रव्यान्तराधारश्वेतगुणापेक्षया सातिशयः श्वेतो गुण इत्यर्थः । यदा तु प्रतिपदोक्तत्वात् 'पूर्वकालैक-' इति समासो गृह्यते, तदा कात्स्न्यंग्रहणं माऽस्तु । अञ्जनागिरिरिति । 'वनगर्योः सञ्ज्ञायाम्' इति दीर्घः । कुमार्याम् । कुमारीशब्दे परे पूर्वपदमन्तोदात्तं स्याद्वयसि गोम्ये । वृद्धकुमारीति । विशेषणसमासः । 'पुंवत्कर्मधारय-' इति पुंवद्भावः । ननु कुमारीशब्दः प्रथमे वयसि वर्तते तथा च 'वयसि प्रथमे' इत्यनेन ङीविहितः, तस्य कथं चरमवयोवाचिना वृद्धेन सामानाधिकरण्यमत आह—कुमारीत्यादि । कुमारीशब्दे द्वयं प्रवृत्तिनिमित्तं; प्रथमं वयः, पुंसा सहाऽसम्प्रयोगश्च, तत्राऽऽद्यमर्थं त्यक्त्वा द्वितीयमात्रे वर्तते, तदा वृद्धादिसामानाधिकरण्यं भवति । तदाह—तच्चेति । शब्दान्तराभिधेयमित्यर्थः । न कुमारत्वमेवेति । यदेतत्कुमारीशब्दस्य प्रवृत्तिनिमित्तं तद्वयो न गृह्यत इत्यर्थः । एतच्च वयोग्रहणसामर्थ्यात्लभ्यते । अन्यथा कुमारीशब्दप्रयोगे नियोगतः प्रथमं वयो गम्यत इत्यनर्थकं स्यात् । ननु तर्हि ङीरपि न स्यादिति चेच्छृणु । पूर्वं हि प्रथमं वयः प्रवृत्तिनिमित्तं कृत्वा ङीप् कृतः सोऽन्तरङ्गो वृद्धादिसामानाधिकरण्येऽपि न निवर्तते । परमकुमारीति । अत्र कुमारत्वमेव गम्यते न वयोऽन्तरमिति भवति प्रायुदाहरणम् । उदके । अकेवल इति पदच्छेदः । अन्यथाऽसन्देहार्थं केवल उदक इत्येव ब्रूयात्तदाह—अकेवलं मिश्रमिति । द्रव्यान्तरसं-

क्रतौ ६।२।६७॥ द्विगावुत्तरपदे क्रतुवाचिनि समासे पूर्वमन्तोदात्तम्। गर्गत्रिरात्रः। द्विगौ किम्। अतिरात्रः। क्रतौ किम्। बिल्वहोमस्य सप्तरात्रो बिल्वसप्तरात्रः। **३८३२ सभायां नपुंसके** ६।२।६८॥ सभायां परतो नपुंसकलिङ्गे समासे पूर्वमन्तोदात्तम्। गोपालसभम्। स्त्रीसभम्। सभायां किम्। ब्राह्मणसेनम्। नपुंसके किम्। राजसभा। प्रतिपदोक्तनपुंसकग्रहणान्नेह। रमणीयसभम्, ब्राह्मणकुलम्। **३८३३ पुरे प्राचाम्** ६।२।६९॥ देवदत्तपुरम्। नान्दीपुरम्। प्राचां किम्। शिवपुरम्। **३८३४ अरिष्टगौडपूर्वे च** ६।२।१००॥ पुरे परे अरिष्टगौडपूर्वसमासे पूर्वमन्तोदात्तम्। अरिष्टपुरम्। गौडपुरम्। पूर्वग्रहणं किम्। इहापि यथा स्यात्। अरिष्टाश्रितपुरम्। गौडभृत्यपुरम्। **३८३५ न हास्तिनफलकमार्देयाः** ६।२।१०१॥ पुरे परे नैतान्यन्तोदात्तानि। हास्तिनपुरम्। फलकपुरम्। मार्देयपुरम्। मृदेरपत्यमिति शुभ्रादित्वाढ्ढक्। **३८३६ कुसूलकूपकुम्भशालं बिले** ६।२।१०२॥ एतान्यन्तोदात्तानि बिले परे। कुसूलबिलम्। कूपबिलम्। कुम्भबिलम्। शालबिलम्। कुसूलादि किम्। सर्पबिलम्। बिलेति किम्। कुसूलस्वामी। **३८३७ दिक्शब्दा ग्रामजनपदाख्यानचानरादेषु** ६।२।१०३॥ दिक्शब्दा अन्तोदात्ता भवन्त्येषु। पूर्वेषुकामशमी। अपरकृष्णमृत्तिका। जनपद-

---

पृक्तं मिश्रम्। गुडोदकमिति। गुडमिश्रमुदकं गुडोदकम्। शीतोदकमिति कर्मधारयः। गर्गत्रिरात्रमिति। षष्ठीसमासः। तिसृणां रात्रीणां समाहारस्त्रिरात्रम्। 'अहः सर्वैकदेश-' इत्यादिनाऽच् समासान्तः। 'सङ्ख्यापूर्वं रात्रं क्लीबम्' इति क्लीबत्वम्। एवं सप्तरात्र इति। रात्रिमतिक्रान्त इति प्रादिसमासः। बिल्वसप्तरात्रमित्यत्र बिल्वशब्दो बिल्वहोमे वर्तते, तेन सह षष्ठीसमासः। गोपालसभमिति। 'अशाला च' इति क्लीबत्वम्। प्रतिपदोक्तेति। 'सभा राज्ञः-' इत्यादिविहितम्। रमणीयसभमिति। रमणीया सभा यस्येति बहुव्रीहिः। अत्राऽभिधेयवशान्नपुंसकत्वं न प्रतिपदोक्तम्। पुरे प्राचाम्। पुरशब्दे परे प्राचां देशे पूर्वपदमन्तोदात्तं स्यात्। अरिष्ट। पूर्वग्रहणं किमिति। 'अरिष्टगौडयोरिति वक्तव्यमिति प्रश्नः। इहापि यथा स्यादिति। पूर्वग्रहणे हि सति बहुव्रीहिर्लभ्यते। अरिष्टगौडौ पूर्वौ यस्मिन्समास इति। तेनारिष्टाश्रितपुरं गौडभृत्यपुरमित्यत्रापि पूर्वपदमन्तोदात्तं भवति। असति तु पूर्वग्रहणे श्रितभृत्यशब्दाभ्यां व्यवहितत्वाच्चाऽरिष्टगौडयोस्तावत्र स्यात्, समुदाययोश्च सूत्रेऽनुपात्तत्वात्। न हास्ति। 'पुरे प्राचाम्' इति प्राप्तः प्रतिषिध्यते। मार्देयपुरमिति। 'ढे लोपोऽकद्र्वाः' इत्युकारलोपः। दिक्शब्दाः। दिक्शब्दाः पूर्वपदानि अन्तोदात्तानि स्युर्ग्रामादिषूत्तरपदेषु। चानराटे स्वरूपग्रहणमितरेषामर्थग्रहणम्। पूर्वेषुकामशमी।

पूर्वपञ्चालाः । आख्यानं-पूर्वयायातम् । पूर्वचानराटम् । शब्दग्रहणं कालवाचि-दिक्शब्दस्य परिग्रहार्थम् । ३८३८ **आचार्योपसर्जनश्चाऽन्तेवासिनि ६।२।१०४॥** आचार्योपसर्जनान्तेवासिनि परे दिक्शब्दा अन्तोदात्ता भवन्ति । पूर्व-पाणिनीयाः । आचार्येति किम् ? पूर्वान्तेवासी । अन्तेवासिनि किम् । पूर्वपाणिनीयं शास्त्रम् । ३८३९ **उत्तरपदवृद्धौ सर्वं च ६।२।१०५॥** उत्तरपदस्येत्यधिकृत्य या वृद्धिर्विहिता तद्वत्युत्तरपदे परे सर्वशब्दो दिक्शब्दाश्चान्तोदात्ता भवन्ति । सर्वपाञ्चालकः । अपरपाञ्चालकः । अधिकारग्रहणं किम् । सर्वभासः । सर्वकारकः । ३८४० **बहुव्रीहौ विश्वं संज्ञायाम् ६।२।१०६॥** बहुव्रीहौ विश्वशब्दः पूर्व-पदभूतः संज्ञायामन्तोदात्तः स्यात् । पूर्वपदप्रकृतिस्वरेण प्राप्तस्यादायुदात्तस्यापवादः । विश्वकर्मणा विश्वदेव्यावता । आविश्वदेवं सत्पतिम् । बहुव्रीहौ किम् । विश्वे च ते देवाश्च विश्वदेवाः । संज्ञायां किम् । विश्वदेवः । प्रागव्ययीभावाद्बहुव्रीह्यधिकारः । ३८४१ **उदराश्वेषुषु ६।२।१०७॥** संज्ञायामिति वर्तते । वृकोदरः । हर्यश्वः ।

अपरकृष्णमृत्तिकेति । **'दिक्संख्ये संज्ञायाम्'** इति समासः । पूर्वपञ्चाला इति । **समुदा-येषु हि प्रवृत्ताः शब्दा अवयवेष्वपि वर्तन्त** इति पञ्चालैकदेशे पञ्चालशब्दः । **ततः पूर्वशब्देन सामानाधिकरण्यात् 'पूर्वाऽपरप्रथम-'** इत्यादिना कर्मधारयः । पूर्वयाया-तमिति । **ययातिमधिकृत्य कृतो ग्रन्थ** इत्यणि यायातशब्दः सिद्धः । शब्दग्रहणमि-त्यादि । **दिशि दृष्टः शब्द** इत्युत्तरपदलोपी समासस्तेन कालवाचिनोऽपि ग्रहणात्पू-र्वयायातमित्यादावपि भवति । आचार्योपसर्जन । **आचार्योपसर्जनग्रहणमन्तेवासिनो विशेषणं, सप्तम्यर्थे प्रथमा । तदाह**-आचार्योपसर्जनान्तेवासिनीति । **आचार्य उपसर्जनं यस्य स आचार्योपसर्जनः, स चासावन्तेवासी च तद्वाचिनि** । पूर्वपाणिनीया इति । **'पूर्वापरप्रथम'** इति समासः । पाणिनेरिच्छात्राः पाणिनीयाः । अन्ताऽन्तेवासिनः प्रधा-नमाचार्यस्तूपसर्जनम् । पूर्वपाणिनीयं शास्त्रमिति । **पूर्वं चिरन्तनमित्यर्थः** । उत्तरपद-वृद्धौ । अत्र वृद्धावित्येतावतैव वृद्धिमदुत्तरपदपरिग्रहे सिद्धे उत्तरपदग्रहणात्तदधि-कारो लक्ष्यते । उत्तरपदशब्दस्य स्वरितत्वादिहाधिकारप्रतिपत्तिरित्याशयेनाह— उत्तरस्य पदस्येत्यादि । सर्वपाञ्चालक इत्यादि । **'सुसर्वार्धदिक्शब्देभ्य'** इति तद्धितविधौ **'अवृद्धादपि बहुवचनविषयात्'** इति वुञ् । **'सुसर्वार्धाञ्जनपदस्य'** 'दिशोऽमद्राणाम्' इत्युत्तरपदवृद्धिः। **'वृद्धिशब्देन या वृद्धिर्विहिता तद्वत्युत्तरपद'** इत्युच्यमानेऽपि न नि-र्वाह इत्याह-सर्वकारक इति । बहुव्रीहि । **'संज्ञाया'मिति बहुव्रीहेर्विशेषणं न विश्वशब्द-स्येति** । विश्वकर्मेति । **विशेः कनिन् नित्त्वादाद्युदात्तो विश्वशब्दः** । उदरा । **पूर्वोत्तरपदेषु बहुव्रीहौ संज्ञायां पूर्वपदमन्तोदात्तं स्यात्** । अयमपि पूर्वपदप्रकृतिस्वरस्यापवादः । वृक-

महेषुः । ३८४२ क्षेपे ६।२।१०८॥ उदराश्वेषुषु पूर्वमन्तोदात्तं बहुव्रीहौ निन्दायाम् । घटोदरः । कटुकाश्वः । चलाचलेषुः । अनुदरः इत्यत्र 'नञ्सुभ्याम्' (सू ३९०६) इति भवति विप्रतिषेधेन । ३८४३ नदी बन्धुनि ६।२।१०९॥ बन्धुशब्दे परे नद्यन्तं पूर्वमन्तोदात्तं बहुव्रीहौ । गार्गीबन्धुः । नदी किम् । ब्रह्मबन्धुः । ब्रह्मशब्द आद्युदात्तः । बन्धुनि किम् । गार्गीप्रियः । ३८४४ निष्ठोपसर्गपूर्वमन्यतरस्याम् ६।२।११०॥ निष्ठान्तं पूर्वपदमन्तोदात्तं वा । प्रधौतपादः । निष्ठा किम् । प्रसेवकमुखः । उपसर्गपूर्वं किम् । शुष्कमुखः । ३८४५ उत्तरपदादिः ६।२।१११॥ उत्तरपदाधिकार आपादान्तम् । आद्यधिकारस्तु 'प्रकृत्या भगालम्' (सू ३८७१) इत्यवधिकः । ३८४६ कर्णो वर्णलक्षणात् ६।२।११२॥ वर्णवाचिनो लक्षणवाचिनश्च परः कर्णशब्द आद्युदात्तो बहुव्रीहौ । शुक्लकर्णः । शङ्कूकर्णः । कर्णः किम् । श्वेतपादः । । वर्णलक्षणात्किम् ।

शब्दः 'प्राणिनां कुपूर्वाणाम्' इत्याद्युदात्तः वृकस्येवोदरमस्य वृकोदरः । हर्यश्व इति । हरतेः 'सर्वधातुभ्यः-' इति इन् । आद्युदात्तो हरिशब्दः । हरिरश्वोऽस्य हर्यश्वः । यण्णि कृते 'उदात्तस्वरितयोः-' इति स्वरितः । महेषुरिति । महच्छब्दोऽन्तोदात्तः । 'वर्तमाने पृषद्बृहन्-' इत्यत्र तथा निपातनात् । तथा च पूर्वपदप्रकृतिस्वरेणैव सिद्धे सति स्वरार्थं आरम्भोऽपवादस्यापवादेनैवान्तोदात्तत्वम् । उदाहरणं तु सुवर्णपुङ्खेषुरिति ज्ञेयम् । सुष्ठु वर्णो येषां ते सुवर्णाः 'नञ् सुभ्याम्-' इत्यन्तोदात्तम् । सुवर्णाः पुङ्खा येषां ते इति बहुव्रीहौ पूर्वपदप्रकृतिस्वरेण मध्योदात्तत्वं पुनरिषुशब्देन बहुव्रीहौ पूर्वपदमन्तोदात्तम् । एकादेशस्तु 'स्वरितो वाऽनुदात्ते पदादौ' इति पक्षे स्वरितः । घटोदर इति । घटशब्दः पचाद्यजन्तः । कन्दुशब्दात्संज्ञायां कन् । 'चरिचलिपतिवदीनां वा द्वित्वमध्याक्चाभ्यासस्य' इति पचाद्यजन्तो चलाचलशब्दः । अनुदर इत्यादि । अस्त्यवकाशः । घटोदरः । 'नञ्सुभ्याम्-' इत्यस्त्यवकाशः । अयशाः । सुयशाः । एवं स्थिते विप्रतिषेधः । नदी । 'बन्धुनी'ति शब्दस्वरूपापेक्षया नपुंसकनिर्देशः 'गार्गादिभ्यो यञ्' इति यञन्तादुर्गशब्दात् 'यञश्च' इति ङीप् । गार्गी । नित्स्वरेणाद्युदात्तः । ब्रह्मबन्धुरिति । 'बृंहेर्नोच्च' इति नकारस्याऽकारादेशो मनिन्प्रत्ययश्चेति मनिन्तो ब्रह्मशब्दो नित्स्वरेणाद्युदात्तः । तदाह—ब्रह्मेत्यादि । गार्गीप्रिय इति । अत्र पूर्वपदप्रकृतिस्वर एव । निष्ठोपसर्ग । उपसर्गपूर्वं निष्ठान्तं पूर्वपद मन्तोदात्तम् । प्रधौतपाद इति । धावु गतिशुद्ध्योः क्तः 'च्छ्वोः शूठ्-' इत्यूठ् । 'एत्येधत्यूठ्सु' इति वृद्धिः । प्रधौतशब्दो गतिस्वरेणाद्युदात्तः । प्रसेवकमुख इति । ण्वुलन्तः प्रसेवकशब्दः कृदुत्तरपदप्रकृतिस्वरेण शिरस्यम्मध्योदात्तः । शुष्कमुख इति । 'शुष्कधृष्टौ' इति शुष्कशब्दः आद्युदात्तः । उत्तरपदादिः । 'उत्तरपदे'ति पृथक्पदं लुप्तषष्ठीकम् । कर्णो

शोभनकर्णः । ३८४७ **सञ्ज्ञौपम्ययोश्च** ६।२।११३॥ कर्ण आद्युदात्तः । मणिकर्णः । औपम्ये गोकर्णः । ३८४८ **कण्ठपृष्ठग्रीवाजङ्घं च** ६।२।११४॥ संज्ञौपम्ययोर्बहुव्रीहौ । शितिकण्ठः । काण्डपृष्ठः । सुग्रीवः । नाडीजङ्घः । औपम्ये । खरकण्ठः । गोपृष्ठः । अश्वग्रीवः । गोजङ्घः । ३८४९ **शृङ्गमवस्थायां च** ६।२।११५॥ शृङ्गशब्दोऽवस्थायां सञ्ज्ञौपम्ययोश्चाद्युदात्तो बहुव्रीहौ । उद्गतशृङ्गः । व्यङ्गुलशृङ्गः । अत्र शृङ्गोद्गमनादिकृतो गवादेर्वयोविशेषोऽवस्था । सञ्ज्ञायाम् । शृष्यशृङ्गः । उपमायाम् । मेषशृङ्गः । अवस्थेति किम् । स्थूलशृङ्गः । ३८५० **नञो जरमरमित्रमृताः** ६।२।११६॥ नञः परा एते आद्युदात्ता बहुव्रीहौ । न मे जरा अजरम् । अमरम् । अमित्रमर्दय । श्रवो दधेऽमृतम् । नञः किम् । ब्राह्मणमित्रः । जेति किम् । अशत्रुः । ३८५१ **सोर्मनसो अलोमोषसो** ६।२।११७॥ सोः परं लोमोषसी वर्जयित्वा मन्नन्तमसन्तं चाऽऽद्युदात्तं स्यात् । 'नञ्सुभ्याम्' (सू ३९०६) इत्यस्यापवादः । सुकर्माणः सुयुजः । स ना वक्ष-

---

आद्युदात्त इति । सिद्धार्थकथनमेतत् । उत्तरपदस्य कर्णशब्दस्याऽऽदिरुदात्त इत्यर्थः । एवं चाऽस्मिन्प्रकाणे कर्ण इत्यादौ षष्ठ्यर्थे प्रथमेति ज्ञेयम् । शङ्कू कर्णे इति । शङ्कुः कर्णे यस्येति विग्रहः । 'सप्तमीविशेषणे-' इति सप्तम्यन्तस्य पूर्वनिपाते प्राप्ते 'गवादेः परा सप्तमी' इति परनिपातः । 'कर्णे लक्षणस्य—' इति दीर्घः । पशूनां विभागज्ञानार्थं शङ्कुप्रतिरूपकं कर्णादिषु यच्चिह्नं क्रियते तदिह लक्षणं गृह्यते पृथग्वर्णग्रहणात् । अन्यथा वर्णेनापि लक्ष्यमाणत्वादनर्थकं तत्स्यात् । श्वेतेनपाद इति । सिता वर्णो, पचाद्यच् । शोभनकर्ण इति । शुभ शोभार्थे 'अनुदात्तेतश्च हलादेः' इति युच् । प्रत्युदाहरणे सर्वत्र पूर्वपदप्रकृतिस्वर एव भवति । संज्ञौपम्य । संज्ञायामौपम्ये च यो बहुव्रीहिस्तत्र कर्णशब्द उत्तरपदमाद्युदात्तं स्यात् । कण्ठपृष्ठ । कण्ठादीनां समाहार द्वन्द्वे नपुंसकह्रस्वत्वम् । कण्ठादीन्युत्तरपदानि संज्ञौपम्ययोराद्युदात्तानि स्युर्बहुव्रीहौ । कण्ठपृष्ठौ 'स्वाङ्गशिटाम्' इत्याद्युदात्तौ । ग्रीवाजङ्घयोः स्वाङ्गत्वेऽप्यदन्तत्वाभावादन्तोदात्तत्वम् । सुग्रीव इत्यत्र परत्वात् 'नञ्सुभ्याम्' इत्यन्तोदात्तत्वेन भाव्यम् । अस्य तु दशग्रीवादिरवकाशः । यदि तु नेष्यते तर्हि चकारोऽस्यैव विधेः समुच्चयार्थ इति व्याख्येयम् । नाडीजङ्घ इति । नाड्याकारे जङ्घे यस्य स नाडीजङ्घः । नञो जर । 'नञ्सुभ्याम्' इत्यस्याऽपवादः । जरणं जरः । 'ऋदोरप्' । मरणं मरः । न मरः, अमरः । अस्मादेव निपातनादप् । अमिदा स्नेहने 'अमिचिमिदिघसिभ्यः क्त्रः' । मृङो 'नपुंसके भावे क्तः' । सूत्रे तु शब्दपरत्वात्पुंस्त्वम् । जेति किमिति । जरमरमित्रमृतग्रहणं किमर्थमित्यर्थः । अशत्रुरिति । नञ्सुभ्याम्' इत्युत्तरपदान्तोदात्तत्वम् ।

दनिमानः सुब्रह्मा । शिवा पशुभ्यः सुमनाः सुवर्चाः । सुपेशसस्करति । सोः किम् । कृतकर्मा । मनसी किम् । सुराजा । अलोमोषसी किम् । सुलोमा । सूषाः । कपि तु परत्वात् 'कपि पूर्वम्' (सू ३९०७) इति भवति । सुकर्मकः । सुस्रोतस्कः । **३८५२ क्त्वादयश्च ६।२।१९८॥** सोः परे आद्युदात्ताः स्युः । साम्राज्याय सुक्रतुः । सुप्रतीकः सुहव्यः । सुप्रतूर्तिमनेहसम् । **३८५३ आद्युदात्तं द्वयच् छन्दसि ६।२।११९॥** यदाद्युदात्तं द्वयच् तत्सोरुत्तरं बहुव्रीहावाद्युदात्तम् । अधा स्वश्वाः । सुरथाँ आतिथिग्वे । नित्स्वरेणाश्वरथावाद्युदात्तौ । आद्युदात्तं किम् । या सुबाहुः । द्वयच् किम् । सुगुरसत्सुहिरण्यः । हिरण्यशब्दस्त्र्यच् । **३८५४ वीरवीर्यौ च ६।२।१२०॥** सोः परौ बहुव्रीहौ छन्दस्याद्युदात्तौ । सुवीरेण रयिणा । सुवीर्यस्य गोमतः । वीर्यशब्दो यत्प्रत्ययान्तः । तत्र 'यतोऽनावः (सू ३७०१) इत्याद्युदात्तत्वं नेति वीर्यग्रहणं ज्ञापकम् । तत्र हि सति पूर्वेणैव सिद्धं स्यात् । **३८५५ कूलतीरतूलमूलशालाऽक्षसममव्ययीभावे ६।२।१२१॥** उपकूलम् । उपतीरम् । उपतूलम् । उपमूलम् । उपशालम् । उपाक्षम् । सुषमम् । निःष-

---

सोर्मन । मन् च अस् च मनसी । सुकर्माण इत्यादि । यद्यपि आद्युदात्तं 'द्वयचश्छन्दसि' इत्यनेन सिद्धमिदं, तथापि सुप्रथिमेत्यादि बह्वर्थमच्छन्दोर्थं च सूत्रमिति बोध्यम् । सुप्रथिमेत्यत्र पृथोर्भाव इति पृथ्वादिभ्य इमनिच् । 'र ऋतो हलादेर्लघोः' इति रादेशः । सुराजेति । राजशब्दः 'कनिन्युवृषि-' इति कनिन्प्रत्ययान्तः । लुनातेर्मनिन् लोम । उष दाहे । 'मिथुनेऽसि' रिति वर्तमाने उषः किद् । उषः । कपि त्विति । अस्यावकाशः सुकर्मा । 'कपि पूर्व'मित्यस्यावकाशः अपवरकः । एवं स्थिते विप्रतिषेधः । आद्युदात्तम् । नञ्सुभ्याम् इत्यस्यापवादः । 'अशुष्कुषिलटिकणिखटि' इति कत्रन्तोऽश्वशब्दः-'हनिकुशिनीरमिकाशिभ्यः क्थन्' इति क्थन्नन्तो रथशब्दस्तदाह—नित्स्वरेणेति । सुबाहुरिति । 'अर्जिदृशिकम्यमिपञ्जिवधि' इति कुप्रत्ययान्तो बाहुशब्दः प्रत्ययस्वरेणान्तोदात्तः । सुहिरण्य इति । 'हर्यतेः कन्यन् हिर च' इति कन्यन्नन्तो हिरण्यशब्द आद्युदात्तस्त्र्यच् । वीरवीर्यौ । वीरविक्रान्तौ चुरादिस्तत्र पचाद्यचि वीरः । 'अचो यत्' वीरेषु साधुरिति प्रारदीव्यतीयो वा यत् । वीर्यः । तत्रेत्यादि । कथं पुनरेतज्ज्ञापकमित्याह—तत्र हि सतीति । कूलतीर इति । एतान्युत्तरपदान्याद्युदात्तानि स्युरव्ययीभावे । सुषममित्यादौ 'सुविनिर्दुर्भ्यः सुपिसूतिसमाः' इति षत्वम् । तस्या-

मम् । तिष्ठद्गुप्रभृतिष्वेते । कूलादिग्रहणं किम् । उपकुम्भम् । अव्ययीभावे किम् । परमकूलम् । **३८५६ कंसमन्थशूर्पपाय्यकाण्डं द्विगौ ६।२।१२२॥** द्विकंसः । द्विमन्थः । द्विशूर्पः । द्विपाय्यम् । द्विकाण्डम् । द्विगौ किम् ? परमकंसः । **३८५७ तत्पुरुषे शालायां नपुंसके ६।२।१२३॥** शालाशब्दान्ते तत्पुरुषे नपुंसकलिङ्गे उत्तरपदमाद्युदात्तम् । ब्राह्मणशालम् । तत्पुरुषे किम् ? दृढशालं ब्राह्मणकुलम् । शालायां किम् । ब्राह्मणसेनम् । नपुंसके किम् । ब्राह्मणशाला । **३८५८ कन्था च ६।२।१२४॥** तत्पुरुषे नपुंसकलिङ्गे कन्थाशब्द उत्तरपदमाद्युदात्तम् । सौशमिकन्थम् । आह्वरकन्थम् । नपुंसके किम् । दाक्षिकन्था । **३८५९ आदिश्चिहणादीनाम् ६।२।१२५॥** कन्थान्ते तत्पुरुषे नपुंसकलिङ्गे चिहणादीनामादिरुदात्तः । चिहणकन्थम् । मन्दुरकन्थम् । आदिरिति वर्तमाने पुनर्ग्रहणं पूर्वपदस्याद्युदात्तार्थम् । **३८६० चेलखेटकटुककाण्डं गर्हायाम् ६।२।१२६॥** चेलादीन्युत्तरपदान्याद्युदात्तानि । पुत्रचेलम् । नगरखेटम् । दधिकटुकम् । प्रजाकाण्डम् । चेलादिसादृश्येन पुत्रादीनां गर्हा, व्याघ्रादित्वात्स-

---

ऽसिद्धत्वात्समशब्द एवायम् । तिष्ठद्गुप्रभृतिष्वेत इति । तेनाऽव्ययीभावसंज्ञा । कंसमन्थ । एतान्युत्तरपदानि द्विगावाद्युदात्तानि स्युः । द्विकंस इति । द्वाभ्यां कंसाभ्यां क्रीत इति तद्धितार्थे समासः । 'कंसाट्टिठन्' इति टिठन् तस्य 'अध्यर्धपूर्व' इति लुक् । द्विमन्थ इति । 'आर्हादगोपुच्छ' इत्यादिना ठक् । शेषं पूर्ववत् । द्विशूर्प इति । 'शूर्पादञन्यतरस्याम्' । द्विपाय्यमिति । 'पाय्यसाह्वाय्य' इत्यादिना पाय्यशब्दः परिमाणवाची निपातितः । तत्र 'प्रमाणे द्वयसच्' । द्विकाण्डमिति । द्वे काण्डे प्रमाणमस्य 'प्रमाणे द्वयसच्' इति मात्रच्, 'प्रमाणे लो द्विगोर्नित्यम्' इति लुक् । ब्राह्मणशालमिति । 'विभाषा सेनासुराच्छाया' इति नपुंसकता । दृढशालमिति । बहुव्रीहिरयं । तत्र पूर्वपदप्रकृतिस्वर एव भवति, पूर्वपदं च निष्ठान्तत्वादन्तोदात्तम् । ननु चात्र लक्षणप्रतिपदोक्तपरिभाषयैव न भविष्यति । सत्यम् । उत्तरार्थमावश्यकं तत्पुरुषग्रहणमिहैव क्रियते परिभाषाऽनाश्रयणाय । सौशमिकन्थमिति । शोभनः शमोऽस्य सुशमस्तस्यापत्यं सौशमिस्तस्य कन्था सौशमिकन्थम् । 'संज्ञायां कन्थोशीनरेषु' इति नपुंसकत्वम् । आह्वरकन्थमिति । आङ्पूर्वात् ह्वरतेः पचाद्यच्, आदिश्चिहणादीनाम् । चिनोतेः क्विप् । चित् । हृतेः पचाद्यच् । हनः । 'चिहण' इति निपातनात्तलोपो णत्वं च । मद मन्द धारणे आभ्यां रः । निपातनाल्लस्य दत्वम् । मदुरः । आदिरिति वर्तमान इति । पूर्वत्र ह्यादिग्रहणमुत्तरपदाऽभिसम्बद्धम् । इह तु चिहणादीनां पूर्वपदानामाद्युदात्तत्वमिष्यते, तदर्थं पुनरादिग्रहणं कर्तव्यम् । पुत्रचेलमिति । चेलं वस्त्रं तदुत्तरपदमित्यर्थः । नगरखेटमिति । खेटमिति तृणनाम, तद्बदुर्बलम् । दधिकटुकमिति ।

मासः । गर्हायां किम् । परमचेलम् । **३८६१ चोरमुपमानम्** ६।२।१२७॥ वस्त्रं चीरमिव वस्त्रचीरम् । कम्बलचीरम् । उपमानं किम् । परमचीरम् । **३८६२ पललसूपशाकं मिश्रे** ६।२।१२८॥ घृतपललम् । घृतसूपः । घृतशाकम् । 'भक्ष्येण मिश्रीकरणम्' (सू ६९७) इति समासः । मिश्रे किम् । परमपललम् । **३८६३ कूलसूदस्थलकर्षाः सञ्ज्ञायाम्** ६।२।१२९॥ आद्युदात्ताःतत्पुरुषे । दाक्षिकूलम् । शाण्डिसूदम् । दाण्डायनस्थलम् । दाक्षिकर्षः । ग्रामसंज्ञा एताः । संज्ञायां किम् । परमकूलम् । **३८६४ अकर्मधारये राज्यम्** ६।२।१३०॥ कर्मधारयवर्जिते तत्पुरुषे राज्यमुत्तरपदमाद्युदात्तम् । ब्राह्मणराज्यम् । अकेति किम् । परमराज्यम् । **चेलराज्यादिस्वरादव्ययस्वरः पूर्वविप्रतिषेधेन** (वा ३८४७) कुचेलम् । कुराज्यम् । **३८६५ वर्ग्यादयश्च** ६।२।१३१॥ अर्जुनवर्ग्यः । वासुदेवपक्ष्यः । अकर्मधारय इत्येव । परमवर्ग्यः । वर्गादिर्दिगाद्यन्तर्गणः । **३८६६ पुत्रः पुम्भ्यः** ६।२।१३२॥ पुम्शब्देभ्यः परः पुत्रशब्दः आद्युदात्तस्तत्पुरुषे । दाशकिपुत्रः । माहिषपुत्रः । पुत्रः किम् । कौनटिमातुलः । पुम्भ्यः किम् । दाक्षीपुत्रः । **३८६७ नाचार्यराजर्त्विकसंयुक्तज्ञात्याख्येभ्यः** ६।२।१३३॥ एभ्यः पुत्रो नाऽऽद्युदात्तः । आख्याग्रहणात्पर्यायाणां, तद्विशेषाणां च ग्रहणम् । आचार्यपुत्रः । उपाध्यायपुत्रः । शाकटायनपुत्रः । राजपुत्रः । ईश्वरपुत्रः । नन्दपुत्रः । ऋत्वि-

---

कटु गतस्वादु तद्वत् गतस्वादु । प्रज्ञाकाण्डमिति । **काण्डमिति शरनाम** । स यथा सावरपोडाकरः एवम्भूतम् । व्याघ्रादित्वात् समास इति । **पुत्रश्चेलमिवेत्यादि विगृह्य व्याघ्रादेराकृतिगणत्वादुपमितं व्याघ्रादिभिरिति समासः** । चीर । **उपमानवाचिचीरशब्दे उत्तरपदमाद्युदात्तं स्यात्तत्पुरुषे** । वस्त्रचीरमिति । **पूर्ववद्व्याघ्रादिसमासः** । पललसूप । **पललादीन्युत्तरपदान्याद्युदात्तानि स्युर्मिश्रे तत्पुरुषे** । घृतपललमित्यादि । घृतेन मिश्रं पललमिति विग्रहः । पललं मांसम् । 'पललं क्लथ्यमामिषम्' इत्यमरः । कूलसूद । **एतान्युत्तरपदान्याद्युदात्तानि स्युः संज्ञायाम्** । दाण्डायनस्थलमिति । **'प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्' इति स्थलीशब्दो गृह्यते । 'जानपदकुण्ड' इत्यनेन ङीप्** । चेलराज्यादिस्वरादिति । **आदिशब्देन वर्ग्यादिस्वरपरिग्रहः । चेलराज्यादिस्वरस्यावकाशो भार्याचेलं ब्राह्मणराज्यम् । 'तत्पुरुषे तुल्यार्थ' इत्यादिना विहितस्याऽव्ययस्वरस्यावकाशो निष्कौशाम्बिः । कुचेलं कुराज्यमित्यत्रोभयप्रसङ्गे पूर्वविप्रतिषेधः** । वर्ग्य । **वर्ग्यादीन्युत्तरपदान्याद्युदात्तानि स्युरकर्मधारये तत्पुरुषे । ये दिगादिषु वर्गादयः पठ्यन्ते त एवेह यत्प्रत्ययान्ता वर्ग्यादयो गृह्यन्ते वर्ग्यादिपाठाऽभावात्तद्वाह**–वर्गादिर्दिगाद्यन्तर्गण इति । कौनटिमातुल इति । **कुनटस्यापत्यं कौनटिः तस्य मातुलः** । आख्याग्रहणादिति । **आख्याग्रहणमाचार्यादिभिः प्रत्येकं**

क्पुत्रः । याजकपुत्रः । होतुःपुत्रः । संयुक्ताः सम्बन्धिनः । श्यालपुत्रः । ज्ञातयो मातापितृसम्बन्धेन बान्धवाः । ज्ञातिपुत्रः । भ्रातुष्पुत्रः । **३८६८ चूर्णादीन्यप्राणिषष्ठ्याः** ६।२।१३४॥ एतानि प्राणिभिन्नषष्ठ्यन्तात्पराण्याद्युदात्तानि तत्पुरुषे । मुद्गचूर्णम् । अप्रेति किम् । मत्स्यचूर्णम् । **३८६९ षट् च काण्डादीनि** ६।२।१३५॥ अप्राणिषष्ठ्या आद्युदात्तानि । दर्भकाण्डम् । दर्भचीरम् । तिलपललम् । मुद्गसूपः । मूलकशाकम् । नदीकूलम् । षट् किम् । राजसूदः । अप्रेति किम् । दत्तकाण्डम् । **३८७० कुण्डं वनम्** ६।२।१३६॥ कुण्डमाद्युदात्तं वनवाचिनि तत्पुरुषे । दर्भकुण्डम् । कुण्डशब्दोऽत्र सादृश्ये । वने किम् । मृत्कुण्डम् । **३८७१ प्रकृत्या भगालम्** ६।२।१३७॥ भगालवाच्युत्तरपदं तत्पुषे प्रकृत्या । कुम्भीभगालम् । कुम्भीनदालम् । कुम्भीपालम् । मध्योदात्ता एते । प्रकृत्येत्यधिकृतम् । 'अन्तः' (सू ३८७७) इति यावत् । **३८७२ शितेर्नित्याऽबह्वच्बहुव्रीहावभसत्** ६।२।१३८॥ शितेः परं नित्याऽबह्वच्कं प्रकृत्या । शितिपादः । शित्यंसः । पादशब्दो वृषादित्वादाद्युदात्तः । अंसशब्दः प्रत्ययस्य नित्त्वात् । शितेः किम् । दर्शनीयपादः । अभसत्किम् । शितिभसत् । शितिरादयदात्तः । पूर्वपदप्रकृतिस्वरापवादोऽयं योगः । **३८७३ गतिकारकोपपदात्कृत्** ६।२।१३९॥ एभ्यः कृदन्तं प्रकृतिस्वरं स्यात्तत्पुरुषे । प्रकारकः । प्रहरणम् ।

सम्बध्यते । होतुःपुत्र इति । 'ऋतो विद्यायोनिसम्बन्धेभ्यः' इति षष्ठ्या अलुक् । भ्रातुष्पुत्र इति । कस्कादिपाठात्षत्वम् । मुद्गचूर्णमिति । चूर्णं सङ्घोचे पचाद्यच् । षट् च । अप्राणिभ्यः परा या षष्ठी तदन्तात्पराणि षट् काण्डादीन्याद्युदात्तानि स्युः । 'चेल-खेटकटुककाण्ड'मिति काण्डशब्दादारभ्य 'कूलसूदस्थलकर्षाः सज्ञाया'मिति कूलान्तानि, काण्ड चीर पलल सूप शाक कूल एतानि काण्डादीनि, तत्र काण्डं 'गर्हाया'मित्युक्तमगर्हायामपि भवतीति । 'चीरमुपमानम्' इत्युक्तमनुपमानेऽपि भवति । 'पललसूपशाकं मिश्रे'इत्युक्तममिश्रेऽपि भवति । 'कूलं संज्ञाया'मित्युक्तमसंज्ञायामपि भवति । अप्रेति किमिति । 'अप्राणिषष्ठ्या' इति किमर्थमित्यर्थः । मृत्कुण्डमिति । मृद्राजनविशेष इत्यर्थः । प्रकृत्या । भगालमित्यर्थग्रहणं तदाह—भगालवाचीति । अत्र व्याख्यानमेव शरणम् । मध्योदात्ता एते इति । 'लघावन्ते द्वयोश्च' इति सूत्रात् । शितेः । शितेः परं नित्याऽबह्वच्कं भसत्शब्दवर्जितं बहुव्रीहौ प्रकृतिस्वरं स्यात् । अंसशब्द इति । 'अमेः सन्' अंसः । दर्शनीयपाद इति । 'बहुव्रीहौ प्रकृत्या' इति पूर्वपदप्रकृतिस्वरः । दर्शनीयशब्दोऽनीयर्प्रत्ययान्तः । 'उपोत्तमं रिति' इत्युपोत्तमोदात्तः । शितिरादयुदात्त इति । 'वर्णानां तणतिनितान्तानाम्' इति सूत्रेण । गतिका । 'शितेर्नित्याबह्वच्' इत्यतो बहुव्रीहिग्रहणं नानुवर्ततेऽस्वरितत्वात् । किं तु 'तत्पुरुषे शालायाम्, इत्यतो व्यवहि-

शोणा धृष्णू नृवाहसा । इध्मप्रव्रश्चनः । उपपदात् । उच्चैःकारम् । ईषत्करः । गतीति किम् । देवस्य कारकः । शेषलक्षणा षष्ठी । कृद्ग्रहणं स्पष्टार्थम् । प्रपचतितरामित्यत्र तरबाद्यन्तेन समासे कृते आम् । तत्र सतिशिष्टत्वादाम्स्वरो भवतीत्येके । 'प्रपचतिदेश्यार्थं तु कृद्ग्रहण'मित्यन्ये । ३८७४ उभे वनस्पत्यादिषु युगपत्

तमपि तत्पुरुषग्रहणमनुवर्तते । तदाह—तत्पुरुषे इति । प्रकारक इति । 'कुगति' इति समासः लित्स्वरेण पूर्वपदमाद्युदात्तम् । नृवाहसेति । नॄन्वहतीति विग्रहः । 'वसे-र्णित्' इत्यतो णिदित्यनुवृत्तेरसुनो णित्त्वादुपधावृद्धिः । निरुदात्तेनोत्तरपदमाद्युदात्तम् । इध्मप्रव्रश्चन इति । प्रव्रश्च्यते येनेति करणे ल्युट् । कर्मषष्ठ्यन्तेन इध्मशब्देन समासः । अत्र गतिप्रयुक्ते कृत्स्वरे कृते कारकप्रयुक्तः कृत्स्वरः । उच्चैःकारमिति । 'अव्ययेऽयथाभिप्रेता' इति णमुल् । तत्र हि उच्चरित्युपपदम् । ईषत्कर इति । ईषदुःसुषु कृच्छ्रा—' इति खलु । उभयथाऽपि लित्स्वरः । शेषलक्षणा षष्ठीति । न कर्मलक्षणा । तथा सति कारकमेव देवदत्तः स्यात् । 'तृजकाभ्यां कर्तरि' इति समासप्रतिषेधश्च स्यात् । अथ कृद्ग्रहणं किमर्थम् । निर्गतः कौशाम्ब्या निष्कौशाम्बिरित्यत्र मा भूत् । नैतदस्ति । 'यत्क्रियायुक्ताः प्रादयस्तं प्रत्येव गत्युपसर्गसंज्ञा' भवन्ति । न च कौशाम्बीशब्दं प्रति क्रियायोगः, कारकं च क्रियायामेव सम्भवति । उपपदमपि धात्वधिकारे सप्तमीनिर्दिष्टं प्रत्ययनिमित्तमुच्यते । तदेवं गत्यादिभिरपि क्रियावाच्युत्तरपदमाक्षिप्यते, धातोश्च क्रियावाचित्वं, तस्माच्च द्वये प्रत्ययाः कृतस्तिङश्च । तत्र तिङन्तेन समासाभावात्कृदन्तमेव सम्भवति । अनुव्यचलदित्यत्र तु न गतिस्वनिबन्धनः समासः, किं तर्हि सुबन्तेन योगविभागात्समासः । तस्माच्चार्थः कृद्ग्रहणेनेत्यत आह—कृद्ग्रहणं स्पष्टार्थमिति । य एवं प्रतिवक्तुमसमर्थस्तं प्रति विस्पष्टार्थं क्रियत इत्यर्थः । नन्वु विस्पष्टार्थमपि क्रियमाणे कृद्ग्रहणे आमन्ते न प्राप्नोति, प्रपचतितरामिति । ततश्च समासस्वरं बाधित्वाऽव्ययस्वर एव स्यादत आह—प्रपचतितरामित्यादि । इत्येक इत्यस्य 'कृद्ग्रहणं विस्पष्टार्थ'मित्यादिना कृत्स्नेन सम्बन्धः । तदयमर्थः-कृद्ग्रहणं विस्पष्टार्थम् । आमन्ते च दोषाऽभाव इति केचिदाचार्या व्याचक्षते इति । प्रपचतिदेश्यार्थं त्विति । आदिशब्देन प्रपचतिकल्पं प्रपचतिदेशीयः प्रपचतिरूपमित्येतेषां त्रयाणां ग्रहणम् । प्रपचतिदेश्यादौ अर्थः प्रयोजनं यस्य तत्तथोक्तम् । अयमभिप्रायः-न विस्पष्टार्थं कृद्ग्रहणम्, अपि तु प्रपचतिदेश्यादौ यत्र सतिशिष्टं स्वरान्तरं नास्ति, तत्रापि स्वरो मा भूदव्ययपूर्वपदप्रकृतिस्वर एव यथा स्यादित्येवं सप्रयोजनमाहुः । अत्र हरदत्तः-इदं तु वक्तव्यम् । प्रपचतितरामित्यादौ तरबन्तेन समासे पश्चादाम् भवन्प्रत्ययग्रहणपरिभाषया पचतितरशब्दस्यैव घान्तस्वान्तत एव स्यात् । तत्र को दोषः सोपसर्गस्य घान्तस्यैकपदाभावादाम् । प्रपचतितरां देवदत्तेत्यादावाम एकान्तरमामन्त्रितमनन्तिक इत्येव विधिर्न स्यात्, शेषनिघातश्च

६।२।१४०॥ एषु पूर्वोत्तरपदे युगपत्प्रकृत्या । वनस्पतिं वन आ । बृहस्पतिं यः । बृहच्छब्दोऽग्राद्युदात्तो निपात्यते । हर्षया शचीपतिम् । शार्ङ्गरवादित्वादाद्युदात्तः शचीशब्दः । शचीभिर्न इति दर्शनात् । तनूनपादुच्यते । नराशंसं वाजिनम् । निपातनाद्दीर्घः । शुनःशेपम् । **३८७५ देवताद्वन्द्वे च ६ । २ । १४१ ॥** उभे युगपत्प्रकृत्या स्तः । आ य इन्द्रावरुणौ । इन्द्राबृहस्पती वयम् । देवता किम् । प्लक्षन्यग्रोधौ । द्वन्द्वे किम् । अग्निष्टोमः । **३८७६ नोत्तरपदेऽनुदात्तादावपृथिवीरुद्रपूषमन्थिषु ६ । २ । १४२ ॥** पृथिव्यादिवर्जितेऽनुदात्तादावुत्तरपदे प्रागुक्तं न । इन्द्राग्निभ्यां कं वृषणः । अपृथिव्यादौ किम् । द्यावापृथिवी जनयन् । आद्युदात्तो द्यावा निपात्यते । 'पृथिवीत्यन्तोदात्तः' । सोमारुद्रौ । 'रोदेर्णिलुक्च' इति रगन्तो रुद्रशब्दः । इन्द्रापूषणौ । 'श्वन्नुक्षन्पूषन्' इति पूषा अन्तोदात्तो निपात्यते । शुक्रामन्थिनौ । मन्थिनिशब्दान्तत्वादन्तोदात्तः । उत्तरपदग्रहणमनुदात्तादावित्यु-

---

प्रशब्दस्य न स्यादिह पदत्वात् । तस्मात्प्रशब्दस्याऽऽमन्तेन समासोऽङ्गीकर्तव्यो न तरबन्तेन । तत्र समासत्वात्समुदायस्य प्रातिपदिकत्वे विभक्तावेकपदं भवति, स्वरे तु दोषप्रसङ्गात्कृद्ग्रहणमपि वक्तव्यमिति भाष्ये स्थितम् । प्रपचतिदेश्यादौ का गतिरिति न विद्मः । उभे । वनस्पतिमिति । वनशब्दो 'नड्विषयस्याऽनिसन्तस्य' इत्याद्युदात्तः । पतिशब्दोऽपि 'पातेर्डतिः' इति डतिप्रत्ययान्तः प्रत्ययस्वरेण । पारस्करादित्वात्सुट् । बृहस्पतिमिति । 'वर्तमाने पृषद्बृहत्-' इति अतिप्रत्ययान्तत्वादन्तोदात्तोऽप्याद्युदात्तो निपात्यते । 'तद्बृहतोः, करपत्योः-' इति सुट्तलोपौ । शार्ङ्गरवादित्वादाद्युदात्त इति । शार्ङ्गरवादित्वात् ङीनि कृते नित्त्वादाद्युदात्तत्वमित्यर्थः । शचीपतिरिति । एते षष्ठीसमासाः । तनूनपादिति । 'कृषिचमितनिधनिसर्जिखर्जिभ्य ऊः' इति ऊप्रत्ययान्तत्वादन्तोदात्तोऽपि तनूशब्दोऽग्राद्युदात्तो निपात्यते । नपातयतीति नपात् । 'नभ्राण्नपान्नवेदा-' इति सूत्रे आद्युदात्तो नपाच्छब्दो निपात्यते । तन्वाः नपादिति विग्रहः । नराशंसमिति । नरा एनं शंसन्तीत्यर्थः । नृ नये 'ऋदोरप्' शंसेः कर्मणि घञ् द्वावप्यादुदात्तौ । 'अन्येषामपि-' इति दीर्घः । शुनःशेपमिति । शुन इव शेपोऽस्येति बहुव्रीहिः । 'शेपपुच्छलाङ्गूलेषु शुनः' (सञ्ज्ञायाम्) इत्यच्समुक् षष्ठ्याः । श्वनूशब्दः प्रातिपदिकस्वरेण, शेपशब्दः 'स्वाङ्गशिटामदन्तानाम्' इत्याद्युदात्तौ । इन्द्राबृहणामिति । इन्द्रशब्दः 'ऋन्नेन्द्राग्र-' इति रगन्तः, बृहच्छब्दः 'कृवृदारिभ्य उनन्' इत्युनन्तः । उभौ आद्युदात्तौ । 'देवताद्वन्द्वे च' इति पूर्वपदस्याऽऽनङ् । इन्द्राबृहस्पती इति । बृहस्पति-

त्तरपदविशेषणं यथा स्यात्; द्वन्द्वविशेषणं मा भूत्। अनुदात्तादाविति विधिप्रतिषेधयोर्विषयविभागार्थम्। ३८७७ अन्तः ६।२।१४३॥ आंधकारोऽयम्। ३८७८ थाऽथघञ्क्ताजबित्रकाणाम् ६।२।१४४॥ थ अथ घञ् क्त अच् अप् इत्र क एतदन्तानां गतिकारकोपपदात्परेषामन्त उदात्तः। प्रभृत्यस्यायोः। आवसथः। घञ्, प्रभेदः। क्तः। धर्ता वज्री पुरुष्टुतः। पुरुषु बहुप्रदेशेषु स्तुत इति विग्रहः। अच्। प्रक्षयः। अप्। प्रलवः। इत्र। प्रलवित्रम्। क। गोवृषः। मूलविभुजादित्वात्कः। गतिकारकोपपदादित्येव, सुस्तुतं भवता। ३८७९ सूपमानात्क्तः ६।२।१४५॥ सोरुपमानाच्च परं क्तान्तमन्तोदात्तम्। ऋतस्य योनौ सुकृतस्य। शशप्लुतः। ३८८० सञ्ज्ञायामनाचितादीनाम् ६।२।१४६॥ ग-

---

शब्दौ वाचस्पत्यादित्वात् द्वावादूयुदात्तौ तेनेन्द्राबृहस्पतीइत्यत्र त्रय आदूयुदात्ताः। अग्निष्टोम इति। 'अग्नेः स्तुत्स्तोमसोमाः' इति षत्वम्। इन्द्राग्निभ्यामिति। अग्निशब्दः 'अङ्गेर्निनलोपश्च' इति निप्रत्ययान्तत्वादन्तोदात्तः। पृथिवीत्यन्तोदात्त इति। ङीप्प्रत्ययान्तत्वात्। सोमारुद्राविति। 'अर्तिस्तुसुहुसृधि' ति मन्नन्तत्वादादूयुदात्तः सोमशब्दः। उत्तरपदग्रहणमित्यादि। अन्यथाऽस्मिन् प्रकरणे द्वन्द्वः सप्तम्या निर्दिष्टः, नोत्तरपदं, तत्रानुदात्तादाविति सप्तम्यन्तं द्वन्द्वस्य विशेषणं स्यात्। ततश्चन्द्रासूर्यावित्यादौ प्रतिषेधः स्यात्। चन्द्रशब्दो रगन्तत्वादन्तोदात्तः। सूर्यशब्दः 'राजसूयसूर्य-' इति यदन्तत्वात् 'यतोऽनावः' इत्यादूयुदात्तः। उत्तरपदग्रहणे तस्यैव श्रुतस्याऽनुदात्तादाविस्येतद्विशेषणं भवति। अनुदात्तादाविति। विधिप्रतिषेधयोरित्यादि। अन्यथा विधिप्रतिषेधयोः समानविषयत्वाद्विकल्पः प्रसज्येत। इह पृथिव्यादिप्रतिषेधो ज्ञापयति 'स्वरविधौ व्यञ्जनमविद्यमानवदि'ति। तेन 'अग्निमीळे' इत्यादौ स्वरितः सिध्यति। थाऽथ। प्रभृत्यस्येति। 'हनिकुषिनीरमिकाशिभ्यः क्थन्' 'अवे भृञः' इति क्थन्। निस्स्वरेणादूयुदात्तत्वे प्राप्ते-आवसथ इति। 'उपसर्गे वसेः' इत्यथप्रत्ययान्तः। पुरुष्टुत इति। कर्मणि क्तः। पुरुष्विति। तृतीया तत्पुरुषे तु 'तृतीया कर्मणि' इति सूत्रेण कर्मणि क्तान्ते उत्तरपदे तृतीयान्तस्य पूर्वपदस्य प्रकृतिस्वरः स्यादिति भावः। प्रक्षय इति। 'पुरच्'। न च क्षयशब्दस्याऽचप्रत्ययान्तत्वात्कुत्तरपदप्रकृतिस्वरेणैवाऽन्तोदात्तत्वं सिद्धमिति वाच्यम्। 'क्षयो निवासे' इति क्षयशब्दस्यादूयुदात्तत्वात्। प्रलव इति। 'ऋदोरप्'। प्रलवित्रमिति। 'अर्तिलूधूसूखनसहचर इत्रः'। गोवृष इति। गां वर्षति इति विग्रहः। वृषु सेचने 'वृषादीनां च' इत्यादूयुदात्तोऽयम्। सुस्तुतमिति। 'ञुः पूजायाम्' इति कर्मप्रवचनीयः। अव्ययपूर्वपदप्रकृतिस्वर एव। सूप। सुकृतस्येति।

तिकारकोपपदात् क्तान्तमन्तोदात्तमाचितादीन्वर्जयित्वा । उपहूतः शाकल्यः । परिजग्धः कौण्डिन्यः । अनेति किम् । आचितम् । आस्थापितम् । **३८८१ प्रवृद्धादीनां च** ६।२।१४७॥ एषां क्तान्तमुत्तरपदमन्तोदात्तम् । प्रवृद्धः । प्रयुतः । असञ्ज्ञार्थोऽयमारम्भः । आकृतिगणोऽयम् । **३८८२ कारकादत्तश्रुतयोरेवाऽऽशिषि** ६।२।१४८॥ सञ्ज्ञायामन्त उदात्तः । देवदत्तः । विष्णुश्रुतः । कारकात्किम् । सम्भूतो रामायणः । दत्तश्रुतयोः किम् । देवपालितः । अस्मान्नियमादत्र 'सञ्ज्ञायामना' (सू ३८८०) इति न । 'तृतीया कर्मणि' (सू ३७८२) इति तु भवति । एव किम् । कारकावधारणं यथा स्यात् दत्तश्रुतावधारणं मा भूत् । अकारकादपि दत्तश्रुतयोरन्त उदात्तो भवति । संश्रुतः । आशिषि किम् । देवैः खाता देवखाता । आशिष्येवेत्येवमत्रेष्टो नियमः । तेनाऽनाहतो नदति देवदत्त इत्यत्र न, शङ्खविशेषस्य सञ्ज्ञेयम् । 'तृतीया कर्मणि' (सू ३७८२) इति पूर्वपदप्रकृतिस्वरत्वमेव भवति । **३८८३ इत्थम्भूतेन कृतमिति च** ६।२।१४९॥ 'इत्थम्भूतेन कृत' मित्येतस्मिन्नर्थे यः समासस्तत्र क्तान्तमुत्तरपदमन्तोदात्तं स्यात् ।

'गतिरनन्तरः' इति प्राप्ते । शशप्लुतमिति । शश इव प्लुतमिति विग्रहः । 'तृतीया कर्मणि' इति प्राप्तम् । उपहूत इति । 'ह्वेञो निष्ठायाम्' यजादित्वात्सम्प्रसारणम् । परिजग्ध इति । अदो जग्धादेशः । उभयत्र 'गतिरनन्तरः' इति प्राप्तम् । अनेति किमिति । अनाचितादीनामिति किमर्थमित्यर्थः । आचितमित्यादि । चिञ् चयने । ष्ठा गतिनिवृत्तौ, णिजन्तः । आभ्यां कर्तरि क्तः । प्रवृद्धः प्रयुत इति । वृधु वृद्धौ । यु मिश्रणे । असंज्ञार्थोऽयमारम्भ इति । संज्ञायां तु 'संज्ञायामनाचितादीनाम्' इत्येव सिद्धम् । कारकादत्त । तत्पुरुषे संज्ञायामाशिषि कारकात्परयोर्दत्तश्रुतयोरेव क्तान्तयोरन्त उदात्तः स्यात् । 'संज्ञायामनाचितादीनाम्' इत्यनेन विहितमन्तोदात्तत्वमनेन नियम्यते । देवदत्त इत्यादि । देवा एनं देयासुरित्येवं प्रार्थितैर्देवैर्दत्तो देवदत्तः । 'आशिषि लिङ्लोटौ' इति वर्तमाने 'क्तिच्क्तौ च संज्ञायाम्' इति क्तः । 'दो दद्घोः' इति ददादेशः । विष्णुरेनं अयादित्येव प्रार्थिते विष्णुना श्रुतो विष्णुश्रुतः । क्तप्रत्ययः पूर्ववत् । सम्भूता रामायण इति । कारकादित्यनुवर्त्यमाने गतिकारकोपपदादिति त्रितयाधिकारात्तथा कारकाश्रियमो भवति, तथैव गतेरपि स्यात् । एव किमिति । सिद्धेऽधिकारे आरभ्यमाणोऽन्तरेणाप्येवकारं नियमार्थो भविष्यतीति प्रश्नः । कारकावधारणमित्यादि । असति ह्येवकारे विपरीतनियमोऽपि स्यात् 'कारकादेव दत्तश्रुतयो'रिति एवं चाकारकादत्तश्रुतयोर्न स्यात् इष्यते च, तथा कारकस्याऽनियतत्वादेवकारेण नियत इत्यादावन्तोदात्तः । अतः कारकावधारणं यथा स्यादत्तश्रुतावधारणं मा भूदित्येवमर्थमेवकारग्रहणमित्यर्थः । देवखातेति । 'तृतीया कर्मणि' इति पूर्वपदप्रकृतिस्वरः । इत्थम् । इत्थम्भूतेन कृतमित्येत-

सुप्तप्रलपितम् । प्रमत्तगीतम् । कृतमिति क्रियासामान्ये करोतिर्नाऽभूतप्रादुर्भाव एव । तेन प्रलपितायपि कृतं भवति । 'तृतीया कर्मणि' (सू ३७८२) इत्यस्यापवादः । ३८८४ **अनो भावकर्मवचनः** ६।२।१५०॥ कारकात्परमनप्रत्ययान्तं भाववचनं, कर्मवचनं चान्तोदात्तम् । पयःपानं सुखम् । राजभोजनाः शालयः । अनः किम् । हस्ताऽऽदायः । भेति किम् । दन्तधावनम् । करणे ल्युट् । कारकात्किम् । निदर्शनम् । ३८८५ **मन्क्तिन्व्याख्यानशयनाऽऽसनस्थानयाजकादिक्रीताः** ६।२।१५१॥ कारकात्पराणि एतान्युत्तरपदान्यन्तोदात्तानि तत्पुरुषे । कृत्स्वराऽपवादः । रथवर्त्म । पाणिनिकृतिः । छन्दोव्याख्यानम् । राजशयनम् । राजाऽऽसनम् । अश्वस्थानम् । ब्राह्मणयाजकः । गोक्रीतः । कारकात्किम् । प्रभूतौ सङ्गतिम् । अत्र 'तादौ च निति' (सू ३७८४) इति स्वरः । ३८८६ **सप्तम्याः पुण्यम्** ६।२।१५२॥ अन्तोदात्तम् । अध्ययनपुण्यम् । तत्पुरुषे तुल्यार्थेति प्राप्तम् । सप्तम्याः किम् । वेदेन पुण्यं वेदपुण्यम् । ३८८७ **ऊनाऽर्थकलहं तृतीयायाः** ६।२।१५३॥ माषेनम् । माषविकलम् । वाक्कलहः । तृती-

---

स्मिन्नर्थे इति । इत्थं प्रकारमापन्न इत्थम्भूतस्तेन कृतमित्यर्थे । सुप्तप्रलपितमित्यादि । कथमेतान्युदाहरणानि यावता कृतमित्युच्यते । न च प्रलपितादीनि कृतानि । अभूतप्रादुर्भाव एव हि करोतिर्वर्तते ततश्च सुप्तकृतं सुप्तभावितम् उन्मत्तभावितमित्यादिक्रमेणोदाहर्तव्यमित्यत आह—कृतमिति । कृतिसामान्ये करोतिर्वर्तते इति । ततश्च 'यथा क्रियावचनो धातुः क्रियायां क्रियार्थायामित्यादौ विशेषाणामपि ग्रहणं भवति तद्वदत्रापि । ननु सुप्तप्रलपितमित्यादौ कारकादिति योगविभागेनैव सिद्धमित्याशङ्क्याह—तृतीयेति । तस्य तु योगविभागो न बाधकः तस्य निविषयत्वं स्यात् । अभूतप्रादुर्भाव इति । अभूतप्रादुर्भावो निष्पादनम् । अनः । 'गतिकारकोपपदात्कृत्' इत्यस्यापवादः । पयःपानमिति । 'कर्मणि च येन-' इति कर्मण्युपपदे भावे ल्युट् । उपपदसमासः । राजभोजना इति । 'कृत्यल्युटो बहुलम्' इति कर्मणि ल्युट् कर्तरि षष्ठीसमासः । मन्क्तिन् । कृत्स्वरापवादः । क्रीते तु 'तृतीयाकर्मणी'त्यस्य । रथवर्त्मेति । वृतेरधिकरणे मनिन् कर्तरि षष्ठ्या समासः । पाणिनिकृतिरिति । कर्मणि क्तिन् । पूर्ववत्समासः । छन्दोव्याख्यानमिति । व्याख्यानमिति करणे ल्युट् । शयनाऽऽसनस्थानेष्वधिकरणे ल्युट् । ब्राह्मणयाजक इति । 'याजकादिभिश्च' इति सूत्रे षष्ठीसमासार्थं ये याजकादयस्त एव गृह्यन्ते । प्रभूतौ सङ्गतिमिति । 'तादौ च निति कृत्यतौ' इति पूर्वपदप्रकृतिस्वर एवात्र भवति । सप्तम्या । सप्तम्यन्तात्परं पुण्यमित्येतदुत्तरपदमन्तोदात्तं स्यात्तत्पुरुषे । अध्ययनपुण्यमिति । अध्ययने पुण्यमिति विग्रहः । सप्तमीति योगविभागात्समासः । ऊनार्थ । तृतीयान्तात्परानि ऊनार्थानि कलहश्च एतान्युत्तरपदा-

यापूर्वपदप्रकृतिस्वरापवादोऽयम्। अत्र केचिदर्थेति स्वरूपग्रहणमिच्छन्ति। धान्यार्थः। ऊनशब्देन त्वर्थनिर्देशाऽर्थेन तदर्थानां ग्रहणमिति प्रतिपदोक्तत्वादेव सिद्धे तृतीयाग्रहणं स्पष्टार्थम्। ३८८८ **मिश्रं चाऽनुपसर्गमसन्धौ** ६।२।१५४॥ पणबन्धेनैकार्थ्यं सन्धिः। तिलमिश्राः। सर्पिर्मिश्राः। मिश्रं किम्। गुडधानाः। अनुपसर्गं किम्। तिलसम्मिश्राः। मिश्रग्रहणे सोपसर्गग्रहणस्येदमेव ज्ञापकम्। असन्धौ किम्। ब्राह्मणमिश्रो राजा। ब्राह्मणैः सह संहित ऐकार्थ्यमापन्नः। ३८८९ **नञो गुणप्रतिषेधे सम्पाद्यर्हहिताऽलमर्थास्तद्धिताः** ६।२।१५५॥ सम्पाद्यायर्थतद्धितान्ता नञो गुणप्रतिषेधे वर्तमानात्परेऽन्तोदात्ताः। कर्णवेष्टकाभ्यां सम्पादि कार्णवेष्टकिकम्। न कार्णवेष्टकिकमकार्णवेष्टकिकम्। छेदमर्हति छैदिकः। नछैदिकोऽच्छैदिकः। न वत्सेभ्यो हितोऽवत्सीयः। न सन्तापाय प्रभवति असान्तापिकः। नञः किम्। गर्दभरथमर्हति गार्दभरथिकः। विगार्दभरथिकः। गुणप्रतिषेधे किम्। गार्दभरथिकादन्योऽगार्दभरथिकः। गुणो हि तद्धितार्थे प्रवृत्तिनिमित्तं

न्यन्तोदात्तानि स्युः। उदाहरणेषु 'पूर्वसदृश—' इत्यादिना तृतीयासमासः। केचित्त्विरत्यादि। **नन्वेवमूनशब्दस्यापि स्वरूपस्य ग्रहणं प्रसज्येत। ततश्च तदर्थानामन्येषां ग्रहणं न स्यादत आह**—ऊनशब्देन त्विति। **अर्थनिर्देशार्थत्वं तु व्याख्यानाद्वसेयम्।** मिश्रं चा। **तृतीयान्तात्परमनुपसर्गं मिश्रमन्तोदात्तं स्यादसन्धौ**। अयमपि 'तत्पुरुषे तुल्यार्थ—' इत्यस्यापवादः। पणबन्धेनैकार्थ्यमिति। **पणबन्धः परिभाषणम्।** 'यदि मे भवानिदं कुर्यादहमपि भवतः करिष्यामी'त्येवंरूपम्। तिलमिश्रा इति। **'पूर्वसदृशसमोनार्थ'** इति समासः। गुडधाना इति। **'भक्ष्येण मिश्री—'** इति समासः। तिलसमिश्रा इति। **कथं पुनर्मिश्रशब्दस्य विधीयमानं सोपसर्गेण लभ्यतेऽत आह**—मिश्रग्रहणेत्यादि। **तेन 'मिश्रश्लक्ष्णे'**रिति विधीयमानः समासः **सोपसर्गेणापि सिद्धः।** ब्राह्मणमिश्र इति। **'यदि मे भवतः कार्यं कुर्युस्तदाहं भवतामुपकारं करिष्यामी'त्येवंरूपेण पणबन्धेन कृत्वा ब्राह्मणैः सह मिलित इत्यर्थः। अपरे तु स्वरूपभेदग्रहणं सन्धिः। 'ब्राह्मणमिश्र' इत्यत्र ब्राह्मणैरेकीभावेऽपि राजा स्वस्वरूपेण गृह्यते। 'गुडमिश्र' इत्यत्र गुडेनैकीभूतस्य स्वरूपभेदो न गृह्यत इत्याहुः।** नञो गुण। कार्णवेष्टकिकमिति। **'सम्पादिनि'** इति **प्राग्वतेष्ठञ्।** छैदिक इति। **'छेदादिभ्यो नित्यम्'** इति **ठक्।** वत्सेभ्य इति। **'तस्मै हितम्'** इति **छः।** सान्तापिक इति। **'तस्मै प्रभवति सन्तापादिभ्यः'** इति **ठञ्।** नञः किमिति। **प्रतिषेधे प्रायेण नञ एव वृत्तिदर्शनात्प्रश्नः।** विगार्दभरथिक इति। **अव्ययपूर्वपदप्रकृतिस्वर एवाऽत्र भवति।** गार्दभरथिकादन्य इति। **उदाहरणादस्य विशेषं दर्शयितुं 'गुणप्रतिषेध' इति सूत्रावयवं व्याचष्टे**—गुण इति। **तद्धितार्थे प्रवृत्तिनिमित्तमिति। तद्धितार्थः सम्पाद्यादि तस्य यत् प्रवृत्तिनिमित्तम्।**

सम्पादित्वाद्युच्यते । तत्प्रतिषेधो यत्रोच्यते तत्राऽऽयं विधिः । कर्णवेष्टकाभ्यां न सम्पादि मुखमिति । सम्पेति किम् । पाणिनीयमधीते पाणिनीयः । न पाणिनीयः अपाणिनीयः । तद्धिताः किम् । वोढुमर्हति वोढा । न वोढाऽवोढा । ३८९० **ययतोरश्राऽतदर्थे** ६।२।१५६॥ ययतौ यौ तद्धितौ तदन्तस्योत्तरपदस्य नञो गुणप्रतिषेधविषयात्परस्यान्त उदात्तः स्यात् । पाशानां समूहः पाश्या । न पाश्या अपाश्या । अदन्त्यम् । अतदर्थे किम् । अपाश्यम् । तद्धितः किम् । अदेयम् । गुणप्रतिषेधे किम् । दन्त्यादन्यददन्त्यम् । 'तदनुबन्धकग्रहणे नातदनुबन्धकस्ये'ति । नेह । अवामदेव्यम् । ३८९१ **मच्कावशक्तौ** ६।२।१५७॥ अजन्तं कान्तं च नञः परमन्तोदात्तमशक्तौ गम्यायाम् । अपचः । पक्तुं न शक्तः । अविलिखः । अशक्तौ किम् । अपचो दीक्षितः । गुणप्रतिषेधे इत्येव । अन्योऽयं पचादपचः । ३८९२ **आक्रोशे च** ६।२।१५८॥ नञः परावच्कावन्तोदात्तावाक्रोशे । अपचो जाल्मः । पक्तुं न शक्नोतीत्येवमाक्रोश्यते । अविलिखः । ३८९३ **संज्ञायाम्** ६।२।१५९॥ नञः परमन्तोदात्तं संज्ञायामाक्रोशे । अदेवदत्तः । ३८९४ **कृत्योकेष्णुच्चार्वादयश्च** ६।२।१६०॥ नञः परेऽन्तोदात्ताः स्युः । अकर्तव्यः । उक् । अनागामुकः । इष्णुच् । अनलङ्करिष्णुः । इष्णुज्ग्रहणे खिष्णुचो द्वयनुबन्धकस्यापि ग्रहणमिकारादेर्विधानसामर्थ्यात् । अनाढ्यं भविष्णुः ।

सम्पादित्वादिति । **आदिशब्देन तदर्हत्वादेर्ग्रहणं स गुण इत्युच्यते । उक्तं हि—'संसर्गभेदकं यद्यत्सव्यापारं प्रतीयते । गुणत्वं परतन्त्रत्वात्तस्य शास्त्रे उदाहृतम्' इति ।** वोढेति । **'अर्हे कृत्यतृचश्च' इति तृच् । घत्वढत्वष्टुत्वढलोपेषु 'सहिवहोरोदवर्णस्य' इत्योत्वम् ।** पाश्येति । **समूहे 'पाशादिभ्यो यः' ।** अदन्त्यमिति । **'शरीरावयवाच्च' इति यत् ।** अपाश्यमिति । **'पाशदाभ्यां च' इति यत् ।** अदेयमिति । **दुदाञ् दाने अर्हार्थे 'अचो यत्' । 'ईद्यति' इतीत्वे गुणः ।** अवामदेव्यमिति । **वामदेवेन दृष्टमित्यर्थे 'वामदेवाड्ड्यड्ड्यौ' इति ड्यः ।** अपच इति । **पचाद्यच् ।** अविलिख इति । **'इगुपध—' इति कः । 'कृत्योकेष्णुच्चार्वादयश्च' इति वक्ष्यमाणैः कृत्योकेष्णुभिः साहचर्याद्यच्कयोः कृतोरिह ग्रहणं तेन कृद्ग्रहणपरिभाषया विलिखशब्दस्य कान्तत्वम् ।** अपचो दीक्षित इति । **दीक्षितः शास्त्रविरोधाच्च पचति, न स्वशक्तत्वेन ।** अपचो जाल्म इति । **पचं शक्तोऽपि पक्तुमयं न शक्नोतीत्यनेन प्रकारेण क्षिप्यते । तदाह—**पक्तुमित्यादि । **अदेवदत्त इति । देवदत्तः सन्यस्तात्कर्म न करोति स एवमाक्षिप्यते ।** अनागामुक इति । **'लषपतपद–' इत्युकञ् ।** अनलङ्करिष्णुरिति । **'अलङ्कृञ्–' इतीष्णुच् ।** इकारादेर्विधानसामर्थ्यादिति । **भवतेरुदात्तत्वात्ततः परस्य खिष्णुच इटीवेकारादित्वे सिद्धे इकारादेर्वि-**

चार्वादिः । अचारुः । असाधुः । (ग) राजाहोश्छन्दसि । अराजा । अनहः । भाषायां नञः स्वर एव । ३८६५ विभाषा तृन्नतीक्ष्णशुचिषु ६।२।१६१॥ तृन् । अकर्ता । अघ्न । अनघ्नम् । अतीक्ष्णम् । अशुचि । पक्षे अव्ययस्वरः । ३८६६ बहुव्रीहाविदमेतत्तद्भ्यः प्रथमपूरणयोः क्रियागणने ६।२।१६२॥ एभ्योऽनयोरन्त उदात्तः । इदं प्रथमं यस्य स इदंप्रथमः । एतद्द्वितीयः । तत्पञ्चमः । बहुव्रीहौ किम् । अनेन प्रथमं इदंप्रथमः । 'तृतीया' (सू ६९२) इति योगविभागात्समासः । इदमेतत्तद्भ्यः किम् । यत्प्रथमः । प्रथमपूरणयोः किम् । तानि बहून्यस्य तद्बहुः । क्रियागणने किम् । अयं प्रथमः प्रधानं येषां ते इदंप्रथमाः । द्रव्यगणनमिदम् । गणने किम् । अयं प्रथमो येषां ते इदंप्रथमाः । इदंप्रधाना इत्यर्थः । उत्तरपदस्य कार्यित्वात्कपि पूर्वमन्तोदात्तम् । इदं प्रथमकः । बहुव्रीहावित्यधिकारो 'वनं समासे' (सू ३६१२) इत्यतः प्राग्बोध्यः । ३८६७ संख्यायाः स्तनः ६।२।१६३॥ बहुव्रीहावन्तोदात्तः । द्विस्तना । चतुःस्तना । संख्यायाः किम् । दर्शनीयस्तना । स्तनः किम् । द्विशिराः । ३८६८ विभाषा छन्दसि ६।१।१६४॥ द्विस्तनां करोति ' ३८६६

धानामह सामान्यग्रहणा 'भवति भावः । अनादयश्च भवन्तीति । 'भुवः खिष्णुच् खुकञौ इति खिष्णुच् । अचारुरिति । 'हसति-' इति चरेरुण् । असाधुरिति । साध्नोतेः कृवापाजि—' इत्युण् । राजाहोः । चार्वाद्यन्तर्गणसूत्रम् । नञः परयोरेतयोश्छन्दस्यन्तोदात्तत्वम् । अराजेति । 'नञस्तत्पुरुषात्' इति समासान्तनिषेधः । विभाषा तृन् । नञ उत्तरपदान्येतान्यन्तोदात्तानि स्युस्तत्पुरुषे । बहुव्रीहाविदम् । एभ्य इत्यादि । इदमेतत्तद्भ्यः अनयोः प्रथमपूरणयोः । इदं प्रथमं यस्येति । निगमनं, भोजनं वा । अनेन प्रथम इदम्प्रथम इति । तृतीयापूर्वपदप्रकृतिस्वर एव भवति । यत्प्रथम इति । यत्प्रथमं गमनं यस्य स यत्प्रथमः । इदम्प्रधाना इत्यर्थ इति । अनेन प्रधानवचनः प्रथमशब्दो न त्वेकत्वसंख्यावचन इति दर्शितम् । तेनाऽत्र गणनाऽभाव उक्तः । उत्तरपदस्येत्यादि । इह समासस्येति प्रकृतम् । 'उत्तरपदादिरित्यतः प्रभृति उत्तरपदस्येति च तन्त्रम् । इहोत्तरपदं कार्यित्वेनाश्रीयते; तेन यदा कबुत्पद्यते; तदा कपि परतो यत्पूर्वं प्रथमेति तदन्तोदात्तं भवति न तु कबन्तम् । कप्प्रत्ययो हि समासस्यैवाऽन्तो नोत्तरपदस्य । 'उत्तरपदावयवाः समासान्ताः' इति पक्षेऽपि 'प्रथमपूरणयो'रिति विशिष्टकपग्रहणात् । कपस्तत्रानन्तर्यादुपात्तयोरेव स्वरः । स्तनस्येत्यायाः । संख्यायाः परः स्तनशब्दोऽन्तोदात्तः स्यात् । दर्शनीयस्तनेति । पूर्वपदप्रकृतिस्वरः । दर्शनीयशब्दोऽनीयर प्रत्ययान्तो द्रष्टव्यः । विभाषा । पूर्वपदोक्तं छन्दसि वा स्यात् । द्विस्तनामिति । अन्तोदात्तत्वम् । 'स्वाङ्गाच्चोपसर्जनात्' इति ङीष् । चतुःस्तनेति । पूर्वपदप्रकृतिस्वरेण 'चतु-

संज्ञायां मित्राजिनयोः ६।२।१६५॥ देवमित्रः। कृष्णाजिनम्। संज्ञायां किम्। प्रियमित्रः। **ऋक्पप्रतिषेधो मित्रे** (वा० ३८५७)। विश्वामित्र ऋषिः। **३६०० व्यवायिनोऽन्तरम्** ६।२।१६६॥ व्यवधानवाचकात्परमन्तोदात्तम्। वस्त्रमन्तरं व्यवधायकं यस्य स वस्त्रान्तरः। व्यवायिनः किम्। आत्मान्तरः। अन्यस्वभाव इत्यर्थः। **३६०१ मुखं स्वाङ्गम्** ६।२।१६७॥ गौरमुखः। स्वाङ्गं किम्। दीर्घमुखा शाला। **३६०२ नाऽव्ययदिक्शब्दगोमहत्स्थूलमुष्टिपृथुवत्सेभ्यः** ६।२।१६८॥ उच्चैर्मुखः। प्राङ्मुखः। गोमुखः। महामुखः। स्थूलमुखः। मुष्टिमुखः। पृथुमुखः। वत्समुखः। पूर्वपदप्रकृतिस्वरोऽत्र। गोमुष्टिवत्सपूर्वपदस्योपमानलक्षणोऽपि विकल्पोऽनेन बाध्यते। **३६०३ निष्ठोपमानादन्यतरस्याम्** ६।२।१६९॥ निष्ठान्तादुपमानवाचिनश्च परं मुखं स्वाङ्गं वाऽन्तोदात्तं बहुव्रीहौ। प्रक्षालितमुखः। पक्षे 'निष्ठोपसर्ग' (सू ३८४४) इति पूर्वपदान्तोदात्तत्वम्। पूर्वपदप्रकृतिस्वरत्वेन गतिस्वरोऽपि भवति। उपमानम्—सिंहमुखः।

रुरन्' इति चतुरशब्दस्य निरनुबन्धत्वादाद्युदात्तत्वम्। अत्राऽन्तोदात्तत्वाऽभावात् 'स्वाङ्गात्—' इति ङीप् न। संज्ञायां मित्रा। एतयोरुत्तरपदयोरन्त उदात्तः स्याद् बहुव्रीहौ संज्ञायाम्। विश्वामित्र इति। 'मित्रे चर्षौ' इति दीर्घः। अत्र 'बहुव्रीहौ विश्वं संज्ञायाम्' इति वार्तिकेन परत्वादनेनाऽन्तोदात्तत्वं प्राप्तं प्रतिषिध्यते। अतो 'बहुव्रीहौ विश्वं संज्ञायाम्' इत्यन्तोदात्तत्वं भवति। व्यवायि। उदाहरणे व्यवधानवाचिनोऽन्तरशब्दात् 'तत्करोति—' इति णिचि पचाद्यच्। प्रत्युदाहरणे त्वन्यवाच्यन्तरशब्दः। मुखं। स्वाङ्गं मुखमुत्तरपदमन्तोदात्तं बहुव्रीहौ। दीर्घनखा शालेति। मुखशब्देनाऽत्र द्वारप्रदेशः शालाया उच्यते। स्वाङ्गमद्रव्यवाचिलक्षणमिह गृह्यते, न तु 'स्वमङ्गं स्वाङ्ग'मिति व्युत्पत्तिरभ्यम्। अन्यथाऽत्रापि स्यादिति भावः। नाऽव्ययः। एभ्यः परो मुखशब्दोऽन्तोदात्तो न स्यात्। पूर्वपदप्रकृतिस्वरोऽत्रेति। एषूदाहरणेषु 'बहुव्रीहौ प्रकृत्या पूर्वपदम्' इति पूर्वपदप्रकृतिस्वरेणान्तोदात्तं पूर्वपदम्। तथाहि 'उदि चेदैत्सि' उच्चैः। 'अनिगन्तोऽञ्चतावप्रत्यये' इति प्रशब्द उदात्तः। तत्र एकादेशस्वरेण प्राङ्शब्द उदात्तः। 'गमेर्डोसिः'। गौः। 'वर्तमाने पृषद्' इत्यादिना महच्छब्द उदात्तो निपातितः। स्थूलशब्दः 'ऋज्रेन्द्र' इत्यादावन्तोदात्तो निपातितः। मुषेः क्तिच, मुष्टिः। 'प्रथिम्रदिभ्रस्जां संप्रसारणं सलोपश्च' इति कुः। पृथुः। 'कृत्वादि' इत्यादिना सः। वत्सः। उपमानलक्षणो विकल्प इति। निष्ठोपमानादिति प्राग्वत्। बाध्यत इति। अस्य प्रतिषेधस्यावकाशो यत्र गवाद्युपमानं न भवति। गौर्मुखमिव यस्य सः। वत्सो मुखमिव यस्येति। सर्वत्राऽत्र गवाद्युपमेयं, नोपमानम्। उत्तरस्य विकल्पस्यावकाशो यत्र गवादिपूर्वपदं न भवति। सिंहमुखः। गवादावुपमाने उभयप्रसङ्गेऽयमेव

३६०४ जातिकालसुखादिभ्योऽनाच्छादनात् क्तोऽकृतमितप्रतिपन्नाः ६।२।१७०॥ सारङ्गजग्धः। मासजातः। सुखजातः। दुःखजातः। जातिकालेति किम्। पुत्रजातः। अनाच्छादनादिति किम्। वस्त्रच्छन्नः। अकृतेति किम्। कुण्डकृतः। कुण्डमितः। कुण्डप्रतिपन्नः। अस्माज्ज्ञापकान्निष्ठान्तस्य परनिपातः। **३६०५ वा जाते** ६।२।१७१॥ जातिकालसुखादिभ्यः परो जातशब्दो वान्तोदात्तः। दन्तजातः। मासजातः। **३६०६ नञ्सुभ्याम्** ६।२।१७२॥ बहुव्रीहावुत्तरपदमन्तोदात्तम्। अव्रीहिः। सुमाषः। **३६०७ कपि पूर्वम्** ६।२।१७३॥ नञ्सुभ्यां परं यदुत्तरपदं तदन्तस्य समासस्य पूर्वमुदात्तं कपि परे। अब्रह्मबन्धुकः। सुकुमारीकः। **३६०८ ह्रस्वान्तेऽन्त्यात्पूर्वम्** ६।२।१७४॥ ह्रस्वान्त उत्तरपदे समासे वाऽन्त्यात्पूर्वमुदात्तं कपि, नञ्सुभ्यां परं बहुव्रीहौ। अव्रीहिकः। सुमाषकः। पूर्वमित्यनुवर्तमाने पुनः पूर्वग्रहणं प्रवृत्तिभेदेन नियमार्थम्। ह्रस्वान्तेऽन्त्या-

---

भवति पूर्वविप्रतिषेधेन। सिंहमुख इति। पक्षे पूर्वपदप्रकृतिस्वरः। द्विसेः पचाद्यचि सिंहः। पृषोदरादित्वादाद्यन्तविपर्ययः। जातिकाल। जात्यादिभ्यः परं क्तान्तमन्तोदात्तं स्याद् बहुव्रीहौ, कृतादीन्वर्जयित्वा, आच्छादनवाचकात्परं चेन्न। सारङ्ग इति। सारङ्गः पक्षिविशेषः स जग्धो भक्षितो येनेति विग्रहः। प्रत्युदाहरणे सर्वत्र पूर्वपदप्रकृतिस्वरः। तत्र पुत्रशब्दोऽन्तोदात्तः। वसेः ष्ट्रन्। वस्त्रशब्द आद्युदात्तः। कुण्डशब्दो 'नञ्विषयस्यानिसन्तस्य' इत्याद्युदात्तः। ननूदाहरणेषु प्रत्युदाहरणेषु च 'निष्ठा' इति निष्ठान्तस्य पूर्वनिपातः प्राप्नोति। तत्राह—अस्माज्ज्ञापकादिति। इदमेव मनसि विभाव्योक्तं 'जातिकालसुखादिभ्यः परा निष्ठा वाच्या' इति। दन्तजात इति। पक्षे पूर्वपदप्रकृतिस्वरः। दन्तशब्दः 'स्वाङ्गशिटामदन्तानाम्' इत्याद्युदात्तः। मासशब्दो 'ग्रामादीनां च' इत्याद्युदात्तः। नञ्सु। नञ्सुभ्यां परमुत्तरपदमन्तोदात्तं स्यात्। समासान्ता उत्तरपदावयवाः। तेनाऽनृच इत्यत्र 'ऋक्पूर' इत्यप्यकारस्यादात्तत्वं भवति। 'समासावयवाः समासान्ता' इति पक्षे तु अस्मिन्सूत्रे समासस्यैव कापित्वमाश्रीयते नोत्तरपदस्य 'कपि पूर्वं' मिति ज्ञापकात्। यद्यनेनोत्तरपदस्यान्तोदात्तः स्यात् ततोऽकुमारीक इत्यादावनेनैव सिद्धत्वात्कपिपूर्वमित्यवाच्यं स्यात्। कपि पूर्वम्। पूर्वेण कप एवोदात्तत्वे प्राप्ते ततः पूर्वस्योदात्तत्वं विधीयते। 'ह्रस्वान्तेऽन्त्यात्पूर्वम्' इति वचनादिह दीर्घान्ता एवोदाहृताः। उदाहरणे 'नञ्तश्च' इति कप्। ह्रस्वान्ते। ह्रस्वः अन्तो यस्य तद्विदं ह्रस्वान्तमिति बहुव्रीहेरन्यपदार्थे उत्तरपदं समासो वा गृह्यत इत्याशयेनाह—उत्तरपदे समासे वेति। अत्र कपि पर इति सामान्यवचनात्तद्धितमुत्तरपदं समासो वा गृह्यते। ननु पूर्वग्रहणमनर्थकं 'कपि पूर्वं' मित्यनुवृत्तेरत आह—पूर्वमित्यनुवर्तमाने इति। प्रवृत्तिभेदेन—वाक्यभेदेन। तत्र केन वाक्येन ह्रस्वान्तेऽन्त्यात्पूर्वमुदात्तत्वं विधीयते।

देव पूर्वपदमुदात्तं न 'कपि पूर्व'मिति। अङ्ककः। कबन्तस्यैवाऽन्तोदात्तत्वम्। **३९०९ बहोर्नञ्वदुत्तरपदभूम्नि ६।२।१७५॥** उत्तरपदार्थबहुत्ववाचिनो बहोः परस्य पदस्य नञः परस्येव स्वरः स्यात्। बहुव्रीहिकः। बहुमिश्रकः। उत्तरपदेति किम्। बहुषु मानोऽस्य स बहुमानः। **३९१० न गुणादयोऽवयवाः ६।२।१७६॥** अवयववाचिनो बहोः परे गुणादयो नाऽन्तोदात्ता बहुव्रीहौ। बहुगुणा रज्जुः। बह्वक्षरं पदम्। बह्वध्यायः। गुणादिराकृतिगणः। अवयवाः किम्। बहुगुणो द्विजः। अध्ययनश्रुतसदाचारादयो गुणाः। **३९११ उपसर्गात्स्वाङ्गं ध्रुवमपर्शु ६।२।१७७॥** प्रपृष्ठः। प्रललाटः। ध्रुवमेकरूपम्। उपसर्गादिकम्। दर्शनीयपृष्ठः। स्वाङ्गं किम्। प्रशाखो वृक्षः। ध्रुवं किम्। उद्बाहुः। अपर्शु किम्। विपर्शुः। **३९१२ वनं समासे ६।२।१७८॥** समासमात्रे उपसर्गादुत्तरपदं वनमन्तोदात्तम्। तस्येदिमे प्रवृणे। **३९१३ अन्तः ६।२।१७९॥** अस्मात्परं वनमन्तोदात्तम्। अन्तर्वणो देशः। अनुपसर्गार्थमिदम्। **३९१४ अन्तश्च ६।२।१८०॥** उपसर्गादन्तःशब्दोऽन्तोदात्तः। पर्यन्तः। समन्तः। **३९१५ न निविभ्याम् ६।२।१८१॥** न्यन्तः। व्यन्तः। पूर्वपदप्रकृतिस्वरे यणि च कृते

द्वितीयेन तु नियम्यते। 'ह्रस्वान्तेऽन्त्यादेव' पूर्वमुदात्तं भवति। न कपि पूर्वमिति। तेन किं सिद्धमत आह—कबन्तस्यैवान्तोदात्तत्वमिति। नास्ति ज्ञा यस्य अङ्ककः। अत्र यद्येष नियमो न स्यात्तर्हि एतस्यामावे 'कपि पूर्व'मित्ययमेव स्वरः स्यात्। अस्मिंस्तु नियमे सति न भवति। 'नञ्सुभ्याम्' इति कबन्तस्यैव भवति। बहोर्नञ्। नञ इव नञ्वत्। अस्मादेव निपातनात्पञ्चमीसमर्थाद्वतिः। बहूनां भावो भूमा। 'बहोर्लोपो भू च बहोः' उत्तरपदशब्देन तदर्थो गृह्यते, स्वरूपेणोत्तरपदस्य बहुत्वाऽसंभवात्। तदाह—उत्तरपदार्थबहुत्वेति। बहुव्रीहिक इत्यादि। 'ह्रस्वान्तेऽन्त्यात्पूर्वम्' इति स्वरः। बहुमान इति। पूर्वपदप्रकृतिस्वरः। बहुशब्दस्तु 'लंविबंहोर्नलोपश्च'इति कुप्रत्ययान्तोऽन्तोदात्तः। न गुणा। अवयववाचिनो बहोः परे इति। अवयववाचिन इति गुणादीनां विशेषणम्। उपम। स्वाङ्गं प्रति क्रियायोगाभावादुपसर्गग्रहणं प्राय्युपलक्षणम्। प्रादेरुत्तरं ध्रुवं स्वाङ्गवाचि पर्शुवर्जितमन्तोदात्तं स्यात् बहुव्रीहौ। प्रत्युदाहरणे पूर्वपदप्रकृतिस्वरः दर्शनीयशब्दोऽनीयरप्रत्ययान्तो रित्स्वरः। उद्बाहुरिति। 'क्रोशतो'ति शेषः। अत्र क्रोशनसमय एवोद्बाहुत्वं न सर्वदेत्येतद्ध्रुवम्। वनं समासे। बहुव्रीहाविति शेषः। निसूत्यर्थं समासग्रहणम्। प्रणव इति। बहुव्रीहौ तत्पुरुषे च पूर्वपदप्रकृतिस्वरे प्राप्ते 'प्रनिरन्तः—' इति णत्वम्। अन्तः। अन्तःशब्दात्पञ्चम्यास्तस्लुन्दसो लुक्। तदाह—अस्मात्परमिति। अन्तःशब्दात्परमित्यर्थः। अन्तर्वण इति। अत्रापि तेनैव णत्वम्। अनुपसर्गार्थमिति। उपसर्गे तु पूर्वेणैव सिद्धम्। न निविभ्याम्। निविभ्यामुत्तरोऽन्तः

'उदात्तस्वरितयोर्यणः' (सू ३६५७) इति स्वरितः । **३६१६ परेरभितोभावि मण्डलम्** ६।२।१८२॥ परेः परमभित उभयतो भावोऽस्यास्ति तत्कूलादि, मण्डलं चान्तोदात्तम् । परिकूलम् । परिमण्डलम् । **३६१७ प्रादस्वाङ्गं संज्ञायाम्** ६।२।१८३॥ प्रगृहम् । अस्वाङ्गं किम् । प्रपदम् । **३६१८ निरुदकादीनि च** ६।२।१८४॥ अन्तोदात्तानि । निरुदकम् । निरुपलम् । **३६१९ अभेर्मुखम्** ६।२।१८५॥ अभिमुखम् । 'उपसर्गात्स्वाङ्गम्' (सू ३९११) इति सिद्धे बहुव्रीह्यर्थमध्रुवार्थमस्वाङ्गार्थं चेदम् । अभिमुखा शाला । **३६२० अपाच्च** ६।२।१८६॥ अपमुखम् । योगविभाग उत्तरार्थः । **३६२१ स्फिगपूतवीणाञ्जोऽध्वकुक्षिसीरनामनाम च** ६।२।१८७॥ अपादिमान्यन्तोदात्तानि । अपस्फिगम् । अपपूतम् । अपवीणम् । अञ्जस् । अपाऽञ्जः । अध्वन् । अपाध्वा । 'उपसर्गादध्वनः' (सू ९५३) इत्यस्याभावे इदम् । एतदेव च ज्ञापकं समा-

---

ङाड्डो नाऽन्तोदात्तः स्यात् । पूर्वपदप्रकृतिस्वर इति । बहुव्रीहिसमासे 'बहुव्रीहौ प्रकृत्या' इति 'तत्पुरुषे तुल्यार्थै-' इत्यनेन । परेरभितः । परेरुत्तरोऽभिशब्दो भाववाची मण्डलं चाऽन्तोदात्तं स्यात् । अभितो भावीत्यस्यार्थमाह—अभितो भावोऽस्यास्तीति । अथवा अभितः उभयतो भवति नद्यादौ कूलादिकमित्यभितोभावि । 'सुप्यजातौ-' इति णिनिः । परिकूलमिति । बहुव्रीहिः प्रादिसमासोऽव्ययीभावो वा । तत्र बहुव्रीहौ तत्पुरुषे च पूर्वपदप्रकृतिस्वरे प्राप्ते, अव्ययीभावे तु 'परिप्रत्युपापा-' इति, 'कूलतीर-' इति च प्राप्ते परितः कूलमस्य, परिगतं कूलमिति वा कूलात्कूलं वर्जयित्वेत्यर्थं इति । उदकस्याभाव इव विग्रहः । प्राद । प्रादुत्तरमस्वाङ्गवाचि संज्ञायामन्तोदात्तं स्यात् । प्रगृहमिति । प्रादिसमासः, बहुव्रीहिर्वा । प्रपदमिति । पूर्वपदप्रकृतिस्वरः । निरुदकमित्यादि । निर्गतमुदकं यस्मादिति बहुव्रीहिः । निर्गतमुदकमिति प्रादिसमासो वा । उदकस्याऽभाव इत्यव्ययीभावे तु समासाऽन्तोदात्तत्वेनैव सिद्धम् । अभे । अभेरुत्तरपदं मुखमन्तोदात्तं स्यात् । उपसर्गात्स्वाङ्गमिति । मुखं स्वाङ्गमिति तु न भवति 'नाऽव्ययदिक्शब्द-' इति निषेधात् । अपाच्च । अपादुत्तरं मुखमन्तोदात्तं स्यात्समासे । अपमुखमिति । प्रादिसमासे बहुव्रीहौ च पूर्वपदप्रकृतिस्वरे प्राप्ते मुखं वर्जयित्वेत्यव्ययीभावेऽपि 'परिप्रत्युपापा वर्ज्यमानाहोरात्रावयवेषु' इति प्राप्तेऽयमारम्भः । उत्तरार्थ इति । उत्तरत्र अपादित्यस्यैवानुवृत्तिर्यथा स्यात् अभेर्मा भूत । स्फिगपूत । नामग्रहणं सीरेणैव सम्बध्यते, न स्फिगादिभिः । स्फिगपूतकुक्षीणां पृथग्ग्रहणादिति हरदत्तः । तेन स्फिगपूतकुक्ष्यः पर्याया इति निश्चीयते । उपसर्गादध्वनः इत्यस्याभाव इति । 'उपसर्गादध्वनः' इदं समासान्ताऽप्रत्ययविधायकं, तदभावे । तस्मिन् सति अऽप्रत्ययस्य चिरादेव सिद्धम् । ननु

सान्ताऽनित्यत्वे । अपकुक्षिः । सीरनाम । अपसीरम् । अपहलम् । नाम । अप नाम । स्फिगपूतकुक्षिप्रहणमबहुव्रीह्यर्थमध्रुवार्थमस्वाङ्गार्थं च । ३९२२ **अधेरुपरिस्थम्** ६।२।१८८॥ अध्यारूढो दन्तोऽधिदन्तः । दन्तस्योपरि जातो दन्तः । उपरिस्थं किम् । अधिकरणम् । ३९२३ **अनोरप्रधानकनीयसी** ६।२।१८९ ॥ अनोः परमप्रधानवाचि कनीयश्चान्तोदात्तम् । अनुगतो ज्येष्ठोऽनुज्येष्ठः । पूर्वपदार्थप्रधानप्रादिसमासः । अनुगतः कनीयाननुकनीयान् । उत्तरपदार्थप्रधानः । प्रधानार्थं च कनीयोग्रहणम् । अप्रेति किम् । अनुगतो ज्येष्ठोऽनुज्येष्ठः । ३९२४ **पुरुषश्चाऽन्वादिष्टः** ६।२।१९०॥ अनोः परोऽन्वादिष्टवाची पुरुषोऽन्तोदात्तः । अन्वादिष्टः पुरुषोऽनुपुरुषः । अन्वादिष्टः किम् । अनुगतः पुरुषोऽनुपुरुषः । ३९२५ **अतेरकृत्पदे** ६।२।१९१ ॥ अतेः परमकृदन्तं पदशब्दश्चाऽन्तोदात्तः । अत्यङ्कुशो नागः । अतिपदा गायत्री । अकृत्पदे किम् । अतिकारकः । **अतेर्धातुलोप इति वाच्यम्** । इह मा भूत् । शोभनो गार्ग्योऽतिगार्ग्यः । इह च स्यात् । अतिक्रान्तः कारुमतिकारुकः । ३९२६ **नेरनिधाने** ६।२।१९२ ॥ निधानमप्रकाशता ततोऽन्यदनिधानं प्रकाशनमित्यर्थः । निमूलम् । न्यक्षम् । अनिधाने

'उपसर्गादध्वनः' इत्यनेन नित्योऽज् विधीयते तत्कथमुक्तमित्यस्याऽभाव इतीत्यत आह—एतदेव च ज्ञापकमिति । यदि हि नित्यः समासान्तः स्यात् अध्वग्रहणमिहानर्थकं स्यात्, अध्वग्रहणस्य चित्त्वादन्तोदात्तस्य सिद्धत्वात् । कृतं तु अध्वग्रहणं ज्ञापयति 'समासान्ता अनित्या' इति । स्फिगपूतकुक्षिग्रहणमिति । यदा ह्येतानि स्वाङ्गवाचीनि ध्रुवाणि च भवन्ति बहुव्रीहिश्च समासस्तदा 'उपसर्गात्स्वाङ्गम्' इत्येव सिद्धम् । अधेः । अधेरुत्तरमुपरिस्थवाचि अन्तोदात्तं स्यात् । उपरि तिष्ठतीत्युपरिस्थम् । 'सुपि स्थः' इति कः । तदेतद्दर्शयति—दन्तस्योपरीति । अधिकरणमिति । अधिक्रियतेऽस्मिन्नित्यधिकरणं नेतदुपरिस्थवाचि किन्त्वधारस्थवाचि । अत्र कृदुत्तरपदप्रकृतिस्वरेणाकार उदात्तः । अनुज्येष्ठ इति । उत्तरपदार्थस्याऽप्राधान्यं दर्शयति—पूर्वपदार्थप्रधानः प्रादिसमासोऽयमिति । प्रधानार्थं च कनीयोग्रहणमिति । अन्यत्राऽप्रधानग्रहणेनैव सिद्धत्वात् । अनुगतो ज्येष्ठ इति विग्रहविशेषेण प्रधानवाचित्वं ज्येष्ठशब्दस्य दर्शयति—पुरुषः । अन्वादिष्ट इति । अनु पश्चादादिष्टः कथितः । कस्मिंश्चित्कथिते योऽन्यः कथ्यते सोऽन्वादिष्ट इत्यर्थः । अतेरकृत्पदे । अकृच्च पदं च अकृत्पदे । तदाह—अकृदन्तं पदशब्दश्चेति । अत्यङ्कुश इति । अङ्कुशमतिक्रान्त इति विग्रहः । अतिकारक इति । शोभनः कारकः । पूजार्थोऽयमतिः । अतेर्धातुलोप इति । अत्यङ्कुशादौ वृत्तिविषयेऽतिशब्दोऽतिक्रान्तार्थवृत्तिरिति क्रमेरप्रयोग एव धातुलोपः । अतिगार्ग्य इति । यथान्यासे स्वन्नापि प्राप्नोति, गार्ग्यशब्दस्याऽकृदन्तत्वात् । अतिकारुक इति । यथान्यासे स्वन्न

किम् । निहितो दण्डो निदण्डः । ३९२७ प्रतेरंश्वादयस्तत्पुरुषे ६।२।१९३॥ प्रतेः परेऽश्वादयोऽन्तोदाताः । प्रतिगतोऽशुः प्रत्यंशुः । प्रतिजनः । प्रतिराजा । समासान्तस्यानित्यत्वान्न टच् । ३९२८ उपादूद्वयजजिनमगौरादयः ६।२।१९४ ॥ उपात्परं यत् द्वयच्कमजिनं चान्तोदात्तं तत्पुरुषे गौरादीन्वर्जयित्वा । उपदेवः । उपेन्द्रः । उपाजिनम् । अगौरादयः किम् । उपगौरः । उपतैषः । तत्पुरुषे किम् । उपगतः सोमोऽस्य स उपसोमः । ३९२९ सोरवक्षेपणे ६।२।१९५ ॥ सुप्रत्यवसितः । सुरत्र पूजायामेव । वाक्यार्थस्त्वत्र निन्दा । असूयया तथाऽभिधानात् । सोः किम् । कुब्राह्मणः । अवक्षेपणे किम् । सुतृषणम् । ३९३० विभाषोत्पुच्छे ६।२।१९६ ॥ तत्पुरुषे । उत्क्रान्तः पुच्छादुत्पुच्छः । यदा तु पुच्छमुदस्यति उत्पुच्छयते 'एरच्' (सू ३२३१) उत्पुच्छस्तदा थाथादिस्वरेण नित्यमन्तोदात्तत्वे प्राप्ते विकल्पोऽयम् । सेयमुभयत्र विभाषा । तत्पुरुषे किम् । उदस्तं पुच्छं येन स उत्पुच्छः । ३९३१ द्वित्रिभ्यां पाद्दन्मूर्धसु बहुव्रीहौ ६।२।१९७ ॥ आभ्यां परेष्वेष्वन्तोदात्तो वा । द्विपाच्चतुष्पाच्च रथाय । त्रिपादूर्ध्वः । द्विदन् । त्रिमूर्धानं सप्तरश्मिम् । मूर्धन्नित्यकृतसमासान्त एव मूर्धशब्दः । तस्यै-

---

न स्यात्, कारकशब्दस्य कृदन्तत्वात् । तस्मादव्याप्यवतिव्याप्तिपरिहारार्थमकृत्पदे इत्येतदपनीय धातुलोप इति वक्तव्यमित्यर्थः । नेरनि । नीशब्दादुत्तरपदमन्तोदात्तं स्यादनिधानेऽर्थे । निमूलमिति । निर्गतं मूलमस्य, निर्गतं वा मूलं निमूलम् । निदण्ड इति । निशब्दो निधानार्थं वर्तते । कथं पुनर्निशब्दस्याऽयमर्थ इति चेच्छृणु । प्रादयो हि वृत्तिविषये सक्रियं साधनमाहुः । समासान्तस्यानित्यत्वादिति । इह राजन्शब्दस्य पाठ एव ज्ञापयति—'समासान्ता अनित्या' इति । अन्यथा 'राजाहःसखिभ्यष्टच्' इति टचश्चित्त्वादेव सिद्धं स्यात् । सोरव । सोरुत्तरपदं निन्दायामन्तोदात्तं स्यात्तत्पुरुषे । सुप्रत्यवसित इति । 'सुः पूजायाम्' इति कर्मप्रवचनीयस्य सोः 'स्वती पूजायाम्' इति समासः । तेन सुप्रत्यवसिते थाथादिविधिर्न शङ्कनीयः । ननु यदि सुशब्दोऽत्र पूजायां वर्तते, कथं तर्हि क्षेपो गम्यत इत्याह-वाक्यार्थस्त्वति । कथमित्याह-असूयया इति । यस्त्वनर्थे उपस्थिते सुस्तायमान आस्ते तं प्रत्येवमुक्ते क्षेपो गम्यते । विभाषेत् । उच्छब्दादपरः पुच्छशब्दः अन्तोदात्तो वा स्यात्तत्पुरुषे । सेयमुभयत्र विभाषेति । आद्यायां तु व्युत्पत्तौ अव्ययपूर्वपदप्रकृतिस्वरेण बाधितत्वात्समासस्यान्तोदात्तत्वमप्राप्तम् । द्वितीयायां तु व्युत्पत्तौ थाथादिस्वरेण नित्यमन्तोदात्तत्वं प्राप्तमिति कृत्वोभयत्र विभाषा । द्वित्रिभ्याम् । पादिति कृताऽकारलोपो गृह्यते । दृदिति कृतदकारादेशो दन्तशब्दः । आभ्यामिति । द्वित्रिभ्याम् । द्विपादिति । द्वौ पादौ यस्येति द्विपात् ।

तत्प्रयोजनमसत्यपि समासान्ते अन्तोदात्तत्वं यथा स्यात्। एतदेव ज्ञापकम्। 'अनित्यः समासान्तो भवती'ति। यद्यपि च समासान्तः क्रियते। तथापि बहुव्रीहिकार्यत्वात्तदेकदेशत्वाच्च समासान्तोदात्तत्वं पक्षे भवत्येव। द्विमूर्धः। त्रिमूर्धः। द्वित्रिभ्यां किम्। कल्याणमूर्धा। बहुव्रीहौ किम्। द्वयोर्मूर्धा द्विमूर्धा। ३६६२ **सक्थं चाऽक्रान्तात्** ६।२।१६८॥ गौरसक्थः। श्लक्ष्णसक्थः। अक्रान्तात्किम्। चक्रसक्थः। समासान्तस्य पचश्चित्त्वान्नित्यमेवान्तोदात्तत्वं भवति। ३६३३ **परादिश्छन्दसि बहुलम्** ६।२।१६६॥ छन्दसि परस्य सक्थशब्दस्याऽऽदिरुदात्तो वा। अजिसक्थ्यमालभेत। अत्र वार्तिकम्। **'परादिश्च परान्तश्च पूर्वान्तश्चापि दृश्यते। पूर्वादयश्च दृश्यन्ते व्यत्ययो बहुलं ततः।** (वा० ३८६८।६६) इति। परादिः। तुविजाता उरुक्षया। परान्तः। नियेन

'संख्यासुपूर्वस्य' इति पादशब्दस्याऽकारलोपः। द्विदन्नित्। 'वयसि दन्तस्य दत्'। मूर्धन्नित्यकृतसमासान्त एव मूर्धन्शब्द इति। एतच्च मूर्धस्विति निर्देशादेवावसीयते। अन्यथा मूर्धस्विति निर्देश्यं स्यात्। किमर्थं पुनरकृतसमासान्त एव निर्दिष्ट इत्यत आह—तस्येति। कृतसमासान्तस्योपादानं तर्हि यदा समासान्तः क्रियते, तदा न प्राप्नोति तस्य शब्दान्तरत्वादित्यत आह—तथापीति। इह हि बहुव्रीहिः कायित्वेनोपात्तो न मूर्धन्शब्दः। तदेकदेशत्वाच्चेति। तस्य बहुव्रीहेरेकदेशः समासान्तस्य भावस्तत्त्वं तस्मादिति स एवार्थः। तदेकदेशित्वादिति पाठे तु स बहुव्रीहिरेकदेशी अवयवी यस्य स तदेकदेशी समासान्तस्तद्भावस्तत्त्वं तस्मादिति स एवार्थः। तदेवं बहुव्रीहेः कायित्वात्तदेकदेशत्वाच्च समासान्तस्येति। यदा समासान्तः क्रियते तदाप्यं विधिर्भवत्येव। द्विमूर्ध इति। 'द्वित्रिभ्यां ष मूर्धनः' इति षः। कल्याणमूर्धेति। पूर्वपदप्रकृतिस्वर एवात्र भवति। कल्याणशब्दो 'लघावन्ते—' इत्यादिना मध्योदात्तः। सक्थं च। 'बहुव्रीहौ सक्थ्यक्ष्णोः—' इति षजन्तः सक्थशब्दः उत्तरपदमन्तोदात्तं वा स्यात्, स चेत् कृताऽदान्तात्परो न भवति। चित्त्वाच्चित्यमन्तोदात्तत्वे प्राप्तेऽस्य विकल्पः। गौरसक्थ इति। पक्षे पूर्वपदप्रकृतिस्वरः। 'शुक्लगौरयोरादिः' इति गौरस्याद्यन्तावुदात्तौ। तेऽनात्र ह्रस्वर्यम्। श्लक्ष्णसक्थ इति। 'कृत्यशुभ्यां कक्नः' 'श्लक्षेरच्चोपधायाः' इति श्लक्ष्णशब्दोऽन्तोदात्तः। पचश्चित्त्वादिति। एतेन चित्स्वरस्याऽपवादः। प्राप्तविभाषेयमिति दर्शयति—परादिश्छन्दसि। परशब्देनाऽत्र सक्थशब्द एव। तस्यैव पूर्वसूत्रे सन्निहितत्वात्तदाह—परस्य सक्थशब्दस्येति। ननु तर्हि परग्रहणमनर्थकं प्रकृतो हि सक्थशब्दोऽनुवर्तते। नैतदस्ति। बहुव्रीहेरपि प्रकृतत्वात्तस्यादुदात्तत्वं स्यादुत्तरपदस्य। 'विभाषोत्पुच्छे' इत्यतो विभाषेति वर्तमाने बहुलग्रहणं सर्वार्थप्रदर्शनार्थम्। बहुलग्रहणस्याऽर्थं श्लोकेन दर्शयति—परादिश्चेति। उरुक्षयेति। उरूणां क्षयो

मुष्टिहत्यया । यस्त्रिचक्रः । पूर्वान्तः । विश्वायुर्धेहि । इति समासस्वराः ।

अथ तिङन्तस्वराः ३३ ।

३६३४ तिङो गोत्रादीनि कुत्सनाऽऽभीक्ष्ण्ययोः ८।१।२७ ॥ तिङन्तात्पदाद्गोत्रादीन्यनुदात्तान्येतयोः । पचति गोत्रम् । पचति पचति गोत्रम् । एवं प्रवचनप्रहसनप्रकथनप्रत्यायनादयः । कुत्सनाऽभीक्ष्ण्यग्रहणं पाठविशेषणम् । तेनाऽन्यत्रापि गोत्रादिग्रहणे कुत्सनादावेव कार्यं ज्ञेयम् । गोत्रादीनि इति किम् । पचति पापम् । कुत्सेति किम् । खनति गोत्रम् समेत्य कूपम् । ३६३५ तिङ्डतिङः ८।१।२८॥ अतिङन्तात्पदात्परं तिङन्तं निहन्यते । अग्निमीळे । ३६३६ न लुट् ८।

निवास इति विग्रहः । 'क्षयो निवासे' इति क्षयशब्द आद्युदात्तः । 'समासस्य' इत्यन्तोदात्तं बाधित्वा कृदुत्तरपदप्रकृतिस्वरेणोत्तरपदाद्युदात्तत्वं प्राप्तं तत्थाथादिस्वरेण बाधितम् । अतो बाहुलकेनोत्तरपदाद्युदात्तत्वम् । एतच्च 'क्षि निवासगत्योः' इति धातोर्बाहुलकादधिकरणे 'एरच्' इति माधवेनोक्तम् । वस्तुतस्तु घप्रत्ययान्तः क्षयशब्द इति हरदत्तोक्तरीत्या थाथादिस्वरस्येहाऽप्राप्त्या कृदुत्तरपदप्रकृतिस्वरेणैव सिद्धम् । 'परादिश्च' इत्यस्योदाहरणं तु 'चोदधित्री सूनृतानाम्' इति बोध्यम् । ऊन परिहाणे । चुरादिष्वदन्तः णिच् क्विप् सुतरामूनयत्यप्रियमिति सून् तदतं च सूनृतम् । 'अयस्मयादीनि-' इति भस्वाल्लोपो न । मुष्टहत्ययेति । मुष्ट्या हननं मुष्टिहत्या 'हनस्त च' इति सुबन्ते उपपदे क्यप् । कृदुत्तरपदप्रकृतिस्वरोऽत्र प्राप्तः । त्रिचक्र इति । बहुव्रीहित्वात्पूर्वपदप्रकृतिस्वरः प्राप्तः । विश्वायुरिति । विश्वमायुर्यस्मिन्निति बहुव्रीहिः । विश्वशब्दः कनप्रत्ययान्तः पूर्वपदप्रकृतिस्वरेणाद्युदात्तः प्राप्तः । इति सुबोधिन्यां समासस्वरप्रकरणम् ।

तिङो । पचति गोत्रमिति । गोत्रं स्वकुलं पीडयतीत्यर्थः । एवं हि कुत्सा भवति । आभीक्ष्ण्ये उदाहरणमाह—पचतिपचति गोत्रमिति । अनेकार्थत्वात्पचिः करोत्यर्थे वर्तते । विवाहादौ गोत्रं पुनः पुनः सुखीकरोतीत्यर्थः । 'नित्यवीप्सयोः' इति द्वित्वम् । ननु किं कुत्सनाभीक्ष्ण्यग्रहणं गोत्रादीनां पाठविशेषणम्, एतयोरर्थयोर्गोत्रादीनि भवन्ति । तानि च तिङः पराण्यनुदात्तानि भवन्ति, आहोस्विदनुदात्तविशेषणं तिङः परानि गोत्रादीन्यनुदात्तानि भवन्त्येतयोरर्थयोरिति । अस्मिन्विचारे निर्णयमाह—कुत्सनाभीक्ष्ण्यग्रहणमिति । अयं चाऽर्थो योगविभागाल्लभ्यते । तिङो गोत्रादीनीत्येको योगोऽनुदात्तविधानार्थः । कुत्सनाभीक्ष्ण्ययोरिति द्वितीयो योगो गोत्रादीनीत्येव । परिभाषेयम् । इह शास्त्रे गोत्रादीनि कुत्सनाभीक्ष्ण्यविषयाण्येव प्राह्याणि तेन किं सिद्धं भवतीत्यत आह—तेनेति । अन्यत्रापीति । 'चनचिदिवगोत्रादितद्धिताम्रेडितेष्वगतेः' इत्यत्र । पचति पापमिति । 'पाप'मिति क्रियाविशेषणम् । खनति गोत्रम् समेत्यकू-

१।२६॥ लुङन्तं न निहन्यते। श्वःकर्ता। श्वःकर्तारौ। ३६३७ **निपातैर्यद्यदिहन्तकुविन्नेच्चेच्चण्कच्चिद्यत्रयुक्तम्** ८।१।३०॥ एतैर्निपातैर्युक्तं न निहन्यते। यदग्ने स्यामहं त्वम्। युवा यद्दीकृथः। कुविदङ्ग आसन्। आचेत्तिभिष्वकृमा कच्चित्। पुत्रासो यत्र पितरो भवन्ति। ३६३८ **नह प्रत्यारम्भे** ८।१।३१॥ नहेत्यनेन युक्तं तिङन्तं नानुदात्तम्। प्रतिषेधयुक्त आरम्भः प्रत्यारम्भः। नह भोक्ष्यसे। प्रत्यारम्भे किम्। नह वै तस्मिंल्लोके दक्षिणमिच्छन्ति।

र्थमिति। **गोत्रं कुलं समुदितं भूत्वा कूपं खनतीत्यर्थः**। तिङः। **'अनुदात्तं सर्वमिति** वर्तते। **तदाह**—'नहन्यत इति। **'सर्वानुदात्तो निघात' इति वैयाकरणानां व्यवहारः। अतिङ इतिकिम्। पचति भवति। एककर्तृका पचिक्रिया भवतीत्यर्थः। नन्वतिङ्ग्रहणं व्यर्थं 'समानवाक्ये निघातयुष्मदस्मदादेशाः' इत्युक्तत्वात्। एकस्मिंश्च वाक्ये तिङन्तद्वयाऽभावादिति चेत्सत्यम्। सूत्रकारेण समानवाक्याधिकारो न कृत इत्यतिङ्ग्रहणमकारि। भाष्ये तु अतिङ्ग्रहणं प्रत्याख्यातम्। न लुट्। इत आरभ्य निषेधसूत्राणि।** श्वःकर्ता। श्वःकर्तारौ इति। **तासेः परस्य लसार्वधातुकस्याऽनुदात्तत्वे कृते तासिरुदात्तः। एकवचने टिलोपे कृते उदात्तनिवृत्तिस्वरेण डा उदात्तो निपातैः। यद्दिष्टादीनां यत्रेत्यन्तानां द्वन्द्वे तृतीयायाःसौत्रो लुक्, न तु युक्तशब्देनसमासः। निपातैरितिविशेषणस्याऽनन्वयापत्तेस्तदाह**—एतैर्निपातैरिति। **यद् यदि हन्त कुवित् नेत्-चेत् चण् कच्चित् यत्र एतैरित्यर्थः। 'यद्यदौ च हेतौ च विचारे यदि चेच्चणः। हन्त हर्षेऽनुकम्पायां वाक्यारम्भविषादयोः। कच्चित्प्रश्ने नेत् निषेधे प्रशंसायां कुवित्स्मृतम्। यत्रेत्याधारे तत्र मूले कुविद्बहुदाहृतः'। अन्येऽप्यूह्याः। तत्रग्रहणं साक्षात्संबन्धप्रतिपादनार्थम्।** यदग्ने स्यामिति। **अस्तेर्लिङि अम्। चकृमा कच्चिदिति। चकृमेति लिट्। प्रत्ययस्वरेणाऽन्तोदात्तम्। कच्चिदयं निपातसमुदायः। पदकाले कत् चिदिति विच्छिद्य पाठात्। निपातैः किम्। यत्कूजति शकटम्। एतीति यत्। इणः शतरि रूम् 'इणो यण्' इति यण्। ननु प्रतिदोक्तत्वात् यदादिभिः साहचर्याच्च निपातस्यैव यच्छब्दस्य ग्रहणं स्यादिति चेत्सत्यम्। एतदेव ज्ञापयति अस्मिन्प्रकरणे नेदमुभयं व्यवस्थापकमिति। तेन 'यावद्यथाभ्याम्' इत्यत्र 'यत्तदेतेभ्यः परिमाणे वतुप्' इति व्युत्पादितस्याऽपि लाक्षणिकस्यनिपातस्यापि ग्रहणं भवति। 'यावत् स्तोतृभ्योऽरदो गृणानाः' इति। अक्षाऽरद इत्यट्स्वरेणाद्युदात्तम्। युक्तग्रहणं किम्। अन्यान्विते मा भूत्। 'यत्र क च ते मनो यच्चं दधत उत्तरम्' इह यत्रेत्यस्योत्तरमित्यनेन साक्षात्सम्बन्धः। दध धारणे। अनुदात्तेत्। नह प्रत्या। नहशब्दो निपातसमुदायो निषेधे वर्तते। नह भोक्ष्यस इति। अनुपदेशात्परस्मैपदात्स इत्यस्य निघातः। स्य-प्रत्ययस्वरेण मध्योदात्तं पदम्। पूर्वं भुङ्क्षवेत्युक्ते पुनः क्रोधेनोपहासेन वा पुनः पुनः**

३९३९ **सत्यं प्रश्ने** ८।१।३२॥ सत्ययुक्तं तिङन्तं नानुदात्तं प्रश्ने। सत्यं भोक्ष्यसे। प्रश्ने किम्। सत्यमिद्धा उ तं वयमिन्द्रं स्तवाम। ३९४० **अङ्गात्प्रातिलोम्ये** ८।१।३३॥ अङ्गेत्यनेन युक्तं तिङन्तं नानुदात्तम्। अङ्ग कुरु। अप्रातिलोम्ये किम्। अङ्ग कूजसि वृषल। इदानीं शास्यसि जाल्म। अनभिप्रेतमसौ कुर्वन्प्रतिलोमो भवति। ३९४१ **हि च** ८।१।३४॥ हियुक्तं तिङन्तं नानुदात्तम्। आ हि ष्मा याति। आहि रुहन्तम्। ३९४२ **छन्दस्यनेकमपि साकाङ्क्षम्** ८।१।३५॥ हीत्यनेन युक्तं साकाङ्क्षमनेकमपि नाऽनुदात्तम्। अनृतं हि मत्तो वदति पाप्मा चैनं युनाति। तिङन्तद्वयमपि न निहन्यते। ३९४३ **यावद्यथाभ्याम्** ८।१।३६॥ आभ्यां युक्तं तिङन्तं नाऽनुदात्तम्। यथा चित्कण्वमावतम्। ३९४४ **पूजायां नानन्तरम्** ८।१।३७॥ यावद्यथाभ्यां युक्तमनन्तरं तिङन्तं पूजायां नाऽ-

---

प्रतिषेध उक्ते पृच्छति भोजनं करिष्यति स एवमुच्यते। नव वै तस्मिन्नति। तस्मिन् शब्दः फिट्स्वरेणाद्युदात्तः। लोकशब्दः पचाद्यजन्तत्वादन्तोदात्तः। दक्षिणशब्दः 'स्वाङ्गशिष्टामदन्तानाम्' इति शिटत्वादादूयुदात्तः। सत्यं भोक्ष्यस इति। इदं मध्योदात्तम्। अङ्ग। प्रातिलोम्यं प्रतिकूलकारित्वं ततोऽन्यदभिमतकारित्वमप्रातिलोम्यम्। एवं चानुलोम्य इति वक्तव्यम्। अङ्गशब्द उदाहरणेऽनुज्ञायां प्रत्युदाहरणे त्वमर्थे। अङ्ग कुर्विति। करोतेर्लोण्मध्यमपुरुषैकवचनं सिप् तस्य 'सेर्ह्यपिच्च' इति हिरादेशः। 'तनादिकृञभ्य उः' सार्वधातुक इति करोतेर्गुणः। 'अत उत्सार्वधातुके' इत्युत्वम् 'उतश्च प्रत्ययादसंयोगपूर्वात्' इति हेर्लुक्। कुर्वित्युप्रत्ययस्वरेणान्तोदात्तम्। हि च। अत्राप्यप्रातिलोम्य इति सम्बध्यते। आ हि ष्मेति। ष्मशब्दो निपातोऽपि चादित्वादनुदात्तः दीर्घत्वं च छान्दसम्। प्रातिलोम्ये तु, हि कूज वृषल। उदाहरणे हिशब्दोऽवधारणे हेतौ वा। स च प्रत्युदाहरणे त्वमर्थं। छन्दस्य। अनेकमपीति। अपिशब्दादेकम्। तत्राऽनेकमुदाहरति—अनृतं हीति। हियंत इत्यर्थं। यस्माद्यं मत्तोऽनृतं वदति ततः पाप्मा। पापमेनं युनाति अनृतवदनदोषेण युज्यत इति तात्पर्यार्थः। एकस्योदाहरणम्। अग्निर्हि पूर्वमुदजयत्तस्मिन्द्रोऽनुदजयत्। अत्र एकमजयदित्याद्युदात्तम्। परं निहतम्। अत्र हेतुहेतुमद्भावस्य द्योतको हिरित्यनेकमपि तिङन्तं हियुक्तं भवति। अत्र पूर्वेण सर्वस्य निघातप्रतिषेधे प्राप्ते क्वचिदनेकस्य क्वचिदेकस्य यथान्यायमिति वचनम्। तत्र छन्दसि दृष्टानुविधानाद्यथाप्रयोगं व्यवस्था। यावद्यथा। इयं तृतीया न पञ्चमीत्याह-भ्यां युक्तमिति। तेन परभूतयोरपि भवति देवदत्तः पचति यावदिति। यावच्छब्दो निपातश्चाऽनिपातश्च गृह्यते 'निपातैर्यद्यदि' इत्यत्र ज्ञापितत्वात्। आद्यः साकल्ये, द्वितीयः परिमाणोपाधिको वतुप्रत्ययान्तः। यथाशब्दो योग्यतादिषु। आवत्तमिति। अवतेर्लोण्मध्यमपुरुषद्विवचनम्। यावच्छब्दो-

नुदात्तम्। यावत्पचति शोभनम्। यथा पचति शोभनम्। पूजायां किम्। यावद्भुङ्क्ते। अनन्तरं किम्। यावद्देवदत्तः पचति शोभनम्। पूर्वेणाऽत्र निघातः प्रतिषिध्यते। ३९४५ **उपसर्गव्यपेतं च** ८।१।३८॥ पूर्वेणाऽनन्तरमित्युक्तम्। उपसर्गव्यवधानार्थं वचनम्। यावत्प्रपचति शोभनम्। अनन्तरमित्येव। यावद्देवदत्तः प्रपचति शोभनम्। ३९४६ **तुपश्यपश्यताऽहैः पूजायाम्** ८।१।३९॥ एभिर्युक्तं तिङन्तं न निहन्यते पूजायाम्। आदह स्वधामनु पुनर्गर्भत्वमेरिरे। ३९४७ **अहो च** ८।१।४०॥ एतद्योगे नाऽनुदात्तं पूजायाम्। अहो देवदत्तः पचति शोभनम्। ३९४८ **शेषे विभाषा** ८।१।४१॥ अहो इत्यनेन युक्तं तिङन्तं वाऽनुदात्तं पूजायाम्। अहो कटं करिष्यति। ३९४९ **पुरा च परीप्सायाम्** ८।१।४२॥ पुरेत्यनेन युक्तं वाऽनुदात्तं त्वरायाम्। अधीष्व माणवक पुरा विद्योतते विद्युत्। निकटाऽऽगामिन्यत्र पुराशब्दः। परीप्सायां किम्। न तेन

दाहरणं तु यावद् भुङ्क्ते देवदत्तः। पचति यावदिति। 'यावत्तोतृभ्योऽरहो गृणानाः' इति। रद विलेखने लङि सिपि अट् अट्स्वरेणाद्युदात्तः। पूजायां। नानुदात्तमिति। अनुदात्त एव भवतीत्यर्थः। यावद्देवदत्त इति। पूर्वेणाऽत्र निघातप्रतिषेधो व्यवाये यदि भवति उपसर्गेणेति नियमाद्यत्राऽतिप्रसङ्गाभावेऽनन्तरग्रहणं शक्यमकर्तुम्। उपसर्ग। यावद्यथाभ्यां युक्तमनन्तरमुपसर्गेण व्यवहितम् तिङन्तं पूजायां विषये नाऽनुदात्तं स्यात्। अनन्तरमित्येवेति। तङ्चानन्तर्यं सोपसर्गस्य न तिङन्तमात्रस्य। प्रपचतीति। प्रशब्द आद्युदात्तः। तुपश्य। तुप्रभृतीनि पूजाविषयाणि। उदाहरणानि तु माणवको भुङ्क्ते, पश्य माणवको भुङ्क्ते। माणवकस्तु भुङ्क्त इति आश्चर्ये तुशब्द इति भोजनस्य पूजा गम्यते। एवमन्यत्रापि। पूजायां किम्। पश्य मृगो धावति। तत्रकथनमेतत्। ननु 'पूजायां नानन्तरम्' इत्यतः पूजायामिति वर्तमाने पूजाग्रहणं व्यर्थमिति चेन्मैवम्। पूजाग्रहणं निघातप्रतिषेधार्थम्। तद्धि पूजाग्रहणं प्रतिषेधस्य प्रतिषेधेन सम्बद्धम्। ततश्च तदनुवृत्ताविहापि न लुडित्यादिके विषये प्रतिषेधस्य प्रतिषेधः स्यात्, मा भूदेवं निघातस्यैव यथा स्यादित्येवं पूजाग्रहणम्। किं वाऽनन्तरमित्येवं तद्भूत इह स्वविशेषेणेष्यते। अहो च। अहो देवदत्तः पचति शोभनमित्युदाहरणम्। पृथग्योगकरणमुत्तरार्थम्। उत्तरो अहोयोग एव यथा स्यात्तुप्रभृतिभिर्योगे मा भूदिति। शेषे। पूर्वं पूजायामित्युक्तस्यातोऽन्यः शेष इत्याह—पूजायामिति। अहो कटं करिष्यतीति। पक्षेऽस्य प्रत्ययस्वरः। अनाश्चर्यभूतमेव वस्तु असूयया आश्चर्यवत्प्रतिपाद्यते, न पूजा। शेषग्रहणं स्पष्टार्थम्। योगविभागसामर्थ्यादिति। 'यावत्पुरा—' इति भविष्यति लट्। विद्योतनादावध्ययनं धर्मशास्त्रप्रतिषिद्धम्। अतस्तदुपन्यासेन त्वरितमधीष्वेति गम्यते। पक्षे द्योतत इति धातुस्वरेणाद्युदात्तम्। 'तास्यनुदात्त—' इति

स्म पुराऽधीयते। चिरातीतेऽत्र पुरा। ३९५० **नन्वित्यनुज्ञैषणायाम्** ८।१।४३॥ नन्वित्यनेन युक्तं तिङन्तं नाऽनुदात्तमनुज्ञाप्रार्थनायाम्। ननु गच्छामि भोः। अनुजानीहि मां गच्छन्तमित्यर्थः। अन्विति किम्। अकार्षीः कटं त्वम्। ननु करोमि। पृष्टप्रतिवचनमेतत्। ३९५१ **किं क्रियाप्रश्नेऽनुपसर्गमप्रतिषिद्धम्** ८।१।४४॥ क्रियाप्रश्ने वर्तमानेन किंशब्देन युक्तं तिङन्तं नानुदात्तम्। किं द्विजः पचत्याहोस्विद्गच्छति। क्रियेति किम्। साधनप्रश्ने मा भूत्। किं भक्तं पचत्यपूपान्वा। प्रश्ने किम्। किं पठति। क्षेपेऽयम्। अनुपसर्गं किम्। किं प्रपचति उत प्रकरोति। अप्रतिषिद्धं किम्। किं द्विजो न पचति। ३९५२ **लोपे विभाषा** ८।१।४५॥ किमोऽप्रयोगे उक्तं वा। देवदत्तः पचत्याहोस्विदपठति। ३९५३ **एहि मन्ये प्रहासे लृट्** ८।१।४६॥ एहि मन्ये इत्यनेन युक्तं लृङन्तं नानुदात्तं क्रीडायाम्। एहि मन्ये भक्तं भोक्ष्यसे, भुक्तं तत्वतिथिभिः। प्रहासे किम्। एहिमन्यसे ओदनं

लसावंधातुकनिघातः। न तेन स्म पुराऽधीयत इति। 'लट् स्मे' इति भूते लट्। अत्र भूतस्याध्ययनस्य चिरकालप्रवृत्तत्वं गम्यते न स्वरा। नन्वि। किञ्छिक्तुं स्वयमेवोऽयतस्य 'एवं क्रियता'मित्यभ्युपगमोऽनुज्ञा। तस्याः एषणा प्रार्थनाऽनुज्ञैषणा। अनुज्ञाप्रार्थनेत्यर्थः। तदाह—अनुज्ञाप्रार्थनायामिति। उदाहरणे वर्तमानसामीप्ये लट्। प्रत्युदाहरणे 'ननौ पृष्टप्रतिवचने' इति भूते लट्। अन्विति किमिति। अनुज्ञैषणायामिति किमित्यर्थः। 'अङ्गाऽऽप्रातिलोम्ये' इत्यादिवदितिकरणं विनापि सिद्धे एकनिपातोऽयमिति प्रदर्शनार्थमितिशब्दः। अन्यथा द्वयोर्निपातयोर्ग्रहणं सम्भाव्येत। किं क्रिया। अप्रतिषिद्धमिति। अप्रतिषिद्धार्थमित्यर्थः। किं द्विजः पचति आहोस्विद्गच्छतीति। आहोस्विदेको निपात आद्युदात्तः। अत्र केचित् पूर्वं क्रियुक्तं तत्र निहन्यते उत्तरं तु न क्रियुक्तमिति। निहन्यत एवेति। अन्ये तु यद्यप्येकस्याख्यातस्य समीपे किंशब्दः श्रूयते, तथापि सर्वस्य संशयविषयस्य तेन योग इति उभयत्रापि निषेधेन भाव्यमिति। अत्र हरदत्तः—ये त्वाहुः पूर्वं क्रियुक्तमिति, ते मन्यते—'अस्तु द्वयोः संशयविषयत्वं किंशब्देन तु श्रुतक्रियाविषय एव प्रश्नो द्योत्यते क्रियान्तरविषयस्तु प्रश्नः 'आहोस्वि'दित्यनेन। क्रियाप्रश्न इति चोच्यते। तस्मात्तस्यैव निघातप्रतिषेध इति। प्रश्ने किम्। किं देवदत्तः पठति। क्षेपे किंशब्दः। क्वचित्पुस्तके 'किमधीयत' इति प्रत्युदाहरणं दृश्यते, तच्चादर्तव्यं लोपसृष्टत्वात्। लोपे। 'किंक्रियाप्रश्न-' इति सूत्रमनुवर्तते। तथा चायमर्थः—क्रियाप्रश्ने यः किंशब्दः तस्य लोपः तदर्थेन युक्तमनुपसर्गमप्रतिषिद्धं च तिङन्तं नाऽनुदात्तं स्यात्। सूत्रेण किमो लोपस्याऽविधानादर्थप्रकरणादिना गम्यमानार्थत्वादप्रयोग एव लोपो विवक्षितः,। देवदत्तः पचति। आहोस्विदपठतीति। अत्र पक्षे निघातः। पक्षे धातुस्वरेणाद्युदात्तता। किंशब्दाऽप्रयोगाद्-

भोक्ष्ये इति सुष्ठु मन्यसे। 'गत्यर्थलोटा लृट्' (सू ३९५८) इत्यनेनैव सिद्धे नियमार्थोऽयमारम्भः। 'एहि मन्ये युक्ते प्रहास एव नान्यत्र'। एहि मन्यसे ओदनं भोक्ष्ये। **३९५४ जात्वपूर्वम्** ८।१।४७॥ अविद्यमानपूर्वं यजातु तेन युक्तं नाऽनुदात्तम्। जातु भोक्ष्यसे। अपूर्वं किम्। कटं जातु करिष्यसि। **३९५५ किंवृत्तं च चिदुत्तरम्** ८।१।४८॥ अविद्यमानपूर्वं चिदुत्तरं यत्किंवृत्तं तेन युक्तं तिङन्तं नाऽनुदात्तम्। विभक्त्यन्तं डतरडतमान्तं किमो रूपं किंवृत्तम्। कश्चिद्भुङ्क्ते। कतरश्चित्। कतमश्चिद्वा। चिदुत्तरं किम्। को भुङ्क्ते। अपूर्वमित्येव। रामः किंचित्पठति। **३९५६ आहो उताहो चाऽनन्तरम्** ८।१।४९॥आहो उताहो इत्याभ्यां युक्तं तिङन्तं नाऽनुदात्तम्। आहो उताहो वा भुङ्क्ते। अनन्तरमित्येव। शेषे विभा-

---

प्राप्तविभाषेयम्। यद्वा तस्याऽप्रयोगेऽपि अर्थेन योगात्प्राप्तविभाषा पूर्वसूत्रस्थानि प्रत्युदाहरणानि किंशब्दं स्यक्त्वात्र योजनीयानि। एहि। एहि मन्य इत्यनेन युक्तमिति। समुदायाभिप्रायमेकवचनम्। अन्यथा आख्याते द्वे, आङ्चापर इति बहुवचनप्रसङ्गः। एहि मन्ये भक्तं भोक्ष्यस इति। मन्यसे भोक्षये इत्यर्थं 'प्रहासे च मन्योपपदे-' इत्यादिना मन्ये भोक्ष्यस इति पुरुषव्यत्ययः। इदं च वृत्तिकारमतरीत्या प्रत्युदाहरणम्। तन्मते उत्तमापोदानं स्यात्तन्त्रत्वात्। भाष्ये तु 'एहि मन्ये रथेन यास्यसी'ति प्रत्युदाहृतम्। तत्रायमर्थः-त्वं रथेन यास्यसीत्यहं मन्य एहीति। गत्यर्थलोटा लृडित्यनेनैव सिद्ध इति। आङ्पूर्वादिणो लोट् सिपो हिः। अत्र एहीत्यस्य गत्यर्थत्वाद् गत्यर्थलोटेति सिद्धमित्यर्थः। एहीत्यत्र आङः परत्वादिहीत्यत्र निघातः। मन्ये इति। मन ज्ञाने अनुदात्तेत्। श्यन्नन्तत्वादाद्युदात्तत्वम्। 'तास्यनुदात्तेत्—' इति अदुपदेशात्परत्वादिडनुदात्तः। जात्व। अपूर्वमित्येतज्जातुशब्दस्यैव विशेषणं न तिङन्तस्य। 'आहो उताहो' इति सूत्रे अनन्तरग्रहणाज्ज्ञापकात्। अन्यथा तत्राप्यपूर्वमित्यनुवृत्तेरेव केवलतिङन्तस्याऽऽनन्तर्यं लभ्यते इति किं तेन। नन्वु शेषे विभाषा वक्ष्यति। तत्र शेषप्रकृल्पत्यर्थं तत्स्यात्, शेषे विभाषा, कश्च शेषः? सान्तरं शेष इति अन्तरेणाप्यनन्तरग्रहणं प्रकृल्पः शेषः कथम्। अपूर्वमिति प्रकृतं सपूर्वः शेष इति तदेतत्सकलमभिप्रेत्याह-अविद्यमानपूर्वं यज्जातिति। जातु भोक्ष्यस इति। अदुपदेशात्परत्वात्से इत्यस्य निघातः। मध्योदात्तं पदम्। जातुशब्दो निपातत्वादाद्युदात्तः। कटं जातु करिष्यसीति कटशब्दः फिट्त्वादन्तोदात्तः। किंवृत्तम्। वृत्तमित्यधिकरणे क्तः। किमो वृत्तं किंवृत्तम्। 'अधिकरणवाचिनश्च' इति कर्तरि षष्ठी। 'अधिकरणवाचिना च' इति समासनिषेधे प्राप्तेऽस्मादेव निपातनात्समासः। इह 'जात्वपूर्वम्' इत्यतोऽपूर्वमिति वर्तते। तद्व्याचष्टे-अविद्यमानपूर्वमिति। यदि यत्र किंशब्दो वर्तते तत्सर्वं गृह्यते, तर्हि किमीयः किंतरामित्यादेरपि प्रसङ्गः स्यादिति मत्वा परिसञ्चष्टे-विभक्त्यन्तमि-

षां वक्ष्यति । अपूर्वेति किम् । देव आहो भुङ्क्ते । **३६५७ शेषे विभाषा ८।१।५०॥** आभ्यां युक्तं व्यवहितं तिङन्तं वाऽनुदात्तम् । आहो देवः पचति । **३६५८ गत्यर्थलोटा लृडन्न चेत्कारकं सर्वाऽन्यत् ८।१।५१॥** गत्यर्थानां लोटा युक्तं तिङन्तं नाऽनुदात्तं, यत्रैव कारके लोट् तत्रैव लृडपि चेत् । आगच्छ देव ग्रामं द्रक्ष्यस्येनम् । उद्यन्तां देवदत्तेन शालयो रामेण भोक्ष्यन्ते । गत्यर्थे किम् । पच देव ओदनं भोक्ष्यसेऽनम् । लोटा किम् । आगच्छेर्देव ग्रामं द्रक्ष्यस्येनम् । लृट् किम् । आगच्छ देव ग्रामं पश्यस्येनम् । न चेदिति किम् । आगच्छ देव ग्रामं, पिता ते ओदनं भोक्ष्यते । सर्वं किम् । 'आगच्छ देव ग्रामं त्वं चाहं च द्रक्ष्याव एन'मित्यत्रापि निघातनिषेधो यथा स्यात् । यल्लोडन्तस्य कारकं तच्चान्यच्च लृडन्तेनोच्यते । **३६५९ लोट च ८।१।५२॥** लोडन्तं गत्यर्थलोटा युक्तं नाऽनुदात्तम् । आगच्छ देव ग्रामं पश्य । गत्यर्थेति किम् । पच देवौदनं भुङ्क्वैनम् । लोट् किम् । आगच्छ देव ग्रामं पश्यसि । 'न चेत्कारकं सर्वान्य'दित्येव । आगच्छ देव ग्रामं, पश्यत्वेनं रामः । सर्वग्रहणात्त्विह स्यादेव । आगच्छ देव ग्रामं त्वं चाहं च पश्यावः । योगविभाग उत्तरार्थः । **३६६० विभाषितं सोपसर्गमनुत्त-**

त्यादि । शेषे वि । अनन्तरापेक्षं शेषत्वमित्याह-व्यवहितमिति । पचतीति । पक्षे धातुस्वरेणाद्युदात्तम् । गत्यर्थ । गतिरर्थो येषामिति विग्रह इत्यर्थः । लोटा युक्तमिति । योगः पुनरर्थद्वारको निमित्तनिमित्तीभावः । लोडन्तवाच्यं हि निमित्तं लृडन्तवाच्यस्य न चेत्कारकम् । सर्वान्यदित्यस्य व्याख्यानमाह—यत्रैव कारके लोडित्यादि । कर्तरि कर्मणि वा । आगच्छ देवदत्त ग्रामं द्रक्ष्यस्येनमिति । आङुपसर्गः गच्छदेवदत्तशब्दयोः पदात्परत्वान्निघातः । ग्रामशब्दो 'ग्रसेरा च' इति मन्नन्त आद्युदात्तः । द्रक्ष्यसीति । प्रत्ययस्वरेण मध्योदात्तम् । उद्यन्तां देवदत्तेन शालयो रामेण भोक्ष्यन्त इति । वहेः प्रापणार्थत्वेऽपि गतिर्गम्यत इति गत्यर्थत्वम् । उद्यन्तामित्यत्र देवदत्तरामयोः कर्त्रोर्भेदेऽपि लकारवाच्यस्य शालेः कर्मणः अभेदात् । आगच्छेरिति । लिङर्थे न लोट् । द्रक्ष्यसीति । वर्तमानसामीप्ये लट् । आगच्छ देव ग्रामं,पिता ते ओदनं भोक्ष्यत इति । कारकशब्देन सूत्रे कारकव्यक्तिरेवाश्रीयते, तेन कर्तृत्वाऽभेदेऽपि व्यक्तिभेदात्कारकभेदः । त्वं चाहं च द्रक्ष्याव एनमिति । अक्रियमाणे सर्वग्रहणे यत्र वाक्यं न भिद्यते तत्रैव भवितव्यमिह च भिद्यते वाक्यम् । एकत्रैकमन्यत्र द्वयमिति निघातप्रतिषेधो न स्यात्, क्रियमाणे तु सर्वग्रहणे लोड्वाक्यकारकापेक्षया लृड्वाक्यकारकाधिक्येऽपि निघातप्रतिषेधः सिद्धः । लोट् च । लोड्ग्रहणं विहाय 'गत्यर्थलोटा-' इति सम्पूर्णं सूत्रमनुवर्तते । तदाह—गत्यर्थेत्यादि । आगच्छेति । गत्यर्थलोटा युक्तं पश्येति न निहतं गच्छेति तु निहतमेव । योगवि-

मम् ८।१।५३॥ लोडन्तं गत्यर्थलोटा युक्तं तिङन्तं वाऽनुदात्तम् । आगच्छ देव ग्रामं प्रविश । सोपसर्गं किम् । आगच्छ देव ग्रामं पश्य । अनुत्तमं किम् । आगच्छानि देव ग्रामं प्रविशानि । ३९६१ हन्त च ८।१।५४॥ हन्तेत्यनेन युक्तमनुत्तमं लोडन्तं वाऽनुदात्तम् । हन्त प्रविश । सोपसर्गमित्येव । हन्त कुरु । 'निपातैर्यद्यदि' (सू ३९३७) इति निघातप्रतिषेधः । अनुत्तमं किम् । हन्त प्रभुञ्जावहै । ३९६२ आम एकान्तरमामन्त्रितमनन्तिके ८।१।५५॥ आमः परमेकपदान्तरितमामन्त्रितं नानुदात्तम् । आम् पचसि देवदत्त ३ । एकान्तरं किम् । आम् प्रपचसि देवदत्त ३ । आमन्त्रितं किम् । आम् पचति देवदत्तः । अनन्तिके किम् । आम् पचसि देवदत्त । ३९६३ यद्धितुपरं छन्दसि ८।१।५६॥ तिङन्तं नाऽनुदात्तम् । उदसृजो यदङ्गिरः । उशन्ति हि । आख्यास्यामि तु ते । 'निपातैर्यत्' (सू ३९३७) इति 'हि च' (सू ३९४१)

भाग उत्तरार्ध इति । उत्तरो विकल्पो लोट एव यथा स्यात्, लुटो मा भूद् इति । विभाषितम् । पूर्वसूत्रं सर्वमनुवर्तते । प्राग्विभाषा चेयम् । गत्यर्थलोटा युक्तं लोडन्तं सोपसर्गमुत्तमभिन्नं विभाषानुदात्तं स्यात् न चेत्कारकं सर्वान्यत् । सोपसर्गमिति । उपसर्गेण सह । उपसर्गं विद्यमान इत्यर्थः । सहशब्दो विद्यमानार्थो, न तुल्ययोगे, । न चोपसर्गस्य निघातप्रसङ्गोऽस्ति । आगच्छ देव ग्रामं प्रविशेति । अत्र विशेति पक्षे निहतं, पक्षे शप्रत्ययस्वरेणाऽन्तोदात्तम् । यदाऽन्तोदात्तं तदा 'तिङि चोदात्तवति-' इति गतेर्निघातः । पश्य । प्रविशानीति । उभयत्रापि पूर्वेण नित्यमेव निघातः । प्रत्युदाहरणानि पूर्वसूत्रोक्तान्येव प्रशब्दपूर्णानि योज्यानि । हन्त च । पूर्वसूत्रमनुवर्तते लोट्ग्रहणं च । तदाह-हन्तेत्यनेनेत्यादि । प्राग्विभाषेयम् । 'निपातैर्यद्यदि-' इति निघातनिषेधस्य सिद्धत्वात् । प्रभुञ्जावहै इति । भुजोर्लोट् 'भुञोऽनवने' इत्यात्मनेपदं बहिः टेरेत्वं इनम् । 'आदुत्तमस्य पिच्च' 'एत ऐ' अनुदात्तेत्त्वाल्लसार्वधातुकानुदात्तत्वम् । विकरणस्वरः । आमः । अन्तरयतीत्यन्तरं व्यवधायकम् । एकमन्तरं यस्य तदेकान्तरम् । उदाहरणे निघाते प्रतिषिद्धे चाऽऽमाद्यनुदात्तत्वम् । अनन्तिक इति किमिति । अत्र केचिदनन्तिकं दूरं तस्यैव सामर्थ्यादेकश्रुतेर्निघातस्य च प्रतिषेधः । यदि निघातमात्रनिषेधोऽयं तदा निघातस्यैकश्रुत्या बाधितत्वादिदं सूत्रं व्यर्थं स्यादिति सामर्थ्यादेव चैतन्निषेधं प्रति एकश्रुतेरसिद्धत्वाऽभावः । प्लुतोदात्तस्तु न प्रतिषिध्यत इत्याहुः । अपरे तु अनन्तिक इत्यनेन यन्न दूरं न च संनिकृष्टं तदुच्यते न दूरमेव । अन्यथा दूरमित्येव वदेत् । तेनाऽस्मिन्नेकश्रुतेः प्राप्तिरेव नास्ति अदूरत्वात्प्लुतोदात्तोऽपि नोदाहर्तव्य इति । यदि तु । उदसृज इति । तुदादेः सृजेर्लङि सिप्यट् । उशन्ति हीति । वश कान्तौ । अदादिः । लटि 'झोऽन्तः' । अद्यादित्वात्सःप्रसारणम् ।

इति 'तु पश्य' (सू० ३९४६) इति च सिद्धे नियमार्थमिदम् । 'एतैरेव परभूतैर्योगे नान्यै'रिति । जाये स्वारोहावैहि । एहीति गत्यर्थलोटा युक्तस्य लोङन्तस्य निघातो भवति । **३९६४ चनचिदिवगोत्रादितद्धिताम्रेडितेष्वगतेः** ८।१।५७॥ एषु षट्सु परतस्तिङन्तं नाऽनुदात्तम् । देवः पचति चन । देवः पचति चित् । देवः पचतीव । देवः पचति गोत्रम् । देवः पचतिकल्पम् । देवः पचतिपचति । अगतेः किम् । देवः प्रपचति चन । **३९६५ चाद्विषु च** ८।१।५८॥ चवाहाऽहैवेषु परेषु तिङन्तं नाऽनुदात्तम् । देवः पचति च खादति च । अगतेरित्येव । देवः प्रपचति च प्रखादति च । प्रथमस्य 'चवायोगे' (सू ३९६६) इति निघातः प्रतिषिध्यते । द्वितीयं तु निहन्यत एव । **३९६६ चवायोगे प्रथमा** ८।१।५९॥ चवेत्याभ्यां योगे प्रथमा तिङ्विभक्तिर्नानुदात्ता । गाश्च चारयति वीणां वा वादयति । इतो वा सातिमीमंहे । उत्तरवाक्ययोरनुषङ्गनीयतिङन्तापेक्षयेयं प्राथमिकी । योगे किम् । पूर्वभूतयोरपि योगे निघातार्थम् । प्रथमाग्रहणं द्वितीयादेस्तिङन्तस्य मा भूत् । **३९६७ हेतिक्षियायाम्** ८।१।६०॥ हयुक्ता प्रथमा तिङ्विभक्तिर्नाऽनुदात्ता धर्मव्यतिक्रमे । स्वयं ह रथेन

नान्यैरिति । यद्यदिहन्तेत्यादिभिरित्यर्थः । जाये स्वारोहावैहीति । **रहेर्लोट् । वस् शप् । 'आडुत्तमस्य पिच्च' 'लोटो लङ्वत्' इति लङ्वद्भावात् 'नित्यं ङितः' इति सलोपः । आ पूर्वादियो लोट् । सिपो हिः । एहि । तेन परभूतेन युक्तस्य रोहावेत्यस्य 'लोट् च' इति प्राप्तो निघातप्रतिषेधो नियमाश्रियते । तेन स्वशब्दाश्रयो निघातो बोध्यः । स्वाशब्दे 'रो रि' इति लोपः 'ढ्रलोपे-' इति दीर्घः । स्वो रोहावेति पाठे तु छान्दसत्वादुत्वम् । चनचि । एष्वित । चन चित् इव गोत्रादि तद्धित आम्रेडित एष्वित्वर्थः । इहापि गोत्रादयः कृत्स्नताभीक्ष्ण्ययोरेव गृह्यन्त इति तिङो गोत्रादीत्यत्रैवोक्तम् । पचतिकल्पमिति । तत्राऽनुदात्त एव तद्धितो ग्राह्यः । अन्यत्र तद्धितस्वरेण तिङन्तस्वरो बाध्यते । अयं पचतिदेवयः । चाद्विषु च । 'न चवाहाहैवयुक्ते' इति सूत्रे निर्दिष्टाश्चादयोऽत्र गृह्यन्ते संनिकृष्टत्वात्, न तु 'चादयोऽसत्त्वे' इति सूत्रनिर्दिष्टाः विप्रकृष्टत्वात् । तदेतदाह-चवाहाहैवेषु परेष्विति । पचति च खादति चेति । देवः पचति वा खादति वेति । उभयत्र खादतीत्यस्य निघातप्रसङ्ग एव नास्ति नानावाक्यत्वात् । चवायोगो हि समुच्चये विकल्पे वा सति भवति, स चाऽनेकस्य धर्म इति कृत्वोदाहृतम् । चवा । प्रथमेति । स्त्रीलिङ्गस्य निर्वाहमाह-प्रथमा तिङ्विभक्तिरिति । प्रथमसूत्रारिता तिङ्विभक्तिरित्यर्थः । अगतेरिति प्रथमसूत्रे चानुकृष्टत्वादिह नानुवर्तते । उत्तरवाक्ययोरिति । 'दिवो वा पार्थिवादधि' । 'इन्द्रं महो वा रजसः' इत्येतयोरित्यर्थः । ननु अतस्यैव तिङन्तस्योत्तरत्राऽनुषङ्गः तत्कथं प्राथम्यमिति चेत्, अनुषक्तस्याप्योपाधिकं भेदं पुरस्कृत्य प्राथम्याश्रयणेन निघातनिषेधस्य छन्दसि बहुशो दृष्टत्वात् । एतच्चेहैव मन्त्रे

याति ३। उपाध्यायं पदाति गमयति ३। 'क्षियाशीः' (सू.३६२३) इति प्लुतः। **३९६८ अहेति विनियोगे च** ८।१।६१॥अहयुक्ता प्रथमा तिङ्विभक्तिर्नानुदात्ता, नानाप्रयोगे नियोगे क्षियायां च। त्वमह ग्रामं गच्छ। क्षियायाम्। स्वयमह रथेन याति ३। उपाध्यायं पदातिं नयति। **३९६९ चाऽहलोप एवेत्यवधारणम् ८।१।६२॥** च अह एतयोर्लोपे प्रथमा तिङ्विभक्तिर्नानुदात्ता। देव एव ग्रामं गच्छतु। देव एवारण्यं गच्छतु। ग्राममरण्यं च गच्छत्वित्यर्थः। देव एव ग्रामं गच्छतु। राम एवारण्यं गच्छतु। ग्रामं केवलमरण्यं केवलं गच्छत्वित्यर्थः। इहाऽहलोपः। स च केवलार्थः। अवधारणं किम। देव क्रेव भोक्ष्यसे। 'न क्वचि-दित्यर्थः। अनवक्लृप्तावेव। **३९७० चादिलोपे विभाषा ८।१।६३॥** चवा-हाऽहैवानां लोपे प्रथमा तिङ्विभक्तिर्नानुदात्ता। चलोपे। इन्द्र वाजेषु नोऽव। शुक्रा व्रीहयो भवन्ति। श्वेता गा आज्याय दुहन्ति। वालोपे। व्रीहिभिर्यजेत। यवैर्यजेत। **३९७१ वैवावेति च छन्दसि ८।१।६४॥** अहर्वै देवानामासीत्। अयं वाव हस्त आसीत्। **३९७२ एकान्याभ्यां समर्थाभ्याम् ८।१।६५॥** आभ्यां युक्ता प्रथमा तिङ्विभक्तिर्नानुदात्ता छन्दसि। अजामेकां जिन्वति। अजा-

---

नियेन मुष्टिहत्यायेति च मन्त्रे वेदभाष्ये स्पष्टम्। इति। स्वयं ह रथेन यातीति। **उपा-ध्यायं पदातौ गच्छति सति शिष्यस्य रथेन गमनं प्रतिषिद्धमित्याचारभेदः।** अहेति। **अनेकस्मिन्प्रयोजने प्रेषणं विनियोगः। तदाह**—नानाप्रयोजने नियोगे इति। **अनेकप्रयोजनो नियोगः प्रेषणम्। उदाहरणे पूर्वत्र प्रेषे प्लुतः, उत्तरत्र क्षियायाम्।** चाहलोपे। **अवधार-णार्थैवशब्दप्रयोगे सति प्रथम तिङन्तं नानुदात्तम्। सूत्रेण चाहलोपस्याविधानाद् अर्थप्रकरणादिना गम्यमानार्थत्वादप्रयोग एव लोपो विवक्षितः। वशब्दः समुच्चयार्थः। अहशब्दः केवलार्थः। समानकर्तृके चलोपः। नानाकर्तृकेऽहलोपः। उदाहरणे चलोपं दर्शयति**—ग्राममरण्यं चेति। क्वेव भोक्ष्यस इति। **अनवक्लृप्तावयमेवशब्दः। 'एवे चानि-योगे' इति परूपम्।** चादि। वाजेष्विति। **अत्रेति तिङन्तस्येह निपातः। निपातऽ-भावस्य तूदाहरणान्तरं मृग्यम्। ननु पूर्वसूत्रे समानकर्तृके चलोप इत्युक्तम्। इह तु कर्तृभेदात कथं चलोप इति चेत्। अवधारणार्थं एवशब्दप्रयोगे समानकर्तृके चलोप इति नियमोः न तु सर्वत्रेत्यस्यत्र चलोपः।** व्रीहिभिर्यजेतेति। **पक्षे निहतं पक्षे आद्युदात्तम्। द्वितीयं तु निहतमेव। एवं शेषेष्वपि यथादर्शनमुदाहरणम्।** वैवाव। **आभ्यां युक्तं प्रथमं तिङन्तमनुदात्तं वा स्यात् छन्दसि। वै स्फुटार्थं चमार्थं च। वाव प्रसिद्धौ स्फु-टार्थे च।** एकान्या। **समौ तुल्यावर्थौ ययोस्तौ समर्थौ। शकन्ध्वादित्वात्परूपम्।** जिन्वतीति। **जिविः प्रीणनार्थः। इदित्त्वान्नुम्। झटू तिप् झप्।** अजामेकां रक्षतीति।

मेकां रक्षति । तयोरन्यः पिप्पलं स्वाद्वत्ति । समर्थाभ्यां किम् । एको देवानुपातिष्ठत् । एक इति संख्यापरं नान्यार्थम् । ३९७३ **यद्वृत्तान्नित्यम्** ८।१।६६॥ यत्र पदे यच्छब्दस्ततः परं तिङन्तं नानुदात्तम् । यो भुङ्क्ते यदद्यश्वायुर्वाति । अत्र व्यवहिते कार्यमिष्यते । ३९७४ **पूजनात्पूजितमनुदात्तं काष्ठादिभ्यः** ८।१।६७॥ पूजनेभ्यः काष्ठादिभ्यः पूजितवचनमनुदात्तम् । काष्ठाध्यापकः । **मलोपश्च वक्तव्यः** (वा० ४७३५) दारुणाध्यापकः । अज्ञाताध्यापकः । समासान्तोदात्तत्वापवादः । एतत्समासे इष्यते । नेह–दारुणमध्यापक इति वृत्तिमतम् । पूजनादित्येव पूजितग्रहणे सिद्धे पूजितग्रहणमनन्तरपूजितलाभार्थम् । एतदेव ज्ञापकमत्र प्रकरणे पञ्चमीनिर्देशेऽपि नान्तर्यमाश्रीयत, इति । ३९७५ **सगतिरपि तिङ्** ८।१।६८॥ पूजनेभ्यः काष्ठादिभ्यस्तिङन्तं पूजितमनुदात्तम् । यत्काष्ठां प्रपचति । 'तिङ्ङतिङः' (सू०

अन्यां प्रीणयति अन्यां रक्षतीत्यर्थः । एक इति सख्यापरमिति । **एकशब्दस्याऽनेकार्थत्वात्** । तथा चोक्तम्—'एकोऽन्यार्थे प्रधाने च प्रथमे केवले तथा । साधारणे समानेऽक्षपे संख्यायां च प्रयुज्यते' इति । ननु साहचर्यादन्यार्थक एवैकशब्दो ग्रहीष्यत इति चेत्सत्यम् । न साहचर्यमत्रप्रकरणे व्यवस्थापकमिति 'निपातैर्यद्यदिहन्त' इत्यत्रैवोचाम । यद्वृ । यदद्यश्वङिति । यद् अञ्चतीति क्विन् । 'विष्वग्देवयोश्च—' इति टेरद्व्यादेशः । कथं पुनः पञ्चमीनिर्देशे सति 'यदद्यश्वायुर्वाति' इत्यादौ व्यवधाने भवत्यत आह—अत्र व्यवहिते कार्यमिष्यत इति । अत्र च ज्ञापकमुत्तरसूत्रे मूल एव स्फुटीभविष्यति । पूजनात् । 'काष्ठादिभ्य—' इति वार्तिकं दृष्टं तदनुरोधेन पूजनादिति बहुवचनस्थान एकवचनमिति व्याचष्टे—पूजनेभ्यः काष्ठादिभ्य इति । उत्तरसूत्रे तिङग्रहणादिदं सुबन्तविषयकम् । काष्ठाध्यापक इति । **काष्ठादयोऽद्भुतपर्यायाः सन्तः पूजनवचना भवन्ति, समासविषयकं सूत्रमिदम्** । उदाहरणे मयूरव्यंसकादित्वात्समासः । मलोपश्च वक्तव्य इति । दारुणमध्यापक इति । समासे कृते विभक्तेर्लुकि स्वाभाविकी मकारनिवृत्तिरित्यनेन वचनेनान्वाख्यायते इति वृत्तिन्यासकारयोर्मतम् । तदेतदाह—इति वृत्तिमतमिति । भाष्यवार्तिककैयटास्तु असमास एव क्रियाविशेषणीभूतानां दारुणमित्यादीनामसमास एवास्य सूत्रस्य प्रवृत्तिमिच्छन्ति । मयूरव्यंसकादित्वे नास्ति प्रमाणम् । हरदत्तोऽप्याह । 'यदि समासे एवेदमभिमतमभविष्यत्तदा समास इत्येवाऽवक्ष्यत्' । युक्तं चैतत् । न ह्यत्र समासाधिकारोऽस्ति येन समासः स्यात् । अस्मिन्पक्षे मलोपवचनं च सार्थकम् । पूजनादित्येव पूजितग्रहणे सिद्ध इति । **पूजनस्य पूजितापेक्षत्वादिति** भावः । अनन्तरपूजितलाभार्थमिति । 'पूजनात्पूजितम्' इति सूत्रे सामान्यगतमानन्तर्यं विशेषणं विज्ञायत इति भावः । कथं पुनः पञ्चमीनिर्देशे व्यवहितस्य प्रसङ्ग इत्याह–एतदेवेति । ज्ञापकफलं तु 'यदवृत्तान्नित्यम्' इत्यत्रोक्तम् । सगति । यत्का-

३९३५) इति निघातस्य 'निपातैर्यत्' (सू ३९३७) इति निषेधे प्राप्ते विधिरयम् । सगतिग्रहणाच्च गतिरपि निहन्यते । **गतिग्रहणे उपसर्गग्रहणमिष्यते** (वा० ४७३२)। नेह–यत्काष्ठां शुक्लीकरोति । **३९७६ कुत्सने च सुप्यगोत्रादौ ८।१।६९॥** कुत्सने च सुबन्ते परे सगतिरगतिरपि तिङनुदात्तः । पचति पूति प्रपचति पूति । पचति मिथ्या । कुत्सने किम् । प्रपचति शोभनम् । सुपि किम् । पचति क्लिश्नाति । अगोत्रादौ किम् । पचति गोत्रम् । **क्रियाकुत्सन इति वाच्यम् ।** (वा. ३७३९) कर्तुः कुत्सने मा भूत् । पचति पूतिर्देवदत्तः । **पूतिश्चानुबन्ध इति वाच्यम् ।** तेनायं चकारानुबन्धत्वादन्तोदात्तः । **वा बहुर्थमनुदात्तमिति वाच्यम्** (वा ४७४२)। पचन्ति पूति । **३९७७ गतिर्गतौ ८।२।७०॥** अनुदात्तः । अभ्युद्धरति । गतिः किम् । दत्तः पचति । गतौ किम् । आमन्द्रैरिन्द्र हरिभिर्याहि मयूररोमभिः । **३९७८ तिङि चोदात्तवति ८।१।७१॥** गतिरनुदात्तः । यत्प्रपचति । तिङ्ग्रहणमुदावतः परिमाणार्थम् । अन्यथा हि यत्क्रियायुक्ताः प्रादयस्तं प्रत्येव गतिस्तत्र धातावेवोदात्तवति स्यात् प्रत्यये न स्यात् । उदात्तवति किम् । प्रपचति । **इति तिङन्तस्वराः ।**

ष्ठां प्रपचतीति । **ये मलोपश्चेत्यनेन वाक्येन मलोपमाहुस्तेऽपि तिङन्ते परतो नैव लोपमिच्छन्ति ।** सगतिग्रहणाच्च गतिरपि निहन्यत इति । **तुल्ययोगे अत्र सहशब्दः । यत्र तुल्ययोगे सहशब्दस्तत्र द्वयोरपि कार्ययोगो भवति । तद्यथा 'सपुत्रो भोज्यता'मित्युक्ते पुत्रोऽपि भोज्यते । अपिग्रहणं यत्र गतिर्न युज्यते तत्र केवलस्याऽपि तिङन्तस्य यथा स्यात् गतिप्रयोगे तु द्वयोः सहैव भवति तिङ्ग्रहणं,पूर्वयोगस्यातिङ्विषयत्वज्ञापनार्थम् ।** कुत्सने । **पदादिति निवृत्तम् ।** पचति क्लिश्नातीति । **कथमत्र समानवाक्यत्वस्य सामर्थ्यस्य वाऽभावादेवाऽप्राप्तेः । सुपीति स्पष्टार्थम् । कर्तुः कुत्सने मा भूत् ।।**पचति पूतिर्देवदत्त इति । **कर्तृत्वमात्रं कुत्स्यते अस्येदमयुक्तमिति । क्रिया तु शोभनैव ।** पूतिश्चानुबन्ध इति । **चकारानुबन्ध इत्यर्थः । तिबन्तपूतिशब्द आद्युदात्तः । 'वशेस्तिबि'ति तिप् बाहुलकात्पूर्वो भवति । तस्मादेव गुणाभावः । तस्य निघातनिमित्तस्याऽन्तोदात्तत्वं यथा स्यादिति चित्त्वमुपसंख्यायते ।** वा बहुर्थमिति । **बहुवचनान्तं तिङन्तं वाऽनुदात्तं स्यात् । यदा तिङन्तस्य निघातस्तदा पूतिरन्तोदात्तः । अन्यदा त्वाद्युदात्तः ।** आमन्द्रैरिति । **अत्र याहीत्येतत्प्रति क्रियायोगादाङित्येष गतिः ।** तिङि । **उदात्तवति तिङन्ते परे गतिर्निहन्यते । 'निपाता आद्युदात्ताः' इत्यस्यापवादः ।** यत्प्रपचतीति । **निपार्थंतद्यदि—' इति निघातप्रतिषेधात्तिङन्तमुदात्तवत् । ननु तिङ्ग्रहणं व्यर्थम् । न च तिङन्ते यथा स्यात् मन्द्रशब्दे मा भूत् 'आमन्द्रैरिन्द्र हरिभिर्याहि'**

अथ स्वरसञ्चारप्रकारः । ३४ ।

अथ वैदिकवाक्येषु स्वरसंचारप्रकारः कथ्यते । अग्निमीळे इति प्रथमा ऋक् । तत्राग्निशब्दोऽव्युत्पत्तिपक्षे (फि०) 'फिषः' इत्यन्तोदात्त इति माधवः । वस्तस्तु घृतादित्वात् । व्युत्पत्तौ तु नित्प्रत्ययस्वरेण । अम् सुप्त्वादनुदात्तः । 'अमि पूर्वः' (सू १९४) इत्येकादेशस्तु 'एकादेश उदात्तेन' (सू ३६५८) इत्युदात्तः । ईळे । 'तिङ्ङतिङः' सू (३९३५) इति निघातः । संहितायाम् 'उत्तादनुदात्तस्य' (सू ३६६०) इतीकारः स्वरितः । 'स्वरितात्संहितायाम्' (सू ३६६८) इति ळे इत्यस्य प्रचयाऽपरपर्याया एकश्रुतिः । पुरःशब्दोऽन्तोदात्तः । 'पूर्वाधरावराणाम्' (सू १९७५) इत्यसिप्रत्ययस्वरात् । हितशब्दोऽपि धात्रो निष्ठायां 'दधातेर्हिः (सू ३०७६) इति ह्यादेशे प्रत्ययस्वरेणान्तोदात्तः । पुरोऽव्ययम्' (सू ७६८) इति गतिसंज्ञायां 'कुगति' (सू ७६१) इति समासे समासान्तोदात्ते 'तत्पुरुषे तुल्यार्थ' (सू ३७३६) इत्यव्ययपूर्वपदप्रकृतिस्वरे 'गतिकारकोपपदात्कृत्' (सू ३८७३) इति कृदुत्तरपदप्रकृतिस्वरे, यथादिस्वरे च पूर्वपूर्वोपमर्देन प्राप्ते 'गतिरनन्तरः' (सू ३७८३) इति पूर्वपदप्रकृतिस्वरः । पुरःशब्दाकारस्य संहितायां प्रचये प्राप्ते 'उदात्तस्वरितयरस्य सन्नतरः' (सू ३६६६) इत्यनुदात्ततरः । यज्ञस्य । नडः प्रत्ययस्वरः । विभक्तेः सुप्त्वादनुदात्तत्वे स्वरितत्वम् । देवम् । पचाद्यच् । फिटस्वरेण प्रत्ययस्वरेण वाऽन्तोदात्तः । ऋत्विक्शब्दः कृदु-

---

इति मन्द्रशब्दो रक्प्रत्ययान्तोऽन्तोदात्त इति वाच्यम् । 'यत्क्रियायुक्ताः प्राद्यस्तं प्रत्येव गत्युपसर्गसंज्ञाः' इति वचनात् स्वसम्बन्धिनमाक्षिपतीति क्रियावाचिन्येवोदात्तवति भविष्यति । न च कृदन्तेऽतिप्रसङ्गः । तत्र कृत्स्वरयथादिस्वरगतिस्वरेषु कृतेषु शेषनिघातेन गतिर्निहन्यत एव । तस्मान्नाऽर्थस्तिङ्ग्रहणेनेत्याशङ्क्याह—इतिङ्ग्रहणमिति । परिमाणमियत्ता । परिमाणार्थत्वमेव स्पष्टयति—अन्यथा हीति । अक्रियमाणे तिङ्ग्रहणे धातुरेव क्रियावाचित्वाद्गतिसंज्ञानिमित्तमिति तत्रैवोदात्तवति निघातः परे इत्यर्थो जायते, तेन यत्प्रकरोतीत्यादौ धातोः शेषनिघातेनानुदात्तत्वेऽपि तिङन्तस्य उपसर्गस्वरेण मध्योदात्तत्वाद्गतेर्निघातः सिद्ध इत्याहुः । प्रपचतीति । 'तिङ्ङतिङः' इति निघातः । इति सुबोधिन्यां तिङन्तस्वराः ।

इळे इति । ईड स्तुतौ लङुत्तमैकवचनम् । इट् टेरेत्वं 'द्व्योश्चास्य स्वरयोः'इति प्रातिशाख्येन ळः । यज्ञस्येति । 'यजयाच-' इति यजेर्नङ् । विभक्तेः सुप्त्वादनुदात्तत्वे

त्तरपदप्रकृतिस्वरेणान्तोदात्तः । होतृशब्दस्तृन्प्रत्ययान्तो नित्स्वरेणाद्युदात्तः । रत्नशब्दो (फि०) **'नञ्विषयस्य'** इत्याद्युदात्तः । रत्नानि दधातीति रत्नधाः । समासस्वरेण कृदुत्तरपदप्रकृतिस्वरेण वाऽन्तोदात्तः । तमपः पित्त्वादनुदात्तत्वे स्वरितप्रचयावित्यादि यथाशास्त्रमुन्नेयम् ॥ **इति स्वरसंचारः ।**

इत्थं वैदिकशब्दानां दिङ्मात्रमिह दर्शितम् ।
तदस्तु प्रीतये श्रीमद्भवानीविश्वनाथयोः ॥ १ ॥

इति सिद्धान्तकौमुद्यां श्रीभट्टोजिदीक्षितविरचितायां वैदिकस्वरप्रक्रिया ।

भैरवमिश्रकृतभैरवीव्याख्यासंवलितम्—

अथ लिङ्गानुशासनम् । ३५ ।

स्त्र्यधिकारः ।

१ लिङ्गम् । २ स्त्री । अधिकारसूत्रे एते । ३ ऋकारान्ता मातृदुहितृ-

---

स्वरितत्वमिति । **'स्वरितो वानुदात्ते पदादौ'** इत्यनेन । ऋत्विगिति । ऋतावुपपदे यजेः क्विन् **'ऋत्विगि'**त्यनेन, **'वचिस्वपि-'** इति सम्प्रसारणम् । नञ्विषयस्येति । इषन्तवर्जितस्य नित्यनपुंसकस्यादिरुदात्त इति सूत्रार्थः । **इति स्वरसञ्चारः ।**

इति श्रीमन्मौनिकुलतिलकायमानश्रीगोवर्धनभट्टात्मजरघुनाथात्मजेन जयकृष्णेन कृतायां सुबोधिन्याख्यायां सिद्धान्तकौमुदीव्याख्यायां वैदिकस्वरप्रक्रिया ।

श्रीः । मूले, अधिकारसूत्रे एते इति । उभयोरधिकारसूत्रयोरेऽपि **'लिङ्गमित्याशास्त्रसमाप्तेः'**, द्वितीयस्तु **'तारकादारा-'** इति यावदिति विवेकः । अत्रापि लिङ्गं शास्त्रीयं प्रागुक्तमेव विवक्षितम् । तच्चार्थनिष्ठं तच्छब्दप्रतिपाद्यम् । तत्रायं विशेषः । शक्तिस्वभावेन कस्यचित्सर्वलिङ्गप्रतिपादकता, कस्यचिदेकलिङ्गप्रतिपादकता, कस्यचिद्द्विलिङ्गयुक्तार्थप्रतिपादकता चेति । यद्यपि शब्दानामर्थानां चाऽऽनन्त्यात्प्रातिस्विक्यरूपेण तेषां ज्ञानं योगिनां युक्तयुञ्जानत्वेन व्यवहारयोग्यानामेव सम्भवति न त्वस्मदादीनामज्ञानाम्, तथाप्यस्मदाद्युद्देशेन शास्त्रप्रवृत्तेर्यथा लघुनोपायेनास्मदा-

स्वसृपोतृननान्दरः। ऋकारान्ता एते पञ्चैव स्त्रीलिङ्गाः। स्वस्रादिपञ्चकस्यैव ङीबूनिषेधेन कर्त्रीत्यादेर्ङीपा ईकारान्तत्वात्। तिसृचतसृोस्तु स्त्रियामादेशतया विधानेऽपि प्रकृत्योस्त्रिचतुरोर्ऋदन्तत्वाऽभावात्। ४ अन्यप्रत्ययान्तो धातुः। अनिप्रत्ययान्त ऊप्रत्ययान्तश्च धातुः स्त्रियां स्यात्। अवनीः। चमूः। प्रत्ययग्रहणं किम्। देवयतेः क्विप्। द्यूः। विशेष्यलिङ्गः। ५ अशनिभरण्यरण्यः पुंसि च। इयमयं वा अशनिः। ६ मिन्यन्तः। मिप्रत्ययान्तो, निप्रत्ययान्तश्च धातुः स्त्रियां स्यात्। भूमिः। ग्लानिः। ७ वह्निवृष्ण्यग्नयः पुंसि। पूर्वस्याऽपवादः। ८ श्रोणियोन्यूर्मयः पुंसि च। इयमयं वा श्रोणिः। ९ क्तिन्नन्तः। स्पष्टम्। कृतिरित्यादि। १० ईकारान्तश्च। ईप्रत्ययान्तः स्त्री स्यात्। लक्ष्मीः।

दीनां ज्ञानं सम्भवेत्तथाह—ऋकारान्ता इत्यादिना। स्त्रीति पदमेषु सूत्रेषु सम्बध्यते; तच्च भावप्रधाननिर्देशेन स्त्रीत्वपरम्। तस्य लिङ्गपदेन बहुव्रीहिसमासे स्त्रीलिङ्गा इति सामानाधिकरण्येन व्यवहारः। मात्रादिशब्दानां विशेषत उपादानात्पञ्चेति लब्धम्। अवधारणस्य तु यथा लाभस्तं प्रकारमाह—स्वस्रादिपञ्चकस्यैवेति। ङीबूनिषेधेनेति। 'न षट्स्वस्रादिभ्यः' इति सूत्रेण ङीपो निषेधेन। कर्त्रीत्यादेरिति। अनेन कर्तृपदेन यौगिकाः शब्दा ऋकारान्ताः परिग्राह्याः। रूढस्य क्रोष्टृप्रभृतिशब्दस्याऽऽदिना परिग्रहः। नच सप्तेवेति वक्तव्ये पञ्चेवेति नियमानुपपत्तिरिति वाच्यम्। आदेशत्वानाक्रान्ताः पञ्चैवेत्यर्थात्। यद्यपि भाष्यसम्मते 'तृज्वत्क्रोष्टुः' इत्यादिसूत्र्याः प्रयोगनियमार्थत्वपक्षे स्त्रियां प्रवर्तमानस्य क्रोष्टृशब्दस्यादेशत्वानाक्रान्तत्वम्, तथापि परिनिष्ठिते शब्देऽयमीकारान्त एव प्रयुज्यत इति भावः। 'उणादयो बहुलम्' इति सङ्गृहीतसाधुत्वकानां व्युत्पन्नत्वं शास्त्रान्तरे प्रसिद्धमिति तदभिप्रायेणाह—अन्यू इत्यादि। अवनिः। 'अतिसृधृधम्यम्यत्ययवितृभ्योऽनिः' इत्यनिः। चमूरिति। 'कृषिचमितनिधनिसर्जिभ्य ऊः' इत्यूः। द्यूः। अत्र वकारस्य 'च्छ्वोः—' इत्यूठ्। अशनिभर। पूर्वसूत्रापवादोऽयम्। मिन्यन्त। भूमिः। 'नियो मिः' इत्यतो मिरित्यनुवर्त्य विहितो 'भुवः कित्' इति निः। ग्लानिः। 'वह्निश्रिश्रयुद्रुस्रुाह्यस्वरिभ्यो नित्' इति निः। वह्न्यादिशब्दानां निप्रत्ययान्तत्वेन स्त्रीत्वे प्राप्ते आह—वह्निवृष्णि। वृष्णिः। 'सुवृषिभ्यां कित्' इति निः। अग्निः। 'अङ्गेर्नलोपश्च' इति निः। श्रोणिन्योन्यू। श्रोणिः। योनिः। 'वहिश्रि—' इतीनिः। ऊर्मिः। 'अतेरुश्च' इति निः। ईकारान्तश्च। अत्र ईकारः प्रत्यय एव, पूर्वोत्तरसाहचर्यात्। लक्ष्मीरिति। अत्र 'लक्षेर्मुट् च' इति सूत्रे 'अवितृस्तृतन्त्रिभ्य ईः' इत्यत ईरित्यस्याऽनुवृत्त्या। तेनेकारः प्रत्ययः। एवमन्यादिधातुभ्य ईकारप्रत्ययेऽपि स्त्रीत्वम्। तथा अवीनारी रजस्वला, तरोर्नौस्तरी धूमः

११ ऊङावन्तश्च । कुरूः । विधा । १२ ग्वन्तमेकाक्षरम् । श्रीः । भूः । एकाक्षरं किम् । पृथुश्रीः । १३ विंशत्यादिरानवतेः । इयं विंशतिः । त्रिंशत् । चत्वारिंशत् । पञ्चाशत् । षष्टिः । सप्ततिः । अशीतिः । नवतिः । १४ दुन्दुभिरक्षेषु । इयं दुन्दुभिः । अक्षेषु किम् । अयं दुन्दुभिर्वाद्यविशेषोऽसुरो वेत्यर्थः । १५ नाभिरक्षत्रिये । इयं नाभिः । १६ उभावप्यन्यत्र पुंसि । दुन्दुभिर्नाभिश्चोक्तविषयादन्यत्र पुंसि स्तः । नाभिः क्षत्रियः । कथं तर्हि समुल्लसत्पङ्कजपत्रकोमलैरुपाहितश्रीण्युपनीविनाभिभि'रिति भारविः । उच्यते । दृढभक्तिरित्यादाविव कोमलैरिति सामान्ये नपुंसकं बोध्यम् । वस्तुतस्तु 'लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्ये'ति भाष्यात्पुंस्त्वमपीह साधु । अत एव 'नाभिर्मुख्यनृपे चक्रमध्यक्षत्रिययोः पुमान् । द्वयोः प्राणिप्रतीके स्यात् स्त्रियां कस्तूरिकामदे' इति मेदिनी । रभसोऽप्याह—'मुख्यराट्क्षत्रिये नाभिः पुंसि प्राण्यङ्गके द्वयोः । चक्रमध्ये प्रधाने च स्त्रियां कस्तूरिकामदे' इति । एवमेवंविधेऽन्यत्रापि बोध्यम् । १७ तलन्तः । अयं स्त्रियां स्यात् । शुक्लस्य भावः शुक्लता । ब्राह्मणस्य कर्म ब्राह्मणता । ग्रामाणां समूहो ग्रामता । देव एव देवता । १८ भूमिविद्युत्सरिन्नतावनिताभिधानानि । भूमिर्भूः । विद्युत्सौदामनी । सरिन्निम्नगा । लता वल्ली ।

तन्त्रीवीणादेर्गुणः । नच 'यापोः क्विदूहे च' इति सूत्रविहितेकारान्तस्याऽपि स्त्रीत्वापत्तिरिति वाच्यम् । पुंस्त्वाधिकारोक्तेन 'योपध०' 'योपधः' इत्याम्बां परत्वाद्बाधात् । यूप इत्यादौ प्रथमस्य, समय इत्यादौ द्वितीयस्य चारितार्थ्यात् । एवं च पपी-यथीशब्दस्य पुंस्त्वेऽपि न क्षतिः । ऊङावन्तश्च । 'ऊङुतः' इत्यूङ् । आबग्रहणेन टापडापौ गृह्येते । ग्वन्तमेकाक्षरम् । ईकारोऽत्र प्रत्ययः, ऊकारस्साहचर्यात् । विंशत्यादिरानवतेरिति । विंशत्यादयः 'पङ्क्तिविंशति-' इति सूत्रनिर्दिष्टाः । दुन्दुभिरक्षेष्विति । अक्षेषु बोधनोपेषु यः प्रयुज्यते इत्यर्थः । नाभिरक्षत्रिये । क्षत्रियभिन्ने यो नाभिशब्दः प्रयुज्यते स स्त्रियां स्यात् । इयं नाभिरिति । पुरुषावयवे इदम् । उभावप्यन्यत्र पुंसि । इदं स्पष्टार्थम् । पूर्वसूत्रयोः 'अक्षेष्वक्षत्रिये' इत्यभिधानेन सिद्धेः । कथं तर्हीति । अत्र यत्कोमलैरिति तदनुपपन्नम् । स्त्रीलिङ्गनाभिशब्दार्थविशेषणत्वात् । सामान्ये इति । लिङ्गविशेषाऽविवक्षया नपुंसकं कोमलैरिति प्रसाध्य तस्य नाभिशब्दार्थविशेषणत्वं स्वीकार्यम् । विशेष्यप्रतिपादकस्य यथा पुंस्त्वं तथाऽस्यापि भविष्यतीत्याशयेन समाधानान्तरमाह—वस्तुतस्त्विति । 'चक्रमध्यक्षत्रिययोः' इत्यत्र चक्रमध्यं च क्षत्रियश्चेति द्वन्द्वः । अत एव 'प्राण्यङ्गके द्वयोः' इति सङ्गच्छते । तलन्तः । 'तस्य भावस्त्वतलौ' इति सूत्रविहिततलूप्रत्ययान्तः स्त्रियां स्यात् । भूमिवि-

वनिता योषित् । १९ **यादो नपुंसकम्** । यादःशब्दः सरिद्वाचकोऽपि क्लीबं स्यात् । २० **भाःस्रुक्स्रग्दिगुष्णिगुपानहः** ॥ एते स्त्रियां स्युः । इयं भा इत्यादि । २१ **स्थूणोर्णे नपुंसके च** । एते स्त्रियां क्लीबे च स्तः । स्थूणा । स्थूणम् । ऊर्णा । ऊर्णम् । तत्र स्थूणा काष्ठमयी द्विकर्णिका । ऊर्णा तु मेषादिलोम । २२ **गृहशशाभ्यां क्लीबे** । नियमार्थमिदम् । गृहशशपूर्वे स्थूणोर्णे यथासंख्यं नपुंसके स्तः । गृहस्थूणम् । 'शशोर्णं शशलोमनी'त्यमरः । २३ **प्रावृड्विप्रुड्रुट्तृड्विट्त्विषः** । एते स्त्रियां स्युः । २४ **दर्विविदिवेदिखनिशान्यश्रिवेशिकृष्योषधिकट्यङ्गुलयः** । एते स्त्रियां स्युः । पक्षे ङीप् । दर्वी । दर्विरित्यादि । २५ **तिथिनाडिरुचिर्वीचिनालिधूलिकिकिलिच्छविराट्यादयः** । एते प्राग्वत् । इयं तिथिरित्यादि । अमरस्त्वाह-'तिथयो द्वयो'रिति । तथा च मारविः-'तस्य भुवि बहुतिथास्तिथय' इति । स्त्रीत्वे हि बहुतिथ्य इति स्यात् । श्रीहर्षश्च-'निखिलान्निशि पौर्णमातिथी'निति । २६ **शष्कुलिराजिकुटथशनिवर्तिभृकुटिभ्रुटिवलिपङ्क्तयः** । एतेऽपि स्त्रियां स्युः । इयं शष्कुलिः । २७ **प्रातपदापद्विपत्सम्पच्छरत्संसत्परिषदुषः संवित्क्षुत्पुन्मुत्समिधः** । इयं प्रतिपदित्यादि । उषा उच्छन्ती । उषाः प्रातरधिष्ठात्री देवता । २८ **वाशीर्धूःपूर्गीर्द्वारः** । इयमाशीरित्यादि । २९ **अप्सुमनस्समासिकतावर्षाणां बहुत्वं च** । अबादीनां पञ्चानां स्त्रीत्वं स्याद्बहुत्वं च । आप इमाः । 'स्त्रियः सुमनसः पुष्पम्' । 'सुमना मालती जातिः' । देववाची तु पुंस्येव । 'सुपर्वाणः सुमनसः' । बहुत्वं प्रायिकम् । 'एका च सिकता तैलदाने असमर्थेति' अर्थवत्सूत्रे भाष्यप्रयोगात् 'समांसमां विजायते' (सू० १८१३) इत्यत्र समायां समायामिति भाष्याच्च । 'विभाषाघ्राधेट्' इति (सू २३७९) इति सूत्रे 'अघ्रासातां सुमनसा'विति

द्युदिति । अत्राऽभिधानशब्दो भूम्यादिशब्दे शक्यतावच्छेदकधर्मावच्छिन्नशक्तपरत्वेन प्रमेयशब्दव्यावृत्तिः । एवमन्यत्रापि बोध्यम् । यादो नपुंसकमिति । पूर्वस्यापवादः । स्थूणोर्णे नपुंसके च । चकारेण स्त्रियामित्यस्यानुकर्षणार्थमस्यात्र लेख. । प्रावृडिति । स्त्रीशब्दस्य पूर्वत्र चानुकृष्टत्वेऽपि 'स्वरितेनाधिकारः' इत्यस्याऽधिकः कार इति व्याख्यानस्यापि प्रसिद्धत्वादत्र सम्बन्धः । दर्विविदिवेदि । दर्विशब्दो 'वृदृभ्यां विन्' इति विन्नन्तः, 'सतोऽक्तिच्यर्थादित्येके' इति विकल्पेन ङीप् दर्वी इति । तिथिनाडि । एते प्राग्वदिति । स्त्रियां स्युरित्यर्थः । पुंस्येवेति । देवासुरात्मेत्यनेन पुंस्त्वबोधकेन परत्वाद्बाधादिति भावः । भाष्यप्रयोगादिति । तेन भाष्ये णौ 'अप्सुमनः' इति सूत्रनिर्दिष्टानां बहुत्वं

वृत्तिव्याख्यायां हरदत्तोऽप्येवम् । ३० **स्रक्त्वक्ज्योग्वाग्यवागूनौस्फिजः** । इयं स्रक् त्वक् ज्योक् वाक् यवागूः नौः स्फिक् । ३१ **तृटिसीमासम्बध्याः** । इयं तृटिः । सीमा । सम्बध्या । ३२ **चुल्लिवेणिखार्यश्च** । स्पष्टम् । ३३ **ताराधाराज्योत्स्नादयश्च** । ३४ **शलाका स्त्रियां नित्यम्** । नित्यग्रहणमन्येषां क्वचिद्व्यभिचारं ज्ञापयति । **इति स्त्र्यधिकारः** ।

अथ पुँल्लिङ्गाधिकारः ।

३५ **पुमान्** । अधिकारोऽयम् । ३६ **घञन्ताः** । पाकः । त्यागः । करः । गरः । भावार्थ एवेदम् । नपुंसकत्वविशिष्टे भावे क्तल्युड्भ्यां, स्त्रीत्वविशिष्टे तु क्तिन्नादिभिर्बाधेन परिशेषात् । कर्मादौ तु घञन्तमपि विशेष्यलिङ्गम् । तथा च भाष्यम्–'सम्बन्धमनुवर्तिष्यते' इति । ३७ **घाऽजन्तश्च** । विस्तरः । गोचरः । चयः । जय इत्यादि । ३८ **भयलिङ्गभगपदानि नपुंसके** । एतानि नपुंसके स्युः । भयम् । लिङ्गम् । भगम् । पदम् । ३९ **नङन्तः** । नङ्प्रत्ययान्तः पुंसि स्यात् । यङ्गः । यत्नः । ४० **याञ्चा स्त्रियाम्** । पूर्वस्यापवादः । ४१ **क्यन्तो घुः** । किप्रत्ययान्तो घुः पुंसि स्यात् । आधिः । निधिः । उदधिः । क्यन्तः किम् । दानम् । घुः किम् । जह्निर्बीजम् । ४२ **इषुधिः स्त्री च** । इषुधिशब्दः स्त्रियां पुंसि च । पूर्वस्यापवादः । ४३ **देवासुरात्मस्वर्गगिरिसमुद्रनखकेशदन्तस्तनभुजकण्ठखड्गशरपङ्काभिधानानि** । एतानि पुंसि स्युः । देवाः सुराः । असुरा दैत्याः । आत्मा क्षेत्रज्ञः । स्वर्गो नाकः । गिरिः पर्वतः । समुद्रोऽब्धिः । नखः कररुहः । केशः शिरोरुहः । दन्तो दशनः । स्तनः कुचः । भुजो दोः । कण्ठो गलः । खड्गः करवालः । शरो मार्गणः । पङ्कः कर्दम इत्यादि । ४४ **त्रिविष्टपत्रिभुवने नपुंसके** । स्पष्टम् । तृतीयं विष्टपं त्रिविष्टपम् । स्व-

---

प्राधिकमिति । विकल्पेनाऽन्यत्र · बहुत्वाऽभावेऽपि न क्षतिः । क्वचिद्व्यभिचारमिति । तेन तिथिशब्दस्य पूर्वत्र यथा पुंस्त्वं प्रदर्शितं तथान्येषामन्यलिङ्गत्वेऽपि साधुत्वमिति सूच्यति । इति लिङ्गानुशासने स्त्र्यधिकारः ।

भावार्थ एवेति । भावे यो घञ् तदन्तस्य पुंस्त्वमित्युक्तम् । एतल्लाभप्रकारमाह— नपुंसकेत्यादि । भयलिङ्गेत्यादि । पूर्वस्याऽपवादोऽयम् । क्यन्तो घुः । किप्रत्ययोऽन्तः परो यस्मात्तादृशो घुसंज्ञको धातुस्तदूघटितः पुमानित्यर्थः । देवासुरा । अत्र षष्ठ्यन्तशब्दान्तद्वन्द्वं कृत्वा तस्य षष्ठीसमासोऽभिधानशब्देन कर्तव्यः, अभिधानशब्दः क्रियाध्युक्तो वाचकशब्दपरः, तेन देवादिशब्दवाच्यतावच्छेदकेत्यादि पूर्ववद्बोध्यम् । शब्दस्वरूपा-

र्गाभिधानतया पुंस्त्वे प्राप्ते अयमारम्भः। ४५ द्यौः स्त्रियाम्। द्योदिवोस्तन्त्रेणोपादानमिदम्। ४६ इषुबाहू स्त्रियां च। चात्पुंसि। ४७ बाणकाण्डौ नपुंसके च। चात्पुंसि। 'त्रिविष्टपे'त्यादिचतुःसूत्री 'देवासुरे'त्यस्यापवादः। ४८ नान्तः। अयं पुंसि। राजा। तक्षा। न च चर्मवर्मादिष्वतिव्याप्तिः 'मन्द्वयच्कोऽकर्तरी'ति नपुंसकप्रकरणे वक्ष्यमाणत्वात्। ४९ ऋतुपुरुषकपोलगुल्फमेघाभिधानानि। क्रतुरध्वरः। पुरुषो नरः। कपोलो गण्डः। गुल्फः प्रपदः। मेघो नीरदः। ५० अभ्रं नपुंसकम्। पूर्वस्याऽपवादः। ५१ उकारान्तः। अयं पुंसि स्यात्। प्रभुः। इक्षुः। 'हनुर्हट्टविलासिन्यां नृत्यारम्भे गदे स्त्रियाम्। द्वयोः कपोलावयवे' इति मेदनी। 'करेणुरिभ्यां स्त्री नेमे' इत्यमरः। एवंजातीयकविशेषवचनाऽनाक्रान्तस्तु प्रकृतसूत्रस्य विषयः। उक्तं च। 'लिङ्गशेषविधिर्व्यापी विशेषैर्यद्यबाधित' इति। एवमन्यत्रापि। ५२ धेनुरज्जुकुहूसरयुतनुरेणुप्रियङ्गवः स्त्रियाम्। ५३ समासे रज्जुः पुंसि च। कर्कटरज्ज्वा। कर्कटरज्जुना। ५४ श्मश्रुजानुवसुस्वाद्वश्रुजतुत्रपुतालूनि नपुंसके। ५५ वसु चाऽर्थवाचि। अर्थवाचीति किम्। 'वसुर्मयूखाग्निधनाधिपेषु'। ५६ मद्गुमधुसीधुशीधुसानुकमण्डलूनि नपुंसके च। चात्पुंसि। अयं मद्गुः। इदं मद्गु। ५७ रुत्वन्तः। मेरुः। सेतुः। ५८ दारुकसेरुजत्रुवस्तुमस्तूनि नपुंसके। रुत्वन्त इति पुंस्त्वस्यापवादः। इदं दारु। ५९ सक्तुर्नपुंसके च। चात्पुंसि। सक्तुः। सक्तु। ६० प्राग्रश्मेरकारान्तः। 'रश्मिर्दिवसाभिधानानी'ति वक्ष्यति। प्रागेतस्मादकारान्त इत्यधिक्रियते। ६१ कोपधः। कोपधोऽकारान्तः पुंसि स्यात्। स्तबकः। कल्कः। ६२ चिबुकशालुकप्रातिपदिकांऽशुकोलुकानि नपुंसके। पूर्वसूत्राऽपवादः। ६३ कण्टकाऽनीकसरक-

---

ऽपेक्षया च नपुंसकत्वम्। त्रिविष्टप। स्वर्गाभिधानतया इति। अत एवाहाऽमरसिंहः 'क्लीबे त्रिविष्टपम्' इति। द्यौः स्त्रियाम्। अस्य स्वर्गाभिधानत्वात्पुंस्त्वस्य पूर्वेण प्राप्तेरयमारम्भः। इषुबाहू। शरभुजपर्यायाविमौ। बाणकाण्डौ। शराभिधानोऽयम्। नान्त इति। नान्तप्रत्ययान्त इत्यर्थः। अभ्रं नपुंसकमिति। मेघाभिधानविषये पूर्वस्यापवाद इत्यर्थः। लिङ्गशेषविधिरिति। लिङ्गस्य शेषोऽवशेषस्तस्य विधिः व्यापी काण्डत्रयस्य विधिर्व्यापी काण्डत्रयस्य व्यापको यदि विशेषशास्त्रेण बाधितो न स्यादित्यर्थः। नपुंसके चेति। चात्पुंसि। वसु चार्थवाचि। अर्थवाची वसुशब्दो नपुंसके च द्रष्टव्यः। रुत्वन्त इति। उकारो नकारस्संज्ञकः। मेरुः। सेतुरित्यत्र 'सितनिगमिमसिसक्ष्यविधाञ्कुशिभ्यस्तुन्' इति तुन्। सूर्यवाचकः प्रथमः। दारुकसेरु जत्रु। जत्रवादित्वादुप्रत्ययान्ता एते।

मोदकचषकमस्तकपुस्तकतडाकनिष्ककशुष्कवर्चस्कपिनाकभाण्डकपिण्डककटकशण्डकपिटकतालकफलकपुलाकानि नपुंसके च। चात्पुंसि। अयं कण्टकः। इदं कण्टकमित्यादि। ६४ टोपधः। टोपधोऽकारान्तः पुंसि स्यात्। घटः। पटः। ६५ किरीटमुकुटललाटवटविटश्रृङ्गाटकराटलोष्टानि नपुंसके। किरीटमित्यादि। ६६ कुटकूटकपटकवाटकर्पटनटनिकटकोटकटानि नपुंसके च। चात्पुंसि। कुटः। कुटमित्यादि। ६७ णोपधः। णोपधोऽकारान्तः पुंसि स्यात्। गुणः। गणः। पाषाणः। ६८ ऋणलवणपर्णतोरणरोष्णानि नपुंसके। पूर्वसूत्राऽपवादः। ६९ कार्षापणस्वर्णसुवर्णव्रणवरणवृषणविषाणचूर्णतृणानि नपुंसके च। चात्पुंसि। ७० थोपधः। रथः। ७१ काष्ठपृष्ठसिक्थोक्थानि नपुंसके। इदं काष्ठमित्यादि। ७२ काष्ठा दिगर्था स्त्रियाम्। इमाः काष्ठाः। ७३ तीर्थप्रोथयूथगाथानि नपुंसके च। चात्पुंसि। अयं तीर्थः। इदं तीर्थम्। ७४ नोपधः। अदन्तः पुंसि। इनः। फेनः। ७५ जघनाऽजिनतुहिनकाननवनवृजिनविपिनवेतनशासनसोपानमिथुनश्मशानरत्ननिम्नचिह्नानि नपुंसके। पूर्वस्याऽपवादः। ७६ मानयानाभिधाननलिनपुलिनोद्यानशयनासनस्थानचन्दनाऽऽलानसमानभवनवसनसम्भावनविभावनविमानानि नपुंसके च। चात्पुंसि। अयं मानः। इदं मानम्। ७७ पोपधः। अदन्तः पुंसि। यूपः। दीपः। ७८ पापरूपोडुपतल्पशिल्पपुष्पशष्पसमीपाऽन्तरीपाणि नपुंसके। इदं पापमित्यादि। ७९ शूर्पकुतपकुणपद्वीपविटपानि नपुंसके च। अयं शूर्पः। इदं शूर्पमित्यादि। ८० भोपधः। स्तम्भः। ८१ तलभं नपुंसकम्। पूर्वस्याऽपवादः। ८२ जृम्भं नपुंसके च। जृम्भम्। जृम्भः। ८३ मोपधः। सोमः। भीमः। ८४ रुक्मसिध्मयुग्मेध्मगुल्माध्यात्मकुङ्कुमानि नपुंसके। इदं रुक्ममित्यादि। ८५ संग्रामदाडिमकुसुमाश्रमक्षेमक्षौमहोमोद्दामानि नपुंसके च। चात्पुंसि। अयं संग्रामः। इदं संग्रामम्। ८६ योपधः। समयः। हयः। ८७ किसलयहृदयेन्द्रियोत्तरीयाणि नपुंसके। स्पष्टम्। ८८ गोमयकषायमलयाऽन्वयाऽव्ययानि नपुंसके च। गोमयः। गोमयम्। ८९ रोपधः। क्षुरः। अक्षुरः। ९० द्वाराग्रस्फारतक्रवक्रवप्रक्षिप्रक्षुद्रनीरतीरदूरकृच्छ्ररन्ध्राश्रश्वभ्रमीरगभीरकूरविचित्रकेयूरकेदारोदराऽजस्रशरीरकन्दरमन्दारपञ्जराऽजरजठराऽजिरवै-

रचामरपुष्करगह्वरकुहरकुटीरकुलीरचत्वरकाश्मीरनीराम्बरशिशिरतन्त्र-यन्त्रनक्षत्रक्षेत्रमित्रकलत्रचित्रमूत्रसूत्रवक्त्रनेत्र गोत्राङ्कुलित्रभलत्रशस्त्रशास्त्रवस्त्रपत्रपात्रच्छत्राणि नपुंसके। इदं द्वारमित्यादि। ९१ शुक्रमदेवतायाम्। इदं शुक्रं रेतः। ९२ चक्रवज्रान्धकारसाराऽवारापारक्षीरतोमरभृङ्गारभृङ्गारमन्दारोशीरतिमिरशिशिराणि नपुंसके च। चात्पुंसि। चक्रः। चक्रमित्यादि। ९३ षोपधः। वृषः। वृक्षः। ९४ शिरीषजींषाऽम्बरोषपीयूषपुरीषकिल्विषकल्माषाणि नपुंसके। ९५ यूषकरीषमिषविषवर्षाणि नपुंसके च। चात्पुंसि। अयं यूषः। इदं यूषमित्यादि। ९६ सोपधः। वत्सः। वायसः। महानसः। ९७ पनसबिसवुससाहसानि नपुंसके। ९८ चमसांऽसरसनिर्यासोपवासकार्पासवासमासकासकांसमांसानि नपुंसके च। इदं चमसम्। अयं चमस इत्यादि। ९९ कंसे चाऽप्राणिनि। 'कंसोऽस्त्री पानभाजनम्'। प्राणिनि तु कंसो नाम कश्चिद्राजा। १०० रश्मिदिवसाभिधानानि। एतानि पुंसि स्युः। रश्मिर्मयूखः। दिवसो घस्रः। १०१ दीधितिः स्त्रियाम्। पूर्वस्यापवादः। १०२ दिनाऽहनी नपुंसके। अयमप्यपवादः। १०३ मानाभिधानि। एतानि पुंसि स्युः। कुडवः। प्रस्थः। १०४ द्रोणाढको नपुंसके च। इदं द्रोणम्। अयं द्रोणः। १०५ खारीमानिके स्त्रियाम्। इयं खारी। इयं मानिका। १०६ दाराऽक्षतलाजाऽसूनां बहुत्वं च। इमे दाराः। १०७ नाड्यपजनोपपदानि व्रणाङ्गपदानि। यथासंख्यं नाड्यादयुपपदानि व्रणादीनि पुंसि स्युः। अयं नाडीव्रणः। अपाङ्गः। जनपदः। व्रणादीनामुभयलिङ्गत्वेऽपि क्लीबत्वानुवृत्यर्थं सूत्रम्। १०८ मरुद्गरुत्तरदृत्विजः। अयं मरुत्। १०९ ऋषिराशिदृतिग्रन्थिक्रिमिध्वनिबलिकौलिमौलिरविकविकपिमुनयः। एते पुंसि स्युः। अयमृषिः। ११० ध्वजगजमुञ्जपुञ्जाः। एते पुंसि। १११ हस्तकुन्तान्तव्रणवातदूत-

---

कंसे चाऽप्राणिनि। 'कंस'मिति शब्दस्य निर्देशात् 'नपुंसके च' इत्यस्य सम्बन्धः। अप्राणिनि वाच्ये कंसशब्द इत्यर्थः। दिनाहनी। दिवसाभिधानादिमौ। खारीमानिके। मानाभिधानत्वात्पुंस्त्वे प्राप्तेऽस्यारम्भः। बहुत्वं चेति। चकारः पुंस्त्वस्य समुच्चायकः। नाड्यपजनोपपदानि व्रणाऽङ्गपदानि। अत्रोपपदशब्दः पूर्वपदपरो, नतु 'तत्रोपपदम्—' इति तत्संज्ञकपरः। तस्य प्राप्त्यभावात्। क्लीबत्वनिवृत्त्यर्थमिति। नपुंसकाधिकारे 'मुखनयनम्' इत्यादिवक्ष्यमाणसूत्रेण विस्तराऽभि-

धूतसूतचूतमुहूर्ताः । एते पुंसि । अमरस्तु 'मुहूर्तोऽस्त्रिया' मित्याह । ११२ षण्डमण्डकरण्डभरण्डवरण्डतुण्डगण्डमुण्डपाषण्डशिखण्डाः । अयं षण्डः । ११३ वंशांशपुरोडाशाः । अयं वंशः । पुरो दाश्यते पुरोडाशः । कर्मणि घञ् । भवद्व्याख्यानयोः प्रकरणे 'पौरोडाशपुरोडाशात्ष्टन्' (सू १४४९) इति विकारप्रकरणे 'व्रीहेः पुरोडाशे' (सू १५२८) इति च निपातनात्प्रकृतसूत्र एव निपातनाद्वा दस्य डत्वम् । 'पुरोडाशभुजामिष्ट'मिति माघः । ११४ ह्रदकन्दकुन्दबुद्बुदशब्दाः । अयं ह्रदः । ११५ अर्घपथिमश्यूभुक्तिस्तम्बनितम्बपूगाः । अयमर्घः । ११६ पल्लवपल्वलकफरेफकटाहनिर्व्यूहमठमणितरङ्गतुरङ्गगन्धमृदङ्गसङ्गसमुद्गपुङ्खाः । अयं पल्लव इत्यादि । ११७ सारथ्यतिथिकुक्षिबस्तिपाण्यञ्जलयः । एते पुंसि । अयं सारथिः । इति पुंलिङ्गाधिकारः ।

अथ नपुंसकाधिकारः ।

११८ नपुंसकम् । अधिकारोऽयम् । ११९ भावे ल्युडन्तः । हसनम् । भावे किम् । पचनोऽग्निः । इध्मप्रव्रश्चनः कुठारः । १२० निष्ठा च । भावे या निष्ठा तदन्तं क्लीवं स्यात् । हसितम् । गीतम् । १२१ त्वष्यञौ तद्धितौ । शुक्लत्वम् । शौक्ल्यम् । ष्यञः षित्वसामर्थ्यात्पक्षे स्त्रीत्वम् । चातुर्यम् । चातुरी । सामप्रथम् । सामग्री । औचित्यम् । औचिती । १२२ कर्मणि च ब्राह्मणादिगुणवचनेभ्यः । ब्राह्मणस्य कर्म ब्राह्मण्यम् । १२३ यद्यढग्यगञण्वुञ्छाश्च भावकर्मणि । एतदन्तानि क्लीबानि । 'स्तेनाद्यन्नलोपश्च' (सू १७९०) । स्ते-

---

धानत्वेन क्लीबत्वं प्राप्तं तन्निवृत्त्यर्थमित्यर्थः । अमरस्त्विति । एवं च [तन्मतेऽधंचादित्वयं द्रष्टव्यः । इति लिङ्गानुशासने पुंलिङ्गाधिकारः ।

भावे ल्युडन्तः । इदं च सूत्रं यद्यपि 'नपुंसके भावे क्तः' 'ल्युट् च' इत्यनेन गतार्थं तथापि स्पष्टार्थमुपात्तम् । एवमन्तग्रहणं चेति बोध्यम् । इध्मप्रव्रश्चन इति । अत्र करणे ल्युट् । निष्ठा च । अत्र निष्ठापदं क्तस्य बोधकम् । इदमपि सूत्रं 'नपुंसके भावे क्तः'इत्यनेन गतार्थम् । प्रत्ययग्रहणे तदन्तस्य ग्रहणम् । त्वष्यञौ तद्धितौ । भावे इत्यनुवर्तते । यद्यपि 'तस्य भावः-' इति सूत्रे भावशब्दः प्रकृतिजन्यबोधीयप्रकारतात्पर्यपरः । 'भावे ल्युडन्तः' इत्यत्र तु भावशब्दो भावनाबोधक इति भेदस्तथापीह भावशब्दः शब्दाधिकारेणाऽन्यार्थको द्रष्टव्यः । कर्मणि च । चाद्भावे । त्वष्यञाविति । स्त्रियामनुवर्तते स्तेनाद्यन्नलोपश्चेति । यद्यपीदं सूत्रं प्राग्व्याख्यातमेव तथापीतः प्र-

यम्। 'सख्युर्यः' (सू १७९१)। सख्यम्। 'कपिज्ञात्योर्ढक्' (सू १७९२)। कापेयम्। 'पत्यन्तपुरोहितादिभ्यो यक्' (सू १७९३)। आधिपत्यम्। 'प्राणभृज्जातिवयोवचनोद्गात्रादिभ्योऽञ्' (सू १७९४)। औष्ट्रम्। 'हायनान्तयुवादिभ्योऽण्' (सू १७९५)। द्वैहायनम्। 'द्वन्द्वमनोज्ञादिभ्यो वुञ्' (सू १७९८)। पितापुत्रकम्। 'होत्राभ्यश्छः' (सू १८००)। अच्छावाकीयम्। 'अव्ययीभावः' (सू ६५९) अधिस्त्रि। **१२४ द्वन्द्वैकत्वम्**। पाणिपादम्। **१२५ अभाषायां हेमन्तशिशिरावहोरात्रे च**। स्पष्टम्। **१२६ अनञ्कर्मधारयस्तत्पुरुषः**। अधिकारोऽयम्। **१२७ अनल्पे छाया**। शरच्छायम्। **१२८ राज्ञोऽमनुष्यपूर्वा सभा**। इनसभमित्यादि। **१२९ सुरासेनाच्छायाशालानिशाः स्त्रियां च**। **१३० परवत्**। अन्यस्तत्पुरुषः परवल्लिङ्गः स्यात्। रात्राह्नाहाः पुंसि। **१३१ अपथपुण्याहे नपुंसके**। **१३२ संख्यापूर्वा रात्रिः**। त्रिरात्रम्। संख्यापूर्वेति किम्। सर्वरात्रः। **१३३ द्विगुः स्त्रियां च**। व्यवस्थया। पञ्चमूली। त्रिभुवनम्। **१३४ इसुसन्तः**। हविः। धनुः। **१३५ अर्चिः स्त्रियां च**। इसन्तत्वेऽपि अर्चिः स्त्रियां नपुंसके च स्यात्। इयमिदं वा अर्चिः। **१३६ छदिः स्त्रियामेव**। इयं छदिः। छाद्यतेऽनेनेति छादेश्चुरादिण्यन्तादर्चिशुचीत्यादिना इस्। इस्मन्नित्यादिना ह्रस्वः। 'पटलं छदि'रित्यमरः। तत्र पटल-

---

मिति कथितनपुंसकत्वस्पष्टप्रतिपत्त्यर्थमिहोपादानमिति बोध्यम्। द्वन्द्वैकत्वमिति। 'द्वन्द्वश्च प्राणितूर्य-' इत्यादिना, येषां द्वन्द्वानामेकवद्भावो भवति ते द्वन्द्वा नसपुंसकत्वाभिधायका बोध्या इत्यर्थः। अभाषायामिति। इदमपि सूत्रं 'हेमन्तशिशिरावहोरात्रे च छन्दसि' इति सूत्रे छन्दसीत्युपादानेन गतार्थम्। 'हेमन्तशिशिरा'वित्यत्र तु निर्देशादेव पुंस्त्वप्रतिपादकता बोध्या। स्त्रियां चेति। चेन नपुंसकमित्यनुकर्षः। 'विभाषा सेना-' इति विभाषापदोपादानेनेदमपि गतार्थम्। परवदिति। 'परवल्लिङ्गम्-' इति सूत्रोपात्त इत्यर्थः। परवदिति सूत्रस्थ स्मारकमिह परवदिति, नत्विदमपूर्वम्। तत्पुरुष इति द्वन्द्वस्याप्युपलक्षणम्। संख्यापूर्वा रात्रिः। 'संख्यापूर्वं रात्रं क्लीबम्' इत्यस्यानुवादः। द्विगुः स्त्रियां चेति। चात्रपुंसकमिति सम्बध्यते। इदमपि 'अकारान्तोत्तरपदो द्विगुः स्त्रियामिष्टः' 'पात्राद्यन्तस्य न' इत्यनेन गतार्थम्। अत एवाह—व्यवस्थयेति। इसुसन्तः। 'अर्चिशुचिहुसृपिच्छादिभ्य इसिः', 'जनेरुसिः' एतयोरुपात्तावेतौ। छदिः स्त्रियामेवेति। यद्यपि छदिरित्यस्येसन्तत्वेन नपुंसकत्वे प्राप्ते विशेषोपादानेन स्त्रियामित्यनेनैव नित्यस्त्रीत्वलाभे सिद्धे एवकारो व्यर्थः, तथापि 'पटलं छदिः' इत्यमरग्रन्थदर्शनेन साहचर्यान्नपुंसकत्वमपीति भ्रान्तिः स्यात्तन्निवारणायैवकारः। अत

साहचर्याच्छदिषः क्लीबतां वदन्तोऽमरव्याख्यातार उपेक्ष्याः । १३७ **मुखनयनलोहवनमांसरुधिरकार्मुकविवरजलहलधनाऽन्नाभिधानानि ।** एतेषामभिधायकानि क्लीबे स्युः । मुखमाननम् । नयनं लोचनम् । लोहं कालम् । वनं गहनम् । मांसमामिषम् । रुधिरं रक्तम् । कार्मुकं शरासनम् । विवरं बिलम् । जलं वारि । हलं लाङ्गलम् । धनं द्रविणम् । अन्नमशनम् । अस्यापवादानाह त्रिसूत्र्या । १३८ **सीरार्थौदनाः पुंसि । १३९ वक्त्रनेत्राऽरण्यगाण्डीवानि पुंसि च ।** वक्त्री वक्त्रम् । नेत्रो नेत्रम् । अरण्योऽरण्यम् । गाण्डीवो गाण्डीवम् । १४० **अटवी स्त्रियाम् । १४१ लोपधः । कुलम् । कूलम् । स्थलम् । १४२ तूलोपलतालकुसूलतरलकम्बलदेवलवृषलाः पुंसि ।** अयं तूलः । १४३ **शीलमूलमङ्गलसालकमलतलमुसलकुण्डलपललमृणालवालबालनिगलपलालबिडालखिलशूलाः पुंसि च ।** चात् क्लीबे । शीलं शील इत्यादि । १४४ **शतादिः संख्या ।** शतम् । सहस्रम् । शतादिरिति किम् । एको द्वौ बहवः । संख्येति किम् । शतशृङ्गो नाम पर्वतः । १४५ **शताऽयुतप्रयुताः पुंसि च ।** अयं शतः । इदं शतमित्यादि । **लक्षा कोटिः स्त्रियाम् ।** इयं लक्षा । इयं कोटिः । 'वालक्षा नियुतं च त'दित्यमरात् क्लीबेऽपि लक्षम् । १४७ **शङ्कु पुंसि ।** १४८ **सहस्रः क्वचित् ।** अयं सहस्रः । इदं सहस्रम् । १४९ **मन्द्रधक्कोऽकर्तरि ।** मन्प्रत्ययान्तो द्रधक्कः क्लीबः स्यान्न

एव वक्ष्यति–अमरव्याख्यातार इति । अस्येति । 'मुखनयन–' इति सूत्रस्य । सीरार्थौदनाः । सीरशब्दो हलाभिधानः । अर्थशब्दस्तु धनशब्दस्य पर्यायः । ओदनशब्दोऽन्नवाची । भिस्साभिस्सटाशब्दौ तु दग्धान्नपराविति तयोः स्त्रीत्वेऽपि न क्षतिरिति । अटवी स्त्रियाम् । अयं वनाभिधानः । संख्येति । संख्यावाचीत्यर्थः । शताऽयुत । अयं शतशब्दोऽनन्तवाची । 'शतादिः–' इति पूर्वसूत्रापवादोऽयम् । लक्षा कोटिः । एतयोरपि संख्यावाचकत्वान्नपुंसकत्वे प्राप्ते इदम् । क्लीबेपीति । एवं चायमर्थोदिषु द्रष्टव्यः । शङ्कुः पुंसि । अस्य शङ्कुशब्दस्य संख्याविशेषवाचकत्वात् 'शतादिः संख्या' इति नपुंसकत्वे प्राप्तेऽस्यारम्भः । सहस्रः क्वचिदिति । क्वचिदिति अर्थविशेष इत्यर्थः । 'सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्' इत्यत्रऽनन्तवाची । नचाऽत्र सहस्रशब्दस्यानन्तपरत्वे संख्यापरत्वाऽभावेन सहस्रपादित्यत्र 'संख्यासुपूर्वस्य' इति पादशब्दस्यान्त्यलोपो न स्यादिति वाच्यम् । भिषतविषयपरिच्छेदकरूपसंख्यात्वाऽभावेऽपि यथाकथञ्चित्संख्यायाः प्रतीतिरिति लोपः । वस्तुतस्तु छान्दसो लोप इति तूचितम् । मन्द्रधक्कः । अत्र मन्प्रत्ययः श्रूयमाणनकाराक्तः 'सर्वधातुभ्यो मनिन्' इति विहितः ।

तु कर्तरि । वर्म । चर्म । द्वयच्कः किम् । अणिमा । महिमा । अकर्तरि किम् । ददाति इति दामा । १५० **ब्रह्मन् पुंसि च** । अयं ब्रह्मा । इदं ब्रह्म । १५१ **नामरोमणो नपुंसके** । मनद्व्यच्क इत्यस्यायं प्रपञ्चः । १५२ **असन्तो द्व्यच्कः** । यशः । मनः । तपः । द्व्यच्कः किम् । चन्द्रमाः । १५३ **अप्सराः स्त्रियाम्** । एता अप्सरसः । प्रायेणायं बहुवचनान्तः । १५४ **त्रान्तः** । पत्रम् । क्षत्रम् । १५५ **यात्रामात्राभस्त्रादंष्ट्रावरत्राः स्त्रियामेव** । १५६ **भृत्रामित्रछात्रपुत्रमन्त्रवृत्रमेढ्रोष्ट्राः पुंसि** । अयं भृत्रः । न मित्रममित्रः । 'तस्य मित्राण्यमित्रास्ते' इति माघः । 'स्यातामसित्रौ मित्रे चे'ति च । यत्तु 'द्विषोऽमित्रे' इति सूत्रे हरदत्तेनोक्तम् । 'अमेर्द्विषदित्यौणादिक इत्रच्' । अमेरमित्रम् । मित्रस्य व्यथयेदित्यादौ मध्योदात्तस्तु चिन्त्यः । नञ्समासेऽप्येवम् । परवल्लिङ्गतापि स्यादिति तु तत्र दोषान्तरमिति । तत्प्रकृतसूत्राऽपर्यालोचनमूलकम् । स्वरदोषोद्भावनमपि 'नञो जरमरमित्रमृता' इति षाष्ठसूत्राऽस्मरणमूलकमिति दिक् । १५७ **पत्रपात्रपवित्रसूत्रच्छत्राः पुंसि च** । १५८ **बलकुसुमशुल्बपत्तनरणाभिधानानि** । बलं वीर्यम् । १५९ **पद्मकमलोत्पलानि पुंसि च** । पद्मादयः शब्दाः कुसुमाभिधायित्वेऽपि द्विलिङ्गाः स्युः । अमरोप्याह–'वा पुंसि पद्मं नलि-

---

चर्म वर्मेति । चरादिधातोर्मनिन्प्रत्ययः । बाहुलकादिडभावः । अणिमादौ ष्विट् । दामेत्यत्रापि 'सर्वधातुभ्यो मनिन्' इत्यनेनैव मनिन्, परं त्वयं विशेषः । उणादिप्रत्ययान्तानां संज्ञाशब्दपरत्वेन यादृशी व्युत्पत्तिर्यत्रोचिता सा कल्पनीयेति कर्तर्यपि प्रत्ययः सम्भवतीति । ब्रह्मेति । 'बृहेर्नोच्च' इति मनिन्प्रत्ययः । असन्तो द्व्यच्कः । सर्वधातुभ्योऽसुन्' इति विहितोऽसुन् । तस्याऽसुनो येष्वनुवृत्तिस्तदन्ता अपि बोध्याः । 'चन्द्रेर्मो डित्' इति विहिताऽसुन्प्रत्ययान्तश्चन्द्रमस् शब्दोऽप्यसुन्नन्तः । कॄवृग्रहणे गतिकारकपूर्वस्यापि ग्रहणात् । एवमप्सराःशब्दोऽपि । त्रान्तः । त्रप्रत्ययान्तो नपुंसकं स्यात् । 'सर्वधातुभ्यष्ट्रन्' इति ष्ट्रनप्रत्ययो नकारानुबन्धक इति । यात्रामात्रा । 'हुयामा–' इति विहितस्त्रन्प्रत्ययोऽपि त्रप्रहणेन गृह्यत इति नपुंसकत्वे प्राप्तेऽस्यारम्भः । एवकारो न्यायसिद्धबाध्यबाधकभावानुवादकः । भृत्रामित्र पूर्वस्यापवादः । यत्विति । दोषान्तरमित्यन्ता तदुक्तिः । मध्योदात्तः, मकारेकारस्य प्रत्ययाद्युदात्तत्वेन मध्योदात्त इति तद्भावः । चिन्त्य इति । चित्त्वस्य सत्त्वात् । नञ्समित्रशब्दो नेत्रन्तः किन्तु 'अमिचिमि–' इति धातुविहितक्त्रान्तमित्रशब्देन नञः समासे सति सिद्ध इत्याह—नञ्समासेऽप्येवमिति । अन्तोदात्त इत्यर्थः । परवल्लिङ्गतेति । एवं सति नपुंसकत्वं स्यात् । हरदत्तोक्तं दूषयति—तत्प्रकृतेत्यादिना । नञो जरमरेति । यदि तु न मित्रम् अमित्र इति नञ्समासस्तदा न 'नञो जरमरमित्र–' इत्यस्य प्राप्तिस्तस्य बहुव्री-

नमि'ति एवं चार्धर्चादिसूत्रे तु 'जलजे पद्मं नपुंसकमेवे'ति वृत्तिग्रन्थो मतान्तरेण नेयः। १६० आहवसंग्रामौ पुंसि। १६१ आजिः स्त्रियामेव। १६२ फलजातिः। फलजातिवाची शब्दो नपुंसकं स्यात्। आमलकम्। आम्रम्। १६३ वृक्षजातिः स्त्रियामेव। क्वचिदेवेदम्। हरीतकी। १६४ विषयज्ञगत्सकृत्शकन्पूषत्शकृद्यकृदुदश्वितः। एते क्लीबाः स्युः। १६५ नवनीताऽवतानऽनृताऽमृतनिमित्तवित्तचित्तपित्तव्रतरजतवृत्तपलितानि। १६६ श्राद्धकुलिशदंवपोठकुण्डाङ्काङ्कदधिसक्थ्यक्ष्यास्यास्पदाकाशकणवबीजानि। एतानि क्लीबे स्युः। १६७ दैवं पुंसि च। दैवम्। दैवः। १६८ धान्याऽयसस्यरूप्यपण्यवर्ण्यधृष्यहव्यकव्याऽयसत्यापत्यमूल्यशिक्यकुड्यमद्यहर्म्यतुर्यसन्यानि। इदं धान्यमित्यादि। १६९ द्वन्द्वबर्हदुःखबडिशपिच्छबिम्बकुटुम्बकवचवरशरवृन्दारकाणि। १७० अक्षमिन्द्रिये। इन्द्रिये किम्। रथाङ्गादौ मा भूत्। इति नपुंसकाधिकारः।

अथ स्त्रीपुंसाधिकारः।

१७१ स्त्रीपुंसयोः। अधिकारोऽयम्। १७२ गोमणियष्टिमुष्टिपाटलिबस्तिशाल्मलित्रुटिमसिमरोचयः। इयमयं वा गौः। १७३ मृत्युस्त्रीधुकर्कन्धुकिष्कुकण्डुरेणवः। इयमयं वा मृत्युः। १७४ गुणवचनमुकारान्तं नपुंसकं च। त्रिलिङ्गमित्यर्थः। पटु। पटुः। पटुवी। १७५ अपत्याथस्तद्धिते। औपगवः। औपगवी। इति स्त्रीपुंसाधिकारः।

अथ पुंनपुंसकाधिकारः।

१७६ पुन्नपुंसकयोः। अधिकारोऽयम्। १७७ घृतभूतमुस्तद्वेलितैरावत-

हिंसमासे प्रवृत्तेरिति बोध्यम्। कुसुमाभिधायित्वेति। वस्तुतः कुसुमाभिधायित्वेऽपीत्यर्थः। यदि तु कुसुमविशेषाभिधायकोऽयं नतु कुसुमशब्दशक्यतावच्छेदकावच्छिन्नशक्त इति विभाव्यते तदात्वपूर्वमेवोभयलिङ्गत्वाभिधानमिति मतान्तरेण। जलजशब्दस्य जलजातकुसुमान्तराभिधायकत्वमित्यभिप्रायकमतान्तरेणेत्यर्थः। आहवसङ्ग्रामौ पुंसि। एतयोर्युद्धाभिधायकत्वाच्चपुंसकत्वे प्राप्ते। एवमाजिशब्दोऽपि। फलजातिरिति। फलोपादानाद्वृक्षपरस्यामलकीशब्दस्य स्त्रीत्वेऽपि न क्षतिः। हरीतकीति। हरितक्याः फलानि हरीतक्यः। 'हरीतक्यादिषु व्यक्तिः' इति स्त्रीत्वाऽभिधानात्। रथाङ्गादाविति। आदिना देवनाऽक्षपरिग्रहः॥ इति लिङ्गानुशासने नपुंसकाधिकारः।

स्त्रीपुंसयोः। अधिकारोऽयम्। नपुंसकं चेति। चात्स्त्रीपुंसयोः।

इति लिङ्गानुशासने स्त्रीपुंसाधिकारः।

पुस्तकबुस्तलोहिताः । अयं घृतः । इदं घृतम् । १७८ शृङ्गार्घनिदाघोद्यमशल्यदृढाः । अयं शृङ्गः । इदं शृङ्गम् । १७९ व्रजकुञ्जकुथकूर्चप्रस्थदर्भार्धर्चदर्भपुच्छाः । अयं व्रजः । इदं व्रजम् । १८० कबन्धौषधायुधान्ताः । स्पष्टम् । १८१ दण्डमण्डखण्डशमस्कन्धवपार्श्वकाशकुशकाशाङ्कुशकुलिशाः । एते पुन्नपुंसकयोः स्युः । 'कुशो रामसुते दर्भे योक्त्रे द्वीपे कुशं जले' इति विश्वः । शलाकावाची तु स्त्रियाम् । तथा च 'जानपद—' (सू ५००) इति सूत्रेणाऽयोविकारे ङीषि कुशी । दारुणि तु टाप् । 'कुशा वानस्पत्याः स्थ ता मा पातेति श्रुतिः । 'अतः कृकमि–' (सू १६०) इति सूत्रे कुशाकर्णीष्विति प्रयोगश्च । व्याससूत्रे च । 'हानौ तूपायनशब्दे शेषत्वात्कुशाच्छन्द' इति । तत्र शारीरिकभाष्येऽप्येवम् । एवं च श्रुतिसूत्रभाष्याणामेकवाक्यत्वे स्थिते आच्छन्द इत्याद्यूपश्लेषादिपरो भामतीग्रन्थः प्रौढिवादमात्रपर इति विभावनीयं बहुश्रुतैः । १८२ गृहमेहदेहपट्टपटहाष्टापदाम्बुदककुदाश्च । इति पुंनपुंसकाधिकारः ।

अथ अविशिष्टलिङ्गाधिकारः ।

१८३ अविशिष्टलिङ्गम् । १८४ अव्ययं कतियुष्मदः । १८५ षण्णन्ता संख्या । शिष्टा परवत् । एकः पुरुषः । एका स्त्री । एकं कुलम् । १८६ गुणवचनं च । शुक्लः पटः । शुक्ला पटी । शुक्लं वस्त्रम् । १८७ कृत्याश्च । १८८ करणाधिकरणयोर्ल्युट् च । १८९ सर्वादीनि सर्वनामानि । स्पष्टार्थेयं त्रिसूत्री । इति लिङ्गानुशासनं समाप्तम् ।

इति श्रीभट्टोजिदीक्षितविरचिता वैयाकरणसिद्धान्तकौमुदी सम्पूर्णा ॥

शलाकावाचीति । सा च शलाका काष्ठादिनिर्मिता । तत्र मानमाह—तथाचेति ।
इति पुंनपुंसकाधिकारः ।

अविशिष्टलिङ्गम् । तल्लिङ्गवाचकताप्रयुक्तकार्यविशेषशून्यम् । शिष्टा इति । पूर्वोक्तशब्दान्यतमत्वावच्छिन्नप्रतियोगिताकभेदवन्तः । परवदिति । विशेष्यवदित्यर्थः । गुणवचनं च । परवदित्यनुवर्तते । कृत्याश्च । कृत्यप्रत्ययान्ताः परवद्वोध्याः । । सर्वादीनि सर्वनामानि । सर्वनामसंज्ञकानि सर्वादीनि परवद्वोध्यानि । स्पष्टार्थेति । लोकव्युत्पत्त्यैव तत्तल्लिङ्गाभिधानसिद्धत्वात् । अत एव 'लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्य' इति भगवता भाष्यकृतोक्तम् । तेन यौगिकेषु शब्देषु लोकव्युत्पत्तिरेव लिङ्गाभिधाने प्रमाणमिति सिद्धम् । इति लिङ्गानुशासनविवरणम् ।

इति श्रीमदनन्तकल्याणसद्गुणनिधानाखिलपण्डितसार्वभौमभूमण्डलसंचारिविमलतरानवद्यसद्यशः पार्वणपीयूषभान्वगरस्यकुलवंद्यावतंसश्रीमद्भवदेवमिश्रात्मजभैरवमिश्रप्रणीतं लिङ्गानुशासनव्याख्यानं सम्पूर्णम् ।

संपूर्णा चेयं सिद्धान्तकौमुदी ।

॥ श्रीः ॥

सिद्धान्तकौमुदीपरिशिष्टानि ।

अथ पाणिनीयशिक्षा १

अथ शिक्षां प्रवक्ष्यामि पाणिनीयं मतं यथा । शास्त्रानुपूर्वं तद्विद्याद्यथोक्तं लोकवेदयोः ॥ १ ॥ प्रसिद्धमपि शब्दार्थमविज्ञातमबुद्धिभिः । पुनर्व्यक्तीकरिष्यामि वाचं उच्चारणे विधिम् ॥ २ ॥ त्रिषष्टिश्चतुःषष्टिर्वर्णाः शम्भुमते मताः । प्राकृते संस्कृते चापि स्वयं प्रोक्ताः स्वयम्भुवा ॥३॥ स्वरा विंशतिरेकश्च स्पर्शानां पञ्चविंशतिः । यादयश्च स्मृता ह्यष्टौ चत्वारश्च यमाः स्मृताः ॥४॥ अनुस्वारो विसर्गश्च ✕क✕पौ चापि पराश्रितौ । ह्रस्वदीर्घप्लुतश्चेति विज्ञेयो लृकारः प्लुत एव च ॥५॥ ॥१॥ आत्मा बुद्ध्या समेत्यार्थान्मनो युङ्क्ते विवक्षया । मनः कायाग्निमाहन्ति स प्रेरयति मारुतम् ॥६॥ मारुतस्तूरसि चरन्मन्द्रं जनयति स्वरम् । प्रातःसवनयोगं तं छन्दो गायत्रमाश्रितम् ॥७॥ कण्ठे माध्यन्दिनयुगं मध्यमं त्रैष्टुभानुगम् । तारं तार्तीयसवनं शीर्षण्यं जागतानुगम् ॥८॥ सोदीर्णो मूर्ध्न्यभिहतो वक्त्रमापद्य मारुतः । वर्णाञ्जनयते तेषां विभागः पञ्चधा स्मृतः ॥ ९ ॥ स्वरतः कालतः स्थानात्प्रयत्नानुप्रदानतः । इति वर्णविदः प्राहुर्निपुणं तन्निबोधत ॥१०॥ ॥२॥ उदात्तश्चानुदात्तश्च स्वरितश्च स्वराश्रयः । ह्रस्वो दीर्घः प्लुत इति कालतो नियमा अमी ॥११॥ उदात्ते निषादगान्धारावनुदात्त ऋषभधैवतौ । स्वरितप्रभवा ह्येते षड्जमध्यमपञ्चमाः ॥ १२ ॥ अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा । जिह्वामूलं च दन्ताश्च नासिकोष्ठौ च तालु च ॥१३॥ ओभावश्च विवृत्तिश्च शवसा रेफ एव च । जिह्वामूलमुपध्मा च गतिरष्टविधोष्मणः ॥१४॥ यथोभावप्रसन्नावानुकारादिपरं पदम् । स्वराग्रं तादृशं विद्याद्यदग्रयमनुयुक्तमूष्मणः ॥१५॥ ॥३॥ हकारं पञ्चमैर्युक्तमन्तःस्थाभिश्च संयुतम् । औरस्यं तं विजानीयात्कण्ठ्यमाहुरसंयुतम् ॥१६॥ कण्ठ्यावहाविचुवश्लास्तालव्या ओइजावुपू । स्युर्मूर्धन्या ऋटुरषा दन्त्या लृतुलसाः स्मृताः ॥ १७॥ जिह्वामूले तु कु✕प्रोक्तो दन्त्योष्ठ्यौ वः स्मृतो बुधैः । एऐ तु कण्ठतालव्यौ ओऔ कण्ठोष्ठजौ स्मृतौ ॥ १८ ॥ अर्धमात्रा तु कण्ठ्या स्यादेकारैकारयोर्भवेत् । ओकारौकारयोर्मात्रा तयोर्विवृतसंवृतम् ॥१९॥ संवृतं मात्रिकं ज्ञेयं विवृतं तु द्विमात्रिकम् । घोषा वा संवृताः सर्वे अघोषा विवृताः स्मृताः ॥२०॥ ॥४॥ स्वराणामूष्मणां चैव विवृतं करणं स्मृतम् । तेभ्योऽपि विवृतावेकौ ताभ्यामैचौ तथैव च ॥२१॥ अनुस्वारयमानां च नासिकास्थानमुच्यते । अयोगवाहा विज्ञेया आश्रयस्थानभागिनः ॥२२॥ अलाबुधीव्यानिर्घोषो दन्त्यमूष्मयस्वराननु । अनुस्वारस्तु कर्तव्यो निःश्वासो ह्रस्व एव च ॥ २३ ॥ अनुस्वारे विवृत्तौ तु विरामे चाक्षरद्वये । द्विरोष्ठ्यौ तु विगृह्णीयाद्यत्रोकारवकारयोः ॥ २४ ॥ व्याघ्री यथा हरेत्पुत्रान्दं-

ष्ट्राभ्यां न च पीडयेत् । भीता पतनभेदाभ्यां तद्वद्वर्णान्प्रयोजयेत् ॥२५॥ ॥२॥ यथा सौराष्ट्रिका नारी तर्कं हरत्यभिभाषते । एवं रक्षाः प्रयोक्तव्याः खे अर इव खेदया ॥२६॥ रक्तवर्णं प्रयुञ्जीरन्नोग्रसेत्पूर्वमक्षरम् । दीर्घस्वरं प्रयुञ्जाथाप्यक्षाक्षिक्ष्यमाचरेत् ॥२७॥ ह्रस्वे चैकमात्रस्त्वर्धमात्रस्तु मूर्धनि । नासिकायां तथार्धं च रक्तस्यैवं द्विमात्रता ॥२८॥ ह्रस्वाद्दुःकरे तिङन्तात्स्वेन समनुस्वरन् । मादवं च द्विमात्रं च जवन्त्यां इति निदर्शनम् ॥२९॥ मध्ये तु कम्पयेत्कम्पमुभौ पार्श्वौ समौ भवेत् । सरङ्गं कम्पयेत्कम्पं रथीवेति निदर्शनम् ॥३०॥ एवं वर्णाः प्रयोक्तव्या नाव्यक्ता न च पीडिताः । सम्यग्वर्णप्रयोगेण ब्रह्मलोके महीयते ॥३१॥ ॥६॥ गीती शीघ्री शिरःकम्पी,तथा लिखितपाठकः । अनर्थज्ञोऽल्पकण्ठश्च षडेते पाठकाधमाः ॥३२॥ माधुर्यमक्षरव्यक्तिः पदच्छेदस्तु सुस्वरः । धैर्यं लयसमर्थं च षडेते पाठका गुणाः ॥३३॥ शङ्कितं भीतमुद्घुष्टमव्यक्तमनुनासिकम् । काकस्वरं शिरसि गतं तथा स्थानविवर्जितम् ॥३४॥ उपांशु दष्टं त्वरितं निरस्तं विलम्बितं गद्गदितं प्रगीतम् । निष्पीडितं प्रस्तपदाक्षरं च वदेच्च दीनं न तु सानुनास्यम् ॥३५॥ प्रातः पठेच्चित्यमुरःस्थितेन स्वरेण शार्दूलरुतोपमेन । मध्यन्दिने कण्ठगतेन चैव चक्राह्वकूजितसन्निभेन ॥३६॥ तारं तु विद्यात्सवनं तृतीयं शिरोगतं तच्च सदा प्रयोज्यम् । मयूरहंसान्यभृतस्वराणां तुल्येन नादेन शिरःस्थितेन ॥३७॥७॥ अघोऽस्पृष्टा यणस्त्वीषन्नेमस्पृष्टाः शलः स्मृताः । शेषाः स्पृष्टा हलः प्रोक्ता निबोधानुप्रदानतः ॥३८॥ अमोनुनासिका नद्यो नादिनो हसषः स्मृताः । ईषच्छ्वासाश्चरो वश्चाद्धोर्धामैतत्प्रचक्षते । दाक्षीपुत्रः पाणिनिना येनेदं व्यापितं भुवि ॥४०॥ छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते । ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते ॥४१॥ शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम् । तस्मात्साङ्गमधीत्येव ब्रह्मलोके महीयते ॥४२॥ ॥८॥ उदात्तमाख्याति वृत्तोऽङ्गुलीनां प्रदेशिनीमूलनिविष्टमूर्धा । उपान्तमध्ये स्वरितं घृतं च कनिष्ठिकायामनुदात्तमेव ॥ ४३ ॥ उदात्तं प्रदेशिन्यां विद्यात्प्रचयं मध्यतोऽङ्गुलिम् । निहतं तु कनिष्ठिकायां स्वरितोपकनिष्ठिकाम् ॥४४॥ अन्तोदात्तमाद्युदात्तमुदात्तमनुदात्तं नीचस्वरितम् । मध्योदात्त स्वरितं द्व्युदात्तं त्र्युदात्तमिति नवपदशब्दा ॥४५॥ अग्निः सोमः प्रवो वीर्यं हविषां स्वबृहस्पतिरिन्द्राबृहस्पती । अग्निरित्यन्तोदात्तं सोम इत्याद्युदात्तं प्रेत्युदात्तं च इत्यनुदात्तं वीर्यं नीचस्वरितम् ॥४६॥ हविषां मध्योदात्तं स्वरिति स्वरितम् । बृहस्पतिरिति द्व्युदात्तमिन्द्राबृहस्पती इति त्र्युदात्तम् ॥४७॥ अनुदात्ता हृदि ज्ञेयो मूर्ध्न्युदात्त उदाहृतः । स्वरितः कण्ठमूलीयः सर्वास्ये प्रचयः स्मृतः ॥४८॥९॥ चाषस्तु वदते मात्रां द्विमात्रं खेव वायसः । शिखी रौति त्रिमात्रं तु नकुलस्त्वर्धमात्रकम् ॥ ४९ ॥ कुतीर्थादागतं दग्धमपवर्णं च शङ्कितम् । न तस्य पाठे मोक्षोऽस्ति पापाहेरिव किल्बिषात् ॥ ५० ॥ सुतीर्थादागतं व्यक्तं स्वाम्नाय्यं सुव्यवस्थितम् । सुस्वरेण सुवक्त्रेण प्रयुक्तं ब्रह्म राजते ॥ ५१ ॥ मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह । स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपरा-

धात् ॥१२॥ अवक्वरं हनायुष्यं विस्वरं व्याधिपीडितम् । अक्षताऽशङ्करूपेण वज्रं पतति मस्तके ॥९३॥ हस्तहीनं तु योऽधीते स्वरवर्णविवर्जितम् । ऋग्यजुःसाममिर्दग्धो विषोनिमधिगच्छति ॥९४॥ हस्तेन वेदं योऽधीते स्वरवर्णार्थसंयुतम् । ऋग्यजुःसाममिः पूतो ब्रह्मलोके महीयते ॥९५॥१०॥ शङ्करः शाङ्करीं प्रादाद्दाक्षीपुत्राय धीमते । वाङ्मयेभ्यः समाहृत्य देवीं वाचमिति स्थितिः ॥९६॥ येनाक्षरसमाम्नायमधिगम्य महेश्वरात् । कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः ॥९७॥ येन धौता गिरः पुंसां विमलैः शब्दवारिभिः । तमश्वाज्ञानजं भिन्नं तस्मै पाणिनये नमः ॥९८॥ अज्ञानान्धस्य लोकस्य ज्ञानाञ्जनशलाकया । चक्षुरुन्मीलितं येन तस्मै पाणिनये नमः ॥९९॥ त्रिनयनमभिमुखनिःसृतामिमां य इह पठेत्प्रयतश्च सदा द्विजः । स भवति धनधान्यपशुपुत्रकीर्तिमानतुलं च सुखं समश्नुते दिवीति दिवीति ॥१००॥११॥ अथ शिक्षामात्मोदात्तश्च हकारं स्वराणां यथा गीत्यवोस्पृष्टोदात्त चावस्तु शङ्कर एकादश ॥

इति पाणिनीयशिक्षा समाप्ता ॥

थ गणपाठः ।

प्रथमोऽध्यायः ।

२१३ सर्वादीनि सर्वनामानि १।१।२७ सर्व विश्व उभ उभय डतर डतम अन्य अन्यतर इतर त्वद् त्व नेम सम सिम । पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायाम् । स्वमज्ञातिधनाख्यायाम् । अन्तरं बहिर्योगोपसंव्यानयोः । त्यद् तद् यद् एतद् इदम् अदस् एक द्वि युष्मद् अस्मद् भवतु किम् । इति सर्वादिः ॥१॥ ४४७ स्वरादिनिपातमव्ययम् १।१।३७ स्वर् अन्तर् प्रातर । अन्तोदात्ताः । पुनर् सनुतर् उच्चैस् नीचैस् शनैस् ऋधक् ऋते युगपत् आरात् [अन्तिकात्] पृथक् । आद्युदात्ताः । ह्यस् श्वस् दिवा रात्रौ सायम् चिरम् मनाक् ईषत् [शश्वत्] ओषम् तूष्णीम् बहिस् [अधस्] अवस् समया निकषा स्वयम् मृषा नक्तम् नञ् हेतौ [हे है] इद्धा अद्धा सामि । अन्तोदात्ताः । वत् [५।१।११५] ब्राह्मणवत् क्षत्रियवत् सना सनत् सनात् उपधा तिरस् । आद्युदात्ता । अन्तरा । अन्तोदात्तः । अन्तरेण [मक्] ज्योक् [योक् नक्] कम् शम् सना सहसा [श्रद्धा] मनस् स्वधा वषट् विना नाना स्वस्ति अन्यत् अस्ति उपांशु क्षमा विहायसा दोषा मुधा दिष्ट्या वृथा मिथ्या । कृत्वातोसुन्कसुनः । कृन्मकारसन्ध्यक्षरान्तोऽव्ययीभावश्च । पुरा मिथो मिथस् प्रायस् मुहुस् प्रवाहुकम् प्रवाहिका आर्यहलम् अभीक्ष्णम् साकम् सार्धम् [सत्रम् समम्] नमस् हिरुक् । तसिलादयस्तद्धिता एधाञ्पर्यन्ताः [५।३।७-४६] अस्तसी कृत्वसुच् सुच् आस्थालौ । व्यर्थाश्च । [अथ] अम् आम् प्रताम् प्रतान् प्रकान् । आकृतिगणोऽयम् । तेनाग्नेऽपि । तथाहि माक् अम् कामम् [प्रकामम्] भूयस् परम् साक्षात् साचि (साचि) सत्यम् मंक्षु संवत् अवश्यम् सपदि प्रादुस् आविस् अनिशम् नित्यम् नित्यदा सदा अजस्रम् सन्ततम् उषा ओम् भूर् भुवर् झटिति तरसा सुष्ठु कु अञ्जसा अ मिथु (अमिथु) विथक्

भाजक् अम्बक् चिराय चिरम् चिररात्राय चिरस्य चिरेण चिरात् अल्पम् आनुषक् अनुषक् अनुषट् अग्नस् (अग्मस्) अग्नर् (अग्मर) स्थाने वरम् दुष्ठु वलात् शु अर्वाक् शुदि वदि इत्यादि । तसिलादयः प्राक्पाशपः (६।३।३६) शरप्रभृतयः प्राक्समासान्तेभ्यः [५।४।४३-६८] मान्तः कृत्वोर्थः । तसिवती । नानाभाविति ॥ इति स्वरादिः॥२॥ २० चादयोऽसत्त्वे १।४।५७ च वा ह अह एव एवम् नूनम् शश्वत् युगपत् भूयस् सूपत् कूपत् कुवित् नेत् चेत् चण् कच्चित् यत्र तत्र नह हन्त माकिम् माकीम् माकिर् नकिम् नकीम् नकिर् आकीम् माङ् नञ् तावत् यावत् त्वा त्वै द्वै ग्वै रै [रे] ओषट् वौषट् स्वाहा स्वधा ओम् तथा तथाहि खलु किल अथ सुष्ठु स्म अ इ उ ऋ ऌ ए ऐ ओ औ आदह उम् उकम् वेलायाम् मात्रायाम् यथा यत् तत् किम् पुरा वषा (वष्वा) धिक् हाहा हेहे (हहे) पाट् प्वाट् आहो उताहो हो अहो नो (नौ) अथो ननु मण्ये मिथ्या असि म्रूहि नु नु इति इव वत् वात् वम वत [सम् वसम् शिकम् सिकम्] सनुकं छंवट् (छंवट्) शङ्के शुकम् खम् सनात् सनुतर् नहिकम् सत्यम् ऋतम् अद्धा हद्धा नोचेत् नचेत् नहि जातु कथम् कुतः कुत्र अव अनु हा हे [है] आहोस्वित् शम् कम् खम् दिष्ट्या पशु नुट् सह (आनुषट्) आनुषक् अङ्क फट् ताजक् भाजक् अये भरे वाट् (चाटु) कुम् खुम् घुम् अम् ईम् साम् सिम् सि वै । उपसर्गविभक्तिस्वाप्रतिरूपकाश्च निपाताः । आकृतिगणोऽयम् । इति चादयः ॥३॥ २१ प्रादयः १।४।५८ प्र परा अप सम् अनु अव निस् निर् दुस् दुर् वि आङ् नि अधि अपि अति सु उद् अभि प्रति परि उप । इति प्रादयः ॥४॥ ७३२ ऊर्यादिच्विडाचश्च १।४।६१ ऊरी उरी तन्वी ताली आताली वेताली धूली धूसी शकला संशकला ध्वंसकला भ्रंसकला गुलुगुधा सजूस् फल फली विफली आकली आलोडी केवाली केवासी सेवासी पर्याली शेवाली वर्षाली अत्यूमशा वस्मशा मस्मसा मसमसा औषट् श्रौषट् वौषट् वषट् स्वाहा स्वधा वन्था प्रादुस् श्रत् अविस् । इत्यूर्यादयः ॥५॥ ७७५ साक्षात्प्रभृतीनि च १।४।७४ साक्षादू मिथ्या चिन्ता भद्रा रोचना आस्था अमा अद्धा प्राजर्या प्राजद्हा बीजर्या बीजद्हा संसर्या अर्थे लवणम् उष्णम् शीतम् उदकम् आर्द्रम् अग्नौ वशे विकसने प्रसहने तपने प्रादुस् नमस् । आकृतिगणोऽयम् । इति । साक्षात्प्रभृतयः ॥६॥ इति प्रथमोऽध्यायः ।

द्वितीयोऽध्यायः ।

६७१ तिष्ठद्गुप्रभृतीनि च २।१।१७ तिष्ठद्गु वहद्गु आयतीगवम् खलेयवम् खलेयुसम् लूनयवम् लूयमानयवम् पूतयवम् पूयमानयवम् संहृतयवम् संहियमाणयवम् संहृतयुसम् संहियमाणयुसम् समभूमि समपदाति सुषमम् विषमम् दुःषमम् निःषमम् अपसमम् आयतीसमम् [प्रौढम्] पापसमम् पुण्यसमम् प्राङ्मम् प्रत्यम् प्रमृगम् प्रदक्षिणम् [अपरदक्षिणम्] सम्प्रति असम्प्रति । इषप्रत्ययः समासान्तः । [५।३।१२०।५।४।१२८] ॥ इति तिष्ठद्गुप्रभृतयः ॥७॥ ७१७ सप्तमी शौण्डैः २।१।४० शौण्ड धूर्त कितव व्याड प्रवीण संवीत अन्तर अधि पटु पण्डित कुशल चपल निपुण । इति शौण्डादयः ॥८॥

७२५ पात्रेसमितादयश्च २।१।८४ पात्रेसमिताः पात्रेबहुलाः उदुम्बरमशकः उदुम्बरकृमिः कूपकच्छपः अवटकच्छपः कूपमण्डूकः कुम्भमण्डूकः उपमानमण्डूकः नगरकाकः नगरवायसः मातरिपुरुषः पिण्डीशूरः पितरिशूरः गेहेशूरः गेहेनर्दी गेहेधृष्टः गेहेविजिती गेहेव्याडः गेहेमेही गेहेदाही गेहेदसः गेहेधृष्टः गर्भेतृसः आखनिकखकः गोष्ठेशूरः गोष्ठेविजिती गोष्ठेचवेडी गोष्ठेपटु गोष्ठेपण्डितः गोष्ठेप्रगल्भः कर्णेटिरिटिरा कर्णेचुरचुरा । आकृतिगणोऽयम् । इति पात्रे समितादयः ॥९॥ ७२५ उपमितं व्याघ्रादिभिः सामान्याप्रयोगे २।१।५३। व्याघ्र सिंह ऋक्ष ऋषभ चन्दन वृक वृष वराह हस्तिन् तक्ष कुञ्जर तरु पुरुष पुण्डरीक पलाश कितव । इति व्याघ्रादयः ॥ १० आकृतिगणोऽयम् । तेन मुखपद्मम् मुखकमलम् करकिसलयम् पार्थिवचन्द्रः इत्यादि ॥५॥ ७३८ श्रेण्यादयः कृतादिभिः २।१।५९ (१)श्रेणि पूग सुकुन्द राशि निचय विषय निचय पर इन्द्र देव मुण्डभूत श्रमण वदान्य अध्यापक अभिरूपक ब्राह्मण क्षत्रिय [विशिष्ट] पटु पण्डित कुशल चपल निपुण कृपण ॥ इत्येते श्रेण्यादयः ॥११॥ (२)कृत मित मतभूत उक्त [युक्त, समाज्ञात समाम्नात समाख्यात संभावित[संसेवि]अवधारित अवकल्पित निराकृत उपकृत उपाकृत [हृष्ट कलित दलित उद्गाहित विश्रुत उदित] । आकृतिगणोऽयम् । इति कृतादयः ॥१२॥ ७३९ *शाकपार्थिवादीनामुपसंख्यानम्* २।१।६० शाकपार्थिव कुतुपसौश्रुत अजातौदवलि । आकृतिगणोयम् । कृताकृत भुक्तविभुक्त पीतविपीत गतप्रत्यागत यातानुयात क्रयाक्रयिका पुटापुटिका फलाफलिका मानोन्मानिका । इति शाकपार्थिवादयः ॥१३॥ ७५२ कुमारः श्रमणादिभिः ३।१।७० श्रमणा प्रव्रजिता कुलटा गर्भिणी तापसी दासी बन्धकी अध्यापक अभिरूपक पण्डित पटु मृदु कुशल चपल निपुण ॥ इति श्रमणादयः ॥१४॥ ७५४ मयूरव्यंसकादयश्च २।१।७२ मयूरव्यंसक ब्राह्मव्यंसक कम्बोजमुण्ड पचमुण्ड । छन्दसि । हस्तेगृह्य(हस्तगृह्य) पादेगृह्य (पादगृह्य) लाङ्गूलेगृह्य (लाङ्गूलगृह्य) पुनर्दाय । पहीलादयोऽव्ययपदार्थे । पहीइं पहियइं च पहिवाणिजा क्रिया अपेहिवाणिजा प्रेहिवाणिजा पहिस्वागता अपेहिस्वागता पहिद्वितीया अपेहिद्वितीया प्रेहिद्वितीया पहिकट्टा अपेहिकट्टा प्रेहिकट्टा आहरकट्टा प्रेहिकर्दमा प्रोहकर्दमाविधमचूडा उद्धमचूडा(उद्धरचूडा) आहरचेला आहरवसना[आहरसेना] आहरवनिता (आहरविनता) कृन्तविचक्षणा उद्धरोत्सूजा उद्धरावसृजा उद्धमविधमा उत्पचनिपचा उत्पतनिपता उच्चावचम् उच्चनीचम् आचोपचम् आचपराचम् [नखप्रचम्] निखप्रचम् अकिञ्चन इलात्वाकालक पीत्वास्थिरक भुक्त्वासुहित प्रोत्थपापीयान् उत्पत्यपाकला निपत्यरोहिणी निषण्णश्यामा अपेहिप्रघसा पहिविघसा हृदपञ्चमी हृद्वितीया । जहि कर्मणा बहुलमाभीक्ष्ण्ये कर्तारं चाभिद्योतयति । जहिजोढः । जहिजोढम् । जहिस्तब्धम् । जहिस्तब्धः । [उज्जहिरतब्धम्] । आख्यातमाख्यातेन क्रियासातत्ये । अश्नीतपिबता पचतभुञ्जता खादतमोदता खादतरमता । खादताचमता । आहरनिचया । आहरनिष्किरा । आचयनिष्किरा । उत्पचविपचा निम्धिलक्षया । कुन्थिविचक्षया पचक्षपया पचप्रकृरा । आकृतिगणोऽयम् । तेन । अकुतोभयः । काम्बोजीकः

कान्देशीकः। आहोपुरुषिका। अहमहमिका यदृच्छा एहिरेयादिरा उन्मृजावमृजा द्रव्यान्तरम्। अवश्यकार्यम्। इति मयूरव्यंसकादयः ॥१५॥ ७०३ याजकादिभिश्च २।२।९॥ याजक पूजक परिचारक परिवेषक परिषेचक स्नापक अध्यापक उत्साह उद्वर्तक होतृ भर्तृ रथगणक पत्तिगणक। इति याजकादयः ॥१६॥ ९०२ राजदन्तादिषु परम् २।२।३१॥ राजदन्तः अग्रवणम् क्षिप्तवासितम् नग्नमुषितम् सिक्तसंमृष्टम् मृष्टलुञ्चितम् अवक्लिन्नपक्वम् अर्पितोऽम्। उन्नगाढम् उलूखलमुसलम् तण्डुलकिण्वम् दधदुपक्वम् आरट्टवायनि। आरग्वायनबन्धकी। चित्ररथबाह्लीकम्। अवन्त्यश्मकम् शूद्रार्यम् स्नातकराजानौ विष्वक्सेनार्जुनौ अश्विभ्रवम् दारगवम् शब्दार्थौ धर्मार्थौ कामार्थौ अर्थशब्दौ अर्थधर्मौ अर्थकामौ वैकारिमतम् गाजवाजम्। गोजवाजम्। गोपालिधानपूलासम्। गोपालधानीपूलासम्। पूलासकारण्डम्। पूलासमकुरण्डम्। स्थूलासम्। स्थूलपूलासम्। उशीरबीजम्। [जिज्ञाद्यि] सिक्ताश्यम्। सिक्ताश्वश्यम्। चित्रास्वाती। चित्रस्वाती। भार्यापती दम्पती जम्पती जायापती पुत्रपती पुत्रपशू केशश्मश्रू शिरोबिजु। शरोबीजम्। शिरोजानु सर्पिर्मधुनी मधुसर्पिषी (आद्यन्तौ) अन्तादी गुणवृद्धी वृद्धिगुणौ। इति राजदन्तादयः ॥१७॥ ९०० वाहिताग्न्यादिषु २।२।३७ आहिताग्नि जातपुत्र जातदन्त जातश्मश्रु तैलपीत घृतपीत [मधुपीत] ऊढभार्य गतार्थं। आकृतिगणोऽयम्। तेन गडुकण्ठ अभ्युद्यत (अरमुद्यत) दण्डपाणिप्रभृतयोऽपि। इत्याहिताग्न्यादयः ॥१८॥ ७५१ कडाराः कर्मधारये २।२।३८॥ कडार गडुल खञ्ज खोड काण कुण्ठ खलति गौर वृद्ध भिक्षुक पिङ्ग पिङ्गल (पिङ्गल) तड तनु [जठर] बधिर मटर कञ्ज बर्बर इति कडारादयः ॥१९॥ ५८४ नौकाकाञ्जशुकशृगालवर्जेषु ३।२।१७ नौ काक अञ्ज शुक शृगाल। इति नावादयः ॥२०॥ ५६१ प्रकृत्यादिभ्य उपसंख्यानम् २।३।१८॥ प्रकृति प्राय गोत्र सम विषम द्विद्रोण पञ्चक साहस्र। इति प्रकृत्यादयः ॥२१॥ ९१५ गवाश्वप्रभृतीनि च २।४।११॥ गवाश्वम् गवाविकम् गवैडकम् अजाविकम् अजैडकम् कुब्जवामनम् कुब्जकिरातम् पुत्रपौत्रम् श्वचण्डालम् स्त्रीकुमारम् दासीमाणवकम् शाटीपटीरम् शाटीप्रच्छदम् शाटीपट्टिकम् उष्ट्रखाम् उष्ट्रशल्यम् मूत्रशकृत् मूत्रपुरीषम् यकृन्मेदः मांसशोणितम् दर्भशरम् दर्भस्तूलिकम् अर्जुनशिरीषम् अर्जुनपुरुषम् तृणोपलम् [तृणोलपम] दासीदासम् कुटीकुटम् भागवतीभागवतम्। इति गवाश्वप्रभृतीनि ॥२२॥ ९१८ न दधिपयआदीनि २।४।१४ दधिपयसी रूपिर्मधुनी मधुसर्पिषी ब्रह्मप्रजापती शिववैश्रवणौ स्कन्दविशाखौ परिव्राजककौशिकौ (परिव्राट्कौशिकौ) प्रवर्ग्योपसदौ शुक्लकृष्णौ हव्यावहिषी दीक्षातपसी [अक्षातपसी मेधातपसी]अध्ययनतपसी उलूखलमुसले आद्यवसाने अश्वमेधे अश्वसामे वाङ्मनसे। इति दधिपयआदीनि ॥२३॥ ८१६ अर्धर्चाः पुंसि च २।४।३१ अर्धर्च गोमय कषाय कार्षापण कुपत कुसुप (कुप्य) कपाट शङ्कु गूथ यूप ध्वज कबन्ध पद्म गृह सरक कंस दिवस यूष अन्धकार दण्ड कमण्डलु मण्ड भूत द्वीप धूत चक्र धर्म कर्मन् मोदक शतमान धान नख नखर चरण पुच्छ दाडिम हिम रजत सक्तु पिधान सार

पात्र घृत सैन्धव औषध आढक चषक द्रोण खलीन पात्रीव यष्टिक वारवाण (वार-वारण) प्रोथ कपित्थ [शुष्क] शाल शील शुक्र (शुक्र) शीधु कवच रेणु [ऋण] कपट शीकर मुसल सुवर्ण वर्ण पूर्व चमस क्षीर कर्ष आकाश अष्टापद मङ्गल निधन निर्यास जृम्भ वृत्त पुस्त वुस्त चत्रेडित शृङ्ग निगड [खल] मूलक मधु मूल स्थूल शराव नाक वप्र विमान मुख प्रग्रीव शुक्र वज्र कटक कण्टक [कर्पट] शिखर कपक (वपकल) नटमस्तक (नाटमस्तक) वलय कुसुम तृण पङ्क कुण्डल किरीट [कुमुद] अर्बुद अङ्कुश तिमिर आश्रय भूषण इक्कस (इष्वास) मुकुल वसन्त तटाक (तडाग) पिटक विटङ्क विडङ्ग पिण्याक माष कोश फलक दिन दैवत पिनाक समर स्थाणु अनीक उपवास शाक कर्पास [विशाल] चषाल (चषाल) खण्ड वर विटप [रण बल मक] मृणाल हस्त आर्द्र हल [सूत्र] ताण्डव गाण्डीव मण्डप पटह सौध योध पार्श्व शरीर फल [छत्र] पुर (पुरा) राष्ट्र अम्बर बिम्ब कुट्टिम मण्डल (कुक्कुट) कुडप ककुद खण्डल तोमर तोरण मशक पङ्क पुङ्ख मध्य [बाल] व्याल वल्मीक वर्ष वस्त्र वसु देह उद्यान उद्योग स्नेह स्तेन [स्तन स्वर] सङ्गम निष्क क्षेम शुक्र क्षत्रपवित्र [यौवन कलह] मालक (पालक) मूषिक [मण्डल वल्कल] कुज (कुञ्ज) विहार लोहित विषाण भवन अरण्य पुलिन दृढ आसन ऐरावत शूर्प तीर्थ लोमन (लोमश) तमाल लोह दण्डक शपथ प्रतिसर दारु धनुस् मान वर्चस्क कूर्च तण्डक मठ सहस्र ओदन प्रवाल शकट अपराह्ण नीड शकल तण्डुल । इत्यर्धर्चादिः ॥२४॥ १०८४ पैलादिभ्यश्च २।४।५९ पैल शालाक्ष सात्यकि सात्यकामि राहवि रावणि औदञ्चि औदन्यजि औदमेधि औदन्यञ्चि (औदमज्जि औदभृज्जि) दैवस्थानि पैङ्गलोदायनि राहवति भौलिङ्गि राणि औदन्यि औद्राहमानि औज्जिहानि औदशुद्धि तद्राजाश्वायाः (तद्राज) । आकृतिगणोऽयम् । इति पैलादिः ॥ २५ ॥ १०८६ न तौल्वलिभ्यः २।४।६१ तौल्वलि धार-णि पारणि रावणि दैलीपि दैवति वार्कलि नैवति (नैवकि) दैवमिश्रि (दैवमति) दैवयज्ञि चाफट्टकि वैश्वकि वैकि (वैङ्कि) आनुहारति (आनुराहति) पौष्कर-सादि आनुरोहति आनुति प्रादोहनि । नैमिश्रि प्राडाहति बान्धकि वैशीति आसि-नासि आहिसि आसुरी नैमिषि आसिबन्धकि पौष्पि कारेणुपालि वैकर्णि वैरकि वैहति । इति तौल्वल्यादिः ॥ २६ ॥ ११४६ यस्कादिभ्यो गोत्रे २।४।६३ यस्क लह्य दुह्य अयस्थूण (अयःस्थूण) तृणकर्ण सदामत्त कम्बलहार बहियोग पर्णाढक कर्णाढक पिण्डीजङ्घ वकसक्थ (वकसक्थ) बिभ्रि कुद्रि अजवस्ति मित्रयु रथोमुख जङ्घवा-रथ उरुकास कटुक मथक । (मन्थक) पुष्करट् (पुष्करसद्) विष्पुट उपरिमेखल क्रोष्टुकमान (क्रोष्टुमान) क्रोष्टुपाद क्रोष्टुमाय शीर्षमाय खरप पदक वर्षक भल-न्दन भण्डिल भण्डिल भण्डित । एते यस्कादयः ॥ २७ ॥ ११४९ न गोपवनादिभ्यः २।२।६७ गोपवन शेपु (शिग्रु) बिन्दु भाजन अश्वावतान श्यामाक (श्योनाक) श्यामक

ख्यापण्य। विदाचन्तर्गणोऽयम् ४।१।१०४ इति गोपवनादिः ॥२८॥ ११५० तिककितवादिभ्यो द्वन्द्वे २।४।६८ तिककितवाः बहुरभण्डीरथाः उपकलमकाः पकलरकाः बकनखगुदपरिखाद्राः मञ्जककुभाः लकुशान्तमुखाः उत्तरशालकुटाः कृष्णाजिनकृष्णसुन्दराः भ्राष्टककपिष्ठकाः अग्निवेशदशेरकाः। एते तिककितवादयः ॥ २९ ॥ ११५१ उपकादिभ्योऽन्यतरस्यामद्वन्द्वे २।४।६९ उपक लमक भ्राष्टूक कपिष्ठक कृष्णाजिन कृष्णसुन्दर चूडारक आडारक गडुक उदङ्क सुधायुक अवन्धक पिङ्गलक पिष्टक सुपिष्ट (सुपिष्ठ) मयूरकर्ण खरीजङ्घ शकायल पतञ्जल पदञ्जल कठेरणि कुषीतक कसकृत्स्न (काशकृत्स्न) निदाघ कलशीकण्ठ दामकण्ठ कृष्णपिङ्गल कर्णक पर्यंक जटिरक बलिरक जन्तुक अनुलोम अनुपद प्रतिलोम अपजघ्य प्रतान अनभिहित कमक वराटक लेखाश्व कमन्दक पिञ्जूलक वर्यंक मसूरकर्ण मदाघ कबन्तक कमन्तक कदामत्त दामकण्ठ। एते उपकादयः ॥ ३० ॥ इति द्वितीयोऽध्यायः।

तृतीयोऽध्यायः।

२६६७ भृशादिभ्यो भुव्यच्वेर्लोपश्च हलः ३।१।१२ भृश शीघ्र चपल मन्द पण्डित उत्सुक सुमनस् दुर्मनस् अभिमनस् उन्मनस् रहस् रोहस् रेहत् संश्चत् तृपत् शश्वत् भ्रमत् वेहत् शुचिस् शुचिवर्चस् अण्डर वर्चस् ओजस् सुरजस् अरजस्। एते भृशादयः ॥ ३१ ॥ २६६८ लोहितादिडाज्भ्यः क्यष् ३।१।१३ लोहित चरित नील फेन मद्र हरित दास मन्द। लोहितादिराकृतिगणः ॥ ३२ ॥ २६७४ सुखादिभ्यः कर्तृवेदनायाम् ३।१।१८ सुख दुःख तृप्त कृच्छ्र अस्र आस्र अलीक प्रतीप करुण कृपण सोढ। इत्येतानि सुखादीनि ॥ ३३ ॥ २६७८ कण्ड्वादिभ्यो यक् ३।१।२७ कण्डूम् मन्तु हणीङ् वल्गु असु [मनस्] महीङ् कोट् क्लेट् हरस् हरज् हरम् उवस् उषस् वेट् मेधा कुधुभ (नमस) मगध तन्तस् पन्थस् (पथस्) सुख दुःख [भिक्ष चरण चरम अवर] सपर अरर (अरर्) भिषज् भिष्णुज् [अपर आर] इषुध वरण चुरण तुरण भुरण गदगद एका केला खेला [वेला शेला] लिट लाट [लेखा लेख] रेखा द्रवस् तिरस् अगद उरस् तरण (तरित्र) पथस् सम्भूयस् सम्वर। आकृतिगणोऽयम्। इति कण्ड्वादिः ॥३४॥ २८९६ नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः ३।१।१३४। नन्दिवाशिमदिदूषिसाधिवर्धिशोभिरोचिभ्यो ल्यन्तेभ्यः सज्ञायाम्। नन्दनः वाशनः मदनः दूषणः साधनः वर्धनः शोभनः रोचनः। सहितपिदमः संज्ञायाम्। सहनः तपनः दमनः जल्पनः रमणः दर्पणः संक्रन्दनः सङ्घर्षणः संहर्षणः जनार्दनः यवनः मधुसूदनः विभीषणः लवणः चित्तविनाशनः कुक्कुदमनः [शत्रुदमनः] इति नन्दादिः ॥३५॥ ग्राही उत्साही उद्दासी उल्लासी स्थायी मन्त्री सम्मर्दी। रक्षश्रवपशां नौ। निरक्षी निश्रावी निवापी निशायी। याच्ञव्याहसंव्याहव्रजवद्वसां प्रतिषिद्धानाम्। अयाची अव्याहारी असंव्याहारी अव्राजी अवादी अवासी अचामचित्तकर्तृकाणाम्। अकारी अहारी अविनायी [विशायी विषायी] विशयी विषयी देशे। विशयी विषयी देशः। अभिभावी भूते। अपरोधी उपरोधी परिभवा प-

रिभावी । इति ग्रहादिः ॥३६॥पच वच वप वद चक्ष पत नदट् भषट् क्लवट् चरट् गरट् तरट् चोर ् गाहट् सर ् देवट् (द्योवट्) जर (रज) मर (मद) क्षम (क्षर) सेच मेघ कोप (कोष) मेघ नर्त ब्रण दर्श सर्प [दृभ दर्प] जारभर भषच । पचादिराकृतिगणः ॥३७॥ २९१९ कप्रकरणे मूलविभुजादिभ्य उपसंख्यानम् ३।१।५ मूलविभुज नखमुच काकगुह कुमुद महीध्र कुध्रागिध्र । आकृतिगणोऽयम् । इति मूलविभुजादयः ॥३८॥ पार्श्वादिधूपसंख्यानम् ३।२।१५ पार्श्व उदर पृष्ठ उत्तान अवमूर्धन् । इति पार्श्वादिः ॥३९॥ ३१७१ भविष्यति गम्यादयः ३।३।३ गामी आगामी भावी । प्रस्थायी प्रतिरोधी प्रतियोद्धा प्रतियोधी प्रतियायी प्रतियोगी । एते गम्यादयः ॥४०॥ ३२८१ चिक्रिदादिभ्योऽङ् ३।३।१०४ भिदा विदारणे । छिदा द्वैधीकरणे । विदा । क्षिपा । गुहा गिर्योपध्योः श्रद्धा मेधा गोधा । आरा शस्त्रस्याम् । हारा । कारा बन्धने । क्षिपा । तारा ज्योतिषी । धारा प्रपातने । रेखा चूडा पीडा वपा वसा मूजा । क्रपेः । सम्प्रसारणं च कृपा । इति भिदादिः ॥४॥ ३२९३ सम्पदादिभ्यः क्विप् । (वा) ३।३।१०८॥ सम्पद् विपद् आपद् प्रतिपद् परिषद् । एते सम्पदादयः ॥४२॥ ३१७३ भीमादयोऽपादाने ३।४।७४ भीम भीष्म भयानक वहचर (वहचरु) प्रस्कन्दन प्रपतन (प्रपतन) समुद्र स्रुव स्रुक् वृष्टि (दृष्टि) रक्षः शङ्कुक (शङ्कुक) मूर्खं लक्षति । आकृतिगणोऽयम् । इति भीमादिः ॥४३॥ इति तृतीयोऽध्यायः ।

चतुर्थोऽध्यायः ।

४५४ अजाद्यतष्टाप् ४।१।४ अजा एडका कोकिला चटका अश्वा मूषिका बाला होडा पाका वत्सा मन्दा विलाता पूर्वापिहाणा (पूर्वापहाणा) अपरापहाणा । सम्भस्राजिनशणपिण्डेभ्यः फलात् । सदच्काण्डप्राप्तशतेभ्यः पुष्पात् । शूद्राचामहत्पूर्वाजातिः । क्रुञ्चा उष्णिहा देवविशा ज्येष्ठा कनिष्ठा । मध्यमा पुंयोगेऽपि । मूलाग्रतः । दंष्ट्रा । एतेऽजादयः ॥४४॥ ३०८ न षट्स्वस्रादिभ्यः ४।१।१० स्वसृ दुहितृ ननान्द यातृ मातृ तिसृ चतसृ । इति स्वस्रादिः ॥४५॥ ४९२ नित्यं सपत्न्यादिषु ४।१।३५॥ समान एक वीर पिण्ड स (शिरी) भ्रातृ भद्र पुत्र । द्वासाच्छन्दसि । इति समानादिः ॥४६॥ ४९८ षिद्गौरादिभ्यश्च ४।१।४१ गौर मत्स्य मनुष्य शृङ्ग पिङ्गल हय गवय मुकय ऋष्य [पूट तूण] द्रुण द्रोण हरिण कोकण (काकण) पटर डणक [आमल] आमलक कुवल बिम्ब बदर फर्कर (कर्कर) तर्कार शर्कार पुष्कर शिखण्ड सकद शष्कण्ड सनन्द सुषम सुषव अलिन्द गहुल षाण्डश आढक आनन्द आश्वत्थ सुपाट आखक (आपखिक) शष्कुल सूर्य (सूर्म) शूर्प सूच यूष (पूव) यूथ सूप मेथ वल्गुख धातक सल्लक माल्लक माल्लत साल्वक वेतस वृक्ष (वृस) अतस [उभय] भृङ्ग मह मठ छेद पेश मेद श्वन् तक्षन् अनड्वही अनड्वाही । एषण्यः करणे । देह देहल काकादन गवादन तेजन रजन लवण औद्राहमामि आद्राहमानि गौतम (गोतम) [पारक] अयस्थूण (अयःस्थूण) भौरिकि भौलिकि भौकिञ्चि यान मेघ आलम्बि आलजि आलम्बि आलञ्चि केवाल आपक आरट नट ढोट नोट मूकाट शातन [पोतन] पातन पाठन [पानठ] आस्तरण

अधिकरण अधिकार अग्रहायणी (आग्रहायणी) प्रत्यवरोहिणी [सेचन] सुमङ्गलासंज्ञायाम्। अण्डर सुन्दर मण्डल मन्थर मङ्गल पट पिण्ड [षण्ड] उर्द गुर्द शम सूद औड (आर्द्र) हृद (हृद) पाण्ड [भाण्डल] भाण्ड [कोहाण्ड] कदर कन्दर कदल तरुण तलुन कलमाष बृहत् [सोम] सौधर्म। रोहिणी नक्षत्रे। रेवती नक्षत्रे। विकल निष्कल पुष्कल। कटाच्छ्रोणिवचने। पिप्पलशादयश्च। पिप्पली हरितकी (हरीतकी) कोशातकी शमी वरी शरी पृथिवी क्रोष्टु मातामह पितामह। इति गौरादिः ॥४७॥ ५०३ वह्वादिभ्यश्च ४।१।४५ बहु पङ्क्ति अञ्चति अङ्कति अंहति शकटि (शकति)। शक्तिः शस्त्रे। शारि वारि राति राधि [शाधि] अहि कपि यष्टि मुनि। इतः प्राग्यङ्गात्। कृदिकारादक्तिनः। सर्वतोऽक्तिवर्थादित्येके। चण्ड अराल कृपण कमल विकट विशाल विशङ्कट भरुज ध्वज चन्द्रभागाशब्दाम् (चन्द्रभागा नद्याम्) कल्याण उदार पुराण अहन् क्रोड नख खुर शिखा बाल शफ गुद। आकृतिगणोऽयम्। तेन भगल राग इत्यादि। इति वह्वादयः ॥ ४८ ॥ ५२७ शार्ङ्गरवाद्यो ङीन्। ४।१।७३ शार्ङ्गरव कापटव गौरगुलव ब्राह्मण बैद गौतमकामण्डलेय ब्राह्मणकृतेय [आनिचेय] आनिधेय आशोकेय वात्स्यायन मौञ्जायन कैकस काप्य (काश्य) शैव्य पृहि पर्येहि आडमरथ्य औदपान अराल चण्डाल वतण्ड। भोगवद्गौरिमतोः संज्ञायां वादिषु [६।३।४३] नित्यं ह्रस्वार्थम्। नृनरयोर्वृद्धिश्च। इति शार्ङ्गरवादिः ॥४९॥ १२०० क्रौड्यादिभ्यश्च ४।१।८०क्रौडि लादि ड्यादि आपिशलि आपस्तिति चौपयत चैटयत(वैटयत)सैकयत वैहवायत सोधातकि। सूत युवत्याम्। भोजक्षत्रिये। यौतकि कौटि भौरिकि भौलिकि [शाल्मलि] शालाग्रथलि कापिष्ठलि गौकक्ष्य। इति क्रौड्यादिः ॥५०॥ १०७४ अश्वपत्यादिभ्यश्च ४।१।८४ अश्वपति (ज्ञानपति) शतपति धनपति गणपति (स्थानपति यज्ञपति) राष्ट्रपति कुलपति गृहपति [पशुपति] धान्यपति धन्वपति [बन्धुपति धर्मपति] सभापति प्राणपति क्षेत्रपति। इत्यश्वपत्यादिः ॥५१॥ १०७८ अस्मादिभ्योऽञ् ४।१।८६ ह्रस उदपान विकर मिनद महानद महानस महाप्राण तरुण तलुन। वक्तव्यासे। पृथिवी [धेनु] पङ्क्ति जगति त्रिष्टुप् अनुष्टुप् जनपद भरत उशीनर ग्रीष्म पीलुकुण। उदस्थान देशे। पूषदश्व भलुकीय रथन्तर मध्यन्दिन बृहत् महत् सत्त्वत् कुरु पञ्चाल इन्द्रावसान उष्णिह् ककुभ् सुवर्ण देव ग्रीष्मादयश्छन्दसि। इत्युरसादिः ॥५२॥ १०९६ बाह्वादिभ्यश्च ४।१।९६ बाहु उपबाहु उपबाकु निबाकु शिबाकु वटाकु उपनिन्दु [उपविन्दु] वृषली वृकला चूडा बलाका मूषिका कुषला भगला (छगला) ध्रुवका [धुवका] सुमित्रा दुर्मित्रा पुष्करसद् अनुहरत देवशर्मन् अग्निशर्मन् [भद्रशर्मन्] सुशर्मन् कुनामन् (सुनामन्) पञ्चन् सप्तन् अष्टन्। आमतोजसः असोपश्च। सुधावत् उदञ्च शिरस माघ शरावित् मरीचि क्षेमवृद्धिन् श्यङ्गलतोदिन् खरनादिन् नगरमर्दिन् प्राकारमर्दिन् लोमन् अजीगर्त कृष्ण युधिष्ठिर अर्जुन साम्ब गद प्रद्युम्न राम (उदङ्क) उदङ्कः संज्ञायाम्। सम्भूबोम्भसोः सलोपश्च। आकृतिगणोऽयम्। तेन सात्यकिः आकूतिः ऐन्द्रशर्मिः आजवेनविः इत्यादि। इति बाह्वादयः ॥५३। १०९९ गोत्रे कुञ्जादिभ्य-

इञ्फञ् ४।१।९८ कुञ्ज अञ्चन शङ्कु भस्मन् गण क्षोमन् शठ शाक शुण्डा शुभ विपाश् स्कन्द स्कम्भ । इति कुञ्जादिः ॥५४॥ ११०१ नडादिभ्यः फक् ४।१।९९ नड चर वर वक मुञ्ज इतिक इतिश उपक (एक) लमक शलङ्कु शकुं च । सप्तल वाजप्य तिक । अग्निशर्मन्वृषगणे । प्राण नर सायक दास मित्र द्वीप पिङ्गर पिङ्गल किङ्कर किङ्कुल (कातर) कातल काश्यप (कुश्यप) काश्य, काल्य (काश्य) अज अमुष्य (अमुष्म) कृष्णरणौ ब्राह्मणवासिष्ठे । अमित्र लिगु चित्र कुमार क्रोष्टु क्रोष्टं च । लोह दुर्ग स्तम्भ शिशपा अग्र तृण शकट सुमनस् सुमत मिमत ऋच् जलन्धर अब्बर युगन्धर हंसक दण्डिन् हस्तिन् [पिण्ड] पञ्चाल चमसिन् सुकृत्य स्थिरक ब्राह्मण चटक बदर अश्वल अरप लङ्क इन्द्र अज्ञ कामुक ब्रह्मदत्त उदुम्बर शोण अलोह दण्डप । इति नडादिः ॥५५॥ ११०६ अनृष्यानन्तर्ये विदादिभ्योऽञ् ४।१।१०४ विद उर्व कश्यप कुशिक भरद्वाज उपमन्यु किलात कन्दर्प (किदर्भ) विश्वानर ऋषिषेण (ऋष्टिषेण) ऋतभाग हर्यश्व प्रियक आपस्तम्ब कूचवार शरद्वत् शुनक (शुनक्) धेनु गोपवन शिग्रु । बिन्दु [भोगक] भाजन (शर्मिक) श्यावतान श्यामाक श्यामक (श्यावलि) श्यापर्ण हरित किदास वह्यस्क अर्कजूष (अर्कलूष) बध्योग विष्णुवृद्ध प्रतिबोध रचित (रथीतर) रथन्तर गविष्ठिर निषाद (शबर अजस) मठर (मृडाकु) सूपाकु मृदु पुनर्भू पुत्र दुहितृ ननान्द । परस्त्री परशुं च । इति विदादिः ॥५६॥ ११०७ गर्गादिभ्यो यञ् ४।१।१०५ गर्ग वत्स वाजासे संकृति अज श्यामपात् विदभृत् प्राचीनयोग (अगस्ति) पुलस्ति चमस रेभ अग्निवेश शङ्ख । शट शक एक धूम अवट मनस् धनञ्जय वृक्ष विश्वावसु जरमाण । लोहित शंसितव्रभु वल्गु । मण्डु गण्डु शङ्कु लिगु गुहलु मन्तु मङ्क्षु अलिगु जिगीषु मनु तन्तु मनायी सुबु कथक कन्थक ऋच् तृक्ष (वृक्ष) [तनु] तरुक्ष तलुक्ष तण्ड वतण्ड कपिकत (कपि कत) कुरुकत अनडुह कण्व शकल गोकक्ष अगस्त्य कण्डिनी। यज्ञवल्क पर्यायवल्क अभयजात विरोहित वृषगण रहूगण शण्डिल वर्षक (वणक) चुलुक मुद्गल मुसल जमदग्नि पराशर जतूकर्ण (जातूकर्ण) महित मन्त्रित अश्मरथ शर्कराक्ष पूतिमाष स्थूरा अदरक (अररक) एलाक पिङ्गल कृष्ण गोलन्द उलूक तितिक्ष भिषज (भिषज्) [भिष्णज] मण्डित भण्डित दण्ड चेकित चिकित्सित देवहू इन्द्रहू एकहू पिप्पलु बृहदग्नि [सुलोहित्] सुलोमिन् उक्थ कुटीगु । इति गर्गादिः ॥५७॥ ११११३ अश्वादिभ्यः फञ् ४।१।११० अश्व अश्मन् शङ्ख शुद्रक विद पुट रोहिण खर्जूर (खजूर) [खज्जार वस्त] पिजूर मण्डिल मण्डिल मण्डित [प्रकृत रामोद] क्षान्त [काश तीक्ष्ण गोलाङ्क अर्क स्वर स्फुट चक्र श्रविष्ठ] पविन्द पवित्र गोमिन् श्याम धूम धूम्र वाग्मिन् विश्वानर कुट शप आग्नेये । जन जड खड ग्रीष्म अर्ह कित विक्षम्प विशाख गिरि चपल चुप दासक वैल्य (वैल्व) प्राच्य [चर्म्य] आनडुह । पुंसि जाते । अर्जुन[प्रकृत] सुमनस् दुर्मनस् मन (मनन)[प्राप्त] ऽवन । आग्नेय भरद्वाजे । भारद्वाज आग्नेये । दास आतव कितव [वद धन्य पाद] शिव खदिर । इत्यश्वादिः ॥५८॥ ११११५ शिवादिभ्योऽण् ४।१।११२ शिव प्रोष्ठ प्रोष्ठिक चण्ड जम्भ भूरि दण्ड कुठार ककुभ्

(ककुभा) अनभिम्लान कोहित सुख सन्धि मुनि ककुत्स्थ कहोड कोहड कहूय कहय रोद् कपिञ्जल (कुपिञ्जल) खञ्जन वतण्ड तृणकर्ण चीरहद जलहद परिल (पथिक) पिष्ट हैहय [पार्षिका] गोपिका कपिलिका जटिलिका बधिरिका मञ्जीरक मजिरक वृष्णिक खञ्जार खञ्जाल [कर्मार] रख लेख आलेखन विश्रवण रवण वर्तनाक ग्रीवाक[पिटक विटप]पिटाक तृषाक नमक ऊर्णानाभ जरत्कारु [पृथा उत्क्षेप]पुरोहितिका सुरोहितिका सुरोहिका आर्यश्वेत (अर्यश्वेत) सुपिष्ट मयुरकर्ण मयूरकर्ण[खर्जूरकर्ण]कदूरक तक्षन् ऋष्टिषेण गङ्गा विपाश मस्क लङ्घ द्रुघ्न अयस्थूण तृणकर्ण (तृण कर्ण) पर्ण अलम्बन विरूपाक्ष भूमि इला सपत्नी । द्वयचो नद्याः । त्रिवेणी त्रिवर्ण च । इति शिवादिः । आकृतिगणः ॥५९॥ ११२६ शुभ्रादिभ्यश्च ४।१।१२३ शुभ्र विष्ट पुर (विष्टपुर) ब्रह्मकृत शतद्वार शलाकाभ्रू लेखाभ्रू (लेखाभ्र) विकसा (विकास) रोहिणी रुक्मिणी धर्मिणी दिश् शालूक अजवस्ति शकन्धि विमातृ विधवा शुक्र विश देवतर शकुनि शुक्र हप ज्ञातल (शतल) बन्धकी सुकण्डु विल्लि अतिथि गोदन्त कुशाश्व मकण्टु शाताहर पवष्टुरिक सुनामन् । लक्ष्मणश्यामयोर्वासिष्ठे । गोधा कृकलास अणीव प्रवाहण भरत (भारत) भरम मृकण्डु कर्पूर इतर अन्यतर आलीढ सुदन्त सुदक्ष सुवक्षस् सुदामन् कद्रु तुद अकशाय कुमारिका कुठारिका किशोरिका अश्विका जिह्वाशिन् परिधि वायुदत्त शकल शलाका खदूर कुवेरिका अशोकागन्धपिङ्गला खडोन्मत्ता अनुदृष्टिन् (अनुदृष्टि) जरतिन् बलीवर्दिन् विप्र वीज जीव श्वन् अरमन् अरव अजिर । इति शुभ्रादिः । आकृतिगणः ॥६०॥ ११३१ कल्याण्यादीनामिनङ् ४।१।१२६ कल्याणी सुभगा दुर्भगा बन्धकी अनुदृष्टि अनुसृति (अनुसृष्टि) जरती बलीवर्दी ज्येष्ठा कनिष्ठा मध्यमा परस्त्री । इति कल्याण्यादिः ॥६१॥ ११४३ गृष्ट्यादिभ्यश्च ४।१।१३६॥ गृष्टि हृष्टि बलि हलि विश्रि कुद्रि अजवस्ति मित्रयु । इति गृष्ट्यादिः ॥६२॥ ११६९ रेवत्यादिभ्यष्ठक् ४।१।१४६ रेवती अम्बपाली मणिपाली द्वारपाली वृकवच्चिन् वृकबन्धु वृकग्राह कर्णग्राह दण्डग्राह कृष्णकुक्षि (ककुदाक्ष) वामरथाह । इति रेवत्यादिः ॥६३॥ ११७५ कुर्वादिभ्यो ण्यः ४।१।१५१ कुरु गार्ग मद्रुष अजमार रथकार वावदूक । सम्राजः क्षत्रिये । कवि मति (विमति) 'कापिञ्जलादि वाक् वामरथ पितृमत् इन्द्रजाली पुजि वातकि दामौष्णीषि गणकारि कैशोरि कुट शाल्लाका (शलाका) मुर पुर एरका शुभ्र अभ्र दर्भ केशिनी । वेनाच्छन्दसि । शूर्पणाय श्यावनाय श्यावरथ श्यावपुत्र सत्यंकार वडभीकार पथिकार मूढ शकन्धु शङ्कु शाक शालिन् शालीन कतृ हतृ हन पिण्डी तक्षन् । वामरथस्य कण्वादिवत्स्वरवर्जम् । इति । कुर्वादिः ॥६४॥ ११७८ तिकादिभ्यः फिञ् ४।१।१५४ तिक कितव संज्ञाबालशिख (संज्ञा बाला शिखा) उरस् शाठय सैन्धव यमुन्द रूप्य ग्राम्य नील अमित्र गोकक्ष्य (गौकक्ष्य) कुरु देवरथ तैतल औरस कौरव्य भौरिकि भौलिकि चौपयत चैटयत शौकयत क्षैतयत वाजवत् चन्द्रमस् शुभ गङ्गा वरेण्य सुपामन् आरङ्ग वाह्लक स्वस्रक वृष लोमक उदन्य यज्ञ । इति तिकादिः ॥६५॥ ११८२ वाकिनादीनां कुक्च ४।१।१५८

वाकिन गौधेर कार्कश काक लंका। चर्मिवर्मिलोर्नलोपश्च । इति वाकिनादिः ॥६६॥ ११९४ *कम्बोजादिभ्य०—* ४।१।१७५ कम्बोज चोल केरल शक यवन । इति कम्बोजादिः ॥६७॥ ११९७ न प्राच्यभर्गादियौधेयादिभ्यः ४ १।१७८ भर्ग कक्ष केकय कश्मीर साल्व सुस्थाल डरस कौरव्य । इति भर्गादिः ॥६८॥ यौधेय शौक्रेय शौभ्रेय ज्यावाणेय धार्तेय त्रिगर्त भरत ऊशीनर । इति यौधेयादिः ॥६९॥ १२४४ भिक्षादिभ्योऽण् ४।२।३८ भिक्षागर्भिणी क्षेत्र करीष अङ्कार (अङ्गार) चर्मिन् धर्मिन् सहस्र युवति पदाति पद्धति अथर्वन् दक्षिणा भूत विषय श्रोत्र । इति भिक्षादिः ॥ ७० ॥ १२५४ खण्डिकादिभ्यश्च ४।२।४५ खण्डिका वडवा । क्षुद्रकडालवात् (क्षुद्रकमालवात्) सेना । संज्ञायाम् । भिक्षुक शुक उल्लक सन् अहन् युगवरत्रा (युगवरत्र) हलबन्धा (हलबन्ध) । इति खण्डिकादिः ॥७१॥ १२५८ पाशादिभ्यो यः ४।२।४९ पाश तृण धूम वात अङ्गार पाटक पोत गल पिटक पिटाक शकट हल नट वन । इति पाशादिः ॥७२॥ १२६०*खलादिभ्य इनिर्वक्तव्यः* ४।२।५१ खल डाक कुटुम्ब शाक कुण्डलिनी । इति खलादिराकृतिगणः ॥७३॥ १२६२ राजन्यादिभ्यो वुञ् ४।२।५३ राजन्य आनृत बाभ्रव्य शालङ्कायन देवयातव (देवयात) [अग्रीड वरत्रा] जालन्धरायण [राजयन] तेलु आत्मकामेय अम्बरीषपुत्र वसाति बैलवन शैलूष उदुम्बर तोत्र वैश्वल आर्जुनायन सप्रिय दाक्षि डर्णनाम । इति राजन्यादिराकृतिगणः ॥७४॥ १२६३ भौरिक्याधैषुकार्यादिभ्यो विधल्भक्तलौ ४।२।५४ भौरिकी भौलिकी चौपयत चौटयत (चैटयत) काणेय वाणिजक वाणिकाव्य (वालिकाव्य) सैकयत वैकयत । इति भौरिक्यादिः ॥७५॥ ऐषुकारि सारस्यायन (सारसायन) चान्द्रायण द्व्याह्यायण त्र्याह्यायण औडायन जौलायन आडायन दासमित्रि दासमित्रायण शौद्रायण दाक्षायण शापण्डायन (शायण्डायन) ताचर्यायण शौभ्रायण सौवीर [सौवीरायण] शपण्ड (शयण्ड) शौण्ड शयाण्डि (शयाण्ड) वैश्वमानव वैश्वधेनव (वैश्वधेनव) नड तुण्डदेव विश्वदेव [सापिण्डि] इत्यैषुकार्यादिः ॥७६॥ १२७० क्रतूक्थादिसूत्रान्ताट्ठक् ४।२।६० उक्थ लोकायत न्यास न्याय पुनरुक्त निरुक्त निरुक्त द्विपदा ज्योतिष अनुपद अनुकल्प यज्ञ धर्म चर्चा क्रमेतर उलक्ष (उलक्ष्ण) संहिता पदक्रम संवट (संवट्ट) वृत्ति परिषद् संग्रह गण [गुण] आयुर्देव (आयुर्वेद) । इत्युक्थादिः ॥७७॥ १२७१ क्रमादिभ्यो वुन् ४।२।६१ क्रम पद शिक्षा मीमांसा सामन् । इति क्रमादिः ॥७८॥ १२७३ वसन्तादिभ्यष्ठक् ४।२।६३ वसन्त ग्रीष्म वर्षा शरद् शरत् हेमन्त शिशिर प्रथम गुण चरम अनुगुण अथर्वन् आथर्वण । इति वसन्तादिः ॥७९॥ १२८७ सङ्कलादिभ्यश्च ४।२।७५ सङ्कल पुष्कल उत्तम उडुप उडुप उडुप कुम्भ निधान सुदत्त सुदत्त सुभूत सुपूत सुनेत्र सुमङ्गल सुपिङ्गल सूत सिकत पूतिका (पूतिक) पूलास कूलास पलाश निवेश (गवेश) गम्भीर इतर आन् अहन् लोमन् वेमन् चरण (वरुण) बहुल सयोज अभिषिक्त गोभृत् राजभृत् भल्ल मल्ल माल ॥ इति सङ्कलादिः ॥८०॥ १२८९ सुवास्त्वादिभ्योऽण् ४।२।७७ सुवास्तु (सुवस्तु) वर्णु भण्डु खण्डु सेवानिन् कर्पूरिन् शिखण्डिन् गर्त कर्कश शकटीकर्ण कृष्णकर्ण [कर्क] कर्कन्धुमती गोह अहिसक्थ ॥

इति सुवास्त्वादिः॥८१॥ १२९२ युच्छण्कठजिलसेनिरदण्ड्यथफक्किफलिब्ध्यकण्ठकोऽरीरण्कुशाश्वश्यंकुमुदकाशतृणप्रेक्षाश्मसखिसंकाशबलपलाशकर्णसुतङ्गमप्रगदिन्वराहकुमुदादिभ्यः४।२।८० (१) अरीहण (अहीरण) द्रुवण द्रुहण भलग (भगल) उलन्द किरण सांपरायण क्रौष्ट्रायन (क्रौष्ट्रायण) औष्ट्रायण त्रैगर्तायन मैत्रायण भाल्लायण वैमतायण (वैमतायन) गौमतायन सौमतायन सौसायन धौमतायन सौमायन ऐन्द्रायण कौद्रायण (कौन्द्रायण) खाडायन शाण्डिल्यायन रायस्पोष विपथ विपाश डहण्ड उदञ्चन खाण्डवीरण वीरण काशकृत्स्न (कशकृत्स्न) जाम्बवत् शिशपा रैवत (रेवत) बिल्व सुयज्ञ शिरीष बधिर जम्बु खदिर सुशर्मन् (सशर्मन्) दलतृ भलन्दन खण्डु कलन (कनल) यज्ञदत्त। इत्यरीहणादिः॥ ८२॥ (२) कृशाश्व अरिष्ट अरिश्म वेशमन् विशाल लोमश रोमश लोमक रोमक शबल कूट वर्चल सुवर्चल सुकर सूकर प्रातर (प्रतर) सहश पुरग पुराग सुख धूम अजिन विनत अवनत कुविद्यास (कुविट्यास) पराशर अरुस् अथस् मौद्गल्याकर (मौद्गल्य युकर)। इति कृशाश्वादिः॥८३॥ (३) ऋश्य (ऋष्य) न्यग्रोध शर निलीन [निवास निवात] निधान निबन्धन (निबन्ध) [विबद्ध] परिगूढ [उपगूढ] असनी सित मत वेशमन् उत्तराश्मन् अश्मन् स्थूल बाहु खदिर शर्करा अनडुह (अनडुह) अरडु परिवंश वेणु वीरण खण्ड दण्ड परिवृक्त कर्दम अंशु। इत्यृश्यादिः॥८४॥ (४) कुमुद शर्करा न्यग्रोध डुकट संकट कंकट गर्त बीज परिवाप निर्यास शकट कच मधु शिरीष अश्व अश्वत्थ बलवज यवास कूप विकङ्कत दशग्राम। इति कुमुदादिः॥८५॥ (५) काश पाक अश्वत्थ पलाश पीयूक्षा चरण वास नड वन कर्दम कच्छूल कङ्कट गुह बिस तृण कर्पूर बर्बर मधुर ग्रह कपित्थ जतु सीपाल। इति काशादिः॥ ८६॥ (६) तृण नड मूल वन पर्ण वर्ण वराण बिल पुल फल अर्जुन अर्ण सुवर्ण बल चरण बुस। इति तृणादिः॥८७॥ (७) प्रेक्षा फलका (डलका) बन्धुका ध्रुवका क्षिपका न्यग्रोध डुकट कङ्कट संकट कट कूप वुक पुक पुट मह परिवाप यवाष ध्रुवका गर्त कूपक हिरण्य। इति प्रेक्षादिः॥८८॥ (८) अश्मन् यूथ ऊष मीन मद दर्भ वृन्द गुड खण्ड नग शिखा कोट पाम कन्द काम्द कुल गह्व गुड कुण्डल पीन गुह। इत्यश्मादिः॥८९॥ (९) सखि अग्निदत्त वायुदत्त सखिदत्त [गोपिल] भरुलपाल (भल्ल पाल) चक्र चक्रवाक डुगल अलोक करवीर वासव वीर पूर वज्र कुशीरक शीहर (सीहर) सरक सरस समर समल सुरस रोह तमालकदल सप्तल। इति सख्यादिः॥९०॥(१०) सङ्काश कपिल कश्मीर [समीर] सूरसेन सरक सूर। सुपथिन्पन्थ च। यूप (यूप) अंश अङ्ग नासा पलित अङ्ग नाश अश्मन् कूट मलिन दश कुम्भ शीर्ष चिरन्त (विरत) समल सीर पञ्जर मन्थ नल रोमन् पुलिन सुपरि कटिप सकर्णक वृष्टि तीर्थ अगस्ति विकर नासिका। इति संकाशादिः॥९१॥ (११) बल चुल नल दल वट लकुल डरक पुख (पुल) मूल डलडुल (डल डुल) वन कुल। इति बलादिः॥९२॥ (१२) पक्ष तुक्ष तुष कुण्ड अण्ड कम्बलिका बलिक चिन्न अस्ति। सुपथिन् पन्थ च। कुम्भ सीरक सरक सकल सरस समल अतिशयेन् रोमन् लोमन् हस्तिन् मकर लोमक शीर्ष निवात पाक सहक (सिंह-

क) अङ्कुश सुवर्णक हंतक हिंसक कुस बिल खिल यमल हस्त कला सकर्णक। इति पक्षादिः॥९३॥(१३) कर्ण वसिष्ठ अर्क अर्कलूष द्रुपद आनदुह पाञ्चजन्य स्फिग(स्फिज्) कुक्षी कुन्ती जिस्वन् जीवन्त कुक्षिल आण्डीवत् (आण्डीवत)जव जेत्र आकन(अनक) इति कर्णादिः॥९४॥ (१४)सुतंगम मुनिचित विप्रचित्त महाचित्त महापुत्र स्वन श्वेत गडिक (खटिक) शुक्र विप्र बीजावापिन् (बीजवापिन्) अर्जुन स्वन् अजिर जीव खण्डिन कर्ण विग्रह। इति सुतङ्गमादिः॥९५॥ (१५)प्रगदिन् मगदिन् मदद्दिन् कविल खण्डित गदिल चडार मन्दार कोविदार। इति प्रगद्यादिः॥९६॥(१६)वराह पलाश (पलाश)शेखिर(शिरीष) पिनद्ध निबद्ध बहाल स्थूल विदग्ध [विजग्ध] विमग्न [निमग्न] बाहु खदिर शकरा। इति वराहादिः॥९७॥ (१७)कुमुद गोमय रथकार दशग्राम अश्वत्थ शाल्मलि [शिरीष] मुनिस्थल कुण्डल कूट मधुकर्ण घासकुन्द शुचिकर्ण। इति कुमुदादिः॥९८॥ १३०१ वरणादिभ्यश्च ४।२।८२॥ वरणा शृङ्गी शाल्मलि शुण्डि शयाण्डी पर्णी ताम्रोपर्णी गोद आलिङ्गयायन जालपदी (जानपदी) नम्बू पुष्कर चम्पा पम्पा वलगु उज्जयिनी गया मथुरा तक्षशिला उरसा गोमती वलभी। इति वरणादिः॥९९॥ १३०५ मधवादिभ्यश्च ४।२।८६ मधु बिस स्थाणु वेणु कर्कन्धु शमी करीर हिम किंशर शर्याति मरुत् वार्दली शर इष्टका आसुति शक्ति आसन्दी शकल शलाका आमिषी इक्षु रोमन् रुष्टि रुष्य तक्षशिला कड घट वेट। इति मधवादिः॥ १०० ॥ १३०९ उत्करादिभ्यश्छः ४।२।९० उत्कर सरफल शफर पिप्पल पिप्पलीमूल अश्मन् सुवर्ण स्वलाजिन तिक किंतव अणक श्रवण पिचुक अश्वत्थ काश क्षुद मल्ला शाल जम्या अजिर चर्मन् उत्कोश क्षान्त खदिर शूर्पणाय श्यावनाय नैवाकव तृण वृक्ष शाक पलाश विजिगीषा अनेक आलप फल सरार अर्क गर्त अग्नि वैराग्रक इडा अरण्य निशान्त पृग नीवायक शंकर अवरोहित क्षार विशाल वेत्र अरीहण खण्ड वातागार मन्त्रण्याहं इन्द्रवृक्ष नितान्तवृक्ष (नितान्तावृक्ष) आर्द्रवृक्ष। इत्युत्करादिः॥ १०१ ॥ १३१० नडादीनां कुक्च ४।२।९१ नड पलङ्क बिल्व वेणु वेत्र वेतस इक्षु काष्ठ कपोत तृण। क्रुञ्चा हलस्यं च। तलवलोपश्च। इति नडादिः॥ १०२ ॥ १३१५ ॥ कुण्यादिभ्यो ढकञ् ४।२।९५ कन्नि उम्भि पुष्कर पुष्कल मोदन कुम्भी कुण्डिन नगरी माहिष्मती वर्मती उल्या ग्राम। कुडयाया यलोपश्च। इति कुण्यादिः॥१०३॥ १३१७ नद्यादिभ्यो ढक् ४।२।९७ नदी मही वाराणसी आवन्ती कौशाम्बी वनकौशाम्बी (वनकोशाम्बी)काशपरी काशकारी (काशशफरी) खादिरी पूर्वनगरी पाठा माया शाल्वा दार्वा सेतकी। वडवाया वृषे। इति नद्यादिः॥ १०४ ॥ १३३१ प्रस्थोत्तरपदपलद्यादिकोपधादण् ४।२।११० पलद्दी परिखदू रोमक वाहीक कलकीट बहुकीट जालकीट कमलकीट कमलकीकर कमलभिदा गौष्ठी नैकती परिखा शूरसेन गोमती पटच्चर उदपान शकुलोम। इति पलद्यादिः॥ १०५ ॥ १३४० काश्यादिभ्यष्ठञ्जिठौ ४।२।११६ काशि चेदि (वेदि) सांपाति संवाह अभ्युत मोदमान शकुलाद हस्तिकर्षू कुनामन् हिरण्या करण गोवासन भारद्वी आरदम अरिष्ट देवदत्त दशग्राम शौवावतान युवराज उपराज देवराज मोदन सिन्धुमित्र दा-

समित्र सुधामित्र सोममित्र छागमित्र साधमित्र । (सधमित्र) आपदादिपूर्वपदात्कालान्तात् । आपद् ऊर्ध्वं तत् । इति काश्यादिः ॥ १०६ ॥ १३५ धूमादिभ्यश्च ४।२। १२७ धूम षडण्ड शशादन अर्जुनाव माहकस्थली आनकस्थली माहिषस्थली मानस्थली अट्टस्थली मद्रुकस्थली समुद्रस्थली दापडायनस्थली राजस्थली विदेह राजगृह सात्रासाह शष्प मित्रवर्ध (मित्रवर्ध) भक्षाली मद्रकूल आजीकूल द्वयाहव (द्वयाहाव) त्र्यहव (त्र्याहव) संस्फाय बर्बर वर्ज्य गर्त आनर्त माठर पाथेय घोष पल्ली आराज्ञी भार्तराज्ञी आवय तीर्थ । कूलात्सौवीरेषु । समुद्राच्च मनुष्ये च । कुक्षि अन्तरीप द्वीप अरुण उज्जयनी पट्टार दक्षिणापथ साकेत । इति धूमादिः ॥ १०७ ॥ १३५७ कच्छादिभ्यश्च ४।२।१३३ कच्छ सिन्धु वर्णु गन्धार मधुमत् काम्बोज कश्मीर साल्व कुरु अनुशण्ड द्वीप अनूप अजवाह विजापक कलूतर रङ्कु । इति कच्छादिः ॥ १०८ ॥ १३६२ गहादिभ्यश्च ४।२।१३८ गह अन्तस्थ सम विषम मध्य मध्यंदिन चरण उत्तम अङ्ग वङ्ग मागध पूर्वपद अपरपद अधमशाख उत्तमशाख समानग्राम एकग्राम एकवृक्ष एकपलाश ह्रस्वग्र ह्रस्वनीक अवश्यन्दन कामप्रस्थ शाडिकाडायनि (खाडायन) काठेरणि लावेरणि सौमित्रि शैशिरि आसुत दैवशर्मि श्रौति आहिंसि आमित्रि व्याडि वैजि आध्यदिव आनृशंसि (आनृशंसि) शौङ्गि आग्निशर्मि भौमि वाराटकि वाल्मिकि (वाल्मीकि) क्षेमवृद्धि आश्वत्थि औद्दालमानि ऐकविन्दवि दन्ताग्र हंस तत्त्वग्र (तत्त्वग्र) उत्तर अन्तर (अनन्तर) मुखपार्श्वतस्रोलोपः । जनपरयोः कुक्च देवस्य च । वेणुकादिभ्यश्छण् । इति गहादिः । आकृतिगणः ॥ १०९ ॥ १३८७ सन्धिवेलाद्यृतुनक्षत्रेभ्योऽण् ४।३।१६ सन्धिवेला सन्ध्या अमावास्या त्रयोदशी चतुर्दशी पञ्चदशी पौर्णमासी प्रतिपत् । सवत्सरात्फलपर्वणोः । इति सन्धिवेलादिः ॥ ११० ॥ १४२९ दिगादिभ्यो यत् ४।३।५४॥ दिश् वर्ग पूरा गण पङ्क्ति व्रात्य मित्र मेघा अन्तर पथिन् रहस् अलीक उखा साक्षिन् देश आदि अन्त मुख जघन मेघ यूथ । उदकात्संज्ञायाम् । ज्ञाय (ज्ञाय) वंश वेश काल आकाश । इति दिगादिः ॥ १११ ॥ *परिमुखादिभ्यश्च* ४।३।५९ परिमुख परिहनु पर्याप्त पर्युलूखल परिसीर उपसीर उपस्थूण उपकलाप अनुपथ अनुपद अनुगङ्ग अनुतिल अनुसीत अनुपाय अनुसीर अनुमाष अनुयव अनुयूप अनुवंश प्रतिशाख । इति परिमुखादिः ॥ ११२ ॥ १४३७ * अध्यात्मादिभ्यश्च * ४।३।६० अध्यात्म अधिदेव अधिभूत इहलोक परलोक । इत्यध्यात्मादिः । आकृतिगणः ॥११३॥ १४५२ अयनयनादिभ्यः ४।३।७३ अयन पद्व्याख्यान छन्दोमान छन्दोभाषा छन्दोविचिति न्याय पुनरुक्त निरुक्त व्याकरण निगम वास्तुविद्या क्षत्रविद्या अङ्गविद्या विद्या उत्पाद उत्पात उत्पाव संवत्सर मुहूर्त उपनिषद् निमित्त क्रिया भिक्षा । इत्ययनादिः ॥११४॥ १४५५ शुण्डिकादिभ्योऽण् ४।३।७६ शुण्डिक कुकुण कूपण स्थण्डिल उदपान उपल तीर्थ भूमि तृण पर्ण । इति शुण्डिकादिः ॥११५॥ १४७२ शुण्डिकादिभ्यो ञ्यः ४।३।९२ शुण्डिक सर्वसेन सर्वकेश शक वट रक शङ्कु बोध । इति शुण्डिकादिः ॥११६॥ १४७३ सिन्धुतक्ष-

शिलादिभ्योऽणञौ ४।३।९३ सिन्धु वर्णु मधुमत् कम्बोज साल्व कश्मीर गन्धार किष्किन्धा उरसा दरद (दरद्) गन्दिका । इति सिन्ध्वादिः ॥ ११७ ॥ तक्षशिला वस्सोद्धरण कैमेदुर ग्राहणी छगल क्रोष्टुकर्ण सिंहकर्ण सङ्कुचित किन्नर काण्डधार पर्वत अवसान बर्बर कंस । इति तक्षशिलादिः॥११८॥ १४८६ शौनकादिभ्यश्छन्दसि ४।३।१०६ शौनक वाजसनेय शार्ङ्गरव शापेय शाष्पेय खाडायन स्तम्भ स्कन्ध देवदर्शन रज्जुभार रज्जुकण्ठ कठशाठ कषाय तज दण्ड पुरुषांसक अश्वपेज । इति शौनकादिः ॥११९॥ १४९८ कुलालादिभ्यो वुञ् ४।३।११८ कुलाल वरुड चाण्डाल निषाद कर्मार सेना सिरिन्ध्र (सिरिध्रि) सैरिन्ध्र देवराज पर्षत् (परिषत्) वधू मधु रुद्रु रुद्र अनडुह् ब्रह्मन् कुम्भकार श्वपाक । वैजवापि । इति कुलालादिः॥१२०॥ १५११ रैवतिकादिभ्यश्छः ४।३।३१ रैवतिक श्वापिशि शैमवृद्धि गौरग्रीव (गौरग्रीवि) औदमेघि औदवापि वैजवापि । इति रैवतिकादिः ॥१२१॥ १५१६ बिल्वादिभ्योऽण् ४।३।१३६ बिल्व व्रीहि काण्ड मुद्गु मसूर गोधूम इक्षु वेणु गवेधुका कर्पासी पाटली कर्कन्धु कुटीर ॥ इति बिल्वादिः ॥१२२॥ १५२१ पलाशादिभ्यो वा ४।३।१४१ पलाश खदिर शिंशपा स्पन्दन पूलाक करीर शिरीष यवास विकङ्कत ॥ इति पलाशादिः ॥१२३॥ १५२४ नित्यं वृद्धशरादिभ्यः ४।२।१४४ शर दर्भ मृदु (मृत्) कुटी तृण सोम वल्वज ॥ इति शरादिः ॥१२४॥ १५३० तालादिभ्योऽण् ४।३।१५२ तालाङ्गुलि । बाहिक इन्द्रालिश इन्द्राद्दश इन्द्राशिव इन्द्रायुध चय श्यामाक पीयूक्षा ॥ इति तालादिः ॥१२५॥ १५३२ प्राणिरजतादिभ्योऽञ्४।३।१५४ रजत सीस लोह उदुम्बर नीप दारु रोहितक बिभीतक पीतदारु तीव्रदारु त्रिकण्टक कण्टकार । इति रजतादिः ॥१२६॥ १५४२ प्लक्षादिभ्योऽण् ४।३।१६४ प्लक्ष न्यग्रोध अश्वत्थ इङ्गुदी शिंशपु रुरु कक्कतु बृहती । इति प्लक्षादिः ॥१२७॥ १५४६ हरीतक्यादिभ्यश्च ४।३।१६७ हरीतकी कोशातकी नखरञ्जनी शष्कण्डी दार्वी दोर्वी श्वेतपाकी अर्जुनपाकी द्राक्षा काला श्यामा गभीरका कण्टकारिका पिप्पली चिम्पा (चिञ्चा) शेफालिका । इति हरीतक्यादिः ॥१२८॥ १५५८ *माशब्दादिभ्य उपसंख्यानम्* ४।४।१ माशब्दः नित्यशब्दः कायशब्दः । इति माशब्दादिः ॥१२९॥ १५४९ *प्राद्यो प्रभूतादिभ्यः* ४।४।१ प्रभूत पर्याप्त । इति प्रभूतादिः ॥१३०॥ १५४९ * पृच्छतौ सुस्नातादिभ्यः * ४।४।१ सुस्नात सुखरात्रि सुखशयन । इति सुस्नातादिः ॥१३१॥ १५४९ * गच्छतौ परदारादिभ्यः ४।४।१ परदार गुरुतल्प । इति परदारादिः ॥१३२॥ १५५८ पर्यादिभ्यः ष्ठन् ४।४।१० पर्य अश्व अश्वत्थ रथ जाल न्यास व्याल । पादः पच्च । इति पर्यादिः ॥१३३॥ १५३२ वेतनादिभ्यो जीवति ४।४।१२ वेतन वाहन अधंवाहन धनुर्दण्ड जाल वेश उपवेश प्रेषण उपवर्त्ति सुख शय्या शक्ति उपनिषद् उपदेश स्फिज् (स्फिज) पाद उपस्थ उपस्थान उपहस्त । इति वेतनादिः ॥१३४॥ १५३५ हरायुरसङ्गादिभ्यः ४।४।१५ उरसङ्ग उडुप उत्पूत उत्पञ्च उत्पुट पिटक पिटाक ॥ हरायुरसङ्गादिः ॥१३५॥ १५३६ भस्त्रादिभ्यः ष्ठन् ४।४।१६ भस्त्रा भरट भरण शीर्षभार शीर्षभार अंसभार अंसेभार ॥ इति भस्त्रादिः ॥१३६॥ १५३९ निर्वृत्तेऽक्षयूतादिभ्यः ४।४।१९ अक्षयूत [जानुप्रहत] जङ्घाप्रहत जङ्घाप्रहत पादस्फेदन कण्टकमर्दन गतानुगत गतागत

यातोपयात अनुगत ॥ इत्यच्चतूपादिः ॥१३७॥ १५६८ अण्महिष्यादिभ्यः ४।४।४८ महिषी प्रजापति प्रजावती प्रलेपिका विलेपिका अनुलेपिका पुरोहिता मक्षिपाली अनुवारक [अनुचारक] होतृ यजमान । इति महिष्यादिः ॥१३८॥ १६०३ किसरादिभ्यः छन् ४।४।४३ किसर नरद नलद स्थागल तगर गुग्गुलु उशीर हरिद्रा हरिद्रु पर्णी (पर्ण्णी) इति किसरादिः ॥१३९॥ १६१२ छत्रादिभ्यो णः ४।४।६२ छत्र शिक्षा प्ररोहस्था बुभुक्षा चुरा तितिक्षा उपस्थान कृषि कर्मन् विश्वधा तपस् सत्य अनृत विभिक्षा विभिक्षा भक्षा उद्स्थान पुरोडा विक्षा चुक्षा मन्द्र ॥ इति छत्रादिः ॥१४०॥ १६५१ प्रतिजनादिभ्यः खञ् ४।४।९९ प्रतिजन इदंयुग संयुग समयुग परयुग परकुल परस्यकुल अमुष्यकुल सर्वजन विश्वजन महाजन पञ्चजन ॥ इति प्रतिजनादिः॥१४१॥ १६५४ कथादिभ्यष्ठक् ४।४।१०२ कथा विकथा विश्वकथा सङ्कथा वितण्डा कुहविद् (कुहचिद्) जनवाद जनेवाद जनोवाद वृत्ति संग्रह गुणगण आयुर्वेद ॥ इति कथादिः ॥१४२॥ १६५५ गुडादिभ्यष्ठञ् ४।४।१०३ गुड कुल्माष सक्तु अपूप मांसौदन इक्षु वेणु सङ्ग्राम संघात संकाम संवाह प्रवास निवास उपवास ॥ इति गुडादिः ॥१४३॥ इति चतुर्थोऽध्यायः ।

पञ्चमोऽध्यायः ।

१६६२ उगवादिभ्यो यत् ५।१।२ गो हविस् अक्षर विष बर्हिस् अष्टका स्वदा युग मेधा स्रुच् । नामि नभं च । शुनः सम्प्रसारणं वा च दीर्घत्वं, तत्सन्नियोगेन चान्तोदात्तत्वम् । ऊधसोऽनङ् च । कूप खद दर खर असुर अश्वत्थ (अश्वत्थ) वर वेद बीज दीक्ष (दीक्षा) ॥ इति गवादिः॥१४४॥ १६६४ विभाषा हविरपूपादिभ्यः ५।१।४॥ अपूप तण्डुल अभ्युष (अभ्यूष) अभ्योष अवोष अभ्येष पृथुक ओदन सूप पूप किण्व प्रदीप मुसल कटक कर्णवेष्टक दुर्गल अर्गल । अन्नविकारेभ्यश्च । यूप स्थूणा दीप अन्न पत्र ॥ इत्यपूपादिः ॥१४५॥ १६८२ अमसामे निष्कादिभ्यः ५।१।२० निष्क पण पाद माष वाह द्रोण षष्टि ॥ इति निष्कादिः ॥ १४६ ॥ १७०५ गोदुग्धेचोऽसस्ययापरिमाणाश्वादेर्यत् ५।१।३९॥ अश्वः अश्वनू गण ऊर्णा (ऊर्म) उमा मङ्गा (गङ्गा) वर्षा वसु ॥ इत्यश्वादिः ॥१४७॥ १७१६ तद्धरति वहत्यावहति भारादंशादिभ्यः ५।१।५०॥ वंश कुटज वलज मूल स्थूणा (स्थूण) अन्न अक्षमन् अक्ष शकुन इक्षु खट्वा ॥ इति वंशादिः ॥१४८॥ १७२९ छेदादिभ्यो नित्यम् ५।१।६४ छेद भेद द्रोह दोह नर्ति (नर्त) कर्ष तीर्थ सम्प्रयोग विप्रयोग प्रयोग विप्रकर्ष प्रेषण सम्प्रश्न विप्रश्न विकर्ष प्रकर्ष । विराग विरङ्ग च । इति छेदादिः ॥१४९॥ १७३१ दण्डादिभ्यो यत् ५।१।६६ दण्ड मुसल मधुपर्क कक्षा अर्घ मेघ मेधा सुवर्ण उदक वज्र युग गुहा भाग हुम मङ्ग ॥ इति दण्डादिः ॥१५०॥ १७५८ *महानाम्न्यादिभ्यः षष्ठ्यन्तेभ्य उपसंख्यानम्* ५।१।९४ महानाम्नी आदित्यव्रत गोदान ॥ इति महानाम्न्यादिः ॥ १५१॥ १७६१ *अवान्तरदीक्षादिभ्यो डेर्निवक्तव्य* ५।१।९४ अवान्तरदीक्षा तिलव्रत देवव्रत । इत्यवान्तरदीक्षादिः ॥१५२॥ १७६१ व्युष्टादिभ्योऽण् ५।१।९७ व्युष्ट नित्य निष्क्रमण प्रवेशन उपसंक्रमण तीर्थ आस्तरण सङ्ग्राम संघात ॥ इति व्युष्टादिः ॥१५३॥ अग्निपदा-

दिभ्य उपसंख्यानम् अग्निपद् पीलुपद् (पीलुमूल) प्रवास उपवास । इत्यग्निपदादिराकृतिगणः ॥१५ ॥ १७६५ तस्मै प्रभवति सन्तापादिभ्यः ५।१ १०१ सन्ताप संनाह संग्राम संयोग सम्पराय संवेशन सम्पेष निष्पेष सर्ग निसर्ग विसर्ग उपसर्ग प्रवास उपवास संघात संवेष संवास सम्मोदन सस्तु । मांसौदनाद्विगृहीतादपि । इति सन्तापादिः ॥१५५॥ १७६९ * ऋतोरण्प्रकरणे उपवस्त्रादिभ्य उपसंख्यानम् * ५।१।१०५ उपवस्तृ प्राशित्रं चूडा श्रद्धा । इत्युपवस्त्रादिः ॥१५६॥ १७७४ अनुप्रवचनादिभ्यश्छः ५।१ १११ अनुप्रवचन उत्थापन उपस्थापन संवेशन प्रवेशन अनुप्रवेशन अनुवासन अनुवचन अनुवाचन अन्वारोहण प्रारम्भण आरम्भण आरोहण । इत्यनुप्रवचनादिः ॥ १५७ ॥ १७७४ * स्वर्गादिभ्यो यद्लुक्यः * ५।१।१११ स्वर्ग यशस् आयुस काम धन । इति स्वर्गादिः ॥ १५८ ॥ २७६ * पुण्याहवाचनादिभ्यो लुग्वक्तव्यः * ५।१।१११ पुण्याहवाचन स्वस्तिवाचन शान्तिवाचन । इति पुण्याहवाचनादिः ॥ १५९ ॥ १७८४ पृथ्वादिभ्य इमनिज्वा ५।१।१२२ पृथु मृदु महत् पटु तनु लघु बहु साधु आशु उरु गुरु बहुल खण्ड दण्ड चण्ड अकिञ्चन बाल होड पाक वास मन्द स्वादु ह्रस्व दीर्घ प्रिय वृष ऋजु क्षिप्र क्षुद्र अणु । इति पृथ्वादिः ॥१६०॥ १७८७ वर्णदृढादिभ्यः ष्यञ् ५।१।१२३ दृढ हुढ परिवृढ भूरा कृष्ण वर्ण शुक्ल चुक्ल आम्र कृष्ण लवण ताम्र शीत उष्ण जड बधिर पण्डित मधुर मूर्ख मूक स्थिर । वेर्यातलातमतिमतः शरदानाम् समो मतिमनसोः जवन इति दृढ दिः१६१ १७८८ गुणवचनब्राह्मणादिभ्यः कर्मणि च ५।१ १२४॥ ब्राह्मण वाडव माणव । अर्हतो नुम् च । चोर धूर्त आराधय विराधय अपराधय उपचारय एकभाव द्विभाव त्रिभाव अन्यभाव अक्षेत्रज्ञ संवादिन् संवेशिन् सम्भाविन् बहुमाविन् शीर्षघातिन् विघातिन् समस्थ विषमस्थ परमस्थ मध्यमस्थ अनीश्वर कुशल चपल निपुण विशुन कुतूहल क्षेत्रज्ञ निपुण बालिश अलस दुःपुरुष कापुरुष राजन् गणपति अधिपति गबुल दाबाह विशस्ति विषम विपात निपात । सर्ववेदादिभ्यः स्वार्थे । चतुर्वेदस्योभयपदवृद्धिश्च । शौटीर । आकृतिगणोऽयम् । इति ब्राह्मणादिः॥१६२॥१७८९ * चतुर्वेदादिभ्य उभयपदवृद्धिश्च * ५।१ १२४ चतुर्वेद चतुर्वर्ण चतुराश्रम सर्वविद त्रिलोक त्रिस्वर षड्गुण सेना अनन्तर सन्निधि समीप उपमा सुख तदर्थ इतिह मणिक । इति चतुर्वेदादिः ॥१६३॥ १७९३ पत्यन्तपुरोहितादिभ्यो यक् ५।१ १२८ पुरोहित । राजासे । ग्रामिक पिण्डिक सुहित बालमन्द (बालमन्द) खण्डिक दण्डिक वर्मिक कर्मिक धर्मिक शितिक सूतिक मूलिक तिलक अञ्जलिक (अन्तलिक) कपिक ऋषिक पुत्रिक अविक कृत्रिक पर्षिक पथिक चर्मिक प्रतिक सारथि आस्थिक सूचिक संरक्ष सूचक (संरक्षसूचक) नास्तिक अज्ञानिक शाकर नागर चूडिक । इति पुरोहितादिः ॥१६४॥ १७९४ प्राणभृज्जातिवयोवचनोद्गात्रादिभ्योऽञ् ५।१।१२९ उद्गातृ उन्नेतृ प्रतिहर्तृ प्रशास्तृ होतृ पोतृ हर्तृ रथगणक पत्तिगणक सुष्ठु दुष्ठु अध्वर्यु वधू सुभग मन्त्रे । इत्युद्गात्रादिः ॥१६५॥ १७९५ हायनान्तयुवादिभ्योऽण् ५।१।१३० युवन् स्थविर होतृ यजमान । पुरुषासे । भ्रातृ कुतुक अभव्य (अभव्य) कटुक कमण्डलु कुक्षी सुक्षी दुःक्षी सुहृदय दुर्हृदय सुहृद् दुर्हृद् सुभ्रातृ दुर्भ्रातृ वृषल

परिव्राजक सब्रह्मचारिन् अनृशंस । हृद्यासे । कुशल चपल निपुण पिशुन कुतूहल क्षेत्रज्ञ । श्रोत्रियस्य यलोपश्च । इति युवादिः ॥१६६॥ १७९८ द्वन्द्वमनोज्ञादिभ्यश्च ५।१।१३३ मनोज्ञ प्रियरूप अभिरूप कल्याण मेधाविन् आढ्य कुलपुत्र छान्दस छात्र श्रोत्रिय चोर धूर्त विश्वदेव युवन् कुपुत्र ग्रामपुत्र ग्रामकुलाल ग्रामड (ग्रामषण्ड) ग्रामकुमार सुकुमार बहुल अवडपुत्र अमुष्यपुत्र अमुष्यकुल सारपुत्र शतपुत्र । इति मनोज्ञादिः ॥१६७॥ १८२५ तस्य पाकमूले पीलवादिकर्णादिभ्यः कुणब्जाहचौ ५।२।२४ पीलु कर्कन्धू (कर्कन्धु) शमी करीर बल (कुवल) बदर अश्वत्थ खदिर । इति पीलवादिः ॥१६८॥ कर्ण अक्षि नख मुख केश पाद दन्त ओष्ठ पृष्ठ । इति कर्णादिः ॥१६९॥ १८३७ तदस्य सञ्जातं तारकादिभ्य इतच् ५।२।३६ तारका पुष्प कर्णक मञ्जरी ऋजीष वर्ण सूत्र मूत्र निष्क्रमण पुरीष उच्चार प्रचार विचार कुड्मल कण्टक मुसल मुकुल कुसुम कुतूहल स्तबक (स्तवक) किसलय पल्लव खण्ड वेग निद्रा मुद्रा बुभुक्षा धेनुष्या पिपासा श्रद्धा अभ्र पुलक अङ्गारक वर्षाक द्रोह दोह सुख दुःख उत्कण्ठा भर व्याधि वर्मन् व्रण गौरव शाल्व तरङ्ग तिलक चन्द्रक अन्धकार गर्व कुमुर (मुकुर) हर्ष उत्कर्ष रण कुवलय गर्ध क्षुध् सीमन्त ज्वर गर रोग रोमाञ्च पण्डा कज्जल तृष् कोरक कल्लोल स्थपुट फल कञ्चुक शृङ्गार अङ्कुर शैवल बकुल श्वभ्र आराक कलङ्क कर्दम कन्दल मूर्च्छा अङ्गार हस्तक प्रतिबिम्ब विघ्नतन्त्र प्रत्यय दीक्षा गर्ज । गर्मादप्राणिनि । इति तारकादिराकृतिगणः ॥ १७० ॥ १८६१ विमुक्तादिभ्योऽण् ५।२।६१ विमुक्त देवासुर रक्षोसुर उपसद् सुवर्ण परिसारक सदसत् वसु मरुत् पालीवत् वसुमत् महीयस् सरयत् बर्हयत् दशार्ण दशार्ह वयस् हविर्धान पतत्रिन् महित्री अश्वहत्य सोमापूषन् इडा अग्नाविष्णू उर्वशी वृत्रहन् । इति विमुक्तादिः ॥१७१॥ १८६२ गोषदादिभ्यो वुन् ५।२।६२ गोषद (गोषद्) इषेत्वा मातरिश्वन् देवस्यत्वा देवीरापः । कृष्णोऽस्याखरेष्ठ देवीर्षिया (देवीर्धियम्) रक्षोहण युञ्जान अञ्जन प्रसूत प्रतूर्त कृशानु (कृशाकु) । इति गोषदादिः ॥१७२॥ १८६४ आकर्षादिभ्यः कन् ५।२।६४ आकर्ष (आकर्ष) रसरु पिशाच पिचण्ड अशनि अश्मन् निचय चय जय विजय आचय नय पाद दीपहद ह्राद ह्लाद गद्गद शकुनि । इत्याकर्षादिः ॥१७३॥ १८८८ इष्टादिभ्यश्च ५।२।८८ इष्ट पूर्त उपासादित निगदित परिगदित परिवादित निकथित निषादित निपठित सङ्कलित परिकलित संरक्षित परिरक्षित अर्चित गणित अवकीर्ण आयुक्त गृहीत आम्नात श्रुत अधीत अवधान आसेवित अवधारित अवकल्पित निराकृत उपकृत उपाकृत अनुयुक्त अनुगणित अनुपठित व्याकुलित । इतीष्टादिः ॥१७४॥ १८९५ रसादिभ्यश्च ५।२।९५ रस रूप वर्ण गन्ध स्पर्श शब्द स्नेह भाव । गुणात् एकाच्चः । इति रसादिः ॥१७५॥ १९०४ सिध्मादिभ्यश्च ५।२।९७ सिध्म गडु मणि नामि बीज वीणा कूष्ण निष्पाव पांसु पार्श्व पर्शु हनु सक्तु मास (मांस) पार्ष्णिधमन्योर्दीर्घश्च । वातदन्तबल्लललाटानामूच्च । जटा घटाकटाकाञ्चाः क्षेपे । पर्ण उदक प्रजा सविथ कर्ण स्नेह क्षीतस्याम पिङ्ग पित्त पुष्क पृथु मृदु मज्ज मण्ड पत्र चटु कपि गण्डु ग्रन्थि श्री कुण्डा धरा वर्त्मन्

पक्ष्मन् श्लेष्मन् पेश निष्पाद् कुण्ड । क्षुद्रजन्तूपतापयोश्च । इति सिध्मादिः ॥१७६॥ १९०७ लोमादिपामादिपिच्छादिभ्यः शनेलचः ५।२।१०० लोमन् रोमन् वभ्रु हरि गिरि कर्क कपि मुनि तरु । इति लोमादिः ॥१७७॥ पामन् वामन् वेमन् हेमन् श्लेष्मन् कद् (कद्) वलि सामन् ऊष्मन् कृमि । अङ्गात्कल्याणे । शाकीपलाशीदूर्णा हस्वश्चं च ॥ विष्व-गित्युत्तरपदलोपश्चाकृतसन्धेः। लक्ष्म्या अच्च । इति पामादिः ॥१६८॥ पिच्छा ऽरस् ध्रुवक ध्रुवक । जटाघटाकालाः क्षेपे । वर्ण ऽदक पङ्कप्रज्ञा। इति पिच्छादिः॥१७९॥ १९१० *ज्योत्स्नादिभ्य उपसंख्यानम्* ५।२।१०३ ज्योत्स्ना तमिस्रा कुण्डल कुतप विसर्प विपादिका । इति ज्योत्स्नादिः ॥१८०॥ १९२३ व्रीह्यादिभ्यश्च ५।२।११६ व्रीहि माया शाला शिखा माला मेखला केका अष्टका पताका चर्मन् कर्मन् वर्मन् दंष्ट्रा संज्ञा वडवा कुमारी नौ वीणा बलाका यवखदनौ कुमारी । शीर्षाच्छन्दसः । इति व्रीह्यादिः ॥१८१॥ १९२४ तुन्दादिभ्य इलच्च ५।२।११७ तुन्द उदर पिचण्ड यव व्रीहि । स्वाङ्गाद्विवृद्धौ । इति तुन्दादिः ॥१८२॥ १९३३ अर्शआदिभ्योऽच् ५।२।१२७ अर्शस् उरस् तुन्द चतुर पलित जटा घटा घाटा अभ्र अघ कर्दम अम्ल लवण । स्वाङ्गादीनात् । वर्णात् । इत्यर्शआदिराकृतिगणः ॥ १८३ ॥ १९३७ सुखादिभ्यश्च ५।२।१३१ सुख दुःख तृप्त (तृप्र) कृच्छ्र अम्ल (आम्र) आम्ल अलीक कठिण सोढ प्रतीप शील हल । माला क्षेपे। कृपण प्रणाय (प्रणय) दल कक्ष । इति सुखादिः ॥१८४॥ १९४१ पुष्करादिभ्यो देशे ५।२।१३५ पुष्कर पद्म उत्पल तमाल कुमुद नड कपित्थ बिस मृणाल कर्दम शालूक विगर्ह करीष शिरीष यवास (प्रवास) हिरण्य कैरव कल्लोल तट तरङ्ग पङ्कज सरोज राजीव नालीक सरोरुह पुटक अरविन्द अम्भोज अब्ज कमल कल्लोल पयस् । इति पुष्करादिः ॥१८५॥ १९४२ बलादिभ्यो मतुबन्यतरस्याम् ५।२।१३६ बल उत्साह उल्लास उद्वास उद्दास शिखा कुल चूडा पुल कूल आयाम व्यायाम उपयाम आरोह अवरोह परिणाह युद्ध । इति बलादिः ॥१८६॥ १९६३ दृशिग्रहणाद्भवदादियोग एव ५।३।१४ भवान् दीर्घायुः देवानां प्रियः आयुष्मान् । इति भवदादिः ॥१८७॥ २०१५ देवपथादिभ्यश्च ५।३ १०० देवपथ (हंसपथ वारिपथ रथपथ) स्थलपथ करिपथ अजपथ राजपथ शतपथ शङ्कुपथ सिन्धुपथ सिद्धगति उष्ट्रग्रीव वामरज्जु हस्त इन्द्र दण्ड पुष्प मत्स्य । इति देवपथादिराकृतिगणः ॥१८८॥ २०२८ शाखादिभ्यो यः ५।३। १०३ शाखा मुख जघन श्रृङ्ग मेघ अभ्र चरण स्कन्ध स्कद (स्कन्द) उरस् शिरस् अग्र (शाण) शरण । इति शाखादिः ॥१८९॥ २०६२ शर्करादिभ्योऽण् ५।२।१०७ शार्करा कपालिका कपाटिका कपिष्ठिका (कनिष्ठिका) पुण्डरीक शतपत्र गोलोमन् लोमन् गोपुच्छ नराची नकुल सिकता । इति शर्करादिः ॥१९०॥ २०६६ अङ्गुल्यादिभ्यष्ठक् ५।३।१०८ अङ्गुली भरुज वभ्रु वरुण मण्डर मण्डल शष्कुली हरि कपि मुनि रुह खल उदश्वित् गोणी उरस् कुलिश । इत्यङ्गुल्यादिः ॥१९१॥ २०६९ दामन्यादित्रगर्तषष्ठाच्छः ५ ३।११६ दामनी औलपि वैजवापि औदकि औदञ्चि अच्युतत्ति (आच्युतत्ति) अच्युतदत्ति (आच्युतदत्ति) शाकुन्तकि आक्षिदत्ति (आक्षिदत्ति) औडवि काकदन्तकि शाण्डान्तपि सार्वसेनि विन्दु वैन्दवि तुलभ मौञ्जायनि काकन्दि सावित्रीपुत्र । इति दाम-

न्यादिः ॥ १९२ ॥ २०७० पर्वादिर्यौधेयादिभ्योऽणञौ ५।३।११७ पर्शु असुर रक्षस् बाह्लीक वयस वसु मरुत् सत्वत् दशार्ह पिशाच अशनि कार्षापण। इति पर्वादिः॥१९३॥ यौधेय कौशेय शौक्रेय शौभ्रेय धार्तेय धार्तेय उपावाणेय त्रिगर्त भरत उशीनर। इति यौधेयादिः ॥१९४॥ २०७५ स्थूलादिभ्यः प्रकारवचने कन् ५।४।३ स्थूल अणु माषेषु (माष इषु) कृष्ण तिलेषु। यव व्रीहिषु। इक्षु तिल। पाण्डकालावदातसुरायाम्। गोमूत्र आच्छादने। सुरा अहौ। जीर्णशालिषु। पन्नमूल समस्तो व्यस्तश्च। कुमारीपुत्र कुमारीश्वशुर मणि। इति स्थूलादिः ॥१९५॥ २०९७ यावादिभ्यः कन् ५।४।२९ याव मणि अस्थि तालु जानु साम्द्र पीत स्तम्ब। ऋता उष्णशीते। पशौ लूनविपाते। अणु निपुणे। पुत्र कृत्रिमे। स्नात वेदसमाप्तौ। शून्य रिक्ते। दान कुस्सिते। तनु सूत्रे। ईयसश्च। ज्ञात अज्ञात। कुमारीक्रीडनकानि च (कुमारक्रीडनकानि च)। इति यावादिः ॥१९६॥ २१०२ विनयादिभ्यष्ठक् ५।४।३४ विनय समय। उपायो द्रव्यदं च। सम्प्रति सङ्गति कथञ्चित् अकस्मात् समाचार उपचार समाय (समयाचार) व्यवहार सम्प्रदान समुत्कर्ष समूह विशेष अत्यय। इति विनयादिः ॥१९७॥ २१०६ प्रज्ञादिभ्यश्च ५।४।३८ प्रज्ञ वणिज् उशिज् उष्णिज् प्रत्यय विद्वस् विदन् वोढ्न् विद्या मनस्। श्रोत्र शरीर। जुह्वत्। कृष्ण मृगे। चिकीर्षत्। चोर शत्रु योध चक्षुस् वसु [एनस्] मरुत् ऋक्ष सत्वत् दशार्ह वयस् [व्याकृत] असुर रक्षस् पिशाच अशनि कर्षापण देवता बन्धु। इति प्रज्ञादिः ॥१९८॥ २१११ *भाषादिभ्य उपसंख्यानम्* ५।४।४४ आदि मध्य अन्त पृष्ठ पार्श्व। इत्याद्याकृतिगणः ॥१९९॥ ८७७ अव्ययीभावे शरत्प्रभृतिभ्यः ५।४।१०७ शरद् विपाश् अनस् मनस् उपानह् अनडुह् दिव् हिमवत् हिरुक् विट् सद् दिश् दृश् विश् चतुर् स्यद् तद् यद् एतद् कियत्। जरायाः जरस् च। प्रतिपरसमनुभ्योऽक्ष्णः। पथिन्। इति शरदादिः ॥२००॥ ८९७ द्विदण्ड्यादिभ्यश्च ५।४।१२८ द्विदण्डि द्विमुसलि उभाञ्जलि उभयाञ्जलि उभादन्ति उभयादन्ति उभाहस्ति उभयाहस्ति उभाकर्णि उभयाकर्णि उभापाणि उभयापाणि उभाबाहु उभयाबाहु एकपदी प्रोष्ठपदी आढ्यपदी (आढ्यपदी) सपादि निकुष्यकर्णि संहतपुच्छि अन्तेवासी। इति द्विदण्ड्यादिः ॥२०१॥ ८७७ पादस्य लोपोऽहस्त्यादिभ्यः ५।४।१३८ हस्तिन् कुद्दाल अश्व कशिक कुक्कुट कटोल कटोलक गण्डोल गण्डोलक कण्डोल कण्डोलक अज कपोत जाल गण्ड महिला दासी गणिका कुसूल। इति हस्त्यादिः ॥२०२॥ ८७८ कुम्भपदीषु च ५।४।१३९ कुम्भपदी एकपदी जालपदी शूलपदी मुनिपदी गुणपदी शतपदी सूत्रपदी गोधापदी कलशीपदी विपदी तृणपदी द्विपदी त्रिपदी षट्पदी दासीपदी शितिपदी विष्णुपदी सुपदी निष्पदी आर्द्रपदी कुणिपदी कृष्णपदी शुचिपदी द्रोणीपदी (द्रोण्यपदी) द्रुपदी सूकरपदी शकृत्पदी अष्टापदी स्थूणापदी अपदी सूचीपदी। इति कुम्भपद्यादिः ॥२०३॥ ८७९ उरःप्रभृतिभ्यः कप् ५।४।१५१॥ उरस् सर्पिस् उपानह् पुमान् अनड्वान् पयः नौः लक्ष्मीः दधि मधु शाली शालिः अर्थाञ्च ः। इत्युत्तरःप्रभृतयः ॥ २०४ ॥

षष्ठोऽध्यायः ।

७९ * शकन्ध्वादिषु पररूपं वाच्यम् * ६।१।९४ शकन्धुः कर्कन्धुः कुलटा । सीमन्तः केशवेशे । हलीषा मनीषा लाङ्गलीषा पतञ्जलिः । सारङ्गः पशुपक्षिणोः । इति शकन्ध्वादिः ॥२०५॥ १०७१ पारस्करप्रभृतीनि च संज्ञायाम् ६।१।१५७ पारस्करो देशः । कारस्करो वृक्षः । रथस्था (रथस्था) नदी । किष्कुः प्रमाणम् । किष्किन्धा गुहा । तदूबृहतोःकरपत्योश्चोरदेवतयोः सुट् तलोपश्च । प्राक्तुम्पतौ गवि कर्तरि । इति पारस्करादिः ॥२०६॥ ३६८१ उञ्छादीनां च ६।१।१६० उञ्छ म्लेच्छ जञ्ज तल्प (जल्प) जप वच । युग कालविशेषे रथाङ्गकरणे च । गरो दूष्ये (गरो दुष्ये) अवन्तः वेदवेगवेष्टबन्धाः करणे । स्तुद्रुवरुक्छन्दसि । वर्तनि स्तोत्रे । स्वभ्रे दरः । साम्बतापौ भावगर्हायाम् । उत्तमशक्तमौ सर्वत्र । भक्षमन्यभोगमन्थाः देहाः । इत्युञ्छादिः ॥२०७॥ ३६९१ वृषादीनां च ६।१।२०३ वृषः जनः ज्वरः ग्रहः हयः मयः गयः तायः तयः चयः अमः वेदः सूदः अंशुः गुहा । शमरण्यौ संज्ञायां सम्मतौ भावकर्मणोः । मन्त्रः शान्तिः कामः यामः आरा धारा कारा वहः कल्पः पादः । इति वृषादिराकृतिगणः । अविहितलक्षणमाद्युदात्तत्वं वृषादिषु ज्ञेयम् ॥२०८॥ ३७८५ विस्पष्टादीनि गुणवचनेषु ६।२।२४ विस्पष्ट विचित्र विचित्त व्यक्त स्वप्न पटु पण्डित कुशल चपल निपुण । इति विस्पष्टादिः॥२०९॥ ३७७१ कार्तकौजपादयश्च ६।२।३७ कार्तकौजपौ सावाणमाण्डकेयौ (सावर्णिमाण्डूकेयौ) अवन्त्यश्मकाः पैलश्यापर्ण्ययाः कपिश्यापर्ण्ययाः शौतिकाक्षपाञ्चालेयाः कटुकवाधूलेयाः शाकलशुनकाः शाकलशणकाः शणकवाभ्रवाः आर्चाभिमौद्गलाः कुन्तिसुराष्ट्राः चिन्तिसुराष्ट्राः तण्डवतण्डाः अविमुक्तकामविद्धाः बाभ्रवशालङ्कायनाः बाभ्रवदामच्युताः कटकाल्लापाः कठकौथुमाः कौथुमलौकाक्षाः स्त्रीकुमारम् मौदपैप्पलादाः वत्सजरन्तः सौश्रुतपार्थिवाः जरामृत्यूयाज्यानुवाक्ये । इति कार्तकौजपादिः ॥२१०॥ ३७७६ कुरुगार्हपतरिक्तगुर्वसूतजरत्यश्लीलदृढरूपापारेवडवातैतिलकद्रुः पण्यकम्बलोदासीभाराणां च ६।२।४२ दासीभारः देवदूतिः देवभीतिः देवलातिः वसुनीतिः (वसूनितिः) औषधिः चन्द्रमाः । इति दासीभारादिराकृतिगणः ॥२११॥ ३८१५ युक्तारोह्यादयश्च ६।२।८१ युक्तारोही आगतरोही आगतयोधी आगतवज्री आगतनन्दी आगतप्रहारी आगतमत्स्यः क्षीरहोता भगिनी भर्ता वामगोधुक् अश्वत्रिरात्रः गर्गत्रिरात्रः व्युष्टित्रिरात्रः गणपादः एकत्रितिपादू । पात्रेसमितादयश्च । इति युक्तारोह्यादिराकृतिगणः ॥२१२॥ ३८१९ घोषादिषु च ६।२।८५ घोष घट (कट) वल्लभ हद बदरी पिङ्गल (पिङ्गली) पिशङ्ग माला रक्षा शाला (कुट्) कुट कूटशाल्मली अश्वत्थ तृण शिखण्डी मुनि प्रैक्षाकु (प्रेक्षा) इति घोषादिः ॥२१३॥ ३८२० छात्र्यादयः शालायाम् ६।२।८६ छात्रि पेलि भाण्डि व्याडि आखण्डि आटि गोमि । इति छात्र्यादिः ॥२१४॥ ३८२१ प्रस्थेऽवृद्धमकर्क्यादीनाम् ६।२।८७ कर्कि (कर्की) मद्गी मकरी कर्कन्धु शमी करीरि (करीर) कन्दुक कुवल (कवल) बदरी । इति कर्क्यादिः ॥२१५॥ ३८२२ मालादीनां च ६।२।८८ माला शाला शोणा (शोण)

द्राक्षा स्राक्षा क्षामा काक्षी एक काम । दिवोदासवध्र्यश्च इति मालादिराकृतिगणः ॥ २१६ ॥ ३८५२ क्रत्वादयश्च ६।२।११८ क्रतु इशीक प्रतीक प्रतूर्ति हव्य भव्य भग । इति क्रत्वादिः ॥ २१७ ॥ ३८५९ आदिश्चिहणादीनाम् ६।२।१२५ चिहण मदुर मदुगुर वैतुल पटत्क वैडालिकर्ण्यक वैडालिकर्णि कुक्कुट चिक्कण चित्कण । इति चिहणादिः ॥ २१८ ॥ ३८६५ वर्ण्यादयश्च ६।२।१३१ दिगादिषु वर्ण्यादयस्त एव कृतयदन्ताः । इति वर्ण्यादयः ॥ २१९ ॥ ३८६८ चूर्णादीन्यप्राणिषष्ठ्याः ६।२।१३४ चूर्ण करिष करीष शाकिन शाकट द्राक्षा तूस्त कुन्दम दलप चमसी चक्कन चौल । इति चूर्णादिः ॥ २२० ॥ ३८६९ षट्च काण्डादीनि ६।२।१३५ काण्ड चीर पल्लल सूष शाक कूल । इति काण्डादिः ॥ २२१ ॥ ३८७४ उभे वनस्पत्यादिषु युगपत् ६।२।१४० वनस्पति बृहस्पतिः शचीपतिः तनूनपात् नराशंसः शुनःशेपः शण्डामर्कौ तृष्णावरूत्री लम्बा विश्ववयसौ मनुष्युः । इति वनस्पत्यादिः ॥ २२२ ॥ ३८८० सञ्ज्ञायामनाचितादीनाम् ६।२।१४६ आचित पर्याचित आस्थापित परिगृहीत निरुक्त प्रतिपन्न अपश्लिष्ट प्रश्लिष्ट उपहित उपस्थित संहितागवि । इत्याचितादिः ॥ २२३ ॥ ३८८१ प्रवृद्धादीनां चः ६।२।१४० प्रवृद्ध यानम् । प्रवृद्धो वृषलः । प्रयुता सृष्णवः । आकर्षे अवहितः अवहितो भोगेषु । खट्वारूढः । कविशस्तः । इति प्रवृद्धादिः ॥ २२४ ॥ आकृतिगणोऽयम् । तेन । प्रवृद्ध यानम् । अप्रवृद्धो वृषकृतो रथ इत्यादि । ३८९४ कृत्योकेष्णुच्चार्वादयश्च ६।२।१६० चारु साधु यौधिक (यौधकि) अनङ्गमेजय वदान्य अकस्मात् वर्तमानवर्धमानस्थ्वरमाणध्रियमाणक्रियमाणरोचमानशोभमानाः सञ्ज्ञायाम् । विकारसदृशे । व्यस्तसमस्ते । गृहपति गृहपतिक । राजाह्नोश्छन्दसि । इति चार्वादिः ॥ २२५ ॥ ३९१० न गुणादयोऽवयवाः ६।२।१७६ गुण अक्षर अध्याय सूक्त छन्दोमान । इति गुणादिराकृतिगणः ॥ २२६ ॥ ३९१८ निरुदकादीनि च ६।२।१८४ निरुदक निरुपल निर्मक्षिक निर्मशक निष्कालक निष्कालिक निष्पेष दुस्तरीप निस्तरीप निस्तरीक निरजिन उदजिन उपाजिन । परेर्हस्तपादकेशकर्षाः । इति निरुदकादिराकृतिगणः ॥ २२७ ॥ २९२७ प्रतेरंश्वादयस्तत्पुरुषे ६।२।१९३ अंशु जन (राजन्) उष्ट्र खेटक अजिर आर्द्रा प्रवण कृत्तिका अधंपुर । इत्यंश्वादिः ॥ २२८ ॥ ३९२८ उपाद्व्यजजिनमगैरादयः ६।२।१९४ गौर तैल तैल लेट लोट जिह्वा कृष्ण कन्या गुध कल्प पाद । इति गौरादिः ॥ २२९ ॥ ६२९ * त्रिचक्रादीनां छन्दस्युपसङ्ख्यानम् * ६।२।१२९ त्रिचक्र त्रिवृत् । त्रिवङ्कुर । इति त्रिचक्रादिराकृतिगणः ॥ २३० ॥ ८३१ स्त्रियाः पुंवद्भाषितपुंस्कादनूङ्समानाधिकरणे स्त्रियामपूरणी प्रियादिषु ६।३।३४ प्रिया मनोज्ञा कल्याणी सुभगा दुर्भगा भक्तिः सचिवा स्वसा (स्वा) कान्ता (क्षान्ता) समा चपला दुहिता वामा अबला तनया । इति प्रियादिः ॥ २३१ ॥ ८३६ तसिलादिष्वाकृत्वसुचः ६।३ ३५ तसिल् त्रल् तरप् तमप् चरट् जातीयर् कल्पप् देशीयर् रूपप् पाशप् थल् थाल् दाहिल् तिल् थ्यन् । इति तसिलादयः ॥ २३२ ॥ ९३६ * कुक्कुट्यादीनामण्डादिषु * ६।३।४२ कुक्कुटी मृगी काकी अण्ड पद ग्रा अकुंस शकुनी । इति कुक्कुट्यादिरण्डादिश्च ॥ २३३-२३४ ॥ १०३४ पृषोदरादीनि यथोप

दिष्टम् ६।३।१०९ पृषोदर पृषोत्थान बलाहक जीमूत श्मशान उलूखल पिशाच बृसी मयूर । इति पृषोदरादिराकृतिगणः ॥ २३५ ॥ १०३८ वनार्थयोः सञ्ज्ञायां कोटरकिंशुलुकादीनाम् ६।३।११७ कोटर मिश्रक सिंघ्रक पुरगसारिक (शारिक) इति कोटरादिः ॥२३६॥ किंशुलुक शाल्व नड अञ्जन भञ्जन लोहित कुक्कुट । इति किंशुलुकादिः ॥ २३७ । १०४१ मतौ बह्वाऽनजिरादीनाम् ६।३।११९ अजिर खदिर पुलिन हंसक (हंस) कारण्ड (कारण्डव) चक्रवाक । इत्यजिरादिः ॥२३८ । १०४२ शरादीनां च ६।३।१२० शर वश धूम अहि कपि मणि मुनि शुचि हनु । इति शरादिः ॥ २३९ ॥ १०४३ । * अपोल्वादीनामिति वक्तव्यम् * ६।३।१२१ पीलु दारु रुचि चारु गम्भ कम्भ । इति पीलवादिः ॥ २४० ॥ १३११ बिल्वकादिभ्यश्छस्य लुक् ६।४।१५३॥ बिल्वक वेणु वेत्र वेतस तृण इक्षु काष्ठ कपोत कुञ्जा तक्षन् । नडाद्यन्तर्गणो बिल्वादिः । छविधानार्थं ये नडादयस्ते यदा छसन्नियोगेन कृतकुगागमास्ते बिल्वकादयः ॥ २४१ ॥ इति षष्ठोऽध्यायः ।

सप्तमोऽध्यायः ।

स्नात्व्यादयश्च ६।१।४९ स्नात्वी पीत्वी । इति स्नात्व्यादिराकृतिगणः ॥२४॥ १३८६ द्वारादीनां च ७।३।४ द्वार स्वर स्वपाम स्वाध्याय व्यलीक स्वहित स्वर् स्फ्यकृत् स्वादु मृदु दवस श्वन् स्व । इति द्वारादिः ॥२४३॥ १५४९ स्वागतादीनां च ७।३।७ स्वागत स्वध्वर स्वेङ्ग व्यङ्ग व्यड व्यवहार स्वपति स्वपिति । इति स्वागतादिः ॥२४४॥ १४३८ अनुशतिकादीनां च ७।३।२० अनुशतिक अनुहोड अनुसंवरण (अनुसञ्चरण) अनुसंवत्सर अङ्गारवेणु असिहस्त्य [अस्यहस्त्य] अस्यहेति वध्योग पुष्करसद् अनुहरत् कुरुकत कुरुपञ्चाल उदकशुद्ध इहलोक परलोक सवलोक सर्वपुरुष सर्वभूमि प्रयोग परस्त्री । राजपुरुषात्ष्यञि । सूत्रनड । इत्यनुशतिकादिराकृतिगणोऽयम् ॥२२५॥ तेन । अभिगम अभिभूत अभिदेव चतुर्विधा इत्यादयोऽप्यत्र विज्ञेयाः । ४६४ *क्षिपकादीनां चोपसंख्यानम् ७।३।४५ क्षिपका ध्रुवका चरका सेवका करका चटका अवका लहका अलका कन्यका ध्रुवका एडका । इति क्षिपकादिराकृतिगणः ॥१०६॥ १८६४ न्यङ्क्वादीनां च ७।३।५२ न्यङ्कु मदगु भृगु दूरेपाक बलेपाक क्षणेपाक दूरेपाका फलेपाका दूरेपाकु फलपाकु तक्र (तत्र) वक्र (चक्र) व्यतिषङ्ग अनुषङ्ग अवसर्ग उपसर्ग श्वपाक मांसपाक (मासपाक) मूलपाक कपोतपाक उलूकपाक । संज्ञायां मेघनिदाघावदाघार्घाः । न्यग्रोध वीरुत् । इति न्यङ्कादिः ॥१४७॥ १५७१, १५८३ *काण्यादीनां चेति वक्तव्यम्* ७।४।३ कण रण भण श्रण लुप हेठ ह्वायि वाणि (चाणि) लोठि (लोठि) लोपि । इति काण्यादिः ॥१४८॥ इति सप्तमोऽध्यायः ।

अष्टमोऽध्यायः ।

३९३४ तिङो गोत्रादीनि कुत्सनाभीक्ष्ण्ययोः ८।१।२७ गोत्र अव प्रवचन प्रहसन प्रक्थन प्रत्ययन प्रपञ्च प्राय न्याय प्रवक्षण विचक्षण अवचक्षण स्वाध्याय भूयिष्ठ (भूयिष्ट) वानाम ॥ इति गोत्रादिः ॥२४९॥ ३९७४ पूजनात्पूजितमनुदात्तं काष्ठादिभ्यः ८।१।६७ काष्ठ दारुण अमतापुत्र वेश अनाज्ञात अनुज्ञात अपुत्र अयुत अदभुत अनुक्त मृष घोर सुख परम सु अति । इति काष्ठादिः ॥२५०॥ १८९७ मादुपधायाश्च मतोर्वोऽयवादिभ्यः

परिशिष्टे रूपलेखनप्रकारः।

अपीपवत्—'पूङ्' धातोः "हेतुमति च" इत्यनेन णिचि अनुबन्धलोपे पू इ इति स्थिते "द्विर्वचनेऽचि" इति निषेधात् वृद्धयभावे "सनाद्यन्ता धातवः" इत्यनेन ण्यन्तस्य धातुसंज्ञायां लुङि तिपि इपावितौ "लुङ्-लङ्-लृङ्क्ष्वडु-दात्तः" इत्यनेन अडागमे "च्लि लुङि" इति च्लौ "णि-श्रि-द्रु-स्रुभ्यः" इत्यनेन च्लेश्चङादेशे अनुबन्धलोपे "चङि" इत्यनेन द्वित्वे उत्तरखण्डस्य वृद्धयवादेशयोः कृतयोः 'अपू पाव् इ अत्' इति स्थिते "णेरनिटि" इत्यनेन णिलोपे "णौ चङ्युपधाया ह्रस्वः" इत्यनेन उपधाह्रस्वे अभ्यासे आकाराभावेन 'सन्यतः" इत्यस्याप्राप्त्या "ओः पुयण्ज्यपरे" इत्यनेन अभ्यास्याकारस्य इकारे सन्वद्भावविषयत्वात् "दीर्घो लघोः" इति दीर्घे "अपीपवत्" इति जातम्।

अचीचकासत्—"चकासृ दीप्तौ" अस्माण्णिचि तदन्तात्लुङि तिपि इपावितौ "लुङ्-लङ्" इत्यडागमे मध्ये च्लौ तस्य "णि-श्रि-द्रु-स्रुभ्यः कर्तरि चङ्" इत्यनेन चङादेशे "चङि" इत्यनेन द्वित्वे अभ्याससंज्ञायां हलादिशेषे च 'कुहोश्चुः" इति चुत्वे 'णेरनिटि' इति णिलोपे चङ्परे णौ यदङ्गं तस्य योऽभ्यासो लघुपरः इत्यर्थपक्षाश्रये "सन्वल्लघुनि चङ्परेऽनग्लोपे" इति सन्वद्भावे "सन्यतः" इति इत्वे "दीर्घो लघोः" इति दीर्घे 'अचीचकासत्' इति। "अङ्गं यत्र द्विरुच्यते" इति मते अर्थात् "सन्वल्लघूनी"त्यस्य "चङ्परे णौ यल्लघु तत्परो योऽङ्गस्य अभ्यासः" इत्यर्थपक्षे सन्वद्भावाऽभावात् इत्वदीर्घयोरप्राप्तयोः "अचचकासत्" इति भवतीति।

औज्जिजत्—'उब्ज आर्जवे' अयं धातुः उपदेशे दकारोपधः। तस्य "भुजन्युब्जौ पाण्युपतापयोः" इति सूत्रेण निपातनात् बकारे कृते निष्पन्नात् 'उब्ज्' धातोर्णिचि ण्यन्तस्य "सनाद्यन्ताः" इत्यनेन धातुसंज्ञायां लुङि तिपि अजादित्वादाडागमे "आटश्चे"ति वृद्धौ औब्ज् इ त्' इति स्थिते मध्ये च्लौ तस्य "णि-श्रि-द्रु-स्रुभ्यः कर्तरि चङ्" इत्यनेन चङि "नन्द्राः संयोगादयः" इत्यनेन निषेधात् "चङि" इत्यनेन जिशब्दस्य द्वित्वे, नच साम्प्रतं संयोगादौ दकाराभावात् कथं "नद्राः" इत्यस्य प्रवृत्तिरिति वाच्यम्? द्वित्वे कर्त्तव्ये अन्तरङ्गोऽपि नकारादेशः "नद्राः" इति निषेधे कृते प्रवर्त्तते दकारोच्चारणसामर्थ्यात्। एवञ्च "औब्जि जि अ त्' इति स्थिते "णेरनिटि" इति णिलोपे "औब्जिजत्" इति सिद्धम्।

अतितिपत्—"ष्ठा गति-निवृत्तौ" इत्यस्य धात्वादेः षः सः" इति सत्वे "निमित्तापाये नैमित्तिकस्याप्यपायः" इति परिभाषया इत्वस्यापि निवृत्तौ स्थाइत्यस्माद्धातोः' 'हेतुमति च" इति णिचि अनुबन्धलोपे "अर्ति-ह्री-ब्ली-री-क्नूयी-क्ष्माय्यातां पुङ् णौ" इत्यनेन पुकि अनुबन्धलोपे स्थापि इति ण्यन्तस्य "सनाद्यन्ता धातवः" इति धातुसंज्ञायां लुङि तिपि इपावितौ "लुङ्-लङ्" इत्यडागमे मध्ये च्लौ तस्य "णि-श्रि-द्रु-स्रुभ्यः" इत्यनेन चङि "णौ चङ्युपधाया ह्रस्वः" इति ह्रस्वे "णेरनिटि" इति णिलोपे "चङि" इत्यनेन द्वित्वे अभ्यास-

संज्ञायां "सर्पूर्वाः खयः" इति अभ्यासावयवसकारपकारयोर्लोपे "अभ्यासे चर्च" इति चर्त्वे "सन्वल्लघुनि" इति सन्वद्भावे "सन्यतः" इति इत्वे षत्वे ष्टुत्वे च कृते अतिष्टप अत् इति स्थिते "तिष्ठतेरित्" इत्यनेन उपधाया इदादेशे "अतिष्ठिपत्" इति ।

अध्यजीगपत्—अधिपूर्वादिङ्धातोर्णिचि तदन्ताल्लुङि तिपि अडागमे च्लेश्चङादेशे "णौच संश्चङोः" इति इङो गाङादेशे पुकि उपधाह्रस्वत्वे 'अधि अ गप् इ अ त्' इति स्थिते 'गप्' इत्यस्य द्वित्वे अभ्याससंज्ञायां हलादिशेषे 'कुहो श्चुः' इत्यनेन अभ्यासस्य चुत्वे सन्वद्भावे 'सन्यतः' इतीत्वे 'दीर्घो लघोः' इति दीर्घे यणि 'अध्यजीगपत्' इति । नचात्र णिज्निमित्तस्य गाङो द्वित्वे कर्त्तव्ये स्थानिवद्भावो निषेधो वा शङ्क्यः, यत्र अभ्यासोत्तरखण्डे आद्योऽज्वर्णोऽस्ति तत्रैव स्थानिवद्भावो निषेधो वेत्युक्तत्वात् । इह तु गाङः पूर्वं सति हि द्वित्वे 'अजादेर्द्वितीयस्य' इति णिच एव द्वित्वं भवेत्ततः चङ्परणिज्निमित्तो गाङ् ततश्च प्रक्रियाणां परिनिष्ठितरूपे वा अवर्णवदुत्तरखण्डं दुर्लभं कीर्तयतिसाम्यात् ।

जिघृक्षति—'ग्रह् धातोः' "धातोः कर्मणः समानकर्तृकादिच्छायां वा" इति सनि अनुबन्धलोपे सनः आर्धधातुकत्वात् इटि प्राप्ते "सनि ग्रहगुहोश्च" इति निषेधे धातुसंज्ञायां लटि तिपि अनुबन्धलोपे "रुदविदमुषग्रहिस्वपिप्रच्छः संश्च" इति सनः कित्त्वेन "ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां ङिति च" इति सम्प्रसारणे पूर्वरूपे "सन्यङोः" इति द्वित्वे अभ्याससंज्ञायाम् "उरत्" इति अत्त्वे हलादिशेषे च "कुहोश्चुः" इति चुत्वे "सन्यतः" इति इत्वे सति हकारादिणः परस्य सस्य षत्वे प्राप्ते तस्यासिद्धत्वात् हस्य ढत्वे "एकाचो वशो भष्झषन्तस्य स्ध्वोः" इति भष्भावे "ढढोः कः सि" इति कत्वे षत्वे "जिघृक्षति" इति ।

ईर्त्सति—ऋद्धिंतुमिच्छति इति विग्रहे 'ऋध्' धातोः "धातोः कर्मणः समानकर्तृकादिच्छायां वा" इत्यनेन सनि अनुबन्धलोपे "आप्ज्ञप्यृधामीत्" इति ईत्वे रपरत्वे ईर्ध् + स इति स्थिते "पूर्वत्रासिद्धीयमद्वित्वे" इति वचनात् पूर्वं चर्त्वे ततः "नन्द्राः" इति रेफं वर्जयित्वा "अजादेर्द्वितीयस्ये"ति 'त्स' इत्यस्य द्वित्वे अभ्याससंज्ञायाम् "अत्र लोपोऽभ्यासस्य" इति अभ्यासस्य लोपे "सनाद्यन्ता धातवः" इति धातुसंज्ञायां लटि तिपि अनुबन्धलोपे सार्वधातुकसंज्ञायां शपि शपावितौ "अतो गुणे" इति पररूपे 'ईर्त्सति' इति । इवन्त–ऋध–भ्रस्ज–दम्भु–श्रि–स्तृ–यु–ऊर्णु–भर–ज्ञपि–एभ्यः सन इट् वा स्यादित्यर्थक "सनीवन्तर्धे"ति इट् पक्षे तु—'अर्दिधिषति' इति बोध्यम् ।

ईप्सति—आप्तुमिच्छतीति विग्रहे 'आप्' धातोः "धातोः कर्मणः समानकर्तृकादिच्छायां वा" इति सनि अनुबन्धलोपे "आप्ज्ञप्यृधामीत्" इत्यनेन ईत्वे सन्नन्तस्य "सनाद्यन्ता धातवः" इत्यनेन धातुसंज्ञायां लटि तिपि अनुबन्धलोपे "सन्यङोः" इति द्वित्वे अभ्याससंज्ञायाम् "अत्र लोपोऽभ्यासस्य" इत्यभ्यासस्य लोपे सार्वधातुकसंज्ञायां शपि अनुबन्धलोपे पररूपे च 'ईप्सति" इति सिद्धम् ।

धीप्सति—"दम्भ्" धातुः उपदेशे 'दन्भु' इति, तस्मात् "धातोः कर्मणः" इत्यनेन सनि अनुबन्धलोपे सन्नन्तस्य धातुसंज्ञायां लटि तिपि शपि पूर्वरूपे "सनीवन्तर्धभ्रस्ज–दम्भु–

श्रि–स्तृ–यूर्णु–भर–ज्ञपि–सनाम्" इत्यनेन विभाषया सनो झलादित्वाभावेन अकित्त्वान्नलोपाभावे 'दम्भ इ स ति' इति स्थिते "सन्यङोः" इति द्वित्वे अभ्याससंज्ञायां हलादिशेषे "सन्यतः" इति इत्वे इणः परस्य सस्य षत्वे "दिदम्भिषति" इति। इड्विकल्पपक्षे "दम्भ इच्च" इत्यनेन दम्भेरकारस्य इत्त्वे दिम्भ स ति इति स्थिते हलग्रहणस्य जातिपरत्वेन "हलन्ताच्च" इति कित्त्वे "अनिदिता"मिति उपदेशिनो नकारस्य लोपे द्वित्वे अभ्याससंज्ञायाम् "अत्र लोपोऽभ्यासस्य" इति अभ्यासलोपे "अभ्यासे चर्चः" इति जश्त्वे भष्भावे "खरि च" इति चर्त्वे "धिप्सति" इति। "दम्भ इच्च" इत्यनेन चकारादीत्त्वपक्षे "धीप्सति" इत्यप्यव्यवहितपूर्ववदूबोध्यम्।

ज्ञीप्सति—'सनीवन्तर्धभ्रस्जदम्भुश्रिस्तृयूर्णुभरज्ञपिसनाम्' इति सूत्रे ज्ञपिः पुगन्तो मित्संज्ञकः, पकारान्तश्चौरादिकश्च। तत्र घटादिस्थात् मारणतोषणनिशामनार्थात् ज्ञाधातोः हेतुमण्णिचि पुकि घटादित्वेन मित्वादुपधाह्रस्वे 'ज्ञपि' इति, तस्मादथवा 'ज्ञप मिच्चे'ति यः स्वतः पठितइचुरादौ, तस्माण्णिचि उभयविधादपि ण्यन्ताज्ज्ञपिधातोः सनि 'सनीवन्तर्धे'ति इडभावपक्षे णेः परस्य सनः 'इको झल्' इति कित्त्वात्तस्मिन्परे णेर्गुणाभावे 'ज्ञप् इ स' इति स्थिते 'अज्झनगमां सनि' इत्यनेन प्राप्तदीर्घं परत्वाद्बाधित्वा 'णेरनिटि' इत्यनेन णिलोपे 'आप्ज्ञप्धार्मात्' इत्यनेने ईत्त्वे 'ज्ञीप्' इत्यस्य द्वित्वे अभ्याससंज्ञायां हलादिशेषे 'अत्र लोपोऽभ्यासस्य' इत्यनेन अभ्यासलोपे' लटि तिपि शपि पररूपे 'ज्ञीप्सति' इति। इट्पक्षे तु 'जिज्ञपयिषति' इति बोध्यम्।

उच्चिच्छिषति—"उच्छी विवासे" अत्र "छे च" इति तुकि कृते इचुत्वेन "उच्छ्" इति निष्पन्नं भवति। तस्मात् सनि सन्नन्तस्य "सनाद्यन्ताः" इत्यनेन धातुसंज्ञायां लटि तिपि शपि सनः इटि 'उच्छ् इ स अ ति' इति स्थिते "पूर्वत्रासिद्धीयमद्वित्वे" इति निषेधात् द्वित्वे कर्त्तव्ये चुत्वस्य निषेधाभावेन 'च्छिस्' इत्यस्य द्वित्वे अभ्याससंज्ञायां हलादिशेषेण छकारसकारयोर्निवृत्तौ 'उचिच्छिस अ ति' इति स्थिते सकारस्य प्रत्ययावयवत्वात् षत्वे पररूपे "उचिच्छिषति" इति सिद्धम्।

नच "निमित्तापाये नैमित्तिकस्याप्यपायः" इति न्यायात् निमित्तकस्य छस्य हलादिशेषेणाऽपाये सति नैमित्तिकस्य तुकोऽपि निवृत्तेस्ततश्च तदादेशचकारस्य कथमभ्यासे श्रवणमिति वाच्यम्? 'च्छ्वो'रिति सूत्रस्थ–सतुग्ग्रहणेन तस्याऽनित्यत्वात्। अन्यथा 'पृष्टः' 'पृष्टवान्' इत्यत्र "च्छ्वो"रिति सूत्रेण छकारस्य शकारे सति निमित्ताऽभावादेव तुकोऽपि निवृत्तिसिद्धौ सतुग्ग्रहणं व्यर्थं स्यात्। किञ्च 'पुष्ययोगं जानाति' 'पुष्येण योजयति' इत्येतत्साधके 'पुष्ययोगे ज्ञी' इति वचने भाष्यकृत्कृतप्रत्ययापत्त्यनुवृत्तिर्वा उक्तपरिभाषायाः अनित्यत्वे ज्ञापकं बोध्यम्। अन्यथा कुल्लुकि निमित्तापायपरिभाषयैव कुत्वनिवृत्तौ सिद्धायां किं।तदनुवृत्त्येति दिक्।

अरिरिषति—'ऋ' धातोः "धातोः कर्मणः समानकर्तृकादिच्छायां वा" इति सनि अनुबन्धलोपे आर्धधातुकसंज्ञायां "स्मिपूङ्रञ्ज्वशां सनि" इति इडागमे।गुणे रपरे अरि+स् इति स्थिते "अजादेर्द्वितीयस्य" इति रिस् शब्दस्य "सन्यङोः" इत्यनेन द्वित्वे अभ्याससंज्ञायां

-"हलादिः शेषः" इति सलोपे "सनाद्यन्ताः" इति धातुसंज्ञायां लटि तिपि अनुबन्धलोपे सार्वधातुकसंज्ञायां शपि पररूपे षत्वे 'अरिरिषति' इति ।

नच "द्विर्वचनेची"ति निषेधात् इडागमोत्तरं कथं गुण इति वाच्यम्' इसो द्वित्वकार्यित्वेन "कार्यमनुभवन्नि"ति परिभाषया निमित्तत्वाभावेन "द्विर्वचनेची"त्यस्याऽप्राप्तेः ।

यंयम्यते—यम्धातोर्यङि द्वित्वे अभ्याससंज्ञायां हलादिशेषे 'नुगतोऽनुनासिकान्तस्य' इति नुकि तस्यानुस्वारे यङन्तस्य धातुत्वाल्लटि ङित्वादात्मनेपदे तप्रत्यये एत्वे शपि पररूपे 'यंयम्यते' इति । ननु नुको नकारस्य अपदान्तत्वादझल्परकत्वाच्चेति कथं तस्य 'नश्च' इत्यनुस्वार इति चेन्न, नुकानुस्वारो लक्ष्यते इत्युक्तत्वात् ।

बोभवीति—'भू' धातोर्यङि "यङोऽचि च" इत्यनेन तरय लुकि प्रत्ययलक्षणेन "सन्यङोः" इति द्वित्वे अभ्याससंज्ञायाम् "अभ्यासे चर्च" इत्यनेन जत्वे "गुणो यङ्लुकोः" इत्यनेन अभ्यासोकारस्य गुणे 'बोभू' इत्यस्माल्लटि तिपि इपावितौ 'बोभू ति' इति स्थिते "श्तिपा शपे"ति निषेधात् "दिवादिभ्यः श्यन्" "रुधादिभ्यः श्नम्" इत्यादीनां प्राप्तावपि "कर्त्तरि शप्" इत्यस्य "श्तिपा शपे"ति निषेधाविषयत्वात् तेन शपि "चर्करीतञ्चे"त्यदादौ पाठात् शपः लुकि 'यङो वा" इत्यनेन इडागमे ऊकारस्य गुणे अवादेशे "बोभवीति" । "भूसुवोस्तिङ्" इति गुणनिषेधस्तु यङ्लुकि भाषायां न "बोभूतु तेतिक्ते" इति छन्दसि निपातनात् । अत एव यङ्लुग्भाषायामपि सिद्धः ।

वर्वृतीति—'वृतु वर्तने' अस्मात् यङि यङ्लुकि च कृते "सन्यङोः" इति द्वित्वे अभ्याससंज्ञायाम् "उरत्" इत्यत्वे रपरत्वे हलादिशेषे च कृते 'वृवृत' इत्यस्य "सनाद्यन्ता धातवः" इत्यनेन धातुसंज्ञायां लटि तिपि अनुबन्धलोपे "यङो वा" इत्यनेन ईटि व वृत ई ति इति स्थिते "नाभ्यस्तस्याचि पिति सार्वधातुके" इत्यनेन निषेधात् लघूपधगुणाऽभावे "रुग्रिकौ च लुकि" इत्यनेन अभ्यासस्य रुगागमे 'वर्वृतीति' इति सिद्धम् । एवञ्च रिकागमे "वरिवृतीति" रीगागमे "वरीवृतीति" इत्यपि बोध्यम् ।

अजघाः—'गृधु अभिकाङ्क्षायामित्यस्माद्धातोः यङ्लुकि "सन्यङोः" इति द्वित्वे अभ्याससंज्ञायां हलादिशेषे "रुग्रिकौ च लुकि" इति सूत्रेण अभ्यासस्य रुकि "कुहोश्चुः" इति चुत्वे जश्त्वे प्रत्ययलक्षणेन यङन्तस्य धातुसंज्ञायां लङि सिपि अनुबन्धलोपे शपि लुकि 'पुगन्ते'ति गुणे रपरत्वे हल्ङ्यादिना सुलोपे जर्+गर्+ध् इति स्थिते "एकाचो वश" इति गकारस्य भष्भावत् घकारे जर्+घर्+ध् इति स्थिते धकारस्य इत्वुत्वेन दकारे 'दश्च' इति रुत्वे "लुङ्लङि"ति अडागमे अजर्+घर्+र् इति स्थिते "रो रि" इति रेफलोपे "ढ्रलोपे पूर्वस्य दीर्घोऽण" इति दीर्घे रेफस्य विसर्गे 'अजघाः इति सिद्धम् । तदुक्तं केनचित्—

"गृधेर्यलोपे लङि सेरिलोपे हल्ङ्यादिलोपे रपरे गुणे च ।
भष्भावजश्त्वे च रुरेफलोपे ढ्रलोपदीर्घे च भवेदजघाः ॥"

सपत्नीवाचरतीति विग्रहे सिद्धानि रूपाणि समर्थ्यताम् ।

सपत्नीवाचरतीति विग्रहे—सपत्नायते, सपतीयते, सपत्नीयते, इति त्रीणि रूपाणि भवन्ति । तथा हि—

शत्रुपर्यायात् अपलशब्दात् "शार्ङ्गरवाद्यञो ङीन्" इति ङीनि ततः सौ तदन्तात्सपत्नी-माचरतीति विग्रहे "कर्तुः क्यङ् सलोपश्च" इति क्यङि कङ्योरित्सञ्ज्ञायां लोपे च "सुपो धातु-प्रातिपदिकयोः" इति सुपो लुकि "क्यङ्मानिनोश्च" इति पुंस्त्वेन ङीनो निवृत्तौ "अकृत्सार्व-धातुकयोः" इति दीर्घे 'सपलाय' इत्यस्य "सनाद्यन्ताधातवः" इति धातुसंज्ञायां लटि तप्रत्यये शपि शपयोरित्संज्ञायां लोपे च 'सपलाय अ त' इति स्थिते "अतो गुणे" इति पररूपे "टित आत्मनेपदानां टेरे" इति एत्वे "सपलायते" इति ।

समानः पतिः=स्वामी, यस्याः इति बहुव्रीहौ तु—सपतिशब्दात् "नित्यं सपत्न्यादिषु" इति नादेशे नान्तत्वात् ङीपि च कृते उक्तप्रकारेण क्यङि भाषितपुंस्कत्वात् पुंवद्भावेन ङीन्न-त्वयोर्निवृत्तौ दीर्घादिकार्ये 'सपतीयते' इति ।

विवाहजन्यसंस्कारविशेषनिमित्तकं पतिशब्दमाश्रित्य समानः पतिः=भर्ता, यस्याः इति बहुव्रीहौ उक्तरूपेण निष्पन्नस्य सपत्नीशब्दस्य नित्यस्त्रीत्वात् पुंस्त्वाभावेन क्यङादिकार्ये 'सपत्नीयते' इति ।

लोहितायति—'लोहित'शब्दात् भवत्यर्थे "लोहितादिडाज्भ्यः क्यष्" इति सूत्रेण क्यषि अनुबन्धलोपे, नच 'काम्यच्' इव क्यषोऽपि ककारः उच्चारणसामर्थ्यात् श्रूयत एवेति वाच्यम् ? क्यषः ककारस्य भाष्ये प्रत्याख्यानात् । एवं च लोहित य' इति स्थिते "सनाद्यन्ता धातवः" इत्यनेन धातुसंज्ञायां लटि "वा क्यषः" इत्यनेन परस्मैपदसंज्ञायां तिपि सार्वधातु-कसंज्ञायां शपि पररूपे दीर्घे च कृते "लोहितायति" इति । आत्मनेपदे तु "लोहितायते" इति भवति । अलोहितो लोहितो भवतीत्यर्थः ।

नच अभूत तद्भावविषयत्वं कथं लब्धमिति वेच्छृणु—प्रकृतिसूत्रे "अच्वेः" इत्यनुवर्तनात् लभ्यते । नन्वेवमभूततद्भावविषयत्वं डाचोऽपि विशेषणं स्यादिति चेन्न, अव्यक्तानुकरणाड्डाचो विहितत्वेन तस्य अभूततद्भावविषयत्वे अनुकरणत्वस्य भङ्गापत्तेः । एवञ्च आदिशब्दग्राह्याणां श्यामादिशब्दानामपि न विशेषणम्, आदिशब्दस्य भाष्ये प्रत्याख्यानात् । तथा च वार्ति-कम्—"लोहितडाज्भ्यः क्यष्वचनं, भृशादिष्वितराणि" आदिग्रहणमपनीय लोहितशब्दाड्डा-जन्तेभ्यश्च क्यष्वचनं कर्तव्यम्, इतराणि=लोहितादिगणपठितानि, प्रातिपदिकानि भृशा-दिष्वेव पठनीयानीत्यर्थः । एवञ्च लोहितादिगणपठित-श्यामादिशब्देभ्यः क्यङि नित्यमात्मने-पदमेवेति ज्ञेयमिति दिक् ।

चन्द्रीयिषति—चन्द्रीयतेः सनि "यथेष्टं नामधातुषु" इति वार्तिकबलात् द्वितीय-स्यैकाचो द्वित्वे रूपम् । अत्र "नन्द्राः" इति निषेधात् नकारस्य न द्वित्वमिति माधवः । वस्तुतस्तु आदिभूतादचः परेषां नदराणां न द्वित्वमित्येव भाष्यसम्मतत्वेन माधवमतं चिन्त्य-मेवेति दिक् ।

याहि याहीति यातम्—अत्र' क्रियासमभिहारे लोट्, लोटो हिस्वौ, वा च तध्वमोः' इत्य-नेन लोट्, तस्य सर्वपुरुषवचनविषये परस्मैपदिभ्यः कर्तरि हिः, एवञ्च 'याही'ति । अत्र 'यथा-विध्यनुप्रयोगः पूर्वस्मिन्' इति लोट्प्रकृतिभूत एव धातुरनुप्रयोज्यः, तत अनुप्रयोगात् यथा यथं

लडादयस्तिबादयश्च भवन्ति। ततः संख्याकालयोः पुरुषविशेषार्थस्य चाऽभिव्यक्तिः। अत्र 'क्रियासमभिव्याहारे द्वे वाच्ये' इति द्वित्वे याहि याहीति याति, यातः, यान्ति, इत्यनुप्रयोगात् सर्वलकाराः सर्वपुरुषवचनानि च भवन्ति। पुनः पुनरतिशयेन वा एककर्तृकं वर्तमानकालिकं यानं यातीत्यर्थः। अत्र इति शब्दस्तु अभेदान्वये तात्पर्यं ग्राहयतीति दिक्।

विनयति विपादिकाम्—पदव्यवस्थापूर्वकं साधनीयः।

'णीञ् प्रापणे' अस्मात् "स्वरितञितः" इत्येव आत्मनेपदे सिद्धे "कर्तृस्थे चाऽशरीरे कर्मणि" इति सूत्रं नियमयति—"कर्मकारके कर्तृस्थे सति णीञ्धातोर्यदात्मनेपदं कर्तृगे फले ञित्त्वात्प्राप्तं, तच्छरीरावयवभिन्ने एव सति कर्तृकारके स्यात्" इति। नच सूत्रस्थशरीराग्रहणात् शरीरावयव इति कथमुच्यते इति चेत् सत्यम्? शरीरतादात्म्यापन्नस्यैव कर्तृतया शरीरस्य कर्तृस्थत्वासम्भवेन सूत्रे शरीरशब्दात् शरीरावयवो लक्ष्यते। तेन प्रकृते विपादिकायाः शरीरावयवत्वात् आत्मनेपदाभावेन 'वि' उपसर्गात् 'णी' धातोर्लटि तिपि "णो नः" इति नत्वे शपि गुणे अयादेशे "विनयति" इति। "पादस्फोटो विपादिका" इत्यमरः।

परिशिष्टे पङ्क्तिलेखनप्रकारः।

ईर्ष्यतेस्तृतीयस्येति वार्तिकार्थं विवदमानं मतं सोदाहरणं प्रतिपादयत।

अयमाशयः—'ईर्ष्यतेस्तृतीयस्येति वक्तव्यम्' इति वार्तिकेन तृतीयव्यञ्जनस्य तृतीयैकाचश्च द्वित्वं भवति। ततश्च तृतीयव्यञ्जनस्य द्वित्वपक्षे व्यञ्जनापेक्षया तृतीयव्यञ्जनं यकारस्तत्सहितस्य 'यि' इत्येकाचो द्वित्वे णिलोपे च कृते 'ऐर्ष्ययत' इति रूपं सिद्ध्यति। तृतीयैकाचो द्वित्वपक्षेऽत्र तृतीयैकाचोऽभावेन वार्तिकाप्रवृत्तौ 'अजादेर्द्वितीयस्य' इति 'ष्य' शब्दस्य द्वित्वे यलोपादिकार्ये च कृते 'ऐर्षिष्यत' इति रूपम्। एवञ्च 'ऐर्ष्ययत' इति रूपसिद्ध्यर्थं वार्तिकम्। 'ऐर्षिष्यत' इति तु 'अजादेर्द्वितीयस्य' इत्यनेनैव सिद्धमिति दिक्।

माभवानिदिधत्—एधधातोर्णिचि ण्यन्तस्य धातुत्वाल्लुङि तिपि च्लेश्चङि 'एध् इ अ त्' इति स्थिते पूर्वम् उपधाह्रस्वे ततो 'धी'त्यस्य द्वित्वे अभ्याससंज्ञायां हलादिशेषे माङ्योगादाडभावे 'मा भवानिदिधत्' इति। नचाऽत्र असिद्धं बहिरङ्गमन्तरङ्गे' इति परिभाषया अन्तरङ्गत्वात् द्वित्वमेव पूर्वं स्यादिति वाच्यम्, अ.णे ऋदिकरणेन बहिरङ्गस्यापि उपधाह्रस्वस्य प्राबल्यबोधनात्। यदि तु उपधाह्रस्वात् प्रागेव अन्तरङ्गत्वात् द्वित्वं स्यात्तदा 'ओण् इ अ त्' इति स्थिते णिशब्दस्य द्वित्वे 'णौ चङ्युपधाया' इति ह्रस्वे कर्त्तव्ये चङ्परको यो णिस्तदव्यवहितमङ्गम् 'ओणिण्' इति, तस्योपधाया दीर्घाभावेन ह्रस्वाप्राप्त्या ह्रस्वनिषेधार्थम् ओण् धातोर्ऋकारोपादानं व्यर्थं स्यात् तदेव व्यर्थीभूय 'उपधा कार्यं द्वित्वात् प्रबलम्' इति ज्ञापयति।

शैषिकान्मतुवर्थीयेति कारिकां सोदाहरणं व्याख्यायत।

शेषाधिकारे विहितः शैषिकः। भवार्थे अध्यात्मादित्वात् ठञ्। शैषिकात्=शेषाधिकारभवप्रत्ययान्तात्, शैषिकः सरूपः प्रत्ययो न भवति। तेन शालायां भवः शालीयः 'वृद्धाच्छः'। तदन्तात् शालीये भवः इति वाक्यार्थे स छ एव न भवति किन्तु वाक्यमेव। विरूपस्तु भवत्येव।

अहिच्छत्रे भवः आहिच्छत्रः भवार्थेऽण्। तदन्तादाहिच्छत्रे भवः इति वाक्यार्थे वृद्धाच्छो भवति, आहिच्छत्रीयः। एवं मतुबर्थीयात् सरूपो मतुबर्थकः प्रत्ययो न। धनवानस्यास्तीति मतुबन्तान्मतुब्न। विरूपस्तु स्यादेव, दण्डिमती शाला। इह मतुबन्तात् इनिप्रत्ययो भवत्येव। सन्नन्तात्सन्नेष्यते। अर्थद्वारा च सादृश्यम्। तेनेच्छासन्नन्तात्सन्न। स्वार्थसन्नन्तात्तु स्यादेव। जुगुप्सिषते। मीमांसिषते। इति।

विस्मापयन्नित्यत्र काऽनुपपत्तिः, किञ्च समाधानम्।

'विस्मापयन् विस्मितमात्मवृत्तौ' इत्यत्र मनुष्यवाचेति करणेनैव राज्ञो विस्मय इति सिंहरूपप्रयोजकाद् विस्मयाऽभावेन "नित्यं स्मयतेः" इति सूत्राऽप्रवृत्तौ, आत्वाऽभावेन 'पुग्' न स्यात्। यदि प्रयोजकाद् विस्मयः स्वीक्रीयते, तदा "भीस्म्योर्हेतुभये" इत्यात्मनेपदमपि स्यात्। एवञ्च शतृप्रत्ययप्रयुक्तं रूपमनुपपन्नं भवतीति सन्देहावसरे "विस्मापयन्" इत्येव पाठ इति साम्प्रदायिकाः।

अथवा राजा विस्मयते, मनुष्यवाक् प्रेरयतीति मनुष्यवाक् राजानं विस्मापयते इति, तां मनुष्यवाचं सिंहः प्रेरयतीति सिंहः तया राजानं विस्मापयन्निति ण्यन्ताण्णौ मनुष्यवाग्रूपप्रयोजकाद् विस्मयो विद्यत इत्यात्त्वादिकार्यं सुलभमिति दिक्।

ऊर्णुनविषति—ऊर्णुधातोः सनि 'सनीवन्तर्धभ्रस्जदम्भुश्रिस्वृयूर्णुभरज्ञपिसनाम्' इत्यनेन विकल्पेन इटि 'विभाषोर्णोः' इत्यनेन ङित्वपक्षे गुणाभावात् 'नु' शब्दस्य द्वित्वे उत्तरखण्डे उवङि च कृते सन्नन्तस्य धातुत्वाल्लटि 'तिपि' शपि पररूपे षत्वे 'ऊर्णुनुविषति' इति। ङित्वाभावपक्षे गुणाऽवादेशयोः 'ऊर्णनविषति' इति। इडभावपक्षे 'नन्द्रा' इति निषेधात् 'नुस्' शब्दस्य द्वित्वे 'इको झल्' इत्यनेन सन्नः कित्त्वात् गुणाभावे 'अज्झनगमां सनि' इति दीर्घे 'ऊर्णुनूषति' इति।

नन्वत्र परत्वात् गुणाऽवादेशयोः कृतयोः अभ्यासे उकारस्य श्रवणं न स्यादिति चेन्न, 'द्विर्वचनेचो'ति गुणनिषेधात्। नचात्र 'सन्यङोः' इति सन्नन्तस्य द्वित्वं प्रति कार्यित्वादिटो निमित्तत्वं न स्यादिति वाच्यम्, इटो द्वित्वरूपकार्यत्वाऽभावेन निमित्तत्वात्। अत्र 'सन्यङोः' इति सूत्रेण प्रथमतः सन्नन्तसमुदायस्य द्वित्वरूपकार्यं प्राप्तं भवति, परन्तु "अजादेर्द्वितीयस्ये"ति बलेन नुशब्दस्यैव द्वित्वरूपकार्यं भवति नन्विटः। इत्थं च 'कार्यमनुभवन्नि'ति परिभाषाया अवसर एव नास्तीति भावः। 'यत्र कार्यमनुभवन् कार्यी प्रवर्तते तत्रैव कार्यी निमित्तत्वेन न स्वीक्रियते' इति परिभाषार्थः। अत्र 'यदागमाः' इति परिभाषया इड्रूप सन् द्वित्वन्नानुभवति।

यङ्लुगन्तादात्मनेपदं कथन्नेति प्रदर्श्य यङ्लुको भाषायां प्रवृत्तौ किम्मानमिति विस्तरेण ब्रूत। अयम्भावः—भूधातोर्यङ्लुकि 'बोभवीति' इत्यत्र प्रत्ययलक्षणेन ङित्वधर्ममानीय "अनुदात्तङित आत्मनेपदम्" इति सूत्रेणात्मनेपदं कथं न स्यादिति चेद्? न, ङित्त्वस्य प्रत्ययाप्रत्ययोभयवृत्तित्वेन प्रत्ययलक्षणसूत्राप्रवृत्तेः। यो हि धर्मः केवलप्रत्यये तिष्ठति, तस्यैव धर्मस्य प्रत्ययलक्षणेनानयनं भवति, यश्च धर्मः प्रत्ययेषु वर्तते, अथ च धातुष्वपि वर्तते, तस्य धर्मस्यानयनं न भवति। ङित्वधर्मश्च यङादिप्रत्ययेषु वर्तते अथ च शीङादिधातुष्वपि

वर्तते, इति तस्य धर्मस्यानयनं न भवति। अत एव शोभना दृषदो यस्मिन् प्रासादे इति विग्रहे प्रत्ययलक्षणेन असन्तत्वमाद्दाय "अत्वसन्तस्य" इति दीर्घोऽपि न भवति। असन्तत्वस्योभयेष्वपि विद्यमानत्वात्।

यङ्लुको भाषायां प्रवृत्तौ मानम्—"भूसुवोस्तिङि" इति गुणनिषेधे सिद्धे,"बोभोतेतिक्ते" इति गुणाभावनिपातनं छन्दस्येव गुणनिषेधो भवतीति नियमं करोति। एवञ्च यदि भाषायां यङ्लुक् न स्यात्तदा नियमस्य किमपि फलमेव नास्तीति यङ्लुक् भाषायामपि सिद्धो भवति। न च द्वित्वे 'बोभू' इति समुदाये भूधातोरभावेन "भूसुवोस्तिङि" इति सूत्राप्राप्तौ गुणाभावो निपातनीय एवेति वाच्यम्। षष्ठाध्यायीस्थसूत्रेण यद्द्वित्वं भवति तत्पुनरपि तस्यैवोच्चारणं भवति, न तु नवीनस्य द्वितीयस्य भूशब्दस्य, "द्विः प्रयोगो द्विर्वचनं षाष्ठम्" इति सिद्धान्तात्।

यकारवकारान्तानान्तूठ्भाविनामिति फक्किका साधु व्याख्येया।

"छ्वोः शूड्" इति सूत्रे भाष्ये किद्ग्रहणमनुवर्तते नवेति विचारे कांश्चिद्दोषानुद्भाव्य परिहृत्य चोक्तम्। एतावानेव विशेषः। अनुवर्तमाने किद्ग्रहणे छः षत्वं वक्तव्यम्। अननुवर्तमाने त्वनेन छः शत्वे कृते शान्तत्वादेव षो भविष्यतीति प्रष्टा प्रष्टुमित्यादि सिद्धये व्रश्चादिसूत्रे छग्रहणं न कर्तव्यम्। एवं हि वदता भाष्यकृता ऊठ्भाविभ्यो यङ्लुक् नास्तीत्युक्तप्रायम्। अन्यथा दिवेर्यङ्लुकि ईडभावपक्षे देदेति देदेषि इत्यादौ ऊठो णावाभावाभ्यां महान् विशेषः स्यात्। तत्र किद्ग्रहणाननुवृत्तावूठः प्रवृत्त्या देद्येति देद्येषीत्यादिरूपविशेषलाभात्, परन्त्विदं ज्ञापकं "छ्वोः शूड्" इत्यनेन यत्रोठ् प्रवर्तते, तत्रैव प्रवर्तते। तज्ज्ञापनस्योक्तसूत्रस्य भाष्यमूलकत्वात्। "ज्वरत्वर" इत्यादिसूत्रेण यत्रोठ् भवति, तत्र यङ्लुग् भवत्येवेति युक्तं माधवादीनां सम्मतञ्च।

हलिकल्योरदन्तत्वनिपातनस्य प्रयोजनं सोदाहरणं प्रदर्श्यते।

हलिकल्योरदन्तत्वनिपातनेन 'वृद्धौ सत्यां टिलोपः' इत्ययं सिद्धिर्भवति। तथाहि—'वृद्धेर्लोपो बलीयान्' इति भाष्यवचनात् पूर्वं टिलोपे अग्लोपित्वाद् दीर्घसन्वद्भावयोरभावात् 'अजहलत्' 'अचकलत्' इति रूपद्वयसिद्धौ हलिकल्योरदन्तत्वनिपातनं व्यर्थमेव, तदेव व्यर्थीभूय "वृद्धौ सत्यां टिलोपः" इति वचनं ज्ञापयति। इत्थं च स्वांशे चरितार्थम्। फलञ्च—'अपीपटत्—अपपटत्' इति रूपद्वयसिद्धिः। पूर्वोक्तभाष्यवचनेन पूर्वं टिलोपस्ततो वृद्धिरिति पक्षः सिद्धो भवति। हलिकल्योरदन्तत्वनिपातनेन च पूर्वं वृद्धिस्ततष्टिलोपः इति पक्षः सिद्धो भवति। एवञ्च प्रमाणद्वयेन मतद्वयं सिद्धं भवतीति पूर्वोक्तरूपद्वयस्यापि सिद्धिरिति दिक्।

'आचारेऽवगल्भल्लीवहोरेभ्यः क्विब्वा वक्तव्यः इति वार्तिकं सोदाहरणं व्याख्येयम्।

आचारेऽर्थे एभ्यः क्विब्वा स्यादित्यर्थः। वाग्रहणात् क्यङपि। वार्तिके अवगल्भादयः पचाद्यजन्ताः। किप्सन्नियोगेनानुदात्तत्वमनुनासिकत्वं चच्प्रत्ययस्य प्रतिज्ञायते। नचात्र क्विप्प्रत्ययसन्नियोगेन अच्प्रत्ययस्यानुनासिकत्वादिनिपातनाद्गल्भादिघटकाकारस्य लोपेऽनेकाच्त्वाभावेन 'अवगल्भाञ्चक्रे' इत्यत्र आम् न स्यादिति वाच्यम्, 'साम्प्रतिकाभावे भूतपूर्व-

गतिरामीयते' इति परिभाषया आम्प्रत्ययस्य सिद्धत्वात्। उक्तवचने प्रमाणञ्च—"आचारेऽवगल्भ" इति प्रकृतवार्तिकमेव। नच आचारेर्थे—अवगल्भते, क्लीबते, होडते, इत्यादौ आत्मनेपदार्थं वार्तिकं सार्थकमिति वाच्यम्, "धातूनामनेकार्थाः" इति वचनेन प्रत्ययरहितगल्भादिधातोरप्याचारेऽर्थे शक्तिप्रदर्शनाद् 'अवगल्भते' इत्यादौ तङः सिद्धत्वात्। वार्तिके अवोपसर्गसिशिष्टपाठसामर्थ्यात् केवलगल्भादिधातोः उपसर्गान्तरविशिष्टाच्च क्यङेव भवतीति माधवादयः। परञ्च क्यङ्क्विपोर्नास्ति विवादो द्वाभ्यामपि भाव्यम्। किन्तु अवोपसर्गरहितगल्भादिभ्यः क्विपि सति परस्मैपदमेव स्यान्नत्वात्मनेपदमित्येव वक्तुं युक्तम्। वार्तिकस्य मुख्यप्रयोजनं प्रयोगे आम्प्रत्ययस्य सिद्धिः। आत्मनेपद तु गौणफलमिति दिक्।

उपसर्गसमानाकारमिति व्याख्यायताम्।

अयम्भावः—युद्धे योऽयं ग्रामशब्द इति व्याख्यानेन केवलग्रामशब्दस्य युद्धे शक्त्यभावेन संग्रामशब्दस्य लाभात् 'तत्करोति' इत्यादिना णिचि 'सङ्ग्रामयते' इत्यादिसिद्धौ चुरादौ सङ्ग्रामयुद्धे इति विशिष्टग्रामशब्दो व्यर्थीभूय 'उपसर्गसमानाकारम्' इत्यादि वचन ज्ञापयति। तेन 'स्वमनायत' इत्यादौ उपसर्गस्य पृथक्करणं फलं भवति। अथ च ज्ञापकस्य सजातीयापेक्षत्वेन यत्रोपसर्गस्य सम्पूर्णरूपेण स्थितिस्तत्रैव पृथक्करण भवति, यत्र तु गुणादेशेनोपसर्गस्यापहरणं भवति तत्र पृथक्करणन्न भवति। ततश्च ओढ इवाचर्येति विग्रहे आडः पृथक्करणाभावेन अन्ययपूर्वपदत्वाभावाल्लयप् न भवतीति फलम्। ज्ञापकस्य विशेषापेक्षत्वे—'उस्योमाङ्क्त्वाटः प्रतिषेधो वक्तव्यः' इति वार्तिकं तत्प्रत्याख्यानप्रकारकम्, 'आटश्च' इति सूत्रे चकारग्रहणं च प्रमाणम्, अन्यथा 'औढीयत्' इत्यादौ धातुसंज्ञायां कर्तव्यायामाडः पृथक्करणेन 'ओमाङोश्च' इति सूत्राप्रवृत्तौ वार्तिक व्यर्थमेव। एवञ्च पररूपादिकार्याप्रवृत्तौ पुनर्वृद्धिविधानार्थं चकारग्रहणमपि व्यर्थम्। 'आटश्च' इति सूत्रे चकारग्रहणम् 'अटश्च' इति वृद्धिविषये यद्यत् कार्यं प्राप्नोति तत्तत् सर्वं निवारयतीति चकारग्रहणेनैव पररूपन्न स्यादिति वार्तिकं निष्प्रयोजनमिति वार्तिकं प्रत्याख्यातं भगवता।

'कण्ड्वादिभ्यो यक्' इति सूत्रे धातोरित्यनुवृत्तेः प्रयोजनं लिखत।

अत्र सूत्रे "धातोरेकाचः" इत्यस्माद्धातोरिति वर्तते। तद्ग्रहणाभावे प्रातिपदिकादेव यक् स्यादित्यर्थे तु धातोर्लङादौ कण्ड्वतीत्याद्यनिष्टापत्तिः स्यात्। सुखदुःखादिप्रातिपदिकेभ्यो यकि अलोपाऽसम्भवेन सुख्यतीत्याद्यप्यसिद्धिप्रसङ्गाच्च।

नच धातोरित्यनुवर्तनात् प्रातिपदिकादित्यर्थः कथं लभ्यते इति चेच्छृणु—कण्डूञ् इति दीर्घपाठेन 'प्रातिपादिकाः' इति ज्ञायते। तथाहि—'कण्डूञ् गात्रविघर्षणे' इति धातौ कण्डु इति ह्रस्वान्त एव पठितव्यः। 'अकृत्सार्वधातुकयोः' इति दीर्घे कण्डूयते इति सिद्धे दीर्घान्तपाठो ज्ञापयति "कण्ड्वादयः प्रातिपदिकाः" इति। यदि च कण्ड्वादयः प्रातिपदिकास्तर्हि "कण्ड्वादिभ्यो यक्" इति सूत्रे कित्करणं व्यर्थं स्यात्, तदेव व्यर्थं सत् ज्ञापयति—"कण्ड्वादयो धातवः" इति, इत्थं च कण्ड्वादीनां धातुत्वं प्रातिपदिकञ्च सिद्धम्। अत एवोक्तं भाष्ये—"धातुप्रकरणाद्धातुः कस्य चासञ्जनादपि। आह चायमिमं दीर्घं मन्ये धातुर्विभाषितः॥",

इति। एवञ्च धातुपक्षे 'कण्डूयते' इत्यादीनां सिद्धिः। प्रातिपदिकत्वपक्षे—यकि असति सति' क्विपि च कृते—कण्डूः, धातुत्वादुवङि—कण्ड्वा, कण्डुवः इति। प्रातिपदिकत्वे—यणि कण्ड्वौ, डकण्वः इत्यादि।

णेरणाविति सूत्रं सोदाहरणं व्याख्यायताम्।

अत्र सूत्रे चत्वारि वाक्यानि प्रतीयन्ते। तथाहि—'णेः' इत्येकं वाक्यम्। "अणौ यत्कर्मणौ चेत्" इति द्वितीयम्। 'स कर्त्ता' इति तृतीयम् 'अनाध्याने' इति चतुर्थम्। आत्मनेपदस्याधिकारः। द्वितीययोगे कर्मपदस्य क्रियापरत्वम्। तृतीययोगे द्वितीययोगस्यानुवृत्तिः, तत्र कर्मपदस्य कर्मकारकबोधकत्वम्। तथा च—ण्यन्तादात्मनेपदं स्यादणौ या क्रिया सैव ण्यन्तेनोच्यते, अणौ यत्कर्मकारकं स चेण्णौ कर्त्ता स्यान्नत्वाध्याने इति तदर्थः। एतदुदाहरणानि तु अपरिस्पन्दनसाधनसाध्याः कर्तृस्थभावकाः सपरिस्पन्दनसाधनसाध्याः कर्तृस्थक्रियाश्च। तथाहि—(१) पश्यन्ति भवं भक्ताः। (२) पश्यति भवः। (३) दर्शयन्ति भवं भक्ताः। (४) दर्शयते भवः। इति क्रमिकोदाहरणानि बोध्यानि।

उदाहरणसङ्गमस्तु इत्थम्—पश्यति भवः इति द्वितीयकक्षायां या क्रियोच्यते सैव क्रिया दर्शयते भव इति चतुर्थकक्षायामुच्यते। एवञ्च क्रियासाम्यात् प्रथमकक्षायां भवरूपकर्मणः कर्तृत्वाच्चात्मनेपदं सिद्धम्भवति। एवं कर्तृस्थक्रियायामारोहयते हस्तीत्यत्रापि अथवा पश्यन्ति भव मारोहयन्ति हस्तिनमिति प्रथमकक्षायामेव कर्मणो हेतुत्वारोपाण्णिचि दर्शयति भवः आरोहयति हस्तीति। ततश्च णिजर्थव्यापारस्य अध्यारोपितकर्तृव्यापारस्य च त्यागेन दर्शयते भव इति तृतीयकक्षायामेव तङ् भवति। न च भवरूपकर्मणः कर्तृत्वात् दर्शयति भवो भक्तानिति द्वितीयकक्षायां कथं तङ् न स्यादिति वाच्यम्, अध्यारोपितकर्तृव्यापारेण साम्येऽपि णिजर्थव्यापारस्याधिक्येन समानक्रियात्वाभावात्। तृतीयकक्षायां तु धातूपात्तव्यापारस्य णिजर्थव्यापारस्य च त्यागेन समानक्रियात्वात्तङ्सिद्धिः। न च तृतीयकक्षायामपि चानुषङ्गानविषयीकरणरूपव्यापारयुक्तायाः पश्यन्ति भवं भक्ता इति प्रथमकक्षास्थक्रियाया अपेक्षया न्यूनता स्यादिति वाच्यम्, एतत्कारेणाधिक्यांशस्यैव निस्सारितत्वात्।

'आहध्वं मा रघूत्तम'मिति प्रयोगे शङ्कासमाधी निरूप्येताम्।

ननु आहध्वम् इत्यादिप्रयोगे रघूत्तमस्य कर्मत्वेन स्वीयाकर्मकत्वाभावादकर्मकत्वाभावाच्च "आङो यमहनः" इति सूत्रेण आत्मनेपदाभाव इति चेद्? न। प्राप्येत्यध्याहारमाश्रित्य रघूत्तमम्प्राप्य मा हध्वम् इति प्राप्तिक्रियाम्प्रत्येव रघूत्तमस्य कर्मतया हन्तेरकर्मकत्वादात्मनेपदस्य निर्बाधात्। न च प्राप्येत्यध्याहारे श्वशुराज्जिहेतीतिवदत्रापि कर्मणि पञ्चम्या भाव्यमिति वाच्यम्। ल्यबन्तं विनैव यत्र ल्यबन्तार्थप्रतीतिस्तत्रैव "ल्यब्लोपे कर्मण्यधिकरणे च" इति वचनस्य प्रवृत्तित्वात्। अत्र तु ल्यबन्तं विना ल्यबन्तार्थभानं न भवति, प्रत्युत मारणमेव प्रतिभातीति तस्याविषयत्वम्। अथवा भेत्तुमित्यादि तुमुन्नन्ताध्याहारो वा कर्तव्यः। एवम् 'आजघ्ने विषमविलोचनस्य वक्षः' इत्यत्र विषमविलोचनस्य वक्षः प्राप्य आजघ्ने इति व्याख्यानेन हन्धातोरकर्मकत्वात्प्रयोगः साधुः। अथवा वक्षो भेत्तुमिति तुमुन्नन्ताध्याहारः कर्तव्यः,

यथा लोके मल्लोऽतिहर्षात्स्वस्यैव वक्षस्ताडयति तथा विषमविलोचनस्य समीपमेत्य स्वकीयमेव वक्षः आजघ्ने।

'अनुपराभ्यां कृञः' इति सूत्रस्य प्रयोजनं ब्रूत।

नन्वनेन सूत्रेण कर्तरि परस्मैपदविधानात् कर्मकर्तर्यपि तत्प्रसक्तिरिति चेन्मैवम्, कार्यातिदेश-शास्त्रातिदेशपक्षद्वयमध्ये कार्यातिदेशपक्षस्यैव प्राधान्यात् कर्मकर्तर्यात्मनेपदविधायकस्य "कर्मवत्कर्मणा तुल्यक्रियः" इत्यस्योक्तसूत्रापेक्षया परत्वादनेन तद्बाधे तदप्रसक्तेः। नच कार्यातिदेशपक्षेऽप्यतिदिश्यमानकार्याणामुत्पत्तिदेशस्यैव देशत्वाङ्गीकारात्, शास्त्रातिदेशपक्षे "कर्मवत्कर्मणा" इत्यनेनात्मनेपदाद्यविधानेन तद्बाधायकं "भावकर्मणोः" इति शास्त्रस्यवातिदेशात्तस्य च "अनुपराभ्याम्" इत्यतः पूर्वत्वेनानेनैव तद्बाधाद्दोषस्तदवस्थ 'एवेति चेदत्रोच्यते-' "अनुपराभ्यां कृञः" इत्यत्र "कर्तरि कर्मव्यतिहारे" इत्यस्मादेकं कर्तृग्रहणमनुवर्तते, तथा "शेषात् कर्तरि परस्मैपदम्" इत्यतो द्वितीयं कर्तृग्रहणमनुवर्तते। तथा च स्वभाव एव यः कर्ता न तु विवक्षाधीनः कर्मकर्ता तथाविधकर्तर्येव अनुपराभ्यां कृञः परस्मैपदमिति लभ्यते। एवञ्च कर्मकर्तरि नास्य प्रवृत्तिरिति सूत्रस्य प्रयोजनं ब्रवीमिति दिक्।

प्रकृतो मितां ह्रस्व एव तु न विकल्पितः इत्यादि फक्किका विशदं व्याख्यायताम्

नच "चिण्णमुलोः" इति सूत्रे दीर्घग्रहणं व्यर्थम्, "चिण्णमुलोरन्यतरस्याम्" इत्येतावतैव "मितां ह्रस्वः" इति पूर्वसूत्रादननुवृत्तस्य ह्रस्वस्यैव विकल्पे दीर्घविकल्पसिद्धेरिति वाच्यम्। शामिता-शमिता इत्युक्तप्रयोगयोः ह्रस्वविकल्पो न स्यात्, प्रथमणिलोपस्य "अचः परस्मिन्" इति स्थानिवत्वेन व्यवहिततया चिणपरकणिपरकत्वाभावात्। दीर्घविकल्पविधौ तु प्रथमस्य णिचो लोपो न स्थानिवत्, दीर्घविधौ स्थानिवत्वनिषेधात्। भाष्यकारस्तु 'नपदान्त' इति सूत्रे 'पूर्वत्रासिद्धे न स्थानिवत' इत्येव सिद्धत्वात् तत्र द्विर्वचनसवर्णानुसारदीर्घजश्चरविधीन् प्रत्याख्यातवान्। नच ण्यन्ताण्णौ 'चिण्णमुलोः' इति दीर्घे कर्तव्ये प्रथमणिलोपस्य स्थानिवत्वं दुर्वारम्, 'चिण्णमुलोः' इति दीर्घस्य पूर्वत्रासिद्धीयत्वाभावात्। ततश्च प्रथमणिचा व्यवहितत्वात् दीर्घानापत्तिः। एवञ्च तत्र दीर्घे कर्तव्ये स्थानिवत्वनिवारणाय दीर्घग्रहणस्यावश्यकत्वात् कथं दीर्घग्रहणं प्रत्याख्यातमिति वाच्यम्, 'चिण्णमुलोः' इति दीर्घविधौ णाविति णित्वजातिप्रधानो निर्देशः। चिण्णमुल्परकणित्वजातौ परत इति यावत्। णित्वजातिश्च णिद्वयेऽस्तीति प्रथमणेः स्थानिवत्वेऽपि दीर्घस्य निर्बाधत्वात्। एवञ्च ह्रस्वदीर्घयोर्विशेषाभावात् ह्रस्वविकल्प एव क्रियताम् मास्तु दीर्घग्रहणमिति भाष्यतात्पर्यम्।

बोध्यते माणवकं धर्मः—बुध्यर्थकस्याऽपि प्रधाने गौणे वा कर्मणि स्वेच्छया लादयो भवन्ति। अत एव बोध्यते माणवकं धर्मः "बोध्यते माणवको धर्मम्" इति वा भवतीति।

बीजमात्र मूलस्थ-द्विकर्मणां धातूनां कर्मप्रत्ययस्य व्यवस्थैव। तथा हि—

"गौणे कर्मणि दुह्यादेः प्रधाने नी-हृ-कृष्-वहाम्।
बुद्धि-भक्ष्यार्थयोः शब्दकर्माणां निजेच्छया॥
प्रयोज्यकर्मण्यन्येषां ण्यन्तानां लादयो मताः॥" इति।

दुह्याच्–प्रभृतीनां द्वादशधातूनां गौणे कर्मणि लादयो भवन्ति । गौर्दुह्यते पयः । गोपेनेति शेषः । अत्र गोरप्रधानकर्मत्वात् तस्मिन् कर्मणि लकारः । तिङा अभिहितत्वात् गोः प्रथमा । प्रधानकर्मत्वात् पयः इति द्वितीयान्तम् । नी–हृ–कृष्–वहां प्रधाने कर्मणि लादयो भवन्ति । अजा ग्रामं नीयते, ह्रीयते, कृष्यते, उह्यते । अत्र अजायां प्रधानकर्मणि लकारः । ग्रामस्याऽनभिहितत्वात् द्वितीया । बुध्यर्थकस्य भक्षार्थकस्य शब्दकर्मणश्च प्रधाने वा गौणे वा कर्मणि स्वेच्छया लादयो भवन्ति । बोध्यते माणवको धर्मम् । बोध्यते माणवकं धर्मः इति वा । भोज्यते माणवकमोदनः । भोज्यते माणवकः ओदनमिति वा । वेदोऽध्याप्यते विधिं हरिणा, वेदमाध्याप्यते विधिरिति वा । अन्येषां गत्यर्थादीनां प्रयोज्यकर्मणि लकारः । देवदत्तो ग्रामं गम्यते, अत्र प्रयोज्यकर्मणि देवदत्ते इति गमेर्ण्यन्तात्कर्मणि लः ।

कर्मणेति किम् करणाधिकरणाभ्यां तुल्यक्रिये माभूत्, इति फक्किका व्याख्यायताम् ।

"कर्मवत् कर्मणा तुल्यक्रियः" इति सूत्रे कर्मणेत्यस्याऽभावे—'असिना छिनत्ति, स्थाल्यां पचति, इत्यत्र करणाधिकरणयोर्यो व्यापारः, स एवेदानीम् 'असिश्छिनत्ति' 'स्थाली पचति इत्यादौ कर्तृस्थ इति तत्रापि कर्मत्वं स्यात्, तन्माभूदित्येवमर्थं कर्मणेति पदमित्यर्थः । ननु तुल्यक्रियः कर्ता कर्मवद्भवतीत्युक्तेः केनेत्याकाङ्क्षायामनेककारकोपस्थितावपि कर्मवदिति प्रत्यासत्या कर्मणेति लभ्यत एवेति चेत्तर्हि—'गच्छति ग्रामः' 'आरोहति हस्ती' इत्यादौ कर्तृस्थक्रियेभ्यो कर्मत्वनिवृत्त्यर्थं तदिति स्यात् । नच एवमपि पचिभिदिप्रभृतीनामेव गमिरुहिप्रभृतीनां सकर्मकत्वे फलस्य कर्मनिष्ठत्वे च तुल्ये कर्तृस्थभावका गम्यादयः इति कथं ज्ञातव्या इति वाच्यम्, यत्र कर्मणि क्रियाकृतो विशेषो दृश्यते—यथा 'पक्वेषु तण्डुलेषु' यथा वा 'छिन्नेषु काष्ठेषु' तत्र कर्मस्था क्रिया, नेतरत्र । नहि पक्वापक्वतण्डुलेष्विव गतागतग्रामेषु आरूढानारूढहस्त्यादिषु वा क्रियाकृतं वैलक्षण्यं प्रत्यक्षमुपलभ्यत इति ।

'तपस्तपः कर्मकस्यैव' इति सूत्रं नियमार्थं विध्यर्थं वेति निर्णयत—उपवासादिरूपतपस्तापसं तपति दुःखीकरोतीत्यर्थः । एवञ्च तापसस्य कर्मत्वे तप्धातोःदुःखजननमर्थः । तापसः स्वयमेव तप्यते अर्थात्तपः अर्जयतीति तापसस्य कर्तृत्वे तपेरर्जनरूपार्थः । एवं हि—कर्मस्था क्रिया दुःखजननरूपा, कर्तृस्था क्रिया तु अर्जनरूपेति क्रियाभेदात् सकर्मकत्वाच्चाप्राप्ते कर्मवद्भावे "तपस्तपः कर्मकस्य" इति सूत्रं विध्यर्थम् । एवकारस्तु व्यर्थ एवेति वृत्तिकारादयः । वस्तुतस्तु कर्मत्वकर्तृत्वरूपावस्थाद्वयेऽपि तापस उपवासादिजन्यकृशतादिरूपशरीरसन्तापमनुभूय पुण्यविशेषमर्जयतीति कर्मस्था क्रिया कर्तृस्था क्रिया च समानेति कर्मवद्भावे प्राप्ते—'सकर्मकाणां कर्मवद्भावश्चेत्तर्हि तपेरेव' इति नियमार्थं सूत्रम् । तथा च "सकर्मकाणां प्रतिषेधो वक्तव्यः" इति वार्तिकमपि न कर्तव्यम् । नियमेनैव एवकारे लब्धे सूत्रे एकारग्रहण व्यर्थं सत्—'तपधातोरपि यदि कर्मवद्भावश्चेत्तर्हि तपः कर्मकस्यैवेति द्वितीयं नियमं करोति । तेन 'सुवर्णमुत्तपति' इत्यादौ कर्मवद्भावो न भवतीति फलमिति दिक् ।

क्रियासमभिहारे हिस्वयोः कथं परस्मैपदात्मनेपदसंज्ञेति विस्तरं वर्णनीयम् ।

"क्रियासमभिहारे लोट्, लोटो हिस्वौ, वा च तध्वमोः" इत्यत्र चत्वारि वाक्यानि । तत्र—

"क्रियासमभिहारे लोट्" इति प्रथमं वाक्यम्। पौनःपुन्यं भृशार्थश्च क्रियासमभिहारः। ततश्च—पौनःपुन्ये भृशार्थे च द्योत्ये धातोर्लोट् स्यादिति तदर्थः। "लोटो हिस्वौ" इति द्वितीयं वाक्यम्, पूर्ववाक्यविहितस्य लोटो हिस्वावादेशौ स्तः तङामपवादौ इति तदर्थः। ननु तर्हि हि—स्वयोरुभयोरपि लादेशत्वात् परस्मैपदत्वं स्यात्, अस्य स्वादेशस्य तङ्प्रत्याहारप्रविष्टत्वाभावेन "तङानावात्मनेपदम्" इत्यस्याऽप्रवृत्तेः, किञ्च अनयोर्हिस्वयोः "तिप्तस्झी"ति सूत्रानन्तर्भूतत्वात् तिङन्तत्वं च दुर्लभं स्यादिति चेत्? "लोटो हिस्वौ" इति द्वितीयवाक्ये तावत् "क्रियासमभिहारे लोट्" इति प्रथमवाक्यात् 'लोट्' इत्यनुवृत्तं स्थानषष्ठ्या विपरिणतं तृतीयं वाक्यं सम्पद्यते। तत्र हि "लोटो हिस्वौ" इति द्वितीयवाक्यात् 'हि—स्वौ' इत्यनुवृत्तं धर्मपरमाश्रीयते। तथा च—लोडादेशौ हि—स्ववद्भवतः इति लभ्यते, कौ भवतः इत्याकाङ्क्षायां पूर्ववाक्योपस्थितौ 'हि—स्वौ' इति गम्यते। ततश्च—'यावेमौ तिङन्तभूतौ हिस्वावुक्तौ तौ प्रसिद्धलोडादेशतिङन्तभूतहिस्ववद्भवतः' इति तृतीयं वाक्यं पर्यवस्यति। तिङन्तभूतहिस्वयोस्तावत्क्रमात् परस्मैपदत्वमात्मनेपदत्वं तिङन्तत्वं च प्रसिद्धम्। अतः प्रकृतौ 'हि—स्वौ' क्रमात्परस्मैपदात्मनेपदसंज्ञौ स्तः, तिङ्संज्ञौ चेत्यर्थः। तिङ्त्वात् पदत्वसिद्धिः।

न कादेरिति सूत्रप्रत्याख्यानरीतिर्दर्शनीया।

"चजोः" इति सूत्रे 'निष्ठायामनिट्' इति पठित्वा—निष्ठायामनिट्धातोश्चजोः कुत्वमित्यर्थे गर्जधातोर्निष्ठायां सेट्त्वेन 'गर्ज्यम्' इत्यादौ "न कादेः" इति सूत्रोदाहरणे कुत्वभावं सम्पाद्य वार्तिककारेण प्रत्याख्यातं तत्सूत्रम्। अर्जितजिप्रभृतीनां निष्ठायां सेट्त्वेन कुत्वाभावः। ग्रुचु-ग्लुञ्चुप्रभृतीनां कादिगणपठितत्वेऽपि "उदितो वा" इति सूत्रेण क्त्वायां वेट्त्वात् "यस्य विभाषा" इति निष्ठाविषये अनिट्त्वात् "चजोः" इत्यनेन इष्टं कुत्वं भवत्येव। न च "न कादेः" इति सूत्रसत्तायां ग्रुचुग्लुञ्चुप्रभृतीनां कुत्वं न भवति, सूत्राभावे तु प्राप्नोतीति मतद्वये प्रयोगवैलक्षण्यात् प्रत्याख्यानासङ्गतिरिति वाच्यम्? परस्परविरोधेऽपि ययोत्तरमुनिवाक्यस्य प्रामाण्यात्। एवञ्च वार्तिककारानुरोधेन ग्रुचुग्लुंचुप्रभृतीनां कुत्वं स्वीकर्त्तव्यमिति दिक्।

राजसूयेति सूत्रं सोदाहरणं व्याख्यायताम्।

अनेन सूत्रेण राजसूय, सूर्य, मृषोद्य, रुच्य, कुप्य, कृष्टपच्य, अव्यथ्य, एते सप्त निपात्यन्ते। तत्र प्रथमनिपातने—राज्ञा सोतव्योऽभिषवद्वारा निष्पादयितव्यः, यद्वा लतात्मकः सोमो राजा, स सूयते=क्रण्ड्यतेऽत्रेति विग्रहे 'षुञ् प्राणिप्रसवे' अस्मात् 'धात्वादेः षः सः' इति सत्त्वे 'सुञ्' इति। तस्मात् निपातनात् अधिकरणे क्यपि दीर्घे च कृते विभक्त्यादिकार्ये 'राजसूयः, राजसूयम्' इति। (अर्धर्चादिः)। द्वितीयनिपातने—'सूर्यः' इति। अत्र सरत्याकाशे इति विग्रहे सृधातोः निपातनात् कर्तरि क्यपि उत्वे तस्य रपरत्वे 'हलि चे'ति दीर्घे विभक्त्यादिकार्ये 'सूर्यः' इति। केचित्तु 'षू प्रेरणे' अस्मात् निपातनात् क्यपि रुटि 'सूर्यः' इत्याहुः। तृतीयनिपातने—'मृषोद्यम्' इति। अत्र मृषोपपदाद्वदेः निपातनात् कर्मणि नित्यं क्यपि 'वचिस्वपी'ति सम्प्रसारणे पूर्वरूपे गुणे विभक्त्यादिकार्ये 'मृषोद्यम्' इति (विशेष्यनिघ्नोऽयम्)। चतुर्थनिपातने—'रुच्यः' इति। अत्र रुचधातोः निपातनात् कर्तरि क्यपि विभक्त्यादिकार्ये 'रुच्यः' इति।

पञ्चमनिपातने—'कुप्यम्' इति। अत्र 'गुप्' धातोः निपातनात् क्यपि धातोरादिवर्णस्य कत्वे च कृते विभक्त्यादिकार्ये 'कुप्यम्' इति। (सुवर्णरजतभिन्नं धनं कुप्यम्)। षष्ठनिपातने—'कृष्टपच्याः' इति। अत्र कृष्टोपपदात् पच्धातोः कर्मकर्त्तरि निपातनात् क्यपि विभक्त्यादिकार्ये 'कृष्टपच्याः' इति। कृष्टप्रदेशे ये स्वयं पच्यन्ते ते 'कृष्टपच्याः' इति। (बहुवचनान्तनिर्देशोऽयम्)। सप्तमनिपातने—अव्यथ्यः' इति। न व्यथते इति विग्रहे व्यथ्धातोः निपातनात् कर्तरि क्यपि नञ्समासे विभक्त्यादिकार्ये 'अव्यथ्यः' इति।

"अचो यत्" इति सूत्रं कर्तुमशक्यं न वेति प्रतिपादय।

हलन्तेभ्यो ण्यत्प्रत्ययस्य विशिष्य विधानं भवतीति विशेषविहितत्वेन ण्यत्प्रत्ययो यत्प्रत्ययस्यापवादो भविष्यतीति, अर्थादेवाजन्तेभ्यो धातुभ्योऽच्प्रत्ययः स्यादिति सूत्रेऽज्ग्रहणं न कर्तव्यम्। एवञ्च अज्ग्रहणे प्रत्याख्याते यद्ग्रहणमपि "तव्यत्तव्यानीयरः" इति सूत्रे एव कर्तव्यम्। न चाज्ग्रहणाभावे "वाऽसरूपोऽस्त्रियाम्" इति परिभाषया ण्यत्प्रत्ययाभावपक्षे हलन्तेभ्योऽपि धातुभ्यो यत्प्रत्ययप्रसङ्गः स्यादिति वाच्यम्। "नानुबन्धकृतमसारूप्यम्" इति परिभाषया ण्यद्यतोः सरूपत्वात्। द्वयोः प्रत्ययोः समानरूपत्वेन "वाऽसरूप" इति सूत्राप्रवृत्तिरिति दिक्।

'इचेति ह्रस्वः सुपठः' इति केनाभिप्रायेणोपस्थितमिति लिख।

खन्धातोः क्यपि नकारस्य ह्रस्वेकारे आद्गुणे च खेयमितिरूपसिद्धिर्निर्बाधा। दीर्घस्य ह्रस्वस्य वा आद्गुणे विशेषाभावात्। अतस्तत्सूत्रे ह्रस्व एवेकारो विधेयो न तु दीर्घः, ह्रस्वविधाने मात्रालाघवात् इति। ननु इचेति ह्रस्वादेशाभ्युपगमे तस्यादेशस्य पूर्वेण सह आद्गुणे तस्यासिद्धतया "ह्रस्वस्य पिति" इति तुक् स्यात् "षत्वतुकोरसिद्धः" इति षत्वे तुकि च कर्तव्ये एकादेशशास्त्रस्यासिद्धत्वस्वीकारात् इति चेद्? न। तुग्विधौ पदान्तपदाद्योरादेशोऽसिद्धो न त्वन्योऽपीति सिद्धान्तात्।

'भार्या वधूः' इत्यत्र क्यप् भवति न वेति वद।

ननु "भृञोऽसंज्ञायाम्" इति सूत्रं भार्याः क्षत्रिया इति पुँल्लिङ्गे संज्ञायां क्यपोऽभावं कुर्वत्सच्चरितार्थमिति स्त्रीलिङ्गे संज्ञायां न प्रवर्तिष्यते इति भार्या वधूरित्यत्र "संज्ञायां समजनिषत्" इत्यादिना क्यपा भाव्यमिति चेद्? न। "एकानुबन्धकग्रहणे न द्व्यनुबन्धकस्य" इति परिभाषया 'डुभृञ् धारणपोषणयोः' इत्यस्मात्क्रयादिपठितदीर्घान्तात् 'भृ भरणे' इत्यस्माद् वा ण्यन्तप्रत्ययस्य सिद्धत्वात्। "संज्ञायां समजनि" इत्यादिसूत्रे ह्रस्वान्तभृञ्धातोः पाठेन दीर्घान्तभृधातुविषये तत्सूत्राप्रवृत्तिः। डुभृञ्धातौ अनुबन्धद्वयं वर्तते, भृञ्धातौ चैकोऽनुबन्धो वर्तते, इति डुभृञ्धातुविषयेऽपि तत्सूत्राप्रवृत्तिरिति दिक्।

'सुप्यजातौ णिनिस्ताच्छील्ये" इति सूत्रे वृत्तिकारभाष्यकारयोः को मतभेदः कथञ्च स इति स्पष्टमभिधीयताम्।

"सत्सूद्विष" इति सूत्रे उपसर्गेऽपीत्युक्तत्वादुपसर्गभिन्नस्यैव सुपो लाभायास्मिन्सूत्रे पुनः सुग्रहणमिति वृत्तिकारादीनां मतम्। भाष्यकारास्तु "सत्सूद्विष" इति सूत्रे "सुपि स्थः"

इत्यतः सुपीत्यनुवर्तते। तच्चोपसर्गेतरपरम्, उपसर्गेऽपीति पृथगुक्तेः। तदिहानुवर्तमानमर्थाधिकारादुपसर्गेतरपरमेव स्यादतः पुनः सुब्ग्रहणमनाश्रितोपसर्गानुपसर्गविशेषस्य सुबन्तमात्रस्य ग्रहणार्थमित्याहुः। तेन 'स बभूवोपजीविनाम्' इत्यादिप्रयोगैः सुबन्तमात्रे णिनिरिति सङ्गच्छते।

"निष्ठायां सेट्" इति सूत्रे सेड्ग्रहणस्य प्रयोजनं लिख

ननु अनिटि "णेरनिटि" इति सिद्धत्वात् सेडर्थमेवेदं सूत्रं भविष्यतीति चेद्? न। कालावधारणार्थमस्यावश्यकत्वात्। यदि निष्ठा सेट्त्वमापद्येत, तदैव णिलोपो न तु ततः प्रागिति। अन्यथा ण्यन्तात्क्रुधातोः क्तप्रत्यये नित्यत्वादिडागमात्पूर्वमेव णिलोपे तत 'एकाच उपदेशेऽनुदात्तात्" इति इटः प्रतिषेधः स्यात्। एतदपि फलं पूर्वस्मादपि विधौ स्थानिवद्भावमनाश्रयणे, तदाश्रये तुनेदं प्रयोजनम्। भाष्ये तु सूत्रमिदं प्रत्याख्यातम्। "णेरध्ययने" इति सूत्रे योगविभागात् वृत्तमिति निपातनस्य नियमार्थत्वेन वृत्तादन्यत्र कारितमित्यादौ णिलोपाभावविज्ञानात्।

"धृषिशसी वैयात्ये" इदं सूत्रं विध्यर्थमुत नियमार्थम्, अत्र मतान्तरं निरस्य सिद्धान्तः प्रदर्शनीयः।

धृषेरादित्त्वात् "आदितश्च" इत्यनेन, शसुधातोश्चोदित्त्वात् "यस्य विभाषा" इत्यनेन सूत्रेणेण्निषेधे सिद्धे "धृषिशसी वैयात्ये" इदं सूत्रम् 'अविनये एवैतौ अनिटौ स्त' इति नियमयति। एवञ्चान्यत्रार्थे इटि सति 'धर्षितः, विशसित' इति रूपद्वयसिद्धिः। नच धृषेर्भावादिकर्मणोरर्थयोः प्रत्यये "विभाषा भावादिकर्मणोः" इत्यनेन पाक्षिके इटि प्राप्ते तन्निषेधार्थं विध्यर्थमेवास्तु इति वाच्यम्। वैयात्येऽर्थे भावादिकर्मणोर्धृषेर्विधानाभावात्। इत्थञ्च नियमार्थमेवेति वृत्तिकारादयः। हरदत्तस्तु—धृषिधातौ आकारग्रहणस्य फलाभावादकरणेन "आदितश्च" इति सूत्राप्रवृत्तौ इटः प्राप्तौ सत्यां तन्निषेधार्थं सूत्रं विध्यर्थमेवेत्याह। तन्मते—वैयात्येऽर्थे इड्रहितप्रयोगोऽन्यत्रार्थे चेट्सहितप्रयोगः सिद्धः। पाणिनिना आकारग्रहणं कृतमिति भावादिकर्मणोः प्रत्यये जाते "विभाषा भावादिकर्मणोः" इति प्राप्तस्येटो निषेधार्थं सूत्रं विध्यर्थमेवेत्याह माधवः। एवञ्च वैयात्येऽर्थे धृष्टमित्येकं रूपम्। अन्यत्रार्थे च धृष्टम्, धर्षितमिति रूपद्वयं सिद्धम्। अयमेव पक्षो ज्यायान् इति दिक्।

"अतिसुलभम्, अतिदुर्लभम्" इत्यत्र "उपसर्गात्खल्घञोः" इति नुम् कथं नेति प्रदर्शय।

ननु "अतिसुलभम्' इत्यादावुपसर्गद्वयेन "नसुदुर्भ्याम्" इति सूत्राप्रवृत्तौ "उपसर्गात्खल्घञोः" इति सूत्रेण नुम् स्यादिति चेन्न, स्वत्योः कर्मप्रवचनीयसंज्ञात्वेन उपसर्गत्वाभावात् "उपसर्गात्खल्घञोः" इति सूत्राप्रवृत्तेः। यदा अतेः कर्मप्रवचनीयसंज्ञा भवति, तदा सु इत्येकोपसर्गत्वेन "सुदुर्भ्याम्" इति सूत्रेण नुमो निषेधः। यदि च सोः कर्मप्रवचनीयसंज्ञा भवति, तदा उपसर्गात्परत्वाभावेन "उपसर्गात्खल्घञोः" इति सूत्राप्रवृत्तिरिति उभयथापि नुमोऽभावः सिद्धः। इत्थञ्च उभयोः कर्मप्रवचनीयसंज्ञा भवतीति दिक्।

"अदो जग्धिर्ल्यप्तिकिति" इति सूत्रे ल्यब्ग्रहणं किमर्थं तत्सकलं लिख ।

ननु "अदो जग्धिर्ल्यप्तिकिति" इति सूत्रे ल्यब्ग्रहणाभावेऽपि पपूर्वकाद्धातोः क्त्वाप्रत्यये कृते "समासेऽनञ्पूर्वे क्त्वो ल्यप्" इति सूत्रेण ल्यबादेशे "अदो जग्धिः" इत्यादिना जग्ध्यादेशे च प्राप्ते "असिद्धं बहिरङ्गमन्तरङ्गे" इति परिभाषया जग्ध्यादेश एव स्यादिति "अदो जग्धिः" इत्यत्र ल्यब्ग्रहणं व्यर्थमेव स्यादिति चेद् ? न । "अन्तरङ्गानपि विधीन् बहिरङ्गो ल्यब् बाधते" इति परिभाषाज्ञापनेन ल्यब्ग्रहणस्य सफलत्वात् । तेन विधाय इत्यत्र "दधातेर्हिः" इति हित्वन्न । 'प्रदाय' इत्यत्र च "दादद्धोः" इति दत्त्वन्न । 'प्रखन्य' इत्यत्र "जनसनखन" इत्यात्त्वन्नेत्यादि ।

"मूलकोपदंशम्भुङ्क्ते" अत्र सामर्थ्याभावात् णमुल्प्रत्ययः समासश्च कथमिति लिख ।

ननु मूलकेनोपदंशं भुङ्क्ते इति विग्रहे ल्यबन्तसकर्मकदंशधातुयोगे मूलकस्य शब्दतः कर्मत्वाभावेन मूलकोपदंशयोः सम्बन्धाभावेन सामर्थ्याभावात् "उपदंशस्तृतीयायाम्" इत्यनेन णमुल्प्रत्ययः, "तृतीयाप्रभृतीन्यन्यतरस्याम्" इति समासश्चात्र दुर्लभ इति चेद् ? न । किमुद्दिश्य भुङ्क्ते इति कर्मणोऽपेक्षायाम्मूलकमुपदश्य भुङ्क्ते इत्यर्थेन मूलकस्य कर्मत्वं समायाति । मूलकस्य दंशधातुना सहार्थसम्बन्धस्य सत्त्वात् । यदि तृतीयायाः शब्दत एवान्वये प्रत्यय इष्यते, तर्हि "करणे हनः" इतिवत् 'उपदंशः करणे' इत्येव वदेत् । एवञ्च तृतीयाग्रहणसामर्थ्येन आर्थसम्बन्ध एवात्रेष्टः। शब्दतस्तु मूलकं भुजिक्रियाम्प्रति करणमेवेत्यलम् ।

इति सिद्धान्तकौमुद्याश्चतुर्थभागपरिशिष्टे रूपलेखन-पङ्क्तिलेखनप्रकारः समाप्तः ।

*

ण्यन्तादिस्वरप्रकरणान्तसूत्रसूची ।

सूत्राङ्काः	सूत्राणि
	अ
३१८८	अकर्तरि च
२६१३	अकर्मकाच्च
२७०८	अकर्मकाच्च
२७१८	अकर्मकाच्च
३८६४	अकर्मधारये
३८०७	अके जीविका
३२४७	अक्षेषु ग्लहः
३२५६	अगारैकदेशे
३६११	अग्नीत्प्रेषणे
३००१	अग्नौ चेः
२८१२	अग्नौ परिचा
३४६२	अग्राद्यत्
३५५३	अङ्तश्च
३५२२	अङ्ग इत्यादौ
३६१५	अङ्गयुक्तं तिङा
३८०४	अङ्गानि मैरेये
३१४०	अङ्गाप्रातिलो
३०७८	अच उपसर्गा
३६७८	अचः कर्तृय
२७६८	अचः कर्मकर्त
२८४१	अचो यत्
३८११	अच्कावशक्तौ
२८५३	अजर्यं सङ्गतं
२८७६	अजिव्रज्योश्च
२६१४	अजेव्यगमां
३०४७	अज्ञेः पूजायां
३७१६	अज्ञेरछन्द
३०२४	अज्ञोऽनपादा
२७५४	अणावकर्मका
३८०१	अणि नियुक्ते
३२१९	अणिनुणः
३१८१	अण् कर्मणि
३१२५	अतेरकृत्पदे
२६२०	अत्र लोपोऽ
३०८०	अदोजग्धिर्ल्यं
२१०७	अदोऽनन्नं
३४८०	अद्भिः संस्कृ
३३६२	अधिकरणे
२१२१	अधिकरणेशे
२८२०	अधीष्टे च
२७२६	अधेः प्रस्महने
३१२२	अधेरुपरिस्थं
३३०१	अध्यायन्या
३७४४	अध्वर्युकषाय
३६२४	अनन्यस्यापि
२८०२	अनवक्लृप्य
३५०५	अनसन्ताच्च पुं
३७८६	अनिगन्तोऽञ्च
३६७०	अनुदात्तं च
३५५०	अनुदात्त पद
३६१६	अनुदात्तप्रश्ना
३६५१	अनुदात्तस्य
३६७४	अनुदात्ते च
३५२३	अनुदात्ते चकु
३१२९	अनुदात्तोतश्च
३७०६	अनुदात्तौ सु
२६६६	अनुनासिक
२७४५	अनुपराभ्यांकृ
२७४३	अनुपसर्गाज्ञः
३०३५	अनुपसर्गात्फु
२७१६	अनुपसर्गाद्वा
२१००	अनुपसर्गाल्लि
३६०१	अनो नुट्
३८८४	अनो भावक
२७२२	अनोरकर्मकात्
३१२३	अनोरप्रधान
३००६	अनौ कर्मणि
२१८४	अन्तः
३८२६	अन्तः
३८७७	अन्तः
३६१३	अन्तः
३२१४	अन्तरदेशे
३२५५	अन्तर्धनोदेशे
३६१४	अन्तश्च
३६८८	अन्तश्च तवै
२१६९	अन्तात्यन्ता
३७१९	अन्तोदात्तादु
३७०५	अन्तोऽवत्याः
३८१७	अन्त्यात्पूर्वं
३३४८	अन्यथैवंकथ
२१८०	अन्येभ्योऽपि
३१५८	अन्येभ्योऽपि
३४२२	अन्येभ्योऽपि
३५३६	अन्येषामपि
३०११	अन्येष्वपि दृ
३३८६	अन्वच्यानुलो
३३७५	अपगुरो णा
३२५८	अपघनोऽङ्गम्
३०७१	अपचितश्च
३५८०	अपरिहृता
२७७१	अपरोक्षे च
३५१२	अपस्पृधेथा
२७१३	अपह्नवे ज्ञः
३९२०	अपाच्च
२६८८	अपाच्चतुष्पा
३३७३	अपादाने परी
२७४१	अपाद्वदः
२९६७	अपे क्लेशतम
३१२४	अपे च लषः
३२७९	अ प्रत्ययात्
२७७३	अभिज्ञावचने
३१९३	अभिनिसः स्त
२७४६	अभिप्रत्यति
३२१८	अभिविधौ
३९१९	अभेर्मुखम्
३०६५	अभेश्चाविदूर्ये
३६७२	अभ्यस्ताना
३४०३	अभ्युत्सादयां
२९७०	अमनुष्यक
३८२३	अमहन्नवन्न
२८७४	अमावस्यद
३५०३	अमु च च्छ
३५६२	अमो मश्
३६०४	अन्नरूधरवरि
२९१८	अम्बाम्बगोभू
२६४९	अयङ्यि क्ङि
३२९५	अयनं च
३३९०	अयस्मयादी
३८३४	अरिष्टगौडपूर्वे
२९४२	अर्द्धर्चपद्य

२४९३ अर्तिपिपर्त्यो
३१६५ अर्तिलूधूसू
३७७८ अर्थे
३०६४ अर्देः संनिवि
३८२४ अर्मे चावर्ण
२८५१ अर्यः स्वामि
२९२६ अर्हः
३११३ अर्हः प्रशंसा
२८८२ अर्हे कृत्यतृ
३११६ अलंकृञ्निरा
३३१६ अलंखल्वोः
३४४२ अवचक्षे च
२८४९ अवद्यपण्यव
३५२४ अवपथासि
३४१६ अवयाः श्वेत
२७२४ अवाद्ग्रः
३२२६ अवे ग्रहो वर्ष
३२९९ अवे तॄस्रोर्घञ्
३४१५ अवे यजः
३१८९ अवोदैधौग्रप्र
३१९७ अवोदोर्नियः
३३८१ अव्ययेऽयथा
३५१९ अव्यादवद्या
२६६१ अशनायोद
२६६२ अश्वक्षीरवृष
३५९० अषाघस्यात्
३४७२ अस्थिमानण्
३७१८ अष्टनो दीर्घा
३४६९ असुरस्य स्वं
२९५१ असूर्यललाट
३३७९ अस्यतितृषोः
३७८१ अहीने द्वितो
३९६८ अहेति विनि
३९४७ अहो च

आ

३८१२ आक्रोशे च
३२८९ आक्रोशे न
३२२० आक्रोशेऽव
३११४ आक्रेस्तच्छी
२७१३ आङ उदमने
२१२५ आङि ताच्छी
३२५० आङि युद्धे
३६८६ आङो दोऽना
३५२५ आङोऽनुना
२६९५ आङो यमहन
२८४५ आङो यि
३७७० आचार्योपस
३८३८ आचार्योपस
३५७२ आज्ञसेरसुक्
२९७३ आत्मसुभग
३४२९ आत ऐ
२८९८ आतश्चोपसर्गे
३२८३ आतश्चोपसर्गे
३६३२ आतोऽटि नि
२९१५ आतोऽनुपस
३४१८ आतो मनिन्
२७६१ आतो युक्चि
३३०९ आतो युच्
२६९६ आत्मनेपदेष्व
२९९३ आत्ममाने
३७६१ आदिः प्रत्येन
३७३१ आदिः सिचो
३०५३ आदिकर्मणि
३०३६ आदितश्च
३७९८ आदिरुदात्तः
३६७७ आदिर्णमुल्य
३८५९ आदिश्चिहणा
३१५१ आदृगमहन
३८५३ आद्युदात्तं
३७०८ आद्युदात्तश्च
२८८८ आनाय्योऽ
३१०१ आने मुक्
३९२१ आपो जुषाणो
२६१९ आप्ज्ञप्यृधा
३७४० आभीक्ष्ण्ये ण
३९६२ आम एकान्त
३६९३ आमन्त्रितस्य
३६९४ आमन्त्रितस्य
३६१४ आम्रेडितं भ
३७१२ आर्यो ब्राह्मण
३३११ आवश्यकाध
२७१० आशंसायां
२७९२ आशंसावचने
३७५९ आशङ्काबाध
३६९५ आशितः
२१६२ आशिते भुवः
२१९२ आशिषि च
२१६६ आशिषि हनः
२८८७ आसुयुवपिर
३१५६ आहो उताहो

इ

३५३६ इकः सुञि
२६१२ इको झल्
३७६३ इगन्तकालक
२८१७ इगुपधज्ञाप्री
२६१६ इङश्च
३१९१ इङश्च
३११० इङ्धार्योः
२१९४ इच एकाचो
३२७८ इच्छा
२८१६ इच्छार्थेभ्यो
२८१४ इच्छार्थेषु लि
२८३८ इजादेः सनुमः
२६२९ इट् सनि वा
३६३९ इडाया वा
३१४३ इण्नशिजिस
३०४९ इण्निष्ठायाम्
२६८२ इतरेतरान्यो
३४२६ इतश्च लोपः
३८८३ इत्थंभूते कृत
३५६८ इदन्तो मसि
३३९३ इन्धिभवति
३५४७ इरयो रे
३५७० इष्ट्वीनमिति
२१८९ इस्मन्त्रन्क्रिषु
ई
२६४८ ई घ्राध्मोः
२८८० ई च खनः
३५७६ ई च द्विवचने
३७०२ ईडवन्दवृशंस
३१०४ ईदासः
२८४३ ईद्यति
३७०७ ईद्यस्याः
३४४० ईश्वरेतोसुन्क
३७८८ ईषदन्यतर
३३०९ ईषदुःसुषु कृ
उ
२१५२ उग्रंपश्येरंम
३६६४ उच्चैस्तरां वा
३६८१ उञ्छादीनां
३१६९ उणादयो
२८०१ उताप्योःसम
३८३१ उत्तरपदवृद्धौ
३८४५ उत्तरपदादिः
२६३७ उत्परस्यातः
३८३० उदकेऽकेवले

३३०२ उदङ्कोऽनुदके
३८४१ उदराश्वेषुषु
२७२६ उदश्वरः सक
३७२० उदात्तयणो
३३६९ उदात्तस्वरित
३६५७ उदात्तस्वरित
३६६० उदात्तादनुदा
२१४६ उदि कूलेरुजि
३२०७ उदि ग्रहः
३३२८ उदितो वा
३२२४ उदि श्रयति
३३१७ उदीचां माङो
३०५६ उदुपधाद्भावा
२६६१ उदोऽनूर्ध्वकर्म
३२५७ उद्धनोऽत्या
२६९४ उद्भिभ्यां तपः
३२०० उन्नयोर्ग्रः
३२६३ उपन्न आश्रये
३३६८ उपदंशस्तृती
२७१२ उपपराभ्याम्
३८१४ उपमानं श
२६६४ उपमानादा
३३३६ उपमाने कर्म
३६२१ उपरिस्विदा
३४३१ उपसंवादा
२१४५ उपसर्गव्यपेतं
३४९६ उपसर्गाच्छ
३३०६ उपसर्गादखल्
३९११ उपसर्गात्स्वा
२७०२ उपसर्गादृध्र
३२७० उपसर्गे घोः
३००९ उपसर्गे च सं
३२३५ उपसर्गेऽदः
३११२ उपसर्गे रुवः
२८५२ उपसर्या का
२७५० उपाच्च
२८४६ उपात्प्रशंसा
३१२८ उपाद्यजय
२७२१ उपाद्यमः
२६१२ उपान्मन्त्रकर
३०९८ उपेयिवानना
३७३३ उपोत्तमं
३६३० उभयथर्क्षु
३८७४ उभे वनस्पत्या
२६०६ उभौ साभ्या
३७७४ उष्ट्रः सादिवा

ऊ

३७१७ ऊडिदंपदाद्य
२३६४ ऊदुपधायागो
३८८७ ऊनार्थकलहं
३३६९ ऊर्ध्वे शुषिपू

ऋ

३५३४ ऋचि तुनुधा
३०४३ ऋणमाधम
२६५३ ऋतश्च
३९०८ ऋतश्छन्दसि
३५५६ ऋत्व्यवा
२८५९ ऋदुपधाच्चा
२८७२ ऋहलोर्ण्यत्

ऋ

३२७२ ऋदोरप्

ए

३६६१ एकश्रुति दूरा
३६५८ एकादेश उदा
३९६१ एकान्याभ्यां
३६२६ एकाचोऽप्र
२९४१ एजेः खश्
२८५७ एतिस्तुशा
३२३१ एरच्
३९५३ एहिमन्ये

ओ

२८८० ओक उचः
३४७६ ओजसोऽहनि
३०१९ ओदितश्च
३६०६ ओमभ्यादाने
२८८६ ओरावश्यके
३५३२ ओषधेश्च

क

३६३५ कः करत्करति
३८५६ कंसमन्थशूर्प
३८४८ कण्ठपृष्ठग्रीवा
२६७८ कण्ड्वादि
३७११ कतरकतमौ
३४४१ कदुकमण्ड
३८५८ कन्था च
३१०७ कपि पूर्वम्
३०८४ कपिष्ठलो
३२१३ करणाधिकर
२९१६ करणे यजः
३२५१ करणेऽयोवि
३३५८ करणे हनः
३८४६ कर्णो वर्ण
२६८० कर्तरि कर्म
२८३२ कर्तरि कृत्
३१६७ कर्तरि चर्षि
२१७४ कर्तरि भुवः
२१८१ कर्तर्युपमाने
२६६५ कर्तुः क्यङ्
३३०८ कर्तृकर्मणोश्च
२७१० कर्तृस्थे चाश
३३६४ कर्त्रोर्जीवपुरु
३३१६ कर्मणि च
३३५० कर्मणि दृशि
२१३६ कर्मणि भृतौ
२१४७ कर्मणि हनः
३००३ कर्मणीनि वि
२६७१ कर्मणो रोम
३००२ कर्मण्यण्या
२१९३ कर्मण्यण्
३२७१ कर्मण्यधिकर
३३४६ कर्मण्याक्रोशे
३७८० कर्मधारये
२७६६ कर्मवत्कर्मणा
३२१५ कर्मव्यतिहारे
३६८० कर्षाऽऽत्वतो
३५९२ कव्यध्वरपृत
३४११ कव्यपुरीषपु
३३६७ कषादिषु यथा
२६७० कष्टाय क्रमणे
२८१० कामप्रवेदने
२६६३ काम्यच्च
३८८२ कारकादत्तश्रु
३७७१ कार्तकौजपा
२७१५ कालविभागे
३१७१ कालसमयवे
३७१२ कितः
२६११ किरश्च पञ्च
२८०३ किंकिलास्त्य
३९५१ किंक्रियाप्रश्ने
३१९५ किंवृत्ते च
२८०१ किंवृत्ते लिङ्
२७८५ किंवृत्ते लिप्सा
३८७० कुण्डं वनम्
३१७६ कुत्सने च
२९६८ कुमारशीर्षयो
३७६० कुमारश्च

३८२९ कुमार्यो वय
३७७९ कुरुगार्हपत
२७७२ कुषिरज्रोः
३८३६ कुसूलकूप
३८५५ कूलतीरतूल
३८६३ कूलसूदस्थल
३०६२ कृच्छ्रगहनयोः
३२७० कृञः श च
२१९४ कृञो हेतुता
२८३५ कृत्यचः
२८४१ कृत्यल्युटो
२८३१ कृत्याः
३४४१ कृत्यार्थे तवै
३३१२ कृत्याश्च
३८१४ कृत्योकेष्णु
३४०६ कृमृदृरुहिभ्य
३५१५ कृषेश्छन्दसि
३२०१ कृ धान्ये
३०१२ क्तक्तवतू नि
३३१३ क्तिच्क्तौ च
३७७१ क्ते च
३७१५ क्ते निरर्थार्थे
३०८७ क्तोऽधिकरणे
३५६० क्त्वापिच्छन्द
३३२१ क्त्वि स्कन्दि
३५६१ क्त्वो यक्
२६५८ क्यचि च
२६६० क्यस्य विभा
३१५० क्याच्छन्दसि
२८११ क्रतौ कुण्डपा
३८५२ क्रत्वादयश्च
३३२१ क्रमश्च क्त्वि
२१७८ क्रव्ये च
२८२५ क्रियासमभि
२६८० क्रीङ्जीनां
२६८७ क्रीङोऽनुसंप
३१३१ क्रुधमण्डार्थे
३०४१ क्लिशः क्त्वा
३२४२ क्वणो वीणायां
३०१५ क्वसुश्च
२९८३ क्विप्च
३६८१ क्षयो निवासे
३०३२ क्षायो मः
२७११ क्षिप्रवचने
३३३८ क्षियः
३६२३ क्षियाशीःप्रै
३०१५ क्षियो दीर्घात्
३०५८ क्षुध्स्वान्त
३७७३ क्षुल्लकश्च वै
३८४२ क्षेपे
२१६१ क्षेमप्रियमद्रे
ख
३४७८ ख च
२९५५ खचि ह्रस्वः
३३०४ खनो घ च
२१४३ खित्यनव्यय
३५१३ खिदेरछन्द
ग
३८७३ गतिकारकोप
३७८३ गतिरनन्तरः
३१७७ गतिर्गतौ
३१५८ गत्यर्थलोटा
३०८६ गत्यर्थाकर्मक
३१४४ गत्वरश्च
२८४८ गदमदचर
३७४७ गन्तव्यपण्यं
२७०५ गन्धनावक्षे
२१८६ गमः क्वौ
२१६४ गमश्च
२८०६ गर्हायां च
२७११ गर्हायां लड
२९०८ गस्थकन्
३७३८ गाधलवणयोः
२१२२ गापोष्टक्
२६३० गुणो यङ्लुको
३४०४ गुपेश्छन्दसि
३२८० गुरोश्च हलः
२७३१ गृधिवञ्च्योः
२१०६ गेहे कः
३५७४ गोः पादान्ते
३२१८ गोचरसंचर
३८१२ गोतन्तियवं
३८०३ गोत्रान्तेवासि
३८०६ गोबिडाल
३७७५ गौः सादसा
३५८२ ग्रसितस्क
३२३४ ग्रहवृदृनिश्चि
३७१६ ग्रामः शिल्पि
३८१८ ग्रामेऽनिव
२६३१ ग्रो यङि
३१११ ग्लाजिस्थश्च
घ
३४६३ घञ्छौ च
३२३६ घञपोश्च
३१८७ घञि च भाव
३५५० घसिभसोर्ह
३०६३ घुषिरविशः
३५८४ घर्लोपो लेटि
३८११ घोषादिषु च
ङ
३७०० ङयि च
३७२४ ङ्याच्छन्दसि
च
३६७१ चङ्यन्यतर
२८६३ चजोः कु घि
३६८२ चतुरः शसि
३७७७ चतुर्थी तदर्थे
३३९६ चतुर्थ्यर्थे
३९६४ चनचिदिव
२६३६ चरफलोश्च
२१३० चरेष्टः
३३५२ चर्मोदरयोः
३१२८ चलनशब्दा
३१६६ चवायोगे
२१७० चादिलोपे वि
३९६५ चादिषु च
२६४७ चायः की
३५११ चायः की
३१६९ चाहलोप एवे
२७६२ चिण्णमुलोर्दी
२७५८ चिण्भावकर्म
३७१० चितः
२८९३ चित्याग्निचि
२८०७ चित्रीकरणे
३६२० च्विदिति चोप
३२८२ चिन्तिपूजि
३८६१ चीरमुपमानं
३८६८ चूर्णादीन्यप्रा
३८६० चेलखेटकटु
३३५४ चेले क्नोपेः
३६५९ चौ
छ
३४२१ छन्दसि गत्य
३४९१ छन्दसि चस

३९३२ छन्दसि च
३९०७ छन्दसि च
३९६२ छन्दसि च
३४९० छन्दसि ठञ्
३४०७ छन्दसि निष्ट
३३९१ छन्दसि परे
३३८७ छन्दसि पुन
३०९३ छन्दसि लिट्
३४२३ छन्दसि लुङ्
३४०८ छन्दसि वन
३६३४ छन्दसि वाप्रा
३४३२ छन्दसि शाय
३४०९ छन्दसि सहः
३६०० छन्दसीरः
३९४२ छन्दस्यनेकम
३५४५ छन्दस्यपि इ
३५७५ छन्दस्यपि इ
३४३५ छन्दस्युभय
३५४० छन्दस्युभय
३५४८ छन्दस्युभय
३६४८ छन्दस्यृदवग्र
३२०५ छन्दोनाम्नि
३२०६ छन्दोनाम्नि
३८२० छात्र्यादयः
३२९७ छादेर्घेऽद्व्युप
ज
३४१३ जनसनखन
३५४२ जनिता मन्त्रे
२६३८ जपजभदहद
३१३५ जल्पभिक्ष
३३३१ जहातेश्च क्विब
३१४५ जागुरूकः
३९०४ जातिकालसु
२८०४ जानुयदोर्लिङ्
३९५४ जास्वपूर्वम्
३३३० जान्तनशां
३३०३ जालमानायः
२५८९ जिघ्रतेर्वा
३१३७ जिदृक्षिविश्री
३०९२ जीर्यतेरतृन्
३१३० जुचङ्क्रम्य
३६९७ जुष्टार्पिते च
३३२७ जृव्रश्च्योः
२७२१ ज्ञाश्रुस्मृदृशां
३३४० ज्यश्च
२६५४ ज्वरत्वर
२९०२ ज्वलितिकस
झ
३६८३ झल्युपोत्तमम्
ञ
३०८८ ञीतः क्तः
३६८६ ञ्नित्यादिर्नि
ट
३२६७ ट्वितोऽथुच्
ड
३२३६ ड्वितः क्त्रिः
ढ
३४५५ ढश्छन्दसि
ण
३२१६ णचः स्त्रियाम्
३८१३ णिनि
२७३८ णेरणौ यत्कर्म
३०६६ णेरध्ययने वृत्त
२८३६ णेर्विभाषा
३११७ णेश्छन्दसि
२६०७ णौ गमिरबोध
२५७९ णौ च संश्चङोः
२६०१ णौ च संश्चङो
२८८१ ण्य आवश्यके
३२८४ ण्यासश्रन्थो
२९०९ ण्युट् च
२८९५ ण्वुल्तृचौ
त
३७३६ तत्पुरुषे तुल्यार्थ
३८५७ तत्पुरुषे शाला
२५७५ तत्प्रयोजको
३७११ तद्धितस्य
३४७१ तद्वानासामुप
३५४९ तनिपत्योश्छ
२७५९ तनातेर्यकि
२६२२ तनोतेर्विभाषा
२७७१ तपस्तपःकर्म
२७६० तपोऽनुतापे च
३५६७ तप्तनप्तनथना
२८८३ तयोरेव कृत्य
३४९९ तयोर्दार्हिलौ
३६२७ तयोर्य्वावचि
३७८५ तवै चान्तश्च
२८३४ तव्यत्तव्यानी
२५६६ तस्य तात्
३१०९ ताच्छील्यवयो
३७८४ तादौ च निति
१३७२ ताभ्यामन्यत्र
३७३० तास्यनुदात्ते
३९७८ तिङि चोदात्त
३९३४ तिङो गोत्रादी
३९३५ तिङ्स्तिङः
३०३७ ति च
३१०३ तितुत्रतथसि
३७२९ तिरस्तिरिंतम्
३६६२ तिर्यच्यपवर्गे
२५८८ तिष्ठतेरित्
३७१३ तिसृभ्यो जसः
३४६१ तुम्राद्धन्
३५०९ तुजादीनां दी
२९९१ तुन्दशोकयोः
३९४६ तुपश्यपश्यताहै
३४३६ तुमर्थे सेसेनसे
३१७५ तुमुन्ण्वुलौ क्रि
३३८९ तूष्णीमिभुव
३७८२ तृतीया कर्मणि
३३९४ तृतीया च हो
३११९ तृन्
३३२६ तृषिमृषिकृषेः
३१०६ तौ सत्
३७०४ त्यागरागहास
३१२० त्रसिगृधिधृषि
थ
३४९७ थट् च छन्दसि
३७३२ थलि च सेटी
३८७१ थाथघञ्क्ताज
३५०० था हेतौ च
द
२९०१ ददातिदधात्योः
३०७६ दधातेर्हिः
२६२१ दम्भ इच्च
३०७९ दस्ति
२७२८ दाणश्च सा
३५९६ दाधर्तिदर्धर्ति
३१३९ दाधेट्सिशदस
३१६२ दाम्नीशसयुयु
३७३९ दायाद्यं दायादे
३१७२ दाशगोघ्नौ
३६२९ दाश्वान्साह्वा
३८३७ दिक्छब्दा
२९३५ दिवाविभानि

३७२७ दिवो झल्
३०२८ दिवोऽविजि
३७३५ दिष्टिवितस्यो
३८१६ दीर्घकाशतुष
३४४८ दीर्घजिह्वी च
३६३१ दीर्घादटि
२६३२ दीर्घाऽकितः
२१०४ दुन्योरनुपसर्गे
३५८१ दुरस्युर्द्रविण
२१७१ दुहः कब्घश्च
२७६१ दुहश्च
३४६६ दूतस्य भाग
३५७७ दक्स्ववःस्वतव
३०६० दृढः स्थूलबल
३००४ दृशेः क्रनिप्
३४३८ दृशे विख्ये च
३८७५ देवताद्वन्द्वे च
३६६७ देवब्रह्मणोरनु
३५११ देवसुम्नयोर्यजु
३१२७ देविक्रुशोश्चोपस
३०७७ दो दद्घोः
२६०४ दोषो णौ
३०७४ द्यतिस्यतिमा
३०२० द्रवमूर्तिस्पर्शा
३८३१ द्विगौ क्रतौ
३७४६ द्विगौ प्रमाणे
३३१५ द्वितीया ब्राह्म
३३७४ द्वितीयायां च
३१३१ द्वित्रिभ्यां पा
२१५४ द्विषत्परयोः
३१११ द्विषोऽमित्रे
३४५३ द्वयचश्छन्दसि
३५३६ द्वयचोऽतस्तिङ्

ध

३१६१ धः कर्मणि ष्ट्रन्
२८२४ धातुसंबन्धे प्र
२८२१ धातोः
२६७१ धातोः
२६०८ धातोः कर्म
२६२९ धातोरेकाचो
३०५१ धृषिशसी
३५६४ ध्वमो ध्वात्

न

२६५१ नः क्ये
३२१७ न कर्मव्यति
२६४१ न कवर्तेर्यङि
३३१४ न क्त्यिचि
३३२२ न क्त्वा सेट्
२८७५ न क्षादेः
३४८७ नक्षत्राद्वः
२६८१ न गतिहिंसा
३१९० न गुणादयो
३७२६ न गोश्वन्साव
३५८८ न च्छन्दस्यपु
३८८१ नञो गुणप्रति
३८५० नञो जरमर
३१०६ नञ्सुभ्याम्
३८४३ नदी बन्धुनि
२७६७ न दुहस्नुनमां
२६५६ न धातुलोप
३०४० न ध्याख्यापृ
३११५ न निविभ्याम्
२७८० ननौ पृष्टप्रतिव
२८१६ नन्द्रिप्रहिपचा
३९५० नन्द्रियनुञ्यैष
२७८१ नन्द्रोर्विभाषा
३७५५ न पादम्या
३०९० नपुंसके भावे
२८४० न भाभूपूकमि
३८२५ न भूताधिकसं
३७५३ न भूवाक्चिदि
३१४७ नमिकम्पिस्म्य
२६७५ नमोवरिवश्चि
३१३२ न यः
२७७४ न यदि
३३४४ न यद्यनाकाङ्क्षे
३१६८ न रपरसृपिसृ
२७७० न रुधः
३१३६ न लुट्
३३३५ न ल्यपि
२६४६ न वशः
२१३७ न शब्दश्लोक
२६४१ नश्च धातुस्थो
३६०३ नसत्तनिषत्ता
३३०७ न सुदुभ्यां
३६६६ न सुब्रह्मण्यायां
३९३८ नह प्रत्यारम्भे
३८३५ न हास्तिनफ
३८६७ नाचार्यराज
३१४५ नाडीमुष्टयोश्च
३६०२ नाद्धस्य
३३८४ नाधार्थप्रत्यये
२७१३ नानद्यतनव
२७३२ नानोर्ज्ञः
३७२३ नामन्यतर
३०८० नाम्न्यादिशि
३१०२ नाम्ययदिक्
२१४४ नासिकास्तन
२७५३ निगरणचलना
३६१३ निगृह्यानुयोगे
३२६५ निघो निमित
२६६४ नित्यं कौटिल्ये
३४४६ नित्यं छन्दसि
३५८७ नित्यं छन्दसि
३२४३ नित्यं पणः
३६९८ नित्यं मन्त्रे
२५९६ नित्यं स्मयतेः
३०८२ निनदीभ्यां
३१२६ निन्दहिंसक्लि
३५३८ निपातस्य च
३९३७ निपातैर्यद्यदि
३२५१ निपानमाहावः
३३५५ निमूलसमूल
३१९९ निरभ्योः पू
३९१८ निरुदकादीनि
३०२९ निर्वाणोऽवाते
३७४२ निवाते वात
३२१३ निवासचिति
३६४७ निव्यभिभ्यो
३०१३ निष्ठा
३६९३ निष्ठा च
३०५७ निष्ठायां सेटि
३०५४ निष्ठायामण्य
३०५२ निष्ठा शीङ्
३९०३ निष्ठोपमाना
३८४४ निष्ठोपसर्गपूर्व
२७०३ निसमुपविभ्यो
२६४२ नीग्वञ्चुस्रंसु
२६४३ नुगतोऽनुना
३०३८ नुदविदोन्दत्रा
३७२८ नृ चान्यतर
२९८१ नेड्वशि कृति
३१२६ नेरनिधाने

१९८३ नेर्विशः
३७२१ नोङ्धात्वोः
३८७६ नोत्तरपदेऽनु
३४५४ नोत्वद्वर्ध्रबि
३६६१ नोदात्तस्वरि
२७६३ नोदात्तोपदेश
३४०५ नोनयतिध्वनय
३३२४ नोपधात्थफा
३२४१ नौ गदनदपठ
३२३७ नौ ण च
३२२३ नौ वृ धान्ये
२८६४ न्यङ्क्वादीनां
३७८७ न्यधी च

प

३०३१ पचो वः
३६३६ पञ्चम्याः परावध्यर्थे
३००८ पञ्चम्यामजातौ
३७५२ पत्यावैश्वर्ये
३५३० पथि च च्छ
३६८७ पथिमथोः
३१८२ पदरुजविशस्पृशो घञ्
२८७० पदाम्वैरिबाह
३७४१ पदेऽपदेशे
२७६३ परस्मिन्विभाषा
३६३३ परादिश्छन्दसि
३२१० परावनुपात्यय
३३१६ परावरयोगे च
३३७७ परिक्रिश्यमाने
३२०६ परिन्योर्नीणो
३७६७ परिप्रत्युपापा
३१६० परिमाणा
२९४८ परिमाणे पचः
२६८४ परिव्यवेभ्यः
३०२६ परिस्कन्दः
३९१६ परेरभितो
२७४८ परेर्मृषः
३२६२ परेश्च घाङ्कयोः
३२६१ परौ घः
३२३० परौ भुवोऽव
३२२२ परौ यज्ञे
३१७८ पर्याप्तिवचनेष्व
३२८८ पर्यायार्हणोत्पत्तिषु
३८६२ पललसूप
३५०१ पश्च पश्चा च
२८६६ पाघाध्माधेट्
२६७२ पाणिघताड
३६३७ पातौ च
३४५७ पाथोनदी
३८०१ पापं च शिल्पिनि
२८६० पाय्यसान्ना
३५२८ पितरामातरा
३२९६ पुंसि संज्ञायां
२६७६ पुच्छभाण्डचीवराण्णिधौ
३८६६ पुत्रः पुम्भ्यः
३६४६ पुरा च परीप्सायाम्
३७४२ पुरि लुङ् चा
३६२४ पुरुषश्चान्वा
३८३३ पुरे प्राचाम्
२९३२ पुरोऽग्रतोऽग्रेषु
३१६६ पुवः संज्ञा
२८३७ पुष्यसिद्ध्यौ
२६५८ पूः सर्वयोर्दारि
३७६२ पूरोष्वन्यतर
३०५१ पूङः क्वा च
३०५० पूङश्च
३१०८ पूङ्यजोः
३६७४ पूजनात्पूजितम्
३९४४ पूजायां नान
३६१७ पूर्वं तु भाषा
३६४३ पूर्वपदात्
२७३४ पूर्ववत्सनः
२६३३ पूर्वे कर्तरि
३७५६ पूर्वं भूतपूर्वे
३४७९ पूर्वैः कृतमिन
२८४४ पोरदुपधात्
३०७२ प्यायः पी
२६६० प्रकाशनस्थेया
३५१८ प्रकृत्यान्तः पा
३८७१ प्रकृत्या भगालं
२६०३ प्रजने वीयतेः
३२४८ प्रजने सर्तेः
३१३५ प्रजोरिनिः
३६०८ प्रणवष्टेः
२८८६ प्रणाय्योऽसंमत
३७४० प्रतिबन्धि चिरं
३६१८ प्रतिश्रवणे च
३०२७ प्रतिस्तब्धनि
३६२७ प्रतेरंश्वादयः
३०२२ प्रतेश्च
३५०२ प्रश्नपूर्वविश्वे
२८६९ प्रत्यपिभ्यां
२७३३ प्रत्याङ्भ्यां श्रु
३२०४ प्रथने वावशः
३७६० प्रथमोऽचिरो
३०६१ प्रभौ परिवृढः
३२४५ प्रमदसंमदौ ह
३३७२ प्रमाणे च
२८७८ प्रयाजानुयाजौ
३४३७ प्रयै रोहिष्यै
२८८४ प्रयोज्यनियो
३८८१ प्रवृद्धादीनां च
२७७७ प्रश्ने चासन्नका
३९१७ प्रष्ठोऽग्रगामि
३५६६ प्रसमुपोदः पादः
३०३४ प्रस्योऽन्यतर
३८२१ प्रस्थेऽवृद्धमक
३८०८ प्राचां क्रीडायां
३६१७ प्रादस्वाङ्गे
२७४७ प्राङ्नहः
२९५३ प्रियवशे वदः
३७५० प्रीतौ च
२६११ प्रसूत्वः सम
२६२० प्रे दाज्ञः
३१९८ प्रे द्रुस्तुस्रुवः
३२२७ प्रे वणिजाम्
३१२९ प्रे लपस्रुद्रुमथ
३२२१ प्रे लिप्सायाम्
३२०३ प्रे स्रोऽयज्ञे
२८१७ प्रैषातिसर्ग
२७३९ प्रोपाभ्यां युजे
२७३९ प्रोपाभ्यां समर्थाभ्याम्
३६२९ प्लुतावैच इदुतौ
२९५८ प्वादीनां ह्रस्वः

फ

२६४० फलेग्रहिरात्मंभरिश्च

ब

३४६५ बर्हिषि दत्तम्
३५०६ बहुप्रजाश्छन्दसि
३३६८ बहुलं छन्दसि
३४०० बहुलं छन्दसि
३४०१ बहुलं छन्दसि
३४१६ बहुलं छन्दसि
३४९७ बहुलं छन्दसि
३६१० बहुलं छन्दसि
३६५७ बहुलं छन्दसि

३१९८ बहुलं छन्दसि
३१७८ बहुलं छन्दसि
३१८६ बहुलं छन्दसि
३१९८ बहुलं छन्दसि
३१७६ बहुलं छन्दस्य
२१११ बहुलमाभी
३८११ बहुव्रीहाविद
३७३९ बहुव्रीहौ
३८४० बहुव्रीहौ विश्वं
३११० बहोर्नञ्वदुत्त
३७६४ बह्वन्यतरस्याम्
२६७२ बाष्पोष्मभ्यां
२५९३ बिभेतेर्हेतुभये
२७५२ बुधयुधनशजने
२११८ ब्रह्मभ्रूणवृत्रेषु
३६१० ब्रूहिप्रेष्यश्रौष

भ

३८०५ भक्ताख्यास्तद
२१७६ भजो ण्विः
३१४१ भजभासमिदो
२७६४ भञ्जेश्च चिणि
३५१७ भव्यप्रवय्ये च
३१७१ भविष्यति
२७१४ भविष्यति
३४५६ भवे छन्दसि
२८११ भव्यगेयप्रवच
२६७१ भावकर्मणोः
३४४३ भावलक्षणे स्थे
३१८१ भाववचनाश्च
३१८४ भावे
३४१० भावे च
३२५५ भावेऽनुपसर्ग
३०९७ भाषायां सद्
२७२० भासनोपसंभा
२१३१ भिक्षासेनादाये
३०४२ भित्तं शकलम्
२८६६ भिद्योद्धर्यौ
३१५४ भियः क्रुकलुक
३१७३ भीमादयोऽपा
२५१४ भीस्म्योर्हेतुभ
३६७५ भीह्रीभृहुमद
२८७७ भुजन्युब्जौ पा
२७३७ भुजोऽनवने
३१५१ भुवः संज्ञान्त
३११८ भुवश्च
३४४७ भुवश्च
३६०५ भुवश्च महा
२८५५ भुवो भावे
२१११ भूते
२७१७ भूते च
३१७० भूतेऽपि दृश्य
२८६१ भृशोऽसंज्ञाया
२६६७ भृशादिभ्यो भु
२८८५ भोज्यं भक्ष्ये
३१५७ भ्राजभासधु

म

३०८१ मतिबुद्धिपूजा
२६२८ मतुवसो रु
२७०५ मतोः पूर्वमा
३४८२ मतौ च
३४७४ मत्वर्थे मासत
३२४४ मदोऽनुपसर्गे
३४८५ मधोः
३४७५ मधोर्ञ च
२९१२ मनः
३८८५ मन्क्तिन्व्या
३४८२ मन्त्रे घसह्वरण
३४२० मन्त्रे वृषेषपच
३४१४ मन्त्रे श्वेतवहो
३५५४ मन्त्रेष्वाङ्या
३५३३ मन्त्रे सोमाश्वे
३३१८ मयतेरिदन्य
३४८४ मये च
३७७२ महान्व्रीह्य
३७४८ मात्रोपज्ञोपक्र
६४७० मायायामण्
३८२२ मालादीनां च
२१४१ मितनखे च
२७४० मिथ्योपपदात्
३८८८ मिश्रं चानुपस
३५८५ मीनातेर्निगमे
३१०१ मुखं स्वाङ्गम्
२६२४ मुचोऽकर्मकस्य
२६७७ मुण्डमिश्र
३२५४ मूर्तौ घनः
२८६२ मृजेर्विभाषा
३३२३ मृडमृदगुध
३०५५ मृषास्तितिक्षायां
२१६० मेधर्तिभयेषु

य

२६३३ यङि च
२६५० यङोऽचि च
२६५१ यङो वा
२८०५ यच्चयत्रयोः
३१४६ यजजपदशां
३५६५ यजध्वैनमिति
३२६८ यजयाचयत
२८८२ यजयाचरुच
३५२० यजुष्युरः
३६४१ यजुष्येकेषाम्
३३१७ यजेश्च करणे
३६६३ यज्ञकर्मण्य
३२०२ यज्ञे समिस्तु
३७०१ यतोऽना
३३४९ यथातथयोरसू
२८२७ यथाविध्यनुप्र
३१६३ यद्धितुपरं छ
३९७३ यद्वृत्तान्नित्यं
३२४० यमः समुपनि
२६१८ यमो गन्धने
३८९० यततोश्चातद
३१५६ यश्च यङः
३०२५ यस्य विभाषा
२६६१ यस्य हलः
३६०१ याज्यान्तः
३३५१ यावति विन्द
२७८३ यावत्पुरा
३१४३ यावद्यथाभ्यां
३८१५ युक्तारोह्याद
३७०० युक्ते च
२८७३ युग्यं च पत्रे
३५४४ युष्मदोर्द्वीर्घ
३६४० युष्मत्तत्ततक्षु
३६१६ युष्मदस्मदो
३६०७ ये यज्ञकर्मणि

र

३४६७ रक्षोयातूनां
३०१६ रदाभ्यां निष्ठा
२५८१ रभेरशब्लिट
२६१७ रलोव्युपधाद्ध
३२२८ रमौ च
३००५ राजनि युधिकृ
३७६८ राजन्यबहुवच
२८६५ राजसूयसूर्य
३७१३ राजा च
३७१७ राजा च प्रशं

२६४५ रात्रेश्चाजसौ
२६५५ राल्लोपः
३६१६ रिक्ते विभाषा
२६४४ रीगृदुपधस्य
२६५२ रुग्रिकौ च
२६०१ रुदविदमुष
३०६१ रुष्यमत्वर
२५१६ रुहः पोऽन्यतर
३४६८ रेवतीजगती
३२८५ रोगाख्यायां
ल
३१०३ लक्षणहेत्वोः
१६६१ लक्षणे जाया
३१०० लटः शतृशा
२७७८ लट् स्मे
२५८२ लभेश्च
३१७४ लषपतपद
३४२४ लिङर्थे लेट्
२८१५ लिङ् च
२७८८ लिङ्चोर्ध्वं
२८१८ लिङ् चोर्ध्वमौ
२८२१ लिङर्थादि
३४३४ लिङ्याशिष्य
३०१५ लिटः कान
१८७६ लिति
२७८६ लिप्स्यमानसि
२५९२ लियः सम्मान
२५६१ लीलोर्नुग्लु
२६३५ लुपसदचरजप
३०४८ लुभो विमोहने
३१०७ लृटः सद्वा
३४२७ लेटोऽडाटौ
३५५९ लोट् च
२७८७ लोडर्थलक्षणे
२५८७ लोपः पिबतेरी
३५६३ लोपस्त आत्म
३१९२ लोपे विभाषा
२६६८ लोहितादिडा
३३३९ ल्यपि च
३३३६ ल्यपि लघुपूर्वा
३२९० ल्युट् च
३०१८ ल्वादिभ्यः
व
२८८३ वचोऽशब्द
३३२५ वञ्चिलुञ्च्यृत
२८७१ वञ्चेर्गतौ
३४१२ वदव्रजहलन्ता
२८५४ वदः सुपि
३९०१ वनं समासे
२९२४ वयसि च
३४७३ वयस्यासु
३८६५ वर्ग्यादयश्च
३७३७ वर्णो वर्णेष्वने
२७८१ वर्तमानसामी
३३५३ वर्षप्रमाण
३०४६ वसतिक्षुधोरिट्
३४५१ वसन्तात्च
३४८६ वसोः समूहे
३०१६ वस्वेकाजाद्ध
३४१० वहश्च
२१४७ वहाभ्रे लिहः
२९५० वह्नेः करणम्
२६६९ वा क्यषः
३०८१ वाऽऽक्रोशदैन्य
२७०० वा गमः
२९५७ वाचंयमपुरन्द
२६०५ वा चित्तविरा
२१९६ वाचि यमो
३५९२ वा छन्दसि
३५१९ वा छन्दसि
३१०५ वा जाते
३०६८ वा दान्तशा
२८३९ वा निंसनिक्ष
३७५४ वा भुवनम्
३२१२ वा यौ
३३३४ वा ल्यपि
३५४१ वा षपूर्वस्य
२८३० वाऽसरूपोऽस्त्रि
३०८५ विकुशमिपरि
३६१६ विचार्यमाणा
३४१७ विजुपे छन्द
२१८२ विड्वनोरनुना
३०४१ वित्तो भोगप्र
३१४२ विदिभिदि
३१०५ विदेः शतुर्वसुः
२१५० विध्वरुषोस्तुदः
३१४९ विन्दुरिच्छुः
२६८५ विपराभ्यां जेः
२८६८ विपूयविनी
३१६० विप्रसंभ्यो
३५५४ विभाषर्जोश्छ
२८०० विभाषा कथ
२७८४ विभाषा कदा
२७५१ विभाषाऽकर्म
२८७१ विभाषा कृ
३२८७ विभाषाख्या
३०९१ विभाषा गम
२१०५ विभाषा ग्रहः
३३४५ विभाषाग्रेप्रथ
३२२५ विभाषाङि रु
२७६५ विभाषा चि
३६६५ विभाषा छन्द
३८१८ विभाषा छन्द
३५१३ विभाषा छन्द
३८९५ विभाषा तृन्न
२८१२ विभाषा धातौ
३७०१ विभाषाध्यक्षे
३३३७ विभाषाऽऽपः
३३४२ विभाषा परेः
३६१२ विभाषा पृष्टप्र
३०५४ विभाषा भावा
३६८४ विभाषा भाषा
३०२३ विभाषाभ्यव
२७२३ विभाषा विप्र
३७०३ विभाषा वेण्वि
२५८३ विभाश वेष्टि
२७७५ विभाषा साक
३६५५ विभाषितं वि
३९६० विभाषितं सो
३९३० विभाषोत्पु
२७४४ विभाषोपपदेन
२७३० विभाषोपयम
३३८८ विशाखयोश्च
३३७८ विशिपतिपदि
३७५८ विस्पष्टादीनि
३८५४ वीरवीर्यौ च
३५०४ वृकज्येष्ठाभ्यां
३२३३ वृक्षासनयोर्वि
३२२९ वृणोतेराच्छा
२७११ वृत्तिसर्गतायने
३६९१ वृषादीनां च .
२७१४ वेः पादविहरणे
२७०७ वेः शब्दकर्मणः
२७०१ वेत्तेर्विभाषा
३४५८ वेशन्तहिम
३४७७ वेशोयशआदे

३४३० वैतोऽन्यत्र
३१७१ वैवावेति च
२७१८ वोताप्योः
२५९० वो विधूनने
३१२३ वौ कषलस
३१९६ वौ कुश्रुवः
२७२१ व्यक्तवाचां स
३४३३ व्यत्ययो बहु
३२६८ व्यधजपोरनु
३३९२ व्यवहिताश्च
३९०० व्यवायिनो
३३४१ व्यश्च
२७४९ व्याङ्परिभ्यो
३२११ व्युपयोः शेतेः
३२७५ व्रजयजोर्भावे
२९९० व्रते

श

३१७७ शकधृषज्ञा
३४३९ शकि णमुल्क
२८२३ शकि लिङ् च
२८४७ शकिसहोश्च
२९७१ शक्तौ हस्ति
३७१९ शतुरनुमो
२५१८ शदेरगतौ
२६७३ शब्दवैरकलहा
३५४३ शमिता यज्ञे
३१२१ शमित्यष्टाभ्यो
२१२८ शमि धातोः
२५८९ शाच्छासाह्वा
३०७५ शाच्छोरन्य
३७४३ शारदेऽनार्तवे
३८७२ शितेर्निधा
३८१० शिल्पिनिचाकृ
२९०७ शिल्पिनि ब्रु
३४८९ शिवशमरि
३९१४ शीर्षश्छन्दसि
३०३० शुषः कः
३३५६ शुष्कचूर्णरूक्षेषु
३६९४ शुष्कधृष्टौ
३८४९ शृङ्गमवस्था
३०६७ शृतं पाके
३१४३ शृवन्द्योरारुः
३५१६ शेश्छन्दसि
२८०८ शेषे लुडयदौ
३१४८ शेषे विभाषा
३१५७ शेषे विभाषा
२१०३ श्याद्व्यधास्रु
३०२१ श्योऽस्पर्शे
३७५१ श्रयुवमक
३११५ श्रिणीभुवोऽनु
३५७३ श्रीग्रामण्योश्छ
३५५१ श्रृण्वृकृवृ
३०३९ श्वीदितो निष्ठा

ष

३८१९ षट् च काण्डा
३७२५ षट्त्रिचतु
३३३३ षत्वतुकोरसि
३७९४ षष्ठीप्रत्येनसि
३३८१ षष्ठीयुक्तश्छन्द
३६३८ षष्ठ्याः पति
३३१० षात्पदान्तात्
३२८१ षिद्भिदादिभ्यो

स

३४२८ स उत्तमस्य
२६२८ सः स्विदि
३०१७ संयोगादेरातो
३१३२ सक्थं चाक्रा
३१७५ सगतिरपि
३४६० सगर्भसयूथ
३७६१ संख्या
३८१७ संख्यायास्त
३२१४ संघेचानौत्तरा
३२६४ संघोद्धौ गण
३२८६ संज्ञायाम्
३३५७ संज्ञायाम्
३८१३ संज्ञायाम्
३२७६ संज्ञायां समज
३८२८ संज्ञायां गिरि
३८११ संज्ञायां च
३८८० संज्ञायामना
३६८९ संज्ञायामुपमा
३६१२ संज्ञायाभृतृ
३८१९ संज्ञायां मित्रा
३८४७ संज्ञौपम्ययोश्च
३१३९ सत्यं प्रश्ने
२१७५ सत्सूद्विषद्रुहदु
३७४५ सदृशप्रतिरूप
३५२९ सधमादस्थयो
३३१५ सनः क्तिचि
३१४८ सनाशंसभिक्ष
३५८३ सनिंससनिवां
२६१० सनिग्रहगुहोश्च
२६१५ सनि च
२६२३ सनि मीमाघु
२६१८ सनीवन्तर्ध
२६४५ सनोतेरनः
३४११ सप्तनोऽञ्छन्द
३७६६ सप्तमीसिद्धशु
३७९९ सप्तमीहारिणौ
३८८६ सप्तम्याः पुण्य
३३७० सप्तम्यां
३००७ सप्तम्यां जनेर्ड
२८३२ सभायांनपुंसके
२७२६ समः क्ष्णुवः
२७२५ समः प्रतिज्ञाने
२६८९ समवप्रविभ्यः
२७२७ समस्तृतीया
३३२० समानकर्तृक
३१७६ सामानकर्तृकेषु
३३७१ सामासक्तौ
३७३४ सामासस्य
३३३२ समासेऽनञ्पूर्वे
२९२१ समिख्यः
३२०८ समि मुष्टौ
३१९४ समि युद्रुदुवः
२८२८ समुच्चयेऽन्य
२८२६ समुच्चये सा
२७४२ समुदाङ्भ्यो
३२४६ समुदोरजः
३४६४ समुद्राभ्राद्धः
३३५७ समूलाकृतजीवे
२६९९ समोगम्यृच्छि
३४९४ संपरिपूर्वात्ख
३१२२ संपृचानुरुधा
२७१९ संप्रतिभ्याम्
३१०२ संबोधने च
२८११ संभावनेऽलमि
२७०९ संमाननोत्सञ्ज
२९५९ सर्वकूलाभ्रकरी
३८२७ सर्वं गुणका
३४८८ सर्वदेवात्तादि
३६८५ सर्वस्य सुपि
३७५७ सर्विधसनीड
३५९७ ससूवेति
३४८९ सहक्षेण संमि
३६४६ सहेः पृतनर्ता

२०६ सहे च
३९३१ साढ्यै साढ्वा
३६९९ सामान्यवचनं
२७१६ सार्वधातुके
३७१४ सावेकाचस्तृ
२६४० सिचो यङि
२६०२ सिध्यतेरपार
३४३५ सिब्बहुलं ले
२९६९ सुकर्मपापमन्त्र
३७४६ सुखप्रिययोर्हि
२६७४ सुखादिभ्यः
३६४४ सुञः
३११२ सुञो यज्ञसंयो
३५९४ सुधितवसुधित
२६९७ सुप आत्मनः
३९६१ सुपां सुलुक्पूर्व
२९१६ सुपि स्थः
२९८८ सुप्यजातौ
३६५६ सुबामन्त्रिते
३०९१ सुयजोर्ङ्वनि
३०८३ सूत्रं प्रतिष्णात
३१३३ सूददीपदीक्षश्च
३८७९ सूपमानात्क्तः
३१४० सृघस्यदः क्म
३५४४ सृपितृदोः कसु
३१८३ सॄ स्थिरे
३४८३ सोममर्हति यः
३००० सोमे सुञः
३५८१ सोमे ह्वरितः
३९२९ सोरवक्षेपणे
३८५१ सोर्मनसी अलो
२९२७ स्तम्बकर्णयो
२९३८ स्तम्बशकृतो
३२६० स्तम्बे क च
२९८० स्तम्भुसिवुस
३६४२ स्तुतस्तोमयो
२६२७ स्तौतिण्योरेव
३०३३ स्थः प्रपूर्वस्य
३२७२ स्त्रियांक्तिन्
२९८७ स्थः क च
३२७३ स्थागापाप
३१५५ स्थेशभासपिस
३५७१ स्नात्व्यादयश्च
३३५९ स्नेहने पिषः
२७०४ स्पर्धायामाङः
३१३८ स्पृहिगृहिपति
३०४४ स्फायः स्फी
२५९७ स्फायो वः
३९२१ स्फिगपूत
३१८५ स्फुरतिस्फुल
२६२६ स्मिपूङ्रञ्ज्व
२८१९ स्मे लोट्
३५२६ स्यश्छन्दसि
२७५७ स्यसिच्सीयुट्
२५७८ स्रवतिश्रुणोति
३४५९ स्रोतसो विभा
३७५१ स्वं स्वामिनि
३६३३ स्वतवान्पायौ
३२३९ स्वनहसोर्वा
३६७२ स्वपादिहिंसा
३१५२ स्वपितृषोर्नजि
२६४५ स्वपिस्यमिव्ये
३२६९ स्वपो नन्
३६२२ स्वरितमात्रेडि
३६६८ स्वरितात्संहि
३६५९ स्वरितो वानु
३३८३ स्वाङ्गे तस्प्रत्य
३३७६ स्वाङ्गेऽध्रुवे
३३४७ स्वादुमि णमुल्
२५८४ स्वापेश्चङि
३३६३ स्वे पुषः

ह

२६९७ हनः सिच्
३२५३ हनश्च वधः
२८५६ हनस्त च
३९६१ हन्त च
२९२३ हरतेरनुद्यमने
२९३९ हरतेर्दंतिनाथ
२६१३ हलन्ताच्च
३३०० हलश्च
२८२७ हलश्चेजुपधा
३१६४ हलसूकरयोः
३४१२ हव्येऽनन्तःपा
२७७६ हशश्वतोर्लङ् च
२६१० हश्च व्रीहि
३२१२ हस्तादाने चे
३३६० हस्ते वर्तिग्रहो
३३६९ हिंसार्थानां च
३६४१ हि च
६७८९ हिरण्यपरिमा
३०७० ह्वश्चोर्लोमसु
३९६७ हेति क्रियां
२५७६ हेतुमति च
२८१३ हेतुहेतुमतोर्लिं
३३९९ हेमन्तशिशि
३४५२ हेमन्ताच्च
३७२२ ह्रस्वनुड्भ्यां
२८५८ ह्रस्वस्य पिति
३५२७ ह्रस्वाच्चन्द्रोत्त
३९०८ ह्रस्वान्तेऽन्त्या
३५७९ ह्रु ह्वरेश्छन्दसि
३०७३ ह्लादो निष्ठा
२५८० ह्वः संप्रसारणं
३२४९ ह्वृ संप्रसारणं
२९१४ ह्वावामश्च

ण्यन्तादिस्वरप्रक्रियान्तवार्तिकसूची ।

वार्तिकम्	सूत्राङ्काः	वार्तिकम्	सूत्राङ्काः	वार्तिकम्	सूत्राङ्काः	वार्तिकम्	सूत्राङ्काः
अ		अतद्धित इति	३६५२	अनाचमिकमी	२७६३	अमुष्येत्यन्तः	३६६६
अक्षरसमूहे छ	३४८६	अतेर्धातुलोप	३९२५	अनुपसर्ग इति	३७८१	अर्तिश्रुदृशिभ्य	२७०१
अग्रग्रामाभ्यां	२९७५	अत्यन्तापह्नवे	२७७५	अन्यत्रापि	२९६५	अर्थवेदयोरप्या	२६७७
अजेः क्यपि	३२७६	अदेः प्रतिषेधः	२७५३	अपादाने क्रिया	३१९१	अवहाराधारा	३३०१

अव्ययानां न ३६५१
अव्ययीभाव ३६२६
अव्यये नञ्कु ३७३६
अशब्दृषयोर्मै २६६२
असावित्यन्तः ३६६६
असि अकेऽने २९०७

आ

आगमेः त्तमा २६८७
आङ्याजयारा ३५५१
आङः प्रतिज्ञा २६८९
आङि नुप्रच्छ २६८८
आङ्पूर्वस्या ३०७२
आङ्पूर्वादज्ञेः २८९७
आचारेऽवग २६६५
आदिकर्मणि ३०५२
आदिखाद्योर्न २७५३
आद्युदा ३८२५
आमन्त्रिते ३६२६
आविष्टयस्योप ३४४४
आशङ्कायांसन्व २६२२
आशासः क्त्रौ २९८४
आशिषि २६८७

इ

इक्कृष्यादिभ्यः ३२८९
इक्स्तपौ धा ३२८५
इञ्वपादिभ्यः ३२८९
इणजादिभ्यः ३२८५
इन्धेश्छन्दोविष ३३९३
इयाडियाजीका ३५६१
इषेरनिच्छार्थं ३२८४

ई

ईक्षिक्षमिभ्यां २९१३
ईदथिनः ३६०२
ईर्ष्यते २६०७,२६०८
ईषा अक्षादीनां ३५२५
ईहायामेव २६९१

उ

उत्तानादिषु २९२९
उत्फुल्लसंफुल्ल ३०३७
उपसर्गादस्यात्यू २७०१
उपाद्देवपूजा २६९२
उभयसंज्ञान्य ३३९०
उरसो लोपश्च २९६५
उस्योमाङ्त्वा २६६७

ऊ

ऊङ्च गमादीना २९८६
ऊठ्युपधाग्रहणं ३७१७
ऊर्णोतेर्नुवन्नावो ३०१५

ऋ

ऋचि त्रेरुत्तरप ३८१०
ऋल्वादिभ्यः ३२७२
ऋषिप्रतिषेधो ३८९९

ए

एमन्नादिषु छन्द ३५१६
एरजधिकारे ३४१९

ओ

ओजसोऽप्सर २६६५

क

कण्ड्वादेस्तृती २६७८
कप्रकरणे मूल २९१९
कर्तृकर्मणो ३३००
कर्मणि समि २९६६
कविधौ सर्वत्र २९१५
काण्यादीनां वे २५८३
किरतेर्हर्षजीवि २६८७
किंयत्तद्बहुषु कृ २९३५
कुत्सितग्रहण ३००३
केलिमर उपसं २८३४
क्रमे कर्तर्यात्म २८९५
क्रियासमभि २८२८
क्ष्विञ्वचिप्रच्छ ३१९८
क्षीरलवणयो २६६२
क्सोऽपि वा २९७४

ख

खच्च डिद्वा २९५३
खनेर्डडरेकेक ३३०४
ख्शाञः शस्य २८४०

ग

गतिग्रहणे ३९७५
गमादीनामिति २९८९
गमेः सुपि वा २९५३
गवादिषु विन्देः २९००
गिरौडश्छन्द २९२९
गुग्गुलुमधु ३४४९

घ

घञर्थे कविधा ३२३४
घटीखारीखरी २९४५
घट्टिवन्दिविदि ३२८४
घ्रः संज्ञायां न २८९९

च

चरिचलिपतिव २८५६
चरेराङि चागु २८४८
चायतेः क्तिनि ३२७२
चारौ वा २९६६
चितः सप्रकृते ३७१०
चीवरादर्जने २६७६
चेलराज्य ३८६४

छ

छन्दसि स्त्रियां ३५२८
छन्दसीति वक्त २८६१

छन्दसीवनिपौ ३४९८
छन्दस्यपशब्दा ३४१९
छन्दोविन्प्रकर ३४९८

ज

जसादिषु छन्द ३५८६
जागर्तेरकारो ३२७८
जुहोतेर्दीर्घश्च ३१५८
ज्योतिरुद्गमन २७१४

झ

झलादाविति ३३३०

ड

डे च विहायसो २९६९

ण

णिश्रन्थिग्रन्थि २७७१
ण्यत्प्रकरणे त्य २८८२
ण्यत्प्रकरणे ल २८८५
ण्यन्तभादीना २८४०

न

तकिशसिचति २८४३
ननिपतिदरिद्रा २६२१
तनोतेरुपस २९०२
तन्वादीनां छ ३५४८
तपसः परस्मै २६७१
तमधीष्टो ३७६३
तितुत्रेष्वग्रहा ३२८०
तेन तत्र न भवे २८४८
त्यजेश्च २८८२

द

दंशेश्छन्दस्यु ३११६
दानेरार्जवे २३६४
दारजारौ क ३१६०
दुग्वोर्दीर्घश्च ३०१८
दुहिपच्योर्बहु २७६६
दृशेश्च ३०९६

निगमिजुहो ३१५८
द्विगोर्यप् ३७६३
द्वित्वप्रकरणे ३१३४

ध

धात्वर्थनिर्देशे ३२८९
धेट उपसंख्यान २७५५
ध्यायतेः सम्प्र ३१५८

न

नभोऽङ्गिरोमनु ३३८९
निमिमीलियां ३३०५
निर्विण्णस्योप २८३५
निष्ठादेशः षत्व ३०२५
निष्ठायामनिट २८६३
निष्ठायांसेट इति ३२८०
नृतिखनिरञ्जि २९०७
नौ लिम्पेर्वाच्यः २९००

प

पण्यकम्बलः ३७७६
परस्परोपप २६८२
पराङ्गकर्मका २६८६
परादिश्च परान्त ३१३३
परिचर्यापरि ३२७८
परेर्वा ३२८४
पाटेर्णिलुक्चो २८९६
पाणौ सृजेर्ण्यङ्वा २८७४
पातेर्णौ लुग्वक्त २५८९
पार्श्वादिषूप २१२९
पावकादीनां छ ३५८३
पिबतेः सुराशी २१२२
पुच्छादुदसने २६७६
पूज्ञ एवेह २८४०
पूर्वो विनाशे ३०१८
पूतिभ्रानुबन्ध ३९७६
पूर्वाङ्गवच्चेति ब ३६५६
प्रतिषेधे हसादी २६८१
प्रमाणे लो ३७४६
प्रलम्भनाभि २५९१
प्रश्नान्ताभिपू ३६२६

फ

फेनाच्चेति २६७२

ब

बहुलं छन्दसीति ३९८६
ब्रह्मणि वदा २१८८

भ

भगे च दारेः २९५८
भयादीनामुप ३२३१
भविष्यत्येवेष्यते २८१३
भाण्डात्समाच २६७६
भाषायां धाञ्कृ ३१५१
भाषायां शासि ३३०९
भूरिदाव्नस्तुट ३६०२
भूषाकर्मकिरादि २७६९

म

मलोपश्च ३९७४
माङ्योगाशी ३१०१
मान्तप्रकृतिक २६६०
मासरछन्दसीति ३५९४
मितद्ववादिभ्य ३१६०
मुद्गलाच्छन्द ३४३७

य

यदायद्योरुपसं २८०४
युष्मदस्मदोः ३४९१

र

रक्षणेर्णौ मृगरम २६०५
रयेर्मतौ बहुलम् ३५१०
राजघ उपसं २९७२
रादिफः ३२८९
राधो हिंसायां २६२३
रीगृत्वत इति २६४४

ल

लोहितादिडा २६६९

व

वनउपसंख्यान २६२९
वर्णात्कारः ३२८५
वशिरण्योरुप ३२३४
वसेस्तव्यत्कर्त २८३४
वस्त्रात्समाच्छा २६७७
वातशुनीतिल २९४२
वा नामधेयस्य ३६६६
वा बह्वर्थमनु ३१७६
वा लिप्सायामि २६९२
विदिप्रच्छिस्वर २७००
विन्दीन्धिखिदि ३७३०
विंशतेश्चेति ३४९१
विस्मितप्रति ३०७०
विहायसो विह २९५३
वृजेरिति ३७७६
वृषण्वस्वश्वयो ३३८१
व्याधिमत्स्यब ३१८३
व्रताद्भोजनतन्नि २६७७
व्रीहिवरणयोरि २९३८

श

शक्तिलाङ्गला २९२३
शपउपालम्भे २६८८
शब्विकरणेभ्य ३०५६
शसिदुहिगुहि २८५८
शिक्षेर्जिज्ञासा २६८७
शीङो वाच्यः ३१३८
शीलिकामिभ २९१३
श्रु वायुवर्ण ३१९१
श्वदन्तरोरुप ३२८३
श्रुयजीषिस्तु ३२७२
श्वेतवहादीनां ३४१४

ष

षठ्यर्थे चतुर्थी ३३१६
षठ्यामन्त्रित ३६५६

स

सन्निपाताच्चे १७०४
सम्पदादिभ्य ३२७२
सकर्मकाणां प्र २७६६
सतिशिष्टस्वर ३६९०
सत्रकक्षकष्टकृ २६७०
समवपूर्वाच्च २८७४
समश्च बहुलम् २८६१
समानान्ययो २१७४
समोऽकूजेन २६८७
सर्वत्रपन्नयोरुप २९६५
सर्वप्रातिपदि २६६२
सर्वप्रातिपदिक २६६९
साधुकारिण्युप २९८८
सासहिवावहि ३१५१
सिनोतेर्ग्रासकर्म ३०१८
सुडपि हर्षादि २६८८
सुदिनदुर्दिन २६७३
सुदुरोरधिकरणे २१६५
सूचिसूत्रिसूत्र्य २६३०
सूत्रे च धार्येऽर्थे २९२३
सृजियज्योः २७६१
सृजेः श्रद्धोपप २७६१
सोपसर्गस्य न ३०७२
स्तने धेटो २९४४
स्थाम्तस्योपो ३६६६

स्वराद्यन्तोपस २७३५
स्ववःस्वतवसो ३५९५
स्वाङ्गकर्मका २६९४
ह
हनुचलने इति २६७१
हनो वा यद्वध २८४३
हन्तेर्घत्वं च २८९६
हन्तेर्हिंसायां २६४३
हन्तेरप्रतिषेधः २६८१
हरतेर्गतताच्छी २६८७
हलिकल्योरद् २६७७
हल्यादिभ्यो २६७७
हस्तिसूचकया २९२७
हिरण्य इति ३४०७
हृग्रहोर्भश्छ ३४३२
हृदय्या आप ३५१७
हेतुमण्णिश्रि २७७१

उत्तरार्द्धगत-परिभाषासूची ।

९३ अङ्गवृत्ते पुनर्वृत्त
१२२ अनिर्दिष्टार्था अनुक्तेस्वल २३२६ २४३५ २५१३
४ अनेकान्ता अ
५७ अन्तरङ्गादप्यप
५४ अन्तरङ्गा ३३३४
६६ अपवादो यद्य
६८ अभ्यासविका
११८ अभेदका गुणाः
१३३ अर्धमात्रालाघ
१०७ अवयवप्रसिद्धेः
९५ आगमशास्त्रम
९९ आतिदेशिकम
२२ उणादयोऽव्यु
६५ उपसर्जनिष्य
९ उभयगतिरिह
७१ उभयनिर्देशे प
३७ एकदेशवि २४४०
१८ एकयोगनिर्दिष्टा
१७ एकयोगनिर्दि
१२७ एकस्या आकृते
५ एकान्ताः
१३० औपदेशिकप्रा
९ कार्यकालं सं
१० कार्यमनुभ २६२१
४३ कृताकृतप्रसङ्गि
९ कृत्रिमाकृत्रिम
६९ कृत्ल्युट्तुमुन्
४६ क्वचित्कृताकृत
५९ क्वचिदपवादवि
१२९ क्वचिद्विकृतिः
११७ क्वचित्समुदाये
८४ क्वचित्स्वार्थिकाः
९६ गणकार्यमनि
११७ गामादाग्रहणे
१५ गौणमुख्ययो
३१ ग्रहणवता प्रा
७९ चानुकृष्टं नो
१२५ ज्ञापकसिद्धं न
८३ तदनुबन्ध २८६१
९० तन्मध्यपतित
८८ ताच्छीलिके
८९ धातोः कार्यमु
७५ नञिवयुक्तमन्य
९८ नञ्घटितमनि
५१ नाजानन्तर्ये ७ नानुबन्धकृतमने
८ नानुबन्ध २८४४
८२ निरनुबन्धकग्र
१२१ निषेधाश्च बली
१३२ पदगौरवाद्यो
१२० पर्जन्यवल्लक्षण
१२४ पर्यायशब्दानां
३९ पुनः प्रसङ्गवि
६७ पुरस्तादप २५१४
२४४६, २४७७, २६७७
१२६ पूर्वत्रासिद्धीय
३८ पूर्वपरनित्यान्त
६६ पूर्वं ह्यपवादा
५३ पूर्वोत्तरपदनिमि
६४ प्रकल्प्य चाप
१०१ प्रकृतिग्रहणे य २६५१
९२ प्रकृतिग्रहणेष्य
१११ प्रत्ययाप्रत्यय
२४ प्रत्ययग्रहणे चा
११६ प्रत्येकं वाक्य
१०६ प्रधानाप्रधान
७८ बहुव्रीहौ त
११९ बाधकान्येव
१९ भाव्यमानेन स
२० भाव्यमानोऽप्यु
६१ मध्येऽपवादाः ५११
२ यथोद्देशं संज्ञा
११ तदागमास्त
३३ यस्मिन्विधि
४७ यस्य च लक्षणा
४८ यस्य च लक्षणा
५८ येन नाप्राप्ते यो
१२३ योगविभागा
११४ लक्षणप्रतिपदो २३५३
४५ लक्षणान्तरेण
१२१ लक्ष्ये लक्षणं
७० लादेशेषु वास
९१ लुग्विकरणालु २३५३
२१ वर्णाश्रये नास्ति
५५ वार्णादाङ्गं बली २२९०, २३८७
४१ विकरणेभ्यो
१०९ विधिनियमसं
१०२ विधौ परिभा
७३ विभक्तौ लिङ्ग
३० व्यपदेशिवदे
३२ व्यपदेशिवन्ना
१०८ व्यवस्थितवि
१ व्याख्यानतोवि
४३ शब्दान्तरस्य
४४ शब्दान्तराप्रा
१३१ शितपा शपानु २२४६, २६५०, २६५१
११३ श्रुतानुमितयोः
९४ सज्ञापूर्वकविधे २५४७

४० सकृद्गतौ२४७१
१२८ सम्प्रसारणं त
२५७९
१८५ समासान्तविधि
१०० सर्वविधिभ्यो
३५ सर्वे विधयश्छ
३४ सर्वो द्वन्द्वो विभा
११२ सहचरितासह
७७ साम्प्रतिकाभा
१११ सामान्यातिदे
२७९०
७४ सूत्रे लिङ्गवचनम
४९ स्वरभिन्नस्य च
८० स्वरविधौ व्यञ्ज
८१ हल्स्वरप्राप्तौ

उणादिसूत्रसूची।

सूत्राङ्काः	सूत्रम्
	अ
७६	अगारे णिच्च
५५१	अङ्न्याद्यश्च
६७५	अङ्गतेरसिरिरु
४१४	अङ्गिन्मदिम
४९०	अङ्गोर्नलोपश्च
५७८	अच इः
७०९	अच् तस्य जङ्घः
३४१	अजियमिशीङ
३२७	अजियुधिनीभ्यो
५३	अजिरशिशिर
३१८	अजिघृरीभ्यो
२०६	अजेरज च
५७०	अज्यतिभ्यां च
५०१	अञ्चेः को वा
६५५	अञ्च्यञ्जियुजि
३६९	अञ्जिघृसिभ्यः
८	अणश्च
८६	अणो डश्च
१२६	अण्डन्कृसृभृषृ
३९७	अत्यविचमित
६७९	अदि भुवो डुत
५०५	अदिशदिभूशुभि
५५५	अदेर्घ च
६४५	अदेर्नुग्धौ च
२६२	अदेर्मुट् च
५०८	अदेस्त्रिनिश्च
४५७	अनिहृषिभ्यां
३३२	अनुङ् नषेश्च
९३	अन्दूदृम्भूजम्बूक
६४४	अन्ने च
५४५	अन्येभ्योऽपि
२५	अपदुःसुषु स्थ
५३८	अब्दादयश्च
६०३	अमिचिमिदिश
१७३	अमितम्योर्दी
३८५	अमिनक्षियजि
४९९	अमेरतिः
४६	अमेर्दीर्घश्च
६१३	अमेर्ह्रिषति चि
६५२	अमेर्हुक्च
७३८	अमेस्तुट् च
६९९	अमेस्सन्
४६९	अम्बरीषः
२६५	अर्चिशुचिहुसृ
२७	अर्जिदृशिकम्य
४६८	अर्जेर्नुज च
३३८	अर्जेर्णिलुक्
४४१	अर्तिकमिभ्रमि
४३२	अर्तिगृभ्यां भन्
२७४	अर्तिपृवपियजि
२५९	अर्तिसृधृधम्य
१३७	अर्तिस्तुसुहुः
२०९	अर्तेः किदिच्च
६९५	अर्तेः क्युरुच्च
५१९	अर्तेररुः
६३४	अर्तेरुच्च
४८४	अर्तेरूच्च
२४५	अर्तेर्गुणः शुट् च
३८२	अर्तेर्नित्च
१६५	अर्तेर्नेरि
३४०	अर्तेश्च
६८५	अर्तेश्च
७१	अर्तेश्च तुः
१७५	अर्दर्वीर्घश्च
७३१	अर्भकपृथुक
४६५	अलीकाद्यश्च
१३९	अवतेष्टिलोपश्च
७३२	अवद्यावमाधमा
४३८	अवितृस्तृतन्त्रि
४९	अविमहोष्टिषच्
१४१	अविसिविसिशुं
१६०	अवे भृञः
६१२	अशिम्राद्भ्य इ
१७२	अशिपणाभ्योरु
५८६	अशिशकिभ्यां
१४९	अशूप्रुषिलटिक
३५०	अशेः सरः
२३३	अशेरश च
५२	अशोर्णित्
३४९	अशोर्देवेन
६३०	अशोर्देवेन युट् च
४३६	अशोर्नित्
३३७	अशोर्लशश्च
४८६	अश्नोते रश्च
७३५	अश्नोतेराशु
७०७	अश्ववादयश्च
४३४	असिसञ्जिभ्या
४२	असेरुरन्
	आ
४४७	आङि णित्
२०३	आङि पणिपनि
२६०	आङि शुषेः सन
५७७	आङि श्रिहनि
३३	आङ्परयोः ख
३६३	आणको लूधू
८०	आतृकन्वृद्धिश्च
३६२	आनकःशीङ्भि
६४७	आपः कर्माख्या
७४	आप्नोतेर्हस्वश्च
२१६	आप्नोतेर्हस्वश्च
६१४	आः समिण्निक
	इ
५५९	इगुपधात् कित

६३७ इण आगसि
६५१ इण आगोऽपरा
६६१ इण आसिः
४३३ इणः कित्
४२९ इणस्तशन्तशसु
३२३ इण्भीकापाश
१५० इण्शीभ्यां वन्
२८२ इणिसञ्जिदीङु
५९६ इन्देःकमिर्नलोप
५१ इषिमदिमुदिखि
१४२ इषियुधीन्धिद
४३७ इषेः क्सुः
४२८ इष्यशिभ्यां तक

ई

१३ ईषेः किच्च
४६१ ईषेः किद्ध्रस्वश्च

उ

१९७ उदकं च
६४३ उदके थुट् च
६३६ उदके नुट् च
६४९ उदके नुम्भौ च
६९० उदि चेर्डैसिः
६९७ उदि इणातेर
५२८ उद्योतेश्चित्
३४८ उन्दिगुधिकुषि
१२ उन्देरिच्चादेः
२३४ उन्देर्नलोपश्च
३९६ उपसर्गे वसेः
६३१ उडजेर्बले बलोप
४८१ उलूकादयश्च
५३५ उल्वादयश्च
३६४ उल्मुकदविहो
४३३ उषः कित्
१६१ उषिकुषिगर्ति
६०१ उषिखनिभ्यां

ऊ

७१८ ऊजि इणाते
७२५ ऊर्णोतेर्डः
३० ऊर्णोतेर्नुलोपश्च

ऋ

४११ ऋच्छेररः
७२९ ऋजेः कीकन्
४६२ ऋजेश्च
१८६ ऋज्रेन्द्राग्रवज्र
२४४ ऋञ्जिवृधिमन्दि
४४२ ऋतन्यञ्जिवन्य
९२ ऋतेरञ्च
४०३ ऋषिवृषिभ्यां
३४७ ऋषेर्जातौ
५१३ ऋहनिभ्यामूषन्

ए

२७५ एतेर्णिच्च
१३० एतेस्तुट् च
७८ एधिवद्योश्चतुः

क

४१७ कञ्जिमृजिभ्यां
३९७ कटिकुषिभ्यां का
६४ कठिचकिभ्यामो
१०३ कणेष्टः
५२३ कदेर्णित्पक्षिणि
१५४ कनिन्युवृषितक्षि
३३१ कन्युच्छिपेश्च
४२४ कपश्चाक्रवर्मण
६६ कपिगडिगण्डिक
६२ कवेरोतश्च
७२ कमिमनिजनिगा
४१८ कमेः किदुच्चोप
५५ कमेः पश्च
१०० कमेरठः
४४५ कलंश्च
१०४ कलस्तृपश्च
५२४ कल्किर्घोरमः
७०४ कल्गिगलिभ्यां
४७२ कशेर्मुट् च
४५६ कषिदूषिभ्यामी
८४ कषेश्छश्च
५९७ कायतेर्डिमिः
५० किलेर्बुक् च
६५ किशोरादयश्च
४ किंजरयोः श्रिण
५२० कुटः किच्च
५८३ कुडिकम्प्योर्नलो
६२६ कुडिकुषिभ्यां
५२५ कुणिपुल्योः किं
५२६ कुपेर्वा वश्च
५९ कुम्बेर्नलोपश्च
३०७ कुयुभ्यां च
२२ कुर्भ्रश्च
४१३ कुवः क्रन्
५३१ कुवश्चट् दीर्घश्च
६२७ कुषेर्लश्च
५४६ कुसेरुम्भोमेदेताः
५२२ कृकदिकडिकटि
६ कृके वचः कश्च
२४ कृग्रोरुच्च
४७३ कृज उच्च
५६८ कृज उदीचां
७७ कृजः क्रतुः
७२३ कृजः पासः
७१३ कृजादिभ्यः सं
७२७ कृतिभिदिलति
१६ कृतेराद्यन्तविप
३८९ कृतेर्नुम् च
१७८ कृतेश्छः क्रू च
२९७ कृत्यशूभ्यां
७१९ कृदरादयश्च
३२० कृदाधाराचिक
३५३ कृधूमदिभ्यः
१ कृवापाजिमिस्व
३९६ कृविधृष्विछवि
८१ कृषिचमितनि
२६१ कृषेरादेश्च
२८४ कृषेर्वर्णे
१९६ कृषेर्वृद्धिश्चोदी
५६६ कृषेर्वृद्धिश्छन्द
३१० कृहनिभ्यां
१५८ कृहृभ्यामेणुः
१५३ कृगृशृदृभ्यो वः
५८२ कृगृशृपृकुटि
२७९ कृगृशृवृङ्क्षतिभ्यः
६२४ कृतृकृपिभ्यः की
४६६ कृतृभ्यामीषन्
२३९ कृपृघृजिमन्दि
२९० कृभृजसिद्रुप
३३३ कृभृदारिभ्य उ
४७० कृशृपृकटिपटि
४०२ कृशृशलिकलि
८८ केश्च एरङ् चास्य
५९४ कोररन्
७२१ क्रमिगमिक्षमि
५३१ क्रिमितमिश
२०२ क्रिय इकन्
१११ क्ष्मिशेरन्लो
७३४ क्ष्मिशेरीच्चोप

४२३ क्रमेः सम्प्रसा
११२ क्रादिभ्यः कित्
२१५ क्विब्वचिप्रच्छि
१९० क्षुनूक्षिल्पि
७४३ क्षमेरुपधालोप
२६४ क्षिपेः किच्च
३३५ क्षुधिपिशिभि
ख
४५३ खजेराकः
५७९ खनिकष्यज्यसि
३६ खरुशङ्कुपीयु
५३० खर्जिपिञ्जादिभ्य
३९२ खलतिः
३०८ खष्पशिल्पशष्प
ग
४१५ गडेः कड च
३८६ गडेरादेश्च कः
५१८ गडेश्च
१२४ गणशकुनौ
६६६ गतिकारकोप
१२० गन्गम्यद्योः
४७५ गभीरगम्भीरौ
६०८ गमेरा च
४४६ गमेरिनिः
२३५ गमेर्गश्च
२२५ गमेर्डोः
३११ गमेः सन्वच्च
२१२ गर्वेरत उच्च
१६७ गश्वोदि
२९६ गादाभ्यामि
५९५ गिर उडच्
६०६ गुधवीपचिव
६८० गुधेरूमः
५६ गुपादिभ्यः कित्
३४९ गृधिपण्योर्दकौ
१४० ग्रसेरा च
७४५ ग्रहेरनिः
१४७ ग्रीष्मः
९९ ग्रो मुट् च
२२२ ग्लानुदिभ्यां
घ
१४६ घर्मः
४७४ घसेः किच्च ह
४९२ घृणिपृश्निपा
च
१७१ चकिरम्योरुच्चो
२७६ चक्षेः शिच्च
६७२ चक्षेर्बहुलंशिच्च
४५८ चक्रूणः कक्रूणश्च
७३६ चतेरुरन्
६२८ चन्देरादेश्च छः
६६७ चन्द्रे मो डित्
६११ चर्देर्वृत्ते
७४७ चरेश्च
७३ चायः किः
६३९ चायतेरन्ते ह्रस्व
२२० चिक्च
६१५ चितेः कणःकश्च
७१४ चीकयतेराद्य
१०८ चुपेरुपधायाः
३०४ च्युवः किच्च
२२३ च्विरव्ययम्
छ
२ छन्दसीणः
२४३ छन्दस्यसानच्
१२१ छापूखडिभ्यः
२८१ ष्टित्वरच्छत्वर
११० छो गुग्घस्वश्च
ज
५४२ जत्रवादयश्च
५६६ जनिघसिभ्या
५४४ जनिदाच्युसृवृ
५८८ जनिमृङ्भ्यामि
७१६ जनेररष्ट च
२७२ जनेरुसिः
५५० जनेर्यक्
७०८ जनेष्टन् लोपश्च
७२४ जनेस्तु रश्च
२३१ जसिसहोरुरिन्
१९२ जहातेर्ढे च
३१६ जहातेर्ढेऽन्तलो
१३८ जहातेः सन्वदा
७२७ जीर्यतेः क्रिन्न
७९ जीवेरातुः
४०६ जृविशिभ्यांम्नच्
१६३ जृवृभ्यामूथन्
४९४ जृशृस्तृजागृभ्यः
३७१ जेर्मुट् चोदात्तः
१८१ जोरी च
ञ
१११ ञमन्ताड्डः
ड
६६८ टित्खनेर्मुट् स
ण
८५ णित्कसिपत्यर्तेः
त
३६८ तनिमृङ्भ्यां किं
२२१ तनोतेरनश्च वः
७३० तनोतेर्डटःसन्व
३५५ तन्यृषिभ्यां
११५ तमिविशिबि
७४४ तरतेर्ड्रिः
११७ तरत्यादिभ्यश्च
२११ तलिपुलिभ्यां च
४८ तवेर्णिद्वा
१८ ताडेर्णिलुक्च
२९८ तिजेर्दोर्धश्च
१६९ तिथपृष्ठगूथयूथ
४११ तुषारादयश्च
३३९ तृगाख्यायां
२५० तृन्नृचौ शंसि
२९२ तृषिशुधिरसि
६८६ तृहेः क्नो हलो
४०८ तृभूवहिवसिभा
१२९ त्यजितनियजि
८९ त्रो टुट् च
९ त्रो रश्च लः
३३४ त्रो रश्च लो वा
द
७२६ दधातेर्यन्नुट् च
६७४ दमेरुनसिः
२२७ दमेर्डोसि
९० दरिद्रातेर्यालोप
४८७ दल्मि
६८९ दशेश्च
६८८ दंसेष्टनौ
७३९ दहेर्गा लोपो
६०९ दाद्यिभ्यश्छन्दसि
३१२ दाभाभ्यां नुः
३७७ दिधिषाद्यः
४०१ दिवः कित्
२५६ दिवेर्कः

६०० दिवेर्युच्च
४६ दिवो द्वे दीर्घश्च
४२० दीङो नुट् च
३७० दुतनिभ्यां दीर्घ
१७७ दुरीगो लोपश्च
१२८ दृगातेःघुरभ्रस्वश्च
६२३ दृगातेर्ह्रस्वश्च
३ हसनिजनिचरि
४३१ दृदलिभ्यां भः
६५४ देशे ह च
२६७ द्युतेरिसिञ्चोदश्च
२०८ द्रुदक्षिभ्यामिनन्

ध

६ धान्ये नित्
२८६ धापृवस्यज्यति
२४० धृषेर्धिषच्च
२६१ धेट इच्च
३१४ धेट इच्च
१६३ ध्मो धम च
५५४ ध्याप्योः सम्प्र

न

२५५ नञि च नन्देः
१५३ नञि जहातेः
८७ नञि लम्बेर्नलो
४९ नञि व्यधेः
६६३ नञि हन एह च
२६७ नन्यपि ह्रुट् च
२५२ नप्तृनेष्टृत्वष्टृ
२५७ नयतेर्डिच्च
६५० नहेर्दिवि भश्च
७०१ नहेर्हलोपश्च
५६५ नहो भश्च
५६० नामन्सीमन्व्यो
१७ नावन्ध्वेः
१७४ निन्देर्नलोपश्च
४८३ नियो मिः
१६६ निशीथगोपीथा
६६५ नुवो धुट् च
६१ नृतिशृध्योः कूः
६६१ नौ दीर्घश्च
५७५ नौ व्यो यलोपः
५२७ नौ षञ्जेर्घथिन्
३२५ नौ सदेर्डिच्च
२८० नौ सदेः
३२४ नौ हः

प

७० पः किच्च
४७७ पच एलिमन्
१८८ पचिनशोर्णुकन्क
७१५ पचिमन्योरिच्चो
६५९ पचिवचिभ्यां
२२८ पणेरिज्यादेश्चवः
४५२ पतस्थ च
५८ पतिकठिकुठिगडि
११४ पतिचण्डिभ्याम
११६ पतेरङ्कपक्षिणि
५०६ पतेरत्रिन्
३५४ पते रश्च लः
६२२ पदिप्रथिभ्यांनित्
६६६ पयसि च
४५० परमे कित्
२१७ परौव्रजेवःपदान्ते
३८३ पर्जन्यः
३६० पर्देर्निरसंप्रसार
१६४ पाघ्राध्मास्थाम्नादृदृपत्यदृशदृगृ
६८३ पातेरतिः
४१७ पातेर्डतिः
६१७ पातेर्डुम्सुन्
६९२ पातेर्बले जुट् च
५७१ पादे च
३०३ पानीविभ्यःपः
१३३ पारयतेरजिः
४४५ पिनाकादयश्च
२७१ पिबतेरुक्
३७५ पिशेः किच्च
५१६ पीयेरूषन्
५१४ पुरः कुषन्
६७० पुरसि च
६७१ पुरूरवाः
६०४ पुवो ह्रस्वश्च
४४४ पुषः कित्
६६३ पूञो यण्गुणह्रस्व
३९१ पृषिरञ्जिभ्यांकित्
५१५ पृनहिकलिभ्य
२३ पृभिदिव्याधिगृ
५५६ प्र ईरशदोरक्तुट् च
२८ प्रथिम्रदिभ्रस्जां
७४६ प्रयेरमच्
१३४ प्रयेः किरत्सम्प्र
१४८ प्रयेः षिवन्त्सम्प्र
१९१ प्राङि पणिकवः
७३७ प्रा (प्रे) ततेररन्
३५६ प्रीयुकणिभ्यां
४४१ प्रे स्थः
५७४ प्रे हरतेः कूपे
४३५ प्लुषिकुषिशुषि०
३४३ प्लुशेरवोपधायाः

फ

४६० फर्फरीकादयश्च
११८ फलिपाटिनमिम
७१२ फलेरितजादेश्च
३३६ फलेर्गुक् च
२८३ फेनमीनौ

ब

२८५ बन्धेर्भ्रिबुधौ च
४५४ बलाकादयश्च
१८० बहुलमन्यत्रापि
१९५ बहुलमन्यत्रापि
२०७ बहुलमन्यत्रापि
२३६ बहुलमन्यत्रापि
२५१ बहुलमन्यत्रापि
२७८ बहुलमन्यत्रापि
११८ बिडादिभ्यःकित्
२६६ बृहेर्नलोपश्च
५८५ बृहेर्नोऽच्च

भ

४१० भन्देर्नलोपश्च
६३ भातेर्डवतुः
१८६ भियः क्रुकन्
१३५ भियः घुरभ्रस्व
१४५ भियः घुरवा
३०१ भुजिमृड्भ्यां
५८१ भुजेः किच्च
४४८ भुवश्च
२६९ भुवः किन्
४८५ भुवः कित्
३३० भुवो ज्झिच्च
६५६ भूरञ्जिभ्यां
६१० भूवादिगृभ्यो
२३८ भूसूधृञ्जिञ्जि
२३० भृञ उरच्च
१२२ भृञः किन्नुट्
३९४ भृमृशिभ्यां
३१० भृमृदृशियजि

७ भृमृशीतृचरि
५२६ भ्रमेश्च डुः
५६० भ्रमेः सम्प्रसा
५६९ भ्रस्जिगमिनमि

म

७४८ मङ्गेरलच्
४१ मद्गुरादयश्च
५६२ मनेरुच्च
३४४ मनेर्दीर्घश्च
७३ मनेर्धरुछन्दसि
४२१ मन्थः
३८ मन्दिवाशिमथि
२८ भ्रंश्यतेर्थलोपो
६८१ मसेरूरन्
४३ मसेश्च
५१७ मस्जेर्नुम् च
३१ महति ह्रस्वश्च
२१४ महेरिनण्च
७०३ माङ ऊखो मय्
५४९ माङ्हासिभ्यो
५७ मिथिलादयश्च
५६१ मियुने मनिः
६६२ मियुनेऽसिः
५४१ मिपिभ्यां रुः
६७ मीनातेरूरन्
४० मुकुरदर्दुरौ
१२५ मुदिप्रोर्गंगौ
२०० मुषेर्दीर्घश्च
२७७ मुहेः किच्च
७०० मुहेः खो मूर्ध
६१ मूलेरादयः
५४८ मूंशस्यविभ्यः
५१० मृकणिभ्यामी
४७१ मृकणिभ्यामूकौ
३७ मृगय्वादयश्च
९४ मृग्रोरुतिः
८२ मृजेर्गुणश्च
१०७ मृजेष्टिलोपश्च
४६४ मृडः कीकवूक

य

३०० यजिमनिशुम्भि
२५४ यतेर्वृद्धि
४३६ यापोः किद्धे च
१४३ युजिरुचितिजां
२४७ युधिबुधिदृशि
१३६ युष्यसिभ्यां
२१ यो द्वे च

र

२३७ रञ्जेः क्युन्
६२९ रपेरत एच्च
२६ रपेरिच्चोपधायाः
१६१ रमे रश्च लो वा
५०३ रमेर्नित्
१०१ रमेर्वृद्धिश्च
६५३ रमेश्च
२१४ रमेस्त च
३८० राजेरन्यः
२२४ रातेर्डैः
५०७ राशदिभ्यां त्रिप
४०५ राशिवल्लिभ्यांच
२९५ रास्नासास्नास्थू
६३८ रिचेर्धने घिच्च
६१८ रुचिभुजिभ्यां
६२५ रुचिवचिकुचि
३६५ रुदिविदिभ्यां क्डि
५४३ रुशातिभ्यां क्नू
४०४ रुषेर्निरुलुष् च
४०७ रुहिनन्दिजीवि
३७४ रुहे रश्च लो वा
४७ रुहेर्वृद्धिश्च
२१३ रुहेश्च
६४८ रूपे जुट् च
१७१ रोदेर्णिलुक् च

ल

२८७ लषेरट् च
४४० लषेर्मुट् च
२६ लङ्घिबंद्योर्नलोप
१३२ लङ्घेर्नलोपश्च
७३३ लीरीङोर्ह्रस्वः
३७२ लोष्टपलितौ

व

५०६ वङ्क्रयादयश्च
७१७ वचिमनिभ्यांचि
३१३ वचेर्गश्च
३८४ वदेरान्यः
२८८ वनेरिच्चोपधायाः
४०० वयश्च
६६८ वयसि धाञः
५६३ वर्णेर्बलिश्चाहिर
२४१ वर्तमाने पृषद्बृ
५३९ वलिमलितनिभ्यः
४८० वलेरूकः
१९ वलेर्गुक् च
६७८ वशेः कनसिः
२२६ वशेः कित्
४७१ वशेः कित्
५६४ वसिवपियजिरा
६५७ वसेर्णित्
३५१ वसेश्च
६१६ वसेस्तिः
७५ वसेस्तुन्
२६८ वसौ रुचेः संज्ञा
३९६ वहियुभ्यांणित्
५०० वहिवस्यर्तिभ्य
४६१ वहिश्रिश्रुयुद्रुस्रु
६६० वहिहाधाभ्य
८३ वहो धश्च
४४१ वातप्रमीः
५७३ वातेर्डिच्च
६८४ वातेर्नित्
१८४ वाविन्धेः
४२५ विटपपिष्टपविभि
६७७ विदिभुजिभ्यां
६६४ विधाञो वेध च
४७६ विषाविहा
३१९ विषेः किच्च
४८८ वीज्याज्वरिभ्य
४३० वीपतिभ्यां तकन्
६४० वृङ्शीङ्भ्यां
२०५ वृजेः किच्च
३७८ वृञ एण्यः
३८७ वृञश्चित्
६८७ वृञ्लुटितनि
३५६ वृतेर्वृद्धिश्च
२६३ वृतेश्च
५८० वृतेश्छन्दसि
४२६ वृतेस्तिकन्
४६३ वृदभ्यां विन्
१८५ वृधिवपिभ्यां रन्
१९८ वृश्चिकृञ्भ्यो कि
१६६ वृषादिभ्यश्चित्
५४० वृहोः घुरदुकौ च
३४२ वृतृवदिहनिकमि
५८९ वेञः सर्वत्र
३६८ वेञस्तुट् च

५१२ वेञो डिच्च
२१० वेपितुह्योर्हस्वश्च
१७२ वौ कसेः
६२१ वौ तसेः
३१ व्यथेःसम्प्रसारणं
७४१ व्याङि घ्रातेश्च
६३५ व्याधौ शुट् च

श

२० शः कित्सन्वच्च
५२१ शकादिभ्वोऽटन्
१०१ शकिशम्योर्नित्
३२९ शकेरुनोन्तो
४९८ शकेर्ऋंतिन्
३५ शते च
६० शदेस्त च
१०५ शपेर्बश्च
११ शमेर्दः
५३४ शमेर्बन्
१०२ शमेः खः
४८२ शलिमण्डिभ्या
४४ शावशेराशौ
५३७ शाशपिभ्यां
४७८ शीङो धुक्कलल
७०२ शीङोहस्वश्च
५५३ शीङ्कुशिरुहि
३९३ शीङ्शपिरुगमिव
३२२ शुकवल्कोल्काः
१७६ शुचेर्दश्च
१८३ शुसिचिमीनां
४१६ शृङ्गारभृङ्गारौ
१२३ शृणातेर्ह्रस्वश्च
१२७ शृदृभसोऽदिः
४६७ शॄपृभ्यां किच्च
४५१ शॄपॄवृञां ह्रे
३८१ शॄस्रंभ्योश्च
१० शॄस्वृनिहिम्र
१५२ शेवयह्वजिह्वा
७०६ श्मनि श्रयते
२०४ श्यास्त्याह्वञ
४४३ श्रः करन्
५६७ श्रः शकुनौ
६३३ श्रयतेः स्वाङ्गे
३७६ श्रुदक्षिस्पृहि
२९९शिलपेरच्चोपधा
३२ शिलषेः कश्च
१५७ श्वन्नुक्षन्पूषन्
५११ श्वयतेश्चित्
२४९ श्विवतेर्दश्च
६३२ श्वेःसम्प्रसारणं

स

३५२ संपूर्वाच्चित्
२४२ संश्चत्तृपद्वेहत्
१५५ सप्त्यशूभ्यां तुट्
५७६ समाने ख्यः स
१८७ समिकसउकन्
१६८ समीणः
५३२ समीणः
२४६ सम्यानच्स्तुवः
१३१ सर्तेरटिः
४२१ सर्तेरपः षुक्च
६७६ सर्तेरप्पूर्वादसिः
३०२ सर्तेरयुः
५२९ सर्तेर्णिच्च
१६२ सर्तेर्णित्
३५८ सर्तेर्दुक्च
४६३ सर्तेर्नुक्च
५९८ सर्वधातुभ्यः ष्ट्रन्
५५७ सर्वधातुभ्यइन्
५८४ सर्वधातुभ्यो म
६२८ सर्वधातुभ्योऽसु
१५१ सर्वनिवृष्वरि
५४ सलिकल्यनिम
२५८ सव्ये स्थश्छन्द
२७० सहो धश्च
५९२ सातिभ्यांमनिन्
५४७ सानसिवर्णसिप
६२० सावसेः
७४० सिचेः संज्ञायाम्
६६ सितनिगमिमसि
६०२ सिविमुच्योष्टेरू
५३३ सिवेष्टेरू च
२८९ सिवेष्टर्यूं च
२९३ सुञो दीर्घश्च
२९३ सुष्यसेर्ऋन्
२३२ सुयुरुवृञो युच्
३१५ सुवः कित्
३८८ सुविदेः कत्रः
३०६ सुशॄभ्यां निच्च
१८२ सुसूधागृधिभ्यः
५०४ सूङः क्रिः
६१६ सूचेः स्मन्
१५ सृजेरसुम्च
३६१ सृयुवचिभ्यो
११९ सृवृभोर्ग्रहिश्च
३२१ सृवृभूशुषि
४८९ सृवृषिभ्यां कित्
६९२ सौ रमेः क्तो दमे
१४ स्कन्देः सलोपश्च
६४६ स्कन्देश्च स्वाङ्गे
३०९ स्तनिहृषिपुषिगि
३७९ स्तुवः क्सेरयश्च
३०५ स्तुवो दीर्घश्च
६०५ स्थायतेर्ड्रट्
६८२ स्थः किच्च
५३६ स्थः स्तोऽम्बजब
११३ स्थाचतिमृजेराल
३१७ स्थो णुः
५९२ स्नामदिपद्यति
३४६ स्नुव्रश्रिवृत्यषि
७०५ स्पृशोः श्वशुनौ
१७० स्फायितञ्चिव
६८ स्यन्देः सम्प्रसा
११ स्यन्देः सम्प्रसा
३२६ स्यमेरीट् च
२०१ स्यमेः सम्प्रसा
६९४ स्रंसेः शिः कुट्
६४१ स्रुरीभ्यां तुट् च
२१९ स्रुवः कः

ह

१५१ हनिकुषिनीरमि
५९३ हनिमशिभ्यां सि
१९४ हनो वध च
७४२ हन्तेरच् घुर च।
५०२ हन्तेरंह च
४०९ हन्तेर्मुट् हि च
७२० हन्तेर्युन्नाद्य
१४४ हन्तेर्हि च
७१० हन्तेःशरीरावयवे
३४ हरिमितयोर्दुवं
७२२ हर्यतेः कन्यङि
३६६ हसिमृग्रिण्वामि
६९६ हिंसेरीरन्नीरचौ
६०७ हुयामाश्रुभसि
२४८ हुर्छेः सनो लुक

वचने हेः ८।२।६३॥ प्लुतः। अकार्षीः कटम्। अकार्षं हि ३। अकार्षं हि। पृष्टेति किम्। कटं करिष्यति हि। हेः किम्। कटं करोति ननु। **३६१३ निगृह्यानुयोगे च** ८।२।६४॥ अत्र यद्वाक्यं तस्य टेः प्लुतो वा। अथामावास्येत्याह ३। अमावास्येत्येवं वादिनं युक्त्या स्वमतात्प्रच्याव्य एवमनुप्रयुज्यते। **३६१४ आम्रेडितं भर्त्सने** ८।२।६५॥ दस्यो ३ दस्यो ३ घातयिष्यामि त्वाम्। आम्रेडितग्रहणं द्विरुक्तोपलक्षणम्। चौर ३ चौर ३। **३६१५ अङ्गयुक्तं तिङाकाङ्क्षम्** ८।२।६६॥ अङ्गेत्यनेन युक्तं तिङन्तं प्लवते। अङ्ग कूज ३ इदानीं ज्ञास्यसि जाल्म। तिङ् किम्। अङ्ग देवदत्त मिथ्या वदसि। आकाङ्क्षं किम्। अङ्ग, पच। नैतदपरमाकाङ्क्षति। भर्त्सन इत्येव। अङ्गाधीष्व भक्तं तव दास्यामि। **३६१६ विचार्यमाणानाम्** ८।२।६७॥ वाक्यानां टेः प्लुतः। होतव्यं दीक्षितस्य गृहा ३ इ। न होतव्य ३मिति। होतव्यं न होतव्यमिति विचार्यते। प्रमाणैर्वस्तुतत्त्वपरीक्षणं विचारः। **३६१७ पूर्वं तु भाषायाम्** ८।२।६८॥ विचार्यमाणानां पूर्वमेव प्लवते। अहिर्नु ३ रज्जुर्नु ३। प्रयोगापेक्षं पूर्वत्वम्। भाषाग्रहणात्पूर्वयोगश्छन्दसीति ज्ञायते। **३६१८ प्रतिश्रवणे च** ८।

भवति। निगृह्य। 'निगृह्ये'ति ल्यबन्तम्। स्वमतात्प्रच्यवनं निग्रहः तस्यैव स्वमतस्य 'एवं किल त्वं निरुपपत्तिकमात्थे'ति शब्देन प्रतिपादनमनुयोगः, तत्र यद्वाक्यं तदाह—अत्र यद्वाक्यमिति। निगृह्यानुयोगे यद्वाक्यमित्यर्थः। 'अथामावास्येत्याथेवं केनचित्प्रतिज्ञातं तमुपपत्तिभिर्निगृह्य साऽभ्यसूयमनुयुक्ते। अथामावास्येत्याथेति। तदेव विवृणोति अमावास्येत्येवमित्यादि। दस्यो ३ दस्यो ३ इति। 'वाक्यादेरामन्त्रितस्य' इत्यादिना द्विर्वचनम्। ननु द्विरुक्तसमुदाये परभागस्यैव प्लुतः प्राप्नोति, न तु पूर्वस्य 'तस्य परमाम्रेडितम्' इति परभागस्यैवाम्रेडितसंज्ञा विधानात्, इष्यते चोभयोरपीत्याह—आम्रेडितग्रहणमित्यादि। द्विरुक्तोपलक्षणार्थमिति। द्विरुक्तसमुदाये भागद्वयोपलक्षणमित्यर्थः। एतच्चाम्रेडितस्य भर्त्सने वृत्यसम्भवाल्लभ्यते। अङ्गयुक्तम्। आकाङ्क्षतीत्याकाङ्क्षं पचाद्यच्। तिङन्तमिति। आकाङ्क्षं तिङन्तमित्यर्थः। अङ्ग कूज ३ इति। अङ्गशब्दोऽमर्षे। कूज अव्यक्ते शब्दे। लोण् मध्यमपुरुषैकवचनम्। शास्यसि जाल्मेति। कूजनफलमस्मिन्नेव क्षणे ज्ञास्यसीत्यर्थः। अङ्ग देवदत्तेति। अङ्गशब्दोऽनुनये। 'अङ्ग देवदत्ते'त्येकं वाक्यम्। एतच्च मिथ्या वदस्येतदपेक्षते। विचार्यमाणानाम्। 'कोटिद्वयस्पृग्विज्ञानं विचार इति कथ्यते। विचार्यमाणस्तज्ज्ञानविषयीभूत उच्यते।' इह तु विचार्यमाणविषयत्वाद्वाक्यानि विचार्यमाणानि। गृहा ३ इति। सप्तम्येकवचनान्तस्य गृहे इत्यस्य 'एचोऽप्रगृह्यस्ये'ति प्लुतविकारः। पूर्वं तु। पूर्वमेव सिद्धे नियमार्थमिदम्। तुशब्दस्त्वर्थस्तोऽवधारणार्थः। यदेवं विज्ञायेत 'पूर्वमेव प्लुत' इति

परीक्षोपयोगी सरल संस्कृत हिन्दी टीकाओं से
सुसज्जित सभी प्रान्तके परीक्षापाठ्य निर्द्धा-
रित ग्रन्थ तथा प्राचीन से प्राचीन
संस्कृत ग्रन्थ मिलने का एक मात्र
जगत प्रसिद्ध प्राचीनतम
स्थान—
जयकृष्णदास-हरिदास गुप्त
चौखम्बा संस्कृत सीरिज आफिस,
विद्याविलास प्रेस, बनारस।